काशीविद्यासुधानिधिः

श्रीगणेशाय नमः

श्रीमद्विजयिनीदेवीपाठशालोदयोदितः । प्राच्यप्रतीच्यवाक्पूर्वापरपक्षद्वयान्वितः ॥ १ ॥
अङ्कुरश्मिः स्फुटयतु काशीविद्यासुधानिधिः । प्राचीनार्यजनप्रज्ञाविलासकुमुदोत्करान् ॥ २ ॥

THE PANDIT.

A Monthly Journal, of the Benares College, devoted to Sanskrit Literature.

No. 73. Benares, June 1st, 1872. Vol. VII.

॥ चिन्तामणेः शब्दखण्डम् ॥

अत्रोच्यते । गकारादिव्यक्तयो नैकैकाः । (१) अस्ति हि शुकसारिकामनुष्यप्रभवेषु स्त्रीपुंसतद्विशेषप्रभवेषु गकारादिषु स्फुटतरवैलक्षण्यात्स्वरूपतो भेदप्रथा इक्षुक्षीरादिमाधुर्यवत् । न चेयमौपाधिकी भेदप्रतीतिः, (२) नहि विदितकुङ्कुमस्य (३) कुङ्कुमारुणा तरुणीति प्रतीतिवत् स्त्रीपुंसप्रभवत्वमानुभविकमुपाधिः । इन्द्रियासन्निकर्षेण स्त्रीपुंसादिभेदमविदुषोऽपि भेदप्रत्ययात् । यतो ऽनुमापयन्ति शुकशब्दो ऽयं स्त्रीशब्दो ऽयमित्यादि । अन्यथा ऽन्योन्याश्रयात् । तत्प्रभवत्वे ज्ञाते भेदप्रत्ययः । तस्माच्च तदनुमानमिति । (४) न च कृपाणान्वयव्यतिरेकानुविधानात् कृपाणे मुखदीर्घत्ववदौपपत्तिकमौपाधिकत्वम् । अन्यानुविधानाभावात् । अथ व्यञ्जकवायोरेव वैलक्षण्यं शुकादिगकारगतत्वेन भासते, वायोरुपलब्धिस्तेनैव रूपेणेति चेत्, न । गकारगतत्वे बाधकाभावात् । न चाभेदप्रत्यभिज्ञानं बाधकं, नहि य एव शुकशब्दस्स एव स्त्रीशब्द इति प्रत्यभिज्ञानम् । अन्यथा तेषु भेदज्ञानाभावाद्वक्तृविशेषानुमानं न स्यात् । न चाभिव्यञ्जकवायोरेव वैलक्षण्यं शुकाद्यनुमापकम् । तस्य गकारावृत्तित्वात् । (५) तत्र चारोपे ऽनुमिते भ्रान्तित्वात् । (६) तस्माद्यथा कृष्णा गौः शुक्ला गौरिति भेदे भासमाने गवाकारानुगतप्रतीतिर्गोत्वमालम्बते, तथा शुकादिगकारेषु भेदे भासमाने ऽयं गकारो ऽयमपि गकार इति बुद्धिर्गत्वमालम्बते (७) इति प्रत्य-

---

॥ शब्दचिन्तामणिव्याख्या रुचिदत्तीया ॥

प्रत्यभिज्ञान्यथासिद्ध्यर्थं गत्वजातिसिद्धये गकारनानात्वं साधयति । (१) अस्ति हीति । औपाधिकत्वमानुभविकमौपपत्तिकं वा, तत्राद्यमाशङ्क्य निराकरोति । (२) नहीति । (३) कुङ्कुमारुणेति । तथा च कुङ्कुमारुण्यवत् स्त्रीपुंसभेद एव तत्र भासते इत्यर्थः । द्वितीयमाशङ्क्य निराकरोति । (४) न चेति । कुङ्कुमेनारुणा न तु स्वभावत इत्यत्र कुङ्कुमस्योपाधित्वमनुभूयमानं कृपाणे तु तथात्वमन्वयव्यतिरेकगम्यं न तु तद्वत् कृपाणदीर्घमुखमिति प्रत्यय इति भेदः । यद्वा यत्रोपाध्याश्रयसंबन्धेन तज्ज्ञानात्तथा धीस्तत्रोपाधेरानुभविकत्वं यत्र तदाश्रयाद्यनुविधानमात्रं न संबन्धस्तत्रौपपत्तिकत्वमिति भेदः । (५) तत्र चारोप इति । यद्यपि कूटलिङ्गकानुमितिवद्विषयाबाधे साध्यांशे याथार्थ्यमप्रत्यूहमेव, गकारे शुकप्रभवत्वाद्यनुमितेर्भ्रान्तत्वापादने गकारनित्यतावादिन इष्टापत्तिश्च, तथापि प्रमात्वसंभवे भ्रमत्वं न कल्प्यते, प्रत्यभिज्ञाया अपि गत्वाभेदविषयतया प्रमात्वमेवोपपाद्यमिति भावः । तदेवोपसंहारव्याजेनाह । (६) तस्मादिति । (७) इतीति । हेतौ, यत उक्तानुगतप्रतीत्या गत्वसिद्धिरतस्तदभेदविषयतया प्रत्यभिज्ञोपपद्यत इत्यर्थः । प्रत्यभिज्ञापदमनुगतप्रतीतिपरमित्यन्ये । नतु वर्णवैलक्षण्यं न शुकप्रभवत्वाद्यनुमापकं किं तु ध्वनिगतमेव तत्तथा, तथा च तादृशध्वनिसाहित्यमेव वर्णस्यापि

भिन्नाभेदप्रथा चोपद्यते । (८) किं च गत्वादिकं यदि न जातिस्तदा कोलाहलप्रत्ययो न स्यात् । तथाहि । नगरादौ बहुभिर्वर्णानामेकदोच्चारणे (९) दूरस्थेनानभिव्यक्तगकारादिवर्णविभागं कोलाहलमात्रं श्रूयते । (१०) न च तत्र वर्णान्यस्य ध्वनिरूपस्य शब्दस्य श्रुतिः संभवति । (११) तदभिव्यञ्जकभेरीताडनादेरभावात् । न च वर्णाभिव्यञ्जका एव ध्वनिव्यञ्जकाः, सन्निधानेऽपि श्रूयमाणवर्णे तच्छ्रवणप्रसङ्गात् । न च वर्णाभिव्यञ्जकवायुभिरेव दूरे ध्वनिमात्रमभिव्यज्यते । कव्यञ्जकस्य गव्यञ्जनइव वर्णव्यञ्जकस्य ध्वनिव्यञ्जने ऽसामर्थ्यात् तत्समर्थशङ्खादेरभावाच्च । न च तत्र शब्दत्वमेव प्रतीयते न शब्दः । व्यक्त्यग्रहे जात्यग्रहात् । (१२) न चाभिव्यञ्जको वायुरेव कोलाहलत्वेन प्रतीयते, शब्दत्वेन प्रत्ययात् (१३) सन्निधावपि तथाप्रत्ययप्रसङ्गाच्च । गकारादिग्रहेऽपि तेषां परस्परं (१४) भेदाग्रहात् कोलाहलधीरिति चेत्,न । (१५) तेषु वैधर्म्याभावात्, (१६) तदभावे ऽन्योन्याभावस्याभावात्, (१७) स्वरूपस्य ग्रहणात् । समीपे बहुगकारेषु (१८) भेदाभावेन (१९) तदग्रहे कोलाहलधीप्रसङ्गाच्च । अनेकवर्णोच्चारणस्य तद्धेतुत्वे (२०) दूरेऽपि तदप्रतीत्यापत्तेः । तस्मादवश्यं गत्वादि(२१)र्जातिरुपेया, यदग्रहणेऽपि गकारादिग्रहेऽपि कोलाहलबुद्धिव्यपदेशौ, (२२) अस्ति च शब्दस्य कोऽपि जातिविशेषः श्रोत्रग्राह्यः,यस्मा(२३)त्प्राच्यादिदेशविशिष्ट(२४)शङ्खप्रभवत्त्वमनुमीयते । अव्यपदेश्यत्वेऽपि इक्षुक्षीरादिमाधुर्यावान्तरवत्तत्सत्त्वात् । अन्यथा दिग्देशविशिष्टशङ्खादीनां ग्रहे श्रोत्रस्यासामर्थ्यात्तत्प्रतीतिर्नस्यादेव । तथापि गत्वादिना परापरभावानुपपत्त्या शुकादिगकारेषु न जातिविशेष इति चेत् । शुकककारादिषु कत्वादिव्याप्या जाति(२५)र्भिन्ना, (२६) तया प्रत्येकं शुकककारादिषु शुकप्रभवत्वमनुमाय तद्व्यवहारो न तु शुकककारादिष्वेका जातिरस्ति शुकप्रभवत्वानुमापिका तद्व्यवहारकारिका वा, गत्वादिना संकरप्रसङ्गात् । (२७) गत्वं तु न नाना, अननुगतत्वेन ततो ऽनुगतव्यवहारानुपपत्तेः ।

वैलक्षण्यमिति गकारभेदाभावाद् गत्वजातौ न मानं, तथा च न तथा प्रत्यभिज्ञान्यथासिद्धिरित्यरुचेर्गत्वजातेः साधकान्तरमाह । (८) किं चेति । तथा च गत्वजातिसिद्धौ गकारनानात्वमपि आवश्यकमिति भावः । (९) दूरस्थेनेति । यद्यपि स्वस्वश्रवणसमवेत एव शब्दो गृह्यते इति न ग्राहकस्य दूरस्थता; न वा दूरत्वं गत्वादिग्रहप्रतिबन्धकं, तथापि आद्यशब्दापेक्षया दूरत्वं बोध्यम् । अन्वयव्यतिरेकाभ्यां तद्दूरत्वमेव तद्ग्रहप्रतिबन्धकमिति भावः । ध्वनिविषयत्वेनान्यथासिद्धिमाशङ्क्य निराकरोति । (१०) न चेति । परमतेनैवाह । (११) तदभिव्यञ्जकेति । शब्दत्वजातिमभ्युपेत्य शङ्कते । (१२) न चेति । तदारोप्यतइत्यत आह । (१३) सन्निधावपीति । वस्तुतो वायुरतीन्द्रिय इति भावः । (१४) भेदाग्रहादिति । न तु गत्वाद्यग्रहादिति भावः । भेदो वैधर्म्यं वा ऽन्योन्याभावो वा स्वरूपं वा । आद्ये (१५) तेष्विति । यद्यप्युपाधिरूपमेव गत्वादिकं वैधर्म्यं संभवति तथापि तन्निर्वक्तुमशक्यम् । जातिरूपं च त्वया नाङ्गीक्रियते, गकारस्यैकत्वे ऽनुगतमत्यापि न.नुगतधर्मसिद्धिरिति भावः । द्वितीये (१६) तदिति । अन्योन्याभावस्य वैधर्म्यनिबन्धनत्वादिति भावः । अन्त्ये (१७) स्वरूपस्येति । (१८) भेदाभावेनेति । त्वन्मतइति शेषः । (१९) तदग्रहइति । तद्ग्रहे वान्यथाख्यात्यापत्तिरिति भावः । (२०) दूरेपीति । तत्र गकारस्यैक्येनानेकवर्णोच्चारणाभावादिति भावः । (२१) जातिरिति । अखण्डं पदार्थान्तरमप्रामाणिकमिति भावः । ननु यथा तारत्वव्यञ्जकस्यैव दूरे मन्दत्वव्यञ्जकत्वं तथा च वर्णव्यञ्जकस्यैव दूरे ध्वनिव्यञ्जकत्वमस्तु, यदि तस्यासामर्थ्यं तत्तदा तस्यापि तदापत्तेः । यदि चान्वयव्यतिरेकाभ्यां तत्र तथात्वं तदा प्रकृतेऽपि तुल्यमित्यत आह । (२२) अस्ति चेति । तद्गकारेऽपि तादृशजातिसिद्धौ तन्नानात्वे गत्वस्यापि सिद्धौ तदग्रहादेव कोलाहलबुद्धिसंभवेन तत्तत्कल्पनमिति भावः । (२३) प्राच्यादीति । यत्र देशे शब्द उत्पद्यते तद्देशप्रभवत्वमित्यर्थः । स च देशः कस्य चित्प्राची कस्य चिदन्यथा । तदैक्यात्तत्प्रयोज्या तत्प्रभवत्वानुमापिका जातिरप्येकैवेति तत एव तत्तद्दिग्वर्त्तिपुरुषाणां तत्र प्राच्यादिप्रभवत्वानुमानमिति भावः । एतेनैकस्यामेव शब्दव्यक्तौ तत्तद्दिक्प्रभवत्वानुमापिका दश जातयः स्युरित्याशङ्क्य एतज्जातिदशकाभ्युपगन्त्रा कदम्बगोलकन्यायेनैव शब्दोत्पत्तिस्वीकार इति कस्य चित्समाधानमपास्तम् । (२४) शङ्खेति । शङ्खेत्युपलक्षणं, पुरुषादिकं च बोध्यम् । शङ्खेति दृष्टान्तार्थमुक्तम् । ध्वनेरप्यनित्यत्वार्थमित्यन्ये । (२५) भिन्नेति । शुकादेरेकककाराद्युच्चारणमात्रमित्यत्र तु न प्रमाणम् । अन्ततो वीचीतरङ्गन्यायेनापि नानोत्पादादिति बोध्यम् । तन्नानात्वेऽपि तदनुमितेन शुकादिप्रभवत्वेनोपाधिनैवानुगतधीरित्याह । (२६) तयेति । ननु गत्वमेव शुकप्रभवत्वानुमापकैकजातिव्याप्यं नानास्त्वित्यत आह । (२७) गत्वं त्विति । सकलसाधारणशुकप्रभवत्वैकोपाधिवन्नानागत्वसाधारणैकध-

(२८) अत एव तारत्वमपि गत्वादिव्याप्यं नाना, न तु
गत्वमपि । तन्निश्चये ऽपि गत्वसंदेहश्च (२६) व्याप्य-
तावच्छेदकरूपानिश्चयात् । न चानुगतव्यवहारानुपपत्तिः ।
सजातीयसाक्षात्कारप्रतिबन्धकतावच्छेदकत्वेनानुगतेन ना-
नातारत्वेष्वनुगतव्यवहारसंभवात् । तदज्ञाने व्यवहारा-
सिद्धेः । तारत्वमन्दत्वे न जाती, (३०) सप्रतियोगिक-
त्वादिति चेत्,न । तारत्वतारतरत्वादय उत्कर्षरूपा
जातिविशेषा एव, (३१) तेचाश्रये गृह्यमाणा एव गृह्यन्ते
न तूत्कर्षावध्यपेक्षा,यथा मधुरतरत्वादय उत्कर्षव्यवहा-
रमितरसापेक्षाः कुर्वन्ति (३२) तथा मन्दत्वाद्यपेक्षया
तारत्वादिव्यवहारम् । (३३) उत्कर्षस्तु तज्जातिरूपा-
दन्यो ऽसंभावित एव । (३४) गकारे तु नैवम्, (३५)
अनन्यथासिद्धभेदप्रत्ययबलेन वक्तृविशेषानुमानबलेन च
तत्सिद्धेर्गत्वकत्वव्याप्यतन्नानात्वस्वीकारात् । (३६) तवापि
वायुवृत्तित्वे शुकादिककारगकारादिव्यञ्जकवायूनां विजा-
तीयत्वं वाच्यं, तथा च ककारव्यञ्जकवायुत्वव्याप्यं यदि
शुकवर्णाभिव्यञ्जक(३७)वायुत्वं तदा शुकगकारव्यञ्जक-
वायौ न स्यात् । अथ व्यापकं तदा सर्वे एव कव्यञ्जक-
वायवः शुकवर्णाभिव्यञ्जकवायवः स्युः । तस्माद्वायुवृत्ति-
त्वेपि (३८) तासां नानात्वमावश्यकम् । अथास्तु स्त्री-
पुंसादिगकारभेदस्तथापि यावद्वक्तृभेदमनन्ता एव नित्या
वर्णाः प्रत्यभिज्ञानादिति चेत् । अस्त्युत्पादविनाशप्रतीतौ
सत्यामपि स एवायं गकार इति प्रत्यभिज्ञा । अस्ति च
तदनन्तरमप्युत्पादविनाशप्रथा, न चोत्पादादिप्रतीत्यभेद-
प्रत्यभिज्ञयोरन्यतरस्य परस्परं विहायान्यद्बाधकमस्ति ।
न चानयोः परस्परं बाध्यबाधकभावे विनिगमकं, येनैक-
भ्रान्तत्वेनाविरोधः स्यात् । कथं वा भेदाभेदज्ञानयोरन्य-
तरावधारितं परस्परप्रतिबन्धकत्वं परिभूय प्रथमं तयोरेक-
सत्त्वे ऽप्यपरोत्पत्तिप्रसङ्ग इति संकटप्रविष्टतया प्रत्यभि-
ज्ञानं शब्दनित्यत्वे प्रमाणयितुं न शक्यते । (३६) नन्वे-

र्माभावेन तस्याननुगतत्वमिति भावः । यद्यपि गकारपदवाच्य-
त्वावच्छेदकत्वादिनानुगमः संभवत्येव तथापि तदप्रतिसंधाने-
प्यनुगतप्रत्ययाद्गत्वमेकमिति बोध्यम् । (२८) अत एवेति । जाति-
संकरप्रसङ्गादेवेत्यर्थः । ननु गत्वव्याप्यमपि तारत्वं कथमेकम् ।
मन्दत्वेन संकरापत्तेः । तथा हि । तारत्वव्याप्यं यदि मन्दत्वं, त-
दात्यन्तमन्देपि तारत्वापत्तिः । यदि च तद्व्यापकं, तदा ऽत्यन्त-
तारेपि मन्दत्वापत्तिरिति परस्परात्यन्ताभावसमानाधिकरण-
जात्योर्मध्ये गकारे संकरापत्तिः । यदि चाऽत्यन्ततारे भिन्न-
मेव तारत्वमात्र,मत्यन्तमन्दे मन्दत्वमपि भिन्नमेव, तदा
मध्यगकारवृत्तितारत्वमन्दत्वयोरन्यूनानतिरिक्तव्यक्तिकत्वाप-
त्तिः । न चानन्यगत्या तत्तथा स्वीकार्यम् । अपसिद्धान्तादि-
ति चेत्, मैवम् । मध्यगकारे तारत्वमन्दत्वयोर्भेदस्यासिद्धेः ।
एकैव हि जातिः किंचित्सजातीयसाक्षात्कारप्रतिबन्धकताव-
च्छेदिका प्रतिबध्यतावच्छेदिका च, अत एव प्रवृत्तिनिमि-
त्तद्वयसमावेशात्तारमन्दशब्दप्रयोगः । न चैवं वस्तुतउभयोर-
विरोधात्तन्निबन्धनविरुद्धधर्माध्यासो विरुध्यतइति वाच्यम् ।
एकप्रतियोगिकतारत्वमन्दत्वयोर्विरोधेन तन्निबन्धनविरुद्धध-
र्माध्यासोपन्यासादिति । (२९) व्याप्यतेति । व्याप्यत्वेना-
निश्चयादित्यर्थः । अत एव धूमत्वेन धूमदर्शनेपि वह्निसंदेहः,
तदर्थमेव व्याप्यतावच्छेदकानिश्चय उक्त इति ध्येयम् । (३०)
सप्रतियोगिकत्वादिति । अवधिज्ञानाधीनज्ञानत्वादित्यर्थः ।
(३१) ते चाश्रय इति । तथा चासिद्धिरिति भावः । (३२)
तथेति । नन्वेवं व्यवहर्तव्यज्ञाने सति सत्यां व्यवजिहीर्षाया-
मधिकापेक्षाया व्यवहारे ऽदृष्टचरत्वादिति प्रत्यक्षखण्डोक्त-
विरोध इति चेत् । अत्राहुः । व्यवहारः शब्दप्रयोगात्मा प्र-
वृत्तिनिमित्तज्ञानमपेक्षते तस्यापि व्यवहर्तव्यत्वात् । न च
तारशब्दप्रयोगे सजातीयसाक्षात्कारप्रतिबन्धकतावच्छेदक-
जातिमानयमित्यात्मके सजातीयोपस्थितिं विना प्रवृत्तिनि-
मित्तनिश्चय इत्याश्रये गृह्यमाणे गृहीतेपि स्वरूपेण जातिवि-
शेषे न तद्व्यवहारो न तु यावद्व्यवहर्तव्यज्ञानेपि व्यवहारार्थम-
धिकापेक्षेति । परमतावष्टम्भेन वादिभेदेन वा तदुक्तमित्यन्ये ।
ननु मन्दत्वाभाव एवोत्कर्षो न तु जातिरूप इत्यत आह । (३३)
उत्कर्षस्त्विति । वैपरीत्यापत्तेरितिभावः । ननु यदि जातिसं-
करभयेनैकस्य नानात्वं तदा तारत्वादिकमेवानुगतं, गत्वं तु
नानास्तु । तथा च न तु गत्वं नानेत्यसिद्धमित्यत आह ।
(३४) गकारे त्विति । गत्वे त्वित्यर्थः । तादृशानुगमकोपा-
धेरभावात् । भावे वा तदप्रतिसंधानेप्यनुगतप्रत्ययादिति भावः ।
ननु जातिसंकराद्गत्वं जातिरेव मास्त्वित्यत आह । (३५)
अनन्यथेति । गकारभेदसिद्धावनुगतप्रत्ययानुरोधेन गत्वजाति-
सिद्धौ संकरभयेनानन्यगत्या तारत्वादिनानात्वस्वीकारादि-
त्यर्थः । ननु त्वन्मते तावद्वैलक्षण्यस्वीकारे गौरवमित्यत आह ।
(३६) तवापीति । तथा च गौरवं तुल्यमित्यर्थः । (३७) वा-
युत्वम् । वायुवृत्तिजातिविशेषः । (३८) तासाम् । तारत्वादिजा-
तीनामित्यर्थः । आशयमविद्वान् शङ्कते । (३९) नन्विति । आश-

वमुत्पत्तिमत्त्वादिनाप्यनित्यत्वसिद्धिः कथम्। (४०) इत्य-(४१)मुत्पादादिबुद्धिप्रत्यभिज्ञानयोरप्यवश्यं विषयभेदः, एकविषयत्वे (४२) विरोधेनैकानन्तरमपरानुत्पत्तिप्रसङ्गात्। एवं च भेदे भासमाने प्रत्यभिज्ञायास्तज्जातीयत्वं विषयो न व्यक्त्यभेदः। न चैवं तज्जातीयोऽयमिति स्यात्, (४३) न तु सोयमिति वाच्यम्। (४४) तज्जातीयत्वप्रतीतेरपि सोयमित्याकारदर्शनात्। यथा सैवेयं गाथा तदेवेदमौषधं बहुभिः कृतं मयाऽपि प्रत्यहं क्रियमाणमस्तीत्यादौ। (४५) नहि तावद्वर्णमात्रमानुपूर्वी,-जराराजनदीदीनादिषु तन्नानात्वात्, किं तु तदुच्चारणानन्तरमुच्चारणं (४६) तज्ज्ञानानन्तरं ज्ञानं वा। तच्च नानेति तद्वती गाथापि नानैव। (४७) न चाभेदे भासमाने उत्पादादिबुद्धिरेवान्यस्योत्पादादिकमवगाहते गकारगतत्वप्रतीतेर्भ्रान्तत्वप्रसङ्गात्। न चेष्टापत्तिः। अभेदे भासमाने तद्विरुद्धधर्मवत्त्वभ्रमानुदयात्। विनिगमकाभावेनोभयस्यापि यथार्थत्वाच्च। क्व तर्हि तस्याभेदो विषयः यत्र प्रथमं न भेदप्रथा। अत एव भेदसत्त्वे तदज्ञानात् क्व चित्सा भ्रान्ता, तस्माद् यत्र भेदप्रतीति(४८)स्तदितरबाधकाबाध्या तत्र प्रत्यभिज्ञैव न भवति (४९) भवन्ती वा तज्जातीयत्वमालम्बते न तु भ्रान्ता विशेषदर्शने भ्रमानुदयात्। (५०) अपि च यथा शङ्खादिध्वनीनामुत्पत्तिविनाशप्रत्ययात्तारत्वादिविरुद्धधर्मसंसर्गाच्चानित्यत्वे सैवेयं गुर्जरीत्यादिप्रत्यभिज्ञा तज्जातीयत्वविषया, तथा वर्णप्रत्यभिज्ञापि, अन्यथा ध्वनयोऽपि नित्याः स्युः, उत्पत्तिविनाशतारत्वादिप्रतीतीनां प्रत्यभिज्ञानबलेनौपाधिकत्वात्। न च वर्णेषु तारत्वेनैव भासमाना ध्वनय उपाधयः संभवन्ति। न तु ध्वनिषु वर्णास्तज्जनककण्ठताल्वाद्यभिघाताभावादिति वाच्यम्। वर्णोच्चारणदशायामपि गुर्जरिकादिजनकानामभावात्। तस्मादुत्पत्तिविनाशतारत्वादि प्रत्ययस्य प्रत्यभिज्ञानस्य च तुल्यत्वे द्वयोरपि नित्यत्वमनित्यत्वं वा। न चोभयोरपि नित्यत्वमेव। उक्तन्यायेन प्रत्यभिज्ञायास्तज्जातीयत्वविषयत्वात्। किं च यदि व्यङ्ग्यः शब्दः स्यात्तदा बाह्यालोकाभावे घटस्येव व्यञ्जकाभावे शब्दस्यानुपलम्भात् तत्संशयः स्यात्, न त्विहेदानीं शब्दो नास्तीति निश्चयः तस्माद्वर्णा न

यमुद्घाटयति। (४०) इत्यमिति। (४१) उत्पादादीति। आदिपदाद् भेदबुद्धिपरिग्रहः। (४२) विरोधेनेति। उत्पादादेर्भेदव्याप्यत्वेनाभेदविरोधित्वादित्यर्थः। (४३) न त्विति। सोयमितिशब्दाभिलापो न स्यादित्यर्थः। (४४) तज्जातीयेति। तज्जातीयत्वविषयकप्रतीत्यापि सोयमित्याकारकशब्दाभिलापदर्शनादित्यर्थः। ननु तज्जातीयत्वविषयकप्रत्ययेनाविचित्रेण कथं तज्जातीयोयं सोयमित्याकारकविचित्रशब्दाभिलाप इति चेत्। अत्र वदन्ति। तत्पदसमभिव्याहृत एवकारोऽभेदव्युत्पन्नो, ऽभेदश्च भेदविरहो, भेदश्च द्वेधा, गत्वसामान्यावच्छिन्नप्रतियोगिकस्तद्गत्वावच्छिन्नप्रतियोगिकश्च; तत्र भेदे भासमाने प्रत्यभिज्ञा प्रथमस्य भेदस्य विरहमभेदमवगाहते। तदभाने द्वितीयस्य। उभयत्रापि स एवायं गकार इति व्यपदेशः। यत्र तु तद्वृत्तिजात्यभिन्नजातिमत्त्वमन्यत्र भासते तत्र तज्जातीयोयमिति॥ के चित्तु भेदे भासमाने यत्र जात्यभेद आश्रये परम्परासंबन्धेन भासते तत्र सोयमित्याकारः। यत्र तु तद्वृत्तिधर्मोऽन्यत्र तत्र तज्जातीयोयमित्याकार इति प्राहुः। भेदे भासमाने जात्या संबन्धेन व्यक्त्यन्तराभेदो यत्र व्यक्त्यन्तरे भासते तत्र सोयमित्याकार इत्यप्याहुः॥ ननु गाथाप्येकैवेत्याशङ्क्याह। (४५) नहीति। मौनिश्लोकाव्याप्तेराह। (४६) तज्ज्ञानेति। वैपरीत्यमाशङ्क्य निराकरोति। (४७) न चेति। अभेदो व्यक्त्यभेदः। (४८) तदितरेति। प्रत्यभिज्ञेतरेत्यर्थः। (४९) भवन्ती वेति। यद्यपि सा न प्रत्यभिज्ञा तथापि तादृशशब्दप्रयोगहेतुत्वेन सापि तथोक्तेति भावः। ननु चाभेदे भासमाने विशिष्टधर्मिभेदप्रतीतेर्धर्मभेदविषयत्वम्। यथा लोहितोयं न श्याम इत्यत्र नहि प्रथमं भेदधीरेवेत्यत्र मानमस्ति, येन विरोधेन प्रत्यभिज्ञा व्यक्त्यभेदं नोल्लिखेत्। कस्य चित्तथासंभवेपि पुरुषविशेषं प्रति शब्दनित्यत्वं स्यात्। तथा च वैपरीत्यमेवास्तु। एवं चोत्पादादिबुद्धिर्भ्रान्तास्तु। न चाभेदे भासमाने विशेषदर्शनान्न तथा। उत्पादादेर्भेदव्याप्यत्वेनाग्रहदशायां तदारोपे बाधकाभावात्। प्रत्यभिज्ञाविषयभेदकल्पनया परंपरासंबन्धेन वा यथार्थत्वसंभवाच्च। श्यामो नष्टो लोहितोऽयमुत्पन्न इतिवत्। तस्मात्प्रत्यभिज्ञायां भेदादिबुद्धेर्वा विषयभेदकल्पनमित्यत्र विनिगमनाविरहादनित्यत्वे संदेह इति चेत्। अत्र वदन्ति। बहूनामुत्पादादिबुद्धीनां विषयान्तरकल्पनापेक्षया प्रत्यभिज्ञानमात्रस्य विषयभेदकल्पने लाघवमिति तदेव कल्प्यतइति। प्रतिबन्दीमाह। (५०) अपि चेति। परपक्षखण्डनमात्राय

नित्यो (५१) ऽनित्यो वा (५२) सत्त्वे सत्युत्पत्तिमत्त्वात्। (५३) अस्मदादिबहिरिन्द्रियग्राह्यत्वे सति जातिमत्त्वाद्, (५४) अस्मदादिप्रत्यक्षगुणत्वाद्वा। (५५) आत्मैकत्वप्रत्यक्षपक्षे विशेषगुणत्वात्। (५६) व्यापकसमवेतप्रत्यक्षविशेषगुणत्वात्। (५७) अनात्मप्रत्यक्षविशेषगुणत्वात्। (५८) अव्याप्यवृत्तित्वात्। (५९) ईश्वरज्ञानं च न तथा, तत्प्रयोजककारणाभावात्। (६०) बहिरिन्द्रियव्यवस्थाहेतुगुणत्वात्। (६१) भूतप्रत्यक्षगुणत्वात्। (६२) उत्कर्षापकर्षशब्दप्रवृत्तिनिमित्तजातिमत्त्वाद्वेत्यादिरसत्वादिव्याप्यजातेर्नानात्वेपि तादृशशब्दप्रवृत्तिनिमित्तत्वस्य साधारणत्वात्। न चात्र (६३) साधनावच्छिन्नस्य (६४) पक्षधर्मावच्छिन्नस्य वा साध्यस्य व्यापकः स्पर्शवत्समवेतत्वमुपाधिः। (६५) सर्वत्र वर्णात्मकशब्दपक्षीकरणे व्योमगुणेष्वनित्येषु ध्वनिषु साध्याव्यापकत्वात्। (६६) स्पर्शवत्पदस्य पक्षमात्रव्यावर्तकत्वेन पक्षेतरत्वाच्चेति, (६७) यदा वर्णा एव न नित्याः तदा क्वैव कथा पुरुषविवक्षाधीनाऽऽनुपूर्व्यादिविशिष्टवर्णसमूहरूपाणां पदानां कुतस्तरां च तत्समूहरूपस्य वाक्यस्य कुतस्तमां च तत्समूहस्य वेदस्येति (६८) तथापि

स्वपक्षसिद्धिरित्यत आह। (५१) अनित्यो वेति। न च साध्ययोरभेदः। उत्तरावधिविधुरत्वाभावः पूर्वत्र साध्यः, ध्वंसावच्छिन्नसत्तावत्त्वं सत्तावच्छिन्नध्वंसप्रतियोगित्वं वाऽत्र साध्यमित्यदोषादित्याहुः। ध्वंसे व्यभिचारवारणाय (५२) सत्त्वे सतीति। न च सत्ता जातिरन्यतरासिद्धाप्रसाध्याङ्गकत्वात्। उत्पत्तिमत्त्ववत्। सत्त्वं भावत्वमित्यन्ये। (५३) अस्मदादीति। आत्मनि व्यभिचारवारणाय बहिष्पदम्। गोत्वादौ तद्वारणाय जातिमत्त्वम्। योगिचक्षुर्ग्राह्यतया परमाणौ व्यभिचारवारणायास्मदादीति। न च योगजो धर्मो मनस एव सहकारी न चक्षुरादेरिति वाच्यम्। विनिगमकाभावात्। वस्तुतस्त्वेवमपि सामान्यादिप्रत्यासत्तिसहकृतास्मदादिबहिरिन्द्रियग्राह्यतया परमाण्वादौ व्यभिचार एवेति बाह्यविषयजन्यज्ञानविषयत्वे सति जातिमत्त्वाद्बहिरिन्द्रियजन्यलौकिकप्रत्यक्षविषयत्वे सति जातिमत्त्वादिति हेत्वर्थः। लौकिकपदं स्वमतावष्टम्भेनैव। (५४) अस्मदादीति। लौकिकप्रत्यक्षगुणत्वादित्यर्थः। गोत्वादौ व्यभिचारवारणाय गुणपदम्। (५५) आत्मैकत्वेति। एकोऽहमिति प्रत्यक्षसत्त्वादिति भावः। (५६) व्यापकेति। एतच्च मतभेदेन हेतुद्वयं, व्यापकसमवेतविशेषगुणत्वादिति गुरुमते, प्रत्यक्षविशेषगुणत्वादित्यस्मन्मते। एवं च परमते घटरूपे व्यभिचारवारणाय व्यापकसमवेतपद, मस्मन्मते भगवतो ज्ञानादौ व्यभिचारवारणाय प्रत्यक्षपदं लौकिकप्रत्यक्षपरमित्याहुः। तच्चिन्त्यम्। द्वितीयहेतोः पूर्वहेत्वविशेषापत्तेः। न च परमतेनैवायं हेतुरिति वाच्यम्। तत्र प्रत्यक्षपदवैयर्थ्यापत्तेः। केचित्तु आशुविनाशित्वं यदि साध्यं तदायं हेतुर्बाध्यः। एवं च घटरूपादावेव व्यभिचारवारणाय व्यापकेति। ईश्वरज्ञानादौ व्यभिचारवारणाय प्रत्यक्षेति। आत्मैकत्वप्रत्यक्षत्वपक्षे विशेषेतीत्याहुः। (५७) अनात्मेति। आत्मैकत्वे व्यभिचारादाहानात्मेति। जलपरमाणुरूपादौ व्यभिचारादाह। प्रत्यक्षेति। विशेषपदं यद्यस्ति तदा व्यर्थमित्याहुः। केचित्तु विशेषपददानेन प्रत्यक्षविशेषालौकिकप्रत्यक्षं लभ्यतइति नोक्तदोष इत्याहुः। (५८) अव्याप्येति। स्वात्यन्ताभावसमानाधिकरणत्वात्। अत्यन्ताभावत्वं च नित्यसंसर्गाभावत्वं तेन संयोगरूपस्वात्यन्ताभावसमानाधिकरणे संयोगात्यन्ताभावे न व्यभिचार इत्येके। वृत्तिः समवायो विवक्षित इत्यन्ये। गुणपदं प्रयोज्यपरमित्यपरे। ईश्वरज्ञानादौ व्यभिचारमाशङ्क्याह। (५९) ईश्वरज्ञानं त्विति। ईश्वरज्ञानादिकं त्वित्यर्थः। (६०) बहिरिति। सुखादिवदात्मैकत्वमपि मनोव्यवस्थापकमिति कृत्वोक्तं बहिरिति। रूपत्वादौ व्यभिचारादाह गुणेति। शब्दविशेषस्यैव पक्षत्वमिति न भागासिद्धिः। (६१) भूतेति। आत्मैकत्वजलपरमाणुरूपगोत्वेषु व्यभिचारवारणाय क्रमेणैव विशेषणानि। (६२) उत्कर्षेति। उत्कृष्टापकृष्टेत्यर्थः। परमाणुत्वपरममहत्त्वयोर्व्यभिचारादुभयोपादानम्। न चैवं तारतमे मन्दतमे च शब्दे भागासिद्धिरिति वाच्यम्। तदुभयभिन्नस्यैव शब्दस्य पक्षत्वादित्याहुः। सुखादौ साध्याव्याप्तेराह। (६३) साधनेति। यदवच्छिन्नं साध्यं प्रति उपाधेर्न व्यभिचारः तस्य बहिरिन्द्रियव्यवस्थाहेतुत्वादेः साधनस्यावच्छेदकत्वं बोध्यम्। अत एवाह। (६४) पक्षधर्मावच्छिन्नस्येति। तथा च सत्त्वे सतीत्यादौ पक्षधर्मस्यैवावच्छेदकत्वमिति भावः। पक्षे साध्याव्याप्तिर्न दोष इत्यत आह। (६५) सर्वत्रेति। ननु ध्वनीनां वायुधर्मतया व्योमगुणत्वमसिद्धमिति न तत्र साध्याव्याप्तिरित्यतो दोषान्तरमाह। (६६) स्पर्शवदिति। यद्यप्यात्मत्वादेरपि व्यावर्तनात्र पक्षमात्रव्यावर्तकत्वं तथापि साधनवत् पक्षमात्रकमेव व्यावर्तयतीति तथोक्तम्। पक्षेतरवदुत्सर्गतस्तस्याप्युपाध्याभासत्वात्। वस्तुतो हेतौ तर्कसत्त्वादस्याप्रयोजकत्वे तात्पर्यम्। प्रकृते योजयति। (६७) यदा चेति। तथा च निर्दोषत्वाभावे कथमीश्वरं विना वेदप्रामाण्यमिति भावः। तथापीति। (६८)

परतन्त्रपुरुषपरंपराधीनतया प्रवाहाविच्छेदमेव नित्यत्वं ब्रूम इतिचेत्,न । स्मृत्याचारानुमितानां शाखाना(६९)मुच्छेददर्शनात् ।

(७०) स्यादेतत् । (७१) विवादपद(७२)मपूर्वबोधिका (७३) स्मृतिः स्मृत्यर्थानुभवजनकवेदमूला,(७४) अविगीतमहाजनपरिगृहीतस्मृतित्वात् । प्रत्यक्ष(७५)वेदमूलकस्मृतिवत्,वेदमूलत्वं च वेदजन्यानुभवजन्यत्वं,(७६) ज्ञानद्वारा ज्ञायमानस्यैव वेदस्य स्मृतिहेतुतया ऽनुमानं कुविन्दस्येव ज्ञानादिव्यवहितस्य च पटे (७७) न तु कारणकारणता, वेदे सत्येव तत्प्रतिसंधाने स्मृतिप्रणयनात् । (७८) वेदार्थस्मृतिता च प्रसिद्धिसिद्धा, (७९) स्मृत्यर्थश्च स्मृतित एवोपस्थितः । न च स्मृत्यर्थबोधकवेदानुमाने स्मृत्यर्थरूपवेदार्थस्य विषयत्वाद्वेदोऽनुवादकः । (८०) ज्ञानान्तरोपनीतस्य विशेषणत्वेन (८१) विशिष्टबुद्धिसंभवात् । पाककृतौ मानसप्रत्यक्षायां पाकस्य संज्ञा-

---

न चैवं स्वतः प्रमाणपुरुषाभावे ऽविश्वासादन्धपरंपरापत्तिः, सर्वेषामेव तेषामुपदेशेन वेदार्थदर्शितया स्वतः प्रामाण्यात्, तथा च तदधीनमेव वेदप्रामाण्यमस्तु किमीश्वरेणेति भावः ॥ के चित्तु प्रवाहावच्छिन्नस्वरूपं यन्नित्यत्वं तेन यन्निर्दोषत्वं तत एव प्रामाण्यमस्तु इत्यर्थ इत्याहुः । (६९) उच्छेदेति । तथा च प्रवाहाविच्छेदो ऽसिद्ध इति भावः । स्मृत्याचारानुमितशाखानां नोच्छेदः, किं तु स्वत एव प्रच्छन्नवेदात्तदर्थज्ञापकत्वेनानुमितात् स्मृत्याद्युत्पत्तिरित्याह ।

(७०) स्यादेतदिति । अत्र वेदत्वमध्ययनविषयत्वव्याप्यं न वेति विप्रतिपत्तिः, प्रत्यक्षवेदमूलकस्मृतावंशतः सिद्धसाधनमित्यत आह । (७१) विवादेति । उच्छिन्नमूलत्वविवादेत्यर्थः । प्रत्यक्षवेदमूलान्येत्यत्र तात्पर्यम् । न्यायादिमूलकस्मृतावंशतो बाधादाह । (७२) अपूर्वबोधिकेति । अपूर्वप्रमापिकेत्यर्थः । वेदसमानार्थेत्यत्र तात्पर्यम् । अपूर्वस्य वेदत्वात् । वेदस्यापि पक्षत्वेंऽशतो बाधादाह । (७३) स्मृतिरिति । ताद्रूप्यसिद्धये जनकेत्यन्तम् । अन्यथा तस्याननुभावकत्वापत्तेः । यत्तु उच्छिन्नवेदमूलत्वेनार्थान्तरादाह । जनकेत्यन्तम् । उच्छिन्नश्वासत्त्वाच्च जनक इति, तन्न । वेदमूलत्वपदेनैव वेदमूलत्वं चेत्यादिना तन्निराकरणात् । उच्छिन्नवेदस्यापि पूर्वस्मृत्यर्थानुभवजनकत्वाच्च । (७४) अविगीतेति । लोभमूलस्मृतेर्विगीतत्वात् । न्यायमूलकस्मृतेर्महाजनापरिगृहीतत्वाद् वेदस्यास्मृतित्वान्नितयमुपात्तम् । महाजनश्चादृष्टार्थिपुरुष इत्यवधेयमित्याहुः । तच्चिन्त्यम् । एवं हि महाजनपदेनैव लोभमूलकस्मृतिवारणे ऽविगीतपदवैयर्थ्यापत्तिः । नहि लोभमूलकस्मृतिरदृष्टार्थिपुरुषपरिगृहीता, किं तु लोभार्थिपरिगृहीतैव, भ्रमादिना तथा परिग्रहे न्यायमूलकस्मृतावपि तथासंभवे व्यभिचारतादवस्थ्यापत्तेः ॥ अन्ये तु स्मृतित्वं शब्दतदुपजीविप्रमाणातिरिक्तप्रमाणजन्यप्रमितिविषयार्थकभिन्नत्वे सति शब्दजन्यवाक्यार्थज्ञानजन्यवाक्यत्वं, तेन लौकिकवाक्ये न्यायादिवेदमूलकस्मृतौ वेदे च न व्यभिचारः । एवं च चैत्यं वन्देतेत्यादिबौद्धागममूलकस्मृतौ व्यभिचारादाह । महाजनेति । श्येनेनाभिचरन् यजेतेत्यादिवेदमूलकस्मृतौ व्यभिचारः, साध्ये वेदपदस्य विधिपरत्वेन तत्र साध्यासत्त्वादित्यत आह । अविगीतेति । विधित्वं च निषिद्धफलकादृष्टाप्रतिपादकवेदत्वम् । अतो न कलञ्जं भक्षयेदित्यादिवेदमूलकस्मृतौ न व्यभिचार इति वदन्ति । के चित्तु अलौकिकाविगीतस्मृतित्वादिति हेत्वर्थः । न्यायप्रत्यक्षमूले तु लौकिक्यौ, यूपहस्तिस्मृतिर्विगीतेति । स्मृतित्वं च ऋषिप्रणीतशास्त्रत्वं, तेन न वेदस्य स्मृतित्वं, पाणिनिमतादिकं तु स्मृतिरेवेत्याहुः । ननु वेदमूलत्वं वेदपरम्पराकारणतयापि निर्वहतीत्युच्छिन्नवेदमूलकत्वेनार्थान्तरमत आह । (७५) वेदेति । तथापि दोषतादवस्थ्यमित्यत आह । (७६) ज्ञानेति । (७७) न त्विति । कारणकारणतामात्रमित्यर्थः । ननु वेदानुमानात्प्राग् वेदसमानार्थत्वं दुर्ज्ञेयं स्मृतीनामिति विशिष्टपक्षाज्ञानादाश्रयासिद्धिरित्यत आह । (७८) वेदार्थेति । परपक्षवदिति शेषः । यद्वा ऽप्रयोजकत्वनिरासायाह । वेदार्थेति । यदिवेदजन्यानुभवजन्येयं न स्यात्तदा महाजनस्य वेदसमानार्थकत्वप्रसिद्धिसिद्धा न स्यादित्यर्थः । साध्याप्रसिद्धिं परिहरति । (७९) स्मृत्यर्थइति । (८०) ज्ञानान्तरेति । ननु स्मृतिजन्यतादृशज्ञानगोचरतयैव वेदार्थस्य वेदोऽनुवादक इति चेत् । अत्राहुः । नहि यथाकथंचिदुपस्थितार्थबोधकतामात्रेणानुवादकता । एकदा वेदार्थाधिगमे पुनस्तेन तदर्थबोधजनने तद्वेदानुवादकतापत्तेः । किं त्ववश्यापेक्षणीयनिरपेक्षप्रमाणबोधितार्थप्रमापकतया । न च स्मृतिर्निरपेक्षप्रमाणमवश्यापेक्षणीयं वा । स्मृत्यर्थगोचराचारादप्यनुमानसंभवेन तथानुमितवेदस्यापि तदर्थबोधकत्वादिति । (८१) विशिष्टबुद्धिसंभवादिति । तटस्थज्ञानविषयस्यापि व्यावर्तकत्वेन विशेषणत्वमिति स्मृत्यर्थस्य नानुमितिविषयत्वम् । अतो नानुवादकत्वम् । कार्येण कारणानुमाने ऽकारणस्यातद्विषयत्वमिति तैरभ्युपगमात् । तदिदं वक्ष्यति । तस्यासिद्धत्वेनाजनकतयेत्यादि । न चैवं तदर्थज्ञापकत्वविशिष्टवेदस्याननुमितौ कथं ततो ऽर्थधीरिति वाच्यम् । भेदाग्रहे सति ज्ञानद्वयस्यापि

संविज्ञाने संज्ञाया (८२) ज्ञानायथार्थत्वे (८३) तदनुव्यवसाये भ्रमविषयस्येव, (८४) अन्यथा भ्रान्तभ्रान्तिज्ञसंकरापत्तिः,न तु शब्दार्थौ ऽनुमानस्य विषयः,तस्यासिद्धत्वेनाजनकतया स्मृत्यव्यापकत्वात् । (८५) स च वेदो नित्यमनुमेय एव, (८६) अनुमितादेवार्थमवधार्य स्मृतिप्रणयनसंभवात् । नन्वासंसारमपठितस्य न वेदत्व(८७)-मुत्पत्तितो ऽभिव्यक्तितो मौनिश्लोकवदभिप्रायतो वा ऽऽनुपूर्वीहीनवर्णमात्रस्य निरर्थकत्वात् । (८८) ज्ञानजनकसमभिव्याहारस्यानेकत्वे विशेषाननुमानाच्चेतिचेत्, न । स्मृत्यर्थज्ञापकत्वेनैव ज्ञातस्य स्मृत्यर्थानुभावकत्वात् । नहि शाब्दबोधे नियतपदानुपूर्वी हेतुः, (८९) व्यभिचारात् । (९०) पदस्य वर्णविशेषानुपूर्वीनियमेपि तत्तद्वर्णानुपूर्वीकपदविशेषत्वेन न हेतुत्वं, हस्तकरादिपदानां प्रत्येकं व्यभिचारात् । किं त्व(९१)व्यभिचारितदर्थज्ञापकत्वेन ज्ञातस्य लाघवादावश्यकत्वाच्च । (९२) तदर्थज्ञापकत्वज्ञानार्थमेव क्व चिद् वर्णक्रमस्वरविशेषाणामुपयोगः । (९३) अत एव वर्णलोपादौ कुशमानयेति सकारसंदेहे ऽपि लिपावुच्चारणे वा हस्तकरसंदेहे ऽपि वाक्यार्थबोधः ॥

विशिष्टज्ञानकार्यकारित्वाभ्युपगमात् । के चित्तु बुद्धिविषयत्वे सतीति पाठः । अत्र विशेषणतया ऽनुमितौ स्मृत्यर्थरूपवेदार्थस्य भानम्, अतो भिन्नप्रकारकत्वान्नानुवादकत्वमित्यर्थ इति । तच्चिन्त्यम् । न च शब्दार्थ इत्याद्ययिमग्रन्थविरोधात् । स्वमतेनैव दृष्टान्तमाह । पाकेत्यादि । इवशब्दः पाकस्येत्यत्र संज्ञाया इत्यत्र चानुवृज्यते । सर्वधीयथार्थत्वपक्षे द्वितीयं ज्ञानं नानुव्यवसाय इति न ज्ञानान्तरोपनय इत्यत आह । (८२) ज्ञानायथार्थत्वइति । यद्यपि ज्ञानानुव्यवसाये ज्ञानविषयस्येवेति सामान्याभिधानेपि प्रकृतसिद्धिस्तथापि अन्यथेतिवक्ष्यमाणमनिष्टं भ्रमानुव्यवसाय एवेति विशिष्याह । (८३) तदनुव्यवसाय इति । (८४) अन्यथेति । तदनुव्यवसायस्य भ्रमविषयत्वे भ्रमवत्तस्यापि भ्रमत्वापत्तिरित्यर्थः । ननु यदि वेदो विद्यमानोस्ति तदा कथं न श्रूयत इत्यत आह । (८५) स चेति । तर्हि कथं ततो ऽर्थधीः कथं वा स्मृतिप्रणयनमित्यत आह । (८६) अनुमितादिति । (८७) उत्पत्तित इति न्यायनये, ऽभिव्यक्तित इति गुरुमते, तृतीयमुभयमते । एकवर्णभिन्नपदाभिप्रायेणेदमित्याहुः । तर्ह्यानुपूर्वीविशिष्ट एवानुमीयतामित्यत आह । (८८) ज्ञानेति । अष्टकाः कार्याः कार्या अष्टका इत्याद्यनेकविधसमभिव्याहारसंभवे विशेषेण व्याप्त्यग्रहादिति भावः । (८९) व्यभिचारादिति । घटमानय आनयघटमित्युभाभ्यां वाक्याभ्यामन्वयदर्शनाद्दिति भावः । (९०) पदस्येति । एकवर्णभिन्नपदस्येत्यर्थः । (९१) अव्यभिचारीति । अनुगतेत्यर्थः । ननु यद्यानुपूर्वी न नियामिका तदा जराराजादावविविशेषापत्तिरित्यत आह । (९२) तदर्थेति । विशेषपदं सर्वत्र संबध्यते, प्रकृते च तद्विनापि तदर्थज्ञापकत्वग्रह इति न तदपेक्षेति भावः । (९३) अत एवेति । यत एव तदर्थज्ञापकत्वज्ञानं प्रयोजकमित्यर्थः ॥

॥ वेदान्तसूत्रशैवभाष्यम् ॥

पुनराशङ्क्याह ॥

॥ कामाच्च नानुमानापेक्षा ॥ १८ ॥

"प्रजापतिरकामयत प्रजाः सृजेयेति" इति सर्वश्रुतिषु[1] संकल्पो हिरण्यगर्भस्य जगत्सृष्टौ श्रूयते, तथापि तस्य जगत्कारणत्वेऽनुमानापेक्षा नास्ति[2], तस्य कामस्यावान्तरसृष्टिविषयत्वात्; "परमेश्वरस्यैव हिरण्यगर्भात्मनावान्तरसृष्टिश्च[3]" इति वक्ष्यति, "संज्ञामूर्तिक्लृप्तिस्तु त्रिवृत् कुर्वत" इति; "अनेन जीवेनात्मनानुप्रविश्य नामरूपे व्याकरवाणि" इति हिरण्यगर्भ[4]रूपेणात्मना प्रपञ्चानुप्रविष्टस्य परमेश्वरस्य नामरूपकर्तृत्वश्रवणात् ॥ १९ ॥

अनयोरभेद एवाभ्युपेय इत्यत आह ॥

॥ अस्मिन्नस्य च तद्योगं शास्ति ॥ २० ॥

अस्मिन्नुपनिषत्तन्त्र[5] एवास्य हिरण्यगर्भस्य तद्योगं तस्य परमेश्वरस्य शेषत्वसंबन्धं शास्ति मन्त्रभागः; "ब्रह्माधिपतिर्ब्रह्मणोऽधिपतिः" इति; अतः परमेश्वर एव जगत्कारणं तच्छेषभूतो हिरण्यगर्भ इति सिद्धम् ॥ २० ॥

तदितः पूर्वै[6]रधिकरणन्यायैः सर्वज्ञं नित्यतृप्तमनादिबोधं स्वतन्त्रमलुप्तशक्तिमनन्तशक्तिकं सकलजगदुभयकारणं समस्तोपनिषत्तन्त्रसमन्वयैकप्रतिपाद्यं स्वप्रकाशनिखिलप्रपञ्चविशिष्टाद्वितीयस्वभावं सच्चिदानन्दस्वरूपं संसारपाशविच्छेदकारणं चिदचिदर्थान्तरं शिवतत्त्वं परं ब्रह्मेति सिद्धं; तस्य साधकानां संसारभेषजं मनःसमाधानयोग्यं किमपि रूपं प्रदर्शयितुमिदमधिकरणमारभ्यते ॥

१–रकामयत प्रजायेयेति, प्रजाः सृजेयेति सर्वत्र श्रुतिषु इति पा० ।
२–युक्त्यपेक्षा नास्ति इति पा० ।
३–स्य हिरण्यगर्भात्मनोऽवान्तरसृष्टीच्छा" इति वरपा० ।
४ प्रथमजीवरूपहिरण्य-इति पा० ।
५–न्मन्त्र इति पा० ।
६ पूर्वमतोते–इति पा० ।

॥ अन्तस्तद्धर्मोपदेशात् ॥ २१ ॥

"य एषोऽन्तरादित्ये हिरण्मयः पुरुषो दृश्यते हिरण्यश्मश्रुर्हिरण्यकेश आ प्रणखात् सर्व एव सुवर्णस्तस्य यथा कप्यासं पुण्डरीकमेवमक्षिणी", इति छान्दोग्ये श्रूयतेऽस्य विषयः । अयमादित्यान्तर्वर्ती हिरण्मयः पुरुषः परमेश्वरो देवताविशेषो वेति संशयः । एवं सति सर्वाधारस्य सर्वगतस्य परमेश्वरस्यादित्यान्तर्वर्तित्वं हिरण्मयरूपत्वं च न संभवति, स्वेच्छया रूपाङ्गीकारे त्रिलोचनत्वनियतं[1] तदिह न विद्यते; "पुण्डरीकमेवमक्षिणी" इति लोचनद्वयमेव श्रूयते; अथवा स्वेच्छागृहीतोऽपि देहः संसारिणमिव परमेश्वरस्यापि दुःखमुत्पादयेदेव; स्वेच्छासंबन्धेऽपि पावकस्य दाहकत्वं हि स्वभावः[2]; अतः परमेश्वरस्य शरीरसंबन्धो न युक्तः[3]; तस्मादयं कश्चिद्देवताविशेष एव, न परमेश्वरः; इति पूर्वपक्षन्यायः ।

सिद्धान्तस्तु, परमेश्वर एव; कुतः; तद्धर्माणामुपदेशात्; "स एष सर्वेषां लोकानामीष्टे[4], सर्वेषां कामानां"; तस्योदिति नाम", "स एष सर्वेभ्यः पाप्मभ्य उदित", इत्यादिना प्रतिपादिताः सर्वलोककामेश्वरत्वसर्वपापराहित्यादयो धर्मा हि पारमेश्वराः,

"एको रुद्रो न द्वितीयाय तस्थुः,
सर्वाल्लोकानीशते ईशिनीभिः ।
अजं ध्रुवं सर्वतत्त्वैर्विशुद्धं
ज्ञात्वा देवं मुच्यते सर्वपाशैः" ॥
"एको बहूनां विदधाति कामान्"

इत्यादिश्रवणात् सर्वाधारस्य सर्वगतस्यादित्यान्तर्वर्तित्वं न संभवति; इति यदुक्तं, तत्र न विरोधः; सर्वाधारः सर्वगतः परमेश्वरः साधकानुग्रहाय हिरण्मयं किमपि रूपं समास्थाय सवितृमण्डलमधिवसति, शरीरसंबन्धादस्मदादिवदीश्वरस्य न संसारदोषापत्तिः; श्रुतिरेव भगवती ह्यस्य शरीरसंबन्धं सर्वपापराहित्यं च प्रतिपादयति; वयं हि श्रुतिप्रामाण्यशरणा न युक्तिं बहु मन्महे; पावकोऽपि संबन्धाच्च शक्तिमतां दाहकः; "यथा कप्यासं पुण्डरीकमेवमक्षिणी"इति त्रिलोचनस्य परमेश्वरस्य लोचनद्वयग्रहणं पुण्डरीकसादृश्यवर्णनार्थं, न तृतीयलोचनाभावद्योतनपरं; तथाहि, त्रिपुत्रं ब्राह्मणं प्रति द्वौ पुत्रावस्याग्निकल्पावित्युक्ते द्विसंख्याग्रहणं न शेषपुत्रनिषेधपरं, किंतु पुत्रद्वयस्याग्निसादृश्यपरं, तद्वदत्रापि; कमुदकं रश्मिभिः पिबतीति कपिरादित्यः; तेनास्तिं विकसितं पुण्डरीकं यथा स्फुरति, तथा परमेश्वरस्य लोचनद्वयं; तृतीयं लोचनं तु मुकुलितस्वभावं विकसितपुण्डरीकसदृशं न भवति; मुकुलितपुण्डरीकसममित्यभिप्रायः; "असौ योऽवसर्पति नीलग्रीवो विलोहितः, उतैनं गोपा अदृशन्, अदृशन्नुदहार्यः, उतैनं विश्वा भूतानि, स दृष्टो मृडयाति नः"; इतीति ॥ २१ ॥

नीलग्रीवस्य परमेश्वरस्य सर्वभूतप्रत्यक्षादित्यत्वावगमात्,

"स्वरुचाहितमण्डलस्त्रिनेत्रो रविः,"

इति तस्य त्रिलोचनत्वावगतेश्च, आदित्य एव प्रत्यक्षः परमेश्वरः प्रभामण्डलमध्यवर्ती; अन्यथा कथमस्य "नीलग्रीवो विलोहित" इति नीलग्रीवत्वं त्रिलोचनत्वं चोच्येत; "असावादित्यो ब्रह्म" इति श्रुतिषु ब्रह्मत्वव्यपदेशश्च; तस्मात् "अन्तरादित्य"इति प्रद्योतनरूपमण्डलान्तर्वर्ती सूर्य एव हिरण्मयः पुरुष, इत्यत आह ॥

॥ भेदव्यपदेशाच्चान्यः ॥ २२ ॥

मण्डलाभिमानिनोऽस्माच्चेतनरूपादादित्यादन्य एव हिरण्मयरूपः परमेश्वरः, भेदव्यपदेशात्; "य आदित्ये तिष्ठन्नादित्यादन्तरो, यमादित्यो न स वेद, यस्यादित्यः शरीरं, य आदित्यमन्तरो यमयति, एष त आत्मान्तर्याम्यमृत"इति; अत्रामृतशब्देन शिव उच्यते; "एतानि ह वा अमृतस्य नामधेयानि" इति शतरुद्रीयप्रशंसापरजाबालोपनिषच्छ्रवणादादित्याद्भेद एव परमेश्वरस्य तदविदितत्वादिधर्मैर्व्यपदिश्यते; तस्मादादित्याच्चेतनादन्य ईश्वरो हिरण्मयो "नीलग्रीवो विलोहित" इति नीलग्रीवः परमेश्वर एवादित्यान्तर्वर्ती प्रतिपाद्यते; तदात्मतया तच्छब्दवाच्यत्वम् ।

ननु न नीलग्रीवः परमेश्वर आदित्यान्तर्वर्ती किंतु नारायण एव; तथाहि, सर्वत्र लौकिकाः पठन्ति ॥

ध्येयः सदा सवितृमण्डलमध्यवर्ती
नारायणः सरसिजासनसंनिविष्टः ।

इति तस्यैव पुण्डरीकसदृशाक्षिद्वयसंबन्धो युक्तः, पुण्डरीकाक्ष इति प्रसिद्धेः; किमन्यया प्रतिपादनप्रयासेन, इति चेन्न; परमेश्वरासाधारणलिङ्गानां हिरण्मयपुरुषे दृश्यमानानां[1] तस्मिन् नारायणेऽनुपपत्तेः; तथाहि, सूत्रविषयस्य संदिग्धस्यास्य वाक्यस्यासंदिग्धैर्वाक्यान्तरैर्निर्णयो युक्तः; महोपनिषदि श्रूयते; "आदित्यो वा एष एतन्मण्डलं तपति" इत्यादि; तत्र "य एष एतस्मिन् मण्डलेऽर्चिर्दीप्यत[2]" इति मण्ड-

१ त्रिलोचनत्वं इति पा० ।

२—त्वं स्वभाव एव; इति पा० ।

३ न युक्त एव इति पा० ।

४—मीशः, इति पा० ।

१ गृह्यमाणानां इति पा० ।

२ तत्रादित्यमण्डले त्रयीमयेऽर्चिर्दीप्यत इति पा०

लप्रभामुक्त्वा "य एतस्मिन् मण्डलेऽर्चिषि पुरुष" इति मण्डलाभिमानिनं सूर्यमभिधाय "य एषोऽन्तरादित्ये[1] हिरण्मयः पुरुष" इति हिरण्मयं पुरुषमादित्यान्तर्यामिण[2]मुक्त्वा पुनः "आदित्यो वै तेज ओजो बलं यश" इत्यादिना तस्यादित्यरूपस्य विभूतिमभिधाय "एष एव पुरुष" "एष भूतानामधिपतिः" इति भूतपतित्वेन तं निर्दिश्य, पुनः कीदृश[3] इत्याकाङ्क्षायां "सर्वो वै रुद्र" इत्यारभ्य "हिरण्यबाहवे हिरण्यपतयेऽम्बिकापतय उमापतय" इत्युपसंहृतं; तत्र बाहुग्रहणस्योपलक्षणत्वाद्धिरण्यरूप इति तात्पर्यम्; अतो हिरण्यसदृशरूप उमापतिरादित्यमण्डलवर्तीति सिध्यति; अत्र नीलग्रीवत्वमुमापतित्वमित्यादि विशेषलिङ्गं परमेश्वरादन्यत्र तस्यायोगात्; पुण्डरीकाक्षत्वं सामान्यं लिङ्गं नारायणादन्यत्रापि तस्य दर्शनात्; कमललोचना नारी कमललोचनः पुरुष इति; अतो विशेषलिङ्गेन सामान्यलिङ्गस्य बाधो विधेयः; सदेत्यादि लौकिकवचनं भाक्तमेव; ततो हिरण्यसदृशरूपस्त्रिलोचनो नीलग्रीव उमापतिः सकललोककामेश्वरः सर्वपाप्मानाघ्रातो भगवान् परमेश्वर आदित्यान्तर्वर्ती सावित्रीप्रतिपाद्यः सर्वेषां मुमुक्षूणां ध्येय इति सिद्धम् ॥ २२ ॥

सर्वज्ञत्वादिधर्मकस्य परब्रह्मणः शिवस्य परममङ्गलास्पदमुपास्यं रूपमभिधाय तल्लक्षणस्य नामरूपवशादत्रातिव्याप्तिशङ्कायामधिकरणमारभ्यते ॥

॥ आकाशस्तल्लिङ्गात् ॥ २३ ॥

॥ अत एव प्राणः ॥ २४ ॥

छान्दोग्ये श्रूयतेऽस्य विषयः । "सर्वाणि ह वा इमानि भूतान्याकाशादेव समुत्पद्यन्ते, आकाशं प्रत्यस्तं यन्ति"; "सर्वाणि ह वा इमानि भूतानि प्राणमेवाभिसंविशन्ति, प्राणमभ्युज्जिहते," इति; अत्र सकलभूतोत्पत्तिप्रलयकारणप्रतिपादकौ[4] प्राणाकाशशब्दौ परमेश्वरप्रतिपादनपरौ किंवा भूताकाशप्राणवायुप्रतिपादनपराविति संदेहः। "प्राणाद्ध्येव खल्विमानि भूतानि जायन्ते, प्राणेन जातानि जीवन्ति,प्राणं प्रयन्त्यभिसंविशन्ति," इत्यादिश्रुतेः, "आकाशाद्वायुः" इत्यादिश्रुतेश्च, प्राणाकाशयोरपि सकलभूतकारणत्वावगमात् तावेवात्र प्रतिपाद्याविति प्राप्ते ब्रूमः । प्राणाकाशशब्दवाच्यः परमेश्वर एव, सर्वकारणत्वादितल्लिङ्गात्[5]; न ह्यनयोः सर्वकारणत्वादिकं संभवति; तत्रानन्दरूपस्य ब्रह्मणः कारणत्ववादे तात्पर्यं "प्राणाद्ध्येव खलु" इत्यादिश्रुतेः, न प्राणस्य कारणत्ववादे, किंत्वनुवादमात्रम्, आकाशस्य भूतान्तर्वर्तितया सर्वशब्देन ग्रहणात्; सर्वभूतोत्पत्तिश्च "आत्मन आकाशः संभूत" इति श्रुत्या परमेश्वरादेव; तस्मात् सर्वभूतकारणत्वं न भूताकाशप्राणयोरिति सिद्धान्तः ।

ननु भूताकाश इत्युपपदग्रहणेन किमिति चेत्; परमाकाशस्य परप्रकृतिरूपस्य सर्वभूतकारणत्वसद्भावात्[1] सप्रयोजनं; तर्हि परमेश्वर इति कथं निर्णयः, तदभेदात्; इति सिद्धम् ॥ २३ ॥ २४ ॥

पूर्वं निखिलभुवननायकस्य निरस्तसमस्तदोषवासनाकलङ्कस्य निरतिशयमाङ्गल्यरत्नाकरस्योमापतेः परब्रह्मण आदित्यमण्डलमास्पदमिति निरूपितं; तदिह तस्य स्थानान्तरमुच्यते ॥

॥ ज्योतिश्चरणाभिधानात् ॥ २५ ॥

छान्दोग्ये श्रूयतेऽस्य विषयः । "अथ यदतः परो दिवो ज्योतिर्दीप्यते विश्वतः पृष्ठेषु, सर्वतः पृष्ठेष्वनुत्तमेषूत्तमेषु लोकेषु, इदं वाव तद्यदिदमस्मिन्नन्तः पुरुषे ज्योतिः" इत्यादि; अत्र सकललोकव्यापितया दिवि श्रूयमाणं परं ज्योतिः परमेश्वरो वा तदन्यो वेति संशयः । द्योशब्दस्याकाशवाचित्वात् "परो दिव" इत्याकाशवर्ती सूर्य एवात्र प्रतिपाद्यते ज्योतिरिति; अथवा "अन्तः पुरुषे ज्योतिः" इति पुरुषान्तर्वर्तितया जाठरोऽग्निरिति पूर्वपक्षः । सिद्धान्तस्तु, "परो दिवो ज्योतिः" इति सर्वोत्तरं परं ज्योतिः परमेश्वर एव; पूर्वत्र "पादोऽस्य सर्वा भूतानि" इति ज्योतिषोऽस्यैकांशतया विश्वभूतानामभिधानात्; नैतत् संभवति जाठराग्निसूर्ययोः, परिच्छिन्नत्वात् ॥ २५ ॥

पूर्वं[2] "गायत्री वा इदं सर्वं भूतम्" इति सर्वात्मकतया गायत्री प्रतिपाद्यते; प्रकरणात् तदेकांशत्वमेव प्रपञ्चस्य "पादोऽस्य सर्वा भूतानि" इति श्रुतिराह, इत्यत आह ॥

॥ छन्दोऽभिधानान्नेति चेन्न,

तथा चेतोऽर्पणनिगदात्,

तथाहि दर्शनम् ॥ २६ ॥

पूर्वं[3] "गायत्री वा इदं सर्वं भूतम्" इति छन्दसोऽभिधानात्[4] तस्यैवात्राभिधानं, न परमेश्वरस्य इति चेत्; नैतत् संभवति[5] गायत्र्याख्यस्य छन्दोमात्रस्य सर्वभूतात्मकत्वं; किंतु सावित्र्या तु समानोपदेशः परमेश्वरस्य क्रियते; यया गाय-

१—मुक्त्वार्चिषि पुरुष इति मण्डलाभिमानी सूर्योऽन्तरादित्ये इति पा० ।
२—न्तर्वर्तिन—इति पा० ।
३—शः पुरुष इति पा० ।
४—प्रतिपादनपरो इति पा० ।
५—त्वादिरूपः, तल्लिङ्गात् इति पा० ।

१ संभवात् इति पा० ।
२ पूर्वत्र इति पा० ।
३ पूर्वत्र इति पा० ।
४ छन्दस एवाभिधानात् इति पा० ।
५ सिद्धं भवति इति पा० ।

त्री षडक्षरैश्चतुर्भिः पादैश्चतुष्पदा, तथा ब्रह्मापि चतुष्पादिति; तथाह्यन्यत्रापि छन्दोऽभिधायी शब्दः सादृश्यादर्थान्तरे प्रयुज्यंमानो दृश्यते; यथा संवर्गविद्यायां "ते वा एते पञ्चान्ये दश सन्तस्तत्कृतम्" इत्युपक्रम्य "सैषा विराट्" इत्युक्तं; तथाच सर्वात्मकतया[1] परमेश्वरस्य लिङ्गेन गायत्रीप्रकरणबाधः; अतः परमेश्वर एव ज्योतिरिति ॥ २६ ॥

पुनरनुपपत्तिमाह ॥

॥ भूतादिपादव्यपदेशोपपत्तेश्चैवम् ॥ २७ ॥

भूतपृथिवीशरीरहृदयैश्चतुष्पदेति व्यपदेशो न गायत्र्याख्ये छन्दस्युपपद्यते, परमेश्वर एवोपपद्यते ॥ २७ ॥

पुनराशङ्क्य परिहरति ॥

॥ उपदेशभेदान्नेति चेन्नोभयस्मिन्नप्यविरोधात् ॥ २८ ॥

ननु "पादोऽस्य सर्वा भूतानि" इति, "त्रिपादस्यामृतं दिवि" इत्यत्र द्युसंबन्धप्रत्यभिज्ञानाज्ज्योतिर्वाक्ये परमेश्वरः[2] प्रतिपाद्यत इति न सारम्; उपदेशभेदेन विरोधात्; "त्रिपादस्यामृतं दिवि" इति "परो दिवो ज्योतिः" इति विभक्ति[3]भेदेनोपदेशभेदः; अतो विरोध इति चेन्न; उभयत्रापि विरोधाभावात्; यथा वृक्षाग्रे श्येनः, वृक्षाग्रात् परः श्येन, इति व्यपदेशः; अत्रोभयत्रापि दिवः परत्वमेव विवक्षितम्; अनेन लिङ्गेन परमेश्वर एव पुरुषसूक्तोदितः पुरुष इति सिद्धम्; "पादोऽस्य विश्वा भूतानि" इत्यत्रापि श्रवणात्; अतो निजैकांशसमाप्तसकलप्रपञ्चं दिवि दीव्यमानं परं ज्योतिः परमेश्वर इति निर्णयः ॥ २८ ॥

भगवत्सवितृमण्डले साक्षादुपास्यतया निर्दिष्टस्य परमेश्वरस्यास्मिन्नधिकरणे विश्वात्मकत्वमुक्तं; तदात्मकतया तदन्येषामुपास्यत्वं नान्यथेति प्रतिपादयितुमिदमधिकरणमारभ्यते ॥

॥ प्राणस्तथानुगमात् ॥ २६ ॥

अस्य कौषीतकोपनिषदि विषयः श्रूयते । "प्राणोऽस्मि प्रज्ञात्मानं मामायुरमृतमुपास्व" इतीन्द्रवचनं विषयः । अत्रोपासनाविधिविषयत्वेन प्राणशब्दसामानाधिकरण्येन निर्दिष्ट इन्द्रो वा परमेश्वरो वेति संशयः । इह "प्राणोऽस्मि प्रज्ञात्मानं माम्" इति प्राणशब्दस्य साक्षादिन्द्रेण सामानाधिकरण्यमवगम्यते; "मामुपास्व" इति तद्विषय एवोपासनाविधिः श्रूयते; तस्य प्राणत्वं वृष्टिद्वारा सकलरक्षकत्वादुपपद्यते; सकलोपास्यत्वं च परमैश्वर्यवत्त्वादुपपन्नम्; तथाहि श्रुतिः; "इन्द्रो राजा जगतो य ईश" इत्यादि; तस्मादिन्द्र एवोपास्यतया निर्दिश्यत इति पूर्वपक्षः । सिद्धान्तः परमेश्वर इति; कुतः, आनन्दाजरामृतप्रज्ञात्मादीनां तदसाधारणधर्माणामस्मिन् प्राणशब्दनिर्दिष्टेऽनुगमात्; "एष प्राण एव प्रज्ञात्मानन्दोऽजरोऽमृत" इति; यदुक्तम्, "इन्द्रो राजा" इति श्रुतिः, तत्रेन्द्रशब्द ईश्वरविषयः प्रकरणादवगम्यते ॥ २९ ॥

आशङ्क्य परिहरति ॥

॥ न वक्तुरात्मोपदेशादिति चेदध्यात्मसंबन्धभूमा ह्यस्मिन् ॥ ३० ॥

नायमुपास्यः परमेश्वरः; उपक्रमे[1] "मामेव विजानीहि त्रिशीर्षाणं त्वाष्ट्रमहनम्" इत्यादिना प्रज्ञातजीवभावस्येन्द्रत्वोपदेशात्; अत उपसंहारस्तदनुगुणो नेतव्य इति चेत्; नैतदुचितम्; उपक्रमादारभ्यास्मिन् प्रकरणे[2]ऽध्यात्मसंबन्धस्य परमेश्वरधर्मस्य बाहुल्यात्; तथाहि, उपक्रमे तावत्; "यं त्वं मनुष्याय हिततमं मन्यसे" इति हिततयोपासनं प्रारब्धं; तत् तावत् परमेश्वरधर्मः, तदुपासनस्यैव मोक्षसाधनस्य हिततमत्वात्; मध्ये च "एष ह्येव साधु कर्म कारयति, तं यम एभ्यो लोकेभ्य उन्निनीषते, एष ह्येवासाधु कर्म कारयति तं यमएभ्यो लोकेभ्योऽधो निनीषत" इति सर्वकर्मकारयितृत्वं श्रूयते; तथा, "तद्यथा रथस्यारेषु नेमिरर्पितो नाभावरा अर्पिता एवमेवैता भूतमात्राः प्रज्ञामात्रास्वर्पिताः प्रज्ञामात्राः प्राणेऽर्पिता,, इति जडचेतनात्मकसकलप्रपञ्चाधारत्वं श्रूयते; तच्च परमेश्वरधर्मः; अतः परमेश्वरधर्मबाहुल्यादिहोपास्य इन्द्रो[3] न भवति ॥ ३० ॥

कथमिन्द्रो[4] जीवत्वादनुपास्योऽपि स्वविषयमुपदिशतीत्याशङ्क्याह ॥

॥ शास्त्रदृष्ट्या तूपदेशो वामदेववत् ॥ ३१ ॥

"अनेन जीवेनात्मनानुप्रविश्य नामरूपे व्याकरवाणि" इत्यादिशास्त्रदृष्ट्या सर्वशब्दवाच्यत्वात् परमेश्वरस्य स्वशरीरकतया[5] स्वशब्दवाच्यं परमेश्वरमेवोपास्यत्वेनोपदिष्टवानिन्द्रः; अत इन्द्रशब्देनोपदेशः परमेश्वरस्य; दृष्टान्तमाह, वामदेववत्; वामदेवो हि स्वस्य परमेश्वरात्मत्वदृष्ट्या "अहंमनुरभवं सूर्यश्च,,इत्युपदिदेश, तद्वदिन्द्रोपदेशः; अथवा वेदान्तविज्ञानोपलब्धया ब्रह्मात्मसामरस्यभावनया ब्रह्मभावमुपगतस्य वि-

१ क्रियते, सर्वात्मकतया इत्येव पा० ।

२ इत्यत्र गायत्रीप्रतिपादनमुचितं; परमेश्वरः इति पा० ।

३ विरोधात् प्रत्यभिज्ञानासिद्धेः, "त्रिपादस्यामृतं दिवि" इति विभक्ति—इति पा० ।

१ उपक्रमे इत्येव पा० ।

२—भ्यास्मिन्निन्द्रशब्दवाच्ये—इति पा० ।

३—बाहुल्यादयमिन्द्रशब्दवाच्य इन्द्रो इति पा० ।

४ कथमयं इति पा० ।

५ स्वस्वरूपतया इति पा० ।

गलितमनुष्यादिदेह[1]विषयकल्पिताहंभावसंकोचस्य संपन्नविश्वाकारपराहंभावस्य वामदेवस्य स्वात्मनः सर्वगतत्वावगमान्मनुसूर्यादिप्रपञ्चभावोक्तिः; एवमिन्द्रस्यापीति निश्चीयते; "प्राणोऽस्मि प्रज्ञात्मा" इति प्राणशब्देन परं ब्रह्मोच्यते, तस्यानन्दरूपत्वेन सकलप्राणनहेतुत्वात्; "प्राण एव प्रज्ञात्मानन्दोऽजरोऽमृत" इति श्रवणात्; तथाच "अहं ब्रह्मास्मि, मामुपास्व" इति ब्रह्मदृष्ट्योपदेशः; तथा हि, कृष्णादयोऽप्यर्जुनादीन् प्रत्युपदिष्टवन्तः ॥ ३१ ॥

पुनराशङ्क्याह ॥

॥ जीवमुख्यप्राणलिङ्गान्नेति चेन्नो-
पासात्रैविध्यादाश्रितत्वादिह तद्योगात् ॥ ३२ ॥

ब्रह्मज्ञानोपासनया ब्रह्मभावमुपगतस्य विगलितजीवभावस्य तद्रूपदृष्ट्या स्वस्मिन्नुपास्यत्वसर्वात्मभावोपदेशो न युक्तः; अत्र "त्रिशीर्षाणं त्वाष्ट्रमहनं यावद्ध्यस्मिन् शरीरे प्राणो वसति तावदायुः" इत्यादौ जीवत्वलिङ्गं मुख्यप्राणलिङ्गं च दृश्यते; ततोऽयमुपदेशो न युक्त इति चेत्; नैवं वाच्यम्; यतो जीवप्राणशब्दवाच्यत्वं परमेश्वरस्य समुचितम्; उपासनात्रैविध्याद्धेतोः; अत्र परमेश्वरस्य स्वरूपेण भोक्तृशरीरेण भोग्यरूपेण चोपासनं त्रिविधमिह विवक्षितम्[2]; आत्मतया भोग्याश्रितत्वेन च तदुपपत्तेः; परमेश्वरस्य स्वरूपोपासनमविलम्बेन मुक्तिहेतुः; अन्यदपि द्वयं कालेन; तस्मादिह परमेश्वरात्मकतयेन्द्रस्योपासनसिद्धिरिति निर्णयः ॥ ३२ ॥

इति श्रीकण्ठशिवाचार्यविरचिते ब्रह्म[3]मीमांसाभाष्ये प्रथमस्याध्यायस्य प्रथमः पादः ॥ :: :: ॥

॥ अथ वेदान्तसूत्रशैवभाष्यीयप्रथमाध्यायस्य ॥

॥ द्वितीयपादारम्भः ॥

ब्रह्मबोधकानां वेदान्तवाक्यानामानन्त्यात् प्रतिवाक्यं विचारानुपपत्तेः संदिग्धानां केषांचिद्विचारेण तन्न्यायैस्तादृशानामपि निर्णयो भवतीति कतिचिदेव वाक्यानि तात्पर्यलिङ्गसमन्वयेन ब्रह्मबोधकानि सूत्रितानि[4]; तेषु कतिचित् स्पष्टब्रह्मलिङ्गानि प्रथमपादे विचारितानि, कतिचिदनतिस्पष्टलिङ्गानि द्वितीयपादे विचार्यन्ते ॥

॥ सर्वत्र प्रसिद्धोपदेशात् ॥ १ ॥

छान्दोग्ये श्रूयतेऽस्य विषयः । "मनोमयः प्राणशरीरो भारूपः सत्यसंकल्प आकाशात्मा सर्वकर्मा सर्वकाम" इत्यादि; अत्र "मनोमय" इत्यादि[1]धर्मकः श्रूयमाणः पुरुषः परमेश्वरो वा जीवो वेति संशयः । जीव इति पूर्वपक्षः[2]; कुतः; तस्य सर्वप्रत्यासन्नत्वात्[3]; "अथ खलु क्रतुमयः पुरुषो यथा क्रतुरस्मिँल्लोके पुरुषो भवति; तथेतः प्रेत्य भवति; स क्रतुं कुर्वीत" इति कर्मवशादिह परत्र च परिभ्रमन् जीवः प्रस्तुतः पूर्वं, तदनन्तरं "मनोमय" इति श्रूयते, अत एव मनोमयत्वादिधर्मको जीवः, मनोमयत्वप्राणशरीरत्वादिकं संसारिलक्षणं न परमेश्वरलिङ्गः; सति यथार्थेऽसंकल्प इति सत्यसंकल्पत्वमपि संसारिधर्मत्वेन योजनीयम्; अतः सर्वथा मनोमयत्वादिधर्मको जीव एव, न परमेश्वर, इति प्राप्ते ब्रूमः; परमेश्वर एव मनोमयत्वादिधर्मकः; कुतः; परब्रह्मणः परमेश्वरस्यैवोपक्रमे "सर्वं खल्विदं ब्रह्म, तज्जलानिति शान्त उपासीत" इति सर्वकारणस्योपास्यत्वेनोपदेशात्; श्रुतितात्पर्यं च; "तज्जलानिदं सर्वं" "ब्रह्माधीनजन्मस्थितिध्वंसकमेतत् सर्वं चिदचिद्रूपं ब्रह्म[4] खलु" इति, "शान्त उपासीत ब्रह्म" इति; यथा सागरे संपन्नजन्मस्थितिविलयं बुद्बुदकदम्बकं तद्रूपमेव दृश्यते, तथा शक्तिमति ब्रह्मणि संपन्नजन्मादिकं तन्मयत्वेन तद्व्यतिरिक्तं किंचन नोपलभ्यते; तथाथर्वशिरसि निरूपितमीश्वरेण; "अहमेकः प्रथममासं वर्तामि च भविष्यामि च, नान्यः कश्चिन्मत्तो व्यतिरिक्त" इति; ततश्च तेन "ब्रह्माहम्" इत्यादिना विश्वरूपत्वमात्मनः प्रपञ्चितं; तत्र विश्वरूपत्वे "सोऽन्तरादन्तरं प्राविशत्" इत्यनुप्रवेश एव हेतुरुक्तः; अतो ब्रह्मणोऽपृथक्[5]सिद्धजन्मस्थितिप्रवृत्तिकत्वादस्य जगतस्तद्व्यतिरिक्तता नास्ति; तथाभियुक्ता वदन्ति ।

"शक्तयोऽस्य जगत् कृत्स्नं शक्तिमांस्तु महेश्वरः ।
शक्तिस्तु शक्तिमद्रूपाद् व्यतिरेकं न गच्छति[6] ॥
तादात्म्यमनयोर्नित्यं वह्निदाहकयोरिव ।
शक्तिशक्तिमतोर्यस्मादभेदः सर्वदा स्थितः ॥
अतस्तद्धर्मधर्मित्वात् परा शक्तिः परात्मनः ।
न वह्नेर्दाहिका शक्तिर्व्यतिरिक्ता विभाव्यते" ॥

१—भेद—इति पा० ।

२ त्रिविधम्; इति पा० ।

३ श्रीमद्ब्रह्म—इति पा० ।

४ वाक्यानि सूत्रितानि ब्रह्मबोधकानि तात्पर्यलिङ्गसमन्वयेन इति पा० ।

---

१ मनोमयत्वादि—इति पा० ।

२ पूर्वः पक्ष इति सर्वत्र पा० ।

३ तस्य प्रसक्तत्वात् इति वरपा० ।

४—मेतद्विश्वं यतस्ततः सर्वं विश्वं ब्रह्म इति पा० ।

५—णोऽपृथक्सिद्धिस्थिति—इति पा० ।

६ वाञ्छति इति पा० ।

इत्यादि; वायु[1]संहितायां च,

"शक्त्यादि च पृथिव्यन्तं शिवतत्त्वसमुद्भवम् ।
तेनैकेन तु तद्व्याप्तं मृदा कुम्भादिकं यथा ॥
परेण[2] विविधा शक्तिः प्रबोधानन्दरूपिणी ।
एकानेकस्वरूपेण भाति भानोरिव प्रभा" ॥

"परास्य शक्तिर्विविधैव श्रूयते
स्वाभाविकी ज्ञानबलक्रिया च ।
एको रुद्रो न द्वितीयाय तस्थु-
र्य इमाँल्लोकानीशत ईशनीभिः" ॥

"जननीभिः परमशक्तिभिः" इत्यादयश्च परब्रह्मणः स्वाभाविकानन्तजगज्जननशासनपालनशक्तिमत्त्वं श्रुतयो वदन्ति ।

किं बहुना, श्रुतिस्मृतीतिहासपुराणाभियुक्तसूक्तिप्रामाण्यात् सकलचिदचित्प्रपञ्चमहाविभूतिरूपा[3] महासच्चिदानन्दसत्ता स्वतन्त्रा च देशकालादिपरिच्छेदशून्या स्वाभाविकी परमशक्तिः परब्रह्मणः शिवस्य स्वरूपं च गुणश्च भवति; तद्व्यतिरेकेण[4] परब्रह्मणः सर्वज्ञत्वसर्वशक्तित्वसर्वकारणत्वसर्वनियन्तृत्वसर्वोपास्यत्वसर्वानुग्राहकत्वसर्वपुरुषार्थहेतुत्वादिकं सर्वगतत्वं च न संभवति ।

किंच, महेश्वरमहादेवरुद्रादिपरमाख्यानामभिधेयत्वं च न संभवति ।

तथाच[5] सर्वचिदचित्प्रपञ्चशरीरविशिष्टं ब्रह्म सर्वशब्दवाच्यं, यथा नीलशब्दो न केवलं स्वस्यैव वाचकः, किंतु स्वविशिष्टस्योत्पलस्यापि, तथा प्रपञ्चशब्दोऽपि ब्रह्मणः; तस्मात् सर्वशब्दवाच्यत्वं ब्रह्मणः "सर्वो वै रुद्र" इत्यादय उपपादयन्ति[6]; ततः "सर्वं खल्विदं ब्रह्म" इति सर्वचिदचित्प्रपञ्चशरीरकं ब्रह्माभिधीयते; ततो ब्रह्मरूपत्वात् प्रपञ्चस्य द्वेषाद्यविषयत्वाच्छान्त एव ब्रह्मोपासीतेति । एनमर्थं[7] पौराणिकी भणितिरप्यभिव्यनक्ति[8],

"विग्रहं देवदेवस्य जगदेतच्चराचरम् ।
एनमर्थं न जानन्ति पशवः पाशगौरवात् ॥
विद्येति चेतनां प्राहुस्तथाविद्यामचेतनाम् ।
विद्याविद्यात्मकं सर्वं विश्वं विश्वगुरोर्विभोः ॥
रूपमस्य न संदेहो विश्वं तस्य वशे यतः ।
सत्ये साधौ च सच्छब्दः सद्भिरेव प्रयुज्यते ॥
विपरीते त्वसच्छब्दः कथ्यते वेदवादिभिः ।
सच्चासच्च जगद्विश्वं शरीरं परमेष्ठिनः ॥
वृक्षस्य मूलसेकेन शाखाः पुष्यन्ति वै यथा ।
शिवस्य पूजया तद्वत् पुष्यत्यस्य वपुर्जगत् ॥
आत्मा तस्याष्टमी मूर्तिः शिवस्य परमात्मनः ।
व्यापिकेतरमूर्तीनां विश्वं तस्माच्छिवात्मकम् ॥
देहिनो यस्य कस्यापि निग्रहः क्रियते यदि ।
अनिष्टमष्टमूर्तेस्तन्नात्र कार्या विचारणा ॥
सर्वोपकारकरणं सर्वानुग्रहणं तथा ।
सर्वाभयप्रदानं च शिवस्याराधनं विदुः" ॥

इत्यादिकाः । अतः सर्वाकारत्वाद् ब्रह्मणः, "सर्वं ब्रह्म" इति "शान्त उपासीत" इति समञ्जसमेव; तस्मादुपास्यत्वे[1]नोपक्रमगतं ब्रह्मैव मनोमयत्वादिधर्मकं, न[2] मनोमयत्वादिकं संसारिणो लक्षणम्, उपास्याकारपरिग्रहादस्य परिच्छेदसंभवात्; यदुक्तं "क्रतुमयस्य जीवस्य प्रस्तुतत्वान्मनोमयो जीव" इति; तदयुक्तम्, उत्पत्तिशिष्टब्रह्मावरुद्धायामुपासनायामवान्तरप्राप्तस्य जीवस्य प्रवेशयितु[3]मशक्यत्वात्; यथा विश्वेदेवावरुद्धायामामिक्षायां वाजिनां न प्रवेशः; अतो ब्रह्मैव मनोमयत्वादिधर्मवत्त्वेनोपास्यमिति ॥ १ ॥

उपक्रमगतं ब्रह्मैव मनोमयत्वादिविशिष्टमित्युक्तेऽवान्तरसिद्धस्य जीवस्य प्रसङ्गोऽनर्थकः स्यादित्याशङ्कायामाह ॥

॥ विवक्षितगुणोपपत्तेश्च ॥ २ ॥

सत्यसंकल्पत्वसर्वकामत्वादीनां विवक्षितानां गुणानां ब्रह्मण्येवोपपत्तेस्तदेवोपास्यम्, अवान्तरसिद्धस्य जीवस्योपासकत्वेन तदाकाङ्क्षायोगादिति ॥ २ ॥

इह सामान्येन जीवस्योपास्यत्वं नास्ति, किंतूपासकत्वमिति निरूपितम्; पुनरपि सकलजीवसमष्टिरूपहिरण्यगर्भोपादानभूतस्य नारायणस्यापि विश्वाधिकब्रह्मविषयमुपास्यत्वं नास्तीत्यभिधातु[4]मिदमधिकरणमारभ्यते ॥

---

१ वायवीय—इति पा० ।
२ परास्य इति पा० ।
३ महारूपा इति पा० ।
४—रेके इति पा० ।
५ यथा इति पा० ।
६—यः प्रतिपा—इति पा० ।
७ एतत् सर्वं इति पा० ।
८—व्यञ्जयति इति पा० ।

१ ततो हि समुपास्यत्वे—इति पा० ।
२ न च इति पा० ।
३ प्रवेष्टु—इति पा० ।
४—मुपासकत्वं नोपास्यत्वमित्यभिधातु—इति पा० ।

॥ अनुपपत्तेस्तु न शारीरः ॥ ३ ॥

अस्य महोपनिषदि श्रूयते विषयः । "पतिं विश्वस्यात्मेश्वरं शाश्वतं शिवमच्युतं नारायणं महाज्ञेयम्"इत्यादि । अत्र विश्वपतित्वादिलक्षणयुक्ततया नारायणशब्दवाच्यो मूर्त्यात्मा परमेश्वरोऽन्यो वेति संदेहः । "सहस्रशीर्षं देवम्" इत्यारभ्य सहस्रशीर्षत्वादिविधेयत्वेन[1] नारायणमूर्त्यात्मन एवोद्देश्यत्वेनाभ्यासात्, "समुद्रे तं विश्वशंभुवम्" इति समुद्रशायित्वादितल्लिङ्गाच्च, तत्पर्यायवाचकाच्युतहरिशब्दादिप्रयोगाच्च, नारायण एव मूर्त्यात्मा विश्वपतित्वादिना लिङ्गेन प्रतिपाद्य इति पूर्वः पक्षः । सिद्धान्तस्तु नारायणात्मा परमेश्वर इति; कुतः; विश्वपतित्वादीनां परमेश्वरधर्माणां तदर्थान्तरे नारायणेऽनुपपत्तेः; "पशूनां पतये वृक्षाणां पतये जगतां पतये" इत्यादिना परमेश्वर एव निखिलभुवनाधिपत्यमभ्यस्यते; "एको रुद्रो न द्वितीया यतः स्युर्य इमाल्लोकानीशते ईशिनीभिः" इति रुद्रव्यतिरिक्तस्य जगदीश्वरत्वं निषिध्यते; "विश्वाधिको रुद्र" इति विश्वाधिकत्वं च तस्यैव श्रूयते; अतो विश्वपतित्वादिलक्षणो नारायणात्मा परमेश्वर इति समीचीनम् ॥ ३ ॥

ननु "नारायणात्मा" इति नारायणान्तर्यामी परमेश्वर इति हृदयं; तदयुक्तं; "नारायणपरं ब्रह्म" इति नारायणस्य परब्रह्मभावमुक्त्वा "पद्मकोशप्रतीकाशम्" इत्यादिना पुरुषस्य हृदयपुण्डरीकस्थानमुक्त्वा तस्य मध्ये "वह्निशिखा" इत्यादिना जीवस्वरूपमुक्त्वा तस्याः शिखाया मध्ये परमात्मा व्यवस्थित इति परमात्मत्वेन जीवान्तर्यामित्वेनोपास्यत्वमवगम्यते; "स ब्रह्मा स शिव" इत्यादिना तद्विभूतित्वं ब्रह्मशिवादीनामुच्यते; अतो नारायण एव विश्वपतिः परब्रह्मभूतो जीवान्तर्यामित्वेनोपास्य इति; तदात्मकत्वेन तदधिकत्वं तदुपास्यत्वं च परमेश्वरस्य वक्तुमयुक्तमित्यत आह ॥

॥ कर्मकर्तृव्यपदेशात्[2] ॥ ४ ॥

कर्मत्वं कर्तृत्वं च व्यपदिश्यते, तत्र ध्यातृध्येययोः परमेश्वरनारायणयोः, कथं "पद्मकोशप्रतीकाशम्" इति प्रकृतस्य नारायणस्यैव हृदयमुच्यते; "परमात्मा व्यवस्थित" इति परमेश्वर एव परमात्मा तदन्तर्वर्तितया ध्येयत्वेनोच्यते; ततो ध्यातृत्वेन नारायणस्य ध्येयत्वेन परमेश्वरस्य कर्तृत्वं कर्मत्वं च व्यपदिश्यते; अतो नारायणादन्य एवोपास्यः परमात्मा; "स ब्रह्मा स शिव" इत्यादिना ब्रह्मविष्णुरुद्रेन्द्रादिप्रपञ्चविभूतिविशिष्टत्वं परमेश्वरस्योपदिश्यते; अत्र विष्णोरग्रहणेऽपि कैवल्योपनिषदि श्रूयते; "हृत्पुण्डरीकं विरजम्" इत्यादिना हृदयपुण्डरीकं प्रस्तुत्य,

१–देर्विधेय–इति पा० ।
२–मसार–इति पा० ।

"उमासहायं परमेश्वरं प्रभुं
त्रिलोचनं नीलकण्ठं प्रशान्तम् ।
ध्यात्वा मुनिर्गच्छति भूतयोनिं
समस्तसाक्षिं तमसः परस्तात् ॥
स ब्रह्मा स शिवः सेन्द्रः सोऽक्षरः परमः स्वराट् ।
स एव विष्णुः स प्राणः स कालोऽग्निः",

इत्यादि,तच्चायोऽत्राध्याहार्यः; "यो वै रुद्रः स भगवान् भूर्भुवः स्वर्यश्च ब्रह्मा तस्मै वै नमो नमः, यश्च विष्णुर्यश्च महेश्वर" इत्याद्यथर्वश्रुतिरपि द्रष्टव्या; अत्र विभूतित्वेन ब्रह्मशिवयोर्मध्ये विष्णोरग्रहणं परमेश्वरोपासकतया तस्य प्रस्तुतत्वादित्यविरोधः ॥ ४ ॥

"सहस्रशीर्षा पुरुष"इत्यारभ्य प्रस्तुतस्य पुरुषस्य "पादोऽस्य विश्वा भूतानि" इति निजैकांशजगद्विशिष्टत्वमुच्यते; "सहस्रशीर्षं देवम्" इति स एवात्र नारायण इति बोध्यते[1]; स चायं "नारायणपरं ब्रह्म" इति ब्रह्मत्वेनोच्यते; ब्रह्मैव हि सर्वोपास्यं कथमस्य तथाभूतस्यान्यं प्रत्युपासकत्वमित्यत आह ॥

॥ शब्दविशेषात् ॥ ५ ॥

"नारायणपरं ब्रह्म" इति शब्दविशेष एव नारायणात् परमिति ब्रह्म प्रतिपादयति; अतो नारायणादन्यदेव परं ब्रह्मोपास्यं, परब्रह्मणः सहस्रशीर्षत्वादिविशिष्टपुरुषरूपेण जगदुपादानत्वात्; परब्रह्मात्मकस्य तस्य जगदाकारत्वमिति वक्ष्यामः, "प्रकृतिश्च" इत्यधिकरणे ॥ ५ ॥

नारायणस्योपासकत्वे प्रमाणान्तरमाह ॥

॥ स्मृतेश्च ॥ ६ ॥

"एवमुक्त्वा ततो राजन्[2] महायोगेश्वरो हरिः ।
दर्शयामास पार्थाय परमं रूपमैश्वरम्" ॥

इति स्मृतेश्च महायोगस्वामिनो नारायणस्य परमेश्वरविषयो योगः समाधिरभिव्यज्यते; अत्र,

"अहं यथावदाराध्यः कृष्णेनाक्लिष्टकर्मणा ।
तस्मादिष्टतमः कृष्णादन्यो मम न विद्यते" ॥

इति, अश्वत्थामानं प्रति परमेश्वरवचनं च; तस्मादन्यन्नारायणादुपास्यं परं ब्रह्म ॥ ६ ॥

पुनरनुपपत्तिमाशङ्क्याह ॥

॥ अर्भकौकस्त्वात् तद्व्यपदेशाच्च नेति
चेन्न निचाय्यत्वादेवं व्योमवच्च ॥ ७ ॥

१ साध्यते इति पा० ।
२ महाबाहुर–इति पा० ।

"नीवारशूकवत् तन्वी पीता भास्वत्यनुत्तमा ।
तस्याः शिखाया मध्येऽसौ परमात्मा व्यवस्थितः" ॥

इति स्वल्पवह्निशिखान्तर्वर्तितया स्वल्पाश्रयत्वादल्पव्यपदेशाच्चायं व्यापी न परमेश्वर इति चेत्; न; उपास्यत्वात् तथा व्यपदेशः, न स्वरूपाल्पत्वात्; व्योममहत्त्ववत् स्वरूपमहत्त्वस्य सिद्धत्वात्; यथा घटादिषूपहितस्य व्योम्नस्तदुपाधिवशादल्पत्वं स्वरूपतो महत्त्वं च; ततो न विरोधः ॥ ७ ॥

पुनराशङ्क्य परिहरति ॥

॥ संभोगप्राप्तिरिति चेन्न वैशेष्यात् ॥ ८ ॥

यदुक्तं[1], "नारायणपरं ब्रह्म" इति नारायणात् परं तदुपास्यं ब्रह्म; तदेव हि "ऋतं सत्यं परं ब्रह्म पुरुषं कृष्णपिङ्गलं ऊर्ध्वरेतं विरूपाक्षम्", इत्युच्यते[2]; तत्र[3] परमशक्तिमायाशवलाकारतया कृष्णपिङ्गलं, कृशानुरेतस्कतया चोर्ध्वरेतस्कं, त्रिलोचनतया विरूपाक्षं, पुरि पूर्वोक्तदहरपुण्डरीके शेत इति पुरुषम्, ऋतं सत्यं मनोवाग्विपर्यासरहितं परं ब्रह्म, इति यल्लक्षणम्, अतोऽस्य त्रिलोचनत्वादिलक्षणशरीरसंबन्धाच्छरीरगतसुखादिसंभोगप्राप्तिरिति चेन्न; वैशेष्यात्; सुखदुःखभोगहेतुभ्यो जीवशरीरेभ्यो ब्रह्मरूपस्यास्ति हि वैशेष्यम्; इच्छागृहीतत्वादस्य, तेषां कर्ममूलत्वाच्च; अत एव श्रूयते परमेश्वरः, "अपहतपाप्मा विरजो विमृत्युर्विशोको विजिघत्सोऽपिपासः सत्यकामः सत्यसंकल्प" इति, संसारिशरीरधर्मरहितत्वेन; न चैवं संसारी जीवः; अत एवाप्राकृतानि पापजरामरणशोकादिरहितानि[4] स्वेच्छासंपादितानि लीलामङ्गलरूपाणि परमेश्वरस्य,

"स्थिरेभिरङ्गैः पुरुरूप उग्र"

इत्यादिषु स्थिराणि नित्यानि विज्ञायन्ते; अतः परब्रह्मणः परमेश्वरस्य जीवाद्वैशेष्यान्न तद्वच्छरीरादिगतदोषापत्तिः; अत्र खलूपक्रमादिभिर्लिङ्गैर्विरूपाक्षं ब्रह्म सर्वोत्कृष्टमुपास्यमिति युक्तमेव; तथाहि, उपक्रमे "अणोरणीयान्" इत्यादिना, "महिमानमीशम्" इत्यन्तेन, सकलजन्तुहृदयगुहावर्तित्वेन स्वप्रसादातिशयवीतशोकपुरुषदर्शनविषयत्वेन महिमातिशयवानीशः प्रस्तुतः; पुनः "सप्त प्राणाः प्रभवन्ति तस्मात्" इत्यादिना स एव परमशक्तिमान् प्राणादिजगदुपादानत्वेन निरूपितः; ततश्च, "यो देवानां प्रथमं पुरस्ताद्विश्वाधिको रुद्रो महर्षिर्हिरण्यगर्भं पश्यति जायमानम्", इति विश्वाधिकत्वेन सर्वज्ञत्वेन सकलकार्यप्रथमहिरण्यगर्भजनकत्वेन च निमित्तभूतः परामृष्टः स एव, ततः "परेण नाकम्" इति पराकाशगुहावर्तीत्युक्तः, अफलकर्मानुष्ठायिनां वेदान्ततात्पर्यवेदिनां यतीनां जितेन्द्रियाणां "परामृतात् परिमुच्यन्ति" इति परामृतरूपतया प्राप्यत्वेन वर्णितः[1]; कस्तत्प्राप्तावुपाय इति प्राप्ते "दहरं विपाप्म" इति दहरोपासनमारब्धं; तत्र,

"तस्मिन् यदन्तस्तदुपासितव्यम्"

इति दहरपुण्डरीके यद्वस्तु तदुपास्यमिति सामान्येनोक्तं; तत् किमित्याकाङ्क्षायां,

"यः परः स महेश्वर"

इति महेश्वराख्यं तदुपवर्णितम्; उपास्यं तत् किंरूपमित्याकाङ्क्षायाम्, "ऋतं सत्यम्" इत्यादिना विरूपाक्षत्वादिलक्षणरूपमित्युपसंहृतम्; तत्रावान्तरवाक्यसिद्धो नारायणः पूर्वाधिकरणन्यायादुपासकत्वेन सिद्धः; अत्र सर्वेषामुपासनेऽधिकारस्य सद्भावेऽपि नारायणग्रहणमस्याधिक्यार्थं; तदिहोपास्येन विरूपाक्षेण ब्रह्मणा तदुपासकस्य नारायणस्याभेदभावनया तद्धर्मैरस्य प्रतिपादनमुपादानस्य तदात्मन इति समीचीनम् ॥ ८ ॥

॥ अत्ता चराचरग्रहणात् ॥ ९ ॥

"यस्य ब्रह्म च क्षत्रं च उभे भवत ओदनः, मृत्युर्यस्योपसेचनं, क इत्था वेद यत्र स" इति श्रूयतेऽस्य विषयः । इह मृत्यूपसेचनमिलितब्रह्मक्षत्रोपलक्षितनिखिलचिदचित्प्रपञ्चकवलभोक्तृतया श्रूयमाणः परमेश्वरोऽन्यो वेति संशयः । परमकारुणिकस्य सर्वानुग्राहकस्य सकलभक्षकत्वमनुचितं, हिंसारूपं हि परप्राणविमोचनं, हिंसाप्रवृत्तेः क्रोध एव मूलाङ्कुरः, क्रोधस्यामङ्गलगुणस्य मोह एव मूलकन्दः, तस्य सर्वसंहार[2]निदानस्य तम एव प्रकृतिः; अतस्तामसः सर्वसंहर्ता; तामसत्वं नामावृतज्ञानादिमत्त्वान्निष्प्रकाशत्वं, सर्वसंहर्तृ ब्रह्मेत्युक्ते तस्य नित्यशुद्धस्य निरुपाधिक[3]मङ्गलाकारस्य निःसंसारकलङ्कस्याज्ञानतमोमोहक्रोधादिकामङ्गलगुणसंसर्गप्रसङ्गः[4]; स्वरूपलक्षणतया निर्णीतं सर्वज्ञत्वं नित्यतृप्तत्वादिकमनर्थकमेव स्यात्; तस्माद् ब्रह्मणोऽन्य एतादृशगुणः संहर्ता भवतीति पूर्वः पक्षः; सिद्धान्तस्तु ब्रह्मैव सर्वसंहर्तृत्वेन श्रूयते; कुतः, चराचरग्रहणात्; यदुक्तं "निखिलचराचरप्रपञ्चभोक्तृत्वमयुक्तम्", इति, तदेव ब्रह्मत्वे लक्षणं, परिच्छिन्नशक्तेर्जीवस्य सकलचराचरसंहरणसामर्थ्याभावात्; "तस्मा उपसंहर्त्रे[5] महाग्रासाय वै नमः",

१ उक्तं हि इति पा० ।
२ इत्यवगम्यते इति पा० ।
३ तदत्र इति पा० ।
४ पापजरामरणादिशून्यानि इति पा० ।

१ सिद्धः; इति पा० ।
२ संसार—इति पा० ।
३ निरवधिक—इति पा० ।
४—संकरप्रसङ्गः इति पा० ।
५—दुपसंहर्त्रे इति पा० ।

इति परमेश्वरस्याथर्वशिरसि श्रूयते सर्वसंहर्तृभावो, न क्वचिज्जीवस्य; "य इमा न्विश्वा भुवनानि जुहुत्" इति ब्रह्मणो निजप्रकाशवह्नौ निखिलभुवनहव्यहोतृत्वमवगम्यते, नचैवमस्ति जीवस्य सामर्थ्यं हव्यकोटिनिविष्टस्य; स्वेतरमखिलं चराचरं चिदचित्प्रपञ्चं स्वात्मनि संहृत्य यदा वर्तते परमेश्वरस्तदा सर्वमिदं निरस्तचन्द्रसूर्यादिप्रकाशतया विध्वस्तरात्रिदिनादिकालविभागमपगतनामरूपविशेषतया स्थूलसूक्ष्मदेवमनुष्यादिव्यवहारशून्यं तमोमात्रं वर्तते, स एक एव परमेश्वरो निरङ्कुशप्रकाशः सर्वसाक्षी तदानीमपि परिशिष्यते; तथाहि श्रुतिः,

"यदा तमस्तन्न दिवा न रात्रि-
र्न सन्न चासच्छिव एव केवलः" ।

इति[1]; अत्र "न सन्न चासत्" इति सदतोः पशुपाशयोर्न स्वरूपसत्ता निषिध्यते, किंतु नामरूपविभागार्हस्थूलत्वम् ।

ननु नित्यप्रकाशे शिवे परब्रह्मणि सत्यपि कथं तमोमयं जगदिति चेत्; न; स्वयंप्रकाशस्य सर्वसाक्षिणः शिवस्य का हानिः; नामरूपशून्यतया ग्रहणायोग्येषु विषयेषु विहत[2]करणशरीरशक्तीनां जीवानां प्रपञ्चग्रहणं नास्ति; मलतिरोहितस्वज्ञानकरणतया शिवस्य स्वप्रकाशरूपस्यापि पूर्वमिव दर्शनाभावाच्चिरस्त[3]समस्तकार्यविशेषज्ञाना परमसुषुप्तिमयी महावस्था तम इत्युच्यते; तथाहि स्मृतिः,

"आसीदिदं तमोभूतमप्रज्ञातमलक्षणम्" ।

इति; नामरूपविभागानर्हसूक्ष्मचिदचित्प्रपञ्चशक्तिविशिष्टतया शिवः केवल इत्युच्यते; स पुनः सर्गकाले स्वसंकल्पमात्रेण समवायिकारणनिरपेक्षमेव स्वस्मात् प्रथमशक्तिपरिस्फुरणपूर्वकं तत्तन्नामविशिष्टमेव सकलं चिदचिदर्थजातं सृजति; प्रकाशयति; तथाभियुक्तसूक्तिः,

"चिदात्मैव हि देवोऽन्तःस्थितमिच्छावशाद्बहिः ।
योगीव निरुपादानमर्थजातं प्रकाशयेत्" ॥

इति ।

ननु,

"मायां तु प्रकृतिं विद्यान्मायिनं तु महेश्वरम्" ।

"तस्माद्विराडजायत" इत्यादिश्रुत्या मायापुरुषयोरुपादानत्वं श्रूयते; कथं निरुपादानत्वमिति चेत्; सत्यम्; यथा घटनिष्पत्तौ कुलालस्य स्वशरीरपृथक्त्वेन मृत्पिण्ड उपादानं दृश्यते, तथा न परमेश्वरात् पृथक् सिद्धं मायाद्युपादानं, मायादिरूपात् परमेश्वराज्जगदुत्पत्तेः; अतो न विरोधः[1]; तत्तत्स्व[2]रूपापृथगवस्थानसूक्ष्ममायापुरुषः पर एव स्वयमुपादानमपीत्युच्यते; तथाथर्वशिखायाम्, "ध्यायीतेशानं प्रध्यायितव्यं सर्वमिदं ब्रह्म[3]विष्णुरुद्रेन्द्रास्ते संप्रसूयन्ते सर्वाणि चेन्द्रियाणि सह भूतैर्न कारणं कारणानां धाता ध्या[4]ता कारणं तु ध्येयः सर्वैश्वर्यसंपन्नः सर्वेश्वरः शंभुराकाशमध्यग" इति श्रूयते; ततः सर्वभूतानां यत्र संहारस्तत एव सर्वेषामुत्पत्तिरिति, अनन्तानां तेषां यावत् संहृतिस्तावत् तत्रैवानन्तशक्तौ शिवे स्थितिः, इति सर्वसंहर्ता शिव एव ब्रह्मशब्दाभिधेयः; यदुक्तं "संहारस्य हिंसारूपत्वात् तन्मूलक्रोधाद्यनर्थगुणसंबन्धो ब्रह्मणो भवेत्" इति, तदविचारविलासः; क्रोधादिमूलस्य तमोगुणस्य प्राकृतधर्मत्वात्;

"उमासहायं परमेश्वरं प्रभुम्" ।

इत्यारभ्य

"समस्तसाक्षिं तमसः परस्तात्" ।

इति श्रुतिरेव भगवती प्रमाणं; परमेश्वरस्य तमसः परत्वेन पौराणिकी भणितिरपि परमेश्वरे मोहादिनिवर्तकानां ज्ञानादीनां नित्यसंबन्धमाह,

"ज्ञानं विराग ऐश्वर्यं तपः सत्यं क्षमा धृतिः ।
स्रष्टृत्वमात्मसंबोधो ह्यधिष्ठातृत्वमेव च ॥
अव्ययानि दशैतानि नित्यं तिष्ठन्ति शंकरे" ।

इति;

अशेषविषयामोषशुद्धबुद्धिविजृम्भणः ।
आत्मशक्त्यमृतास्वादप्रमोदरसिको युवा ॥
अनन्तानन्दसंदोहमकरन्दमधुव्रतः ।
औदार्यवीर्यगाम्भीर्यमाधुर्यमकरालयः ॥
अखण्डजगदण्डानां पिण्डीकरणपण्डितः ।

इत्यादि च; असंकुचितविभवः परमेश्वरो हि सिसृक्षुः "सोऽकामयत बहु स्याम्" इति बहुप्रपञ्चभावनायात्मनो मायालक्षणमिच्छारूपां शक्तिमाश्रयति; "स तपोऽतप्यत" इति तपःस्वरूपिकया ज्ञानात्मिक[5]या शक्त्या सकलजीवकर्मानुगुणतत्तच्छरीरसामग्रीमालोचयति; आलोच्य च संकल्पितसकलकरणविदग्धया क्रियाशक्त्येदं सर्वं सृजतीतीच्छाशक्तिभित्तौ निखिलजगच्चित्रमुन्मीलयति; तत् सृष्ट्वा "तदेवानुप्रावि-

१ इत्याविका इति पा० ।
२ विगलित—इति पा० ।
३ दर्शनं नास्ति; तस्माच्चिरस्त—इति पा० ।

१—ज्जगदुत्पद्यत इत्यविरोधः इति पा० ।
२ ततः स्व—इति पा० ।
३—ध्यानं तत्र ब्रह्म—इति पा० ।
४—नां ध्याता इति पा० ।
५—स्वरूपया ज्ञानरूप इति पा० ।

शत्" इति सकलकार्यजातमनुप्रविश्य शक्तित्रयसंबन्धेन त्रिगुणभिन्नमूर्तित्रयादिप्रपञ्चरूपो भवति; तदिह सर्वशक्तेः सर्वज्ञस्य शिवस्य महिमा केन विज्ञायते; अतः सर्वसंहर्ता परमेश्वर इति ॥ ९ ॥

॥ प्रकरणाच्च ॥ १० ॥

"महान्तं विभुमात्मानं मत्वा धीरो न शोचति"।

"नायमात्मा प्रवचनेन लभ्य" इति परमेश्वरस्यैव प्रकरणम्; अतश्च परं ब्रह्म परमेश्वरः सर्वसंहर्ता नान्य इति सिद्धम् ॥ १० ॥

इहाधिकरणे सर्वसंहर्तृत्वलक्षणेन सिद्धस्य परमेश्वरस्य "द्वा सुपर्णा" इत्यादिना प्रसिद्धं स्वविभूतिजीवसाहचर्यमभिव्यञ्जयितुमधिकरणारम्भः ॥

॥ गुहां प्रविष्टावात्मानौ हि तद्दर्शनात् ॥ ११ ॥

"ऋतं पिबन्तौ सुकृतस्य लोके
गुहां प्रविष्टौ परमे परार्धे।
छायातपौ ब्रह्मविदो वदन्ति
पञ्चाग्नयो ये च त्रिणाचिकेताः" ॥

इति श्रूयतेऽस्य विषयः। इह सुकृतस्थाने परार्धे ब्राह्मणादिशरीरे हृदयगुहां प्रविष्टौ कर्मफलभोक्तारौ छायातपाविव विलक्षणौ कौचिच्छ्रूयेते; तावेतौ बुद्धिजीवौ जीवपरमेश्वरौ वेति संदेहः। बुद्धिजीवावेव तौ; कुतः; "ऋतं पिबन्तौ" इति भोक्तृत्वावगमात्; परमेश्वरस्य न भोक्तृत्वम्, "अनश्नन्नन्योऽभिचाकशीति" इति दर्शनात्; बुद्धिजीवयोर्भोक्तृत्वं प्रसिद्धमेव;

किंच, जीवेश्वरयोश्चेतनरूपयोश्छायातपवदतीव वैलक्षण्यं नास्ति; बुद्धेरचेतनत्वादस्ति जीवाद्वैषम्यं; तदेवं बुद्धिजीवाविति प्राप्ते ब्रूमः। जीवपरमेश्वरावेव गुहागतौ; तयोरेव,

"तं दुर्दर्शं गूढमनुप्रविष्टं गुहाहितं गह्वरेष्ठं पुराणम्"।

इति गुहाप्रवेशदर्शनात्; यदुक्तम्, "ईश्वरस्य न भोक्तृत्वम्" इति; तदपि न युज्यते; "प्राणारामं मनआनन्दम्", इति ब्रह्मणोऽप्यात्मारामस्य मनोमात्रविषयस्वरूपानन्दभोगदर्शनात्; तथा पुराणे च,

"आत्मगतस्यमृतास्वादप्रमोदरसिको युवा।
"अनन्तपरमानन्दमकरन्दमधुव्रतः" ॥

इत्यादि; जीवस्य स्वकर्मफलभोक्तृत्वं प्रसिद्धम्; एवंच तयोर्भोगस्य साधारण्येन श्रवणेऽपि तत्र विशेषः समाश्रीयते, भोक्तृविशेषात्; यथा राजभृत्यावन्नं भुञ्जाते, इत्यत्र तत्तदुचितान्नविशेषः; यदुक्तं "तयोर्न वैषम्यमिति"; तन्न; यतो "नित्यो नित्यानां चेतनश्चेतनानाम्" इत्यादिश्रुत्या नित्यत्वचेतनत्वादिना जीवेश्वरयोः साम्येऽपि वैषम्यमनादिमलसंबन्धभावाभावाभ्यां संभवति; "ज्ञाज्ञौ द्वावजावीशानीशौ" इत्यादिश्रुत्या ज्ञत्वाज्ञत्वस्वातन्त्र्यास्वातन्त्र्यादिधर्मवैषम्यं चावगम्यते।

ननु कथमेतयोः शरीरसंबन्धे समानेऽपि कस्यचिदज्ञत्वादिकानर्थसंबन्धः, कस्यचिदनर्थाभावः, इति चेन्न; सुखदुःखयोर्नैकाश्रयत्वं प्रयोजकं, किंतु स्वातन्त्र्यास्वातन्त्र्यमेव; तथाहि श्रुतिः, "समाने वृक्षे पुरुषो निमग्नोऽनीशया शोचति मुह्यमानो जुष्टं यदा पश्यत्यन्यमीशं तदास्य महिमानमेति वीतशोक" इति; अस्याः सांप्रदायिकोऽर्थः; जीवोऽयमनादिना कर्मनिगडेन बद्धस्तत्तत्फलभोगानुगुण[1]गुहामायामयबहुकलेवरप्रविष्टो दुर्वारतापसंघातमनुभवन्ननीशया पारवश्येन तद्रूपोहितुमकुशल एव मुह्यमानः शोचति, महामोहजलधिमग्नः शोकमनुभवन्ननुवर्तते[2]; स्वप्रेरकतया स्वजुष्टं सर्वानुग्राहकमीशमुमासहितं यदा पुनरस्य प्रसादेन पश्यति, अपरोक्षेण जानाति, तदास्य महिमानं निरतिशयानन्दमपहृतशोकः प्राप्नोति; अतः स्वतन्त्रस्य शिवस्यानादिमुक्तस्य शरीरसंबन्धेऽपि जीववच्च तद्गतदोषापत्तिः; तस्माज्जीवपरमेश्वरौ गुहागतौ ॥ ११ ॥

पुनरुपपत्तिमाह ॥

॥ विशेषणाच्च ॥ १२ ॥

किंच, जीवपरमेश्वरावस्मिन् प्रकरणे विशेष्येते; "न जायते म्रियते वा विपश्चित्" इत्यादिना जीवः; "अणोरणीयान् महतो महीयान्" इत्यादिना परमेश्वरः; एतद्विशेषणं जीवबुद्धिपक्षे कथं न संभवतीति; ततो जीवपरमेश्वरावेव गुहां प्रविश्य प्रेरकभावेनाश्रिताविति निर्णयः ॥ १२ ॥

हृदयगुहान्तर्वर्तितयोपास्यपरमेश्वरस्येहोपासनस्थानान्तर[3]मुच्यते ॥

॥ अन्तर उपपत्तेः ॥ १३ ॥

छान्दोग्ये श्रूयतेऽस्य विषयः। "य एषोऽक्षिणि पुरुषो दृश्यते, एष आत्मेति होवाच, एतदमृतमभयम्, एतद् ब्रह्म" इत्यादि; इहामृतत्वादिलक्षणोऽक्ष्यन्तः श्रूयमाणः पुरुष ईश्वरो वान्यो वेति संशये परमेश्वरादन्य इति वदामः, परमेश्वरस्य "दहरं विपाप्म[4] पद्मकोशप्रतीकाशम्" इत्यादिषु हृदयपुण्ड-

१—स्वभोग्यफलानुगुण—इति पा०।
२ महामोहनिबन्धनशोकजलधिमग्नो वर्तते; इति पा०।
३ हृदयगुहागतस्योपास्यतया परमेश्वरस्य पुनरिहो-इति पा०।
४ विपापं इति पा०।

रीक एव संनिधानश्रवणात्; जीवस्य तु रूपादिग्रहणे चक्षुरिन्द्रियप्रवेशोऽस्ति, मनःसंबन्धात्; स एवाक्षिपुरुषः; अथवा छायापुरुष इति प्राप्ते निरूपयामः, परमेश्वर एवात्यन्तःपुरुष इति, निरुपाधिकामृतत्वाभयत्वादीनामस्मिन्नेवोपपत्तेः ॥ १३ ॥

यदुक्तम्, "अत्यन्तःस्थितिरीश्वरस्य न श्रुता" इति, तत्राह ॥

॥ स्थानादिव्यपदेशाच्च ॥ १४ ॥

"यश्चक्षुषि तिष्ठन्, यश्चक्षुषोऽन्तरः, यं चक्षुर्न वेद, यस्य चक्षुः शरीरं, यश्चक्षुषोऽन्तरो यमयति, एष त आत्मान्तर्याम्यमृतः", इत्यादिश्रुत्या चक्षुःस्थितिनियमनादिकमीश्वरस्य व्यपदिश्यते; अतः पर एवायमीश्वरः[1] ॥ १४ ॥

छायापुरुषपक्षे[2] पुनरनुपपत्तिमाह ॥

॥ सुखविशिष्टाभिधानादेव च ॥ १५ ॥

"कं ब्रह्म, खं ब्रह्म", इति पूर्वमस्य सुखविशिष्टताभिधानादेवायमीश्वरः; नहि छायापुरुषे सुख[3]संभवः ॥ १५ ॥

यदुक्तम्, "अक्षिपुरुषस्य जीवरूपत्वं"[4] तत्राह ॥

॥ अत एव सद्ब्रह्म * ॥ १६ ॥

यत एव भवभयभीतायोपकोशलाय ब्रह्मजिज्ञासवे "कं ब्रह्म, खं ब्रह्म" इत्युपक्रम्योपदिष्टम्; यद्वाचकं तदेव खं यदेव खं तदेव कमिति[5]; अत एव खशब्दाभिधेय आकाशः परमेव ब्रह्म; किमीदृशोपपत्तिरस्ति जीवस्य; नहि जीवे निरतिशयसुखसंभवः ॥ १६ ॥

अतो यदेव पूर्वमपरिच्छिन्नसुखरूपतया प्रकृतं ब्रह्म तदेवात्याधारतया प्रतिपाद्यत इत्यत्यन्तः पुरुषः परमेश्वर इति पूर्वपक्षे पुनरियमनुपपत्तिरित्याह[6] ॥

॥ श्रुतोपनिषत्कगत्यभिधानाच्च ॥ १७ ॥

श्रुतब्रह्मस्वरूपाणामधिगन्तव्याया अर्चिरादिगतेरक्षिपुरुषं श्रुतवतो"ऽर्चिषमेवाभिसंभवन्त्यर्चिषो हर इत्यादि, तत् पुरुषोऽमानवः स एतान् ब्रह्म गमयति, एष देवपथो ब्रह्मपथः, एतेन प्रतिपद्यमाना इमं मानवमावर्तं नावर्तन्त" इत्यन्तेनाभिधानान्नासौ जीवश्छायापुरुषो वा, किंत्वीश्वर[7] एव ॥ १७ ॥

१ अतः परमेश्वर एवायम् इति पा० ।

२ जीवपक्षे इति पा० ।

३ न संसारिणि जीवे निरतिशयसुख–इति पा० ।

४ छायारूपत्वं इति पा० ।

* शंकरमते एतत् सूत्रं न भवति ।

५ यद्वाचकं तदेव खमिति पा० ।

६ परमेव ब्रह्म; तच्छायापुरुषस्य किमीदृशोपपत्तिरस्ति जीवस्य वा ॥ १६ ॥ अतोऽत्यन्तः पुरुष ईश्वर इति जीवपक्षे परमियमनुपपत्तिरित्याह इति पा० ।

७ श्रुतवतोऽर्चिषमभिसंभवन्तीत्यादिनाभिधानान्नासौ जीव, ईश्वर इति वरपा० ।

॥ अनवस्थितेरसंभवाच्च नेतरः ॥ १८ ॥

अस्य महोपनिषदि श्रूयते विषयः ।

"अङ्गुष्ठमात्रः पुरुषोऽङ्गुष्ठं चैव समाश्रितः ।
ईशः सर्वस्य जगतः प्रभुः प्रीणाति विश्वभुक्" ॥

इत्यादि; इहाङ्गुष्ठमात्रत्वादिविशिष्टः परमेश्वरो वान्यो वेति संशयः । प्राणाग्निहोत्रप्रकरणादङ्गुष्ठमात्र इत्यल्पत्वव्यपदेशादयं प्राणवायुरेव पञ्चानामाहुतीनां भोक्तावगम्यते; न चास्य भोक्तृत्वानुपपत्तिः;

"आपश्च पृथिवी चान्नमत्तारौ वह्निमारुतौ" ।

इत्यादिषु वायोरपि भोक्तृत्वप्रसिद्धेः सर्वथायं प्राणवायुरिति पूर्वः पक्षः । परमेश्वर एवेति सिद्धान्तः । सकलजगदीशत्वविश्वभुक्त्वादीनां धर्माणामन्यत्राभिधानेऽनवस्थानादसंभवाच्च[1]; तत्र तेषामत ईश्वर एवैतादृशः; तस्य प्राणरूपत्वेनाप्युपास्यत्वमुच्यते; "प्राणानां ग्रन्थिरसि रुद्रो मा विशान्तक" इति प्राणाधारत्वेन तस्य श्रवणात्; अङ्गुष्ठमात्रपरिमाणस्योपास्यत्वादित्यविरोधः । प्राणवायोर्भोक्तृत्वसिद्धावपि विश्वभोक्तृत्वं न संभवति; अतोऽयमीश्वर एव प्राणाग्निहोत्राराध्यत्वेन प्राणरूपः प्रतिपाद्यत इति ॥ १८ ॥

सर्वज्ञस्य सर्वशक्तेः सर्वानुग्राहकस्य विभोरपि शिवस्य परब्रह्मणः सवितृमण्डलपुरुषहृदयपुण्डरीकादिषूपासनाय स्थितिरुपपादिता; सर्वत्र तां प्रतिपादयितुमिदमधिकरण[2]मारभ्यते ॥

॥ अन्तर्याम्यधिदैवादिषु तद्धर्मव्यपदेशात् ॥ १९ ॥

अन्तर्यामिब्राह्मणेऽस्य विषयः श्रूयते। "यः पृथिव्यां तिष्ठन्, यः पृथिव्या अन्तरो, यं पृथिवी न वेद, यस्य पृथिवी शरीरं, यः पृथिवीमन्तरो यमयति, स त आत्मान्तर्याम्यमृत" इत्येवं पृथिवीमारभ्य प्रतिपर्यायमव्यक्तात्मतत्त्वपर्यन्तमखिलवस्त्वन्तर्यामितया श्रूयमाणः परमेश्वरो जीवो विराट् पुरुषो वा प्रधानं वेति संशयः । स्वोपार्जितविचित्रफलभोगाय सकलभूतेन्द्रियानुप्रवेशो जीवस्य युज्यते[3]; सकलचेतनोपादानतया सर्वभूतानुप्रवेशो विराट्पुरुषस्य युक्तः; अथवा महदादिरूपेण परिणतत्वात् प्रधानस्य सर्वव्यापकत्वमुचितं; "विश्वाधिको रुद्र" इति विश्वाधिकत्वेन निखिलविकारोत्तीर्णस्य विकाररूपप्रपञ्चानुप्रवेशो न घटते; ततः परमेश्वरमन्तरेण जीवादिष्वेकतमः स्यादन्तर्यामीति[4] पूर्वपक्षे प्राप्ते ब्रूमः । पृथिव्या-

१ यतोऽनवस्था स्यात्, तदसंभवाच्च इति पा० ।

२–करणान्तर–इति पा० ।

३ विद्यते इति पा० ।

४–ष्वेकतमस्यान्तर्यामित्वमिति इति पा० ।

द्यन्तर्यामितया श्रूयमाणः परमेश्वर एव, सर्वान्तरत्वादितद्धर्मव्यपदेशात्; अथर्वशिरसि च, "सोऽन्तरादन्तरं प्राविशत्", इति परमेश्वरस्यैव सर्वात्मतयानुप्रवेशदर्शनात्; "एष त आत्मान्तर्याम्यमृत" इति शिव एवानादिमुक्तोऽमृत इत्युच्यते; "एतानि वा अमृतस्य नामधेयानि" इति श्रवणाद्; यथा "विश्वाधिको रुद्र" इति विश्वाधिकत्वं परमेश्वरस्य श्रूयते, तथा विश्वरूपत्वमपि; "सर्वो वै रुद्र" इत्यादिषु सर्वविकारानुप्रवेशेऽपि तद्विकारस्पर्शलेशोऽपि नास्तीति खलु प्रतिपर्यायममृतशब्दप्रयोगः; अथर्वशिरसि च "यो वै रुद्रः स भगवान् भूर्भुवः स्वर्यश्च ब्रह्मा तस्मै वै नमो नम"इत्यादिना[1] ब्रह्मविष्णुरुद्रोमालक्ष्मीसरस्वतीगणेशस्कन्देन्द्रादिलोकपालभूरादिसप्तलोकपृथिव्यादिपञ्चभूतसूर्यसोमग्रहनक्षत्रकालादिरूपेण प्रत्येकमेवमभ्यासतो निरूप्यते परमेश्वरः; तत्रापि सकलचिदचित्तत्त्वानुप्रवेशादस्यापुरुषार्थसंबन्धो भवेदिति शङ्कायां प्रतिपर्यायमैश्वर्यादिमङ्गलगुणसंबन्धाभिधायिभगवच्छब्दप्रयोगः कृतः; ततः सर्वाधिकः सर्वात्मा च शिवः परमेश्वर इति युक्तमेव ॥ १९ ॥

यच्छङ्कितं प्रधानादीनामन्तर्यामित्वमुचितमिति, तत् परिहरति ॥

॥ नच स्मार्तमतद्धर्माभिलापाच्छारीरश्च ॥ २० ॥

नच स्मार्तं प्रधानमन्तर्यामीति श्रुतं, तस्य विकारजडत्वादिधर्मानभिलापात्, न शारीरो विराड्पुरुषश्च, तस्य सकलनियामकत्वाद्यनुपपत्तेः ॥ २० ॥

जीवश्च न भवतीत्याह ॥

॥ उभयेऽपि हि भेदेनैनमधीयते * ॥ २१ ॥

उभये काण्वा माध्यंदिनशाखिनश्च "यो विज्ञाने तिष्ठन्, य आत्मनि तिष्ठन्" इत्यादिना जीवादन्तर्यामिणं भेदेनाधीयते; ततः परमेश्वरस्यैव सकलान्तर्यामित्वं, न प्रधानविराट्पुरुषजीवानामिति सिद्धम् ॥ २१ ॥

इह प्रत्यक्षपृथिव्यादिरूपत्वेन प्रतिपादितस्य परमेश्वरस्य तद्वद्दृश्यत्वादिकं नास्तीति प्रतिपादयितुमिदमधिकरणमवतार्यते ॥

॥ अदृश्यत्वादिगुणको धर्मोक्तेः ॥ २२ ॥

अथ परा यया तदक्षरमधिगम्यते; "यत् तदद्रेश्यमग्राह्यमगोत्रमवर्णमचक्षुःश्रोत्रं तदपाणिपादं नित्यं विभुं सर्वगतं सुसूक्ष्मं तदव्ययं तद्भूतयोनिं[2] परिपश्यन्ति धीरा"इत्यादि श्रूयते-

१ इति रीत्या इति पा०।

* शंकरमते शारीरश्चोभयेऽपि भेदेनैनमधीयते इत्याकारकमेकं सूत्रं विभावनीयम् ।

२–दद्रेश्यं तद्भूतयोनिं इति पा० ।

ऽस्य विषयः । अत्राक्षरं[1] प्रधानं जीवः परमेश्वरो वेति संदेहः। प्रधानमत्राक्षरं, तस्य[2] महदादिपरिणामिनो[3] भूतयोनित्वसंभवात्; अथवा जीवः; तस्य हि "अक्षरं प्रधानममृताक्षरम्" इति श्रुतेरक्षरशब्दवाच्यत्वमुचितं; स्वकर्मवशेन[4] महाभूतयोनित्वं च; अतस्तयोरन्यतरदक्षरमिति प्राप्ते ब्रूमः; परमेश्वर एवाक्षरं[5] "यः सर्वज्ञः सर्वविद्यस्य ज्ञानमयं तप" इत्यादिना तद्धर्मोक्तेः; न हि परमेश्वरादन्यस्मिन् सर्वज्ञत्वादिकं संभवति; यदुक्तं "भूतयोनित्वं जीवप्रधानयोः संभवति" इति; तदयुक्तं[6]; तयोरचेतनासर्वज्ञयोस्तत्सामर्थ्याभावात् ॥ २२ ॥

पुनरत्र जीवप्रधानयोरनुपपत्तिमाह ॥

॥ विशेषणभेदव्यपदेशाभ्यां च नेतरौ ॥ २३ ॥

अत्रैकविज्ञानेन सर्वविज्ञानं प्रतिज्ञायते; "कस्मिन्नु भगवो विज्ञाते सर्वमिदं विज्ञातं भवति" इति; तच्चान्यच्चैवंरूपं विशेषणं, तद्व्यपदेशाच्च न प्रधानमक्षरम्[7], "अक्षरात् परतः पर" इति जीवाद्भेदव्यपदेशाच्च ॥ २३ ॥

॥ रूपोपन्यासाच्च ॥ २४ ॥

"अग्निर्मूर्धा चक्षुषी चन्द्रसूर्यौ दिशः श्रोत्रे वाग्विवृताश्च वेदाः । वायुः प्राणो हृदयं विश्वमस्य पद्भ्यां पृथ्वी ह्येष सर्वभूतान्तरात्मा" इत्यक्षरस्य[8] त्रैलोक्यरूपत्वमुपन्यस्यते; अतश्च सकलात्मा परमेश्वर एवात्राक्षरपदाभिधेयः ॥ २४ ॥

प्राणाधारत्वेन पूर्वमुपास्यतयोक्तस्य पुनर्जाठराग्निरूपेणोपास्यत्वमाह ॥

॥ वैश्वानरः साधारणशब्दविशेषात् ॥ २५ ॥

"यस्त्वेतमेवं प्रादेशमात्रमभि चिदात्मानं वैश्वानरमुपास्ते, स सर्वेषु लोकेषु सर्वेष्वात्मस्वन्नमत्ति"इत्यादि[9] छान्दोग्येऽस्य विषयः श्रूयते; अत्रोपास्यतयोक्तो वैश्वानरः[10] परमेश्वरोऽन्यो वेति संदेहः । पूर्वपक्षन्यायैस्तु वैश्वानरशब्देन जाठराग्निरुच्यते; "अयमग्निर्वैश्वानरो येनेदमन्नं पच्यते, यदिदमद्यते, तस्यैष घोषो भवति, यमेतत्कर्णावपिधाय शृणोति, स यदोत्क्रमिष्यन् भवति, नैनं घोषं शृणोति"जाठराग्नौ प्रयोगदर्शनान्महाभूत-

१ अत्राक्षरशब्दवाच्यं इति वरपा० ।

२ अत्राक्षरशब्दवाच्यं प्रधानं "यद्भूतयोनिम्" इति तस्य इति पा० ।

३–परिणामेन इति वरपा० ।

४–प्रवेशेन इति पा० ।

५ एवाक्षरशब्दवाच्यः, इति वरपा०

६–युक्तमेव इति पा०

७–मक्षरशब्दवाच्यं इति वरपा० ।

८–मूर्धात्यदिनाक्षरस्य इत्येव पा० ।

९ यस्त्वेवं प्रादेशमात्रमात्मानं वैश्वानरमुपास्ते, स सर्वेषु लोकेष्वित्यादिकं इति प०० ।

१०–तया वैश्वनरशब्दवाच्यः इति वरपा० ।

तृतीयोऽग्निर्वा स्यात् "एष वा अग्निर्वैश्वानर"इत्यादौ[1] वैश्वानरशब्दस्याग्नौ प्रसिद्धत्वादग्निर्देवता वा स्यात्; "वैश्वानरं द्वादशकपालं निर्वपेत्, पुत्रे जात" इत्यादिष्विष्टिदेवतात्वेन फलदातृत्वश्रवणात्; नतु परमेश्वरः; प्रादेशमात्रमिति परिच्छेदावगमादिति ।

अत्रोच्यते[2] ।

परमेश्वर एव वैश्वानरः[3] कथं वैश्वानरशब्दस्याग्नौ साधारण्येऽप्यस्मिन् प्रकरणे "को न आत्मा, किं ब्रह्म,आत्मानमेवेमं वैश्वानरं संप्रत्यध्येषि, तमेव नो ब्रूहि"इत्यादिषु परमेश्वरासाधारणब्रह्मशब्दादिभिर्विशेष्यमाणत्वाच्च[4] जाठराग्न्यादिषु तद्विशेषणं संभवति; अतः परमेश्वर एव वैश्वानरः॥२५॥

परमेश्वरपक्षे प्रमाणान्तरमाह ॥

॥ स्मर्यमाणमनुमानं स्यादिति ॥ २६ ॥

"अग्निर्मूर्धा चक्षुषी चन्द्रसूर्यौ" इत्यादिषु परमेश्वरस्य द्युलोकादिपृथिव्यन्तरूपत्वमुक्तं; तदिह 'प्रत्यभिज्ञायमानं'[5] तस्य परमेश्वरत्वे लिङ्गम् ॥ २६ ॥

॥ शब्दादिभ्योऽन्तःप्रतिष्ठानान्नेति
चेन्न, तथा दृष्ट्युपदेशादसंभवात्
पुरुषमपि चैनमधीयते ॥ २७ ॥

"स एषोऽग्निर्वैश्वानरो हृदयं गार्हपत्यो मनोऽन्वाहार्यपचन आस्यमाहवनीयः,तद्यद् भक्तं प्रथममागच्छेत् तद्धोमीयं स यां प्रथमामाहुतिं जुहुयात्" इत्यादिषु प्रतिपन्नेभ्योऽग्नित्रयकल्पनप्राणाहुत्याधारादिभ्यः "स यो हैतमग्निं वैश्वानरं पुरुषविधं पुरुषेऽन्तःप्रतिष्ठितं वेद" इति श्रुतात् पुरुषान्तःप्रतिष्ठितत्वलिङ्गाच्च जाठरोऽग्निरेव नासौ[6] परमेश्वर इति चेन्न; जाठराग्निरूपतयोपास्यत्वेनोपदेशात्, केवलस्य जाठराग्नेस्त्रैलोक्यशरीरत्वाद्यसंभवाच्च ;

किंच, "स एषोऽग्निर्वैश्वानरो यत् पुरुष"इत्येनं वैश्वानरं पुरुषमप्यधीयते वाजसनेयिनः; निरुपाधिकपुरुषशब्दवाच्यस्तु परमेश्वर एव, "तेनेदं पूर्णं पुरुषेण सर्वम्", इति श्रवणात्; अतः परमेश्वर इति युक्तम् ॥ २७ ॥

१—ग्निरुच्यते; एष वाग्निर्वैश्वानर इत्यादौ इति पा० ।

२ न परमेश्वर इति प्राप्तम्; अत्रोच्यते इति पा० ।

३—नर इति सिद्धान्तः;

४ प्रकरणे परमेश्वरासाधारणब्रह्मादिशब्दैर्विशेष्य—इति पा० ।

५ तदित्थं भूतरूपमितीह "तस्य हवा एतस्यात्मनो वैश्वानरस्य मूर्धैव सुतेजाश्चक्षुर्विश्वरूपः प्राणः पृथग्वर्त्मात्मा संदेहो बहुलो वस्तिरेव रयिः पृथिव्येव पादौ" इत्यत्र प्रत्यभिज्ञायमानं इति पा० ।

६ "स एषोऽग्निर्वैश्वानर" इत्यग्निसामानाधिकरण्येन प्राणाहुत्याधारादिभ्यः पुरुषेऽन्तः प्रतिष्ठितमित्यादेश्च नासौ इति पा० ।

॥ अत एव न देवताभूतं च ॥ २८ ॥

यतोऽयं वैश्वानरस्त्रैलोक्यशरीरकः पुरुषशब्दवाच्यश्च; अत एव न देवताग्निर्न तृतीयं भूतं वा ॥ २८ ॥

इह जाठराग्निरूपतयोपास्यत्वे सिद्धे परमेश्वरस्याग्निशब्दवाच्यत्वे तद्योजनाभेदमाचार्यान्तराणां दर्शयति ॥

॥ साक्षादप्यविरोधं जैमिनिः ॥ २९ ॥

अवश्यमग्निरूपतयोपास्यत्वादेवेदमग्निशब्दसामानाधिकरण्यम्; अग्निनयनादियोगेन परमेश्वर एवाग्निशब्दस्य साक्षाद्वृत्तित्वसंभवाद्वृत्तिसामानाधिकरण्याविरोधं जैमिनिरुवाच ॥ २९॥

॥ अभिव्यक्तेरित्याश्मरथ्यः ॥ ३० ॥

"यस्त्वेतमेवं प्रादेशमात्रम्" इत्यपरिच्छिन्नस्य द्युप्रभृतिपृथिव्यन्तप्रदेशसंबन्धिमात्रतया परिच्छिन्नत्वमुपासकाभिव्यक्त्य इत्याश्मरथ्यमुनिः ॥ ३० ॥

॥ अनुस्मृतेरिति बादरिः ॥ ३१ ॥

द्युप्रभृतिपृथिव्यन्तस्य मूर्धादिपादान्तान्वयत्वकल्पनमनुस्मृतये ब्रह्मप्राप्त्यर्थमिति बादरिः ॥ ३१ ॥

॥ संपत्तेरिति जैमिनिस्तथाहि दर्शयति ॥ ३२ ॥

"उर एव वेदिर्लोमानि बर्हिर्हृदयं गार्हपत्यो मनोऽन्वाहार्यपचन आस्यमाहवनीयम्"इत्युपासकस्योरःप्रभृतीनां वेद्यादित्वकल्पनं विद्याङ्गभूतायाः प्राणाहुतेरग्निहोत्रत्वकल्पनार्थमिति जैमिनिः, तथा दर्शयति च श्रुतिः, "अथ य एवं विद्वानग्निहोत्रं जुहोति" इति ॥ ३२ ॥

॥ आमनन्ति चैनमस्मिन् ॥ ३३ ॥

तैत्तिरीया एनं परमेश्वरमस्मिन्नुपासकशरीरे प्राणाहुतिवेलायां भोक्तृतया "शिवो मा विशाप्रदाहाय" इति, "प्रभुः प्रीणाति विश्वभुक्" इति चामनन्ति; अतः सकलाचार्यमतेन सर्वथा न्यायेन च जाठराग्निरूपेण परमेश्वर एवाराध्यः प्राणाग्निहोत्रेणेति समीचीनम् ॥ ३२ ॥

इति श्रीकण्ठशिवाचार्यविरचिते ब्रह्ममीमांसाभाष्ये प्रथमस्याध्यायस्य द्वितीयः पादः ॥ २ ॥ :: :: ॥

॥ अथ विद्धशालभञ्जिकाख्यनाटिकायाः ॥

॥ उपसंहारः ॥

इत्थं विद्वज्जनस्वान्तानन्दजननी श्रीराजशेखरकविराजप्रणीतविद्धशालभञ्जिकाभिधा नाटिका सर्वत्र संस्कृतवाण्या प्राकृतभाषाया अर्थलेखनेन पाठनाद्यनेकव्यापारवताऽपि यथा-

१—त्वायेद—इति पा० ।

कथं चिल्लब्धावकाशेन मया सुसंस्कृत्य प्रतिमासं मुद्रणेन देवदेवस्य जेतुः श्रीमदनङ्गरूपिणः श्रीकृष्णस्य भगवतः कृपया निर्विघ्नतया प्रकाशिता। अत्र प्रथमद्वितीयाङ्कयोः स्तम्भोत्कीर्णशालभञ्जिकापुत्तलिकोपवर्णनादस्या विद्धशालभञ्जिकानाम्ना व्यपदेशः। अत्र च प्रायः शृङ्गाररस एवोपलभ्यते। नाटिकालक्षणं चोक्तं साहित्यदर्पणे षष्ठपरिच्छेदे।

नाटिका क्लृप्तवृत्ता स्यात् स्त्रीप्राया चतुरङ्किका।
प्रख्यातो धीरललितस्तत्र स्यान्नायको नृपः॥
स्यादन्तःपुरसंबन्धा संगीतव्यापृताऽथ वा।
नवानुरागा कन्यात्र नायिका नृपवंशजा॥
संप्रवर्तेत नेताऽस्यां देव्यास्त्रासेन शङ्कितः।
देवी पुनर्भवेज्ज्येष्ठा प्रगल्भा नृपवंशजा॥
पदेपदे मानवती तद्वशः संगमो द्वयोः।
वृत्तिः स्यात् कैशिकी स्वल्पविमर्शाः संधयः पुनः॥

इति। सेयं नाटिका सुरुचिराऽऽलंकारिकाणां विदुषां पठनपाठनयोग्या महता परिश्रमेण संशोध्य काशीविद्यासुधानिधेः पञ्चषष्टितमाङ्कमारभ्य द्वासप्ततितमाङ्कपर्यन्तैरष्टभिरङ्कैरेतत्पत्रसुधाचकोरमनोविनोदनाय संप्रकाशिता ज्योत्स्नेव रसिकजनमानसकुमुदानि विकासयन्ती मामकात् संशोधनादिपरिश्रमात् सफलयतादिति जगदीशमुपयाचते।

ज्योतिः॰ वामनाचार्यः

॥ अथ कर्पूरमञ्जर्यभिधनाटकविशेषस्य ॥

॥ सट्टकस्य प्रस्तावना ॥

अथ खलु तत्रभवान् सकलविद्याविनोदचतुरो बालरामायणविद्धशालभञ्जिकानिर्माता दौहिकिकुलजो यायावरो बालकविः कविराजो राजशेखराभिधः पूर्वोक्तनाटिकोपक्रमे दर्शितगुणगणः केवलया प्राकृतभाषया काव्यविशेषं सट्टकं निर्ममे। तल्लक्षणं चोक्तं साहित्यदर्पणे षष्ठपरिच्छेदे।

सट्टकं प्राकृताशेषपाठ्यं स्यादप्रवेशकम्।
नच विष्कम्भकोऽप्यत्र प्रचुरश्चाद्भुतो रसः॥
अङ्का जवनिकाख्याः स्युः स्यादन्यन्नाटिकासमम्।

इति। अत्र कर्पूरमञ्जर्याः कुन्तलेशसुताया नायिकाया विवाहोपवर्णनाद् एतत्काव्यनामापि कर्पूरमञ्जरीति प्रसिद्धम्। तथाच पारिपार्श्वकवचनम्।

चंदवालधरिणीहरिणंको
चक्कवत्तिपअलाहणिमित्तम्।
एत्थ सट्टअवरे रससोत्ते
कुंदलाहिवसुदं परिणेदि॥

एतत्कविना स्वस्य सर्वभाषानिपुणत्वं द्योतयितुं सट्टकरणं स्वाभिधाज्ञापनं च पारिपार्श्वकोक्त्या सूचितम्। तथा हि, सव्वभासाचदुरेण तेण भणिदं जेव्व, जहा,

अत्थणिवेसा ते च्चिअ सद्दा ते च्चिअ परिणमंता वि।
उत्तिविसेसो कव्वो भासा जा होइ सा होउ॥
परुसा सक्किअबन्धा पाउअबन्धो इदो वि सुउमारो।
पुरिसमहिलाणं जेत्तिअ महंतरं तेत्तिअ च्चेअ॥

तथा।

बालकई कइराओ णिब्भरराअस्स तह उवज्झाओ।
इअ जस्स परंपरए अप्पा माहप्पमारूढो॥

सो अस्स कई।

सिरिराअसेहरो तिहुअणं पि धवलंति।
हरिणंकपडिसिद्धीए णिक्कलंका गुणा जस्स॥

अथास्य ग्रन्थस्यैकमेव पुस्तकमशुद्धतरं प्राकृतच्छायासहितं संप्राप्य पुस्तकान्तरान्वेषणपरोऽप्यलब्धपुस्तकान्तर एतदेव पुस्तकं महतायासेन संशोध्याधुना प्रभुवर्यस्य श्रीमतो गाफसाहिबस्याज्ञया काशीविद्यासुधानिधिपत्रे मुद्रणद्वारेमं ग्रन्थं प्रकाशयितुमुद्यतोऽस्मि।

प्रार्थये चाहं रसिकजनमनोनन्दनौ संगतावुमामाधवौ, यदेतत्काव्यं मुद्रितं सत्सज्जनमनस्सु परमां मुदमातनोत्विति शम्।

ज्योतिश्शास्त्राध्यापको
वामनाचार्यः।

॥ श्रीगणेशाय नमः॥

॥ अथ कर्पूरमञ्जर्यभिधसट्टकस्य ॥

॥ प्रथमं जवनिकान्तरम्॥

॥ सिरिसरस्सईए णमो॥

भद्दं भोदु सरस्सईअ कइणो णंदंतु वासाइणो
अण्णाणं पि परं पअट्टदु वरा वाणी छइल्लप्पिआ।

॥ अथ कर्पूरमञ्जर्यभिधसट्टकस्यप्राकृतविवृतिः ॥

॥ श्रीसरस्वत्यै नमः॥

भद्रं भवतु सरस्वत्याः कवयो नन्दन्तु व्यासादयः
अन्येषामपि परं प्रवर्ततु वरा वाणी विदग्धप्रिया।

बच्छोमी तह माअही फुरदु णो सा किं अ पंचालिआ
रीदीओ विलिहंतु कव्वकुसला जोण्हं चकोरा विअ ॥१॥

अवि अ ।

अकलिअपरिरंभविब्भमाहिं
अजणिअचुंबणडंबराइं दूरं ।
अघडिअघणताडणाइं णिच्चं
णमह अणंगरईणमोहणाइं ॥ २ ॥

अवि अ ।

ससिहंडमंडणाणं संमोहणासाणं सुरअणप्पिआणं ।
गिरिसगिरिंदसुआणं संहाडो वो सुहं देउ ॥ ३ ॥

अवि अ ।

ईसारोसप्पसादप्पणदिसु बहुसो
सग्गगंगाजलेहिं
आमूलं पूरिदाए तुहिणअरकला-
रूप्पसिप्पीअ रुद्दो ।
जोण्हामुत्ताहलिल्लं णदमउलिणिहि-
त्तग्गहत्तेहिं दोहिं
अग्घं सिग्घं दअंतो जअइ गिरिसुआ-
पादपंकेरुहाणं ॥ ४ ॥

नान्द्यन्ते सूत्रधारः । परिक्रम्य । नेपथ्याभिमुखमवलोक्य ।

वैदर्भी तथा मागधी स्फुरतु नः सा किं च पाञ्चालिका
रीतीरपि लिहन्तु काव्यकुशला ज्योत्स्नां चकोराइव ॥ १ ॥

अपि च ।

अकलितपरिरम्भविभ्रमाणि अजनितचुम्बनडम्बराणि दूरम् ।
अघटितघनताडनानि नित्यं नमस्यथ अनङ्गरत्योर्मोहनानि॥२॥

अपि च ।

शशिखण्डमण्डनयोः संमोहनाशयोः सुरजनप्रिययोः ।
गिरिशगिरीन्द्रसुतयोः संघाटिर्वः सुखं ददातु ॥ ३ ॥

अपि च ।

ईर्ष्यारोषप्रसादप्रणतिषु बहुशः स्वर्गगङ्गाजलैः
आमूलं पूरितया तुहिनकरकलारूप्यशुक्त्या रुद्रः ।
ज्योत्स्नामुक्ताफलाढ्यं नतमौलिनिहिताग्रहस्ताभ्यां द्वाभ्या-
मर्घं शीघ्रं ददज्जयति गिरिसुतापादपङ्केरुहयोः ॥ ४ ॥

किं उण णव्वपअट्टो विअ दीसदि अह्माणं कुसीलवाणं जणो । जदो । एक्का पत्तोचिआइं सिचआइं उच्चिणोदि, इअरा कुसुमावलीओ गुंफेदि, अण्णा पडिसीसआइं पडिसारेदि, का वि क्खु वण्णिआओ पट्टए वट्टेदि, एस वंसो ट्ठाविदो ट्ठाणे, इअं वीणा पडिसारीअदि, इमे तिण्णि मिअंगा सज्जीअंति, एस कंसतालाणं पक्खाउज्जाणं हलहलो, एदं धुआगीदमालवीअदि, ता किं पि कुडुंबं हक्कारिअ पुच्छिस्सं । नेपथ्याभिमुखमवलोक्य संज्ञापयति ।

ततः प्रविशति पारिपार्श्वकः । आणवेदु भावो ॥

सूत्र । विचिन्त्य । किं उण णिच्चप्पअट्टा विअ दीसध ॥

पारि । अध इं ।

सूत्र । किं उण णच्चिदव्वं ।

पारि । भाव सट्टअं णच्चिदव्वं ।

सूत्र । को उण तस्स कई ।

पारिपार्श्वकः ।

भाव कहिज्जदु एदं
को भणिए रअणीवल्लहसिहंडो ।
रहुउलचूडामणिणो
महेंदवालस्स को अ गुरू ॥ ५ ॥

सूत्र । विचिन्त्य । अए पण्हुत्तरं क्खु एदं । प्रकाशम् । राअसेहरो ।

पारि । सो एदस्स कई ।

सूत्र । स्मृत्वा । कधिदं जेव्व छइल्लेहिं ।

किं पुनर्नव्यप्रवृत्त इव दृश्यतेऽस्माकं कुशीलवानां जनः । यतः, एका पात्रोचितानि शिचयानि उच्चिनोति । इतरा कुसुमावलीर्गुम्फति । अन्या प्रतिशीर्षकाणि "प्रतिमादीनां मुखानि" प्रसारयति । कापि खलु वर्णिकाः पट्टके वर्तयति । एष वंशः स्थापितः स्थाने । इयं वीणाप्रतिसार्यते, इमे त्रयो मृदङ्गाः सज्ज्यन्ते, एष कांस्यतालानां मर्दलानां हलहलः । एतद्ध्रुवागीतमालप्यते, तत्किमपि कुटुम्बमाकार्य पृच्छामि ॥ आज्ञापयतु भावः ॥ किं पुनर्नृत्यप्रवृत्ता इव दृश्यध्वे ॥ अथ किम् ॥ किंपुनर्नर्तितव्यम् ॥ भाव सट्टकं नर्तितव्यम् ॥ कः पुनस्तस्य कविः ॥

भाव कथ्यतामेतत् को भण्यते रजनीवल्लभशिखण्डः ।
रघुकुलचूडामणेर्महेन्द्रपालस्य कश्च गुरुः ॥ ५ ॥

अये प्रश्नोत्तरं खल्वेतत् । राजशेखरः ॥ स एतस्य कविः ॥ कथितमेव विदग्धैः ।

सो सट्टओत्ति भणिए दूरं जो णाडिअं अणुहरइ ।
किं उण पवेसअविक्खंभआ इह केवलं णत्थि ॥ ६ ॥

विचिन्त्य । ता किं त्ति सक्किअं परिहरिअ पाउअ-बंधे पउट्टो कई ।

पारि । सव्वभासाचदुरेण तेण भणितं जेव्व, जधा,

अत्थणिवेसा ते च्चिअ सद्दा ते च्चिअ परिणमंता वि ।
उत्तिविसेसो कव्वो भासा जा होइ सा होउ ॥ ७ ॥

अवि अ ।

पुरुसा सक्किअबंधा पाउअबंधो इदो वि सुउमारो ।
पुरुसमहिलाणं जेत्तिअ महंतरं तेत्तिअ च्चेव ॥ ८ ॥

सूत्र ।

ता अप्पा किं ण वण्णिदो देण ।

पारि । सुणु वण्णिदो ज्जेव तक्कालकइणं मज्झम्मि मिअंकलेहाकहाआरेण अवराइएण ।

वालकई कइराओ निब्भरराअस्स तह उवज्झाओ ।
इअ जस्स परंपरए अप्पा माहप्पमारूढो ॥ ६ ॥

सो अस्स कई ।

सिरिराअसेहरो त्तिहुअणं पि धवलअंति ।
हरिणंकपडिसिद्धीए णिक्कलंका गुणा जस्स ॥ १० ॥

तत्सट्टकमिति भण्यते दूरं यन्नाटिकामनुहरति ।
किं पुनः प्रवेशकविष्कम्भकाविह केवलं न स्तः ॥ ६ ॥

तत्किमिति संस्कृतं परिहृत्य प्राकृतवन्धे प्रवृत्तः कविः ॥ सर्वभाषाचतुरेण तेन भणितमेव । यथा,

अर्थनिवेशास्त एव शब्दास्त एव परिणमन्तोऽपि ।
उक्तिविशेषः काव्यं भाषा या भवति सा भवतु ॥ ७ ॥

अपिच ।

पुरुषाः संस्कृतवन्धाः प्राकृतवन्ध इतोपि सुकुमारः ।
पुरुषमहिलयोर्यावदिहान्तरं तावदेव ॥ ८ ॥

तदात्मा किं न वर्णितस्तेन ॥ शृणु वर्णित एव तत्काल-कवीनां मध्ये मृगाङ्कलेखाकथाकारेणापराजितेन । यथा,

बालकविः कविराजो निर्भरराजस्य तथोपाध्यायः ।
इति यस्य परंपरया आत्मा माहात्म्यमारूढः ॥ ९ ॥

सोऽस्य कविः ।

श्रीराजशेखरस्त्रिभुवनमपि धवलयन्ति ।
हरिणाङ्कप्रतिस्पर्धया निष्कलङ्का गुणा यस्य ॥ १० ॥

सूत्र । ता केण समादिट्ठा पउंजध ।

पारि ।

चउहाणकुलमोलिमालिआ
राअसेहरकइंदगेहिणी ।
भत्तुणो किदिमवंतिसुंदरी
सा पउंजइदुमेदमिच्छदि ॥ ११ ॥

किं च ।

चंदवालधरिणीहरिणंको
चक्कवट्टिपअलाहणिमित्तं ।
एत्थ सट्टअवरे रससोत्ते
कुंतलाहिवसुदं परिणेदि ॥ १२ ॥

ता भाव एहि अणंतरकरणिज्जं संपादेह्म । इति परिक्रम्य निष्क्रान्तौ ॥

प्रस्तावना ॥

ततः प्रविशति राजा देवी विदूषको विभवतश्च परीवारः । सर्वे परिक्रम्य यथोचितमुपविशन्ति ।

राजा । देवि दक्खिणावहणरेंदणंदिणि वद्धावीअसि वसन्तारम्भेण । जदो,

बिंबुट्ठेवहलं ण देत्ति मअणं णो गंधतेल्लाविला
वेणीओ विरअंति लिंति ण तहा अंगम्मि कुप्पासअं ।
जं बालामुहकुंकुमम्मि वि घणे वट्टंति ढिल्लाअरा
तं मण्णे सिसिरं विणिज्जिअ बलात् पत्तो वसंतोत्सवः ॥१३॥

तत्केन समादिष्टाः प्रयुङ्ग्ध्य ॥
चहुाणकुलमौलिमालिका राजशेखरकवीन्द्रगेहिनी ।
भर्तुः कृतिमवन्तिसुन्दरी सा प्रयोजयितुमेतदिच्छति ॥ ११ ॥

"चहुाणेति प्रसिद्धं कुलोपनाम"

किंच ।

चन्द्रपालधरिणीहरिणाङ्कश्चक्रवर्तिपदलाभनिमित्तम् ।
अत्र सट्टकवरे रसस्रोतसि कुन्तलाधिपसुतां परिणयति ॥ १२ ॥

तद् भाव एहि अनन्तरकरणीयं संपादयावः ॥ इति परिक्रम्य निष्क्रान्तौ ॥ प्रस्तावना । देवि दक्षिणापथनरेन्द्रनन्दिनि वर्धाप्यसे वसन्तारम्भेण । यतः,

बिम्बोष्ठेवहेलं न ददाति मदनं नो गन्धतैलाविला-
वेणीर्विरचयन्ति लान्ति न तथा अङ्गे कूर्पासकम् ।
यद्बालामुखकुङ्कुमेऽपि घने वर्तन्ते शिथिलादराः
तन्मन्ये शिशिरं विनिर्जित्य बलात् प्राप्तो वसन्तोत्सवः ॥ १३ ॥

देवी। देव अहं पि तुह्म पडिवड्ढाविआ भविस्सं । जहा,

छोल्लंति दंतरअणाइं गदे तुसारे
ईसीसिचंदनरसम्मि मणं कुणंति ।
णिहं सुअंति घरमज्झमसालिआसु
पादंतपुंजिदपडं मिहुणाइं पेच्छ ॥ १४ ॥

नेपथ्ये । वैतालिकयोरेकः । जअजअ पुव्वदिअंगणाभुजंग, जअ २ चंपंगणाचंपककण्णऊर, जअ २ लीलाणिज्जिदराडदेस, जअ २ चंगत्तणविणिज्जिअकामरूअ, जअ २ हरिकेलीकेलिकार ; अवमाणिअजच्चसुवण्णवण्ण, सव्वंगसुंदरत्तणरमणिज्ज, सुहाअ देवस्स भोदु सुरहिसमारंभो । इह हि,

पंडीणं गंडवालीपुलअणचवला
कंचिवालावलाणं
माणं दो खंडअंता रइरहसअरा
लोलचोलप्पिआणं ।
कण्णाडीणं कुणंता कुरलतरलणं
कुंतलीणं पिएसु
गुंफंता णेहगेंठिं मलअसिहरिणो
सीअला वंति वाआ ॥ १५ ॥

अत्रैव द्वितीयः ।

“मदनं घृतसंपृक्तमधूच्छिष्टं, मुखकुङ्कुमं मुखोद्वर्तनम्”
देव अहमपि तव प्रतिवर्धापिका भविष्ये । यथा,

उन्मृजन्ति दन्तरत्नानि गते तुषारे
ईषदीषच्चन्दनरसे मनः कुर्वन्ति ।
इदानीं स्वपन्ति गृहमध्यमशालिकासु
पादान्तपुञ्जितपटं मिथुनानि पश्य ॥ १४ ॥

जयजय पूर्वदिगङ्गनाभुजङ्ग, जय २ चम्पाङ्गनाचम्पककर्णपूर, जय २ लीलानिर्जितराटदेश, जय २ सौन्दर्यविनिर्जितकामरूप, जय २ हरिकेलीकेलिकारक, अवमानितजात्यसुवर्णवर्ण, सर्वाङ्गसुन्दरत्वरमणीय, सुखाय देवस्य भवतु सुरभिसमारम्भः । “चम्पानगरी देशो वा । कामरूपं मदनसौन्दर्यं देशश्च । हरिकेली देशविशेषः” इह हि ।

पाण्डीनां गण्डपालीपुलकनचपलाः काञ्चिपालाबलानां
मानं द्विः खण्डयन्तो रतिरभसकरा लोलचोलप्रियाणाम् ।
कर्णाटीनां कुर्वन्तश्चिकुरतरलनं कुन्तलीनां प्रियेषु
गुम्फन्तः स्नेहग्रन्थिं मलयशिखरिणः शीतला वान्ति वाताः॥१५॥
“काञ्चिपालश्चोलः कुन्तलश्च देशविशेषः”

जादं कुंकुमपंकलीढमरठीगंडप्पहं चंपअं
थोआवट्टिददुद्धमुद्धकलिआ पप्फुल्लिआ मल्लिआ ।
मूले सामलमग्गलग्गभमलं लक्खिज्जए किंसुअं
पिज्जंतं मुहु एहिं दोसु वि दिसाभाएसु लग्गेहि व ॥१६॥

राजा । पिए विब्भमलेहे एक्को अहं वड्ढावओ तुह्म, एका तुमं वि वड्ढाविआ मह्म, किं उण दुवे वि अह्मे कंचणचंडरअणचंडेहिं बंदीहिं, ता विब्भमपअट्टा वअंतरट्टीणं, णट्टावअं मलअमारुदंदोलिदलदाणच्चणीणं, चारुप्पंचिदपंचमं कलअंठिकंठकंदलेसु, कंदलिदकंदप्पकोअंडदंडचंडिमं, सिणिद्धबंधुं वसुंधरापुरंधीए, ता विसारिअ पसइप्पमाणे अच्छिणी महूत्सवं जहिच्छं पेक्खदु देई, जधा किल णिवेदिदं बंदीहिं, पअट्टा च्चेअ मलआणिला, तह हि,

लंकातोरणमालिआतरलिणो कुंभब्भुवस्सास्समे
मंदंदोलिदचंदणद्दुमलदा कप्पूरसंपक्किणो ।
कंकोलीकुलकंपिणो फणिलदाणिप्पट्टपट्टावआ
चंडं चुंबिद तम्मवण्णिसलिला वाअंति चेत्ताणिला ॥ १७ ॥

अवि अ ।

माणं मुंचध देह वल्लहजणे दिट्ठिं तरंगुत्तरं

जातं कुङ्कुमपङ्कलीढमहाराष्ट्रीगण्डपत्रं चम्पकं
स्तोकावर्तितदुग्धमुग्धकलिका प्रफुल्लिता मल्लिका ।
मूले श्यामलमयलग्नभ्रमरं लक्ष्यते किंशुकं
पीयमानं मुहुरेतैर्द्वयोरपि दिग्भागयोर्लग्नैरिव ॥ १६ ॥

प्रिये विभ्रमलेखे एकोऽहं वर्धापकस्तव, एका त्वमपि वर्धापिका मम, किं पुनर्द्वावप्यावां काञ्चनचण्डरत्नचण्डाभ्यां बन्दिभ्याम् । तद्विभ्रमप्रवर्तकं प्रौढाङ्गनानां नर्तापकं, मलयमारुतान्दोलितलतानर्तकीनां चारुप्रपञ्चितपञ्चमं, कलकण्ठकण्ठीकन्दलेषु कन्दलितकन्दर्पकोदण्डदण्डचण्डिमानम्, स्निग्धबन्धुं वसुंधरापुरन्ध्याः, तद् विस्तार्य प्रसृतिप्रमाणे अक्षिणी मधूत्सवं यथेच्छं प्रेक्षतु देवी । यथा किल निवेदितं बन्दिभ्याम् । प्रवृत्ता एव मलयानिलाः । तथाहि ।

लङ्कातोरणमालिकातरलिनः कुम्भोद्भवस्याश्रमे
मन्दान्दोलितचन्दनद्रुमलताः कर्पूरसंपर्किणः ।
कङ्कोलीकुलकम्पिनः फणिलतानिस्पृष्टनर्तापकाश्चण्डं चुम्बिततामपर्णिसलिलाः संवान्ति चैत्रानिलाः ॥ १७ ॥

अपिच ।

मानं मुञ्चत दत्त वल्लभजने दृष्टिं तरङ्गोत्तरां

तारुण्णं दिअहाइं पंच दह वा पीणत्थणुत्तंभनं ।
इत्थं कोइलमंजुसिंजणमिसा देअस्स पंचेसुणो
दिण्णा चैत्तमहूत्सवेण सहसा आणेव सव्वंकसा ॥ १८ ॥

विदूषकः । भो तुह्माणं सव्वाणं मज्झे अहमेक्को कालक्खरिओ जस्स मे ससुरस्ससुरो पंडिदघरे पुत्थआइं वहंतो आसीत् ।

चेटी । विहस्य । तदो कमागदं दे अण्णएण पंडिअत्तणं ।

विदूषकः । सक्रोधम् । आः दासीए धाए भविस्सकुट्टणि णिल्लक्खणे विअक्खणे ईरिसोहं मुक्खो जं तुए वि अ उवहसीअदि । अण्णं अ । हे खरपुत्तविट्टालणि भमणसीले रच्छालुंठणि जूदप्पिए टेंटाकराले टुट्टसंघडिदे कोससदापहारिणि । अहवा । हत्थकंकणं किं दप्पणे पेक्खीअदि ।

विचक्खणा । एव्वं णेदं । तुरंगमस्स सिग्घत्तणे किं सक्खिणो पुच्छिअंति, ता वण्णीअ वसंतं ।

विदू । कधं तुमं पंजरगदा सारिआ व्व कुरकुराअंती चिट्ठसि ण किं पि जाणेसि । ता पिअवअस्स देईणं पुरदो पठिस्सं । जदो, ण कत्थूरिआ कुग्गामे वणे वा विक्किणीअदि, ण सुवण्णं कसवट्टिअं विणा सिलापट्टए कसीअदि ।

राजा । पिअवअस्स ता पढ सुणीअदि ।

विदू । पढदि ।

तारुण्यं दिवसानि पञ्च दश वा पीनस्तनोत्तम्भनम् ।
इत्थं कोकिलमञ्जुसिञ्जनमिषाद्देवस्य पञ्चेषो-
र्दत्ता चैत्रमहोत्सवेन सहसा आज्ञेव सर्वंकषा ॥ १८ ॥

भो युष्माकं सर्वेषां मध्ये अहमेकः कालाक्षरिको यस्य मे श्वशुरश्वशुरः पण्डितगृहे पुस्तकानि वहन्नासीत् ॥ "कालाक्षरिको विद्वान्" ततः क्रमागतं ते अन्वयेन पण्डितत्वम् ॥ आः दास्याः पुत्रि भविष्यत्कुट्टनि निर्लक्षणे विचक्षणे ईदृशोऽहं मूर्खयरत्वयापि चोपहास्यते । अन्यच्च । खरपुत्रस्पर्शिनि "विट्टालशब्दोऽमङ्गलवाचकः" भ्रमणशीले, रथ्यालुण्ठनि, द्यूतप्रिये, टेन्टाकराले, त्रुटितसंघट्टिते, कोशशतापहारिणि, अथवा । हस्तकङ्कणं किं दर्पणे प्रेक्ष्यते ॥ एवमेतत् । तुरङ्गमस्य शीघ्रत्वे किं साक्षिणः पृच्छ्यन्ते । तद्वर्णय वसन्तम् ॥ कथं त्वं पञ्जरगता सारिकेव कुरकुरायमाणा तिष्ठसि न किमपि जानासि । तत्प्रियवयस्य देव्याः पुरतः पठिष्ये । यतः, न कस्तूरिका कुग्रामे वने वा विक्रीयते, न सुवर्णं कषपट्टिकां विना शिलापट्टके कष्यते ॥ प्रियवयस्य तत् पठ श्रूयते ॥ पठति ।

फुल्लुक्करं कलमकूरसमं वहंति
जे सिंदुआरविडवा मह वल्लहा ते ।
जे गालिअस्स महिसीदहिणो सरिच्छा
ते किं ण मुद्धविअइल्लपसूणपुंजा ॥ १९ ॥

विच । णिअकंतारंजणजोग्गं दे वअणं ।

विदू । ता किं पि उदारवअणे तुमं पढ ।

देवी । किंचित् स्मित्वा । सहि विअक्खणे अह्माणं पुरदो तुमं गाढकइत्तणेण उत्तिण्णा होसि, ता पढ संपदं अज्जउत्तस्स पुरदो, सयंकिदं किं पि कव्वं । जदो, ता कव्वं जं सभाए पढीअदि, तं सुवण्णं जं कसलट्ठिए णिव्वट्टेदि, सा घरिणी जा पिअं रंजेदि, सो पुत्तो जो कुलमुज्जलेदि ।

विच । जं देई आणवेदि त्ति पढति ।

जे लंकागिरिमेहलाहि खलिदा संभोअखिण्णोरई-
फारुप्फुल्लफणावलीकवलणे पत्ता दरिद्दत्तणं ।
ते एण्हिं मलआणिला विरहिणीणीसाससंपक्किणो
जादा झत्ति सिसुत्तणे वि बहला तारुण्णपुण्णा विअ ॥ २० ॥

राजा । सच्चं विअक्खणा चदुरत्तणेण उत्तिण्णा कईणं पि कई । ता किमण्णं कइचूडामणित्तणे ट्ठिदा एसा ।

देवी । विहस्य । सच्चं कइचूडामणित्तणे ट्ठिदा एसा ।

पुष्पोत्करं कलमकूरसमं वहन्ति
ये सिन्धुवारविटपा मम वल्लभास्ते ।
ये गालितस्य महिषीदध्नः सदृक्षास्ते
किं न मुग्धविचकिलप्रसूनपुञ्जाः ॥ १९ ॥

निजकान्तारञ्जनयोग्यं ते वचनम् ॥ तत्किमपि उदारवचने त्वं पठ ॥ सखि विचक्षणे अस्माकं पुरतस्त्वं गाढकवित्वेनोत्तीर्णा भवसि । तत् पठ सांप्रतमार्यपुत्रस्य पुरतः स्वयं कृतं किमपि काव्यम् । यतः, तत् काव्यं यत् सभायां पठ्यते । तत्सुवर्णं यत्कषयष्ट्यां निर्वर्त्यते । सा गृहिणी या पतिं रञ्जयति । स पुत्रो यः कुलमुज्ज्वलयति ॥ यद्देवी आज्ञापयति इति पठति ।

ये लङ्का गिरिमेखलाभ्यः स्खलिताः संभोगखिन्नोरगी-
स्फारोत्फुल्लफणावलीकवलने प्राप्ता दरिद्रत्वम् ।
ते इदानीं मलयानिला विरहणीनिःश्वाससंपर्किणो
जाता झटिति शिशुत्वेऽपि बहलास्तारुण्यपूर्णा इव ॥ २० ॥

सत्यम् । विचक्षणा चतुरत्वेनोत्तीर्णा कवीनामपि कविः; तत्किमन्यत्कविचूडामणित्वे स्थिता एषा ॥ सत्यम् । कविचूडामणित्वे स्थिता एषा ॥

विदू । सक्रोधम् । ता उज्जुअं चेअ किं ण भणीअदि देईए अच्चुत्तमा विअक्खणा कव्वम्मि अच्चंताहमो कविंजलो बह्मणो त्ति ।

विच । अज्ज मा कुप्प कव्वं जेव्व दे कइत्तणं पिसुणेदि । जदो, णिअकंतारंजणजुग्गे णिंदणिज्जे वि अत्थे सुउमारा दे वाणी । लंबत्थणीए विअ एक्कावली । तुंदिलाए विअ कंचुलिआ । कट्टिदकेसाए विअ मालईकुसुममाला, काणाए विअ काजलसलाआ । ण सुट्ठुतरं भादि रमणिज्जा ।

विदू । तुज्झ उण रमणिज्जे वि अत्थे ण सुंदरा सद्दावली । कणअकटिसुत्तए विअ लोहकिंकिणीमाला । पडिवट्टे विअ तसरविरअणा । गोरंगीए विअ चंदणचच्चा । ण चारुत्तणमवलंबेहि । तहा वि तुमं वण्णीअसि ।

विच । अज्ज मा कुप्प २ का तुमेहिं सह पडिसिद्धी । जदो, तुमं णाराओ विअ णिरक्खरो वि रअणतुलाए णिउंजीअसि, अहं उण तु लद्धलक्खरा वि कप्पासतुलणे णिउंजीआमि ।

विदू । एव्वं मह भणंतीए तुह वामं दक्खिणं जुहिट्ठिलजेट्ठभादुणामहेअं अंगजुगलं झडत्ति उप्पाटइस्सं ।

विच । अहं पि उण तुह एव्वं भणंतस्स उत्तरफग्गुणीपुरस्सरणक्खत्तणामहेअं अंगजुगं झडत्ति खंडिस्सं ।

तदृजुकमेव किं न भण्यते देव्या, अत्युत्तमा विचक्षणा काव्ये अत्यन्ताधमः कपिञ्जलो ब्राह्मण इति ॥ आर्य मा कुप्य २ काव्यमेव ते कवित्वं पिशुनयति । यतः । निजकान्तारञ्जनयोग्ये निन्दनीयेऽप्यर्थे सुकुमारा ते वाणी । लम्बस्तन्या इव एकावली । तुन्दिलाया इव कञ्चुलिका । कर्तितकेशाया इव मालतीकुसुममाला । काणाया इव कज्जलशलाका । न सुष्ठुतरं भातिरमणीया ॥ तवपुनः रमणीयेऽप्यर्थे न सुन्दरा शब्दावली, कनककटिसूत्रक इव लोहकिङ्किणीमाला ; प्रतिपट्ट इव तसरविरचना । गौराङ्ग्या इव चन्दनचर्चा न चारुत्वमवलम्बते । तथापि त्वं वर्ण्यसे ॥ आर्य मा कुप्य २ का युष्माभिः सह प्रतिस्पर्धा ॥ यतस्त्वं नाराच इव निरक्षरोपि रत्नतुलायां नियुज्यसे, अहं पुनस्तुलेव लब्धाक्षरापि कार्पासतुलने नियुज्जामि ॥ एवं मम भणन्त्यास्तव वामं दक्षिणं युधिष्ठिरज्येष्ठभ्रातृनामधेयमङ्गयुगलं झटिति उत्पाटयिष्ये । "कर्णयुगमितिभावः" । अहं पुनस्तव एवं भणत उत्तराफल्गुनीपुरःसरनक्षत्रनामधेयमङ्गयुगं झटिति खण्डयिष्ये "हस्तयुगमित्यर्थः" ॥

राजा । वअस्स मा एवं भण कइत्तणे णिठ्ठिदा एसा ।

विदू । सक्रोधम् । उज्जुअं जेव्व ता किं ण भणीअदि, अह्माणं चेडिआ हरिअंदणंदिअंदपोट्टिलसहालप्पहुदिणं वि पुरदो सुकइ त्ति ।

राजा । एव्वं णेदं ।

विदू । परिक्रम्य गन्तु मिच्छति ।

विच । तहिं गच्छ जहिं मे पढमसाडिया गदा ।

विदू । चलितग्रीवम् । तुमं उण तहिं गच्छ जहिं मे मादाए पढमदंदावली गदा । ईदिसस्स राअकुलस्स भद्दं भोदु, जहिं चेडिआ बह्मणेण समं सरिसआए दीसदि । मदिरापंचगव्वं एक्कस्सिं भंडए करीअदि । कच्चं माणिक्कं अ सममाहरणे पउंजीअदि ।

चेटी । इह राअउले तं ते कंठत्थिदं भोदु जं भअवं तिलोअणो सीसे समुव्वहदि । तेण दे मुहं चुरीअदु । जेण अ असोअतरू दोहदं लहेदि ।

विदू । आः दासीए पुत्ति टिंटाकराले कोससदचट्टिणी रच्छालोट्टणी । एव्वं मं भणसि । मह महाबह्मणस्स भणिदेण तं तुमं लहेसु जं फग्गुणसमए सोहंजणो जणादो लहेदि । जं अ पामराहिंतो बली बइल्लो लहेदि ।

विच । अहं उण तुह एव्वं भणंतस्स णेउरस्स विअ-

वयस्यैवं मा भण कवित्वे निष्ठिता एषा ॥ ऋजुकमेव तत्किं न भण्यते अस्माकं चेटिकाहरिचन्द्रनन्दिचन्द्रपोटिलसभालप्रभृतीनामपि पुरतःसुकविरिति ॥ एवमेतत् ॥ तत्र गच्छ यत्र मे प्रथमशाटिका गता ॥ त्वं पुनस्तत्र गच्छ यत्र मे मातुः

प्रथमदन्तावलीगता । ईदृशस्य राजकुलस्य भद्रं भवतु यत्र चेटिका ब्राह्मणेन समं सदृशतया दृश्यते । मदिरा पञ्चगव्यं च एकस्मिन् भाण्डे क्रियते । काचो माणिक्यं सममाभरणे प्रयुज्यते ॥ इह राजकुले तत्ते कण्ठेस्थितं भवतु यद् भगवान् त्रिलोचनः शीर्षेसमुद्वहति "अर्धचन्द्रो गलहस्तिकेत्यर्थः" तेन तेमुखं चूर्ण्यताम् । येन चाशोकतरुर्दोहदं लभते ॥ आः दास्याःपुत्रि टिंटाकराले कोशशतलेहिनि रथ्यालुण्ठनि एवं मां भणसि तद् मम महाब्राह्मणस्य भणितेन त्वं लभस्व यत्फाल्गुनसमये शोभाञ्जनो जनाल्लभते "शोभाञ्जनस्तरुविशेषः पुष्पमालादिभिरलंकृतोहुताशन्यां निक्षिप्यते । प्रदीप्तायां च तस्यां लोकैरितस्ततो निहत्यापक्रियते इति कस्मिंश्चिद्देशे आचारः" । यच्च पामराद्बली वृषभो लभते ॥ अहं पुनस्तवैवं भणतो नपुरस्येव पादलग्नस्य पादेन

पाअलग्गस्स पाएण मुहं चूरइस्सं । अण्णं अ । उत्तरासा-ढपुरस्सरणक्खत्तणामहेअं अंगजुगं उप्पाडिअ टाकिस्सं ।

विदू । सक्रोधं परिक्रामति । जवनिकान्तरे स्थित्वा किं चिदुच्चैः । ईरिसं राअउलं दूरे बंदीअदु । जहिं दासी बह्मणेण समं पडिसिद्धिं करेदि । ता अज्जप्पहुदि णिअगेहिणीए वसुंधराणामहेआए बह्मणीए चलणसुस्सूसओ भविअ गेहे ज्जेव्व चिट्ठिस्सं । इति सर्वे हसन्ति ।

देवी । अज्जउत्त कीदिसी कविंजलेण विणा गोट्ठी । कीदिसी णअणंजणेण विणा पसाहणलच्छी ।

विदू । सक्रोधम् । आकाशे । ण हु २ आगमिस्सं । अण्णो को वि पिअवअस्सो अण्णेसीअदु । एसा वा दुट्ठ-दासी लंबकुच्चं टप्परकण्णं पडिसीसअं देउण मह ठाणे उवहसणत्थं करीअदु । अहमेको मंदो तुह्माणं सव्वाणं मज्झे । तुह्मे उण वरिससदं जीवध ।

विच । मा अणु संधेहि । अणुणअकक्कसो क्खु कविं-जलवह्मणो सलिलसित्तो वि सणगुणगंठि व्व गाढत्तरो भोदि ।

देवी । सर्वंचावलोक्य । णं दंसणिज्जं दीसदु ।

गाअंतगोपअबहूपअपेंखिदासु
डोलासु विब्भमवदीसु णिबद्धदिट्ठी ।

मुखं चूर्णयिष्ये । अन्यच्च । उत्तराषाढापुरस्सरनक्षत्रनामधेय-मङ्गयुगलमुत्पाट्य क्षेपयामि । “श्रवणयुगलमित्यर्थः” ॥ ईदृशं राजकुलं दूरे वन्द्यतां यत्र दासी ब्राह्मणेन समं प्रतिस्पर्धां करोति । यदद्यप्रभृति निजगेहिन्या वसुंधरानामधेयाया ब्राह्मण्याश्चरणशुश्रूषको भूत्वा गृहे एव तिष्ठामि ॥ आर्य-पुत्र कीदृशी कपिञ्जलेन विना गोष्ठी । कीदृशी नयनाञ्जनेन विना प्रसाधनलक्ष्मीः ॥ न खलु आगमिष्ये । अन्यः कोपि प्रि-यवयस्यः अन्विष्यताम् । एषा वा दुष्टदासी लम्बकूर्चं टप्पर-कर्णं प्रतिशीर्षकं दत्वा मम स्थाने उपहसनार्थं क्रियते । अह-मेको मन्दो युष्माकं सर्वेषां मध्ये । यूयं पुनर्वर्षशतं जीवत । मानुसंधत्स्व । अनुनयकर्कशः खलु कपिञ्जलब्राह्मणः सलि-लसिक्तो ऽपि शणगुणग्रन्थिरिव गाढतरो भवति । ननु दर्शनीयं दृश्यताम् ।

गायद्गोपकवधूपदप्रेङ्खितासु
दोलासु विभ्रमवतीषु निबद्धदृष्टिः ।

जं जादि खंजिदतुरंगरहो दिणेसो
तेण व्व होंति दिअसा अदिदीहदीहा ॥ २१ ॥

प्रविश्य पटाक्षेपेण विदूषकः । आसणमासणं ।

राजा । किं तेण ।

विदू । भैरवाणंदो दुआरे चिट्ठदि ।

देवी । किं जो जणवअणादो अच्चब्भुदसिद्धि सुणी-अदि ।

विदू । अध इं ।

राजा । पवेसअ ।

विदू । निष्क्रम्य तेनैव सह प्रविशति ।

भैरवानन्दः । किंचिन्मदमभिनीय ।

मंतो ण तंतं ण अ किं पि जाणं
झाणं अ णो को वि गुरुप्पसादो ।
मज्जं पिआमो महिलं रमामो
मोक्खं अ आमो कुलमग्गलग्गा ॥ २२ ॥

अवि अ ।

रंडा चंडा दिक्खिदा धम्मदारा
मज्जं मंसं खज्जए पिज्जए अ ।
भिक्खा भोज्जं चम्मखंडं अ सेज्जा
कोलो धम्मो कस्स णो भादि रम्मो ॥ २३ ॥

किं अ ।

यद्याति खञ्जिततुरङ्गरथो दिनेश
स्तेनैव भवन्ति दिवसाः प्रतिदीर्घदीर्घाः ॥ २१ ॥

आसनमासनम् ॥ किं तेन ॥ भैरवानन्दो द्वारे तिष्ठति ॥ किं यः जनवचनादत्यद्भुतसिद्धिः श्रूयते ॥ अथ किम् ॥ प्रवे-शय ॥

मन्त्रो न तन्त्रं नच किमपि ज्ञानं
ध्यानं च न कोपि गुरुप्रसादः ।
मद्यं पिबामो महिलां रमामो
मोक्षं च यामः कुलमार्गलग्नाः ॥ २२ ॥

अपि च ।

रण्डाश्चण्डा दीक्षिता धर्मदारा
मद्यं मांसं पीयते खाद्यते च ।
भिक्षा भोज्यं चर्मखण्डं च शय्या
कौलो धर्मः कस्य नो भाति रम्यः ॥ २३ ॥

किं च ।

मुत्तिं भणंति हरिबह्मसुहा हि देश्रा
झाणेन वेदपढणेण कउक्किश्राहिं ।
एक्केण केवलमुमादइदेण दिठ्ठो
मोक्खो समं सुरश्रकेलिसुरारसेहिं ॥ २४ ॥

राजा । एदमासणमुपविसदु भैरवाणंदो ।

भैरवा । किं कादव्वं ।

राजा । कहिं पि बिसए अच्छरिश्रं दठ्ठुमिच्छामि ।

भैरवानन्दः ।

दंसेमि तं पि ससिणं वसुहावतिण्णं
त्थंभेमि तस्स वि रइस्स रहं णहद्धे ।
आणेमि जक्खसुरसिद्धगणंगणाश्रो
तं णत्थि भूमिवलए मह जं ण सक्कं ॥ २५ ॥

ता भण किं करीश्रदु ।

राजा । वश्रस्स तुए कहिं पि अपुब्बं दिठ्ठं महिलारश्रणं ।

विदू । दिठ्ठं दाव ।

राजा । कहिं हिं ।

विदू । अत्थि दक्खिणावहे बच्छोमं णाम णगरं तहिं मए एकं कण्णा रश्रणं दिठ्ठं तमिहाणीश्रदु ।

भैर । आणीश्रदि ।

राजा । अवदारीश्र पुण्णि माहरिणंको धरणीतले ।

भैर । ध्यानं नाटयति ।

मुक्तिं भणन्ति हरिब्रह्ममुखा हि देवा
ध्यानेन वेदपठनेन क्रतुक्रियाभिः ।
एकेन केवलमुमादयितेन दृष्टो
मोक्षः समं सुरतकेलिसुरारसाभ्याम् ॥ २४ ॥

एतदासनमुपविशतु भैरवानन्दः ॥ किं कर्तव्यम् ॥ कुत्रापि विषये आश्चर्यं द्रष्टुमिच्छामि ॥

दर्शयामि तमपि शशिनं वसुधावतीर्णं
स्तम्भयामि तस्यापि रवे रथं नभोर्धे ।
आनयामि यक्षसुरसिद्धगणाङ्गना-
स्तचास्ति भूमिवलये मम यन्न साध्यम् ॥ २५ ॥

तद् भण किं क्रियताम् ॥ वयस्य त्वया कुत्रापि अपूर्वं दृष्टं महिलारत्नम् ॥ दृष्टं तावत् ॥ कुत्र हि ॥ अस्ति दक्षिणापथे वैदर्भं नाम नगरं तत्र एकं कन्यारत्नं दृष्टं तदिहानीयतु ॥ आनीयते ॥ अवतार्यतां पूर्णिमाहरिणाङ्को धरणीतले ॥ अहह आश्चर्यमाश्चर्यम् ॥

ततः प्रविशति पटाक्षेपेण नायिका । सर्वे आलोकयन्ति ।

राजा । अहह अच्छरिज्जं ।

जं धोश्रंजणसोणलोश्रनजुश्रं लग्गालश्रग्गं मुहं
हत्थालंबिदकेसपल्लवचये दोल्लंति जं बिंदुणो ।
जं एक्कं सिचश्रंचलं णिवसिदा तं ण्हाणकेलिठ्ठिदा
आणीदा इश्रमब्भुदेक्कजणणी जोईसरेणामुणा ॥ २६ ॥

अवि अ ।

एक्केण पाणिणलिणेण णिवेसअंती
पोत्तंचलं घणघणत्थलसंसमाणं ।
चित्ते लिहिज्जदि ण कस्स वि संयमंती
अण्णेण चंकमणदो चलिदं कडिल्लं ॥ २७ ॥

विदू ।

ण्हाणाश्र मुक्काभरणोच्चश्राए
तरंगसंगक्खदमंडणाए ।
उल्लंसुउल्लासिथणुल्लश्राए
सुंदेरसव्वस्समिमीश्र दिठ्ठी ॥ २८ ॥

नायिका । सर्वानालोक्य स्वगतम् । एसो महाराश्रो को वि इमिणा गंभीरसरसमहुरेण सोहासमुदएण जाणिज्जदि । एसा वि एदस्स जेव्व महादेई तक्कीश्रदि । जहा

यद्धौताञ्जनशोणलोचनयुगं लग्नालकाग्रं मुखं
हस्तालम्बितकेशपल्लवचये पूर्णन्ति यद्बिन्दवः ।
यदेकं सिचयाञ्चलं निवसिता तत्स्नानकेलिस्थिता
आनीता इय मद्भुतैकजननी योगीश्वरेणामुना ॥ २६ ॥

अपि च ।

एकेन पाणिनलिनेन निवेशयन्ती
पोत्राञ्चलं घनस्तनस्थलसांसमानम् ।
चित्ते न लिख्यते कस्यापि संयमन्ती
अन्येन चङ्क्रमणतश्चलितं च वस्त्रम् ॥ २७ ॥

स्नानाय मुक्ताभरणोच्चयाया
स्तरङ्गसंगक्षतमण्डनायाः ।
आर्द्रांशुकोल्लासिस्तनोत्कटायाः
सौन्दर्यसर्वस्वमस्या दृष्टिः ॥ २८ ॥

एष महाराजः कोप्यनेन गम्भीरसरसेन मधुरेण शोभासमुदयेन ज्ञायते । एषापि एतस्यैव महादेवी तर्क्यते । यथा अर्धनारीश्वरस्येव वामार्धे अकल्पितापि गौरी ज्ञायते । एषोपि

अद्धणारीस्सरस्स विअ वामद्धे अकहिआ वि गोरी जाणीअदि । एसो वि जोईस्सरो । एस उण परिअणो । विचिन्त्य । ता किं एदस्स महिलासहिदस्स वि दिठ्ठी मं बहु मणेदि । इत्यजस्रं वीचते ।

राजा । विदूषकमपवार्य ।

जं मुक्कासवणंतरेण तरला तिक्का कटाक्खच्छटा-
भिंगाकठ्ठिदकेदअग्गिमदलट्ठोणीसरिच्छच्छई ।
तं कप्पूररसेण णं धवलिदो जोण्हाअ णं ण्हाविदो
मुत्ताणं घणरेणुण व्व छुरिदो जादोह्मि एत्थंतरे ॥२६॥

विदू । तह एव्व । अहो इमाए रूवसोहा ।

मण्णे मज्झं त्तिवलिवलिअं डिंभमुठ्ठीअ गेज्झं
णो बाहूहीं रमणफलअं वेठ्ठिदुं जादि दोहिं ।
णेत्तच्छेतं तलुणपसए दिज्जमाणोवमाणे
ता पच्चक्खं मह विलिहिदुं जादि एसा ण चित्ते ॥ ३० ॥

कधं ण्हाणधोविदविलेवणा वि समुत्तारिद वहूसणा वि रमणिज्जा ।

अह वा ।

जारूवमुक्का वि विभूसअंति
ताणं अलंकारवसेण सोहा ।
णिसर्गचंगस्स वि माणुसस्स
सोहा समुम्मीलदि भूसणेहिं ॥ ३१ ॥

राजा । एदाए एदं दाव । जदो,

णावण्णं णवजच्चकंचणणिहं णेत्ताण दीग्घत्तणं
कण्णेहीं खलिदं कवोलफलआ दो खंडचंदो वमा ।
एसा पंचसरेण सज्जिदधणूदंडेण रक्खिज्जए
जेणं सोसणमोहणप्पहुदिणो विंधंत्ति मं मग्गणा ॥३२॥

विदू । विहस्य । जाणे इच्छावादे तुह सोंडीरत्तणं ।

राजा । विहस्य । पिअवअस्स कधेमि दे सुणु ।

अंगं चंगं णिअगुणगणालंकिदं कामिणीणं
पच्छाअंती उण तणुसिरं भादि णेवच्छलच्छी ।
इत्थं जाणं अवअवगदा का वि सुंदेरमुद्दा
मण्णे ताणं वलइदधणू णिच्चभिच्चो अणंगो ॥ ३३ ॥

अवि अ । एदाए,

तहा रमणवित्थरो जहण ठाइ कंचीलदा
तहा सिहिणतुंगिमा जहण एहि णाहीमुहं ।
तहा णअणवढ्ढिमा जह ण किं पि कण्णुप्पलं
तहा अ मुहमुज्जलं दुससिणी जहा पुण्णिमा ॥३४॥

योगीश्वरः । एष पुनः परिजनः । तस्यैतस्य महिलासहितस्यापि दृष्टिर्मां बहुमन्यते ॥

यन्मुक्ताश्रवणान्तरेण तरलास्तीक्ष्णाः कटाक्षच्छटा-
भृङ्गाकर्षितकेतकाग्रिमदलद्रोणीसदृक्षच्छविः ।
तत्कर्पूररसेन ननु धवलितो ज्योत्स्नया ननु स्नापितो
मुक्तानां घनरेणुनेव छुरितो जातोस्मि अत्रान्तरे ॥ २९ ॥

तथैव अहो एतस्या रूपशोभा ।

मन्ये मध्यं त्रिवलिवलितं डिम्भमुष्ट्या याह्यं
नो बाहुभ्यां रमणफलकं वेष्टितुं याति दोर्भ्याम् ।
नेत्रक्षेत्रं तरुणप्रस्टतिर्दीयमानोपमाने
तत्प्रत्यक्षं मम विलिहितुं याति एषा न चित्ते ॥ ३० ॥

"रमणो नितम्बः"

कथं स्नानधौतविलेपनापि समुत्तारितविभूषणापि रमणीया ।

अथवा ।

या धौतमुक्ता अपि विभूषयन्ति तासामलंकारवशेन शोभा ।
निसर्गसुन्दरस्यापि मानुषस्य शोभा समुन्मीलति भूषणैः ॥ ३१ ॥

एतस्या एतत्तावत् । यतः,

लावण्यं नवजात्यकञ्चननिभं नेत्रयोर्दीर्घत्वं
कर्णाभ्यां स्खलितौ कपोलफलकौ द्विखण्डचन्द्रोपमौ ।
एषा पञ्चशरेण सज्जितधनुर्दण्डेन रक्ष्यते
येन शोषणमोहनप्रभृतयो विध्यन्ति मां मार्गणाः ॥ ३२ ॥

एवं जाने स्वयैव तव सुन्दरत्वम् ॥ प्रियवयस्य कथयामिति शृणु ।

अङ्गं सुन्दरं निजगुणगणालंकृतं कामिनीनां
प्रच्छादयन्ती पुनस्तनुश्रियं भाति नेपथ्यलक्ष्मीः ।
एवं यासामवयवगता कापि सौन्दर्यमुद्रा
मन्ये तासां वलयितधनुर्नित्यभृत्यो अनङ्गः ॥ ३३ ॥

अपि चैतस्याः ।

तथा रमणविस्तरो यथा न तिष्ठन्ति काञ्चीलता-
स्तथा स्तनतुङ्गिमा यथा न एति नाभिमुखम् ।
तथा नयनवर्धिमा यथा न किमपि कर्णोत्पलं
तथा च मुखमुज्ज्वलं द्विशशिनी यथा पूर्णिमा ॥ ३४ ॥

देवी । अज्ज कविंजल पुच्छिअ जाणीहि का एस त्ति । अह वा तं पडि । एहि मुद्धमुहि उवसिअ णिवेदेहि का तुमं त्ति ।

राजा । आसणमिमाए ।

विदू । एदं मे उत्तरीअमासणं ।

नायिका । वस्त्रदानोपवेशनं नाटयति ।

विदू । भोदु संपदं कहिज्जदु ।

नायि । अत्थि एत्थ दक्खिणावहे बच्छोमं णाम णगरं तहिं कुंदलेसो सअलजणवल्लहो वल्लहराओ नाम राजा ।

देवी । स्वगतम् । जो हुं सो मह माउस्सओ होइ ।

नायि । तस्स घरिणी ससिप्पहा णाम ।

देवी । स्वगतम् । सा वि मे माउस्सिआ ।

नायि । तेहिं अहं खडिखंडएहिं उहिद त्ति उच्चामि ।

देवी स्वगतम् । णहि ससिप्पभागब्भुप्पत्तिमंतरेण ईरिसी रूपसोहा होदि । ण हु वेडूरिअभूमिगब्भुप्पत्तिमंतरेण वेडुरिअमणिसलाआ णिप्पज्जंदि । प्रकाशम् । णं तुमं कप्पूरमंजरी ।

नायि । अधोमुखी तिष्ठति ।

देवी । एहि बहिणिए आलिंगेसु मं ।

नायि । अज्जे कप्पूरमंजरीए एसों पढमो पणामो ।

देवी अज्ज मए भैरवाणंद तुम्ह प्पसाएण अपूव्वं संविहाणअं अणुभविदं बहिणिआकप्पूरमंजरीदंसणेण ।

"रमणविस्तरो नितम्बगरिमा"

आर्य कपिञ्जल आपृच्छ्य जानीहि का एषेति । एहि मुग्धमुखि उपविश्य निवेदयतु का त्वमिति ॥ आसनमेतस्याः ॥ एतन्मे उत्तरीयमासनम् ॥ अस्त्यत्र दक्षिणापथे वैदर्भं नाम नगरं तत्र कुन्तलेशः सकलजनवल्लभो वल्लभराजो नाम राजा ॥ यो हि मम मातृष्वसृपतिर्भवति ॥ तस्य गृहिणी शशिप्रभानाम ॥ सापि मे मातृष्वसा ॥ ताभ्यामहं क्रीडनकैः क्रीडा उदितेत्युच्यते ॥ नहि शशिप्रभागर्भोत्पत्तिमन्तरेण ईदृशीरूपशोभा भवति । न खलु वैडूर्यभूमिगर्भोत्पत्तिमन्तरेण वैडूर्यमणिशालका निष्पद्यन्ते ॥ ननु त्वं कर्पूरमञ्जरी ॥ एहि भगिनिके आलिङ्गयस्वमाम् ॥ आर्ये कर्पूरमञ्जर्या एष प्रथमः प्रणामः ॥ अद्यमया भैरवानन्द तव प्रसादेनापूर्वं संविधानकमनुभूतं भगिनिकाकर्पूरमञ्जरीदर्शनेन ।

शेष उत्तराङ्के ॥

THE VIDVAN-MANO-RANJINI'

OR

REJOICER OF THE MIND OF THE LEARNED,

A COMMENTARY ON SAD-ÁNANDA'S VEDÁNTA-SÁRA, BY RÁMA-TÍRTHA.

(Continued from page 306.)

Tranquillity &c. Tranquillity should by considered after self-restraint, inasmuch as the external organs are the media of the outward activity of the internal organ, and the restraint of the internal organ is impossible without that of the external organs; and inasmuch as the order of fact is preferable to the order of instruction, as in the case of the fiery oblation and the cooking of the gruel used at this oblation [where the order of injunction is inverted, the agni-hotra being enjoined before the preparation of the gruel which is a prerequisite]. Tranquillity is the restraint of the mind or internal organ, that is, its forcible withdrawal from objects of sense. So much being premised, the author anticipating an objection that this is absurd, the restraint not being conformable to knowledge, inasmuch as the restraint from objects hearing &c. [and consequently from the Veda &c.] would be included, proceeds to characterise restraint.

From the hearing &c. The words *et cætera* are intended to include *reflection &c.* This is to be understood also in the sequel. In the phrase with the exception of this, the word this means hearing &c. [that is, hearing,

---

ऐहिकानामिति । इहलोके भवाऐहिकाः प्रतिपन्नशरीरसम्बन्धिनः स्रक्चन्दनवनितागृहक्षेत्रपशुमर्त्यादिविषयजन्यसुखस्वरूपाभोगाः कृषिसेवाप्रतिग्रहादिकर्म्मजन्या अनित्या यथा दृष्टाः एवमामुष्मिका अप्यमृतादिविषयसेवाजन्यानन्दा यागादिकर्म्मजन्यत्वादनित्या भवितुमर्हन्तीति निश्चित्यतेभ्योऽतितरां विषमिश्रितान्नछर्दितान्नवज्जुगुप्सेहामुत्रलफभोगविरागइत्यर्थः । अयं भावः सुखं मे निरतिशयं भूयात् दुःखं माभूदणुमात्रमपीत्यखिलप्राणिनामस्त्यभिनिवेशः । तेचैवमभिनिविष्टाः पुरुषकारावलम्बनेन सर्व्वोत्साहं यतन्तोऽपि न लभन्ते सुखमात्यन्तिकं दुःखाभावञ्च कथं केचित्समुद्रयानराजप्रीणनाद्यतिकष्टमनुभूय फलकाले स्वयं नश्यन्ति केचित् प्राप्तफलाअपि व्याध्याद्युपद्रुताः सन्तोभोगं न लभन्ते केचिंत्तु प्राप्तेष्टभोगा अपि भोग्यभार्य्यापुत्रादिविनाशाद्वा तद्विसम्वादाद्वान्यैर्व्वा सहस्पर्द्धासूयादिभिः सञ्चितभोग्यजातस्य क्षयभयेनानावृष्ट्यादिचिन्तासन्तापादिभिश्च क्षणमपि सुखमलभमानाः कष्टादरिद्राः कान्यकुब्जक्लीवबधिरादयोबुभुक्षापिपासार्दितवहुलमुपलभ्यन्ते । एवं दुःखबहुले संसारे सुखलवमात्रमननुभवन्नपि कृपणवद्विशुद्धचित्तो न सज्जते किन्तु विरज्यत एवेति। नन्वस्त्येवमैहिकं सुखमनित्यत्वादिदोषदुष्टत्वाद्विरागास्पदं तथापि न पारलौकिकाद्विरक्तिरुपपद्यते । क्षयिष्णुत्वानुमानस्याक्षय्यं हवै चातुर्म्मास्ययाजिनः सुकृतं भवतीति श्रुतिबाधितविषयस्यानुत्थानादिति चेत् मैवं तद्यथेह कर्म्मचितो लोकः क्षीयते एवमेवामुत्र पुण्यचितोलोकःक्षीयते इति श्रुत्या वस्तुबलावलम्बनेन प्रवृत्तयाऽनन्यपरया सापेक्षाक्षय्यफलविषयिकायाः प्रशस्तलक्षणाया विध्येकवाक्यत्वेनान्यपरायास्तस्या एव बाधितत्वात् । नहि जन्यं नित्यं भावरूपं दृष्टं । अत ऐहिकभोगव दाब्रह्मस्तम्बपर्य्यन्तेषु भोगेषु वैराग्यमुपपद्यत इति तदुक्तं भगवता व्यासेन यच्च कामसुखं लोके यच्च दिव्यं महत्सुखं । तृष्णाक्षयसुखस्यैते नार्हतः षोडशीं कलामिति । शमादीन्विभजते ॥

reflection and meditation.] Quiescence [or cessation] is the inaction of the external and internal organs thus restrained, from objects different therefrom, that is, from objects different from hearing &c., such inaction being absence of incitement to acting towards objects. It might be objected that this definition of quiescence appears to be confounded with the definitions of tranquillity and self-restraint; the meaning of the definition, which is the arrest of the operation of the outwardly active senses, being identical with those. The author, therefore, not contented with this definition, defines quiescence in another manner.

Or [it is the abandonment of works enjoined] &c. The meaning is that quiescence is the abandonment, shunning or renunciation, of works enjoined, that is, of actions such as the prayers at the junctions of the day [in the morning, noon, and evening,] the fiery oblation &c., which are enjoined, that is, prescribed as necessary to be done, according to the course described in Vedic and scriptural texts, such as Who duly perform the sacrifice to Prajâ-pati in truth, Having performed the sacrifice to Prajâ-pati, wherein the fees are a man's whole property, bearing within himself the sacred fires, let the Brâhman go forth a mendicant from his home. Like quiescence &c., renunciation also, being an internal portion of the knowledge of spirit, must necessarily be performed by one who desires emancipation. Accordingly the Vedic texts: Neither by works, nor by offspring, nor by wealth, only by renunciation have some partaken of immortality; Ascetics, knowing the truth by knowing the latter portion of the Veda, by conjunction with renunciation, become purified in intellect; Desiring only this world mendicants set out, and quitting desire of offspring, of wealth, and of the world, they observe the practice of mendicancy; These are merely inferior austerities, it is renunciation that is superior. So also the scriptural texts: He attains by renunciation the highest perfection of freedom from works; The renunciation of all works, which consists in reflection on the meaning of the word Thou; The root of wealth is effort and sufferance, that of sensual pleasure is beauty and form and youth, that of merit sacrifice &c., kindliness, and self-restraint, and that of liberation entire cessation from works; Sacrifice is characterised by activity, knowledge is marked by renunciation, therefore let the wise, preferring knowledge, practise renunciation. So the aphorism: That is to be embraced which is subservient to the attainment of the highest end of spirit, and not-repugnant thereto; but what is repugnant thereto is to be avoided.

A. E. G. and G. D.

शमादयइति । मनसो बहिः प्रवृत्तौ बाह्येन्द्रियाणां द्वारत्वात्तन्निरोधमन्तरेण मनोनिग्रहाशक्तेर्दमानन्तरं शमो द्रष्टव्यः पाठक्रमादर्थक्रमस्य बलीयस्त्वादग्निहोत्रयवागूपाकवत् । मनसोऽन्तः करणस्य निग्रहो विषयेभ्यो बलादाकर्षणं शमइत्येतावत्युक्ते श्रवणादिविषयेभ्योऽपि निग्रहे प्राप्ते ततो निग्रहस्य ज्ञानानुकूलत्वाभावादानर्थक्यमित्याशङ्क्य निग्रहं विशिनष्टि ॥

श्रवणादीति । मननादिसंग्रहार्थमादिपदं एवमुत्तरत्रापि द्रष्टव्यं तद्व्यतिरिक्तेत्यत्र श्रवणादिस्तच्छब्दार्थः । निवर्त्तितानां तेषां बाह्यान्तरिन्द्रियाणां तद्व्यतिरिक्त विषयेभ्यः श्रवणादिव्यतिरिक्तविषयेभ्यउपरमणं पुनर्विषयप्रवृत्त्यनुत्साहकरणमुपरतिरित्यर्थः । ननु शमदमयोर्लक्षणाभ्यामिदमुपरतिलक्षणं संकीर्णं प्रतिभाति बहिः प्रवृत्तेन्द्रियव्यापारनिरोधात्मकस्य लक्षणार्थस्य तुल्यत्वादित्यपरितोषात् प्रकारान्तरेणोपरतिं लक्षयति ॥

अथवेति । विहितानामवश्यकर्त्तव्यतया चोदितानां सन्ध्यावन्दनाग्निहोत्रादीनां कर्म्मणां विधिना तत्त्वे के प्राजापत्यामिष्टिं कुर्व्वन्ति । प्राजापत्यां निरूप्येष्टिं सर्व्ववेदसदक्षिणां । आत्मन्यग्नीन् समारोप्य ब्राह्मणः प्रव्रजेद्गृहादित्यादिश्रुतिस्मृत्युक्तमार्गेण परित्यागः परिव्रजनं सन्न्यासउपरतिरित्यर्थः । शमादिवत् सन्न्यासोऽप्यात्मज्ञानान्तरङ्गत्वादवश्यं मुमुक्षुणानुष्ठेयः तथा च श्रुतयः न कर्म्मणा न प्रजया धनेन त्यागेनैके अमृतत्वमानशुः । वेदान्तविज्ञानसुनिश्चितार्थाः सन्न्यासयोगाद्यतयः शुद्धसत्त्वाः । एतमेव लोकमिच्छन्तः प्रव्राजिनः प्रव्रजन्ति । पुत्रैषणायाश्च वित्तैषणायाश्च लोकैषणायाश्च व्युत्थायाथभिक्षाचर्य्यं चरन्ति तानि वा एतानि अवराणि तपांसि न्यासएवात्यरेचयदित्याद्याः । स्मृतयश्च नैष्कर्म्यसिद्धिं परमां सन्न्यासेनाधिगच्छति । त्वं पदार्थविचारो यः सन्न्यासः सर्व्वकर्म्मणां अर्थस्य मूलं प्रकृतिः क्षमा च कामस्य रूपञ्च वपुर्व्वयश्च । धर्म्मस्य यागादिदया दमश्च मोक्षस्य सर्व्वोपरमः क्रियाभ्यः । प्रवृत्तिलक्षणो यागो ज्ञानं सन्न्यासलक्षणं । तस्मात् ज्ञानं पुरस्कृत्य सन्न्यसेदिह बुद्धिमानित्याद्याः । न्यायश्च पुरुषस्योद्देश्यसिद्धये यदुपयुक्तमविरोधि च तदुपादेयं विपरीतं हेयमिति ॥

PRESS ADVERTISEMENT.

SANSKRIT and ENGLISH DICTIONARY, being an abridgment of PROFESSOR WILSON'S DICTIONARY, with an Appendix explaining the use of affixes in Sanskrit, by PANDIT RÁM JASAN, cloth bound and lettered. Rs. 10.

THE RÁMÁYAN of VÁLMIKÍ, translated in English verse by RALPH T. H. GRIFFITH, M. A. Vol. I. Rs. 6. Vol. II. Rs. 6. and Vol. III. Rs. 4-8. Postage 6 annas each.

THE HITOPADEŚA, containing the Sanskrit text with a Hindí translation and a Glossary, by PANDIT RÁMAJASAN, 2nd Edition. Rs. 2.

THE LAGHU KAUMUDÍ, a Sanskrit Grammar with an English version, commentary and references by DR. BALLANTYNE, late Principal of the Sanskrit College, Benares, re-edited by RALPH GRIFFITH, M. A., Principal of the Sanskrit College, Benares. *Price 8 Rupees.*

"The Translation of the Laghu Kaumudí made by the late Dr. Ballantyne has enabled even beginners to find their way through the Labyrinth of Native Grammar." *Prof. Max Müller.*

"THE BIBLE FOR THE PANDITS." The first three chapters of Genesis diffusely and unreservedly commented, in Sanskrit and English,—with an introduction, by JAMES R. BALLANTYNE, LL. D. Rs. 3.

LAGHU KAUMUDÍ VYÁKARAN, in Sanskrit (only); the text taken from Dr. Ballantyne's Edition. Re. 1-2.

BODH CHATUSPATH CHANDRIKÁ, a Hindí and Sanskrit Primer. Annas 3.

PRINTED AND PUBLISHED BY THE PROPRIETORS, E. J. LAZARUS AND CO. AT THE MEDICAL HALL PRESS, BENARES.

काशीविद्यासुधानिधिः

श्रीगणेशाय नमः

श्रीमद्विजयिनीदेवीपाठशालोदयोदितः । प्राच्यप्रतीच्यवाक्पूर्वापरपत्तद्वयान्वितः ॥ १ ॥
अङ्करश्मिः स्फुटयतु काशीविद्यासुधानिधिः । प्राचीनार्यजनप्रज्ञाविलासकुमुदोत्करान् ॥ २ ॥

THE PANDIT.

A Monthly Journal, of the Benares College, devoted to Sanskrit Literature.

No. 74, Benares, July 1st, 1872. Vol. VII.

॥ चिन्तामणेः शब्दखण्डम् ॥

(१) ननु क्रमिकपदवत्त्वं वाक्यत्वं, न चात्र पदक्रमो, ऽनुच्चार्यमाणतयोच्चारणाधीनस्य युगपदनुमीयमानतया बुद्ध्यधीनस्य वा तस्याभावादिति चेत्, नहि क्रमिकपदवत्त्वं वाक्यत्वं, गौरश्व इत्यादावभावात्, किं तु (२) विशिष्टार्थपरशब्दत्वं, तच्चात्रास्त्येव । अथानुच्चार्यमाणस्य न वाक्यत्वं, न वा ऽर्थानुभावकत्वमिति चेत्, न । लिप्यनुमितानामपि वाक्यत्वादर्थबोधकत्वाच्च, लिपितुल्या च स्मृतिः । (३) किं च वाक्यमुच्चार्यते न तूच्चारणाद्वाक्यत्वमन्यथा वाक्यमुच्चारयेत्यत्रानन्वयापत्तिः । (४) अनुच्चारितमौनिश्लोकश्च वाक्यं न स्यात्, (५) उच्चारणादशायां वाक्यत्वे वाक्यस्यासत्त्वमेव स्यात् । एकदा तावत्पदानामुच्चारणाभावात् । न च कृतक्रियमाणकरिष्यमाणोच्चारणस्य वाक्यत्वं, समुदाये प्रत्येकस्याभावात् । (६) तस्मादर्थविशेषज्ञापकत्वेनैव ज्ञातादर्थविशेषधीः । (७) अत एवास्ति वह्निलिङ्गमिति शब्दात्प्रतीतधूमेन वह्नेरनुमानम् । ननु तदर्थज्ञापकत्वेन ज्ञातात्पदादर्थज्ञानमात्रं न तु संसर्गधीः, घटः कर्मत्वमानयनं भावना तद्बोधकमिति ज्ञानेपि घटमानयेति वाक्यादिवान्वयबोधाभावात् । एवं चान्वयप्रकारककर्मत्वाद्युपस्थापकविभक्त्यादिमत्पदविशेषस्य तदुपस्थापिताकाङ्क्षादेश्च ज्ञानं वाक्यार्थधीहेतुरतो न तैर्विना ज्ञापकत्वमात्रेण ज्ञातादर्थधीः । (८) हस्तकरादिसंदेहे कुशमानयेत्यादौ विभक्त्यादिज्ञानादेव वाक्यार्थानुभव इति । मैवम् । नहि तत्तद्विभक्त्यादिमत्पदविशेषत्वेन वाक्यार्थधीहेतुत्व,मननुगमात्, किं तु घटः कर्मत्वमित्याद्यन्वयविरोधिपदाजन्यपदार्थोपस्थि-

---

॥ शब्दचिन्तामणिव्याख्या रुचिदत्तीया ॥

(१) नन्विति । तथा च वाक्यत्वाभावात्तद्विशेषवेदत्वाभाव इत्यर्थः । (२) विशिष्टेति । विशिष्टार्थानुभावकशब्दत्वमित्यर्थः । ननु लिप्यनुमितमपि कदा चिदुच्चार्यत एवेत्यरुचेराह । (३) किं चेति । उच्चारणात्पूर्वमेव वाक्यस्वरूपं यदि वोच्चारणगर्भं तत् स्वरूपं तदा तदुच्चारणं नोच्चारणकर्मत्यनन्वय इत्यर्थः । (४) अनुच्चरितेति । तस्य कदाप्युच्चारणाभावादिति भावः । उच्चार्यमाणेत्यत्र लडर्थोपि यदि विवक्षितस्तदा दोषमाह । (५) उच्चारणेति । यदि चोच्चारणमुपलक्षणं तदा मौनिश्लोकादिसाधारणोपलक्ष्याभावात्तदर्थज्ञापकत्वेन ज्ञातत्वं तथा वाच्यं, तच्च प्रकृतेप्यस्ति इत्याशयेनाह । (६) तस्मादिति । न केवलमियं शब्दे रीतिरपि तु ज्ञायमानकरणमात्रे एव ज्ञाप्यज्ञापकत्वज्ञानप्रयोजकत्वं साधयामीत्याह । (७) अत एवेति । (८) हस्तेति । तत्र विभक्त्यादिसमभिव्याहारमुचीयान्वयधीस्तल्लोपमजानतोप्यन्वयबोध एवेत्याशयः । ननु घटः कर्मत्वमित्यादावभेदान्वयस्वरूपयोग्यत्वात्तत्तदन्वयविरोधिपदाजन्यत्वं वाच्यम्, तथा चाननुगमस्तदवस्थ एवेति लाघवाद् विभक्तिमत्पदत्वेनैव तद्धेतोस्त्वि-

तिस्तथा, सा चेहाप्यस्ति । (९) वस्तुतस्तु नानापदात्पदार्थोपस्थित्यनन्तरं वाक्यार्थबोधे तथैव सामग्री, अनुमितवेदाद्वाक्यार्थानुभवे विलक्षणैव सा, स्मृत्यर्थज्ञापकत्वेनैव ज्ञातस्य स्मृत्यर्थानुभावकत्वात् । धर्मिग्राहकप्रमाणेन तथैव तस्य सिद्धत्वात् । (१०) तवेश्वरस्येवाशरीरस्य कर्तृत्वे, (११) अत एव वर्णपदविभक्त्यादिविशेषघटितत्वेनाज्ञातस्याखण्डस्य (१२) सखण्डस्य वा वाक्यार्थानुभावकत्वात् (१३) पदार्थस्थानीयस्तस्य वाक्यार्थः, तत्र वर्णसमूहः पदं पदसमूहो वाक्यमित्यत्रापि न नो ग्रहः । (१४) प्रमाणशब्दत्वमात्रेण तस्य सिद्धेः । अन्यथा क्लृप्तहेतुं विना न सो ऽनुभावक इत्यादौ तदसिद्धावाश्रयासिद्धिः, सिद्धौ वा बाधः, तेन विनैव सर्वानुपपत्तिं परिभूय तदनुभावकत्वस्य धर्मिग्राहकमानसिद्धत्वात् । (१५) अत एव स्तुतिनिन्दाभ्यां कल्पितविधिनिषेधकवेदादर्थमधिगम्य प्रवृत्तिनिवृत्ती, अन्यथा विधिनिषेधकानां पदानां नानाप्रकारकत्वेन विभक्त्यादिविशेषवत्पदस्यानुमातुमशक्यत्वान्न ततो ऽर्थधीः स्यात्, तथापि वक्तृज्ञानानुमानानन्तरमिवा(१६)नुमितानुमानादेव वाक्यार्थसिद्धेर्लौकिकवाक्यवद्वेदस्यानुवादकत्वं स्यादिति चेत्, न । धर्मिग्राहकमानेन स्मृत्यर्थज्ञापकतया ज्ञातात्संभृतसामग्रीकत्वेनानुपदमेव वाक्यार्थबोधोदयाद् अपेक्षणीयान्तराभावात् । अनुमानस्य व्याप्त्यादिज्ञानापेक्षितत्वेन विलम्बितत्वात् । न च वेदस्यापि (१७) योग्यतादिज्ञानापेक्षिततया विलम्बः । तन्निरपेक्षबोधकस्यैव धर्मिग्राहकमानसिद्धत्वाद् (१८) योग्यतादिविशिष्टस्यैवानुमानाद्वा । (१९) एवं मङ्गलाचारस्याविगीतशिष्टाचारत्वेन कर्तव्यतामनुमाय (२०) सा कर्तव्यता, वेदबोधिता, लौकिकाऽविगीतशिष्टाचारकर्तव्यतात्वादिति (२१) तद्बोधकत्वेनानुमितवेदात् कर्तव्यताधीस्ततः प्रवृत्तिः । (२२) न तु स आचारो वेदबोधितकर्तव्यताकः, तादृशाचारत्वा,दित्यनुमितवेदात्तत्कर्तव्यताधीः । (२३) विभक्त्यादिकं विना ऽनुमितवेदात्तत्कर्तव्यताज्ञानाभावात्, (२४) मङ्गलमाचरेदित्येवंरूपस्य च वेदस्य नानुमानं, तथा व्याप्त्यभावात् । तस्मा (२५) त्तस्य कर्तव्यतामनुमाय (२६) तद्बोधकवेदानुमानं, प्रथमं कर्तव्यतानुमानेपि वेदानुमानमविनाभावात् । न च तत एव प्रत्यक्षवेदानुमानं, प्रत्यक्षत्वे उच्छेदानुपपत्तेः, शाखान्तरवत् ॥

त्यस्वरसेन मतान्तरमाह । (९) वस्तुतस्त्विति । प्रतिबन्द्यभिप्रायेण दृष्टान्तमाह । (१०) तवेति । (११) अत एवेति । तथा च धर्मिग्राहकमानसिद्धत्वादेवेत्यर्थः । घटितत्वेनाज्ञातस्येत्यस्य विवरणमखण्डस्येति । (१२) सखण्डस्य, तद्घटितत्वेन ज्ञातस्य, वाशब्दो ऽनास्थायामिवार्थे वा । (१३) पदार्थेति । आहत्य वाक्यार्थ एव ज्ञायते न तु पदार्थस्मरणावान्तरव्यापारापेक्षापीत्यर्थः । तर्हि कथं वेदत्वमित्यत आह । (१४) प्रमाणेति । तथा च न तद्घटितं वेदत्वं, किं तु प्रमाणशब्दत्वघटितं, तच्चात्रास्त्येवेति भावः । त्वया ऽप्युक्तसामग्री कल्प्येत्याह । (१५) अत एवेति । (१६) अनुमितेति । एते स्मृत्यर्थाः परस्परसंसर्गवन्तो वेदजन्यानुभवविषयत्वादित्यादेरित्यर्थः । अत्र च नाविषयत्वं न वा ऽप्राधान्येन विषयत्वमित्यनुवादकतावश्यकीति भावः । (१७) योग्यतादिज्ञानेति । आदिपदात्तात्पर्यादिग्रहः । अभ्युपगमवादेनाह । (१८) योग्यतादीति । उक्तरीतिमाचारस्थले ऽप्यतिदिशति । (१९) एवमिति । तदनुमानं प्रत्यक्षप्रकाशे व्याख्यातप्रायम् । (२०) सा, मङ्गलाचारीयेत्यर्थः । तथा च पक्षतावच्छेदकावच्छेदेन साध्यसिद्धिरिति मते मङ्गलाचारविशिष्टकर्त्तव्यताया वेदबोधितत्वानुमितौ समानसंवित्संवेद्यतया मङ्गलाचारविशिष्टकर्त्तव्यताबोधकत्वेन वेदसिद्धिस्ततस्तद्धीस्तदर्थज्ञापकत्वज्ञानमात्रस्यैवात्र सामग्रीत्वात् । तदिदमाह । (२१) तद्बोधकत्वेनानुमितवेदादिति । (२२) नत्विति । अत्र कर्तव्यतामात्रबोधकत्वेन वेदसिद्धेर्न ततो मङ्गलाचारविशिष्टकर्तव्यताबोधः स्यादिति भावः । न च बहुव्रीह्यर्थपर्यालोचनयात्रापि मङ्गलकर्तव्यताबोधकत्वेनैव तत्सिद्धिरिति वाच्यम् । वस्तुगत्या मङ्गलकर्तव्यतातद्बोधकत्वेन सिद्धावपि मङ्गलांशबोधकत्वेनासिद्धेस्तद्बोधकत्वानुपपत्तेः । नह्याकाशः श्रोत्रग्राह्यगुण इत्यनुमितावाकाशे ऽपि श्रोत्रग्राह्यत्वभानसंभव इति । तर्हि मङ्गलांशे विभक्त्यादिसमभिव्याहाररूपसामग्र्येव बोधयत्वित्यत आह । (२३) विभक्तीति । अनुमितवेदे विभक्त्यादिसमभिव्याहाररूपसामग्र्यभावादित्यर्थः । तर्हि तत्समभिव्याहृत एवानुमीयतामित्यत आह । (२४) मङ्गलमिति । (२५) तस्येति । मङ्गलाचारस्येत्यर्थः । (२६) तद्बोधकेति । मङ्गलाचारविशिष्टकर्तव्यताबोधकेत्यर्थः । अविनाभावादित्युपलक्षणमन्यपरंपरानिरासेनाश्वासार्थं चेत्यपि द्रष्टव्यम् । एवं च ततः प्रवृत्तिरिति पूर्वोक्तमपि संगच्छतइति ध्येयम् । अत्र च कथं नानुवा-

(२७) यत्त्वष्टकाः कर्त्तव्याः कार्या अष्टका इत्येवंरूपमेव वाक्यमनुमेय,मुपस्थितत्वादेवं च तत्रैवार्थे प्रतिपुरुषमन्यान्यवेदानुमानं न दोषाय । एकार्थानेकपदोपस्थितौ वा ऽनेकवाक्यानुमानमेवेति । तन्न । आचारतो वेदानुमाने मङ्गलमाचरेदित्याद्यन्यतरोपस्थितौ नियमाभावात् । अनेकवेदकल्पने च स्वानुभवविरोधः । मनुस्मृतिमूलं चानेकं वाक्यं नावश्यकमिति कथमाधुनिको ऽनेकमनुमिनुयात् । न च स्मृत्यर्थबोधको वेदः स्मृतिसदृश एवानुमेयः, नियमतः स्मृतेरुपस्थितत्वादिति वाच्यम् । तदर्थस्मृतेरपि नानाप्रकारकत्वात् । तस्य च प्रदोषादावनुच्चरितवेदस्येव वेदत्वं, (२८) श्रोत्रग्रहणार्हतया च शब्दत्वं (२९) वाक्यत्व,मर्थबोधकत्वादित्येतदेव युक्तं, (३०) स्मृत्याचारेणानुमितो वेदोऽर्थं बोधयतीति पूर्वपूर्वेणानुमितवेदाद् उत्तरोत्तरस्मृत्याचाराविति नान्धपरंपरा । शब्दार्थशक्तिग्रहवत्स्वतन्त्रप्रमाणमूलकत्वात् । तस्मान्नित्यानुमेयत्वं वेदस्य न तूच्छेद इति ॥

अत्रोच्यते ॥ (३१) उच्छिन्नवेदादर्थं प्रतीत्य स्मृत्याचारयोरुपपत्तेर्न सामग्र्यन्तरकल्पनम् । (३२) अत एव नाश्रयासिद्धिः, बाधो वा, स्मृत्याचारानुमितस्य वेदस्यास्माभिरभ्युपगमात् । (३३) इदानीं च स्मृतेरर्थं प्रतीत्याचाराच्च कर्तव्यतामनुमाय प्रवृत्तिः । न चैवं किं वेदेनेति वाच्यम् । तुल्यत्वादविनाभावाच्च तत्कल्पनं तुल्यं, तथा च स्मृत्याचारयोर्वेदजन्यानुभवमूलकत्वानुमानादेव पक्षधर्मताबलात् प्रत्यक्षवेदमूलकत्वसिद्धिः, अन्यथा तस्यानुभावकत्वाभावेन मूलत्वानुपपत्तेः । तस्मात्स्मृत्याचारानुमितो वेदः प्रत्यक्षो ऽध्ययनविषयश्च, वेदत्वात्, मतवत् । अन्यथा सामग्र्यन्तरकल्पने गौरवप्रसङ्गः । (३४) ननु स्तुतिनिन्दार्थवादेन कल्पिताद्विधिनिषेधकवाक्यात् कथमर्थमवगम्य प्रवृत्तिनिवृत्ती । नहि तत्र वर्णपदविभक्तिविधिप्रत्ययक्रमविशेषाणामनुमानं संभवति, व्यभिचारादिति चेत्, न । स्तुतिनिन्दावाक्याभ्यां हि प्रवृत्तिनिवृत्तिपराभ्यां प्रवृत्तिनिवृत्तिहेतु(३५)रर्थ एव कल्प्यते, लाघवात् । न तु विधायकनिषेधकवाक्यं, (३६) गौरवाद् (३७) उक्तदोषाच्च । यत्रार्थवादादेव (३८) तदर्थावगमः, तरति मृत्युमित्यादौ तत्र न तत्कल्पनापि । अथ तस्याध्ययनविषयत्वे शाखान्तरवद् बहुभिर्मेधाविभिराध्यात्मिकशक्तिसंपन्नैर्ध्रियमाणशाखाया उच्छेदासंभव इति चेत्, न । एकस्य न सकलशाखाध्ययने शक्तिरित्येके-

---

दकत्वमिति चिन्त्यम् । (२७) यत्त्विति । तथा च विभक्त्यादिसमभिव्याहारवत एवानुमानान्न सामग्र्यन्तरकल्पनमिति भावः । यद्यपि तादृशवेदेन समं न व्याप्तिस्तथाप्युपनीतभानमतेनेदं बोध्यम् । (२८) श्रोत्रेति । कत्वादेरेव तदवच्छेदकत्वादिति भावः । (२९) वाक्यत्वमिति । आचारमूलाभिप्रायेणेदं, तेन न पौनरुक्त्यमित्याहुः । ननु स्मृत्याचारमूलत्वं स्मृत्याचारयोरेवास्तु किं वेदेनेति शङ्कां निरस्यति । (३०) स्मृतीति । (३१) उच्छिन्नेति । न च तदर्थज्ञापकत्वज्ञानमेव सर्वत्र सामग्र्यस्त्विति वाच्यम् । तदभावेपि श्रूयमाणवाक्याद् योग्यतादिप्रतिसंधाने ऽन्वयबोधदर्शनात् वाक्यार्थस्यापूर्वत्वेन तज्ज्ञापकत्वेन प्रागज्ञानाच्चेति भावः । अन्यथेत्यादिप्रागुक्तमुद्धरति । (३२) अत एवेति । नन्विदानीं विभक्त्यादिविशिष्टस्यानुमातुमशक्यत्वात्तदर्थज्ञापकत्वेनैवानुमितस्योच्छिन्नवेदस्यानुभावकत्वमिति सामग्र्यन्तरकल्पनमावश्यकमित्यत आह । (३३) इदानीं चेति । तथा च प्रत्यक्षतादशायां परं तस्यानुभावकत्वमिति न तत्कल्पनमिति भावः । (३४) नन्विति । प्रामाणिकं गौरवमिति भावः । (३५) अर्थ एवेति । इष्टसाधनत्वादिकमनिष्टसाधनत्वं चेत्यर्थः । (३६) गौरवादिति । आवश्यकार्थकल्पनेनैवोपपत्तेरिति भावः । (३७) उक्तेति । विभक्त्यादिमतो ऽनुमातुमशक्यत्वात्सामग्र्यन्तरकल्पने गौरवादित्यर्थः । (३८) तदिति । अर्थकल्पनापीत्यर्थः । अपिः सामग्र्यन्तरकल्पनं समुच्चिनोति । ननु कृतिसाध्येष्टसाधनत्वं तर्हि कस्यार्थ इत्यवश्यं तद्बोधार्थं विधिकल्पनम् । किं च तादृशस्य विधेयत्वव्याप्यत्वनियमादवश्यं तत्कल्पनमिति । न च लडर्थं इष्टसाधनत्वं यौक्तिकं च कृतिसाध्यत्वमिति वाच्यम् । तत्र लटो ऽनभिमतत्वादिति चेत् । अत्र के चित् । सिद्धसाध्यसमभिव्याहारेण सिद्धं साध्यायोपयुज्यत इति व्युत्पत्तिबलात्तथा प्रतीतिरित्याहुः । तच्चिन्त्यम् । तादृशव्युत्पत्तौ मानाभावात् । भावे वा कथं चित्प्रतीतावपि पदानुपस्थितस्याप्रकारत्वेन कृतिसाध्यत्वादिप्रकारकज्ञानाभावे ततोपि प्रवृत्त्यनुपपत्तेः । अन्ये तु व्युत्पत्तिबलादत्र सोर्थो भासते इत्येव पूर्वस्माद्भेदः, प्रवृत्तिस्त्वानुमानिकज्ञानादेव । यष्टा ऽश्वमेधेनेति तृतीयात इष्टसाधनत्वलाभ इति कृत्वा तयोक्तं, कृतिसाध्यत्वं त्वानुमानिकमेवेत्याहुः । के चित्तु स्मृत्यनुमित्यादावित्यत्रातद्गुणसंविज्ञानबहुव्रीहिवशादर्थवादा-

नेवापरैरपि तदनध्ययने शाखोच्छेदसंभवात् । एकानधी-
ताया अपराध्ययनविषयत्वनियमे मानाभावात् । (३६)
शाखात्वस्येव प्रत्यक्षशाखात्वस्याप्यप्रयोजकत्वात् । यद्यपि
सहस्रशाखाविदो व्यासादयः सन्त्येव, तथाप्यध्ययनाभाव
एव शाखोच्छेदः । ननु शाखोच्छेदे वर्णपदवाक्यहानिश-
ङ्कया प्रत्यक्षवेदादपि वाक्यार्थप्रयोगयोरनिश्चये वैदिकव्यव-
हारमात्रं लुप्येतेति चेत्, न । श्रूयमाणमात्रस्यैव महाजन-
परिगृहीतत्वा,त्तन्मात्रबोधिताङ्गेतिकर्तव्यतयैव शिष्टैरनुष्ठी-
यमानत्वाच्च तदर्थनिश्चयात् । न चोच्छिन्नशाखाबोधिते-
तिकर्तव्यताशङ्कयैकस्मिन्नपि कर्मण्यनाश्वासप्रसङ्गः, नाना-
शाखेतिकर्तव्यतापूरणीयत्वात्तस्येति सांप्रतं, सन्निहिततत्त-
त्कर्मणि नानाशाखाबोधितसकलेतिकर्तव्यताबोधनायैन-
मेव कालक्रमभाविनमनाश्वासमाशङ्कमानैर्महर्षिभिः प्रणी-
ता महाजनपरिगृहीताः स्मृतय इति नानाश्वासः । अ-
न्यथैकस्य सकलशाखानवगमाच्छाखान्तरबोधितेतिकर्त-
व्यतासंशयेनैकशाखातो नार्थनिश्चयः स्यात् ॥ यत्तु विभ-
क्त्यादिमत्तत्तत्पदानां तत्तत्समुदायानां च प्रत्यक्षत्वं तेष्व-
पि कश्चिद्वेदः तत्रायं समुदायो वेद इत्यनिश्चय एव नि-
त्यानुमेयार्थः, (४०) वेदत्वं वा तत्रानुमेयमिति । तन्न ।
प्रत्यक्षवेदातिरिक्तवाक्ये तदभियुक्तानां महाजनानां वेद-
त्वाभावनिश्चयात् । अत एव वेदत्वं तत्र नानुमेयं, (४१)
बाधाद् (४२) विशिष्य पक्षाज्ञानाच्च । (४३) धर्मवेदना-
जनकत्वं च वेदत्वं नानुमेयं, तज्जनकत्वस्य (४४) प्र-
त्यक्षत्वात् । (४५) नाध्ययनविषयत्वं, (४६) तदभा-
वात् । न जाति,(४७)रनभ्युपगमादिति ॥

(४८) स्यादेतत् । स्मृत्याचारयोर्वेदमूलत्वे तत्रोच्छे-
दादिविवादस्तदेव त्वसिद्धम् । तथाहि । वेदसमानार्था
महाजनपरिगृहीता च स्मृतिः स्वार्थोपस्थित्यनन्तरं स्मृ-
त्यर्थानुभावकवेदानुमाने लिङ्गं, तथा च प्राथम्यात्साध्य-
प्रसिद्ध्यर्थमुपजीव्यत्वाच्च स्मृतेरेवापूर्वादिवाक्यार्थज्ञानमस्तु,
किं वेदेन, (४९) तदर्थस्य स्मृति[illegible] एव सिद्धेः । अपूर्व-
स्यापि (५०) शब्दैकवेद्यत्वेन स्मृतितो ज्ञातस्य ज्ञापक-
त्वेनानुवादकतापत्तेश्च । (५१) सा च स्मृत्यन्तरादित्यना-
दिरेव स्मृतिधारावश्यकी । अन्यथा मनुस्मृतेः पूर्वं तत्रापि
वेदानुमानं न स्यात् । [illegible] च स्मृतिः स्मृतिजन्यवाक्या-
र्थप्रमाजन्यत्वेन (५२) महाजनपरिगृहीतत्वेन च प्रमा-
णमिति नान्धपरंपरा, (५३) प्रत्यक्षा च स्मृतिः स्मृतिमूलं,
नानुमिता । अनुमितवेदवत्तस्या अननुभावकत्वात् । (५४)
वेदार्थस्मृतिताप्रसिद्धिस्तु प्रत्यक्षवेदमूलस्मृति(५५)साह-
चर्येण (५६) भ्रमा,त्प्रत्यक्षवेदाबोधितलोभन्यायमूलस्मृ-
ताविव तान्त्रिकाणां (५७) लिङ्गाभासजन्यवेदमूलत्वभ्रमा-
द्वा भवन्ती न (५८) संभवन्मूलान्तराणां वेदमूलत्वं कल्प-

न्तरे यत्र तदवगमस्तत्र न तत्कल्पनमेवेत्याहुः । विधेयत्वव्या-
प्तिर्यद्यस्ति तदा ऽस्त्वविनाभावात्कल्पनं, प्रवृत्त्यर्थं तु न त-
थेत्येव ब्रूमः । वस्तुतो ऽप्रयोजकत्वादविनाभावो वेति भावः ।
(३९) शाखात्वस्येति । त्वमतदिति शेषः । अनिश्चयो
नानुमेयपदार्थ इत्यत आह । (४०) वेदत्वं वेति । अत एवे-
त्यस्य विवरणं (४१) बाधादिति । (४२) विशिष्येति । यदि
च सामान्यतो ऽन्यतमत्वादिना पक्षत्वं, यदि वा तावदन्य-
तमत्वं वेदत्वसमानाधिकरणमिति साध्यं तदा बाध एव
मूलम् । यद्वा एतदस्वरसादाह । (४३) धर्मेति । (४४)
प्रत्यक्षत्वादिति । उपनयमर्यादयेदं बोध्यम् । तथा च सिद्ध-
साधनान्नानुमानमिति भावः । न च स्मृतावतिप्रसङ्गः,
अनपेक्षेति विशेषणादित्याहुः । (४५) नाध्ययनेति । अदृष्टहे-
त्वध्ययनविषयत्वमित्यर्थः । (४६) तदभावादिति । नहि
तादृशानुपूर्वीविशिष्टः क्व चित्तथा पठ्यतइति भावः । (४७)
अनभ्युपगमादिति । देवदत्तप्रभवत्वाद्यनुमापकजातिभिः सं-
करप्रसङ्गादिति भावः । ननु यद्यपि शब्दतदुपजिवी-
त्यादिरूपवेदत्वानुमाने नोक्तदोषस्तथापि वेदस्य नित्यानुमे-
यत्वविवादे वेदत्वस्य तथात्वसाधने ऽर्थान्तरमिति तात्प-
र्यम् । तटस्थः प्रत्यवतिष्ठते । (४८) स्यादेतदिति । (४९)
तदर्थस्येति । वेदप्रयोजनस्य प्रवृत्त्यादेरित्यर्थः । वेदं विना-
प्यपूर्वोपस्थितावपूर्वत्वव्याघात इत्यत आह । (५०) शब्दैके-
ति । न तु शब्दविशेषवेद्यैकवेद्यत्वं, गौरवादिति भावः ।
ननु वेदं विना मूलाभावे स्मृतिरेव न स्यादित्यत आह । (५१)
सा चेति । प्रलयादिकं नास्तीत्यभिमानः । उत्पादकमुक्त्वा
प्रामाण्यज्ञापकमाह । (५२) महाजनेति । पूर्वस्मृतिरतीन्द्रिया
चेत्तदा किमपराद्धं नित्यानुमेयवेदेनेत्यत आह । (५३) प्र-
त्यक्षा चेति । तर्हि वेदमूलत्वेन महाजनानां कथं तत्प्रसि-
द्धिरित्यत आह । (५४) वेदार्थेति । (५५) साहचर्येणेति ।
प्रत्यक्षभ्रमाभिप्रायम् । (५६) भ्रमा,द्वेदमूलकत्वभ्रमादित्यर्थः ।
वेदाबोधितत्वं, वेदाबोधितार्थकत्वम् । (५७) लिङ्गेति । विवा-
दपदं स्मृतिः वेदमूला, स्मृतित्वात् । संमतवदिति भ्रमादि-
त्यर्थः । ननु सल्लिङ्गमेव तत्र कुत इत्यत आह । (५८) संभ-

यति । अथ स्मृतिरिव तद्वेदमूलकत्वप्रसिद्धिरपि महाजनपरिगृहीता, एवं च सा वेदमूलत्वनिबन्धना, अविगीतमहाजनपरिगृहीतवेदमूलत्वप्रसिद्धित्वात्, प्रत्यक्षवेदमूलस्मृतौ तत्प्रसिद्धिवत् । (५९) एवं वेदार्थस्मृतिताप्रसिद्धिरपि । अन्यथा (६०) महाजनपरिग्रहानादरे वेदस्मृत्योरपि प्रामाण्यं न स्यादिति चेत्, न । (६१) यूपहस्त्यादिस्मृतेस्तत्प्रसिद्धौ व्यभिचारात् । (६२) क्लृप्तलोभादित एव तत्संभवाद्, विचारकाणां विप्रतिपत्तेश्च तत्र तत्प्रसिद्धौ विगानं महाजनानामिति चेत्, न । (६३) अत्रापि मूलान्तरसंभवाद् विप्रतिपत्तेश्च विगानमेव तेषाम् । अत एव स्मृतीनां न्यायमूलत्वे संभवति वेदमूलत्वप्रसिद्धावपि न वेदमूलत्वम् । (६४) न च वेदमूलेयमिति कृत्वा स्मृतेर्महाजनपरिग्रहात्तन्मूलत्वम् । वेदमूलेयमिति प्रथमं ज्ञातुमशक्यत्वात् । शक्यत्वे वा किमनुमानेन । न च वेदमूलत्वेन प्रकारेण महाजनपरिग्रहः । असिद्धेः । मन्वादिस्मृतित्वेन पूर्वै महाजनपरिग्रहेऽन्योत्तरेषां परिग्रहादनुष्ठानाद्युपपत्तेः । (६५) एवं होलाकाद्याचारेपि वेदलिङ्गेनैव कर्तव्यताज्ञानोपपत्तेः किं वेदेन । तदर्थस्य लिङ्गादेवोपपत्तेः । अविगीतालौकिकविषयशिष्टाचारस्य वेदमूलत्वदर्शनाद्वेदानुमाने चाविगीतशिष्टाचारत्वेन भोजनाद्याचारेपि वेदमूलः स्यात् । वेदं विनापि तत्कर्तव्यताधीसंभवान्न तदर्थं वेद इति, इहापि (६६) तुल्यम् । आचारकर्तव्यतानुमानयोरनादित्वेनाचाराणां कर्तव्यतानुमानमूलकत्वान्नान्यपरंपरा । न च पूर्वानुमानसापेक्षमुत्तरानुमानमिति स्वतन्त्रप्रमाणमूलकत्वाभावात्सा । व्याप्तिपक्षधर्मतासत्त्वेन तेषां स्वतन्त्रप्रमाणत्वात् । नापीतरप्रामाण्याधीनं सर्वस्य प्रामाण्यमिति न निरपेक्षत्वम् । प्रत्यक्षादेरपि तथात्वापत्तेः । एतेन विवादपदमाचारो निरपेक्षप्रमाणमूलकः, अविगीतमहाजनाचारत्वात् । प्रत्यक्षवेदमूलाचारवदि,ति निरस्तम् । (६७) अनुमानस्य निरपेक्षप्रमाणत्वात् प्रमाणमूलत्वेनैव हेतोरुपपत्तेः, निरपेक्षत्वस्य गौरवेणाप्रयोजकत्वाच्च । न च सापेक्षत्वेन न प्रमाणता । व्याप्त्यादिसत्त्वात् । (६८) अन्यथा प्रमाणनैरपेक्ष्यस्य वैयर्थ्यात् । (६९) न चाचारे वेदमूलत्वप्रसिद्धेस्तदनुमानम् । (७०) असिद्धे(७१)र्व्यभिचारा(७२)दन्यथोपपत्तेश्च । न च वेदमूलत्वेनैव महाजनपरिग्रहात्तथा । (७३) नहि वेदमूलोयमिति कृत्वा महाजनानां तत्परिग्रहः, वेदमूलत्वस्य प्रथमं ज्ञातुमशक्यत्वात् । शक्यत्वे वा किमनुमानेन । (७४) न च वेदमूलत्वेनैव महाजनपरिगृहीतोयमाचार इति ज्ञात्वा तत्र महाजनपरिग्रहो (७५) गौरवा(७६)दसिद्धेश्च । (७७) पूर्वमहाजनपरिग्रहादेवोत्तरेषां परिग्रहानुष्ठानोपपत्तेः । (७८) तादृशस्मृत्याचारयोर्वेदमूलत्वेन व्याप्तेर्वेदसिद्धिरिति चेत्, न । असंभवन्मूलान्तरत्व-

---

वन्मूलेति । तथा चासंभवन्मूलान्तरत्वमेव तत्रोपाधिरित्याभासत्वमेवेति भावः । (५९) एवमिति । वेदार्थताप्रसिद्धिः वेदार्थत्वनिबन्धना, तादृशवेदार्थताप्रसिद्धित्वादित्यर्थः । अन्यथेत्यस्य विवरणं (६०) महाजनपरिग्रहानादरइति । गूढाभिसंधिराह । (६१) यूपेति । असंभवन्मूलान्तरत्वमविगीतत्वं विचारकाणां विप्रतिपत्त्यविषयत्वं वा लिङ्गविशेषणमिति नोक्तव्यभिचार इति शङ्कते । (६२) क्लृप्तेति । अभिसंधिमुद्घाटयति । (६३) अत्रापीति । तथा च स्वरूपासिद्धिरिति भावः । न चाविगीतत्वं वेदानिषिद्धत्वमिति नासिद्धिरिति वाच्यम् । तथा सति न्यायादिमूलकस्मृतेस्तत्प्रसिद्धौ व्यभिचारापत्तेः । वस्तुतो ऽप्रयोजकत्वं बोध्यम् । अज्ञानरूपासिद्धिमुद्भाव्य स्वरूपासिद्धिमाह । (६४) न चेति । आचारेपि वेदमूलत्वं निरस्यति । (६५) एवमिति । (६६) तुल्यमिति । तथा चाप्रयोजकत्वमुभयत्रेति भावः । सिद्धसाधनमाह । (६७) अनुमानस्येति । (६८) अन्यथा, सापेक्षस्याप्रमाणत्वे । (६९) न चेति । आचारो वेदमूलकः, वेदमूलकत्वेन प्रसिद्धेरित्यर्थः । अत्र प्रामाणिकप्रसिद्धिर्विवक्षिता, प्रसिद्धिमात्रं वा, आद्ये दोषमाह । (७०) असिद्धेरिति । अन्यतरासिद्धेरित्यर्थः । अन्त्ये त्वाह । (७१) व्यभिचारादिति । न्यायादिमूलकाचारइति शेषः । (७२) अन्यथेति । न्यायादिमूलकाचारवन्मूलान्तरसंभवात् तथा चाप्रयोजकत्वमिति भावः । पूर्वपदप्रसिद्धिमाह । (७३) नहीति । ननु वेदमूलत्वेन महाजनपरिगृहीतोयमिति कृत्वा यो महाजनपरिग्रहः स हेतुरस्त्वित्यत आह । (७४) न चेति । (७५) गौरवादिति । वेदमूलकत्वेन महाजनपरिग्रहमात्रस्यैव हेतुत्वे ऽधिकस्य व्यर्थत्वादिति भावः । वेदमूलत्वकल्पने गौरवम् । तथा चाप्रयोजकत्वमित्यन्ये । (७६) असिद्धेरिति । वेदमूलकत्वज्ञानं विना परिग्रहोपपत्तेस्तद्घटितहेतोरसिद्धिरित्यर्थः । तदेव स्पष्टयति । (७७) पूर्वेति । पूर्वशङ्कितमप्युपाधिदानाय शङ्कते । (७८) तादृशेति । पूर्वं पूर्वपूर्वस्मृतेरुत्तरोत्तरस्मृतिरित्यादिक्रम उक्तः, इदानीमाचारात् स्मृतिः स्मृतेराचार इत्या

स्योपधित्वात् । अन्यथा लोभन्यायमूलस्मृतेरपि वेदमूलत्वप्रसङ्गः । (७६) अस्तु वा स्मृत्याचारयोरनादित्वम् । न चाचारात्स्मृतिः स्मृतेराचार इत्यन्धपरंपरा, मूलभूतप्रमाणाभावादिति वाच्यम् । स्मृत्याचारयोरुभयोरपि प्रमाणत्वात् । अन्यथा न ततो वेदानुमानमपीति ॥ उच्यते । प्रलये पूर्वस्मृत्याचारयो(८०)रुच्छेदात् । सर्गादौ नित्यसर्वज्ञेश्वरप्रणीतवेदमूलत्वं स्मृत्याचारयोः । अन्यथा मूलाभावेनान्धपरंपराप्रसङ्गः । न च (८१) मन्वादीनामतीन्द्रियार्थदर्शित्वम् । तदुपायश्रवणादेस्तदानीमभावात् । पूर्वसर्गसिद्धसर्वज्ञमन्वादय एव तद्इति चेत्, न । प्रमाणाभावात् । स्मृत्याचारयोः प्रमाणत्वमेव तत्कल्पकमिति चेत्, न । प्रतिसर्गं तेषामन्यान्यत्वकल्पने गौरवमित्ये(८२)कस्यैव नित्यसर्वज्ञस्य कल्पनात् । न च स्मृतय एव तत्प्रणीताः । (८३) तासां मन्वादिकर्तृकत्वेन स्मृतौ बोधात् । (८४) स्मृतावेव स्मृतीनां वेदमूलत्वस्मरणाच्च । एवं च स्मृत्याचारयोर्महाजनपरिग्रहाद्वेदमूलत्वसाधकान्यपि भगवति प्रमाणम् । (८५) अत एव "प्रतिमन्वन्तरं चैषा श्रुतिरन्या विधीयत" इत्यागमोऽपि । (८६) एवं च पूर्वं प्रत्यक्षवेदमूलावेव स्मृत्याचारा,वग्रे च कालक्रमेणायुरारोग्यबलश्रद्धाग्रहणधारणादिशक्तेरहरहरपचीयमानत्वात् तदध्ययनविच्छेदेन शाखोच्छेदात् । स्मृत्याचाराभ्यामेव कर्तव्यतामधिगम्य (८७) प्रवृत्तिः । नन्वेवं स्मृतिरस्तु वेदमूला, मङ्गलाद्याचारस्तु ईश्वराचारादेव भविष्यति, घटलिप्यादिसंप्रदायव,दिति चेत्, न । (८८) बहुव्यापारघटितस्य तत्तदाचारस्य गुरुत्वेन (८९) मङ्गलमाचरेदित्यादिवाक्यस्यैव लाघवेन कल्पनात् । न च मङ्गलादिपदशक्तिग्रहार्थमाचार आवश्यक इति वाच्यम् । स्वर्गादिपदवद्वाक्यार्थत्वेन तदुपपत्तेः । (९०) अत एव यत्र वचनमात्रात्पदार्थाप्रतिपत्तिस्तत्र नाचारः परीक्षकाणां, (९१) तस्य च वेदत्वं नेश्वरप्रणीतत्वेन शक्तिग्रहणार्थं, (९२) तद्वचने व्यभिचारात्, (९३) किं तु तादृशाचारस्य वेदमूलत्वनियमादिति ।

(९४) स्यादेतत् । प्रलये सत्येवमेतत्, स एव तु नास्ति, प्रमाणाभावादिति चेत्, न । कालकपालान्यावृत्ति-

---

ह । (७९) अस्तु वेति । (८०) उच्छेदादिति । नित्यानुमेयवेदवादिमतेऽपीदं दूषणं बोध्यम् । (८१) मन्वादीनामिति । तथा च तत्प्रणीतस्मृतिरेव तन्मूलमस्तु किं वेदेनेत्यर्थः । (८२) एकस्यैवेति । तथा च मन्वादीनां सर्वज्ञत्वस्मृतिः शाब्दसर्वविषयकज्ञानवत्त्वविषयेति भावः । (८३) तासामिति ।

"वक्तारो धर्मशास्त्राणां मनुर्विष्णुर्यमोऽङ्गिराः"

इत्यादिस्मृतावित्यर्थः । (८४) स्मृतावेवेति ।

"यः कश्चित्कस्य चिद्धर्मो मनुना परिकीर्त्तितः ।
स सर्वोऽभिहितो वेदे"

इत्यादावित्यर्थः । (८५) अत एवेति । यतः स्मृत्याचारयोरीश्वरप्रणीतोच्छिन्नवेदमूलत्वमित्यर्थः । उपसंहरति । (८६) एवं चेति । (८७) प्रवृत्तिरिति । आनुपूर्व्यादिविशिष्टस्य वेदस्यानुमातुमशक्यत्वे तस्याननुभावकत्वादिति भावः । (८८) बहुव्यापारेति । एतच्चोपलक्षणम् । वस्तुत ईश्वराचारसंभवेऽपि तत्र स्वेष्टसाधनतारूपसाध्यप्रसिद्ध्यभावेन दृष्टान्तमूलव्याप्त्या नाचारान्तरसंभव इत्याहुः । (८९) मङ्गलमाचरेदिति । देवतास्तुत्यादिकमाचरेदित्यर्थः । तदपि वास्तवाभिप्रायम् । वस्तुत आनुपूर्व्यनिश्चयएव वेदत्वेनैव तदनुमानमिति । (९०) अत एवेति । वाक्यापेक्षया आचारस्य गुरुत्वादेवेत्यर्थः । नन्वस्तु वाक्यस्य कल्पनं तथापि तस्य वेदत्वं कुत इत्यत आह । (९१) तस्य चेति । (९२) तद्वचने, घटमानयेत्यादौ (९३) किं त्विति । न चाप्रयोजकत्वं, तथा च शक्तिग्राहकतद्वचनवत्तन्मूलतद्वाक्यस्यापि वेदत्वं माऽस्त्विति वाच्यम् । शब्दतदुपजीवीत्यादिप्रागुक्तलक्षणाक्रान्तत्वेन तस्य वेदत्वात्, अन्यथाऽश्वमेधेन यजेतेत्यादेरप्यवेदत्वशङ्का स्यादिति भावः । उपोद्घातसंगतिमाह । (९४) स्यादेतदिति । कालेत्युपलक्षणं, कालोपाधिदिक्तदुपाध्यादिकमपि बोध्यम् । एतच्च घटप्रागभावस्याकाशवृत्तितयाऽर्थान्तरं मा भूदिति बाधस्फोरणाय, तेन कार्यद्रव्यानधिकरणत्वेन कार्यद्रव्याधिकरणभिन्नत्वस्य विवक्षितत्वात्कपालस्य चातथात्वात् पक्षधर्मताबलेन तादृशकालसिद्धिरिति । न च दिशाऽर्थान्तरम् । तादृशकालासिद्धौ दिशोऽपि तादृप्यासिद्धेः । नहीदानीं कापि दिक् सकलकार्यद्रव्यशून्या । तथा च तादृशकालावच्छेदेनैव दिशोऽपि तादृप्यसिद्धेरिति तत्सिद्धिरप्रत्यूहैव । न च भूतलादिवृत्तित्वेनार्थान्तरं, घटप्रागभावाधिकरणीभूतभूतलादेः कार्यद्रव्याधिकरणत्वनियमात् । प्रागभावस्य प्रतियोगिसमानदेशत्वात् । न च कालस्यापि कार्यद्रव्याधिकरणत्वेन तद्भिन्नत्वाभावाद्बाध इति वाच्यम् । अखण्डस्यातथात्वेऽप्येककालोपाधेस्तथात्वेन बाधा

(९५) घटप्रागभावः कार्यद्रव्यानाधाराधारः। कार्यद्रव्यानधिकरणकार्याधिकरणवृत्तिर्वा, (९६) अभावत्वाद्, आकाशवृत्त्यन्योन्याभाववदिति वृत्तप्रलयसाधनात्, एवमेव (९७) घटध्वंसं पक्षीकृत्यागामिप्रलयसाधनम्। यद्वा घटः, (९८) कार्यद्रव्यानधिकरणकार्याधिकरणवृत्तिध्वंसप्रतियोगी, (९९) कार्यत्वात्, (१००) शब्दवत्। यद्वा (१०१) कार्यद्रव्यत्वं, कार्यद्रव्यानधिकरणकार्याधिकरणवृत्तिध्वंसप्रतियोगिवृत्ति, (१०२) कार्यमात्रवृत्तित्वात्, शब्दत्ववत्। यद्वा (१०३) एककालीनाः सर्वे परमाणवः, समग्रोपादेयप्रबन्धशून्याः, (१०४) आरम्भकत्वात्,नष्ट-

---

भावात्। (९५) घटप्रागभावः। एतत्कालीनघटप्रागभावः, तेन वृत्तप्रलयसिद्धिः। अत एव प्रागित्यपि। एकदैव सर्वब्रह्माण्डनाश इति मतेनेदम्। केचित्तु एतद्ब्रह्माण्डवृत्तित्वं कार्यद्रव्ये विशेषणमित्याहुः। अत एव खण्डप्रलयसिद्धये द्वितीयसाध्ये कार्याधिकरणपदं, तस्यैव खण्डप्रलयपदार्थत्वात्। यत्तु महाप्रलयेनार्थान्तरवारणाय तदिति। तन्न। प्रागभावस्य महाप्रलयवृत्तित्वाभावादेव तदसंभवात्। कार्याधिकरणत्वं च भावकार्याधिकरणत्वम्। (९६) अभावत्वादिति। नन्विदं कार्यद्रव्यानधिकरणान्योन्याभावे व्यभिचारि। अन्योन्याभावस्य प्रतियोगितावच्छेदकासमानाधिकरणत्वेन तत्र साध्यासत्त्वादिति चेन्न। तस्यापि कार्यद्रव्यानधिकरणे सिसाधयिषितकाले सत्त्वेन पक्षसमत्वात्। अन्यथा नित्यत्वव्याघातात्। न चैवमन्योन्याभावस्य प्रतियोगितावच्छेदकविरोधित्वनियमभङ्गापत्तिः। स कालविशेषः कार्यद्रव्यानधिकरणभिन्न इति प्रतीत्यभावेन देशतया तस्य तदनधिकरणत्वेपि तदानीं कार्यद्रव्यानधिकरणान्योन्याभाव इति प्रतीत्या कालत्वेन तस्य तदधिकरणत्वाभ्युपगमात्। अत एव कालान्योन्याभावस्य नित्यतया कालवृत्तित्वेपि देशतया कालो नाधिकरणं, कालः कालभिन्न इति प्रतीत्यापत्तेः। नन्वेतदेव कथमिति चेत्, न। अनन्यगत्या वृत्तिभेदेन तथाऽभ्युपगमादित्याहुः। द्वितीयसाध्ये चाभावत्वमनाद्यभावत्व, मत एवान्योन्याभावपर्यन्तमुक्तं दृष्टान्ते, तेन महाप्रलयाव्यवहितपदार्थध्वंसे न व्यभिचारः। केचित्तु एतत्कालीनाभावत्वादित्यत्र तात्पर्यमित्याहुः। न चाकाशस्य सौरालोकादिकार्यद्रव्याधारतया दृष्टान्तासिद्धिरिति वाच्यम्। तथा प्रतीत्यभावेन तस्य तदाधारत्वानुपपत्तेः। संयोगितामात्रेण तथात्वे वैपरीत्यापत्तेरिति भावः। प्रसङ्गादाह। (९७) घटध्वंसमिति। एतत्कालीनघटध्वंसमित्यर्थः। एतच्च द्वितीयसाध्ये बोध्यं, तेन न महाप्रलयेनार्थान्तरम्। न चैवमपि महाप्रलयपूर्वकालीनद्रव्यनाशकालेनार्थान्तरं द्रव्यगुणादीनां क्रमेण नाशादिति वाच्यम्। सूक्ष्मकालोपाधिभिन्नत्वेन कार्याधिकरणत्वस्य विशेषणाद्युगपदेव सर्वनाश इत्यन्ये। न च महाप्रलयाव्यवहितसृष्टिकार्यध्वंसे व्यभिचारः। एतत्कालीनाभावत्वादित्यत्र तात्पर्यात्। (९८) कार्येति। पूर्ववच्च महाप्रलयपूर्वक्षणेनार्थान्तरम्। (९९) कार्यत्वात्। इदानींतनभावकार्यत्वात्, तेन महाप्रलयाव्यवहितकार्ये ध्वंसे च न व्यभिचारः। (१००) शब्दवदिति। इदानींतनशब्दवदित्यर्थः। (१०१) कार्यद्रव्यत्वमिति। अत्रापि पूर्ववन्नार्थान्तरं, तादृशसुखादिवृत्तित्वेनार्थान्तरवारणाय पक्षे द्रव्यपदम्। (१०२) कार्यमात्रेति। ननु ध्वंसत्वे व्यभिचारः। न च कार्यपदं भावकार्यपरम्। मात्रपदवैयर्थ्यापत्तेः। न च भाववृत्तित्वे सति कार्यमात्रवृत्तित्वमित्यर्थः, तथा चानन्तत्वे व्यभिचारवारणाय मात्रपदमिति वाच्यम्। तथा सति चरमक्रियात्वादौ व्यभिचारापत्तेरिति चेत्। अत्राहुः। मात्रपदस्य कार्त्स्न्यपरत्वेन कार्यपदस्य भाववृत्तिविभाजकोपाध्यवच्छिन्नपरत्वेन च भाववृत्तिविभाजकोपाध्यवच्छिन्नयावत्कार्यवृत्तित्वादित्यर्थः। तेन नोक्तदोषः। न च व्यर्थविशेषणत्वं, विशेष्यमात्रं च स्वतः सिद्धमिति वाच्यम्। विकासकविशेषणे तस्यादोषत्वात्। नीलधूमवत्संकोचकविशेषण एव तथात्वादिति। तच्चिन्त्यम्। व्याप्याश्रयस्यैवं विकासेपि व्याप्याश्रयस्याविकासात्। तद्घटितोपाधेरेकत्वात्। न च व्याप्याश्रयविकासकस्यापि न व्यर्थत्वं तत्र यन्निष्ठेत्यादिन्यायस्यासंभवेन मानाभावात्। अन्यथा धूमालोकान्यतरत्वादावपि व्यर्थत्वं न स्यात्। आलोकादिपदस्यायोगोलकादिव्याप्याश्रयविकासकत्वात्। यत्तु कार्यतावच्छेदकधर्मत्वादित्यर्थ इति, तन्न। महाप्रलयाव्यवहितसृष्टिसंबन्धिचैत्रप्रभवत्वाद्यनुमापकशब्दवृत्तिजातौ व्यभिचारापत्तेः। न च व्योमैव कार्यद्रव्यानधिकरणमादाय तत्र साध्यस्य सत्त्वमिति वाच्यम्। शब्दवद् घटपटादावपि कुम्भकारादिविशेषप्रयोज्यजातिसंभवेन तत्र तथापि व्यभिचारात्। केचित्तु अनादितावच्छेदकधर्मत्वादित्यर्थ इति, अनादित्वं च सजातीयध्वंसव्याप्यप्रागभावप्रतियोगित्वमित्याहुः। (१०३) एककालीना इति। स्पर्शवन्त इत्यपि पूरणीयम्। अन्यथा मनस्यंशतो बाधापत्तेः। उपादेयपदस्य स्वोपादेयद्रव्यपरत्वात्। अन्यथा बाधापत्तेः। गुणादिसत्त्वात्। अन्योपादेयशून्यत्त्वाभावाच्च शून्यपदस्य कादाचित्काभावपरत्वात्। अत एवारम्भकत्वादिति हेतुरुक्तोऽन्यथा मेयत्वादित्याद्येव क्रियेतेति भावः। कार्यसमानकालीनतादृशोपादेयप्रबन्धकादाचित्काभाववन्त इति साध्यं, तेन न महाप्रलयेनार्थान्तरम्। (१०४) आरम्भकत्वात्। द्रव्यसमवायिकारणत्वात्

पवनारम्भकपरमाणुवत् । (१०५) सर्वत्र पक्षतावच्छेदका- वच्छिन्ने साध्यं प्रतीयतइति एककाले शून्यता लभ्यते । (१०६) न च पवनपरमाणूनामपि पक्षत्वेनांशतः सिद्ध- साधनं, (१०७) पक्षधर्मताबललभ्यसाध्याप्रतीतेः । (१०८) अभेदानुमानवच्च पक्षस्य दृष्टान्तत्वाविरोधः । यद्वा (१०९) परमाणवः, कार्यद्रव्यानधिकरणवृत्तिकार्यवन्तः, । (११०) नित्य (१११) द्रव्यत्वाद्, आकाशवत्, (११२) भूगो- लक(११३)संतानोयं, भूगोलकसंतानानधिकरणवृत्तिध्वंस- प्रतियोगी,(११४)कार्यत्वात्, घटवत्, यद्वा (११५) एत- त्कर्मातिरिक्तानि कर्माणि, एतत्प्रतिबन्धकप्रतिबध्यानि, कर्मत्वा,देतत्कर्मवत् । न चात्र व्यभिचारशङ्का,सर्वेषामे- (११६)वंरूपत्वात् । अनेवंभावे (११७) स्वभावप्रच्य-

अन्यथोक्तसाध्याभाववति मनःप्रभृतौ व्यभिचारापत्तेः । (१०५) सर्वत्रेति । यथा चैत,त्तथोक्तमनुमानप्रकाशे । (१०६) न चेति । अपक्षत्वे प्रलयासिद्धिरिति भावः । उद्देश्यप्रतीतेरसिद्धेर्नांशतः सिद्धसाधनमित्याह । (१०७) पक्षेति । (१०८) अभेदेति । निश्चितसाध्यवत्त्वं दृष्टान्तत्वे प्रयोजकं, न तु पक्षान्यत्वमपीति भावः । (१०९) परमाणव इति । अत्रैकपार्थिवपरमाणुपक्ष- त्वेपीष्टसिद्धिरिति बोध्यम् । अत्र कार्यवन्त इत्यत्र कार्यपदम- व्यासज्यवृत्तिभावकार्यपरं, तेन परमाण्वाकाशसंयोगादिना न सिद्धसाधनं, न वा महाप्रलयेनार्थान्तरम् । कपालादौ व्यभि- चारादाह । (११०) नित्येति । गोत्वादौ व्यभिचारादाह । (१११) द्रव्येति । न चेश्वरे व्यभिचारः, तदन्यत्वेनापि विशे- षणात् । वस्तुतो भावपदं न देयम् । कार्यपदं च जातिमत्- परं, तथा च ज्ञानादिकमादायेश्वरेपि साध्यसत्त्वान्न व्यभि- चारः । भावकार्याधिकरणत्वमपि कार्यद्रव्यानधिकरणविशेष- णमतो न महाप्रलयेनार्थान्तरमिति । (११२) भूगोलकेति । अवयवानामावापोद्वारेण भूगोलकस्याधुना नाशादर्थान्तरमत उक्तं, (११३) सन्तानेति । कार्याधिकरणत्वमपि विशेषणं देयं, तेन न महाप्रलयेनार्थान्तरम् । (११४) कार्यत्वात् भावकार्य- त्वात् । (११५) एतत्कर्मेति । अत्र प्रतिबध्यत्वं प्रतिबन्ध- स्वरूपयोग्यत्वं बोध्यं, तेन जनितभोगे नष्टेपि कर्मणि साध्य- सत्वान्न बाधो व्यभिचारो वा, तथा च पक्षधर्मताबलेन सक- लकर्मप्रतिबन्धकतयैककालः सिध्यतीति भावः । न च कर्मत्व- मेव पक्षतावच्छेदकमस्त्विति वाच्यम् । पक्षान्यस्यैव दृष्टान्त- त्वमिति मतेनोक्तत्वादित्येके । व्याप्तिग्रहएव साध्यसिद्धिप्रस- ङ्गाद् इत्यपरे । (११६) एवंरूपत्वादिति । तत्प्रतिबन्धकप्रति- बध्यस्वरूपयोग्यत्वादित्यर्थः । (११७) स्वभावेति । कर्मत्वा- वच्छेदेनैव तादृशस्वभावनिर्णयादिति भावः । ननु तादृश-

वात् । (११८) अन्यथा नियमेपि नियमान्तरापेक्षाया- मनवस्थितेः । (११९) आगमोप्यमुमर्थं संवदतीति कृतं प्रसक्तानुप्रसक्त्या ॥

स्वभावएव किं नियामकमत आह । (११८) अन्यथेति । नियामकान्तराभिधानप्रसङ्गेनैव पुरुषायुषपर्याप्तौ वादान्तराव- तारो न स्यादित्यनवस्थार्थः । तदिदमुक्तं, कृतं प्रसक्तानुप्रस- क्त्येति । नन्वेतदतिरिक्तानि कार्याणि एतदुत्पादकाद्याधार- णोत्पाद्यानि कार्यत्वादित्याद्यपि स्यादित्यत आह । (११९) आगमो ऽपीति । "नाहो न रात्रिर्न नभो न भूमि"रित्यादि- रित्यर्थः । अन्यत्र तु न तथागमाद्युपलम्भ इति भावः ॥

॥ अथ वेदान्तसूत्रशैवभाष्यप्रथमाध्यायस्य ॥

॥ तृतीयपादारम्भः ॥

इह पादे स्पष्टास्पष्टब्रह्मलिङ्गानां वेदान्तवाक्यानां वि- चारः प्रसङ्गादधिकारिनिरूपणं च क्रियते ॥

॥ द्युभ्वाद्यायतनं स्वशब्दात् ॥ १ ॥

"यस्मिन् द्यौः पृथिवी चान्तरिक्षमोतं मनः सह प्राणैश्च सर्वैस्तमेवैकं जानथ आत्मानमन्या वाचो विमुञ्चथ अमृतस्यैष सेतुरिति" अस्य विषयः श्रूयते मुण्डकोपनिषदि । अत्र श्रु- तौ द्युभ्वाद्याधारतया श्रूयमाण[1]: परमेश्वरादन्यो वायुरेव द्युभ्वाद्याधार इति गम्यते; "वायुना वै गौतम सूत्रेणायं च लोकः परश्च लोकः सर्वाणि च भूतानि संदृब्धानि भवन्ति" इति श्रुतौ तस्य सर्वाधारत्वप्रसिद्धेः; इति प्राप्ते[2] ब्रूमः । परमेश्वर एव द्युभ्वाद्यायतनं[3], "तमेवैकं जानीथ आत्मान- मित्यात्मशब्दात्[4] ॥ १ ॥

सूत्रात्मनो वायोरप्यात्मशब्दवाच्यत्वे को दोष इत्यत आह ॥

॥ मुक्तोपसृप्यव्यपदेशात्[5] ॥ २ ॥

"यदा पश्यः पश्यते रुक्मवर्णं
कर्तारमीशं पुरुषं ब्रह्मयोनिम् ।
तदा विद्वान् पुण्यपापे विधूय
निरञ्जनः परमं साम्यमुपैति" ॥
"यथा नद्यः स्यन्दमानाः समुद्रे
अस्तं गच्छन्* नामरूपे विहाय ।

१ श्रूयमाणः परमेश्वरोऽन्यो वेति संशयः । एवं सति इति पा० ।
२ श्रुतेस्तस्य सर्वाधारत्वसिद्धिरिति प्राप्ते इति पा० ।
३–द्यायतनत्वेन श्रूयते, कुतः इति पा० ।
४–शब्दश्रवणात् इति पा० ।
५–व्यपदेशाच्चेति पा० ।
* अगच्छन् गच्छन्ति वेत्यर्थे गच्छन्तिति छान्दसः प्रयोगः ।

तथा विद्वान् नामरूपाद्विमुक्तः
परात् परं पुरुषमुपैति दिव्यम्" ॥

इति पुण्यापुण्यप्रवृत्तनामरूपविनिर्मुक्तानां[1] मुक्तानां प्राप्यतया व्यपदेशाच्चायं परमेश्वर एव; कथमेतद्वायोः संभवति; परमेश्वरात्मक एव वायुः सूत्रात्मा, पारमेश्वरीष्वष्टासु मूर्त्तिष्वेकत्वात्; ततो न वायुरिति निर्णयः ॥ २ ॥

॥ नानुमानमतच्छब्दात् प्राणभृच्च* ॥ ३ ॥

अनुमानगम्यं प्रधानमेव द्युभ्वाद्यायतनं, तस्य सर्वोपादानत्वात्; इति न वाच्यम्; अतच्छब्दात्, आत्मशब्दात्; न प्राणभृज्जीवश्च; अनुपपत्तेरिति ॥ ३ ॥

॥ भेदव्यपदेशात् ॥ ४ ॥

अत्रेश्वरस्य जीवाद्भेदो व्यपदिश्यते;

"स समाने वृक्षे पुरुषो निमग्नो-
ऽनीशया शोचति मुह्यमानः ।
जुष्टं यदा पश्यत्यन्यमीशं
तदास्य महिमानमेति वीतशोकः" ॥

इति; अतः स्वतः परमेश्वर एव द्युभ्वाद्याधारः ॥ ४ ॥

॥ प्रकरणात् ॥ ५ ॥

"अथ परा यया तदक्षरमधिगम्यते" इति परस्य खल्विदं प्रकरणम्; अतश्च परमेश्वरः ॥ ५ ॥

॥ स्थित्यदनाभ्यां च ॥ ६ ॥

"द्वा सुपर्णा सयुजा सखाया समानं वृक्षं परिषस्वजाते ।
तयोरन्यः पिप्पलं स्वाद्वत्ति अनश्नन्नन्योऽभिचाकशीति" ॥

इति जीवस्य कर्मफलादनमुक्त्वा, अनश्नत एव दीप्यमानस्याभिधानाच्च; तस्मादर्थान्तरभूतः[2] परमेश्वर एव द्युभ्वाद्यायतनमिति निर्णयः ॥ ६ ॥

मुक्तप्राप्यतयेह प्रतिपादितस्य परमेश्वरस्य प्राप्तिप्रयोजनं निरतिशयसुखं दर्शयति ॥

॥ भूमा संप्रसादादध्युपदेशात् ॥ ७ ॥

छान्दोग्ये श्रूयतेऽस्य विषयः । छान्दोग्ये भूमैव सुखमित्युक्त्वा भूम्नः स्वरूपमाह; "यत्र नान्यत् पश्यति नान्यच्छृणोति नान्यद्विजानाति स भूमा" इति; तदत्र संदेहः; भूमशब्दनिर्दिष्टः परमेश्वरस्तदन्यो वेति; परमेश्वरादन्यः प्राण एव भूमा; पूर्वेषु नामादिषु तत्त्वेषु "अस्ति भगवो भूय" इत्यादिनारदप्रश्ने सनत्कुमारो "वाग्वाव नाम्नो भूयसी" इत्यादिना वागादीनि निर्दिश्य[1] प्राणस्योपरि प्रश्नप्रत्युक्तिभ्यां विनैव यतो भूमानमवतारयति; न परमेश्वरस्तत्र प्रसक्तः; अतो भूमा प्राण इति प्राप्ते ब्रूमः । अत्र परमेश्वर एव भूमशब्दनिर्दिष्टः, संप्रसादादध्युपदेशात्; संप्रसादो जीव उच्यते, "अथ य एष संप्रसाद" इति श्रुतेः; स चात्र प्राणशब्देन निर्दिश्यते; तस्मादूर्ध्वमर्थान्तरत्वेन[2] भूमोपदिश्यते; "एष तु वा अतिवदति यः सत्येनातिवदतीति" इत्यादिना; अत्र हि पूर्वं "स वा एष एवं पश्यन् एवं मन्वान एवं विजानन् इत्यतिवादिनोऽतिवादित्वमुक्त्वा तदनन्तरम्, "एष तव" इति तुशब्देन पूर्वस्मात् प्राणातिवादिनः सत्यातिवादिन आधिक्यप्रदर्शनात् पूर्वोतिवादनिमित्तात् प्राणादेतदतिवादनिमित्तस्य सत्यशब्दाभिधेयस्याधिक्यमवसीयते; स एवाग्रे भूमगुणविशिष्टः प्रतिपाद्यते; "अथात आत्मादेश" इत्यात्मत्वेनाप्ययं वर्ण्यते; अतः प्राणशब्दनिर्दिष्टाज्जीवादधिक आत्मा भूमा परमेश्वर एव[3] ॥ ७ ॥

॥ धर्मोपपत्तेश्च ॥ ८ ॥

"स भगवः कस्मिन् प्रतिष्ठितः, स्वे महिम्नि" इत्यादिना[4] स्वमहिमप्रतिष्ठितत्वसर्वात्मत्वसर्वैककारणत्वादयो धर्मा उपदिश्यन्ते; तेषां परमेश्वर एवोपपत्तिः; न प्राणशब्देरिते[5] जीवे; ततः परमेश्वर एव भूमा नापर इति सिद्धम् ॥

ननु पूर्वत्राधिकरणे "निरञ्जनः परमं साम्यमुपैति" इति मुक्तानां ब्रह्मसादृश्यमभिहितं[6]; ततो ब्रह्मणः सायुज्यमुपगता मुक्तात्मानस्तत्पृथग्भूता वर्त्तन्त इति; अत्र "नान्यत् पश्यति नान्यच्छृणोति नान्यद्विजानाति स भूमा" इति भूमशब्दवाच्ये ब्रह्मणि दृष्टे तन्निष्ठभेदप्रपञ्चदर्शनादिनिषेधः क्रियते; कथमिह सांगत्यमिति चेत्; न; भूम्नि प्रत्यक्षे "नान्यत् पश्यति" इत्यादेरयमभिप्रायः, निरतिशयसुखस्वभावे यस्मिन् साक्षात्कृते सुखान्तराभिलाषेण रूपादिविषयदर्शनादौ न प्रवर्त्तते यन्मग्नः पुरुषः स भूमा ब्रह्मेति, ब्रह्मानन्दलवपरमाणवो हि विषयसुखविशेषाः; तथाहि श्रुतिः, "एतस्यैवानन्दस्यान्यानि भूतानि मात्रामनुभवन्ति" इति; तस्मादिह ब्रह्मणि न द्वैतनिषेधप्रसक्तिः; प्रपञ्चे सत्ये कथं मुक्तात्मनामपुरुषार्थस्य तस्य दर्शनं परिह्रियत इति न विचार्यं, न हि

१—पुण्यनिर्मुक्तानां इति पा० ।

* शंकरमते प्राणभृच्च इति पृथक् सूत्रम् ।

२. अतः संसारिणोऽर्थान्तरभूतः इति पा० ।

१—त्कुमारोऽस्तीति नामादीनि निर्दिश्य इति पा० ।

२—र्ध्वमात्मान्तरत्वेन इति पा० ।

३ इत्यादिना, ततः प्राणशब्देन निर्दिष्टात् पुरुषादन्यः परमेश्वर एव भूमा इति पा० ।

४—म्नि" इति "आत्मैवेदं सर्वमात्मनः प्राण आत्मन आश" इत्यादिना इति पा० ।

५ प्राणादिके इति पा० ।

६ सादृश्य—इति पा० ।

मुक्तात्मनां प्राकृतप्रपञ्चो दर्शनविषयः, किंतु निरतिशयानन्दस्वरूपं ब्रह्मैव प्रपञ्चाकारेण दर्शनगोचरो भवति; तथा हि श्रुतिः, "एतत् ततो भवति" "आकाशशरीरं ब्रह्म" "सत्यात्मप्राणारामं मन आनन्दम्" इति; तत्र "आप्नोति स्वाराज्यमाप्नोति मनसस्पतिम्" इत्यादिना मुक्तात्मा प्रस्तुतः; "तस्य वाक्पतिः" इत्यादिना स्वाधीनाप्राकृतविशुद्धवागिन्द्रियादिसंबन्ध उक्तः; तस्य पुनस्तादृशावस्थाप्राप्त्यनन्तरमेतद् दृश्यमानं प्राकृतप्रपञ्चजालमाकाशशरीरं चिदम्बरप्रकाशशरीरं ब्रह्मैव भवतीति तात्पर्यरहस्यार्थः; ततो मुक्तानां ब्रह्मणा सादृश्यं तत्समरसीभूतप्रपञ्चदर्शित्वमिति सर्वं समीचीनम् ॥ ८ ॥

॥ अक्षरमम्बरान्तधृतेः ॥ ९ ॥

बृहदारण्यके श्रूयतेऽस्य विषयः। "एतद्वै तदक्षरं गार्गि ब्राह्मणा अभिवदन्ति, अस्थूलमनण्वह्रस्वमदीर्घमलोहितमस्नेहमच्छायम्" इत्यादि; अत्राक्षरशब्दवाच्यस्त्रेधा संदिह्यते प्रणवो जीवः परमेश्वरो वा इति; प्रणवजीवयोरन्यतर एवाक्षरशब्दवाच्यः; कुतः[1]; अक्षरशब्दस्य वर्णपर्यायत्वात् प्रणववाचकत्वमुचितं; "पुरुषोऽक्षरमुच्यते" इति पुरुषस्यापि तदभिधेयत्वमुक्तम्; अतस्तावेवाक्षरशब्दवाच्याविति प्राप्ते ब्रूमः। अत्राक्षरशब्दवाच्यं परं ब्रह्मैव; कुतः; अम्बरान्तधृतेः; "यदूर्ध्वं गार्गि दिवो यदर्वाक् पृथिव्याः यदन्तरा द्यावापृथिवी इमे यद्भूतं च भवच्च भविष्यच्च" इत्याचक्षते, "आकाश एव तदोतं प्रोतं च" इति सर्वविकाराधारतया निर्दिष्ट आकाशः कस्मिन्नोतश्च प्रोतश्चेति गार्ग्या पृष्टे "एतद्वै तदक्षरं गार्गि ब्राह्मणा अभिवदन्ति" इत्यादिना "एतस्मिन् खल्वक्षरे गार्गि ओतश्च प्रोतश्च" इत्यन्तेन याज्ञवल्क्यवचनेन निर्दिष्टस्याक्षरस्याम्बरान्तप्रपञ्चस्य धृतिरवगम्यते; कथमेतदन्यत्र परमेश्वरात् संभवति; ततः परमेश्वर एवाक्षरपदाभिधेयः ॥ ९ ॥

॥ सा च प्रशासनात् ॥ १० ॥

सा च धृतिरेतस्यैवाक्षरस्य प्रशासने "गार्गि सूर्याचन्द्रमसौ विधृतौ तिष्ठतः" इत्यादिनात्र प्रकृष्टाज्ञावगम्यते; तज्जगच्छासनं च जीवस्य न संभवति; "एको रुद्रो न द्वितीयाय तस्थुः" इति जगच्छासने परमेश्वरस्य द्वितीयाभावश्रवणात्; अतः परमेश्वर एवाक्षरम्[2] ॥ १० ॥

॥ अन्यभावव्यावृत्तेश्च ॥ ११ ॥

अन्यभावोऽर्थान्तरत्वं "तद्वा एतदक्षरं गार्गि अदृष्टं द्रष्टृ श्रुतं श्रोतृ अमतं मन्तृ अविज्ञातं विज्ञातृ" इति वाक्यशेषः परमेश्वरादक्षरस्यान्यभावं व्यावर्तयति, प्रणवजीवपक्षयोरदृष्टत्वविशेषितद्रष्टृत्वाद्यसंभवात्; अतः परमेश्वर एवाक्षरमिति निर्णयः ॥ ११ ॥

प्रत्यक्षादिप्रमाणातीतस्यापि परमेश्वरस्य परमकरुणावशादुपासकप्रत्यक्षत्वमुपपादयितुमेतदधिकरणमारभ्यते ॥

॥ ईक्षतिकर्मव्यपदेशात् सः ॥ १२ ॥

अस्य विषयः प्रश्नोपनिषदि श्रूयते "यः पुनरेतं त्रिमात्रेणोम्,इत्येतेनैवाक्षरेण परं पुरुषमभिध्यायीत स तेजसि सूर्ये संपन्नो यथा पादोदरस्त्वचा विनिर्मुच्यते एवं हैव स पाप्मना विनिर्मुक्तः स सामभिरुन्नीयते ब्रह्मलोकं स एतस्माज्जीवघनात् परं पुरि शयं पुरुषमीक्षते" इति; अत्रेक्षतिकर्मत्वेन श्रूयमाणः परमेश्वरोऽन्यो वेति संशयः। नासौ परमेश्वरो, हिरण्यगर्भ एव, "स सामभिरुन्नीयते ब्रह्मलोकम्" इति तल्लोकप्राप्तिश्रवणात्, परशब्दस्य जीवोत्कृष्टे तस्मिन् संभवाच्च; अथवा नारायणः, तस्य पुरुषशब्दवाच्यत्वात्,जीवाद् घनाद्धिरण्यगर्भात् परत्वोपपत्तेश्च, तस्मिन्नेव प्रणववाच्यत्वप्रसिद्धेश्च; "तद्विष्णोः परमं पदं सदा पश्यन्ति सूरयः" इति तत्पदस्यैव विद्वदनुभवविषयत्वश्रवणात्; "ऋग्भिरेतं रिप्सं सामभिर्यत् तत् कवयो वेदयन्त" इत्ययमश्लोके तत्प्रत्यभिज्ञानाच्च; इति प्राप्ते ब्रूमः। अत्रेक्षतिविषयः स परमेश्वरः; उत्तरत्र "तमोङ्कारेणायनेनान्वेति विद्वान् यत् तच्छान्तमजरममृतमभयं परं च" इति तदसाधारणशान्तत्वादि[1]धर्मव्यपदेशात्; नहि हिरण्यगर्भे तत् कार्ये शान्तत्वादिकमस्ति[2]; "ब्रह्मलोकम्" इति परब्रह्मणः शिवस्य लोकः प्राप्यतयावगम्यते; "जीवघन" इति जीवसमष्टिरूपो यो हिरण्यगर्भस्तस्मात् "परात् परम्" इति परत्वेन ध्येयं हि श्रूयते; ततो हिरण्यगर्भपक्षो न युक्तः; नारायण इति यदुक्तं तद्विचार्यम्; "अमृतमभयं परं च" इति नित्यमुक्तत्वमभयहेतुत्वं विश्वाधिकतया परत्वं च कथमस्मिन्नुपपद्यते, "विश्वरूपो ह्यसौ" कथं चैतदुपपद्यते, यज्जीवघनाद्धिरण्यगर्भादपि परादुत्कृष्टान्नारायणात् परमुत्कृष्टं, पुरि शयानमन्तर्यामितया, अत एव पुरुषं परं ब्रह्म च तदुपासकः साक्षात् पश्यतीति वर्णितम्; "नारायणपरं ब्रह्म"

"ऋतं सत्यं परं ब्रह्म पुरुषं कृष्णपिङ्गलम्।
ऊर्ध्वरेतं विरूपाक्षम्"

इति हि श्रूयते; तस्मात् पुरि दहरपुण्डरीके वर्तमानतया पुरुषशब्दवाच्यं; तस्य प्रकृतिलीनस्य "यः परः स महेश्वरः" इत्यादिश्रुत्या प्रणवाभिधेयं च,"नारायणपरं ब्रह्म" इति श्रुत्या नारायणाद् विश्वरूपादधिकं, वाङ्मनसविपर्यासरहिततया

१—वाच्य इति पूर्वपक्षः; कुतः; इति पा०।
२—क्षरनामधेयः इति पा०।

१—शान्तत्वादि—इति पा०।
२ अनन्तत्वादिकमस्ति इति पा०।

ऋतं सत्यं, त्रिलोचनतया विरूपाक्षं, परशक्त्या प्रणववर्णव्यत्यासरूपोमाशब्दवाच्यया शबलाकारत्वेन कृष्णपिङ्गलं, परं सर्वातिशायि, ब्रह्म परात् परं, पुरि शयानमिति पुरुषम्, ईक्षत इतीक्षतिकर्मत्वेन व्यपदिश्यत इति युक्तं ; यदुक्तं "तद्विष्णोः परमं पदम्" इति ; तत्र प्रपञ्चाकारत्वमन्तरेण यन्निरतिशयानन्दस्वभावं विष्णोः परमं पदं रूपं तदेव शिवाभिधं परं ब्रह्मेत्यविरोधः ; विष्णुशिवयोरुपादाननिमित्तयोरवस्थाभेदमन्तरेण स्वरूपभेदो नास्तीत्यर्थः ॥ १२ ॥

तदिह हरिविरञ्च्यादिप्रपञ्चोत्तीर्णस्याप्युपासकानुग्रहाय पुरि शयानतया पुरुषस्य परशक्तिरूपोमाशबलितरूपस्य विरूपाक्षस्य परब्रह्मणः साक्षात्कारः सकलसंसारनिवृत्ति[1]पूर्वकं तत्प्राप्तये तदुपासकानां तद्वाचकप्रणवपराणां भवतीति निरूपितं ; तस्य पुरि शयनमुपासनं च प्रकटयितुमिदमधिकरणं प्रस्तूयते ॥

॥ दहर उत्तरेभ्यः ॥ १३ ॥

छान्दोग्ये श्रूयतेऽस्य विषयः । "अथ यदिदमस्मिन् ब्रह्मपुरे दहरं पुण्डरीकं वेश्म, दहरोऽस्मिन्नन्तराकाशः, 'तस्मिन् यदन्तस्तदन्वेष्टव्यं, तद्वाव विजिज्ञासितव्यम्" इत्यादि ; दहरशब्देनेह भूताकाश उच्यत उत जीवः परमेश्वरो वेति संशयः । आकाशशब्दस्य वियति रूढतया भूताकाशो दहराकाशः ; अथवा जीवो दहर इति ; अल्पपरिमाणत्वात्, तस्याणुभूतेऽस्मिन् संभवात् ; न व्यापी परमेश्वरो दहर इति प्राप्ते ब्रूमः । परमेश्वर एव दहराकाशः, उत्तरेभ्योऽपहतपाप्मत्वादिभ्यो धर्मेभ्यः ; "एष आत्मापहतपाप्माजरो विमृत्युर्विशोको विजिघत्सोऽपिपासः सत्यकामः सत्यसंकल्प" इति श्रुतिवाक्यसिद्धेभ्य इति शेषः ; त एते कथं संसारिणि जीवे संभवन्ति ; तस्मादीश्वर एव दहराकाशोऽपहतपाप्मत्वादिगुणक इति ॥ १३ ॥

॥ गतिशब्दाभ्यां तथाहि दृष्टं लिङ्गं च ॥ १४ ॥

तद्यथा, "हिरण्यनिधिनिहितमक्षेत्रज्ञा उपर्युपरि संचरन्तो न विन्देयुरेवमेवेमाः सर्वाः प्रजा अहरहर्गच्छन्त्य एतं ब्रह्मलोकं न विन्दन्ति अनृतेन हि प्रत्यूढा" इति वाक्यशेषे प्रजानामहरहरस्मिन् दहराकाशे या गतिः श्रूयते, यश्चात्र ब्रह्मलोकशब्दः, ताभ्यामपि दहराकाशः परमेश्वरः ; तथाहि, श्रुत्यन्तरे परमेश्वर एव एवंरूपं गमनं दृष्टम् ; "एवमेव खलु सौम्येमाः सर्वाः प्रजाः सति संपद्य न विदुः सति संपत्स्या[2]मह" इति, ब्रह्मलोकशब्दश्च तस्मिन् दृष्टः ; "एष ब्रह्मलोकः सम्राडिति होवाच" इति ;

[1] रभयनिवृत्ति-इति पा० ।

[2]-द्या-इति पा० ।

किंच माभूद्गतिशब्दयोरन्यत्र दर्शनम् ; अस्मिन् प्रकरणे सर्वासां प्रजानामहरहः श्रूयमाणं गमनं ब्रह्मलोकशब्दश्च परमेश्वरस्य दहराकाशत्वे पर्याप्तं गमकम्[1] ॥ १४ ॥

॥ धृतेश्च महिम्नोऽस्यास्मिन्नुपलब्धेः ॥ १५ ॥

अथ य आत्मा स सेतुर्विधृतिरेषां लोकानामसंभेदाय, इति जगद्विधृतिः परमेश्वरस्य महिमास्मिन् दहराकाश उपलभ्यते ; धृतिश्च परमेश्वरमहिमा, "एष सर्वेश्वर एष भूताधिपतिरेष भूतपाल एष सेतुर्विधारण एषां लोकानामसंभेदाय" इति श्रुतेः ; अतोऽपि दहराकाशः परमेश्वरः[2] ॥ १५ ॥

॥ प्रसिद्धेश्च ॥ १६ ॥

दहरं विपाप्म वरवेश्मभूतं यत् पुण्डरीकं पुरमध्यसंस्थं, तत्रापि दहरं गगनं, "विशोकस्तस्मिन् यदन्तस्तदुपासितव्यम्" इति महोपनिषदि "हृत्पुण्डरीकं विरजम्" इत्यारभ्य

"उमासहायं परमेश्वरं प्रभुं
त्रिलोचनं नीलकण्ठं प्रशान्तम् ।
ध्यात्वा"

इत्यादि कैवल्योपनिषदि च परमेश्वरस्योमासखस्य दहरपुण्डरीकमध्यवर्तित्वेनोपास्यत्वं प्रसिद्धं[3] ; ततोऽपि परमेश्वरो दहराकाशः[4] ।

ननु दहरपुण्डरीकमध्ये दहराकाशान्तर्वर्तित्वेनोपास्यत्वं "य एषोऽन्तर्हृदय आकाशस्तस्मिन् शेते सर्वस्य वशी सर्वस्येशान" इत्याद्युपनिषदन्तरे प्रसिद्धं परमेश्वरस्य[5], इह दहराकाशत्वेनेति विरोध इति चेत् ; अत्रापि दहराकाशमध्यवर्ती न परमेश्वर उपास्यः, किंतु दहराकाशे परमेश्वरधर्माणामपहतपाप्मत्वादीनां संबन्धप्रतीते[6]र्दहराकाशत्वमप्यस्य चिदम्बररूपतयेति न विरोधः ॥ १६ ॥

॥ इतरपरामर्शात् स इति चेन्नासंभवात् ॥ १७ ॥

"अथ य एष संप्रसादोऽस्माच्छरीरात् समुत्थाय परं ज्योतिरुपसंपद्य स्वेन रूपेणाभिनिष्पद्यत एष आत्मेति होवाच" इति इतरो जीवः परामृश्यते ; अतः प्रकृताकाशः स.

[1] इति, अत्र दहरवाक्यशेषे "इमाः सर्वाः प्रजा अहरहर्ब्रह्म गच्छन्त्य एतं ब्रह्मलोकं न विन्दन्ति" इति दहरविषयाभ्यां गतिब्रह्मलोकशब्दाभ्यां दहरो ब्रह्म, नच ब्रह्मणो लोक इति चतुर्मुखलोको वाच्यः ; तथाहि, सुप्तस्य दृष्टमहरहर्ब्रह्मगमनं कर्मधारयग्रहणे लिङ्गम्, एवकारार्थश्चकारः ; तयाच दहरो ब्रह्म इत्येव पा० ।

[2] अतः परमेश्वरमहिमा दहराकाशेऽशेषसेतुर्विधारण इति श्रूयते इति पा० ।

[3]-स्यत्वप्रसिद्धिरवगम्यते इति पा० ।

[4] दहरशब्दवाच्यः ; इति पा० ।

[5] ननु पुण्डरीकमध्यदहराकाशान्तर्वर्तित्वेन परमेश्वरस्योपास्यत्वमुपनिषदन्तरे प्रसिद्धम् ; इति पा० ।

[6]-तेस्तच्छब्दवाच्यत्वमस्येति युक्तम् इति पा० ।

एव भवतीति चेन्, उक्तानामपहतपाप्मत्वादीनां तस्मिन्न-संभवात्; अतः परमेश्वर एव तदाश्रय इति युक्तम् ॥ १७ ॥

॥ उत्तराच्चेदाविर्भूतस्वरूपस्तु ॥ १८ ॥

उत्तरत्र प्रजापतिवाक्ये "य आत्मा अपहतपाप्मा विजरो विमृत्युर्विशोको विजिघत्सोऽपिपासः सत्यकामः सत्यसंकल्पः सोऽन्वेष्टव्यः स विजिज्ञासितव्यः स सर्वांश्च लोकानाप्नोति सर्वांश्च कामान् यस्तमात्मानमनुविद्य विजानाति" इति जीवस्यापहतपाप्मत्वादिकं श्रूयते, जीवत्वलक्षणमवस्थात्रयवर्तित्वं च श्रूयते[1]; "य एषोऽक्षिणि पुरुषो दृश्यत एष आत्मेति होवाच, य एष स्वप्ने महीयमानश्चरति एष आत्मेति होवाच, तद्यत्रैतत् सुप्तः समस्तः संप्रसन्नः स्वप्नं न विजानात्येष आत्मेति होवाच" इति; ततः स एवायं भवितुमर्हतीति चेत्; न सारमेतत्; निजानादिकलङ्ककर्मसंबन्धघटितकलेवरतिरोहितापहतपाप्मत्वादिको जीवः परं ज्योतिरुपसंपद्य पश्चादाविर्भूतस्वरूप[2] आविर्भूतापहतपाप्मत्वादिकोऽत्र प्रतिपाद्यते, न संसारी; दहराकाशस्तु स्वाभाविकातिरोहिततत्तत्कल्याणगुण इति न बद्धो मुक्तो वात्र दहराकाशः ॥ १८ ॥

॥ अन्यार्थश्च परामर्शः ॥ १६ ॥

"अस्माच्छरीरात् समुत्थाय परं ज्योतिरुपसंपद्य स्वेन रूपेणाभिनिष्पद्यत" इति जीवस्य दहराकाशशब्दनिर्दिष्टेन परवस्तुना संपद्य स्वरूपाविर्भावोऽभिधीयते[3], तत्र तादृक्तत्माहात्म्यप्रतिपादनार्थो जीवपरामर्शः[4], अतो न विरोधः॥ १९॥

॥ अल्पश्रुतेरिति चेत् तदुक्तम् ॥ २० ॥

अल्पस्यानाश्रयत्वादल्पस्वरूपप्रतीतेर्न परोऽयमिति शङ्कायाः पूर्वमुक्तमेवोत्तरं व्योमवच्चेति ॥ २० ॥

॥ अनुकृतेस्तस्य च ॥ २१ ॥

तस्य जीवस्य दहराकाशशब्दनिर्दिष्टपरज्योतिरनुकृतिरवगम्यते, "नैनं सेतुमहोरात्रे तरतो न जरा न मृत्युर्न शोको न सुकृतं न दुष्कृतं सर्वे पाप्मानोऽतो निवर्तन्ते,अपहतपाप्मा ह्येष ब्रह्मलोकः, तस्माद्वा एतं सेतुं तीर्त्वा अन्धः सन्नन्धो भवति विद्धः सन्नविद्धो भवति उपतापी सन्ननुपतापी भवति, तस्माद्वा एतं सेतुं तीर्त्वा अपि न क्तमहरेवाभिनिष्पद्यते सकृद्विभातो ह्येवैष ब्रह्मलोक" इति वाक्यशेषः; अत्र हि दहराकाशप्राप्यापाप्मकार्यतया जरादिवत् पाप्मरूपस्यान्धत्वादेरभावे सततोदितप्रकाशत्वे च प्राप्यस्य दहराकाशस्यापहतपाप्मत्वं सततोदितप्रकाशत्वं च हेतुत्वेनोच्यते; तेन दहराकाशं प्राप्तस्योक्तफलावाप्तिस्तत्साम्यापत्तिरूपा तदनुकृतिरिति लभ्यते; सा च ततोऽभेद एवोपपद्यते, अतश्चायं[1] न जीव इति तात्पर्यम् ॥ २१ ॥

पुनरस्मिन् प्रकरणान्तरमाह ॥

॥ अपि च स्मर्यते ॥ २२ ॥

दहरपुण्डरीकान्तर्वर्तित्वमुपास्यत्वं च ब्रह्मणः स्मर्यते,

"अथवा परमात्मानं परमानन्दविग्रहम् ।
गुरूपदेशाद्विज्ञेयं पुरुषं कृष्णपिङ्गलम् ॥
ब्रह्म ब्रह्मपुरे गार्गि दहराब्जमध्यमे ।
अभ्यासात् संप्रपश्यन्ति सन्तस्त्वं च तथा कुरु" ॥

इत्यादि; ततः परं ज्योतिःस्वरूपं मुक्तप्राप्यं, परशक्त्युपासनार्थं परब्रह्म दहरपुण्डरीकाकाशमध्यवर्ति स्वाभाविकापहतपाप्मत्वादिगुणकमुपासनीयमिति सिद्धम् ॥ २२ ॥

अथ परमेश्वरस्योपास्यरूपान्तरमुच्यते ॥

॥ शब्दादेव प्रमितः ॥ २३ ॥

कठवल्यामस्य विषयः श्रूयते ।

"अङ्गुष्ठमात्रः पुरुषो मध्य आत्मनि तिष्ठति ।
ईशानो भूतभव्यस्य न ततो विजुगुप्सते" ॥

इत्यादि; इहाङ्गुष्ठमात्रतया श्रूयमाणः पुरुषः परमेश्वरो जीवो वेति संदेहः[2] । जीव इति वक्तुं[3] युक्तम् ।

स विश्वरूपस्त्रिगुणस्त्रिवर्त्मा ।
प्राणाधिपः संचरति स्वकर्मभिः ॥
अङ्गुष्ठमात्रो रवितुल्यरूपः ।
संकल्पाहंकारसमन्वितो यः ॥

इति तस्याङ्गुष्ठमात्रत्वसिद्धेः, "मध्य आत्मनि तिष्ठति" इति देहान्तर्वर्तित्वावगमाच्च; न तु[4] परमेश्वरो व्यापक इति प्राप्ते वदामः ।

परमेश्वर एवाङ्गुष्ठमात्र इति न युक्तम्,

"ईशानो भूतभव्यस्य" इत्यादिपरमेश्वरलिङ्गशब्दात्, "सर्वैश्वर्यसंपन्नः सर्वेश्वरश्च शंभुराकाशमध्यग इति तस्यैव सर्वेश्वरत्वश्रवणात् ॥ २३ ॥

कथं परमेश्वरे परिच्छिन्नत्वमभ्यस्यमानमुपपद्यत इत्यत[5] आह ॥

१ च इति पा० ।
२—स्वरूपतया इति पा० ।
३—वगम्यते इति पा० ।
४—यो हि तत्परामर्शो न तत्प्रभावत्वात् इति पा० ।

१—रवगम्यते, अतश्चायं इत्येव पा० ।
२—प्रमाणतया इति पा० ।
३ संदेहे जीव इति विवेक्तुं इति पा० ।
४ युक्तं, "वालाग्रशतभागस्य शतधा कल्पितस्य च" इत्यादिषु स्वल्पाकारत्वावगमात्, तस्य "मध्य आत्मनि तिष्ठति" इति देहान्तर्वर्तितया च न इति पा० ।
५ अतः परमेश्वरे परिच्छिन्नत्वमभ्यस्यमानमिह कथं युक्तमित्यत इति पा० ।

॥ हृद्यपेक्षया तु मनुष्याधिकारत्वात् ॥ २४ ॥

अपरिच्छिन्नस्यापि परमेश्वरस्याङ्गुष्ठमात्रत्वमुपासकहृदयापेक्षया, मनुष्याधिकारत्वादुपासनाशास्त्रविधेः; मनुष्याणां हृदयं यावत्प्रमाणं तदवच्छिन्नं रूपं परमेश्वरः परमकारुणिकः परिगृह्णाति तदुपासनासिद्धये; ततः परमेश्वरो ज्योतिर्मयो लिङ्गरूपतयोपासकानां हृदयमध्ये तिष्ठतीति निर्णयः ॥ २४ ॥

"मनुष्याधिकारत्वात्" इत्यस्मिन्नधिकरणे मनुष्याणामेव परमेश्वरोपासनेऽधिकारः सूचितः; कथं देवानामपि परमेश्वरविषयमुपासनं श्रूयतेऽथर्वशिरसि, "ततो देवा रुद्रं नापश्यंस्ते देवा रुद्रं ध्यायन्ति" इत्याशङ्कायां तदुपपादनायाधिकरणमिदमारभ्यते ॥

॥ तदुपर्यपि बादरायणः संभवात् ॥ २५ ॥

अस्याथर्वशिरसि श्रूयते, "ते देवा रुद्रं ध्यायन्ति" इति विषयः । इह परमेश्वरोपासने देवानामधिकारः संभवति न वेति संशयः । न संभवतीति पूर्वः पक्षः[1] । अर्थी समर्थो विद्वान् शास्त्रेणापर्युदस्तो हि वैदिके कर्मण्यधिकारी[2], नच तेषां सामर्थ्यमस्ति, तेषां विग्रहाभावात्; विग्रहवन्तो हि स्तुतिध्यानादिषु कस्यचित् समर्थाः; "इन्द्रो वृत्राय वज्रमुदयच्छत्" इत्यादीनां प्रामाण्यात् तेषां विग्रहवत्त्वमिति चेत्, न, विध्येकवाक्यतापन्नानामन्यत्र तात्पर्याभावात्, सद्भावेऽपि तेषामर्थित्वं नास्ति परमेश्वरपदं प्रति, तेषां परमेश्वरस्य च पदस्यैकत्वात्, "देवा ह वै स्वर्गं लोकमगमंस्ते देवा रुद्रमपृच्छन्,को भवान्" इति श्रुत्या स्वर्ग एव लोको रुद्रस्य परब्रह्मणः पदमवगम्यते, स एव देवानां, मुक्तस्यापि स्वाराज्यमेव प्राप्यतयावगम्यते, "आप्नोति स्वाराज्यम्" इत्यादिषु तथा वैदुष्यमपि तेषां नास्ति,उपनयनसंस्कारपूर्वकस्य वेदाध्ययनस्याभावेन तेषां वेदान्तविचारासंभवाद्ब्रह्मबोधानुपपत्तेः; अत एव तेषां शास्त्रपर्युदासश्च; तस्माद्देवतानां नास्ति ब्रह्मोपासनेऽधिकार इति । सिद्धान्तस्तु ब्रह्मोपासने देवानामप्यधिकारोऽस्ति ; कुतस्तेषामर्थित्वाद्यधिकारः, लक्षणसंभवात्, नच परमेश्वरस्य देवानां च पदं समानं, सामान्येन सुखवाचकोऽपि स्वर्गशब्दः प्रकरणादिना विशेषमभिधत्ते; यथेश्वरशब्दः स्वामिमात्रवाचकः, प्रकरणवशात् ।

"उपेयादीश्वरं चैव योगक्षेमार्थसिद्धये"

इत्यादिषु जनपदाधिपतिमात्रवाची राजविषयः; ब्रह्मणः प्रकरणे पुनरयं निरतिशयैश्वर्यवाची तद्विषयो भवति; तथा सुखमात्रवाचकः स्वर्गशब्दः प्रकरणेन प्रमाणान्तरोपपत्त्या च देवानां पदं क्षयिष्णुत्वसातिशयत्वादिदोषकलुषितं चाल्पसुखमभिधत्ते[1]; परब्रह्मणः शिवस्य पदं तु निरतिशयसुखस्वरूपमनावृत्तिलक्षणमेव ब्रूते; अतः सातिशयत्वादिदुष्टसुखपदवर्तिनां निरतिशयसुखं ब्रह्मपदं प्रत्यर्थित्वं संभवत्येव[2]; तेषामर्थवादप्रामाण्याद्विग्रहवत्त्वेन सामर्थ्यं चास्ति; तथा "आदित्यो यूपः" "अग्निर्हिमस्य भेषजम्" इत्यादिना गुणवादानुवादानां स्वार्थे तात्पर्याभावेऽपि "इन्द्रो वृत्राय वज्रमुदयच्छत्" इत्यादीनां भूतार्थवादानां प्रामाण्येन स्वार्थे तात्पर्यदर्शनात्; शक्त्यतिशयतः स्वयंभातवेदार्थत्वात्[3] पूर्वाधीतवेदविस्मरणाभावाद्वा तेषां वैदुष्यं च संभवति; शास्त्रस्य साधारण्येनोपासनाविधायकत्वादधिकारस्य दुर्निवारत्वेन दूरतस्तत्पर्युदासः[4]; तस्माद्ब्रह्मविद्यायामधिकारिणो देवाः ॥ २५ ॥

देवानां विग्रहादिमत्त्वे विरोधमाशङ्क्य परिहरति ॥

॥ विरोधः कर्मणीति चेन्ना-
नेकप्रतिपत्तेर्दर्शनात् ॥ २६ ॥

नानादेशेषु प्रवृत्तेषु यज्ञेषु तत्राहूतानां देवानां विग्रहादिमत्त्वे सर्वत्र युगपत् सांनिध्यं वाच्यं, तच्च युज्यते[5]; ततः कर्मणि विरोध इति चेन्न शङ्क्यमेतत्, विग्रहवत्त्वेऽपि सौभरिप्रभृतिषु युगपदनेकदेहप्रतिपत्तिर्दृष्टा हि, ततो न कश्चिद्विरोधः ॥ २६ ॥

मा भूत् कर्मणि विरोधः, वैदिके शब्दे भवतीत्यत आह ॥

॥ शब्द इति चेन्नातः प्रभवात् प्रत्यक्षानुमानाभ्याम् ॥ २७ ॥

कर्मविरोधाभावेऽपि वैदिके शब्दे विरोधः प्रसज्जते; कथं, देहानां सावयवत्वादनित्यत्वं सहजमेव, तत इन्द्रादिदेहानामप्युत्पत्तिरनिवार्या, तथात्वे तदुत्पत्तेः प्राक् तद्विनाशात्, परतश्च वैदिकेन्द्रादिशब्दानामर्थशून्यत्वमनित्यत्वं वा स्यात्; अनित्यत्वे पौरुषेयत्वेन विधिनिषेधवाक्यानामप्रामाण्यम्; अतस्तत्प्रयुक्तकर्मणां चासिद्धिरित्यनेकानर्थापत्तिः; ततो वैदिकशब्दविरोधस्य परिहाराय विग्रहवत्त्वं देवानामनङ्गीकार्यमिति चेत्; न, यतो वैदिकादेवेन्द्रादिशब्दादर्थसृष्टिः; यदीन्द्रादिशब्दा व्यक्तिवाचकाः स्युः, तदा खल्विन्द्रादिशब्दार्थनाशे तेषामर्थशून्यत्वमनित्यत्वं वा स्यात्; गवादिशब्दवदाकृतिवाचकत्वमेवेन्द्रादिशब्दानामुच्यते; तथाच यथा कुलालो घटादिशब्दान्मनसि विपरिवर्तमानं तत्तदाकारं स्मृत्वा घटादिकं सृजति, तथा पूर्वस्मिन्निन्द्रादौ विनष्टे वैदिकादिन्द्रा-

१ पक्षः । कुतः, अर्थित्वादीनां तेष्वसंभवात् इति पा० ।

२–दस्त इत्यधिकारी निरूप्यते इति पा० ।

१ तं स्वल्पसुखरूप–इति पा० ।

२–त्वमस्त्येव इति पा० ।

३ शक्त्यतिशयप्रतिभातवेदार्थतया इति पा० ।

४ शास्त्रस्य विधायकत्वात् तदुपासनाधिकारस्य दूरत–इति पा० ।

५–दिमत्त्वादेकस्यानेकत्र युगपत् सांनिध्यं न युज्यते इति पा० ।

दिशब्दादेव ब्रह्मापूर्वेन्द्राद्याकृतिविशेषं स्मृत्वा तदाकारमपरमिन्द्रादिकं सृजति; तत इन्द्रादिव्यक्तिविनाशेऽपि तत्तदाकृतेरवशेषेण तच्छब्दानां[1] नित्यत्वादविरोधः। किं प्रमाणमिति चेत्; श्रुतिः स्मृतिश्च; तथाहि, "वेदेन रूपे व्याकरोत् सदसती प्रजापतिः" "स भूरिति व्याहरत्" "स भूमिमसृजत्" इत्यादिश्रुतिः;

"सर्वेषां च स नामानि कर्माणि च पृथक् पृथक्।
वेदशब्देभ्य एवादौ पृथक् संस्थाश्च निर्ममे॥

इत्यादिस्मृतिः॥ २७॥

॥ अत एव च नित्यत्वम्॥ २८॥

अत एव "मन्त्रकृतो वृणीते" विश्वामित्रसूक्तं भवतीति विश्वामित्रादीनां मन्त्रकृत्त्वेऽपि विश्वामित्रादिशब्दानामाकृतिनिमित्तत्वेन मन्त्रब्राह्मणमयस्य वेदस्य नित्यत्वमुपपद्यते; यतो ब्रह्मा वैदिकान् शब्दार्थान् स्मृत्वा सृजति, अनधीतमन्त्रादिदर्शनशक्तत्वादियुतान्; तथाच पूर्वविश्वामित्रादीनामाकृतिविशेषांस्तत्तद्वैदिकशब्दैः स्मृत्वा[2] तदाकारानेवापरांस्तत्तच्छक्तिविशेषयुक्तान् ब्रह्मा नैमित्तिके प्रलये गते सृजति; ते चानधीत्यैव तान् मन्त्रानखिलान् पठन्ति; अतस्तेषां मन्त्रादिकर्तृत्वं वेदनित्यत्वं च॥ २८॥

भवत्वेवं नैमित्तिकप्रलये, प्राकृतप्रलये तु ब्रह्मादौ वेदाख्ये शब्दे च विनष्टे कथं वेदनित्यत्वमित्यत आह॥

॥ समाननामरूपत्वाच्चावृत्तावप्यविरोधो दर्शनात् स्मृतेश्च॥ २९॥

सृज्यानां समाननामरूपत्वादेव प्राकृतप्रलयावृत्तावप्यविरोधः, तथाहि, सर्वज्ञः सर्वशक्तिर्विश्वाधिपः परमेश्वर आदिकर्ता पूर्वप्रपञ्चसंस्थानं स्मृत्वा तदाकारमेव पुनः प्रपञ्चं सृजति, वेदानपि पूर्वानुपूर्वीविशिष्टान् संस्मृत्य पुत्रभूताय ब्रह्मणे प्रयच्छति; कथमवगम्यते; श्रुत्या स्मृत्या च; "सूर्याचन्द्रमसौ धाता यथापूर्वमकल्पयद् दिवं च पृथिवीं चान्तरिक्षमथो स्वः" "यो ब्रह्माणं विदधाति पूर्वं यो वै वेदांश्च प्रहिणोति तस्मा"इत्यादिश्रुतिः; स्मृतिरपि,

"अप एव ससर्जादौ तासु वीर्यमवासृजत्।
तदण्डमभवद्धैमं सहस्रांशुसमप्रभम्॥
तस्मिन् जज्ञे स्वयं ब्रह्मा सर्वलोकपितामहः।
ब्रह्माणं विदधे पूर्वं वेदानस्मै प्रयच्छति"॥

१—विनाशेऽपि तच्छब्दानां इति पा०।

२—मित्रादीनिन्द्रादिकमपि वैदिकशब्दात् स्मृत्वा इति पा०।

इत्यादि; ततः प्राकृतप्रलयावृत्तावपि वेदानां नित्यत्वमेव॥ २९॥

मतान्तरमाह॥

॥ मध्वादिष्वसंभवादनधिकारं जैमिनिः॥ ३०॥

मधुविद्यादिषु वस्वादिदेवानामेवोपास्यत्वात् प्राप्यत्वाच्च वस्वादीनां कर्तृकर्मभावविरोधेनोपास्यत्वासंभवाद्वस्वादीनां सतां वस्वादित्वं प्राप्तमिति प्राप्यत्वासंभवाच्च तत्र वस्वादीनामनधिकारं जैमिनिर्मन्यते॥ ३०॥

॥ ज्योतिषि भावाच्च॥ ३१॥

"तं देवा ज्योतिषां ज्योतिरायुर्होपासतेऽमृतम्" इति ज्योतिषि परब्रह्मणि देवानां साधारण्येन प्राप्तत्वेऽप्यधिकारभाववचनादन्यत्र मध्वाद्युपासने[1]ऽनधिकारो न्यायसिद्धो गम्यते॥ ३१॥

स्वमतमाह॥

॥ भावं तु बादरायणोऽस्ति हि॥ ३२॥

मधुविद्यादिष्वपि वस्वादीनामधिकारभावं बादरायणो मन्यते; अस्ति वस्वादीनां सतां वस्वावस्थब्रह्मण उपास्यत्वसंभवः; कल्पान्तरे वसुत्वादेः प्राप्यत्वसंभवश्च; कार्यकारणोभयावस्थं ब्रह्मात्र समुपास्यं; "तत्रासौ वा आदित्यो देवमधु"इत्यारभ्यादित्यवस्वादिनामरूपकृत्ययुक्तकार्यविशेषावस्थं ब्रह्मोपास्यमुपदिश्यते; अथ तत ऊर्ध्वम्, उदेत्यनेनैवोद्गतानामरूपकृत्यरहितसूक्ष्मादित्यान्तरात्मतयावस्थितं कारणावस्थं ब्रह्मोपास्यमुपदिश्यते; तदुभयावस्थब्रह्मोपासनफलं कल्पान्तरे वस्वादित्वमुभयाधिकारावसाने ब्रह्मप्राप्तिश्च; तत्र "स य एतदेवममृतं वेद वसूनामेवैको भूत्वा अग्निनैव मुखेन एतदेवामृतं दृष्ट्वा तृप्यति"इत्यादिना वस्वादित्वरूपं फलमुपदिश्यते, "न ह वा अस्मा उदेति न निम्लोचति सकृद्दिवा हैवास्मै भवति य एतामेवं ब्रह्मोपनिषदं वेद" इति ब्रह्मप्राप्तिरूपं फलमुपदिश्यते; ततो मध्वादिष्वपि देवानामधिकारोऽस्तीति[2]; तस्मात् सर्वथा देवा ब्रह्मविद्याधिकारिण इति॥ ३२॥

अथ मनुष्याधिकारत्वादिति सामान्येन मनुष्याणामधिकारे प्राप्ते विशेषमाह॥

॥ शुगस्य तदनादरश्रवणात्
तदाद्रवणात् सूच्यते हि॥ ३३॥

छान्दोग्ये श्रूयतेऽस्य विषयः। "आजहारेमाः शूद्रानेनैव मुखेनालापयिष्यथा"इति; अत्राचार्यः शिष्यं शूद्रेत्यामन्त्रयते,

१ वस्वाद्युपासनेऽ—इति पा०।

२—ष्वप्यधिकारसिद्धिः इति पा०।

अतः शूद्राणामपि ब्रह्मविद्यायामधिकारोऽस्ति न वेति संदेहः। तेषामधिकारोऽस्ति,अर्थित्वादिसंभवात्; नच त्रैवर्णिकानामेवेति नियमः; अत्रैवर्णिकानामपि देवानां तद्दर्शनात्; देवानामुपनयनाध्ययनाभावेऽपि स्वयंभातवेदार्थतया युज्यते विद्वत्ता; कथमेषामिति न शङ्क्यम्, एषामपि पुराणश्रवणादिना बोधोपपत्तेः, निषादस्थपतिन्यायेन महावाक्यग्रहणेऽधिकारसंभवाच्च; तस्मादमीषामधिकारो ब्रह्मविद्यायामुचित इति प्राप्ते ब्रूमः। नास्ति शूद्राणां ब्रह्मविद्यायामधिकारः, तेषामध्ययनाभावेन तदुपायभूतोपास्यतद्गुणादिज्ञानासंभवात्; इतिहासपुराणानि वेदोपबृंहणं कुर्वन्त्येवोपायभावमनुभवन्ति न स्वातन्त्र्येण; शूद्राणामितिहासपुराणश्रवणानुज्ञानं तु पापक्षयफलं; विदुरधर्मव्याधादीनां जन्मान्तरसिद्धज्ञानाप्रमोषाद्ब्रह्मनिष्ठता; कथं ब्रह्मविद्योपदेशे शूद्रेत्यामन्त्रणमिति चेत्; नात्र जातियोगेन शूद्रेत्यामन्त्रणं, किंतु ब्रह्मज्ञानाप्राप्त्या शुगस्य संजातेति दर्शनात्; शुगस्य संजातेति च तदनादरश्रवणात्; ब्रह्मविद्यावैकल्येन स्वात्मानं प्रति हंसोक्तानादरवाक्यश्रवणात्; तदैवाचार्यं प्रत्याद्रवणाच्च; "सूच्यते हि" शब्दो हेतौ; यतः शूद्रेत्यामन्त्रणं न जातियोगेन, ततः शूद्रस्य ब्रह्मोपासनं नास्तीति ॥ ३३ ॥

इतश्च शूद्रेत्यामन्त्रणं न जातियोगेनेत्याह ॥

॥ क्षत्रियत्वावगतेश्च ॥ ३४ ॥

शुश्रूषोर्जानश्रुतेः क्षत्रियत्वावगतेश्च न जातियोगेन शूद्रेत्यामन्त्रणम्; उपाख्यानोपक्रमे हि "जानश्रुतिर्हि पौत्रायणः श्रद्धादेयो बहुदायी बहुपाक्य आस, स सर्वत आवसथान् मापयांचक्रे, सर्वत एव मेऽत्स्यन्ति" इति जानश्रुतेर्धनिपतित्वं बहुतरपक्वान्नप्रदायित्वं चोक्तं, मध्ये च "सह संजिहान एव क्षत्तारमुवाच" इति तत्प्रेषणमुक्तम्, अन्ते च "इयं जाया अयं ग्रामो यस्मिन्नास इति ते हैते रैक्व[1] पर्णा नाम महावृषेषु यत्रास्मा उवास"इति बहुग्रामप्रदायित्वमुक्तम्; एतैर्लिङ्गैर्जानश्रुतेः क्षत्रियत्वमवगम्यते ॥ ३४ ॥

॥ उत्तरत्र चैत्ररथेन लिङ्गात्* ॥ ३५ ॥

उपरिष्टाच्चास्यां संवर्गविद्यायां ब्रह्मक्षत्रिययोरेवान्वयो दृश्यते, "अथ शौनकं च कापेयमभिप्रतारिणं च काक्षसेनिं परिविष्यमाणौ ब्रह्मचारी बिभिक्षे" इत्यादौ; अत्राभिप्रतारी चैत्ररथः क्षत्रिय इत्यवगम्यते, कापेययोगात्; कापेययाजकयोगो हि चैत्ररथस्य श्रुतः; एतेन चैत्ररथं कापेया अयाजयन्, तमेकाकिनमन्नाद्यस्याध्यक्षमकुर्वन्, इति; तेनाभिप्रतारिणः संज्ञाभेदात् चित्ररथत्वसिद्धावपि तद्वंश्यत्वं सिध्यति; समानान्वयानां हि समानान्वयाः प्रायेण याजका भवन्ति; चित्ररथवंश्यत्वे सति क्षत्रियत्वं, "तस्माच्चैत्ररथीनामेकः क्षत्रपतिर्जायत" इति तद्वाक्यशेषेण सिध्यति; एवं चोत्तरत्र ब्राह्मणेन कापेयेन युक्तोऽभिप्रतारी क्षत्रिय इति निश्चिते तद्वद् ब्राह्मणेन रैक्वेन युक्तो जानश्रुतिरपि क्षत्रिय इति गम्यते; अतः क्षत्रिय एव शूद्रेत्यामन्त्रितः ॥ ३५ ॥

यदुक्तं निषादस्थपतिन्यायेन शूद्रस्य महावाक्यश्रवणमात्रेऽधिकार इति तत्राह ॥

॥ संस्कारपरामर्शात् तदभावाभिलापाच्च ॥ ३६ ॥

ब्रह्मविद्योपक्रमे "उप त्वा नेष्ये तं होपनिन्ये"इत्यादिप्रदेशेषूपनयनसंस्कारपरामर्शात्, शूद्रस्य च,

न शूद्रे पातकं किंचिन्नच संस्कारमर्हति।
शूद्रश्चतुर्थो वर्ण एकजातिः,

इत्यादिस्मृतिषु तदभावश्रवणात्[1] तस्य ब्रह्मविद्यायामनधिकारः; "निषादस्थपतिं याजयेत्"इति विधिरस्तीति न विरोधः[2]; उपनयनाभावेऽपि शूद्रस्य महावाक्यश्रवणे कुत्रापि न विधिः ॥ ३६ ॥

॥ तदभावनिर्धारणे च प्रवृत्तेः ॥ ३७ ॥

नैतदब्राह्मणो वक्तुमर्हति, "समिधं सोम्याहरोप त्वा नेष्ये न सत्यादगा" इति सत्यवचनेन जाबालस्य शूद्रत्वाभावनिर्धारणे सत्येव तदुपनयनानुशासनविद्योपदेशप्रवृत्तेश्च न शूद्रस्याधिकारः ॥ ३७ ॥

ननूपनयनाभावे ब्रह्मोच्चारणनिषेधः क्वाचित्कः सार्वत्रिको वा[3]; न सार्वत्रिकः[4]; शिशोरुपनयनाभावेऽपि "न ब्रह्माभिव्याहारयेदन्यत्र स्वधानिनयनात्"इति स्वधानिनयने ब्रह्मोच्चारणविधानात्; तेन क्वाचित्क[5] इति युज्यते; अतः शूद्रस्यानुपनीतस्य पाकयज्ञादिषु ब्रह्मोच्चारणनिषेधो न ब्रह्मविद्यायामित्याशङ्कायामाह ॥

॥ श्रवणाध्ययनार्थप्रतिषेधात्* ॥ ३८ ॥

शूद्रस्य वेदवाक्यश्रवणादि निषिध्यते, तस्माच्छूद्रसमीपे नाध्येतव्यमिति; अनुपशृण्वतः कुतोऽध्ययनादिप्रसक्तिः ॥ ३८ ॥

॥ स्मृतेश्च ॥ ३९ ॥

स्मर्यते च शूद्रस्य वेदश्रवणादौ दण्डः; "अथास्य वेदमुपशृण्वतस्त्रपुजतुभ्यां श्रोत्रपरिपूरणम्, उदाहरणे जिह्वा-

१ रैक्व इति पा०।

* शंकरमते क्षत्रियत्वावगतेश्चोत्तरत्र चैत्ररथेन लिङ्गात् इत्येकं सूत्रम्।

१–मर्शाच्छूद्रस्य तदभावश्रवणात् इति पा०।

२–रस्ति यथा तद्वदत्र न विधिः, ततो न विरोधः इति वरपा०।

३ एकत्र सर्वत्र वा इति पा०।

४ न सर्वत्र इति पा०।

५–रणप्राप्तिसंभवात् तेनैकत्र इति पा०।

* शंकरमते श्रवणाध्ययनार्थप्रतिषेधात् स्मृतेश्च इत्येकमेव सूत्रम्।

च्छेदो, धारणे शरीरभेद"इति, एवं श्रुतिस्मृतिभ्यां शूद्रसमीपाध्ययनादिनिषेधात् कुतस्तेषां वेदार्थविचारादिकम्[1]; अतः सर्वथाष्टवर्षब्राह्मणाद्युपयुक्तोपनयनसंस्कारमन्तरेण वेदाध्ययनप्राप्तिर्न कुत्रापि कस्य चिदिति सिद्धम्। ततः शूद्रा ब्रह्मविद्यायामनधिकारिण एव ॥ ३९ ॥

एवं प्रासङ्गिकमधिकारिनिरूपणं कृत्वा प्रकृतमनुसरति ॥

॥ कम्पनात् ॥ ४० ॥

अङ्गुष्ठमात्रप्रमितपुरुषप्रकरणे कठवल्लीषु श्रूयते; "यदिदं किंच जगत् सर्वं प्राण एजति निःसृतं महद्भयं वज्रमुद्यतं" "य एतद्विदुरमृतास्ते भवन्ति" इति; तत्र कम्पनहेतुः परमेश्वरोऽन्यो वेति संशयः। अत्र प्राणशब्दनिर्दिष्टजनितभयेन सकलजगत्कम्पनमुच्यते; परमेश्वरस्य सकलजगदभयप्रदानमधुरस्वभावस्य परमकारुणिकस्य जगत्कम्पनहेतुत्वमयुक्तं; तस्माद्वज्रश्रुतेरशनिः कम्पनहेतुः; यद्वा प्राणवायुः कम्पनहेतुः, प्राणश्रुतेः; प्राणवायोर्देहचलनहेतुत्वेन प्राणे निर्मिते सर्वमिदं जगच्छरीररूपं चलतीति; "यदिदं किंच जगत् सर्वं प्राण एवैजति निःसृतम्" इत्यस्य तत्रोपपत्तेः; वायुनिमित्तमेव विद्युत्स्तनयित्नुवृष्टिवन्महाभयहेतुरशनिरपि विवर्तत इति "महद्भयं वज्रमुद्यतम्" इत्यस्यापि तत्रोपपत्तेः; "वायुरेव व्यष्टिर्वायुरेव समष्टिरयं पुनर्मृत्युं जयति य एवं वेद"इति श्रुतेर्वायुविज्ञानादमृतत्वोपपत्तेश्च; इति प्राप्ते परमेश्वर एव कम्पनहेतुरिति ब्रूमः; परमेश्वरस्य[2] सकलजगत्कम्पनहेतुत्वं शासकत्वात् संभवति,यस्य शासनभयेन सर्वे वयं निषिद्धेषु विमुखा विहितेषु प्रवर्तामहे, यच्छासनभयादेव वाय्वादीनां स्वस्वाधिकारप्रवृत्तिः "भीषास्माद्वातः पवत" इत्यादिष्ववगम्यते; कल्याणमूर्तिरपि परमेश्वरः शासकतया भयदर्शनो भवति; ततः श्रूयते; "तस्माद्राजमुखं भीष्मं भावुकम्" इति; तस्मात् स्वामितया सकलजगद्भयहेतुरीश्वर एव ॥ ४० ॥

दहरादिषूपास्यतया निर्दिष्टस्य परमेश्वरस्य प्राप्यत्वमुपपादयितुमधिकरणान्तरमारभ्यते ॥

॥ ज्योतिर्दर्शनात् ॥ ४१ ॥

छान्दोग्येऽस्य प्रजापतिविद्यायामाम्नायते विषयः। "एष संप्रसादोऽस्माच्छरीरात् समुत्थाय परं ज्योतिरुपसंपद्य स्वेन रूपेणाभिनिष्पद्यते स उत्तमः पुरुष" इति मुक्तप्राप्यतया श्रूयमाणं परं ज्योतिः परमेश्वरः किंवा नारायणो मूर्त्यात्मेति संशयः। उत्तमः पुरुष इति मुक्तप्राप्यस्य परज्योतिषः पुरुषोत्तमशब्दवाच्यतयावगमात् पुरुषोत्तमशब्दस्य नारायणे रूढतया स एवोत्तमपुरुषशब्दसमानाधिकरणं परं ज्योतिरिति प्राप्ते ब्रूमः। मुक्तप्राप्यं परं ज्योतिरिह परमशिवाभिधानं परं ब्रह्म, तत् प्राप्तानामेवानावृत्तिदर्शनात्; परब्रह्मणोऽन्यत् प्राप्तानां कथमनावृत्तिः समुचिता[1]; पुरुषोत्तमशब्दो नारायणे रूढोऽपि ब्रह्मण्यपि वर्तते, पुरुषेभ्योऽधिकत्वात्, ब्रह्ममेधकल्पेऽपि "वेष्टितुं पुरुषोत्तमम्" इति प्राप्यस्य परब्रह्मणः पर्यायत्वेन पुरुषोत्तमशब्दस्य प्रयोगात्; अतः परं ब्रह्मैव परं ज्योतिः ॥ ४१ ॥

॥ आकाशोऽर्थान्तरत्वादिव्यपदेशात् ॥ ४२ ॥

छान्दोग्ये श्रूयतेऽस्य विषयः। "आकाशो ह वै नामरूपयोर्निर्वहिता ते यदन्तरा तद्ब्रह्म तदमृतं स आत्मा" इति; अत्र नामरूपयोर्निर्वोढृत्वेन श्रूयमाणः स आकाशः परमेश्वरो वियद्वा जीवो वेति संशयः। सर्वभूतावकाशप्रदानेन नामरूपनिर्वोढृत्वस्य वियति संभवात्, वियदिहाकाशः; अथवा जीवः; "अनेन जीवेनात्मनानुप्रविश्य नामरूपे व्याकरवाणि" इति तस्य नामरूपव्याकरणसंबन्धदर्शनात्; इत्येवं प्राप्ते ब्रूमः। परमेश्वर एवात्राकाशशब्देन नामरूपनिर्वोढा श्रूयते, अमृतत्वादितद्धर्मव्यपदेशात्; न ह्याकाशेऽमृतत्वादिकं संभवति जीवे वा; अतः परमेश्वर एवाकाशशब्दवाच्यः ॥ ४२ ॥

ननु "तत् त्वमसि" इत्यादिनैक्यव्यपदेशान्न प्रत्यगात्मनोऽर्थान्तरभूतः परमेश्वरोऽस्तीत्याशङ्क्याह ॥

॥ सुषुप्त्युत्क्रान्त्योर्भेदेन ॥ ४३ ॥

"प्राज्ञेनात्मना संपरिष्वक्तो न बाह्यं किंचन वेद नान्तरं" "प्राज्ञेनात्मनान्वारूढ उत्सर्जन् याति"इति सुषुप्त्युत्क्रान्त्योर्बाह्यान्तरविषयज्ञानशून्याज्जीवात् तदानीमेव प्राज्ञतया भेदेन व्यपदेशाज्जीवादर्थान्तरभूतः परमेश्वरोऽस्ति; स एवात्राकाशशब्दवाच्यः ॥ ४३ ॥

॥ पत्यादिशब्देभ्यः ॥ ४४ ॥

परिष्वञ्जके प्राज्ञे श्रूयमाणेभ्यः पत्यादिशब्देभ्यश्चायमन्य एव जीवादित्यवगम्यते; "स सर्वस्य वशी सर्वस्येशानः सर्वस्याधिपतिः स न साधुना कर्मणा भूयान् नो एवासाधुना कनीयान् एष सर्वेश्वर एष भूताधिपतिरेष भूतपाल" इत्यादिकमुत्तरत्र हि श्रूयते; "पशूनां पतये वृक्षाणां पतये"इत्यादिभिश्च,परमेश्वरस्य जगदाधिपत्यं प्रसिद्धं, न कुत्रापि जीवस्य; तस्मादयं जीवादन्यः परमेश्वर एवात्राकाशशब्दवाच्यः ॥ ४४ ॥

इति श्रीकण्ठशिवाचार्यविरचिते ब्रह्ममीमांसाभाष्ये प्रथमस्याध्यायस्य तृतीयः पादः ॥ ३ ॥ :: ::

१—शूद्रस्य समीपेऽध्ययनादिकमपि निषिध्यते वेदस्य, कुतस्तदर्थविचारणादिकम् इति पा०।

२—एजति" इत्यादिना प्राणशब्दनिर्दिष्टजनितभयात् सकलजगत्कम्पनमुच्यते, तत्र भूतकम्पनहेतुः परमेश्वरोऽन्यो वेति संशये परमेश्वरस्य सकलजगदभयप्रदस्य मधुरस्वभावस्य जगत्कम्पनहेतुत्वं न युक्तमिति प्राप्ते ब्रूमः; परमेश्वरस्य इति पा०।

१—वृत्तिशब्दः समुचितः इति पा०।

॥ अथ कर्पूरमञ्जर्यभिधसट्टकस्य ॥

॥ प्रथमजवनिकान्तरस्य शेषः ॥

चिट्ठदुदाव पंच दह दिहाइं पच्छा झाणविमाणेण उण वि णइस्सध ।

भैरवा । जं भणदि देवी ।

विदू । राजानमुद्दिश्य । भो वअस्स अह्मे परं दुवे वि बाहिरा एत्थ । जदो, एदाणं मिलिदं कुटुंबं वट्टदि । जदो इमाओ दो वि बहिणिआओ । भैरवाणंदो एदाणं संजोअअरो अच्चिदो माणिदो अ । एसा वि महीअल-सरस्सई कुट्टणी देहंतरेण देई जेव्व ।

देवी । विअक्खणे णिजज्जेट्ठबहिणिआए सुलक्खणाए भणिदं भैरवाणंदस्स हिअअट्ठिदा सपज्जा कादव्वा ।

विच । जं देवी आणवेदि ।

देवी । राजानं प्रति । अज्जउत्त पेसिहि मं जेण अहं बहिणिआए एदावत्थाए णेवच्छलच्छीलीलाणिमित्तं अंते-उरं गमिस्सं ।

राजा । जुज्जदि चंपअलदाए कत्थूरिआकप्पूरेहिं आ-लबालपूरणं ।

नैपथ्ये वैतालिकयोरेकः । सुहसंझा भोदु दे अस्स ।

जादं वासरजीवपिंडसरिसं चंडंसुओ मंडलं
को जाणादि कहिं पि संपदि गदं पत्तम्मि कालंतरे ।

॥ अथ कर्पूरमञ्जर्यभिधसट्टकस्य ॥

॥ प्रथमजवनिकान्तरस्य शेषः ॥

तिष्ठतु तावत् पञ्च दश दिनानि पश्चाद् ध्यानविमानेन पुनरपि नेष्यथ ॥

यद् भणति देवी ॥ भो वयस्य आवां परं द्वावपि बाह्या-वत्र । यत एतासां मिलितं कुटुम्बं वर्तते । यत इमे द्वे अपि भगिनिके । भैरवानन्दः पुनरेतयोः संयोगकरोऽर्चितो मानि-तश्च । एषापि महीतलसरस्वती कुट्टनी देहान्तरेण देव्येव ॥ विचक्षणे निजज्येष्ठभगिनिकया सुलक्षणया भणितं भैरवा-नन्दस्य हृदयस्थिता सपर्या कर्तव्या ॥ यद्देवी आज्ञापयति ॥ आर्यपुत्र प्रेषय मां येनाहं भगिनिकाया एतदवस्थाया नेपथ्य-लक्ष्मीलीलानिमित्तमन्तःपुरं गमिष्ये ॥ युज्यते चम्पकलतायाः कस्तूरिकाकर्पूरैरालवालपूरणम् ॥ सुखसंध्या भवतु देवस्य ।

जातं वासरजीवपिण्डसदृशं चण्डांशोर्मण्डलं
को जानाति कुत्रापि संप्रति गतं प्राप्ते कालान्तरे ।

जादा किं अ इअं पि दीहविरहा सोएव्व णाहे गदे
णिद्दामुद्दिदलोअणव्व णलिणी मीलंतपंकेरुहा ॥ ३५ ॥

द्वितीयः ।

उग्घाडीअंति लीलामणिमअवलहीचित्तभित्तीणिएसा
पल्लंका किंकरीहिं रइसमअसहा पत्थरिज्जंति झत्ति ।
सैरंधीलोलहत्थंगुलिचलणवसा पट्टणादो पअट्टो
हुंकारो मंडवेसूं विलसदि महुरो रुट्ठतुट्ठंगणाणं ॥ ३६ ॥

राजा । अह्मे वि संझं वंदिदुं गमिस्सामो ॥

इति निष्क्रान्ताः सर्वे ॥

॥ इति श्रीबालकविकविराजराजशेखरविरचिते कर्पूर-मञ्जर्यभिधसट्टके कर्पूरमञ्जरीनायिकासमागमो नाम प्रथमं जवनिकान्तरम् ॥

जाता किं च इयमपि दीर्घविरहात् शोकेव नाथे गते
निद्रामुद्रितलोचनेव नलिनी मीलत्पङ्केरुहा ॥ ३५ ॥

उद्घाट्यन्ते लीलामणिमयवलभीचित्रभित्तीनिवेशाः
पर्यङ्काः किङ्करीभी रतिसमयसहाः प्रस्तार्यन्ते झटिति ।
सैरन्ध्रीलोलहस्ताङ्गुलिचलनवशात् पट्टनादः प्रवृत्तो
हुंकारो मण्डलेषु विलसति मधुरो रुष्टतुष्टाङ्गनानाम् ॥ ३६ ॥

"पट्टोवाद्यविशेषः"

वयमपि संध्यां वन्दितुं गमिष्यामः ॥

॥ इति प्रथमजवनिकान्तरच्छायाविवृतिः ॥

॥ अथ कर्पूरमञ्जर्यभिधसट्टकस्य द्वितीयं ॥

॥ जवनिकान्तरम् ॥

ततः प्रविशति राजा प्रतीहारी च ।

प्रती । परिक्रामितकेन । इदो २ महाराओ ।

राजा । कतिचित्पदानि गत्वा । तामनुसंधाय । तहिं क्खु अअसरे ।

ण ठाणाहि तिलंतरं पि चलिदा सुत्था णिअंबत्थली
थोउव्वेल्लवलीतरंगमुअरं कंठो तिरज्जट्ठिदो ।

॥ अथ द्वितीयजवनिकान्तरस्य प्राकृतविवृतिः ॥

इतइतो महाराजः ॥ तस्मिन् खलु अवसरे ।

न स्थानात्तिलान्तरमपि चलिता सुस्था नितम्बस्थली
स्तोकोद्वेल्लवल्लीतरङ्गमुदरं कण्ठस्तिर्यक्स्थितः ।

वेणीए उण आणणेंदुवलणे लद्धं थणालिंगणं
जादा तीअ चदुव्विदा तणुलदा तस्सं वलंतीमइ ॥ १ ॥

प्रती । स्वगतम् । कधं अज्ज वि सो जेव्व ताडीसंचओ ताओ जेव्व अक्खरपंतीओ । ता वसंतवण्णणेण सिढिलआमि तग्गदं हिअआक्खेवं । प्रकाशम् । दिट्ठिं देउ महाराओ ईसीसिजरठाअमाणे कुसुमाअरम्मि ।

मूलाहिंतो परहुअबहूकंठमुद्दं दलंतो
देंता दीहं महुरिमगुणं जप्पिदे छप्पआणं ।
संचारेंतो विरहिसु णवं पंचमं किं अ राअं
राउम्मत्ता रइकुलघरा वासरा वित्थरंति ॥ २ ॥

राजा । तदाकर्ण्यसानुरागम् ।

अत्थाणी जणलोचणाण बहला लावण्णकल्लोलिणी
लीलाविब्भमहासवासणअरीसोहग्गपारब्भिआ ।
णेत्तेंदीवरदीहिआ मह पुरो सिंगारसंजीअणी
जं जादा अह बम्हहेण धणुहो तिक्खो सरो पुंखिदो ॥ ३ ॥

सोन्मादमिव । दंसणक्खणादो पहुदि कुरंगच्छी ।

चित्ते विलुट्टदि ण खुट्टदि सा गुणेसुं
सेज्जासु लोट्टदि विसट्टदि दिम्मुहेसुं ।
बोल्लम्मि वट्टदि पअट्टदि कव्वबन्धे
झाणे ण तुट्टदि चिरं तरुणी तरट्टी ॥ ४ ॥

अवि अ ।

जे तीअ तिक्खचलचक्खुतिहाअदिट्ठा
ते कामचंदमहुपंचममारणिज्जा ।
जेसूं पुणो णिवडिदा सअला वि दिट्ठी
वट्टंति ते तिलजलंजलिदाणजोग्गा ॥ ५ ॥

सस्मरणमिव ।

अग्गम्मि भिंगसरणी णअणाण तीए
मज्झे पुणो कधिददुद्धतरंगमाला ।
पच्छा अ से सरदि तस्सनिरिक्खिदेसुं
आअण्णमंडलिदचावधरो अणंगो ॥ ६ ॥

विचिन्त्य । कधं चिरअदि पिअवअस्सो ।

विदूषकः प्रविश्य विचक्खणा च परिक्रामतः ।

विदू । अइ विअक्खणे सव्वं सच्चं एदं ।

विच । सव्वं सच्चअरं ।

विदू । णाहं पत्तिएमि । जदो परिहासलीला क्खु तुमं ।

विच । अज्ज मा एव्वं भण अण्णो वक्करकालो अण्णो कज्जकालो ।

विदू । पुरोवलोक्य । एसो पिअवअस्सो हंसो विअ मुक्कमाणसो करी विअ मदक्खामो मुणालदंडो विअ

वेण्या पुनराननेन्दुवलने लब्धं स्तनालिङ्गनं
जाता तस्याश्चतुर्विधा तनुलता त्र्यस्रं वलन्तीमपि ॥ १ ॥

कथमद्यापि स एव तालीसंचयः ता एवाक्षरपङ्क्तयः तद्वसन्तवर्णनेन शिथिलयामि तद्गतं हृदयाक्षेपम् । दृष्टिं ददातु महाराज ईषदीषज्जरठायमाने कुसुमाकरे ।

मूलात्प्रभृति परभृतवधूकण्ठमुद्रा दलयन्तः
ददतो दीर्घं मधुरिमगुणं जल्पिते षट्पदानाम् ।
संचारयन्तो विरहिषु नवं पञ्चमं किं च रागं
रागोन्मत्ता रतिकुलगृहा वासरा विस्तरन्ति ॥ २ ॥

आस्थानी जनलोचनानां बहुला लावण्यकल्लोलिनी
लीलाविभ्रमहाप्रवासनगरी सौभाग्यप्रारब्धिका ।
नेत्रेन्दीवरदीर्घिका मम पुरः शृङ्गारसंजीविनी
यज्जाता अद्य मन्मथेन धनुषि तीक्ष्णः शरः पुङ्खितः ॥ ३ ॥

दर्शनक्षणात्प्रभृति कुरङ्गाक्षी ।

चित्ते विलुठति न कुण्ठति सा गुणेषु
शय्यासु लुठति विसर्पति दिङ्मुखेषु ।
वचने वर्तते प्रवर्तते काव्यबन्धे
ध्याने न त्रुटति चिरं तरुणी प्रौढा ॥ ४ ॥

ये तस्यास्तीक्ष्णचलचक्षुस्त्रिभागदृष्टा-
स्ते कामचन्द्रमधुपञ्चममारणीयाः ।
येषु पुनर्निपतिता सकलापि दृष्टि-
र्वर्तन्ते ते तिलाञ्जलि दानयोग्याः ॥ ५ ॥

अये भृङ्गसरणी नयनयोस्तस्या
मध्ये पुनः क्वथितदुग्धतरङ्गमाला ।
पश्चाच्चास्याः सरति त्र्यस्रनिरीक्षितेषु
आकर्णमण्डलितचापधरोनङ्गः ॥ ६ ॥

कथं चिरयति प्रियवयस्यः ॥ अयि विचक्षणे सर्वं सत्यमेतत् ॥ सर्वं सत्यतरम् ॥ नाहं प्रत्येमि । यतः परिहासशीला खलु त्वम् ॥ आर्य मा एवं भण अन्यो विनोदकालः अन्यः कार्यकालः ॥ एष प्रियवयस्यो हंस इव मुक्तमानसः करीव

घणघम्ममलिणो दिणदीवो विश्र विश्रलिश्रच्छाश्रो पहादपुण्णिमाचंदो विश्र पंडुरपरिक्खीणो चिठ्ठदि । उभे परिक्रामतः ।

उभै । जेदुजेदु महाराश्रो ।

राजा । वश्रस्स कहिं उण विश्रक्खणाए मिलिदोसि ।

विदू । श्रज्ज विश्रक्खणा मए सह संधिं कादुं श्राश्रदा । किदसंधाए इमाए सह मंतश्रंतस्स एत्तिश्रा वेला लग्गा ।

राजा । संधिकरणस्स किं फलं ।

विदू । एसा श्रहिमदजणप्पेसिदा लेहहत्था णं विश्रक्खणा श्राश्रदा ।

राजा । गन्धं सूचयित्वा । केश्रईकुसुमगंधो विश्र श्राश्रच्छदि ।

विच । केश्रईदललेहो एसो मह हत्थे ।

राजा । महुसमए कुदो केश्रईकुसुमाइं ।

विच । भेरवाणंददिण्णमंतप्पहावेण देईए भवणुज्जाणे केश्रईलठ्ठीए एक्को दाव पसवो दंसिदो । तस्स वि तीए दलसंपुडेहिं श्रज्ज हिंदोलणपहंजणीए चउत्थीए हरवल्लहा देई श्रच्चिदा । श्रण्णं श्र दलसंपुडजुश्रलं उण कणिठ्ठाए बहिणिश्राए कप्पूरमंजरीए पसादीकदं तीए पि एक्केण दलसंपुडेण भश्रवदी गोरी एव्व श्रच्चिदा ।

श्रण्णं श्र

केश्रईकुसुमपत्तसंपुडं पाहुदं तुह सहीश्र पेसिदं ।
एणणाहिमसिवण्णसोहिणा जं सिलोश्रजुश्रलेण लंछिदं ॥ ७ ॥

इति लेखमर्पयति ।

राजा । प्रसार्य वाचयति । स्वस्ति ।

हंसीं कुंकुमपंकपिंजरतणुं काउण जं वंचिदो
तब्भत्ता किल चक्कवाश्रघरिणी एस त्ति मण्णंतहो ।
एदं तं मह दुक्किदं परिणदं दुक्खाण सिक्खावणं
एकत्थो वि ण जासि जेण विसए दिठ्ठी तिहाश्रस्स वि ॥ ८ ॥

द्विर्वाचयति । एदाइं ताइं मश्रणरसाश्रणाइं श्रक्खराइं ।

विच । दुदीश्रो उण मह पिश्रसहीए श्रवत्थाणिवेदश्रो कदुश्र सिलोश्रो लिहिदो एत्थ तं वाचेदु महाराश्रो ।

राजा । वाचयति ।

सह दिश्रहणिसाहीं दीहरा सासदंडा
सह मणिवलएहीं बाहधारा गलंति ।
सुहश्र तुह विश्रोए तीश्र उव्विग्गिश्राए
सह श्र तणुलदाए दुब्बला जीविदासा ॥ ६ ॥

विच । विहस्य । एत्थ जेव्व एदाए श्रवत्थाए मह ज्जेठ्ठबहिणिश्राए सुलक्खणाए श्रोलग्गाविश्राए हुविश्र सिलोश्रो किदो तं महाराश्रो सुणादु । पठति ।

मदत्तामो मृणालदण्ड इव घनघर्ममलिनो दिनदीप इव विगलितच्छायः प्रभातपूर्णिमाचन्द्र इव पाण्डुरपरिक्षीणस्तिष्ठति ॥ जयतु २ महाराजः ॥ वयस्य कुत्र पुनर्विचक्षणया मिलितोसि ॥ श्रद्य विचक्षणा मया सह संधिं कर्तुमागता । कृतसंध्या एतया सह मन्त्रयतः एतावतीवेला लग्ना ॥ संधिकरणस्य किं फलम् ॥ एषा श्रभिमतजनप्रेषिता लेखहस्ता ननु विचक्षणा श्रागता ॥ केतकीकुसुमगन्ध इवागच्छति ॥ केतकीदललेख एष मम हस्ते ॥ मधुसमये कुतः केतकीकुसुमानि ॥ भैरवानन्ददत्तमन्त्रप्रभावेन देव्या भवनोद्याने केतकीयष्ट्या एकस्तावत्प्रसवो दर्शितः तस्यापि तया दलसंपुटैरद्य हिन्दोलनप्रभञ्जिन्यां चतुर्थ्यां हरवल्लभा देवी श्रर्चिता । श्रन्यच्च दलसंपुटयुगलं पुनः कनिष्ठिकाया भगिनिकायाः कर्पूरमञ्जर्याः प्रसादीकृतम् तयापि एकेन दलसंपुटेन भगवती गैार्येवार्चिता । श्रन्यच्च

केतकीकुसुमपत्त्रसंपुटं प्राभृतं तव सख्या प्रेषितम् ।
एणनाभिमसीवर्णशोभिना यत् श्लोकयुगलेन लाञ्छितम् ॥ ७ ॥

हंसीं कुङ्कुमपङ्कपिञ्जरतनुं कृत्वा यद्वञ्चित-
स्तद्भर्ता किल चक्रवाकगृहिणी एषेति मन्यमानः ।
एतत्तन्मम दुष्कृतं परिणतं दुःखानां शिक्षापण-
मेकस्थोपि न यासि येन विषयं दृष्टिं त्रिभागस्यापि ॥ ८ ॥

एतानि तानि मदनरसायनानि श्रक्षराणि ॥ द्वितीयः पुनः मम प्रियसख्या श्रवस्थानिवेदकः कृत्वा श्लोको लिखितः श्रत्र तं वाचयतु महाराजः ॥

सह दिवसनिशाभिर्दीर्घाः श्वासदण्डाः
सह मणिवलयैर्बाष्पधारा गलन्ति ।
सुभग तव वियोगे तस्या उद्विग्नायाः
सह च तनुलतया दुर्बला जीविताशा ॥ ९ ॥

श्रत्रैवैतस्या श्रवस्थाया मम ज्येष्ठभगिनिकया सुलक्षणया श्रादेशकारिण्या भूत्वा श्लोकः कृतस्तं महाराजः शृणोतु ।

णीसासा हारलट्ठीपसरणतरला चंदनं फोडकारि
चंदो देहस्स दाहो सुमरणसरणा हाससोहा मुहम्मि ।
अंगाणं पंडुभावो दिअहससिअलाकोमलो किं अ तीए
णिच्चं बाहप्पवाहा तुह सुहअ किदे होंति कुल्लाहि तुल्ला ॥१०॥

राजा । निःश्वस्य । किं भणीअदि सुकइत्तणेण । तुह एव्व जेठ्ठबहिनिआ क्खु एसा ।

विदू । एसा विअक्खणा महीअलसरस्सई एदाए जेठ्ठबहिणिआ वि तिहुअणसरस्सई । ता एदाहिं समं पाडिसिद्धिं ण करिस्सं । किं उण पिअवअस्सस्स पुरदो मअणावत्थं अत्तणो उचिदेहिं अक्खरेहिं किं पि णिवेदेमि ।

राजा । पठ एदं पि सुणीअदि ।

विदू । पठति ।

परं जोह्ला उह्ला गरलसरिसो चंदनरसो
खदक्खारो हारो मलअपवणा देहतवणा ।
मुणाली बाणाली जलदि अ जलट्ठा तणुलदा
वरिट्ठा जं दिट्ठा कमलवअणा सासुणअणा ॥ ११ ॥

राजा । वअस्स तुमं पि दिव्वेण चंदणरसेण समालहिज्जसि । ता कधेहि संपदं तग्गदं किं पि वुत्तं । अध अंतेउरं णेउण देईए किं कदं तस्सा ।

विदू । विअक्खणे किं कदं ।

निःश्वासा हारयष्टिप्रसरणतरलाश्चन्दनं स्फोटकारि
चन्द्रो देहस्य दाहः स्मरणशरणा हासशोभा मुखे ।
अङ्गानां पाण्डुभावो दिवसशशिकलाकोमलः किं च तस्य
नित्यं बाष्पप्रवाहास्तव सुभग कृते भवन्ति कुल्याभिस्तुल्याः॥१०

किं भण्यते सुकवित्वेन, तवैव ज्येष्ठभगिनिका खल्वेषा ॥ एषा विचक्षणा महीतलसरस्वती । एतस्या ज्येष्ठभगिनिकापि त्रिभुवनसरस्वती । तदेताभ्यां समं प्रतिस्पर्धां न करिष्ये । किं पुनः प्रियवयस्यस्य पुरतो मदनावस्थामात्मनउचितैरक्षरैः किमपि निवेदयामि ॥ पठ एतदपि श्रूयते ॥

परं ज्योत्स्ना उष्णा गरलसदृशश्चन्दनरसः
क्षतक्षारो हारो मलयपवना देहतपनाः ।
मृणाली बाणाली ज्वलति च जलार्द्रा तनुलता
वरिष्ठा यद्दृष्टा कमलवदना सासुनयना ॥ ११ ॥

वयस्य त्वमपि दिव्येन चन्दनरसेन समालभ्यसे । तत्कथय सांप्रतं तद्गतां किमपि वार्ताम् । अथान्तःपुरं नीत्वा देव्या किं कृतं तस्याः ॥ विचक्षणे किं कृतम् ॥

विच । देअ मंजिदा टिक्किदा भूसिदा तोसिदा अ ।

राजा । कधं विअ ।

विच । घणमुट्टट्टिअमंगं कुंकुमरसपंकपिंजरं तस्सा ।

राजा । रोसाणिअं परं ता कंचणमअमालिआरूपं ॥ १२॥

विच । मरगअमंजीरजुअं चरणे स्से लंभिआ वअस्साहिं ।

राजा । भमिअमहोमुहपंकअजुअलं ता भमरमालाए ॥ १३॥

विच । राअसुअपिच्छणीलं पट्टंसुअजुअलं णिवसिदा सा ।

राजा । कदलीए कंदली ता खरपवणपल्लोल्लिअदलग्गा ॥ १४॥

विच । तीए निअंबफलए णिवेसिआ पोम्मराअमणिकंची ।

राजा । कंचणसेलासिलाए ता बरही कारिओ णट्टं ॥ १५॥

विच । दिण्णा वलआवलीओ करकमलप्पओट्ठणालजुअलम्मि ।

राजा । ता भण किं ण सोहइ विवरीअं मअणतोणीरं ॥ १६॥

विच । कंठम्मि तीए ठविदो छम्मासीअमोत्तिआण वरहारो ।

राजा । सेवइ ता पंतीहिं मुहअंदं तारआणिअरो ॥ १७॥

विच । उहवेसुं वि सवणेसुं णिवेसिअं रअणकुंडलं तिस्सा ।

राजा । ता वअणमम्महे रहो दोहिं वि चक्केहिं चंकमिदो ॥१८॥

विच । अंजणजणिदप्पसाहणाइं कदाइं तीए णअणाइं ।

राजा । उप्पुंखिदे णवकुवलअसिलीमुहे पंचबाणस्स ॥ १९ ॥

देव मज्जिता तिलकिता विभूषिता तोषिता च ॥ कथमिव ॥

घनमुद्वर्तितमङ्गं कुङ्कुमरसपङ्कपिञ्जरं तस्याः ।
रोषाक्षिप्तं परं तत् काञ्चनमयमालिकारूपम् ॥ १२ ॥
मरकतमञ्जरीयुगं चरणावस्यावालम्बितौ वयस्याभिः ॥
भ्रमितमधोमुखपङ्कजयुगलं तद् भ्रमरमालया ॥ १३ ॥
राजशुकपिच्छनीलं पट्टांशुकयुगलं निवसिता सा ॥
कदल्यां कन्दली तत् खरपवनप्रेरितदलाग्रा ॥ १४ ॥
तस्या नितम्बफलके निवेशिता पद्मरागमणिकाञ्ची ॥
काञ्चनशैलशिलायां तद्बर्ही कारितो नृत्यम् ॥ १५ ॥
दत्ता वलयावल्यः करकमलप्रकोष्ठनालयुगले ॥
तद् भण किं न शोभते विपरीतं मदनतूणीरम् ॥ १६ ॥
कण्ठे तस्याः स्थापितः षाण्मासिकमौक्तिकानां वरहारः॥
सेवते तत्पङ्क्तिभिर्मुखचन्द्रं तारकानिकरः ॥ १७ ॥
उभयोरपि श्रवणयोर्निवेशितं रत्नकुण्डलं तस्याः ॥
तद्वदनमन्मथे रथो द्वाभ्यामपि चक्राभ्यां चङ्क्रमितः ॥१८॥
यच्चाञ्जनजनितप्रसाधने कृते तस्या नयने ॥
उत्पुङ्खितौ नवकुवलयशिलीमुखौ पञ्चबाणस्य ॥ १९ ॥

विच । कुडिलालआलं माला णिडाललोलग्गसंगिणी रइआ ।
राजा । ता ससिबिंबस्सोवरि वट्टइ मज्झम्मि कसणसारंगो ॥ २० ॥
विच । घणसारतारणअणाए गूढकुसुमक्करो चिहुरभारो ।
राजा । ससिराहुमल्लजुज्झं विअ दंसिदं एणणअणाए ॥ २१ ॥
विच । इअ देइए जहिच्छं पसाहणेहीं पसाहिदा कुमारी ।
राजा । ता केलिकाणणमही विहूसिदा सुरहिलच्छीए ॥ २२ ॥
विदू । देअ एदं परमत्थं विण्णवीअदि ।

जिस्सा दिठ्ठी सरलधवला कज्जलं तीअ जोग्गं
जा वित्थिण्णत्थणअलसिनी सोहए तीअ हारो ।
चक्काआरे रमणफलए कोवि कंचीभरट्टो
जिस्सा तिस्सा उण वि भणिमो भूसणं दूसणं अ ॥ २३ ॥

राजा । पुनस्तामनुसंधाय ।

तिवलिवलिअणाहीबाहुमूलेसु लग्गं
थणअलसणिअंबा डंबरेसूस्ससंतं ।
जलनिबिडमिमीए लह्णु अह्णाणपोत्तं
पिसुणदि तणुलठ्ठी चंगिमं लग्गिमं अ ॥ २४ ॥

विदू । सक्रोधमिव । भो मए सव्वालंकारसहिदा वण्णिदा । तुमं उण जलविलुत्तप्पसाहणं एव्व सुमरसि । ता किं ण सुदं देवेन ।

कुटिलालकानां माला ललाटलोलायसङ्गिनी रचिता ॥
तत् शशिबिम्बोपरि वर्तते मध्ये कृष्णसारङ्गः ॥ २० ॥
घनसारतारनयनाया ग्रथितकुसुमोत्करश्चिकुरभारः ॥
शशिराहुमल्लयुद्धमिव दर्शितमेणनयनया ॥ २१ ॥
इति देव्या यथेच्छं प्रसाधनैः प्रसाधिता कुमारी ॥
तत्केलिकाननमही विभूषिता सुरभिलक्ष्म्या ॥ २२ ॥
देव एतत्परमार्थं विज्ञाप्यते ॥

यस्या दृष्टिः सरलधवला कज्जलं तस्या योग्यं
या विस्तीर्णस्तनकलशिनी शोभते तस्या हारः ।
चक्राकारे रमणफलके कोऽपि काञ्चीकलापः
यस्यास्तस्याः पुनरपि भणामो भूषणं दूषणं च ॥ २३ ॥
त्रिवलिवलितनाभीबाहुमूलेषु लग्नं
स्तनकलशनितम्बाडम्बरेषूच्छ्वसत् ।
जलनिबिडमेतस्याः श्लक्ष्णं स्नानपोत्रं
पिशुनयति तनुयष्टिः सौन्दर्यं लग्नं च ॥ २४ ॥

भो मया सर्वालंकारसहिता वर्णिता । त्वं पुनर्जलविलुप्तप्रसाधनामेव स्मरसि । तत्किं न श्रुतं देवेन ।

णिहंणचंगस्स वि माणुसस्स
सोहा समुम्मीलदि भूसणेहिं ।
मणीण मुत्ताण वि हारएहिं
विहूसणे लग्गदि का वि लच्छी ॥ २५ ॥

राजा ।

मुद्धाण णाम हिअआइं हरंति हंत
णेवच्छकप्पणगुणेण णिअंबिणीओ ।
छेआ पुणो पकिदिचंगिमहावणिज्जा
दक्खारसो ण महुरिज्जदि सक्कराए ॥ २६ ॥

विच । जधा देवेण दिठ्ठं ।

थोराणं थणआण कण्णकलिआलंघीण अच्छीण वा
भूचंदस्स मुहस्स कंतिसरिआ सोत्तस्स गत्तस्स अ ।
को णेवच्छकलाअ कीरदि गुणो जं तं पि सच्चं पिअं
सच्चं तं सुणु तत्थ कारणमिणं रूढीअ का खंडणा ॥ २७ ॥

राजा । सुपंजल कविंजल एस सिक्खावीअसि ।

किं कज्जं कित्तिमेणं विरअणविहिणा सो णडीणं विडंबो
तं चंगं जं णिसग्गं जणमणहरणं तेण सीमंतिणीओ ।
जस्सिं सव्वंगसंगो सअलगुणगणो सो अदंभो अलंभो
तस्सिं णेच्छंति काले परमसुहअरे किं पि णेवच्छलच्छी ॥ २८ ॥

निसर्गसुन्दरस्यापि मानुषस्य
शोभा समुन्मीलति भूषणैः ।
मणीनां मुक्तानामपि हारकै-
र्विभूषणे लगति कापि लक्ष्मीः ॥ २५ ॥
मुग्धानां नाम हृदयानि हरन्ति हन्त
नेपथ्यकल्पनगुणेन नितम्बिन्यः ।
विदग्धाः पुनः प्रकृतिसौन्दर्यहावनीया
द्राक्षारसो न मधुरीयते शर्करया ॥ २६ ॥

यथा देवेनादिष्टम् ।

स्थूलयोः स्तनयोः कर्णकलिकालङ्घिनोरक्ष्णोर्वा
भूचन्द्रस्य मुखस्य कान्तिसरित्स्रोतसो गात्रस्य च ।
को नेपथ्यकलया क्रियते गुणो यत्तदपि सर्वं प्रियं
सत्यं तत् शृणु तत्र कारणमिदं रूढेः का खण्डना ॥ २७ ॥

सुप्राञ्जल कपिञ्जल एष शिक्षाप्यसे ।

किं कार्यं कृत्रिमेण विरचनविधिना स नटीनां विडम्ब-
स्तत्सुन्दरं यन्निसर्गजनमनोहरणं तेन सीमन्तिन्यः ।
यस्मिन् सर्वाङ्गसङ्गः सकलगुणगणः सोऽदम्भोऽप्राप्यं
तस्मिन्नेच्छन्ति काले परमसुखकरे कामपि नेपथ्यलक्ष्मीम् ॥ २८ ॥

विच । देश्र एदं श्र विरणवीश्रदि । ण केवलं देईए णिश्रोएण तिस्सा श्रणुगदह्मि किं उण तारामेत्तीए विसहित्तणं पत्ता कप्पूरमंजरीए तेण तक्कज्जसज्जा श्रहं पुणो वि श्रोलग्गाविश्रा भविश्र णिवेदइस्सं ।

तिस्सा दाव परिक्खणाश्र णिहिदो हत्तो त्थणुत्संगदो
दाहुड्डामरिदो सहीहिं बहुसो हेलाश्र कढ्ढिज्जदि ।
किं तेणा वि इमं णिसामश्र गिरं संतोसविट्ठेसिणीं
हत्तच्छत्तणिवारितेंदुकिरणा बोल्लेइ सा जामिणी ॥ २९ ॥

कज्जसेसं उण कविंजलो णिवेदइस्सदि । तं श्र देवेण तधा कादव्वं । इति परिक्रम्य निष्क्रान्ता ॥

राजा । वश्रस्स किं उण तं कज्जसेसं ।

विदू । श्रज्ज हिंदोलणचउत्थी तत्थ देईए कप्पूरमंजरी हिंदोलए श्रारोहिदव्वा । ता मरगदपुंजट्ठिदेण देवेण कप्पूरमंजरी हिंदोलंती दट्ठव्वा । एदं तं कज्जसेसं ।

राजा । विचिन्त्य । ता श्रइणिउणा वि छलिदा देई ।

विदू । पाइश्रा जुण्णमज्जरिश्रा दुद्धं ति तक्कं ।

राजा । को श्रण्णो तुह्मेहिंतो मह कज्जसज्जो । जदो, को श्रण्णो चंदाहिंतो समुद्दवड्ढणे दिठ्ठो । इति परिक्रम्य कदलीगृहप्रवेशं नाटयतः ।

विदू । इश्रं जोग्गा उत्तुंगफलिहमणिवेदिश्रा । ता इह उववसिदु पिश्रवश्रस्सो ।

राजा । तथा करोति ।

विदू । हस्तमुद्यम्य । भोभो दीसदु पुण्णिमाचंदो ।

राजा । विलोक्य । स्वगतम् । श्रए दोलारूढाए मह वल्लहाए वश्रणं पुण्णिमाचंदो त्ति णिद्दिसदि । समंतादवलोक्य । प्रकाशम् ।

विच्छाश्रंतो णश्ररमणीमंडलस्साणणाइं
पक्खालंतो गश्रणकुहरं कंतिजोह्नाजलेण ।
पेच्छंतीणं हिश्रश्रणिहिदं णिट्ठलंतो श्रदप्पं
दोलालीलासरलतरलो दीसए से मुहेंदुः ॥ ३० ॥

श्रवि श्र ।

उच्चेहीं चामरेहीं धजधवलवडा डंबरिल्लावलीहिं
घंटाहीं विद्दुरिल्ला सुरतरुणिविमाणाणुश्रारं वहंती ।
पाश्रारं लंघश्रंती कुणइ रश्रवसा उण्णमंती णमंती
एंती जंती श्र दोला जणमणहरणं कठ्ठणाकठ्ठणेहीं ॥ ३१ ॥

श्रवि श्र ।

रणंतमणिणेउरं झणझणंतहारच्छडं
कणक्कणिदकिंकिणीमुहरमेहलाडंबरं ।
विलोलवलश्रावलीजणिदमंजुसिंजारवं
ण कस्स मणमोहणं ससिमुहीश्र हिंदोलणं ॥ ३२ ॥

विदू । भो सुत्तश्रारोतुमं, श्रहं उण वित्तिश्रारो भविश्र वित्थरेण वण्णइस्सं ।

देव एतच्च विज्ञाप्यते । न केवलं देव्या नियोगेन तस्या अनुगतास्मि किं पुनस्तारामैत्र्यापि सखित्वं प्राप्ता कर्पूरमञ्जर्याः तेन तत्कार्यसज्जा अहं पुनरपि आज्ञाकारिणी भूत्वा निवेदयिष्ये ।

तस्यास्तावत्परीक्षणाय निहितो हस्तःस्तनोत्सङ्गतो
दाहोड्डामरितः सखीभिर्बहुशो हेलयाकृष्यते ।
किं तेनापि इमां निशामय गिरं संतोषविद्वेषिणीं
हस्तच्छत्रनिवारितेन्दुकिरणा अतिवाहयति सा यामिनी ॥ २९ ॥

कार्यशेषं पुनः कपिञ्जलो निवेदयिष्यति । तच्च देवेन तथा कर्तव्यम् ॥

वयस्य कः पुनः स कार्यशेषः ॥ अद्य हिन्दोलनचतुर्थी तत्र देव्या गौरीं कृत्वा कर्पूरमञ्जरी हिन्दोलके आरोहयितव्या तन्मरकतपुञ्जस्थितेन देवेन कर्पूरमञ्जरी हिन्दोलन्ती द्रष्टव्या । एतत्तत्कार्यशेषम् ॥ तदतिनिपुणापि छलिता देवी ॥ पायिता जीर्णमार्जारिका दुग्धमिति तक्रम् ॥ कोन्यो युष्मत्तो मम कार्यसज्जः । यतः कोन्यश्चन्द्रतः समुद्रवर्धने दृष्टः ॥ इयं योग्या उत्तुङ्गस्फटिकमणिवेदिका । तदिहोपविशतु प्रिय-

वयस्यः ॥ भोभो दृश्यतां पूर्णिमाचन्द्रः ॥ अये दोलारूढाया मम वल्लभाया वदनं पूर्णिमाचन्द्र इति निर्दिशति ॥

विच्छाययन्नगरमण्डलस्याननानि
प्रक्षालयन् गगनकुहरं कान्तिज्योत्स्नाजलेन ।
प्रेक्षन्तीनां हृदयनिहितं निर्दलंश्च दर्पं
दोलालीलासरलतरलो दृश्यतेस्या मुखेन्दुः ॥ ३० ॥

उच्चैश्चामरैर्ध्वजधवलपटाडम्बरवहलावलीभिः
घण्टाभिर्विद्रावणबहला सुरतरुणीविमानानुकारं वहन्ती ।
प्राकारं लङ्घयन्ती करोति रयवशादुन्नमन्ती नमन्ती
आगच्छन्ती यान्ती च दोला जनमनोहरणं कर्षणाकर्षणैः ॥ ३१ ॥

रणन्मणिनूपुरं झणझणद्धारच्छटं
क्वणक्वणितकिङ्किणीमुखरमेखलाडम्बरम् ।
विलोलमलयावलीजनितमञ्जुसिञ्जीरवं
न कस्य मनोमोहनं शशिमुख्या हिन्दोलनम् ॥ ३२ ॥

भो सूत्रधारस्त्वमहं पुनर्वृत्तिकारो भूत्वा विस्तरेण वर्णयिष्ये ।

उवरिट्ठिदथणपब्भारचंपिश्रो चरणपंकश्रणजुश्रलं ।
हक्कारइव्व मश्रणं रणंतमणिणेउररवेण ॥ ३३ ॥

हिंदोलणलीलारहसा तीश्र चक्कवक्कणं रमणं ।
किलकिलइव्व सहरिसं मणिकंचीकिंकिणीरवेण ॥ ३४ ॥

दोलंदोलणहेलासरंतसरिश्राच्छलेण हारो स्से ।
विक्खिरइव्व कुसुमाउहणरवइणो कित्तिवल्लीश्रो ॥ ३५ ॥

सम्मुहवणपल्लिश्रवरिल्लदरदासाविश्राइं श्रंगाइं ।
हक्कारिउणमश्रणं पासम्मि णिवेसश्रंतिव्व ॥ ३६ ॥

ताडंकजुश्रं गंडेसु बहलघुसिणेसु घडणलीलाहिं ।
देइव्व दोलंदोलणरेहाश्रो गणणकोडेण ॥ ३७ ॥

णश्रणाइं पसइ सरिसाइं झत्ति फुल्लाइं कोदुहल्लेण ।
उप्पुंखिश्रव्व कुवलश्रदलसिलीमुहे पंचबाणस्स ॥ ३८ ॥

दोलारश्रविच्छेश्रो कहिं वि मा होउत्ति पडइव्व ।
पुट्ठम्मि वेणिदंडो मम्महचम्मट्ठिश्राश्रंतो ॥ ३९ ॥

इश्र एश्राइं विलासुज्जलाइं दोलापवंचचरिश्राइँ ।
कस्स ण लिहइ चित्ते णिउणो कंदप्पचित्तश्ररो ॥ ४० ॥

राजा । सविषादम् । कधं श्रवइण्णा कप्पूरमंजरी । रित्ता दोला रित्तं श्र मझ्झ चित्तं । रित्ताइं दंसणूसुश्राइं मझ्झ णश्रणाइं ।

उपरिस्थितस्तनप्राग्भारपीडितचरणपङ्कजयोर्युगलम् ।
आकारयतीव मदनं रणन्मणिनूपुररवेण ॥ ३३ ॥

हिन्दोलनलीलारभसा तस्याश्चक्रविस्तीर्णं रमणम् ।
किलकिलयतीव सहर्षं मणिकाञ्चीकिङ्किणीरवेण ॥ ३४ ॥

दोलान्दोलनहेलासरत्सरिकाछलेन हारोस्याः ।
विस्तारयन्ती कुसुमायुधनरपतेः कीर्तिवल्लिः ॥ ३५ ॥
"सरिकावलयाकारं गलभूषणम्"

सन्मुखपवनप्रेरितवस्त्रदरदर्शितानि अङ्गानि ।
आकार्यमदनं पार्श्वे निवेशयन्तीव ॥ ३६ ॥

ताटङ्कयुगं गण्डयोर्बहलघुसृणयोर्घटनलीलाभिः ।
ददादिव दोलान्दोलनरेखा गणनकौतुकेन ॥ ३७ ॥

नयने प्रसृति सदृशे झटिति फुल्ले कौतूहलेन ।
उत्पुङ्खिताविव कुवलयदलशिलीमुखौ पञ्चबाणस्य ॥ ३८ ॥

दोलारयविच्छेदः कुत्रापि मा भवत्विति पतन्तीव ।
पृष्ठे वेणीदण्डो मन्मथचर्मयष्टिकायमानः ॥ ३९ ॥

इत्येतानि विलासोज्ज्वलानि दोलाप्रपञ्चचरितानि ।
कस्य न लिखति चित्ते निपुणः कन्दर्पचित्रकारः ॥ ४० ॥

कथमवतीर्णा कर्पूरमञ्जरी रिक्ता दोला रिक्तं च मम चित्तम् रिक्ते दर्शनोत्सुके मम नयने ॥

विदू । ता विज्जुल्लेहा विश्र खणदिट्ठणट्ठा ।

राजा । मा एवं भण हरिश्रंदपुरी विश्र दिट्ठा पणट्ठा श्र । स्मृतनाटितकेन ।

मंजिट्ठी श्रोट्ठमुद्दा णवघडणसुवण्णुज्जला श्रंगलट्ठी
दिट्ठीबालेंदुलेहाधवलिमजणणी कुंतला कज्जलाहा ।
इत्थं वण्णाणलेहा विहरइ हरिणी चंचलच्छीश्र एसा
कंदप्पो दीहदप्पो जुश्रजणजश्रणे बद्धलक्खव्व ठादि ॥ ४१ ॥

विदू । एदं तं मरगश्रपुंजं । ता इह उवविसिश्र पिश्रवश्रस्सो पडिवालेदु तं । संझावि संणिहिदा वट्टदि । उभौ तथा कुरुतः ।

राजा । श्रए सिसिरं वि जामिणीं संदावदाइणीं श्रणुहवामि ।

विदू । ता लच्छीसहश्ररो खणं चिट्ठदु देश्रो जाव श्रहं सिसिरोवश्रारसामग्गीं संपादेम्हि । इति नाट्येन निष्क्रम्य पुरोवलोक्य च । किं उण एसा विश्रक्खणा इदो णिश्रडं श्राश्रच्छदि ।

राजा । संणिहिदो संझाकालो कहिदो श्र बन्दिहीं पि । स्मृत्वा मदनाकूतमभिनीय ।

किसलश्रकरचरणा वि कुवलश्रणश्रणा मिश्रंकवश्रणा वि ।
श्रहहणवचंपश्रंगी तह वि हुलावेइ श्रच्छरिश्रं ॥ ४२ ॥

विदू । सम्यगवलोक्य । श्रए विश्रक्खणा सिसिरोवश्रारसामग्गी सहिदा विश्र ।

तद्विद्युल्लेखेव क्षणदृष्टनष्टा ॥ मैवं भण हरिचन्द्रपुरीव दृष्टा प्रणष्टा च ।

माञ्जिष्ठी ओष्ठमुद्रा नवघटनसुवर्णोज्ज्वला अङ्गयष्टि-
र्दृष्टिर्बालेन्दुलेखाधवलि[illegible]जननी कुन्तलाः कज्जलाभाः ।
इत्थं वर्णानां रेखा विहरति हरिणी चञ्चलाक्ष्या एषा
कन्दर्पो दीर्घदर्पो युवजयजयने बद्धलक्ष्य इव तिष्ठति ॥ ४१ ॥

एतत्तन्मरकतपुञ्जम् । तदिहोपविश्य प्रियवयस्यः प्रतिपालयतु ताम् । संध्यापि संनिहिता वर्तते ॥ अये शिशिरामपि यामिनीं संतापदायिनी मनुभवामि ॥ तल्लक्ष्मीसहचरः क्षणं तिष्ठतु देवो यावदहं शिशिरोपचारसामग्रीं संपादयामि ॥ किं पुनरेषा विचक्षणा इतो निकटमागच्छति ॥ संनिहितः संध्याकालः कथितश्च बन्दिभ्यामपि ॥

किसलयकरचरणापि कुवलयनयना मृगाङ्कवदनापि ।
अहह नवचम्पकाङ्गी तथापि खलु नाययति आश्चर्यम् ॥ ४२ ॥

अये विचक्षणा शिशिरोपचारसामग्रीसहितेव ॥ अहो

ततः प्रविशति शिशिरोपचारसामग्रीसहिता विचक्खणा । परिक्रम्य । अहो पिअसहीए । महंतो खु विरहदाहज्जरो ।

विदू । उपसृत्य । भोदि किं एदं ।

विच । सिसिरोवआरसामग्गी ।

विदू । कस्स किदे ।

विच । पिअसहीअ कदे ।

विदू । ता मम वि अद्धं देहि ।

विच । किं णिमित्तं ।

विदू । महाराअस्स कदे ।

विच । किं उण कारणं तस्स ।

विदू । कप्पूरमंजरीए वि किं कारणं ।

विच । किं ण जाणासि महाराअस्स दंसणं ।

विदू । तुमं पि किं ण जाणासि महाराअस्स कप्पूरमंजरीए दंसणं । उभौ हसतः ।

विच । ता कहिं महाराओ ।

विदू । तुह वअणेण मरगअपुंजे चिट्ठदि ।

विच । ता महाराएण सह मरगअपुंजे दुआरदेसे चिट्ठ खणं जेण उहअदंसणे जादे सिसिरोवआरसामग्गीए जलंजली दिज्जदि ।

विदू । तहिं गच्छ जदो ण आअच्छसि । इति प्रक्षिपति । पुनस्तां प्रति । ता कीस दुआरदेसे होदव्वं ।

विच । देईए आदेसेण कप्पूरमंजरी समाअच्छदि ।

विदू । किं तीए आदेसो ।

विच । तहिं देईए बालतरुणो तिण्णि आरोविदा ।

विदू । केके ।

विच । कुरबअतिलअअसोआ ।

विदू । ता किं तेहिं ।

विच । भणिदा सा कप्पूरमंजरी देवीए । जधा,

> कुरबअतिलअअसोआ आलिंगणदंसणचलणगहआ ।
> विअसंति सुंदरीणं ता ताणं देहि दोहलअं ॥ ४३ ॥

एण्हिं तं संपादइस्सदि त्ति ।

विदू । ता मरगअपुंजादो पिअवअस्सं आणिअ तमालविडवंतरिदं ठेविअ एदं पच्चक्खं करिस्सं । तथा नाटयित्वा राजानं प्रति । भोभो उट्ठिअ पेक्ख णिअहिअअसमुद्दचंदलेहं ।

राजा । तथा करोति ।

ततः प्रविशति विशेषविभूषिताङ्गी कर्पूरमंजरी । कहिं उण विअक्खणा ।

विच । तामुपसृत्य । सहिं करीअदु देईए संदिट्ठं ।

राजा । वअस्स किं उण संदिट्ठं ।

विदू । तमालविडवंतरिदो जाणेसु ।

विच । एस कुरबअतरू ।

कर्पूर । तमालिङ्गति ।

विच ।

> णवकुरबअवच्छो कुंभथोरत्थणीए
> रहसविरइएणं णिब्भरालिंगणेण ।
> तह कुसुमसमिद्धिं लंभिदो सुंदरीए
> जह भमरकुलाणं तत्थ जत्ता पउत्ता ॥ ४४ ॥

प्रियसख्याः महान् खलु विरहदाहज्वरः ॥ भवति किमेतत् ॥ शिशिरोपचारसामग्री ॥ कस्य कृते ॥ प्रियसख्याः कृते ॥ तन्ममाप्यर्धं देहि ॥ किं निमित्तम् ॥ महाराजस्य कृते ॥ किं पुनः कारणं तस्य ॥ कर्पूरमञ्जर्या अपि किं कारणम् ॥ किं न जानासि महाराजस्य दर्शनम् ॥ त्वमपि किं न जानासि महाराजस्य कर्पूरमञ्जर्या दर्शनम् ॥ तत् कुत्र महाराजः ॥ तव वचनेन मरकतपुञ्जे तिष्ठति ॥ तत् महाराजेन सह मरकतपुञ्जे द्वारदेशे तिष्ठ क्षणं येनोभयदर्शने जाते शिशिरोपचारसामग्र्या जलाञ्जलिर्दीयते ॥ तत्र गच्छ यतो नागच्छसि । तत् किमिति द्वारदेशे भवितव्यम् ॥ देव्या आदेशेन कर्पूरमञ्जरी समागच्छति ॥ कस्तस्या आदेशः ॥ तत्र देव्या बालतरवस्त्रय आरोपिताः ॥

कुरबकतिलकाशोकाः ॥ तत्किं तैः ॥ भणिता सा कर्पूरमञ्जरी देव्या । यथा,

> कुरबकतिलकाशोका आलिङ्गनदर्शनचरणग्रहतः ।
> विकसन्ति सुन्दरीणां तत्तेषां देहि दोहलकम् ॥ ४३ ॥

इदानीं तत्संपादयिष्यतीति ॥ तत् मरकतपुञ्जात् प्रियवयस्य मानीय तमालविटपान्तरितं स्थापयित्वा एतत्प्रत्यक्षं करिष्ये । भोभो उत्थाय प्रेक्ष निजहृदयसमुद्रचन्द्रलेखाम् ॥ कुत्र पुनर्विचक्षणा ॥ सखि क्रियतां देव्या संदिष्टम् ॥ वयस्य किं पुनः संदिष्टम् ॥ तमालविटपान्तरितो जानीहि ॥ एष कुरबकतरुः ।

> नवकुरबकवृक्षः कुम्भस्थूलस्तन्या
> रभसविरचितेन निर्भरालिङ्गनेन ।
> तथा कुसुमसमृद्धिं लम्भितः सुन्दर्या
> यथा भ्रमरकुलानां तत्र यात्रा प्रवृत्ता ॥ ४४ ॥

विदू । भोभो पेक्खपेक्ख महेंदजालं । जेण बालो वि कुरबअतरू तरुणीए गाढमवगूढो झत्ति सुपुप्फिदो ।

राजा । ईदिसो एव दोहलकस्स प्पहावो ।

विच । अह एसो तिलअद्दुमो ।

कर्पूर । चिरं तिर्यगवलोकयति ।

राजा ।

तिक्खाणं तरलाण कज्जलकलासंवग्गिदाणं वि से
पासे पंचसरं सिलीमुहधरं णिच्चं कुणंता विअ ।
णेत्ताणं तिलअद्दुमेण वडिदा धाडी मिअच्छी अजं
तं सो मंजरिपुंजदंतुरसिरो रोमञ्चिदं व्व ठ्ठिदो ॥ ४५ ॥

विच । एसा वि असोअसही ।

कर्पूर । चरणताडनं नाटयति ।

विच ।

असोअतरुताडणं रणिदणेउरेणंघिणा
कदं अ मिअलंछणच्छविमुहीअ हेलुल्लसं ।
सिहासु सअलासु वि त्थवअमंडणाडंबरं
ठिदं अ गअणंगणं जणणिरिक्खणिज्जं खणं ॥ ४६ ॥

विदू । भो वअस्स जं सअं ण किदं दोहलदाणं देईए तत्थ किं कारणं जाणेसि ।

राजा । तुमं जाणेहि ।

विदू । भणामि जइ देओ ण कुप्पदि ।

राजा । को एत्थ रोसावसरो भण उण्णिद्दजीहाए ।

भोभो प्रेक्ष महेन्द्रजालम् । येन बालोपि कुरबकतरुस्तरुण्या गाढमवगूढो झटिति सुपुष्पितः ॥ ईदृश एव दोहलकस्य प्रभावः ॥ अयमेव तिलकद्रुमः ॥

तीक्ष्णयोस्तरलयोः कज्जलकलासंवलितयोरप्यस्याः
पार्श्वे पञ्चशरं शिलीमुखधरं नित्यं कुर्वतोरिव ॥
नेत्रयोस्तिलकद्रुमेन पतिता धाटी मृगाक्ष्या यत्
तत्समञ्जरीपुञ्जदन्तुरशिरा रोमाञ्चित इव स्थितः ॥४५॥

एषाप्यशोकसखी ।

अशोकतरुताडनं रणितनूपुरेणाङ्घ्रिणा
कृतं च मृगलाञ्छनच्छविमुख्या हेलोल्लसत् ।
शिखासु सकलास्वपि स्तबकमण्डनाडम्बरं
स्थितं च गगनाङ्गणं जननिरीक्षणीयं क्षणम् ॥ ४६ ॥

भो वयस्य यत् स्वयं न कृतं दोहलदानं देव्या तत्र किं कारणं जानासि ॥ त्वं जानीहि ॥ भणामि यदि देवो न कुप्यति ॥ कोऽत्र रोषावसरो भणोन्निद्रजिह्वया ॥

विदू ।

इह जइ वि कामिणीणं सुंदेरं घरइ अवअवाणसिरी ।
अहिदेअदव्व णिवसइ तह वि हु तारुण्णए लच्छी ॥४७॥

इह यद्यपि कामिनीनां सौन्दर्यं धारयत्यवयवानां श्रीः ।
अधिदेवतेव निवसति तथापि खलु तारुण्यके लक्ष्मीः ॥४७॥

॥ शेष उत्तराङ्के ॥

॥ श्रीः ॥

॥ कीर्तिस्तम्भस्थो लेखः ॥

इण्डियनमेलनामकपत्राद् ज्ञायते । सिंहलद्वीपस्थबोन्टोटानगरनिवासी पाल्माड्डुलानामकनगरस्थायास्तृपिताभिधायाः पुस्तकसंशोधनाय व्यवस्थापितायाः प्रधानधर्माचार्यसभायाः संपादकस्तद्देशीयपाल्युपपदकप्रधानपण्डितेभ्यो वयसा न्यूनोपि विद्यया प्रज्ञया चान्यूनो बौद्धमतशास्त्रविचक्षणशिरोमणिर्यात्रामूले धर्म्मारामनामको बौद्धाचार्यस्त्रिचतुर्भ्यो वर्षेभ्यो दुःसहक्लेशकरेण रोगविशेषेण मुहुर्मुहुराक्रान्तकलेवरः शय्यातलगतस्तत्क्लेशमसहमानो भगवतः श्रीबुद्धस्य साचिव्यमिच्छन्निवेमं लोकं विहाय स्वरारुरोह । ह्यो ऽहं स्थविरसुभूतेः सकाशादिमं वृत्तान्तमश्रोषम् । "तव पियमित्तभूदो वनवासविहारवासी यात्रामूल्ले धम्मारामो नाम थेरो इमस्सिं जनवारिमासे अठ्ठावीसत्तिमे दिने रात्तियां परलोकं गदो, अहो सव्वो संघारो अणिच्चा त्ति" । तव प्रियमित्रं स्थविरो वन्यैकान्ताश्रमवासी यात्रामूल्ले धर्मारामोनाम अस्मिन् जनवरिमासे अष्टाविंशतितमे दिने रात्र्यां पश्चिमयामे परलोकं गतः । अहो सर्वः संसारो ऽनित्य इति । हः!!! महदेतत्खेदस्य पदमेतादृशनिःसीमशमदमदयानिधेस्तस्याकाले मरणं, को नामेदानीं दुरूहतरप्राचीननिबन्धसंशोधनाय व्यवस्थापितां तृपितकाभिधां सभामलंकुर्यात्, कश्च तानतिप्रौढान् बौद्धमतनिबन्धान् संशोध्य मुद्रयेत् । ये च स्वीयभाग्योदयोद्रेकेण तमपश्यंस्ते नूनमिदानीं संस्मृत्यसंस्मृत्य तदीयामतिसज्जनतां दयालुतां निर्लोभितां परमं पावित्र्यं दृढां चेश्वरेभक्तिमन्यानप्यनेकान् लोकोत्तरांस्तदीयसद्गुणगणान् विगलिताङ्गाः शयनाशने अपि विहाय विनष्टसंज्ञाः केवलं महते शोकाय चिराय भविष्यन्ति । किं बहुना, यदि जगति कश्चन मृत्योरुपायो ऽभविष्यत्तर्हि के नाम तन्नगरनिवासिनो जनास्तत्प्रातिनिध्येनातिप्रियतमानपि स्वीयानसून् मृत्यवे समर्प्य तं नारक्षिष्यन् । अहह!!! नूनमूनपञ्चाशद्वर्षस्यास्य मरणं सर्वाणि बौद्धकुलानि तद्द्वीपनिवासिनो ऽन्यांश्च जनानवश्यं खेदयति स्म । अहो विषमः कालो यदनवद्यगुणगणाकरस्याकाले

एव मरणम् । अशक्याश्च स्वयशोराजिराजितानेकदिगन्तास्तदीयसद्गुणगणाः प्रादेशमात्रे ऽत्र वृत्तपत्रे मुद्रयितुमिति । इदं तावत्सानुनयं प्रार्थये जगत्यस्मिन्सुकीर्तनीयगुणगणाकराणां शिरोमुकुटत्वेन कीर्तनीयस्यास्य स्तुतिपूर्वकं स्मरणं प्रमाणीकरणीयं सहृदयहृदयैरार्यैरिति ॥

॥ कस्याप्येतल्लोकं स्वविरहखेदशालिनं कुर्वाणस्य जीवनवृत्तान्तवर्णनम् ॥

अथ कोपि प्रशियादेशीयकोनिग्वर्गाभिधाननगरनिवासी श्रीमान् थियोडरगोल्डष्टकरसाहिबाभिधः सत्यविनयाद्यगण्यगुणगणनिकरैरुपशोभमानस्तत्रैव पाठशालायां प्रधानाध्यापकवरश्रीपेटरबोन्साहिबमहाशयस्य निकटे किंचित्संस्कृतमारभ्याधिकं पिपठिषुर्बोरनाम्नि नगरे श्रीमदतीतकन्सर्टाभिधराजकुमारवरश्रीश्रीमन्महाराज्ञीपतिना सह अगस्तिविहेल्मबान्स्लीगल्, ख्रीष्टमतानुयायिल्यासन्, संज्ञकाभ्यां तत्रत्यप्रधानपाठशालाध्यापकाभ्यां समीचीनं पाण्डित्यमवाप्याचिरादेव संस्कृतव्युत्पत्तिनैपुण्यपूर्णकलानिधिचन्द्रिकाभी रसिकविद्वज्जनमनःकुमुदिनीसंमोदमापादयामास । ततः परं कतिपयैरेवाहोभिः पेरिसाख्यनगरमलंकुर्वाणो गीर्वाणवाणीसंचरणे 'बर्नूफ' 'लेद्रोन्' नामस्वीयमित्रजनगणानानन्दयन् कतिपयसमास्तत्र निवसति स्म । बर्लिनाभिधनगरे च कदा चिन्निवसन् जगन्मण्डलनाम्नि अलग्जाण्डरबोन् हम्बोल्डसाहिबकृतग्रन्थे साहाय्यमातन्वंस्ततोपि विविधं बहुमानं समपादयत् । यदीयाभ्यासशालिता संस्कृतविद्याचातुर्येण विविधदेशसंचारसमुत्पन्नानन्दनिकरैर्नन्दनमिव लन्दननगरं प्रति निवसद्भी राजकीयाधिकारिजनैः सबहुमानं पञ्चाशदधिकाष्टादशशततमे ईशवीयशके महाराज्ञीपाठशालायां संस्कृतप्रधानाध्यापकपदमधिष्ठापितस्तत्र बहून् विद्यार्थिनः संस्कृतनिपुणान् व्यधात् । षट्षष्ट्यधिकाष्टादशशततमे ऽब्दे संस्कृतपुस्तकानां मुद्रणाय श्रीमद्वेल्साभिधनगरयुवराजदत्तपरमाश्रयमध्यक्षीकृतड्यूकाफ्डोमालेतिसुप्रसिद्धनामधेयां नानाविधविद्वद्वृन्दनिकरसभासत्सभाजितां सभां परोपकारधिया विराजयामास । स चायं सततं पाठनग्रन्थनिर्माणादिनिरत उद्भवसमये उपेक्षितेन यमपाशेनेव कण्ठगतेन रोगविशेषेण ग्रस्तो द्विसप्तत्यधिकाष्टादशशततमे ख्रीष्टाब्दे मार्चमासीयषष्ठदिने बुधवासरे प्रातर्द्वादशात्मरश्मीनवलम्ब्योत्तरोत्तरमुच्चतिमिच्छुः श्रीमन्मसीहदक्षिणकरावलम्बं संपादयितुमिव नाकमधिरुरोह । अनेन च बहवो ग्रन्था निर्मितास्तत्रातिविस्तृतः संस्कृतकोशः परमोपयोग्यप्रसिद्धसप्रमाणशब्दावलिसमलंकृतो ऽपूर्ण एवास्ते । कृष्णमिश्रपण्डितनिर्मितस्य प्रबोधचन्द्रोदयनामनाटकस्य जर्मन्देशीयभाषया ऽवतारं चक्रे, यस्य प्रस्तावनां श्रीमान् ऐसेन्क्रान्साहिबो लिलेख । अयं च परमबुद्धिमान् पाणिनीयव्याकरणनिपुणो मानवकल्पसूत्रस्यात्यन्तं परिशोधितमुद्रितपुस्तके शास्त्रीयाणां कालक्रमसंबन्धिनीनां च जिज्ञासानां शोधनानि तत्परिचायिकारूपेण प्रकाशयन्, जैमिनिन्यायमालाविस्तरस्य मूलं च संशोध्य मुद्रयांचकार । तदीयकृतिश्च चतुर्भ्यो वर्षेभ्यः पूर्वम् 'अथेनिय' नामके शास्त्रीयोदन्तपत्रे परमदर्शनीया ऽऽसीत् । अयं पुनः शब्दशास्त्रार्थविचारिणीनाम्न्याः सभायाः सभ्यस्तत्र शब्दसादृश्यविषयं पुराणं चाधिकृत्य परमोत्तमान्संग्रहयोग्यान् वादानवदत् । परंतु दुरदृष्टदूषितचित्ता न केपि तत्रत्याः सभासदः सभालेख्यवृत्तान्तपत्रे तान् वादान् संघटयितुमेनं प्रेरयन्ति स्म । अनेन च वेस्ट्मिनिष्टर्रिव्यूनामकादिनियतपत्रेषु विषयदानेन साहाय्यमकारि । तत्रायं महान् विषयो रमणीयतमो महाभारताख्यः स चेदानीं परमोत्साहशालिभिः पृथङ्मुद्रितो विराजते । भारतवर्षीयपुराणं शास्त्रं चाधिकृत्य चेम्बरसाहिबाभिधमहाशयप्रकाशिते निखिलशब्दार्थप्रकाशककोशे संगृहीताः सर्वे एतद्विरचिता एव लेखाः सन्ति ।

अहोअहो पश्यतपश्यतैतस्य निस्सीमधीरतामुद्योगिसार्वभौमितां च, यदयं व्याकरणमहाभाष्यस्य जीर्णमेकं पुस्तकमुपलभमानस्तच्छोधने च पुस्तकनाशं संभावयन् फोटोग्राफाभिधयन्त्रेण यथावदाभास्य तत्र शुद्धाशुद्धविवेकपुरःसरं पुनर्मुद्रणे कृतप्रयत्नः श्रीमन्महाराज्ञ्या तत्साधनीभूतद्रव्यदानप्रतिश्रवेण जातपरमाश्रयः सादरं तन्मुद्रणे प्रवृत्तः प्राय एतद्धुर्धरकर्मणि प्रवर्तनेन शङ्कितरोगो निसर्गजनहितैषी, पुण्यकथायां नाटककाव्यादिषु दायभागव्यवहारेषु च विवादविषयेषु आचार्यइवायमेव सर्वजनानुमतवचनो मान्यजनमनोनन्दने नन्दनन्दनावरजः स्वीययशोराजिप्रकाशितदिङ्मण्डलो ऽमासोम इव केवलं कीर्तिमात्रावशेष इदानीं सुजनतां स्मरयति ॥

हा!!! दायभागव्यवस्थानामतीवोपकारको ग्रन्थो निर्मातव्य इति महाशयस्याशयं क इदानीं संपाद्य सभासदां व्यवस्थाविदां चानन्दं जनयेत् ॥ कोवा तद्देशीयानां परमोपकाराय नवनवान् ग्रन्थान्निर्माय महासंस्कृतप्रवीणस्य हृद्यं संपादयेदिति वयं खिन्नमनसो महामहिमजगद्विचित्रचरितेन परमकारुणिकेन भगवतैवानन्दनीया इति मुहुर्मुहुः प्रार्थयाम इति शिवम् ॥

PRINTED AND PUBLISHED BY THE PROPRIETORS, E. J. LAZARUS AND CO. AT THE MEDICAL HALL PRESS, BENARES.

काशीविद्यासुधानिधिः

श्रीगणेशाय नमः

श्रीमद्विजयिनीदेवीपाठशालोदयोदितः । प्राच्यप्रतीच्यवाक्पूर्वापरपक्षद्वयान्वितः ॥ १ ॥
अङ्करश्मिः स्फुटयतु काशीविद्यासुधानिधिः । प्राचीनार्यजनप्रज्ञाविलासकुमुदोत्करान् ॥ २ ॥

THE PANDIT.

A Monthly Journal, of the Benares College, devoted to Sanskrit Literature.

No. 75. Benares, August 1st, 1872. Vol. VII.

॥ चिन्तामणेः शब्दखण्डम् ॥

(१) आचारमूलत्वं वेदस्य प्रवर्तकज्ञानजनकत्वेन भवतीति प्रवर्तकज्ञानं निरूप्यते ॥ (२) तत्राभिधासंकल्पापूर्वभावनाज्ञानं न प्रवर्तकम् ।

॥ शब्दचिन्तामणिव्याख्या रुचिदत्तीया ॥

उपोद्घातसंगतिमाह । (१) आचारेति । प्रसङ्ग एवात्र संगतिरित्यन्ये । (२) तत्राभिधेति । तत्राभिधा लिङाद्यर्थः । सैव च प्रवृत्तिहेतुरिति भावः । तथाहि । लिङादेस्तावदभिधानामकः स्वनिष्ठो व्यापारो ऽवश्याभ्युपेयः, व्यापारभिन्नस्य परनिष्ठव्यापारजनकत्वं स्वनिष्ठव्यापारद्वारा, यथा दण्डस्य स्वनिष्ठस्पन्दद्वारा चक्रनिष्ठस्पन्दजनकत्वम् । अत्र च व्यापारे व्यभिचारवारणाय व्यापारभिन्नस्येति । व्यापारिणः स्वनिष्ठव्यापारजननेपि न व्यापारापेक्षा ऽनवस्थापत्तेरित्यत उक्तं परनिष्ठेति । ज्ञानद्वारैव लिङादि प्रवृत्तिं जनयत्विति शब्दाश्रया सा नायास्यतीत्यत उक्तं स्वनिष्ठेति । सा च शब्दाश्रयत्वात् शब्दभावनेत्युच्यते, अपरा चार्थविषयत्वेनार्थभावनेत्युच्यते, सा च सर्वाख्यातवाच्या । तदुक्तम् ।

अभिधाभावनामाहुरन्यामेव लिङादयः ।
अर्थात्मभावना त्वन्या सर्वाख्यातस्य गोचरः ॥

अर्थात्मत्वमर्थविषयत्वम् । अर्थभावना च कर्म करणमितिकर्त्तव्यतां चापेक्षते, इत्यंशत्रयवती भवति । अन्यथा फलं स्वर्गादि सा न भावयेत् तस्यैतच्चितयाधीनत्वात् । एवं च शब्दभावनापि भावनात्वात् किं केन कथमिति अंशत्रयवती भवति, तदिदमाह ।

लिङो ऽभिधा सैव च शब्दभावना
भाव्या च तस्याः पुरुषप्रवृत्तिः ।
संबन्धबोधः करणं तदीयं
प्ररोचना चाङ्गतयोपयुज्यते ॥

इति । तत्र किमित्याकाङ्क्षायां प्रवर्तनीयपुरुषप्रवृत्तिर्भाव्या, सैव च कर्म, केनेत्याकाङ्क्षायां संबन्धबोध इति । अव्युत्पन्नस्य लिङादिपदादर्थप्रवृत्तेः संबन्धबोधेन तच्छक्तिग्रहरूपेण सहकारिणा सा प्रवर्त्तयतीत्यर्थः । कथमित्याकाङ्क्षायां प्ररोचनेति । प्ररोचना स्तुत्यर्थवादः, स च कर्मणः प्रशस्तत्वज्ञानमन्तरेणावसीदन्तीं प्रवृत्तिमप्रापयन्तीं विधिशक्तिं प्राशस्त्यज्ञानद्वारा उत्तम्भाति । प्रवृत्तिजननीं करोति । अत एव यत्र प्ररोचना न श्रूयते तत्रापि कल्प्यतइति तस्या विध्यविनाभाव इति । इदमत्र तत्त्वम् । अभिधापि न तत्त्वेन ज्ञाता स्वरूपसती वा हेतुरतिप्रसङ्गादिति प्रवर्त्तनात्वेन भावनात्वेन च ज्ञाता तथा, तथा च यज्यादिपदसमभिव्याहारेण यागादिजनकप्रवृत्तिजनकत्वग्रहे समानसंवित्संवेद्यतया यागादावपि कृतिसाध्यत्वभानम् । भाव्यानुपस्थितौ च भावनात्वेन ज्ञानमसंभवीति समभिव्याहृतफलं प्रति भावनात्वेन ज्ञायते । अत एवाश्रुतफलेपि विश्वजिदादौ फलं कल्प्यते । तथा चाभिधागतमिष्टसाधनत्वमपि भासते । तच्च क्रियागतमिष्टसाधनत्वं विना नेत्याक्षिप्तदिष्टसाधनताबोधोपि, तथा च प्रवर्त्त-

(३) तस्मिन् सत्यप्रवृत्तेः । असत्यपि प्रवृत्तेश्च । कार्यत्वज्ञानं प्रवर्तकमिति गुरवः । तथाहि । (४) ज्ञानस्य कृतौ जन्यायां चिकीर्षातिरिक्तं न कर्तव्यमस्ति । तत्सत्त्वे कृतिविलम्बे हेत्वन्तराभावात् । (५) चिकीर्षा च कृतिसाध्यत्वप्रकारिका कृतिसाध्यक्रियाविषयेच्छा । (६) पाकं कृत्या साधयामीति तदनुभवात् । (७) सा स्वकृतिसाध्यताज्ञानसाध्या । (८) इच्छायाः स्वप्रकारकधीसाध्यतानियमात् । अत एव स्वकृतिसाध्ये पाके प्रवर्तते । न त्विष्टसाधनताज्ञानसाध्या । (९) स्वकृत्यसाध्येपि चिकीर्षापत्तेः । (१०) स्वकृत्यसाध्यताज्ञानं प्रतिबन्धकमिति चेत् । न । तदभावकारणत्वे गौरवात् । अथाभाव उभयसिद्धः, कृतिसाध्यताधीरसिद्धेत्यतो न लाघवावसर इति चेत् । न । यत्र शब्दादनुमानाद्वा दैवात्सा तत्र (११) लाघवावतारात् । इच्छायाः स्वप्रकारकज्ञान(१२)साध्यत्वनियमेन कृतिसाध्यत्वज्ञानस्यावश्यकत्वात् । (१३) जनकज्ञानं विघटयत एव ज्ञानस्य प्रतिबन्धकत्वाच्च । व्याप्तिज्ञानविघटनद्वारानुमितिप्रतिबन्धकानैकान्तिकज्ञानवत् । (१४) अन्यथा स्वकृत्यसाध्यत्वानिष्टसाधनत्वोपेक्षणीयत्वनिष्फलत्वज्ञानं प्रतिबन्धकं क्रियाज्ञानमेव प्रवर्तकं कल्प्येत । ननु सनो धात्वर्थगोचरेच्छावाचित्वा(१५)ल्लाघवाच्च कृताविच्छा चिकीर्षा, सा च वृष्टाविवेष्टसाधनताज्ञानादिति चेत् । न । वह्निना साधयामीतिवत् कृत्या

नात्वभावनात्वज्ञानानुकूला ऽपरा शक्तिर्लिङादिपदे एव, अत एवैका प्रवृत्त्यनुकूला ऽपरा च ज्ञानानुकूला इति शक्तिचतुष्टयमिति ॥ अन्ये तु व्यवहारेण व्युत्पित्सुर्बालः स्वप्रवृत्तिजनकत्वेनावधारिते शक्तिं कल्पयति, तादृशी चेच्छैवेति, सैव लिङाद्यर्थ इत्याहुः ॥ अपरे त्वपूर्वमेव विध्यर्थो वैदिके तज्ज्ञानस्यैव प्रवर्त्तकत्वादित्याहुः ॥ अपरे तु प्रयत्नरूपभावनाज्ञानं प्रवर्त्तकमिति, सैव विध्यर्थ इति वदन्ति ॥ तदेतत्सर्वं दूषयति । (३) तस्मिन्नित्यादि । इदं च हेतुद्वयं यथायथं बोध्यम् । अभिधायां मानाभावेन तत्र तस्मिन् सतीत्यादिहेतोरनन्वयात् । इदमत्राकूतम् । पदतदर्थभिन्नायामभिधायां मानाभावः । व्यवहाराधीनव्युत्पत्तिबलेन शब्दस्य ज्ञानमात्रजनकत्वावधारणेन प्रवृत्तिजनकत्वाभावात् । भावे वा ऽऽवश्यकेष्टसाधनताज्ञानमात्रव्यापारत्वेनोपपत्तावभिधालक्षणव्यापारकत्वे मानाभावात् । न चोक्तनियमात् तत्कल्पनम् । नियमे स्वनिष्ठत्वस्य गौरवेणाप्रयोजकतया व्यर्थविशेषणत्वात् । अनुमित्यादिकरणव्याप्तिस्मृत्यादौ व्यभिचाराच्च । इच्छा ऽपि न लिङर्थः, तस्याः स्वरूपसत्या एव प्रवर्त्तकत्वेन ज्ञानफलकत्वशक्तेस्तत्राकल्पनात् । स्वर्गकामादिपदलभ्यत्वाच्च । अपूर्वज्ञानमपि न प्रवर्त्तकम् । अपूर्वपदादिना तज्ज्ञाने ऽप्यप्रवृत्तेस्तदज्ञानेपीष्टसाधनत्वज्ञाने प्रवृत्तेश्च । भावनाज्ञानमपि सर्वाख्यातसाधारण्याद् न प्रवर्त्तकमिति । (४) ज्ञानस्येति । साक्षादसाधनस्येति शेषः, तेन प्रवृत्तिविषयप्रत्यक्षे न व्यभिचारः । फलज्ञानं तु न प्रवर्त्तकमित्युक्तं प्रत्यक्षप्रकाशे । व्यापारीभूतां चिकीर्षां लक्षयति । (५) चिकीर्षा चेति । अत एव क्रियाविषयत्वं फलान्यविषयत्वं विशेषणं फलगोचरतादृशेच्छाया अप्रवर्त्तकत्वात् । अत एव कृत्यसाध्यक्रियायां तादृशेच्छासंभवेपि न कृतौ व्यापार इति क्रिया कृतिसाध्यत्वेन वास्तवेन विशेषितेत्याहुः । तच्चिन्त्यम् । गुरुतरभारोत्तोलनादौ कृत्यसाध्येपि तादृशेच्छायाः कृतौ व्यापारत्वात् । अत एव तत्र कृतिजन्य एव श्रम इति वक्ष्यते । तस्मात्काचित्काभिप्रायेण स्वरूपनिर्वचनं तदिति मन्तव्यम् । (६) पाकमिति । पाकं कृत्या साधयामीत्येवमाकारिकाया इच्छाया अनुभवात् । कृतिसाध्यत्वेन पाकमिच्छामीत्यनुभवेनेति शेषः । अन्यथा यथाश्रुते इतिशब्देनेच्छानुभवप्रकारकथनपरत्वलाभे विरोधादिति भावः । ततः किमित्यत आह । (७) सेति । स्वपदमत्र प्रवर्त्तकज्ञानं तादृशमिति कृत्वा, प्रकृते तु तदनन्तर्भावेप्यदोषादिति ध्येयम् । (८) इच्छाया इति । जन्येच्छायाः स्वप्रकारकधीसाध्यत्वनियमादित्यर्थः । (९) स्वकृत्यसाध्ये । स्वकृत्यसाध्यत्वेन ज्ञाते, अत एवाह । (१०) स्वेति । (११) लाघवावतारादिति । यद्यप्येवंविधलाघवावतारे त्वन्मते भेदाग्रहोपि न प्रवृत्तिहेतुः स्याद् अभेदग्रहापेक्षया गुरुत्वात् तथापि तद्धेतोरेवेति न्यायाद् अतिरिक्तविशिष्टज्ञानकल्पनागौरवाच्च युगपदुपस्थित्यभावेन तत्र तथा, अत्र तु युगपदुपस्थितौ लाघवादर इति भावः । (१२) साध्यत्वनियमेन, प्रयोज्यत्वनियमेनेत्यर्थः । तेन रजतस्मरणाजन्यभ्रमस्थलीयरजतेच्छायां तन्मते न व्यभिचारः । नन्वावश्यकत्वेपि रजतस्मरणवद्धेतुत्वं मास्त्वित्यत आह । (१३) जनकेति । साक्षादविरोधिन इति शेषः । तेन बाधादिबुद्धौ न व्यभिचारः । ननु जनकं विघटयत इत्येवास्तु लाघवा,त्तथा च स्वाभावं जनकं विघटयतस्तयात्वं स्यादित्यत आह । (१४) अन्यथेति । एवं तवापीष्टसाधनताज्ञानं हेतुर्न स्यादिति भावः । (१५) लाघवादिति । कृतिसाध्यत्वप्रकारेच्छापेक्षया कृतीच्छात्वस्य प्रवृत्तिनिमित्तस्य लघुत्वादित्यर्थः । तथा चेष्टसाधनताज्ञानादेव प्रवृत्तिरिति

साधयामीतीच्छाया: (१६) कृतिपूर्वमनुभूयमानाया: सन्नन्तावाच्यत्वेन गौरवेण च प्रत्याख्यातुमशक्यत्वात् । किं च पाकं चिकीर्षतीत्यत्र प्राधान्येन पाकस्येच्छाविषयत्वमनुभूयते न तु कृते: । (१७) धातोश्च सन्प्रत्ययाभिधेयेच्छाप्रकारवाचित्वमोदनं बुभुक्षतइत्यत्र भोजनविशेष्यतयौदनस्येच्छाविषयत्वानुभवात् । (१८) इष्टसाधनत्वेन वृष्टाविव कृताविच्छासंभवेपि कृतीच्छा न प्रवर्त्तिका, किं तु कृतिसाध्येच्छैव । घटं जानाति चिकीर्षति करोति इति ज्ञानचिकीर्षाप्रवृत्तीना(१९)मेकविषयत्वानुभवात् । (२०) अथ यदि (२१) कृत्या साधयितुमिच्छा सा, तदा चिकीर्षितस्य पाकस्यान्यत: सिद्धौ सा नापगच्छेत् । नह्युपायविशेषसाध्यत्वेनेच्छोपायान्तराधीनफललाभेन निवार्यते । प्रीत्या धनलाभेपि प्रतिग्रहेण तल्लिप्साया अनिवृत्तेरिति चेत् । न । स्व(२२)विषयसिद्धत्वस्य फलेच्छाविच्छेदस्य चोपायेच्छाविरोधित्वात् । (२३) अस्ति च तत्र पाकौदनयो: सिद्धत्वम्, अन्यौदनेच्छायां पाकचिकीर्षा भवत्येव । प्रत्युतासिद्धत्वात् कृतावेवेच्छा न विच्छिद्येत । यदि कृतिविषयसिद्धत्वफलेच्छाविच्छेदौ न विरोधिनौ, प्रीत्या धनलाभे च तदधिकधनेच्छा न विच्छिद्यते । तस्यासिद्धत्वात् तत्फलेच्छाया: सत्त्वात् । धनमात्रार्थिनश्च प्रीत्या तल्लाभे प्रतिग्रहेण तल्लिप्सा नास्त्येव, धनमात्रस्य सिद्धत्वात् । किंचिद्विशेषस्य सिद्धावेव हि सामान्येच्छाविच्छेद: । अन्यथा सकलस्वविषयसिद्धेरसंभवेन तद्विच्छेदो न स्यादेव ॥ (२४) वस्तुतस्तु क्रियानुकूला कृतिरिष्टोपाय इति ज्ञाने क्रियाया: कृतिसाध्यत्वमिष्टोपायत्वं च भातं, (२५) क्रियाद्वारैव कृतेरिष्टसाधनत्वादिति तद्बोधात् कृताविव कृतिसाध्यत्वेन क्रियायामपि सैवेच्छेति चिकीर्षायां कृतिसाध्यत्वप्रकारनैयत्यम् । अत: कृतिसमानविषयचिकीर्षात्वेन चिकीर्षाया: कृतिकारणत्वं न तु कृतीच्छात्वेन, भिन्नविषयतया गौरवात् (२६) तथापि येन रूपेण यस्येष्टसाधनत्वं तेन प्रकारेण तत्रेच्छा । यथा स्वकेदारवृष्टित्वेनेष्टसाधनत्वात्तथैवेच्छा, तथा कृतिसाध्यत्वेन पाकस्येष्टसाधनत्वमत: कृतिसाध्यत्वेन तत्रेच्छा भवतीति कृतौ कृतिविषये वा चिकीर्षायां न वृष्टीच्छाविलक्षणसामग्र्यन्तरकल्पनमिति चेत् । भवेदेवं यदि कृतिसाध्यत्वेन पाकस्यौदनसाधनता स्यात् । न चैवं, गौरवात् । किं तु पाकत्वेन, स तु कृतिं विना नेत्यन्यदेतत् । वह्निना साधयामीतिवत् कृत्या साधयामीतीच्छा इष्टसाधनताज्ञानादेवेति वत् । (२७) तर्हि तत्र वह्निसाध्यताज्ञानवदत्रापि कृतिसाध्यत्वज्ञानं कारणमावश्यकं, कृतौ चानुभवसिद्धं

भाव: । (१६) कृतिपूर्वमिति । एतेन स्वतन्त्रान्वयव्यतिरेकित्वमुक्तम् । सन्नन्तवाच्यत्वमप्युपपादयति । (१७) धातोश्चेति । तथा च यथौदनादिविशेष्यकभोजनप्रकारेच्छा बुभुक्षा, तथा पाकादिविशेष्यककृतिप्रकारकेच्छा चिकीर्षेत्यर्थ: । एवं च सनो धात्वर्थप्रकारकेच्छावाचित्वमिति भाव: । यद्यप्येवमपि कृतिप्रकारकत्वमायाति न तु कृतिसाध्यत्वप्रकारकत्वं तथाप्यत्र कृतिप्रकारकेच्छैव चिकीर्षा, साध्यत्वं च विषये वैशिष्ट्यमर्यादया भासतइत्याहु: । ननु तथाप्युक्तलाघवेन कृतीच्छैव कृतिहेतु: तस्यापि प्रमाणसिद्धत्वादित्यत आह । (१८) दृष्टेति । (१९) एकेति । एकविशेष्यकत्वेनेत्यर्थ: । यद्यपि गुरुमते ज्ञानादीनां नैकविषयत्वेन हेतुहेतुमद्भावस्तथापि परमतेनैतदुक्तमित्याहु: । स्वपक्षे दोषमपश्यन्नाह । (२०) अथेति । (२१) कृत्या, स्वकृत्या । (२२) विषयेति । स्वविषयसिद्धत्वज्ञानस्येत्यर्थ: । ज्ञानातिरिक्तेच्छायां तज्ज्ञानस्य तथात्वादित्याहु: । वस्तुत: सिद्धत्वज्ञानं नेच्छाविरोधि, किंतु विरोधिगुणान्तरमेव । परं तु तदा असिद्धत्वज्ञानाभावेन हेत्वभावादयमिच्छा न जायते । एवं च धनादावुत्पन्ने ऽपि तदसिद्धत्वभ्रमसंभवान्नेच्छाविच्छेद इति सिद्धत्वज्ञाने सत्येव विच्छेद: । न तथा ज्ञाने । अनुमितिज्ञाने तु ज्ञाते तदभावात् तत् स्वरूपसदेव संदेहनिवृत्तिप्रयोजकम् । अत एव सिद्धत्वज्ञानमपि स्वरूपसदेव तथेति भाव: । (२३) अस्ति चेति । पाकसिद्धतया स्वविषयसिद्धत्वम् । ओदनसिद्धतया फलेच्छाविच्छेद इति भाव: । ननु कृतिसाध्यत्वप्रकारकेच्छां विनापि कृतीच्छास्थले प्रवृत्तेरनुभूयमानत्वेन व्यभिचारादनन्यगत्या भिन्नविषयकेच्छाया अपि हेतुत्वं कल्प्यमित्यत आह । (२४) वस्तुतस्त्विति । ननु कथं भासतइत्यत आह । (२५) क्रियाद्वारैवेति । साक्षात्साधनत्वबाधे परंपरासाधनत्वमादायैव साधनत्वप्रतीतिरिति सिद्धान्तात् क्रियाद्वारत्वभाने तदुभयं भाति । तज्जन्यत्वे सति तज्जन्यजनकत्वस्यैव द्वारत्वादित्येके । क्रियानुकूला कृतिरित्यत्र समानसंवित्संवेद्यतया कृतिसाध्यत्वभानमित्यपरे । (२६) तथापीति । स्वकेदारवृष्टित्वज्ञानवत् कृतिसाध्यताज्ञानमिष्टसाधनोपक्षीणमिति भाव: । (२७) तर्हीति । अनन्यथासिद्धान्वयाद्यनुविधायित्वादिति

चिकीर्षाधीनत्वं विशेषः, तेन प्राणपञ्चकसंचारे (२८) जीवनयोनिकृतिसाध्ये न प्रवृत्तिः । अन्यथा कृतिसाध्येष्टसाधनतापक्षेऽपि तत्र प्रवर्त्तेत । (२९) ननु चिकीर्षाधीनत्वस्योपलक्षणत्वे उपलक्ष्यमात्रगतानतिप्रसक्तधर्माभावात् कृतिमात्रस्य चातिप्रसङ्गात्तत्तत्कृतिविशेषा उपलक्ष्याः, तथा च तदननुगमात्प्रवृत्त्यननुगमः । विशेषणत्वे चिकीर्षायां प्रवृत्तौ च चिकीर्षाज्ञानकारणत्वे गौरवं, (३०) प्रमाणाभावश्च । किं च चिकीर्षासाध्यावस्थायाः कृतेः सिद्धावस्थसाधनत्व(३१)विरोधेन कृतिसाध्यता पाकादौ न ज्ञायेतेति चेत् । न । अस्ति हि कृतिविशेषो मानसप्रत्यक्षसिद्धः जीवनयोनियत्नव्यावृत्तः चिकीर्षोपलक्ष्यः, यत्र चिकीर्षाकारणत्वग्रहः, (३२) स

भावः । (२८) जीवनयोनीति । ननु तद्धेतोरेवेति न्यायात् प्राणपञ्चकसंचारो जीवनादृष्टजन्य एव न तु तज्जन्यकृतिजन्य इति चेत् । अत्र वदन्ति । वायूदीरणत्वेन भस्त्रावायूदीरणवत् तस्यापि यत्नजन्यत्वानुमानात् । न च बाह्यवायूदीरणत्वेन व्यभिचारः, तस्यापीश्वरजन्यत्वादिति । तन्न । एवं हीश्वरयत्नेनैव प्रकृतेर्थान्तरं स्यात् । यदि जन्ययत्नजन्यत्वं साध्यं तदोक्तव्यभिचारानुद्धार एव । ईश्वरस्य परेणानङ्गीकाराच्च ॥ अन्ये तु धावतः प्रयत्नोत्कर्षेण श्वासक्रियोत्कर्षदर्शनात् श्वासक्रियात्वावच्छेदेन प्रयत्नजन्यत्वम् । सुषुप्त्यादिकाले च प्रयत्नान्तराभावात् तज्जन्यत्वम् । किं च समाधिस्थानां श्वासधारणे श्वासक्रियाप्रतिबन्ध इत्यविवादम् । जीवनादृष्टं तु तदापि लब्धवृत्ति, तथा च जीवनयोनिकृतिव्यतिरेकादेव तत्र श्वासक्रियाविरह इति तत्र तज्जन्यत्वमिति वदन्ति ॥ यद्यपि संचारोद्देशेन प्राणे प्रवृत्तिरापाद्या, सा च प्राणातीन्द्रियतया न संभवति, प्रवृत्तिविषयप्रत्यक्षस्य तद्धेतुत्वात्तथापि तन्मते प्राणस्य प्रत्यक्षत्वादिदमुक्तम् । अस्मन्मते तु प्राणवहनाड्यामतिप्रसङ्गो बोध्यः । न च मनोवहनाडीवत्तत्रेष्टापत्तिः, फलबलेन तत्रैव तथाभावात् । अस्यास्तु फलाभावेन फलवत्प्रवृत्तिविषयत्वायोगादित्याहुः ॥ ननु विषभक्षणादिव्यावर्त्तकं स्वविशेषणवत्ताप्रतिसंधानजन्यत्वं कार्यताज्ञाने विशेषणमावश्यकं तत एवोक्तातिप्रसङ्गवारणे चिकीर्षाधीनत्वविशेषणं व्यर्थमेवेति चेत्, न । अहं कृतिसाध्यप्राणपञ्चकसंचारो जीवित्वादित्याद्यनुमानसंभवात् । अत एव भ्रमेप्यतिप्रसङ्गवारणार्थं विशेषणोपादानमिति भावः । न च यत्कृतिसाध्यताज्ञानं ततः सा कृतिरिति जीवनयोनिकृतिसाध्यताज्ञानात्सैव कृतिरिति नोक्तातिप्रसङ्ग इति वाच्यम् । तादृशज्ञानं विनापि जीवनयोनिकृत्युत्पादेन व्यभिचारात्तस्यास्तज्ज्ञानाजन्यत्वात् । तस्मात् प्रयत्नरूपकृतिविशेषं प्रत्येव तज्ज्ञानस्य हेतुत्वं तत्र चातिप्रसङ्गनिरासाय चिकीर्षाधीनत्वं विशेषणमावश्यकम् ॥ अत्रवदन्ति । कृतिसाध्यताधीरेव हेतुर्न तु कृतावुक्तविशेषणापेक्षा । तथाहि, चिकीर्षाधीनकृतिसाध्यताज्ञानस्य हेतुत्वेपि प्रकृते चिकीर्षाधीना कृतिरयोग्यैव विषयस्वाभाव्यादित्येव बीजम् । तथा च कृतिसाध्यताधीरेव चिकीर्षाधीनकृतौ कारणम् । तथा च तथा ज्ञानेप्युक्तस्थले चिकीर्षाधीनकृतिरयोग्यत्वादेव नोत्पद्यते । न चान्वयव्यभिचारः । तादृशविषयविलम्बादेव विलम्बात् । अन्यथा भ्रमेण चिकीर्षाधीनकृतिसाध्यताज्ञाने चिकीर्षायामपि प्राणपञ्चकसंचारे प्रवृत्त्यापत्तेर्वज्रलेपायमानत्वात् । ननु चिकीर्षाधीनत्वं न ज्ञातं तन्त्रं येन चिकीर्षाधीनकृत्यसाध्यमपि तादृशकृतिसाध्यत्वेन बुध्येतेति कथं भ्रमन्निबन्धनोतिप्रसङ्ग इति चेन्न । चिकीर्षाधीनत्वेनोपलक्षितकृतिविशेषासाध्यस्य प्राणपञ्चकसंचारादेस्तत्साध्यत्वभ्रमसंभवात् । अन्यथा सुखेतिप्रसङ्गभङ्गायोपायविषयत्वविशेषणप्रवेशापत्तेः । न चान्वयव्यभिचारः । सिद्धे इच्छाभाव इव विषययोग्यताविलम्बादेव बिलम्बात् । न च तत्रासिद्धत्वज्ञानविलम्बाद् विलम्ब,स्तद्वदिहापि तादृशविषययोग्यताज्ञानहेतुत्वौचित्या,देवं भ्रमे ऽतिप्रसङ्गवारणाय स्वपदप्रवेशोप्यनावश्यकः । तस्य तादृशकृत्ययोग्यत्वादिति ॥

अत्र ब्रूमः । स्वेच्छाधीनकृतिसाध्यताज्ञानं प्रवर्तकमित्यग्रे स्फुटम् । स्वेच्छाधीनत्वं च न ज्ञातं तन्त्रं, किं तु स्वरूपसत् । एवं च वस्तुगत्या स्वेच्छाधीना या कृतिः तत्साध्यताज्ञानस्य प्रवर्तकत्वे प्राणपञ्चकसंचारस्थले तादृशकृतेरसिद्धतया तद्भ्रमासंभवेन तन्निबन्धनातिप्रसङ्गाभावात् । एवं च यथाश्रुतेनैवोपपत्तौ कृतिसाध्यताज्ञाने ऽवच्छेदककल्पनैवातिप्रसङ्गनिरासाय युज्यते, न तु तादृशकृतिविषययोग्यताज्ञानरूपहेत्वन्तरकल्पनं, गौरवादिति मन्तव्यम् । न च सुखे ऽतिप्रसङ्गनिरासाय तस्यावश्यकत्वमिति वाच्यम् । उपायेच्छाधीनकृतितः सुखसंभवे तत्रापि स्वेच्छाधीनकृतेरसिद्धतया तादृशज्ञानासंभवेनातिप्रसङ्गाभावात् । यथा फलज्ञानं फलेच्छा वा न प्रवर्तिका तथोक्तं प्रत्यक्षप्रकाशे । अस्तु वा स्वचिकीर्षाधीनत्वं विशेषणम् । सुखचिकीर्षाजन्या न कृतिरित्यग्रे स्फुटत्वादिति । तटस्थः शङ्कते । (२९) नन्विति । ननु सप्रमाणकत्वाद्ग्राह्यमित्यत आह । (३०) प्रमाणेति । (३१) विरोधेनेति । तत्साध्यत्वभाने समानसंवित्संवेद्यतया साधनत्वभानमिति भावः । ननु को धर्मस्तत्कार्यतावच्छेदक इत्यत आह । (३२)

च तवापि जातिरूपो (३३) मम (३४) त्वनुगतकारणोपाधिरूपः। (३५) एवं च चिकीर्षाधीनत्वेनानुगतेन कृतिविशेषाणामुपलक्ष्याणामनुगतत्वमपि। (३६) यथा गोत्वेन तटस्थेनोपलक्षिता महिष्यादिव्यावृत्तधानकर्मव्यक्तिविशेषा धेनुपदेनोच्यन्ते, न तु गोत्वमपि, तथा चिकीर्षापि। एवं जीवनयोनियत्नव्यावृत्तकृतिविशेषाणां कृतित्वेन ज्ञानं कारणमिति नाननुगमः। ननु कृतिसाध्ये न कृतिर्विशेषणम्, असत्त्वात्, सत्त्वे वा कृतौ सत्यां ज्ञानं, ज्ञाने च कृतिरित्यन्योन्याश्रयः। नोपलक्षणमतिप्रसङ्गादिति चेत्। न। कृतिर्हि ज्ञाने विषयतया विशेषणमेव। साध्ये च परिचायकतयोपलक्षणम्। अन्यथा इष्टसाधनेपि इष्टं न विशेषणमसत्त्वात्। नोपलक्षणमतिप्रसङ्गात्। (३७) लिङ्गज्ञानादौ वा का गतिः। नन्वेवं भोजनादिनान्तरीयकश्रमेपि चिकीर्षा स्यात्, तस्यापि चिकीर्षाधीनकृतिसाध्यत्वात्। (३८) अत्र श्रमस्तु भोजनादिक्रियासाध्यो, न तु तत्कृतिसाध्योऽचिकीर्षितत्वात्। (३९) कृतेः स्वध्वंससाक्षात्कारातिरिक्ते (४०) चिकीर्षा-

स चेति। (३३) ममेति। गुणगतजात्यनङ्गीकर्तुरित्यर्थः। (३४) अनुगतेति। अनुगतकारणे चिकीर्षालक्षणे उपाधिरूपस्तत्तद्व्यक्तित्वरूप इति यावत्। कार्यतावच्छेदकस्याननुगतस्यादोषत्वात्। न त्वनुगतकारणघटित उपाधिः चिकीर्षाजन्यत्वलक्षण इत्यर्थः। तज्जन्यत्वे ग्राह्ये तज्जन्यत्वस्यानवच्छेदकत्वात्। यत्तु अनुगतकारणप्रयोज्यानुगतोपाधिरूप इत्यर्थ इति। तन्न। तस्यैवानुगतत्वे चिकीर्षाधीनत्वेनानुगतत्वमित्यग्रिमग्रन्थविरोधात्। एवं पूर्वोक्ताननुगममुद्धरति। (३५) एवं चेति। यथा धूमत्वावच्छेदेन वह्निजन्यत्वग्रहेपि धूमालोकादीनां वह्निजन्यत्वमनुगतं तथा तत्तत्कृतित्वाद्यवच्छेदेन चिकीर्षाजन्यत्वग्रहेपि चिकीर्षाजन्यत्वं सर्वानुगतमित्यर्थः। नन्वेवं चिकीर्षापि लिङादिपदशक्या स्यादित्यत आह। (३६) यथेति। (३७) लिङ्गज्ञानादाविति। अतीतलिङ्गज्ञानादावित्यर्थः। नन्वेवं श्रमेपि चिकीर्षाधीनकृतिसाध्यताज्ञानात् प्रवर्त्ततेत्यत्र कस्यचित्समाधानमाह। (३८) श्रमस्त्विति। नन्वचिकीर्षितमपि तथास्त्वित्यत आह। (३९) कृतेरिति। कृतित्वेन जनकत्वे नियमोऽयमित्यत्र स्वध्वंसेत्यादेस्तात्पर्यम्। तेन स्वाश्रयवृत्तिगुणान्तरध्वंसे विरोधिगुणत्वेन कृतेर्जनकत्वेऽपि न दोषः। यद्यप्येवमप्यदृष्टादिकं प्रति कृतित्वेन कृतेर्जनकत्वाद्व्यभिचार एव तथापि तद्भिन्नत्वेनापि विशेषणीयमिति भावः। (४०) चिकीर्षेति। स्वजनकचिकीर्षाविषयमात्रइत्यर्थः। अप्रयोजकत्व-

विषयमात्रे जनकत्वात्। (४१) नहि भोजनादिचिकीर्षाधीनकृत्या गमनं साध्यतइति केचित्। तन्न। गुरुतरभारोत्तोलने कृत्यसाध्ये भ्रमात् प्रवृत्तस्य (४२) निगडनिश्चलदेहस्य वा कृतौ सत्यामुत्तोलनचलनक्रियानुत्पादेपि श्रमानुभवात् कृतेरेव कारणत्वात्। न तु तज्जन्यक्रियायाः। (४३) सुखे व्यभिचाराच्च। (४४) नहि सुखं कृतिकारण(४५)चिकीर्षाविषयः। उपायचिकीर्षाजन्या हि कृतिः न तु सुखचिकीर्षाजन्या। चिकीर्षाजन्यकृतिसाध्यत्वं न श्रमे, द्वेषयोनियत्नादपि तदुत्पत्तेरित्यपरे। तन्न। (४६) शत्रुवधस्येष्टसाधनत्वेन चिकीर्षाजन्यकृतिसाध्यत्वाद् द्वेषस्य यत्नाजनकत्वात्। द्वेषसिद्धिस्तु शत्रुं द्वेष्मीत्यनुभवबलात्। यत्तु श्रमः कृतित्वेन कृतिसाध्यो न चिकीर्षाधीनकृतित्वेन, यद्यचिकीर्षितेपि श्रमे चिकीर्षाधीनकृतित्वेन कारणता स्यात्तदा चिकीर्षितमेव भोजनं कृत्या साध्यते नाचिकीर्षितं गमनादीति न स्यात्। श्रमवद्गमनेपि तज्जन्यत्वप्रसङ्गात्। भोजनादिश्च चिकीर्षाधीनकृतिविशेषात्। स हि कृतिमात्रं व्यभिचरति जीवनयोनिकृतेस्तदनुत्पादात्। यद्वा श्रमो न भोजनकृतिसाध्यः, किं तु तन्निरन्तरोत्पन्नाज्जीवयोनियत्नादेवेति। (४७) तन्न। नहि कृतित्वेन श्रमजनकत्वं, नापि कृत्यन्तरादेव श्रमो-

निरासायाह। (४१) नहीति। ननु तत्राप्यङ्गचालनक्रियाजन्यः श्रम इत्यरुचेराह। (४२) निगडेति। आमवातजडीकृतकलेवरस्योत्थातुकामस्येत्यपि बोध्यम्। उक्तव्याप्तौ व्यभिचारमाह। (४३) सुखइति। तस्य स्वजनकचिकीर्षाविषयत्वाभावादिति भावः। तदेवाह। (४४) नहीति। तत्रैवान्येषां समाधानमाह। (४५) चिकीर्षेति। (४६) शत्रुवधस्येति। प्रतियोगिविषयद्वेषस्य भिन्नविषयतया गौरवेणाप्रवर्त्तकत्त्वात्, किं तु लाघवेन समानविषयकेच्छाया एव। नन्वेवं तन्निवृत्तौ द्वेष एव हेतुरुक्तयुक्त्येति चेत्। न। इष्टत्वात्। तदुक्तं कुसुमाञ्जलौ, रागद्वेषविनाभावेपीत्यादि। न च निवृत्तिप्रयत्नेनापि श्रमे पूर्वपक्षतादवस्थ्यमिति वाच्यम्। निवृत्तिप्रयत्नस्य क्रियां प्रत्यजनकत्वेन तच्छ्रमजनकत्वस्य शङ्कानास्कन्दतया प्रवृत्तिहेतुत्वस्यैव द्वेषे शङ्कितत्वादित्याहुः। वस्तुतस्तु प्रवृत्तिविरह एव निवृत्तिः, तथा च प्राचीनमते ऽनुशयप्रकाश एवायं ग्रन्थकृत इति प्रपञ्चितमस्माभिरनुमानप्रकाशे। उभयमपि दूषयति। (४७) तन्नेति। कृत्यन्तरात्, जीवनयोनियत्नात्। उभयहेतुमाह।

त्पत्तिः (४८) जीवनयोनियत्ने सत्यपि भारोद्वहनादिकमकुर्वतस्तादृशश्रमानुभवेन (४९) तस्य श्रमाजनकत्वात्। तस्माद्भोजनादिवत् श्रमविशेषाणामपि भोजनादिकृतिसाध्यत्वमनन्यगतिकत्वात्। सुप्तस्य स्वेदाद्यनुमितः श्रमस्तज्जन्य इति चेत्। न। स्वेदादेः श्रमान्यहेतुकत्वात्। (५०) अन्यथा जागरेऽपि (५१) तदनुवृत्तौ श्रमानुवृत्तिप्रसङ्गादिति। (५२) मैवम्। स्वेच्छाधीनत्वस्य कृतिविशेषणत्वात्। (५३) श्रमश्च नियमतोऽन्येच्छाधीनकृतिसाध्यः, श्रमे दुःखत्वेनेच्छाविरहात्। अत एवान्येच्छाजन्यकृतिसाध्यत्वेन श्रमो नान्तरीयक इत्युच्यते। (५४) स्वचिकीर्षाधीनत्वं तु न कृतौ विशेषणं, (५५) गौरवात्। अन्ये तु कृतिगतं (५६) धर्मान्तरमेवोद्देश्यत्वं तद्विशिष्टकृतिसाध्यश्च न श्रमः। (५७) अचिकीर्षितत्वात्। किं तु कृतिमात्रसाध्यः। (५८) अत एव कष्टं कर्मेत्यनुभवो लोकानाम्। (५९) एवं चिकीर्षायां ममैकं कृतिसाध्यत्वं प्रयोजकं, तव तु कृतिसाध्यत्वे सति इष्टसाधनत्वं सुखत्वं दुःखाभावत्वं चेति (६०) चतुष्टयम्। इच्छाप्रयोजकं तु मम सुखत्वं दुःखाभावत्वं चेति (६१) द्वयम्। (६२) वृष्टिसाध्ये सुखे हीच्छा वृष्टिमपि विषयीकरोति, न त्विष्टसाधनत्वेन तत्र इच्छासाधनत्वस्येच्छाविरोधित्वात्। तव तु त्रयम्। (६३) विषभक्षणे कृतिसाध्यत्वेऽपि बलवदनिष्टसाधनत्वेन चिकीर्षा नास्तीति कृतौ चिकीर्षाजन्यत्वं विशेषणमिति कश्चित्। तत्तुच्छम्। (६४) एवं हि विषभक्षणं कृतिसाध्यमेव न स्यात्। जीवनयोनिकृतेस्तस्यानुत्पत्तेरिति व्यर्थं विशेषणम्। स्यादेतत्। इष्टसाधनताभ्रमाद्विषभक्षणे चैत्यवन्दने च चिकीर्षाजन्यकृतिसाध्यत्वमस्ति, ज्ञानप्रयुक्तत्वात्कार्यत्वस्य। तथा च संजातबाधोऽपि तत्र कार्यत्वज्ञानात्प्रवर्त्तेत, तथा तृप्तोऽपि (६५) भोजने। ननु कृतिसाध्यतानुभवस्तथा। अन्यथेष्टसाधनतास्मरणे विषभक्षणेऽपि प्रवर्त्तेत। न चेष्टसाधनताज्ञानं वेदो वाऽनुभावकमस्तीति चेत्, न। (६६) वस्तुतस्तत्र कृतिसाध्यत्वे लिङ्गान्तरेणाप्तवाक्येन वा तदनुभवसंभवात्। लिङ्गाभासाच्छब्दाभासाद्वाऽप्रवृत्तिप्रसङ्गाच्च। (६७) भेदाग्रहवादिनस्तत्र तव तदनुभवाभावात्।

(४८) जीवनयोनीति। यद्यपि चिकीर्षाधीनकृतिमात्रादपि न श्रम इति कृतिविशेषस्तादृशो वाच्यस्तथा च जीवनयोनिकृतिविशेष एव तथास्त्विति नायं परिहारस्तथापि चिकीर्षाधीनकृतौ क्रियाविशेषरूपविषयवैलक्षण्यात् ततः श्रमो, न च जीवनयोनिप्रयत्ने तथेति वैषम्यमित्याशयः। तादृशेति संपातायातं, श्रमाननुभवेनेत्येव विवक्षितम्। (४९) तस्येति। जीवनयोनिप्रयत्नस्येत्यर्थः। श्रमहेतुत्वे किं बाधकमत आह। (५०) अन्यथेति। (५१) तदनुवृत्तौ, स्वेदानुवृत्तौ। स्वकारणीभूतश्रमानुवृत्तिप्रसङ्गादित्यर्थः। जीवनयोनियत्नानुवृत्तौ तज्जन्यश्रमानुवृत्तिप्रसङ्गादित्यर्थ इत्यन्ये॥ एकदेशिनां समाधानं निरस्य स्वयं समाधत्ते। (५२) मैवमिति। (५३) श्रमश्चेति। इष्टसाधनीभूत इत्यर्थः। इष्टसाधनीभूतश्च मल्लादेः श्रमः स्वेच्छाधीनकृतिसाध्यः प्रवृत्तिविषयश्चेतिभावः। न च फलेच्छाया हेतुत्वात्तां विना कथं श्रमे प्रवृत्तिरापाद्यतइति वाच्यम्। तस्या इष्टसाधनतालिङ्गोपक्षीणत्वेनाहेतुत्वात्। अन्यथा तन्मते नित्ये प्रवृत्तिर्न स्यात्। फलेच्छायास्तत्राभावादिति भावः। (५४) स्वचिकीर्षेति। यद्यपि प्रवर्त्तकं ज्ञानं न स्वेच्छाधीनत्वं चिकीर्षाधीनत्वं वाऽवगाहते किं तु तदुपलक्ष्यकृतिविशेषे वस्तुत एतदुभयमस्तीति किं लाघवेन। तथापि कारणताग्राहकेणावच्छेदकतया तत्र धर्मान्तरमवश्यं ग्रहीतव्यमिति तत्र लाघवावतार इति भावः। (५५) गौरवादिति। कृतिसाध्यत्वप्रकारकत्वभागप्रवेशादिति भावः। (५६) धर्मान्तरम्, अनित्यम्। (५७) अचिकीर्षितत्वादिति। चिकीर्षितस्यैव तादृशकृतिसाध्यत्वाभ्युपगमादिति भावः। (५८) अत एवेति। यत एव कृतिमात्रसाध्यः श्रमोऽत एव कर्मेकार्यजातं कष्टं श्रमसंवलितमिति सार्वलौकिकोऽनुभव इति भावः। धर्मान्तरकल्पने गौरवमिति विपरीतं, तदाह। (५९) एवमिति। (६०) चतुष्टयमिति। सत्यन्तं सर्वत्रान्वितं कृतिसाध्यत्वमादाय चतुष्टयत्वं बोध्यम्। भोगेऽपि चिकीर्षासंभवमादायैव चतुष्टयत्वमित्यन्ये। (६१) द्वयमिति। भोगेच्छाभ्युपगमे भोगत्वमपि बोध्यम्। नन्वेवं वृष्टाविच्छा न स्यादित्यत आह। (६२) वृष्टीति। सुखेच्छायां सुखत्वमिवावच्छेदकतया वृष्टिरपि विषय इति भावः। प्रवर्तकज्ञाने चिकीर्षाधीनत्वप्रयोजनं कैश्चिदुक्तं तदुपन्यस्य निराकरोति। (६३) विषेति। (६४) एवं हीति। द्वेषयोनिप्रयत्नस्तु नास्त्येव तत्सत्त्वे वा ततोऽपि तदनुत्पत्तेः। तस्य निवृत्तिरूपत्वादिति भावः। तथा विषभक्षणव्यावृत्त्यर्थं तद्विशेषणं ततस्तद्व्यावृत्त्यभावादिति भावः। भ्रमादिति नैयायिकमतेन। (६५) भोजनइति। न च फलेच्छाविच्छेदः प्रतिबन्धक इति वाच्यम्। तस्याः प्रवृत्तिजनकज्ञानोपक्षीणत्वात्। अन्यथा तन्मते नित्ये प्रवृत्तिर्न स्यादित्याशयात्। आद्यप्रवृत्तौ व्यभिचार इति दूषणमन्ये च दोषान्तरमाह। (६६) वस्तुत इति। (६७) भे-

मैवम् । (६८) स्वविशेषणवत्ताप्रतिसंधानजन्यं हि कार्यताज्ञानं प्रवर्त्तकम् । तथाहि । काम्ये पुरुषविशेषणं कामना, ततः काम्यसाधनताज्ञानेन यागपाकादौ कार्यताज्ञानम् । नित्ये च कालशौचादिस्वविशेषणं, तथा चे(६९) तत्संध्यायामहं कृतिसाध्यसंध्यावन्दनः, (७०) संध्यासमये शौचादिमत्त्वात्, पूर्वसंध्यायामहमिवेति कार्यताज्ञानं शौचादिस्वविशेषणज्ञानजन्यम् । तदुक्तम् । स कार्यविशेषः (७१) पुरुषविशेषणावगतः प्रवृत्तिहेतुरिति । संजातबाधस्य च विषभक्षणे चैत्यवन्दने च भ्रमदशायामिव नेष्टसाधनताज्ञानमस्ति येन तज्जन्यकार्यताज्ञानात्प्रवर्तेत । तृप्तस्य च तृप्तौ कामनाविरहेणेष्टसाधनताज्ञानाभावान्न तथा बोधः । अन्ये त्वात्मनो जीवित्वप्रतिसंधानजन्यं श्रमे कृतिसाध्यताज्ञानं संभवतीति जीवनव्यतिरिक्तत्वं स्वविशेषणे विशेषणमिति । तन्न । श्रमे स्वेच्छाधीनकृतिसाध्यताभावात् । इष्टसाधनतालिङ्गकं कार्यताज्ञानं प्रवर्तकमित्यपरे । तन्न । (७२) नित्ये तदभावात् ॥

दायहेति । तथा च स्मृतिसाधारणं कृतिसाध्यताज्ञानमेव हेतुस्तच्चास्त्येवेति प्रवृत्त्यापत्तिरिति भावः । न च भावियौवराज्यातिप्रसङ्गनिरासायेदानीं कृतिसाध्यताज्ञानं प्रवर्त्तकं, स्मरणे चानुभवगोचरकालविशेषस्याभानात्कथं प्रवृत्त्यापत्तिरिति वाच्यम् । स्मृत्यापि स्वकालस्यानुभवगोचरस्यैव ज्ञानसामान्यसामग्रीमहिम्ना विषयीकरणात् । अतीताद्यगोचरज्ञानस्य वर्त्तमानसमानविषयतानियमादित्याहुः । (६८) स्वविशेषणवत्तेति । स्वस्य प्रवर्त्तमानपुरुषस्य यद्विशेषणं कामनादि तद्वत्ता तद्वर्त्तमानता तत्प्रतिसंधानजन्यमित्यर्थः । नन्वाद्यप्रवृत्तौ कार्यतास्मरणस्य हेतुत्वात् तस्य च तत्प्रतिसंधानाजन्यत्वाद् व्यभिचारः । एवं भेदाग्रहवादिनो विसंवादिप्रवृत्तावपि तथा । न च परंपरया पूर्वानुभवद्वारा तत्प्रतिसंधानजन्यत्वाच्च तथेति वाच्यम् । एवं हि संजातबाधस्यापि कार्यतास्मरणाद्विषभक्षणे प्रवृत्त्यापत्तेरिति चेत् । न । तदतिरिक्तस्थले हेतुत्वादित्येके । अन्ये तु अनाद्यप्रवृत्तौ तद्धेतुः, विसंवादिप्रवृत्तिस्थलेपि स्वतन्त्रकार्यत्वस्मृतिरूपस्य इष्टसाधनत्वरूपतत्प्रतिसंधानाधीनत्वादित्याहुः ॥ अपरे त्वाद्यप्रवृत्तावपि स्मरणरूपेष्टसाधनत्वरूपतत्प्रतिसंधानाधीनं मत्कृतिविशेषसाध्यमिति ज्ञानं प्रवर्तकं, तच्च न स्मृतिरूपं, पूर्वं तादृशानुभवाभावात् । किं तु व्याप्त्यादिस्मृतौ सत्यामिष्टसाधनतालिङ्गकमेव तत्र कार्यताज्ञानम् । न चैवमयिमग्रन्थविरोधः । तस्य मतान्तरेणाभिधानादित्याहुः ॥ नन्वहं कृतिसाध्यविषभक्षणः पुरुषत्वादित्यादिना तादृशकार्यताज्ञानं संजातबाधस्याप्यस्तीत्यतिप्रसङ्ग इति चेत् । अत्र वदन्ति । मदीयेदानींतनेच्छाविषयसाधनत्वशुचित्वसमानाधिकरणविहितकालजीवित्वप्रतिसंधानात्मकविशेषद्वयसामग्रीसहितस्यैव तस्य जनकत्वं, न चेदमुभयं विषभक्षणादावस्तीति । एवं स्वविशेषणवत्ताप्रतिसंधानजन्यत्वात्सर्वस्यैव कार्यताज्ञानस्य सामान्यसामग्रीत्वमित्यत्र किं मानमिति चिन्त्यम् ॥ के चित्तु यस्मिन्विशेषणे सति अननुष्ठाने ऽनिष्टावाप्तिरिष्टहानिर्वा तदिह विवक्षितं, कामनायां सत्यामननुष्ठाने दृष्टस्यौदनादेर्हानिः । एवं शौचे ऽननुष्ठाने पापावाप्तिः । पुरुषत्वादिकं तु न तथेति नोक्तातिप्रसङ्ग इत्याहुः । तदपि चिन्त्यम् । इष्टहान्यादेरननुगमेन विशेषणस्याननुगमात् । यदि चान्यतरत्वादिना तदनुगमस्तदा कामनाद्यन्यतरप्रतिसंधानजन्यत्वमेवास्तु लाघवात् । यदि चान्यतरत्वं न कारणतावच्छेदकमविष्टमन्यथा गुणाद्यन्यतमत्वेनापि हेतुत्वं स्यादिति मन्यसे तदा तुल्यमिति । वस्तुतः स्वविशेषणवत्ताप्रतिसंधानजन्यत्वेन हेतुत्वमिति न प्रकृतग्रन्थार्थः, किं तु तज्जन्यमित्येव, तथा च प्रवृत्तिसामान्ये कार्यताज्ञानत्वेन हेतुता, काम्यनित्ययोश्च विशेषसामग्रीद्वयमिति । एवं चाद्ये स्वेच्छाधीनत्वेन श्रमे समाधानमभ्युपगमवादेनेति मन्तव्यम् । नित्ये चेत्युपलक्षणं, नैमित्तिकेपि शौचादिमत्त्वे सति निमित्तवत्त्वं तथेति ध्येयम् । (६९) एतत्संध्यायामिति । इदं तु प्राथमिकमनुमानं, नत्वेतदेव प्रवर्त्तकं, प्रवृत्तिविशेष्यकज्ञानस्यैव प्रवर्त्तकत्वात्, किं तूक्तानुमाने सति संध्योपासनमिदानीं मत्कृतिसाध्यं मत्कृतिनिष्ठहेतुताप्रतियोगिककार्यताधिकरणत्वात्, इत्यनुमानम् । न च सिद्धिः । एकवित्तिवेद्यतया प्रथमानुमानेन तद्ग्रहात् । अत एव प्राक्तदपेक्षा । उक्तानुमानानन्तरं तद्विशेष्यकं मानसमेव वा ज्ञानं प्रवर्त्तकमित्याहुः । तच्चिन्त्यम् । तस्य स्वविशेषणवत्ताप्रतिसंधानाजन्यत्वेनाप्रवर्त्तकत्वात्, परंपरया तज्जन्यत्वस्यातिप्रसक्तत्वात् । तस्मादेतन्मते ज्ञानमात्रस्यैवात्मविशेषणतया भिन्नविशेष्यकस्यापि प्रवर्त्तकत्वमित्येव तत्त्वमिति । (७०) संध्येति । यथा हेतुर्न व्यभिचारी तथा कार्यः । न च नित्ये वेदाधीनकार्यताज्ञानस्यैव प्रवर्त्तकतया नैतदनुमानापेक्षेति वाच्यम् । तस्य विशेषणवत्ताप्रतिसंधानाजन्यत्वेनाप्रवर्त्तकत्वात् । इदानींतनत्वादेस्तत्राभावाच्च, एवं च नित्ये वेदाधीनकार्यताज्ञानं प्रवर्त्तकमिति मतान्तरेण बोध्यम् । (७१) पुरुषेति । पुरुषविशेषणं कामनादि । क्व चित्पुरुषविशेषेति पाठः । तत्र स्वविशेषणवत्ताप्रतिसंधानवत्त्वं पुरुषे विशेषः । (७२) नित्यइति । फलापूर्वं नेष्टमिति भावः ।

॥ अथ वेदान्तसूत्रशैवभाष्यप्रथमाध्यायस्य ॥

॥ चतुर्थपादारम्भः ॥

पूर्वपादे स्पष्टास्पष्टब्रह्मलिङ्गानि वाक्यानि विचारितानि । चतुर्थेऽस्मिन् पादेऽस्पष्टलिङ्गानि कानिचिद्वाक्यानि विचार्यन्ते ॥

॥ आनुमानिकमप्येकेषामिति चेन्न, शरीररूपकविन्यस्तगृहीतेर्दर्शयति च ॥ १ ॥

एकेषां कठानां शाखायामाम्नायतेऽस्य विषयः ।

"इन्द्रियेभ्यः परा ह्यर्था अर्थेभ्यश्च परं मनः ।
मनसस्तु परा बुद्धिर्बुद्धेरात्मा महान् परः ॥
महतः परमव्यक्तमव्यक्तात् पुरुषः परः ।
पुरुषान्न परं किंचित् सा काष्ठा सा परा गतिः" ॥

इत्यादिकः । अत्र महतः परत्वेनाव्यक्तशब्दवाच्यं प्रधानं कापिलमुत शरीरं वेति संशयः । प्रधानमिति युक्तिः पूर्वपक्षीया ।? कथम् । महदव्यक्तपुरुषाणां सांख्यतन्त्र एव प्रसिद्धेः । तेषामिह श्रुतौ प्रत्यभिज्ञा भवति । वपुषो न कश्चिदिह प्रसङ्गः । तस्मात् सांख्यं प्रधानमिति । वपुरिति सिद्धान्तोऽयुक्तः । पूर्वत्र

"आत्मानं रथिनं विद्धि शरीरं रथमेव तु ।
बुद्धिं तु सारथिं विद्धि मनः प्रग्रहमेव च ॥
इन्द्रियाणि हयानाहुर्विषयांस्तेषु गोचरान्" ।

इत्यात्मशरीरादिषूपासनोपायेषु वशीकार्यत्वाय रथिरथादिरूपकविन्यस्तेषु परिशिष्टस्य शरीराख्यरूपकस्य विन्यस्तस्याव्यक्तशब्देन गृहीतेः । "इन्द्रियेभ्यः परा ह्यर्था," इत्यारभ्य "सा काष्ठा सा परा गतिः," इत्यन्तेन वशीकार्यत्वाय ह्युत्तरोत्तरं परा उच्यन्ते । "यच्छेद्वाङ्मनसी प्राज्ञस्तद्यच्छेज्ज्ञान आत्मनि । ज्ञानमात्मनि यच्छेत तद्यच्छेच्छान्त आत्मनि" ॥

इत्यादिना श्रुतिरेवोत्तरत्र च दर्शयति । ततोऽव्यक्तं वपुरत्र प्रतिपाद्यम् ॥ १ ॥

ननु प्रधानमेवाव्यक्तमिति प्रसिद्धम् । कथमिह शरीरमित्याशङ्कायामाह ॥

॥ सूक्ष्मं तु तदर्हत्वात् ॥ २ ॥

सूक्ष्ममित्यव्यक्तमुच्यते । अव्यक्तमेव शरीरावस्थं कार्यात्मतयाव्यक्तशब्दवाच्यमिति युक्तम् ॥ २ ॥

युक्त्यन्तरमुच्यते ॥

॥ तदधीनत्वादर्थवत् ॥ ३ ॥

आत्मशरीरादिकं परमेश्वराधीनतयार्थवदुपासनानिर्वृत्तये भवति । परमेश्वरोऽन्तर्यामी सर्वमात्मादिकं प्रेरयन्नेव चोपासनोपायत्वेन वशीकार्यकाष्ठाप्राप्यत्वेन

"सा काष्ठा सा परा गतिः"

इत्युच्यते । ततोऽव्यक्तमिह शरीरमेव ॥ ३ ॥

॥ ज्ञेयत्वावचनाच्च ॥ ४ ॥

यदि सांख्यं प्रधानमत्राव्यक्तं, तदास्य ज्ञेयत्वमुच्येत । न च तदस्ति । ततो न कापिलमव्यक्तम् ॥ ४ ॥

ज्ञेयत्वमप्यस्यात्रास्तीत्याशङ्क्य परिहरति ॥

॥ वदतीति चेन्न प्राज्ञो हि प्रकरणात् ॥ ५ ॥

अशब्दमस्पर्शमरूपमव्ययं
तथा रसं नित्यमगन्धवच्च यत् ।
अनाद्यनन्तं महतः परं ध्रुवं
निचाय्य तं मृत्युमुखात् प्रमुच्यते ॥

इत्यारभ्यास्यापि निचाय्यतां वदतीति चेन्न युक्तं; "यच्छेद्वाङ्मनसी प्राज्ञ"इति प्राज्ञस्यैव पूर्वं प्रकृतत्वात् ॥ ५ ॥

ततोऽव्यक्तं शरीरमेव । प्रधानस्य प्रसङ्ग एव नास्तीत्याह ॥

॥ त्रयाणामेव चैवमुपन्यासः प्रश्नश्च ॥ ६ ॥

त्रयाणामुपास्योपासनोपासकानामेवात्र प्रकरणे ज्ञेयतया प्रश्न उपन्यासश्च क्रियते, न प्रधानादेः । यथा,

"तं दुर्दर्शं गूढमनुप्रविष्टं
गुहाहितं गह्वरेष्ठं पुराणम् ।
अध्यात्मयोगाधिगमेन देवं
मत्वा धीरो हर्षशोकौ जहाति" ॥

इत्यादिरुपन्यासः । "येयं प्रेते विचिकित्सा मनुष्ये अस्तीत्येके नायमस्तीति चैके एतद्विद्यामनुशिष्टस्त्वयाहं वराणामेष वरस्तृतीय" इति, "अन्यत्र धर्मादन्यत्राधर्मादन्यत्रास्मात् कृताकृतात् । अन्यत्र भूताच्च भव्याच्च यत् तत् पश्यति तद्वद"इति प्रश्नः । तस्मादप्रकृतत्वादपि शरीरमेवाव्यक्तं न प्रधानम् ॥ ६ ॥

किंच, लिङ्गान्तरमप्यस्तीत्याह ॥

॥ महद्वच्च ॥ ७ ॥

यथेह

"बुद्धेरात्मा महान् पर"

इत्यत्र न तान्त्रिको महान् भवति, आत्मशब्दादपि न प्रधानमिति निर्णयः ॥ ७ ॥

अप्रकृतत्वादिह न प्रधानप्रस्ताव इति भवतु । अन्यत्र प्रधानमेव कारणत्वेन श्रूयत इत्याशङ्क्याधिकरणमिदमारभ्यते ॥

॥ चमसवदविशेषात् ॥ ८ ॥

श्वेताश्वतरोपनिषदि श्रूयतेऽस्य विषयः ।

"अजामेकां लोहितशुक्लकृष्णां
बह्वीः प्रजाः सृजमानां सरूपाः ।
अजो ह्येको जुषमाणोऽनुशेते
जहात्येनां भुक्तभोगामजोऽन्यः" ॥

इति । इह सर्वप्रपञ्चकारणत्वेन जन्मरहितत्वादजेति श्रूयमाणा प्रकृतिः सांख्यसिद्धा परा वेति संशये सांख्यसिद्धेति नक्तुं युक्तम्, "अजाम्" इति जन्माभाववचनात्, सर्वप्रजाकारणत्वाच्च, "लोहितशुक्लकृष्णाम्" इति वर्णोपलक्षितगुणत्रयावगमाच्च; तदन्यस्याः कस्याश्चिदेवंविधत्वं न युक्तमिति प्राप्ते सिद्धान्त उच्यते । न तन्त्रसिद्धा प्रकृतिरिह कारणत्वेनोच्यते । नहि जन्माभावमात्रेण तस्या एव प्रतीतिः । अर्वाग्बिलश्चमस इतिवत् प्रकरणविशेषाभावात् । यथा इदं तच्छिर इति चमसो विशेष्यते । यौगिकशब्दाद्विशेषप्रतीतिर्हि विशेषकापेक्षा । ततो न तान्त्रिकी प्रकृतिरिति ॥ ८ ॥

तन्त्रसिद्धायाः प्रकृतेरन्या कीदृशीत्यत आह ॥

॥ ज्योतिरुपक्रमात् तु तथा ह्यधीयत एके ॥ ९ ॥

ज्योतिरिति परमेश्वर उच्यते । परमेश्वरकारणिकेयमजा प्रकृतिरित्युच्यते । तथा परमेश्वरकारणिकाया एव प्रतिपादनमेके तैत्तिरीयकास्तत्स्वरूपमधीयते हि । "अणोरणीयान् महतो महीयान्" इत्यारभ्य, परमेश्वरमुपक्रम्य[1] "सप्त प्राणाः प्रभवन्ति तस्मात्" इत्यादिना प्राणादिपञ्चकस्य[2] परमेश्वरादुत्पत्त्या तदात्मकत्वप्रतिपादनसमये ह्यजामिति पठन्ति । अतस्तत्प्रत्यभिज्ञानादियमत्रापि परमेश्वरकारणिका सर्वथेति निश्चीयते । अतो न तन्त्रसिद्धेति वादोऽयुक्तः[3] ॥ ९ ॥

ननु परमेश्वरकारणिकेत्यस्याः परमेश्वरकार्यत्वमुच्यते । कथमस्यास्तादृश्या अजामिति[4] वाद इत्याशङ्क्याह ॥

॥ कल्पनोपदेशाच्च मध्वादिवदविरोधः ॥ १० ॥

कल्पनेति सृष्टिरुच्यते ।

१ तथा परमेश्वरमुपक्रम्य इति पा० ।
२ प्राणपञ्चक—इति पा० ।
३ वादो निर्निबन्धनः इति पा० ।
४ अजात्वमिति इति पा० ।

"छन्दांसि यज्ञाः क्रतवो व्रतानि
भूतं भव्यं यच्च वेदा वदन्ति ।
अस्मान्मायी सृजते विश्वमेतत्
तस्मिंश्चान्यो मायया संनिरुद्धः ॥
मायां तु प्रकृतिं विद्यान्मायिनं तु महेश्वरम्" ।

इति सृष्ट्युपदेशादजात्वमहेश्वरकार्यत्वयोरविरोधः । तथाहि, प्रलयकाले नामरूपे विहायाचिद्वस्तुरूपा मायापि सूक्ष्मरूपेण महेश्वरस्य शरीरतया तिष्ठतीत्यजा । सृष्टिसमये नामरूपोपेता तत्कारणिकेति । यथा, आदित्यस्य वृष्टिसमये वस्वादिभोग्यरसाधारत्वेन मधुत्वं कार्यत्वं च । तस्य पुनः प्रलयकाले मध्वादिव्यपदेशानर्हात्यन्तसूक्ष्मरूपेणावस्थानमकार्यत्वं च मधुविद्यायां प्रतीयते[1] । एवं प्रकृतेरजात्वेश्वरकारणत्वयोरविरोध एव । तस्मादजा न तन्त्रसिद्धा ॥ १० ॥

पुनरन्यत्र तन्त्रसिद्धानि पञ्चविंशतिसंख्यानि श्रूयन्त इत्याशङ्क्य तत् परिहर्तुमधिकरणान्तरमारभ्यते ॥

॥ न संख्योपसंग्रहादपि
नानाभावादतिरेकाच्च ॥ ११ ॥

श्रूयतेऽस्य विषयः ।

"पञ्चपञ्चजना यस्मिन्नाकाशश्च प्रतिष्ठितः ।
तमेव मन्ये आत्मानं विद्वान् ब्रह्मामृतोऽमृतम्" ॥

इत्यादिः । अत्र पञ्चपञ्च जना इति पदार्थाः किं सांख्यसिद्धानि तत्त्वानि श्रुतिप्रसिद्धानि वेति संशयः । एवं सति पञ्चविंशतिसंख्यायाः सांख्यशास्त्रप्रसिद्धत्वादत्र तदवभासात् सर्वथा पञ्चपञ्च जना इति तान्येव प्रतिपाद्यानीति प्राप्ते ब्रूमः । इह "पञ्चपञ्च"इति पञ्चविंशतिसंख्योपसंग्रहादपि न तान्त्रिकाणि तत्त्वानि । "यस्मिन्" इति यच्छब्दनिर्दिष्टपरमेश्वराधारत्वममीषां प्रतीयते । तेभ्य एषां पृथग्भावात्, आकाशस्य पृथङ्निर्देशेन तत्त्वातिरेकाच्च; तत्त्वातिरेकस्तत्त्वानामधिकसंख्यात्वम् । अतोऽत्र न पञ्चविंशतितत्त्वप्रसङ्गः ।

किंच, पञ्चविंशतिसंख्योपसंग्रहोऽपि न युक्तः । "दिक्संख्ये संज्ञायाम्" इति संज्ञाविषयो ह्ययं समासः । तस्मात् पञ्चजना नाम केचित् ते हि पञ्च पञ्चजना इत्युच्यन्ते । सप्त सप्तर्षय इतिवत् । अतो न सांख्यतत्त्वप्रसक्तिः ॥ ११ ॥

के पुनरेत इत्यत आह ॥

प्राणादयो वाक्यशेषात् ॥ १२ ॥

"प्राणस्य प्राणमुत चक्षुषश्चक्षुरुत श्रोत्रस्य श्रोत्रमन्नस्यान्नं मनसो ये मनो विदुः" इति वाक्यशेषात् पञ्चजनसंज्ञकाः

१ वस्थानश्रुतेः इति पा० ।

प्राणादयः पञ्चेन्द्रियाणीति गम्यते । अतोऽपि न तान्त्रिकतत्त्वप्रसक्तिः ॥ १२ ॥

पुनरुपपत्तिरुच्यते ॥

॥ ज्योतिषैकेषामसत्यन्ने ॥ १३ ॥

एकेषां काण्वानाम्, "अवस्याचम्" इति शब्दभावे "तद्देवा ज्योतिषां ज्योतिः" इत्युपक्रमगतेन ज्योतिःशब्देन पञ्चजना इन्द्रियाणीति ज्ञायन्ते । ज्योतिषां ज्योतिःप्रकाशकानामपि प्रकाशकं ब्रह्मेत्युक्त्वा, ततः पञ्चपञ्चजना इत्युक्तेहि तानि प्रकाशकानि पञ्चेन्द्रियाणीति गम्यते ॥ १३ ॥

॥ कारणत्वेन चाकाशादिषु यथा व्यपदिष्टोक्तेः ॥ १४ ॥

यथाकाशादिषु कार्यवर्गेषु कारणत्वेन सर्वत्र वेदान्तवाक्येषु "असद्वा इदमग्र आसीत्" "तद्धेदं तर्ह्यव्याकृतमासीत्" इत्यादिषु अननुज्ञातविशेषेषु च "आत्मा वा इदमेक एवाग्र आसीत्" इति विशेषवाक्यनिर्दिष्टस्यैवोक्तेर्न तान्त्रिकाव्याकृतग्रहणम् । तथात्र विशेषवाक्यदृष्टानामिन्द्रियाणामेवोक्तेर्न तान्त्रिकतत्त्वग्रहणम् ॥ १४ ॥

अत्र तान्त्रिकतत्त्वग्रहणयोगः कथमित्यत आह ॥

॥ समाकर्षात् ॥ १५ ॥

"सोऽकामयत बहु स्याम्" इति पूर्वनिर्दिष्टस्य सर्वज्ञस्यैव "असद्वा इदमग्र आसीत्" इति समाकर्षात् पूर्वनिर्दिष्टस्याव्याकृतस्यैव "स एष इह प्रविष्ट आ नखाग्रेभ्य" इति समाकर्षाच्च यथा स एवावगम्यते । तथात्रापि समाकर्षात् पञ्चजनानामिन्द्रियत्वावगतिरिति न विरोधः ॥ १५ ॥

गतः सांख्यतत्त्वाशङ्काप्रसङ्गः । पुनरपि जीवात् परमेश्वरस्यान्यभावमुपपादयति ॥

॥ जगद्वाचित्वात् ॥ १६ ॥

श्रूयतेऽस्य विषयः कौषीतकिब्राह्मणोपनिषदि । "ब्रह्म ते ब्रवाणि" इत्युपक्रम्य "यो वै बालाक एतेषां पुरुषाणां कर्ता यस्य चैतत् कर्म स वै वेदितव्य" इत्यादिकः । इह वेद्यत्वेन श्रुतः परमेश्वरो जीवो वेति संशयः । "य एवैष आदित्ये पुरुषस्तमेवाहमुपासे य एवैष चन्द्रमसि पुरुषो य एवैष विद्युति" इत्यादिपूर्ववाक्यसंदर्भे प्रकृतादित्यादिसकलस्य[1] जीवेऽपि विद्यमानत्वात् कर्मशब्दस्यापूर्ववाचित्वादपूर्वस्य तदर्थत्वान्निर्धूतनिखिलकर्मसंबन्धे परमेश्वरे तदयोगाज्जीव एवायमिति पूर्वः पक्षः । सिद्धान्तस्तु कर्मशब्दस्यैतच्छब्दस्य सामानाधिकरण्येन क्रियत इति व्युत्पत्त्या च जगद्वाचित्वाज्जगत्कार्यवान् परमेश्वर एवात्र प्रतिपाद्यः । नहि जीवे सकलजगत्कर्तृत्वसंभवः[2] ॥ १६ ॥

पुनराशङ्क्य परिहरति ॥

॥ जीवमुख्यप्राणलिङ्गान्नेति चेत् तद् व्याख्यातम् ॥ १७ ॥

"तद्यथा श्रेष्ठी स्वैर्भुङ्क्ते यथा वा स्वाः श्रेष्ठिनं भुञ्जन्त्येवमेवैष प्राज्ञ आत्मा एतैरात्मभिर्भुङ्क्ते एवमेवैत आत्मानं एतमात्मानं भुञ्जन्ति" इति, "यदा सुप्तः स्वप्नं न कंचन पश्यति अथास्मिन् प्राण एवैकधा भवति" इति जीवमुख्यप्राणलिङ्गदर्शनाचासौ परमेश्वर इति न वाच्यम् । पूर्वत्र प्रतर्दनविद्यायां व्याख्यातत्वादिहापि पूर्वापरपर्यालोचनया ब्रह्मपरत्वे स्थिते तदनुरूपतयान्यानि लिङ्गानि नेतव्यानि । पूर्वत्र हि उपक्रमे "ब्रह्म ते ब्रवाणि" इति ब्रह्मोपक्षिप्तं, मध्ये च "यस्यैतत् कर्म" इति सकलजगत्कर्तृत्वमुक्तं, परत्र चोपसंहारे "सर्वान् पाप्मनोऽपहत्य सर्वेषां च भूतानां श्रैष्ठ्यं स्वाराज्यमाधिपत्यं पर्येति य एवं वेद" इति ब्रह्मोपासनैकान्तं सर्वपाप्मापहतिपूर्वकं स्वाराज्यफलमुक्तम् । एवमस्य प्रकरणस्य ब्रह्मपरत्वनिश्चये जीवमुख्यप्राणलिङ्गानि तत्परतयैव नेतव्यानि ॥ १७ ॥

पक्षान्तरमुच्यते ॥

॥ अन्यार्थं तु जैमिनिः प्रश्नव्याख्यानाभ्यामपि चैवमेके ॥ १८ ॥

"तौ ह सुप्तं पुरुषमाजग्मतुस्तं हाजातशत्रुरामन्त्रयांचक्रे बृहत्पाण्डरवासः सोमराजन्" इति "य इह तूष्णीमिव शिश्ये तदुह एनं यष्ट्या व्याचिक्षेप स तत एव समुत्तस्थौ" इत्यत्र प्राणनामभिरामन्त्रणेऽपि तदुत्यश्रवणेन ततः परं यष्टिघातोत्थानेन च प्राणाद्यतिरिक्तजीवसद्भावप्रतिपादनं तदतिरिक्तपरमेश्वरप्रज्ञापनार्थमिति "क्वैष एतद्बालाके पुरुषोऽशयिष्ट क्व वा एतदभूत् कुत एतदागात्" इति प्रश्नाद् "यदा सुप्तः स्वप्नं न कंचन पश्यत्यथास्मिन् प्राण एवैकधा भवति" इति "सता सौम्य तदा संपन्नो भवति" इत्यादिवाक्यान्तरसमानार्थात् तत्प्रतिवचनाच्चाप्यवगम्यते । एके वाजसनेयिनोऽयमीश्वर इति स्पष्टमस्मिन् बालाक्यजातशत्रुसंवादे एतत्समानार्थमधीयते[1] । तत्र हि "यत्रैष एतत् सुप्तोऽभूत् क्व एष विज्ञानमयः पुरुषः क्वैष तदाभूत् कुत एतदागात्" इति प्रश्नः । "यत्रैष एतत् सुप्तोऽभूत् क एष विज्ञानमयः पुरुषः" तदेषां प्राणानां विज्ञानमादाय "य एषोऽन्तर्हृदय आकाशस्तस्मिंश्छेते" इति प्रतिवचनम् । तस्मात् परमेश्वर एवायं सकलजगत्कर्मवत्त्वेन सिद्धः ॥ १८ ॥

सर्वत्र जीवेश्वरयोरेकशब्दविषयत्वे प्रतीयमाने तत्सामानाधिकरण्यं कथमित्येतन्निरूपणायेदमधिकरणमारभ्यते ॥

१–संशयः । सकलपुरुषकर्तृत्वस्य इतिवरपा० ।

२–संभवो युक्तः । पूर्वत्र प्रतर्दनविद्यायां व्याख्यातत्वादिहापि पूर्वापरपर्यालोचनाद्ब्रह्मपरत्वम् इति पा० ।

१ "तौ ह सुप्तं पुरुषमाजग्मतुः" इत्यादिना देहातिरिक्त–इति पा० ।

॥ वाक्यान्वयात् ॥ १६ ॥

बृहदारण्यके श्रूयतेऽस्य विषयः । "न वा अरे पत्युः कामाय पतिः प्रियो भवत्यात्मनस्तु कामाय पतिः प्रियो भवति" इत्यारभ्य "आत्मा वा अरे द्रष्टव्यः श्रोतव्यो मन्तव्यो निदिध्यासितव्य" इत्यादि श्रूयते । इहात्मनस्तु कामायेत्यादिवाक्यैर्भोगप्रीतियुक्ततयात्मनः संसारित्वावगमादत्र प्रतिपाद्यमानो जीव इति पूर्वपक्षे प्राप्ते सिद्धान्तयामः । परमेश्वर इति । कुतः । "अमृतत्वस्य तु नाशास्ति वित्तेन" "आत्मनि खल्वरे दृष्टे श्रुते मते विज्ञाते इदं सर्वं विदितम्", "इदं सर्वं यदयमात्मा" इत्यादेः, "येनेदं सर्वं विजानाति तं केन विजानीयात्" इत्यवसानस्य कृत्स्नस्य वाक्यस्य परमेश्वरेऽन्वयाद्भोगप्रीतियुक्तजीवस्यानुवादेन परमेश्वरप्रतिपादनादविरोधः ॥ १९ ॥

कथमिह सर्वत्र जीवशब्देन परमेश्वराभिधानमिति चेत् तदिदं मतान्तरेणोपपादयति ॥

॥ प्रतिज्ञासिद्धेर्लिङ्गमाश्मरथ्यः ॥ २० ॥

"आत्मनि खल्वरे दृष्टे" इत्यादिनोक्तस्यैकविज्ञानेन सर्वविज्ञानस्य सिद्धये जीवस्य तत्कार्यतया तदव्यतिरिक्ततां ज्ञापयितुं जीवशब्देन परमेश्वरस्याभिधानमित्याश्मरथ्यो मन्यते ॥ २० ॥

॥ उत्क्रमिष्यत एवंभावादित्यौडुलोमिः ॥ २१ ॥

उत्क्रमिष्यतो मुक्तस्य परमेश्वरस्वरूपभावादात्मशब्देन परमेश्वराभिधानमित्यौडुलोमिर्मेने ॥ २१ ॥

॥ अवस्थितेरिति काशकृत्स्नः ॥ २२ ॥

"य आत्मनि तिष्ठन्"इत्यादिश्रुतेर्जीवात्मनि परमेश्वरस्यात्मतयावस्थानाज्जीवशब्दवाच्यत्व परमेश्वरस्येति काशकृत्स्नो मेने । इदमेव मतं सूत्रकारस्य, मतद्वयमुपन्यस्य तद्विरोधेनैतदभिधानादन्यस्यानभिधानाच्च निश्चीयते । प्रबलश्रुत्यानुगुण्यं चात्र संभवति । तथाह्यथर्वशिरसि सर्वचिदचिदनुप्रवेशात् परमेश्वरस्य सर्वशब्दवाच्यत्वमिति श्रूयते । प्रथमखण्डे "देवा ह वै स्वर्गं लोकमगमंस्ते देवा रुद्रमपृच्छन् को भवान्" इति । सोऽब्रवीत् "अहमेकः प्रथममासं वर्तामि च भविष्यामि च, नान्यः कश्चिन्मत्तो व्यतिरिक्त" इति । "सोऽन्तरादन्तरं प्राविशत्" "दिशश्चान्तरं स प्राविशत्" "सोऽहं" "नित्यानित्यो ब्रह्माहम्" इत्यारभ्य, "प्राङ्वोऽहं दक्षिणावाङ्वोऽहमधश्चोर्ध्वं च दिशश्च विदिशश्चाहं पुमानहं स्त्री चाहं गायत्र्यहं सावित्र्यहं त्रिष्टुब्जगत्यनुष्टुप् चाहं छन्दोऽहं गार्हपत्योऽहं दक्षिणाग्निराहवनीयोऽहं सत्योऽहं गौरहं गौर्यहं ज्येष्ठोऽहं वरिष्ठोऽहमापोऽहं तेजोऽहमृग्यजुःसामाथर्वाङ्गिरसोऽहं क्षरमहमक्षरमहं गुह्योऽहं पुष्करमहं पवित्रमहमग्रं च मध्यं च बहिश्च परस्ताज्ज्योतिरित्यहमेव, सर्वं च मां यो वेद स सर्वान् वेद" इत्यन्तेन, द्वितीयखण्डे च सर्वानुप्रवेशादेव "यो वै रुद्रः स भगवान् यश्च ब्रह्मा तस्मै वै नमो नम" इत्यारभ्य ब्रह्मविष्णुमहेश्वरोमाविनायकादिसर्वप्रपञ्चशब्दवाच्यत्वं प्रतिपाद्यते । तथा सर्वश्रुतिसामरस्यविचारे सर्वेषां चिदचिद्वस्तूनामन्तर्यामितयानुप्रविष्टः सर्वशरीरः सर्वशब्दवाच्यः परमेश्वरः शिव इति विज्ञायते । अतः काशकृत्स्नमतमेव श्रुतिसूत्रमहाभियुक्तसंमतमिति समञ्जसम् ॥ २२ ॥

पूर्वं "जन्माद्यस्य यत"इति द्वितीयाधिकरणे "यतो वा इमानि भूतानि" इति पञ्चमीश्रवणात् परमेश्वरस्य जगदुपादानत्वं सामान्येन निरूपितम् । तदशेषतः समर्थयितुमिदमधिकरणमारभ्यते ॥

॥ प्रकृतिश्च प्रतिज्ञादृष्टान्तानुपरोधात् ॥ २३ ॥

"तस्माद्वा एतस्मादात्मन आकाशः संभूतः" "द्यावाभूमी जनयन् देव एक"इत्यादिवाक्यान्यस्य[1] विषयः । एतेषु प्रसिद्धमुभयकारणत्वं ब्रह्मणो युक्तं न वेति संदेहः । संदेहश्च निमित्तस्य कुलालादेरुपादानमृत्पिण्डादिभावादर्शनात्, उपादानस्य मृत्पिण्डादेर्निमित्तकुलालादिभावादर्शनात्; कथमेतस्मि[2]न्निमित्तत्वमुपादानत्वं च जगत् कार्यं प्रतीति पूर्वपक्षे तु जगत्स्रष्टा निमित्तमेव, नोपादानमिति; कुतः; असंभवात्; नहि घटं निर्मिमाणः कुलालः स्वयमेव मृत्पिण्डीभूय घटं करोति, पटं वा कुविन्दः; यदि कर्तुमीहते, तन्न संभवत्येव; अतो निमित्तभूतस्य ब्रह्मण उपादानत्वं न संभाव्यते; निष्प्रयोजनं च निमित्तस्यैवोपादानत्वकल्पनं; विनापि तत्कल्पनं कार्यनिष्पत्तेः, कुलालस्य मृत्पिण्डादन्यत्वेऽपि घटनिष्पत्तिदर्शनात्; अतो ब्रह्म निमित्तमेव, न तूपादानमपीति ॥

अत्रोच्यते ।

जगतो निमित्तमुपादानं च ब्रह्मैव । "स्तब्धोऽस्युत तमादेशमप्राक्षः, येनाश्रुतं श्रुतं भवत्यमतं मतमविज्ञातं विज्ञातम्" इति श्रुत्या येनादेष्ट्रा निमित्तभूतेन विज्ञातेन चिदचिद्रूपं सर्वं जगद्विज्ञातं भवतीत्यादेष्टृविज्ञानेन सर्वविज्ञानात्, "यथैकेन मृत्पिण्डेन विज्ञातेन सर्वमिदं मृन्मयं विज्ञातं स्यात्" इति तदुपपादकमृत्पिण्डदृष्टान्तानुपरोधाच्च; ब्रह्मणो निमित्तमात्रत्वे तद्विज्ञानेन सकलप्रपञ्चविज्ञानं न संभवति; तथाहि, कुलालज्ञानेन कार्यं न ज्ञायते, किंतु तदुपादानमृत्पिण्डज्ञानेन; अतो निमित्तस्य ब्रह्मण उपादानत्वे तत् संभवतीति ब्रह्मैवोपादानमप्यादिश्यते ॥ २३ ॥

१—क्यानि चात्र इति पा० ।

२—मेकस्मि—इति पा० ।

अनेनेत्यादेशशब्दादादेष्टृभूतं ब्रह्मोच्यते; न तदर्थान्तरत्वमुपादानस्येति ज्ञापयितुं हेत्वन्तरमाह ॥

॥ अभिध्योपदेशाच्च ॥ २४ ॥

"तदैक्षत बहु स्यां प्रजायेय" इति निमित्तभूतस्येक्षितुः सर्वज्ञस्य ब्रह्मण एव विचित्रजगदाकारेण बहुभवनसंकल्प उपदिश्यते । अतो निमित्तादनन्यदुपादानम् ॥ २४ ॥

ननु "विश्वाधिको रुद्रो महर्षिर्हिरण्यगर्भं पश्यति जायमानम्" इति विश्वोत्तीर्ण एव सर्वज्ञः परमेश्वरो निमित्तभूतः स्वव्यतिरिक्तप्रकृतौ स्वसंकल्पेन जायमानं सकलदेवप्रथमं हिरण्यगर्भं सृष्टमनुग्रहदृष्ट्या पश्यतीति विज्ञायते । कथमस्य विश्वाकारत्वं प्रकृतिरूपत्वेन संभवति । "मायां तु प्रकृतिं विद्यात्" इति मायायाः प्रकृतित्वं श्रूयते । "तस्माद्विराडजायत विराजो अधि पूरुषः" इति पुरुषस्य प्रकृतित्वमाम्नायते । अतस्तयोरेव प्रकृतित्वेन जगदाकारत्व[4]मुचितमित्यत आह ॥

॥ साक्षाच्चोभयाम्नानात् ॥ २५ ॥

साक्षात् प्रत्यक्षमेव वेदान्तभागेषु परमेश्वरस्य प्रकृतित्वेन जगदाकारत्वं निमित्तत्वेन जगदुत्पादकत्वं[5] च श्रूयते । तथाहि, "विश्वाधिको रुद्र" इत्यादिना यथा विश्वाधिकत्वमवगम्यते, तथा "सर्वो वै रुद्र" इत्यादिना प्रकृतित्वाद्विश्वरूपत्वमपि श्रूयते । शतरुद्रिये "नमो हिरण्यबाहव" इत्यारभ्य, "कुलुञ्चानां पतय" इत्यन्तेन विश्वाधिपत्यम् । ततश्च "नमः पर्णाय च पर्णशताय च" इत्येतत्पर्यन्तेन जगदाकारत्वं च परमेश्वरस्य श्रूयते । प्रदेशान्तरे च 'ब्रह्म स वृक्ष आसीद्ब्रह्माध्यतिष्ठद्भुवनानि धारयन्" इत्युभयश्रुतिः । अथर्वशिरसि च प्रथमद्वितीयखण्डयोर्जगदाकारत्वं, तदुपरि जगदीश्वरत्वं च । ततः प्रत्यक्षमुभयाम्नानाज्जगज्जगदीश्वरश्च प्रकृतिनिमित्तत्वेन परं ब्रह्म परमेश्वरः शिव इति युक्तमेव ॥ २५ ॥

किंच प्रमाणान्तरमस्तीत्याह ॥

॥ आत्मकृतेः ॥ २६ ॥

"तदात्मानं स्वयमकुरुत" इति स्वस्यैव जगदाकारत्वेन कृतिरवगम्यते परमेश्वरस्य । अतः स एवोपादानं निमित्तं च ॥ २६ ॥

नन्वज्ञानविकारास्पदमाया[1]प्रपञ्चरूपेण प्रकृतिभावेन कथं वर्तते निरस्तसमस्तदोषलवकलङ्को निःसीममङ्गलगुणरत्नाकरो निरङ्कुशनित्यसिद्धवैभवः प्रपञ्चातीतः परमशिव इत्यत आह ॥

॥ परिणामात्* ॥ २७ ॥

नित्यशुद्धानन्दस्य निरतिशयमङ्गलस्वभावस्यापि निमित्तस्य प्रकृतित्वेन जगदाकारत्वं युक्तमेव । परमशिवस्य चिदचिदाकारेण परिणामात् । हन्त कारणविकाररूपो हि परिणामः । पूर्वरूपपरित्यागेन रूपान्तरापत्तिः परिणाम इति । कथं परमेश्वरोऽनर्थधर्मात् परिक्लिश्यत इति चेत् । सत्यम् । यथा निमित्तस्य प्रकृतित्वेऽपि न विकारादिस्पर्शः, तथा परिणामः संभवति । कोऽयमपूर्वः परिणामः, कुतस्त्यः, कुतूहलिनो वयं तच्छ्रवणे, विविच्यतामिति चेत्; शृणु विविचयामः;

"यदा तमस्तन्न दिवा न रात्रि-
र्न सन्नचासंश्छिव एव केवलः ।
तदक्षरं तत् सवितुर्वरेण्यं
प्रज्ञा च तस्मात् प्रसृता पुराणी" ॥

इति । यस्मिन् काले विगतचन्द्रसूर्यादितेजस्तया दिवारात्रिविभागशून्यं नामरूपविशेषराहित्येन स्थूलसूक्ष्मचेतनाचेतनसदसद्व्यक्तिव्यवस्थारहितं सर्वमिदं तमोभूतमवर्तत, तदा शिव एवाद्वितीयः केवलः स्वाविभागापन्नचिदचिच्छक्तिः स्वप्रकाशः परिशिष्टोऽभूत् । तदक्षरं तदेव तदानीं क्षररहितं नाशरहितं परं वस्तु, तत् सवितुर्वरेण्यं तत् सवितुरादित्यस्य पूर्वं तेजःप्रदत्वेन वरेण्यमन्तर्वर्ति तेजस्तदपि तदेव । तस्मात् तादृशात् स्वविलीनस्वेतरनिखिलचिदचित्प्रपञ्चादद्वितीया पुराणी नित्यसिद्धा[2] तत्कालतमोऽपनोदिनी महास्फुरणरूपा परमा प्रज्ञा ज्ञानशक्तिः प्रसृता प्रावर्तत । ततः "सोऽकामयत बहु स्याम्" इति नामरूपादिविभागरहितसूक्ष्मचिदचिद्वस्तुशरीरकः कारणावस्थः परमेश्वरः संविभक्तनामरूपचिदचिद्वस्तुशरीरको[3] भवेयमिति संकल्पमकरोत् । ततश्च "इदं सर्वमसृजत" यदिदं किंचन इति । स्वशरीरभूतं सूक्ष्मचिदचिद्वस्तु स्वस्माद्विभज्य, "तत् सृष्ट्वा तदेवानुप्राविशत्" इति स्वतो विभक्ते चिदचिद्वस्तुनि स्वयमात्मतया प्रविश्य "सच्च त्यच्चाभवत्" इत्यादिना सदसत्प्रपञ्चरूपेण बहुधा परिणतोऽभवदिति पुरुषस्य बालत्वयुवत्वादिवद् ब्रह्मणो जगच्छरीरिणः कारणत्वं कार्यत्वं च ।

---

३ येनाश्रुतं श्रुतं भवतीति । येनादेष्टा निमित्तभूतेन श्रुतेनाश्रुतमपि श्रुतं भवतीति ब्रह्मैवोपादानमप्यादिश्यते । अनेनेत्यादेशशब्दादादेष्टृभूतं ब्रह्मोच्यते । तज्ज्ञानेन कार्यस्य ज्ञानत्वप्रतिज्ञोपादानत्वसाधिका । यथा 'सोम्यैकेन मृत्पिण्डेन सर्वं मन्मयं विज्ञातं भवति" इत्यादिदृष्टान्तश्च । तदुभयानुरोधान्निमित्तमुपादानं च ब्रह्म ॥ २३ ॥ इतश्च न इत्यन्तं पा० ।

४–रेव जगदाकारेण प्रकृतित्व–इति पा० ।

५ जगत्पतित्वं इति पा० ।

१–हेय–इति पा० ।

* शंकर आत्मकृतेः परिणामादित्येकमेव सूत्रमभ्युपगम्य व्याख्याय चान्ते परिणामादिति वा पृथक् सूत्रमिति व्याजहार ।

२ सनातनी इति पा० ।

३ परमेश्वरो व्यक्तचिच्छक्तिप्रतिबिम्बो व्यक्तनामरूपचिदचिद्वस्तुशरीरको इति पा० ।

"मायां तु प्रकृतिं विद्यान्मायिनं तु महेश्वरम् ।
तस्यावयवभूतेन व्याप्तं सर्वमिदं जगत्" ॥

इति श्रवणान्मायायाः सकलप्रकृतित्वं तद्विशिष्टत्वं महेश्वरस्य तदवयवभूतेनांशभूतेन चिच्छक्तिशकलभूतेन भोक्तृत्वदशायां पुरुषसंज्ञकेन सकलजगद्व्याप्तिश्चावगम्यते । यथा केवलाच्छरीराल्लोमनखाद्युत्पत्तिर्न संभवति, आत्मनश्च तथा न, केवलं तु मायाया जगदुत्पत्तिर्महेश्वराच्च । किंतु मर्त्यशरीरिणः केशनखाद्युत्पत्तिवन्मायिनः परमेश्वरात् सकलचेतनाचेतनप्रकृतिपुरुषाभिव्यक्तिर्भवति । तद्रूपादीश्वरादव्यक्तचतुर्मुखाद्युत्पत्तिः। तथा च श्रुतिरीश्वरस्य पुरुषरूपत्वमभिधत्ते "पुरुषो वै रुद्र" इति । ततः समुचितं चिदचिद्विशिष्टः परमेश्वरः कारणं कार्यं च । तत्तदवस्थाविशेषादिति ॥ २७ ॥

॥ योनिश्च हि गीयते ॥ २८ ॥

साक्षात् परमेश्वर एव भूतयोनिरित्युच्यते, ।

"उमासहायं परमेश्वरं प्रभुं
त्रिलोचनं नीलकण्ठं प्रशान्तम् ।
ज्ञात्वा मुनिर्गच्छति भूतयोनिं
समस्तसाक्षिं तमसः परस्तात्" ॥

इति समस्तसाक्षिणः सर्वज्ञस्य तमसः परस्य विश्वोत्तीर्णस्य परमशक्त्योमया सहितस्य विशिष्टस्य परमेश्वरस्यैव भूतयोनित्वं भूतभौतिकप्रकृतित्वं गीयते । ततश्चोपादानमपि निमित्तं परं ब्रह्मैव ॥ २८ ॥

॥ एतेन सर्वे व्याख्याता व्याख्याताः ॥ २९ ॥

"जन्माद्यस्य यत" इत्यादिनैतदन्तेन वेदान्तवाक्यानां व्याख्यानेन ब्रह्मलिङ्गाभिधायिनो वेदान्तरूपाः कर्मकाण्डमध्यपातिनः पुरुषसूक्तशतरुद्रियप्रभृतयो मन्त्रब्राह्मणभागाः, स्मृतीतिहासपुराणाभियुक्तसूक्तिविशेषाश्च, व्याख्याता इति । द्विरुक्तिरध्यायसमाप्त्यर्था । अत्र कर्मप्रकरणपठितानां पुरुषसूक्तशतरुद्रियादीनां स्मृतीतिहासपुराणादीनां च तात्पर्यलिङ्गसमन्वयेन ब्रह्मबोधकत्वमस्ति न वेति संशयः । संशयबीजं प्रकरणभेदादिकम् । कर्मप्रकरणगतानां पुरुषसूक्तादीनामनुष्ठातृजीवपरत्वमेव समीचीनम् । न नित्यमुक्तब्रह्मविषयत्वं, प्रयोजनाभावात् । स्मृतिपुराणादीनामपि नैकात्म[1]परत्वमस्ति । यतस्तेषु कतिचिद् ब्रह्माणं परं ब्रह्मेत्याहुः, कतिचिद्विष्णुं, कतिचिद्रुद्रं, कतिचिच्छक्तिमेव, कतिचिदग्निं, कतिचित् सूर्यं, कतिचिद्वायुं, कतिचिदन्यम्। एवमनवस्था भवतीति। अत एतेषां न

१ –र्थ– इति पा० ।

ब्रह्मबोधकत्वमिति न युक्तमिति[1] प्राप्ते ब्रूमः । पुरुषसूक्तादीनां ब्रह्मबोधकत्वमस्ति, तल्लिङ्गदर्शनात् । "तस्माद्विराडजायत" "आदित्यवर्णं तमसस्तु पारे । तमेव विद्वानमृत इह भवति" इति सकलकारणत्वम् । तमः परत्वामृतहेतुत्वादीनां परमेश्वरलिङ्गानामत्र संबन्धो दृश्यते । अत ईश्वर एवात्र पुरुषशब्देन प्रतिपाद्यते । शतरुद्रीये च साक्षात् परमेश्वरस्य जगदाधिपत्यं जगदात्मकत्वं नीलग्रीवत्वादिलक्षणं च श्रूयते । अतः परमेश्वरस्य तद्बोध्यत्वं युक्तम् ।

ननु परमेश्वरस्य मङ्गलगुणैकनिधानस्य[2] शतरुद्रियप्रतिपाद्यत्वमयुक्तमिव प्रतिभाति । प्रथममेवात्र "नमस्ते रुद्र मन्यव" इति हेयगुणमन्युसंबन्धावगमात् इति चेत् । नैवं विचारणीयम् । मन्युशब्दस्यात्र ज्ञानवाचकत्वात् । अथवा क्रोधपर्यायत्वेऽपि मन्युशब्दस्य न दोषः । दुष्टनिग्रहार्थं स्वेच्छागृहीतप्रकृतिगुणत्वेनास्य परमेश्वरे संबन्धाभावात् । पुराणादीनां च तात्पर्यलिङ्गवशेन ब्रह्मविष्ण्वादितत्तच्छब्दवाच्यं सर्वात्मकं सर्वज्ञं सर्वशक्ति सर्वाधिकमसामान्यवैभवं ब्रह्मशब्दार्थ[3]विश्रान्तिपदं निखिलवेदान्तवाक्यसामञ्जस्यसमन्वयात् तात्पर्यावसानविषयं शिवमुमासहितं परमेश्वरं प्रति बोधकत्वं युक्तमेव । यदुक्तं कर्मप्रकरणमिति तत्र लिङ्गेन प्रकरणबाधो युक्तः । अनेनैव न्यायेन यत्र यत्र चेतनेऽचेतने वा जगत्कारणत्वादिकं श्रूयते वेदादिषु प्रमाणवचनेषु, तत्र तत्र तदात्मा शिव एव वाच्यः । यत्र यत्रापुरुषार्थविकाराज्ञत्वादिको धर्मस्तत्र तत्र शिवस्य परब्रह्मणः शरीरं चिदचिद्वस्त्वेव बोध्यत इति निपुणतरं निरूप्यमिति[4] सर्वं समञ्जसमेव ॥ २९ ॥

इति श्रीकण्ठशिवाचार्यविरचिते ब्रह्ममीमांसाभाष्ये प्रथमस्याध्यायस्य चतुर्थः पादः ॥ ४ ॥ समाप्तश्च प्रथमोऽध्यायः ॥ :: :: ॥

१ त्वमिति वरपा० ।
२ निदानस्य इति पा० ।
३–शब्द–इति पा० ।
४ निपुणमतिभिरूह्यमिति इति पा० ।

॥ अथ कर्पूरमञ्जर्यभिधसट्टकस्य ॥

॥ द्वितीयजवनिकान्तरस्य शेषः ॥

राजा । सुणिदो दे अहिप्पाओ उण किं पि भणामि ।

॥ अथ द्वितीयजवनिकान्तरस्य प्राकृतविवृतिशेषः ॥

श्रुतस्तेऽभिप्रायः पुनः किमपि भणामि ॥

बालाओ होंति कोदूहलेण पेम्मचवलचित्ताओ ।
दरउल्लसिअत्थणीसु पुणो णिवसइ मअरद्धअरहस्सं ॥४८॥

विदू । तरुणो रूअरेहारहस्सेण फुल्लंति ण उण रहस्सं जानंति ।

नेपथ्ये । वैतालिकः । सुहसंझा भोदु देअस्स ।

लोआणं लोअणेहीं सह कमलवणं अद्धणिद्दं कुणंतो
मुंचंतो तीव्वभावं सुहअसरहसं माणिणी माणसेहिं ।
मंजिट्ठारत्तसुत्तच्छविकिरणचओ चक्कवाएक्कमित्तं
जादो अत्थाचलत्थो पउह दिणमणी पक्कणारंगपिंगः ॥ ४६ ॥

राजा । भो वअस्स संणिहिदो संझासमओ वट्टदि ।

विदू । संकेदकालो कधिदो बंदीहिं ।

कर्पूर । सहि विअक्खणे गमिस्सं दाव विआलो संवुत्तो वट्टदि ।

विच । एवं करीअदु ॥ इति परिक्रम्य निष्क्रान्ताः सर्वे ॥

॥ इतिश्रीबालकविकविराजराजशेखरविरचिते
कर्पूरमञ्जर्यभिधसट्टके द्वितीयं जवनिकान्तरम् ॥

बाला भवन्ति कौतूहलेन प्रेमचपलचित्ताः ।
दरोल्लसितस्तनीषु पुनर्मकरध्वजरहस्यम् ॥ ४८ ॥

तरवो रूपरेखारहस्येन फुल्लन्ति न पुना रहस्यं जानन्ति ॥ सुखसंध्या भवतु देवस्य ।

लोकानां लोचनैः सह कमलवनमर्धनिद्रं कुर्वन्
मुञ्चन्ती तीव्रभावं सुभगसरभसं मानिनी मनुष्यैः ।
मञ्जिष्ठारक्तसूत्रच्छविकिरणचयश्चक्रवाकैकमित्रं
जातो ऽस्ताचलस्थः पश्य दिनमणिः पक्वनारङ्गपिङ्गः ॥४९॥

भो वयस्य संनिहितः संध्याकालो वर्तते ॥ संध्याकालः कथितो वन्दिभ्याम् ॥ सखि विचक्षणे गमिष्यामस्तावद्विकालः संवृत्तो वर्तते ॥ एवं क्रियताम् ॥

॥ इति द्वितीयजवनिकान्तरप्राकृतविवृतिः ॥

॥ अथ कर्पूरमञ्जर्यभिधसट्टकस्य ॥

॥ तृतीयं जवनिकान्तरम् ॥

ततः प्रविशति राजा विदूषकश्च ।

राजा । तामनुसंधाय ।

दूरे किज्जदु चंपअस्स कलिआ कज्जं हलद्दीअ किं
उल्लुल्लाइ वि कंचणेण गणणा का णाम जच्चेण वि ।
लाअण्णस्स णउग्गदिंदुमहुरच्छाअस्स तिस्सा पुरो
पच्चग्गेहिं वि केसरस्स कुसुमुक्करेहिं किं कारणं ॥ १ ॥

अवि अ ।

मरगअमणिपुंजा हारलट्ठि व्व तारा-
भमरकबलिअंता मालईमालइ व्व ।
रहसवलिअकंठी तीअ दिट्ठी वरिट्ठा
सवणपहणिविट्ठा माणसं मे पइट्ठा ॥ २ ॥

विदू । भो वअस्स किं तुमं भज्जाजिदो पइ व्व किंपि २ कुरकुराअंतो चिट्ठसि ।

राजा । भो वअस्स सिविणअं दिट्ठं ।

विदू । ता कहेदु पिअवअस्सो ।

राजा ।

जाणे पंकअलोअणा सिविणए मं केलिसेज्जागदं
कंदोदेण झडित्ति ताडिदुमणा एत्थंतरे संठिदा ।

॥ अथ तृतीयजवनिकान्तरस्य प्राकृतविवृतिः ॥

दूरे क्रियतां चम्पकस्य कलिका कार्यं हरिद्रया किम्
आर्द्रयापि काञ्चनेन गणना का नाम जात्येनापि ।
लावण्यस्य नवोद्गतेन्दुमधुरच्छायस्य तस्याः पुरः
प्रत्यग्रैरपि केसरस्य कुसुमोत्करैः किं कारणम् ॥ १ ॥

अपि च ।

मरकतमणिपुञ्जा हारयष्टिरिव तारा-
भ्रमरकवलयमाला मालतीमालिकेव ।
रभसवलितकण्ठी तस्या दृष्टिर्वरिष्ठा
श्रवणपथनिविष्टा मानसं मे प्रविष्टा ॥ २ ॥

भो वयस्य किं त्वं भार्याजितः पतिरिव किमपि २ कुरकुरायमाणस्तिष्ठसि ॥ भो वयस्य स्वप्नं दृष्टम् ॥ तत्कथयतु प्रियवयस्यः ॥

जाने पङ्कजलोचना स्वप्ने मां केलिशय्यागतं
नीलोत्पलेन झडिति वीचितुमना अत्रान्तरे संस्थिता ।

तक्कोडेण मए वि झत्ति धरिदा ढिल्लं वरिल्लंचलं
तं मोत्तूण गदं अ तीअ सहसा णट्ठं अ णिद्दाअ मे ॥ ३ ॥

विदू । स्वगतम् । भोदु एव्वं दाव । प्रकाशम् । भो वअस्स अज्ज मए वि सिविणअं दिट्ठं ।

राजा । सप्रत्याशम् । ता कहिज्जदु कीदिसं ता सिविणअं ।

विदू । अज्ज जाणे सुरसरिआसोत्ते सुत्तोह्मि, ता हरसिरिसो वरि दिण्णलीलाचलणाए गंगाए पक्खालिओह्मि तोएण ।

राजा । तदोतदो ।

विदू । तदो अ सरदसमअवरिसिणा जलहरेण जहिच्छं पीतोह्मि ।

राजा । अच्छरिअं २ ।

विदू । तदो चित्ताणक्खत्तगदे भअवइ मत्तंडे तम्मवण्णीणदीसंगदं समुद्दं गदो सो महाम्मेहो । जाणे अहं वि मेहगब्भट्ठिदो गच्छामि ॥

राजा । तदोतदो ।

विदू । तदो अ तहिं सो थूलजलबिंदुहिं वरिसिदुं पउत्तो । अहं अ रअणाअरसुत्तीहिं मोत्ताणामहेआहिं संपुडं समुग्घाडिअ जहिच्छं जलबिंदूहिं समं पीदोह्मि । ताणं अ दसमासप्पमाणं मोत्ताणं हलं भविअ गब्भे संट्ठिदो ।

राजा । तदोतदो ।

विदू ।

तत्कौतुकेन मयापि झटिति धृता शिथिलं वस्त्राञ्चलं
तन्मोचयित्वा गतं च तया सहसा नष्टं च निद्रया मे ॥ ३ ॥

भवत्वेवं तावत् ॥ भो वयस्य अद्य मयापि स्वप्नं दृष्टम् ॥ तत् कथ्यतां कीदृशं तत् स्वप्नम् ॥ अद्य जाने सुरसरित्स्रोते सुप्तोऽस्मि, तत् हरशिरस उपरि दत्तलीलाचरणाया गङ्गायाः प्रक्षालितोऽस्मि तोयेन ॥ ततस्ततः ॥ ततश्च शरत्समयवर्षिणा जलधरेण यथेच्छं पीतोऽस्मि ॥ आश्चर्यम् २ ॥ ततश्चित्रानक्षत्रगते भगवति मार्तण्डे ताम्रपर्णीनदीसंगमे संगतं समुद्रं गतः स महामेघः, जाने अहमपि मेघगर्भस्थितो गच्छामि ॥ ततस्ततः ॥ ततश्च तत्र सः स्थूलजलबिन्दुभिर्वर्षितुं प्रवृत्तः, अहं च रत्नाकरशुक्तिभिर्मुक्तानामधेयाभिः संपुटं समुद्घाट्य यथेच्छं जलबिन्दुभिः समं पीतोऽस्मि । तासां च दशमासप्रमाणं मुक्ताफलं भूत्वा गर्भे संस्थितः ॥ ततस्ततः ॥

तदो चउस्सट्ठिसुसुत्तिसु ट्ठिदो घणंबुबिंदुज्जिदवंसरोअणो ।
सुवत्तुलं णित्तलमच्छमुज्जलं कमेण पत्तो णवमोत्तिअत्तणं ॥ ४ ॥

राजा । तदोतदो ।

विदू । सोहं अत्ताणअं ताणं गब्भगदं मोत्ताहलत्तणेण मण्णे ।

राजा । तदोतदो ।

विदू । तदो अ परिणदिकाले समुद्दाहिंतो कड्ढिदाओ सुत्तीओ फोरिदाओ अ अहं चउस्सट्ठिमोत्ताहलत्तणं गदो ट्ठिदो किदो अ एक्केण सेट्ठिणा सुवण्णलक्खकं दइअ अहं ।

राजा । अहो विचित्तदा सिविणअस्स । तदो २ ।

विदू । तदो अ तेण आणिअ वेअडिअवेहिआइं ताइं मोत्तिआइं । मम वि इसीसि वेहणा समुप्पण्णा ।

राजा । तदोतदो ।

विदू ।

तेणावि मोत्ताहलमंडलेण एक्केक्कदाए दसमासिएण ।
एक्कावलीगंटिकमेण गुत्था जा संठिदा कोटिसुवण्णमुल्ला ॥ ५ ॥

राजा । तदोतदो ।

विदू । तदो अ तं करंडिआए कदुअ साअरदत्तो पंचालाहिवस्स सिरिवज्जाउहस्स णअरं कण्णउज्जं णाम गदो । तेण तहिं सा विक्कीणीदा कोटिए सुवण्णस्स ।

राजा । तदोतदो ।

विदू । तदो अ ।

ततश्चतुःषष्टिसुशुक्तिषु स्थितो घनाम्बुबिन्दूर्जितवंशरोचनः ।
सुवर्तुलं निस्तलमच्छमुज्ज्वलं क्रमेण प्राप्तो नवमौक्तिकत्वम् ॥ ४ ॥

ततस्ततः ॥ सोहमात्मानं तासां गर्भगतं मुक्ताफलत्वेन मन्ये ॥ ततस्ततः ॥ ततश्च परिणतिकाले समुद्रात् कर्षिताः शुक्तयः स्फोटिताश्च, अहं चतुःषष्टिमुक्ताफलत्वं गतः स्थितः, क्रीतश्चैकेन श्रेष्ठिना सुवर्णलक्षकं दत्वाहम् ॥ अहो विचित्रतास्वप्नस्य, ततस्ततः ॥ ततश्च तेनानीय रत्नवेधकरवेधितानि मौक्तिकानि, ममापीषदीषद्वेदना समुत्पन्ना ॥ ततस्ततः ॥

तेनापि मुक्ताफलमण्डलेन एकैकतया दशमासिकेन ।
एकावलीग्रन्थिक्रमेण गुम्फिता या संस्थिता कोटिसुवर्णमूल्या ॥ ५ ॥

ततस्ततः ॥ ततश्च तां करण्डिकायां कृत्वा सागरदत्तः पाञ्चालाधिपस्य श्रीवज्रायुधस्य नगरं कान्यकुब्जं नाम गतः, तेन तत्र सा विक्रीणीता कोट्या सुवर्णस्य ॥ ततस्ततः ॥ ततश्च ।

दट्ठूण थोरत्थणतुंगिमाणं एक्कावलीए तह चंगिमाणं ।
स तेण दिण्णा दइआअ कंठे रज्जंति छेआ समसंगमम्मि॥६॥

अवि अ ।

णहवहलिदजोह्णाणिब्भरे रत्तिमज्झे
कुसुमसरपहारुत्ताससंमीलिदाए ।
णिहुअणपरिरंभे णिब्भरुत्तुंगपीण-
त्थणअलसणिवेसा पीडिदोहं विबुद्धो ॥ ७ ॥

राजा । किंचिद्विहस्य विचिन्त्य च । सिविणअमिसेण सव्वं तं दिट्ठं ममाणुसंदधमाणस्स । पडिसिविणएण एदस्स अ विणिवारणं तुह अहिप्पाओ ।

विदू । भइट्ठो ठक्कुरो खुहाकिलंतो बह्मणो अविणीदहिअआ बालरंडा विरहिदो अ माणुसो मणोरहमोदएहिं अप्पाणअं विडंबेदि । अवि अ । वअस्स पुच्छेमि कस्स उण एसो प्पहाओ ।

राजा । पेम्मस्स ।

विदू । भो देवीए गदे पणअप्परूढे वि प्पेम्मे किं ति कप्पूरमंजरीं पि सव्वंगवित्थारिअलोअणो पिअंतो विअ अवलोएसि किं तदो वि हीअमाणगुणगणा देई ।

राजा । मा एवं भण ।

कीए वि संघडइ कस्स वि पेम्मगंठी
एमेअ तत्थ ण हु कारणमत्थि रूवं ।
चंगत्तणं उण लहिज्जदि जं तहीं पि
तं दिज्जए पिसुणलोअमुहेसु मुद्दा ॥ ८ ॥

विदू । किं उण एदं पेम्मपेम्म त्ति भणिज्जदि ।

राजा । अण्णोण्णमिलिदमिहुणस्स मकरद्धअसासणेण रूढपणअगंठिं पेम्म त्ति छइल्ला भणंति ।

विदू । कीदिसो सो ।

राजा ।

जस्सिं विअप्पघडणाइकलंकमुक्को
अत्ताणअम्मि सरलत्तणमेइ भाओ ।
एक्कक्कअस्स पसरंतरसप्पसारो
सिंगारवट्टिअमणोभवदिण्णसारो ॥ ९ ॥

विदू । कधं विअ सो लक्खिज्जदि ।

राजा ।

जाणं सहावपसरंतपलोलदिट्ठी
पेरंतलुंठिअमणाण परस्परेण ।
वड्ढंतवम्महविइण्णरसप्पसारो
ताणं पआसइ लहू वि सचित्तभाओ ॥ १० ॥

विदू ।

दृष्ट्वा स्थूलस्तनतुङ्गिमानमेकावल्यास्तथा सुन्दरत्वम् ।
सा तेन दत्ता दयितायाः कण्ठे रज्जन्ति विदग्धाः समसंगमे ॥६॥

अपि च ।

नभोधवलितज्योत्स्नानिर्भरे रात्रिमध्ये
कुसुमशरप्रहारोत्त्राससंमीलितायाः ।
निधुवनपरिरम्भे निर्भरोत्तुङ्गपीन-
स्तनकलशनिवेशात्पीडितोहं विबुद्धः ॥ ७ ॥

स्वप्नमिषेण सर्वं तद्दृष्टं ममानुसंदधतः । प्रतिस्वप्नेन एतस्यैव विनिवारणं तवाभिप्रायः ॥ भ्रष्टः स्वामी क्षुधाक्रान्तो ब्राह्मणः । अविनीतहृदया बालरण्डा विरहितो मनुष्यश्च मनोरथमोदकैरात्मानं विडम्बयति । अपि च । वयस्य पृच्छामि कस्य पुनरेष प्रभावः ॥ प्रेम्णः ॥ भो देव्यां गते प्रणयप्ररूढेपि प्रेम्णि किमिति कर्पूरमञ्जरीमपि सर्वाङ्गविस्तरितलोचनः पिबन्निवावलोकयसि किं ततोपि हीयमानगुणगणा देवी ॥ मा एवं भण ॥

कस्यामपि संघटते कस्यापि प्रेमग्रन्थि-
रेवमेव तत्र न खलु कारणमस्ति रूपम् ।
सुन्दरत्वं पुनर्लभ्यते यत्तत्रापि
तद्दीयते पिशुनलोकमुखेषु मुद्रा ॥ ८ ॥

किं पुनरेतत् प्रेमप्रेमेति भण्यते ॥ अन्योन्यमिलितमिथुनस्य मकरध्वजशासनेन परूढप्रणयग्रन्थिं प्रेमेति विदग्धा भणन्ति ॥ कीदृशः सः ॥

यस्मिन्विकल्पघटनादिकलङ्कमुक्त आत्मनि सरलत्वमेति भावः ।
एकैकस्य प्रसरद्रसप्रसारः शृङ्गारवर्धितमनोभवदर्पसारः ॥ ९ ॥

कथमिव स लक्ष्यते ॥

ययोः स्वभावप्रसरत्प्रलोलदृष्टि-
पर्यन्तलुण्ठितमनसोः परस्परेण ।
वर्धमानमन्मथवितीर्णरसप्रसार-
स्तयोः प्रकाशते लघुरपि सचित्तभावः ॥ १० ॥

अंतेणिविट्ठमणविब्भमडंबरो जो
सो भण्णए मअणमंडणमेत्थ पेम्मं ।
दुल्लक्खअं पि पअडेइ जणो जअम्मि
तं जाणिमो सुबहुलं मअणिंदजालं ॥ ११ ॥

किंच । यइ चित्तगदं पेम्ममणुरागमुप्पादेदि ता किं किज्जदि मंडणाडंबरविडंबणाए ।

राजा । वअस्स सच्चमिणं ।

किं मेहलावलअसेहरणेउरेहिं
किं चंगिमाण किमु मंडणडंबरेहिं ।
तं अण्णमत्थि इह किं पि णिअंबिणीओ
जेणं लहंति सुहअत्तणमंजरीओ ॥ १२ ॥

अवि अ ।

किं गेअ णदृविहिणा किमु वारुणीए
धूवेण किं अगरुणो किमु कुंकुमेण ।
मिट्ठत्तणे महिअलम्मि ण किं पि अण्णं
रुच्चस्स अत्थि सरिसं उण माणुसस्स ॥ १३ ॥

अवि अ ।

जा चक्कवट्टिघरिणी जणगेहिणी जा
पेम्मम्मि ताण ण तिलं पि विसेसलंभो ।
जाणे सिरीअ जइ किज्जदि को वि भेओ
माणिक्कभूसणणिवेसणकुंकुमेहिं ॥ १४ ॥

अवि अ ।

किं लोअणेहिं तरलेहिं किमाणणेण
चंदोवमेण थिणिएहिं किमुण्णएहिं ।
तं किं पि अण्णमिह भूवलए णिमित्तं
जेणंगणाउ हिअआउ ण ओसरंति ॥ १५ ॥

विदू । एव्वं णेदं । किं उण अण्णं पि मे कहेसु जं कुमारत्तणं माणुसस्स मणुज्जं । तस्सिं वि तारुण्णए ण चंगत्तणं वठ्ठदि ।

राजा ।

णूणं दुवे इह पजापइणो जअम्मि
जो देहणिम्मअणजोव्वणदाणदक्खो ।
एक्को घडेदि पढमं कुमरीणमंगं
कंडारिऊण पअडेइ पुणो दुदीओ ॥ १६ ॥

तेण अ ।

अन्तेनिविष्टमनोविभ्रमडम्बरो यः
स भण्यते मदनमण्डनमत्र प्रेम ।
दुर्लक्ष्यमपि प्रकटयति जनो जगति
तज्जानीमः सुबहुलं मदनेन्द्रजालम् ॥ ११ ॥

यदि चित्तगतं प्रेम अनुरागमुत्पादयति तत्किं क्रियते मण्डनाडम्बरविडम्बनया ॥ वयस्य सत्यमिदम् ॥

किं मेखलावलयशेखरनूपुरैः
किं सौन्दर्येण किमु मण्डनडम्बरैः ।
तदन्यदस्ति इह किमपि नितम्बिन्यो
येन लभन्ते सुभगत्वमञ्जरीः ॥ १२ ॥

अपि च ।

किं गेयं नृत्यविधिना किमु वारुण्या
धूपेन किमगुरोः किमु कुङ्कुमेन ।
मिष्टत्वे महीतले न किमप्यन्यद्
रुच्यस्यास्ति सदृशं पुनर्मानुषस्य ॥ १३ ॥

अपि च ।

या चक्रवर्तिगृहिणी जनगेहिनी या
प्रेम्णि तयोर्न तिलमपि विशेषलाभः ।
जाने श्रिया यदि क्रियते कोपि भेदो
माणिक्यभूषणनिवेशनकुङ्कुमैः ॥ १४ ॥

अपि च ।

किं लोचनैस्तरलैः किमाननेन
चन्द्रोपमेन स्तनैः किमुन्नतैः ।
तत्किमप्यन्यदिह भूवलये निमित्तं
येनाङ्गना हृदयान्नापसर्पन्ति ॥ १५ ॥

एवमेतत् किं पुनरन्यदपि मे कथयस्व यत्कुमारत्वं मानुषस्य मनोज्ञम् । तस्मिन्नपि तारुण्ये न सौन्दर्यं विधत्ते ॥

नूनं द्वाविह प्रजापती जगति
यो देहनिर्मापनयौवनदक्षौ ।
एको घटयति प्रथमं कुमारीणामङ्ग-
मुत्कीर्य प्रकटयति पुनर्द्वितीयः ॥ १६ ॥

तेन च ।

रणिअवलअकंचीणेउरावेसलच्छी
मरगअमणिमालागोरिआहारलट्ठी ।
हिअअहरणमंतो जोव्वणं कामिणीणं
जअदि मअणकंडो को वि सट्ठो बलिट्ठो ॥ १७ ॥

तहा अ ।

अंगं लाअण्णपुण्णं सवणपरिसरे लोअणे हारतारं
वच्छं थोरत्थणिल्लं तिवलिवलइअं मुट्ठिगेज्झं अ मज्झं ।
चक्काआरो णिअंबो तरुणिमसमए किं णु अण्णाण कज्जं
पंचेहिं चेअ बाला मअणजअमहावेजअंतीउ होंति ॥ १८ ॥

नेपथ्ये । कुरंगिका । चिरअरगब्भघरवासेण सेअसलिलसित्तगत्ता तत्थभोदी ता वत्थंचलेण वीजइस्सं । तथा कुर्वन्ती । भोदि वइल्लपल्लवपवणेण णिउत्तो दे देहदाहो ।

कर्पूर । सहि कुरंगिए इमिणा सिसिरोवआरेण णलिणि व्व अइसएण किलिम्मामि ।

बिस व्व बिसकंदली बिसहर व्व हारच्छडा
वअस्समिव अत्तणो किरदि तालवेंटाणिलो ।
तहा अ करणिग्गअं जलदि जंतधाराजलं
ण चंदणमहो सही हरइ देहदाहं अ मे ॥ १९ ॥

रणितवलयकाञ्चीनूपुरावेशलक्ष्मी-
र्मरकतमणिमालागौरिकाहारयष्टिः ।
हृदयहरणमन्त्रो यौवनं कामिनीनां
जयति मदनकाण्डः कोपि षष्ठो बलिष्ठः ॥ १७ ॥

तथा च ।

अङ्गं लावण्यपूर्णं श्रवणपरिसरे लोचने हारतारं
वक्षः स्थूलस्तनाढ्यं त्रिवलिवलयितं मुष्टिग्राह्यं च मध्यम् ।
चक्राकारो नितम्बस्तरुणिमसमये किं नु अन्येन कार्यं
पञ्चभिरेव बाला मदनजयमहावैजयन्त्यो भवन्ति ॥ १८ ॥

चिरतरगर्भगृहवासेन सेकसलिलसिक्तगात्रा तत्रभवती, तद्वस्त्राञ्चलेन वीजयिष्यामि । भवति वस्त्रपल्लवपवनेन निवृत्तस्ते देहदाहः ॥ सखि कुरङ्गिके एतेन शिशिरोपचारेण नलिनीवातिशयेन क्लाम्यामि ॥

विषमिव विसकन्दली विषधरमिव भावच्छटा
वयस्यमिव आत्मनः किरति तालवृन्तानिलः ।
तथा च करनिर्गतं ज्वलति यन्त्रधाराजलं
न चन्दनमहौषधिर्हरति देहदाहं च मे ॥ १९ ॥

विदू । सुदं पिअवअस्सेण, ण भरिदा कण्णा पीऊसगंडूसेहिं, ता अज्ज वि किं उवक्खीअदि घणघम्मेण किलिम्मंती मुणालिआ, गाढकढणदूसहेण सलिलेण सिंचिज्जंती केलिकुंकुमत्थली, छम्मासिअमोत्तिआ तुदंती एक्कावली, गंठिवण्णकेआरिआ लुंठिज्जंती गंधहत्थिणा, ता सच्चं सिविणअं दे संपन्नं, ता एहि खिडक्किआदुआरेण पविसह्म, उब्भिज्जंदु मअरद्धअपडाआ, पअट्टदु कण्णकुहरम्मि पंचमहुंकाररिंछोली, सुक्कंतु बाहप्पहावा, संवरिज्जंतु णीसासप्पसारा, लेहेदु लाअण्णं पुणो णवहावं । इतिखिडक्किकोद्घाटनं प्रवेशं च नाटयतः ॥

ततः प्रविशति नायिका कुरङ्गिका च ।

नायिका । ससाध्वसमात्मगतम् । अम्मो किं एस सहसा गअणंगणादो अवइण्णो पुण्णिमाहरिणंको, किं वा तुट्ठेण णीलकंठेण णिअदेहं लंभिदो मणोभवो, किं अ हिअअस्स दुज्जणो णअणाणं सज्जणो संभावेदि मं, किं एदं इंदआलं पेक्खामि । प्रकाशम् । सहि कुरंगिए इंदआलं विअ पेक्खामि ।

विदू । राजानं हस्ते गृहीत्वा । भो सच्चं एदं इंदजालं संपण्णं ।

नायिका । लज्जते ।

कुरं । सहि कप्पूरमंजरी अब्भुत्थाणेण संभावेहि भट्टारअं ।

श्रुतं प्रियवयस्येन । न भृतौ कर्णौ पीयूषगण्डूषैः, तदद्यापि किमुपेक्ष्यते घनघर्मेण क्लाम्यन्ती मृणालिका, गाढक्वथनदुःसहेन सलिलेन सिच्यमाना केलिकुङ्कुमस्थली, षाण्मासिकमौक्तिका त्रुट्यन्ती एकावली, ग्रन्थिपर्णकेदारिका लुण्ठ्यमाना गन्धहस्तिना, तत्सत्यं स्वप्नं ते संपन्नं, तदेहि क्षुद्रद्वारेण प्रविशावः, ऊर्ध्वीक्रियतां मकरध्वजपताकाः, प्रवर्ततां कर्णकुहरे पञ्चमहुंकारश्रेणी, शुष्यन्तां बाष्पप्रवाहाः, संह्रियन्तां निश्वासप्रसराः, लभतां लावण्यं पुनर्नवभावम् ॥

अहो किमेष सहसा गगनाङ्गणतोऽवतीर्णः, पूर्णिमाहरिणाङ्कः, किं वा तुष्टेन नीलकण्ठेन निजदेहं लम्भितो मनोभवः किं च हृदयस्य दुर्जनो नयनयोः सज्जनः संभावयति माम् । किमेतदिन्द्रजालं प्रेक्षामि । सखि कुरङ्गिके एतदिन्द्रजालमिव प्रेक्षामि ॥ भो सत्यमेतदिन्द्रजालं संपन्नम् ॥ सखि कर्पूरमञ्जरि अभ्युत्थानेन संभावय भट्टारकम् ॥

नायिका । उत्थातुमिच्छति ।

राजा । हस्तेगृहीत्वा ।

उट्ठिजण थणभारभंगुरं
मा मिअंकमुहि भंज मक्झअं ।
तुझ्झ ईदिसणिवेसदंसणे
लोअणाण मअणो पसीददु ॥ २० ॥

अवि अ ।

जिस्सा पुरो हरदि णो दलिआ हलद्दी
रोसाणिअं ण कणअं ण अ चंपआइं ।
ताइं सुवण्णकुसुमेहिं विलोअणाइं
अच्चेमि जेहिं हरिणच्छि तुमं सि दिट्ठा ॥ २१ ॥

विदू । गब्भघरवासेण सेअसलिलसित्तगत्ता संभूदा तत्थभोदी कप्पूरमंजरी ता सिचअंचलेण वीजिस्सं दाव । तथा कुर्वन् । हाहा कधं वत्थपल्लवपवणेण णिव्वाणो पदीओ । विचिन्त्य स्वगतम् । भोदु लीलुज्जाणं चेअ गच्छेह्म । प्रकाशम् । भो अंधआरणच्चिदं वट्टदि ता णिक्कह्म सुरंगामुहेण एव्व पमदुज्जाणं दाव । सर्वे निष्क्रमणं नाटयन्ति ।

राजा । कर्पूरमञ्जरीं करे धृत्वा ।

मझ्झ हत्थठिदपाणिपल्लवा
ईसिसंचरणचंचुरा हव ।
जं चिराअ कलहंसमंडली
भोदु केलिगमणम्मि दूहआ ॥ २२ ॥

उत्थाय स्तनभारभङ्गुरं मा मृगाङ्कमुखि भञ्ज मध्यकम् ।
तव ईदृशनिवेशदर्शने लोचनयोर्मदनः प्रसीदतु ॥ २० ॥

अपि च ।

यस्याः पुरो हरति नो दलिता हरिद्रा
रोषाणितं न कनकं न च चम्पकानि ।
ते सुवर्णकुसुमैर्विलोचने
अर्चयामि याभ्यां हरिणाक्षि त्वमसि दृष्टा ॥ २१ ॥

गर्भगृहवासेन सेकसलिलसिक्तगात्रा संभूता तत्रभवती कर्पूरमञ्जरी तत्सिचयाञ्चलेन वीजयिष्ये तावत्, हाहा कथं वस्त्रपल्लवपवनेन निर्वाणः प्रदीपः ॥ भवतु लीलोद्यानमेव गच्छावः । भो अन्धकारनर्तितं वर्तते तन्निष्क्रामः सुरङ्गामुखेनैव प्रमदोद्यानं तावत् ॥

मम हस्तस्थितपाणिपल्लवा ईषत्संचरणचञ्चुरा भव ।
यच्चिराय कलहंसमण्डली भवतु केलीगमने दुर्भगा ॥२२॥

स्पर्शसुखमभिनीय ।

जे णवस्स तिउसस्स कंटआ
जे कदंबमुउलस्स केसरा ।
अज्ज तुझ्झ करफंससंगिणो
ते हुअंति मह अंगसंगिणो ॥ २३ ॥

नेपथ्ये वैतालिकयोरेकः । सुहणिबंधणो होदु देअस्स चंदुज्जोओ ।

भूगोले तिमिराणुबंधमलिणे भूमीघरे वट्टिदे
संजादा णवभुज्जपिंजरमुही जोह्णाअ पुव्वा दिसा ।
मुंचंतो मुचुकुंदकेसरसिहासोहाणुआरे करे
चंदो पेक्ख कलक्कमेण अ गदो संपुण्णबिंबत्तणं ॥ २४ ॥

अवि अ ।

अकुंकुमपचंदणं दसदिसाबहूमंडणं
अकंकणमकुंडलं भुअणमंडलीभूसणं ।
असोसणममोहणं मअरलंछणस्साउहं
मिअंककिरणावली णहअलम्मि पुंजिज्जदि ॥ २५ ॥

विदू । भो अणकचंदेण वण्णिदा चंदुज्जोअलच्छी । ता संपदं माणिक्कचंदस्स अवसरो ।

नेपथ्ये द्वितीयः ।

धज्जंतागुरुधूववट्टिबहुला दिज्जंतदीउज्जला
लंबिज्जंतविचित्तमोत्तिअलदा मुंचंतपारावदा ।

ये नवस्य त्रपुसस्य कण्टका ये कदम्बमुकुलस्य केसराः ।
अद्य तव करस्पर्शसङ्गिन स्ते भवन्तु ममाङ्गसङ्गिनः ॥ २३ ॥

सुखसंबन्धिनो भवतु देवस्य चन्द्रोद्योतः ।

भूगोले तिमिरानुबन्धमलिने भूमीगृहे वर्तिते
संजाता नवभूर्जपिञ्जरमुखी ज्योत्स्नया पूर्वादिक् ।
मुञ्चन्मुचुकुन्दकेसरशिखाशोभानुकारिणः करान्
चन्द्रः प्रेक्ष कलाक्रमेण च गतः संपूर्णबिम्बत्वम् ॥ २४ ॥

अपि च ।

अकुङ्कुमचन्दनं दशदिशावधूमण्डनम्
अकङ्कणमकुण्डलं भुवनमण्डलीभूषणम् ।
अशोषणममोहनं मकरलाञ्छनस्यायुधं
मृगाङ्ककिरणावली नभस्तले पुञ्जीयते ॥ २५ ॥

भो कनकचन्द्रेण वर्णिता चन्द्रोद्योतलक्ष्मीः, तत्सांप्रतं माणिक्यचन्द्रस्यावसरः ॥

दह्यमानागरुधूपवर्तिबहुला दह्यमानदीपोज्ज्वलाः
लम्ब्यमानविचित्रनवमौक्तिकलता मुच्यमानपारावताः ।

संजिज्जंतमणोण्णकेलिसअणा जप्पंतदूईसआ
सेज्जुत्संगवलंतमाणिणिगणा वट्टंति कीलाघरा ॥ २६ ॥

अवि अ ।

देंता कप्पूरपूरच्छुरणमिव दिसासुंदरीणां मुहेसु
लह्णं जुह्णं किरंता भुअणजणमणोणंदणं चंदणं व्व ।
जुण्णं कंदप्पकंदं णिहुअणकलणाकंदलिल्लं कुणंता
जादा एणंकपादा सरअजलहरुम्मुक्कहाराणुआरा ॥ २७ ॥

विदू ।

दिसिबहुतंसो णहसरहंसो ।
णिहुअणकंदो पअट्टइ चंदो ॥ २८ ॥

कुरं ।

ससहररइअभरट्टो माणिणिमाणघरट्टो ।
णवचंपअकोदंडो मअणो जअइ पअंडो ॥ २९ ॥

कर्पूरमञ्जरीं प्रति । पिअसहि तुए कदं चंदवण्णणं महाराअस्स पुरदो पढिस्सं ।

कर्पूर । लज्जया अधोमुखी तिष्ठति ।

कुरं । पठति ।

मंडले ससहरस्स गोरए दंतिदंतणवछेअचोरए ।
भाइ लंछणमिओ फुरंतओ केलिकोइलतुलं धरंतओ ॥ ३० ॥

राजा । अहो कप्पूरमंजरीए अभिणवत्थदंसणं, रमणिज्जो सद्दो, उत्तिविचित्तदा, रसणीसंदो अ । तां प्रति

सज्ज्यमानमनोज्ञकेलिशयनाः जल्प्यमानदूतीशताः
शय्योत्सङ्गवलन्मानिनिगणा वर्तन्ते क्रीडागृहाः ॥ २६ ॥

अपि च ।

ददतः कर्पूरपूरच्छुरणमिव दिक्सुन्दरीणां मुखेषु
श्लक्ष्णां ज्योत्स्नां किरन्तो भुवनजनमनोनन्दनं चन्दनमिव।
जीर्णं कन्दर्पकन्दं निधुवनकलनाकन्दलाढ्यं कुर्वन्तः
जाता एणाङ्कपादाः शरज्जलधरोन्मुक्तधारानुकाराः ॥ २७॥

दिग्वधूवसन्तो नभस्सरोहंसः ।
निधुवनकन्दः प्रवर्तते चन्द्रः ॥ २८ ॥

शशधररचितगर्वो मानिनीमानदलनः ।
नवचम्पककोदण्डो मदनो जयति प्रचण्डः ॥ २९ ॥

प्रियसखि त्वया कृतं चन्द्रवर्णनं महाराजस्य पुरतः पठिष्ये ॥
मण्डले शशधरस्य गौरके दन्तिदन्तनवछेदचोरके ।
भाति लाञ्छनमृगः स्फुरन् केलिकोकिलतुलां धारयन् ॥ ३० ॥
अहो कर्पूरमञ्जर्या अभिनवार्थदर्शनं रमणीयः शब्द उक्तिविचित्रता रसनिस्पन्दश्च ।

मा कहिं पि वअणेण बिब्भमो
होउ इत्ति तुह णूणमिंदुणा ।
लंछणच्छलमसीविसेसओ
पेच्छ बिंबफलए णिए कदो ॥ ३१ ॥

किं च ।

पंडुरेण जइ रज्जए मुहं
कोमलंगि खडिआरसेण दे ।
दिज्जए उण कवोलकज्जलं
ता लहेदु ससिणो विडंबणं ॥ ३२ ॥

चन्द्रमुद्दिश्य ।

मुक्कसंक हरिणंक किं तुमं
सुंदरीपरिसरेण हिंडसि ।
गोरगंडपरिपंडुरत्तणं
पेच्छ दिण्णमिमिणा मुहेण दे ॥ ३३ ॥

नेपथ्ये । महान् कलकलः । सर्वे आकर्णयन्ति ।

राजा । किं उण एसो कलअलो ।

कर्पूर । ससाध्वसम् । पिअसहिपिअसहि एदं अवगमिअ आअच्छ ।

कुरं । निष्क्रम्य प्रविशति ।

विदू । देवीए पिअवअस्सकदं वंचणं अवगमिदं ति तक्केमि ।

कुरं । अज्जे गमिअ उण आअदा, कधेमि, पिअसहि भट्टारअस्स वंचणं कदुअ तुए सहसंगमं जाणिअ आअच्छदि देई, तेण कुज्जवामणकिराअवरिसधरसोविदल्लाणं एस कोलाहलो ।

मा कुत्रापि वदनेन विभ्रमो भवत्विति तव नूनमिन्दुना ।
लाञ्छनच्छलमसीविशेषकः प्रेक्ष बिम्बफलके निजे कृतः ॥ ३१ ॥
पाण्डुरेण यदि रज्यते मुखं कोमलाङ्गि खटिकारसेन ते ।
दीयते पुनः कपोलकज्जलं तल्लभेत शशिनो विडम्बनम् ॥ ३२ ॥
मुक्तशङ्क हरिणाङ्क किं त्वं सुन्दरीपरिसरेण हिण्डसि ।
गौरगण्डपरिपाण्डुरत्वं प्रेक्ष दत्तमेतेन मुखेन ते ॥ ३३ ॥

किं पुनरेष कलकलः ॥ प्रियसखि २ एतदवगम्यागच्छ ॥
देव्या प्रियवयस्यकृतं वञ्चनमवगमितमिति तर्कयामि ॥
आर्ये गत्वा पुनरागता । कथयामि प्रियसखि भट्टारकस्य वञ्चनं कृत्वा त्वया सह संगमं ज्ञात्वा आगच्छति देवी । तेन वामनकुब्जकिरातवर्षधरसौविदल्लानामेष कोलाहलः ॥

कर्पूर । ता मं पेसदु महाराश्रो जेण इमिणा सुरंगामुहेण एव्व पविसिश्र रक्खाघरश्रं गच्छामि जेण देई महाराएण सह संगमं ण जाणादि ।

इति परिक्रम्य निष्क्रान्ताः सर्वे ॥

इति श्रीबालकविकविराजराजशेखरविरचिते कर्पूरमञ्जर्यभिधसट्टके तृतीयं जवनिकान्तरं संपूर्णम् ॥

तन्मां प्रेषयतु महाराजः । येनैतेन सुरङ्गामुखेनैव प्रविश्य रक्षागृहं गच्छामि । येन देवी महाराजेन सह संगमं न जानाति ॥

॥ इति तृतीयजवनिकान्तरस्य प्राकृतविवृतिः ॥

THE VIDVAN-MANO-RANJINI′

OR

REJOICER OF THE MIND OF THE LEARNED.

A COMMENTARY ON SAD-ÁNANDA'S VEDÁNTA-SÁRA, BY RÁMA-TÍRTHA.

(*Continued from page* 30.)

There is therefore in this system a utility (or means) to those who desire to know supreme soul, in performance of reflection on the latter part of the Veda, without works, inasmuch as such reflection can be achieved even without works (or observances.) Nor is there absence of contradiction for observances are repugnant to reflection, since one whose intellect is distracted by works cannot determine the meaning of the Vedánta.

For the title of these investigators of pure spirit to perform works cannot fail to involve a contradiction, such works depending on the cognition of soul as determined by eternal false imputation to the supreme; whereas spirit is considered by these investigators thus: I am the supreme, which is not a Bráhman, nor a Kshatriya &c., and neither an actor nor subject to fruition of actions; so that works should not require to be renounced by the investigator of spirit. The drift, therefore, is that renunciation which is established to be incumbent as subsidiary to knowledge of spirit, by revelation, scripture, and argumentation, is cessation. By the words *et cætera* in the text *heat, cold, et cætera*, are included honour and dishonour, gain and loss, sorrow and joy, and other pairs of correlates. In the text *on the hearing et cætera*, the words *et cætera* are intended to comprise pondering on what has been heard, and the like. *The object if conformable to hearing and the like*, is obedience to the spiritual teacher in conformity therewith, the procuring of books, their preservation, and the like. It is not taught also that intentness of mind is to be bestowed on building huts and receiving gifts &c., with the notion that accumulation of comfortable dwellings, wealth, and provisions is favourable to hearing and the like; since such accumulation is not authorised in the absence of an injunction to resume that which has been required to be laid aside at the time of renunciation, in conformity to the rule, Let him lay aside his staff, clothes, cincture, and the rest of his habiliments, with exception of the resumption of that which is other than his staff, cincture, and the like. Intentness is concentration, in other words, the being engrossed on one object. In the text *of the spiritual guide, of the Vedânta, et cætera*, the words *et cætera* comprise the scriptures, sacred history, and the legendaries. Belief is an intellection consisting of assurance of the words of the spiritual guide and the rest, that so and so is thus and not otherwise; and this belief is faith. The author defines the last requisite.

Desire of liberation. Liberation is the abiding in identity with the supreme, the effect of ignorance (or illusion) expelled by knowledge. Desire, whereof this is the object, is desire of liberation; possession of such desire is the state of one who desires liberation. It may be asked: How can desire be a predicate of the authorised student, whereas the title to emancipation belongs to one free from all desires, as it is revealed in the text When all the desires which exist in his heart are put away, then the mortal becomes immortal. This is no objection: for this desire is a wish which has not soul for its object; and the text refers to wish having soul for its object; and the wish for liberation, having soul for its object, is not such a desire, it being known from the Vedic text, He who is not desiring, and desireless, and absolutely void of desire, has attained his desire, that he who desires spirit, having attained his desire, is free from

---

तदिह ब्रह्मात्मजिज्ञासूनां वेदान्तविचारे क्रियमाणे निष्कर्म्मणामुपयोगः विनापि कर्म्म तदनुष्ठानसिद्धेः नाप्यविरोधः कर्म्मविक्षिप्तचित्तस्य वेदान्तार्थनिर्णयाशक्तेः कर्म्मणां विचारविरोधित्वात् नह्यप्येतेषामब्रह्मक्षत्राद्यकर्तृभोक्तृब्रह्मास्मीत्यात्मनि विचार्य्यमाणे ब्रह्मण्यनाद्यध्यासविशिष्टात्मप्रतिपत्त्यधीनेषु कर्म्मस्वधिकारो न विरुध्यते येनात्मजिज्ञासुना कर्म्माणि न त्यक्तव्यानि स्युः तस्माच्छ्रुतिस्मृतिन्यायैरात्मज्ञानाङ्गतया यः सन्न्यासः कर्त्तव्यतया प्राप्तः स उपरतिरितिभावः । शीतोष्णादीत्यादिपदात् मानापमानलाभालाभशोकहर्षादिग्रहः । श्रवणादावित्यत्रादिशब्दो मननादिसंग्रहार्थः । तदनुगुणेत्यत्र गुरुशुश्रूषा पुस्तकसम्पादनतद्रक्षणादिः श्रवणाद्यनुगुणो विषयो निर्दिश्यते । न पुनः सुखवासद्रव्यान्नादिसंग्रहादेरपि श्रवणाद्यनुकूलत्वात्तदर्थं मठारम्भप्रतिग्रहादावपि चित्तसमाधिः कर्त्तव्य इहोपदिश्यते । दण्डमाच्छादनं कौपीनं परिग्रहोच्छ्रेयं विसृजेदितिसन्न्यासकाले त्याजितस्य दण्डकौपीनाद्यतिरिक्तस्य विना प्रतिप्रसवशास्त्रं संग्रहानुपपत्तेरित्यर्थः । समाधिरैकाग्र्यं तत्परत्वमिति यावत् । गुरुवेदान्तादीत्यादिपदात् स्मृतीतिहासपुराणानां ग्रहः । विश्वासइदमित्थमेव नान्यथेति गुर्व्वादिवाक्येषु निश्चयात्मिका बुद्धिः सा श्रद्धेत्यर्थः । चरममनुबन्धं लक्षयति ॥

desire. The author proceeds to quote the Vêda to prove that the authorised student should possess tranquillity and other means. The Kâṇvas read: After becoming tranquil, self-subdued, having ceased from works, ready to endure, intent, he should be spirit in spirit. The Mâdhyandinas read in place of *intent*, *rich in faith*. It is to be observed that six instruments, tranquillity and the rest, according to the rule that attributes should be supplied [where not mentioned, from other sources], are in conformity with both readings. The Lord (Krishṇa) also has declared that tranquillity and the rest are conditions of knowledge: Of one engaged in union (with infinite spirit), tranquillity is declared a cause; whence is happiness to him that has not tranquillity? Again, And when he withdraws his organs from the objects of sense, as a tortoise withdraws its limbs from all sides, then his knowledge is concentrated; Renouncing all duties, come to me alone for refuge; The contacts of sense-objects, son of Kuntí, bring heat and cold, pleasure and pain, coming and going, transient, suffer them, O Bharata; In intentness the intellection is unmoved; place thy mind on me alone, fix thy intellect on me; He that has faith, acquires knowledge, engrossed, his sense restrained, but he that has not knowledge, or faith, wavering in spirit, perishes. And with reference to desire of liberation texts of the Veda and the scriptures are to be considered: Desirous of emancipation I resort to thee for refuge; That place is to be sought for, which having reached, souls never return again; I take refuge with that primeval person from whom this primeval activity has proceeded.

One who possesses such qualifications is the authorised student of the Vedânta, and to this effect he exemplifies the statement of a competent authority.

And it has been said, To him who is tranquil, &c. To him who is tranquil in mind, means, to one quiescent; *who has his organs in subjection* self-controlled; *whose sins have disappeared*, entirely purified within; *who acts according to the commandments*, one who has acquired the grace of God by performance of constant and other observances, besides avoiding interested and prohibited actions; *who is possessed of good qualities*, who is endowed with discrimination, dispassionateness, cessation, endurance, and contemplation; *docile*, ever following his spiritual guide, desiring liberation. To such a person, desiring emancipation, this knowledge of soul must always be imparted by the spiritual guide: such is the sense of the stanza quoted in the text. Thus, then, the requisite in the form of the authorised student, has been described. The author now sets forth the object matter as a requisite.

The object-matter &c. A doubt may arise that the unity of the individuated spirit and the supreme, is a commixture of two essentially different things, since a common combination of two objects mutually exclusive, as of milk and water, may be the meaning of the word one. Lest such a doubt should arise, the author makes the following explanation.

Pure intelligence &c. Purity of intelligence is the transcending of all attributes, simplicity. It may be asked: How can pure intelligence be an object of reflection, since antecedently to reflection, such intelligence being self-luminous, shines forth of itself. Anticipating this objection the author proceeds, considering that it may be proved to be an object, inasmuch as though it is essentially luminous, it is unknown in its nature of absolute existence, intelligence, bliss, and self-consciousness.

मुमुक्षुत्वमिति। मोक्षोनाम विद्यानिरस्ताऽविद्या तत्कार्य्य ब्रह्मात्मनावस्थानं। तद्विषयेच्छा मोक्षेच्छा तद्वत्त्वं मुमुक्षुत्वमित्यर्थः। ननु यदा सर्व्वे प्रमुच्यन्ते कामायेऽस्य हृदि श्रिताः। अथ मर्त्त्योऽमृतो भवतीति श्रुतेः। सर्व्वकामविमुक्तस्य मोक्षाधिकारात् कथमिच्छा अधिकारिविशेषणमिति चेत्। नायं दोषः अनात्मविषयेच्छायाएव कामत्वात्तदभिप्राया श्रुतिः। मोक्षेच्छायास्त्वात्मविषयतयाऽकामत्वात्। अथाकामयमानो योऽकामो निष्कामः आप्तकामइति श्रुतेरात्मकामस्याप्तकामत्वेनाकामत्वावगमादिति। विद्याधिकारिणः शमादिसाधनवत्त्वे श्रुतिं प्रमाणयति। शान्तोदान्तउपरतस्तितिक्षुः समाहितो भूत्वात्मन्येवात्मानं पश्येदिति काण्वाः पठन्ति। समाहित इत्यस्य स्थाने श्रद्धावित्तोभूत्वेति माध्यन्दिनास्तदुभयपाठानुरोधेन गुणोपसंहारन्यायमाश्रित्येह शमादयः षट् निर्द्दिष्टाइति द्रष्टव्यं। शमादेर्विद्याहेतुत्वं भगवानप्याह योगारूढस्य तस्यैव शमः कारणमुच्यते। अशान्तस्य कुतः सुखं। तथा यदा संहरते चायं कूर्म्मोऽङ्गानीव सर्व्वशः। इन्द्रियाणीन्द्रियार्थेभ्यस्तस्य प्रज्ञा प्रतिष्ठिता इति। सर्व्वधर्म्मान् परित्यज्य मामेकं शरणं व्रजेति। मात्रास्पर्शास्तु कौन्तेय शीतोष्णसुखदुःखदाः आगमापायिनो नित्यास्तांस्तितिक्षस्व भारतइति। समाधावचलाबुद्धिः। मय्येव मनआधत्स्व मयि बुद्धिं निवेशयेति। श्रद्धावांल्लभते ज्ञानं तत्परः संयतेन्द्रियः। अज्ञश्चाश्रद्दधानश्च संशयात्मा विनश्यतीति च। मुमुक्षुत्वेऽपि मुमुक्षुर्वै शरणमहं प्रपद्ये ततः पदं तत्परिमार्गितव्यं यस्मिन् गता न निवर्त्तन्ते भूयः। तमेव चाद्यं पुरुषं प्रपद्ये यतः प्रवृत्तिः प्रसृता पुराणीति श्रुति स्मृती द्रष्टव्ये। एवं विशेषणविशिष्टोवेदान्ताधिकारीति निर्द्दिशंस्तत्राभियुक्तस्य वचनमुदाहरति॥

उक्तञ्च प्रशान्तेति। प्रशान्तचित्ताय शान्ताय जितेन्द्रियाय दान्ताय प्रहीणदोषाय नितान्तनिर्म्मलस्वान्ताय यथोक्तकारिणे काम्यनिषिद्धवर्ज्जनपुरःसरं नित्याद्यनुष्ठानलब्धेश्वरप्रीतये गुणान्विताय विवेकवैराग्योपरतितितिक्षासमाधानयुक्ताय सर्व्वदा गुरुमनुगताय श्रद्धालवे एवम्भूताय मुमुक्षवे एतदात्मज्ञानं सततं गुरुणा देयमिति श्लोकार्थः। तदेवमधिकार्य्यानुबन्धो निरूपितः। इदानीं विषयानुबन्धं व्यपदिशति॥

विषयइति। क्षीरनीरवत् परस्परविभिन्नयोः समानाभिहारस्यैक्यशब्दार्थत्वाज्जीवब्रह्मणोरपि स्वरूपतो भिन्नयोरैक्यं मिश्रीभाव इति शङ्का स्यात् सा माभूदिति व्याचष्टे॥

शुद्धचैतन्यमिति। चैतन्यस्य शुद्धत्वं सर्व्वधर्म्मातीतत्वमेकरसत्वं। ननु कथं शुद्धचैतन्यस्य विचारविषयत्वं यावता प्रागपि विचारात्तत्स्वप्रकाशं स्वयमेवावभासत इत्याशङ्क्य स्वरूपेणावभासमानत्वेऽपि परिपूर्णसच्चिदानन्दप्रत्यक्स्वरूपतया अज्ञायमानत्वाद्विषयत्वोपपत्तिरित्यभिप्रेत्याह॥

To be known for certain. To be known for certain is the state of being known. Such is the meaning. If the object-matter, reality, that is the supreme soul, were absolutely unknown, it would be impossible to engage in reflection thereon, the object to be set forth being unknown. So also, were it actually known, no one would engage in its consideration, it being useless. Taking therefore for an object reality, that is the supreme, in some wise known, the real nature thereof is to be ascertained by reflection. The term supreme, then, in this place being universally understood of that which is unsurpassably great, and the term soul being universally understood of that which is self-conscious, and their unity being also known superficially from juxtaposition in such sentences as This soul, the supreme; since the this is particular, not being the substratum of finitude, unreality, and indiscernibility, is not known in the form of the supreme, secondless, existent, intelligence, and joy, different from the body, its organ, the internal organ, intellection, vital air, egotism, and identical with self-conscious soul the witness thereof; it is shown to be reasonable to engage in the consideration thereof, for the purpose of ascertaining the detail, through taking into view the generally known circumstances. In other words, the reality, or the supreme being indicated as known transcendentally, it is shown to be reasonable to engage in the consideration thereof for the presentation of the essence thereof. Accordingly the Vedic text It is the soul that is to be seen, to be heard, to be meditated on, and to be pondered over, without mentioning presentation of the soul, in the sense of presentation enjoins hearing [or oral study of the Veda] to be performed together with reflection and meditation as subsidiaries subserving to that result. So also the traditional text [Smṛiti], He is to be heard from the sentences of the Veda, to be reflected on by means of reasonings, and constantly to be pondered on after reflection:—these are the means of discerning the soul. It may be urged: How can it be proclaimed that the supreme and the individuated soul is the object of the texts of the Vedánta, while nature and the like principles, recorded in the tradition of Kapila Kanáda, and others, are object of such texts? The author, therefore, proceeds to say.

(For the purport of all Vedánta texts relates) to this. It is meant that the supreme only is the object-matter of the Vedánta, and not nature &c., inasmuch as when by the indicia, the commencements, the endings &c., the purport of the texts of the latter part of the Veda is explained, it is shown that they apply ultimately to the supreme only whose essence is self-conscious ness. Accordingly the Vedic and the traditional texts: The object whereon all the Vedas ponder, By all the Vedas it is I that am to be known. The third requisite is described.

And the relation. The unity thereof means the unity of the self-conscious soul and the supreme; and that is that which is to be known for certain. If it be asked: How can the object of right knowledge thus described, be knowable on the evidence of the Upanishad; inasmuch as in that unconditioned object, the power of words has no proper application? we ask: What do you mean: if you mean that that which is void of sound and all other qualities cannot be expressible; we reply that you deny that which we have not affirmed; and if you mean that that which has no relations cannot be indicated (or implied) we shall explain in the sequel the manner in which there is no contradiction of the unity of the supreme and individuated soul, if we have recourse to the indicative function of the word. The author describes the last requisite.

But the end &c. The expression The identity of these two (that is, of the supreme and the individuated soul) which is to be known for certain, is to be explained as before; ignorance (or illusion) will be characterised in the sequel. If it had been said only that the cessation of ignorance was the end, the end approved by the Vaiśeshikas, defined as the extirpation of pain with its roots,

---

प्रमेयमिति। प्रमेयत्वं ज्ञातत्वं अयं भावः ब्रह्मात्मवस्तुनो विषयस्यात्यन्ताप्रसिद्धौ न विचारप्रवृत्तिः सम्भवति उद्देश्यविषयाप्रसिद्धेः तथा यथावत् प्रसिद्धौ च न विचारप्रवृत्तिरनुपयोगात्तथाच केन चिद्रूपेण प्रसिद्धं ब्रह्मात्मवस्तूद्दिश्य विचारेण तद्याथात्म्यं निर्णेयं। तदिह ब्रह्मपदस्य निरतिशयमहत्त्ववति सामान्येन प्रसिद्धत्वादात्मपदस्य प्रतीचि सामान्येन प्रसिद्धेरयमात्मा ब्रह्मेत्यादौ समभिव्याहारादैक्यस्याप्यापाततः प्रसिद्धेस्तद्विशेषस्य च पारोक्ष्यासत्त्वेयत्त्वाद्यनधिकरणत्वस्य देहेन्द्रियमनोबुद्धिप्राणाहङ्कृतिविलक्षणतत्साक्षिप्रत्यगभिन्नसच्चिदानन्दाद्वयब्रह्मरूपत्वस्य चाप्रसिद्धेः सामान्यतः प्रसिद्धावस्योद्देशेन तद्विशेषनिर्द्धारणाय विचारप्रवृत्त्युपपत्तिरिति। यद्वा परोक्षतः प्रसिद्धं ब्रह्मात्मवस्तूद्दिश्य तत्स्वरूपसाक्षात्काराय विचारप्रवृत्त्युपपत्तिरिति। तथा च श्रुतिः आत्मा वा अरे द्रष्टव्यः श्रोतव्यो मन्तव्यो निदिध्यासितव्यश्च इत्यात्मसाक्षात्कारमनूद्य तादर्थ्येन मनननिदिध्यासनाभ्यां फलोपकार्य्यङ्गाभ्यां सह श्रवणमनुष्ठेयं विधत्ते स्मृतिरपि श्रोतव्यः श्रुतिवाक्येभ्यो मन्तव्यश्चोपपत्तिभिः। मत्वा च सततं ध्येय एते दर्शनहेतव इति। ननु प्रधानादीनामपि कपिलकणादादिस्मृतिसिद्धानां वेदान्तवाक्यविषयत्वात् कथं जीवब्रह्मैक्यस्य विषयत्वसंकीर्त्तनमिति तत्राह॥

तत्रैवेति। उपक्रमोपसंहारादिभिर्लिङ्गैर्वेदान्ततात्पर्य्ये निरूप्यमाणे प्रत्यक्स्वरूपे ब्रह्मण्येव पर्य्यवसानदर्शनात् प्रधानादिषु चादर्शनात् ब्रह्मैव वेदान्तानां विषयो न प्रधानादिरित्यर्थः। तथा च श्रुतिस्मृती भवतः। सर्व्वे वेदा यत्पदमामनन्ति। वेदैश्च सर्व्वैरहमेव वेद्य इति च। तृतीयमनुबन्धमाह॥

सम्बन्धस्त्विति। तदैक्यं तत्यग्ब्रह्मणोरैक्यं तच्च तत्प्रमेयञ्चेति तथा तस्येति विग्रहः। ननु कथं यथोक्तप्रमेयस्योपनिषत्प्रमाणबोध्यत्वं निर्धर्म्मके तस्मिन् शक्तिगोचरत्वायोगादिति चेत्। को भावः शब्दादिहीनस्य वाच्यत्वानुपपत्तिरिति चेन्न अनुक्तोपालम्भात्। असङ्गस्य लक्ष्यत्वानुपपत्तिरिति चेत्। यथा लक्षणावृत्त्याश्रयणेन ब्रह्मात्मैक्याप्रतिरोधस्तथोत्तरत्र प्रवक्ष्यामः। चरममनुबन्धमाह॥

would have appeared to be sanctioned. That this might not be so a farther characteristic is adopted, viz. the attainment by soul of the bliss which is the essence thereof. And had it been said that the end was cessation of ignorance and attainment of bliss (without the words which is the essence thereof), the end approved by the Bháṭṭas, viz., the manifestation of enduring and unsurpassable bliss, and the entire extirpation of pains, would appear to be sanctioned. Hence the words Which is the essence thereof. It is laid down in the sequel that the intelligence which is the absolute consists of bliss. In relation to the end, described as twofold, of knowledge produced by reflection, the author adduces two Vedic texts respectively (proving its two characters.) By crosses &c., (that is by the text He who knows what soul is, gets beyond grief) is meant, that he that knows the soul, that is, he who has the presentation of the soul which is the supreme (or absolute) called all-pervading, crosses, the ignorance (or illusion) which is the root of transmigratory existence characterised by grief. (And by the text He who knows God, is meant that) whoever knows God, the Supreme Spirit, essentially self-conscious, becomes God, becomes identical with the absolute. If it be asked: How can the bliss which is the essence thereof be the end, while cessation of ignorance may be the end, inasmuch as it may be effected by knowledge whereas eternal bliss cannot be effected by knowledge (since that which is eternal can have no beginning)? We reply: True, the essence of the absolute which is bliss, though eternally possessed, in the state of ignorance appears not to be possessed, like a gold necklace of which the wearer is unconscious. In fine there is nothing unreasonable, inasmuch as when by knowledge there is cessation of ignorance, the bliss (though eternally possessed) when educed is said to be possessed, as in the case of the necklace when the wearer becomes conscious of it.

The author proceeds to show that the authorised student when thus furnished with the quaternion of requisites, and knowing the object-matter, connection and end, attends his spiritual preceptor, with the desire of knowing the real nature of spirit.

This qualified person &c. In the words death and the like, by the expression And the like are to be understood desire, aversion, and so forth. The connection is Burned by the fire of transmigratory existence, resorting to the spiritual preceptor, he follows him. To resort is to approach; to follow is conform oneself. The author gives an example how one much distressed enters without delay the place where his distress may be alleviated.

[As one whose head] is heated &c. One whose head is heated, means one whose occiput is pervaded by the rays of the meridian sun of the hot season [that is one who has a sunstroke] A body of water means a large pool full of cool, fresh water. The author bethinking himself of the verse, Let not one with empty hand approach his king, his deity, or his spiritual preceptor, proceeds.

With tribute in his hands &c. With tribute &c., means with a gift in his hand. Who knows the Vedas, and is intent on God:—these are two attributes of the spiritual guide. To know the Vedas is to have gone through the Vedas and the sciences subsidiary to the Vedas, or in conformity with the matter in hand, to have gone through the meaning of the latter portion of the Vedas. The employment of the term Who knows the Vedas indicates secondarily non-obstruction by desire and freedom from sin, according to the Vedic text, And that knower of the Vedas who is sinless and not smitten with desires. Not to be smitten with desires, means to have no longing for joys lower than the bliss of the sphere of the supreme. Sinlessness means freedom from guilt by means of performance of prescribed observances. To be intent on God, means to be full of the knowledge of the absolute imparted by the Upanishads. The author cites authority to shew that the votary of science must in the aforesaid manner, resort to the spiritual preceptor thus described.

With fuel in his hands &c. The term fuel is intended to indicate generally any offering suitable for the spiritual guide. The words *et cætera* refers to other texts, such as He that worships knows, That know-

---

प्रयोजनन्त्विति । तदैक्यप्रमेयशब्दः पूर्व्ववत् व्याख्येयः अज्ञानञ्च वक्ष्यमाणलक्षणं तस्य निवृत्तिः प्रयोजनमित्येतावत्युक्ते समूलदुःखोन्मूलनलक्षणवैशेषिकाभिमतं प्रयोजनमप्यनुमतं प्रतिभायात्तन्माभूदिति विशेषणान्तरोपादानं अज्ञाननिवृत्तिरानन्दावाप्तिश्च प्रयोजनमित्युक्ते नित्यनिरतिशयसुखाभिव्यक्तिर्निःशेषदुःखोच्छित्तिश्च प्रयोजनमिति भाट्टाभिमतं प्रतिभायात्तन्माभूदिति तत्स्वरूपेत्युक्तं। ब्रह्मात्मचैतन्यस्य चानन्दरूपत्वं प्रतिपादितमधस्तात् । विचारजन्यज्ञानस्योक्तोभयविधं प्रयोजनमित्य त्रक्रमेण श्रुती प्रमाणयति तरतीत्यादिना आत्मविद्भूमाख्यब्रह्मात्मसाक्षात्कारवान् शोकोपलक्षित संसारमूलाज्ञानं तरति अतिक्रमति । यः कश्चिद्ब्रह्मपरमात्मानं प्रत्यग्रूपं वेद साक्षात्करोति स ब्रह्मैव भवति तद्रूप एव भवतीत्यर्थः । नन्वविद्यानिवृत्तेर्विद्यासाध्यत्वेन प्रयोजनत्वेऽपि कथं स्वरूपानन्दस्य तथा त्वं तस्य नित्यप्राप्तत्वेन विद्यासाध्यत्वाभावादिति चेत् सत्यं नित्यप्राप्तमप्यानन्दात्मब्रह्मस्वरूपमविद्यावस्थायां विस्मृतकण्ठगतचामीकरवदनवाप्तमिव भवति । विद्ययात्वविद्यानिवृत्तौ विज्ञातचामीकरवदभिव्यक्तिमापद्यमानमवाप्तमिव व्यपदिश्यत इति न काचिदनुपपत्तिरिति भावः । एवं साधनचतुष्टयसम्पन्नस्याधिकारिणो विज्ञातविषयादिमतश्चात्मयाथात्म्यजिज्ञासया गुरूपसत्तिं दर्शयति ॥

अयमधिकारीति । मरणादीत्यादिपदाद्रागद्वेषादिग्रहः । संसारानलसन्तप्तोगुरुमुपसृत्य तमनुसरतीत्यन्वयः । उपसरणं समीपगमनं । अनुसरणमनुवृत्तिरिति भेदः । अत्युद्विग्नस्याविलम्बेन तच्छान्तिकरस्थानप्रवेशे दृष्टान्तमाह ॥

ledge only which is learned from the spiritual preceptor has reached its object. The author points out the spiritual teacher's procedure in instruction, when the disciples resort to him.

He with the greatest kindness. &c. This spiritual guide is possessed of the greatest kindness, that is, his compassion is awakened on seeing the troubles of one who resorts to him, or he is engaged in enlightening the student's mind. This has, therefore, been stated by competent authority. The improvement of the mind of docile students is the mark of a kind person. The author cites a Vedic text indicatory of the same purport.

To him &c. To him [when he had approached, the learned man[thus spoke.] The words *et cœtera* refer to other Vedic texts, such as Approach me from thy place, thereafter I will tell thee. The author defines and exemplifies erroneous imputation.

Which is no serpent &c. [Erroneous imputation is the allegation that the unreal is the real, like the judgment in respect of a rope which is no serpent, that it is a serpent.] It may be asked: How can there be erroneous imputation of the unreal which has no characters? For it is only that which has been observed somewhere before and is real, which is any where erroneously imputed. So also Bhaṭṭáchárya has said: How can an unreal chimerical character, like that of flowers in the sky, be erroneously imputed to the unreal? It is that whereof the existence and characters are known that may be erroneously imputed or not. For misconception is caused by an impression, and to possess an impression it is an antecedent cognition that is supposed. Again, the antecedently cognised is not necessarily truly existent, since [cognition and real existence] do not infer each other's absence, for reminiscence, the product of impressions, is observed of objects perceived dubiously or erroneously. Thus, for example, the common experience, I once had a doubt whether in such and such an ant-hill there was a post or a man, I had an erroneous conception that such and such a piece of nacre was silver. Nor can it be objected that this is the reminiscence of doubt and mistake only, and not of their objects; for were they without objects, there could be no object to the reminiscence. The erroneous imputation of inexplicable unreality to an object truly existent is rightly affirmed, inasmuch as it is possible to erroneously impute subsequent objects antecedently perceived by error, as in dreaming [in which an unreal object is cognised, remains in the memory, and may be recalled to consciousness]; and inasmuch as the stream of error being without beginning, does not admit occasion for a diallelon, regress to infinity &c.

The author proceeds to define in their order reality and unreality.

Reality &c. [Reality is the absolute, existent, intelligence, and bliss, without a second.] It may be urged that if the absolute only be real, then since the individuated spirit and nacre &c. are unreal, the definition of erroneous imputation would prove too narrow, agency &c. being erroneously imputed to individuated spirit, and silver &c. to nacre &c. This objection we refuse, since the individuated spirit is only imagined in the supreme, and agency and the like are erroneously imputed to the supreme when tinged with conditions, since it is an error which involves conditions; and it is only metaphorically that nacre and the like are called the substratum of the silver, because it is appropriated to the intelligence which is the substratum of the silver &c.; but nacre is not properly the substratum, for the substratum of erroneous imputation (of reality) to the unreal is unknown. Nacre and the like are not unknown, since ignorance is unintelligent, and exists only in intelligence, and is only the object of intelligence. Accordingly it has been said: He who has ignorance, has error, and acts not aright; not so the unintelligent,

---

प्रदीप्तेति । निदाघमध्यान्हार्कमरीचिसंव्याप्तस्वल्लाटः प्रदीप्तशिराः शिशिरतरमधुरजलपरिपूर्णो महाह्रदो जलराशिः । रिक्तपाणिर्न सेवेत राजानं देवतां गुरुमिति वचनमाश्रित्याह ॥

उपहारपाणिरिति । उपहारः उपायनं पाणौ यस्य सः । श्रोत्रियं ब्रह्मनिष्ठमिति गुरोर्विशेषणे श्रोत्रियत्वं वेदवेदाङ्गपारगत्वं वेदान्तार्थपारगत्वं वा प्रकृतोपयोगात् श्रोत्रियग्रहणमकामहतत्वावृजिनत्वयोरप्युपलक्षणार्थं । यश्च श्रोत्रियोऽवृजिनोऽकामहतइति श्रुतेः । अकामहतत्वं ब्रह्मलोकानन्दादर्वाचीनेष्वानन्देषु वितृष्णत्वं । अवृजिनत्वं यथोक्तकारितया निष्पापत्वं । ब्रह्मनिष्टत्वमौपनिषदब्रह्मात्मविज्ञानपरिपूर्णत्वमित्यर्थः । उक्तविधिना यथोक्तगुरूपसर्पणं विद्यार्थिनावश्यंकर्त्तव्यमित्यत्र प्रमाणमाह ॥

समिदिति । समिच्छब्दो गुरोरनुरूपोपायनमात्रोपलक्षणपरः । आदिपदात् अर्च्चावान् पुरुषो वेदआचार्य्यादेवविद्याविदितासाधिष्टाभवतीत्यादि श्रुत्यन्तरसंग्रहः । शिष्योपसत्त्यनन्तरं गुरोरुपदेशक्रमं दर्शयति ॥

स परमेति । स गुरुः परमकृपालुः प्रपन्नजनक्लेशदर्शन जातकरुणः तन्मतिप्रकाशनप्रवृत्तिर्व्वा तदुक्तमभियुक्तैः एतदेवहि दयालुलक्षणं यद्विनेयजनबुद्धिवर्द्धनमिति । उक्तार्थज्ञापिकां श्रुतिं यठति ॥

तस्मादिति । तस्मा एतत् प्रोवाच । यद्बेशमतेनमोपसीद ततस्त उर्ध्वं वक्ष्यामीत्यादिश्रुत्यन्तरमादिशब्दार्थः । अध्यारोपं सदृष्टान्तं लक्षयति ॥

असर्पेति । ननु कथमवस्तुनोनिरात्मकस्यारोपोयावताक्वचिद्दृष्टपूर्व्वस्य सत एव क्वचिदारोपो दृष्टः उक्तञ्च भट्टाचार्य्यैः अध्यस्यते खपुष्पत्वमसत्कथमवस्तुनि । प्रज्ञातगुणसत्ताकमध्यारोप्येत वा न वेति उच्यते संस्कारजन्योहि भ्रमस्तत्सिद्धये पूर्व्वप्रतीतिमात्रमपेक्ष्यते । न पुनः पूर्व्वप्रतीतस्य परमार्थसत्त्वमपि व्यतिरेकाभावात् । संशयविपर्य्ययदृष्टेष्वपि संस्कारकार्य्यस्मृतिदर्शनात् तथाहि लोकेऽनुभवोऽस्मिन् वल्मीककूटे मम पुरा स्थाणुः पुरुषो वेति सन्देह आसीत् अस्मिन् शुक्तिशकले रजतमिदमिति भ्रमआसीदित्यादि नच संशयविपर्य्ययोरेवेयं स्मृतिर्न तदर्थयोरिति वाच्यं अर्थशून्ययोस्तयोः स्मृतिविषयत्वानुपपत्तेः तस्मानिद्राद्यविलक्षणस्य पूर्व्वपूर्व्वभ्रमदृष्टस्याप्युत्तरोत्तरारोपोपपत्तेर्भ्रमप्रवाहस्य चानादित्वेनान्योन्याश्रयानवस्थादिप्रसङ्गानवकाशाद्युक्तं वस्तुनि परमार्थसति अवस्तुनोऽनिर्व्वचनीयस्यारोपइत्यर्थः । वस्त्ववस्तुनी लक्षयतिक्रमेण॥

since it is cognised only by knowledge; therefore ignorance has not an unintelligent substratum. Erroneous imputation has therefore, been said to be the appearance of the indifference of a true reality from a false reality. If the intelligent and unintelligent be thus by erroneous imputation conceived to be mutually identical, the universe will be a void, inasmuch as what is erroneously imputed is false. Thus this objection of certain thinkers is refused. During error the apparent element being false, the non-apparent element is real. Therefore it has been said by competent authority: It is that which is erroneously imputed that appears in errors, nought else appears in misconceptions; for identity with the form of the rope, the piece of nacre, the desert, and the moon, is not apprehended [in the familiar instances of illusory appearance, viz. the serpent falsely surmised in the rope, silver in nacre, water in the desert, and the reflection of the moon in the moon.] But should we impute erroneously two unrealities, this objection of yours would be possible. If this pair, the real and the unreal, be erroneously surmised in each other then how can you bring the charge against us that we maintain a void? It has been, then, rightly stated that reality is the absolute, existent, intelligence, bliss, without a second, and that it is herein that unreality, the complement of ignorance and unintelligent things which are its products, is erroneously surmised.

The author proceeds to analyse ignorance.

A. E. G. and G. D.

वस्त्वित्यादिना । ननु ब्रह्मण एव वस्तुत्वे जीवस्य शुक्त्यादेश्चावस्तुत्वात् कर्तृत्वाद्यध्यारोपे रजताद्यध्यारोपे चाव्याप्तिः स्यादिति चेन्न ब्रह्मण्येव जीवत्वस्यापि कल्पितत्वात् कर्तृत्वादेश्च सोपाधिकभ्रमतयोपाध्यनुरक्ते ब्रह्मण्येवाध्यारोपात् शुक्त्यादेरपि रजताद्यधिष्ठानचैतन्यावच्छेदकत्वेनाधिष्ठानत्वमुपचर्य्यते न पुनस्तस्यैवाधिष्ठानत्वं अज्ञातं हि वस्त्वारोपाधिष्ठानं नच शुक्त्यादेरज्ञातत्वमस्ति जडत्वात् चिन्मात्रनिष्ठत्वाच्चिन्मात्रविषयत्वाच्चाज्ञानस्य । तदुक्तं यस्याज्ञानं भ्रमस्तस्य भ्रान्तोऽसम्यक्करोति सः । जडं न विद्यावेद्यत्वान्नातोऽज्ञानं जडाश्रयमिति । ततश्च सत्यवस्तुनो मिथ्यावस्तुनासम्भेदावभासोऽध्यारोप इत्युक्तं भवति । एतेन चिज्जडयोः परस्परतादात्म्याध्यासे शून्यमेव जगतस्तत्त्वं स्यादध्यस्तस्य मिथ्यात्वादिति केषाञ्चिच्चोद्यं निरस्तं । भ्रमकाले परिस्फुरदंशस्य मिथ्यात्वेऽप्यपरिस्फुरतोऽंशान्तरस्य विद्यमानत्वात् तदुक्तमभियुक्तैः । अध्यस्तमेव हि परिस्फुरति भ्रमेषु नान्यत् कथञ्चन परिस्फुरति भ्रमेषु । रज्जुत्वशुक्तिशकलत्वमरुस्थलत्वचन्द्रैकताप्रभृतिकानुपलम्भनेनेति । किन्त्वनृतद्वयमिहाध्यसितव्यमिष्टं स्याच्चेत्तदा भवति चोद्यमिदं त्वदीयं । सत्यानृतात्मकमिदं मिथुनं मिथश्चेदध्यस्यते किमिति शून्यकथाप्रसङ्ग इति च । तस्माद्युक्तमुक्तं वस्तु सच्चिदानन्दाद्वयं ब्रह्म तस्मिन्नज्ञान तत्कार्य्याखिलजडसमूहस्यावस्तुनोऽध्यारोप इति । अज्ञानं व्युत्पादयति ॥

PRESS ADVERTISEMENT.

SANSKRIT and ENGLISH DICTIONARY, being an abridgment of PROFESSOR WILSON'S DICTIONARY, with an Appendix explaining the use of affixes in Sanskrit, by PANDIT RÁM JASAN, cloth bound and lettered. Rs. 10.

THE RÁMÁYAN of VÁLMIKÍ, translated in English verse by RALPH T. H. GRIFFITH, M. A. Vol. I. Rs. 6. Vol. II. Rs. 6. and Vol. III. Rs. 4-8. Postage 6 annas each.

THE HITOPADEŚA, containing the Sanskrit text with a Hindí translation and a Glossary, by PANDIT RÁMAJASAN, 2nd Edition. Rs. 2.

THE LAGHU KAUMUDÍ, a Sanskrit Grammar with an English version, commentary and references by DR. BALLANTYNE, late Principal of the Sanskrit College, Benares, re-edited by RALPH GRIFFITH, M. A., Principal of the Sanskrit College, Benares. *Price 8 Rupees.*

"The Translation of Laghu Kaumudi made by the late Dr. Ballantyne has enabled even beginners to find their way through the Labyrinth of Native Grammar." *Prof. Max Müller.*

"THE BIBLE FOR THE PANDITS." The first three chapters of Genesis diffusely and unreservedly commented, in Sanskrit and English,—with an introduction, by JAMES R. BALLANTYNE, LL. D. Rs. 3.

"THE PANDIT." A Monthly Journal of the Benares College, devoted to Sanskrit Literature. Terms. Rs. 12-0. for annum, including postage.

The object of the *Pandit* is to publish rare Sanskrit works which appear worthy of careful editing hereafter: to offer a field for the discussion of controverted points in Old Indian Philosophy, Philology, History and Literature; to communicate ideas between the Aryan scholars of the East and of the West; between the Pandits of Benares and Calcutta and the Sanskritists of the Universities of Europe.

THE BÁLARÁMÁYANA, a Drama by RÁJAŚEKHARA, edited by PANDIT GOVINDA DEVA ŚÁSTRI, Professor of Hindu Astronomy in the Sanskrit College, Benares. Rs. 2.

THE PRASANNARÁGHAVA, a Drama by Jayadeva, edited by PANDIT GOVINDA DEVA ŚÁSTRI. Rs. 1-4.

LAGHU KAUMUDÍ VYÁKARAN, in Sanskrit (only); the text taken from Dr. Ballantyne's Edition. Re. 1-2.

BODH CHATUSPATH CHANDRIKÁ, a Hindí and Sanskrit Primer. Annas 3.

PRINTED AND PUBLISHED BY THE PROPRIETORS, E. J. LAZARUS AND CO. AT THE MEDICAL HALL PRESS, BENARES.

काशीविद्यासुधानिधिः

श्रीगणेशाय नमः

श्रीमद्विजयिनीदेवीपाठशालोदयोदितः । प्राच्यप्रतीच्यवाक्पूर्वापरपक्षद्वयान्वितः ॥ १

अङ्करश्मिः स्फुटयतु काशीविद्यासुधानिधिः । प्राचीनार्यजनप्रज्ञाविलासकुमुदोत्करान् ॥ २ ।

THE PANDIT.

A Monthly Journal, of the Benares College, devoted to Sanskrit Literature.

No. 76. Benares, September 2nd, 1872. Vol. VII.

॥ चिन्तामणेः शब्दखण्डम् ॥

ननु विषभक्षणव्यावृत्तमिष्टसाधनत्वमेव कृतिसाध्यताज्ञाने विषयतया विशेषणमस्तु, स्वविशेषणवत्ताज्ञानजन्यत्वापेक्षया लघुत्वात् । (१) किं चोपायचिकीर्षा इष्टसाधनताज्ञानसाध्या, उपायेच्छात्वात्, वृष्टीच्छावत् । भोगचिकीर्षायां तदभावादप्रयोजकमिष्टसाधनत्वमिति चेत् । न । तत्रापि स्वविशेषणधीजन्यत्वाभावेन तत्र तस्याप्रयोजकत्वात् । कृतिहेतुचिकीर्षायां तत्प्रयोजकम् । न च भोगचिकीर्षा तथा । उपायचिकीर्षात एव कृतिसंभवादिति चेत्, (२) तुल्यमिति । (३) मैवम् । साध्यत्वसाधनत्वयोर्विरोधेनैकत्र ज्ञातुमशक्यत्वात् । (४) असिद्धावस्थस्य हि साध्यत्वं सिद्धतादशायां तदभावात् । सिद्धतादशायां च साधनत्वम् । असिद्धावस्थावतः कार्यानुत्पत्तेः । (५) तथा च पाकादेरसिद्धत्वसिद्धत्वज्ञाने साध्यत्वसाधनत्वग्रहः । (६) न चैकमेकेनैकदा सिद्धमसिद्धं चेति ज्ञायते । न च स्वरूपगतता साध्यत्वसाधनत्वयोरतो न विरोध इति वाच्यम् । यदि हि स्वरूपनिबन्धनं तदुभयं तदा तत्स्वरूपं सदैव सिद्धमसिद्धं च स्यात् । (७) भिन्ननिरूपितत्वेपि तयोः (८) सिद्धत्वासिद्धत्वे अनवगम्याज्ञानात् । (९) तस्मात्समयभेदौपाधिक एव तदुभयसंबन्धः पाके । (१०) इदानीं साध्यत्वमग्रे साधनत्वं ज्ञायतइति चेत् । न । इदानीमग्रिमपदार्थयोर्नानात्वादननुगमेन व्याप्त्यग्रहात् । (११) शब्देन तथा प्रतिपादयितुमशक्यत्वात् ।

॥ शब्दचिन्तामणिव्याख्या रुचिदत्तीया ॥

(१) किं चेति । पक्षे हेतौ च जन्यपदं बोध्यम् । उपायपदं भोगचिकीर्षायां व्यभिचारवारणाय । (२) तुल्यमिति । इष्टसाधनत्वधीरपि कृतिहेतुचिकीर्षायामेव हेतुरित्यर्थः । (३) मैवमिति । तथा च प्रामाणिकं गौरवं न दोषायेति भावः । विरोधमेव स्फुटयति । (४) असिद्धेति । प्रकृते किमायातमत आह । (५) तथा चेति । ननु साध्यत्वं साधनत्वं च पाकादेः स्वरूपमेवातो न विरोध इत्यत आह । (६) न चेति । नन्वेकनिरूपितयोस्तयोर्विरोधेऽपि कृतिनिरूपितं साध्यत्वमिष्टनिरूपितं च साधनत्वं न विरुद्धमित्यत आह । (७) भिन्नेति । के चित्तु स्वरूपगतत्वं यदि स्वरूपावच्छिन्नत्वं तदाह । यदीति । अथ स्वरूपेऽन्यावच्छेदेन सत्त्वं तदा तदवच्छेदकमुक्तमेवेत्युक्तदोषानिवृत्तिरित्याह । भिन्नेतीत्याहुः ॥ (८) सिद्धत्वेति । तदवगमे च विरोध एवेति भावः । (९) तस्मादिति । तथा च समयभेदेनोभयज्ञानं संभवति, न त्वेकदेति भावः । (१०) इदानीमिति । शाखाद्यवच्छेदेन वृत्ते संयोगतदत्यन्ताभावग्रहवत्समयभेदेन तदुभयग्रहे न विरोध इति भावः । ननु व्याप्तिग्रहेऽनुमानाभावेपि शब्दात्तद्ग्रहः स्यादत आह । (११) शब्देनेति । शक्यतावच्छेदकैकरूपाभावादिति भावः । अस्तु वा कथं चित्तद्ग्रहस्तथापि साधनत्वादिविषयत्वेन कार्यताज्ञानस्य प्रवर्त्तकत्वे गौरवमित्याह ।

(१२) गैारवाच्च । (१३) न च कृतितः सिद्धमिष्टसाधनमिति ज्ञानात् चिकीर्षा, नहि सिद्धं कश्चिच्चिकीर्षति । कृतेः पूर्वं कृतितः सिद्धमिति ज्ञानाभावाच्च । न च कृतिसाध्यत्वेन पाकादेरिष्टसाधनत्वात्साधनत्वमपि (१४) साध्यम् । नहि कृतिसाध्यत्वेन पाकस्यैादनसाधनतेत्युक्तम् । तस्मात्कृतक्रियमाणविलक्षणं (१५) कृत्यनन्तरभविष्यत्तारूपं कृतिसाध्यत्वं चिकीर्षाप्रयोजकम् । तादृशं च साधनत्वविरोध्येव । (१६) किं च साधनत्वस्य सिद्धमात्रधर्मत्वात्साधनत्वज्ञानमिच्छाविरोधि । नहि कश्चित्सिद्धमिच्छतीत्युक्तम् । (१७) एतेन वृष्ट्यादाविष्टसाधनताज्ञानमुपायेच्छाकारणत्वेन क्लृप्तमिति निरस्तम् । कथं तर्हि स्वतोऽसुन्दरे वृष्ट्यादाविच्छा । तत्साध्येष्टज्ञानादिति गृहाण ।

अन्ये तु सुखदुःखाभाव(१८)तत्साधनेषु इच्छाप्रयोजकमनुगतमुद्देश्यत्वं पुरुषार्थपदवेद्यं धर्मान्तरमस्ति । अनुगतकार्यस्यानुगतकारणनियम्यत्वात् (१९) तदेव च दुःखतत्साधनव्यावृत्तं सुखतत्साधनादैा चिकीर्षाप्रयोजकमिति । न च दुःखविरोधित्वमेव तथास्तीति वाच्यम् । सहानवस्थाननियमस्य विरोधस्यासंभवात् । वध्यघातकस्यैभाव(२०)कसमये सामानाधिकरण्याभावस्य च (२१) यत्नादिसाधारणत्वादिति ।

तन्न । (२२) तदज्ञानेपि सुखत्वज्ञानादिच्छोत्पत्तेः । नहि सुखे ज्ञाते धर्मान्तरज्ञानं विना नेच्छा, तथात्वे स्वतः प्रयोजनत्वहान्यापत्तेः । तदेव हि स्वतः प्रयोजनं (२३) यदवगतं सत् स्ववृत्तितयेष्यते । किं चानुगतधर्मकल्पनापि कारणे । न च सुखादीच्छाकारण,मनागतत्वात्, किं तु तदवगमः । (२४) तर्हि सुखादिज्ञाने तत्स्वरूपसदेवेच्छाप्रयोजकमस्त्विति चेत् । न । यथा ह्युद्देश्यत्वं सुखज्ञानादिषूत्पद्यते (२५) अन्यतरत्वा(२६)त्तृणारणिमणिन्यायाद्वा तथेच्छैव जायताम् । (२७) कृतिसाध्यत्वं च कृतैा सत्यामग्रिमक्षणे स्वरूपं न कृतिं विना । (२८) क्षेमसाधारणं चैतत्, कृतिसाध्यत्वं च न (२९) कृतेः पूर्वम् ।

---

(१२) गैारवाच्चेति । यद्यप्येकत्र साधनत्वमपरत्र स्वविशेषणवत्ताप्रतिसंधानजन्यत्वमिदानीमन्तर्भावश्चोभयत्र तथाप्ययिमपदार्थान्तर्भावाद्गैारवं बोध्यम् । ननु कारणतावच्छेदकावच्छिन्ने कारणत्वमिति कृतिसाध्यत्वविशिष्टे साधनत्वमतः साध्यधर्म एव साधनत्वमिति न विरोध इत्याशङ्क्य निषेधति । (१३) न चेति । (१४) साध्यमिति । साध्यधर्म इत्यर्थः । वैलक्षण्यमेवाह । (१५) कृत्यनन्तरेति । नन्वेकावच्छेदेनोभयग्रहाभावेप्येकत्र धर्मिणि तदुभयग्रहे न विरोधः, वृक्षः संयोगी तदभाववांश्चेतिव,दित्यस्वरसादाह । (१६) किं चेति । (१७) एतेनेति । साधनत्वस्येच्छाविरोधित्वेनेत्यर्थः । एवं च पूर्वोक्तानुमाने दृष्टान्तासिद्धिरिति भावः । (१८) तदिति । तत्साध्यत्वप्रकारिकेच्छा भवन्ती सुखत्वमिवावच्छेदकतया वृष्टिमपि विषयीकरोतीति भावः । एतज्ज्ञाने सिद्धत्वादिकं न भासते इत्यभिमानः । (१९) तदेवेति । कृतिसाध्यत्वप्रकारकज्ञाने सतीति शेषः । न च बलवदनिष्टसाधनत्वज्ञाने प्रवृत्त्यापत्तिः । उद्देश्यत्वज्ञाने तादृशज्ञानाभावादिति भावः । बलवदनिष्टाननुबन्धिकृतिसाध्यत्वज्ञानं तथेत्यन्ये ॥ ननु सुखदुःखयोः स्वसाक्षात्कारमात्रनिवर्त्यत्वात्तयोर्वध्यघातकभावो न शङ्कास्पदमपीत्यन्यं विरोधपदार्थमाह । (२०) एकेति । (२१) यत्नेति । यत्नविशेषो बोध्यः । स्वरूपसतस्तस्य तथात्वे ऽतिप्रसङ्ग इति ज्ञानस्यैव तथात्वं वाच्य,मेवं सत्याह । (२२) तदज्ञानेपीति । (२३) यदवगतमिति । येन रूपेण ज्ञानं यदिच्छाप्रयोजकमित्यर्थः । पाकादिकं तु पाकत्वादिना ज्ञातं न तथा, किं त्विष्टसाधनत्वेनेति भावः । नन्वेवं भोगोपि स्वतः पुरुषार्थः स्यादिति चेत्, न । इष्टापत्तेरित्येके । भोगे इच्छा नास्त्येवेत्यन्ये । तद्भिन्नत्वेन विशेषणादित्यपरे । (२४) तर्हीति । अनुगतत्वेनावच्छेदकतया तत्प्रयोजकमित्यर्थः । (२५) अन्यतरत्वादिति । यद्यपि बहूनां प्रक्रान्तत्वादन्यतमत्वादित्यर्हति, तथापि द्वैा द्वावभिप्रेत्यैतदुक्तम् । तेषां समूहः पापीयानितिवदिति भावः । (२६) तृणेति । एकशक्तिमत्त्वादित्यर्थः । एतच्चोपलक्षणं, सुखादेर्जन्यधर्मानाश्रयत्वात्तदसंभव इत्यपि बोध्यम् । यद्यपि नित्यधर्मपक्षे नोक्तदोषस्तथापि तादृशपदार्थे प्रमाणमेव नास्तीति तात्पर्यम् । नन्वेवं दुःखानुत्पादार्थितया प्रायश्चित्ते प्रवृत्तिर्न स्यात् । अनुत्पादस्य प्रागभावरूपतया कृत्यसाध्यत्वादित्यत आह । (२७) कृतिसाध्यत्वं चेति । (२८) क्षेमं, दुःखप्रागभावादिकम् । एतच्च प्रत्यक्षप्रकाशे प्रपञ्चितम् । ननु यदि कृत्ययिमक्षणघटितं कृतिसाध्यत्वं तदा कृतिपूर्वं कृतिकाले च तदभावात्पाकादैा कृतिसाध्यत्वव्यवहारो न स्यादित्यत आह । (२९) न कृतेः पूर्वमिति । एतच्चोपलक्षणं कृतिकालेपि द्रष्टव्यम् । तथा चोक्तकृतिसाध्यत्वं तदा नास्त्येवेति तत्तदा न व्यवह्रियतएव, किं तु कृत्यर्हत्वं कृ-

(३०) ननु कृतौ नष्टायां सन्नपि धर्मो न कार्यः । तथा च कथं कार्ये ऽपूर्वे कामिनो ऽन्वयः, क्षणिकत्वेन क्रियातुल्यत्वात् । न । (३१) यद्वृत्तिकाम्यसाधनत्वं तत्र कार्यताबुद्धेः प्रयोजकत्वात् (३२) न तु कार्यताविशिष्टस्य काम्यसाधनतेति व्याप्तिः । ननु पाकादौ कृतिसाध्यताज्ञानं न प्रत्यक्षेण, कृत्यनन्तरं पाके सति साध्यताज्ञानं तस्मिन्सति कृतिरित्यन्योन्याश्रयात् । कृति साध्यतोत्तीर्णे चिकीर्षाकृत्योरसंभवाच्चेति चेत् । न । (३३) पाको मत्कृतिसाध्यः, (३४) मत्कृतिं विना ऽसत्त्वे सति मदिष्टसाधनत्वात् ।

तिजननस्वरूपयोग्यत्वं व्यवह्रियत इति भावः । कृतेर्विशेषणत्वमादाय शङ्कते । (३०) नन्विति । यद्यपि नैयायिकमतसाधारणमिदं, तथापि शङ्कामात्रमेतदित्येके । तटस्थशङ्केयमित्यन्ये । उपलक्षणत्वमालम्ब्य परिहरति । (३१) यद्वृत्तीति । (३२) न त्विति । गौरवादिति भावः । न प्रत्यक्षेण बोध्येति शेषः । (३३) पाको मत्कृतिसाध्य इति । इदानीं पाकः स्वेच्छाधीनमत्कृतिसाध्य इति बोध्यं, तेन प्रवर्त्तकं ज्ञानमुत्पद्यते । नन्विदानीं मत्कृतिसाध्यत्वमप्रसिद्धम् । एतदनुमानावतारकाले अनुमानकर्त्रा इदानींपदार्थतयाभिमतेन कालेन विशिष्टस्य साध्यस्य क्व चिदप्यग्रहादिति चेत् । भ्रान्तोसि, नहीदानीं पदार्थस्य व्यापकतावच्छेदकप्रविष्टत्वेनानुमितिविषयत्वमनुमन्यामहे, किं तु यथा यत्र हेतुस्तत्र साध्यमिति दैशिकव्याप्त्या यत्र देशे हेतुग्रहस्तद्देशीयत्व साध्यस्य पक्षधर्मताबलात्सिध्यति । तथा यदा हेतुस्तदा साध्यमिति कालिकव्याप्त्या यत्र काले हेतुग्रहस्तत्कालीनत्वं साध्यस्य सिध्यति, पक्षधर्मताबलादेव न त्वन्यतरस्यापि साध्यकोटिप्रवेशः, प्रकृतेपि व्याप्तिप्रदर्शके ऽग्रिमग्रन्थे यदातदेतिपदोपादानात्कालिकव्याप्तिरभिमता, तथा च तत्कालावच्छिन्नपाकस्य पक्षत्वपर्यवसानात् पक्षधर्मताबलादेव तल्लाभ इति नोक्तदोषः । नन्वेवमेतत्काले पाकः कृतिसाध्य इति ज्ञानेपि इदानींतनी या मत्कृतिस्तत्साध्यताज्ञानं यत्प्रवर्तकं तत्र स्यादिति चेत्, न । आद्यस्यैव प्रवर्त्तकत्वात् । अन्त्यस्य तथात्वे इदानींतनत्वस्य कृतिविशेषणत्वेन साध्यप्रवेशे यस्येत्याद्यग्रिमग्रन्थोदाहरणस्यान्यथाकारत्वापत्तेः । नन्वेवमिदानींतनकृत्या चिरकालसाध्ये भाविराज्यादौ प्रवृत्तिर्न स्यात् । एतत्काले कृतिसाध्य इति ज्ञानाभावादिति चेन्न । तत्र हि तदुपाये देवताराधनादौ प्रवर्त्तते, तत्र च तज्ज्ञानमक्षतमेव । अत एव यत्र तदुपाये न तादृशं ज्ञानं तत्र तदा न प्रवर्त्तत एव ।

के चित्तु व्याप्तावपि न कालप्रवेशस्तदानीं कृतिसाध्यताधीस्तु वर्तमानकालस्य पक्षतावच्छेदकत्वाद्बुद्ध्यनुमिताविवेत्याहुः ॥

अन्ये त्विदानीं कालस्य साध्यप्रवेश एव, तथा च तत्प्रवेशो हेतावपि । न चैवं साध्याप्रसिद्धिरिति वाच्यम् । पूर्वमिदानीं मत्कृतिसाध्य इति क्व चिदनुमितौ जातायां तत्र व्याप्तिग्रहे जाते प्रकृतानुमानकाले पूर्वाप्रसिद्धस्य कालविशेषस्य विशेषणतयैव पूर्वप्रसिद्धसाध्यसाधारणेन व्यापकतावच्छेदकरूपेण सिद्धिसंभवात्, विशिष्टवैशिष्ट्यज्ञाने विशेषणतावच्छेदकप्रकारकज्ञानस्यैव तन्मते हेतुत्वात्, न्यायमते सामान्यलक्षणया पर्वतीयवह्निभानवत्तत्कालविशेषस्यापि भानाच्च । न च पूर्वमिदानीं पदार्थत्वेन भातस्याधुनेदानींपदार्थस्य चैकरूपत्वाभावात्कथं पूर्वसाध्यसाधारणमेकं व्यापकतावच्छेदकमिति वाच्यम् । इदानींपदस्य हि प्रवृत्तिनिमित्तमनुगतमवश्यं वाच्यम् । अन्यथा तस्य नानार्थतापत्तेः । तथा च तदेकमनुगतं व्यापकतावच्छेदकं स्या,दन्यथा पर्वतोयमिदानीं वह्निमानिदानींतनधूमवत्त्वादित्याद्यनुमितिरपि न स्यात् । अत एवेदानीं कृतिसाध्य इति शाब्दबोधोपि । अन्यथा ऽननुगमेन संकेताग्रहात्तदनुपपत्तेरित्याहुः ॥

तच्चिन्त्यम् । इदानीमग्रिमपदार्थयोर्नानात्वादननुगमेन व्याप्त्यग्रहादिति पूर्वग्रन्थविरोधात् । पाके कृतिसाध्यत्वं सिध्यत् सिद्धे बाधादित्याद्यग्रिमग्रन्थविरोधात्, इदानींत्वस्य पूर्वकालसाधारणत्वेन तत्रापीदानीं कृतिसाध्यत्वस्याबाधात्, अन्यथा ऽननुगमस्यैव वज्रलेपायमानत्वात् । साध्ये हेतौ च कालप्रवेशे यदातदेति कालिकव्याप्त्युपदर्शनविरोधाच्च । कालस्याधेयकोटिप्रविष्टत्वेन काले ऽधिकरणे हेतुसाध्यसामानाधिकरण्याग्रहात् । अन्यथा दैशिकव्याप्तावपि तद्देशीयत्वस्य साध्यान्तर्भावापत्तेः । यच्चोक्तं पूर्वमिदानीं मत्कृतिसाध्य इति क्व चिदनुमितौ व्याप्तिग्रह इति, तन्न । तत्रापि साध्याप्रसिद्ध्या तादृशानुमित्यसंभवात् । यदि चोक्तरीत्या कालिकव्याप्त्या तत्रानुमिति,स्तदा प्रकृतेपि तथास्तु । इदानीं यदेव कालशक्तेः शक्तिग्रहसहकारितया स्वरूपसदेवोच्चारणकालत्वमन्यद्वा धीनियामकं, यथा ऽहमादिपदे उच्चारयितृत्वादिकं, नियमतस्तथैव बोधना,दतो न शाब्दबोधानुपपत्ति,र्न वा तस्य नानार्थता, तद्वदेव । अत एवानुमाने शब्दस्वभावोपन्यासस्याप्रयोजकत्वादिति ग्रन्थकृता प्रागुक्तम् । इदानीं वह्निमानित्यनुमितिरपि कालिकव्याप्तिग्रहे सत्युक्तयुक्त्यैव यत्रैतत्कालीनधूमस्तत्रैतत्कालीनवह्निरिति विशिष्य कालघटितहेतुसाध्ययोर्दैशिकव्याप्तिग्रहे क्व चिदन्यथापि । न च प्रकृतेपि तथा ऽस्त्विति वाच्यम् । सर्वत्र तथा व्याप्त्यग्रहा,त्तथा सत्यतीतपाकादौ व्यभिचारप्रसङ्गाभावेनाग्रे तन्निरासस्यासङ्गतत्वापाताच्चेति दिक् । (३४) मत्कृतिं विनेति । इच्छाधी-

(३५) दैवाद्यनधीनत्वे सति मदिष्टसाधनत्वाद्वा, मद्भोजनवदित्यनुमानात्स्वकृतिसाध्यताज्ञानम् । (३६) यस्य यदिष्टसाधनं यत्कृतिं विना यदा न संभवति तत्तदा तत्कृतिसाध्यमिति व्याप्तेः । (३७) असिद्धस्येष्टसाधनत्वाभावात् । बलवदनिष्टाजनकत्वं च लिङ्गविशेषणं, तेन मधुविषसंपृक्तान्नभोजने न व्यभिचारः । अतीतपाके कृतिसाध्यतोत्तीर्णे च न व्यभिचारः, (३८) सामान्यतस्तस्यापि कृतिसाध्यत्वात् । (३९) अतीततादशायां चातीतौदनइच्छाविरहेणेष्टसाध-

---

नमत्कृतिं विनेत्यर्थः । तेन प्राणपञ्चकसंचारे न व्यभिचारः । सत्यन्तं वृष्टौ व्यभिचारवारणाय । मत्कृतिं विनेत्यत्र मत्पदं परकृतपाके मदिष्टसाधने व्यभिचारवारणाय । सत्यन्तमात्रोपादाने श्रमे व्यभिचारादुत्तरप्रतीकम् । मदिष्टेत्यत्र मत्पदं तत्रैव व्यभिचारवारणाय । तस्यापि मदीयश्रमार्थिमदीयशत्रोरिष्टसाधनत्वात् । ननु श्रमवदन्येच्छाधीनमत्कृतिसाध्ये मदिष्टसाधने जलसंयोगादौ व्यभिचारः । न च स्वेच्छाधीनमत्कृतिं विनेति विवक्षितं, तथा सति तत एव श्रमेपि व्यभिचारवारणे मदिष्टेत्यस्य वैयर्थ्यापत्तेरिति चेत्, न । अन्येच्छाधीनमत्कृतिसाध्यमदिष्टसाधनान्यत्वे सतीत्यस्यापि विशेषणत्वात् । यद्यप्यन्येच्छाधीनमत्कृतिसाध्यान्यत्वे सतीत्येव कृते श्रमेपि व्यभिचारवारणादुत्तरं प्रतीकं व्यर्थमेव, तथापि तस्य हेत्वन्तरतया प्रकृते न दोष इति ध्येयम् । ननु यदा वस्तुतो बलवदनिष्टाननुबन्ध्येव तदनुबन्धित्वेन मत्कृतिं विना ऽसदेव तां विना ऽसत्त्वेन मदिष्टासाधनमेव मदनिष्टसाधनत्वेन भ्रमविषयः, तदा तत्र वस्तुतो निरुक्तहेतुरस्ति कृतिसाध्यत्वं नास्तीति कालिकव्याप्तौ व्यभिचारः । न च तत्त्वेन ज्ञायमानत्वं प्रकृतहेत्वर्थः, तच्च तत्र दोषान्नास्तीति वाच्यम् । तत्त्वेन ज्ञायमानत्वेपि निगडनिश्चलदेहस्यामवातजडीकृतकलेवरस्य वा क्रियानुत्पादे व्यभिचारतादवस्थ्यादिति चेन्न । उक्तभ्रमादेव प्रवृत्तिप्रतिबन्धे तद्व्यापारस्यानिर्व्यूढतया तेनेष्टाजननात् । इष्टसाधनत्वस्यैव तत्राभावेन हेत्वसत्त्वात् । असिद्धस्येत्याद्यग्रिमग्रन्थपर्यालोचनया साधनपदस्य फलोपहितपरत्वलाभात् । अत एव संप्रति मदिष्टसाधनतायोग्ये चिरभाविपाकादौ न व्यभिचारः । अनिर्व्यूढतादशायामाश्रयाभावेन स्वरूपयोग्यत्वस्याप्यभावाच्च । न चेष्टसाधनत्वस्य कृतिं विना ऽसत्त्वस्य च सिद्धासिद्धधर्मतया विरोधादेकदा एकधर्मिगतत्वेन भानं न स्यादिति वाच्यम् । एकत्र स्थूलकाले द्वयोरवच्छेदभेदमादाय ग्रहात् । वस्तुतः कदा चिदिष्टसाधनस्य मत्कृतिं विना यदा ऽसत्त्वं तदा मत्कृतिसाध्यत्वमित्येव व्याप्तिः, न त्विष्टसाधनतांशेपि तत्कालान्वयः । तदिदमुक्तम्, यस्य यदिष्टसाधनत्वं यत्कृतिं विना यदा न सिध्यतीति । यदि चैवं चिरभाविपाकादौ व्यभिचारशङ्का तदा तदन्यत्वमपि देयम् । नन्वेवमिष्टसाधनत्वेनैव सामञ्जस्ये किं बलवदनिष्टाननुबन्धित्वोपादानेन । न च तदनुपादेयमेवेति वाच्यम् । बलवदनिष्टाननुबन्धित्वं चेत्यग्रिमग्रन्थविरोधादिति चेन्न । बलवदनिष्टाजनकत्वस्य साध्ये विवक्षिततया भ्रमकृते मधुविषसंपृक्तान्नभोजने व्यभिचारवारकत्वेन तदुपयोगात् । न च साध्ये तदुपादानं विफलमिति वाच्यम् । स्वेच्छाधीनकृतिसाध्यत्वेन ज्ञायमाने मधुविषसंपृक्तान्नभोजने बलवदनिष्टजनकत्वग्रहदशायां न प्रवृत्तिरिति तद्विषयत्वेनापि ज्ञानस्य प्रवर्त्तकत्वात् । न च तावता तज्ज्ञानभिन्नज्ञाने हेतुतास्त्विति वाच्यम् । तदभावकारणत्वे गौरवात् । जनकज्ञानं विघटयत एव ज्ञानस्य प्रतिबन्धकत्वाच्च । अत एव न्यायनयेपि तद्विषयतया ज्ञातस्य प्रवर्त्तकत्वम् ॥

अन्ये तु संजातबाधस्य मधुविषसंपृक्तान्नभोजने कृतेरनुत्पादाद्यथाश्रुतसाध्येपि व्यभिचारात्तद्वारणायैव तद्विशेषणमिति वदन्ति ।

तच्चिन्त्यम् । तदा तस्यानिष्पन्नत्वेनेष्टाजनकतया इष्टसाधनत्वस्याभावेन तत एव तद्वारणात् । निष्पन्नत्वे च स्वेच्छाधीनकृतिसाध्यत्वस्यापि तत्र सत्त्वात्, जीवनयोनिकृतेस्तदनुत्पत्तेश्च । अन्यथा वस्तुतो बलवदनिष्टाननुबन्धिनि भोजनादौ तदनुबन्धित्वभ्रमदशायां कृतेरनुत्पादेन तद्विशेषणदानेपि व्यभिचारस्य वज्रलेपायमानत्वादिति संक्षेपः ॥

यत्तु पिष्टकादिमध्यस्थितविषभक्षणे तृप्तिरूपेष्टसाधने स्वेच्छाधीनकृत्यसाध्ये यथाश्रुते व्यभिचार इति तद्विशेषणमिति । तत्तुच्छम् । तन्मध्यास्थितमीनादिभोजने तथापि व्यभिचारात् । (३५) दैवादीति । आदिपदेन परकृत्यादिपरिग्रहः, तदनधीनत्वं च तदनधीनोत्पत्तिकत्वं, तेन न नित्ये इष्टसाधने व्यभिचारः । यद्यपि पाकस्यादृष्टजन्यतया दैवानधीनत्वमसिद्धं तथापीच्छाधीनमत्कृत्यसमवहितसामग्र्यनधीनोत्पत्तिकत्वे सतीत्यत्र तात्पर्यम् । एतच्च वृष्टौ व्यभिचारवारणाय । अन्यच्च पूर्वहेतुवद्बोध्यम् । (३६) यस्येति । एतच्चोपलक्षणम् । अग्रिमहेतावप्येवमेव योज्यमिति भावः । अप्रयोजकत्वमाशङ्क्याह । (३७) असिद्धस्येति । तथा चेष्टसाधनत्वदर्शनादेव सिद्धत्वे सिद्धे विशेषनिषेधात् परिशिष्टं कृतिसाध्यत्वं पर्यवस्यतीत्यर्थः । (३८) सामान्यत इति । यदा हेतुरस्ति तदा साध्यमपीति कालगर्भव्याप्तौ न व्यभिचार इत्यर्थः । यदा चातीतदशायां साध्यसत्त्वं तदा हेत्वभावादेव न व्यभिचार इत्याह । (३९) अतीतेति । तदा मत्कृतिं विना असत्त्वमपि

नत्वाभावात् । (४०) अत एव निदाघदूनदेहो वर्षति वारिदे तोयदात्तोयलाभसंभावनायां वा सरोऽवगाहने न प्रवर्त्तते। इष्टसंतापशान्तिसाधनस्य तोयसंबन्धस्य स्वकृतिं विनापि सिद्धिप्रतिसंधाने लिङ्गाभावेन स्वकृतिसाध्यत्वज्ञानाभावात् । यदा च मत्कृतिं विना स न संभवतीति प्रतिसंधत्ते तदा प्रवर्त्तते । (४१) यस्य संतापशान्तिमात्रमिष्टं स सरोऽवगाहनस्येष्टसाधनत्वमेव न प्रतिसंधत्ते । उपस्थितवृष्टितोपि तत्संभवादिति केचित् । तन्न । (४२) तोयसंबन्धत्वेन संतापशान्तिसाधनत्वं, तस्य च सरोऽवगाहनेपि सत्त्वात् । अन्यथा वृष्टिरपि तत्साधनं न स्यात् । सरोवगाहनादपि तत्सिद्धेः । (४३) कार्यसाधनत्वं च कृतिसाध्यत्वे न लिङ्गं, पाकादिवदोदनादावपि प्रवृत्तेः पूर्वं कृतिसाध्यत्वज्ञाने हेत्वभावात्। नन्वेवं लिङ्गज्ञानमेव प्रवर्त्तकमस्तु, प्राथमिकत्वा,दावश्यकत्वाच्च । न च लाघवात् कृतिसाध्यत्वज्ञानं तथा । कृतिसाध्यतानुमितौ तदा मानाभावेन युगपदुपस्थित्यसंभवात् । (४४) प्रवृत्तिसामग्र्या ऽनुमितिप्रतिबन्धाच्चेति चेत् । न । लिङ्गज्ञाने कृतिसाध्यत्वाप्रकाशे (४५) तत्प्रकारकचिकीर्षायां तस्याहेतुत्वात् । (४६) अत एव लिङ्गान्तरज्ञानमपि न प्रवर्त्तकम् । ननु पाकादिः कृतः क्रियमाणो वा न पक्षः, तस्य कृतिसाध्यत्वे (४७) बाधात्। नाप्यनागतः। भाविपाके मानाभावेनाश्रयासिद्धेः। पाकत्वं भविष्यद्वृत्ति, सामान्यत्वा,द्गोत्ववदिति मानमिति चेत् । न । मानाभावेन गोत्वेपि तस्या(४८)प्रसिद्धेः । पाकमात्रं पक्ष इति चेत् । न । मात्रार्थो यदि पाकत्वं, तदा बाधो, लिङ्गासिद्धिश्च । सर्वपाकपरत्वे च तस्य सिद्धभागे बाधो, ऽनागतभागे चाश्रयासिद्धिः । (४९) वर्त्तमानाद्युदासीनः पाकः पक्षः, पाकसामान्ये च कृतिसाध्यत्वं न बाधितमित्यपि न । (५०) सिद्धस्य पक्षत्वं नासिद्धस्येत्यनुमितेः सिद्धविषयत्वे बाधात् । भिन्नविषयत्वे वा सिद्धविषयेच्छाप्रवृत्त्याद्यनुत्पादकत्वाच्च । (५१) कृतक्रियमाणसाधारणकृतिसाध्यत्वज्ञानादेवासिद्धविषया चिकीर्षा कृतिश्चोत्पद्यते । अनन्यगतिकत्वेन तथाकरणस्वभावकल्पनादिति चेत्, तर्हि (५२) यादृशं कृतिसाध्यत्वं चिकीर्षायां प्रकारः तादृशं ज्ञाने नास्तीत्यन्यप्रकारकज्ञानादेव चिकीर्षा स्यात् । तथा च लिङ्गज्ञानमेव प्रवृत्तिहेतुरस्तु प्राथमिकत्वात् ॥ यत्तु स्मृतपाके कृतिसाध्यत्वासंसर्गाग्रहात्प्रवृत्तिः, स चासंसर्गाग्रह इष्टसाधनताज्ञानादिति । तन्न । स्मृतपाकस्य (५३) सिद्धत्वेन तत्र कार्यतासंसर्गाग्रहे ऽनुमानबाधात् । स्मृतपाकस्य सिद्धत्वं तदा न गृह्यतइति चेत् । (५४) तर्हि स्मृतपाकस्य सिद्धत्वग्रहे ओदनार्थी पाके न प्रवर्त्तेत । (५५) सिद्धौदनोपि पाके तृप्तोपि भोजने प्रवर्त्तेत । तत्र पाकादौ सिद्धत्वग्रहात्तदसंसर्गग्रह इति चे,त्तुल्यम् । (५६) अपि च स्मृतपाके (५७) कार्यत्वासंसर्गाग्रहाद्विद्यमानासंसर्गाग्रहाद्विसंवा-

---

नास्तीत्यपि बोध्यम् । मत्कृतिं विना असत्त्वे सतीत्यस्य प्रयोजकत्वमाह । (४०) अत एवेति। विशेष्यभागाप्रतिसंधानादेव तत्र लिङ्गाप्रतिसंधानमित्येकदेशिमतमुपन्यस्य दूषयति । (४१) यस्येति। (४२) तोयेति। तोयविशेषसंबन्धत्वेनेत्यर्थः। स्वैकदेशिमतं दूषयति । (४३) कार्येति । कृतिसाध्येत्यर्थः । ननु सामग्र्येव मानमत आह । (४४) प्रवृत्तीति । तथा च सामग्र्येव नेति भावः । (४५) तत्प्रकारकेति । यद्यपि गुरुमते शुक्तिविशेष्यकरजतत्वप्रकारकेच्छाया अतथाभूतज्ञानसाध्यतया व्यभिचारस्तथापि यत्प्रकारिकेच्छा सा तत्प्रकारकज्ञानव्यतिरेकप्रयुक्तव्यतिरेकप्रतियोगिनीति नियमो, ऽस्ति च भेदाग्रहहेतुतावच्छेदकतया रजतत्वप्रकारकज्ञानं तत्रापि प्रयोजकमिति भावः।(४६) अत एवेति। तत्रापि कृतिसाध्यत्वाप्रकाशादन्यथा सिद्धसाधनापत्तेरिति भावः । (४७) बाधादिति । कालिकव्याप्त्या पक्षधर्मताबलात् तत्काले कृतिसाध्यत्वं सिध्यति, तच्च तत्र बाधितमित्यर्थः । (४८) अप्रसिद्धेरिति । एतच्चोपलक्षणम् । आत्मत्वचैत्रत्वादौ व्यभिचारोऽपि बोध्यः। (४९) वर्त्तमानेति । विशिष्य यदि पक्षः क्रियते तदैतद्दूषणावकाशो नान्यथेत्यभिमानः । सामान्यस्य यावद्विशेषनियतत्वाद् असिद्धस्याज्ञानात् सामान्येनापि रूपेण सिद्धस्यैव पक्षत्वादुक्तदोषतादवस्थ्यमित्याह । (५०) सिद्धस्येति । (५१) कृतेति । यद्यपि सिद्धत्वेन ज्ञानादेः समानविषयत्वं प्रागुक्तं, तथापि भिन्नवादिमतेनेदम् । (५२) यादृशमिति । कृत्यनन्तरं भविष्यत्तारूपमित्येके । इदानीं कृतिसाध्यरूपमित्यन्ये । (५३) सिद्धत्वेन, सिद्धत्वज्ञानेनेत्यर्थः । (५४) तर्हीति । तदा तत्र कार्यत्वासंसर्गग्रहादिति भावः । तथापि यदि न तद्ग्रहस्तत्राह । (५५) सिद्धौदनोपीति। ननु विशेषरूपेणासंसर्गग्रहेपि सामान्येन रूपेणासंसर्गाग्रहः स्यादित्यरुचेराह । (५६) अपि चेति। विद्यमानासंसर्गाग्रहे हेतुमाह । (५७) कार्यत्वेति।

दिनी प्रवृत्तिः स्यात् । (५८) किं चैवं सिद्धपाकज्ञानादज्ञाते ऽसिद्धे पाके इच्छाप्रवृत्ती स्यातामिति ॥

(५९) अत्र ब्रूमः । पाके कृतिसाध्यत्वं सिद्ध्यत् सिद्धे बाधादनागतं पाकमादाय सिद्ध्यति । (६०) पक्ष-

---

(५८) किं चेति । यद्यप्यत्रेष्टापत्तिः, समानप्रकारकतया च नातिप्रसङ्गस्तथापि समानविषयकहेतौ संभवति भिन्नविषयको न कल्प्यतइति भावः । (५९) अत्रेति । प्राभाकराभिप्रायं ब्रूम इत्यर्थः । (६०) पक्षतेति । पक्षतावच्छेदकधर्मावच्छिन्नधर्मिज्ञानस्यैव मम पक्षज्ञानत्वाचाश्रयासिद्धिरिति भावः । नन्वेवं पक्षधर्मताज्ञानस्यानुमितिहेतोरनुपपत्तिः । अप्रसिद्धस्यैव पक्षस्यानुमितिविषयताभ्युपगमेन पूर्वं तद्वृत्तितया हेतोरग्रहात् । न च पक्षधर्मताज्ञानमहेतुरेव परस्य, अत एव तदुपदर्शनमुपनयेपि न तेनेष्यतइति वाच्यम् । तस्य हेतुवचनेनैव तल्लाभात् । अत एव व्याप्यतावच्छेदकप्रकारेण पक्षधर्मताज्ञानं तत्प्रकारकव्याप्तिस्मरणं च तस्य परामर्श इति चेत् । अत्र वदन्ति । पक्षे साकाङ्क्षीभूयोपस्थितस्य हेतोरसंसर्गाग्रह एव तस्यानुमितिहेतुत्वेनाभिमतः । अस्ति च पाकत्वावच्छेदेन प्रकृतहेतोरसंसर्गाग्रहः, सिद्धपाके तदसंसर्गग्रहेपि पाकत्वावच्छेदेन तदभावात्, अन्यथा पाको न मदिष्टसाधनमित्याद्यभिलापो ऽपि स्यात् । एवं यदवच्छेदेन हेतोरसंसर्गाग्रहस्तद्धर्मावच्छिन्नविषयानुमितिर्भवतीत्येव सकलसाधारणं, भवति च प्रकृतेपि पाकत्वं तथेति तदवच्छिन्नानागतपाकविषयकानुमितिः । इयांस्तु विशेषः । यत्राविद्यमानस्य लिङ्गासंसर्गस्याग्रहस्तत्रानुमितिः प्रमा, यत्र विद्यमानस्य लिङ्गासंसर्गस्याग्रहस्तत्रासंसर्गाग्रहजन्यलैङ्गिकासंसर्गाग्रहमात्रम् । न च भिन्नप्रकारकविरोधिज्ञानस्याप्रतिबन्धकत्वात्सिद्धपाकत्वेन कृतिसाध्यत्वासंसर्गे गृहीतेपि पाकत्वेन सिद्धपाकस्यैवानुमितौ भानमस्त्विति वाच्यम् । असदसंसर्गाग्रहस्य प्रमानुमितौ कारणत्वेन कलमबीजस्य यवाङ्कुरइव भ्रमानुमितावसामर्थ्यात्, सिद्धपाकविषयत्वेनुमितेर्भ्रमत्वौचित्यात् । नन्वेवं यत्र सन्निकृष्टपर्वते धूमासंसर्गे गृहीतेपि व्यवहिते धूमवति तदग्रहात् पर्वतत्वावच्छेदेन स न गृहीत इति यथोक्तसामग्रीसत्त्वादसन्निकृष्टपर्वतविषयानुमितिः स्यादिति चेन्न । तत्र साकाङ्क्षीभूय हेतोरभानात् । घटघटत्वे इत्यादिसमूहालम्बनाद्वैलक्षण्येनायं घट इत्यत्र यथा साकाङ्क्षीभूय घटत्वभानं तथेहापि लिङ्गभानं विवक्षितमिति, तच्चिन्त्यम् । पक्षसाकाङ्क्षीभूयोपस्थितत्वं किं पक्षवृत्तितयोपस्थितत्व,मुत पक्षेण सममगृहीतासंसर्गीभूयोपस्थितत्व,मन्यद्वा । नाद्यः । प्रकृते ऽनागतस्य प-

तावच्छेदकधर्मसामानाधिकरण्यं साध्यमानस्य लिङ्गेन सिद्ध्यतीत्यनुमाने क्लृप्तत्वात् । यथा प्रसिद्धवह्निबाधेपि

क्षत्वेन तदभावात् । अन्यथा ऽसंसर्गाग्रहहेतुत्वोपवर्णनानुपपत्तेः । न द्वितीयः । असन्निकृष्टपर्वतविषयानुमित्यापत्तेः । नान्त्यः । तदनिरुक्तेः । किं च संसर्गाग्रहस्यानुमितिसामग्रीत्वे हेत्वभावेनान्यथाख्यातिनिराकरणं तस्य न स्यात् । असंसर्गाग्रहद्वैविध्येनानुमितिद्वैविध्यसंभवात् । अत एव प्राभाकरैः प्रत्यक्षखण्डे ऽन्यथाख्यात्यवसरे उक्तं "न च शब्दानुमानाभासात् सा, योग्यतादिमत्तया शब्दस्य लिङ्गवत्तया पक्षस्य ज्ञानाच्छाब्दानुमिती, नचाभासे तज्ज्ञानमस्ति, हेत्वभावादेवेति" । अपि च लाघवात्पक्षे लिङ्गसंसर्गग्रहस्यैवानुमितिहेतुत्वम् । एतेन पाकत्वं मदिष्टसाधनत्वसमानाधिकरणमिति प्रकारेण वस्तुगत्या ऽनागतं पाकं वैशिष्ट्यकोटावन्तर्भाव्य प्रत्यक्षेण गृह्यते तद्ग्रह एव पक्षधर्मताग्रहो विवक्षितः । न चैवं पक्षधर्मताग्रहे ऽनागतपाकस्य विषयत्वादप्रसिद्ध एव पाकः पक्षधर्मताबलेन सिध्यतीत्ययमयन्यविरोध इति वाच्यम् । विशेष्यतया स्वातन्त्र्येण ततस्तत्सिद्धिरित्यभिप्रायात् । न च समानाधिकरणमित्यधिकरणं विशेषणमतस्तदुपस्थितिं विना कथं विशिष्टधीरिति वाच्यम् । गुरुनये विशेषणतावच्छेदकप्रकारकविशेषणान्तरबोधादेव विशिष्टवैशिष्ट्यबोधे ऽपूर्वविशेषणविषयत्वस्वीकारादित्यपास्तम् । असन्निकृष्टपर्वतविषयानुमित्यापत्तेः । तत्रापि पर्वतत्वं धूमसमानाधिकरणमिति प्रकारेणासन्निकृष्टपर्वतवैशिष्ट्यकोटावन्तर्भाव्य पक्षधर्मताग्रहसंभवात् ।

अन्ये तु सिद्धे एव पाके पाकत्वावच्छेदेन पक्षधर्मताज्ञानं समानप्रकारकज्ञानस्यैव विरोधितया विशेषतो व्यतिरेकग्रहेपि सामान्यतोन्वयधीसंभवात् । असंसर्गाग्रहवत् । न चैवं पक्षधर्मताभ्रमादनुमितिभ्रमापत्त्या विसंवादिप्रवृत्त्यापत्तिः । पाकत्वाधिकरणाधिकरणत्वलक्षणपरम्परासंबन्धस्य विद्यमानस्यैव विषयीकरणेन प्रतीतेरभ्रान्तत्वात् । अत एवैकाकारमपि लोहितः स्फटिक इत्यादि ज्ञानं संसर्गभेदेन प्रमा ऽप्रमा चेति सर्वदर्शनसिद्धान्तः । विषयाबाधेन पक्षधर्मताभ्रमेपि अनुमितिप्रमात्वाच्च । न चैवं साध्यभानमपि परम्परासंबन्धेन सिद्धपाकविषयकमेवास्तु, तत् कुतो ऽनागतपाकलाभ इति वाच्यम् । यत्संबन्धपुरस्कारेण हि व्याप्तिज्ञाने सामानाधिकरण्यप्रतियोगितया साध्यं विषयस्तद्व्याप्तिज्ञानजन्यायामनुमितौ तेनैव संबन्धेन पक्षे साध्यं भासते, अन्यथानुमितौ संबन्धभाने नियमो न स्यात् । प्रकृते च कृतिसाध्यत्वे साक्षात्संबन्धेन व्याप्तिर्गृहीतेति कथं तत्परम्परासंबन्धेनानुमितिविषयः, तथा च सिद्धे बाध एवेत्यनागतसिद्धिः । न च परम्परासंबन्धघटकानागतव्यक्तेर-

वह्निमात्रं न बाधितमित्यसिद्धोपि वह्निः सिद्ध्यति, तथा (६१) प्रसिद्धपाके कृतिसाध्यत्वबाधेपि पाकमात्रे न बाधितमित्यप्रसिद्धं पाकमादाय तत्सिद्ध्यति । अप्रसिद्धयोः पक्षसाध्ययोः सिद्धावविशेषात् । (६२) तस्माद् (६३) असिद्धस्य क्व चित्सिद्धे ऽसिद्धे (६४) सिद्धस्य च क्व चित् ।

अप्रसिद्धस्य वा सिद्धे सिद्धिस्तेनानुमा त्रिधा ॥

(६५) अन्यथा कृतिसाध्येष्टसाधनतापक्षेपि पाकादौ

भाने दोषतादवस्थ्यमिति वाच्यम् । वैशिष्ट्यस्याज्ञातस्यैव विशिष्टज्ञानविषयत्वाभ्युपगमादिति वदन्ति ॥

तदपि चिन्त्यम् । तन्मते हेतोरपि कालघटिततया ऽप्रसिद्धत्वेन परम्परासंबन्धेनापि तद्विशिष्टबुद्ध्यसंभवात् । विशेषणतावच्छेदकप्रकारकज्ञानं विना विशिष्टवैशिष्ट्यबोधासंभवात् । किं चैवमसन्निकृष्टपर्वतविषयानुमित्यापत्तिर्दुर्वारा, तत्रापि सन्निकृष्टपर्वते धूमाभावग्रहेपि पर्वतत्वाधिकरणाधिकरणत्वलक्षणपरम्परासंबन्धेन धूमविशिष्टप्रत्ययसंभवात् । न चेष्टापत्तिः । तदा तत्र वह्न्यर्थिप्रवृत्त्यापत्तेः । अथ यत्संबन्धपुरस्कारेण व्याप्तिग्रहे सामानाधिकरण्यप्रतियोगितया हेतुभानं तेन संबन्धेन पक्षधर्मताज्ञानमनुमितिप्रयोजकम् । अन्यथा ऽतिप्रसङ्गात् । धूमे च संयोगरूपसाक्षात्संबन्धस्तथा । तथा च परम्परासंबन्धेन तज्ज्ञानमकिंचित्करमिति चेद्, हन्तैवं प्रकृतेपि हेतौ साक्षात्संबन्धपुरस्कारेण व्याप्तिग्रह इति परम्परासंबन्धेन तज्ज्ञानमकिंचित्करमिति तुल्यम् ॥ अपि च सिद्धपाके परम्परासंबन्धेन यदि हेतुभानं तदा समानप्रकारकज्ञानस्यैव विरोधित्वमित्यभिधानं व्यर्थम् । सिद्धपाकत्वावच्छेदेनापि परम्परासंबन्धेन हेतुग्रहसंभवात् । तत्संबन्धावच्छिन्नतदभावग्रहस्यैव तत्संबन्धविषयकतज्ज्ञाने विरोधित्वात् । अत एव साक्षात्संबन्धावच्छिन्नलौहित्याभावनिश्चयेपि परम्परासंबन्धविषयकं लोहितः स्फटिक इत्यादिज्ञानं सर्वसिद्धं, तस्मादसिद्धपाकसिद्धिरिति चिन्त्यम् ॥

यत्तु सुखत्वप्रकारकसिद्धसुखज्ञानादिच्छास्वाभाव्यादनागते सुखेच्छासमानप्रकारकत्वस्यैव तन्मते नियामकत्वात् । ततस्तदिच्छाग्राहिणा मनसा तद्विशेषणतया ऽनागतसुखज्ञानं ततस्तत्पक्षकभोजनसाध्यत्वानुमित्या पक्षधर्मताबलादनागतभोजनसिद्धौ तत्पक्षकौदनसाध्यत्वानुमानानन्तरं च तत्पक्षकपाकसाध्यत्वानुमानेनोक्तरीत्या ऽनागतपाकसिद्धौ कृतिसाध्यत्वानुमानम् । यद्वेष्टसाधनत्वानुरोधेन तादृशसुखोपस्थित्यावश्यकत्वे तत्सुखं पाकसाध्यौदनसाध्यभोजनसाध्यमित्यनुमित्यैकदैवावच्छेदकतया ऽनागतपाकादिभानमिति ॥

तच्चिन्त्यम् । ज्ञानस्याप्रत्यासत्तित्ववादिनां गुरूणामिच्छाप्रत्यासत्तित्वानभ्युपगमात् । न्यायनयेपि तदनङ्गीकारात् । कथं तर्हि सुखमिच्छामीति धीः । न च गुरूणां विशिष्टवैशिष्ट्यनिर्वाहाय विशेषणतावच्छेदकधीध्रौव्ये तत एव तदुत्पत्तिरिति वाच्यम् । विशेषणतावच्छेदकज्ञानेन हि नेच्छाविषयो विषयीकृत इति सिद्धसुखविषयं सुखमिच्छामीति ज्ञानं स्यात्, न त्विच्छाविषयसुखविषयं, तथात्वे चान्यथाख्यात्यापत्तेरिति चेत् । पाककृतौ मानसप्रत्यक्षायां पाकस्यैवेति तदभिधानाद् इच्छायां न विषयवैशिष्ट्यानुभवः । इच्छाकृत्योस्तुल्यत्वात् । किं तु तटस्थविशेषणतावच्छेदकज्ञानोपस्थितसिद्धसुखासंसर्गाग्रहमात्रमिति नेच्छाप्रत्यासत्तिः । अतो नोक्तप्रकारः । न्यायनये तटस्थविशेषणज्ञानोपस्थितासिद्धसुखासंसर्गाग्रहात्तथा धीः । अस्तु वा ज्ञानलक्षणप्रत्यासत्तिरित्यत्र ज्ञानपदस्य सविषयपरतया इच्छादिकमपि प्रत्यासत्तिः । गुरूणां तु न तथा, ऽपसिद्धान्तादिति ॥

वयं तु ब्रूमः । मीमांसकानां नैयायिकानां चानागतगोचरं ज्ञानमस्तीत्यविवादम् । भविष्यति पाको भविष्यति वृष्टिरित्यनुभवात् । तदुपायः सामान्यलक्षणा ऽनुमानं वा । तदप्यतीतानागतविषयकव्याप्तिग्रहजन्यं प्रसिद्धमात्रविषयकव्याप्तिग्रहजन्यं वेति विवादः । एवं च वर्त्तमानः पाकः पाकपूर्ववर्ती पाकत्वात्, अथ वा वर्त्तमानं दिनं पाकप्रागभाववद्दिनत्वादित्यादिना पक्षधर्मताबलादनागतपाकसिद्धौ कृतिसाध्यत्वानुमानम् । न च चरमपाकादौ व्यभिचारः । परेषां महाप्रलयानङ्गीकारेण चरमत्वासिद्धेः । तद्विशेषस्य वा हेतुत्वम्, अन्यथा न्यायनये तदनुमानं न स्यात् । सामान्यलक्षणा च यद्यस्ति तदोभयत्र मते । नास्ति चेत्तदोभयत्र । न हि अभ्युपगमाधीनं तस्या बोधकत्वम् । एवं च कथं चिदनागतसुखानुमितौ तत्र भोजनसाध्यत्वाद्यनुमित्या ऽप्यनागतभोजनादिसिद्धौ न कोपि दोषः । अन्यथैतत्संध्यायामहं कृतिसाध्यसंध्यावन्दन इत्यनुमितावप्यनागतसंध्यावन्दनभानं न स्यात् । यदि च विशेषणतावच्छेदकप्रकारकज्ञानादपूर्वसिद्धिः समानप्रकारकत्वेनेति मन्यसे, तदा तुल्यम् । एवं चानागतज्ञानसंभवे पक्षधर्मताग्रहसंभवादसंसर्गाग्रहाद्यनुमितिसामग्र्यन्तरकल्पनमप्रामाणिकमित्यप्रसिद्धपाकसिद्धिरित्यसङ्गतमेवेति संक्षेपः । (६१) प्रसिद्धपाकइति । यद्यपि यथाश्रुतं साध्यं तत्र न बाधितं तथा ऽपि कालिकव्याप्त्या तदा कृतिसाध्यतानुमितौ बाधः । अत एव तदा पक्षधर्मताग्रहानुपपत्तिरपीति भावः । (६२) तस्मादिति । (६३) असिद्धस्य, पर्वतीयवह्नेः । (६४) सिद्धस्य, गोत्वादेः । तृतीयमुदाहरणं प्रकृतमेव बोध्यम् । (६५) अन्यथेति । सामान्यलक्षणा नास्तीत्यभिमानः । यदि च कृत्य-

कृतिसाध्यत्वं कथमवगम्येत । (६६) किं च तवापीष्टसाधनताज्ञानात् कथं वृष्ट्यादाविच्छा, सिद्धत्वस्येच्छाविरोधित्वादनागतस्य ज्ञातुमशक्यत्वात् । अत एव सिद्धविषयत्वनिरासेन सुखादिज्ञानात्फलेपि नेच्छेति न वृष्ट्यादाविष्टसाधनतापि । न च वृष्ट्यादिसाध्येष्टज्ञानाद्वृष्ट्यादाविच्छा, इच्छायाः सिद्धासिद्धवृष्ट्यादितत्फलविषयत्वविकल्पग्रासात् । अथ सामान्यलक्षणप्रत्यासत्त्या वृष्ट्यादित्वेन सुखादित्वेन च सिद्धासिद्धवृष्ट्यादितत्फलविषयकं ज्ञानमुत्पन्नं तेन सिद्धं विरोधिनं त्यक्त्वा ऽसिद्धविषयेच्छोत्पद्यते । यदि च सामान्यलक्षणा नास्ति तदा येन रूपेणेष्टसाधनत्वग्रहः तेन रूपेणाज्ञाते ऽसिद्धे वेच्छोत्पद्यते । अन्वयव्यतिरेकाभ्यां तादृशज्ञानस्य तादृशेच्छाजनकत्वावधारणात् । सुखेच्छायामप्येवमिति चेत् । (६७) तर्हि ममापि पाकत्वावच्छेदेन कृतिसाध्यताज्ञानादनागते चिकीर्षा, तच्च ज्ञानं सकलपाकविषयं संनिकृष्टविषयं वेत्यन्यदेतत् । बालस्य व्याघ्राद्यग्रहे ऽप्याद्या प्रवृत्तिर्जीवनादृष्टोद्बोधितजन्मान्तरसंस्कारजन्या (६८) स्तनपानं कार्यमिति स्मरणात् । तवापीष्टसाधनतास्मरणात्तत्प्रवृत्तिरनन्यगतिकत्वात् । न च जन्मान्तरेपि पर्यनुयोगः, जन्मधाराया अनादित्वात् । प्रत्यक्षानुमानमूलकत्वाच्च नान्धपरम्परा ॥

साध्यताज्ञानं प्रतिबन्धकमिष्टसाधनताज्ञानमेव प्रवर्तकमिति ब्रूयात्तत्राह । (६६) किं चेति । (६७) तर्हीति । यद्यपि सिद्धपाकविषयकं कृतिसाध्यताप्रकारकं ज्ञानं नेच्छाप्रकारीभूतकृत्यनन्तरभविष्यत्तारूपकृतिसाध्यत्वप्रकारकमिति भिन्नप्रकारकतया तस्येच्छाजनकत्वानुपपत्तिः, अन्यथा ऽप्रसिद्धपाकविशेष्यककृतिसाध्यतानुमित्यनुसरणमनर्थकं, तथापि चिकीर्षाकालासंभिन्नविषयाननुभाविनं कृत्या साधयामीत्याकारेति मतेनेदं बोध्यम् । (६८) स्तनपानमिति । स्मरणस्य स्वविशेषणवत्ताप्रतिसाधनजन्यत्वाभावात्ततः कथं प्रवृत्तिरित्यत्रोक्तमधस्तात् ॥

॥ अथ वेदान्तसूत्रशैवभाष्यद्वितीयाध्यायस्य ॥

॥ प्रथमपादारम्भः ॥

॥ स्मृत्यनवकाशदोषप्रसङ्ग इति चेन्नान्यस्मृत्यनवकाशदोषप्रसङ्गात् ॥ १ ॥

अतीतेऽध्याये सच्चिदानन्दस्वरूपे सर्वज्ञत्वसर्वशक्तिकत्वादिस्वरूप[1]लक्षणे सकलजगज्जन्माद्युपलक्षणे[2] सर्वविलक्षणे सर्वात्मनि विरूपाक्षत्वकृष्णपिङ्गलत्वनीलकण्ठत्वादिविशिष्टलीलामङ्गलस्वभावे[1] भवशिवमहादेवपरमेश्वरशब्दादिमुख्यवाच्ये परमकारुणिके परब्रह्मणि शिवे निखिलवेदान्तवाक्यानां तदनुगुणानां स्मृत्यादीनां च तात्पर्येण समन्वयोऽभिहितः । इदानीमनेनाध्यायेन तस्य समन्वयस्य वेदान्तविरुद्धस्मृतितर्कादिभिर्विरोधः परिह्रियते । प्रथमं सांख्यस्मृतिविरोधः परिह्रियते । अस्मिन् सर्वत्र पूर्वोक्तसमन्वयो विषयः । इह वैदिकसमन्वयस्य सांख्यस्मृत्या संकोचोऽस्ति न वेति संदेहः । कथम् । ब्रह्मणो जगत्कारणत्वं वेदोऽभिधत्ते, कपिलस्मृतिः प्रधानस्य; कपिलो हि महातपस्वी, ततस्तद्वचनमपि[2] प्रमाणमेव । वेदोऽपि भगवानखिल[3]प्रमाणसार्वभौमः, स चाप्रामाण्यगन्धमपि न सहते । तदनयोः कस्य केन बाध इति संशयप्राप्तिः । तत्र[4] सांख्यस्मृतेरनवकाशत्वेन प्रबलत्वाद् वेदस्य धर्मे सावकाशतया दुर्बलत्वादनवकाशया स्मृत्या वेदस्य संकोचो युक्त इति चेद्वदति पूर्वपक्षी । वयमपि नेति वदामः । कथम् । अन्यासां वेदाविरोधिनीनां मन्वादिस्मृतीनामनवकाशदोषप्रसङ्गात् ।

"अप एव ससर्जादौ तासु वीर्यमवासृजत्" ।

इत्यादिना,

"हिरण्यगर्भं पश्यति जायमानम्" ।

इत्यादिप्रत्यक्षश्रुतिसिद्धब्रह्मकारणत्ववादिन्या[5]नुमेयश्रुतिमूलायाः सांख्यस्मृतेरेव बाधः प्रामाणिकजनपरिग्राह्य इति ॥ १ ॥

॥ इतरेषां चानुपलब्धेः ॥ २ ॥

इतरेषां च मन्वादीनां सर्वज्ञानां स्मृतिषु कपिलदृष्टस्य प्रधानकारणत्वादेरनुपलब्धेः प्रधानस्मृति[6]रनागममूलैवेति वक्तुं युक्तम् । अतः सांख्यस्मृत्या समन्वयस्य न संकोचः ॥ २ ॥

॥ एतेन योगः प्रत्युक्तः ॥ ३ ॥

योगाङ्गप्रतिपादिनी हिरण्यगर्भस्मृतिरपि प्रधानकारणत्वमेव वदति । तथाच यथा प्रधानकारणत्ववादिन्या सांख्यस्मृत्या विरोधाद् वैदिकसमन्वयस्य संकोचो नाभवत्, तथानयापि श्रुत्या संकोचो भवति न वेति[7] संदेहे भवतीति वदामः । कथम् । श्वेताश्वतरोपनिषदि ब्रह्मसाक्षात्कारहेतुतया

१—दिधर्म—इति पा० ।

२—न्मादिकारणत्वाद्युपलक्षणे इति पा० ।

१—रूपस्वभावे इति पा० ।

२ तद्वचनं इति पा० ।

३ वेदो हि भगवान् निखिल—इति पा० ।

४ इह इति पा० ।

५—कारणत्वपराभिर्मन्वादिस्मृतिभिस्तद्विरुद्धाभिधायिन्या—इति पा० ।

६ कपिलस्मृति—इति पा० ।

७ न भवति भवति वेति इति पा० ।

प्रपञ्चिता योगविद्या । तथाच सांख्यस्मृतेरनुमेयश्रुतिमूलत्वेऽपि[1] प्रत्यक्षश्रुतिमूलया[2] हिरण्यगर्भस्मृत्या प्रधानकारणवादिन्या ब्रह्मवादिसमन्वयस्य संकोचो युक्त इति प्राप्ते ब्रूमः । न योगस्मृत्या श्रुतिसमन्वय[3]संकोचः । तस्य "योगश्चित्तवृत्तिनिरोध" इत्यारभ्य वैदिकाष्टाङ्गयोगप्रतिपादनमात्रे हि तात्पर्यं, नावैदिके प्रधानकारणवादेऽपि, यदि तत्रापि तात्पर्यं, सांख्यस्मृतिवदस्या अपि प्रत्याख्यानमेव न्याय्यम् । ततो हिरण्यगर्भस्मृत्यापि प्रधानकारणवादिन्या ब्रह्मकारणवादिश्रुतिसमन्वयस्य न संकोच इति युक्तमेव[4] ॥ ३ ॥

पुनरपि सांख्यतर्कबाध्यतां समन्वयस्याशङ्क्य परिहरति ॥

॥ न विलक्षणत्वादस्य
तथात्वं च शब्दात् ॥ ४ ॥

यथा सांख्यस्मृत्या समन्वयस्य न बाधः, तथा तर्केणापि बाधोऽस्ति न वेति संशये पूर्वपक्षः प्रवर्तते । सर्वथा तर्कबाध्योऽयं ब्रह्मकारणतावादः । कथम् । ब्रह्मणः[5] प्रपञ्चस्यान्योन्य[6]विलक्षणत्वाच्च तत्कार्यत्वं संभवति । कुतो वैलक्षण्यमवगतमिति चेत् । शब्दादेव । "विज्ञानं चाविज्ञानं च" इत्यादिशब्दो हि प्रपञ्चस्य विकारास्पदत्वाज्ञत्वाद्यपुरुषार्थरूपत्वमभिधत्ते । अतः सत्यज्ञानानन्दरूपाद् ब्रह्मणोऽस्य वैलक्षण्यं सिद्धम् ॥ ४ ॥

कथमनयोर्गोमहिषयोरिव कार्यकारणभावः संभवति ॥

॥ अभिमानिव्यपदेशस्तु
विशेषानुगतिभ्याम् ॥ ५ ॥

यद्यचेतनत्वेन चेतनाद् ब्रह्मणो विलक्षणमिदं जगत् । तत् कथमस्मिन्ननुस्यूतं पृथिव्यब्रवीत् । "आपो वा अकामयन्त" "शृणोत ग्रावाणो विदुष" इत्यादौ चेतनकार्यव्यपदेशः । तस्मादिदं चेतनमेव सर्वं जगत् । अतो ब्रह्मप्रपञ्चयोश्चेतनाचेतनरूपतया न वैलक्षण्यमिति शङ्क्यं, यतस्तथा सर्वत्र ज्ञानकार्यव्यपदेशस्तु तदभिमानिदेवताविषय एवेत्यवगम्यते । "हन्ताहमिमास्तिस्रो देवता" इति देवताशब्दविशेषात्, "अग्निर्वाग्भूत्वा मुखं प्राविशत्" इत्यादिनाचिद्वस्त्वभिमानिदेवतानुगतेश्च । तस्मादचेतनत्वादिना विलक्षणमेव जगद्[7] ब्रह्मणः । ततोऽस्य कार्यत्वं ब्रह्मणः कारणत्वं च युक्तिबाध्यमेव ॥ ५ ॥

१–सिद्ध–इति पा० ।
२–सिद्धया इति पा० ।
३ श्रुतिसमन्वयस्य इति पा० ।
४–स्य संकोच इत्ययुक्तमेव इति पा० ।
५ कारणाद्ब्रह्मणः इति पा० ।
६–स्यास्य इति पा० ।
७ जगत् कारणाद् इति पा० ।

॥ दृश्यते तु ॥ ६ ॥

सिद्धान्त उच्यते । विलक्षणयोरपि ब्रह्मप्रपञ्चयोः कार्यकारणभावः संभवति, अचेतनाद्गोमयाच्चेतनवृश्चिकोत्पत्तिदर्शनात्, चेतनात् पुरुषादचेतनकेशाद्युत्पत्तिदर्शनाच्च ; अतः शुष्कतर्को न बाधकः श्रुतिसमन्वयस्येति निर्णयः ॥ ६ ॥

पुनः शङ्कित्वा परिहरति[1] ॥

॥ असदिति चेन्न प्रति-
षेधमात्रत्वात् ॥ ७ ॥

एवं कार्यकारणयोर्वैलक्षण्यात् कारणे कार्यमसदेव । "असद्वा इदमग्र आसीत्" इति श्रुतेरिति चेन्नैवं वाच्यम् । सालक्षण्यनियमप्रतिषेधमात्रपरत्वाच्छ्रुतेः । अतः कार्यकारणयोर्वस्त्वेकता न हीयत एव ॥ ७ ॥

॥ अपीतौ तद्वत् प्रसङ्गादसमञ्जसम् ॥ ८ ॥

सत्कार्यवादेन कार्यकारणयोर्जगद्ब्रह्मणोर्वस्त्वेकत्वे समन्वयस्य तर्कबाध्यत्वमस्ति न वेति संदेहेऽस्तीति पूर्वः पक्षः कुतः । यत एव जगद्ब्रह्मणोर्वस्त्वैक्यमुक्तम् । तथा सति हि जगत इव ब्रह्मणोऽपि विकाराज्ञानाद्यनिष्टप्रसङ्गः समुन्मिषति । ततो वेदान्तवाक्यानां सामरस्यमसमञ्जसं भवति । अतस्तर्केण समन्वयबाध इति ॥ ८ ॥

॥ न तु दृष्टान्तभावात् ॥ ९ ॥

नेति पूर्वपक्षं व्यावर्तयति । "यस्यात्मा शरीरं" "यस्याव्यक्तं शरीरम्" इत्यादिश्रुत्या,

"विग्रहं देवदेवस्य जगदेतच्चराचरम् ।
एतमर्थं न जानन्ति पशवः पाशगौरवात्" ॥

इत्यादिपुराणोक्त्या च सिद्धचिदचिच्छरीरकस्य परब्रह्मणः शिवस्य कार्यतया कारणतया चावस्थाने गुणदोषव्यवस्थायां दृष्टान्तसद्भावात् तत्र वेदान्तवाक्यसमन्वयसामरस्यमसमञ्जसं न भवति । कथम् । यथा शरीरस्य मनुष्याद्यात्मनो बालत्वयुवत्वस्थविरत्वादयः[2] शरीर एव, सुखादयस्त्वात्मन्येव ; तद्वदत्रापि शरीरभूतचिदचिद्वस्तुगतान्यज्ञानविकाराद्यनिष्टानि शरीरभूते चिदचिद्वस्तुन्येव[3] तिष्ठन्ति ; निरवयत्वाविकारत्वसार्वज्ञसत्यसंकल्पत्वादय आत्मभूते परमेश्वर एव । तदेवं दृष्टान्तभावाच्छ्रुत्यसामञ्जस्यं ब्रह्मणि नास्त्येव ॥ ९ ॥

स्वपक्षदोषाच्च ॥ १० ॥

केवलं तर्कावलम्बने स्वपक्ष एव प्रधानकारणवादेन निर्वि-

१–ङ्कते परिहरति च इति पा० ।
२–त्वादिभावेऽपि बालत्वयुवत्वस्थविरत्वादयः इति पा० ।
३–चिद्रूपे वस्तुन्येव इति पा० ।

कार[1]पुरुषसंनिधिवशात् प्रकृतिप्रवृत्तौ सत्यामन्योन्यधर्माध्यासा दुरुपपादा भवन्ति। अन्यत्रान्यधर्मानुसंधानरूपोऽध्यासो निर्विकारस्य पुरुषस्य न संभवति। अचेतनायाः प्रकृतेश्चानुसंधानरूपोऽध्यासो न संभवत्येव। अतः प्रधानकारणवाद एव तर्कबाध्यः ॥ १० ॥

॥ तर्काप्रतिष्ठानात् ॥ ११ ॥

तर्कस्याप्रतिष्ठितत्वात् प्रधानकारणवादस्य तन्मूलत्वात् तत्र प्रतितर्कसंभवात् तस्यैव[2] त्याज्यत्वं न ब्रह्मकारणवादस्येति ॥ ११ ॥

॥ अन्यथानुमेयमिति चे-
देवमप्यनिर्मोक्षप्रसङ्गः* ॥ १२ ॥

अन्यथा यथा प्रतितर्कपराहतिस्तर्कमवति, तथा प्रकारान्तरेण[3] प्रधानमनुमेयमिति वादोऽपि युक्तो न भवति। तत्राप्येवं प्रतितर्ककलहसंभावनया प्रतिष्ठितत्वाभावदोषादनिर्मोक्ष एव प्रसज्यते। ततः शुष्कतर्कमूलः प्रधानकारणवाद एव त्याज्यः। न तु प्रबलश्रुतिप्रमाणसिद्धो ब्रह्मकारणवाद, इति युक्तम् ॥ १२ ॥

॥ एतेन शिष्टापरिग्रहा अपि व्याख्याताः ॥ १३ ॥

यथेदं सांख्यदर्शनं तर्कमूलत्वेनाप्रतिष्ठितत्वादिना प्रत्याख्यातं, तथैतेनैव हेतुना शिष्टानामपरिग्रहाः कणभक्षाक्षपादादीनां पक्षा अपरिग्राह्या इति व्याख्याताः, एतदुक्तं[4] भवति। कणादादिमतसिद्धपरमाणुकारणवादोऽपि निराकृत इति ॥१३॥

॥ भोक्त्रापत्तेरविभागश्चेत् स्याल्लोकवत् ॥ १४ ॥

यदुक्तं पूर्वत्र "चिदचित्प्रपञ्चविशिष्टात्मा शिव एवाद्वितीयः कारणं कार्यं च भवतीति विशिष्टशिवाद्वैतम्" तस्य समन्वयसिद्धस्य युक्तिबाधापत्तिरस्ति न वेति संशयः। एवं सति पूर्वपक्षः प्रवर्तते[5]। यदि चिदचिच्छरीरकत्वमिष्यते परमेश्वरस्य तदा शरीरित्व[6]मस्य सिद्धम्। तथाच जीववत् सशरीरत्वेन तस्यापि शरीरसंबन्धप्रयुक्तसुखदुःखभोक्तृत्वापत्तेरस्मात् संसारिणो जीवात् तस्य परमेश्वरस्याविभागः प्राप्नोति। अतोऽयं जीवोऽयमीश्वर इति विशेषानुपपत्त्या जगद्विशिष्टत्ववादे परमेश्वरस्यानिर्दोषस्वरूपासिद्धिप्रसङ्ग इत्येवं पूर्वपक्षी मन्यते। नात्र विरोध इति सिद्धान्तः। स्यादेव विभागो जीवात् परमेश्वरस्य निष्कलङ्कनिखिलमङ्गलाकरत्वेन, न खलु शरीरित्वप्रयुक्तमनिष्टभोक्तृत्वं भवति, किंतु पराधीनत्वप्रयुक्तमेव; यथा लोके राज्ञः सशरीरत्वेऽप्यनन्यवश्यस्य न स्वाज्ञाननुवृत्ति[1]कृतानिष्टप्रसङ्ग इति भोक्तृत्वं नेतरसमानम्। "ज्ञाज्ञौ द्वावजावीशानीशौ" इति जीवेश्वरयोः स्वातन्त्र्यमस्वातन्त्र्यं च स्वतः सिद्धमेव। अतः स्वतन्त्रस्य परमेश्वरस्य जीवादस्वतन्त्राच्छरीरसंबन्धसामान्येन नाविभागप्राप्तिः। नातो विशिष्टाद्वैतहानिः ॥ १४ ॥

यद्यपि स्वातन्त्र्यास्वातन्त्र्यादिविरुद्धधर्मसंबन्धेन जीवेश्वरयोर्विभाग उच्यते। तथापि तयोः कार्यकारणयोरनन्यत्वमव्यतिरिक्तत्वं च सिध्यत्येवेत्याह ॥

॥ तदनन्यत्वमारम्भणशब्दादिभ्यः ॥ १५ ॥

इह कार्यकारणयोः प्रपञ्चब्रह्मणोः समन्वयसिद्धमनन्यत्वं संदिह्यते, युक्तं न वेति। संदेहस्य चेतनाचेतनत्वपरस्पराविरुद्धधर्मसंबन्धवैलक्षण्यं कारणम्। कथमनयोरनन्यत्वमुपपद्यते। पूर्वाधिकरणे सर्वज्ञत्वादिमत्त्वेन परमेश्वरस्य भोक्तृत्वाज्ञत्वादिना जीवस्य चोभयोर्विभागो निर्दिष्टः। अचिद्वस्तुनोऽप्यनेनात्यन्तविलक्षणत्वादनन्यत्वकथा दूरत एव। नहि कारणत्वमनन्यत्वसाधकं, गोमयवृश्चिकादौ सत्यपि तस्मिन् वैलक्षण्यदर्शनात्। घटमृत्पिण्डादिष्वप्यर्थक्रियादिव्यवहारभेदो नास्त्येव। अथवा कार्यकारणयोरत्यन्ताभेदे प्रपञ्चब्रह्मणोरखण्डतया सर्वत्र कर्तृकर्मक्रियादिव्यवहारलोपः[2] स्यात्, इत्येवं प्राप्ते ब्रूमः। कारणाद् ब्रह्मणः कार्यं जगदनन्यदेव। कथमवगम्यते। आरम्भण[3]शब्दादिभ्यः। यथा "वाचारम्भणं विकारो नामधेयं मृत्तिकेत्येव सत्यं" "सदेव सोम्येदमग्र आसीत्" "एकमेवाद्वितीयं" "तदैक्षत बहु स्यां प्रजायेय" इति। "ऐतदात्म्यमिदं सर्वं" "तत् सत्यं स आत्मा" "तत् त्वमसि श्वेतकेतो" "विश्वं भूतं भुवनं चित्रं बहुधा जातं जायमानं च यत् तत् सर्वो ह्येष रुद्र" इत्यादिशब्देभ्यः ॥ १५ ॥

यदुक्तं नहि कार्यकारणत्वमनन्यत्वसाधकमिति तत्राह ॥

॥ भावे चोपलब्धेः ॥ १६ ॥

घटादिकार्यभावे च तदेव मृद्द्रव्यं घट इत्युपलभ्यते। ततः कारणादनन्यदेव कार्यम्। तथा "वाचारम्भणं विकारो नामधेयं मृत्तिकेत्येव सत्यम्" इति श्रुत्यापि प्रतिपाद्यते। विकारो नामधेयं च वाचारम्भणं, वाचाया अभिलापार्थक्रि-

---

१—वादे दोषो दुर्वारो भवति। अयमेव युक्तः। तथाहि, प्रधानकारणवादे तु निर्विकार—इति पा०।

२ तन्मूलत्वात् तस्यैव इति पा०।

* शंकरमते तर्काप्रतिष्ठानादप्यन्यथानुमेयमिति चेदेवमप्यविमोक्षप्रसङ्ग इत्याकारकमेकमेव सूत्रम्।

३ अन्यथा प्रकारान्तरेण इति पा०,

४ शिष्टानां कथास्वपरिगृहीतानां कणभक्षाक्षपादादीनां पक्षपरिग्रहा व्याख्याता एव। किमुक्तं इति पा०।

५ प्रसज्यते इति पा०।

६—चिद्वस्तु शरीरमिष्यते परमेश्वरस्य तदा सशरीरत्व—इति पा०।

---

१ स्वाज्ञानिवृत्ति—इति पा०।

२—लोप एव इति पा०।

३ वाचारम्भण—इति पा०।

यारूपव्यवहारस्यानिष्पादकं भवति । मृद्द्रव्यस्यैव घटाद्यवस्था घटादिनामधेयं चार्थक्रियाभिलापरूपव्यवहारनिष्पत्तये भवतीति यावत् । वस्तुतो घटादिकमपि मृत्तिकेत्येव सत्यं प्रामाणिकं,[1] मृद्व्यतिरेकेण घटभावादर्शनात् । अथवा वाचारम्भणं विकारः । विकारो घटो वाचारम्भणम् । घटोऽयमिति वाचारम्भ[2]विषयमात्रम् । मृद्द्रव्यमेव व्यवहारसिद्ध्यर्थं जायमानमवस्थान्तरम् । नतु मृदो द्रव्यान्तरम् । मृत्तिकेत्येव नामधेयं सत्यम् । घटादिकं मृत्तिकेति कृत्वैव तत्र सर्वं मृत्पिण्डादिनामधेयं सत्यम् । सति च प्रामाणिकेऽर्थे साधु, नतु द्रव्यान्तरमिति कृत्वा, यतो घटो मृदेवेति । अतः कारणादनन्यदेव कार्यम् । अर्थक्रियादिव्यवहारभेदस्तु मृद्घटयोर्वस्त्वैक्येऽप्यवस्थाभेदाद् भवत्येव । ततो मृद्घटयोरिव ब्रह्मप्रपञ्चयोरपि व्याप्यव्यापकभावादनन्यत्वम् । तथा पुराणवाणी ।

"शक्त्यादि च पृथिव्यन्तं शिवतत्त्वसमुद्भवम् ।
तेनैकेन तु तद्व्याप्तं मृदा कुम्भादिकं यथा" ॥

इति । मृदयं घट इत्यत्र यथा मृद्व्याप्तिर्घटे[3] दृश्यते । तथा ब्रह्मेदं जगदिति ब्रह्मव्याप्तिर्न दृश्यत[4] इति चेत् । सन् घटः सन् पट इति सर्वत्र दृश्यत एव सद्रूपस्य ब्रह्मणो व्याप्तिः । सच्चिद्रूपेण शिवेन यदि न व्याप्तं जगत् तदा सत्तास्फूर्तिभ्यां विना कृतं कथमस्ति स्फुरतीति च दृश्येत । अवस्त्वेव भवेत् । अतो मृदा घटादिकमिव कारणेन शिवेन कार्यमिदं व्याप्तं तदनन्यभूतं चेति सिद्धम् ॥ १६ ॥

॥ सत्त्वाच्चावरस्य[5] ॥ १७ ॥

कार्यस्य कारणे सत्त्वाच्च कारणादनन्यदेव कार्यम् । घटशरावादिकं पूर्वं मृदेवासीदिति हि घटादिकं मृदात्मनोपलभ्यते ॥ १७ ॥

॥ असद्व्यपदेशान्नेति चेन्न धर्मान्तरेण वाक्यशेषाद् युक्तेः शब्दान्तराच्च* ॥ १८ ॥

"इदं वा अग्रे नैव किंचनासीत्" इति कार्यस्य पूर्वमसद्व्यपदेशात् कारणे कार्यमसदिति चेत् । न । स्थूलत्वविरोधिसूक्ष्मत्वरूपधर्मान्तरयोगादेवायमसद्व्यपदेशो नाभावादिति । कुतः । "तदसदेव सन्मनोऽकुरुत स्याम्" इति वाक्यशेषात्[1] । मनस्कारोऽपि विद्यमानस्यैव भवति । युक्तिरपि तथा धर्मान्तरयोगनिमित्ततामसद्व्यपदेशस्यावगमयति । पिण्डत्वघटत्वकपालत्वरूपैः परस्परविरोधिभिर्भावरूपैर्धर्मैर्घटः प्रागासीदिदानीमस्ति तदानीं न भविष्यतीति सदा विद्यमानस्यैव मृद्द्रव्यस्यासदादिव्यपदेशोपपत्तौ न तद्व्यतिरिक्तः कश्चिदभावो नामासद्व्यपदेशालम्बनं धर्मान्तरं कल्पनीयमिति । तथा शब्दान्तरं च "तद्धेदं तर्ह्यव्याकृतमासीत्" "तन्नामरूपाभ्यां व्याक्रियत" इत्यादि । अयमभिप्रायः । पूर्वं स्वाभिन्ननामरूपविभागानर्हसूक्ष्मचिदचिद्रूपपरशक्तिगर्भितो हि शिवः केवलो भवति । पुनः स्वात्मिकां तादृशीं शक्तिं पूर्वदशाविरोधिस्थूलत्वयुक्तनामरूपविभागार्हचिदचिद्रूपां बहिर्विस्तारयति । तत्र शक्तिमतः शिवस्य संकोचावस्था प्रलयः । विकाशावस्था सृष्टिरिति तथाप्तवचनमपि,

"चिदात्मैव हि देवोऽन्तःस्थितमिच्छावशाद्बहिः ।
योगीव निरुपादानमर्थजातं प्रकाशयेत्" ॥

इति । निरुपादानमित्यनपेक्षितोपादानान्तरं, स्वयमुपादानं भूत्वेत्यर्थः । ततः परमकारणात् परब्रह्मणः शिवादभिन्नमेव जगत् कार्यमिति ॥ १८ ॥

निदर्शनान्तरमुच्यते ॥

॥ पटवच्च ॥ १६ ॥

यथा संकुचितः सूक्ष्मरूपः पटः प्रसारितो महापटः कुटीरूपेण कार्यं भवति, तथा ब्रह्मापि संकुचितरूपं कारणं प्रसारितरूपं कार्यं भवति ॥ १९ ॥

यथा च प्राणादिः* ॥ २० ॥

यथा वायुरेक एव वृत्तिविशेषेण प्राणादिभेदं भजते, तथा ब्रह्मापि शक्तिव्यापारभेदेन सदाशिवादिविश्वरूपभेदं भजते । ततो ब्रह्मणः कारणादनन्यदेव कार्यं जगदिति युक्तम्[2] ॥ २० ॥

उक्तमर्थमाक्षिप्य समाधत्ते ॥

॥ इतरव्यपदेशाद्धिताकरणादिदोषप्रसक्तिः ॥ २१ ॥

"तत् त्वमसि" "अयमात्मा ब्रह्म" इत्यादिना कार्यभूतस्य जीवस्य कारणभूतब्रह्मव्यपदेशादनन्यत्वमुपपादितम् । एवं सति सर्वज्ञस्य परमेश्वरस्य सर्वगतस्य जगदकरणं स्वस्य हितरूपं तत्करणमहितरूपं च प्रसज्यते दोषाय । ततश्च सर्वज्ञः सत्यसंकल्प ईश्वरः स्वस्मादनन्यजीवस्य तापः स्वस्येति जानन् कथं संसारनिमित्तमहितं जगत्करणमनुवर्तते । हितं

---

१ इत्यत्र विकारो नामधेयं वाचारम्भणं भवति ! यत् सत्यं मृत्तिकेत्येव । इति पा० ।

२ वागारम्भण—इति पा० ।

३ मृत्तिका व्याप्तिस्वरूपेण घटे इति पा० ।

४—दित्यत्र ब्रह्मव्याप्तिः कथं दृश्यते सर्वत्र इति पा० ।

५—च्चापरस्य इति पा० ।

* असद्व्यपदेशान्नेति चेन्न धर्मान्तरेण वाक्यशेषात् इति युक्तेः शब्दान्तराच्च इति च शंकरमते सूत्रद्वयम् ।

१—षादवगम्यत इति पा० ।

* क्वचिच्छंकरभाष्ये निर्विसर्गः पाठः ।

२ समीचीनम् इति पा० ।

जगदकरणं च नानुवर्तते । ततश्च[1] जीवानन्यत्वे सिद्धे परमेश्वरस्य सर्वज्ञस्यापि स्वहिताहितकरणविचार[2]शून्यत्वादिदोषप्रसक्तिः ॥ २१ ॥

अतः कार्यकारणयोर्जीवेश्वरयोरनन्यत्वमयुक्तमिति चेद्युक्तमित्युच्यते ॥

॥ अधिकं तु भेदनिर्देशात् ॥ २२ ॥

कार्यकारणयोरनन्यत्वेऽपि कार्यभूताच्चिदचित्प्रपञ्चात् कारणमत्राधिकमिति[3] श्रूयते "विश्वाधिको रुद्रो महर्षिः", इति। तथा भेदनिर्देशाज्जीवेश्वरयो[4]र्भेदो निर्दिश्यते ।

"विद्याविद्ये ईशते यस्तु सोऽन्यः ।
चरात्मानावीशते देव एकः ॥
पृथगात्मानं प्रेरितारं च मत्वा" ।

"द्वा सुपर्णा सयुजा सखायौ" "द्वे ब्रह्मणी वेदितव्ये । परं चापरं च" । "ज्ञाज्ञौ द्वावजावीशानीशौ" "नित्यो नित्यानां चेतनश्चेतनानाम्" "अन्तःप्रविष्टः शास्ता जनानाम्" ।

"मायां तु प्रकृतिं विद्या-
न्मायिनं तु महेश्वरम्" ।
अस्मान्मायी सृजते विश्वमेतत्
तस्मिंश्चान्यो मायया संनिरुद्धः" ॥
"जुष्टं यदा पश्यत्यन्यमीशम्" ।
"प्रधानक्षेत्रज्ञपतिर्गुणेशः" ।
"येषामीशः पशुपतिः पशूनाम्" ।

इत्यादिभिरनन्तश्रुतिभिः । अतो विश्वस्मादधिकमेव शिवापरनामधेयं ब्रह्म । ननु "तदनन्यत्वम्" इत्यभेदप्रतिपादनात् "अधिकं तु" इति भेदप्रतिपादनात् प्रपञ्चब्रह्मणोर्भेदाभेदः साधितो भवतीति चेत् । न भेदाभेदकल्पं विशिष्टाद्वैतं साधयामः । न वयं ब्रह्मप्रपञ्चयोरत्यन्तमेव भेदवादिनः । घटपटयोरिव । तदनन्यत्वपरश्रुतिविरोधात् । न वात्यन्ताभेदवादिनः । शुक्तिरजतयोरिवैकतरमिथ्यात्वेन, तत्स्वा[5]भाविकगुणभेदपरश्रुतिविरोधात् । नच भेदाभेदवादिनः । वस्तुविरोधात् । किंतु शरीरशरीरिणोरिव गुणगुणिनोरिव च विशिष्टाद्वैतवादिनः । प्रपञ्चब्रह्मणोरनन्यत्वं नाम मृद्घटयोरिव गुणगुणिनोरिव कार्यकारणत्वेन विशेषणविशेष्यत्वेन विनाभावरहितत्वम् । नहि मृदं विना घटो दृश्यते । नीलिमानं विना चोत्पलम् । तथा ब्रह्म विना न प्रपञ्चशक्तिस्थितिः । शक्तिव्यतिरेकेण न कदाचिदपि ब्रह्म विज्ञायते । वह्निरिवौष्ण्यं विना । येन विना यत्र ज्ञायते, तत् तेन विशिष्टमेव । तत्त्वं च तस्य स्वभाव एव । अतः सर्वथा प्रपञ्चाविनाभूतं ब्रह्म तस्मादनन्यदित्युच्यते । भेदश्च स्वाभाविकः । ततश्च विश्वस्मादधिकमेव परं ब्रह्म । कार्यत्वकारणत्वव्यवस्थास्य "न तु दृष्टान्तभावात्" इत्यत्र निरूपितैव । तस्माद्भेदाभेदश्रुतीनामविरुद्ध एवायं मार्गः ॥ २२ ॥

॥ अश्मादिवच्च तदनुपपत्तिः ॥ २३ ॥

सर्वथा जीवेश्वरयोरभेद एव अभेदश्रुतिभिरिति चेत् । न । अनुपपत्तेः । अश्मकाष्ठतृणादेरचेतनस्येव[1] जीवस्याप्यज्ञत्वादिना सर्वज्ञत्वादियुक्तादीश्वरादत्यन्तविजातीयत्वश्रवणात् तयोरेकभावानुपपत्तिः । तस्मादीश्वरो जीवादर्थान्तरभूत एव । एवं चेतनस्याप्यधिकगुणवैषम्यादीश्वरभावानुपपत्तिः । किमुता[2]चेतनस्य स्वविलक्षणस्येति तात्पर्यम् । सर्वथा श्रुतिस्मृतिन्यायैः कार्यत्वेन स्वानन्यभूतादपि चेतनाचेतनप्रपञ्चाद्विश्वस्मादधिक एव सर्वज्ञः सर्वशक्तिः परमेश्वरः ॥ २३ ॥

॥ उपसंहारदर्शनान्नेति चेन्न क्षीरवद्धि ॥ २४ ॥

"एकमेवाद्वितीयं" "द्यावापृथिवी जनयन् देव एक" इत्यादिषु परमेश्वर एक एव जगतः कारणमवगम्यते । तस्यैकस्य विचित्रजगत्कारणत्वं युक्तं न वेति संशये[3] न युक्तमिति वदामः । तदसंभवात् । कार्यमेतदाकाशवाय्वग्निसलिलरूपं विचित्रम् । कथमेतत् कारणवैचित्र्यमन्तरेण संभवति । दृश्यते हि रथादिकार्येषु बहुकारकोपसंहारः । तस्मादेककारणत्वं न संभवतीति[4] चेत् । नैतद् युक्तम्[5] । एकस्यापि कार्यरूपेण परिणामः संभवति । यथा क्षीरस्यैकस्यैव दधिभावेन । तस्माद् ब्रह्मैककारणकं जगत् कार्यम् ॥ २४ ॥

यदुक्तं "कार्यवैचित्र्यं कारणवैचित्र्यापेक्षमिति । तदसत् । चेतनादेकस्मात् पुरुषात् केशनखादिविचित्रकार्यनिष्पत्तिदर्शनात् । अतो विचित्रजगत्कार्यनिर्वाहे ब्रह्म न कारणान्तरापेक्षमिति, शक्तिमतां सर्वं संभाव्यत एवेत्याह ॥

॥ देवादिवदपि लोके ॥ २५ ॥

देवादेः शास्त्रावगतशक्तेर्यथा स्वापेक्षितनानारूपभावः ।

१ तस्माज्–इति पा० ।
२ स्वहितकरणे स्वाहितकरणे च विवेक–इति पा० ।
३ कारणं ब्रह्माधिकमेव इति पा० ।
४ इति तत्तद्भेदनिर्देशाद्भवति । तथाहि जीवे–इति पा० ।
५ न वा शुक्तिरजतयोरिवैकतरमिथ्यात्ववादिनः । तत्स्वा–इति पा० ।

१ अश्मकादिषु लोष्ठतृणादिभेदेनेवैतस्य इति पा० ।
२ कथम–इति पा० ।
३–यः । इति पा० ।
४ न संभाव्यमिति इति पा० ।
५ नैतद्वक्तुं युक्तमिति ब्रूमः इति पा० ।

एवं शास्त्रावगतशक्तेः परमेश्वरस्य सर्वमुपपद्यते । "य इमाल्लोकानीशत ईशनीभिः" जननीभिः परमशक्तिभिरिति परमेश्वरस्यानन्तशक्तिमत्त्वं श्रूयते । तस्य किमसाध्यम् ॥ २५ ॥

॥ कृत्स्नप्रसक्तिर्निरव-
यवत्वशब्दकोपो वा ॥ २६ ॥

अत्र ब्रह्मणो जगदाकारेण परिणामः पूर्वोक्तो युज्यते न वेति संदेहः । कथं युज्यते एकस्यैव जगदाकारेण परिणाम इत्युक्तम् । तस्य क्षीरस्येव दधिरूपेण सर्वात्मना जगदाकारेण परिणामे कृत्स्नस्यापि कार्यत्वप्रसक्तिः । न ब्रह्म परिशिष्येत केनचिदंशेन । चेतस्य निरवयवत्वश्रुतिकोपो वा भवति ॥ २६ ॥

तस्माद्ब्रह्मणः परिणामो न युक्त इति प्राप्ते ब्रूमः ॥

॥ श्रुतेस्तु शब्दमूलत्वात् ॥ २७ ॥

ब्रह्मणो जगत्परिणामो युक्त एव । तच्छ्रुतेः । श्रुतिरेवात्र प्रमाणम् । न प्रमाणान्तरम् । शब्दमूलत्वादेव । तस्य सकलेतरप्रमाणावगतवस्तुविजातीयत्वेन तत्रादृष्टशक्तियोगेन विरोधाभावात् । अतः परिपूर्णस्य तस्यैव कार्यत्वं कारणत्वं च संभवति । यथा जातिवादिनां जातेः खण्डमुण्डाद्यत्यन्तविलक्षणेष्वनन्तेषु प्रत्येकमेकस्या एव परिसमाप्य वृत्तिः । न तत्रेतरवस्तुदृष्टान्तेन शङ्का चोद्या । तस्माद् ब्रह्मस्वरूपनिरूपणे शब्द एव मूलमिति न कश्चिद्विरोधः ॥ २७ ॥

॥ आत्मनि चैवं विचित्राश्च हि ॥ २८ ॥

जीवात्मनि चाचिद्धर्मविरोधिचिद्धर्मयोगोऽपि विजातीयत्वादेव भवति । अग्निजलादयोऽप्यचिद्विशेषा अन्योन्यविलक्षणशक्तयो दृश्यन्ते विचित्रा एव । ततो ब्रह्मापि शब्दैकप्रमाणकं विचित्रानन्तशक्तिकमिति । ततः सर्वाविरोधः[1] ॥ २८ ॥

॥ स्वपक्षदोषाच्च ॥ २९ ॥

कृत्स्नप्रसक्त्यादिदोषो निरवयवेऽचित्सजातीये प्रधानादौ न ब्रह्मणि शास्त्रप्रमाणके, सर्वशक्तिमत्त्वेन ॥ २९ ॥

सर्वोपपत्तिमाह[2] ॥

॥ सर्वोपेता च तद्दर्शनात् ॥ ३० ॥

"परास्य शक्तिर्विविधैव श्रूयते
स्वाभाविकी ज्ञानबलक्रिया च" ।
"मायां तु प्रकृतिं विद्यान्मायिनं तु महेश्वरम् ।
तस्यावयवभूतेन व्याप्तं सर्वमिदं जगत्" ॥

इत्यादिदर्शनात् सर्वापि शक्तिर्ब्रह्माश्रितेति विज्ञायते । अतः सर्वशक्तिमतस्तस्य किं न संभवति ॥ ३० ॥

॥ विकरणत्वान्नेति चेत् तदुक्तम् ॥ ३१ ॥

"न तस्य कार्यं करणं च विद्यते" इति ब्रह्मणो विकरणत्वमुच्यते । ततोऽस्य न कारणत्वमिति चेन्न । तस्योत्तरं शब्दमूलत्वादिति पूर्वमुक्तमेव । विचित्रानन्तशक्तिशबलमायापरमशक्तिविशिष्टः परमेश्वरः स्वशक्तिशकलेन प्रपञ्चाकारः स्वतः प्रपञ्चातीतश्च भवतीत्यत्र,

"मायां तु प्रकृतिं विद्यान्मायिनं तु महेश्वरम् ।
तस्यावयवभूतेन व्याप्तं सर्वमिदं जगत्" ॥

इति श्रुतिरेव भगवती प्रमाणम् । अत्र विषये पुराणं च ।

"विश्वोत्तरोत्तरविचित्रमनोरथस्य
यस्यैकशक्तिशकले सकलः समाप्तः ।
अध्वानमध्वपतिमध्वविदो वदन्ति
तस्मै नमः सकललोकविलक्षणाय ॥

इति । एवं सकलदोषकलङ्करहितशब्दप्रमाणैकसिद्धसर्वशक्तिसंपद्विलासे परमेश्वरे शिवे परब्रह्मणि संभावनासंभावनाविचारः सर्वोऽपि निरवकाश एव ॥ ३१ ॥

पुनरन्यथाक्षिप्य समाधत्ते ॥

॥ न प्रयोजनवत्त्वात् ॥ ३२ ॥

शास्त्रावगतसर्वशक्तेर्ब्रह्मणः सर्वेषु कार्येषु कारणसामर्थ्यमस्तीति निर्णीतम् । तथापि सर्वप्रवृत्तेः प्रयोजनवत्त्वादवाप्तसकलकामस्य परमेश्वरस्य जगत्सृष्ट्यादिव्यापारः संभवति नवेति संदिह्यते । अत्र कथं संभवति । "आनन्दो ब्रह्म"

"विभुं चिदानन्दमरूपमद्भुतम्"
"उमासहायम्"

इत्यादिभिर्निरतिशयानन्दस्वरूपो नित्यतृप्तो हि शिवः श्रूयते । कथमसौ सृष्ट्यादिव्यापारेषु प्रयोजननिरपेक्षः प्रवर्तते । यदि सप्रयोजनास्य प्रवृत्तिः । नित्यतृप्तताहानिः स्यात् । अन्यथा जडादिवदनुचितकारिता स्यात् ॥ ३२ ॥

इति प्राप्ते ब्रूमः ॥

॥ लोकवत् तु लीलाकैवल्यम् ॥ ३३ ॥

यदुक्तं "नित्यतृप्तस्य प्रयोजनाभावादप्रयोजनजगत्सृष्ट्यादिप्रवृत्तिर्न संभवति" इति । तन्न । संभवत्येव निष्प्रयोजनापि प्रवृत्तिः केवललीलामात्रेण परमेश्वरस्य । यथा लोके प्रयोजनमन्तरेणापि केवलं लीलया कन्दुकताडनादिषु प्रवृत्तिः । तथा परमेश्वरस्यावाप्तसकलकामस्यापि लीलया सृष्ट्यादिप्रवृत्तेरविरोध एव ॥ ३३ ॥

प्रयोजनाभावेऽपि लीलया परमेश्वरस्य जगत्सृष्ट्यादिषु प्रवृत्तिरिति निरूपितम् । तत्र पुनः संदिह्यते । सैषा संभवति

१ शक्तिकमेव । न तत्र विरोधः इति पा० ।
२–के ॥ २९ ॥ सर्वोप–इति पा० ।

न वेति । लीलयापि परमेश्वरस्य सृष्टिर्न संभवति । परिपूर्णतया रागद्वेषादिहीनत्वात् । सकलसाम्येन मध्यस्थ एव हि परमेश्वरः । तस्य केषांचित् सुखमयं देवादिशरीरं केषांचिद्दुःखोत्तरं मनुष्यादिशरीरं सृजतो वैषम्यं दुर्वारम् । किंच सृष्टेः संहारपूर्वत्वात् सकलं युगपत् संहरतः परमेश्वरस्य नैर्घृण्यं च भवेत् । तदेवमपुरुषार्थसंबन्धापादित्वा[1] जगत्स्रष्टृता किं परमेश्वरस्येति प्राप्ते ब्रूमः ॥

॥ वैषम्यनैर्घृण्ये न सापेक्षत्वात्
तथाहि दर्शयति ॥ ३४ ॥

सर्वथा जगत् सृजतः परमेश्वरस्य वैषम्यनैर्घृण्ये न भवतः । कर्मसापेक्षत्वात् सृष्टिवैषम्यस्य । तथाहि दर्शयति श्रुतिः । "रमणीयचरणा रमणीयां योनिमापद्यन्ते, कपूयचरणाः कपूयाम्" इति ॥ ३४ ॥

॥ न कर्माविभागादिति चेन्नानादि-
त्वादुपपद्यते चाप्युपलभ्यते च* ॥ ३५ ॥

सृष्टेः प्राक् कर्म नास्ति । क्षेत्रज्ञाभावात् । तदभावश्च "सदेव सोम्येदम्"इत्यवधारणावगतादविभागात् । इति चेत् । न । "ज्ञाज्ञौ द्वावजावीशानीशौ" इत्यादिश्रुतेर्यथा जीवानामनादित्वं तथा तत्कर्मणामनादित्वम् । दृश्यते हि यतः कर्मप्रवाहसिद्धोऽयं संसारः । परमेश्वरो हि जीवानां विचित्रं कर्म सर्वज्ञतयावलोक्य स्वशक्त्या तत्तदनुगुणमेव भोगायतनं देवादिशरीरं सृजति । ततः कर्ममूलमेव सृष्टिवैषम्यम् । संहारश्च जीवानां संसारव्यापारखिन्नानां सुषुप्तिवद्विश्रान्तिहेतुतया परमेश्वरस्य न नैर्घृण्यापादकः ।

ननु जीवानां सुखदुःखादौ[2] कर्मण एव प्रयोजकत्वात् किमप्रयोजकेन परमेश्वरेणेति चेत् । न । कर्मणोऽपि तदधीनत्वात् तस्य न स्वातन्त्र्यहानिः । पुनरपि घट्टकुटीप्रभातन्यायेन कर्मणः स्वातन्त्र्याभावे परमेश्वरस्य वैषम्यादिदोषापत्तिरिति न वाच्यम् । कर्मशक्तीनामनन्तानां मायागतानां संस्थापकमात्रत्वात् परमेश्वरस्य । कर्मणामेव स्वशक्तिवशात् सृष्टिवैषम्यहेतुत्वे तद्व्यवस्थापकमात्रस्य तस्य न वैषम्यम् ।

ननु जीवानां शरीरसृष्टावचेतनस्य कर्मणश्चेतनाधिष्ठितस्य सामर्थ्याच्चेतनत्वेन परमेश्वर एव प्रयोजक इति वक्तव्यम्[3] । कथमसौ सृष्टेः प्राक् संहृतभोगसाधनतया संसारक्लेशरहितान् सुखिनो जीवान् पुनरपि संसारहेतुना शरीरेण योजयति परमकारुणिकोऽपि सन्निति चेत् ।

उच्यते[1] ।

सर्वानुग्राहकः परमेश्वरो जीवानां कर्मपाकमन्तरेण ज्ञानानुदयाज्ज्ञानमन्तरेण निरतिशयानन्दमोक्षाभावात् कर्मपाकस्य च भोगमन्तरेणानुपपत्तेस्तत्कर्मफलभोगाय पुनरपि तेषां शरीरादिकं कल्पयति । एवं क्रमात् पक्वे स्वकर्मणि भोगेन शुद्धान्तःकरणानां जीवानां स्वविषयं ज्ञानमुत्पाद्य निरतिशयानन्दरूपां मोक्षलक्ष्मीं प्रकाशयति ।

एवंशक्तिमान् परमेश्वरः परमकारुणिकः कथं वा युगपदेव सर्वजीवानां कर्म पाचयित्वा सममेव मोक्षानन्दं न प्रकाशयतीति चेत् । सत्यम् ।

परमेश्वरेण सममेव सर्वेषामनुग्रहे क्रियमाणेऽपि ये पक्वमलास्ते मुच्यन्ते । अपक्वमलाः कालक्रमादेव । यथा सवितृकिरणसंदोहे सममेव संततेऽपि पक्वा एव पद्मा विकसन्ति नापक्वाः । ततः पूर्णोऽपि परमेश्वरः परार्थमेव सर्वां प्रवृत्तिं करोति । तथा पौराणिकी भणितिः परमेश्वरस्य सर्वानुग्राहकत्वप्रतिपादनमुखेनोक्तं सकलमर्थं स्पष्टयति[2] ।

"आदित्येन यथा हीनं तमोभूतमिदं जगत् ।
शिवेनापि विना तद्वत् तमोभूतमिदं जगत् ॥
वैद्यं विना निरानन्दाः क्लिश्यन्ते रोगिणो यथा ।
शिवं विना निरानन्दं क्लिश्यते हि जगत् तथा ॥
व्याधीनां भेषजं यद्वत् प्रतिपक्षः स्वभावतः ।
शिवः संसारदोषाणां प्रतिपक्षः स्वभावतः ॥
यथानादिप्रवृत्तोऽयं घोरः संसारमण्डलः ।
तथानादिप्रवृत्तोऽयं शिवः संसारमोचकः ॥

इत्यादिका । अतः परमेश्वरस्य सर्वानुग्रहप्रवृत्तेर्ज[3]गत्स्रष्ट्यादिव्यापारः संभवत्येव ॥ ३५ ॥

॥ सर्वधर्मोपपत्तेश्च ॥ ३६ ॥

किं बहुना, प्रधानपरमाणुकर्मकालादीनां ये धर्मा अनुपपन्नास्ते सर्वे ब्रह्मण्युपपद्यन्ते । अतो ब्रह्मैव सर्वातिशायि जगत्स्रष्ट्यादिकारणमिति[4] समञ्जसम् ॥ ३६ ॥

इति श्रीकण्ठशिवाचार्यविरचिते ब्रह्ममीमांसाभाष्ये द्वितीयस्याध्यायस्य प्रथमः पादः ॥ १ ॥ :: :: ॥

१ तदेवं पुरुषानर्थधर्मसंपादित्वा इति पा० ।

* शंकरमते न कर्माविभागादिति चेन्नानादित्वात् इत्येकम् ; उपपद्यते चाप्युपलभ्यते च, इत्यपरमिति सूत्रद्वयं वेदितव्यम् ।

२—दैः इति पा० ।

३ विद्धम् इति पा० ।

१ चेच्च इति पा० ।

२ भणितिः इत्येव पा० ।

३—रे सर्वानुग्रहप्रवृत्ते जग—इति पा० ।

४—द्यन्ते यतः । ततो ब्रह्मण्येव सर्वातिशायि जगत्स्रष्ट्यादिकारणत्वमिति इति पा० ।

॥ अथ कर्पूरमञ्जर्यभिधसट्टकस्य चतुर्थं ॥

॥ जवनिकान्तरम् ॥

ततः प्रविशति राजा विदूषकश्च ।

राजा । अहो गाढअरो गिह्मो पवलो अ पवणो, ता कधं णु सहिदव्वो । जदो,

कुसुमसरसरेक्कगोअराणं
इदमुभअ पि सुदुस्सहं त्ति मण्णे ।
जरढरविकरालिदो अ कालो
सुहअजणेण पिएण विप्पलंभो ॥ १ ॥

विदू । एक्को मम्महवाहणिज्जो अण्णो तावसोसणिज्जो । अह्मारिसो उण जणो ण कामवाहणिज्जो ण तावसोसणिज्जो ।

नेपथ्ये । ता किं ण खु दे मूलुप्पालिअचूलिआविअलं सीसं करइस्सं ॥

राजा । विहस्य । वअस्स लीलावणसच्छंदचारिणा केलिसुएण किं भणिदं ॥

विदू । सक्रोधम् । आः दासीएउत्तक सूलारोवणजोग्गोसि ॥

नेपथ्ये । सच्चं तुह्मारिसाहिंतो संभाविज्जदि । जइ मे ण होंतीओ पक्खावलीओ ॥

राजा । विलोक्य । कधं उड्डीणो विअ । विदूषकं प्रति ।

णिसादलितवित्थरा तह दिणेसु दीग्घत्तणं
ससी लहदि खंडणं तह अखंडबिम्बो रई ।
णिदाहदिअसेसु विप्फुरदि जस्स एस क्कमो
कधं ण सविही तदो खुरसिहाहिं खंडिज्जदि ॥ २ ॥

किं अ । निउणं सेवणिज्जो जइ सुहअजणसंगमो भोदि । जदो,

मज्झण्णे सिरिखंडपंककलणा आसंझमोल्लंसुअं
लीलामज्जणमाप्पदोससमअं साअं सुरासीअलं ।
गिह्मे पच्छिमजामिणी णिहुवणं जं किं पि पंचेसुणो
एदे पंचसिलीमुहा विजइणो सेसा सरा जज्झरा ॥ ३ ॥

विदू । मा एव्वं भण ।

पंडुच्छइच्छुरिदणाअलदादधानं
साहोडविल्लपरिपेसलपोप्फुलाणं ।
कप्पूरपंसुपरिवासिदचंदणाणं
भद्दं णिदाहदिअसाण वअस्स भोदु ॥ ४ ॥

राजा एदं उण एत्थ रमणिज्जं ।

सपंचमतरंगिणो सवणसीअला वेणुणो
समं सिसिरवारिणा वअणसीअला वारुणी ।
सचंदणघणत्थणी सअणसीअला कामिणी
णिदाहदिअसोसहं सअलसीअलं कस्स वि ॥ ५ ॥

॥ अथ चतुर्थजवनिकान्तरप्राकृतविर्त्तति: ॥

अहो गाढतरो ग्रीष्मः प्रबलश्च पवनः । यतः,

कुसुमशरशरैकगोचराणामिदमुभयमपि दुःसहमिति मन्ये ।
जरठरविकरालितश्च कालः सुभगजनमिषेण विप्रलम्भः ॥ १ ॥

एको मन्मथबाधनीयोऽन्यस्तापशोषणीयः । अस्मादृशः पुनर्जनो न कामबाधनीयो न तापशोषणीयः ॥ तत्किं न खलु ते मूलोत्पाटितचूलिकाविकलं शीर्षकं करिष्ये ॥ वयस्य लीलावनस्वच्छन्दचारिणा केलिशुकेन भणितम् ॥ आः दास्याःपुत्रक शूलारोपणयोग्योसि ॥ सत्यं युष्मादृशेभ्यः संभाव्यते यदि मे नाभवन् पत्तावल्यः ॥ कथमुड्डीन दुव ॥

निशादलितविस्तरा तथा दिनेषु दीर्घत्वं
शशी लभते खण्डनं तथा अखण्डबिम्बो रविः ।
निदाघदिवसेषु विस्फुरति यस्य एष क्रमः
कथं न सविधिस्ततः क्षुरशिखाभिः खण्ड्यते ॥ २ ॥

निपुणसेवनीयो यदि सुभगजनसंगमो भवति । यतः,

मध्याह्ने श्रीखण्डपङ्ककलना आसंध्यमार्द्रां शुकं
लीलामञ्जनमाप्रदोपसमयं सायं सुराशीतला ।
ग्रीष्मे पश्चिमयामिनी निधुवनं यत्किमपि पञ्चेषोरेते पञ्चशिलीमुखा विजयिनः शेषाः शरा जर्जराः ॥ ३ ॥

मा एवं भण ।

पाण्डुच्छविच्छुरितनागलतादलानां
सहकारतैलपरिपेशलपूगीफलानाम् ।
कर्पूरपांसुपरिवासितचन्दनानां
भद्रं निदाघदिवसानां वयस्य भवतु ॥ ४ ॥

एतत्पुनरत्र रमणीयम् ।

सपञ्चमतरङ्गिणः श्रवणशीतला वेणवः
समं शिशिरवारिणा वदनशीतला वारुणी ।
सचन्दनघनस्तनी शयनशीतला कामिनी
निदाघदिवसौषधं सकलशीतलं कस्यापि ॥ ५ ॥

अवि अ ।

लीलुत्तंसो सिरीसं सिहिणपरिसरे सिंदुआराण हारो
अंगे उल्लं वरिल्लं रमणपणइणी मेहला उप्पलेहिं ।
दोसूं दोकंदलेसूं णवबिसवलिआ कामविज्जो मणोज्जो
तावातंकक्खमाणं महुसमअगमे एस वेसोबलाणं ॥ ६ ॥

विदू । अहं उण भणामि ।

मज्झह्णलह्णघणचंदनपंकिलाणं
साअं णिरंतरणिसेविदमज्जणाणं ।
सामा सुवीअणअवारिकणुक्खिदाणं
दासत्तणं कुणइ पंचसरोबलाणं ॥ ७ ॥

राजा । स्मरणमभिनीय ।

पच्चग्गं णवरूपभंगिघडणारम्भे जणे संगमं
वंछंताण मणम्मि होंति सहसा जे णाम हल्लोहला ।
ते णिद्दं ण खणं पि देंति ण रइं चित्तस्स संताविणो
ताणं जंति जअम्मि दीहरतमा मासोवमा वासरा ॥ ८ ॥

विदूषकं प्रति । अवि अ वअस्स अत्थि तग्गदा का वि वत्ता ॥

विदू । अत्थि सुणादु पिअवअस्सो कधेमि सुहासिदं दे । जा सा कप्पूरमंजरी रण्णा भवणसुरंगा दिण्णा सा देईए दिट्ठा ।

अपि च ।

लीलोत्तंसः शिरीषं स्तनपरिसरे सिन्दुवाराणां हारः
अङ्गे आर्द्रं वस्त्रं रमणप्रणयिनी मेखला उत्पलैः ।
द्वयोर्दोःकन्दल्योर्नवबिसलतायाः कामवैद्यो मनोज्ञ-
स्तापातङ्कक्षमाणां मधुसमयागमे एष वेषोऽबलानाम् ॥ ६ ॥

अहं पुनर्भणामि ।

मध्याह्नश्लक्ष्णघनचन्दनपङ्किलानां
सायं निरन्तरनिषेवितमज्जनानाम् ।
श्यामासु व्यजनवारिकणोक्षितानां
दासत्वं करोति पञ्चशरोऽबलानाम् ॥ ७ ॥

प्रत्ययं नवरूपभङ्गिघटनारम्भे जने संगमं
वाञ्छन्तां मनसि भवन्ति सहसा ये नाम हलहलाः ।
ते निद्रां न क्षणमपि न ददति न रतिं चित्तस्य संतापिन-
स्तेषां यान्ति जगति दीर्घतमा मासोपमा वासराः ॥ ८ ॥

अपि च वयस्यास्ति तद्गता कापि वार्ता ॥ अस्ति, शृणोतु प्रियवयस्यः कथयामि सुभाषितं ते । या सा कर्पूरमञ्जरी राज्ञा भवनसुरङ्गा दत्ता सा देव्या दृष्टा ॥

राजा ॥ तदो २ ॥

विदू । तदो तं सुरंगादुआरं देईए बहुलसिलासंचएण णीरंधीकदुअ पिहितं । अणंगसेना कलिंगसेणा वसंतसेणा विब्भमसेणा चित्तसेण त्ति पंच चामरधारिणीओ सेण त्ति णामहेआओ फारकंपिअकरवालधारिणीओ कारामंदिररक्खाणिमित्तं पुव्वदिसाए णिउत्ताओ । अणंगलेहा चित्तलेहा विब्भमलेहा चंदलेहा मिअंकलेह त्ति पंच सेरंधीओ लेह त्ति णामहेआओ पुंखिदसिलीमुहधणुहत्थाओ दक्खिणदिसाए णिवेसिदाओ । कुंदमाला चंदणमाला बउलमाला मंगलमाला माणिक्कमाल त्ति पंच तंबोलकरंकधारिणीओ माल त्ति णामहेआओ णवणिसिदकुंतहत्थाओ पच्छिमदिसाए ठाविदाओ । अणंगकेली चित्तकेली राअकेली सुंदरकेली कंदोट्टकेलि त्ति पंच मज्जणकारिणीओ केलि त्ति णामहेआओ फलअखग्गधारिणीओ उत्तरदिसाए अणुत्ताओ । ताणं पि उवरि मंदिरावदी केलिवदी कल्लोलवदी तरंगवदी माणवदी त्ति पंच कुमारिओ वदि त्ति णामहेआओ कणअचित्तदंडहत्थाओ सुहासिअपाढिआओ अट्ठक्खीकदाओ ॥

राजा । अहो देईए सामग्गी अंतेउरोचिदा ॥

विदू । भो वअस्स एसा देईए सारंगिआणाम सही किं पि विण्णावेदुं पेसिदा ॥

ततस्ततः ॥ ततस्तत्सुरङ्गाद्वारं देव्या बहुलशिलासंचयेन नीरन्ध्रीकृत्य पिहितम् । अनङ्गसेना कलिङ्गसेना वसन्तसेना विभ्रमसेना चित्तसेनेति पञ्च चामरधारिण्यः सेनेति नामधेयाः स्फारकम्पितकरवालधारिण्यः कारामन्दिररक्षानिमित्तं पूर्वदिशि नियुक्ताः । अनङ्गलेखा चित्रलेखा चन्द्रलेखा मृगाङ्कलेखा विभ्रमलेखेति पञ्च सैरन्ध्र्यो लेखेति नामधेयाः पुङ्खितशिलीमुखधनुर्हस्ताः दक्षिणदिशि निवेशिताः । कुन्दमाला चन्दनमाला बकुलमाला मङ्गलमाला माणिक्यमालेति पञ्च ताम्बूलकरङ्कधारिण्यः मालेति नामधेया नवनिशितकुन्तहस्ताः पश्चिमदिशि स्थापिताः । अनङ्गकेलिः चित्रकेलिः रागकेलिः सुन्दरकेलिः नीलोत्पलकेलिरिति पञ्च मज्जनकारिण्यः केलिरितिनामधेयाः फलकखड्गधारिण्य उत्तरदिश्याज्ञप्ताः । तासामप्युपरि मंदिरावती केलिवती कल्लोलवती तरङ्गवती मानवतीति पञ्च कुमार्या वतीति नामधेयाः कनकचित्रदण्डहस्ताः सुभाषितपाठिका अध्यक्षीकृताः ॥ अहो देव्याः सामग्री अन्तःपुरोचिता ॥ भो वयस्य एषा देव्याः सारङ्गिकानाम सखी किमपि विज्ञापयितुं प्रेषिता ॥

ततः प्रविशति सारङ्गिका ।

सारं । जेदु २ भट्टा । देई विण्णवेदि । अज्ज भाविवडसावित्तीमहूत्सवोवअरणाइं देवेण केलिप्पासाअमारुहिअ पेक्खिदव्वाइं त्ति ॥

राजा । जं देई आदिसदि ॥ निष्क्रान्ता चेटी । उभौ निष्क्रम्य केलिप्रासादारोहणं नाटयतः ॥

ततः प्रविशति चर्चरी ॥

विदू ।

मोत्ताहललिल्लाहरणुच्चआओ
लासावसाणे तलिणंसुआओ ।
सिंचंति अण्णोण्णमिमा उपेच्छ
जंताजलेणं मणिधारएहिं ॥ ९ ॥

इदो वि ।

परिक्कमंतीउ विचित्तबंधं
इमाउ दोसोलह णच्चणीओ ।
खेलंति तालाणुगदप्पदाओ
तुह्मंगणे दीसदि दंडरासो ॥ १० ॥

समं ससीमासमबाहुदिण्ण-
लेहाविसुद्धा अवराउ देन्ति ।
पंतीहिं दोहीं लअतालबंधं
परप्परं साहिमुहीउ होंति ॥ ११ ॥

मोत्तूण अण्णा मणिवारआइं
जंतेहिं धारासलिलं खिवंति ।
पडंति ताओ अ पिआणमंगे
मणोहुओ वारुणबाणकप्पा ॥ १२ ॥

एदा मसी कज्जलकालकाआ
तिक्कंडचावाउ विलासिणीओ ।
पुलिंदरूवेण जणस्स हास्सं
मऊरपिच्छाहरणा कुणंति ॥ १३ ॥

हत्थे महामंसवलीधरीओ
हुक्कारफेक्काररवा रउद्दा ।
णिसाअरीणं पडिसीसएहिं
अण्णा मसाणाहिणअं कुणंति ॥ १४ ॥

का वि वादिदकरालहुडुक्का
मंदमद्दलरवेण मिअच्छी ।
भूलदाहिं परिपाडिचलाहिं
णच्चकम्म करणम्मि पउत्ता ॥ १५ ॥

किंकिणीकिदझणझणसद्दं
कंठगीदलअजंतिदतालं ।
जोगिणीवलअणच्चणकेलिं
तारणेउररवं विरअंति ॥ १६ ॥

कोडएण लसचंचलवेसा
वेणुवादणपरा अवराओ ।
कालवेसवसहासिदलोआ
ओसरंति पणमंति हसंति ॥ १७ ॥

प्रविश्य सारङ्गिका । पुरोवलोक्य । एसो महाराओ मरअदपुंजं जेव्व गदो कअलीघरं पविट्ठो चिट्ठदि, ता देवीए विण्णविदं णिवेदेम्मि । उपसृत्य । जेदु २ भट्टा ।

जयतु २ भर्ता । देवी विज्ञापयति । अद्य भाविवटसावित्रीमहोत्सवोपकरणानि देवेन केलिप्रासादमारुह्य प्रेक्षितव्यानीति ॥ यद्देवी आज्ञापयति ॥

मुक्ताफलाढ्याभरणोच्चयाः लास्यावसाने श्लक्ष्णांशुकाः ।
सिञ्चन्ति अन्योन्यमिमाः प्रेक्ष यन्त्रजलेन मणिपात्रैः ॥ ९ ॥

इतोपि ।

परिक्रामन्त्यो विचित्रबन्धमिमा द्विःषोडश नर्तक्यः ।
खेलन्ति तालानुगतपदाः तवाङ्गणे दृश्यते दण्डरासः ॥ १० ॥
समं सशीर्षाः समबाहुदत्तलेखा विशुद्धा अपरा ददति ।
पङ्क्तिभ्यां द्वाभ्यां लयतालबन्धं परस्परं साभिमुखा भवन्ति ॥ ११ ॥
मुक्त्वा ऽन्या मणीपात्राणि यन्त्रैर्धारासलिलं क्षिपन्ति ।
पतन्ति ताश्च प्रियाणामङ्गे मनोभुवो वारुणबाणकल्पाः ॥ १२ ॥

एता मसीकज्जलकालकायाः त्रिकाण्डचापा विलासिन्यः ।
पुलिन्दरूपेण जनस्य हासं मयूरपिच्छाभरणाः कुर्वन्ति ॥ १३ ॥
हस्ते महामांसावलिधारिण्यः हुंकारफेत्काररवा रौद्राः ।
निशाचरीणां प्रतिशीर्षकैरन्याः श्मशानाभिनयं कुर्वन्ति ॥ १४ ॥
कापि वादितकरालहुडुक्कामन्दमर्दलरवेण मृगाक्षी ।
भ्रूलताभ्यां परिपाटिचलाभ्यां नृत्यकर्मकरणे प्रवृत्ता ॥ १५ ॥
किङ्किणीकृतझणझणशब्दं कण्ठगीतलययन्त्रिततालम् ।
योगिनीवलयनर्तनकेलि तारनेपुररवं रचयन्ति ॥ १६ ॥
कौतुकेन लसच्चञ्चलवेषा वेणुवादनपरा अपराः ।
कालवेशवशहासितलोका अपसर्पन्ति प्रणमन्ति हसन्ति ॥ १७ ॥

एष महाराजो मरकतपुञ्जमेव गतः कदलीगृहं प्रविष्टस्तिष्ठति । तद्देव्या विज्ञप्तं निवेदयामि । जयतु २ भर्ता ।

देवी एदं विराणवेदि । जधा, संझासमए तुह्मे मए परिणाइदव्व त्ति ॥

विदू । भो किं एदं, अकंडकुह्मंडपडणं ॥

राजा । सारंगिए सवित्थरं कधेसु किं एदं ति ॥

सारं । देव एदं विराणवीअदि । अणंतरातिक्कंतचउद्दसीदिवसे देईए पम्मराअमणिमई गोरी कदुअ भेरवाणंदेण पडिट्ठाविदा, सअं अ देईए दिक्खा गहीदा, तदो ताए विराणत्तो जोईसरो गुरुदक्खिणाणिमित्तं ।

भणिदं अ तेण जोईसरेण जइ मे अवस्सं गुरुदक्खिणा दादव्वा, ता अहिलहिदो अत्थो करीअदु ता एसा दीज्जदु । तदो देईए विराणत्तं, जं आदिसदि भेरवाणंदो त्ति । पुणो भणिदं तेण । अत्थि एत्थ लाडदेसे चंडसेणो णाम राआ, तस्स दुहिदा घणसारमंजरी णाम, सा देवराणेहिं समादिट्ठा, एसा चक्कवट्टिघरिणी भविस्सदि त्ति, तदो तए महाराओ परिणाविदव्वो त्ति । जेण अह्मे वि गुरुदक्खिणा दिराणा भोदि । भट्टा वि चक्कवती कदो भोदि ति । तदो देईए विहसिअ भणिअं । जं आदिसदि भअवं । अहं अ विराणवेदुं पेसिदा गुरुस्स दक्खिणाणिमित्तं ॥

विदू । विहस्य । एदं तं संविहाणअं सीसे सप्पो देसंतरे विज्जो, इह अज्ज विआहो लाडदेसे घणसारमंजरीति ॥

देवी एतद्विज्ञापयति । यथा, संध्यासमये यूयं मया परिणायितव्या इति ॥ भो किमेतत् । अकाण्डकूष्माण्डपतनम् ॥ सारङ्गिके सविस्तरं कथय किमेतदिति ॥ एवं विज्ञाप्यते । अनन्तरातिक्रान्तचतुर्दशीदिवसे देव्या पद्मरागमणिमयी गौरी कृत्वा भैरवानन्देन प्रतिष्ठापिता । स्वयं च देव्या दीक्षा गृहीता । ततस्तया विज्ञप्तो योगीश्वरो गुरुदक्षिणानिमित्तम् । भणितं च तेन योगीश्वरेण यदि मे ऽवश्यं गुरुदक्षिणा दातव्या, तदभिलषितोर्थः क्रियताम्, तदेषा दीयताम् । ततो देव्या विज्ञप्तं, यदादिशति भैरवानन्द इति । पुनर्भणितं तेन । अस्त्यत्र लाटदेशे चण्डसेनो नाम राजा तस्य दुहिता घनसारमञ्जरी नाम, सा दैवज्ञैः समादिष्टा एषा चक्रवर्तिगृहिणी भविष्यतीति । ततस्तया महाराजः परिणायितव्यो येन गुरुदक्षिणा दत्ता भवति भर्तापि चक्रवर्ती कृतो भवति । ततो देव्या विहस्य भणितम् यदा दिशति भगवान् । अहं च विज्ञापयितुं प्रेषिता गुरुदक्षिणानिमित्तम् ॥ एतत्तत्संविधानकं शीर्षे सर्पो देशान्तरे वैद्यः । इहाद्यविवाहो लाटदेशे घनसारमञ्जरीति ॥

राजा । किं दे भेरवाणंदस्स पहावो ण पच्चक्खो । तां प्रति । कहिं संपदं भेरवाणंदो ॥

सारं । देईए कारिदपमदुज्जाणस्स मज्झट्ठिदे बउलतरुमूले चामुंडाभअणे भेरवाणंदो देईए सममागमिस्सदि, ता अज्ज आगउअ दक्खिणाविहिदो गोउरघरे कोदूहलेण विआहो, ता देवेण इह ज्जेव्व ट्ठिदेण होदव्वं ॥ इति परिक्रम्य निष्क्रान्ता ॥

राजा । विहस्य । वअस्स सव्वं एदं भेरवाणंदस्स विअंभिअं ति तक्केमि ॥

विदू । एव्वं णेदं । ण हु मिअलंछणमंतरेण अराणो मिअंकमणिपुत्तलिं पज्झरावेदि । ण हु रुदुसमअमंतरेण सेहालिआ कुसुमुक्करं वा विकिरेदि ॥

ततः प्रविशति भैरवानन्दः ।

भैर । इअं सा वडतरुमूलणिब्भिराणसुरुंगादुआरस्स पिहाणचामुंडा एत्थ ज्जेव्व खणमेत्तं चिट्ठामि । चामुराडां हस्ताभ्यां प्रणम्य पठति ।

कप्पंतकेलिभवणे कालस्स पुरो सुरासुररुहिरसंपूरं ।
जअदि पिअंती काली परमेट्ठिकवालचसएण ॥ १८ ॥

प्रविश्योपविश्य च । अज्ज वि ण आअच्छदि सुरंगादुआरेण कप्पूरमंजरी ॥

ततः प्रविशति सुरङ्गाद्वारोद्घाटितकेन कर्पूरमञ्जरी ॥

कर्पू । भअवं पणमिज्जसि ॥

किं ते भैरवानन्दस्य प्रभावो न प्रत्यक्षः । कुत्र सांप्रतं भैरवानन्दः ॥ देव्या कारितप्रमदोद्यानस्य मध्यस्थिते बकुलतरुमूले चामुण्डाभवने देव्या सममागमिष्यति । तदद्यागत्य च दक्षिणाविहितः कौतूहलेन गोपुरगृहे विवाहः । तद्देवेन इहैव स्थितेन भवितव्यम् ॥ वयस्य सर्वमेतद् भैरवानन्दस्य विजृम्भितमिति तर्कयामि ॥ एवमेतत् । न खलु मृगलाञ्छनमन्तरेणान्यो मृगाङ्कपुत्तलिकां प्रक्षरयति । न खलु ऋतुसमयमन्तरेण शेफालिकाः कुसुमोत्करं वा विकिरन्ति ॥ इयं सा वटतरुमूलनिर्भिन्नसुरङ्गाद्वारस्य पिधानचामुण्डा ।

कल्पान्तकेलिभवने कालस्य पुरः सुरासुररुधिरसंपूरम् ।
जयति पिबन्ती काली परमेष्ठिकपालचषकेण ॥ १८ ॥

अद्यापि नागच्छति सुरङ्गाद्वारेण कर्पूरमञ्जरी ॥

भगवन् प्रणम्यसे ॥

भैर । उइदं वरं लहेसु, इह ज्जेव्व उअविससु ॥

कर्पू । उपविशति ॥

भैर । स्वगतम् । अज्ज वि ण एदि देई ॥

प्रविश्य राज्ञी परिक्रम्य पुरोवलोक्य च । भअवं पणमामि ॥

भैर । चिरंजीअ, उवविससु ॥

देवी । अए इअं भगवदी चामुंडा, इदो इअं कप्पूरमंजरी । ता किं एदं । भैरवानन्दं प्रति । एदं विण्णवीअदि । णिअभवने कदुअ विआहसामग्गिं आगदह्मि । तदो तं गेह्णिअ आगमिस्सं ॥

भैर । वत्से एव्वं कीरेदु ॥

राज्ञी । व्यावृत्य परिक्रामति ॥

भैर । विहस्य स्वगतम् । इअं कप्पूरमंजरी ठ्ठाणं अणेसिदुं गदा । प्रकाशम् । पुत्ति कप्पूरमंजरि, सुरुंगादुआरं जेव्व तुरिदपदं गदुअ सट्ठाणे चिठ्ठ । देईए आगमणे पुणो वि आगंतव्वं ॥

कर्पू । तथा करोति । जं भवं आणवेदि त्ति निष्क्रान्ता ॥

देवी । एदं रक्खाघरं । प्रविश्यावलोक्य च । अए इअं कप्पूरमंजरी, ता सा का वि इस्सा सरिक्खए चिठ्ठदि । कर्पूरमञ्जरीं प्रति । वत्से कप्पूरमंजरि कीदिसं दे सरीरं ॥

आकाशे । किं भणसि महरिसिवअणादो ॥

राज्ञी । स्वगतम् । ता पुणो तहिं गमिस्सं । प्रविश्य पार्श्वतोवलोक्य च । हला सहीओ विवाहोवअरणाइं लघुं गेह्णिअ आअच्छंध । इति परिक्रामति ॥

उचितं वरं लभस्व । इहैवोपविश ॥ अद्यापि नैतिदेवी ॥ भगवन् प्रणमामि ॥ चिरंजीव उपविश ॥ अये इयं भगवती चामुण्डा । इत इयं कर्पूरमञ्जरी । तत्किमेतत् । एतद्विज्ञाप्यते । निजभवने कृत्वा विवाहसामग्रीमागतास्मि । ततस्तां गृहीत्वा आगमिष्ये ॥ वत्से एवं क्रियताम् ॥ इयं कर्पूरमञ्जरी स्थानमन्वेषितुं गता । पुत्रि कर्पूरमञ्जरि, सुरङ्गाद्वारेणैव त्वरितपदं गत्वा स्वस्थाने तिष्ठ । देव्या आगमने पुनरप्यागन्तव्यम् ॥ यद्भवानाज्ञापयतीति ॥ एतद्रक्षागृहम् । अये इयं कर्पूरमञ्जरी । तत्सा कापि अस्याः सदृक्षता तिष्ठति । वत्से कर्पूरमञ्जरी कीदृशं ते शरीरम् ॥ किं भणसि महर्षिवचनात् ॥ तत्पुनस्तत्र गमिष्ये । हला सख्यो विवाहोपकरणानि लघु गृहीत्वा आगच्छत ॥

प्रविश्य कर्पूरमञ्जरी तथैवास्ते ॥

राज्ञी । पुरोवलोक्य । इअं कप्पूरमंजरी ॥

भैर । वत्से विब्भमलेहे आणिदाइं विवाहोवअरणाइं ॥

राज्ञी । आणिदाइं किं पुणो घणसारमंजरीसमुचिदाइं आहरणाइ विसुमरिदाइं ता पुणो पि गमिस्सं ॥

भैर । एव्वं कीरेदु ॥

देवी । नाटितकेन निष्क्रामति ॥

भैर । पुत्ति कप्पूरमंजरि तह ज्जेव्व कीरदु ॥

कर्पू । निष्क्रान्ता ॥

राज्ञी । रक्षागृहप्रवेशं नाटयति । अए सारिक्खदाए वि णाडिद ह्मि । स्वगतम् । झाणविमाणेण णिद्दिट्टं पडिसरंतीमाणेदि महाजोगी । प्रकाशम् । सहीओ जंजं णिवेदिदं तंतं गेह्णिअ आअच्छध ॥ चामुण्डाभवनप्रवेशनाटितकेन तामवलोक्य । अहो सारिक्खदा ॥

भैर । देवि उवविस, महाराओ वि आअदो एव्व वट्टदि ॥

ततः प्रविशति राजा विदूषकः सारङ्गिका च ।

भैर । आसणमासणं महाराअस्स ॥ सर्वे यथोचितमुपविशन्ति ॥

राजा । नायिकां प्रति । एसा सा सरीरिणी मअरद्धुअस्स सव्वाधिआ देहंतरसंठिदा सिंगाररसचावलठ्ठी दिवहसंचारिणी पुण्णिमाचंदचंदिआ । अवि अ । प्पगुणगणमाणिक्कमंजूसा रअणमई अंजणसलाआ । तधा अ । एसा रअणकुसुमणिउणा महुलच्छी । किं अ ।

इयं कर्पूरमञ्जरी ॥ वत्से विभ्रमलेखे आनीतानि विवाहोपकरणानि ॥ आनीतानि, किं पुनर्घनसारमञ्जरीसमुचितान्याभरणानि विस्मृतानि तत्पुनरपि गमिष्ये ॥ एवं क्रियताम् ॥ पुत्रि कर्पूरमञ्जरि तथैव क्रियताम् ॥ अए सदृक्षतयापि नाटितास्मि ॥ ध्यानविमानेन निर्दिष्टां प्रतिसरन्तीमानयति महायोगी ॥ सख्यो यद्यन्निवेदितं तत्तद् गृहीत्वा आगताः ॥ अहो सदृक्षता ॥ देवि उपविश, महाराजोपि आगत एव वर्तते ॥ आसनमासनं महाराजस्य ॥ एषा सा शरीरिणी मकरध्वजस्य सर्वाधिका देहान्तरसंस्थिता शृङ्गाररसचापयष्टिः दिवससंचारिणी पूर्णिमाचन्द्रचन्द्रिका ॥ अपि च । प्रगुणगणमाणिक्यमञ्जूषा, रत्नमयी अञ्जनशलाका । तथा च । एषा रत्नसुकुमनिपुणा मधुलक्ष्मीः । किं च ।

भुवणजअवडाआ रूवरेहा इमीए
जहजह णअणाणं गोअरो जस्स जादि ।
बसइ मअरकेतू तस्स चित्ते विचित्तो
बलइद धणुदंडो पुंखिदेहीं सरेहीं ॥ १९ ॥

विदू । जनान्तिकम् । सच्चं कदं तए आहाणअं । तडंगदाए वि णाआए ण वीससीदव्वं । तुमं मअणसरप्पहारजज्जरिअहिअअं जेव्व कुरकुराअंतं सुणिअ देवी तुह अहिप्पाअं सुणिस्सदि । तुह्मि क्खणं चिठ्ठ ।

भैर । एदं विवाहमंगलमुहुत्तं ता महाराअस्स किज्जदु । जधोचिदं तए पडिवण्णं ॥

राज्ञी । कुरङ्गिकां प्रति । कुरंगिए तुमं महाराअस्स विवाहणेवच्छं कुरु । सारंगिआ वि घणसारमंजरीए करेदु ॥ इत्युभे उभयोर्विवाहघटनं नाटयतः ॥

भैर । उवज्झारीओ हक्कारीअदु ॥

राज्ञी । अज्जउत्त एसो वि उवज्झाओ अज्ज कविंजलो चिठ्ठदि । ता करेदु अग्गिकारिज्जं ॥

विदू । एस सज्जो ह्मि । त्वरितमुत्थाय । भो वअस्स उत्तरीअपडस्स गंठिं देइस्सं दाव,तुमं हत्थेण हत्थं गेण्ह कप्पूरमंजरीए, इति चमत्कृत्य,कधं भुल्लोहं ॥

भैर । तं तस्य भावमुपलक्ष्य विदूषकं प्रति । भो तुमं सुठ्ठुदरं भुल्लोसि । जदो कप्पूरमंजरीए घणसारमंजरी त्ति णामंतरं ॥

जे कंटआ तिउसमुद्धफलम्मि संति
जे केअईकुसुमगब्भदलावलीसु ।
फंसेण पाणिणलिणस्स वि सुंदरीए
रोमंचकंटअचएण विणिज्जिदा दे ॥ २० ॥

विदू । भो वअस्स भामरीओ दिज्जदु,हुदवहे लाजंजलीओ खिवदु ।

राजा । भ्रमणं नाटयति ॥

नायि । धूमेन व्यावृत्तमुखी तिष्ठति ॥

राज्ञी । सपरिवारा निष्क्रान्ता ॥

भैर । विवाहे दक्खिणा दिज्जदु आचारीअस्स ॥

राजा । दिज्जदु । वअस्स गामसअं दे दिण्णं ॥

विदू । सोत्थि होदु त्ति । नृत्यति ॥

भैर । राजानं प्रति । महाराअ किं दे पुणो भूयो पियमुवकरोमि ॥

राजा । भअवं तुह प्पसादेण एसा लद्धा ॥

नेपथ्ये वैतालिकः पठति । सुहणिबंधणो होदु विवाहमहुत्सवो देवस्स । जधा अ । मअणं व्व रइ एसा, वासुदेवं व लच्छी,हरं व गिरिपुत्ती, महिला संपउत्ता । सुहअदु तुह्मे सा,सुहेदु चक्कवत्ति सिरिरिव किदवेसा सा मअरद्धजस्सव्व ॥

राजा । विवाहं निर्वर्त्य । योगिनंप्रति । जोईसर किमपरं पिअं वट्टदि । जदो,

---

भुवनजयपताका रूपरेखा एतस्याः
यथायथा नयनयोर्गोचरो यस्य याति ।
वसति मकरकेतुस्तस्य चित्ते विचित्रो
वलयितधनुर्दण्डः पुङ्खितैः शरैः ॥ १९ ॥

सत्यं कृतं तया आभाणकम् । तटंगतायामपि नौकायां न विश्वसितव्यम् । त्वं मदनशरप्रहारजर्जरितहृदयमेव कुरकुरायन्तं श्रुत्वा देवी तवाभिप्रायं श्रोष्यति । त्वं क्षणं तिष्ठ ॥ एतद्विवाहमङ्गलमुहूर्तं तन्महाराजस्य क्रियताम् । यथोचितं तया प्रतिपन्नम् ॥ कुरङ्गिके त्वं महाराजस्य विवाहनेपथ्यं कुरु । सारङ्गिकापि घनसारमञ्जर्याः करोतु ॥ उपाध्याय आकार्यताम् ॥ आर्यपुत्र एषोप्युपाध्याय आर्यः कपिञ्जलस्तिष्ठति । तत् क्रियतामग्निकार्यम् ॥ एष सज्जोस्मि । भो वयस्य उत्तरीयपटस्य ग्रन्थिं दास्ये तावत्, त्वं हस्तेन हस्तं गृहाण कर्पूरमञ्जर्याः । कथं विस्मृतोहम् ॥ भो त्वं सुष्ठुतरं विस्मृतोस्मि । यतः कर्पूरमञ्जर्या घनसारमञ्जरीति नामान्तरम् ॥

ये कण्टकास्त्रपुसमुग्धफले सन्ति
ये केतकीकुसुमगर्भदलावलीषु ।
स्पर्शेन पाणिनलिनस्यापि सुन्दर्या
रोमाञ्चकण्टकचयेन विनिर्जितास्ते ॥ २० ॥

भो वयस्य भ्रामर्यो दीयताम् । हुतवहे लाजाञ्जलयः क्षिप्यन्ताम् ॥

विवाहे दक्षिणा दीयन्तामाचार्यस्य ॥ दीयताम् । वयस्य ग्रामशतं ते दत्तम् ॥ स्वस्तिभर्वात्वति ॥ महाराज किं ते पुनर्भूयः प्रियमुपकरोमि ॥ भगवन् तव प्रसादेन एषा लब्धा ॥ सुखनिबन्धनो भवतु विवाहमहोत्सवो देवस्य । यथा च । मदनमिव रतिरेषा, वासुदेवमिव लक्ष्मीः, हरमिव गिरिपुत्री, महिला संप्रवृत्ता । सुखयतु त्वां सा, सुखयतु तां चक्रवर्ती श्रीरिव कृतवेषा सा मकरध्वजस्येव । योगीश्वर किमपरं प्रियं वर्तते । यतः,

कुंतलेसरसुआकरफंसप्फारसोक्खशिढिलीकिदसग्गो ।
पालएमि वसुहातलरज्जं चक्कवत्तिपअवीरमणिज्जं ॥२१॥

संस्कृतमाश्रित्य ।

स्वामिंस्त्वच्चरणारविन्दवशतः शृङ्गारसंजीविनी
लब्धा पञ्चशरप्रिया ननु मया कर्पूरमञ्जर्यसौ ।
तल्लाभेन च चक्रवर्तिपदवी लोके समासादिता
किंकिं नेह करोति हन्त महतां संदर्शनं जन्तुषु ॥ २२ ॥

तधा वि । एदं भोदु भअववअणं ।

णिच्चं वड्ढदु सज्जणाण सअलो वग्गो, खलाणं पुणो
णिच्चं खिज्जदु, भोदु बह्मणजणो सच्चासिहो सव्वदा ।
मेहो मुंचदु संचिअं पि सलिलं सस्सोचिअं भूअले
लोओ लोभपरम्मुहोणुदिअहं धम्मे मदिं पावदु ॥ २३ ॥

इति श्रीमन्महाराष्ट्रचूडामणिना महेन्द्रपालोपाध्यायेन राजशेखरेण बालकविना कविराजेन विरचिते नाटकविशेषे कर्पूरमञ्जरीनामके सट्टके चतुर्थं जवनिकान्तरं समाप्तम् । सट्टकं च समाप्तिमगमत् ॥

कुन्तलेश्वरसुताकरस्पर्शस्फारसौख्यशिथिलीकृतस्वर्गः ।
पालयामि वसुधातलराज्यं चक्रवर्तिपदवीरमणीयम् ॥ २१ ॥

तथापि एतद्भवतु तावत् ।

नित्यं वर्धतां सज्जनानां सकलो वर्गः खलानां पुनर्नित्यं खिद्यतां भवतु ब्राह्मणजनः सत्याशीः सर्वदा ।
मेघो मुञ्चतु संचितमपि सलिलं सस्योचितं भूतले
लोको लोभपराङ्मुखोनुदिवसं धर्मे मतिं बिभर्तु ॥ २३ ॥

॥ इति चतुर्थजवनिकान्तरस्य प्राकृतविवृतिः ॥

भूमिका ।

पुरा किल श्रीमद्भास्कराचार्यप्रभृतिभिर्विद्वद्भिः सिद्धान्तशिरोमणिप्रभृतयो ग्रन्था विरचितास्तत्र च तैः पूर्वपूर्वशास्त्रेभ्यो लघुभूताः प्रकाराः पूर्वाचार्यानुक्तकतिपयप्रश्नानां नवीनप्रकाराश्च प्रदर्शिताः । अद्यत्वे त्वस्मद्गुरुप्रवरैः श्रीमद्बापूदेवशास्त्रिभिश्चानेके नवीनाः प्रश्नाः सभङ्गाः कल्पिताः । किंच यत्रयत्र सिद्धान्तग्रन्थेष्वसकृत्कर्मोक्तं तत्र सर्वत्र सकृत्प्रकारेणैव निर्वाहः कृतः । अथ तेषामाज्ञया तत्सविधमधीयानेन मया बहूनां नवीनानां प्रश्नानां भङ्गान् विरचय्य पूर्वोक्तकतिपयप्रश्नानां प्रकारान्तराणि च निर्माय ग्रन्थरूपेणोपनिबद्ध्य कतिपयप्रश्नविचार इति तस्य नामाभिधायि । स चायं प्रबन्धको विद्वज्जननयनगोचरीभूय विद्यार्थिनां च कर्णपदवीमनुसृत्य मदीयं परिश्रमं सफलयतादिति सर्वान् विज्ञापये ।

वेतालोपाह्वो विनायकशास्त्री ।

॥ श्रीगुरुभ्यो नमः ॥

संकटां विघ्नराजं च नत्वा गुरुपदद्वयम् ।
ध्यात्वा कतिपयप्रश्नविचारः क्रियते मया ॥ १ ॥
अनन्ते त्रिप्रश्ने नभसि यदि हंसा बुधवराः
समुड्डीयास्यान्तं चिरमलभमानाः खलु तदा ।
खगोऽत्यल्पीयोऽहं परिचितयथाशक्तिपतनः
समुड्डीये नो किं सकलसुजनप्रार्थनमिदम् ॥ २ ॥
त्रिप्रश्नसिन्धौ गहने विशाले
नान्तं न पारं यदवापुरार्याः ।
तथापि पोतं चरणौ गुरूणां
विधाय तर्तुं मनसि स्पृहा मे ॥ ३ ॥

उद्देशकः ।

उद्वृत्तशङ्कुं समवृत्तशङ्कुं
यद्वा कुजीवामथ तद्धृतिं च ।
ज्ञात्वाक्षभां मे वद शीघ्रमग्रामग्राग्रखण्डं च निरीक्ष्य विद्वन् ॥ ४ ॥

उत्तरम् ।

समशङ्कूर्ध्वखण्डेन हृतादुद्वृत्तशङ्कुतः ।
यद्वाग्रकादिखण्डेन भक्तादग्राग्रखण्डतः ॥ ५ ॥
कुगुणाच्च कुजीवोनतद्धृत्या विहृतात् पदम् ।
रविनिघ्नं पलाभा स्याद् बहुधैतत् प्रयुज्यते ॥ ६ ॥

उद्देशकः ।

अग्रादिखण्डं समवृत्तशङ्कुं
ज्ञात्वाथ तद्धृत्यपमज्यके वा ।
उद्वृत्तशङ्कुं समवेक्ष्य चाग्रां
पलप्रभां कोविद मे वद त्वम् ॥ ७ ॥

उत्तरम् ।

अग्रादिखण्डकृत्या वेदाहतया विहीनो यः ।
समवृत्तशङ्कुवर्गो हीनयुतस्तत्पदेन समशङ्कुः ॥ ८ ॥
अग्रादिखण्डविहृतः षड्गुणितः स्याद्द्विधा पलभा ।
अग्रोन्मण्डलशङ्कू समशङ्क्वग्रादिखण्डयोः स्थाने ॥ ९ ॥

तद्वृत्यपमज्ये वा प्रकल्प्य साध्याथवा द्विधा पलभा ।
सद्युक्तियुक्तमेतत् प्रोक्तं स्फुटमेव गोलविदाम् ॥ १० ॥

उद्देशकः ।

विद्धोन्नतांशान् सममण्डलस्थे
रवौ चितिज्यामभिवीक्ष्य शीघ्रम् ।
पलप्रभां चेद्बुध बोबुधीषि
त्वत्तोऽपरः को भुवि गोलवेत्ता ॥ ११ ॥

उत्तरम् ।

कुज्यार्धवर्गसहितात् समशङ्कुवर्गा-
न्मूलं ततः किल कुमौर्विकयोनितं स्यात् ।
कुज्योनतद्धृतिरतः सुलभा पलाभा
कुर्यात् क्रियां यदि सुधीरिह पूर्वमुक्ताम् ॥ १२ ॥

उद्देशकः ।

यो वेत्ति पलभां शीघ्रमग्राकुज्योनतद्धृती ।
ज्ञात्वा स गणितारण्यचारी गणककेसरी ॥ १३ ॥

उत्तरम् ।

कुज्योनतद्धृतिदलस्य तथाग्रकायाः
कृत्योर्युतेः पदमदश्च विहीनितं सत् ।
कुज्योनतद्धृतिदलेन कुशिञ्जिनी स्यात्
साध्याक्षभाच कृतिभिः खलु पूर्वयुत्या ॥ १४ ॥

क्रान्तिज्याग्राग्रखण्डे सुगणक यदि वा कुज्यकाग्रादिखण्डे
ज्ञात्वा वाग्राग्रखण्डं पुनरथ समवृत्तस्थितेऽर्के तु शङ्कोः ।
ऊर्ध्वं खण्डं विलोक्य प्रवद विषुवतीं वीक्ष्य वा क्रान्तिमौर्वीं
बुद्ध्वा चोद्वृत्तशङ्कुं नहि जगति तदा गोलविज्ञस्त्वदन्यः॥१५॥

उत्तरम् ।

अग्राग्रखण्डस्य दलस्य वर्गात्
क्रान्तिज्यकावर्गयुतात् पदं यत् ।
अग्राग्रखण्डार्धयुतं तदग्रा
ततोऽक्षभा पूर्ववदेव साध्या ॥ १६ ॥

कुज्याग्रादिमखण्डे क्रान्तिगुणाग्राग्रखण्डयोः स्थाने ।
कल्प्ये ततोऽग्रमौर्वी ततः पलाभा च संसाध्या ॥ १७ ॥

यदूर्ध्वखण्डं समवृत्तशङ्को-
रग्राग्रखण्डं परिकल्प्य साध्या ।
अग्रा भवेत् सैव समाख्यशङ्कुः
पूर्वप्रकारेण ततः पलाभा ॥ १८ ॥

प्रकल्प्य वोद्वृत्तनरं समाख्य-
शङ्कूर्ध्वखण्डं च तथापमज्याम् ।
कुज्योनितां तद्धृतिमत्र साध्यः
समाख्यशङ्कुः पलभापि तस्मात् ॥ १९ ॥

उद्देशकः ।

अग्राग्रखण्डकं यद्वा समशङ्कूर्ध्वखण्डकम् ।
विज्ञाय तद्धृतिञ्चाशु विद्धन्नक्षप्रभां वद ॥ २० ॥

उत्तरम् ।

अग्राग्रखण्डसमवृत्तनरोर्ध्वखण्ड-
वर्गौ च तद्धृतिहतौ घनमूलमाभ्याम् ।
स्यात् कुज्यका किल तदूनिततद्धृतिश्च
साध्या ततोऽक्ष पलभोक्तवदेव विद्भिः ॥ २१ ॥

उद्देशकः ।

अग्राग्रखण्डकं ज्ञात्वा समशङ्कूर्ध्वखण्डकम् ।
विज्ञाय गोलविज्ञाशु विद्धन्नक्षप्रभां वद ॥ २२ ॥

उत्तरम् ।

समशङ्कूर्ध्वखण्डेन हृतादग्राग्रखण्डतः ।
घनमूलं तदर्कघ्नं पलभा भवति ध्रुवम् ॥ २३ ॥

उद्देशकः ।

ज्ञात्वा समवृत्तनरं यद्वा कुज्योनतद्धृतिं वीक्ष्य ।
ब्रूहि द्रुतमक्षाभां विद्धन्नग्राग्रखण्डञ्च ॥ २४ ॥

उत्तरम् ।

अग्राग्रखण्डकसमं परिकल्प्य पूर्व-
मुद्वृत्तशङ्कुमथ तेन समाख्यशङ्कुः ।
भक्तः फलात् कुरहितात् पदमग्रकाग्र-
खण्डघ्नमेवमसकृत् परिसाधनीयः ॥ २५ ॥

उद्वृत्तशङ्कुरथ तद्धृतमर्कनिघ्न-
मग्राग्रखण्डमिदमेव पलप्रभा स्यात् ।
अग्राग्रखण्डकसमां परिकल्प्य कुज्यां
कुज्योनतद्धृतिरनेन विभाजिताग्रात् ॥ २६ ॥

सैकात् पदं निहतमेतदथाग्रकाग्र-
खण्डेन तत् तु भवति चितिमौर्विकैवम् ।
तां साधयेदसकृदत्र ततः पलाभा
पूर्वक्रिया यदि भवेद् द्रुतमेव सिद्ध्येत् ॥ २७ ॥

उद्देशकः ।

ज्ञात्वाग्रां कुज्यां वा समवृत्तनरोर्ध्वखण्डञ्च ।
पलभां ब्रवीहि तूर्णं चेदच्चेचविज्ञानम् ॥ २८ ॥

उत्तरम् ।

अग्राग्रखण्डं समवृत्तशङ्को-
रूर्ध्वेन खण्डेन समं प्रकल्प्य ।
तद्भाजिताग्रा फलतो निरेका-
न्मूलं हतं तत् समवृत्तशङ्कोः ॥ २९ ॥
ऊर्ध्वेन खण्डेन तदग्रकायाः
स्यादाद्यखण्डं त्वसकृत् प्रसाध्यम् ।
तदच सूर्याभिहतं समाख्य-
शङ्कूर्ध्वखण्डोद्धृतमचभा स्यात् ॥ ३० ॥

समशङ्कूर्ध्वखण्डेन तुल्यां कुज्योनतद्धृतिम् ।
प्रकल्प्य तद्धृता कुज्या फलात् सैकात् पदं हतम् ॥ ३१ ॥

समशङ्कूर्ध्वखण्डेन भवेत् कुज्योनतद्धृतिः ।
असकृत् तां प्रसाध्यातः पलभा प्रोक्तवत् कृते ॥३२॥

उद्देशकः ।

उद्वृत्तशङ्कुमग्रादिखण्डं वा वीक्ष्य कोविद ।
पलभां तद्धृतिज्ञ त्वमावेदय धिया स्वया ॥ ३३॥

उत्तरम् ।

तद्धृतिसमः समाख्यः शङ्कुः कल्प्योऽथ तद्भक्तः ।
उद्वृत्तशङ्कुरेतद्धीनाद्रूपात् पदं यत् स्यात् ॥ ३४ ॥
तत् तद्धृत्याभिहतं समशङ्कुः स्यादसावसकृत् ।
साध्यस्ततः पलाभा सुलभा पूर्वक्रिया यदि क्रियते ॥ ३५ ॥
उद्वृत्तनरस्थाने परिकल्प्याग्रादिखण्डकं तस्मात् ।
असकृत् समशङ्कुर्यः सैवाग्रा स्यादथोक्तवत् पलभा ॥ ३६ ॥

श्रीबालशास्त्रिविदुषां सविधं पठित्वा
प्राक् शब्दशास्त्रमथ तज्जनितावबोधः ।
श्रीबापुदेवगुरुवर्यकृपाकटाक्षा-
त्सज्ज्योतिषं प्रपठतीह विनायको यः ॥ ३७ ॥
तन्निर्मिते कतिपयप्रश्नविचाराभिधप्रबन्धेऽस्मिन् ।
अचचेत्रप्रकरणमाद्यं संपूर्णतामगमत् ॥ ३८ ॥

THE VIDVAN-MANO-RANJINI'

OR

REJOICER OF THE MIND OF THE LEARNED.

A COMMENTARY ON SAD-ÁNANDA'S VEDÁNTA-SÁRA, BY RÁMA-TÍRTHA.

(Continued from page 82.)

But ignorance. The word *but* is intended to point out a difference from other doctrines [that is, from the definitions given in other systems.] The author shews this difference *not explicable by entity and non-entity &c.* [The Vedántins declare that this is something which is not explicable by entity and non-entity, which consists of the three qualities, is not a mere negation and is opposed to knowledge.] The author rejects the too extensive application to the antecedent non-existence of knowledge, which would ensue had ignorance been defined merely as the opponent of knowledge, by adding the words which is not a mere non-entity. The words not explicable by entity and non-entity, are employed to exclude antecedent knowledge opposed to subsequent knowledge; the words which consists of the three qualities, to exclude false cognition. In other words the characteristic of ignorance is repugnancy to knowledge, capability of being expelled by knowledge. Nor does this definition by a too extensive application apply to the world removable by knowledge of the absolute and the individuated soul; inasmuch as this world is not other than ignorance, since it has ignorance or illusion for its material cause. Nor does it by undue extension apply to the connection of soul and ignorance, inasmuch as the connection of ignorance with spirit which as pure intelligence is essentially detached, depends on ignorance, and thus the connection is itself illusory. The definition, therefore, is not unduly extensive, since antecedent non-existence of knowledge and the connection between ignorance and spirit, are not excluded from the object defined. Nor is there any ground to apprehend undue restriction or total inapplicability in the definition, it being known universally that ignorance is sublated by knowledge. Nor is there an undue extension to antecedent knowledge or to antecedent non-existence of knowledge; inasmuch as there is no law that antecedent knowledge must be expelled by knowledge, it being experienced that it is removed also by production of desire and other mental modifications; and it being acknowledged that it is ignorance which is uncondi-

अज्ञानन्त्विति। तुशब्दो मतान्तरेभ्यो वैशिष्ट्यद्योतनार्थः तमेव विशेषं दर्शयति ॥

tionally expelled by knowledge. Since, also, antecedent non-existence is opposed only to the production of non-existent objects; it cannot be removed by knowledge, for a non-existent object not yet produced [that is, an unrealised potentiality] cannot have the power of expelling anything. The definition, therefore, is not unduly extended to antecedent knowledge or to antecedent non-existence of knowledge. It may be objected: How can ignorance be expelled by knowledge, since ignorance receives its destruction concomitantly with the production of knowledge? We reply that the objection is worthless, since it is meant by this concomitance that there is no delay after the production of knowledge. If it be asked: How can ignorance be expelled by knowledge, since the destruction of ignorance encounters destruction concomitantly with the production of knowledge? we refuse this objection since it is meant that there is no delay after the production of knowledge, it being impossible that the production of knowledge, should be concomitant [or simultaneous] with the destruction of knowledge, as may be shown by the impossibility of co-existence even for a moment between entity and non-entity. Such is the disparity between ignorance and antecedent non-existence. Accordingly another characteristic of ignorance is that it cannot be explained either as existent or as non-existent. In this definition, also may be considered the avoidance of undue extension &c. This definition is not totally incompatible, for were ignorance an entity, it would follow that, like pure intelligence, it could not be sublated; and were ignorance a non-entity, it would be impossible that it should appear, not being presented, as is the case with the son of a barren woman and the like chimerical objects. The sublation and the presentation of ignorance being universally known, its inexplicability is correctly stated. Having proclaimed the two alternatives of its existence and non-existence to be shown to be erroneous as aforesaid, the two doctrines are to be rejected, viz. that ignorance is an impression derived from false cognition, and that it is non-existent, having the power of revealing the non-existent. The author next rejects the alternative that ignorance is erroneous cognition, and a quality of the soul.

Which consists of the three qualities, &c. The qualities, red, white and black, are universally experienced in the intermediate natures [objects both produced, and productive] the products of ignorance, light, water and earth; as says the Vedic text, The red colour of fire is the colour of light, white colour is the colour of water, and black is that of earth. Thus it is meant that by reason of the three colours in its products, the cause, also, ignorance the nature whereof is not displayed, consists of the three qualities. Accordingly the rule: From the sign it is light, therefore some men read. In other words, the three qualities are goodness, passion, and darkness, and ignorance is endowed with, or composed of, these. The words which consists of the three qualities are employed to indicate the indifference of qualities and the subject of qualities. Since therefore a quality cannot possess qualities, erroneous cognition [which is a quality of soul] cannot be ignorance [which possesses the three qualities.] He refuses the doctrine that ignorance is absence of knowledge.

Not a mere negation &c. The meaning is as fol-

सदसद्भ्यामित्यादिना । ज्ञानविरोध्यज्ञानमित्युक्ते ज्ञानप्रागभावे प्रसङ्गं व्युदस्यति भावरूपमिति उत्तरज्ञानविरोधिपूर्व्वज्ञानव्युदासाय सदसद्भ्यामनिर्व्वचनीयमिति मिथ्याज्ञानव्युदासाय त्रिगुणात्मकमिति यद्वा ज्ञानविरोधित्वं ज्ञानापनोद्यत्वं तदेवाज्ञानत्वमिति अज्ञानलक्षणं । नच ब्रह्मात्मैकत्वज्ञानापनोद्यप्रपञ्चेऽतिव्याप्तिस्तस्याज्ञानोपादानकत्वेनाज्ञानानतिरेकात् नाप्यज्ञानात्मसम्बन्धेऽतिव्याप्तिः असङ्गस्वभावत्वात् चिदात्मनोऽज्ञानसम्बन्धस्याचाज्ञानाधीनत्वात्तस्याप्यज्ञानात्मत्वोपपत्तेः अतो नानयोर्लक्ष्यबहिर्भावइति न लक्षणस्यातिव्याप्तिः अव्याप्त्यसम्भवयोस्तु शङ्कैव नास्ति ज्ञानेनाज्ञानबाधस्य प्रसिद्धत्वात् । नच पूर्व्वज्ञाने ज्ञानप्रागभावे चातिव्याप्तिः पूर्व्वज्ञानस्य ज्ञानापनोद्यत्वनियमाभावादिच्छादिवृत्त्यन्तरोत्पत्त्यापि तदपनोददर्शनात् । इह च नियमेन ज्ञानापनोद्यस्याज्ञानत्वाभ्युपगमात् । प्रागभावस्य च प्रतियोग्युत्पत्तिमात्रविरोधिनस्तदपनोद्यत्वाभावात् नह्यनुत्पन्नः प्रतियोगी कस्य चिदपनोदकः सम्भवति अतो न तयोरतिव्याप्तिः । ननु ज्ञानस्यापि ज्ञानोत्पत्तिनान्तरीयकतया विनाशाश्रयणात् कथं ज्ञानापनोद्यत्वमिति चेत् न ज्ञानोत्पत्त्यनन्तरं विलम्बाभावाभिप्रायेणाज्ञाननाशस्य ज्ञानोत्पत्तिनान्तरीयकतया विनाशाश्रयणात् कथं ज्ञानापनोद्यत्वमिति चेन्न ज्ञानोत्पत्त्यनन्तरं विलम्बाभावाभिप्रायेणाज्ञाननाशस्य ज्ञानोत्पत्तिनान्तरीयकताबाधोयुक्तेराश्रयणात् भावाभावयोस्तु क्षणमात्रमपि सहभावानुपपत्तेरित्यस्ति प्रागभावाद्वैषम्यमज्ञानस्येति । सदसद्भ्यामनिर्व्वाच्यमित्यपरं लक्षणं । अत्रापि पूर्व्ववदेवातिव्याप्त्यादिपरिहारो द्रष्टव्यः नेदमसम्भवि अज्ञानस्य सत्त्वे चिदात्मवद्बाधाभावप्रसङ्गात् असत्त्वे च बन्ध्यासुतादिवदपरोक्षप्रतिभासानुपपत्तेः बाधप्रतीत्योश्चाज्ञाने प्रसिद्धत्वाद्युक्तं तस्यानिर्व्वचनीयत्वं सदसत्त्वपक्षयोरुक्तदूषणमुपजीव्यमङ्गीकृत्य मिथ्याज्ञानजन्यसंस्कारोऽज्ञानमसत्प्रकाशनशक्तित्वेनासिद्धेति मतद्वयं निरसनीयं । मिथ्याज्ञानमात्मगुणोऽज्ञानमितिपक्षं निरस्यति ॥

त्रिगुणात्मकमिति । गुणालोहितशुक्लकृष्णाः अज्ञानकार्य्येषु तेजोऽबन्नेष्ववान्तरप्रकृतिषु प्रसिद्धाः । यदग्ने रोहितं रूपं तेजसस्तद्रूपं यच्छुक्लं तदपां यत्कृष्णं तदन्नस्येति श्रुतेः । तथा च कार्य्यगतत्रिरूपेण कारणमप्यज्ञानमव्याकृतात्मकं त्रिरूपेण त्रिगुणात्मकमिति यावत् । तथा च न्यायः ज्योतिरुपक्रमातु तथा ह्यधीयत एकइति । यद्वा रजः सत्त्वतमोलक्षणास्त्रयो गुणास्तद्युक्तमज्ञानं त्रिगुणात्मकं गुणगुणिनोरभेदविवक्षया त्रिगुणात्मकमित्युक्तं । तथा च गुणस्य गुणवत्त्वानुपपत्तेर्न मिथ्याज्ञानमज्ञानमित्यर्थः । ज्ञानाभावोऽज्ञानमिति मतं निरस्यति ॥

भावरूपमिति । अयमर्थः अभावप्रतियोगि यज्ज्ञानं तत् किं साक्षिचैतन्यं स्यात् । साक्षी चेतेत्यादिश्रुतेस्तस्यापि ज्ञानत्वप्रसिद्धेः किम्वान्तःकरणवृत्तिः विज्ञानेन वा ऋग्वेदं विजानातीति विज्ञानशब्देन बुद्धेः श्रवणात् । अथवात्मगुणः तथात्वेन च ज्ञानस्य वैशेषिकतन्त्रे प्रसिद्धत्वात् । तत्राद्योनाभवप्रतियोगि तस्य नित्यत्वात् द्वितीये ज्ञानशब्दस्यौपचारिकत्वेन तदभावस्य मुख्यतोऽज्ञानत्वायोगात् येन वा पश्यतीत्यारभ्य प्रज्ञा नेत्रं प्रज्ञाने प्रतिष्ठितं प्रज्ञाने त्रिलोक इत्यन्तेन प्रज्ञाशब्दवाच्यप्रत्यक्चैतन्यव्याप्तस्यैव चक्षुरादिद्वारकबुद्धिपरिणामस्य संकीर्त्तनात् । सांख्यपक्षमाश्रित्यानौपचारिकत्वे स्वीक्रियमाणेऽपि न वृत्त्यभावोऽज्ञानं वृत्त्यभावशब्देन वृत्त्युपादान-

lows. Is the knowledge, the object which is non-existent, the intelligence of the conscious subject, for according to the Vedic text, The conscious subject, the thinker, this is universally known to be knowledge? Or is it a modification of the internal organ, for intellection or the modification of the internal organ] is understood by the word knowledge, in the text, He knows the Rig-veda by knowledge? Or is it a quality of the soul, for knowledge is universally considered such in the system of the Vaiśeshikas? The first of these three cannot be non-existent by antecedent non-existence, being eternal. If it be the second, the word knowledge being only tropically employed, non-existence of such knowledge, cannot be properly called ignorance in its primary application. For such knowledge in the secondary sense is proclaimed to be modification of the understanding mediately through the eye and other organs, pervaded by self-conscious intelligence denoted by the term wisdom, in the text beginning with the words Wherewith he sees, and ending with the words Wisdom is the eye existent in acquiring cognition, and in cognition are three worlds. Adopting the Sáṅkhya view, thus stated, even did we allow that this use of the word knowledge is not secondary, yet non-existence of a modification is not ignorance; for, by the term non-existence of modification is expressed only a state consisting of intellect which is the material cause of modifications [that is the non-existence of a modification would be not a non-entity, but a mode of being retracted into intellect.] The other alternative, then, remains. With respect to this view [that ignorance is the negation of the cognitive quality of soul], we must ask: Is ignorance merely the negation of a particular cognition, or is it the negation of cognition in general? The former it cannot be, inasmuch as we observe ignorance irrelative to particular objects in the form, I am ignorant, I know nothing. Nor can it be replied that even in this instance, we must suppose that the ignorance tends towards some particular object; for there would be an end to all general cognition, if general cognition were unnecessarily assumed to be conversant about particulars. So also it would follow that there might be a universal non-existence of water-pots even on a space occupied by a water-pot, and there would result the non-existence of dreamless sleep. You therefore will maintain that the judgment I am ignorant, has reference to non-existence of cognition in general. But, then, cognition of non-existence supposing knowledge of a propertied subject [soul] and an absent object, how can non-existence of cognition be experienced in the soul which is the subject, while the cognition which is the absent object, and the soul which is the subject, are known, for there exists here a cognition, opposed to the negation of cognition. But if the subject and the absent object be not recognised, how can there be any cognition of non-existence, for the conditions of such cognition are wanting? This rule may be understood to apply to the sixth instrument of right knowledge. It may be urged: Where there is a contradiction [or where a universal negation is encountered by a particular affirmation], a general cognition is supposed relative to some particular; as when in regard to a space occupied by a water-jar, the cognition There is not a water-jar, is relative to the absence of some specially intended water-jar; and thus the soul being in this judgment recognised as opposed to the existence of some particular absent cognition, the general non-existence is impossible, and therefore the cognition I know nothing has for its object the absence of a particular cognition. This we deny; for we must suppose that by this contradiction the cognition is relative to another existent object. For in the cognition I am ignorant, I know nothing at all, no ulterior object remains to the negation of the knowledge of which object, the judgment might refer; just as in the cognition There is no water-pot in this place, there remains no ulterior individual water-pot. If it be argued that it is better to suppose non-entity, a well-known principle, to be the object in some way or other, of the apprehension of non-existence, than to suppose an unknown ulterior entity as that object; we reply that such entity is not altogether unknown, and it is known as the subject of a

---

बुद्धिस्वरूपावस्थानमात्रस्यैवाभिलापात् अतः पक्षान्तरं परिशिष्यते तत्रेदं वक्तव्यं ज्ञानविशेषाभावएवाज्ञानं ज्ञानसामान्याभावोऽपि वेति । नाद्यो मूढ़ोऽहं न किञ्चिज्जानामीत्यनुल्लिखितविषयविशेषस्याप्यज्ञानस्यानुभवात् । नच तत्रापि विषयविशेषपर्य्यवसायित्वं कल्प्यते इति वाच्यं विनानुपपत्तिं सामान्यबुद्धेर्विशेषालम्बनत्वे सामान्यबुद्धेर्विलोपप्रसङ्गात् । तथा च घटवत्यपि भूतले घटसामान्यनिषेधप्रसङ्गः सुषुप्त्यभावप्रसङ्गश्च स्यात् तस्मात् ज्ञानसामान्याभावोऽहमज्ञइत्युल्लिख्यतइति वाच्यं तत्र चाभावज्ञानस्य धर्म्मिप्रतियोगिज्ञानसापेक्षत्वादात्मनि धर्म्मिणि ज्ञाने च प्रतियोगिनि विज्ञायमाने तस्मिन्नेवात्मनि कथं ज्ञानाभावग्रहः । अभावप्रतियोगिनो ज्ञानस्य तत्र वर्त्तमानत्वात् । तयोरविज्ञायमानयोरपि कथं तत्राभावग्रहः कारणाभावात् । षष्टप्रमाणपक्षेऽप्ययं न्यायऊहनीयः । नन्वनुपपत्तौ सत्यां सामान्यबुद्धेरपि विशेषालम्बनत्वं कल्प्यते यथा घटवत्यपि भूतले घटो नास्तीति बुद्धेर्व्विवक्षितघटाभावविषयत्वं तद्वदिहापि सामान्याभावस्य यत्किञ्चित्प्रतियोगिसत्त्वविरोधादात्मनि विज्ञायमाने तस्मिन्ननुपपत्तेर्न किञ्चिज्जानामीति बुद्धेर्ज्ञानविशेषाभावविषयत्वं कल्प्यते इति चेन्न अनयैवानुपपत्त्या भावान्तरविषयत्वस्यैव कल्पनीयत्वात् । नहि मूढ़ोऽहं सामान्यं किञ्चिदपि न जानामीत्यनुभवे किञ्चिद्विषयान्तरमवशिष्यते यज्ज्ञानाभावविषयत्वमस्य कल्प्येत यथास्मिन् भूतले न कोऽपि घटोऽस्तीति प्रत्यये घटविशेषस्य अनवशेषस्तद्वत् । नन्वप्रसिद्धभावान्तरकल्पनाद्वरं प्रसिद्धस्याभावस्यैव यथा कथञ्चिदपि अज्ञानबुद्धेर्विषयत्वकल्पनमिति चेन्न अत्यन्तमप्रसिद्ध्यभावात् देवात्मशक्तिं स्वगुणैर्निगूढां । मायान्तु प्रकृतिमिति च श्रुतिवाक्ययोर्गुणवत्त्वेनोत्पद्यमानजगदुपादानत्वेन च प्रसिद्धत्वात् । तस्मान्नाभावोऽज्ञानं किन्तु भावान्तरमेवेति । ननु भावत्वमप्यज्ञानस्यानुपपन्नमनादेस्तस्य भावरूपत्वे चिदात्मवदनिवृत्तिप्रसङ्गादनिर्मोक्षापत्तेरित्यत आह ॥

tributes and as the material cause of the universe, according to the texts, The power of divine spirit enveloped in its own qualities, and Illusion is nature [and the illuded is God.] Ignorance, therefore, is not a non-entity, but some ulterior entity. Here it may be objected: It is impossible that ignorance should be an entity, for it being without beginning, were it entitative, it would follow that, like pure intelligence, it could not cease to be, and therefore there could be no emancipation. To this the author replies.

Something &c. By this it is meant that we declare ignorance an entity not in the sense of real existence, but in the sense of something different from non-existence. It is not to be maintained that entity and non-entity being mutually repugnant, negation of the one supposes affirmation of the other, and a third term is excluded; for ignorance, neither entitative nor non-entitative, is possible; as on negation of masculine and feminine, which are reciprocally opposed, the neuter ulterior to them emerges. If you reply that in this example a third term is apprehended by another instrument of science; then we rejoin, that you may be satisfied that there is in relation to ignorance also an instrument of science, cognition and sublation of cognition being otherwise [that is, in the absence of such ignorance or illusion] impossible. In truth, we are not greatly concerned about ignorance, for every impossibilty is an evidence that there is such ignorance as it has been said: Of ignorance the characteristic is to be unknown, that is to unsusceptible of proof, for otherwise ignorance would be real. This illusion is baseless, repugnant to all reasoning: it tolerates not judgment, as darkness endures not the light of day. In the Ishṭa-siddhi, also, it is said: Difficulty of maintenance is an ornament, and no disparagement to ignorance; its illusory nature would hardly be established on dogmatic grounds. It is allowed then that the ancients have declared ignorance to be something inexplicable, being incapable of explanation as entity or non-entity, or both entitative and non-entitative, as partite or impartite or both, as separate from spirit or inseparate or both, as the imaginary gloom of the owl in the light of day. The author now proceeds to cite the testimony of consciousness and of revelation, in answer to one who should contend that there is no such ignorance as that we have described.

I am ignorant &c. It has been denied that this deliverance of consciousness has absence of knowledge for its object; for the universal negation of knowledge, the non-existent object whereof consists of the undetermined, is not capable of being perceived in oneself. Nor can it be urged that ignorance even if entitative, could not be apprehended in the knowing subject, since it is repugnant to cognition: for there is no repugnance between this [illusion or ignorance] and self-illuminant conscious intelligence. In fine there is no difficulty, inasmuch as there exists a most manifest assurance in regard to ignorance illumined by conscious spirit, of a manifestation therein of egoism in the form I am ignorant, since the repugnance is only to a modification of the internal organ.

[*The power of divine spirit enveloped in its qualities &c.*] The construction of this text is: They who followed thy practice of meditation beheld the power of God self-illuminant, subject to its possessor, enveloped in its qualities, that is embraced by white, black and red, or by goodness, passion and darkness. Similarly such scriptural texts as: Knowledge is enveloped in ignorance, whereby all creatures are bewildered; I am not the light of all men, clothed as I am in mysterious illusion. Unless soul were somehow enveloped, there could not exist the practical assurance It is not, it shines not, contradictory to another assurance, while there is ample cause for the practical assurance It is, it shines, in the constant existence and self-illumination of the supreme self-conscious spirit. By the text To be heard [from texts of the Veda, to be reflected upon by reasonings, and after reflection to be constantly pondered upon; these are the means of intuition of the supreme], is shown the inutility of oral study and the other rites towards knowledge of the real nature of spirit. Thus, by the particle and is implied the admission of two consequences. Since it may be asked What is the answer in the controversy concerning the unity or plurality of ignorance, consequent upon such texts as Unborn, one; God by his illusions appears, though one, in many forms? the author anticipates the difficulty.

यत्किञ्चिदिति । अयमर्थः नास्माभिरज्ञानस्य भावत्वं परमार्थसत्त्वाभिप्रायेणोच्यते किन्त्वभाववैलक्षण्याभिप्रायेण । नच भावाभावयोः परस्परप्रतिषेधेऽन्यतरविधिनान्तरीयकत्वात् प्रकारान्तरानुपपत्तिरिति वाच्यं । स्त्रीपुंप्रकृत्योः परस्परप्रतिस्पर्द्धिनोर्निषेधे तदन्यस्य नपुंसकस्येव भावाभावान्यस्याज्ञानस्योपपत्तेः । अथ तत्र प्रमाणान्तरेण तृतीया प्रकृतिरुपलभ्यतइति मतं । तर्हीहाप्यस्ति प्रमाणं प्रतीतिबाधान्यथानुपपत्तिरिति सन्तोष्टव्यं । वस्तुतस्तु नात्रास्माकमत्यन्तमाग्रहोऽज्ञानेसर्व्वानुपपत्तेरलङ्कारत्वात् । यदुक्तं अविद्याया अविद्यात्वमिदमेव तु लक्षणं । यत्प्रमाणासहिष्णुत्वमन्यथा वस्तु सा भवेदिति । सेयं भ्रान्तिर्निरालम्बा सर्व्वन्यायविरोधिनी । सहते न विचारं सा तमो यद्वद्दिवाकरमिति च । इष्टसिद्धावपि । दुर्घटत्वमविद्याया भूषणं नतु दूषणं । कथञ्चिद्दृढमानत्वेऽविद्यात्वं दुर्घटं भवेदिति । तस्मात् सत्त्वेनासत्त्वेन सदसत्त्वेन वा सावयवनिरवयवोभयात्मकत्वेन वा भिन्नाभिन्नोभयरूपत्वेन वा निर्व्वक्तुमशक्यत्वेनानिर्व्वचनीयमज्ञानं सवितरि दिवान्धपरिकल्पितान्धकारवत् यत्किञ्चिदिति वदन्ति वृद्धा इति सिद्धं । इदानीं यथानिरूपितमज्ञानमेव नास्तीति विवदमानं प्रतिबोधयितुं तत्रानुभवश्रुती प्रमाणयति ॥

This &c. [This ignorance is treated as one or as many accordingly as it is regarded collectively or distributively.] Distribution means individuality, collectiveness universality. *Is treated,* that is, in the revealed and other texts. The meaning is as follows. That which is the determinate object of understanding tinged by something, consists of that with which the understanding is tinged; as it is known by experience that a water-pot the object of understanding tinged by clay, consists of clay. Reasonably, therefore, the individual objects of understanding tinged with universality, are themselves universal. For if universality and individuality were absolutely different, like a cow and a horse, the relation of universal and individual would be impossible. But difference and indifference are incompatible in one and the same object, for then it would be impossible that one thing should be two. On the supposition that there is no difference, the assurance of a difference between the universal and the individual, is rendered possible by some ideal distinction, like the difference between the sea and its waves, or the moon reflected in the water and the moon in the sky. Thus, also, the assurance expressed in the revealed text, of plurality and unity, by the relation of universality and individuality, in ignorance though a single entity, would not be contravened. The author accordingly, proceeds to enforce this view with illustrations.

That is to say, &c. [As of trees, when regarded as a collection, the single denomination is forest,—or of waters, when regarded as a collection, it is a piece of water,—so the ignorances attached to souls and apparently multitudinous, receive, when regarded as a collection, the single denomination thereof, that is, the name of ignorance in the singular.] The author adopts the two illustrations, in conformity with the two doctrines that intelligent spirit, conditioned by ignorance and its products, or reflected in ignorance and its products, becomes the individuated spirit, and the supreme spirit [or God regarded under limitation]; according to the two Vedic texts, First he made the two-footed, next he made the four-footed, then became he winged, then came as spirit; He became the counterpart of every form, therefore this form of his was for distinction. Such we must understand to be everywhere the purport of the illustrations from the forest and its trees, and the tank and its waters. The meaning of the words apparently multitudinous &c. is as follows. Does ignorance reside in the absolute or in the individuated spirit? Not in the former, for ignorance is repugnant to its nature as eternally pure &c. Nor in the latter, for thus there would be a recurring series [of ignorance in spirit and spirit in ignorance.] When ignorance is mentioned, it is asked, Whose ignorance, and relative to what object? Ignorance, then, cannot be maintained to be without a substratum, since it appears to require a substratum and an object. Now, if ignorance reside in the individuated spirit, while the existence of the individuated soul again depends on ignorance, then, if by the existence of the individuated spirit being established, ignorance be shewn to have a substratum, and if by this substratum the individuated spirit be proved, how can there fail to be a logical see-saw? If it be objected that the continuous stream of ignorance and individuated spirits being without beginning may like a germ and its shoot, not involve a mutual dependency: we reply that it is not so, for there is no proof of the existence of many ignorances and individuated spirits, as there is of the existence of many successive germs and shoots. It may also be urged that since, according to such texts as, He then becomes, fair sir, endowed with existence, That is this expanse of sky &c., therefore it

---

अहमज्ञइत्यादिना । अनुभवस्यास्य ज्ञानाभावविषयत्वं प्रतिक्षिप्तं । निर्व्विकल्पकघटितप्रतियोगिकस्य ज्ञानसामान्याभावस्य स्वात्मनि प्रत्यक्षायोग्यत्वाच्च । नच भावरूपमप्यज्ञानमात्मनि ज्ञायमाने ग्रहीतुं न शक्यते तस्य ज्ञानविरोधित्वादिति वाच्यं स्वप्रकाशसाक्षिचैतन्येन तस्य विरोधाभावात् । अन्तःकरणवृत्त्यैव तु विरोधादहमज्ञइत्यहङ्कारगर्भस्य चोल्लेखस्य साक्षिप्रकाशिताज्ञानविषये स्फुटतरव्यवहारस्य सत्वाच्च न कदाचिदनुपपत्तिरिति भावः । देवस्य स्वयं प्रकाशस्यात्मनः शक्तिं शक्तिमत्परतन्त्रां स्वगुणैः शुक्लादिभिः सत्त्वादिभिर्व्वा निगूढामालिङ्गितान्ते ध्यानयोगानुगता अपश्यन्निति सम्बन्धः । अज्ञानेनावृतं ज्ञानं तेन मुह्यन्ति जन्तवः । नाहं प्रकाशः सर्व्वस्य योगमायासमावृतः इत्यादिस्मृतिः प्रत्यगात्मचैतन्यस्वरूपस्य ब्रह्मणो नित्यप्राप्तत्वेन स्वप्रकाशत्वेन चास्तिप्रकाशत इति व्यवहारपुष्कलकारणे सति नास्ति न प्रकाशत इति तद्विपरीतव्यवहारास्यात्मन्यावरणमन्तरेणानुपपत्तिः । श्रोतव्यइत्यादिना आत्मयाथात्म्यज्ञानस्य श्रवणादिविधानानुपपत्तिश्चेत्यर्थापत्तिद्वयञ्चकारेण समुच्चीयते । नन्वजामेकामिन्द्रो मायाभिरित्यादिश्रुतिभ्यएकतानेकत्वयोरज्ञाने विप्रतिपत्तौ कः समाधिरिति विवक्षायामाह ॥

इदमिति । व्यष्टिर्विशेषः समष्टिः सामान्यं व्यवह्रियते श्रुत्यादिष्विति शेषः । अयं भावः यो यदनुरक्तबुद्धिविषयो नियतः स तदात्मकोयथा मृदनुरक्तबुद्धिविषयो घटो मृदात्मको दृष्टः तथा सामान्यानुरक्तबुद्धिविषया विशेषाः सामान्यात्मका इति युक्तं । सामान्यविशेषयोरत्यन्तभेदे गवाश्ववत् सामान्यविशेषभावानुपपत्तेः भेदाभेदौ त्वेकस्मिन्न प्रामाणिकौ वस्तुनो द्वैरूप्यानुपपत्तेः । अभेदपक्षे तु कयाचिद्भेदकल्पनया सामान्यविशेषव्यवहारोपपत्तेः समुद्रतरङ्गादिवज्जलचन्द्रचन्द्रादिवद्वा । तथाचाज्ञानस्यैकस्यैव सतः सामान्यविशेषभावेनैकानेकत्वव्यवहारः श्रौतोन विरुध्येत इति एतदेव दृष्टान्तैरुपपादयितुमुपक्रमते ॥

was unevolved, we hear that in dreamless sleep and re-absorption the individuated spirit attains to unity with the supreme spirit; and since, again, it is understood that in waking, and at the time of creation, the supreme becomes the individuated spirit, ignorance as a permanent impression being concerned as the cause of such severance at those times between the supreme and the individuated spirit; why is not the illustration of germ and shoot allowable? To this we reply: Do you mean that now during dreamless sleep &c. the individuated spirit is not individuated? On such a supposition, unfortunately, it would be hard to disprove a loss of merit, the accruing of retributions unmerited, and further transmigration of those who are emancipated; there being no difference between them. Moreover in dreamless sleep &c., if ignorance be existent, it would follow that it inhered in the absolute; if it be not existent, it would follow that the sleepers wake not again.

A. E. G. & G. D.

तथाहीत्यादिना। पुरश्चक्रे द्विपदः पुरश्चक्रेचतुष्पदः पुरः स पक्षी भूत्वा पुरः पुरुषआविशत्। रूपं रूपं प्रतिरूपो बभूव तदस्य रूपं प्रतिचक्षणायेति मन्त्रद्वयानुसारेणाज्ञानतत्कार्य्यावच्छिन्नोऽज्ञानतत्कार्य्यप्रतिबिम्बितोवा चिदात्मा जीवेश्वरभावं भजत इति मतद्वयमुपरुध्यदृष्टान्तद्वयोपादानमिति सर्व्वत्र वनवृक्षजलाशयजलकीर्त्तनाभिप्रायो बोद्धव्यः। नानात्वेनेत्यादेरयमर्थः अज्ञानं किं ब्रह्मनिष्ठमुतजीवनिष्टंनाद्यं नित्यशुद्धत्वादिस्वभावविरोधात्। न द्वितीयमन्योन्याश्रयात् तथाहि अज्ञानमित्युक्ते कस्य किंविषयमित्याश्रयविषयसापेक्षताप्रभातेर्न निराश्रयमज्ञानमस्तीति प्रतिपत्तुं शक्यं तस्य च जीवाश्रयत्वे जीवभावस्याप्यज्ञानाधोनत्वात् सिद्धे जीवभावे अज्ञानस्य साश्रयत्वसिद्धिः तत्सिद्धौ च जीवत्वसिद्धिरिति कथं नान्योन्याश्रयः। नन्वनादित्वादज्ञानजीवभावप्रवाहस्य बीजाङ्कुरवन्नान्योन्याश्रयइति चेत् मैवं क्रमभाव्यनेकबीजाङ्कुरव्यक्तिवदनेकाज्ञानजीवव्यक्तीनां सत्त्वे प्रमाणाभावात्। ननु सता सौम्य तदा सम्पन्नो भवति। तद्धेदं वियदादिप्रपञ्चं तर्ह्यव्याकृतमासीदित्यादि श्रुतिभ्यः सुषुप्तिप्रलययोर्जीवस्य परमात्मैकभावापत्तिश्रवणात् पुनः प्रबोधसर्गयोर्जीवभावापत्तेरवगम्यमानत्वाच्च तदातद्विभागहेतोः संस्काररूपस्याज्ञानस्यापि कल्प्यमानत्वात् कथं न बीजाङ्कुरन्यायः प्रामाणिक इति चेत् तत्किमिदानीं सुषुप्त्यादिकाले जीवस्य जीवत्वं नास्तीति विवक्षितं। हन्त तर्हि कृतनाशाकृताभ्यागमप्रसङ्गो मुक्तानामपि संसारित्वप्रसङ्गश्च दुर्व्वारः। किञ्च सुषुप्त्यादावज्ञानसद्भावे तस्य ब्रह्माश्रितत्वप्रसङ्गोऽसद्भावे सुप्तानां पुनरनुत्थानप्रसङ्गः॥

PRESS ADVERTISEMENT.

SANSKRIT and ENGLISH DICTIONARY, being an abridgment of PROFESSOR WILSON'S DICTIONARY with an Appendix explaining the use of affixes in Sanskrit, by PANDIT RÁM JASAN, cloth bound and lettered. Rs. 10.

THE RÁMÁYAN of VÁLMIKÍ, translated in English verse by RALPH T. H. GRIFFITH, M. A. Vol. I. Rs. 6. Vol. II. Rs. 6. and Vol. III. Rs. 4-8. Postage 6 annas each.

THE HITOPADEŚA, containing the Sanskrit text with a Hindí translation and a Glossary, by PANDIT RÁMAJASAN, 2nd Edition. Rs. 2.

THE LAGHU KAUMUDÍ, a Sanskrit Grammar with an English version, commentary and references by DR. BALLANTYNE, late Principal of the Sanskrit College, Benares, re-edited by RALPH GRIFFITH, M. A., Principal of the Sanskrit College, Benares. *Price* 8 *Rupees*.

"The Translation of Laghu Kaumudi made by the late Dr. Ballantyne has enabled even beginners to find their way through the Labyrinth of Native Grammar." *Prof. Max Müller.*

"THE BIBLE FOR THE PANDITS." The first three chapters of Genesis diffusely and unreservedly commented, in Sanskrit and English,—with an introduction, by JAMES R. BALLANTYNE, LL. D. Rs. 3.

"THE PANDIT." A Monthly Journal of the Benares College, devoted to Sanskrit Literature. Terms. Rs. 12-0. for annum, including postage.

The object of the *Pandit* is to publish rare Sanskrit works which appear worthy of careful editing hereafter: to offer a field for the discussion of controverted points in Old Indian Philosophy, Philology, History and Literature; to communicate ideas between the Aryan scholars of the East and of the West; between the Pandits of Benares and Calcutta and the Sanskritists of the Universities of Europe.

THE BÁLARÁMÁYANA, a Drama by RÁJAŚEKHARA, edited by PANDIT GOVINDA DEVA ŚÁSTRI, Professor of Hindu Astronomy in the Sanskrit College, Benares Rs. 2.

THE PRASANNARÁGHAVA, a Drama by Jayadeva, edited by PANDIT GOVINDA DEVA ŚÁSTRI. Rs. 1-4

LAGHU KAUMUDÍ VYÁKARAN, in Sanskrit (only); the text taken from Dr. Ballantyne's Edition. Re. 1-2.

BODH CHATUSPATH CHANDRIKÁ, a Hindí and Sanskrit Primer. Annas 3.

In the Press, and will shortly be published, The VAIŚESHIKA APHORISMS OF KAṆÁDA, reprinted from the "Pandit" with corrections and emendations by A. E. GOUGH, B. A.

PRINTED AND PUBLISHED BY THE PROPRIETORS, E. J. LAZARUS AND CO. AT THE MEDICAL HALL PRESS, BENARES.

काशीविद्यासुधानिधिः

श्रीगणेशाय नमः

श्रीमद्विजयिनीदेवीपाठशालोदयोदितः । प्राच्यप्रतीच्यवाक्पूर्वापरपक्षद्वयान्वितः ॥ १ ॥
अङ्कुरश्मिः स्फुटयतु काशीविद्यासुधानिधिः । प्राचीनार्यजनप्रज्ञाविलासकुमुदोत्करान् ॥ २ ॥

THE PANDIT.

A Monthly Journal, of the Benares College, devoted to Sanskrit Literature.

No. 77. Benares, October 1st, 1872. Vol. VII.

॥ चिन्तामणेः शब्दखण्डम् ॥

(१) वस्तुतस्तु शुष्ककण्ठतया बालो दुःखमनुभवन् (२) विरोधितया सुखं स्मरति । ततः सुखज्ञानात्सुखवृत्तिकार्यत्वं सुखवृत्तितया (३) ऽन्तरङ्गत्वान्न तु स्तनपानमिष्टसाधनमिति स्मरणम् । सुखावृत्तित्वेन (४) बहिरङ्गत्वात् । (५) सुखकार्यत्वं च स्तनपानद्वारा जन्मान्तरानुभूतमिति (६) कार्यत्वस्मरणे (७) स्तनपानमपि विषयः । तेन स्तनपाने कार्यत्वज्ञानादेव प्रवृत्तिः । इष्टसाधनताज्ञानस्य (८) तदानीं सामग्र्यभावात् । एवं चाद्यप्रवृत्तौ कार्यत्वज्ञानं प्रयोजकं क्लृप्तमित्यग्रेऽपि तदेव प्रवर्त्तकं क्लृप्तत्वात् ॥

॥ शब्दचिन्तामणिव्याख्या रुचिदत्तीया ॥

नन्विष्टसाधनतास्मरणमेव कथं तत्र न प्रवर्त्तकमिति विनिगमकमाह । (१) वस्तुतस्त्विति । (२) विरोधितयेति । विरोध एव संबन्धः संस्कारोद्बोधक इति भावः । (३) अन्तरङ्गत्वात् । साक्षात्संबन्धत्वाद् । (४) बहिरङ्गत्वात् । व्यवहितसंबन्धत्वात् । नन्वेवमपि स्तनपानकार्यत्वं न स्मृतं, प्रवृत्तिप्रयोजकं च तदित्यत आह । (५) सुखेति । (६) कार्यत्वस्मरणे । सुखकार्यत्वस्मरणे । (७) स्तनपानमपीति । कार्यत्वेनेति शेषः । (८) तदानीमिति । सुखकार्यत्वस्मरणसमयइत्यर्थः । (९) नवीनास्त्विति । इष्टसाधनताज्ञानवत्त्वस्यैव प्रयोजकत्वाभ्युपगमेन विषभक्षणादिवत् तृप्तभोजनस्यापि व्यवच्छेदे तद्व्यवच्छेदाय कामनावत्त्वज्ञानस्याप्यधिकस्य प्रयोजकत्वाभ्युपगमो नवीनत्वे बीजम् । न चेष्टसाधनताज्ञानं तत्रास्त्येव तृप्तिसाधनतायास्तत्राव्याहतत्वादिति वाच्यम् । न हि यदा कदा चिदिच्छाविषयीभूतफलसाधनत्वं तत् । किं तु विद्यमानेच्छाविषयीभूतसाधनत्वं, तच्च तदानीं कामनाविरहेण नास्त्येवेत्याहुः । वस्तुतोऽग्रे वक्ष्यमाणं गौरवादिकं नवीनत्वे बीजम् । (१०) अतिनवीनास्त्विति । अत्रापि यथा तृप्तस्य भोजने

(९) नवीनास्तु ममेदं कृतिसाध्यमिति ज्ञानं न प्रवर्त्तकमनागतविषये प्रत्यक्षानुमानयोरसंभवात्, किं तु यादृशस्य पुरुषस्य कृतिसाध्यत्वं यत्र दृष्टं तादृशत्वमात्मनः प्रतिसंधाय तत्र प्रवर्तते । तथाह्योदनकामस्य तत्साधनताज्ञानवतस्तण्डुलाद्युपकरणवतश्च पाकः कृतिसाध्यो ऽहमपि तादृगिति ज्ञानात्पाके प्रवर्तते । एवं चान्यकृतपाके कृतिसाध्यत्वज्ञानमात्मनः पाककृतिसाध्यत्वप्रयोजकविशेषणवत्त्वज्ञानं च प्रवर्त्तकम् । अन्यत्रापि प्रवृत्तिरेवमेवेत्यनादितैव । अत एव संजातबाधश्चैत्यवन्दने विषभक्षणे च न प्रवर्त्तते । इष्टसाधनताज्ञानवतो हि तत्कृतिसाध्यम् । न च संजातबाधस्तत्रेष्टसाधनताज्ञानवान् । एवं तृप्तीच्छावतोऽपि भोजनं कृतिसाध्यम् । तृप्तश्च न तृप्तीच्छावत्त्वमात्मन्यवैतीति न भोजने प्रवर्तते ॥ (१०) अतिनवीनास्तु यादृशस्येत्यादावविगीतत्वं तत्कृतौ वि-

शेषणमाहुः ॥ संजातबाधस्तु विषभक्षणं चैत्यवन्दनं च विगीतकृतिसाध्यत्वेनैव जानातीति तत्र न प्रवर्तते । प्रवृत्तिविषयश्च सामान्यतः कालासंभिन्नपाकादिर्ज्ञायते । (११) प्रवृत्तिमहिम्ना चानागतपाकविषयसिद्धिः । (१२) चिकीर्षा च कालासंभिन्नविषया (१३) ननु भाविनं कृत्या साधयामीत्याकारेति ॥

अत्रोच्यते । (१४) विषभक्षणादिव्यावृत्तं कृतिसाध्यत्वज्ञाने इष्टसाधनत्वं विषयंतया ऽवच्छेदकं, लाघवात् । न तु स्वविशेषणवत्ताप्रतिसंधानजन्यत्वं, (१५) गौरवात् । (१६) न च सिद्धासिद्धावस्थयोः साध्यत्वसाधनत्वविरोधः निर्विशेषितयोस्तयोरविरोधात् । पाको ऽसिद्धः साध्यः सिद्धः साधनं चेत्यनुभवात् । तदा साध्यत्वं हि तदा साधनत्वस्य विरोधि । नियमतस्तेनैव तस्य प्रतिक्षेपेण सहानवस्थाननियमात् । ननु साधनत्वस्यान्यदा साधनत्वस्य वा तयोरप्रतिक्षेपात् । अन्यदा साधनत्वेपि साधनत्वमस्त्येव (१७) सामान्याभावे विशेषाभावप्रसङ्गात् । एवं तदा ऽसिद्धत्वस्य तदा सिद्धत्वं विरोधि नियमतस्तस्यैव प्रतिक्षेपात् । न तु सिद्धत्वमात्रम्, अन्यदापि तत्र सिद्धत्वाभावप्रसङ्गात् । निर्विशेषितयोर्विरोधे सिद्धत्वासिद्धत्वयोश्चान्यतरदेव पाकादौ स्यान्न तु समयभेदे ऽप्युभयम् । (१८) न च तदा कृतिसाध्यत्वे सति तदेष्टसाधनत्वज्ञानं प्रवर्त्तकम् । (१९) अत एव वाजपेयेन यजेतेत्यत्र यागस्य करणावस्थायां सिद्धत्वेन न वाजपेयस्य साध्यता । एकदा तयोर्विरोधादिति कर्मनामधेयत्वम् । न तु करणस्य सिद्धत्वेन साध्यत्वविरोधः । यागस्वरूपे तयोः सत्त्वात् । अथ विरुद्धयोरवच्छेदभेदमादायैकत्र प्रतीतिः स्यात्, न च कृतिसाध्यत्वेष्टसाधनत्वयोः समयभेदमादायात्र प्रतीतिरस्ति, तथा लिङ्गाभावादिति

ऽविगीते कृतिसाध्ये ऽपि तृप्तौ कामनाविरहेण इष्टसाधनताज्ञानाभावाच्च प्रवृत्तिः, तथैव विषभक्षणचैत्यवन्दनयोरप्यप्रवृत्तिसंभवादविगीतविशेषणवैयर्थ्यमेवातिनवीनत्वे बीजम् । इयानेवानयोर्विशेषो यदेकत्र फलेच्छाविरहादिष्टसाधनताज्ञानविरहो ऽन्यत्र तु तत्साधनताविरहादिति । नन्वनागते प्रवृत्तिस्तथा ऽपि न स्यात्तदज्ञानादित्यत आह । (११) प्रवृत्तीति) पाकत्वेन रूपेण सिद्धपाकज्ञानादेव समानप्रकारकतया प्रवृत्तिस्वाभाव्यादनागतपाकसिद्धिरित्यर्थः । चिकीर्षायामप्येवमेवेत्याह । (१२) चिकीर्षा चेति । (१३) अननुभावीति । तत्प्रकारकज्ञानासंभवादिति भावः । (१४) विषेति । आदिपदग्राह्यं चैत्यवन्दनादि । न चोभयसिद्धतया तत्प्रतिसंधानजन्यत्वमेवावच्छेदकं, न त्विष्टसाधनत्वविषयत्वम् । कल्पनीयत्वात्, एवं च युगपदुपस्थित्यभावेन लाघवावतारो ऽपीति वाच्यम् । यत्र शब्दादनुमानाद्वा दैवादिष्टसाधनत्वोपस्थितिस्तत्र तदवतारसंभवात् । (१५) गौरवादिति । न च साधनत्वस्य नियमानन्यथासिद्धिगर्भतया गौरवं तुल्यमिति वाच्यम् । तज्जन्यत्वस्यापि तत्कारणकत्वपर्यवसन्नतया तत्प्रवेशस्य तुल्यत्वे स्वविशेषणाद्यधिकभागप्रवेशेन गौरवात् । यदि चाद्यप्रवृत्तौ सामग्र्यन्तरं तदा तदपि गौरवं बोध्यम् । यद्यपि तज्जन्यत्वं प्रवर्त्तकज्ञाने न विषय इति किं गौरवेण, तथापि कारणताग्राहकेणावच्छेदकतया तदवश्यं ग्रहीतव्यमिति गौरवावतारो बोध्यः । ननु विरोधाद् इष्टसाधनत्वविषयत्वं न कुत्रापीति न युगपदुपस्थितिरित्याशङ्क्य निराकरोति । (१६) न चेति । (१७) सामान्याभावे । साधनत्वसामान्याभावे । विशेषस्यान्यदा साधनत्वस्याभावप्रसङ्गादित्यर्थः । यादृशं च ज्ञानं विरोधादसंभवि तादृशं प्रवर्त्तकत्वेन नाभ्युपेयमेवेत्याह । (१८) न चेति । (१९) अत एवेति । एककालीनसाध्यत्वसाधनत्वविरोधादेव तत्र वाजपेयपदस्य यागरूपकर्मनामधेयत्वं कल्प्यते । अन्यथा वाजपेयसाध्यत्वेनोपस्थिते यागे लिङ्पदेनेष्टसाधनत्वान्वयबोधापत्तौ विरोधः स्यात् । एकविशेषणावच्छिन्ने विशेष्ये विशेषणान्तरबोधस्यैव विशिष्टवैशिष्ट्याधीत्वेन तत्र विशेषणयोरेककालताभाननियमात् । अत एव गन्धप्रागभावावच्छिन्नपृथ्वी गन्धवतीत्यत्र बाध इत्युक्तम् । तथा च तृतीयया करणत्वाभिधाने वाजपेयनामकयाग इष्टसाधनं करणं चेत्यन्वयः । प्रयोगः साधुरेव तृतीययेत्यन्ये । ननु वाजपेयनाम्ना यागस्य वाच्यवाचकभावएवान्वयो वाच्यस्तद्बोधश्च न वाजपेयपदोपस्थितिं विना, अन्वयप्रतियोग्यनुपस्थितौ अन्वयबोधाभावात् । तदुपस्थितिश्च न तत्पदेन शक्त्या । तस्य यागरूपार्थशक्तत्वात् । स्वपरत्वे लक्षणाभ्युपगमाच्च । न लक्षणया तदा तत्र शक्त्यग्रहे स्वशक्यसंबन्धित्वेन स्वस्याग्रहादिति चेत्, न । वाजपेयपदस्य सामान्यतः क्वचिच्छक्तिग्रहे तद्ग्रहसंभवात् शक्तिभ्रमेण स्वोपस्थितिसंभवाच्च । अत एव तस्य स्वार्थसंबन्धाग्रहे स्वरूपोपस्थितिः शक्तिभ्रमादिति वक्ष्यति । ननु यदि विशिष्टवैशिष्ट्यबोधे तुल्यकालताभानं तदा वह्निना पचेतेत्यत्रापि वह्निसाध्यत्वेष्टसाधनत्वयोर्युगपद् भानं न स्यादिति चेन्न । तत्र वह्निसाध्यत्वस्योपलक्षणत्वेनैकत्र द्वयमित्यन्वयात् । न चात्रापि तथास्त्विति वाच्यम् । विशेषणत्वे संभवति उ-

चेत् । न । (२०) साध्यत्वसाधनत्वयोरविरोधस्योक्तत्वात् । एवं सिद्धत्वासिद्धत्वयोर्भावाभावरूपत्वेपि न विरोधः । एकधर्मिगतत्वेन मानसिद्धत्वात् । तस्मात्संयोगतदभावयोरिव येन प्रकारेण ययोर्विरोधस्तेन तयोरेकधर्मिगतत्वं न प्रतीयते न तु रूपान्तरेणापीति । अपि च यदि साध्यत्वसाधनत्वयोर्विरोधस्तदा तवापीष्टसाधनत्वेन (२१) कार्यसाधनत्वेन वा कार्यत्वं नानुमीयेत । हेतुसाध्ययोर्विरोधेन सामानाधिकरण्याभावेन व्याप्त्यसिद्धेः, पक्षे साध्यसाधनयोरन्यतरसत्त्वे बाधासिद्ध्योरन्यतरप्रसङ्गाच्च । न च वाच्यमिदानीं मत्कृतिसाध्यत्वं साध्यम् । अग्रे मदिष्टसाधनत्वं हेतुः । दैवाद्यनधीनत्वे सति यदग्रे मदिष्टसाधनं तदिदानीं मत्कृतिसाध्यमिति व्याप्तिः । तथा च समयभेदमादाय साध्यत्वसाधनत्वयोरवगम इति । इदानीमग्रिमपदार्थयोर्नानात्वादनुगतरूपाभावेन व्याप्तेरग्रहात् । पाकन्यायेनान्यत्रापि तत्तत्समयान्तर्भावेन साध्यत्वसाधनत्वयोरप्रतीतेः । प्रतीतौ वा ममापीदानीं कृतिसाध्यत्वे सत्यग्रइष्टसाधनत्वज्ञानं प्रवर्तकमस्तु । न च पाके (२२) साध्येष्टकत्वेन कृतिसाध्यत्वमनुमेयम् । असिद्धावस्थावतो हि पाकादिष्टानुत्पत्तेः, पाकस्य सिद्धत्वमवगम्य तत्साध्यत्वमिष्टस्यावगन्तव्यमसिद्धत्वं चावगम्य कृतिसाध्यत्वमिति सिद्धत्वासिद्धत्वयोर्विरोधो ऽत्रापि दुर्वारः । अपि च स्वविशेषणधीजन्यकार्यताज्ञानाभावात्सुखे कथं चिकीर्षा । नहि कृतिसाध्यताज्ञानमात्रात्सा, संजातबाधस्य विषभक्षणादौ चिकीर्षाप्रसङ्गात् । अथोपायचिकीर्षायां तत्कारणम्, इच्छाकारणसुखत्वज्ञाने कृतिसाध्यत्वं यदा विषयस्तदा सुखे चिकीर्षा, नो चेदिच्छामात्रमिति द्वयमेव चिकीर्षाहेतुरिति चेत् । (२३) तर्हीच्छाहेतुज्ञाने यदा कृतिसाध्यत्वं भासते तदा चिकीर्षा, नो चेदिच्छामात्रमित्येव सुखतदुपायचिकीर्षाकारणमस्तु, लाघवात् । सुखत्वज्ञानवदिष्टसाधनताज्ञानस्यापि इच्छाकारणत्वात् । अत एव पाके इष्टसाधनताज्ञाने कृतिसाध्यत्वं विषय इति तत्र चिकीर्षा न तु वृष्ट्यादिज्ञाने तद्विषयत्वमितीच्छामात्रं सुखचिकीर्षायामिच्छाकारणज्ञाने कृतिसाध्यताविषयके चिकीर्षाजनकत्वावधारणात् । अन्यथा तत्र चिकीर्षानुत्पत्तेः ॥

वस्तुतस्तु उपायचिकीर्षा इष्टसाधनताज्ञानसाध्या । उपायेच्छात्वात् । वृष्टीच्छावत् । न च भोगचिकीर्षावत्तेन विनापि स्यादित्यप्रयोजकत्वम् । उपायेच्छायास्तदन्वयव्यतिरेकानुविधानात् । वृष्टेश्च स्वतो ऽसुन्दरत्वेनेच्छानुत्पत्तेः । अनुगतोपायेच्छायामनुगतस्य प्रयोजकत्वे संभवति बाधकं विना त्यागायोगाच्च । न च चिकीर्षान्यत्वे सत्युपायेच्छात्वमिच्छात्वं वा तज्जन्यत्वे प्रयोजकं, (२४) गौरवात् । (२५) सुखेच्छायां तदभावाच्च । एवं चोपायचिकीर्षायामिष्टसाधनत्वज्ञाने ध्रुवे (२६) ऽतिप्रसङ्गवारणार्थं कृतिसाध्यत्वप्रकारकत्व(२७)निर्वाहार्थं च कृतिसा-

---

पलक्षणताया अन्याय्यत्वादिति वदन्ति । (२०) साध्यत्वसाधनत्वयोरिति । यद्यपि साध्यत्वसाधनत्वयोर्द्रव्यत्वपृथिवीत्ववदविरोधे एकसमयावच्छेदेनापि प्रतीत्यापत्तिरिति संयोगतदभाववदवच्छेदभेदमादायाविरोधो वाच्यस्तथा च तद्देशावच्छेदभेदमादायैव प्रतीतिः स्यादिति शङ्का न यथाश्रुतेनोत्तरेण परिहर्तुं शक्यते तथापि प्रत्यक्षप्रतीतौ सामग्रीसमाजमहिम्ना ऽवच्छेदकग्रहनियमेपि शाब्दादिप्रतीतौ भिन्नभिन्नावच्छेदेनापि विद्यमानयोः प्रतीत्या नावच्छेदकग्रहनियमः । अत एव वृक्षः संयोगवान् तदभाववांश्चेति शब्दादुभयधीरनुभवसिद्धेत्यत्र तात्पर्यम् । एकदेशिमतेनाह । (२१) कार्यसाधनत्वेन वेति । (२२) साध्येष्टकत्वेनेति । तथा च नोक्तदोष इत्यभिमानः । (२३) तर्हीति । इच्छाकारणसुखत्वज्ञानापेक्षयेच्छाकारणत्वमात्रस्य लघुत्वादिति भावः । एवं च फलेच्छायां फलज्ञानमुपायेच्छायामिष्टसाधनताज्ञानं कारणमिति तत्र सामग्रीभेद एव, परेणापि तत्र तद्भेदाङ्गीकारात्, फलतदुपायसाधारणचिकीर्षासामान्ये च कृतिसाध्यत्वप्रकारकेच्छाजनकज्ञानत्वेन हेतुतेति सामग्र्यैक्यमिति लाघवमित्यत्र तात्पर्यम् । आद्ये दोषमाह । (२४) गौरवादिति । अन्त्ये तमाह । (२५) सुखेच्छायामिति । (२६) अतिप्रसङ्गो, वृष्ट्यादौ । (२७) निर्वाहार्थमिति । ननु यदि जनकज्ञानप्रकारस्यैवेच्छायां प्रकारत्वं तदा फलेच्छायां कथं स्ववृत्तित्वं प्रकारः स्यात् । नहि स्ववृत्तित्वेन ज्ञातमेव सुखादि स्ववृत्तित्वेनेष्यते, सर्वत्र तथा सामग्रीविरहात् । यत्रापि स्ववृत्तित्वबाधावतारस्तत्रापि दुर्लभवस्तुनि स्ववृत्तित्वप्रकारकेच्छानुभवाच्च । न च स्ववृत्तित्वमिच्छायां प्रकार एव नेति वाच्यम् । अनुभवविरोधात् । स्ववृत्तितयेष्यतइति पूर्वमन्यस्य तत्र साक्षित्वाच्च । न च क्वाचित्को धर्मो ऽसाधारणसामग्रीसापेक्षः स्ववृत्तित्वप्रकारकत्वं सार्वत्रिकमिति सामान्यसामग्रीनिर्वाह्यमेवेति वाच्यम् । कार-

ध्यत्वमपि विषयतया ऽवच्छेदकमस्तु, न तु (२८) तद्विहाय (२९) तन्मात्रं, क्लृप्तकारणं विना कार्यानुपपत्तेः। (३०) अत एव स्तनपानप्रवृत्तावप्युपायेच्छाकारणत्वेन गृहीतस्येष्टसाधनताज्ञानस्यापि कल्पनं, (३१) दृष्टानुरोधित्वात्कल्पनायाः। ननु साधनत्वमिच्छाविरोधि, तस्य सिद्धधर्मत्वात्। (३२) वृष्ट्यादौ तत्साध्येष्टज्ञानादिच्छेति चेत्, न। निर्विशेषितयोः सिद्धत्वासिद्धत्वयोरविरोधेनेच्छासाधनत्वयोरविरोधात्। तदा सिद्धत्वं तदा ऽसिद्धत्वं च नेच्छासाधनत्वयोः प्रयोजकमिति तथा न ज्ञायत एव। यत्तु तत्साध्येष्टज्ञानाद्वृष्ट्यादाविच्छेति। तत्तुच्छम्। असिद्धावस्थाद्वृष्ट्यादेरिष्टानुत्पत्तेस्तस्या वश्यं सिद्धत्वमवगन्तव्यमिच्छानुरोधित्वाच्चासिद्धत्वमिति तत्रापि विरोध एव। वृष्टौ सत्यामिष्टं तया विना नेत्यन्वयव्यतिरेकग्रहस्य वृष्टिसिद्धत्वमादाय वृष्टिनिरूपितेष्टसाध्यकत्वग्राहकत्वात्। किं च चिकीर्षाजन्यकृतिसाध्यं मण्डलीकरणमित्यर्थप्रतिपादकं मण्डलीं प्रकुर्यादिति वाक्यं (३३) प्रमाणं स्यात्। विषयाबाधात्। एतेन नवीनमतमपास्तम्। परस्य हि कृतिसाध्यत्वौदनकामनावत्त्वेष्टसाधनत्वज्ञानानां ज्ञानं तथात्मन ओदनकामनावत्त्वेष्टसाधनत्वज्ञानस्य ज्ञानं न प्रवृत्तिकारणं, गौरवात्। किं तु मत्कृतिसाध्यत्वे सति मदिष्टसाधनताज्ञानमेव, लाघवात्। यथा च साध्यत्वसाधनत्वयोरविरोधो ऽनागतस्य पाकस्य कृतिसाध्यताज्ञानं च तथोपपादितमेव। (३४) किं च परकृतिसाध्यत्वमज्ञात्वापि स्वकृतिसाध्येष्टसाधनताज्ञानात्स्वकल्पितलिप्यादौ यौवने कामोद्भेदात्संभोगादौ प्रवृत्तेश्च तदेव प्रयोजकम्। (३५) वस्तुतस्तु सिद्धविषयककृतिसाध्यताज्ञानात्कथं पाकं कृत्या साधयामीतीच्छा, सिद्धे इच्छाविरहात्। असिद्धस्याज्ञानात्। अथ सिद्धविषयादेव कृतिसाध्यताज्ञानादसिद्धविषया कृतिसाध्यत्वेनेच्छा जायते। इच्छाया असिद्धविषयत्वस्वभावत्वात्। एकप्रकारकत्वेन ज्ञानचिकीर्षयोः कार्यकारणभावो, न त्वेकविषयत्वे सति, गौरवात्। इच्छाया अनागतविषयत्वात् तस्य चाज्ञानात् तथात्वदर्शनात्। सुखादीच्छायामप्येवमिति चेत्। न। असिद्धविषयेच्छानुरोधेनानागतज्ञानोपायस्य दर्शितत्वात्। (३६) अस्तु चैवं, तथापि कृतिसाध्यताज्ञानइष्टसाधनत्वमेव व्यावर्त्तकमस्तु, स्वपरकीयेष्टसाधनताज्ञानफलकामनाज्ञानापेक्षया लघुत्वात्। इष्टसाधनता(३७)ज्ञानज्ञानस्य फलकामनाज्ञानस्य च हेतुत्वे मानाभावाच्च॥

(३८) नव्यास्तु स्वकृतिसाध्यत्वज्ञानमेव प्रवर्त्तकं, तेन स्वकृत्यसाध्ये वृष्ट्यादौ कारीर्यां च कृषीवलस्य न प्रवृत्तिः। न च संजातबाधस्य विषभक्षणे प्रवृत्तिप्रसङ्गः। स्वकृतिसाध्यत्वज्ञानविषये इष्टत्वस्य स्वरूपसतः प्रवृत्तौ सहकारित्वात्। न च संजातबाधस्य विषभक्षणादाविच्छास्ति। इष्टसाधनत्वेनाज्ञानात्। अतीतभोजने ऽप्यत एव न प्रवर्त्तते। तृप्तेः सिद्धतयेच्छाविरहेण भोजने तदुपाधिकेष्टत्वाभावात्। (३९) अतीततृप्ताविच्छा नास्तीति तत्साधने ऽपीष्टत्वाभावादेव न प्रवृत्तिः। न चैवं पाके न प्रवर्तेत, तस्य स्वरसत इष्टत्वाभावादिति वाच्यम्। इष्टसाधनत्वज्ञानेन तस्यापीष्टत्वात्। हन्तैवं प्राथमिकत्वादिष्टत्वार्थमवश्यापेक्षणीयत्वाच्च कृतिसाध्यत्वे सतीष्टसाधनताज्ञानमेव चिकीर्षाकारणमस्तु इति चेत्। न। इष्टसाधनत्वाभावेपि भोगे चिकीर्षासत्त्वात्। तस्यां स्वकृति-

---

णिकस्य परदुःखप्रहाणेच्छायां स्ववृत्तित्वाप्रकारकत्वेन तस्यापि काचित्कत्वात्। अत एव निरुपधिपरदुःखप्रहाणेच्छा करुणेत्युच्यते। तस्मादत्र समाधानं चिन्त्यम्। (२८) तद्विहाय, इष्टसाधनत्वं विहाय। (२९) तन्मात्रं, कृतिसाध्यत्वमात्रम्। बालस्येत्यादि दूषयति। (३०) अत एवेति। (३१) दृष्टेति। तथा च सुखावृत्तित्वेन बहिरङ्गस्यापि इष्टसाधनत्वस्यैव तत्र स्मरणं कल्प्यतइति भावः। तर्हि कथं वृष्ट्यादौ इच्छेत्यत आह। (३२) वृष्ट्यादाविति। (३३) प्रमाणं स्यादिति। यद्यप्यत्र परस्येष्टापत्तिः स्वर्गकामादिसमभिव्याहृतस्य तद्वाक्यस्य स्वर्गकामनियोज्यान्वयबाधेनाप्रामाण्येपि तदसमभिव्याहृतस्य विषयाबाधेन प्रामाण्यात्, यथास्मन्नये मण्डलीकुर्यादित्यस्याप्रामाण्ये ऽपि कुर्यादित्येतस्य प्रामाण्यं, तथापि पूर्वोक्तदोषएव तात्पर्यम्। व्यभिचारमाह। (३४) किं चेति। एवं चेत्यादि दूषयति। (३५) वस्तुतस्त्विति। नन्वेवमपि गौरवं नापाकृतमिति गौरवं विपरीतयन्नाह। (३६) अस्तु चैवमिति। बलवदनिष्टाजनकत्वज्ञानं च त्वया ऽपि प्रवर्त्तकत्वेनाभ्युपेयम्। अनभ्युपगमे वा ततो ऽप्यस्य गुरुत्वात्। यद्वा एतदस्वरसादाह। (३७) ज्ञानज्ञानस्येति। एतेनातिनवीनमतमप्यपास्तम्। (३८) नव्याः, । प्राभाकरनव्याः। (३९) अतीततृप्ताविति। पूर्वं तृप्ते-

साध्यत्वज्ञाने सतीष्टत्वमेव कारणं, न त्विष्टसाधनत्वं व्यभिचारात् । पाकादौ तदन्वयव्यतिरेकावपीष्टत्वोपक्षीणौ । एवं भोगे प्रवर्त्ततेति चेत् । न । इष्टसाधनतापक्षेपि भुक्तिरूपेष्टसाधने सुखे प्रवर्त्ततेति (४०) तुल्यम् । सुखे चिकीर्षा भवत्येव, कृतिस्तु न भवति, कृतेः सिद्धवृत्त्यसिद्धक्रियाविषयत्वनियमादिति चेत् । तुल्यम् । तस्मात्स्वकृतिसाध्यत्वं विधिरिष्टत्वं सहकारीति । मैवम् । (४१) इष्टसाधनत्वज्ञानस्योपायेच्छायां हेतुत्वावधारणात् । तस्यास्तज्जन्यत्वनियमात् । (४२) इच्छायाः स्वविषयेच्छानुत्पादकत्वनियमात् । (४३) ननु सिद्धौदनः कुतो न पाके प्रवर्त्तते । (४४) ओदनमात्रस्य सिद्धत्वेनेष्टत्वाभावात् । अत एवातीतभोजनादौ न प्रवर्त्तते । अतीततृप्त्यादाविच्छाविरहात् । ननु सामुद्रिकविदाख्याते भाविन्यौवराज्ये भोगसाधने स्वकृतिसाध्येष्टसाधनत्वज्ञानात् कुतो न प्रवर्त्तते । भाविराज्यस्या(४५)सिद्धत्वात् । प्रवृत्तेः सिद्धविषयत्वनियमाद्राज्योपाया(४६)परिचयाच्च । तत्परिचये प्रवर्त्ततएव देवताराधनादाविति चेत् । न । (४७) सिद्धे चिकीर्षाविरहेण यागादावप्यप्रवृत्तिप्रसङ्गात् । देवताराधनादेरप्यसिद्धत्वेन तत्राप्रवृत्तिप्रसङ्गाच्च । किं च राज्योपायापरिचये तत्र मा प्रवर्त्तिष्ट, स्वकृतिसाध्येष्टसाधनत्वेन ज्ञाते राज्ये प्रवृत्तिप्रसङ्गे किमायातम् । नहि कृतिसाध्येष्टसाधनत्वेन ज्ञानेपि तदुपायज्ञानं तत्र प्रवर्त्तकम्, गौरवाद्भिन्नविषयत्वाच्चेति चेत् । मैवम् । यौवने हि तावत्प्रवर्त्ततएव राज्ये, बाल्ये तु राज्योपायमकृत्वा मत्कृत्ये(४८)दानीं राज्यं न सिद्ध्यतीति स्वकृत्यसाध्यताज्ञानादेव न प्रवर्त्तते । यथा तण्डुलं विना पाके स्वकृत्यसाध्यताज्ञानात् । (४९) राज्योपाये तु स्वकृतिसाध्येष्टसाधनत्वेन ज्ञाते देवताराधनादौ प्रवर्त्ततएव । अत एव व्रीह्यवघातमकृत्वा पुरोडाशस्तमकृत्वा यागस्तमकृत्वाऽपूर्वं साधयितुं न शक्यतइति क्रमशोऽवघातादौ प्रवर्त्तते, न युगपत् (५०) सिद्धवृत्त्यसिद्धक्रियाविषयस्वभावत्वात् प्रवृत्तेः । यागानन्तरं च नापूर्वे प्रवर्त्तते कृत्यन्तरं विनैव यागकृतितस्तत्संभवात् । (५१) इष्टसाधने

वर्त्तमानत्वमभिप्रेतमिदानीमतीतत्वमिति न पूर्वाभेदः । (४०) तुल्यमिति । वस्तुतः स्वेच्छाधीनकृतिसाध्यताज्ञानाभावाच्च तत्र कृतिरिति भावः । (४१) इष्टसाधनत्वेति । नहि चिकीर्षान्योपायेच्छात्वं तज्जन्यतावच्छेदकं, गौरवादिति भावः । कृतिसाध्यत्वप्रकारकेच्छाजनकज्ञानत्वेन चिकीर्षाहेतुत्वे नोक्तव्यभिचारः । (४२) इच्छाया इति । भाष्यादौ तथा व्यवस्थापितत्वेन तथैव सिद्धान्तादिति भावः । वस्तुतस्तु पाकादाविष्टसाधनताज्ञानादिच्छोत्पत्तिसमये तद्धेतोरेवेति न्यायाच्चिकीर्षैव जायते तज्ज्ञानेपि कृतिसाध्यत्वप्रकारकत्वसंभवात् । न त्वन्तरापीच्छान्तरकल्पना, गौरवात्मानाभावाच्च । अपि च कृतिसाध्यत्वज्ञाने कृतिहेतुतया व्यवस्थितेऽतिप्रसङ्गवारणाय इष्टसाधनत्वं तत्र विषयतयावच्छेदमात्रं कल्प्यते, न तु कारणान्तरं, गौरवात् । यथा दृष्टपुरोवर्त्तिज्ञाने वैशिष्ट्यमेवावच्छेदकं कल्प्यते, न तु भेदाग्रहादेर्हेतुत्वादिकमिति भावः । स्वरूपसदिष्टत्ववादी पृच्छति । (४३) नन्विति । तथा च तत्रेष्टत्वाभावात् प्रवृत्त्यभाव इति तदेव हेतुरिति भावः । उत्तरम् । (४४) ओदनेति । तथा चेष्टसाधनत्वज्ञानाभावादेव तत्र तदभाव इति भावः । (४५) असिद्धत्वाद् । राज्ये न प्रवर्त्ततइति शेषः । (४६) अपरिचयाच्च । राज्योपाये न प्रवर्त्ततइति शेषः । (४७) सिद्ध इति । तथा चानन्यगत्याऽसिद्धे एव प्रवृत्तिरभ्युपेया, एवं च राज्ये प्रवर्त्ततएवेत्यर्थः । (४८) इदानीमिति । इदानीं मत्कृतिसाध्यताज्ञानस्य प्रवर्त्तकस्याभावाद् न तदा प्रवृत्तिरित्यर्थः । तर्हि राज्योपायमेव करोत्वित्यत आह । (४९) राज्येति । अन्यत्तु कृतिसाध्यत्वादिना न जानात्येवेति न प्रवर्त्तते, अन्यथा तत्राप्यप्रतीकारादिति भावः । (५०) सिद्धेति । तथा च यागार्थितया पुरोडाशादौ प्रवृत्तिस्तत्सिद्ध्यनन्तरमेवेत्यर्थः । नन्वेवमपि संजातबाधोपि सविषान्नभक्षणे प्रवर्त्तेत तस्यापि तृप्तिरूपेष्टसाधनत्वात् कृतिसाध्यत्वाच्चेत्यत आह । (५१) इष्टसाधने चेति । न च केवलसुखजनके प्रतियोग्यप्रसिद्ध्या तदधिकदुःखाजनकत्वमप्रसिद्धमिति वाच्यम् । नञ्व्यत्यासेनेष्टोत्पत्त्यनान्तरीयकदुःखाजनकत्वस्य विवक्षितत्वात् । वस्तुत इष्टोत्पत्तिनान्तरीयकदुःखाधिकदुःखजनकं प्रसिद्धं तदन्यत्वं विवक्षितमिति नोक्तदोषः । न चाजनकत्वं जनकत्वात्यन्ताभावजनकान्योन्याभावरूपतया भिन्नं, तथा च मिलितज्ञानहेतुतायां गौरवमननुभवश्च, प्रत्येकज्ञानेपि फलसिद्धेश्च प्रत्येकहेतुतायामननुगम इति वाच्यम् । प्रत्येकहेतुत्वेपि तादृशदुःखजनकज्ञानविरोधिज्ञानत्वेनानुगमादित्याहुः । ननु नान्तरीयकत्वमिष्टहेतुक्रियाजन्यत्वं वा व्याप्यत्वं वा । तदपि दैशिकं वा कालिकं वा इष्टनियतपूर्वकालीनत्वं वा । नाद्यः । अगम्यागमनादावपि प्रवृत्त्यापत्तेः । नरकस्येष्टहेतुक्रियाजन्यत्वेन तदधिकत्वाभावात् । न द्वितीयः । तत एव तन्नरकस्य तदिष्टोत्पत्तिनियतत्वात् । तयोरेकात्मवृत्तित्वात् । न तृतीयः ।

चेष्टोत्पत्तिनान्तरीयकदुःखाधिकदुःखाजनकत्वं विशेषणं, न तु तज्ज्ञानाभावः कारणं, किं तु तदेव विषयतया कारण-

---

इष्टोत्पत्तिपूर्वकालीनश्रमजनके पाकादौ अप्रवृत्तिप्रसङ्गात् । नापि चतुर्थः । उत्कटानिष्टपूर्वककिंचिदिष्टजनकत्वेन ज्ञायमानेपि प्रवृत्त्यापत्तेः ॥ अत्र वदन्ति । इदानींतनमद्बलवद्द्वेषविषयदुःखाजनकत्वे ऽस्य तात्पर्यम् । द्वेषे च बलवत्त्वमुत्कटत्वं जातिविशेषः । अत एव रागान्धस्य यदा नरकादौ तादृशो न द्वेषस्तदा तद्धेतावपि प्रवृत्तिरन्यदा निवृत्तिः । न च द्वेषे बलवत्त्वमधिकं, दुःखमात्रस्यैव द्वेषविषयत्वेन पाकादावप्रवृत्त्यापत्तेः । योगिनामपि सुखदुःखयो रागद्वेषसंभवात् । अन्यथा प्रवृत्तिनिवृत्त्योरसंभवापत्तेः । न चासक्त इत्यादिविरोधः । अस्मदादिसाधारणोत्कटरागद्वेषविरहपरत्वादिति । अत्रेदं चिन्त्यम् । एवं न कलञ्जं भक्षयेदित्यत्र विशिष्टनिषेधस्य विशेषणनिषेधपर्यवसायितया कलञ्जभक्षणमुत्कटद्वेषविषयदुःखसाधनमित्यन्वयबोधः स्यात् । तथा च यस्य रागान्धस्य तद्दुःखे नोत्कटद्वेषस्तं प्रति तद्वेदस्याप्रामाण्यं स्याद् विषयबाधात् । एवं च स एव वेदः कं चित्प्रति प्रमाणं कं चित्प्रत्यप्रमाणमिति महद्वैशसम् । एवं च यजेतेत्यादेरपि तथात्वं स्यात् । यदि च मदनन्तर्भावस्तदापि यत्किंचिद्द्वेषविषयत्वं सकलद्वेषविषयत्वं वा विवक्षितम् । आद्ये यजेतेत्यादौ बाधापत्तिः । बहुवित्तव्ययायाससाध्ययागजन्यदुःखेपि कस्य चित्पाखण्डादेरुत्कटद्वेषसंभवात् । अन्त्ये न कलञ्जं भक्षयेदित्यादेरप्रामाण्यापत्तिः । यच्चोक्तमुत्कटत्वं जातिविशेष इति, तदपि चिन्त्यम् । उत्कटानुत्कटनानादुःखविषयकसमूहालम्बनाद्यत्र तदुभयगोचरो द्वेष एकांशे उत्कटो ऽपरांशे ऽनुत्कटस्तत्र कथं तज्जातिरव्याप्यवृत्तित्वात् । न च तत्र द्वेषद्वयम् । ज्ञानादेरपि समूहालम्बनत्वोच्छेदापत्तेः । सामग्रीयौगपद्यात्क्रमे विनिगमकाभावाच्च । यदि तत्र तथा, तदात्रापि तुल्यम् । यदि च तत्र तस्योपाधित्वं तदा ऽननुगमः । तद्वदेवान्यत्रापि तस्योपाधितापत्तिश्च । अत एवोत्कटकोटिके संशयेपि तत्र जातिरित्युक्तम् । अस्तु वा उत्कटत्वं जातिः तथापि शब्दवद्देवदत्तादिकारणविशेषप्रयोज्यं द्वेषे वैजात्यमावश्यकमिति तत्संकरापत्त्या द्वेषनिष्ठमुत्कटत्वमनेकं वाच्यम् । तथा च तदननुगमेन ज्ञानाननुगमात् प्रवृत्त्यननुगमः । लिङादिपदशक्तिग्रहानुपपत्तिश्च । किं चाजनकत्वस्यान्योन्यात्यन्ताभावगर्भतया ऽननुगमेन शक्तिग्रहानुपपत्तिः । न च जनकत्वविरोधित्वमनुगतमिति वाच्यम् । तत्प्रकारकज्ञानस्याप्रवर्त्तकत्वेन तत्र शक्तिकल्पनानर्हत्वात् । अपि च सविषान्नभोजनजन्यसुखे इच्छाविरहेणेष्टसाधनत्वाभावादेवातिप्रसङ्गवारणे किमुक्तविशेषणेन । ननु यदि विषभक्षणजन्यदुःखासंभिन्नसुखत्वेन तत्रेच्छा तदा तस्य स्वतःपुरुषार्थत्वं भज्येत, इच्छोत्पत्तौ दुःखासंभेदापेक्षणादिति चेत् । अस्तु तावदेवं तथाप्युत्कटेच्छाविषयसाधनताज्ञानं प्रवर्त्तकमस्तु, तदभावादेव तत्रातिप्रसङ्गनिरासे किमुक्तविशेषणेन । तज्जन्यदुःखे द्वेषौत्कट्येन रागौत्कट्याभावात् । यदि च कलञ्जभक्षणजन्यसुखे कस्य चिद्रागौत्कट्यसंभवेन निषेधानुपपत्त्या तत्र विध्यर्थस्तदा तत्रापि तुल्यम् । एतेनासहिष्णुताविषयदुःखाजनकत्वं तद्विवक्षितमिति परास्तम् । उक्तरीत्या निषेधानुपपत्तेः । द्वेषातिरिक्तायाः सहिष्णुताया निर्वक्तुमशक्यत्वाच्चेति । वयं तु ब्रूमः । एकत्रापि विषये पुरुषभेदसमयभेदाभ्यां द्वेषेच्छयोरौत्कट्यवशाद् अप्रवृत्तिप्रवृत्ती इत्यनुभवसिद्धम् । एवं चोत्कटद्वेषविषयदुःखजनकत्वज्ञानं प्रवृत्तिप्रतिबन्धकमिति नोक्तस्थले प्रवृत्त्यापत्तिः । ननु तदभावज्ञानं कारणम् । तथा च तदननुगतत्वे ऽप्यदोषः । प्रतिबन्धकाननुगमस्यादोषत्वात् । निवृत्तिसामग्रीत्वेन तस्य सत्प्रतिपक्षवत् साक्षादेव प्रतिबन्धकतया जनकज्ञानाविरोधिनः कथं प्रतिबन्धकत्वमिति शङ्कापि न । साक्षादविरोधेनैव जनकज्ञानविघटकतया प्रतिबन्धकत्त्वात् । अत एवासत्प्रतिपक्षितत्वज्ञानमपि नानुमितौ हेतुः । तथा च तस्य विध्यर्थाप्रवेशान्नोक्तदोषः । उत्कटत्वं जातिरुपाधिर्वेति अन्यदेतत् । अस्तु वा तदभावज्ञानमपि हेतुः । तदीयोत्कटद्वेषविषयदुःखाजनकत्वज्ञानस्य तदीयप्रवृत्तौ विशेषसामग्रीत्वान्नाननुगमः । अन्यथा मदिष्टसाधनताज्ञानस्य प्रवर्तकत्वे तत्राप्यननुगमापत्तिः । न चैवं तस्यापि विध्यर्थप्रवेशे पूर्वदोषापत्तिरिति वाच्यम् । नहि यावद्विषयकत्वेन ज्ञानस्य प्रवर्त्तकत्वं तावानवश्यं विध्यर्थः । तादृशस्यापीदानींकालस्य मदंशस्य चातथात्वात् । यदि च बाधकात्तस्य तदनन्तर्भावस्तदोक्तनिषेधानुपपत्त्यादिबाधकादस्यापि तथात्वम् । अत एव श्येनेनाभिचरन् यजेतेत्यत्रापि विधिप्रवृत्तिरप्रत्यूहा । उत्कटेच्छाविषयसाधनताज्ञानमेव वा हेतुरतो नातिप्रसङ्गः । अत एव रागद्वेषयोरुत्कटत्वेन प्रवृत्तिरित्यग्रे विभावयिष्यति । यद्यप्येवमपि न कलञ्जभक्षणमित्यादौ निषेधान्वयानुपपत्तिरेव । इष्टसाधनत्वकृतिसाध्यत्वयोर्निषेधानन्वयात् । तथापि पुरुषभेदसमयभेदाभ्यामेकत्र प्रवृत्त्यप्रवृत्त्योरन्यथोपपादयितुमशक्यतयोक्तस्य प्रवर्त्तकत्वे तत्र निषेधान्वयानुपपत्त्या नञो ऽसुराविद्यावत् पर्युदासलक्षणया विरोध्यनिष्टसाधनत्वपरत्वमस्तु । न च व्युत्पत्तिविरोधः । स्वर्गकामो यजेतेत्यत्र स्वर्गकामस्य यागविषयककार्यमिति प्राभाकरमतेन याग इष्टसाधनं वेति षष्ठ्यर्थमन्तर्भाव्यान्वयबोधेन विधिवाक्ये व्युत्पत्त्यन्तरकल्पनवन्निषेधवाक्येप्यनन्य-

तावच्छेदकं (५२) लाघवात्। तेन मधुविषसंपृक्तान्नभोजने न प्रवृत्तिः। परेणापि प्रवृत्तिपूर्वं लिङ्गविशेषणत्वेना-(५३)न्यथा वा तज्ज्ञानविनियोगस्वीकारात्। एवं चाल्पायाससाध्यादिष्टोत्पत्तिसंभवे (५४) बह्वायाससाध्ये न प्रवृत्तिः। अत एव श्रुतस्वर्ग(५५)फले ऽपि बहुवित्तव्ययायाससाध्ये ज्योतिष्टोमादौ फलभूमा कल्प्यते। अन्यथा अल्पायाससाध्यादेव स्वर्गसिद्धिसंभवे तत्राप्रवृत्तावननुष्ठानलक्षणमप्रामाण्यं तद्विधेः स्यात्, बलवदनिष्टाननुबन्धित्वं च न विशेषणम्। बहुवित्तव्ययायाससाध्यबहुतरदुःखस्याप्यबलवत्त्वं क्व चिदल्पदुःखस्यापि बलवत्त्वमित्यनुगतस्याभावात्। न चेष्टापेक्षया ऽनिष्टस्याधिकत्वं बलवत्त्वम्। तस्याप्युक्तातिरिक्तस्याननुगमात्। (५६) आस्तिकस्य निषिद्धत्वेन ज्ञातेपि प्रवृत्तिनिवृत्ती रागद्वेषयोरुत्कटत्वेन नरकसाधनत्वज्ञानतिरोधानात्। ननु न कलञ्जं भक्षयेदिति (५७) विध्यर्थनिषेधानुपपत्तिः, तद्भक्षणस्य तृप्तिरूपेष्टसाधनत्वात्। न चासुराविद्यादिवत्पर्युदासलक्षणया विरोध्यनिष्टसाधनत्वबोधनम्। (५८) नञो ऽसमस्तत्वात्। (५९) क्रियासंगतत्वेनं प्रतिषेधवाचकत्वव्युत्पत्तेश्चेति चेत्। (६०) विशेष्यवति विशिष्टनिषेधस्य सविशेषणे हीतिन्यायेन विशेषणनिषेधपर्यवसायितया कलञ्जभक्षणमिष्टोत्पत्तिनान्तरीयकदुःखातिरिक्तदुःखसाधनमिति न कलञ्जं भक्षयेदित्यनेन बोधनात्। (६१) इष्टसाधनतावाचकस्य विधेः सामान्येन निषेधानुपपत्तेर्बलवदनिष्टाननुबन्धीष्टसाधनत्वविशेषनिषेधतात्पर्यं, तथा चाशक्यविशेषनिषेधपरत्वं नञ इति कश्चित्। तन्न। यथाह्ययोग्यतया छिद्रं विहाय घटत्वेन तदितरान्वयो, न तु छिद्रेतरत्वेन, युगपद्वृत्तिद्वयविरोधात्, तथा ऽत्रापि बलवदनिष्टाननुबन्धित्वेन नोपस्थितिरिति कथं तन्निषेधः॥

गत्या तत्कल्पनात्। सुब्विभक्तौ लक्षणाया अप्यभावात्। अस्तु वा निषेधानुपपत्त्या आप्ताभिप्राय एव विध्यर्थः। अत एव कुसुमाञ्जलौ आचार्यचरणैरुक्तं प्रवर्त्तकं तूक्तमेवेति सहृदयैराकलनीयम्। एवं च प्रकृतग्रन्थसंगतिश्चिन्त्येति दिक्। (५२) लाघवादिति। कृप्तेष्टसाधनताज्ञाने अवच्छेदकमात्रं कल्प्यते, न त्वभावरूपकारणान्तरं गौरवादित्यर्थः। (५३) अन्यथा वेति। प्रवर्त्तकज्ञाने तदपि वा विषयतयावच्छेदकमित्यर्थः। (५४) बह्वायासेति। तज्जन्यदुःखस्योत्कटद्वेषविषयत्वादिति भावः। (५५) फलेति। तथा च फलाधिक्यात्तज्जन्यदुःखे तादृशो न द्वेष इति भावः। (५६) आस्तिकस्येति। यद्यपि नरकसाधनत्वज्ञानेपि रागौत्कट्यात् प्रवृत्तिरनुभवसिद्धा तथापि तन्नरके तदा नोत्कटद्वेष इति तात्पर्यम्। अत एव वैराग्यदशायां तत्रोत्कटद्वेषात्तस्यैव निवृत्तिरिति। (५७) विध्यर्थेति। यद्यपि नायं विधिः, कलञ्जभक्षणस्य रागप्राप्तत्वात् एकत्रैव विधिनिषेधानुपपत्तेश्च, तथापि निषेध्यकोट्युपस्थापको विधिप्रतिरूपकोयं भक्षयेदितिशब्दः प्रवर्त्तकज्ञानजनकशब्दस्यैव विधित्वादिति बोध्यम्। (५८) नञ इति। यद्यपि व्यासेपि न घटः पट इत्यादौ लक्षणाभ्युपगमादसमस्तनञोपि पर्युदासलक्षणा, तथापि विरोधिपरत्वं समस्तस्यैव व्यासेपि तद्भिन्नत्वमात्रबोधनात्। न चात्रापि तथैवास्त्विति वाच्यम्। तथा सतीष्टसाधनभिन्नत्वज्ञानेपि नरकरूपानिष्टसाधनत्वज्ञानानुदयादिति भावः। केचित्तु पूर्वास्वरसादाह। (५९) क्रियेति। (६०) विशेष्यवतीति। एतच्चातिरिक्तविशिष्टाभावानभ्युपगमेन बोध्यम्। वस्तुतो विशिष्टनिषेधसिद्धौ ततो ऽनुमानाद्विशेषणाभावसिद्धिरिति ध्येयम्। तदननुबन्धित्वस्य विध्यर्थानन्तर्भावेपि यो निषेधान्वयमुपपादयति, तन्मतमुपन्यस्य निराकरोति। (६१) इष्टेति॥

॥ अथ वेदान्तसूत्रशैवभाष्यसंबन्धिद्वितीयाध्यायस्य ॥

॥ द्वितीयपादारम्भः ॥

॥ रचनानुपपत्तेश्च नानुमानं प्रवृत्तेश्च* ॥ १ ॥

पूर्वपादे सांख्यादितर्कविरोधमाशङ्क्य स्वपक्षसाधनं कृतम्। पुनरिह तर्कावलम्बनेन सांख्यादिपरपक्षदूषणं क्रियते। प्रथमं सांख्यानां प्रधानकारणवादो युक्तो न वेति संदेहः। संदेहबीजं सर्वत्र प्रसिद्धमूहनीयम्। प्रधानं हि रजःसत्त्वतमोरूपम्। तदेव जगतः कारणं भवितुमर्हति। सर्वत्र तत्कार्यसुखदुःखमोहान्वयदर्शनात्। पटादयो ह्युपलब्धाः प्रावरणादिहेतुतया सुखात्मका[1] भवन्ति। अन्यापहृता दुःखात्मका भवन्ति[2]। कार्याभावादुपेक्षिता मोहात्मकाः[3]। तदेवं सुखाद्यन्वयात् त्रिगुणमेव प्रधानं जगत्कारणमिति प्राप्तेऽभिधीयते। न प्रधानं जगत्कारणम्। अचेतनत्वात्। तथाहि। दार्वादेरचेतनस्य रथप्रासादादिषु[4] तज्ज्ञानधिष्ठितस्य रचनानुपपत्तिर्दृश्यते। तज्ज्ञाधिष्ठितस्य रचनाप्रवृत्तिश्च दृश्यते। अतश्चेतना-

* शंकरमते प्रवृत्तेश्चेति पृथक् सूत्रम्।

१ सुखाय इति पा०।

२ दुःखायान्यापहृता इति पा०।

३ मोहाय इति पा०।

४–विनिर्माणे इति पा०।

नधिष्ठितं प्रधानं जगत्कारणं भवितुं नार्हति । यदुक्तं सुखाद्यन्वयादिति । तदसत् । सुखादीनामान्तरत्वात् । पटादीनां बाह्यत्वात् । अतः प्रधानकारणवादो न युक्तः[1] ॥ १ ॥

आशङ्क्य परिहरति ॥

॥ पयोऽम्बुवच्चेत् तत्रापि ॥ २ ॥

यथा पयोऽम्बु दध्यादिकरकादिभावेऽधिष्ठानानपेक्षं तद्वत् प्रधानमपीति चेत् । न । तत्राप्युक्त एव हेतुः । तस्याप्यचेतनत्वेन पक्षीकृतत्वात् ॥ २ ॥

किंच ॥

॥ व्यतिरेकानवस्थितेश्चानपेक्षत्वात् ॥ ३ ॥

यदि प्राज्ञाधिष्ठानानपेक्षत्वमचेतनस्य प्रवृत्तौ, तदा सर्वदा सृष्टिप्रसङ्गेन तद्व्यतिरेकस्य प्रलयस्यानवस्थितिः प्रसज्येत[2] । ततो नाचेतनं जगत्कारणम्[3] ॥ ३ ॥

॥ अन्यत्राभावाच्च न तृणादिवत् ॥ ४ ॥

क्षीरायमाणधेनूपभुक्ततृणादिवदचेतनमपि प्रधानं न कारणमिति वक्तुं युक्तम् । अनडुहाद्युपयुक्ते च तृणादौ क्षीरपरिणामाभावात् तदपि प्राज्ञाधिष्ठितमेव ॥ ४ ॥

॥ पुरुषाश्मवदिति चेत् तथापि ॥ ५ ॥

अचेतनमपि प्रधानं पुरुषसंनिधानात् प्रवर्तयति । यथा पङ्गुरन्धं, यथायस्कान्तमणिरयः । ततो न प्राज्ञापेक्षेति चेत्, तथापि प्रधानस्य प्रवृत्तिः संभवति । पुरुषस्याविकृतत्वात् । पङ्ग्वश्मादेर्मार्गोपदेशायःसंनिहितदे[4]शान्तरप्राप्त्यादिः कश्चिद्विकारो भवत्येव । तस्मादविकृतपुरुषसंनिधिः प्रधानप्रवृत्तौ न हेतुः ॥ ५ ॥

॥ अङ्गित्वानुपपत्तेश्च ॥ ६ ॥

गुणानामुत्कर्षापकर्षभावेऽङ्गाङ्गिभावः । ततो[5] जगत्प्रवृत्तिरुच्यते सांख्यैः । प्रतिसर्गावस्थायां साम्यावस्थानां गुणानां वैषम्याभावात् तत्कृताङ्गाङ्गिभावानुपपत्तिः । अतश्च जगदारम्भो न युज्यते प्रधानकारणवादे ॥ ६ ॥

॥ अन्यथानुमितौ च ज्ञशक्तिवियोगात् ॥ ७ ॥

उक्तप्रकारादन्यप्रकारेण प्रधानेऽनुमीयमानेऽपि ज्ञातृत्वशक्तिवियोगाद्रचनानुपपत्तिस्तदवस्थैव ॥ ७ ॥

॥ अभ्युपगमेऽप्यर्थाभावात्* ॥ ८ ॥

प्रधानस्याप्यभ्युपगमे[1] यदि प्रयोजनं, तदा कथंचिदभ्यु[2]पगच्छामः । न किमपि प्रयोजनमस्ति । यतः पुरुषस्य निर्विकारत्वात् प्रधानदर्शनादिरूपविकारासंभवः[3] । अत एव प्रकृतिधर्माध्यास[4]निमित्तो भोगस्तद्विवेकानुसंधानकृतं कैवल्यं च न संभवति । अतः प्रयोजनाभावात् प्रधानं न स्वीकार्यम् ॥ ८ ॥

॥ विप्रतिषेधाच्चासमञ्जसम् ॥ ९ ॥

पुरुषस्य द्रष्टृत्वभोक्तृत्वनिर्विकारत्वादिविरुद्धधर्मसहस्राभ्युपगमश्च दृश्यते । अतोऽप्यसमञ्जसमेव कापिलं मतम् ॥ ९ ॥

एवं[5] प्रधानकारणवादो निष्प्रमाणक इति निरूपितम् । अतः परं परमाणुकारणवादनिरसनायाधिकरणमारभ्यते ॥

॥ महद्दीर्घवद्वा ह्रस्वपरिमण्डलाभ्याम् ॥ १० ॥

अत्र वैशेषिकमतसिद्धः परमाणुकारणवादो युक्तो न वेति संदेहः । प्रधानमतेऽधिष्ठातृपरमेश्वरानङ्गीकारात् तत्कारणवादे विरुद्धेऽपि परमाणुकारणवादो युज्यते । तथाहि, प्रलीने जगति परमेश्वरस्य सिसृक्षायां सत्यां प्राणिनां कर्मवशाचिश्चलेषु[6] परमाणुष्वाद्यं कर्मोत्पद्यते । तस्मात् कर्मणैकः परमाणुः परमाण्वन्तरेण संयुज्यते । तस्माच्च संयोगाद् द्व्यणुकमारभ्यते । तेभ्यस्त्रिभ्यो द्व्यणुकेभ्यस्त्र्यणुकम् । इत्यादिक्रमेण सर्वं जगदुत्पद्यते । अतः परमाणुकारणवादे न विरोध इति पूर्वपक्षे सिद्धान्त उच्यते । ह्रस्वपरिमण्डलाभ्यां महत्त्वदीर्घत्वयुक्तत्र्यणुकात् त्र्यणुकोत्पत्तिरुच्यते काणादमते । कथमेतत् संभवति । तथाहि, परमाणवः पारिमण्डल्यपरिमाणयुक्ताः । न त्वणुपरिमाणयुक्ताः । द्वाभ्यां परमाणुभ्यामणुपरिमाणरहिताभ्यामणुपरिमाणोपेतं द्व्यणुकमुत्पद्यत इत्यभ्युपगम्यते । तथा ह्रस्वपरिमाणोपेतत्वाद्दीर्घपरिमाणोपेतं द्व्यणुकम् । तादृशेभ्यस्त्रिभ्यो द्व्यणुकेभ्यो दीर्घपरिमाणोपेतमणुपरिमाणरहितं त्र्यणुकमुत्पद्यत इत्यभ्युपगम्यते । इदं सर्वमसमञ्जसमेव । तदभ्युपगतकारणगुणप्रक्रियाविरोधात् । अवयवाश्च स्वीयैः षड्भिः पार्श्वैः संयुज्यमानाः पृथुतरमवयविनमारभन्ते । परमाणूनां पार्श्वाभावात्[7] पृथुतरद्रव्यारम्भकास्ते न भवेयुः । अतः परमाणुकारणवादो न युक्तः ॥ १० ॥

पुनरनुपपत्तिमाह ॥

१–दे न युक्तिसंभवः इति पा० ।

२–क्तो भवति इति पा० ।

३ ततोऽचेतनं प्रधानं न कारणम् इति पा० ।

४–मार्गोपदर्शनादेशान्तर–इति पा० ।

५ ततो हीयं इति पा० ।

* शंकरेण, अभ्युपगमेऽप्यर्थाभावात्, इति सूत्रं पुरुषाश्मवदिति चेत् तथापि, इति सूत्रात् पूर्वमुपन्यस्तम् ।

१ यथाकथंचित् प्रधानस्याभ्युपगमे इति पा० ।

२ तदभ्यु–इति पा० ।

३–रूपस्वीकाराभावः इति पा० ।

४–न–इति पा० ।

५ सर्वथा इति पा० ।

६–चिर्नविषु इति पा० ।

७–नभ्युपगमात् इति पा० ।

॥ उभयथापि न कर्मातस्तदभावः ॥ ११ ॥

अणुगताद्यकर्माभावादेव तत्कृताणुगतसंयोगाभावः । जीवादृष्टानां विपाकानपेक्षत्वे प्रागप्यणुगता कर्मोत्पत्तिः स्यात् । तदपेक्षत्वे[1] न तत्कृतकादाचित्काणुगतकर्मसंभवः । विपाको नामादृष्टगतः कश्चिद्धर्मो न ज्ञायते । किंतु कर्मविधिना[2] कालविशेषनियतफलदातृत्वं यस्य कर्मणश्चोदितं तस्य तत्कालागम एव विपाकः । अनियतकालविशेषाणां कर्मणां प्रबलकर्मान्तरप्रतिबन्धाभावो वा विपाकः[3] । अदृष्टानि तत्तत्कर्मानुगुणफलदानस्वभावानि । अतोऽनन्तैरात्मभिर्विविधकालफलदायित्वेनानुष्ठितानामेकदैकरूपविपाको न संभवति । अतः[4] परमाणुकारणवादो न युक्त एव ॥ ११ ॥

इयं चात्रानुपपत्तिरित्याह ॥

॥ समवायाभ्युपगमाच्च साम्यादनवस्थितेः ॥ १२ ॥

समवाय इति संबन्धोऽभ्युपगम्यते । अत एवासमञ्जसमेतत् । कथम् । समवायस्यापि जातिगुणादेरिवापृथक्सिद्धहेत्वन्तरापेक्षासाम्यादनवस्थानात् । अतः काणादमिदं मतमसमञ्जसम् ॥ १२ ॥

॥ नित्यमेव च भावात् ॥ १३ ॥

समवायस्य नित्यत्वाङ्गीकारात् संबन्धिनित्यत्वमन्तरेण तदनुपपत्तेरवयवावयविनोरपि नित्यत्वप्रसङ्गादसमञ्जसमेवैतत् ॥ १३ ॥

॥ रूपादिमत्त्वाच्च विपर्ययो दर्शनात् ॥ १४ ॥

परमाणूनामत्र रूपादिमत्त्वमङ्गीक्रियते । ततस्तन्नित्यत्वादिविपर्ययः । तथा घटादिषु दर्शनात् । तस्मादप्यसमञ्जसम्[5] ॥ १४ ॥

॥ उभयथा च दोषात् ॥ १५ ॥

अनित्यत्वादिपरिहाराय रूपादिमत्त्वादिशून्यत्वाङ्गीकारे[6] कारणपूर्वकत्वासिद्धिः । एतत्सिद्धये[7] पुनरपि रूपादिमत्त्वाङ्गीकारे वानित्यत्वाद्यनर्थापत्तिरित्युभयथापि दोषादसमञ्जसमेव काणादमतम् ॥ १५ ॥

॥ अपरिग्रहाच्चात्यन्तमनपेक्षा ॥ १६ ॥

सांख्यपक्षस्य श्रुतिन्यायविरुद्धस्यापि सत्कार्यवादादौ क्वचिदंशे वैदिकपरिग्रहोऽस्ति । कणादपक्षस्य तु केनाप्यंशेनापरिग्रहादत्यन्तमनपेक्षैव निःश्रेयसार्थिभिः कार्या[1] ॥ १६ ॥

वै[2]दिकैकदेशिनां मतं निराकृतम् । इदानीं वेदबाह्यानां मतं निरस्यते ॥

॥ समुदाय उभयहेतुकेऽपि तदप्राप्तिः ॥ १७ ॥

प्रथममिह बौद्धसिद्धान्तसिद्धः समुदायकारणवादो युक्तो न वेति संदेहः । युक्त इति पूर्वः पक्षः । तथाह्यामनन्ति । द्वौ समुदायौ बाह्याभ्यन्तरौ । बाह्यः पृथिव्यादिः । आन्तरश्चित्तचैतन्यात्मकः । समुदायद्वयमेव सर्वं जगत् । तथाहि,[3] बाह्यसमुदायस्य परमाणवः कारणम् । ते च चतुर्विधाः । पार्थिवाप्यतैजसवायवीयाः । तेभ्यो युगपत् पुञ्जीभूतेभ्यः समुदायो बाह्यो जायते । आन्तरस्य समुदायस्य स्कन्धपञ्चकं कारणम् । रूपवेदनाविज्ञानसंज्ञासंस्काररूपाः पञ्च स्कन्धाश्चित्तेन निरूप्यमाणाः । शब्दस्पर्शरूपादयो रूपस्कन्धः । तदभिव्यक्तिर्विज्ञानस्कन्धः । तज्जन्यं दुःखं वेदनास्कन्धः । देवदत्तादि नाम संज्ञास्कन्धः । तेषां वासना संस्कारस्कन्धः । तेभ्यः पुञ्जीभूतेभ्य आन्तरः समुदायो जायते । अतः समुदायद्वयकारणवादे न कोऽपि विरोधः । इत्येवं प्राप्ते निरूप्यते । न युक्तः समुदायद्वयकारणवाद इति । ते हि क्षणिकत्ववादिनः । कथमेतेषां समुदायः संभवति । कारणानां[4] क्षणिकत्वेन तदानीमेव नष्टत्वात् कार्योत्पादनासमर्थत्वात् ॥ १७ ॥

॥ इतरेतरप्रत्ययत्वादनुपपन्नमेतदिति
चेन्न संघातभावा[*]निमित्तत्वात् ॥ १८ ॥

अस्थिरेषु स्थिरत्वबुद्धिरूपाया अविद्याया रागादीनां चान्योन्यकारणत्वात् संघातभावादिकमुपपन्नमिति[5] चेत् । न । अविद्यायाः संघातभावानिमित्तत्वात् । नहि शुक्तिकादिषु रजतादिबुद्धिरूपाविद्यया शुक्तिकादिर्वस्तुतो रजतादि कार्यं करोति । विद्युदस्तदानीमेव तत्र नष्टत्वात् । तन्निमित्तरागादयोऽपि न संभवन्ति । तस्मादयुक्तः समुदायकारणवादः ॥ १८ ॥

युक्त्यन्तरमाह ॥

॥ उत्तरोत्पादे च पूर्वनिरोधात् ॥ १९ ॥

उत्तरघटक्षणोत्पत्तौ पूर्वघटक्षणस्य नष्टत्वात् । अभावस्यैवोत्पादकत्वाविशेषात् सर्वदा सर्वोत्पत्तिरपि स्यात् ॥ १९ ॥

---

१ विपाकापेक्षत्वेऽपि इति पा० ।

२ कर्मविधिवेलायामेव इति पा० ।

३–भाव एव वा कर्मविपाकः इति पा० ।

४ अनुमेयेश्वरादिसिद्धेश्च तदधिष्ठानं च न संभवति । अतः इति पा० ।

५–दिषु दृश्यते हि । तस्मादिदमस–इति पा० ।

६ अनित्यत्वादिशून्यत्वाङ्गीकारे इति पा० ।

७ कारणपूर्वकत्वात् कार्यसिद्धेस्तत्सिद्धये इति पा० ।

१ कपिलमतसिद्धसत्कार्यवादादिश्रुतिसंवाद्येकदेशपरिग्रहवत् कणादमतसिद्धस्य कस्याप्यंशस्य वैदिकैरपरिग्रहाच्च युक्तिविरोधाच्चात्यन्तमनपेक्षोपेक्षयैव कार्या इति वाक्यजातमेव पा० ।

२ वैदिकदर्शिनां वैदिकैकदेशिनां इति पा० ।

३ तथा इति वरपा० ।

४–नां परमाणूनां इति पा० ।

*–चोत्पत्तिमात्र–इति शंकरमतीयः सूत्रपाठः ।

५ अविद्याया अन्योन्यकारणत्वादुपपद्यत इति इति पा० ।

॥ असति प्रतिज्ञोपरोधो यौगपद्यमन्यथा ॥ २० ॥

असति हेतावुत्पत्तावधिपतिसहकार्यादीनां ज्ञानहेतुत्वप्रतिज्ञाविरोधः स्यात् । तस्यापि स्थित्यभ्युपगमे युगपद् घटद्वयोपलब्धिप्रसक्तिः । अस्थितौ संप्रयोगज्ञानादेर्यौगपद्यम् ॥ २० ॥

॥ प्रतिसंख्याप्रतिसंख्यानिरोधाप्राप्तिरविच्छेदात् ॥ २१ ॥

निरोधो निरन्वयविनाशः । स स्थूलः सूक्ष्मश्च न संभवति । कपालादिभावरूपावस्थाप्राप्तेरेव विनाशशब्दवाच्यत्वात् । सतो द्रव्यस्याविच्छेदात् । ततो न क्षणिकत्वसिद्धिः ॥ २१ ॥

॥ उभयथा च दोषात् ॥ २२ ॥

उत्पन्नस्य तुच्छतापत्तौ तुच्छादुत्पत्तौ चाभावादुत्पत्त्यसंभवात् । अभावात्मककार्योत्पत्तिरूपाद्दोषादसमञ्जसमिदं दर्शनम्[2] ॥ २२ ॥

॥ आकाशे चाविशेषात् ॥ २३ ॥

आकाशे च न तुच्छत्वमुपपद्यते । अबाधप्रतीतिसिद्धत्वादस्य श्येनादिपतनहेतुत्वेन ॥ २३ ॥

॥ अनुस्मृतेश्च ॥ २४ ॥

प्रत्यभिज्ञानादपि न क्षणिकत्वसिद्धिः । तदेवेदमिति सामानाधिकरण्येनातीतवर्तमानकालविशिष्टं वस्त्वेकमिति हि विज्ञायते । सामग्री च तस्याः पूर्वानुभवजनितसंस्कारवतः पुरुषस्येन्द्रियसंयोगः । ततः क्षणिकत्वाद्यनुपपन्नार्थाभिधानादसंबद्ध एव समुदायकारणवादः ॥ २४ ॥

बाह्यार्थास्तित्ववादिषु गोघटादीनां प्रत्यक्षत्ववादिनो बौद्धा निरस्ताः । ज्ञानानुमेयत्ववादिनो निरस्यन्ते[3] ॥

॥ नासतोऽदृष्टत्वात् ॥ २५ ॥

इह वै बौद्धैकदेशिनो ज्ञानानुमेयत्ववादो युक्तो न वेति संशये पूर्वः पक्षप्रसङ्गः । ज्ञाने स्वाकारसमर्पणविनष्टमर्थं ज्ञानाकारवैचित्र्येणानुमिनोति । ततो ज्ञानवैचित्र्येण बाह्यार्थवैचित्र्यमनुमीयत इति । तदेतन्न संभवति । अर्थस्य क्षणिकत्वादसतो विनस्य धर्मिणो धर्मसंक्रमणस्यादृष्टत्वात् ॥ २५ ॥

उदासीनानामपि चैवं सिद्धिः ॥ २६ ॥

क्षणिकत्वाभ्युपगमादन्य एवानुष्ठातान्य एव फलस्वामी । अतो निष्प्रयत्नानामपि सर्वार्थसिद्धिः स्यादिति दुरुपपादोऽयं वाद इति ॥ २६ ॥

॥ नाभाव उपलब्धेः ॥ २७ ॥

इह वै बौद्धानां केवलविज्ञानवादो युक्तो न वेति संशये युक्त इति पूर्वः पक्षः[1] । तथाहि साकारं विज्ञानमेव त्वान्तरं, न बाह्याः पदार्थाः । स्वप्ने बाह्यपदार्थाननपेक्ष्य केवलया बुद्ध्या व्यवहारदर्शनात् । तद्वज्जाग्रद्व्यवहारस्यापि[2] व्यवस्था युज्यते । ततो विज्ञानमात्रं तत्त्वमित्येवं प्राप्तेऽभिधीयते[3] । घटं जानामीति कर्तुः कर्मतयार्थस्यैवोपलब्धेस्तदभावो न शक्यते वक्तुम् । पुरुषस्यार्थविशेषव्यवहारानुगुण्यापादनमेव हि ज्ञानस्याकारः । यदुक्तम्, स्वप्नदृष्टान्तेन जाग्रद्व्यवहारस्यापि शून्यत्वम् । तदसत् । स्वप्नस्य बाध्यत्वात् जाग्रद्व्यवहारस्याबाधदर्शनात् । विषमो दृष्टान्त इत्यर्थः ॥ २७ ॥

॥ वैधर्म्याच्च न स्वप्नादिवत् ॥ २८ ॥

कारणदोषबाधराहित्यरूपवैधर्म्याच्च न स्वप्नादिवज्जागरितज्ञानस्य मिथ्यात्वम् । अतो न विज्ञानमात्रं तत्त्वम् ॥ २८ ॥

युक्त्यन्तरमाह ॥

॥ नाभावोऽनुपलब्धेः* ॥ २९ ॥

अर्थशून्यस्य ज्ञानस्य सद्भावो न संभवति । तस्य कुत्राप्यनुपलम्भात् । स्वप्नज्ञानस्याप्यर्थवत्ता संभवत्येव । ततो विज्ञानमात्रवादोऽनुपपन्न एव ॥ २९ ॥

॥ सर्वथानुपपत्तेश्च ॥ ३० ॥

इहाधिकरणे सर्वशून्यवादो युक्तो न वेति संदेहः । युक्त इति पूर्वः पक्षः । तथाहि[4], सर्वं जगन्न सत् । बाधितत्वात् । नासत् । प्रतीयमानत्वात् । नोभयात्मकम् । विरोधात् । नानुभयात्मकम् । असंभवात् । किंतु चतुष्कोटिविनिर्मुक्तं सर्वं शून्यमेव । प्रत्यक्षावभासस्तु संवित्तिमूलः । तस्माच्छून्यवादः समीचीन इत्येवं[5] प्राप्ते सिद्धान्त उच्यते ॥

न संभवति सर्वशून्यवादः । कुतः । सदिति प्रतिज्ञायामिवासदिति प्रतिज्ञायामन्यथाप्रतिज्ञायां च तुच्छत्वासंभवानुपपत्तेः[6] सदसदनुद्धृतच्छब्दानां वस्तुगतान्योन्यविरुद्धभावाभावरूपावस्थाविशेषविषयत्वात् । यत् तु संवित्तिमूलः प्रत्यक्षावभास इति । तदप्यपहास्यम् । सर्वस्य शून्यत्वे कः संवित्तेराश्रयः । यस्यैवमवभासः । ततः सर्वशून्यवादः सर्वविरुद्ध एव ॥ ३० ॥

गता हि बौद्धाः । जैनमतं निरस्यते ॥

---

१ असत उत्पन्ना—इति पा० ।

२—याच्च न तुच्छत्वसिद्धिर्भवति इति पा० ।

३ ॥ २४ ॥ सर्वत्र साकवादी निरस्तः । अतश्च ज्ञानानुवादवादी निरस्यत इति इत्येव पा० ।

---

१ पूर्वमुच्यते इति पा० ।

२ तथैव जा—इति पा० ।

३—प्ते न युक्तमित्युच्यत इति पा० ।

* अतः सूत्रतः परं शंकरमते क्षणिकत्वाच्च इत्याकारकमपरं सूत्रमस्ति । तदेतन्मते नास्ति ।

४—क्षः । एवं सति युक्तिमापादयति । इति पा० ।

५ तस्माच्छून्यवादिमतं समीचीनमित्येवं इति पा० ।

६ तुच्छत्वानुपपत्तेः इति वरपा० ।

॥ नैकस्मिन्नसंभवात् ॥ ३१ ॥

जैना हि सप्तभङ्गीन्यायेनैकस्मिन्नपि वस्तुनि नानाभावमापादयन्ति । तद्वेतेषां मतं युक्तं न वेति विचारः । एवं तेषां प्रक्रिया । जीवोऽजीवश्चेति द्वौ पदार्थौ । जीवश्चेतनः शरीरपरिमाणः सावयवः । अजीवः षड्विधः । वनमहीधरादिरेकः । आस्रवसंवरनिर्जरबन्धमोक्षाख्याः पञ्च । आस्रवत्यनेन जीवो विषयेष्वित्यास्रव इन्द्रियसंघातः । संवृणोति विवेकमित्यविवेकादिः संवरः । । निःशेषं जीर्यत्यनेन कामक्रोधादिरिति केशोल्लुञ्चनतप्तशिलारोहणादि तपो[1] निर्जरः । कर्माष्टकेनापादिता[2] जन्मपरंपरा बन्धः । चत्वारि घातिकर्माणि पापरूपाणि । चत्वार्यघातिकर्माणि पुण्यरूपाणि । तेभ्यो मुक्तस्य जीवस्य सततोर्ध्वगमनं मोक्षः । एते सप्त पदार्थाः सप्तभङ्गीन्यायेन व्यवस्थाप्याः । स्यादस्ति । स्यान्नास्ति । स्यादस्ति च नास्ति च । स्यादवक्तव्यः*। स्यादस्ति चावक्तव्यः । स्यान्नास्ति चावक्तव्यः । स्यादस्ति च नास्ति चावक्तव्यः । इति सप्तभङ्गीन्यायः । स्याच्छब्द ईषदर्थः[3] । अतः सप्तभङ्गीन्यायात् सप्त पदार्थसिद्धिरिति ।

एतदयुक्तम् । कुतः । एकस्मिन् वस्तुनि सत्त्वासत्त्वनित्यत्वानित्यत्वभेदाभेदादीनामसंभवात् । पर्यायभाविनश्च[4] द्रव्यस्यास्तित्वनास्तित्वादिशब्दबुद्धिविषयाः[5] परस्परविरुद्धाः पिण्डत्वघटत्वकपालत्वाद्यवस्था युगपन्न संभवन्ति । अतो विरुद्ध एव जैनवादः ॥ ३१ ॥

॥ एवं चात्माकार्त्स्न्यम् ॥ ३२ ॥

एवं चात्माकार्त्स्न्यं चानुपपन्नम् । आत्मनः शरीरपरिमाणत्वे बृहच्छरीरादल्पीयसि प्रविशतो विकलत्वं प्रसज्येत । अत आत्मनः शरीरपरिमाणत्वमयुक्तमेव ॥ ३२ ॥

॥ न च पर्यायादप्यविरोधो विकारादिभ्यः ॥ ३३ ॥

तथाविधाल्पत्वावस्थान्तरयोगादप्यविरोधो न संभवति । घटादिवद्विकारादिदोषप्रसङ्गात्[6] ॥ ३३ ॥

॥ अन्त्यावस्थितेश्चोभयनित्यत्वादविशेषः ॥ ३४ ॥

अन्त्यस्य मोक्षदशापरिमाणस्यैकरूपावस्थितेस्तस्य स्वाभाविकत्वेनात्मतत्परिमाणयोरुभयोरपि नित्यतया पूर्वावस्थायामप्यविशेषः । विविधदेहपरिमाणत्वे हि वैकल्यं भवेदेव[1] । अत एकस्मिन् सत्त्वासत्त्वादिवदात्मनः शरीरपरिमाणवादाच्च जैनमतमपि विरुद्धमेव ॥ ३४ ॥

॥ पत्युरसामञ्जस्यात् ॥ ३५ ॥

पत्युः परमेश्वरस्य श्रुतिसिद्धजगदुभयकारणत्वस्यापि तदागमनिष्ठास्तन्मताभिप्रायानभिज्ञा एकदेशिनस्तान्त्रिकाः केवलनिमित्तत्वं वदन्ति । तद्युक्तं न वेति संदेहः । तत्रैवं पूर्वः पक्षः । कुलालादिरनुपादानभूत एव दण्डादिकं नियच्छन् कर्ता भवति । तथा तटस्थ ईश्वरोऽपि निमित्तमात्रम् । माया उपादानम् । शक्तयः कारणम् । अन्यथा मृदादिवदीश्वरस्योपादानत्वे विकारादिप्रसक्तिः । अतो निमित्तमेव परमेश्वर इति । अत्रोच्यते । पत्युरीश्वरस्य केवलनिमित्तत्वमपि न युक्तम् । श्रुतिन्यायविरोधेनासामञ्जस्यात् ॥ ३५ ॥

न्यायविरोधमाह ॥

॥ संबन्धानुपपत्तेः* ॥ ३६ ॥

॥ अधिष्ठानानुपपत्तेश्च ॥ ३७ ॥

नित्यस्य व्यापकस्य निरवयवस्य कूटस्थस्य निर्लेपस्येश्वरस्यादृष्टशरीरादिभिः संबन्धस्यासंभवात् ॥ ३६ ॥

अत एवाशरीरस्य परमेश्वरस्य मायोपादानाधिष्ठानं नोपपन्नम् । लोके शरीरिण एव कुलालादेर्मृत्पिण्डाद्युपादानाधिष्ठानं दृष्टम् । अतः कुलालादिदृष्टान्तो विरुद्धः । अनधिष्ठाने मायादेः, ईश्वरस्यानङ्गीकारात् सांख्यमतमेव युक्तम्[2] । ईश्वरेण प्रयोजनाभावात् । अतः परमेश्वरस्य निमित्तत्वं न संभवति ॥ ३७ ॥

आशङ्क्याह ॥

॥ करणवच्चेन्न भोगादिभ्यः ॥ ३८ ॥

अधिष्ठाने शरीरापेक्षा नास्ति । यथा करणमिन्द्रियमशरीरमपि शरीरमधितिष्ठति । तद्वत् प्रधानमपीश्वर इति चेन्न । तद्गतानर्थभोगादिभ्यः[3] । यथात्मनोऽशरीरस्य शरीराधिष्ठाने शरीरगतसुखदुःखभोगादिस्तथा परमेश्वरस्यापि तदधिष्ठाने तद्गतभोगादिप्रसक्तिः । अतो न निमित्तमात्रमीश्वरः ॥ ३८ ॥

॥ अन्तवत्त्वमसर्वज्ञता वा ॥ ३९ ॥

वाशब्दश्चार्थे । सशरीर एव परमेश्वरः कुलाल इव मृत्पिण्डं पार्थक्येनोपादानमधितिष्ठतीति चेत् । न । तथा

---

१ तप इह इति पा० ।

२ कर्माष्टकापादित—इति पा० ।

* सर्वत्र पुस्तकान्तरे नपुंसकतास्ति ।

३ स्याद्वचनमीषदर्थम्, इति पा० ।

४—रूपाश्च इति पा० ।

५—शब्दविषयाः इति पा० ।

६ तथा विकलत्वावस्थायोगादप्यविरोधाभावः । घटादिवद्विकारादियोगप्रसङ्गात् इति पा० ।

---

१ भवत्येव इति पा० ।

* शंकरमते संबन्धानुपपत्तेश्च ईदृशं चकारघटितं सूत्रम् ।

२ अनधिष्ठाने मायादेरीश्वरस्य सांख्यमतमेव निरीश्वरं युक्तम् इति पा० ।

३ तत्कृता—इति पा० ।

सति पत्युरीश्वरस्य संसारिण इवान्तवत्त्वमसर्वज्ञत्वं च भवति । अतो भोगादिप्रसक्तेः प्रधानाधिष्ठानमीश्वरस्य न संभवति । प्रधानाधिष्ठातृत्वेऽपि परमेश्वरस्य "अनश्नन्नन्योऽभिचाकशीति" इति श्रुतेस्तत्फलभोगादिप्रसक्तिर्न भवतीति चेत् । तथा सति तर्कबलमपहाय श्रुतिरेवावलम्बनीयेति । "तदात्मानं स्वयमकुरुत", "बहु स्यां प्रजायेय", "सर्वो वै रुद्र" इत्यादिश्रुतिभिरुपादानमपि परमेश्वर इत्यभ्युपेयम्[1] । जगदुपादाननिमित्तभूतस्यापि परमेश्वरस्य "निष्कलं निष्क्रियम्" इत्यादिश्रुतिभिर्निर्विकारत्वमप्युपपद्यते ।

"शक्तिः प्रथमसंभूता शान्त्यतीतपदोत्तरा ।
ततो माया ततोऽव्यक्तं शिवाच्छक्तिमतः प्रभोः ॥
शान्त्यतीतपदं जज्ञे ततः शान्तिपदं क्रमात्" ।

इत्यादिना मायादिप्रपञ्चे शक्तिमतः शिवस्यैवोपादानत्वमवगम्यते वायुसंहितायाम् । पुनश्च,

"शक्त्यादि च पृथिव्यन्तं शिवतत्त्वसमुद्भवम् ।
तेनैकेन तु तद् व्याप्तं मृदा कुम्भादिकं यथा" ॥

इत्यादिना तत्रैव शिवेनोपादानभूतेन जगद्व्याप्तं मृद्घटादिन्यायेनावगम्यते ।

"चिदात्मैव हि देवोऽन्तःस्थितमिच्छावशाद् बहिः ।
योगीव निरुपादानमर्थजातं प्रकाशयेत्" ॥

इत्याद्यागमप्रामाण्याच्च परमेश्वरस्य जगदुभयकारणत्वमित्यनवद्यमिति ।

शिवागमैकदेशे शिवस्य परब्रह्मणः केवलनिमित्तत्वमुपपादितम् । तत्परिहारार्थमिदमधिकरणमिति पूर्वाचार्याणां व्याख्या ।

वयं तु वेदशिवागमयोर्भेदं[2] न पश्यामः । वेदोऽपि[3] शिवागम इति व्यवहारो युक्तः । तस्य तत्कर्तृकत्वात् । अतः शिवागमो द्विविधः । त्रैवर्णिकविषयः । सर्वविषयश्चेति । वेदस्त्रैवर्णिकविषयः । सर्वविषयश्चान्यः । उभयोरेक एव शिवः कर्ता । "ईशानः सर्वविद्यानाम्," "अस्य महतो भूतस्य निःश्वसितम्" । इत्यादिश्रुत्या ।

"अष्टादशानामेतासां विद्यानां भिन्नवर्त्मनाम् ।
आदिकर्ता शिवः साक्षाच्छूलपाणिः,"

इति स्मृत्या च वेदे तस्य कर्तृत्वमवगतम् । अन्यत्रापि तस्यैव परमेश्वरस्य । अतः कर्तृसामान्यादुभयमप्येकार्थपरं प्रमाणमेव ।

१—यः इति पा० ।
२—विरोधं इति पा० ।
३ वेदे च इति पा० ।

यद्वा, ब्रह्मप्रणवपञ्चाक्षरीप्रसादादिमन्त्राणां[1] पशुपतिपाशादिवस्तुव्यवहाराणां भस्मोद्धूलनत्रिपुण्ड्रधारणलिङ्गार्चनरुद्राक्षधारणादिपरधर्माणामन्येषां च सर्वेषां व्यवहाराणामुभयत्रापि सममेव दर्शनादुभावपि प्रमाणभूतौ वेदागमौ ।

कर्तृ[2]सामान्यादेकार्थपरत्वेन च विरोधाभावादिदमधिकरणं केवलेश्वरनिमित्तत्वादिभिर्हिरण्यगर्भोक्तयोगस्मृतिविषयमिति वयं वदामः । अतो हिरण्यगर्भागमनिरसनपरमिदमधिकरणमिति युक्तम् ।

वियदाद्युत्पत्तिशङ्कापरिहारवदवान्तरशङ्कापरिहारप्रवृत्तौ न दोष इति कश्चित् । सर्वथा न केवलमीश्वरो निमित्तमित्यस्माकं राद्धान्तः ॥ ३९ ॥

॥ उत्पत्त्यसंभवात् ॥ ४० ॥

पाञ्चरात्रमतं वासुदेवोक्तम् । तत्र जीवोत्पत्त्यादिकमुच्यते । तत् संभवति न वेति संदेहः । संभवतीति पूर्वः पक्षः । कुतः । भगवता वासुदेवेन प्रोक्तस्य[3] प्रमाणत्वात् । तथा ह्यत्र प्रक्रिया । भगवानेको वासुदेवः परमात्मा । तस्मात् संकर्षणाख्यो जीवो जायते । जीवाच्च प्रद्युम्नाख्यं मनः । मनसश्चानिरुद्धाख्योऽहंकारः । एते चत्वारो व्यूहाः सर्वात्मान इति । अतो वासुदेवस्य हिरण्यगर्भादिभ्योऽपि परत्वेन तदुक्तस्य प्रामाण्यादिदं सर्वमुपपन्नमिति प्राप्ते ब्रूमः । जीवोत्पत्त्यभिधायकमिदं शास्त्रमप्रमाणम् । कृतनाशाकृताभ्यागमप्रसङ्गेन जीवोत्पत्त्यसंभवात् । एकस्मिन् किंचित् पुण्यापुण्यात्मकं कर्म कृत्वा प्रलये नष्टे तदन्यः कश्चिज्जीवः प्राप्नोतीत्यकृताभ्यागमः । पूर्वस्य कृतस्य नाश इत्यादिर्दोषः[4] । ततो जीवोत्पत्त्यभिधायकं शास्त्रमप्रमाणम् ॥ ४० ॥

इयं चान्यानुपपत्तिरित्याह ॥

॥ नच कर्तुः करणम् ॥ ४१ ॥

संकर्षणाख्याज्जीवात् प्रद्युम्नाख्यं मनोऽजायत इत्युच्यते । कर्तुर्जीवाच्च करणोत्पत्तिर्न संभवति । तस्य प्रकृतिकार्यत्वेन चेतनकार्यत्वानुपपत्तेः ॥ ४१ ॥

॥ विज्ञानादिभावे वा तदप्रतिषेधः ॥ ४२ ॥

विज्ञानशब्दो जीववाचकः । अत्र जीवादीनामुत्पत्तिर्नाभिधीयते । किंतु संकर्षणादीनां जीवादिभाव उच्यते । जीवाद्यधिष्ठातृत्वं जीवादिभाव इति । ततस्तच्छास्त्रप्रामाण्यप्रतिषेधो मा भूदिति शङ्कार्थः ॥ ४२ ॥

१—दिमाहात्म्यानां इति पा० ।
२ अतो वेदागमरहस्यागमयोः कर्त्र—इति पा० ।
३ दृष्टस्य इति पा० ।
४ इत्यादि च बहुदोषाः इति पा० ।

॥ विप्रतिषेधाच्च ॥ ४३ ॥

एवं जीवोत्पत्त्यभिधाने परिहृतेऽपि पाञ्चरात्रमतस्य नाभ्युपगमः । श्रुतिविरुद्धेश्वरकारणवादमुक्तिहेतुत्वतप्तमुद्राधारणादिधर्मपरत्वादिना विप्रतिषेधात् । अतः पाञ्चरात्रमतमसमञ्जसम् ॥

"पाञ्चरात्रे च बौद्धे च तथा कालामुखेऽपि च ।
श्रद्धया दीक्षिता यूयं भवत[1] ब्राह्मणाधमाः" ॥

इत्यादिषु च विशेषेणास्य[2] प्रतिषेधो दृश्यते। अतो विप्रतिषेधादप्रमाणं[3] पाञ्चरात्रं मतम् ।

ननु "पुरुषो वै रुद्र" इत्यादिश्रुत्या परमेश्वर एव पुरुषो वासुदेवः। तज्ज्ञानाराधनादिकर्मापि क्रमेण परमेश्वरपदप्राप्तिसाधनमिति श्रूयते। तदाराधनप्रतिपादकस्य पञ्चरात्रस्याप्रामाण्ये तस्यानाराध्यत्वप्रसङ्ग इति चेत्। न। श्रुतिविरोधात् पञ्चरात्रस्याप्रामाण्येऽपि तस्य का हानिः। श्रुतिप्रसिद्धमार्गेण तदाराधनसंभवात् । अतो न विरोधः ॥ ४३ ॥

इति श्रीकण्ठशिवाचार्यविरचिते ब्रह्ममीमांसाभाष्ये द्वितीयस्याध्यायस्य द्वितीयः पादः ॥ २ :: :: ॥

१ भवेत इति पा० ।
२ इत्यादिविशेषणादस्य इति पा०।
३ विरुद्धधर्माश्रयत्वेन विप्रतिषेधविषयत्त्वादप्रमाणं इतिं पा० ।

॥ श्रीगुरुभ्यो नमः ॥

॥ अथ चरज्याद्यप्रकरणम् ॥

चरणौ न-
रसिंहस्य
ज्यायस्त्वाद्बन्-
द्यता ययोः ।
प्रणमामि
कराञ्जल्या
रम्यौ शर-
णदौ नृणाम् ॥ १ ॥

अत्र प्रतिपङ्क्त्याद्याक्षराणां योगेन चरज्याद्यप्रकरणमिति प्रकरणाभिधानमाविर्भवति ।

प्रश्नः ।

ज्ञात्वा चरज्यामपमज्यकां च
पलप्रभां ब्रूहि चराक्षभे तु ।
विज्ञाय विद्वन्नपमज्यकां मे
वदाशु चेद् बुध्यसि गोलसंस्थाम् ॥ २ ॥

अस्य भङ्गः ।

त्रिज्याभक्तार्कहता चरशिञ्जिन्यन्यसंज्ञः स्यात् ।
स क्रान्तिज्याविहृतो द्युज्यागुणितो भवेत् पलभा ॥ ३ ॥

परेण भक्ता पलभाप्रवर्गात्
सैकात् पदं तेन हृता त्रिभज्या ।
क्रान्तिज्यका स्यात् पलभापराख्यौ
व्यत्यस्य यत् सिद्ध्यति सा द्युजीवा ॥ ४ ॥

द्वितीयप्रकारस्य श्रीमद्गुरुचरणोक्तः प्रकारान्तरेण भङ्गः ।

वेदेन्द्रनिघ्न्याश्चरमौर्विकायाः
पलप्रभाघ्न्या त्रिभजीवयाप्तम् ।
अक्षप्रभां तत् प्रविकल्प्य साध्या
पलज्यका क्रान्तिगुणः स एव ॥ ५ ॥

प्रश्नः ।

भानौ सममण्डलगे समुन्नतांशांश्च चरकालम् ।
अवलोक्याशु वदेद्यः पलभामग्रां स गणकाग्र्यः ॥ ६ ॥

अस्य भङ्गः ।

पृथक् चरज्या समशङ्कुभक्ता
त्रिज्याहृता ये फलयोः कृती स्तः ।
तत्राद्यखण्डं प्रथमाभिधं स्याद्
द्वयोर्वियोगार्धमथान्यसंज्ञम् ॥ ७ ॥

परवर्गात् प्रथमाढ्यात् पदं पराढ्यं ततः पदं द्विष्ठम् ।
समशङ्क्वर्काभिहतं स्यातां क्रमतोऽग्रकापलभे ॥ ८ ॥

प्रश्नः ।

उदयसमयलब्धांस्तीक्ष्णरश्मेर्दिगंशां-
श्चरसमयमवेत्य द्राग्वदेद्योऽपमांशान् ।
प्रवदति च पलाभामग्रणीस्तान्त्रिकाणां
स गणकगणवक्राम्भोरुहोद्बोधनेऽर्कः ॥ ९ ॥

अस्य भङ्गः ।

अग्रांशकोटिजीवाघ्नी चरज्या प्रथमाभिधा ।
त्रिज्याहतं चरज्याग्रावर्गान्तरपदं परः ॥ १० ॥
चरकोटिज्यया भक्तः परः स्यात् क्रान्तिमौर्विका ।
रविघ्नः प्रथमो भक्तः परेण पलभा भवेत् ॥ ११ ॥

प्रश्नः ।

तद्धृतिं चरकाले च बुध्वा ब्रूहि पलप्रभाम् ।
क्रान्तिज्यकां च चेत् तेऽस्ति गोलालोकनचातुरी ॥१२॥

अस्य भङ्गः ।

चरकोटिज्याविहृता चरज्यका तत्कृतिर्द्विष्ठा ।
व्यासार्धवर्गतद्धृतिगुणिता प्रथमान्यसंज्ञे स्तः ॥ १३ ॥

अन्यार्धवर्गेण युतादाद्या-
न्मूलं तदन्यार्धविहीनितं सत् ।
कुशिञ्जिनी स्यात् क्रिययाद्ययातः
प्रसाधयेद् द्राक् पलभापमज्ये ॥ १४ ॥

प्रश्नः ।

भुजमुन्नतकालं च ज्ञात्वोद्वृत्तगते रवौ ।
पाटवाहंकृतिस्ते चेद् द्राक् क्रान्तिज्याक्षभे वद ॥ १५ ॥

अस्य भङ्गः ।

क्रमाच्चरज्याचरकोटिजीवे
अग्रादिखण्डत्रिगुणोद्धृते ते ।
वर्गीकृते स्तः प्रथमान्यसंज्ञे
परार्धवर्गात् प्रथमेन युक्तात् ॥ १६ ॥

यन्मूलमन्यार्धयुगस्य मूलं
क्रमादिनाद्यादिमखण्डकाभ्याम् ।
हतं पलश्रुत्यपमज्यके स्त-
स्ततः प्रसाध्या सुधिया पलाभा ॥ १७ ॥

प्रश्नः ।

उन्नतसमयच्छाये दृष्ट्वोद्वृत्तं गते भानौ ।
सत्वरमक्षच्छायां वद विद्वन् क्रान्तिजीवां च ॥ १८ ॥

अस्य भङ्गः ।

क्रमाच्चरज्याचरकोटिजीवे
उद्वृत्तशङ्कुत्रिगुणोद्धृते ते ।
वर्गीकृते आदिमखण्डमाद्यः
पराभिधं योगदलं द्वयोर्यत् ॥ १९ ॥

आद्योनात् परवर्गात् पदं तदूनान्वितात् परान्मूले ।
रविनिघ्ने द्विविधः स्यात् पलकर्णोऽतोऽक्षभापमज्ये च ॥ २० ॥

प्रश्नः ।

शङ्कुतलोन्नतकालावुन्मण्डलगे रवौ वीक्ष्य ।
पलभां ब्रवीति योऽसौ गणकेषु कथं न मान्यः स्यात् ॥ २१ ॥

अस्य भङ्गः ।

अग्राग्रखण्डनिहताच्चरकोटिजीवा-
वर्गार्धतः स्वहतया चरजीवयाप्तम् ।
तत्त्रिज्यकाकृतियुतेः पदमाप्तहीनं
स्यादग्रकाक्ष पलभा सुधियः स्फुटातः ॥ २२ ॥

प्रश्नः ।

चरज्यकाक्षितिज्यके कथंचनावगम्य च ।
विचक्षण प्रचक्ष्व मेऽक्षभा कियत्प्रमाणिका ॥ २३ ॥

अस्य भङ्गः ।

चरजीवाक्षितिमौर्व्योर्यत् कृतिवियुतेः पदं हृता तेन ।
चरगुणकुज्याभिहती रविभिर्गुणिता त्रिभज्यया भक्ता ॥ २४ ॥
यत् फलमक्षाभा स्यात् क्रान्तिज्यातो बुधैः साध्या ॥
ज्ञायत एतत् सुधिया स्पष्टप्रतिपत्तये मयोक्तमिदम् ॥ २५ ॥

प्रश्नः ।

विज्ञाय संसदि सतां क्षितिजीवयोनां
यस्तद्धृतिं चरमपि प्रवदेत् पलाभाम् ।
सोऽयं कुशाग्रमतिरत्र जगत्यमीषां
स्याद्गर्वनाशनपटुर्गणकाग्रणीनाम् ॥ २६ ॥

अस्य भङ्गः ।

चरज्यकावर्गदलेन निघ्नी
कुशिञ्जिनीहीनिततद्धृतिः सा ।
त्रिभज्यया स्वाहतया विभक्ता
चरज्यकावर्गयुताप्तवर्गात् ॥ २७ ॥

यन्मूलमाप्तेन विहीनितं तत्
क्षितिज्यका स्यादिति धीमतोह्यम् ।
अतः सुधीभिः प्रथमोक्तमार्गे
विचिन्त्य चित्ते पलभा प्रसाध्या ॥ २८ ॥

प्रश्नः ।

ज्ञात्वोर्ध्वखण्डं समवृत्तशङ्को-
श्चरज्यकां चापि वदेत् पलाभाम् ।
मन्ये स विद्वान् गणितार्णवान्त-
र्मज्जज्जनोत्तारणकारणं नौः ॥ २९ ॥

अस्य भङ्गः ।

समवृत्तनरोर्ध्वखण्डनिघ्ना-
श्चरमौर्व्याः पदमक्ष चापमज्याम् ।

परिकल्प्य दिनज्यकाचितिज्ये
अथचाग्रां तत एव साधयेज् ज्ञः ॥ ३० ॥

समवृत्तनरोर्ध्वखण्डकाग्रा-
भिहतिः क्रान्तिगुणेन भाजिता स्यात् ।
कुगुणोनिततद्धृतिस्तु तद्घ्नात्
कुगुणान्मूलमिहापमज्यकान्या ॥ ३१ ॥

तत इत्थमिदं मुहुर्विदध्या-
दपमज्याप्रमुखास्ततोऽक्षभा स्यात् ।
असकृद्विधिमन्तरा न सिद्ध्ये-
दिदमुद्दिष्टमपीह कोटियत्नैः ॥ ३२ ॥

प्रकारान्तरेण भङ्गः ।

युतोर्ध्वखण्डेन समाख्यशङ्को-
श्चरज्यका तद्धृतिरत्र कल्प्या ।
चरज्यकाकल्पिततद्धृतिभ्या-
मुक्तप्रकारात् कुगुणः प्रसाध्यः ॥ ३३ ॥

यत्तद्धृतिघ्नात् समवृत्तशङ्को-
र्ध्वखण्डवर्गाद् घनमूलमत्र ।
सा स्यात् कुजीवोनिततद्धृतिस्त-
त्कुज्यायुतिस्तद्धृतिरेवमेषा ॥ ३४ ॥

मुहुः प्रसाध्येह परिस्फुटा स्यात्
ततः पलाभा सुलभा बुधानाम् ।
भङ्गो द्विधैवं मयका निरुक्तः
परोऽपि चिन्त्यः स्वधिया सुधीभिः ॥ ३५ ॥

श्रीबालशास्त्रिविदुषां सविधं पठित्वा
प्राक् शब्दशास्त्रमथ तज्जनितावबोधः ।
श्रीबापुदेवगुरुवर्यकृपाकटाक्षात्
सज्ज्यौतिषं प्रपठतीह विनायको यः ॥ ३६ ॥

तन्निर्मिते कतिपयप्रश्नविचाराभिधप्रबन्धेऽस्मिन् ।
पूर्णं द्वितीयमभवत् प्रकरणमेतच्चरज्याद्यम् ॥ ३७ ॥

॥ इति चरज्याद्यप्रकरणम् ॥

THE VIDVAN-MANO-RANJINI OR REJOICER OF THE MIND OF THE LEARNED.

A COMMENTARY ON SAD-ÁNANDA'S VEDÁNTA-SÁRA, BY RÁMA-TÍRTHA.

(Continued from page 110.)

Moreover it would follow that there would be a discrepancy with the latter portion of the sentence discribing real power acquired by the ascetic, in the words

त इह व्याघ्रो वा सिंहोवेत्यादिसत्सम्पत्तिवाक्यशेषासङ्गतिप्रसङ्गश्चेत्यसमञ्जसमेतत् । अथाज्ञानजीवयोः स्वरूपेणैवानादितया आश्रयाश्रयिभावस्य नित्यसिद्धत्वान्नान्योन्याश्रयइति मतं तदपि न ब्रह्मण्यज्ञानाभावप्रसङ्गात् । नायमिष्टप्रसङ्गः सोऽकामयत तदात्मानं स्वयमकुरुतेत्यादिश्रुतिभिर्ब्रह्मणि जगत्कारणे कामयितृत्वादेरज्ञानकार्य्यस्य श्रूयमाणत्वात् । न च दृष्टिगतपीतिम्नः शंखेसमारोपवज्जीवगताज्ञानविक्षेपस्य कामयितृत्वादेस्तद्विषये ब्रह्मणि समारोपः श्रुत्या कीर्त्यंतइति वाच्यं तथा सति जीवानामेव जगत्सर्गस्थितिप्रलयोपादानत्वात् सर्व्वं खल्विदं ब्रह्मेत्यादि ब्रह्मसामानाधिकरण्यं जगतः श्रूयमाणं एकविज्ञानेन सर्व्वविज्ञानप्रतिज्ञानञ्च पीड्येत । जीवस्य ब्रह्माभेदात् सर्व्वमेवोपपद्यत इति न कश्चिद्दोष इति चेन्न हं जीवपक्षपातं परित्यज्य ब्रह्मणएव जगत्स्रष्टृत्वादि यथाश्रुतं स्वीकर्त्तव्यं ! विना तस्याज्ञानाश्रयत्वं कूटस्थस्य न कामयितृत्वादीत्युक्तं तस्य च जीवाद्विभक्तस्याज्ञानाश्रयत्वे तत्रापि स्यादन्योन्याश्रयः । ननु ब्रह्मणि जगत्कारणत्वादिनिर्व्वाहकमज्ञानं मायाशब्दवाच्यमन्यदेव जीवगतकर्तृत्वाद्यवभासहेतुभ्योऽज्ञानेभ्योऽविद्याशब्दवाच्येभ्यइति चेन्न । मायाविद्ययोः श्रुतिस्मृतिसूत्राभियुक्तवचनैरेकत्वस्य वृद्धैर्निरूपितत्वात् । अनिर्व्वचनीयत्वे सति तत्त्वावभासप्रतिबन्धविपर्य्ययावभासहेतुत्वस्य लक्षणस्य तुल्यत्वात् अविद्याभेदे च कल्पनागौरवदोषात् । एकाविद्यापक्षेऽप्यनन्तविक्षेपशक्तिकल्पनयजाग्रत्स्वप्नप्रबन्धमोक्षवासनाभुजङ्गादिव्यवहारव्यवस्थोपपत्तेः । नचात्रापि कल्पनागौरवं । समानं धर्म्मभेदकल्पनातोधर्म्मिभेदकल्पने लाघवादित्यास्तां विस्तरः । अतश्चिन्मात्रनिष्ठमज्ञानं न जीवब्रह्मविभागहेतुः ब्रह्मणो जगत्स्रष्टृत्वादेश्च हेतुरित्यङ्गीकर्त्तव्यं न च चिन्मात्रस्य प्रकाशत्वादज्ञानाश्रयत्वविरोधः जीवपक्षेऽपि तुल्यत्वात् अन्तःकरणपरिणामोपहितस्यैव चैतन्यस्याज्ञानविरोधित्वात् । नच ज्ञानवदज्ञानस्याप्येकाश्रयविषयत्वानुपपत्तिरावरकत्वेनावरकस्य तमोवत्तदुपपत्तेः तदुक्तमभियुक्तैः । आश्रयत्वविषयत्वभागिनो विश्वभागचितिरेव केवला । पूर्व्वसिद्धतमसोहि पश्चिमेनाश्रयो भवति नापि गोचरइति तस्मादेकमज्ञानं चिन्मात्राश्रयविषयमिति स्थितिः । जीवावस्थायामेवाहमज्ञइति स्फुटतरव्यवहारात्तदपेक्षया जीवगताज्ञानानामित्युक्तमिति अनयैव दिशा जीवाश्रया ब्रह्मपदा ह्यविद्यातत्त्वविन्मतेति प्राचां वचनं योजनीयं । ननु नानात्वेन प्रतिभासमानानां जीवानामेकाज्ञानोपाधिकत्वे एकस्य मुक्तौ सर्व्वमुक्तिप्रसङ्ग इति चेन्नायं दोषः । एकस्यैव जीवत्वादितरेषां तद्दृष्टिविजृम्भितत्वेन ततोऽनतिरेकात्तर्हि कोऽसौजीवोयद्दृष्टिविजृम्भितं जीवान्तरमिति चेत् यः पश्यति स एव । अहन्तु संसारिणमात्मानमन्यांश्च मद्विधान् जीवान् पश्यामीति चेत्तर्हि त्वमेव जीवस्त्वदविद्यया वयमन्येच जीवा बद्धा मुक्ताः सुखिनो दुःखिनइत्येवं विचित्राः कल्पितास्तव ब्रह्मसाक्षात्कारमविसम्वादिताः प्रतिभासन्ते स्वप्नइवाप्रबोधं । जाते तु ब्रह्मात्मसाक्षात्कारे सर्व्वमेव त्वद्दृष्टिविजृम्भितं त्वया सह मोक्ष्यते त्वत्सुषुप्ताविवेति । इयांस्तु पुनर्विशेषः सुषुप्तावस्त्यज्ञानं सर्व्वकार्य्यसंस्कारोपरञ्जितं पुनर्व्यवहारप्रवर्त्तकं मुक्तौ तु तस्य ज्ञानेन बाधितत्वात् पुनर्व्यवहाराभावः इत्यलं प्रसङ्गागतप्रपञ्चेन । वनवृक्षयोर्जलाशयजलयोर्व्वा सामान्यविशेषभावो नास्तीति यद्यपि दार्ष्टान्तिकेन वैषम्यं तथापि समुदायसमुदायिनोरेनेकत्वे दृष्टान्तदार्ष्टान्तिकयोः साम्यात् सर्व्वांशेन च साम्यस्याविवक्षितत्वाच्च कश्चिद्दोषइति गमयितव्यं । आज्ञानैकत्वव्यपदेशिनीं श्रुतिं पठति अजामेकामिति आदिपदात् मायान्तुप्रकृतिं विद्यात् तरत्यविद्यां विततां अक्षरात् परतः परः । तद्वेदं तर्ह्यव्याकृतं तम आसीत्तमसा गूढमित्याद्येकवचनान्तश्रुत्यन्तरग्रहः । एकमेवाज्ञानं समष्टिव्यष्टिभेदभिन्नं परिकल्प्य समष्ट्यज्ञानोपध्यानेनिबन्धनचैतन्यव्यवहारं वक्तुं समष्टिं विशिनष्टि ॥

They here became tiger, or lion, or hawk &c.; which would be absurd. Again if it be your doctrine that ignorance and individuated spirit being without beginning essentially, and thus the relation of subsistence and inherence between them being constant, there is no mutual inherence or logical see-saw; this we cannot allow, for then it would follow that there is no ignorance in the supreme. Nor can you accept the consequence, that there is no ignorance in God, for we hear in the Veda, in the texts, He desired, then himself made spirit &c., that the nature of one who desires and other products of ignorance resided in the supreme as the cause of the world. Nor can you argue that there is heard in this text an erroneous imputation to the object thereof, the supreme, of desire &c. the illusory product of ignorance residing in the individuated spirit, just as there may be falsely attributed to a conch-shell the yellowness which resides in the eye of the observer [when suffering from jaundice]; for were this the case, it would follow that individuated spirits only being the material cause of creation, sustentation, and retractation of the universe, the juxtaposition of universe with the supreme heard in texts such as All this is the supreme &c., would be invalidated; as also the promise of all cognition, by means of cognition of one, would be contravened [inasmuch as to know all we should have to know not only the supreme, but also individuated spirits]. If you reply that there being no difference between the supreme and the individuated spirit, all this may be reasonable, and therefore this is no objection; then we reply that you ought to lay aside your partisanship for individuated spirit, and confess, as has been heard in the Veda, that it is the absolute that is the creator, preserver, and destroyer of the world. For it has been shewn that unless the supreme be the subject of ignorance, then unconditioned spirit cannot be affected with desire; and if the supreme, as different from the individuated spirit, be conceived the subject of ignorance, then in this case also there will be a logical circle. If you object that the ignorance that renders it possible to the supreme to be the cause &c. of the world, designated by the term illusion, is other than the ignorances which are the causes of the phenomenal agency &c., residing in individuated spirits, which ignorances are designated by the term nescience; we disallow the objection, for illusion and nescience are described by the ancients as one, according to the revealed and scriptural texts, aphorisms, and competent authorities. Also, because, there being the same definition for both illusion and nescience, viz, inexplicability and cousation of apparent misconception, and of obstruction to manifestation of the truth, the supposition of a difference between illusion and nescience is unnecessary [as violating the law of parcimony.] Moreover, if we allow the unity of illusion and nescience, than, as we may conceive an endless power of illusory production, it is reasonable to suppose practical existence in waking, sleeping, bondage, liberation, illusory serpents &c. Nor is there in this supposition an equally complicated hypothesis [or equal violation of the law of parcimony], for it is simpler to assume a difference of accident than to assume a difference of subjects. Further prolixity may be dispensed with. It must be allowed, then, that ignorance resides only in pure intelligence, and that such ignorance is the cause of the separation between the supreme and the individuated spirit, and the cause also of the creation of the universe by the supreme. Nor can you object that there is a contradiction in pure intelligence being the subject of ignorance, since pure intelligence is self-luminant; for this objection is equally fatal to the view that individuated spirit is the subject of ignorance, for intelligence conditioned by a modification of the internal organ is repugnant to ignorance. Nor is it impossible that ignorance, like knowledge, should have one subject, and one object, for this is possible, as one envelopment may envelop all things, like darkness. Accordingly it has been said by good authority; It is ignorance alone that allows subsistence and inherence, and constitutes the universe, for [liberated soul] beyond the darkness already shewn to be, is neither substratum nor phænomenon. Thus it is shewn that one ignorance, and one only, has for its subject and object pure intelligence. There being a manifest practical assurance I am ignorant, only in the state of individuated spirit, it is with this view that the words ignorances residing in individuated spirits have been employed. In the same direction we may add the saying of the ancients The nescience maintained by those who know the truth inheres in individuated spirit and resides in the supreme. If it be urged that if one ignorance be the condition of many individuated souls appearing many, then it will follow that the liberation of one is the liberation of all; we reply that this is no objection, for there is one only that is individuated spirit, the others being only illusorily exposed to his view, do not differ therefrom. If again thou ask: Who is this individuated spirit, to whose view all other individuated spirits are illusorily exposed? we reply that it is he who sees: and if thou say I behold myself transmigrating and all other individuated spirits like myself, then thou alone art that soul; and it is by thy ignorance that we and others live, are in bondage, liberated, enjoy pleasure, and suffer pain, and are thus made in many modes, and appear as if actual beings, until thy intuition of the absolute, as

if in thy dream till thou awakenest. But when thou shalt have intuition of absolute spirit, then all that is illusorily projected by thy gaze, together with thee, shall be emancipated, as in thy dreamless sleep. There is, indeed, thus much difference [between dreamless sleep and re-absorption into the absolute,] that in dreamless sleep there abides ignorance tinged with the impress of all its products, again giving birth to practical existence [when we awake]; whereas in liberation, ignorance being sublated by knowledge, there is no further practical existence. Further prolixity thus introduced by the order of discussion, may be dispensed with. It is to be understood in this illustration that there is a disparity in the example, inasmuch as there is not any relation of universality and individuality between the forest and its trees, and the tank and its waters; yet this does not vitiate the argument, for the collective whole and its constituent parts being identical, there is an equivalence between the example and the thing exemplified, while a total equivalence is not desiderated. The author cites a Vedic text declaratory of the unity of ignorance *Unborn, one,&c.* Here the words *et cætera* include He should know illusion to be nature [or the material cause of all], He crosses beyond ignorance, Outspread beyond expression, farther than the farthest, This universe indeed was unevolved, Darkness was by darkness enveloped, and other texts relating to an object in the singular number. After thus conceiving one ignorance as divided as collective and distributive, the author proceeds to characterise the collectiveness, in order to explain the practical existence of pure intelligence caused by the conception of collective ignorance. *This* [*aggregation of ignorance*] &c. [*being the condition of its superior, has chiefly pure goodness in it.*] This aggregation is so styled in which pure goodness predominates, not overpowered by pure passion and darkness, because it is the condition of intelligence consisting of unobstructed cognition, such intelligence being superior, that is untinged by any other condition. The author points out a diversity in the names of intelligence conditioned by collective ignorance.

By this [*collective ignorance conditioned intellect being possessed of such qualities as omniscience, omnipotence, and superintendence over all, imperceptible, all-pervading, Maker of the world, is called the Lord*] &c. Intelligence, though in reality unconditioned, acquiring such attributes as omniscience &c., because through its connection with erroneously imputed ignorance, it manifests all, consists of existence which is the substratum of all limited objects, determines the actions of all individuated spirits, and obtains the titles of real, unreal, the phænomenal, superintendent over all, Lord, and so forth. Of this the reason is next assigned.

[*His omniscience may be inferred from the fact that he is the manifester*] of all [*collective ignorance.*] All ignorance means collective illusion. The word manifester is intended to suggest secondarily that he is the sustainer &c. It should be considered that collective ignorance is all that is, even in the unmanifested state inasmuch as ignorance contains the impressions of all illusory products, and because we accept the doctrine that effects pre-exist in their causes. The author quotes a Vedic text confirming the aforesaid appellations.

Who is omniscient, [*who knoweth all.*] &c. Who is omniscient is taken generally, who knoweth all is taken particularly. The words *et cætera* imply such other texts as, Existent indeed, fair sir, was this. This pier is the upholder, This spirit of thine pervades the inner parts undying, Beyond understanding unevolved, From whom indeed these creatures spring, He who is the highest he is the great Lord. Having thus stated the different titles of intelligence conditioned by illusion, the author proceeds to recount those of the condition together with their reasons

Of this [*ignorance his aggregation, since it is the cause of all, is his causal form.*] The word this means ignorance. The character of the conditioned is fulness of bliss; the character of ignorance or illusion is envelopment or obscuration. These two being inseparate, illusion, the cause of all, is styled the sheath of happiness. Since in ignorance ether and all things else subside, ignorance wherein all things subside, is in this nature dreamless sleep, and infinite slumber is universal dissolution. The gross world is called the universal frame or divine body, [Virát]; the subtile world is Hiranya-gar-

---

इयमिति। उत्कृष्टस्योपाध्यन्तरा ननु रक्ततयाऽप्रतिहतज्ञानात्मकस्य चैतन्यस्योपाधितया विशुद्धरजस्तमोभ्यामनभिभूतं सत्त्वप्रधानं यस्याः सा तथाऽभिधेयं समष्टिरित्यर्थः। समष्ट्यज्ञानोपहितचैतन्यस्य व्यपदेशभेदं दर्शयति॥

एतदिति। परमार्थतोऽसङ्गस्यापि चैतन्यस्याध्यासिकसम्बन्धाज्ञानद्वारा सर्व्वभासकत्वेन सर्व्वामर्य्यादाधारकसत्तारूपत्वेन सर्व्वजीवप्रवर्त्तकत्वेन च लब्धसर्व्वज्ञत्वादिगुणकस्य सदसद्व्यक्तमन्तर्य्यामीश्वरइत्यादि व्यपदेशो भवतीत्यर्थः। उक्तेऽर्थे हेतुमाह॥

सकलेति। सकलाज्ञानं समष्ट्यज्ञानं अवभासकत्वशब्दो विधारकत्वादेरप्युपलक्षणार्थः। सर्व्वविक्षेपसंस्कारवत्त्वादज्ञानस्य सत्कार्य्यवादाश्रयणाच्चाव्याकृताद्यवस्थास्वपि समष्ट्यज्ञानस्य सर्व्वत्वमिति द्रष्टव्यं। उक्तव्यपदेशिकां श्रुतिमाह॥

यः सर्व्वज्ञइति। सर्व्वज्ञः सामान्यतः सर्व्वविद्विशेषतइति भेदः। आदिशब्दात् सदेव सोम्येदं एष सेतुर्विधारण एष त आत्मान्तर्य्याम्यतो महतः परमव्यक्तं यतो वा इमानि यः परः स महेश्वरइत्यादिश्रुत्यन्तरसङ्ग्रहः। उपहितस्य व्यपदेशभेदमुक्त्वोपाधेरपि तं सहेतुकमाह॥

bha, God who sprang from the golden egg. Having thus described collective ignorance together with its manifestations and its appellations, the author proceeds similarly to describe distributive illusion.

As a wood [when regarded distributively takes the plural denomination trees, or as a body of water when regarded distributively, takes that of waters, so ignorance when regarded distributively takes the plural name thereof, i. e. of ignorances in the plural.] He next explains the attribution of plurality of names to ignorance.

Indra [by his illusory powers appears manifold] &c. It appears from the context that Indra means God. The meaning of the text is that God by his illusions, by his powers of illusory production, when reflected in bodies, sense-organs, and internal organs, which are illusory products, appears, or is manifested, as manifold, and clothed in many forms. The words *et cœtera* refer to such other texts as, One enchanter rules by his illusions. The author states the occasion for applying to ignorance, which is one, the terms collective and distributive.

Here &c. Here means in regard to ignorance. Its appellation as distributive is given by reason of its pervasion of separate products, that is, by reason of its apparent pervasion of individuated spirits, its condition of effects. Its appellation as collective is given by reason of its pervasion of the collective cause, or its entire undivided pervasion without difference in the omniscient, the causal condition.

[This distributed aspect of ignorance, being the condition of its inferior, has chiefly impure goodness in it.] Being the condition of its inferior, means being the concomitant of its inferior, the individuated spirit, which possesses the cause of obstruction to knowledge [or the individual soul characterised by illusion.] This distributive ignorance has for its predominant element impure goodness, that is, goodness overpowered by passion and darkness, inasmuch as passion and darkness by themselves would be unable to apprehend the reflection of objects. *[Intelligence conditioned by this, characterised by want of knowledge and of dominion, is called very defective intelligence.]* Conditioned by this means conditioned by distributive ignorance. *[Its deficiency of intelligence results from its manifesting only single ignorances,]* From its manifesting only single ignorances means because it illuminates only a part of ignorance. The author states the reason why intelligence conditioned by distributive ignorance should be designated by the term very defective intelligence.

To this &c.—To this individuated spirit, its condition [or concomitant] being obscure, since it has for its condition distributive ignorance, in which the principal element goodness is overpowered by passion and darkness, and since it therefore is not much illuminant, the designation very defective intelligence is given. The almost void of knowledge is called very defective intelligence. Having thus stated the appellation of intelligence conditioned by ignorance, the author proceeds as in the previous instance to state the appellation of its concomitant or condition.

Of this [individuated spirit] likewise, &c. The word likewise alludes to the similar case of the condition of the Lord. *[Since it is the cause of egoism &c., there is a causal form or body.]* That is, because it is the cause of egoism &c., existing as a residuum of impressions in the state of dreamless sleep and other absolute states. *[Since indeed there is in it a plenitude of happiness, it is also called the sheath of happiness.]* In the words since indeed there is in it a plenitude of happiness, the word indeed, is intended to imply secondarily another cause, because it envelops the spirit like a sheath. Or by a different construction indeed may mean by reason only of there being a plenitude of happiness. In the latter case the words Because it envelopes like a sheath are to be supplied. *[Since everything subsides in it, it is identical with dreamless sleep.]* The word everything includes dreaming and waking. The meaning of the rest is obvious. The identity of the very defective intelligence and God, is inferred from the declaration of the coincidence of the very defective intelligence and God in dreamless sleep, in such texts of the Veda as Then (at the time of dreamless sleep) he becomes as if endowed with substantial being, fair sir. Having established the identity of those the Lord and the individual soul, because of their undifferenced dreamless sleep, the author proceeds to describe their experience when in this state.

At that time [during dreamless sleep these two the Lord and the deficient intelligence, enjoy bliss by means of very subtile modifications of ignorance, these modifications being illuminated by intelligence.] Because in those two in that state distributive ignorance appropriated to individuated spirit exists in some manner.

अस्येयमिति । अज्ञानमिदं शब्दार्थः आनन्दप्रचुरत्वमुपहितधर्म्मः आच्छादकत्वमज्ञानधर्म्मः तदुभयाविवेकात् कारणमज्ञानमानन्दमयकोशशब्दार्थः । सर्व्वे आकाशादयः उपरमन्तेऽस्मिन्निति सर्व्वोपरमोऽज्ञानं । तादृग्भावात् सुषुप्तिः महासुषुप्तिः प्रलयइति यावत् यतः सर्व्वोपरमत्वमतएवेतियोजना स्थूलप्रपञ्चो विराट् सूक्ष्मप्रपञ्चोहिरण्यगर्भः एवं समष्ट्यज्ञानं साभासं सव्यपदेशं निरूप्य व्यष्ट्यज्ञानमपि सदृष्टान्तं तथा निरूपयति ॥

यथा वनस्येत्यादिना । क्वैवमनेकत्वव्यपदेशोऽज्ञानस्येति तदाह ॥

In the words *these two &c.* the dual number is employed, because were spirits altogether one, it would be impossible to wake from dreamless sleep. They experience bliss, the joy which is their essence. In the term bliss there is a subaudition of ignorance and of soul that is conscious of it. Since were it understood that at that time there is fruition of bliss by intelligence the essence of undivided spirit, this essence being eternal, there could in the subsequent state [of waking &c.] be no resuscitative reflection, because no impression could be derived from such essence; the author devises a particular condition favourable to the formation of the impression.

By means of modifications of ignorance, &c. As it might be objected that the internal organ &c. itself is an effect of illusion and therefore identical with ignorance, the word ignorance ought not to designate the internal organ, the author adds a qualification or determination to these modifications.

Very subtile &c. Excessive subtility is difficulty to be recognised. The author proceeds to answer by anticipation the question: These modifications being unconscious, how can bliss be experienced by their means?

[*Illuminated by*] *intelligence &c.* This means pervaded by consciousness. Thus it is shown that in the subsequent state [of waking &c.]. recollection produced by the impression retained is possible, because after the cessation of the modification there is a cessation of the intelligence characterised by the modification. The author assigns a proof to this effect.

Enjoying bliss, &c. [*According to the Vedic text, The defective intelligence enjoys bliss, when intelligence prevails.*] When intelligence prevails, means when the modification of illusion illuminated by intelligence predominates. The words *et cætera* indicate such other texts as In dreamless sleep, in universal dissolution, overpowered by darkness, spirit assumes the form of pleasure. To this effect the author cites also the testimony of experience.

[*Otherwise there would be no such reminiscence as that of one risen from sleep who says I slept*] *pleasantly,* [*I knew nothing.*] Nor has this reminiscence of pleasure absence of pain for its object, because this absence of pain is not then experienced, and because we can discover no apparatus for such experience. This has been discussed in detail by older writers, and we therefore quit this section of the compendium. The author elucidates the fact already nearly established in the description of the aforesaid conditions and of the two [God and the individual soul] conditioned, by the words *Of these two* [*viz. ignorance viewed collectively and ignorance viewed distributively there is no difference.*] He cites a Vedic text in confirmation of the doctrine that there is no difference between God and the defective intelligence.

This, the Lord of all &c. [*This individuated spirit is none other than the universal Lord.*] The words *et cætera* indicate such other texts as, This illumination which rising from this body on attaining to absolute luminousness, is regained by its own form. Anticipating the question: The intelligence essential to deficient intelligence and the Lord being conditioned, and it following that unconditioned or intelligence is other than thiswhat is it? the author proceeds to specify its nature and its name.

इन्द्रइति । इन्द्रः परमेश्वरः प्रकरणात् स मायाभिर्मायाविक्षेपशक्तिभिर्विक्षिप्तेषु देहेन्द्रियान्तःकरणेषु प्रतिबिम्बितः पुरुरूपो बहुरूपः सन्नीयते प्रकाशतइति श्रुत्यर्थः आदिशब्दाच्च एको जालवानीशतइशनीभिरित्यादिश्रुत्यन्तरग्रहः । एकस्मिन्नज्ञाने व्यष्टिसमष्टिशब्दप्रयोगे निमित्तमाह ॥

अत्रेति । अज्ञानं सप्तम्यन्तार्थः । व्यस्तव्यापित्वेन कार्य्योपाधिजीवव्यापित्वावभासेन व्यष्टिताव्यपदेशः समस्तव्यापित्वेन कारणोपाधिसर्व्वज्ञाविभक्तसर्व्वव्यापित्वेन समष्टिताव्यपदेशइत्यर्थः निकृष्टोपाधितयेति ज्ञानप्रतिबन्धकारणवान् जीवो निकृष्टस्तस्योपाधितयेत्यर्थः मलिनं रजस्तमोभ्यामभिभूतं सत्त्वं प्रधानं यस्याः सा तथा । रजस्तमसोः स्वातन्त्र्येण प्रतिबिम्बोद्ग्राहकत्वायोगादिति भावः । एतदुपहितं व्यष्ट्यज्ञानोपहितं । एकाज्ञानावभासकत्वादज्ञानैकदेशावभासकत्वादिति यावत् । व्यष्ट्यज्ञानोपहितस्य प्राज्ञशब्दवाच्यत्वे कारणमाह ॥

अस्येति । अस्य जीवस्यास्पष्टोपाधितया रजस्तमोभ्यामभिभूतसत्वप्रधानव्यष्ट्यज्ञानोपाधिकत्वेन हेतुनातिप्रकाशकत्वाभावात् प्राज्ञशब्दवाच्यत्वमित्यर्थः प्रायेणाज्ञः प्राज्ञः इत्युक्तं भवति । पूर्व्ववदुपहितस्य व्यपदेशमुक्त्वा उपाधेरप्याह ॥

अस्यापीति । अपिशब्दईश्वरोपाधिदृष्टान्तार्थः । अहङ्कारादेः सुषुप्त्याद्यवस्थायां संस्कारावशेषेण स्थितस्य कारणत्वादित्यर्थ, आनन्दप्रचुरत्वादेवेत्येवकारः कोशवदाच्छादकत्वादिति हेत्वन्तरसमुच्चयार्थः यद्वा आनन्दप्रचुरत्वाद्धेतोरेवेति भिन्नक्रमः । तस्मिन पक्षे कोशवदाच्छादकत्वादित्यनुषञ्जनीयं । सर्व्वशब्दो जाग्रत्स्वप्नविषयः शेषमति रोहितार्थं । सता सोम्यतदा सम्पन्नो भवति इत्यादिश्रुतेः सुषुप्तौ प्राज्ञस्येश्वरसम्पत्त्यवगमात् प्राज्ञेश्वरयोरैकत्वं । तदवस्थयोरपि अव्याकृतसुषुप्तेरैकत्वं सिद्धवत्कृत्यानयोस्तदवस्थापन्नं भोगं दर्शयति ॥

तदानीमिति । तयोरप्यवस्थयोर्जीवावच्छेदकस्य व्यष्ट्यज्ञानस्य केनापि रूपेण स्थितत्वादेतावित्यादिद्विवचनोपादानं सर्व्वात्मनैक्ये पुनरुत्थानानुपपत्तेः । आनन्दं स्वरूपानन्दमनुभवतः आनन्दशब्दोऽज्ञानतत्साक्षिणोरप्युपलक्षणपरः । तदानीमखण्डात्मस्वरूपचैतन्येनैवानन्दाद्यनुभवेऽभ्युपगम्यमाने स्वरूपस्य नित्यत्वात्तज्जन्यसंस्काराभावेनावस्थान्तरे स्मरणरूपपरामर्शानुपपत्तेस्तदनुकूलमुपाधिविशेषं कल्पयति ॥

अज्ञानवृत्तिभिरिति । अन्तःकरणादेरप्यज्ञानकार्य्यत्वेन तदात्मकत्वात्तदभिप्रायोऽज्ञानशब्दो माभूदिति विशिनष्टि ॥

अतिसूक्ष्माभिरिति । दुर्लक्ष्यत्वमतिसूक्ष्मत्वं । तासां वृत्तीनां जडत्वात् कथं ताभिरानन्दाद्यनुभव इत्यत आह ॥

चैतन्येति । चैतन्यव्याप्ताभिरित्यर्थः । तथाच वृत्तिविनाशात्तद्विशिष्टचैतन्यस्यापि विनाशात् संस्कारजन्यं स्मरणमवस्थान्तरे सम्भवतीति भावः । तत्र प्रमाणमाह ॥

आनन्दभुगिति । चेतोमुखश्चैतन्यदीप्ताज्ञानवृत्तिप्रधानः । आदिशब्दात् सुषुप्तिकाले विलीने तमोभिभूतः सुखरूपमेतीत्यादिश्रुत्यन्तरग्रहः । तत्रैवानुभवमपि प्रमाणयति ॥

As there is for the forest [and its trees and for the ether occupied by these, and for the tank and its waters and for the ether reflected therein, an unconditioned space as their substratum, so for the two ignorances and for the two intelligences associated therewith there is an unconditioned intelligence as their substratum. This is called the Fourth.] There is a space which is a substratum, and which is unconditioned; and absolute intelligence is like this. It is to be understood that, though space or ether is not the substratum of the forest or of the tank, as it is not their material cause, yet as these could not exist without space, therefore space is designated as their site or substratum. It is to be understood that this unconditioned intelligence is fourth in relation to the universes to be described in the sequel. For this the author cites testimony.

[They regard it as] blessed tranquil, without duality, the fourth &c. The words *et cætera* indicate such other Vedic texts as: I am the witness, pure intelligence, ever blessed, different from that which is to be experienced in the three worlds, from the experiencer, and from the experience. Lest the meaning of this section should be forgotten through erroneous imputation, and through mental distraction, the author commences a collateral section.

This and this alone is the fourth &c. The author having thus described ignorance togther with self-conscious soul in its particular states, together with its divisions and its details, and intending next to describe the effects in order after their material cause or substratum, first describes, as subservient to the description of effects, the power which resides in ignorance or illusion.

सुखमिति। नचायं सुखपरामर्शो दुःखाभावविषयस्तस्य तत्राननुभूतत्वात्। तदनुभवसामग्र्याश्च निरूपयितुमशक्यत्वात् विस्तृतञ्चैतद्‌वृद्धैरित्युपरम्यते संग्रहाधिकारात् उक्तोपाध्योस्तदुपहितयोश्च प्राक् सिद्धवत्कृतमेवेदं विशदयत्यनयोरिति प्राज्ञेश्वरयोरभेदे श्रुतिं प्रमाणयति ॥

एष सर्व्वेश्वरइति। आदिपदादथ य एष संप्रसादोऽस्मात् शरीरात् समुत्थाय परं ज्योतीरूपं सम्पद्य स्वेन रूपेणाभिनिष्पद्यतइत्यादि श्रुत्यन्तरसंग्रहः। प्राज्ञेश्वरात्मकस्य चैतन्यस्योपहितत्वेऽनुपहितं चैतन्यमन्यदेवेत्यर्थादु किं तदित्यपेक्षायां तत्स्वरूपसंज्ञे दर्शयति ॥

वनेति। आधारश्चासावनुपहितश्चासावाकाशश्चेति स तथा तद्वदिति यावत्। यद्यप्याकाशस्य वनाश्रयत्वं जलाशयाश्रयत्वं वा नास्ति तदनारम्भकत्वात्तथाप्यवकाशमन्तरेण तयोः स्थित्यनुपपत्तेः तदाधारत्ववचनमिति द्रष्टव्यं। अस्य चैतन्यस्य तुरीयत्वं वक्ष्यमाणविश्वाद्यपेक्षयेति दृष्टव्यं तत्र प्रमाणमाह ॥

शिवमिति। आदिपदात् त्रिषु धामसु यद्भोग्यं भोक्ता भोगश्च यद्भवेत्। तेभ्यो विलक्षणः साक्षी चिन्मात्रोऽहं सदाशिव इत्यादिश्रुत्यन्तरग्रहः। अध्यारोपेण व्यासक्तचित्ततया प्रकरणार्थविस्मरणं माभूदिति प्रसङ्गान्तरमाह ॥

इदमेवेति। एवमवस्थाभिमानिसहितमज्ञानं सविभागंसप्रपञ्चं निरूप्य इदानीं तत्कार्य्यमाधारोपक्रमेणनिरूपयिष्यंस्तदुपयोगित्वेनाज्ञानगतं सामर्थ्यं तावन्निरूपयति ॥

Of this ignorance [there are two powers, enveloping and projection.] Of these the author describes the power of envelopment together with its examples.

As for the enveloping power [as even a small cloud by obstructing the path of the spectator's eye, hides the disc of the sun which is many leagues in extent, such also is the power of ignorance which though limited by covering the understanding of the observer, hides as it were spirit which is unlimited, and non-transmigratory.] Though ignorance, as not explicable as bodied or unembodied, is not limited, there is here intended merely a limitation as compared with that which is thereby to be limited. There is therefore no incongruity between the example and the thing exemplified. In the words by *covering the understanding*, by the term understanding the intelligence tinged by it is designated, inasmuch as understanding being an effect of ignorance cannot be enveloped by ignorance. The author cities Hastámalaka's approval of the view thus enunciated.

A. E. G. and G. D.

अस्याज्ञानस्येति। तत्रावरणशक्तिं सदृष्टान्तामुपपादयति ॥

आवरणेति। यद्यप्यज्ञानस्य मूर्त्तत्वामूर्त्तत्वाभ्यामनिर्व्वाच्यत्वान्न परिच्छिन्नत्वं तथापि परिच्छेद्यापेक्षया अल्पत्वमात्रं विवक्षितमिति दृष्टान्तदार्ष्टान्तिकयोरवैषम्यं। बुद्धिपिधायकतयेत्यत्र बुद्धिशब्देन तदनुरक्तचैतन्यं लक्ष्यते बुद्धेरज्ञानकार्य्यत्वेन तदावृतत्वानुपपत्तेः। निरूपितेऽर्थे हस्तामलकाचार्य्यसम्मतिमाह ॥

PRESS ADVERTISEMENT.

THE BALARAMAYANA, a Drama by RÁJAŚEKHARA, edited by PANDIT GOVINDA DEVA ŚÁSTRI, late Professor. of Hindu Astronomy in the Sanskrit College, Benares Rs. 2.

THE PRASANNARAGHAVA, a Drama by Jayadeva, edited by PANDIT GOVINDA DEVA ŚÁSTRI. Rs. 1-4

LAGHU KAUMUDI VYAKARAN, in Sanskrit (only); the text taken from Dr. Ballantyne's Edition. Re. 1-2.

BODH CHATUSPATH CHANDRIKA, a Hindí and Sanskrit Primer. Annas 3.

In the Press, and will shortly be published, The VAISESHIKA APHORISMS OF KANADA, reprinted from the "Pandit" with corrections and emendations, by A. E. GOUGH, B. A. Anglo-Sanskrit Professor, Benares.

PRINTED AND PUBLISHED BY THE PROPRIETORS, E. J. LAZARUS AND CO. AT THE MEDICAL HALL PRESS, BENARES.

काशीविद्यासुधानिधिः

श्रीगणेशाय नमः

श्रीमद्विजयिनीदेवीपाठशालोदयोदितः । प्राच्यप्रतीच्यवाक्पूर्वापरपक्षद्वयान्वितः ॥ १ ॥
अङ्करश्मिः स्फुटयतु काशीविद्यासुधानिधिः । प्राचीनार्यजनप्रज्ञाविलासकुमुदोत्करान् ॥ २ ॥

THE PANDIT.

A Monthly Journal, of the Benares College, devoted to Sanskrit Literature.

No. 78. Benares, November 1st, 1872. Vol. VII.

॥ चिन्तामणेः शब्दखण्डम् ॥

(१) श्येनेनाभिचरन् यजेतेत्यत्र कथं विधिप्रवृत्तिः, हिंसाया बलवदनिष्टसाधनत्वादिति चेत् । तत्र कृतिसाध्यत्वे सतीष्टसाधनत्वमेव योग्यतयान्वेति, न तु बलवदनिष्टाननुबन्धित्वमपि । (२) अयोग्यत्वात् । निन्दार्थवादेन प्रायश्चित्तोपदेशेन च हिंसाया बलवदनिष्टसाधन-

॥ शब्दचिन्तामणिव्याख्या रुचिदत्तीया ॥

मीमांसकः शङ्कते । (१) श्येनेनेति । अभिचारस्य हिंसात्वेन न हिंस्यात्सर्वा भूतानीत्यनेन निषिद्धत्वादित्यर्थः । न चाग्नीषोमीयपशुहिंसावदियमप्यनिषिद्धा, शब्दबोधितत्वादिति वाच्यम् । न हिंस्यादित्यस्य रागप्राप्तहिंसानिषेधपरत्वात् । श्येनहिंसायाश्च रागप्राप्तत्वात्, अग्नीषोमीयपश्वालम्भनस्य च क्रत्वर्थत्वेन वैधत्वादित्याहुः ॥ (२) अयोग्यत्वादिति । पदार्थः पदार्थेनान्वेतीति व्युत्पत्तेः कथं तदेकदेशेनेष्टसाधनत्वमात्रेणान्वय इति चेन्न । गौरनित्य इत्यत्र विशेषणानन्वयेपि विशेष्यमात्रेणान्वयस्य दर्शनात् । विशेष्यस्यायोग्यत्वे विशेषणस्य विशेष्यान्विततया निराकाङ्क्षत्वादपरपदार्थे नान्वयो भवति । यथा गौर्नित्य इत्यादौ । अतस्तत्र स्वतन्त्रोपस्थितये लक्षणा । निराकाङ्क्षत्वमूलकमेव पदार्थः पदार्थेनान्वेतीत्यपि । नन्विष्टसाधनत्वं विशेष्यं तदननुबन्धित्वं विशेषणमित्यत्रैव किं विनिगमकं, वैपरीत्यस्यापि सुवचत्वात् । अत एव विशेष्यवतीति पूर्वग्रन्थोप्यसंगत इति चेत् । न । दृष्टीच्छायामिष्टसाधनत्वप्रकारकज्ञानस्य हेतुत्वकल्पनात् तद्विशेष्यकएव विशिष्टे लिङ्शक्तेः । नन्वेतत्कृतिसाध्यत्वेपि तुल्यं, चिकीर्षानिर्वाहार्थं कृतिसाध्यत्वप्रकारकज्ञानमात्रस्य हेतुत्वकल्पनात् । न चाख्यातत्वेन कृतौ शक्तेस्तत एव संसर्गमर्यादया कृतिसाध्यत्वलाभान्न पृथक्शक्तिकल्पनमिति वाच्यम् । एवं सति कृतिसाध्यत्वस्य ज्ञानाप्रकारतया चिकीर्षायास्तत्प्रकारकत्वानुपपत्तेः । किं च तथा सति लडादिवद् विषयत्वेन कृतौ धात्वर्थान्वयः स्याद् न साध्यत्वेनेति पृथग् व्युत्पत्तौ पृथक्शक्तेरावश्यकत्वाच्चेति कृतिसाध्यत्वादिषु प्रत्येकं शक्तित्रयमेव युक्तं, तृतीयायाः करणैकत्ववदिति चेत्, अत्र वदन्ति । कृतिसाध्यत्वे उक्तबीजसंभवेन पृथक् शक्तावपि तदननुबन्धित्वविशिष्टेष्टसाधनत्वे लाघवादेकैव शक्तिरिति, तच्चिन्त्यम् । तदननुबन्धित्वविशिष्टकृतिसाध्यत्वएवैका शक्तिरिष्टसाधनत्वमात्रे चापरेति विनिगन्तुमशक्यत्वात् । तथा च शक्तित्रयमेव । अपि चेष्टसाधनत्वे तदननुबन्धित्ववैशिष्ट्यं सामानाधिकरण्यरूपमेव वाच्यम् । अन्यस्याभावात् । एवं च धर्म्यन्तरे तदनुबन्धित्वसमानाधिकरणस्येष्टसाधनत्वस्य वैशिष्ट्यं यत्र सविषान्नभोजनादौ बाधावतारकाले ऽवगतं तत्रापि प्रवृत्तिप्रसङ्गः । न च तदिष्टसाधनत्वं भिन्नमेवेति वाच्यम् । अनुगतस्यैव तस्य शक्यत्वात् । तस्मात्प्रवृत्तिविषयविशेष्यकं त्रितयप्रकारकं ज्ञानं मृग्यते तच्च शक्तित्रयेणैव निर्वहति । एतेन विशिष्टशक्तादपि लिङ्पदाल्लक्षणया स्वातन्त्र्येण तदुपस्थितिरिति न पदार्थैकदेशान्वयः । न च विभक्तौ न लक्षणा । सुब्विभक्तौ तदभावेपि तिङ्विभक्तौ तदभ्युपगमात् । अत एव रथो गच्छतीत्यत्र व्यापारलक्षणेति निरस्तम् ।

त्वावगमात् । अत एव विहितेऽपि श्येने विगानान्न तात्वि-कप्रवृत्तिः । (३) रागद्वेषयोरुत्कटत्वेनानिष्टानुबन्ध्यंशस्य तिरस्कारात्कस्य चित्प्रवृत्तिरित्येके । (४) अन्ये त्वभि-चारस्य वैरिवधफलत्वेन श्रुतत्वाद्वधसाधनत्वेन श्येनो विधीयते न तु वधसाध्यनरकसाधनत्वेन, नरकस्य फ-लत्वेनाश्रुतेः । न च जनकजनकस्य जनकत्वनियमः, कुम्भकारपितृपरम्परायाः कुम्भजनकत्वापत्तेः, विधिनैव श्येनस्य बलवदनिष्टाननुबन्धित्वबोधनाच्च । न च श्येनस्य नरकाहेतुत्वे ऽपेक्षितवैरिवधहेतुत्वे चाविगानेन प्रवृत्तिः स्यादिति वाच्यम् । श्येनाद्वधो वधाच्चावश्यं नरक इति प्रतिसंधानेन विगानात् । ननु श्येनो मरणफलकव्यापार-त्वेन हिंसा, (५) सा च नरकजनिकेति चेत् । न । नहि साक्षात्परम्परासाधारणमरणफलकव्यापारो हिंसा, कू-पादौ विनष्टे गवि तत्कर्तुः गोवधकर्तृत्वापत्तेः । वध्य-स्यापि हन्तुर्मन्यूत्पादनद्वारेणात्महन्तृत्वप्रसङ्गाच्च । नह्यनु-त्पादितमन्युः कश्चित्कमपि व्यापादयति । किं (६) त्व-नुनिष्पादिमरणफलको व्यापारो हिंसा, स च यदनन्तरं मरणं भवत्येव । न च श्येनस्तथा, किं तु खड्गहनना-दिकमेव । अथ मरणानुकूलो व्यापारो मरणोद्देशेनानुष्ठी-यमानो हिंसा, श्येनश्च, तथा, कूपादौ च न मरणोद्देशे-नानुष्ठीयमानत्वमिति चेत् । न । एवं सति (७) गौर-वात् । (८) मरणानुद्देशेन क्षिप्तनाराचाद्धतब्राह्मणे च हिंसा न स्यात् । (९) किं च हिनस्तिधात्वर्थावच्छेदकं फलमव्यवहितमेव मरणम् । अव्यवहितफलकव्यापार-स्यैव हि.वंच धातुवाच्यत्वात् । अन्यथा परम्परया विक्लि-त्तिफलकान्नकामेष्टुतण्डुलक्रयादावपि पचतीतिप्रसङ्गात् । (१०) एवं खड्गघातानन्तरं यत्र विलम्बेन मरणं व्रणपा-कपरम्परया वा, ऽन्ने विषप्रयोगेण वा तत्र हन्तृत्वं प्राय-श्चित्तादि च न स्याद् इति चेत् । न । प्रायश्चित्ततुल्य-त्वार्थं हि तत्र हन्तृव्यपदेशो गौणः । विनिगमकं च ला-

---

विनिगमनाविरहादिना विशिष्टस्याशक्यत्वात् । एवं च सप्र-माणकं नानार्थत्वगौरवं न दोषाय । किं च विशिष्टशक्यत्वे सामानाधिकरण्यरूपं वैशिष्ट्यमपि शक्यम् । शक्तित्रये तु त-त्संसर्गमर्यादयैव भासतइति विपरीतमपि गौरवमिति संक्षेपः ॥

वयं तु ब्रूमः । तदननुबन्धित्वं बलवद्द्वेषविषयदुःखाज-नकत्वमेव वाच्यम् । अन्यस्य निर्वक्तुमशक्यत्वात् । एवं च यस्य श्येनजन्यदुःखे तादृशो न द्वेषस्तं प्रति तदन्वययोग्यत्वमन्यं प्रति नेति वेदार्थनिष्ठा न स्यात्, तथा च तज्ज्ञानस्य प्रवर्त्तक-त्वेपि पूर्वोक्तयुक्त्या तत्र शक्यमतो नात्रविधिप्रवृत्त्यनुपपत्तिः । न च वैरिवधकामनाया अधिकारिविशेषणत्वात्तत्कामस्य, तद्दुःखं न तादृशद्वेषविषय इति तत्सर्वत्र योग्यमेवेति वाच्यम् । त-त्कामस्यापि तात्त्विकस्य तद्द्वेषोत्कट्यात्, नहि तात्त्विको न प्रवर्ततइति तस्य वैरिवधेपि नास्तीति । नन्विदमिष्टसाधन-त्वेपि तुल्यं, स्वर्गेपि सर्वस्येच्छाविरहादिति चेत्, न । स्वर्ग-कामनायास्तत्राधिकारिविशेषणत्वेन तत्कामं प्रति तस्य सर्व-त्रान्वययोग्यत्वात् । एवं कृतिसाध्यत्वेपि स्वरूपयोग्यतायाः सर्वत्र सत्त्वादिति दिक् । (३) रागेति । शत्रुवधे रागौत्कट्यं, शत्रौ द्वेषौत्कट्यं, स्वकार्यनिवृत्त्यक्षमत्वं तिरस्कारस्तदा त-ज्जन्यनरके बलवद्द्वेषाभावात्प्रवृत्तिरिति भावः । (४) अन्ये त्विति । अत्रेदमनभिमतिबीजं, यदि श्येनाद्वधो वधाच्च नरक इति बलवदनिष्टप्रयोजकत्वज्ञानान्निवृत्तिस्तदा बलवद-निष्टाप्रयोजकज्ञानमेव प्रवर्त्तकं वाच्यमन्यथा तत्रापि प्रवृत्त्या-पत्तिरेवं च तत्रैव लिङादिशक्तिरिति तदन्वयायोग्यमेवेति । (५) सा चेति । तथा च बलवदनिष्टाजनकत्वमन्वयायोग्य-मेवेति भावः । आपाततो महार्णवलक्षणमाह । (६) अनु-निष्पादीति । अनुनिष्पादि स्वाव्यवहितोत्तरवर्त्ति मरणं फलं यस्येत्यर्थः । न चैवं फलपदं व्यर्थम् । मरणाजनके तद-व्यवहितपूर्ववर्त्तिन्यतिव्याप्तिवारकत्वात् । यत्किंचित्संबन्धेन मरणस्य तदीयत्वात् । फलपददाने च जन्यजनकभावसंबन्धेन तदीयत्वलाभान्नोक्तदोषः । नन्वेवं खड्गघातेऽपि हिंसा न स्यात् । तस्याप्यव्यवहितमरणफलकत्वाभावादिति चेन्न । म-रणफलकइत्यत्र तादृशं मरणं फलं यस्य तादृशो व्यापारो यस्ये-ति मध्यमपदलोपिसमासाश्रयणादित्येके ॥ अन्ये तु मरणं प्राणश-रीरविभागरूपं फलं यस्य स मरणफलकः प्राणपरिस्पन्द एव सोऽनुनिष्पादी यस्य स बहुप्राणसंयोगस्तथेत्याहुः ॥ अपरे तु स्वाङ्गमव्यवधायकमिति न्यायेन व्यापारस्याव्यवधायकत्वा-न्नोक्तदोष इत्याहुः । (७) गौरवादिति । यद्यपि तत्रानुनिष्पा-दित्वं विशेषणमत्र तदुद्देशेनानुष्ठीयमानत्वमिति न गौरवं, तथापि व्रणपाकपरम्परामृते न हन्तृत्वमिति तद्वारणायानुनिष्पा-दित्वमत्रापि विशेषणमवश्यं वाच्यमिति स्वाभ्युपगमावष्टम्भेन मरणोद्देशांशे प्रवेशाद्गौरवमुक्तम् । यदि च तत्रापि हन्तृत्वमेवेति नात्र तद्विशेषणं तदा दोषान्तरमाह । (८) मरणेति । इष्टा-पत्तिमाशङ्क्याह । (९) किं चेति । शङ्कते । (१०) एवमिति । ननूक्तरीत्या न लाघवं तथा च विनिगमकाभावादन्योद्देश-क्षिप्तनाराचहतब्राह्मणएव हन्तृत्वव्यपदेशो गौणोऽस्तु । व्रण-पाकपरम्परामृते च हन्तृत्वं मुख्यमेव, तथा चाव्याप्तिः, गल-

घवमेव । (११) वस्तुतस्तु मरणोद्देशेन कृतो ऽदृष्टाद्वारक-
स्तदनुकूलो व्यापारो हिंसा, श्येनश्चादृष्टद्वारा मरणसाध-
नमतो न हिंसा । (१२) यदि चादृष्टद्वारापि मरणसा-
धनं हिंसा स्यात् तर्हि सप्तमीतैलाभ्यङ्गस्यादृष्टद्वारा इष्ट-
भार्यामरणसाधनत्वादभ्यङ्गकर्तुर्हिंसकत्वापत्तिः । (१३)
अत एव कूपादौ गोमरणेऽपि न गोवधकर्तृत्वं तत्कर्तुः, गलल-
ग्नान्नमरणे न भोक्तुर्न वा परिवेषयितुरात्महन्तृत्वं ब्रह्म-
हन्तृत्वं वा, व्रणपाकपरम्परया विलम्बेन विषप्रयोगेण च
हन्तृत्वं मुख्यमेव, न त्वनुनिष्पादिमरणफलकत्वं, गलल-
ग्नान्नमरणे स्वहन्तृत्वापत्तेः । अन्योद्देशेन क्षिप्तनाराचेन
हतब्राह्मणे ब्रह्महन्तृत्वं न स्यादिति चेत् । न । इष्टा-
पत्तेः । व्यपदेशस्तु गौणः । (१४) प्रयोगो लक्षणयापि
समर्थयितुं शक्यते । (१५) त्वत्पक्षे (१६) ऽतिप्रसङ्गो
वारयितुं न शक्यतइति इदमेव विनिगमकम् । अत ए-
वातदुद्देशेन कृतेऽपि निषिद्धे प्रायश्चित्तार्द्धमुक्तम् । अपरे
त्व(१७)नभिसंहितनरान्तरव्यापारमद्वारीकृत्य मरणसा-
धनं हिंसा, खड्गकारव्यापारस्यानभिसंहितनरान्तरव्यापार-
द्वारा मरणसाधनत्वं तस्य हि नरान्तरव्यापारो नाभिसं-
हितः किं तु धनलाभ इति खड्गकारो न घातकः । विषस्यान्न-
प्रक्षेपेण नरान्तरव्यापारो भोजनमेवाभिसंहितः । अनेनेदं
भोक्तव्यमित्यभिसंधाय विषप्रयोगादिति हिंसैव विषप्रयोग
इति । तन्न । गललग्नान्नकवलाद्यत्र मरणं तत्र परिवेष-
यितुर्घातकत्वापातात् । अनेनेदं भोक्तव्यमित्यभिसंधाय
परिवेषणाद् । (१८) भोक्तुरात्महन्तृत्वापत्तेश्च । अनभि-

लग्नान्नमरणे ऽतिव्याप्तिश्चेत्यपरितोषादाह । (११) वस्तुत-
स्त्विति । तन्मरणोद्देशेनेति वाच्यम् । तेन विहगमरणोद्देश-
क्षिप्तनाराचहतब्राह्मणेऽपि न ब्राह्मणवधः । न चैवमन्यब्राह्म-
णोद्देशक्षिप्तनाराचे तदन्यब्राह्मणे हतेऽपि ब्राह्मणवधो न
स्यात् । तन्मरणस्य तत्रानुद्देश्यत्वादिति वाच्यम् । इष्टापत्ते-
रित्येके । ब्राह्मणमरणोद्देशे ब्राह्मणमरणफलकव्यापाररूपाया
हिंसायास्तत्राप्रच्यवादित्यन्ये । (१२) यदि चेति । सप्तमी-
तैलाभ्यङ्गो मरणमनुद्दिश्य कृतस्तदा प्रथमविशेषणेनैव वारि-
तो, यदि च तदुद्दिश्य कृतस्तदा ऽसंभवः । इष्टमरणस्यानु-
द्देश्यत्वात् । उद्देश्यत्वे वा श्येनतुल्यतया सोऽपि हिंसैवेति
परेण सुवचत्वात् । कथं तदुपष्टम्भाददृष्टाद्वारकत्वं विशेषण-
मिति चेत् । अत्र ब्रूमः । सकलानिष्टक्षयकामकृतदुर्गामाहा-
त्म्यपाठादेरदृष्टद्वारा रिपुमरणे हेतुत्वात् तद्वारणार्थमदृष्टा-
द्वारकत्वं विशेषणमावश्यकम् । तस्य रिपुमरणोद्देशेनैवानुष्ठी-
यमानतया ऽऽद्यविशेषणेनावारणात् । नहि श्येनवत् सोऽपि
हिंसैवेत्यपि परेण सुवचम् । सर्वस्य सर्वथा तत्र हिंसाव्यव-
हाराभावात् । प्रायश्चित्तानुपदेशाच्च । अत एवाविगानेन
सर्वेषां तत्र प्रवृत्तिरपि । तद्वत्तदुद्देशकृते तैलाभ्यङ्गस्यापि न
हिंसात्वमिति तद्वारणायापीदम् । न चेष्टमरणमुद्देश्यमेव
नेति वाच्यम् । वैराग्यादिना कदा चित्तथासंभवादिति ॥ के-
चित्तु श्रुत्यर्थबाधभयेनैव श्येनस्यावश्यवारणीयतया ऽदृष्टाद्वार-
कत्वं विशेषणमावश्यकमिति सप्तमीतैलाभ्यङ्गो वारितोऽपि
पुनर्वार्यते । न तु तद्वारणार्थमेव विशेषणमित्याहुः ॥ यत्तु
नरकविशेषजनकतत्प्रयोजकं रूपमिह विवक्षितं, तस्यैव प्रकृत-
त्वात् । नरकविशेषहेतुश्च न मरणानुकूलव्यापारमात्रम् ।
अकामकृतेऽतिप्रसङ्गात् । तत्रार्धफलश्रवणात् तद्व्यापारकर्तुरेव
तन्नरकविशेषभागित्वात् । कर्त्ता च तदिच्छापूर्वकतद्विषयक-
कृतिमान्न तु तद्विषयककृतिमन्मात्रम् । अत एव तत्र व्यप-
देशो मत्तो ऽभून्न तु मया कृतमिति । यथा च तदुद्देश्यकत्व-
पूर्वकत्वं तथा ऽदृष्टाद्वारकत्वमपि, अदृष्टद्वारककृतेः कर्तृत्वा-
निर्वाहकत्वात् । अत एव घटभोक्ता न तत्कर्त्तेति व्यवह्रियते
तथा च नरकविशेषजनकताप्रयोजकं तद्व्यापारकर्तृत्वमिति तत्क-
र्तृत्वनिर्वाहायैतद्विशेषणमिति, तच्चिन्त्यम् । तावता मरणं
प्रत्यकर्तृत्वेऽपि तदनुकूलव्यापारकर्तृत्वे बाधकाभावात् । नहि
मरणानुकूले श्येनयागान्तर्भूतव्यापारकलापेऽपि कर्त्तव्ये कृतेर-
दृष्टं द्वारम् । न च मरणकर्तृत्वमेव नरकविशेषजनकत्वमिति
वाच्यम् । खड्गघातादिना यत्र मरणं तत्रापि नरकानापत्तेः,
नहि प्राणशरीरविभागादिरूपे मरणे ऽस्मदादेः कर्तृत्वं, तदु-
पादानगोचराऽस्मदादिज्ञानाद्यजन्यत्वात् । मरणोद्देशेनेत्यस्य
प्रयोजनं दर्शयति । (१३) अत एवेति । ननु व्रणपाकपरम्परा-
मृतएव तद्व्यपदेशो गौणो ऽस्तु, विनिगमकाभावादित्यत
आह । (१४) प्रयोग इति । (१५) त्वत्पक्षइति । अनुनि-
ष्पादीत्यत्रेत्यर्थः । (१६) अतिप्रसङ्ग इति । गललग्नान्नमरण-
इति शेषः । (१७) अनभिसंहितेति । विशिष्यानभिसंहिते-
त्यर्थः । श्येने तु नरान्तरस्य वैरिणो व्यापारो विशेषाकारे-
णानभिसंहित एव द्वारमिति न तत्र प्रसङ्ग इति भावः ।
अत्र श्येनोऽपि संग्राह्य एवेत्यन्ये । साक्षाद्यत्र मरणं तत्परिग्रहाय
नञ्द्वयम् । मरणसाधनमित्युक्ते खड्गकारस्यापि हिंसापत्तिरि-
त्यत उक्तं नरान्तरव्यापारमद्वारीकृत्येति । अन्ने विषप्रयोगे
ऽव्याप्तिवारणायानभिसंहितेति । अन्योद्देशक्षिप्तनाराचेन ह-
न्तृत्वपरिग्रहायान्तरपदमित्याहुः । नन्वयं व्यापारो ऽस्य मरणं
जनयत्वित्येवमाकारमभिसंधानं विवक्षितमिति न परिवेषयि-
तर्यतिप्रसङ्ग इत्यरुचेराह । (१८) भोक्तुरिति । तत्र नरान्तरा-

संहितनरान्तरव्यापारमद्वारीकृत्य मरणानुकूलान्नभक्षणानुष्ठानात् । (१६) अत एवा(२०)ऽव्यवहितप्राणवियोगफलको व्यापारो हिंसा (२१) व्रणपाकपरम्परामृते हन्तृत्वं व्यापारस्याव्यवधायकत्वादिति निरस्तम् । स्यादेतत् । नेष्टसाधनताविधिः, नित्ये संध्योपासनादौ फलाभावात् । अथ नास्त्येव तन्नित्यम्, तन्नित्यं यत्रार्थवादिकं विधिवाक्ये वा न फलं श्रुतमस्ति ।

संध्यामुपासते ये तु सततं संशितव्रताः ।
विधूतपापास्ते यान्ति ब्रह्मलोकं सनातनम् ॥

इत्याद्यर्थवादात् ।

(२२) दद्यादहरहः श्राद्धं पितृभ्यः प्रीतिमावहन् ॥

इत्यादिविधिवाक्यश्रवणात् । (२३) कृत्वा चिन्तया तूच्यते । यत्र न फलश्रुतिस्तत्र विश्वजिन्न्यायात्स्वर्गः फलमिति चेत् । न । कामनोपाधिकार्यत्वेन यागवन्नित्यताभङ्गप्रसङ्गात् । अहरहःश्रुत्या हि तत्कालजीविमात्रकृतिसाध्यं संध्यावन्दनमवगतं, कामनोपाधिकार्यत्वे च यदा फलकामना नास्ति तदा तत्समयएव तत्कर्त्तव्यता न स्यात् । नहि तत्काले फलकामनावश्यंभावः प्रमाणासंभवात् । किं च (२४) प्रथमप्रवृत्तेतरनिरपेक्षाहरहःश्रुत्या जीविमात्रस्याधिकारो ऽवगतः, तथा च (२५) तत्सापेक्षचरमप्रवृत्तार्थवादोपनीतफलकामस्य न तत्राधिकारः । (२६) प्रथमप्रवृत्ताहरहःश्रुत्या विरोधात् । (२७) नित्ये फलश्रुतेरर्थवादस्य च स्तुतौ तात्पर्यम्, अत एव प्रत्यवायपरिहारो ऽपि न फलं, तत्कामनोपाधिकार्यताया नित्यताक्षतेः । किं च नित्ये कर्त्तव्यताबोधनात् प्राक् प्रत्यवाये न प्रमाणमस्ति । विधेः कर्त्तव्यत्वमवगम्य कर्त्तव्याकरणे प्रत्यवायकल्पनम् । (२८) विधिश्च फलाभावेन प्रथमं मूक एव । एवं प्रत्यवायसिद्धौ विधिप्रवृत्तिस्तत्प्रवृत्तौ (२९) कर्त्तव्याकरणे प्रत्यवायकल्पनमित्यन्योन्याश्रयः ॥ अपरे तु न विधेः कर्त्तव्यत्वमवगम्य कर्त्तव्याकरणे प्रत्यवायकल्पनं येनान्योन्याश्रयः, किं तु (३०) निन्दार्थवादेन । (३१) प्रायश्चित्तोपदेशेन चोपासनस्य प्रकृत्यर्थस्य तावद्व्यापाररूपस्याभावः प्रत्यवायहेतुरवगतः, तथा च संध्योपासनाभावः प्रत्यवायद्वारा दुःखसाधनं, तदभावः संध्योपासनं दुःखसाधनाभावत्वेन फलं, प्रायश्चित्ते पापध्वंसवदिति । (३२) तत्साधनत्वेन कृतिर्बोध्यते विधिना । (३३) न चैवं प्रत्यवायपरीहार एव फलमस्त्विति वाच्यम् । परिहारस्य प्रागभावरूपत्वेनानादितया ऽसाध्यत्वात् । न चोपासनाकरणं प्रत्यवायहेतुः, नोपासनाभावः, तथा च दुःखसाधनाभावत्वेन (३४) कृतिरिष्टा, न तूपासनमिति वाच्यम् । निन्दार्थवादस्यो(३५)भयत्र सत्वेनोभयस्यापि तथात्वादिति । तन्न । एवमपि

भावेनैव विशिष्टाभावसत्त्वादिति भावः । (१९) अत एवेति । भोक्तुरात्महन्तृत्वापत्तिरित्यर्थः । (२०) अव्यवहितेति । पूर्वकालाव्यवधानमिहान्यथासिद्धिप्रयोजकव्यवधानाभाव इत्यपौनरुक्त्यम् । अत एव व्रणपाकपरम्परामृते तत्र गौणो हन्तृत्वव्यपदेश इत्युक्तम् । अत्र च हन्तृत्वं मुख्यमेवेत्याह । (२१) व्रणेति । (२२) दद्यादिति । तथा च नित्यश्राद्धे पितृगतप्रीतिरेव फलमित्यर्थः । यावन्नित्यनैमित्तिकानुष्ठानस्यावश्यं ब्रह्मलोकावाप्तिफलकत्वेपि प्रौढिवादेनाह । (२३) कृत्वेति । अभ्युपगमवादेनेत्यर्थः । (२४) प्रथमेति । नियोगविधिरादौ प्रवर्त्तत इत्यभ्युपगमादिति भावः । (२५) तत्सापेक्षेति । नियोगफलाकाङ्क्षायामस्य प्रवृत्तेरिति भावः । (२६) प्रथमेति । उपजीव्यविरोधादित्यर्थः । नन्वेवं फलश्रुतेः का गतिरित्यत आह । (२७) नित्य इति । सा च विधिशक्तिमवसीदन्तीमुत्तम्भाति । तदुक्तं "विधिशक्तिरेवावसीदन्ती स्तुत्यादिभिरुत्तभ्यत" इति ।

(२८) विधिश्चेति । त्वन्मतइति शेषः । (२९) कर्त्तव्येति । "अकुर्वन् विहितं कर्म" इत्यादिना विहिताकरणस्यैव प्रत्यवायहेतुत्वावबोधादिति भावः । (३०) निन्दार्थवादेनेति । यद्यपि तस्य साक्षात्प्रत्यवायहेतुत्वं न विषयस्तथापि तादृशार्थविषयत्वस्य प्रत्यवायहेतुत्वव्याप्यत्त्वात्तेन लिङ्गेन तद्बोधनमिति भावः । (३१) प्रायश्चित्तेति । तद्विषयत्वस्य तद्व्याप्यत्वादिति भावः । संध्योपासनाभावे प्रायश्चित्तमिति शब्दात् प्रमिते प्रायश्चित्ते प्रायश्चित्तपदार्थालोचने क्रियमाणे

"प्रायः पापं विजानीयात्तस्य चित्तं विशोधनम्" ।

इति तदर्थसंकेतयाहकार्थवादप्रवृत्तौ पापनाशककर्मप्राप्तौ पापस्य हेत्वाकाङ्क्षायामुपस्थितस्य संध्यावन्दनाभावस्य हेतुतायह इति भाव इत्यन्ये ॥ इष्टसाधनत्वमुपपादयति । (३२) तत्साधनत्वेनेति । तत्कृतीष्टसाधनताज्ञानस्यैव तत्र प्रवर्त्तकत्वमितिमतेनेदम् । (३३) न चैवमिति । एवं प्रत्यवायपरिहारस्योक्तगत्या प्रथमोपस्थितत्वे । (३४) कृतिरिष्टेति । तथा च कृतावपि नेष्टसाधनतान्वय इति भावः । (३५) उभयत्रेति । संध्योपासनाभावे तदकरणे चेत्यर्थः ।

काम्यत्वे नित्यताक्षतिप्रसङ्गात् । किं चाकुर्वन् विहितं
कर्मेत्यादिना (३६) नोपास्ते यश्च पश्चिमामित्यादिना
च करणाभावस्यैव हेतुत्वं बोध्यते, न तु तद्विषयाभाव-
स्य । (३७) अन्यथा ऽकर्तुः प्रत्यवायो नान्यस्येति कथं
स्यात् । (३८) विषयाभावस्य साधारणत्वात् ॥ (३९)
वस्तुतस्तु कृतिसाध्यत्वे सतीष्टसाधनताज्ञानं प्रवर्त्तकत्वेन
निर्व्यूढं, न च कृतौ कृतिसाध्यत्वमस्ति, अतो न किं चि-
देतत् ॥ नवीनास्तु नित्यापूर्वप्रागभावो दुरितद्वारा दुःख-
साधनं तदभावो ऽपूर्वे दुःखसाधनाभावत्वेनेष्टं, तत्सा-
धनत्वेन कृतिसाध्यत्वेन च संध्योपासनं विधीयते इति ।
तन्न । निन्दार्थवादादिना संध्योपासनाभावस्तदकरणं वा
प्रत्यवायहेतुरवगतो न त्वपूर्वाभावः, प्रथमं प्रमाणाभावेन
तदनुपस्थितेः । (४०) विधेरिष्टसाधनत्वबोधकत्वात्
परिशेषेणापूर्वमिष्टं कल्प्यतइति चेत्, (४१) तर्हि विश्व-
जिन्न्यायेन स्वर्ग एव फलं कल्प्यतां, काम्यत्वस्य त्वया
ऽपि स्वीकारात् । (४२) किं च विधिप्रवृत्तावपूर्वज्ञानम-
पूर्वज्ञाने विधिप्रवृत्तिरित्यन्योन्याश्रयः । (४३) यावन्नि-
त्यनैमित्तिकनिर्वाहकस्य तत्तदाश्रमविहितकर्मणां सम्यक्
परिपालनस्य च ब्रह्मलोकावाप्तिः फलं श्रूयते । तथा च
नित्यस्य सफलत्वमिति के चित् । तन्न । (४४) तस्य
विधे(४५)र्नित्यविधिमुपजीव्य प्रवृत्तिः, (४६) तस्य च
फलाभावेन प्रथमं मूकत्वात्, अन्यथा परस्परापेक्षत्वेना-
न्योन्याश्रयः । तस्मात् कार्यतैव विधिः । ननु नित्ये वे-
दात् कार्यताज्ञानेपि प्रयोजनज्ञानं विना कथं प्रवृत्तिः, नहि
प्रयोजनमनुद्दिश्य मन्दोपि प्रवर्त्तते इति चेत् । न, नित्ये
फलबाधेन प्रवृत्तिमात्रे प्रयोजनज्ञानस्याप्रयोजकत्वात् ।
काम्ये ऽपि प्रयोजनज्ञानं न साक्षात्प्रवर्तकम्, उपायविष-
यत्वात् । प्रयोजने ऽप्रवृत्तेश्च । किं त्विष्टसाधनताज्ञान-
द्वारा कार्यताज्ञाने उपक्षीणम् । (४७) कथमयं निर्णयः ।
नित्ये इष्टसाधनताज्ञानाभावात्, कार्यताज्ञानस्य वेदादपि
संभवात् । (४८) ननु निष्फले दुःखैकफले वा प्रेक्षावतां
कथं प्रवृत्तिः । वेदाधीनकार्यताज्ञानसत्त्वात् सफलप्रवृत्ता-
वपि तस्यैव तन्त्रत्वात् । यत्तु लौकिके दुःखैकफले न
प्रवर्त्तते तदिष्टसाधनतालिङ्गकस्य कार्यताज्ञानस्य वेदाधीन-
स्य वा ऽभावात् । न च दुःखैकफलत्वज्ञानं प्रतिबन्धकं,
सति कार्यताज्ञाने तस्य प्रतिबन्धकत्वादर्शनात् । (४९)
अथ वा काम्ये लिङो ऽपूर्ववाचकत्वान्नित्येपि लिङोपास-
नादिविषयकमपूर्वं बोध्यते, (५०) तच्च निष्फलमपि सु-
खवत्स्वत एव प्रयोजनं नित्यमभ्यर्थ्यमानं चेति । उच्यते ।
सर्वत्र नित्ये फलश्रवणा(५१)ज्जीविफलकामस्य संवलिता-

"एतत्संध्यात्रयं प्रोक्तं ब्राह्मण्यं यदधिष्ठितम् ।
यस्य नास्त्यादरस्तत्र न स ब्राह्मण उच्यते" ॥

इत्यादेरुभयसाधारणत्वादिति भावः । (३६) नोपास्त-
इति । आख्यातस्य कृतिशक्तत्वान्नोपासनविषयकप्रयत्नवानि-
त्यर्थः । ननु विषयाभावे ऽपि निन्दार्थवाद इत्यत आह ।
(३७) अन्यथेति । तथा चानन्यगत्या तत्रापि करणाभावस्यैव
प्रत्यवायहेतुत्वे तात्पर्यम् । (३८) विषयेति । मार्जनादि-
क्रियायाः शरीरनिष्ठत्वेन कर्त्तर्यपि तद्विरहादित्यर्थः । अस्तु
वोक्तगत्योपासनस्यैवेष्टत्वेन तत्कृतेरिष्टसाधनत्वं, तथापि कृति-
साध्यत्वाभावादेव न प्रवृत्तिरित्याह । (३९) वस्तुतस्त्विति ।
विधेरिष्टसाधनत्वबोधानन्तरं किं तदिष्टमित्याकाङ्क्षायामपूर्व-
कल्पनमित्याह । (४०) विधेरिति । (४१) तर्हीति । यद्यपि
स्वर्गकल्पने ऽप्यपूर्वकल्पनमिति लाघवात्तदेव कल्पयितुमर्हम्,
किं च स्वर्गकल्पनेपीष्टसाधनत्वं परस्योपपन्नमेव, तथा ऽपि
काम्यत्वे नित्यताक्षतेरित्यत्रैव तात्पर्यम् । किं च विशेषतः
फलानुपस्थितौ विधिप्रवृत्तिरेव न भवतीत्याह । (४२) किं
चेति । (४३) यावदिति । उपाधिभेदेन नित्यनैमित्तिकतत्त-
दाश्रमविहितकर्मणोर्भेदः । (४४) तस्य । ब्रह्मलोकावाप्ति-
फलबोधकस्येत्यर्थः । (४५) नित्येति । विहितपरिपालना-
दिना तत्प्रवृत्तेरिति भावः । तर्हि नित्यविधिरेव प्रथमं प्रव-
र्त्ततामित्यत आह । (४६) तस्य चेति । (४७) कथमिति ।
प्रयोजनज्ञानमिष्टसाधनताज्ञानद्वारा प्रवृत्तिकारणं न भवति, किं
तु कार्यताज्ञानोपक्षीणमिति निर्णयः कथमित्यर्थः । पूर्वं फल-
ज्ञानरूपकरणाभावान्न प्रवृत्तिरित्युक्तम् । इह तु निष्फलत्व-
ज्ञानस्य प्रतिबन्धकत्वान्न प्रवर्त्तत इत्याह । (४८) नन्विति ।
ननु यदि निष्फले फलज्ञानाभावान्न प्रवृत्त्यभावः, किं तु का-
र्यताज्ञानाभावात्तदा जलताडनादौ दुःखैकफलतया ज्ञाते ऽप्य-
नाप्तशब्दजन्यकार्यताज्ञानात् प्रवृत्त्यापत्तिरिति नित्ये ऽपि
फलमाह । (४९) अथवेति । तच्चापूर्वं न पूर्वमुपस्थितमिति
न तदादायेष्टसाधनत्वान्वय इति भावः । (५०) तच्चेति ।
यद्यप्येवमपि काम्यत्वे नित्यताक्षतिरन्यथा ऽऽर्थवादिकेन
किमपराद्धं, तथापि तद्दूषणमये वाच्यमेवेति भावः । (५१)
जीवीति । प्रयोजनज्ञानं विना ऽप्रवृत्तेर्जीविमात्रस्याधिका-

धिकारः। (५२) यथोपरागे नैमित्तिकं स्नानश्राद्धादि फलश्रुतेः काम्य,मकरणे प्रायश्चित्तादिश्रुतेश्च नियतकर्तव्यताकं, (५३) यथा वा षोडशश्राद्धे प्रेतत्वविमुक्तिकामनाश्रुतेः प्रेतत्वविमुक्तिहेतुषोडशश्राद्धे संकल्पं विधाय महाजनानामाचारात् काम्यत्वं, निन्दार्थवादेनाकरणे प्रत्यवायश्रुतेरवश्यकर्तव्यत्वं, तथा संध्योपासनमपि फलश्रुतेः काम्य, मक्ररणे नरकश्रुतेः प्रायश्चित्तोपदेशाच्च नियतकर्तव्यताकम् । यत्तु यागे काम्येपि न नियतकर्तव्यताकत्वं तदकरणे प्रायश्चित्तानुपदेशात् । न च नित्ये फलकामनाया असंभवः । चिकालज्ञाम्यस्तवपाठवद् नित्ये फलकामनासंभवात् । यत्तु प्रथमप्रवृत्ताहरहःश्रुत्या तत्कालजीविमात्रस्याधिकारबोधनाद् न फलकामस्याधिकार इति । तन्न । अहरहःश्रुत्यर्थवादयोः प्रथमं गृहीतैकवाक्यताबलेन तत्कालजीविफलकामस्य संवलिताधिकारात् । (५४) अर्थवादोपस्थापितफलान्वयं विनैकवाक्यताभङ्गात् । न चार्थवादस्य स्तुतिपरत्वान्नैकवाक्यता । बाधकं विना स्वार्थापरित्यागात् । (५५) विधिवाक्योपस्थिते फले विधिवाक्यफलमादायैवाहरहःश्रुत्या कार्यताबोधनात् । नन्वेवं तत्कालजीविकामिनोऽधिकारे यदा फलकामनाविरहस्तदा ऽशुचेरिवाधिकाराभावान्नियतकर्तव्यता न स्यात्, (५६) अधिकृताकरणे प्रत्यवायो न त्वकरणमात्रइति चेत् । न। (५७) नैमित्तिकेपि तत्काले कस्य चित्कामनाविरहिणो ऽनियतकर्तव्यतापत्तेः। अथापवादाभावेनौत्सर्गिकी फलकामना ऽस्त्येव, फलज्ञानस्य स्वविषयेच्छाजनकस्वभावत्वात् । यस्य तु मुमुक्षापवादेन फलान्तरे कामना नास्ति तस्याकरणेपिं न प्रत्यवाय इति न तन्नियतकर्तव्यताकत्वं नैमित्तिके, (५८) तथा नित्येपि मुमुक्षया फलकामनाबाधेनाकरणे ऽपि न प्रत्यवाय इति तुल्यम्। (५९) किं च अर्थवादोपस्थापितफलोपाधिकर्तव्यत्वे ऽवगते ऽकुर्वन् विहितं कर्मेत्यादिवाक्या (६०)च्छौचे सति संध्यावन्दनाकरणे निन्दार्थवादेन च नरकश्रुतेः प्रायश्चित्तोपदेशाच्च प्रत्यवायः कल्प्यते, तत्फलकामनाविरहेपि प्रत्यवायपरिहारार्थं नियमतः प्रवर्त्तते,

---

रासंभवादिति भावः । संवलिताधिकारिमात्रे दृष्टान्तमाह । (५२) यथेति । संध्योपासनवत्फलश्रुतावपि नैतत्काम्यमिति यदि ब्रूयात्तदा दृष्टान्तान्तरमाह । (५३) यथा वेति । तस्याप्यकाम्यत्वे साभिलापं संकल्पाचारविरोध इति भावः । (५४) अर्थवादेति । तथा चेष्टसाधनत्वस्य विधित्वमक्षतमिति भावः । (५५) विधीति । दद्यादहरहः श्राद्धमित्यादिविधिवाक्योपस्थितमित्यर्थः । ननु कामनाविरहे ऽप्यकरणे प्रत्यवायात्तत्परिहारार्थमेव नियमतः प्रवृत्तिरित्यत आह । (५६) अधिकृतेति । गूढाभिसंधिः प्रतिबन्द्या समाधत्ते । (५७) नैमित्तिकेपीति । अभिसंधिमुद्घाटयति । (५८) तथेति । तथा च यस्य नित्ये नियमतः कर्त्तव्यता तस्य फलकामनावश्यंभाव एव नैमित्तिकादिवदिति भावः । ननु मुमुक्षोरपि यत्यादेः फलकामनाविरहिणो यावज्जीवनैमित्तिकानुष्ठानमस्त्येवेत्यस्वरसादाह । (५९) किं चेति । नहि प्रत्यवायपरिहारमेव फलमादाय विधिप्रवृत्तिर्येनान्योन्याश्रयः स्यादिति भावः । (६०) शौचे सतीति । नन्वधिकारे सत्यकरणे नरकश्रुतिः, न तु शौचमात्रे, मानाभावात् । तथा चाशुचेरिव फलकामनाविरहिणो ऽपि संवलिताधिकाराभावादकरणे न प्रत्यवाय इति कथं तदा तत्परिहारार्थं नियतप्रवृत्तिः, तदिदमुक्तमधिकृताकरणे प्रत्यवायो न त्वकरणमात्र,इति चेन्न । शौचादिमत्त्वं फलकामना वेत्यधिकारद्वयम्। एवं चाधिकारयोः संवलनमित्येव संवलिताधिकारपदार्थः । तथा चाधिकाराभ्यामन्यतरेण वा ऽधिकृतस्याकरणं प्रत्यवायहेतुः। अतः शौचे सति फलकामनाविरहिणो ऽप्यकरणं तथेति तात्पर्यमित्येके । तच्चिन्त्यम् । एवमशुचेरपि फलकामनावतो ऽकरणे प्रत्यवायापत्तेः । वयं तु ब्रूमः । अकुर्वन् विहितं कर्मेत्यादिना विहिताकरणस्य प्रत्यवायहेतुत्वमवगतं, न त्वधिकृताकरणस्य, तद्बोधकपदाभावात् । न चैवमशुचेरपि तदकरणे प्रत्यवायापत्तिरिति वाच्यम् । अशुचेस्तत्कर्त्तव्यतानिषेधेन शुचेरेव कर्तव्यताविधानेन च तं प्रति तस्याविहितत्वात् । विहिताकरणस्य प्रत्यवायहेतुत्वात् । अत एव तत्काले तस्य विहितत्वेनान्यकालीनाकरणं न प्रत्यवायहेतुः । तद्यदि कामनायां तत्कर्तव्यताविधानं कामनाविरहे तत्कर्तव्यतानिषेधश्च स्यात्तदा ऽशुचेरिव कामनाविरहिणो ऽप्यकरणे प्रत्यवायो न स्यात्। न चैवम् । नहि सकामस्याहरहःश्रुत्या तद्विहितं येन निष्कामस्य तद्विहितं न स्यात्। अस्तु वाधिकृताकरणं प्रत्यवायहेतुस्तथापि नित्ये उक्तयुक्त्या सामान्यतः शौचमात्रमधिकारिविशेषणं, न तु फलकामनापि, सा हि नित्यस्य फलजनकतायामधिकारः, अत एव फलकामेनैव कृतं नित्यं फलजनकमन्यथा प्रत्यवायपरिहारमात्रफलकम्, अयमेव च काम्याद्भेदः। तदिदमुक्तं शौचे सतीत्यादि । के चित्तु समर्थस्य फलकामस्याकरणं न प्रसक्तं येन पापहेतुत्वप्रतिपादनेन तन्निवार्येत, तथा चाकुर्वन्विहितं कर्मेत्यादेरप्रसक्तप्रतिषेधत्वापत्त्या ऽ

विधिप्रवृत्त्यनन्तरं प्रत्यवायस्य प्रामाणिकत्वात् । (६१) अकरणोन्मुखस्य करणेन प्रत्यवायप्रागभावस्य साध्यत्वात् । (६२) नैमित्तिके फलोपाधिकर्त्तव्यत्वे कामनाविरहे नियतकर्त्तव्यतावत् । यत्तु निष्फलेपि नित्ये वेदाधीनकार्यताज्ञानात् प्रवर्त्ततइति । तन्न । दुःखैकफलत्वेन ज्ञायमाने प्रेक्षावतां कृतेरनुत्पादयोग्यतया नित्ये कृतिसाध्यत्वस्य बोधयितुमशक्यत्वात् । अत एव संध्योपासनमफलमपि क्रियते । वेदबोधितकर्त्तव्यताकत्वादित्याशङ्क्य (६३) गुरुमतमेतन्न (६४) गुरोर्मतमित्यभिप्रायेणोपेक्षितवानाचार्यः । यत्तु पण्डापूर्वं स्वत एव प्रयोजनमित्युक्तं, तदपि न । एवं तवापि काम्यत्वे नित्यत्वहान्यापत्तेः । किं च सुखं दुःखाभावश्च मुख्यं प्रयोजनं, (६५) तत्साधनं च गौणं, नित्यापूर्वं तु तेषु नैकमपि, पण्डत्वात् । काम्यापूर्वं च सुखहेतुर्गौणं प्रयोजनं प्रवर्त्तकविध्यनुरोधेन तदपि प्रवर्त्तकं कल्प्यतइति चेत् । न । प्रवर्त्तनीयेन लोकेन तस्य प्रयोजनत्वेनाज्ञानात् । गुरुणा नित्यापूर्वं प्रयोजनमुक्तमित्युच्यमानेपि नादरः प्रेक्षावताम् । (६६) मुक्तिस्वर्गौ चालौकिकावपि सुखदुःखाभावजातीयतया प्रयोजने । तस्मादेवं वदन् गुरुरपि लघुरेव ॥ तदयं संक्षेपः । नित्ये दुःखैकफलत्वेन प्रवृत्त्यनुपपत्तेः फलोपाधिकर्त्तव्यता, तच्च फलं दुःखसाधनाभावः पण्डापूर्वं वेति तदिच्छा प्रवृत्त्यर्थं प्रत्यहमुपेया, तां विना प्रवृत्त्यनुपपत्तेः, (६७) तथा चार्थवादिकं विधिवाक्यश्रुतं च फलमस्तु कृतमन्येन । न च कामनाविरहे नियतकर्त्तव्यता न स्यात् । अपूर्वादीच्छाविरहेपि तुल्यत्वात् । प्रत्यवायपरिहारार्थे नियमतः प्रवृत्तिस्तुल्यैव । (६८) यत्र च न फलश्रुतिस्तत्र विश्वजिन्न्याय इति ॥

धिकारैकदेशे करणाभावे ऽपि पापमिति तात्पर्याज्ञयनादनधिकृताकरणमपि प्रत्यवायहेतुरित्याहुः । परिहारस्य प्रागभावत्वेनासाधकत्व निरस्यति । (६१) अकरणेति । (६२) नैमित्तिकइति । अन्यथा तत्राप्यप्रतीकारादिति भावः । (६३) गुरुमतं,प्रा॰ाकरमतम् । गुरु महद्वा मतमिति सोपहासम् । (६४) गुरो, स्मद्गुरोः । ननु स्वतःप्रयोजनत्वाभावे गौणमेवास्त्वित्यत आह । (६५) तत्साधनं चेति । नन्वेवं मुक्तिस्वर्गावपि प्रयोजने न स्यातां, लोकेन तयोस्तथात्वेनाज्ञानादित्यत आह । (६६) मुक्तीति । पण्डापूर्वं त्वपूर्वजातीयमपि पण्डत्वान्न तथेति भावः । (६७) तथा चेति । अन्यथाऽर्थवादादेः स्तुतिपरत्वकल्पनागौरवं स्यादिति भावः । ननु यत्र नित्ये न फलश्रुतिस्तत्र कथमिष्टसाधनत्वान्वय इत्यत आह । (६८) यत्र चेति ।

॥ अथ वेदान्तशैवभाष्यसंबन्धिद्वितीयाध्यायस्य ॥

॥ तृतीयपादारम्भः ॥

निरस्तः समस्तो विरुद्धेतरदर्शनन्यायः । अध्यायशेषेण पुनरवान्तरविरोधपरिहारः क्रियते ॥

॥ न वियदश्रुतेः ॥ १ ॥

निरवयवत्वेनाकार्यत्वभ्रमादाकाशस्योत्पत्तिः संभवति न वेति संदिह्यते । वियन्नोत्पद्यत इति प्राप्तम् । कुतः । अश्रुतेः । तथाहि, छान्दोग्ये "सदेव सोम्येदमग्र आसीत्" इत्यारभ्य "तत् तेजोऽसृजत" इति तेजःप्रभृतिभूतसृष्टिरभिधीयते । तत्र नाकाशस्योत्पत्तिः श्रूयते । या तु "आत्मन आकाशः संभूत" इति श्रुतिस्तैत्तिरीये, सा गौणी भवितुमर्हति । आकाशोत्पादकसमवाय्यादिनिरूपणासंभवात् ॥ १ ॥

अतो जीववदाकाशोऽपि नोत्पद्यत इति प्राप्ते ब्रूमः[1] ॥

॥ अस्ति तु ॥ २ ॥

वियत उत्पत्तिरस्त्येव । "तस्माद्वा एतस्मादात्मन आकाशः संभूत" इत्यादिश्रुतेः । आत्मनस्तु "न जायते म्रियते वा विपश्चिद्" इति प्रतिषेधादनुत्पत्तिः । वियदुत्पत्तिप्रतिषेधश्रुतिर्नास्ति । अतो वियदुत्पद्यत एव ॥ २ ॥

यदुक्तमुत्पत्तिश्रुतिर्गौणीति । तत्राह ॥

॥ गौण्यसंभवाच्छब्दाच्च* ॥ ३ ॥

"तत् तेजोऽसृजत" इति तेजसः प्रथमं सृष्टिवचनात् "आकाशः संभूत"इति श्रुतिर्गौणी । तस्य निरवयवस्योत्पत्त्यसंभवात् । "वायुश्चान्तरिक्षं चैतदमृतम्"इति नित्यत्वशब्दाच्च ॥ ३ ॥

॥ स्याच्चैकस्य ब्रह्मशब्दवत् ॥ ४ ॥

एकस्य संभूतशब्दस्याकाशे गौणत्वमन्यत्र मुख्यत्वमनुषङ्गेऽपि श्रवणादावृत्ताविव संभवत्येव । यथैकस्य ब्रह्मशब्दस्य "तस्मादेतद् ब्रह्म नाम रूपमन्नं च जायते" इति प्रकृतौ गौणत्वम् । "तपसा चीयते ब्रह्म" इति मुख्यत्वमावृत्तौ, तद्वदत्रापि । तस्मादाकाशोत्पत्तिरयुक्तेति ॥ ४ ॥

अथ परिहार उच्यते ॥

॥ प्रतिज्ञाऽहानिरव्यतिरेकात् ॥ ५ ॥

"येनाश्रुतं श्रुतं भवति" इत्येकविज्ञानेन सर्वविज्ञानप्रतिज्ञाया हानिर्वियदादेर्ब्रह्मकार्यत्वेन तदव्यतिरेकादेव भवति । अतो न संभूतशब्दस्य गौणत्वम् । प्रतिज्ञाहान्यापत्तेः । यथा प्रतिज्ञाहानिर्न भवति तथा योजनीयम् ॥ ५ ॥

---

१ ब्रूमः । वियदुत्पद्यते ॥ इति पा० ।

* शंकरमते गौण्यसंभवात् इत्येकं शब्दाच्च इत्यपरमिति सूत्रद्वयम् ।

॥ शब्देभ्यः* ॥ ६ ॥

"आत्मन आकाशः संभूत" इत्यादिशब्देभ्योऽवगतां वियदुत्पत्तिं "तत् तेजोऽसृजत" इत्यत्राकाशावचनावगतं तेजःप्राथम्यं न निवारयितुं क्षमते ॥ ६ ॥

॥ यावद्विकारं तु विभागो लोकवत् ॥ ७ ॥

"ऐतदात्म्यमिदं सर्वम्" इत्याकाशादेरपि विकारत्वावगमात् तेजःप्रभृतिविभागवचनं यावद्विकारजातं तस्य सर्वस्यापि प्रदर्शनार्थमिति विभाव्यते। यथा लोके दशमे पुत्रा इत्युक्त्वा तेषु केषांचिदुत्पत्तिकथनं, तथात्रापि। तस्माद्वियदुत्पद्यत इति युक्तमेव ॥ ७ ॥

॥ एतेन मातरिश्वा व्याख्यातः ॥ ८ ॥

तेजोऽत इति वक्ष्यति। तदर्थं पृथगुपादानम्। आकाशवद्वायोरुत्पत्तिरस्ति न वेति संशये वायुर्नोत्पद्यत इत्युच्यते। छान्दोग्ये तेजःप्राथम्याद्वायूत्पत्तेरश्रुतेः। बृहदारण्यके "सैषानस्तमिता देवता यद्वायुः" इति तज्जन्मनिषेधाच्च। सर्वथा वायुर्नोत्पद्यत इति प्राप्ते सिद्धान्त उच्यते। छान्दोग्ये वायोर्जन्माश्रवणेऽपि गुणोपसंहारन्यायेन "आकाशाद्वायुः" इति तैत्तिरीयवाक्यस्योत्तरत्रोपसंहारे सति श्रुतमेव छान्दोग्येऽपि वायोर्जन्म। "सैषानस्तमिता" इति श्रुतिः स्तुतिपरा,। उपासनप्रकरणात्। तस्माद्वायुरपि जायत एव ॥ ८ ॥

॥ असंभवस्तु सतोऽनुपपत्तेः ॥ ९ ॥

सदेव सोम्येदमग्र आसीत्" इति सद्रूपाद्ब्रह्मण आकाशादीनामुत्पत्तिरिति निरूपितम्। तदिह सर्वकारणस्य सतोऽपि ब्रह्मणः कुतश्चित् कारणादुत्पत्तिरस्ति न वेति संदेहे सति ब्रह्मणोऽप्युत्पत्तिरस्तीत्युच्यते। यथा कारणत्वेऽप्याकाशस्य, किंत्वग्र आसीदिति श्रवणात् सर्वविकारेभ्यः पूर्वमस्योत्पत्तिः। किमस्य कारणमिति चेदसदेव। "असद्वा इदमग्र आसीत्" "ततो वै सदजायत" इति श्रवणात्। ततः सद्रूपं ब्रह्मापि जायत इति पूर्वः पक्षः। सिद्धान्तस्तु न जायते ब्रह्मेति। कुतः। "सदेव सोम्येदमग्र आसीत्" "एकमेवाद्वितीयम्"।

"यदा तमस्तन्न दिवा न रात्रिर्न सन्न चासंश्छिव एव केवलः।

इति शिवस्य ब्रह्मण एवावधारणात् तस्यासंभव एव। निषेधात्। तदन्यस्यानुपपत्तेः संभव इति सिद्धम्। यथा ब्रह्म कारणत्वेन श्रूयते सर्वेषां, तथा तस्यापि किंचित् कारणान्तरं श्रूयते। "असद्वा इदमग्र आसीत्" "ततो वै सदजायत" इति सतः कारणमसदिति चेत्। तदसत्। कथमसतः सज्जायेतेति निषेधात्। सत एव सदुत्पत्तावात्माश्रयापत्तेः। ततः सतो ब्रह्मण एवासंभवोत्पत्तिः। तदन्यस्य सर्वस्य सर्वविज्ञानप्रतिज्ञानुपपत्तेः संभवत्युत्पत्तिरिति ॥ ९ ॥

* शंकरमते प्रतिज्ञाऽहानिरव्यतिरेकाच्छब्देभ्य इत्येकं सूत्रम्।

॥ तेजोऽतस्तथाह्याह ॥ १० ॥

अत्र वाय्वादि कार्यं साक्षाद्ब्रह्मण उत्पद्यते स्वस्वपूर्वकारणाद्वेति संदेहे सति स्वस्वपूर्वकारणादिति पूर्वः पक्षः। तथाहि, "आकाशाद्वायुः" इति श्रुतेर्वायुराकाशादेवोत्पद्यते। न साक्षाद्ब्रह्मणः। तेजोऽपि तथा वायोरेव। तथा "वायोरग्निः" इत्याह श्रुतिः ॥ १० ॥

॥ आपः ॥ ११ ॥

"अग्नेराप" इति श्रुतेरापोऽप्यग्नेरेवेति ॥ ११ ॥

॥ पृथिवी ॥ १२ ॥

"अद्भ्यः पृथिवी" इति श्रुतेरद्भ्य एव पृथिवी। अतो ब्रह्मण एव साक्षान्नोत्पद्यन्ते भूतानि ॥ १२ ॥

॥ अधिकाररूपशब्दान्तरेभ्यः * ॥ १३ ॥

छान्दोग्येऽपि "ता अन्नमसृजन्त" इत्यन्नशब्देन पृथिव्येवोच्यते। भूत[1]सृष्ट्यधिकारात्। "यत् कृष्णं तदन्नस्य" इति रूपविधानाच्च। "अद्भ्यः पृथिवी" इति शब्दाच्च। अतः पृथिव्येवाद्भ्य उत्पद्यते ॥ १३ ॥

तदेवं न्यायेन ब्रह्म न सर्वेषां कारणं किंतु परंपरयेति सिद्धान्त उच्यते ॥

तदभिध्यानादेव तु तल्लिङ्गात् सः ॥ १४ ॥

ब्रह्मण एव तु साक्षात् सर्वभूतोत्पत्तिः। तथाहि, "तस्माद्वा एतस्मादात्मन आकाशः संभूत" इत्यारभ्य वाय्वादीनां पृथिव्यन्तानां न पूर्वपूर्वकारणादुत्पत्तिरुच्यते। किंतु पूर्वपूर्वकारणाकाशादिविशिष्टाद्ब्रह्मण एवोत्तरोत्तरवाय्वादिकार्योत्पत्तिरुच्यत इति परमात्मा शिव एव साक्षात् सर्वभूतोत्पादकः। "तदैक्षत बहु स्यां प्रजायेय" इतिवत् "तत्तेज ऐक्षत बहु स्यां प्रजाय" इति "ता आप ऐक्षन्त बह्व्यः स्याम प्रजायेमहि" इति तदभिध्यानात् तु तल्लिङ्गात्।

"सदाशिवः शब्दमूर्तिः स्पर्शमूर्तिरथेश्वर[2]:।
रुद्रस्तेजोमयः साक्षाद्रसमूर्तिर्जनार्दनः ॥
गन्धमूर्तिश्चतुर्वक्त्र इत्येताः पञ्च मूर्तयः"।

इति वचनात् सदाशिवादिरूपाच्छब्दाद्यात्मन एव ब्रह्मणो वाय्वादिसंभवः। एते हि सदाशिवादयः पञ्च ब्रह्मसंज्ञकाः पञ्चभूतात्मानः परब्रह्मणः शरीरम्। पञ्चब्रह्मशरीरादेव परब्रह्मणः प्रपञ्चस्य सृष्ट्यादयः प्रवर्तन्ते। पञ्चभूतापक्षाश्चैते सदाशिवादयः परमात्मन उत्पद्यन्ते।

* शंकरमते पृथिव्यधिकाररूपशब्दान्तरेभ्य इत्याकारकमेकमेव सूत्रम्।

१ सर्वभूत–इति पा०।

२ ईश्वरः स्पर्शमूर्तिः स्याच्छब्दमूर्तिः सदाशिवः। इति पा०।

ननु भूतानामेवात्रोत्पत्तिरुच्यते । "आकाशः संभूत" इत्यादिना सदाशिवादीनां न साक्षात् सृष्टिरुच्यत इति चेत् । उच्यत एव । श्रुत्यन्तराध्याहारात् । तथाथर्वशिखायाम् "ध्यायीतेशानं प्रध्यायितव्यं सर्वमिदं, ब्रह्म[1]विष्णुरुद्रेन्द्रास्ते संप्रसूयन्ते, सर्वाणि चेन्द्रियाणि सह भूतैः, कारणं कारणानां ध्याता, कारणं तु ध्येयः सर्वैश्वर्यसंपन्नः सर्वेश्वरश्च शंभुराकाशमध्यग"[2] इति ब्रह्मादीनामिन्द्रियाणां च भूतैः सहोत्पत्तिः श्रूयते । कारणानामपि कारणत्वेन स शंभुः परमाकाशमध्यगः सिद्धः । ततः साक्षादेव ब्रह्मणस्तत्तत्कारणरूपात् तत्तत्कार्योत्पत्तिरिति निर्णयः ॥ १४ ॥

विपर्ययेण तु क्रमोऽत उपपद्यते च ॥ १५ ॥

इह पूर्वाधिकरणे निरूपितसृष्टिक्रम उपपद्यते न वेति संदेहः । नोपपद्यत इति पूर्वः पक्षः । तथाहि, मुण्डकोपनिषदि ।

"एतस्माज्जायते प्राणो मनः सर्वेन्द्रियाणि च ।
खं वायुर्ज्योतिरापः पृथिवी विश्वस्य धारिणी" ॥

इति प्राणादीनां वियदादिभ्यः पूर्वमुत्पत्तिः श्रूयते । अथर्वशिखायां च । "ब्रह्मविष्णुरुद्रेन्द्रास्ते संप्रसूयन्ते, सर्वाणि चेन्द्रियाणि सह भूतैः" इति सहोत्पत्तिर्ब्रह्मादीनां भूतेन्द्रियाणां चाम्नायते । अत आकाशादेः पूर्वोक्तसृष्टिक्रमो नोपपद्यत इत्युच्यते । सिद्धान्तस्तु । उपपन्नः पूर्वोक्तसृष्टिक्रमः । "अन्नमयं हि सोम्य मनः" "आपोमयः प्राणः" "तेजोमयी वाक्" इति श्रुतेः प्राणादीनां भौतिकत्वश्रवणाद् भूतेष्वन्तर्भावान्न पृथक् क्रमापेक्षा[3] । ब्रह्मादीनां सहोत्पत्तिस्तु भूतैस्तद्रूपत्वात् तेष्वन्तर्भावात् । ततः पूर्वोक्तक्रमे न विरोधः ॥ १५ ॥

॥ अन्तरा विज्ञानमनसी क्रमेण
तल्लिङ्गादिति चेन्नाविशेषात् ॥ १६ ॥

"प्राण[4]भूतानामिन्द्रिययाममनसी क्रमेणान्तरा उत्पद्येते" इति हीदं वाक्यं प्रतिपादयति । "खं वायुर्ज्योतिः" इत्यादौ श्रुत्यन्तरसिद्धक्रमप्रत्यभिज्ञानरूपाल्लिङ्गात् । तत इदमपि पारंपर्यक्रमपरमिति चेत् । न । "एतस्माज्जायत" इत्यस्य प्राणादिपृथिव्यन्तेषु सर्वेषु प्रत्येकमन्वयाविशेषात् । अतः सर्वेषामीश्वर एव कारणम् । तथाच पौराणिकी भणितिः ।

शक्त्यादि च पृथिव्यन्तं शिवतत्त्वसमुद्भवम् ।
तेनैकेन तु तद्व्याप्तं मृदा कुम्भादिकं यथा ॥

इति क्रमसद्भावेऽपि सर्वस्य शिवतत्त्वादुत्पत्तिमभिधत्ते । अतः सर्वकारणं ब्रह्मेति समीचीनम् ॥ १६ ॥

१–नं तत्र ब्रह्म–इति पा० ।
२ सर्वेश्वरः स शंभुराकाशमध्ये ध्येयः इति पा० ।
३ पृथग्भाव इति पा० ।
४ भूतप्राणयोरिति शेषः प्राणभू–इति पा० ।

॥ चराचरव्यपाश्रयस्तु स्यात् तद्व्यपदेशो भाक्तस्तद्भावभावित्वात् ॥ १७ ॥

पूर्वत्राकाशादिशब्दवाच्यत्वं ब्रह्मणः प्रतिपादितम् । तदिह विचार्यते । चेतनाचेतनचराचरवस्तुसंबन्धी तद्वाचिशब्दो ब्रह्मणि मुख्यो न वेति[1] संदेहे न मुख्य इति वदामः । अन्यवाचकशब्दस्य मुख्यतयान्यत्र वृत्त्यभावात् । तथाहि, "आदित्यो यूपो यजमानः प्रस्तर" इत्यादिषु यूपादेरादित्यादिशब्दवाच्यत्वं सारूप्यादिगुणसंबन्धादेव दृश्यते । न मुख्यत्वेन । अत्रापि "तत् तेज ऐक्षत" इत्यादिषु तेजःप्रभृतीनामचेतनानां चेतनधर्मेक्षितृत्वायोगात् तच्छब्दैस्तदाश्रितं चेतनं ब्रह्म लक्ष्यते । मञ्चाः क्रोशन्तीत्यादिवत् । तस्मादाकाशादिशब्दवाच्यत्वं ब्रह्मणि तदाश्रये गौणमित्येवं[2] प्राप्ते ब्रूमः । चराचरचेतनवस्तुसंबन्धी तद्व्यपदेशशब्दो ब्रह्मणि न भाक्तः । किंतु मुख्य एव । तेषां खल्वेषां भूतानां त्रीण्येव भूतानि बीजानि भवन्ति । अण्डजं स्वेदजमुद्भिज्जम् । इति । "सेयं देवतैक्षत" "हन्ताहमिमास्तिस्रो देवता अनेन जीवेनात्मनानुप्रविश्य नामरूपे व्याकरवाणि" इति सर्वस्य वस्तुनो नामरूपविभागाय तदात्मतया ब्रह्मणोऽनुप्रवेशभावभावित्वात् । यूपादीनामादित्यादिशब्दवाच्यत्वमनुपपत्त्या न मुख्यम् । मञ्चादिषु पुरुषाणामवस्थातृमात्रत्वात् तेषामपि तच्छब्दवाच्यत्वं न मुख्यम् । इहात्मतया प्रपञ्चानुप्रवेशाद्ब्रह्मणस्तच्छब्दवाच्यत्वं मुख्यमेव । यथात्मनो ब्राह्मणादिशरीरानुप्रविष्टस्य ब्राह्मणादिशब्दवाच्यत्वं मुख्यम् । अन्यथा "अष्टवर्षं ब्राह्मणमुपनयीत" इत्यादिषूपनयनसंस्कारादेः शरीरमात्रपर्यवसानादात्मनः संस्कार्यत्वाभावप्रसङ्गात् । ततो "यस्यैते चत्वारिंशत् संस्कारा अष्टौ चात्मगुणाः स ब्रह्मणः सायुज्यम् । इत्यादिरात्मनः संस्कारवतः फलश्रुतिरपार्था भवेत् । "ब्राह्मणो यतेत" इत्यादिविधिवैयर्थ्यं च भवेत् । तस्मात् सकलचराचरवस्तुशरीरप्रविष्टस्य ब्रह्मणस्तच्छब्दवाच्यत्वं मुख्यमेव ॥ १७ ॥

॥ नात्माश्रुतेर्नित्यत्वाच्च ताभ्यः ॥ १८ ॥

पूर्वत्राकाशादीनां ब्रह्मणः साक्षादुत्पत्तिरभिहिता । जीवोऽपि तन्न्यायेन ब्रह्मणः समुत्पद्यते न वेति संदेहः । एवं सति समुत्पद्यत इति पूर्वः पक्षः[3] ।

"यदा तमस्तन्न दिवा न रात्रिर्न सन्न चासंश्छिव एव केवलः" ।

"एकमेवाद्वितीयम्" इत्यादिश्रुतेः प्राक् सृष्टेर्ब्रह्मैकत्वावधारणात्,[4] सदसतोर्निषेधाच्च, सृष्टिकाले ब्रह्मण उत्पद्य-

१–संबन्धिशब्दस्तद्वाची न वेति इति पा० ।
२–मिति कः संदेह इति इति पा० ।
३ इति गम्यते इति पा० ।
४–र्ब्रह्मण एकस्यैवावधारणात् इति पा० ।

त एव जीवः। विस्फुलिङ्गदृष्टान्तोऽपि जीवोत्पत्त्यनुगुणः श्रूयते। "यथाग्नेः क्षुद्रा विस्फुलिङ्गा व्युच्चरन्ति। एवमेवैतस्मादात्मनः सर्वे प्राणाः सर्वे लोकाः सर्वे देवाः सर्वाणि भूतानि सर्व एवात्मानो व्युच्चरन्ति" इति। तस्माद्यथाग्नेर्विस्फुलिङ्गो जायते। तथा ब्रह्मण आत्मानो जायन्त इति प्राप्ते ब्रूमः। आत्मा न जायते। "न जायते म्रियते वा विपश्चित्" इति श्रुतेः। नित्यो नित्यानां चेतनश्चेतनानाम्" "ज्ञाज्ञौ द्वावजावीशानीशौ" इत्यादिश्रुतेर्नित्यत्वावगतेश्च सृष्टेः प्राग्ब्रह्मणोऽवधारणम्। तदाकृतिभूतस्याचिद्वस्तुनश्च नामरूपव्यवहाराभावात्। न जीवादिस्वरूपासत्तया। विस्फुलिङ्गश्रुतिश्च तेषां नामरूपसमुन्मेषाभिप्राया। न जन्मपरा। अन्यथा कृतनाशादिदोषप्रसङ्गात्[2]। तस्माद्ब्रह्मणो न जायत एव जीवः ॥ १८ ॥

॥ ज्ञोऽत एव ॥ १९ ॥

पूर्वत्र नित्यतया जीवः सिद्धः। पुनरत्रास्य स्वाभाविकं ज्ञानमस्ति न वेति संदिह्यते। एवं सति पूर्वपक्षः। जीवस्य स्वाभाविकं ज्ञानधर्मित्वं नास्तीति। "ज्ञाज्ञौ द्वौ" इति जीवस्याज्ञत्वमेव हि श्रूयते। तस्मादज्ञ एवासौ चैतन्यमात्ररूपः[3]। किंतु मायाशक्त्यवच्छेदादवाप्तशरीरकरणादिरयं घटः पटोऽयं मनुष्योऽहं देवोऽहमिति कल्पिताहंकारबद्धः संसरतीति संसारदशायामज्ञ एवायं जीवः। स्वतोऽस्य ज्ञातृत्वं[4] नास्त्येव। अन्यथास्य कुतो मुक्तिरिति।

एवं प्राप्ते ब्रूमः। ज्ञातैवायमात्मा। "अथ यो वेदेदं जिघ्राणीति स आत्मा मनसैतान् कामान् पश्यन् रमते" "य एते ब्रह्मलोके" "मनोऽस्य दैवं चक्षुः" इत्यादिश्रुतेर्धर्मभूतं ज्ञानमेवास्य मनः। अतः स्वत एवायं ज्ञाता। यदुक्तं मायाशक्तिसंबन्धात् संसारदशायां ज्ञातृत्वमस्येति। तत् सत्यम्। मायाशक्तिकवलितस्वाभाविकज्ञानशक्तिविलासोऽयं प्राकृतमनःसंबन्धाद्भोक्ता सुखदुःखयोर्ज्ञाता शरीराहंकारमात्रविश्रान्तः संसरति हि जीवः। यदा पुनरस्य ब्रह्मज्ञानोपासनाभ्यामेन मलत्रयसंबन्धोऽपैति। तदासौ ब्रह्मसदृशोऽभिव्यक्तनैर्जनिरतिशयज्ञानधर्मा मुक्त इत्युच्यते।

किंच, "प्राणारामं मन आनन्दम्" इति ब्रह्मणो निरतिशयात्मानन्दविषयं मनः स्वाभाविकं करणमवगम्यते। तत्सदृशगुणत्वादपगतसंसारस्य जीवस्य स्वरूपानन्दानुभवसाधनं मनोरूपमन्तःकरणमनपेक्षितबाह्यकरणमस्तीति गम्यते। "ज्ञाज्ञौ" इति जीवस्याज्ञत्वं किंचिज्ज्ञत्वमेव। असंसारिणः परमेश्वरस्य तु सर्वज्ञत्वमुच्यते। अतः संसारे किंचिज्ज्ञत्वं मुक्तौ सर्वज्ञत्वमिति ज्ञातैवात्मा ॥ १९ ॥

॥ उत्क्रान्तिगत्यागतीनाम् ॥ २० ॥

पूर्वत्र ज्ञातृत्वेन सिद्धस्यात्मन उत्क्रान्त्यादिदर्शनादणुत्वमवगम्यते। तद्युज्यते न वेति संदेहः। नास्याणुत्वमुपपद्यते। "स वा एष महानज आत्मा" इति जीवस्य विभुत्वावगमात् "अहं विश्वं भुवनमभ्यभवम्" इति तस्य व्याप्त्या सकलभुवनाभिभावित्वावगमाच्च सर्वथायमात्मा विभुरिति प्राप्ते निरूप्यते। अणुरेवायमात्मा। उत्क्रान्तिगत्यागतीनां श्रुतेः। "तेन प्रद्योतेनैष आत्मा निष्क्रामति" इति ह्युत्क्रान्तिः श्रूयते। "ये चैके चास्माल्लोकात् प्रयन्ति चन्द्रमसमेव ते गच्छन्ति" इति गतिः। "तस्माल्लोकात् पुनरेत्यास्मै लोकाय कर्मणे" इत्यागतिः। विभुत्वे जीवस्यैता उत्क्रान्तिगत्यागतयो नोपपद्येरन् ॥ २० ॥

यद्यपि शरीरवियोगरूपोत्क्रान्तिर्विभुत्वेऽप्यात्मनः स्यात्, तथापि गत्यागती नैवमित्याह ॥

॥ स्वात्मना चोत्तरयोः ॥ २१ ॥

उत्तरयोर्गत्यागत्योः स्वात्मनैव संपाद्यत्वादणुरयमात्मा। यदुक्तम्। "महानज आत्मा" तदीश्वरप्रकरणान्नैतद्विषयमिति वक्ष्यति। व्याप्त्या विश्वभुवनाभिभावित्वं यदुक्तम्। तत् तु। मलतिरोधानापगमप्रकटितशक्तिमरीचिव्याप्तमुक्तजीवविषयम्। तस्मादणुरेवात्मा[1] ॥ २१ ॥

आशङ्क्य परिहरति ॥

॥ नाणुरतच्छ्रुतेरिति चेन्नेतराधिकारात् ॥ २२ ॥

"स वा एष महानज आत्मा" इति श्रुतेर्नाणुर्जीव इति चेन्न। "यस्यां तु वित्तः प्रतिबुद्ध आत्मा" इति परमेश्वराधिकारात् ॥ २२ ॥

॥ स्वशब्दोन्मानाभ्यां च ॥ २३ ॥

"एषोऽणुरात्मा चेतसा वेदितव्यो यस्मिन् प्राणः पञ्चधा विवेश" इति श्रुतावणुशब्दात्,

"आराग्रमात्रो ह्यवरोऽपि दृष्टः"

इत्युन्मानाच्च, अणुरात्मा। अणुसदृशं वस्तूदाहृत्य तन्मानत्वप्रदर्शनमुन्मानम् ॥ २३ ॥

अणुत्वेऽस्य सकलदेहव्यापिवेदनानुभवः कुत इत्यत आह ॥

॥ अविरोधश्चन्दनवत् ॥ २४ ॥

यथा चन्दनबिन्दुरेकदेशस्थोऽपि सकलदेहव्यापिसुखं जनयति। तद्वदविरोधः ॥ २४ ॥

१ जडीकृतभूतस्या—इति पा०।

२—प्रसङ्ग इति पा०।

३ नाचेतनमात्ररूपः इति पा०।

४ यो ज्ञानाज्जीवस्य स्वतो ज्ञातृत्वं इति पा०।

१ स्वशब्दोऽवधारणार्थः। उत्तरयोर्गमनागमनयोः स्वात्मप्रयुक्तत्वमेव वाच्यम्। उत्क्रान्तेस्तु स्वोपाधिकत्वेऽपि संभवादित्यर्थः॥ २१ ॥ इत्येव पा०।

पुनराशङ्क्य परिहरति ॥

॥ अवस्थितिवैशेष्यादिति चेन्नाभ्युपगमाद्धृदि हि ॥ २५ ॥

देशविशेषस्थितेश्चन्दनस्यास्तीति चेत् । न । आत्मनोऽपि तदभ्युपगमात् । "हृदि ह्ययमात्मा योऽयं विज्ञानमयः प्राणेषु हृद्यन्तर्ज्योतिः पुरुष" इति श्रुतेः । इति मतान्तरम् ॥ २५ ॥

स्वमतमाह ॥

॥ गुणाद्वा लोकवत् ॥ २६ ॥

आत्मा स्वगुणेन ज्ञानेन सकलदेहं व्याप्यानुभवति । यथा मणिः स्वकीयेन तेजसा संनिहितं व्याप्य प्रकाशयति । तस्मादविरोधः ॥ २६ ॥

ज्ञानात्मनोर्व्यतिरेको नास्तीत्यत्राह ॥

॥ व्यतिरेको गन्धवत् तथाहि दर्शयति* ॥ २७ ॥

गन्धवती पृथिवीतिवद्, गन्धमहं जानामीति गुणत्वेनोपलब्धेर्ज्ञानात्मनोर्व्यतिरेकोऽस्ति । दर्शयति च श्रुतिर्व्यतिरेकं "जानात्येवायं पुरुष" इति ॥ २७ ॥

॥ पृथगुपदेशात् ॥ २८ ॥

आत्मनः पृथग[1]पदिश्यते ज्ञानम् । "न विज्ञातुर्विज्ञातेर्विपरिलोपो विद्यत" इति । एवं नित्यज्ञानगुणक आत्मा सिद्धः ॥ २८ ॥

एवं ज्ञानगुणकत्वेऽप्यात्मनः कथं ज्ञानमात्रत्वव्यपदेश इत्यत आह ॥

॥ तद्गुणसारत्वात् तु तद्व्यपदेशः प्राज्ञवत् ॥ २९ ॥

ज्ञानगुणसारत्वादात्मनो ज्ञानव्यपदेशः । न ज्ञानमात्रत्वात् । यथा प्राज्ञस्य विपश्चितोऽपि सत्यं ज्ञानमिति । ततो ज्ञानमात्रत्वव्यपदेशे दोषो न भवत्यात्मन इति ॥ २९ ॥

पुनरुपपत्तिमाह ॥

॥ यावदात्मभावित्वाच्च न दोषस्तद्दर्शनात् ॥ ३० ॥

आत्मस्वरूपानुबन्धित्वाज्ज्ञानस्य, तेन व्यपदेशे न दोषः । स्वरूपानुबन्धिधर्मत्वेन गोत्वादिना षण्ढादेर्गौरित्यादिव्यपदेशो दृश्यते । अतः स्वरूपानुबन्धित्वाज्ज्ञानधर्मस्य तद्व्यपदेशः ॥ ३० ॥

सुषुप्त्यादिष्वसतो ज्ञानस्य यावदात्मभावित्वं कथमित्यत आह ॥

* शंकरमते व्यतिरेको गन्धवत् इत्येकं तथा च दर्शयति, इत्याकारकमपरमिति सूत्रद्वयम् ।

१ पृथक्त्वेनो—इति पा० ।

॥ पुंस्त्वादिवत् तस्य सतोऽभिव्यक्तियोगात् ॥ ३१ ॥

सुषुप्त्यादिषु सतो ज्ञानस्यानभिव्यक्तस्यापि जागरितादावभिव्यक्तिसंभवात् स्वरूपानुबन्ध्येव ज्ञानम् । यथा पुंस्त्वासाधारणसप्तमधातोर्बाल्येऽपि सतो युवत्वेऽभिव्यक्तिः । ततो ज्ञानस्यात्मस्वरूपानुबन्धित्वे न दोषः ॥ ३१ ॥

आत्मनो ज्ञातृत्वाणुत्वप्रतिपादनप्रयोजनमाह ॥

॥ नित्योपलब्ध्यनुपलब्धिप्रसङ्गोऽन्यतरनियमो वान्यथा ॥ ३२ ॥

अन्यथा ज्ञप्तिमात्रसर्वगतत्वपक्षे तावन्नित्यवत् सर्वदोपलब्धिः स्यात् । संकोचा[1]भावात् । विद्यमानाया अनुपलब्धेरपि स एव हेतुरिति सापि सर्वदा स्यात् । आगन्तुकज्ञानसर्वगतात्मपक्षेऽपि स एव दोषः । सर्वात्मनां सर्वगतत्वेन ज्ञानहेतूनां मनःसंयोगादीनां सर्वसाधारणत्वात् । अदृष्टहेतूनामपि तथात्वात् तेनापि न नियमः । अथोपलब्ध्यनुपलब्ध्योर्विरोधादुपलब्धेर्हेतवः स्युः । अनुपलब्धेर्वा । तथा सत्यन्यतरनियमः स्यात् । अतः पूर्वोक्तमेव समीचीनम् ॥ ३२ ॥

॥ कर्ता शास्त्रार्थवत्त्वात् ॥ ३३ ॥

ज्ञातृत्वमणुत्वं च निरूपितमात्मनः । कर्तृत्वमस्ति न वेति संदेहः । कूटस्थस्यात्मनः कर्तृत्वं न संभवति । बुद्धेर्वा कर्तृत्वमुचितं प्रकृतेर्वा । तदध्यासात् स्वस्मिन्नारोप्य कर्तेव प्रतिभाति । तस्मादात्मनः कर्तृत्वमनुपपन्नमिति पूर्वः पक्षः ।

सिद्धान्तस्तु । आत्मा कर्तैव । शास्त्रार्थवत्त्वात् । अन्यथा कुर्यान्न कुर्यादिति शास्त्रस्य वैयर्थ्यं स्यात् ॥ ३३ ॥

॥ उपादानाद्विहारोपदेशाच्च* ॥ ३४ ॥

"एवमेवैष एतान् प्राणान् गृहीत्वा स्वशरीरे यथाकामं विपरिवर्तत" इत्युपादानविहारोपदेशाभ्यां चायं कर्तैव ॥ ३४ ॥

यदुक्तं बुद्धिप्रकृत्योरेव कर्तृत्वमिति । तत्र बुद्धेः कर्तृत्वपक्षं दूषयति[2] ॥

व्यपदेशाच्च क्रियायां न चेन्निर्देशविपर्ययः ॥ ३५ ॥

"विज्ञानं यज्ञं तनुत" इत्यादिना यज्ञादौ कर्तृत्व[3]व्यपदेशाच्चात्मैव कर्ता । विज्ञानशब्दो बुद्धेरात्मनो नेति चेन्न । तथा सति विज्ञानेनेति निर्देशविपर्ययः स्यात् । अन्यत्र हि बुद्धिविवक्षा, न शब्दस्य कारणविभक्तिनिर्देशो दृश्यते । "तदेषां

१—चे कारणा—इति पा० ।

* शंकरमते विहारोपदेशात्, इति प्रथमं; उपादानात्, इति चकाररहितं द्वितीयं सूत्रमिति ।

२ तत्राह इति पा० ।

३ क्रियाकर्तृत्व—इति पा० ।

प्राणानां विज्ञानेन विज्ञानमादाय" इति। अतो बुद्धेः करणत्वात् कर्तृत्वं नास्तीति[1] ॥ ३५ ॥

प्रकृतेः कर्तृत्वपक्षं दूषयति ॥

॥ उपलब्धिवदनियमः ॥ ३६ ॥

प्रकृतेः कर्तृत्वे तस्याः सर्वसाधारणत्वेन पूर्वोक्तोपलब्धिनियमवत् फलानियमः स्यात् ॥ ३६ ॥

॥ शक्तिविपर्ययात् ॥ ३७ ॥

प्रकृतेः कर्तृत्वे कर्तुरेव भोक्तृत्वमिति सैव भोक्त्री स्यात्। ततश्चात्मनो भोक्तृत्वशक्तेर्विपर्ययो हानिः स्यात् ॥ ३७ ॥

॥ समाध्यभावाच्च ॥ ३८ ॥

किंच, प्रकृतेरेव कर्तृत्वे प्रकृतेरन्योऽस्मीति समाध्यभावप्रसङ्गाच्च कर्तात्मा ॥ ३८ ॥

॥ यथा च तक्षोभयथा ॥ ३९ ॥

आत्मनः कर्तृत्व इच्छायां करोति। अन्यदा न करोत्यात्मेति व्यवस्था। यथा तक्षा स्वकार्ये, तथेति। अत आत्मनः कर्तृत्वमेव। बुद्धेरेवेच्छासंभवान्नाव्यवस्थेति चेन्न। चेतनधर्मत्वादिच्छायाः। तस्मादात्मनः कर्तृत्वं, न बुद्धेर्नापि प्रकृतेरिति निर्णयः ॥ ३९ ॥

॥ परात् तु तच्छ्रुतेः ॥ ४० ॥

ज्ञातृत्वं कर्तृत्वं च प्रतिपादितमात्मनः। तत् कर्तृत्वं स्वायत्तमीश्वरायत्तं वेति संदेहः। स्वायत्तमिति प्राप्तम्। अन्यथा कर्मस्विष्टानिष्टरूपेषु प्रवर्तयन् जीवमीश्वरो वैषम्यादिदोषभाजनं स्यात्।

किंच, जीवस्य प्रवृत्तेरीश्वरायत्तत्वे तस्य कर्तृत्वाभावाद्विधिप्रतिषेधवैयर्थ्यं स्यात्। तस्माज्जीवस्य स्वायत्ता प्रवृत्तिः। इति प्राप्ते ब्रूमः। परमेश्वरायत्तमेव जीवस्य कर्तृत्वं न स्वायत्तम्। "य आत्मानमन्तरो यमयति" इति श्रुतेः ॥ ४० ॥

यदुक्तमीश्वरस्य जीवं प्रवर्तयतो वैषम्यादिकम्। अस्य च विधिप्रतिषेधवैयर्थ्यमिति। तत्राह ॥

॥ कृतप्रयत्नापेक्षस्तु विहि-
तप्रतिषिद्धावैयर्थ्यादिभ्यः ॥ ४१ ॥

जीवः स्वेच्छया प्रवृत्तिनिवृत्तिहेतुं करोति स्वकर्मपाकवशेन। जीवकृतप्रयत्नं प्रवृत्तिनिवृत्तिहेतुमवेक्ष्य तदनुमतिदानेन परः प्रवर्तयतीति विधिनिषेधावैयर्थ्यादि नियहादिभ्योऽवगम्यते। यथा गुरुतरदार्वादिहरणं बालः प्रबलसहायः कुर्वन्नपि स्वप्रयत्ने विधिनिषेधयोग्यो भवति। एवं जीवः परमेश्वरसहायः प्रवर्तमानोऽपि स्वयं विधिनिषेधयोग्यो भवति। अतो जीवकृतप्रयत्नापेक्षत्वात् कर्मसु जीवस्य प्रवर्तक ईश्वरो न वैषम्यभाक्। तस्यापि स्वाधीनप्रवृत्तिसद्भावाद् विधिनिषेधादिवैयर्थ्यं न संभवतीति सिद्धम् ॥ ४१ ॥

अंशो नानाव्यपदेशादन्यथा चा-
पि दाशकितवादित्वमधीय एके ॥ ४२ ॥

नित्यो ज्ञातैव कर्ता परमेश्वरः। साहाय्यापेक्षप्रवृत्तिर्जीव, इति पूर्वत्र निरूपितम्। स इह परमेश्वर एव किंवा तदंशभूत इति प्राप्ते संशये परमेश्वर इति पूर्वः पक्षः[1]। परमेश्वर एव बहुविधोपाधिवशाज्जीवभावमुपगतो दृश्यते। यथैकमाकाशं घटाद्युपाधिवशान्नानाकारं दृश्यते परिच्छिन्नं च[2]। तथाहि, श्रुतिरयमात्मा ब्रह्म इति वदति। तस्मादीश्वर एवाज्ञानाज्जीवभावमुपगत[3] इति। सिद्धान्तस्तु जीवात्मा परमेश्वरस्यांशो मूर्त्येकदेश एव। "अनेन जीवेनात्मनानुप्रविश्य नामरूपे व्याकरवाणि" "य आत्मनि तिष्ठन्" "पृथगात्मानं प्रेरितारं च मत्वा"

मायां तु प्रकृतिं विद्यान्मायिनं तु महेश्वरम्।
तस्यावयवभूतेन व्याप्तं सर्वमिदं जगत् ॥

इत्यादिषु नानाव्यपदेशात्। यदुक्तम्। "अयमात्मा ब्रह्म" इत्यादिना ब्रह्मण एव जीवत्वमिति। तत्राह। अन्यथा "तत् त्वमसि" "अयमात्मा ब्रह्म" इत्यादिकाद्व्यपदेशात् तयो[4]र्जीवब्रह्मणोर्व्याप्यव्यापकभावेनानन्यत्वम्।

अपिच तथैवानन्यत्वमधीयत एके[5]।

"ब्रह्मदाशा ब्रह्मदासा ब्रह्मेमे कितवा उत"

इत्यादिना ब्रह्मणोंऽशत्वेऽपि जीवस्य तद्व्याप्ततया तद्व्यपदेशो युक्तः। यथा वह्निना व्याप्तस्य काष्ठादेर्वह्निव्यपदेशः। तथापि हि तयोर्वह्निकाष्ठयोर्नाभेदः। तस्माज्जीवो ब्रह्मणोंऽशभूत एव तत्स्वरूपं प्रतिपद्यते[6]। ब्रह्मण एवाज्ञानाज्जीवभावकल्पने बहुश्रुतिविरोधादिदोषप्रसक्तिर्दुर्वारा[7] ॥ ४२ ॥

॥ मन्त्रवर्णात् ॥ ४३ ॥

"पादोऽस्य विश्वा भूतानि" इति मन्त्रवर्णाच्च ब्रह्मणोंऽश एव जीवः।

---

१ स्यात्। बुद्धेः करणत्वमेव हि। अतश्च बुद्धेः कर्तृत्वं नास्त्येव इति पा०।

१ पूर्वं निरूप्यते इति पा०।
२—चमेव इति पा०।
३—वमापच इति पा०।
४ इत्यादिकोपदेशोक्तयो—इति पा०।
५—नानन्यत्वमधीयत एके इति वरपा०।
६—पः प्रतिभाति इति पा०।
७—धाद्यव्यवस्थाप्राप्तिर्दुर्वारा भवति इति पा०।

"मायां तु प्रकृतिं विद्यान्मायिनं तु महेश्वरम् ।
तस्यावयवभूतेन व्याप्तं सर्वमिदं जगत्" ॥

इति श्रुतिः प्रकृतित्वं मायायास्तद्विशिष्टत्वं महेश्वरस्य तदवयवभूतत्वं सर्वस्य जगतः प्रकटयति । ततो मायिनः परमेश्वरस्यावयवलेशः पुरुषः ॥ ४३ ॥

॥ अपि* स्मर्यते ॥ ४४ ॥

"आत्मा तस्याष्टमी मूर्तिः शिवस्य परमात्मनः ।
व्यापिकेतरमूर्तीनां विश्वं तस्माच्छिवात्मकम्" ॥

इति स्मरणाच्च शिवस्य मूर्त्येकदेश आत्मा ॥ ४४ ॥

॥ प्रकाशादिवन्नैवंपरः ॥ ४५ ॥

ब्रह्मणोंऽशत्वेऽपि जीवो यत्स्वरूपो यत्स्वभावश्च नैवं परमेश्वरः । किंतु सर्वज्ञत्वादियुक्त एव । कथम् । प्रकाशादिवत् । प्रकाशविशिष्टानां मणिप्रभृतीनां प्रकाशो विशिष्टैकदेशो यथांशः । तद्वज्जीवशरीरतया जीवविशिष्टस्य ब्रह्मणोंऽशो जीवः[1] । आदिशब्दाद्विशेषणैकस्वभावा जातिगुणादयो गृह्यन्ते । विशेषणानां विशिष्टैकदेशतया तदंशत्वेऽपि विशिष्टस्वरूपभेदो न विरुद्धः । "य आत्मनि तिष्ठन्" इत्यादिश्रुतेः ॥ ४५ ॥

॥ स्मरन्ति च ॥ ४६ ॥

"विग्रहं देवदेवस्य जगदेतच्चराचरम् ।
एतमर्थं[2] न जानन्ति पशवः पाशगौरवात्" ॥

इत्यादि । ततो ब्रह्मणोंऽश एव जीवः । तद्विशिष्टतया स्वरूपभेदश्च सिद्धः ॥ ४६ ॥

॥ अनुज्ञापरिहारौ देहसंबन्धाज्ज्योतिरादिवत् ॥ ४७ ॥

सर्वेषां जीवानां ब्रह्मांशत्वेऽपि कथं कस्यचिद्वेदादिष्वनुज्ञा कस्यचित् परिहार इति चेत् । ब्राह्मणदेहादिसंबन्धात् तदुपपत्तिः[3] । यथाग्न्यादेः श्रोत्रियागारश्मशानादिसंबन्धात् । तद्वदविरोधः ॥ ४७ ॥

॥ असंततेश्चाव्यतिरेकः ॥ ४८ ॥

असंततिरव्याप्तिः । प्रतिशरीरं भिन्नत्वात् तत्र तत्राणुत्वेनावच्छिन्नत्वादसंततेरव्याप्त्या च स्थूलोऽहं कृशोऽहं सुख्यहं दुःख्यहं ब्राह्मणोऽहं क्षत्रियोऽहमिति देहाभिमानिनां मानससुखाद्यव्यतिरेको भवति । किमुक्तं भवति । देहाभिमानिनां व्याप्त्यभावस्य समानत्वात् परिच्छिन्नज्ञानसुखादिकं[1] सांसारिकमेवासंकीर्णं भवति[2] । अनेन परब्रह्मज्ञानविशेषेण विगलितदेहाभिमानानां महाव्याप्त्या पराहंभावं[3]मुपगतानां मुक्तात्मनां निरतिशयत्वेन नित्यत्वेन च ज्ञानसुखादीनां स्वाभाविकानां सांसारिकज्ञानादितो व्यतिरेक[4] इति सिद्धम् ॥ ४८ ॥

अज्ञानोपाधिभ्यां ब्रह्मैव संबध्यत इति यदुक्तं तत्र पक्षद्वयेऽपि न व्यवस्थेत्याह ॥

॥ आभास एव च ॥ ४९ ॥

सत्यपि मिथ्योपाधिभ्यां बद्धस्य ब्रह्मण एव जीवभाव इति पक्षद्वयेऽपि युक्तय आभासा एव ॥ ४९ ॥

तथाहि ॥

॥ अदृष्टानियमात् ॥ ५० ॥

सत्यमिथ्योपाधिकृतत्वे ह्यात्मनां ब्रह्मण एवाज्ञानमुपाधिश्च । इति तत्कृतेनादृष्टेनापि न नियमः ॥ ५० ॥

किंच ॥

॥ अभिसंध्यादिष्वपि चैवम् ॥ ५१ ॥

अदृष्टहेतुभूताभिसंध्यादिषु चैवमेव नियमाभावः ॥ ५१ ॥

॥ प्रदेशादिति चेन्नान्तर्भावात् ॥ ५२ ॥

उपाधिसंबन्धिब्रह्मप्रदेशभेदाद् व्यवस्थेति चेत् । उपाधिषु गच्छत्सु सर्वप्रदेशानां तदन्तर्भावात् । तस्मात् सत्यं मिथ्योपाधिपरिच्छिन्नब्रह्मजीवत्वपक्षद्वयेऽपि न व्यवस्था संभवति । ततो ब्रह्मणोंऽशभूतो जीवस्तद्विशेषणैकस्वभाव इति युक्तमेव ॥ ५२ ॥

इति श्रीकण्ठशिवाचार्यविरचिते ब्रह्ममीमांसाभाष्ये द्वितीयस्याध्यायस्य तृतीयः पादः ॥ ३ ॥ :: :: ॥

* अपि च स्मर्यते इति शंकरमते सूत्रपाठः ।

१ यथांशः । इत्येव पा० ।

२ एतदर्थं इति पा० ।

३—न्यविशेषात् तावुपपन्नौ ।

१ सामान्यात् परिच्छिन्नज्ञानस्य इति पा० ।

२—व, एकप्रकारकमेवासंकीर्णं भवतीति इति पा० ।

३ पराङ्गभाव—इति पा० ।

४—कजात्यादेर्व्यतिरेक इति पा० ।

॥ अथ समभगडलप्रवेशप्रकरणम् ॥

यामुने नु पुलिने विहारिणं
हारिणं प्रणतगोपयोषिताम् ।
मानसस्य हृदि नन्दनन्दनं
नन्दनं मुनिहृदां स्मराम्यहम् ॥ १ ॥

प्रश्नः ।

द्राक् समवृत्तस्थरवौ वीक्ष्य नतासूनपमम् ।
ब्रूत पलाभां सुधियो माणवकाक्रीडितत: ॥ २ ॥

अस्य भङ्गः ।

त्रिज्यार्कघातो नतकालकोटि-
ज्यया हृतः स्यात् परसंज्ञ एषः ।
द्युज्याहृतः क्रान्तिगुणेन निघ्नः
पलप्रभा स्यात् सुधियेदमूह्यम् ॥ ३ ॥

प्रश्नः ।

सवितरि सममण्डलाश्रिते यो
नतसमयं पलभां च वीक्ष्य शीघ्रम् ।
वदति यदि सुधीरपक्रमज्यां
स तु गणकैः सकलैरपीह वन्द्यः ॥ ४ ॥

अस्य भङ्गः ।

परः पलाभाविहृतोऽस्य वर्गात्
सैकात् पदं तद्विहृता त्रिजीवा ।
स्यात् क्रान्तिजीवाथ पलप्रभान्यौ
व्यत्यस्य सिध्येद्यदियं द्युजीवा ॥ ५ ॥

अस्य प्रश्नस्य श्रीमद्गुरुचरणोक्तः प्रकारान्तरेण भङ्गः ।

पलप्रभाघ्नी नतकालकोटि-
ज्यका त्रिभज्याविहृता यदाप्तम् ।
अक्षप्रभां तत् प्रविकल्प्य साध्या
पलज्यका क्रान्तिगुणः स एव ॥ ६ ॥

प्रश्नः ।

नतकालं वीक्ष्य रवौ समाख्यवृत्तं समायाते ।
कुज्योनतद्युतिज्ञ द्राक् क्रान्तिज्याक्षभे ब्रूहि ॥ ७ ॥

अस्य भङ्गः ।

कुज्योनतद्युतिनतासुजकोटिमौर्व्यो-
र्वर्गान्तरात् पदमिदं परसंज्ञनिघ्नम् ।
कुज्योनतद्युतिसमाहतमक्षभातः
क्रान्तिज्यका निजधिया सुधियावगम्या ॥ ८ ॥

प्रश्नः ।

याति रवौ समवृत्तं नतकालं वेधतोऽवगम्येह ।
समवृत्तशङ्कुवेत्तः शीघ्रं क्रान्तिज्यकाक्षभे ब्रूहि ॥ ९ ॥

अस्य भङ्गः ।

दृग्ज्या त्रिजीवागुणिता नतासु-
ज्यया विभक्ता द्युगुणो भवेत् सः ।
ततो ऽक्षभापक्रमजीवयोः स्याज्
ज्ञानं झटित्येव बुधाग्रणीनाम् ॥ १० ॥

प्रश्नः ।

वीक्ष्याग्रकां च समवृत्तसमाश्रितेऽर्के
ज्ञात्वा नतं समयमाशु वदेत् पलाभाम् ।
क्रान्तिज्यकां च गणितार्णवपारगोऽसौ
धीरेव चाच सुधियां प्रतिभूत्वमेति ॥ ११ ॥

अस्य भङ्गः ।

त्रिज्यावर्गार्धहृताग्रालवकोटिज्यकाकृतिः प्रथमः ।
नतकालकोटिजीवाविहृताग्रायाः कृतिस्त्वन्यः ॥ १२ ॥

या परयुक्ताद्यकृतिस्तन्मूलादाद्यहीनितान्मूलम् ।
भानुहतं पलभा स्यादपमज्यातो ऽवगन्तव्या ॥ १३ ॥

प्रश्नः ।

मार्तण्डे प्रविशति सति सममण्डलमत्र वीक्ष्य नतकालम् ।
तद्धृतिमपि बुध्वाशु क्रान्तिज्यामक्षभां च मे ब्रूहि ॥ १४ ॥

अस्य भङ्गः ।

नतकालकोटिजीवातद्धृतिघातो नतासुगुण कृत्या ।
द्विघ्न्या हृतोऽस्य वर्गान्नतासुजीवाहृतत्रिभज्यायाः ॥ १५ ॥
कृत्या युक्तान्मूलं फलोनितं त्रिज्यया गुणितम् ।
द्युज्या भवेदिहातः सुगमः पलभापमज्यकावगमः ॥ १६ ॥

प्रश्नः ।

भास्वति तिष्ठति यः सम्रवृत्तं
वीक्ष्य नतं समयं कुगुणं च ।
वेत्त्यचिरात् पलभामपमज्यां
स्याद् गणितामृतदोहक एषः ॥ १७ ॥

अस्य भङ्गः ।

नतासुकोटिज्यकया विनिघ्नी
क्षितिज्यका व्यासदलार्धभक्ता ।
लब्धत्रिमौर्व्योः कृतियोगमूलं
लब्धोनितं स्याद् द्युगुणोऽक्षभातः ॥ १८ ॥

प्रश्नः ।

समवृत्तनरोर्ध्वखण्डवेदिन्
नतकालं सममण्डलाश्रितेऽर्के ।
अभिवीक्ष्य वदाक्षभापमज्ये
गणिते ते सुमतेऽस्ति पाटवं चेत् ॥ १९ ॥

अस्य भङ्गः ।

नतकालज्यावर्गात् समवृत्तनरोर्ध्वखण्डकार्धहतात् ।
नतकालकोटिमौर्व्याः कृत्या विहृतात् फलं यत् स्यात् ॥ २० ॥

तत्त्रिज्यावर्गयुतेर्मूलं लब्ध्योनमत्र समशङ्कुः ।
स्यादस्मात् क्रान्तिज्यापलभे स्तः प्रोक्तमार्गेण ॥ २१ ॥

प्रश्नः ।

नतासून् ज्ञात्वा यो विशति समवृत्तं दिनमणौ
नरं चोद्वृत्तेऽर्के वदति पलभापक्रमगुणौ ।
प्रशास्तारं मतेभगणकगणानां भुवि न के
विदुर्ज्योतिःशास्त्रे हिमशिखरिणीमं मृगरिपुम् ॥ २२ ॥

अस्य भङ्गः ।

दृग्ज्याशङ्कू ये स्त उद्वृत्तगेऽर्के
ते विज्ञेयौ दृग्ज्यकाशङ्कुभिख्यौ ।
या स्यात् कोटिज्या नतासूद्भवा तद्-
दृग्ज्याघातेनाहृतात् त्रिज्यकाघ्नात् ॥ २३ ॥
शङ्कोर्लब्धेर्वर्ग आद्यस्तदाढ्यो
दृग्ज्यावर्गेणोद्धृतः शङ्कुवर्गः ।
अन्याख्यः स्यादर्धितान्यस्य वर्गा-
दाद्येनाढ्यान्मूलमन्यार्धयुक्तम् ॥ २४ ॥
तस्मान्मूलं भानुनिघ्नं पलाभा
स्यात् क्रान्तिज्यातः प्रसाध्या सुधीभिः ।
स्पष्टं चैतद्धीमतां यन्मयोक्तं
तन्मन्दानामेव बोधाप्तिहेतुः ॥ २५ ॥

प्रश्नः ।

निरीक्ष्य समयं नतं तु समवृत्तगेऽर्केऽग्रका-
दिखण्डमपि वीक्ष्य योऽपमगुणाक्षभे वक्त्यसौ ।
सगोलगणिते सरस्यमितताम्त्रिकैः सारसा-
लिभिर्विलसितेऽप्यलं लसति राजहंसः सुधीः ॥ २६ ॥

अस्य भङ्गः ।

नतकालकोटिजीवाग्रादिमखण्डोद्धृते क्रमतः ।
नतकालज्यात्रिज्ये तत्कृत्योरन्तरार्धमाद्याख्यम् ॥ २७ ॥
स्वघ्नं द्वितीयखण्डं परोऽन्यहीनादथाद्यकृतेः ।
पदमेतदूनयुक्तादाद्यान्मूलं रविघ्नगुणम् ॥ २८ ॥
द्विविधः पलकर्णः स्यादस्मादक्षप्रभापमज्ये च ।
द्विविधे स्यातामेतत् स्पष्टं सुधियां धियामग्रे ॥ २९ ॥

प्रश्नः ।

स्वपूर्वापरं वृत्तमाप्ते नतासून्
दिनाधीश्वरे वीक्ष्य चाथो चरासून् ।
अभिज्ञाय विज्ञः पलाभामवैति
तदीयं तु कः साम्यमत्राभ्युपैति ॥ ३० ॥

अस्य भङ्गः ।

सूत्रभक्तचरज्याया मूलं द्वादशभिर्हतम् ।
पलभा स्यात् ततः साध्यो रीत्या पूर्वोक्तयापमः ॥ ३१ ॥

प्रश्नः ।

समवृत्तगते भानौ नतकालं चाक्षजं वलनम् ।
वीक्ष्याक्षभापमज्ये छायां च वदाशु मे विद्वन् ॥ ३२ ॥

अस्य भङ्गः ।

नतासुगुणभाजिताक्षवलनज्यकाथो नता-
सुकोटिगुणतो यदाक्षवलनस्य कोटिज्यया ।
हृतात् फलमथैतयोर्वध इदं त्रयं त्रिज्यका-
हतं त्विह पलज्यकासमनरापमज्याः क्रमात् ॥ ३३ ॥

प्रश्नः ।

अग्राग्रखण्डमभिवीक्ष्य समाख्यवृत्तं
याते तु भास्वति नतं समयं च वीक्ष्य ।
द्रागेव योऽपमगुणं पलभां च वेद
कीदृक् तदस्ति गणितं यदयं न वेद ॥ ३४ ॥

अस्य भङ्गः ।

अग्राग्रखण्डान्नतकालकोटि-
ज्यया हतान्मूलमपक्रमज्याम् ।
प्रकल्पयित्वा द्युगुणं क्षितिज्यो-
नतद्धृतिं चापि समाख्यशङ्कुम् ॥ ३५ ॥
प्रसाधयेत् क्रान्तिगुणेन भक्ता-
ग्रकाग्रखण्डघ्नसमाख्यशङ्कुः ।
कुज्या भवेत् तन्निहतक्षितिज्यो-
नतद्धृतेर्मूलमपक्रमज्या ॥ ३६ ॥
इत्थं मुहुः साध्यमिमाः स्फुटाः स्युः
क्रान्तिज्यकाद्याः पलभा ततश्च ।
एवं गताध्यायवदुक्तयुक्त्या
द्वितीययापि द्रुतमेव सिध्येत् ॥ ३७ ॥
श्रीबालशास्त्रिविदुषां सविधं पठित्वा
प्राक् शब्दशास्त्रमथ तज्जनितावबोधः ।
श्रीबापुदेवगुरुवर्यकृपाकटाक्षात्
सज्ज्यौतिषं प्रपठतीह विनायको यः ॥ ३८ ॥

तन्निर्मिते कतिपयप्रश्नविचाराभिधप्रबन्धेऽस्मिन् ।
सप्तमण्डलप्रवेशप्रकरण एतन्नतासुखण्डमभूत् ॥ ३६ ॥

॥ इति सप्तमण्डलप्रवेशप्रकरणे नतकालखण्डं प्रथमं समाप्तमभूत् ॥

THE
VIDVAN-MANO-RANJINI'
OR
REJOICER OF THE MIND OF THE LEARNED.
A COMMENTARY ON SAD-ÁNANDA'S VEDÁNTA-SÁRA, BY RÁMA-TÍRTHA.

(Continued from page 130.)

Thus it is said [*As the much infatuated man, whose sight is obscured by a cloud, thinks that the sun is obscured by a cloud and void of radiance, so the spirit which in the sight of the infatuated is as if it were bound, this the essence whereof is eternal cognition, is the Ego, the soul &c.*] He attributes the aforesaid power of envelopment, mediately through its products, to the understanding.

With this [*There arises in regard to spirit enveloped with this, the impression of agency, fruition, happiness, dolour, and other transmigratory states.*] There arises an impression, the object of which is contradictory, by the influence of particular envelopment of the essence of the substratum or spirit. Of this the author adduces an example. *As in regard* [*to a rope enveloped*] *by illusion appropriated thereto* [*there arises the impression that it is a serpent.*] The author next describes the power of projection.

But the projective power. [*As illusion relative to a rope creates illusorily in the rope enveloped by such illusion by its own power, a snake &c., so illusion also creates illusorily in spirit enveloped by such illusion, by its own power, ether and the rest of the world. Such is the power of projection.*] Here the author cites the agreement of another teacher.

Thus it is said, The projective [*power may create the universe, from the subtile body up to the mundane egg or two firmaments.*] Illusion as characterised by its two powers of envelopment and projection, is the concomitant in causation of the universe to spirit which is absolute, unassociated, without a second, pure intelligence. It has, therefore, been said by competent authority: Illusion, enveloping the essence of self-irradiated spirit, projects it illusorily in the form of individuals souls, God, and the universe, through association with the powers of envelopment and disjection, and by reason of its dependence upon pure spirit only for its object. With reference to the possible inquiry whether the causation of the universe ascribed to the intelligence of God as conditioned by ignorance of this kind, is an operative causality or a material causality, or both, the author proceeds to state.

[*Intelligence having as its concomitant illusion*] *with the two powers thereof* [*is one, as specially considered itself, an operative or efficient cause; and when its concomitant is specially considered, a material cause.*] When itself is specially considered, means when it manifests itself essentially as absolute intelligence. When its concomitant is specially considered means when it is in its form of appearance of existence as tinged by its concomitant. He shows by an example how one thing can be both causes. *As* [*a spider, when itself is principally considered, is in relation to a web the efficient cause, and when its body is principally considered, a material cause.*] As a spider, in its well-known function of spinning webs, independently of the aid of cotton or spinning-wheel, creates threads and the product thereof, the web make of vertical and horizontal lines of thread, so also God, who prior to creation is one only without a second, without an associate, when under the influence of his power of illusion creates the universe from the subtile body up to the mundane egg, or two firmaments. Conformable to this is the Vedic text beginning That which is invisible, incomprehensible; As the spider projects and retracts; As herbs grow on the earth, and as hair from the living man, so the universe below springs from the divine fiat. Thus also the aphorism, And [absolute spirit is] nature, there being no contradiction of thesis or example. The other therefore proceeds to describe the causation of the universe by intelligence, and the order of the production of the universe which is the product thereof.

[*From intelligence conditioned by ignorance or illusion possessing the projective power*] *in which darkness prevails* [*arises ether; from ether, air;*

तदुक्तमित्यादिना । उक्तामावरणशक्तिं तत्कार्य्यद्वारा बुद्धिमारोहयतीत्याह ॥

अनयेति । अधिष्टानस्वरूपविशेषावरणवशेन विपरीतार्थसम्भावना भवतीत्यत्र दृष्टान्तमाह ॥

यथास्वाज्ञानेति । विक्षेपशक्तिं सदृष्टान्तमाह ॥

विक्षेपेति । अत्राप्याचार्य्यान्तरसम्मतिमाह ॥

तदुक्तं विक्षेपेति । आवरणविक्षेपशक्तिद्वयविशिष्टमज्ञानं कूटस्यासङ्गाद्वयचैतन्यात्मनो जगत्कारणत्वोपाधिरिति भावः । तदुक्तमभियुक्तैः । आच्छाद्य विक्षिपति संस्फुरदात्मरूपं जीवेश्वरत्वजगदाकृतिभिर्मृषैव । अज्ञानमावरणविभ्रमशक्तियोगादात्मत्वमात्रविषयाश्रयताबलेनेति । अन्वेवंविधाज्ञानोपाधिकस्येश्वरचैतन्यस्य । यज्जगत्कारणत्वं तन्निमित्तत्वं स्यादुपादानत्वं वा उभयं वेति जिज्ञासायामाह ॥

शक्तिद्वयवदिति । स्वप्रधानतया कूटस्थचैतन्यस्वरूपावभासितया स्वोपाधिप्रधानतया उपाध्युपरक्तसत्तास्फूर्त्तिरूपतयेतिभेदः एकस्योभयविधकारणात्मकत्वे दृष्टान्तमाह ॥

from air, fire; from fire, water; and from water, earth.] It is to be understood from the mention of the predominance of darkness, that there exist therein partially also goodness and passion. He cites authority for the order described as that of the creation of the elements.

[*According to such Vedic texts as*] *From that,* [*from this same spirit ether sprang,&c.*] It may be objected: Ether is not produced, for it is a subject of attributes and actions, like soul. This objection we refuse; since the argument cannot be raised, inasmuch as its object matter is contradicted by the Vedic text quoted above, and it is contradicted by a counter-argument, viz. Ether is produced, for it possesses magnitude, and is an element, like earth &c. possessed of magnitude. Nor can it be rejoined that the argument or middle-term relates to an unestablished subject or minor-term, for the subject, viz ether, is allowed by both disputants. Nor can it be objected that the argument relates to an unascertained subject, resulting from the impossibility of any proof establishing such a determinate object as ether: for though the proof establishing the existence of such propertied object, viz. its nature as the site of sound, does prove merely the existence of a propertied object which may be called soniferous ether, yet this proof does not establish eternity as residing therein. Nor is there in our argument, incompatibility between the middle and minor terms, for it is has been ascertained that the nature of magnitude, and that of being an element, reside in the minor-term. Nor is the middle-term one of unascertained concomitance with the major, as having no concomitant [that is, as not having an attribute attaching universally to the major, but not to the middle.] Nor can the nature of being finite, or that of possessing parts, or that of possessing colour, be such fallacious concomitants [of the major, viz. the nature of being produced, but not of the middle, viz, the possession of magnitude and the nature of an element]; for quality, and action, are not universally accompanied by the major. The nature of being an element, of being a subject of attributes, and possession of universality, are not such fallacious concomitants, for they pervade or universally accompany the middle-term. If you object that possession of universality subordinate to that which is other than the nature of a subject of attributes, is a fallacious concomitant: we deny this for this fallacious concomitant is not concomitant with the major-term in relation to subsequent non-existence, non-existence, though produced, having no universality. Nor should it be rejoined that an objection lies against subsequent non-existence inasmuch as the major-term productibility must inhere in an entity; for it is only production, and not entity, that is predicated of ether. Otherwise there would result an ignoratio elenchi, the substantiality &c. which resides in propertied objects, being predicable of objects which are not in question. No other fallacious concomitant suggests itself; but if you say that ether is not an omnipresent entity, the Vedântins say the same. It being revealed in such texts as Older than the sky, by whom the ether and the heaven were enveloped, that ether is of lesser extension than soul, this cannot be, as against the Vedântin, a fallacious concomitant. Nor is the argument self-repugnant, there being no concomitance with the contradictory of the major-term. Nor is there a general plurality of consequents [in which the middle-term is found both in the minor and in its contradictories], inasmuch as the argument does not apply to contradictory instances. Nor is the argument undistributed, for it applies to its proper subject. Nor is the argument one at all times inapplicable, inasmuch as no tollent or destructive proof can be found. Nor can it be said that the argument we adduce is itself destructive or tollent, for this argument has been stated as having object matter sublated by the Vedic text, like the argument for proving the purity of a human-skull [viz. the skull is pure because it is a human-skull, which is destroyed by the Vedic text: After touching a corpse a man should bathe.] Nor can it be argued that the text as relative only to the eduction of ether, has no relation to its production; for if your argument [that ether is not produced, being a subject of attributes and actions, but containing no parts] be established as not contradicted or sublated, then you may show that the authoritative text may have some other meaning; and again if this different meaning be evinced, then your inference may be allowed; and thus there is a mutual dependency on circular argument. Moreover if you say that the word sprang which is revealed once only in the text From that, from this spirit ether sprang, and which applies directly to ether, is used only in a secondary sense, and the same term again when applied to air and the like has its primary signification, then we re-

यथेति । लूता ऊर्णनाभः तन्तुरेव कार्य्यं तन्तुकार्य्यं यथा लूता तन्तुनिर्म्माणे प्रसिद्धे कार्य्ये सतूलकाष्टयन्त्रादिसहायमनपेक्ष्यैव तन्तूनातानवितानात्मकश्च तत्कार्य्यं जालरूपं सृजति एवमीश्वरः प्राक्सृष्टेरेकएवाद्वितीयोऽसहाय एव स्वमायाशक्त्यावेशमात्रेण लिङ्गादिब्रह्माण्डान्तं जगत्सृजेदिति भावः । तथा च श्रुतिः । यत्तदद्रेश्यमग्राह्यमित्युपक्रम्य यथोर्णनाभः सृजति गृह्णीते च यथा पृथिव्यामोषधयः सम्भवन्ति यथा सतः पुरुषात् केशलोमानि तथाक्षरात्सम्भवतीह विश्वमिति । न्यायोऽपि प्रकृतिश्च प्रतिज्ञादृष्टान्तानुपरोधादिति तदेवं चैतन्यस्य जगत्कारणत्वं प्रपञ्चस्य तत्कार्य्यस्योत्पत्तिक्रमं दर्शयति ॥

तमः प्रधानेति । तमसः प्राधान्यनिर्देशाद्रजःसत्वयोरपि तत्र मात्रया वृत्तिर्द्रष्टव्या । उक्तभूतसृष्टिक्रमे प्रमाणमाह ॥

mark that great is the exegetical skill of the dialectical animal. Nor is this argument vitiated by a doubtful plurality of consequents, since it is manifestly excluded from contradictory instances. Nor does the argument admit an equally valid counter-hypothesis, for your argument being the weaker, both cannot be of equal validity for the nature of impartite substance is found, as it should be, in cloth at the time of its destruction. But if it be objected that by the term impartite is meant a substratum of the absolute non-existence of parts, we disallow the objection: for if the term part means what has position, then since all the positions of the integrate whole are exhausted by the parts, it will follow that there is no such thing as a whole; but if the term part designate the substratum, the argument [viz. the nature of being without parts, that is without a substratum] is invalidated in our doctrine, for we declare the supreme being the substratum of ether; therefore this inference is not a valid counter-hypothesis. Nor can any other alternative be described Therefore since it has been established by an inference that ether is produced, we may pay no attention to superstitious adherence to a dry dialectic, and believe that ether as described in revelation is produced. Allowing for the sake of argument that the atoms have no production, the argument has been qualified by the words for it possesses magnitude. But if we disallow the eternity of atoms, our argument will be that ether is produced simply because it is an element. For atoms are produced in four modes, because they have a limited extension and are elemental, like water-pots and other common-place objects [which have four kinds of extension viz. short and long, minute and great.] Nor can it be objected that the argument from limited extension is inapplicable to the internal organ [that is, that the internal sensory is of limited extension, but has not four kinds of extensions]; for the internal organ is included in the subject of our inference. Nor is there a contradiction of the proof establishing the subject of the attribute [viz. the atoms], for though the existence thereof be established, there is no proof thereby of any eternity and the like residing therein. Nor can be argued that if atoms are themselves products there will be an infinte regress of causes, and consequently no ultimate cause of the universe: for it is notorious from revelation, scripture, sacred history, and the legendaries, that the supreme spirit is the ultimate cause of the universe. Similarly space and time are produced, because they are unconscious entities, like a piece of

तस्मादिति । नन्वाकाशं नोत्पद्यते । निरवयद्रव्यत्वादात्मवदिति चेन्न। उदाहृतश्रुतिबाधितविषयत्वेनानुमानानुत्थानात् प्रत्यनुमानविरोधाच्च तथाहि आकाशमुत्पद्यते महत्त्वे सति भूतत्वात् महापृथिव्यादिवत् । न चाश्रयासिद्धो हेतुः आश्रयस्याकाशस्योभयवादिसिद्धत्वात् । न च धर्म्मिग्राहकप्रमाणबाधनिबन्धनाश्रयासिद्धता हेतोः । धर्म्मिग्राहकप्रमाणेन शब्दाश्रयत्वेनाकाशाख्यधर्म्मिमात्रसिद्धावपि तद्गतनित्यत्वादेस्तेनासिद्धेः । नच स्वरूपासिद्धिः भूतत्वमहत्त्वयोः पक्षे संप्रतिपत्तेः । नापि व्याप्यत्वासिद्धो निरुपाधिकत्वात् । नच मूर्त्तत्वसावयवत्वरूपवत्त्वादेरुपाधित्वं शक्यं वक्तुं गुणकर्म्मणोः साध्याव्याप्तेः । भूतत्वद्रव्यत्वसामान्यवत्त्वादेश्च साधनव्यापकत्वात् अथ द्रव्यत्वव्यतिरिक्तावान्तरजातिमत्त्वमुपाधिरिति चेन्न प्रध्वंसे साध्याव्याप्तेः । तस्योत्पत्तिमत्त्वेऽपि जात्याश्रयत्वाभावात् । नच साध्यस्योत्पत्तिमत्त्वस्य भावधर्म्मिकत्वान्न प्रध्वंसे प्रसक्तिरितिवाच्यं उत्पत्तिमात्रस्यैवाकाशे साध्यत्वात् अन्यथा विप्रतिपत्त्यविषयाणां द्रव्यत्वादीनां धर्म्मिगतानां साध्यताप्रसङ्ग इत्यनुमानाकौशलमापद्येत नचान्यः कश्चिदुपाधिरुत्प्रेक्ष्यते अविभुत्वंत्वाकाशेऽपि वेदान्तिनः समानं॥ ज्यायानन्तरीक्षात् येनावृतं खञ्च दिवमित्यादावात्मापेक्षया आकाशस्य न्यूनपरिमाणत्वश्रवणात् अतो न तं प्रति तस्योपाधित्वं। नापि विरुद्धः साध्यविपर्य्ययाव्याप्तेः नापि साधारणानैकान्तिको विपक्षाप्रवेशात् । नाप्यसाधारणः स्वपक्षगामित्वात् । नापि कालातीतः बाधकप्रमाणानिरूपणात् । नचोक्तानुमानं बाधकमिति वक्तव्यं । तस्य नरशिरःकपालशुद्धतानुमानवदागमबाधितविषयत्वस्योक्तत्वात् । नच श्रुतेराकाशाभिव्यक्तिमात्रार्थत्वान्नोत्पत्त्यर्थतेति वाच्यं । सिद्धे चानुमानस्याबाधितत्वे प्रमाणश्रुतेरन्यार्थत्वसिद्धिस्तत्सिद्धावितरसिद्धिरितीतरेतराश्रयत्वात्। किञ्च तस्माद्वा एतस्मादात्मनआकाशःसंभूतइति सकृत् श्रुतः सम्भूतशब्दआकाशे साक्षात्सम्बध्यमानो गौणः स एव वाय्वादावनुषज्यमानो मुख्यइति महदिदं व्याख्यानकौशलं तार्किकपशोः। नापि सन्दिग्धानैकान्तिकता विपक्षव्यावृत्तेः स्फुटत्वात् । नापि प्रकरणसमता तवानुमानस्य दुर्बलत्वेनोभयोः समानबलवत्त्वाभावात् । निरवयवद्रव्यत्वस्य विनश्यदवस्थापन्ने पटे व्यभिचारात्। अवयवत्वात्यन्ताभावाधिकरणत्वं निरवयवत्वशब्दे न विवक्षितमिति चेन्न। अवयवशब्देन प्रदेशविवक्षायां सर्व्वस्याप्यवयविप्रदेशस्यावयवत्वेनोपक्षीणत्वादवयव्यभावप्रसङ्गात् । आश्रयविवक्षायामन्यतरासिद्धो हेतुः स्यात् । आकाशाश्रयस्य ब्रह्मणो मयेष्टत्वात् तस्मात्तदनुमानं न प्रतिपक्षः । नापि पक्षान्तरमुत्प्रेक्ष्यते । तस्मादनुमानेनाप्याकाशस्योत्पत्तेः सम्भावितत्वात् शुष्कतर्कश्रद्धामनादृत्य श्रुत्युक्तमेवाकाशं जन्मवत् श्रद्धेयं । अभ्युपगम्य चेदं परमाणूनामनुत्पत्तिमत्त्वं महत्वे सतीति हेतुर्विशेषितः । तदनभ्युपगमे तु भूतत्वादित्येव हेतुः । तथाहि चतुर्द्धा परमाणव उत्पद्यन्ते मूर्त्तत्वात् भूतत्वाद्वा घटादिवत् । नच मूर्त्तत्वहेतोर्मनस्यनैकान्तिकता । तस्यापि पक्षतुल्यत्वात् नच धर्म्मिग्राहकप्रमाणबाधः सिद्धेऽपि तेन धर्म्मिस्वरूपे तद्गतनित्यत्वादेरसिद्धेः । नच परमाणूनामपि कार्य्यत्वे कारणानवस्थानान्न किमपि मूलकारणं जगतः स्यादिति वाच्यं ब्रह्मण एव जगन्मूलकारणस्य श्रुतिस्मृतीतिहासपुराणप्रसिद्धत्वात्तथा दिक्कालावुत्पत्तिमन्तौ । अचेतनभावत्वात् पटवत् । नचास्माकमविद्यायां व्यभिचारः। तस्याभावाभावविलक्षणत्वाभ्युपगमात् । अन्येऽपि हेत्वाभासाः पूर्व्ववदुच्चारणीयाः । नच सामान्यविशेषसमवायेषु व्यभिचारः। तत्र सामान्यस्य विचार्य्यमाणे ब्रह्मस्वरूपानतिरेकादचेतनत्वहेतोस्तत्राप्रवृत्तिः तथाहि विशेषास्तावत् सामान्ये कल्पिता इतित्वविद्यावादे निरूपितं । तथा च द्रव्यत्वादीनां सामान्यविशेषाणां सामान्यमात्ररूपायां सत्तायामन्तर्भावः। सत्तायाअपि स्फुरणविरहितायाः क्वाप्यनुपलम्भात् स्फुरणमात्रत्वं युक्तं। स्फुरणञ्चब्रह्मैव । सदेव सोम्येदं सत्यं ज्ञानमित्यादिश्रुतेः । ब्रह्म तं परादाद्योऽन्यत्रात्मनो ब्रह्मवेदेत्यादौ परस्वरूपातिरिक्तत्वेन ब्राह्मणयादिं जातिं विजानतोब्रह्म निन्दाश्रवणाच्च तस्मान्न सामान्ये व्यभिचारः। विशेषसमवायौ तु खपुष्पकल्पौ अनयोर्यथा खपुष्पकल्पत्वं तथा चिदानन्दलहरीटीकायां प्रपञ्चितमस्माभिरितीहोपरम्यते। श्रुतयश्च भवन्ति प्रत्यक्षानुमानबाधिकाः। अणोरणीयानिति परमाणोरणीयः परमकारणं ब्रह्म दर्शयित्वा यस्मात् परं नापरमस्ति किञ्चित् । यस्मान्नाणीयोनज्यायोऽस्ति किञ्चिदिति तैत्तिरीयश्रुतिस्तद्व्यतिरिक्तं अणु महच्चाविशेषेण प्रतिषेधति असतोऽधिमनोऽसृज्यत एतस्माज्जायते प्राणो मनः सर्वेन्द्रियाणि चेति । तैत्तिरीयाथर्व्वणश्रुती मनसउत्पत्तिं स्पष्टमाचक्षाते । तथाज्ञः कालकालोगुणीसर्व्वविद्यः सर्व्वं निमेषाजज्ञिरेइति च श्वेताश्वतरतैत्तिरीयश्रुती कालस्यापि कार्य्यतामावेदयतः पुरुषएवेदं सर्व्वमित्युपक्रम्य दिशः श्रोत्रादिति पुरुषसूक्तात्मिका श्रुति-

cloth. To this it cannot be rejoined that our argument will be fallacious in regard to illusion [which is an unconscious entity and yet eternal]; for it has been treated as different from entity and non-entity. The other fallacies may be considered as in the preceding discussion [of the argument respecting the non-eternity of ether.] Nor is our argument fallacious or misleading in regard to universality, particularity, and co-inherence: for on reflection universality turns out to be not difference from the essence of the supreme spirit, and therefore the argument, viz. unconsciousness, does not apply to universality. It has been described already in the discussion about illusion, that all particulars or individual things are erroneously surmised in the universal. In this manner the various universals, substantiality and so forth, must be included under existence which contains all universality. As existence is never cognised without the illumination [of pure intelligence], it is rightly regarded as consisting only of such illumination. This illumination is the absolute; according to the Vedic texts Existent indeed, fair sir, was this, Truth, knowledge &c.; and according to censure revealed against one who regards the Brâhmanic and other castes as other than the essence of the supreme spirit, in the text: The Brâhmanic caste rejected him, who knew a supreme spirit other than himself. There is therefore no fallacious misapplication of our argument to universality.

But particularity and co-inherence are mere figments, like celestial flowers. We have diffusely shown in our commentary on the Chid-ânanda-laharî, how particularity and co-inherence are merely chimerical, and therefore decline the discussion here. Moreover there are Vedic texts tollent of perception and inference [the only methods recognised by the Vaiśeshikas]. Thus the Vedic text of the Taittirîyas having shown in the words, More minute than an atom, that the absolute is more minute than an atom and is the primary cause, and, proceeding Beyond which none other is greater, Than which none is smaller, none greater; absolutely denies anything smaller or greater than the absolute. After the unreal, the internal organ was created, From, this springs the vital air, with the internal organ and all the organs.

These Taittirîya texts and the Atharva-veda explicitly declare the production [and therefore, the non-eternity] of the internal organ. Similarly The Śvetâśvatara and Taittirîya texts proclaim that time also is a product, in the words The knowing soul, the time of time, comprising the qualities, and Who knows all the moments were produced. The revelation called the Purusha-sûkta, indicates that space is only an evolution of spirit, in the words begining All this is spirit only and ending with all spaces are from his ear: and it is to be explained that there is no space other than ether, since in reality the name and notion of east &c. is imagined in ether, according to the concomitant, the path of the sun. Nor can you retort that the supreme spirit even is produced, being a cause, like ether, for this would be to contradict such texts as Unborn, everlasting &c., and to contradict to the aphorism There is non-production, for the existent cannot be produced. Thus it is demonstrated that antecedently to a production of the universe there existed nothing except the absolute spirit. For since illusion is a power of the spirit, it cannot be an entity distinct therefrom; and individuated spirits are then absorbed in the absolute spirit; and their merits and demerits residing in the internal organs which are concomitant thereto can have no separate existence, because there are only the illusions remaining in the impression thereof. This matter has been discussed in detail by the founders of the system in the section treating of ether &c., therefore we forbear. In relation to such texts as From ether air, from air fire, and so forth, it is to be consedered that the production of air &c. is from the supreme spirit alone, from association with illusion, and under the condition of ether and the like. For it is revealed in another text, viz. That light created, that luminary beheld, that light &c. creates water &c. from prevision, and there cannot be an unconscious beholder. The aphorism moreover, He is, because we may

दिशः पुरुषविकारत्वं सूचयति वस्तुतस्तु प्राच्यादिव्यपदेशस्यादित्यगत्युपाधिना नभस्येव कल्पितत्वात् नाकाशातिरिक्ता दिगस्तीति गमयितव्यं। नच ब्रह्माप्युत्पद्यते कारणत्वादाकाशवदितिवाच्यं। अजो नित्यइत्यादिश्रुतिविरोधात्। असम्भवस्तु सतोऽनुपपत्तेरिति न्यायविरोधाच्च एतेन जगतउत्पत्तिप्राक्काले ब्रह्मातिरिक्तं वस्तु नास्तीति दर्शितं। अविद्यायाश्चात्मशक्तित्वेन ततः पार्थग्थ्यायोगाज्जीवानाञ्च तदा परमात्मनि सम्पन्नत्वात्तददृष्टानाञ्च तदुपाध्यन्तःकरणनिष्ठानां तत्संस्कारशेषा विद्यामात्रत्वेन पृथक्सत्त्वाभावात्। विस्तृतञ्चैतदाचार्य्यैः वियदधिकरणादाविति विश्राम्यते। आकाशाद्वायुर्वायोरग्निरित्यादौ आकाशादिभावमापन्नादविद्यासहायाद्ब्रह्मणएववाय्वादीनामुत्पत्तिरिति द्रष्टव्यं। तत्तेजोऽसृजत तत्तेज ऐक्षतेत्यादिश्रुत्यन्तरे तेजःप्रभृतेरपीक्षणपूर्व्वकमबादिस्रष्टृत्वश्रवणात् अचेतनस्य च ईक्षणानुपपत्तेः। न्यायोऽपि तदभिध्यानादेव तल्लिङ्गात् स इतीममेवार्थं निर्णयति एतेन प्रधानाणुवादिवादानिरस्तावेदितव्याः तेषां श्रुतिविरुद्धत्वान्न्यायविरुद्धत्वाच्च। नह्यचेतनं चेतनानधिष्ठितं किञ्चित् कुर्व्वदुपपद्यते रथशकटादावदर्शनात् अतो न प्रधानवादश्चाश्रयणीयः। तथा परमाणुवादोऽपि अण्वोर्द्वयोः संयोगस्याव्याप्यवृत्तित्वे तयोः सावयवतापत्तेरनित्यत्वप्रसङ्गः तत्संयोगस्य व्याप्यवृत्तित्वे निरवयवयोरण्वोरेकस्मिन्नितरस्य संमितत्वात् प्रथिमानुपपत्तिः तथा च तत्कार्य्यस्य द्व्यणुकस्यापि परिमण्डलप्रसङ्गः। किञ्च द्व्यणुकारम्भसमये परमाणुः कथञ्चिद्द्विक्रियते न वा। आद्येऽनित्यत्वादिदोषोपपत्तिर्मृत्पिण्डादिवत्। द्वितीये परमाणुसमूह एव द्व्यणुकादिकार्य्यं स्यात्तृणपूलवदित्यलं प्रपञ्चेन प्रकृतमनुसरामः। तमः प्रधानविक्षेपशक्तिमदज्ञानोपहितचैतन्यमाकाशादिकारणमित्युक्तं। तत्कथमवगम्यते भूतकारणाज्ञाने तमःप्राधान्यमिति तत्राह॥

ponder upon him, which is the mark of his existence, ascertains the same fact. By this argumentation we must be understood to have refuted the doctrine of atoms [of the Naiyâyikas, and Vaiśeshikas], and that of the plastic principle [of the Sânkhyas], such doctrines being contradicted by revelation, and by reasonings. For no unconscious agent, not presided over by something conscious, can possibly do anything, for we observe no such action in chariots, carts, and the like. The doctrine, therefore, of a primary plastic principle cannot be accepted. Similarly the atomic theory: for the conjunction of two atoms not being total and universal, it follows that they must each have parts [that facet may join facet], and thus they will be non-eternal; whereas, if this conjunction be total and universal, then two impartite atoms being each measured by the other, aggregation becomes impossible, and thus it will follow that their product also, the binary atomic aggregate, will be an absolute minimum [or of atomic dimension.] Again, does the atom, during the origination of the binary aggregate, undergo any change, or not? On the first alternative there follow its non-eternity and other objections, as in the case of a lump of clay &c. [the gross constituents of a water-pot]; on the second alternative, the product, the binary aggregate and the like, will be a mere aggregation of atoms [without any principle of cohesion], like a bundle of straw and the like. It has thus been stated that intelligence associated with illusion with its projective power in which darkness predominates, is the cause of ether &c. To dismiss further prolixity, and return from our digression. It may be asked how it is known that darkness is predominant in illusion as the cause of the elements. The author, therefore, proceeds to say.

A. E. G. and G. D.

PARJANYA, THE RAIN GOD.

(As represented in the hymns of the Rigveda, v. 83 and vii. 100, 101.)

I.

Parjanya laud with praises meet;
The fertilising god extol
And bless, of living things the soul,
Whose advent men, exulting, greet.

II.

Like steeds a charioteer has spurred,
His watery scouts before him fly.
Far off, within the darkening sky,
The thundering lion's roar is heard.

III.

Fierce blow the blasts, the lightnings flash,
Men, cattle, flee in wild affright.
Avenging bolts the wicked smite;
The guiltless quake to hear the crash;

IV.

Malignant demons stricken lie;
The forest's leafy monarchs tall
Convulsed, uprooted, earthward fall,
Whene'er Parjanya passes by.

V.

Urge on thy car, Parjanya, haste,
And, as thou sweepest o'er the sky,
Thine ample waterskins* untie
To slake with showers the thirsty waste.

VI.

Now forth let swollen streamlets burst,
And o'er the withered meadows flow:
Let plants their quickening influence know,
And pining cattle quench their thirst.

VII.

Thy wondrous might, O god, declare;
With verdure bright the earth adorn,
Clothe far and wide the fields with corn,
And food for all the world prepare.

VIII.

But O, we pray, Parjanya kind,
Since now our harvests, drenched with showers,
Aloud invoke the Solar powers,
Thy waterskins no more unbind.†

EDINBURGH, 13*th*. *September* 1872.

J. MUIR.

---

* This image is of course, found in the original. It is well known that in Eastern countries skins are used for preserving wine and carrying water.

† This verse, which has been mainly suggested by the disastrous rains of the present season, (In Scotland.) is justified by a brief reference in a verse of one of the hymns (v. 83, 10.)

PRESS ADVERTISEMENT.

In the Press, and will shortly be published, The VAIS'ESHIKA APHORISMS OF KANA'DA, reprinted from the "Pandit" with corrections and emendations, by A. E. GOUGH, B. A., Anglo-Sanskrit Professor, Benares College.

PRINTED AND PUBLISHED BY THE PROPRIETORS, E. J. LAZARUS AND CO. AT THE MEDICAL HALL PRESS, BENARES.

काशीविद्यासुधानिधिः

श्रीगणेशाय नमः

श्रीमद्विजयिनीदेवीपाठशालोदयोदितः । प्राच्यप्रतीच्यवाक्पूर्वापरपक्षद्वयान्वितः ॥ १ ॥
अङ्करश्मिः स्फुटयतु काशीविद्यासुधानिधिः । प्राचीनार्यजनप्रज्ञाविलासकुमुदोत्करान् ॥ २ ॥

THE PANDIT.

A Monthly Journal, of the Benares College, devoted to Sanskrit Literature.

No. 79. Benares, December 2nd, 1872. Vol. VII.

॥ चिन्तामणेः शब्दखण्डम् ॥

(१) नन्विदमिष्टसाधनमिति ज्ञानादेतत्साध्यमिष्टमिति ज्ञानाच्च प्रवृत्तिदर्शनात्प्रथमस्यैव प्रवर्तकत्वे किं विनिगमकम् । उच्यते । फलेच्छायां स्वविषयविशेष्यकज्ञानस्य हेतुत्वेन क्लृप्तत्वात् । उपायचिकीर्षा ऽपि बाधकं विना तथा । (२) वस्तुतस्तु कृतिसाध्ययागस्य साध्यमिष्टमिति ज्ञानस्य प्रवर्तकत्वे यजेतेतिपदात् (३) प्रथमं कृतिसाध्यो याग इति ज्ञानं ततः कृतिसाध्ययागस्य साध्यमिष्टमिति ज्ञानं विशेषणज्ञानसाध्यत्वाद् विशिष्टज्ञानस्येति ज्ञानद्वयं तव, मम यागः कृतिसाध्य इष्टसाधनमित्येकमेव ज्ञानम् । न च कृतिसाध्यत्वं यागे बोधयित्वा कृतिसाध्ययागस्य साध्य मिष्टमिति लिङा बोधयितुं शक्यमपि एकस्वार्थान्वयमपरमदार्थे बोधयित्वा तदन्वितापरस्वार्थान्वयबोधकत्वस्य पदे ऽव्युत्पत्तेः, यजिपदे च कृत्या सह यागान्वयं बोधयित्वा पर्यवसिते पुनः स्वार्थान्वयबोधकत्वे आवृत्तिप्रसङ्गः । अथ साध्यमिष्टं यस्येति साध्येष्टकत्वं शक्यं, (४) तथा च बहुव्रीह्यर्थापेक्षया इष्टस्य साधनमिति षष्ठ्यर्थस्य लघुत्वात्तदेव शक्यम् । (५) किं च तत्साध्यत्वं न नियमतस्तदुत्तरसत्त्वम् । (६) दण्डसाध्ये घटे व्यभिचारात् । नापि तदवच्छिन्नक्षणोत्तरक्षण एव सत्त्वम् । (७) एवकारव्यवच्छेद्यतदनुत्तरसमयस्याकाशे ऽप्रसिद्धेः । शब्दस्य तदसाध्यत्वापत्तेः । (८) अत एव न तदभावव्यापकाभावप्रतियोगित्वं, रूपे रससाध्यकत्वापत्तेश्च । नापि तदवधिकोत्तरत्वव्याप्यसमयसंबन्धः । उत्तरत्वव्याप्यत्वं ह्युत्तरत्वानधिकरणकालावृत्तित्वं, तच्चाकाशे ऽप्रसिद्धं, गुरुतरं च । तस्मात्तत्साधनकत्वमेव तत्सा-

॥ शब्दचिन्तामणिव्याख्या रुचिदत्तीया ॥

तटस्थः पृच्छति । (१) नन्विति । ननु फलेच्छायामपि स्वविषयत्वेनैव हेतुत्वं न तु तद्विशेष्यकत्वेन गौरवादित्यरुचेराह । (२) वस्तुतस्त्विति । एतत्साध्यमिष्टमेतावन्मात्रं न प्रवर्तकं कृत्यसाध्ये ऽतिप्रसङ्गादित्यत्रापि कृतिसाध्यत्वप्रवेश आवश्यक इति दर्शयति । (३) प्रथममिति । (४) तथापीति । यद्यपि लक्षणाया अविशेषान्न लाघवं तथापि बहुव्रीहौ धर्मी लक्ष्यस्तत्पुरुषे संबन्धमात्रमिति विशेष इत्याहुः । ननु विशेष्ये विशेषणं तत्र च विशेषणान्तरमिति न्यायेनैकदैवेष्टे यागसाध्यत्वस्य यागे कृतिसाध्यत्वस्य भानं संभवति । तथा चात्राप्येकमेव ज्ञानमत एव न व्युत्पत्तिविरोधो ऽपि, एकदैवोभयबोधेनैकस्वार्थान्वयं बोधयित्वा ऽपरस्वार्थान्वयाबोधनात् । एकदा तद्बोधने व्युत्पत्तिविरोध इत्यत्र मानाभावात् । अत एव च नावृत्तिप्रसङ्गोऽपि । घटमानयेत्यादाविव तादृशावृत्तेरदोषत्वं च । तत्रापि घटपटादेरवान्तरवाक्यार्थबोधजननानन्तरं पुनर्महावाक्यार्थबोधजननादिति पूर्वास्वरसादाह । (५) किं चेति । (६) दण्डेति । दण्डोत्तरमपि कदा चिद् घटाभावादित्यर्थः । शब्दस्याकाशासाध्यत्वापत्तौ हेतुमाह । (७) एवकारेति । (८) अत एवेति । शब्दे आकाशासाध्यत्वापत्तेरेव । नह्याकाशाभावव्यापकः शब्दाभावः । शब्दवत्याकाशात्यन्ताभावसत्त्वेन व्यभिचा-

ध्यत्वम्। एवं च लाघवात् (६) तत्साधनत्वज्ञानमेव प्रवर्तकं न तु तत्साधनकत्वज्ञानमिति ।

स्यादेतत्। इष्टत्वज्ञानस्य प्रवर्तकत्वे तृप्तोऽपि भोजने प्रवर्त्तेत, मनसा तृप्तेरिष्टत्वज्ञानात्। अथ स्वरूपसत्यपि फलेच्छा कारणं, सा च सिद्धतया तृप्तौ नास्तीति चेत्, हन्तैवमावश्यकत्वात्फलेच्छा कारणं न तु तज्ज्ञानं, गौरवात्। किं चेच्छाज्ञानस्य कारणत्वे इच्छा कारणं न स्यात् स्वज्ञानेन तन्नाशात्, इच्छा तज्ज्ञानधाराकल्पने ऽनवस्थानात्। (१०) अपि चेच्छाविषयः सुखमिति ज्ञानं न मानसं, सुखस्यासिद्धतया तद्विशेष्यकसाक्षात्कारस्य तत्संनिकर्षं विना ऽभावाद् (११) ओदनादावपीष्टत्वज्ञानं न स्यात्। मनसो बहिरस्वातन्त्र्यात्। नापि चक्षुरादिना ज्ञातः कृत इतिवदिष्टत्वज्ञानं, (१२) तत्र विशेष्यसन्निकर्षात्। (१३) वस्तुतस्त्विष्टस्य विशिष्य सुखत्वादिना ऽज्ञाने यागपाकादाविष्टसाधनताज्ञानेऽप्यप्रवृत्तिप्रसङ्गः। इष्टस्याल्पाधिकभावेन नानाप्रकारकत्वेन च विशिष्यानध्यवसायात्। न चेच्छाविषयत्वावच्छेदकसुखत्वादेरुपलक्षणमिष्टत्वं, सुखदुःखाभावतत्साधनेष्वनुगतस्योपलक्ष्यस्याभावेनाननुगमादिति।

उच्यते। (१४) यत्रेच्छातत्साधनताज्ञानमेव लोकवेदसाधारणं प्रवर्तकं तेषां सुखदुःखाभावतत्साधनत्वेनेच्छाविषयाणामननुगतानामपि (१५) वस्तु सदि-

---

रादित्याहुः। (९) तत्साधनत्वज्ञानमेव प्रवर्त्तकमिति। अत्रेदं चिन्त्यम्। यदि तत्साधनत्वज्ञानं प्रवर्तकं तदा दुःखप्रागभावार्थितया प्रायश्चित्तादौ प्रवृत्तिर्न स्यात्। तत्साधनत्वं हि तन्नियतपूर्ववर्त्तित्वं, तत्पूर्ववर्तित्वं च तत्प्रागभावावच्छिन्नसमयवृत्तित्वम्। न च प्रागभावस्य प्रागभावाभावेन तत्पूर्ववर्त्तित्वं संभवति। न च प्रागभावस्योक्तसमयसंबन्ध एव तत्र साध्यः तत्साधनत्वज्ञानमविकलमेवेति वाच्यम्। तत्समयसंबन्धस्य समयप्रागभावात्मकतया तस्य च तदसाध्यत्वात्। किं च प्रायश्चित्तादिषु दुःखाभावमुद्दिश्यैव प्रवर्त्तते, न तु तत्समयसंबन्धमुद्दिश्य, तस्य स्वतो ऽपुरुषार्थत्वात्। ननु येन रूपेण यस्य साध्यता तद्रूपाक्रान्तसाध्याधिकरणकालोपाधिपूर्ववर्त्तित्वज्ञानं प्रवर्त्तकम्। तच्चात्राप्यस्ति। दुःखप्रागभावस्य प्रायश्चित्ताद्यनन्तरकालवृत्तिप्रागभावत्वेन साध्यत्वात्तदधिकरणकालोपाधिपूर्ववर्त्तित्वस्य प्रायश्चित्तादौ संभवादिति चेत्। एवं घटाद्यधिकरणसमयात्पूर्ववर्त्तित्वाप्रतिसंधाने घटादिपूर्ववर्तित्वप्रतिसंधानेऽपि प्रवृत्तिर्न स्यात्, न चेष्टापत्तिः। अनुभवविरोधात्। न चोभयोरपि प्रवर्त्तकत्वम्। अननुगमात्। प्रवृत्तिवैजात्यकल्पने मानाभावात्। किं च गोत्वाद्यधिकरणकालोपाधिपूर्ववर्त्तित्वज्ञानसंभवात्तदर्थितयापि प्रवृत्त्यापत्तिः। तस्मादनन्यगत्या तत्साध्यत्वज्ञानमेव प्रवर्त्तकम्। न च तदपि तत्साधनकत्वम्। अन्यानिरुक्तेः। एवं च दोषतादवस्थ्यमिति वाच्यम्। यस्मिन्सति अग्रिमक्षणे यत्सत्त्वमित्यादिना क्षेमसाधारणस्य तत्साध्यत्वस्य यन्यकृतैव निर्वचनात्। एतेन तत्साधनकत्वमेव तत्साध्यत्वम्, एवं च तत्साधनत्वे लाघवमित्यसंगतं बोध्यम्। न चैवमिष्टसाधनत्वज्ञानात्प्रवृत्तिर्न स्यादिति वाच्यम्। तवाप्येतत्साध्यमिष्टमिति ज्ञानात्प्रवृत्तिर्न स्यादिति तौल्यात्। यदि च लाघवादिना तत्साधनत्वज्ञानस्य प्रवर्तकत्वे निर्णीते तत्र प्रवृत्त्यभाव इष्ट एव, समानसंवित्संवेद्यत्वाद्वा तत्रापि तज्ज्ञानसंभवात्तत एव तत्प्रवृत्तिरिति मन्यसे तदा प्रायश्चित्ते प्रवृत्त्यन्यथानुपपत्त्या तत्साध्यत्वज्ञानस्य प्रवर्तकत्वे निर्णीते तत्रापि प्रवृत्त्यभाव इष्ट एव समानसंवित्संवेद्यत्वात्तज्ज्ञानादेव वा प्रवृत्तिरिति तुल्यम्। तस्माद्यन्मते दुःखसाधनध्वंसस्य स्वतःपुरुषार्थत्वात्तदर्थितयैव प्रायश्चित्तादौ प्रवृत्तिस्तन्मतएव तत्साधनताज्ञानं प्रवर्त्तकमिति॥

ननु स्वज्ञानमिच्छायां व्यापारोऽस्तु। तथा च व्यापारिनाशेऽपि न क्षतिः। किं च विनश्यदवस्थेच्छायाः कारणत्वमस्तु। न चेच्छात्वनिर्विकल्पकेन तन्नाशे तदसंभव इति वाच्यम्। ज्ञानवदिच्छाया अपि विषयनिरूप्यत्वेन निर्विकल्पकानभ्युपगमादित्यस्वरसादाह। (१०) अपि चेति। तथा च सुखसाधने भोजनादाविष्टसाधनत्वज्ञानाभावात्प्रवृत्तिर्न स्यादिति भावः। (११) ओदनादावपीति। तथा च तत्साधने पाके ऽपि न प्रवर्त्तेतेति भावः। (१२) तत्रेति। इह त्वसिद्धतयौदनादेस्तदसंभव इति भावः। ननु सुखमोदनं चेच्छामीत्यनुव्यवसायेन तद्विषयत्वमिच्छायां गृह्णता तुल्यवित्तिवेद्यतया इच्छाविषयत्वमपि सुखादौ गृह्यताम्। न चैवमपि तदसन्निकर्षात्सुखादिविशेष्यकमिष्टज्ञानं न स्यादिति वाच्यम्। इष्टसाधनताज्ञानस्य तथा ऽप्यवैकल्यात्। तत्र विशेषणज्ञानत्वेन तदुपयोगात्। किं च ज्ञानोपनीतसुखादेर्विशेष्यत्वं ऽप्यदोषः। अत एवासन्निकृष्टपर्वतादिविशेष्यको मानसः परामर्श इत्यस्वरसादाह। (१३) वस्तुतस्त्विति। फलेच्छा स्वरूपसती प्रवृत्तिप्रयोजिका न प्रवर्त्तकधीविषय इति न तृप्तस्य भोजने प्रवृत्तिरित्याशयेन।

परिहरति। (१४) यत्रेति। (१५) वस्तु सदिति। नन्विदमसंभवीष्टसाधनताज्ञानफलेच्छावदुपादानप्रत्यक्षस्यापि प्रवृत्तिहेतुत्वं, न चैतेषामात्मगुणानां सहावस्थितिरिति चेन्न। इच्छोत्पत्त्यनन्तरं तद्विरोध्यनुत्पादसमयावच्छिन्नत्वस्यैव वस्तुसदि-

च्छाविषयत्वमेवानुगमकम् । एवं यदा सुखादाविच्छा भवति स्वकृतिसाध्यत्वे सति सुखादिसाधनमिति ज्ञानं च तदा पाकादौ प्रवर्त्तते । (१६) नन्वेवं प्रवर्त्तकज्ञानविषयस्य नानात्वेन तच्छक्तस्य विधिप्रत्ययस्य नानार्थत्वप्रसङ्ग इति चेत् । न । सुखत्वादिना अननुगतमिष्टत्वेनानुगतं फलं प्रति साधनत्वस्य यागादेर्लिङादिना बोधनात् । (१७) तथा च फलानामनुगमार्थं फलेच्छा शक्या, न त्विच्छा ज्ञानकारणत्वेन । अथैवं सुखादिसाधनत्वेन ज्ञानं प्रवर्तकं तन्न शक्यमननुगमात्, यच्च शक्यमिष्टसाधनत्वं तज्ज्ञानं न प्रवर्त्तकमिति विधेः प्रवर्त्तकता न स्यादिति चेत् । साक्षादेवमेव, किं त्विष्टसाधनं याग इति लिङा बोधिते इष्टाकाङ्क्षायां काम्यत्वेन श्रुतः स्वर्ग एवेष्टत्वेनाधिगम्यते । (१८) तथा च स्वर्गकामसमभिव्याहारात्स्वर्गसाधनं याग इति ज्ञानं प्रवर्तकमुत्पद्यते, एवं च विधिजन्यज्ञानजन्यं ज्ञानं प्रवर्तकम् । यत्तु सर्वेषामेव विधेर्न साक्षात्प्रवर्तकत्वं विधिबोधकात्स्वकृतिसाध्यतादेरनवगमात् । स्वेष्टसाधनत्वं चाहमिष्टसाधनयागकः, स्वर्गकामत्वात्, दर्शवाक्यावगतस्वर्गकामवदित्यनन्तरमर्थात्प्रतीयते, तन्न, यच्चेच्छा तत्साधनमिति शाब्दज्ञानादेव प्रवृत्त्युपपत्तेस्तत्प्रतीतिर्निष्फला ॥

अन्ये तु साधनत्वमात्रं विध्यर्थः । स्वर्गसाधनतालाभस्तु समभिव्याहारात् । इष्टसाधनतापक्षेपि (१९) तस्योपजीव्यत्वात् । तथा हि । यजेतेत्यनेन यागः कृतिसाध्यः साधनं चेति बोधिते साधनस्य साध्याकाङ्क्षायां कामनाविषयत्वेन श्रुतोऽसिद्धः स्वर्ग एव साधनाकाङ्क्षी साध्यत्वेनावगम्यते, उपस्थितत्वात् । न च यागस्य साधनाकाङ्क्षा, कृतिसाध्यत्वेनैवोपस्थितेः । (२०) अत एव विश्वजिदादौ स्वर्ग एव साध्यत्वेन कल्प्यतइति । (२१)

च्छाविषयत्वेन विवक्षितत्वादित्याहुः । भ्रान्तः शङ्कते । (१६) नन्विति । यज्ज्ञानं प्रवर्त्तकं स एव विधिः, तच्च नेष्टसाधनत्वं किं तु सुखादिसाधनत्वमिति तत्रैव लिङ्शक्तिरिति नानार्थत्वमित्यर्थः । (१७) तथा चेति । एवं च न नानार्थत्वमिति भावः । ननु स्वर्गत्वेन तज्ज्ञानं न स्यात् । तेन रूपेणानुपस्थितेरित्यत आह । (१८) तथा चेति । एवं च स्वर्गत्वेन कामनाविषयत्वेन चोपस्थितस्य स्वर्गस्य लिङुपस्थाप्येष्टत्वेन सहान्वये स्वर्गरूपेष्टसाधनं याग इति शाब्दं ज्ञानमित्यर्थः । न चैवं विधिजन्येत्यादिविरोधः । विधिजन्यं धात्वाख्यातार्थान्वयज्ञानरूपमेवावान्तरवाक्यार्थज्ञानं तज्जन्यमुक्तरूपमहावाक्यार्थज्ञानं प्रवर्त्तकमित्येतत्परत्वात्तस्येति भावः । अत एवानुमानमाशङ्क्य निषेधति । यत्त्वितीति योजयन्ति । तच्चिन्त्यम् । यत्र यदिच्छा स्वरूपसती तत्साधनताज्ञानस्य प्रवर्त्तकत्वेन स्वेष्टसाधनतानुमानस्य निष्फलत्वेपि मत्कृतिसाध्यत्वज्ञानार्थमनुमानमावश्यकमेव, कृतिसाध्यताज्ञानस्य मदंशविषयत्वेनैव प्रवर्त्तकत्वात् । अन्यथा ऽतिप्रसङ्गात् । विधेश्च तत्रासामर्थ्यात् । इदानीं कालविषयतया ऽपि च तस्य प्रवर्तकत्वात् । तदर्थमप्यनुमानमावश्यकं, तदिदमुक्तं, "विधेः स्वकृतिसाध्यतादेरनवगमा"दिति । किं चेष्टस्य पदार्थैकदेशतया स्वर्गस्य चान्यान्वितस्य निराकाङ्क्षतया कथमिष्टस्वर्गयोरन्वयस्तथा च कथमुक्तं महावाक्यार्थज्ञानं प्रवर्त्तकमिति । तस्माद्विधिजन्यमहावाक्यार्थज्ञानजन्यमानुमानिकं मानसं वा ज्ञानं प्रवर्त्तकमित्यर्थः । न चैवं यत्त्वित्यादिनाऽनुमानमाशङ्क्य निषेधप्रतिपादनविरोधः । तस्य स्वेष्टसाधनतानुरोधेनानुमानापेक्षेत्येवं परत्वात्तदिदमुक्तं "यत्रेच्छेति" । एवं च तत्प्रतीतिर्निष्फलेत्यत्र स्वांशप्रतीतिरिष्टांशे या तत्प्रतीतिरित्यर्थः । स्वकृतिसाध्यत्वबोधनार्थं त्वनुमानमावश्यकमेव । ननु मत्कृतिसाध्यतावद् मदिष्टसाधनताज्ञानस्यैव प्रवर्त्तकत्वात्सापि सफलैवेति चेत्, न । इच्छायाः स्वरूपसत्या एव प्रवर्त्तकत्वे तद्विशेषणमदीयत्वस्यापि स्वरूपसत एव तदुपयोगात् । कृतौ तु नैवम् । न चैवं शाब्दज्ञानादेव प्रवृत्त्युपपत्तेरित्यनेन विरोधः । शब्दप्रयोज्यानुमानिकादिज्ञानादेवेति तदर्थात् । क्वचित्तु सर्वेषामित्यस्य पूर्वं यत्त्विति न पाठः । तत्रेति स्थाने किं त्विति पाठः । तत्र विधिजन्यज्ञानजन्यं मानसादिज्ञानं प्रवर्त्तकमित्यत्रोपष्टम्भनार्थं सर्वेषामित्यादि स्वेष्टसाधनत्वं चार्थात्प्रतीयते किं तु तत्प्रतीतिर्निष्फलेत्यत्र तात्पर्यम् । साधनत्वमात्रमित्यत्र मात्रपदेनेष्टांशमात्रव्यवच्छेदः । न तु कृतिसाध्यत्वादेरपीति बोध्यम् ।

(१९) तस्येति । समभिव्याहारस्येत्यर्थः । न चेत्युपलक्षणं यागस्य यागसाध्यान्वये बाधोपीति द्रष्टव्यम् । (२०) अत एवेति । उपस्थितान्यस्य साध्यत्वान्वयायोग्यत्वादेवेत्यर्थः । अत्रेदमनभिमतिबीजम् । इष्टसाधनताविधिपक्षे स्वर्गकामपदेन स्वर्गस्यैव कामनाविषयत्वेनोपस्थितत्वादिष्टत्वेन स्वर्ग एवान्वीयते इति युज्यते । साधनताविधिपक्षे कामनादेः साध्यान्तरस्यान्वयसंभवाद् न स्वर्गान्वयनियमः । न चान्यन्नोपस्थितं, कामना च न यागसाध्येत्ययोग्यताज्ञानाद् न तथान्वय इति वाच्यम् । कामनाविशेषो यागसाध्यः स्यादिति योग्यतासंशयसंभवात् । स्वर्गान्वये ऽपि तत्संशय एव । ननु प्रवर्त्तकत्वतात्पर्यग्रहात्तदन्यथानुपपत्त्यैव तल्लाभ इति चेद्युक्तैवं तत एवेष्टसाधनत्वमेवाक्षिप्यतां, कृतं साधनत्वांशेपि शक्त्येति । (२१) इष्टेति इष्टसाधनता-

इष्टसाधनताविधिपक्षे "तरति मृत्युं" "तरति ब्रह्मह-
त्यां योऽश्वमेधेन यजते" इत्याद्यर्थवादे विधिबोध्येष्ट-
साधनत्वस्यार्थवादादेवावगमात् कुतो विधिकल्पनमिति
चेत् । न । अविनाभावात् । (२२) तथाभूतसाधनत्व-
स्य विधेयत्वव्याप्यत्वात् । व्यापकानुपलम्भबाधोद्धाराय
वा (२३) प्रयोजनाभावान्न तत्कल्पनं तच्चेत्यप्याहुः ॥
यत्तु इष्टसाधनताभिधाने (२४) करणे लिङोऽनुशास-
नाद्दर्शपूर्णमासाभ्यामित्यनभिहिताधिकारविहिता तृतीया
न स्यादिति । तन्न । (२५) उपायतामात्राभिधानेऽपि त-
द्विशेषकरणत्वानभिधानात् । (२६) वस्तुतस्तु अभिहिता-
न्वयलभ्यं यागेष्टसाधनत्वम्, इष्टसाधनतामात्रस्य लिङ-
र्थत्वात् । (२७) नव्यास्तु चिकीर्षाद्वारा ज्ञानस्य कृ-
तौ हेतुता, चिकीर्षा च कृताविच्छा, सनः प्रकृत्यर्थगो-
चरेच्छावाचित्वात्, विवक्षादिवत्, न तु कृतिविषयपाका-
दिविषयकृतिसाध्यत्वप्रकारकेच्छावाचित्वं, पाकादेः प्रकृ-
त्यनभिधेयत्वात् । नहि कृतिवाचकस्य तद्विषयवाचकत्वं,
करोतीत्युक्ते तद्विषयसंशयात् । एवं च कृताविच्छेष्टसा-
धनताज्ञानात्तत्साध्येष्टज्ञानाद्वा, वृष्ट्यादौ तथा कल्पनात् ।
यदा च कृताविच्छा तदा सैव चिकीर्षा, अन्यत्र इच्छा-
मात्रम् । न तु कृतिसाध्यत्वज्ञानात् । कृतौ कृतिसाध्यत्वा-
भावात् । अथ पाकं कृत्या साधयामीतीच्छाऽनुभव-
सिद्धा,ऽनुभवापलापे उपेक्षणीयत्वापत्तेः । सा च कृति-
साध्यताज्ञानात् । सा च चिकीर्षा पदाप्रतिपाद्यापि कृति-
हेतुः, समानविषयत्वात्, न तु कृतीच्छा कृतिहेतुः,
कृतिविषयाविषयत्वादिति चेत् । अस्ति तावत्पाककृता-
विच्छा वृष्टीच्छावत् । अस्ति च कृतिसाध्यत्वप्रकारिकेच्छा-
पाके, तथापि कृतीच्छैव कृतिकारणं (२८) लाघवात्, न
तु कृतिसाध्यत्वप्रकारिकेच्छा गौरवात् । धात्वर्थानुपरक्ते
कृतिस्वरूपे इच्छैव च नोदेतीति चेत् । न । पाकादि-
कृतीष्टसाधनताज्ञानात् पाककृताविच्छा ततः कृतिरित्य-
भ्युपगमात् । (२९) न वा च गतिप्रवृत्त्योः समानवि-
षयत्वमुभयसिद्धं, तस्यैव विचार्यत्वात् । (३०) कथं तर्हि
पाकं कृत्या साधयानीतीच्छा (३१) यथा वन्हिसाध्यत्वे-
नेष्टसाधनत्वावगमाद्वन्हिना पाकं साधयानीतीच्छा । तथा

मात्रविधिपक्षइदं बोध्यम् । अन्यथा कृतिसाध्यत्वलाभायैव वि-
धिकल्पनस्यावश्यकत्वात् । अर्थवादाच्च यथेष्टसाधनत्वलाभस्त-
च्चिन्त्यम् । अविनाभावमेव विवृणोति । (२२) तथाभूतेति ।
अप्रयोजकत्वाच्च तथा व्याप्तिरिति ये मन्यन्ते तन्मतमाह ।
(२३) प्रयोजनेति । (२४) करणइति । इष्टसाधनत्वेन कर-
णस्य यागादेर्लिङाभिधानं ततोऽभेदान्वयधीरित्यभिमानः ।
(२५) उपायतेति । तज्ज्ञानमात्रादेव प्रवृत्त्युपपत्तेः । तथा
चानभिहितकरणत्वाभिधानाय तृतीयेत्यर्थः । ननूपायत्वेनापि
करणस्य यागादेरभिधानादनभिहिताधिकारविहिता तृतीया
न स्यादेवेत्यरुचेराह । (२६) वस्तुतस्त्विति । यागादेर्धातुल-
भ्यत्वादनन्यलभ्यस्यैव शब्दार्थत्वात्केनापि रूपेण न लिङा कर-
णाभिधानमिति भावः । यद्यपि वाक्यार्थतया तदभिधानम-
स्त्येव तथापि पदार्थतया तदभिधानं नेत्येवानभिहितत्वार्थ
इति कुसुमाञ्जलिप्रकाशे स्फुटम् । एवं च यागेष्टसाधनत्व-
योराश्रयाश्रयिभाव एवान्वय इति बोध्यम् । न चैवमिष्टसा-
धनत्वमिष्टसाधनत्वत्वेन शक्यं वाच्यम्, तच्चेष्टसाधनत्वघटितं
तदितरावृत्तित्वघटितं चेति लाघवादिष्टसाधनमेव तत्त्वेन
शक्यम् अभेद एवान्वय इति वाच्यम् । प्रकृतिप्रत्ययार्थयोरभे-
दान्वयेऽव्युत्पत्तेः । किं चेष्टसाधनत्वस्य शक्यत्वे तद्धर्मोऽपि
शक्य इत्यत्र मानाभावः । नहि यच्छक्यं तद्धर्मोऽप्यवश्यं शक्य
इति नियमः, शक्यानन्त्यापत्तेः । शक्यस्यैवोपाधिविशेषस्यैकत्वे
तदनुगमार्थमपि तदनभ्युपगमात् । गवादिपदे तु व्यक्तेरनुग-
मार्थे गोत्वादेः शक्यत्वम् । न चैवं लिङ्पदान्निर्विकल्पकत्वा-
पत्तिः । उपाधिविशेषस्य शक्यस्य नानापदार्थघटितत्वेन स-
विकल्पकमात्रविषयत्वात् । वस्तुतः संख्याभिधानानभिधानं
प्रयोजक,मन्यथा कर्त्तुरवाच्यत्वेनानभिहितत्वाद्देवदत्तः पच-
तीत्यत्र प्रथमा न स्यात् । एवं च लिङा करणसंख्यानभिधाना-
त्तृतीया स्यादेवेति तत्त्वम् । शङ्कितमप्यधिकाभिधानायाह ।
(२७) नव्यास्त्विति । तथा च कृतिसाध्यताज्ञानं न प्रवर्त्तकं
चिकीर्षाजनकज्ञानस्यैव तथात्वादिति भावः । (२८) लाघ-
वादिति । कृतिसाध्यत्वप्रकारकेच्छापेक्षया कृतीच्छात्वस्य कार-
णतावच्छेदकत्वस्य लघुत्वादिति भावः । ननूक्तं भिन्नविषयत्वा-
त्कृतीच्छा न हेतुरित्यत आह । (२९) न वेति । तथा चो-
क्तलाघवात् कृतीच्छैव हेतुरिति भावः । पृच्छति । (३०)
कथं तर्हीति । यदि कृतिसाध्यताज्ञानं न चिकीर्षाहेतुरिति-
शेषः । उत्तरम् । (३१) यथेति । यद्यप्येतच्चिकीर्षायाः कृति-
साध्यत्वज्ञानजन्यत्वेऽपि नव्यमते न क्षतिः, तत्र कृतीच्छारूप-
चिकीर्षाहेतुत्वाङ्गीकारेण कृतिसाध्यत्वज्ञानस्य तथाप्यप्रवर्त्त-
कत्वात्, कृतीष्टसाधनताज्ञानादेव तदुपपत्तेः, तथापि कृति-
साध्यत्वप्रकारकेच्छायाः प्रवर्त्तकत्वेऽपि कृतिसाध्यताज्ञानं न
कारणमिष्टसाधनताज्ञानादेव तस्याप्युपपत्तेरिति दर्शयितुमि-
दमुक्तमिति ध्येयम् । समानविषयत्वेन हेतुत्वमभ्युपेत्याह ।

कृतिसाध्यत्वेनेष्टसाधनत्वात्पाकस्य पाकं कृत्या साधयानीतीच्छा, ऽन्यथा तत्तदुपायसाध्यत्वेनेच्छा पाकादौ तदुपायसाध्यत्वप्रकारकज्ञानात्स्यादित्यनन्तकारणकल्पना स्यात्। मम तूपायेच्छायामिष्टसाधनत्वज्ञानमेव हेतुः। (३२) क्रियाद्वारा कृतेरिष्टसाधनत्वज्ञाने क्रियाया अपीष्टसाधनत्वं विषय इति कृतीच्छा भवन्ती क्रियाविषयापि भवतीति ज्ञानेच्छाप्रयत्नानां समानविषयतापि। (३३) अत एव पाकं चिकीर्षतीति चिकीर्षाविषयतया पाकः प्रतीयते। (३४) यद्वा इच्छाविषयतया पाकः प्रतीयते इति तस्य कर्मता। ग्रामं जिगमिषति शत्रुं जिघांसतीत्यत्र (३५) ग्रामादेरिव। नहि ग्रामादाविच्छा, सिद्धत्वात्। अत एव भोगे सुखे च चिकीर्षा, तदनुकूलकृतेरिष्टहेतुत्वात्। अन्यथा कृतिसाध्येष्टसाधनतापक्षे तच्चिकीर्षा (३६) सामग्र्यन्तरं कल्प्येत। (३७) एवं संध्यावन्दनं दुःखसाधनावन्दनाभावरूपत्वेनेष्टं तत्साधनं कृतिरिति लिङर्थः। अन्यथा कृतिर्न कृतिसाध्या संध्यावन्दनं च (३८) नेष्टसाधनमिति कस्य कृतिसाध्यत्वे सतीष्टसाधनत्वं विध्यर्थः स्यात्। अत एवैकप्रत्ययाभिधेयत्वप्रत्यासत्तेरन्तरङ्गतया विधिप्रत्ययाभिधेयेष्टसाधनत्वस्य कृतावेवान्वयो न प्रकृत्यर्थे, तस्यैव चिकीर्षाकारणज्ञानजनकत्वात् (३९) प्रकृत्यर्थस्य च कृतौ विषयत्वेनान्वय इति। उच्यते। (४०) वन्हिसाध्यत्वेन कृतिसाध्यत्वेन वा पाकस्यौदनसाधनतेत्युक्तम्। कथं तर्हि वन्हिना पाकं साधयामीतीच्छेति चेत्। इष्टसाधनत्वेन ज्ञाते यत्र यत्साध्यत्वं ज्ञायते तत्र तत्साध्यत्वेनेच्छा भवतीति यथेष्टसाधनत्वेन ज्ञाते पाके वन्हिसाध्यत्वज्ञानाद्वन्हिना साधयामीतीच्छा एवं कृतिसाध्यत्वेनावगते इष्टस्य साधनताज्ञानात् कृत्या साधयामीतीच्छा, (४१) तथा चेष्टसाधनत्वे कृतिसाध्यत्वे ज्ञाते कृतिसाध्यत्वप्रकारिकेच्छा न त्विष्टसाधनताज्ञानमात्रादिति॥

आचार्यास्तु प्रवर्तकमिष्टसाधनताज्ञानमेव, लिङर्थस्त्वाप्ताभिप्रायः। (४२) लाघवात्। (४३) पाकं कुर्याः पाकं कुर्यामित्यत्र विधिलिङः संबोध्यस्वकर्तृकक्रियेच्छाभिधायकत्वेनाज्ञाप्रार्थनाशंसनादिलिङो वक्त्रादीच्छाभिधायकत्वेन

---

(३२) क्रियेति। (३३) अत एवेति। यत एव पाकोपि चिकीर्षाविषय इत्यर्थः। अन्यथा कृतेरेवेप्सितत्वात्पाकस्य तदभावात्कर्मता न स्याद् इति भावः। पाकस्येच्छाविषयत्वाभावेपि कर्मत्वमुपपादयति। (३४) यद्वेति। इच्छाविषयः कृतिस्तद्विषयतयेत्यर्थः। (३५) ग्रामादेरिति। तत्रापीच्छाविषयगमनादिविषयतयैव कर्मत्वमित्यर्थः। (३६) सामग्र्यन्तरमिति। एतच्च यन्मते भोगे नेच्छा तत्र बोध्य,मन्यथा भुक्तिरूपेष्टसाधनत्वकृतिसाध्यत्वयोः सुखेऽवैकल्याद् न तत्र सामग्र्यन्तरं स्यादिति। लोकवद्वेदेपि कृतीष्टसाधनताज्ञानमेव प्रवर्त्तकमित्याह। (३७) एवं चेति। (३८) नेष्टसाधनमिति। काम्यत्वे नित्यताक्षतेरिति भावः। ननु कृतीष्टसाधनताज्ञानाद्यत्र क्व चित्प्रवर्त्तेतेत्यत आह। (३९) प्रकृत्यर्थस्य चेति। तथा च संध्योपासनयागादिविषयककृतेरिष्टसाधनतावगमाद् नान्यत्र प्रवर्त्ततइति भावः। यद्वा प्रत्ययानां प्रकृत्यर्थान्वितस्वार्थबोधकत्वमुपपादयति। प्रकृत्यर्थस्य चेति। इष्टसाधनत्वस्य च कृतिद्वारैवान्वय इतिभावः। दृष्टान्तं दूषयन्नेव दार्ष्टान्तिकं दूषयति।

(४०) वह्नीति। (४१) तथा चेति। एवं च कृतिसाध्यत्वमपि प्रवर्त्तकं विध्यर्थ इति भावः। नित्येपीष्टसाधनत्वमुपपादितमेव। नन्वस्तु कृतिसाध्यत्वप्रकारिकेच्छायाः कृतिसाध्यत्वज्ञानजन्यत्वं, तथापि सा न कृतिहेतुः, किं तु लाघवात् कृतीच्छैव, सा च कृतीष्टसाधनताज्ञानादेवोपपन्नेति कृतिसाध्यताज्ञानं न प्रवर्त्तकं, कृतिहेतुचिकीर्षाजनकज्ञानस्यैव तथात्वादित्यत्र नव्यमते किमपि नोत्तरमुक्तमिति चेत्। अत्राहुः। पाकादेरिष्टसाधनतां विना तत्कृतेस्तद्बोधासंभवे तत्प्राथमिकत्वे इष्टसाधनीभूतपाकजनिका कृतिरिति ज्ञानएव तत्कृतिसाध्यत्वेष्टसाधनत्वयोः प्रत्यये तेनैव तद्धेतोरिति न्यायेन प्रवृत्तौ संभवन्त्यां न तत्कृतिगोचरेष्टसाधनत्वपर्यन्तापेक्षा गौरवात्। न च पाकजनिका कृतिरिति ज्ञानेपि पाकः कृतिसाध्य इति ज्ञानालाभः। समानवित्तिवेद्यतया तल्लाभादिति। तच्चिन्त्यम्। उक्तलाघवेन कृतीच्छायाः प्रवर्त्तकत्वे सिद्धे तदुपपादकत्वेन तावत्पर्यन्तापेक्षाया युक्तत्वात्। वस्तुतः समानप्रकारकज्ञानस्यैव विरोधितया पाककृतिरिष्टसाधनमिति ज्ञानेपि पाकः कृत्यसाध्य इति ज्ञानसंभवात्। तेन च प्रवृत्तिप्रतिबन्धात् कृतिसाध्यताज्ञानं प्रवर्त्तकम्। जनकज्ञानं विघटयत एव ज्ञानस्य प्रतिबन्धकत्वात्। एवं च तज्जन्यकृतिसाध्यत्वप्रकारिकेच्छैव हेतुः। गौरवं च प्रामाणिकमेव।

(४२) लाघवादिति। अभिप्रायविधिपक्षइत्यादिना वक्ष्यमाणादित्यर्थः। नन्वाप्तत्वनिर्वचने गौरवमित्युपपादकान्तरमाह। (४३) पाकमिति। यागो यागयत्नो वेति मतभेदेन। तत्र कृतिसाध्यतयेति न यत्नान्वयी। एवमग्रेपीति बोध्यम्। एवं च कृतिसाध्यत्वमपि शक्यमिति ध्येयम्। ननु यत्त्वतत्त्वं

लिङ्मात्रस्येच्छावाचकत्वकल्पनाच्च । एवं स्वर्गकामो यजेतेत्यस्य स्वर्गकामस्य कृतिसाध्यतया यागो यागयत्नो वा ऽऽप्तेष्ट इत्यर्थः । ततो यो व्यापारो यस्य कृतिसाध्यतया यद्व्यापारविषयकः प्रयत्नो वा यस्याप्तेनेष्यते स तस्य बलवदनिष्टाननुबन्धीष्टसाधनमिति व्याप्तिग्रहाद् यागस्येष्टसाधनत्वमनुमिनोति ।.(४४) तथाहि । यागो मदिष्टसाधनं, मत्प्रयत्नविषयतया ऽऽप्तेनेष्यमाणत्वात् । तथा मत्पित्रा मत्प्रयत्नविषयतयेष्यमाणमद्भोजनं मदिष्टसाधनं तथा चेदं तस्मात्तथा । एवं न कलञ्जं भक्षयेदित्यस्य मम कलञ्जभक्षणप्रयत्नो नाप्तेच्छाविषय इत्यर्थः । ततः (४५) कलञ्जभक्षणं मम बलवदनिष्टसाधनं, मदिष्टसाधनत्वे सत्या(४६)प्तेन(४७)मत्प्रयत्नविषयतया ऽनिष्यमाणत्वात्, यथा मत्पित्रा मत्प्रयत्नविषयतया ऽनिष्यमाणं मधुविषसंपृक्तान्नभोजनं मम बलवदनिष्टसाधनं, तथा चेदं, तस्मात्तथा, स चाप्तो वेदव्याख्याता भगवानी(४८)श्वर एव । यस्तु वेदे पौरुषेयत्वं नोपैति तं प्रति विधिरेव तावद्गर्भइव श्रुतिकुमार्याः पुंयोगे प्रमाणम् । न तर्हि लाघवं तात्पर्यगौरवादीश्वराद्यनन्तकल्पनादिति चेत् । न । लाघवादिनेच्छाबोधकत्वेन लिङः प्रमाणसिद्धत्वेन फलमुखगौरवस्यादोषत्वात् । न तु कर्तुरस्मरणं बाधकं, प्रागेव निरासात् । (४९) तृप्तिकामनया विषभक्षणप्रवृत्तस्य विषभक्षणं तत्कृतिसाध्यतया नेश्वरेणेष्यते । ततो विषभक्षणस्येश्वरेच्छाविषयत्वेपि न तेन व्यभिचारः । यद्वा यत्कामकृतिसाध्यत्वेन यो व्यापार आप्तेनेष्यते स तस्येष्टसाधनं विषभक्षणं च तृप्तिकामकृतिसाध्यत्वेन नेश्वरेच्छाविषयो मानाभावात् । (५०) अत एव न कलञ्जं भक्षयेदित्यत्र कलञ्जभक्षणं तृप्तिकामनया भक्षणप्रवृत्तस्य कृतिसाध्यत्वेनाप्तेच्छाविषयो नेति तस्येश्वरेच्छाविषयत्वेपि विशिष्टनिषेध उपपद्यते । अभिप्रायविधिपक्षे (५१) बलवदनिष्टाननु-

---

चाननुगतमिति नानुमानमत आह । (४४) तथा हीति । (४५) कलञ्जभक्षणमिति । सत्यन्तमुदासीने व्यभिचारवारणाय । मदनाप्तेन मदिष्टसाधनस्यापि मत्कृतिविषयतया ऽनिष्यमाणत्वाद्व्यभिचार इत्यत आह । (४६) आप्तेनेति । नगत एवेश्वरेच्छाविषयत्वेनाप्रसिद्धिभयादाह । (४७) मत्प्रयत्नविषयतयेति । ईश्वरस्य न तत्प्रकारिका तत्रेच्छेति भावः । तात्पर्यगौरवमेव विवृणोति । (४८) ईश्वरेति । आद्यहेतौ प्रयत्नविषयतयेत्यस्य फलं दर्शयति । (४९) तृप्तीति । द्वितीयानुमानेपि तत्फलमाह । (५०) अत एवेति । (५१) बलवदिति । तथा च यागो बलवदनिष्टाननुबन्धीष्टसाधनमिति साध्य,मत एव तद्गर्भव्याप्त्युपदर्शनं प्रागुक्तं संगच्छतइति भावः । अत्रेदमनभिमतिबीजम् । भ्रमेण तृप्तिकामंकृते विषभक्षणे तथापि व्यभिचार एव, तस्य तृप्तिकामकृतिसाध्यत्वेनेश्वरेच्छाविषयत्वात् । न चात्र मानाभावः । वस्तुतस्तत्र कृतिसाध्यत्वे तत्प्रकारकतदिच्छाया वज्रलेपत्त्वात् । तदिच्छायाः सकलप्रकारकत्वात् । अन्यथा घटस्य घटत्वेन तदिच्छाविषयत्वे किं मानम् । न च बलवदनिष्टाजनकत्वमपि लिङ्गविशेषणं, भ्रमकृतजलताडनादौ तथापि व्यभिचारात् । उक्तगत्या तस्यापि तत्कृतिसाध्यत्वेनेश्वरेच्छाविषयत्वात् तस्यानुमानिकत्वाभ्युपगमे विधिवाक्यादनुपस्थितेश्च । न च प्रकारान्तरोपस्थितस्यैव तस्य लिङ्गविशेषणत्वम् । कृतिसाध्यत्वस्यापि शक्यत्वापत्तेः, तद्वदेव तस्यापि लिङ्गविशेषणत्वसंभवात् । एतेन यद्व्यापारविषयः प्रयत्नो यस्याप्तेनेष्यतइत्यादिव्याप्तौ व्यभिचारो बोध्यः । एवं च भ्रमकृते कलञ्जभक्षणे विशिष्टनिषेधानुपपत्तिरेव, उक्तगत्या तस्यापि कृतिसाध्यत्वेनेश्वरेच्छाविषयत्वादिति दिक् ॥ अन्ये तत्रानुमितेर्व्यापकतावच्छेदकप्रकारकत्वादिष्टसाधनत्वप्रकारकानुमितावपि प्रवर्त्तकस्वर्गसाधनताज्ञानमितो न भवतीत्यस्वरसमाहुः ॥

विधिस्त्वनेकधा भिद्यते । क्व चिक्त्रियाविधिः । यथा "द्विदा यजेते"ति । क्व चित्संबन्धविधिः । यथा "ऽऽग्नेयोष्टाकपालो भवती"ति । क्व चिद्विशिष्टविधिः । यथा "न जीर्णमलवद्वासाः स्नातकः स्या"दिति । अत्र हि नानूयाजेष्वितिवत् पर्युदासलक्षणया जीर्णमलवदन्यत्वविशिष्टवासोविधिरेवायमनन्यगतिकत्वात् । नह्यत्र जीर्णत्वमलवत्त्वाभ्यां विशिष्टं वासो निषिध्यते । विशिष्टवासोनिषेधस्य विशेष्यवासोनिषेधेप्युपपत्तेर्नग्नस्याप्यन्वयापत्तेः । एकैकविशिष्टस्योपादानापत्तेश्च । नाप्येकैकविशिष्टमेव निषिध्यते । वाक्यभेदापत्तेः । विशेषणमात्रनिषेधेप्येवम्, अत एव "सुवाससा भवितव्य"मिति श्रुतिरत्र मूलमिति भट्टोक्तमपि युज्यते । निषेधकत्वे विधायकत्वमूलता न स्यादिति । क्व चिद्गुणविधिः । यथा "सितासिते स्नाया"दित्यत्र, नित्यविधिप्राप्तएव स्नानद्वये फलार्थं देशरूपो गुणो विधीयते । क्व चित्कालरूपगुणविधिः । यथा "मध्यान्हे एकोदिष्टं कुर्वीते"ति । क्व चित्कारकरूपगुणविधिः । यथा "गोदोहेन पशुकामस्ये" ति क्व चित्कालविशिष्टकर्मविधिः । यथा "ऽपरपक्षश्राद्धं कुर्वीते" ति । क्वचित् क्रमविधिः । यथा "दर्शपौर्णमासाभ्यामिष्ट्वा सोमेन यजेते"ति । क्व चिन्नियमविधिः ।

न्धित्वमानुमानिकम्, इष्टसाधनताविधिपक्षे तु तदपि शक्यमिति गौरवमिति ॥

यथा "याजनाध्यापनप्रतिग्रहैर्ब्राह्मणो धनमर्जयेत्" दिति । अत्र हि न धनार्जनं विधीयते, रागप्राप्तत्वात् । नाप्यर्जनस्य याजनाद्यन्वयः, कृष्याद्यन्वयवत्तस्यापि रागप्राप्तत्वादेव । अप्राप्तस्यैव विधेयत्वात् । तथा च प्राप्तेतरोपायनिषेध एवात्र विधेयः । क्वचित् परिसंख्याविधिः । यथा "पञ्च पञ्चनखा भक्ष्या" इत्यत्र । नन्वत्रापि शशादीनां पञ्चानां भक्षणं रागप्राप्तमेवेति तदितरपञ्चनखभक्षणनिषेध एव विधेय इति नियमपरिसंख्ययोरन्ययोगव्यवच्छेदविधायकत्वादभेद इति चेत्, अत्र वदन्ति । यत्र क्रियायां विकल्पेन कारकान्वयस्तत्र नियमः । यथा धनार्जनम् । नह्येकस्यामेवार्जनक्रियायां याजनप्रतिग्रहादयो मिलिता अन्वीयन्ते । याजनप्रतिग्रहाभ्यामेकस्य धनार्जनस्यासंभवात् । परिसंख्यायां तु नैवम् । शशकादिमांसेन निर्मितस्यैकस्यामेव भक्षणक्रियायामन्वयसंभवात् । तदुक्तम् ॥

विधिरत्यन्तमप्राप्तौ नियमः पाक्षिके सति ।
तत्र चान्यत्र च प्राप्तौ परिसंख्यानमुच्यते ॥

इति । यत्तु तादृशार्जने विकल्पेनोपायत्रयसंबन्धे शब्दतः प्रतीयमाने कृष्यादीनामनन्वयोऽर्थात्सिध्यति । नहि येषामेकान्वये परानन्वयनियमस्तेषां समुच्चयः संभवति,तथा चात्रेतरोपायव्युदास एवं शब्दतात्पर्य,मप्राप्तत्वात् । किं तु न तत्र शब्दः प्रवर्त्तते, अर्थलभ्यत्वात् । वह्निजिज्ञासुं प्रति धूमोऽस्तीति शब्दवत्, परिसंख्यायां तु नैवं, तत्र भक्षणक्रियायां पञ्चपञ्चनखान्वये प्रतीते ऽर्थादितरपञ्चनखान्वयो न व्युदस्यते, उक्तगत्या तत्र समुच्चयसंभवात् । तथा चानन्यगत्या पञ्चनखभक्षणनिषेधो ऽत्र वाक्यार्थ एव । एवं च भक्ष्यपञ्चपदयोर्विरोधलक्षणा । तेन पञ्चेतरे पञ्चनखा न भक्ष्या इति वाक्यार्थः सिध्यति । तथा चोपस्थितपदार्थपरित्यागादनुपस्थितपदार्थकल्पनादभावविधित्वाच्च नियमापेक्षया दोषत्रयवती परिसंख्या जघन्येति । तत्रेदं चिन्त्यम् । याजनादिजन्यतत्तदर्जनेतरोपायव्युदासस्यार्थलभ्यत्वेपि कृष्यादिभिर्नार्जयेदित्यस्याप्राप्तेः । अनन्यगत्या नियमेपि निषेधस्यैव वाक्यार्थत्वौचित्यादन्यथा कृष्यादिभिरर्जयेदेव तज्जन्यार्जने तत्संबन्धव्युदासाभावादिति ।

॥ इतिविधिवादः ॥

॥ अथ वेदान्तसूत्रशैवभाष्यद्वितीयाध्यायस्य ॥

॥ चतुर्थपादारम्भः ॥

॥ तथा प्राणाः ॥ १ ॥

पूर्वत्र भूतानि ब्रह्मण उत्पद्यन्त इति निरूपितम्, जीवो नित्य इति । इह भूतानामिवेन्द्रियाणां ब्रह्मण उत्पत्तिः, उत जीववन्नित्यत्वम्, इति विचार्यते । यथा नित्यत्वाच्च जीवः समुत्पद्यते । तथेन्द्रियाण्यपि । जीववदमीषामपि नित्यत्वे श्रुतिसंभवात् । तथाहि, "असद्वा इदमग्र आसीत्" । "ऋषयो वाव ते अग्रे सदासत" । तदाहुः । "के ते ऋषय इति । प्राणा वा ऋषय" इति । प्रलयकाले प्राणानां स्थितिराम्नायते । प्राणास्ततो ब्रह्मणो नोत्पद्यन्ते ॥ १ ॥

इति प्राप्ते ब्रूमः ॥

॥ गौण्यसंभवात् तत्प्राक्श्रुतेश्च* ॥ २ ॥

न प्राणानां सृष्टेः प्रागवस्थितिः । किंतु परमेश्वरस्यैव । "सदेव सोम्येदमग्र आसीत्" इति श्रुतेः । ऋषिशब्दः प्राणशब्दश्च परमेश्वर एव वर्तते । तस्य बहुत्वासंभवात् । बहुवचनश्रुतिस्तत्र गौणी । ततो ब्रह्मण एव प्रागवस्थितिर्नेन्द्रियाणाम् ॥ २ ॥

युक्त्यन्तरमाह ॥

॥ तत्पूर्वकत्वाद्वाचः ॥ ३ ॥

परमेश्वरसृष्टिपूर्वकत्वादितरेषां नामरूपयोगस्य, तदानीं प्राणशब्दो नेन्द्रियविषयः । ततो ब्रह्मैव पूर्वभावीति ॥ ३ ॥

॥ सप्तगतेर्विशेषितत्वाच्च ॥ ४ ॥

पूर्वत्र ब्रह्मकार्यतया सिद्धानीन्द्रियाणि कियत्संख्यानीति संदेहे सप्तेति पूर्वः पक्षः । कुतः ।

"यदा पञ्चावतिष्ठन्ते ज्ञानानि मनसा सह ।
बुद्धिश्च न विचेष्टेत तामाहुः परमां गतिम्" ॥

इति सप्तानामेवावगतेः । "सप्त प्राणाः प्रभवन्ति" इत्यादिश्रुतौ सप्तेति विशेषितत्वाच्च ॥ ४ ॥

इत्येवं प्राप्तेऽभिधीयते ॥

॥ हस्तादयस्तु स्थितेऽतो नैवम् ॥ ५ ॥

न सप्तैवेन्द्रियाणि । हस्तादयोऽपीन्द्रियाणि । जीवे देहान्तः स्थिते उपकरणत्वाविशेषात् । अपित्वेकादश । "दशेमे पुरुषे प्राणा आत्मैकादशः" ।

"इन्द्रियाणि दशैकं च"

इति श्रुतिस्मृतिभ्याम् । बुद्ध्यादीनां न पृथगिन्द्रियत्वम् । किंतु ते मनोवृत्तिभेदा एव । सप्तानां गतिश्रवणं विशेषणं च । तेषां प्राधान्यात् । अतो न सप्तेन्द्रियाणि, किंत्वेकादश ॥ ५ ॥

॥ अणवश्च ॥ ६ ॥

तानीन्द्रियाणि विभूनि किमणूनीति संदेहे चक्षुरादीनां दूरगतवस्तुग्रहणसामर्थ्याद्विभूनीति प्राप्तेऽणूनीत्युच्यन्ते । क-

* शंकरमते गौण्यसंभवात् इत्येकं तत्प्राक्श्रुतेश्च इत्यपरमिति सूत्रद्वयम् । चकाररहितपाठोऽपि, इति ।

थम्। "प्राणमनूत्क्रामन्तं सर्वे प्राणा अनूत्क्रामन्ति" इति श्रवणात्। विभुत्वे हि तेषां न गतिः संभवति। चक्षुरादेर्दूरगतवस्तुग्रहणसामर्थ्यं न विभुत्वेन, किंतु तेजोरूपत्वादणुत्वाच्च शीघ्रगतिमत्त्वात्। तस्मादिन्द्रियाण्यणून्येव ॥ ६ ॥

॥ श्रेष्ठश्च ॥ ७ ॥

"प्राणमनूत्क्रामन्तं सर्वे प्राणा अनूत्क्रामन्ति" इति सर्वप्राणश्रेष्ठतया श्रूयमाणः पञ्चवृत्त्यात्मा प्राणवायुर्ब्रह्मण उत्पद्यते न वेति संशये न[1]जायते प्राणवायुः। नासदासीये सूक्ते "आनीदवातम्" इति सृष्टेः प्रागपि प्राणचेष्टाश्रवणात् ॥ ७ ॥

इति प्राप्ते वदामः ॥

प्राणवायुरपि जायत एव। आनीच्छब्दो न प्राणव्यापारं वक्ति। अवातमिति तन्निषेधात्। किंतु ब्रह्मसत्त्वमेव ब्रूते। अतो न प्राणानादित्वं संभवति। भवति त्वयं प्राणवायुरुत्पत्तिमान्।

स तु।

"सामान्यकरणवृत्तिः प्राणाद्या वायवः पञ्च।

इति तन्त्रान्तरोक्तरीत्येन्द्रियवृत्तिभ्यो वायुः "यः प्राणः स वायुः" इति श्रुत्या भूतवायोर्वा न[2] पृथग्भूत इत्यत आह ॥

॥ न वायुक्रिये पृथगुपदेशात् ॥ ८ ॥

पञ्चवृत्तिः प्राणोऽयं न वायुः। नचेन्द्रियवृत्तिः।

"एतस्माज्जायते प्राणो मनः सर्वेन्द्रियाणि च।
खं वायुर्ज्योतिरापः पृथिवी विश्वस्य धारिणी" ॥

इति श्रुत्या पृथगुपदेशात्। ततो वायोरिन्द्रियवृत्तिभ्यश्चान्य एव प्राणः ॥ ८ ॥

वायोरन्यत्वेऽपि न तस्य भूतान्तरत्वमित्याह ॥

॥ चक्षुरादिवत् तु तत्सहशिष्ट्यादिभ्यः ॥ ९ ॥

वायोः पृथग्भूतोऽप्ययं[3] नाग्न्यादिवद् भूतान्तरम्। किंतु वायुरेव देहधारणयोग्यतामापद्यते स्वयं परमेश्वराधारः। "भर्ता सन् ध्रियमाणो बिभर्ति, एको देवो बहुधा निविष्टः, त्वमेकोऽसि बहूननुप्रविष्टः, प्राणानां ग्रन्थिरसि, रुद्रो मा विशान्तक" इत्यादिश्रुतेः। किंच, अयं चक्षुरादिवज्जीवोपकरणम्। प्राणसंवादादिषु चक्षुरादिभिः सहोपदेशात्। तत्तुल्योपकारमुख्यत्वादिभ्यश्च ॥ ९ ॥

॥ अकरणत्वाच्च न दोषस्तथा हि दर्शयति ॥ १० ॥

१–यः। एवं सति न इति पा०।

२ संभवति। अयं प्राणवायुरिन्द्रियवृत्तिभ्यो न भूतवायोर्वा इति पा०।

३–तोऽयं इति पा०।

अकरणमक्रिया[1], न जीवोपकारकजीवनक्रिया; तत्त्वाच्च दोषः। यतः श्रुतिरेव देहेन्द्रियाद्यशैथिल्यकरणं वायुरिति दर्शयति प्राणसंवादे, "यस्मिन्नुत्क्रान्ते इदं शरीरं पापिष्ठतरमिव दृश्यते, स वः श्रेष्ठ" इति प्रजापतिवचनानन्तरं, वागाद्युत्क्रमणेऽपि देहस्येन्द्रियाणां च स्थितिं दर्शयित्वा प्राणोत्क्रमणे देहेन्द्रियशैथिल्याभिधानात् ॥ १० ॥

पञ्चवृत्तिर्मनोवद् व्यपदिश्यते ॥ ११ ॥

प्राण एक एव स्ववृत्तिभिः पञ्चभिः प्राणापानादिसंज्ञाभेदभाग्भवति। यथा कामादिभिर्मन एकमेव। अतः प्राण एक एव भूतेन्द्रियवृत्तिव्यतिरिक्तो जीवोपकारक इति सिद्धम् ॥ ११ ॥

अणुश्च ॥ १२ ॥

पञ्चवृत्तिरयं प्राणवायुरिन्द्रियवदणुर्विभुर्वेति संदेहे सति नाणुरयम्। "समः प्लुषिणा समो मशकेन समो नागेन सम एभिस्त्रिभिर्लोकैः समोऽनेन सर्वेण, प्राणे सर्वं प्रतिष्ठितं, सर्वं हीदं प्राणेनावृतम्"। इति श्रुतेः सर्वाधारकतया[2] व्यापी प्राण इति प्राप्ते ब्रूमः। अणुरेव प्राणवायुः। प्राणमनूत्क्रामन्तमिति तस्य गतिश्रवणात्। आधिदैविकस्य हिरण्यगर्भप्राणस्य समष्टिरूपस्य विभुत्वं, न व्यष्टिरूपस्येति[3] न विरोधः। तस्मादणुरेव प्राणः पञ्चवृत्तिरिति ॥ १२ ॥

॥ ज्योतिराद्यधिष्ठानं तु तदामननात् प्राणवताशब्दात्* ॥ १३ ॥

इह "आदित्यश्चक्षुर्भूत्वाक्षिणी प्राविशत्" इत्यादिश्रुत्या चक्षुरादीनामादित्याद्यधिष्ठानं श्रूयते जीवस्य रूपादिग्रहणाय। तदधिष्ठानमादित्यादीनां परमेश्वरायत्तमुत स्वतन्त्रमिति संशये "आदित्यश्चक्षुर्भूत्वाक्षिणी प्राविशत्" इत्यादिषु स्वातन्त्र्यश्रवणादादित्याद्यधिष्ठानं न परमेश्वरायत्तमिति पूर्वः पक्षः। सिद्धान्तस्तु परमेश्वरायत्तमिन्द्रियाद्यधिष्ठानमादित्यादीनाम्। कुतः। "य आदित्यमन्तरो यमयति" "य आत्मानमन्तरो यमयति" इत्यादिश्रवणात्। परमेश्वरसंकल्पपूर्वकत्वाच्च सर्वप्रवृत्तीनाम्। तस्मादिन्द्रियाद्यधिष्ठानं जीवस्यादित्यादीनां च† परमेश्वरायत्तमेव ॥ १३ ॥

तस्य च नित्यत्वात् ॥ १४ ॥

१ करणं क्रिया इति पा०।

२ सकलान्तर्वर्तितया इति पा०।

३–व्यष्टिवायोरिति इति पा०।

* शंकरमते ज्योतिराद्यधिष्ठानं तु तदामननात् इत्येकं प्राणवता शब्दात् इत्यपरमिति सूत्रद्वयम्।

† अस्मिन् व्याख्याने पुस्तकान्तरे आदित्यशब्दस्थाने अग्निशब्दो बोध्यः सर्वत्रैवेति।

सर्वस्य च परमेश्वरनियम्यत्वं नित्यमेव । अतोऽपि परमेश्वरसंकल्पायत्तमेवैषामधिष्ठातृत्वम्[1] ॥ १४ ॥

॥ त इन्द्रियाणि तद्व्यपदेशादन्यत्र श्रेष्ठात् ॥ १५ ॥

इह पूर्वोक्तानि वागादीनीन्द्रियाणि प्राणवृत्तिभ्यो भिन्नानि न वेति संशये तानि मुख्यप्राणवृत्तय एव । "एतस्यैव सर्वे रूपमभवन्" इत्यादिना तेषां प्राणरूपत्वश्रवणात् । वागादीनामुपरमरूपे मरणे प्राणो गत इति व्यवहारसामान्याच्च । तस्मात् प्राणादनन्यानीन्द्रियाणीति प्राप्ते ब्रूमः । मुख्यप्राणादन्यान्येवेन्द्रियाणि । श्रेष्ठादन्यत्र ये प्राणास्त इन्द्रियाणीति चक्षुरादिष्वेव,

"इन्द्रियाणि दशैकं च"

इत्यादिष्विन्द्रियव्यपदेशात्[2] ॥ १५ ॥

॥ भेदश्रुतेर्वैलक्षण्याच्च* ॥ १६ ॥

"एतस्माज्जायते प्राणो मनः सर्वेन्द्रियाणि च" इति प्राणेन्द्रियाणां भेदेनोत्पत्तिः श्रूयते । इन्द्रियाद्युपरमेऽपि प्राणवृत्त्यनुपरमरूपं वैलक्षण्यं च दृश्यते । अतोऽपि प्राणवृत्तिभ्यो भिन्नानीन्द्रियाणीति ॥ १६ ॥

॥ संज्ञामूर्तिक्लृप्तिस्तु त्रिवृत् कुर्वत उपदेशात् ॥ १७ ॥

पूर्वमाकाशादीनां भूतानां सह सदाशिवादिभिरधिष्ठातृभिः परमेश्वरादुत्पत्तिरभिहिता । तदेवं तेषु जातेषु ततो देवानां नामरूपादिक्लृप्तिस्तस्माद्देव मूलकारणादुतान्यस्मादिति संदेहः । एवं सति "तत् तेज ऐक्षत, बहु स्यां प्रजायेय" इति, "तदपोऽसृजत" इति श्रुतेस्तेजोऽभिमानी रुद्रो यः सृजति तासु वीर्यं क्षिपति तासु सत्त्वसहितो विष्णुरभिवर्तते इति । "आपो नारा", "नरो रुद्र" इति श्रुतिदर्शनाद्रुद्रसंभूताप्स्वायतनत्वेन[3] विष्णोर्नारायणसंज्ञा । "ता आप ऐक्षन्त", "ता अन्नमसृजन्त" इति श्रुतेस्तदभिमानी नारायणोऽन्नशब्दवाच्यं पृथिवीमुत्पादयति । तत्र पृथिवीतत्त्वेऽण्डरूपो हिरण्यगर्भः संवर्तते । तथा हि श्रूयते । "अण्डं हिरण्मयं मध्येसमुद्रं रुद्रस्य वीर्यात् प्रथमं संबभूव, तस्मिन् ब्रह्मा विष्णुर्जातो जातवेदा" इति ।

"अप एव ससर्जादौ तासु वीर्यमथासृजत् ।
तदण्डमभवद्धैमं सहस्रार्कसमप्रभम् ॥
तस्मिन् जज्ञे स्वयं ब्रह्मा सर्वलोकपितामहः ।
आपो नारा इति प्रोक्ता आपो वै नरसूनवः ॥

१ अतो न विरोध इति पा० ।

२ मुख्यप्राणादन्यान्येवेन्द्रियाणि । "ये प्राणास्त इन्द्रियाणि" इति तेष्वेवेन्द्रियव्यपदेशात् । "इन्द्रियाणि दशैकं च" इत्यादौ श्रवणाच्च । तस्मादन्यत्र श्रेष्ठादिन्द्रियाणीति इति पा० ।

* शंकरमते भेदश्रुतेः, इत्येकं वैलक्षण्याच्च इत्यपरमिति सूत्रद्वयम् ।

३—तास्वप्सु अयनत्वाद्धि—इति पा० ।

अयनं तस्य ता यस्मात् ततो नारायणः[1] स्मृतः ।
नारायणः परोऽव्यक्तोऽव्यक्तादण्डसमुद्भवः ।
अण्डस्यान्तस्त्विमे लोकाः सप्तद्वीपा च मेदिनी" ॥

इति मनुस्मृतिः । पुराणं च,

"रुद्रसंज्ञस्य देवस्य रूपे मूर्तिः प्रजायते ।
तेन क्षिप्तं रसे वीर्यं परं मूर्त्यभिमानिना ॥
तदण्डमभवद्वीर्यं सहस्रकिरणप्रभम् ।
विष्णुस्तत् प्राविशत् साक्षान्मम शक्तेस्तु वैभवात् ॥
पुनर्नारायणाख्यां मे नियोगात् प्राप्तवानसौ ।
इमं चोदाहरन्त्यत्र श्लोकं नारायणं प्रति ॥
आपः सूक्ष्मो रसो ज्ञेयो रसो नारः प्रकीर्तितः ।
नरजातस्ततो ब्रह्मा नरः साक्षाच्छिवः स्मृतः ॥
नारमस्यायनं प्रोक्तं तेन नारायणः स्मृतः ।
ब्रह्मापि नरशार्दूल गन्धजां मूर्तिमाविशत्[2] ॥

इत्यादि । एवं च "वेदो नामरूपे व्याकरोत् सतासती प्रजापतिः" इत्यादिश्रुतेः । "अण्डान्तर्वर्ती हिरण्यगर्भो वाद्भ्यः संभूतः पृथिव्यै रसाच्च" इत्यादिश्रुतेर्नारायणो वा देवादीनामण्डान्तर्वर्तिनां नामरूपकर्ता भवितुमर्हति । न ब्रह्माण्डादेरुत्तीर्णः परमेश्वर इति पूर्वः पक्षः । सिद्धान्तस्तु, न युक्तः प्रतिपादितसृष्टिक्रमः । किंतु "सदेव सोम्येदमग्र आसीत्," "एकमेवाद्वितीयम्" "तदैक्षत बहु स्यां प्रजायेय" इति "तत् तेजोऽसृजत" इत्यादिश्रुतेः सच्छब्दवाच्यं ब्रह्मैव पञ्चभूतकारणम् । तेजःप्राथम्यं परिहृतम् । ततश्चाकाशादि पृथिव्यन्तं सदाशिवादिसंज्ञया पूर्वकारणरूपं ब्रह्मोत्तरोत्तरं कार्यं सृजतीति, "तदैक्षत," "तत् तेज ऐक्षत," 'ता आप ऐक्षन्त," इति श्रुत्यावगम्यते । "हन्ताहमिमास्तिस्रो देवता" "अनेन जीवेनात्मनानुप्रविश्य नामरूपे व्याकरवाणि" इति तासां त्रिवृतं त्रिवृतमेकैकां करवाणीति त्रिवृत् कुर्वत एव परमेश्वरस्य वाय्वादिरूपस्य तिस्रो देवतास्तेजोऽबन्नात्मिकाः । ब्रह्मविष्णुरुद्ररूपजीवात्मनानुप्रविश्य नामरूपक्लृप्तिरवगम्यते । अतस्त्रिवृत् कुर्वत एव चतुर्मुखाद्यात्मनः सकलनामरूपक्लृप्तिरिति युक्तम् । त्रिवृत्करणं तु केवलं चतुर्मुखस्य न संभवति । त्रिवृत्कृतैर्हि तेजोऽबन्नैरण्डमुत्पद्यते । तत्र पश्चाच्चतुर्मुखसृष्टिः । "अण्डं हिरण्मयं मध्येसमुद्रं रुद्रस्य वीर्यात् प्रथमं संबभूव, तत्र ब्रह्मा विष्णुर्जातो जातवेदा" इति श्रुतेः ॥ १७ ॥

१ ता यदस्यायनं प्रोक्तं तस्मान्नारायणः इति पा० ।

२ गन्धमूर्त्तिं समाविशत् इति पा० ।

ननु त्रिवृत्करणस्य केवलं चतुर्मुखकर्तृत्वं संभवति । अण्डसृष्टुत्तरकालं चतुर्मुखसृष्टजीवेषु त्रिवृत्करणप्रकार उपदिश्यते । "यथा खलु सोम्येमास्तिस्रो देवताः पुरुषं प्राप्य त्रिवृत् त्रिवृदेकैका भवति, तन्मे विजानीहि" इति । "अन्नमशितं त्रेधा विधीयते । तस्य यत् स्थविष्ठो धातुस्तत् पुरीषं भवति । यो मध्यमस्तन्मांसम् । योऽणिष्ठस्तन्मन" इत्यादिना, इत्याशङ्क्य परिहरति[4] ॥

॥ मांसादि भैामं यथाशब्दमितरयोश्च ॥ १८ ॥

"अन्नमशितं त्रेधा विधीयत" इत्यादैा प्राङ्निरूपितात् त्रिवृत्करणादर्थान्तरभूत एवाण्डान्तर्वर्तिपुरुषोपभुक्तान्नादीनां परिणामप्रकार उच्यते ननु त्रिवृत्करणम् । अन्यथा हि मांसमनसोः पुरीषादणीयस्त्वेनाप्यतैजसत्वप्रसङ्गः । तथा सति "अन्नमशितं त्रेधा", इति भूमेरेव त्रैविध्योपक्रमे "अन्नमयं हि सोम्य मन" इति मनसो भैामत्वं च विरुध्येत । तयेतरयोरप्तेजसोस्त्रैविध्यं विरुध्यते । तदिदमाह, मांसादि भैामं यथाशब्दमितरयोश्चेति । पुरीषवन्मांसमनसी अपि भैामे इष्येते । तथा मूत्रवल्लोहितप्राणावाप्यैा, तथास्थिवन्मनोवाचैा तैजस्ये ॥ १८ ॥

ननु पूर्वमेव त्रिवृत् कृतं चेत् त्र्यात्मकं वस्तु कथमन्नमापस्तेज इत्युच्यत इत्यत आह ॥

॥ वैशेष्यात् तु तद्वादस्तद्वादः ॥ १९ ॥

अन्नादिभूयस्त्वेन वैशेष्यादन्नादिवाद इति । तस्मात् त्रिवृत् कुर्वतः परमेश्वरस्य चतुर्मुखाद्यात्मना सकलनामरूपसृष्टिरिति युक्तमेव ॥ १९ ॥

इति श्रीकण्ठशिवाचार्यविरचिते ब्रह्ममीमांसाभाष्ये द्वितीयस्याध्यायस्य चतुर्थः पादः ॥ ४ ॥

समाप्तश्च द्वितीयोऽध्यायः ॥ २ ॥ :: :: ॥

४ श्रुतेः ॥ १७ ॥ आशङ्क्य परिहरति इत्येव पा० ।

॥ अथ वेदान्तसूत्रसंबन्धितृतीयाध्यायस्य ॥

॥ प्रथमपादारम्भः ॥

॥ तदन्तरप्रतिपत्तैा रंहति संपरिष्वक्तः प्रश्ननिरूपणाभ्याम् ॥ १ ॥

अतीतेऽध्याये प्रथमाध्यायसिद्धस्य ब्रह्मकारणवाद[1]समन्वयस्य विरोधः परिहृतः । तथाहि, प्रथमे पादे सांख्यादितर्कविरोधः[2] परिहृतः । द्वितीये प्रधानकारणवादादिषु[3] तर्कविरोधः प्रदर्शितः । तृतीये भूतसृष्टयवान्तरविरोधपरिहारपूर्वकं जीवश्च नित्यत्वादिधर्मैर्निरूपितः[1] । चतुर्थे प्राणेन्द्रियाणां स्वरूपं ब्रह्मणः सकाशात् तेषामुत्पत्तिमप्यभिधाय[2] सर्वेषां नामरूपव्याकरणं च निरूपितम् । अत्र तृतीये प्रथमपादे नित्यत्वादियुक्तस्य जीवस्य गत्यागतिनिरूपणं क्रियते । द्वितीये तदवस्थानिरूपणपूर्वकमीश्वरस्य स्वरूपलक्षणमुच्यते । तृतीये तूपासनाविशेषाणां गुणोपसंहारः । चतुर्थे चाश्रमादिधर्म[3] इति विवेकः । अत्र प्रथमाधिकरणे जीवः परलोकगतागतेषु देहान्तरप्राप्तये भूतसूक्ष्मैर्वेष्टितो याति, उतावेष्टित, इति संशयः । जीवो देहान्निर्गच्छन् भूतसूक्ष्मैर्भाविशरीरबीजैरपरिष्वक्त एव यातीत्युच्यते । भूतानां सर्वत्र सुलभत्वेनापार्थकत्वादायासस्येति प्राप्ते ब्रूमः । जीवो देहान्तरप्राप्तैा भूतसूक्ष्मैः परिष्वक्तो[4] यातीति पञ्चाग्निविद्यायां प्रश्नप्रतिवचनाभ्यामवगम्यते । "वेत्थ[5] यथा पञ्चम्यामाहुतावापः पुरुषवचसो भवन्ति" इति प्रश्नः । "इति तु पञ्चम्यामाहुतावापः पुरुषवचसो भवन्ति" इति प्रतिवचनम् । तत्र चायमर्थः संपिण्डितः । ब्राह्मणादिदेहस्थो जीवः स्वाहादानादिकर्म कृत्वा तत्फलभोगायास्माद्देहादुत्थाय गच्छन्नेतद्देहस्याभिरद्भिर्भूतान्तरसंसृष्टाभिः सूक्ष्माभिः परिष्वक्तोऽग्नित्वेन निरूपितं द्युलोकं प्राप्य ताभिरेवामृतमयदेहाकारेण परिणताभिरद्भिः परिष्वक्तो देवानां शेषभावमुपगम्य तैः सह तत्र भोगविशेषाननुभूय कर्मवासनया भुक्तावशिष्टेन ब्राह्मणादिदेहप्रापकेन कर्मणा सह पुनरिमं लोकमागत्य कर्म कर्तुं ताभिरेव परिष्वक्तोऽग्नित्वेन निरूपितं[6] पर्जन्यं प्राप्य वर्षधाराभिः सहाग्नित्वेन निरूपितां पृथिवीमुपगम्य व्रीह्यादिशस्येनान्नाकारपरिणतेन सहाग्नित्वनिरूपितं पुरुषं प्राप्य तत्र शुक्राकारपरिणताभिस्ताभिरद्भिः[9] परिष्वक्तोऽग्नित्वेन निरूपितां योषितं प्राप्य तत्र देहाकारेण[10] ताभिः पुरुषशब्दाभिलापनीयाभिरद्भिः परिष्वक्तः कर्मानुरूपब्राह्मणादिदेहेन जायत इति । तदेतत् सर्वमुत्तरत्राभिव्यज्यते । तस्मात् पुरुषो भूतसूक्ष्मैर्वेष्टित एव देहान्तरं प्राप्नोतीति ॥ १ ॥

१—दि—इति पा० ।

२—र्दिकैः समन्वयविरोधः इति पा० ।

३ सांख्यादिसिद्धप्रधानादिकारणवादे इति पा० ।

१—जीवनित्यत्वादिधर्मा निरूपितः इति पा० ।

२ प्राणेन्द्रियादीनां स्वरूपनिरूपणं ब्रह्मण उपपत्तिमभिधाय इति पा० ।

३—मधर्म इति पा० ।

४—क्ष्मैर्वेष्टित एव इति पा० ।

५ कथम् । "वेत्थ इति पा० ।

६ निरूपितशब्दस्थाने सर्वत्र रूपितशब्दः पुस्तकान्तरस्थपाठ ऊहनीयः ।

७ पृथिव्यग्निस्थेना—इति पा० ।

८ भुक्त्या—इति पा० ।

९—ताभिः इति पा० ।

१० तत्र गर्भाकारेण इति पा० ।

॥ त्र्यात्मकत्वात् तु भूयस्त्वात् ॥ २ ॥

सर्वस्य त्रिवृत्करणेन त्र्यात्मकत्वाद्भूतान्तरसंसृष्टा एवापो भूयस्त्वादप्शब्देनोच्यन्ते । अतः पञ्चम्यामाहुतावाप इति केवलाप्शब्दग्रहणेऽपि न विरोधः ॥ २ ॥

॥ प्राणगतेश्च ॥ ३ ॥

"प्राणमनूत्क्रामन्तं सर्वे प्राणा अनूत्क्रामन्ति" इति जीवेन सहेन्द्रियगतेस्तदाश्रयत्वेन देहगमनमपि प्रतीयते । अतोऽपि भूतसूक्ष्मदेहवेष्टित एव यातीति[1] ॥ ३ ॥

आशङ्क्य परिहरति ॥

॥ अग्न्यादिगतिश्रुतेरिति चेन्न भाक्तत्वात् ॥ ४ ॥

"यत्रास्य पुरुषस्य मृतस्याग्निं वागप्येति वातं प्राणश्चक्षुरादित्यम्' इत्यादाविन्द्रियाणामग्न्याद्यभिगमः श्रूयते । ततो जीवेनेन्द्रियाणां न सह गमनमिति चेन्न । वागाद्यभिमानिदेवतासु वागादिशब्दानां भाक्तत्वात् । "ओषधीर्लोमानि वनस्पतीन् केशा" इत्यनपियद्भिर्लोमादिभिः[2] सह पाठात् ॥ ४ ॥

॥ प्रथमेऽश्रवणादिति चेन्न ता एव ह्युपपत्तेः ॥ ५ ॥

प्रथमे द्युलोकाग्नावपामश्रवणात् "नापो गच्छन्ति" "एतस्मिन्नग्नौ देवाः श्रद्धां जुह्वति" इति श्रद्धैव श्रूयते । इति चेन्न । आप एव श्रद्धाशब्देनोच्यन्ते । कथम् । अप्सु सृष्टासु तदुत्तरोपपत्तेः । श्रद्धाशब्दश्चाप्सु युज्यते । "श्रद्धा वा आप" इति श्रुतेः ॥ ५ ॥

पुनराशङ्क्य परिहरति ॥

॥ अश्रुतत्वादिति चेन्नेष्टादिकारिणां प्रतीतेः ॥ ६ ॥

अत्र प्रश्नप्रतिवचनयोराप एव प्रतीयन्ते । न तत्परिष्वक्तो जीव, इति चेन्न । उत्तरत्र "अथ य इमे ग्रामे इष्टापूर्ते दत्तमित्युपासते, ते धूममभिसंभवन्ति, धूमाद्रात्रिं रात्रेरपरपक्षमपरपक्षाद्यान् षड्दक्षिणैति मासांस्तान् नैते संवत्सरमभिप्राप्नुवन्ति मासेभ्यः पितृलोकं पितृलोकादादित्यमादित्याच्चन्द्रमसम्, एष सोमो राजा तद्देवानामन्नं तद्देवा[3] भक्षयन्ति, तस्मिन् यावत्संपातमुषित्वाथैतमेवाध्वानं पुनर्निवर्तन्ते. यथैतमाकाशाद्वायुं वायुर्भूत्वा धूमो भवति, धूमो भूत्वाभ्रं भवति, अभ्रं भूत्वा मेघो भवति, मेघो भूत्वा प्रवर्षति, तदुह व्रीहियवा ओषधिवनस्पतयस्तिलमाषा इति जायन्ते, अतो वै खलु दुर्निष्प्रपततरं यो यो ह्यन्नमत्ति, यो रेतः सिञ्चति, तद्भूय एव भवति" इति वाक्ये द्युलोके सोमराजशब्दोक्तामृतमयदेहवैशिष्ट्येन पुण्यफलमनुभूय पुण्यकर्मावसाने पुनरिहागत्य गर्भं प्राप्नुवतामिष्टादिकारिणां प्रतीतेस्तेषामेव तस्मिन्नेतस्मिन्नग्नौ देवाः श्रद्धां जुह्वति, "तस्या आहुतेः सोमो राजा संभवति" इत्यत्र सोमे राजशब्देन प्रत्यभिज्ञानात् । तस्मात् प्रश्नप्रतिवचनयोरप्यद्भिः परिष्वक्तस्तच्छरीरको[1] जीव एवाप इत्युच्यन्त इति गम्यते । अतो न विरोधः ॥ ६ ॥

॥ भाक्तं वानात्मवित्त्वात् तथाहि दर्शयति ॥ ७ ॥

"एष सोमो राजा तद्देवानामन्नं, तद्देवा भक्षयन्ति' इति सोमराजभावापन्नस्यैव देवैर्भक्ष्यमाणत्वश्रवणान्नासौ जीव इति चेत् । तद् भाक्तमेव भक्ष्यमाणत्वम्, अनात्मवित्त्वेन देवोपकरणाभिप्रायम्[2] । तथा हि "यथा पशुरेवं स देवानाम्" इति श्रुतिरनात्मविदां[3] पशुवद्देवोपकरणत्वं दर्शयति । तस्मादात्मविदां परमेश्वरोपकरणत्वम् । अनात्मविदां देवोपकरणत्वम् । इति मन्तव्यम् । अतः[4] सर्वथा जीवो देहान्तरप्राप्तौ भूतसूक्ष्मवेष्टित एव यातीति सिद्धम् ॥ ७ ॥

॥ कृतात्ययेऽनुशयवान् दृष्टस्मृतिभ्यां यथेतमनेवं च ॥ ८ ॥

पूर्वत्र भूतसूक्ष्मशरीरयुक्त एव जीवः स्वर्गादिकमुपेत्य देवादिशरीरे निजकर्मानुगुणं भोगं प्राप्नोतीति सिद्धम् । तदिह भोगानन्तरं[5] स जीवः पुनरिमं लोकं सकर्मशेषोऽवतरति, निःशेषभुक्तकर्मा वेति[6] संशयः । तथा सति पुरुषो निरनुशय एव स्वर्गादिमं लोकमवरोहतीति युक्तम् । अनुशयो नाम कर्मशेषो जीवमनुशेत इति न स्वर्गादवरोहतोऽनुशयः संभवति । अनुशयफलस्य तत्र भुक्तत्वात् । "यावत्संपातमुषित्वा, अथैतमेवाध्वानं पुनर्निवर्तन्ते" इति श्रुतिस्तद्विषया । अत्र संपातः कर्मसमूहः । संपातमनतिक्रम्य, इति यावत्संपातमित्युच्यते । ततो निःशेषं कर्मफलं भुक्त्वा कर्मरहित एव स्वर्गादवरोहति जीव इति पूर्वः पक्षः । सिद्धान्तस्तु स्वर्गात् सुकृतक्षये पुनरिमं लोकमवरोहन् सकर्मशेष एवागच्छति । कथमवगम्यते । श्रुतिस्मृतिभ्यामेव । यथा "रमणीयचरणा रमणीयां योनिमापद्येरन्, ब्राह्मणयोनिं वा क्षत्रिययोनिं वा वैश्ययोनिं वा अथ य इह कपूयचरणाः कपूयां योनिमापद्येरन् श्वयोनिं वा सूकरयोनिं वा चण्डालयोनिं वा" इति श्रुतिः ।

१ ततो न पूर्वोक्तहानिः इति पा० ।

२–लोमानीत्यनविशद्भि–इति पा० ।

३ तं दे–इति सर्वत्र वरपा० ।

१–मित्युपासत इत्यादाविष्टादिकारिणां प्रतीतेर्गमनप्रकारवचनस्य द्युलोकाग्निसंतर्प्यसंबन्धवाच्यस्य तस्या आहुतेः सोमो राजा संबभूवेति सोमोभूतस्यैव एष सोमो राजेति प्रत्यभिज्ञानादद्भिः परिष्वक्त इति पा० ।

२ चेन्न । तदेतद् भाक्तमेव भक्ष्यमाणत्वम् । अनात्मवित्त्वेन देवोपकरणाभिप्रायात् इति पा० ।

३ तथाहि दर्शयति श्रुतिरेव । "यथा पशुरेवं स देवानाम्" इति इति पा० ।

४–त्वं द्रष्टव्यम् । तस्मात् इति पा० ।

५ देहानन्तरं इति पा० ।

६ उत निःशेषं भुक्तकर्मेति इति पा० ।

"जायन्ते पुण्यकर्माणः"

इत्यादिका स्मृतिः। अन्यथा सद्यः समुत्पन्नस्य बालस्य धर्माधर्मोद्यभावात् सुखदुःखभोगो न स्यात्। तस्मादनुशयवानेव यथेदमनेवं च समागच्छति, आकाशावरोहणादारोहप्रकारेण वाय्वादिप्राप्तेः पितृलोकाद्यप्राप्तेश्च। प्रकारान्तरेण च पुनर्निवर्तन्त इत्यर्थः[1] ॥ ८ ॥

पुनराशङ्क्य मतान्तरेण,[2] परिहरति ॥

॥ चरणादिति चेन्न तदुप-*
लक्षणार्थेति कार्ष्णाजिनिः ॥ ९ ॥

रमणीयचरणाः कपूयचरणा इति चरणशब्दाचानुशयासिद्धिः। चरणशब्दस्य स्मार्ताचरणविषयत्वात्। इति चेन्न। अनुशयोपलक्षणार्था हि चरणश्रुतिः। तस्यैव सुखादिसाधकत्वात् ॥ ९ ॥

॥ आनर्थक्यमिति चेन्न तदपेक्षत्वात् ॥ १० ॥

एवं सति स्मार्ताचरणस्यानुपयोगादानर्थक्यं स्यादिति चेन्न। तदपेक्षत्वादेव सर्वस्य पुण्यकर्मणः।

"संध्याहीनोऽशुचिर्नित्यमनर्हः सर्वकर्मसु।
यदन्यत् कुरुते कर्म न तस्य फलभाग्भवेत्" ॥

॥ इति कार्ष्णाजिनिमतम् ॥ १० ॥

॥ सुकृतदुष्कृते एवेति तु बादरिः ॥ ११ ॥

बादरिस्तु रमणीयचरणाः कपूयचरणा इति चरणशब्दः सुकृतदुष्कृतयोर्वाचकः। नतु लक्षकः। इति बादरेर्मतम्। स्माचारापेक्षं कर्मेति तु स्वीकृतमेव[3]। अतः सुकृतदुष्कृतानुशयवानेव स्वर्गादवरोहति जीव इति सिद्धम् ॥ ११ ॥

॥ अनिष्टादिकारिणामपि च श्रुतम् ॥ १२ ॥

इह यथेष्टापूर्तादिकारिणां चन्द्रगमनम्। तथान्येषामप्यस्ति न वेति संशयः। तथा सतीष्टापूर्ताद्यकुर्वतामपि चन्द्रगमनमस्त्येव। "य एवैके चास्माल्लोकात् प्रयन्ति चन्द्रमसमेव ते सर्वे गच्छन्ति" इत्यविशेषेण सर्वेषां चन्द्रगमनश्रवणात्। यद्यपि तत्र पापिनां भोगो नास्ति, तथापि पुनरागत्य शरीरग्रहार्थं पञ्चमाहुतिलाभाय स्वर्गगतिरपेक्ष्या ॥ १२ ॥

तस्मादिष्टापूर्ताद्यकुर्वतामपि चन्द्रगमनं युक्तमिति प्राप्तेऽभिधीयते ॥

॥ संयमने त्वनुभूयेतरेषामारोहावरोहौ तद्गतिदर्शनात् ॥ १३ ॥

इष्टापूर्ताद्यकुर्वतां चन्द्रगमनं नास्ति। किंतु यमसदने कर्मफलमनुभूय प्रत्यवरोहणम्। एवं भूतावेव तेषामारोहावरोहौ "वैवस्वतसंगमनं जनानाम्" इति तद्गतिदर्शनात्। भोगार्थमेव हि स्वर्गगमनम्। न पञ्चमाहुतिलाभाय। द्रोणादीनां योषिदाहुतेरभावेन व्यभिचारात्। अतो यमलोकप्राप्तिरेव पापिनामिति युक्तम् ॥ १३ ॥

॥ स्मरन्ति च ॥ १४ ॥

अस्मिन्नर्थे स्मरन्ति च।

"सर्वे चैते वशं यान्ति यमस्य भगवन् किल"।

इत्यादि ॥ १४ ॥

॥ अपि च† सप्त ॥ १५ ॥

सप्त रौरवादीनपि पापिनो महानरकान् स्मरन्ति ॥ १५ ॥

तत्रापि च तद्व्यापारादविरोधः ॥ १६ ॥

तत्रापि चित्रगुप्ताद्यधिष्ठितेषु नरकेष्वपि तेषां प्रेरकस्य तदधिष्ठातृत्वव्यापारसत्त्वाद् यमवश्यताया विरोधाभावः ॥ १६ ॥

॥ विद्याकर्मणोरिति तु प्रकृतत्वात् ॥ १७ ॥

विद्याकर्मणोः फलभोगाद्यर्थं ब्रह्मगमनं चन्द्रगमनं च। कथम्। "तद्य इत्थं विदुर्ये चेमेऽरण्ये श्रद्धातप इत्युपासते तेऽर्चिषमभिसंभवन्ति," "अथ य इमे ग्रामे इष्टापूर्ते दत्तमित्युपासते, ते धूममभिसंभवन्ति" इति ब्रह्मगमने च विद्याकर्मणोरेव[1] प्रकृतत्वात्। अतो न पापिनां सहगतिप्रसङ्गः ॥ १७ ॥

न तृतीये तथोपलब्धेः ॥ १८ ॥

नच पापिनामपि पञ्चमाहुतिप्राप्तिमूलत्वाद्देहारम्भस्य तदर्थं द्युलोकापेक्षा। तेषां द्युलोकगमनाभावोपलब्धेः। "अथैतयोः पथोर्न कतरेण च तानीमानि क्षुद्राण्यसकृदावर्तीनि भूतानि भवन्ति, जायस्व म्रियस्वेत्येतत् तृतीयं स्थानं तेनासौ लोको न स पूर्यते" इति 'तृतीयं स्थानमिति पापकर्मीणामुच्यते[2]। अतः पापिनां न स्वर्गगमनम् ॥ १८ ॥

॥ स्मर्यतेऽपि च लोके ॥ १९ ॥

लोके द्रौपद्यादीनां पुण्यकर्मणामपि[3] पञ्चमाहुत्यनपेक्षा देहारम्भाय स्मर्यते ॥ १९ ॥

१—वानेव समागच्छतीति निर्णयः इत्येव पा०।

२ मतान्तरमाशङ्क्य इति पा०।

* शेषपुस्तकमपहाय सर्वत्र नोप—इति पाठः।

३ शब्देन सुकृतदुष्कृते एवेति। तथा "पुण्यं कर्माचरति" इति प्रसिद्धेः। एतदेव स्वीकृतं स्मार्ताचारापेक्षं कर्मेति इति पा०।

† चकाररहितः क्वचित् पाठः।

१ ब्रह्मचन्द्रगमनयोरेव इति वरपा०।

२ पापकर्माण उच्यन्ते इति वरपा०।

३ लोके द्रोणादीनामपि पुण्यकर्मणां इति पा०।

॥ दर्शनाच्च ॥ २० ॥

किंच, श्रुतिदर्शनं च भवति। "तेषां खल्वेषां भूतानां त्रीण्येव बीजानि भवन्ति अण्डजं जीवजमुद्भिज्जमिति" तत्र स्वेदजोद्भिज्जयोस्तदनपेक्षत्वं दृश्यते ॥ २० ॥

ननु जीवजमुद्भिज्जमिति श्रुतौ स्वेदजग्रहणं नास्तीत्यत आह[1] ॥

॥ तृतीयशब्दावरोधः संशोकजस्य ॥ २१ ॥

संशोकजस्य स्वेदजस्यापि तृतीयेनोद्भिज्जशब्देन संग्रहोऽस्तीत्यर्थः[2]। ततः पापिनां न स्वर्गगमनमिति निर्णयः॥ २१॥

॥ तत्स्वाभाव्यापत्तिरुपपत्तेः ॥ २२ ॥

पूर्वत्र फलभोगानन्तरं स्वर्गात् सानुशय एव जीवोऽवतरतीति निरूपितम्। घनस्यावरोहत आकाशादिभावः श्रूयते। "अथैतमेवाध्वानं पुनर्निवर्तन्ते, यथैतमाकाशमाकाशाद्वायुं वायुर्भूत्वा धूमो भवति, धूमो भूत्वाभ्रं भवति, अभ्रं भूत्वा मेघो भवति, मेघो भूत्वा प्रवर्षति" इति। तत्र जीवस्येत्याकाशादिरूपतापत्तिस्तत्सादृश्यापत्तिर्वेति संशयः। तत्र भूत्वेति शब्दादाकाशादिरूपत्वं जीवस्येति ब्रूमः[3]। नावरोहतो जीवस्याकाशादिरूपतापत्तिः। किंतु तत्सादृश्यापत्तिः। तत्र सुखदुःखानुभावाभावात्[4]। तदनुभवार्थं हि तत्तच्छरीरसंबन्धः। अन्यस्यान्यत्वानुपपत्तेश्च। तस्मात् तत्सादृश्यापत्तिरवरोहत इत्येवोपपद्यत इति निर्णयः॥ २२ ॥

॥ नातिचिरेण विशेषात् ॥ २३ ॥

अत्रावरोहन् जीवो विलम्बते न वेत्यनियमः। उत न विलम्बत एव। इति संशयः। तत्र प्रवर्षणानन्तरं व्रीह्यादिभावः श्रूयते। "तदुह व्रीहियवा ओषधिवनस्पतयस्तिलमाषा जायन्त" इति प्रागेतस्माद् व्रीहियवादिभावादाकाशादौ विलम्बत्वरयोर्न नियम इति प्राप्ते ब्रूमः। व्रीह्यादिप्राप्तेः प्रागाकाशादिषु नातिचिरं तिष्ठति जीवः। कथम्। व्रीह्यादिभावानन्तरम्, अतो वै खलु दुर्निष्प्रपत्तरमिति व्रीह्यादिभावान्निर्गमनं दुःशकम्। इति[5] हि श्रूयते। अतो व्रीह्यादौ विलम्बादन्यत्र त्वरेत्यवगमादाकाशादौ न विलम्बते जीव इति ॥ २३ ॥

१ तत्र स्वेदजस्य ग्रहणं न विवक्षितमित्याशङ्क्याह इति पा०।

२ उद्भिज्जशब्देनैव स्वेदजस्य संग्रहः कृतः। तयोर्भूम्युदकोद्भवत्वस्य तुल्यत्वात् इत्येव पा०।

३ तस्यावरोहतस्तु "अथैतमेवाध्वानं पुनर्निवर्तन्ते, यथैतमाकाशमाकाशाद्वायुं, वायुर्भूत्वा धूमो भवति, धूमो भूत्वाभ्रं भवति, अभ्रं भूत्वा मेघो भवति मेघो भूत्वा प्रवर्षति" इति श्रूयते ह्याकाशादिभावः। तज्जीवस्याकाशादेः स्वरूपापत्तिः सादृश्यापत्तिर्वेति संशयः। तत्र भूत्वेति शब्दादाकाशादिभावो जीवस्येति प्राप्ते ब्रूमः। इति पा०।

४ तत्र सुखानुभवरूपभोगाभावोपपत्तेः इति पा०।

५ पूर्वोक्ताकाशादवरोहन् जीवो विलम्बते न वेति संशयः। तत्र प्रवर्षणानन्तरं व्रीह्यादिभावे आत्मा जायते। व्रीहियवादेरोषधिवनस्पतयो जायन्त इति प्रागेतस्माद् व्रीहियवादिसंभवादाकाशादौ विलम्बाविलम्बयोर्न नियम इति प्राप्ते ब्रूमः। व्रीह्यादिभावानन्तरम्, अतो वै खलु दुर्निष्प्रपत्तरमिति व्रीह्यादिभावान्निर्गमनं दुःशकमिति इति पा०।

॥ अन्याधिष्ठिते पूर्ववदभिलापात् ॥ २४ ॥

इह व्रीह्यादावपि जीवस्य संश्लेषमात्रमुत जन्मेति संशये व्रीह्यादिरूपेण जायन्त इति श्रवणात् तस्य व्रीह्यादिजन्मेति प्राप्ते ब्रूमः। अन्यजीवाधिष्ठिते व्रीह्यादौ जीवस्य संश्लेषमात्रम्। आकाशादिवावरोहतस्तत्र जननहेतुसंकीर्तनविरहिता[2]भिलापाज्जायन्त इति श्रुतिर्गौणी। यत्र ब्राह्मणादिजन्मास्ति। तत्र रमणीयचरणाः कपूयचरणा इति हेतुरभिलप्यते। अतो ब्राह्मणादावेवास्य जन्माभिलापादन्यत्रास्य संबन्धमात्रमिति निर्णयः॥ २४ ॥

॥ अशुद्धमिति चेन्न शब्दात् ॥ २५ ॥

अवरोहतः पुरुषस्य पूर्वानुष्ठितयागादिष्वग्निषोमीयादिहिंसामिश्रत्वादशुद्धं कर्मेति तत्फलभोगाय व्रीह्यादिष्वप्युत्पत्तिरस्त्विति चेत्। न। श्रूयते हि "हिरण्यशरीर ऊर्ध्वं स्वर्गं लोकमेति न वाडवे तन्म्रियते तरिष्यति" इति पशुहिंसाया अहिंसात्वम्। ततो न तत्प्राप्तिरस्ति ॥ २५ ॥

उपपत्त्यन्तरमाह ॥

॥ रेतःसिग्योगोऽथ ॥ २६ ॥

"यो यो ह्यन्नमत्ति यो रेतः सिञ्चति तद्भूय एव च भवति" इत्यनेन रेतःसिचा योगमात्रमस्यानन्तरमुच्यते। अतः पूर्वमपि व्रीह्यादिषु योगमात्रमेव ॥ २६ ॥

॥ योनेः शरीरम् ॥ २७ ॥

यदा योनिप्राप्तिस्तस्य तदैव शरीरमुत्पद्यते। अतः पूर्वं तु संश्लेषमात्रमिति भावः॥ २७ ॥

इति श्रीकण्ठशिवाचार्यविरचिते ब्रह्ममीमांसाभाष्ये तृतीयस्याध्यायस्य प्रथमः पादः ॥ १ ॥ :: :: ॥

१—दौ इति वरपा०।

२ न जीवस्य जन्म। किंतु संश्लेषमात्रम्। आकाशादाविवारोहतस्तत्र न जननहेतुः। विरहाभि—इति पा०।

॥ श्रीगुरुभ्यो नमः ॥

॥ सप्तमण्डलप्रवेशप्रकरणम् ॥

शङ्करः शं चरीकर्ति यः शर्वरी-
नायकोऽमुष्य भूषाविशेषोऽप्यभूत्।
उत्तमाङ्गस्थया गङ्गया सङ्गत-
स्तं भजेयोमया साकमङ्कस्थया ॥ १ ॥

प्रश्नः ।

समुन्नतासून् समवृत्तसंस्थे
भास्वत्यभिज्ञाय पलप्रभां च ।
आचक्षते क्रान्तिगुणं द्रुतं ये
मन्येऽवतीर्णं द्युमणिं तमन्यम् ॥ २ ॥

अस्य भङ्गः ।

द्वीन्द्वक्षभावधहृतात् पलकर्णवर्गा-
द्यच्चोन्नतासुविपरीतगुणात् त्रिमौर्व्या ।
लब्धं तयोः कृतिवियोगपदं यदेत-
द्भक्तः समुन्नतगुणोऽपममौर्विका स्यात् ॥ ३ ॥

अस्य प्रश्नस्य श्रीमद्गुरुचरणोक्तो प्रकारान्तरेण भङ्गो ।

त्रिज्यानिघ्नादक्षकर्णस्य वर्गा-
द्वेदेन्द्रघ्नीमुन्नतासूत्क्रमज्याम् ।
त्यक्त्वा शेषादुन्नतासुज्यकाच्च-
श्रुत्याहत्याप्तं समाख्यप्रभा स्यात् ॥ ४ ॥

तस्याः समनरः साध्यस्तस्मादक्षभया हतात् ।
पलकर्णेन लब्धस्य चापं क्रान्तिर्भवेत् सकृत् ॥ ५ ॥

द्विघ्नी त्रिभज्या नयनाहताना-
मक्षांशकानां भुजजीवयाप्ता ।
या योन्नतासूत्क्रममौर्विका च
त्रिजीवया संविहृता तयोर्यत् ॥ ६ ॥

वर्गान्तरान्मूलमनेन भक्ता-
न्नतासुजीवापममौर्विका स्यात् ।
समुन्नतास्वक्षलवाववोधाद्
दृष्टे प्रविष्टे समवृत्तमर्के ॥ ७ ॥

प्रश्नः ।

प्रविशति यदादित्यो वृत्तं समाख्यमिहोन्नतं
समयमपमज्यां ज्ञात्वा यो वदेत् पलभां द्रुतम् ।
निखिलगणकामन्दानन्दप्रदो गणितस्थली
समभिपतितः पाटीरोऽसौ श्रमापहरो विदाम् ॥ ८ ॥

अस्य भङ्गः ।

पृथक् स्थिते उन्नतकालजाते
क्रमोत्क्रमज्ये निहते क्रमेण ।
त्रिराशिजीवापममौर्विकाभ्यां
यदेतयोर्वर्गयुतेः पदं तत् ॥ ९ ॥

त्रिभज्यया भाज्यमदो यदाप्तं
सा तद्युतिः स्यादथ बुद्धिमद्भिः ।
अतः प्रसाध्या द्विविधा पलाभा
प्रोक्तप्रकारं मनसा विचार्य ॥ १० ॥

अस्य प्रश्नस्य श्रीमद्गुरुचरणोक्तः प्रकारान्तरेण भङ्गः ।

स्यादुन्नतः काल इहेष्टसंज्ञ-
स्तस्य ज्यका द्युज्यकया विनिघ्नी ।
त्रिज्योद्धृता तद्युतिमत्र लब्धं
प्रकल्प्य तस्याः पलभा चरं च ॥ ११ ॥

द्युज्या चरोनेष्टगुणेन निघ्नी
त्रिज्योद्धृता तद्युतिखण्डमूर्ध्वम् ।
ततोऽक्षभा तद्युतिखण्डमूर्ध्वं
ततोऽक्षभा स्यादसकृच्च तस्मात् ॥ १२ ॥

इष्टक्रमज्योत्क्रममौर्विके वा
त्रिज्यापमज्यानिहते क्रमेण ।
कार्ये तयोर्वर्गयुतिर्युगाब्धि-
हिमांशुवर्गेण हताद्यसंज्ञा ॥ १३ ॥

या क्रान्तिजीवेष्टदलज्यकाघ्नी
द्विघ्नी च या च द्युगुणेन निघ्नी ।
इष्टज्यका तत्कृतिसंयुतिर्द्वि-
क्ष्माभृद्विनिघ्नी परसंज्ञिका स्यात् ॥ १४ ॥

त्रिज्यापमज्यावधवर्गभक्तौ
तौ चाद्यहीनात् परवर्गतो यत् ।
मूलं तदूनाढ्यपराद्युगेन्द्रै-
र्हीनात् पदं स्याद् द्विविधा पलाभा ॥ १५ ॥

क्रान्तिज्यया त्रिज्यकयोन्नतासु-
क्रमोत्क्रमज्ये क्रमशो विभक्ते ।
तद्वर्गयोगो युतिसंज्ञकः स्या-
द्युत्या हतायाश्चतुरूनयुत्याः ॥ १६ ॥

पदेन नेत्रोनयुतिर्युतोना
पृथक् तदर्धात् पदमर्कनिघ्नम् ।
द्विधाक्षभा स्यादपमोन्नतासु-
ज्ञानाद् दिनेशे समवृत्तयाते ॥ १७ ॥

प्रश्नः ।

विद्वा समुन्नतलवान् समवृत्तयाते
सूर्येऽधिगम्य च समुन्नतकालमानम् ।

यो द्राग्ब्रवीति पलभां खलु भास्करोऽसौ
स्याद् दुष्टगाणितिकगर्वतमोपहारी ॥ १८ ।

अस्य भङ्गः ।

दृग्ज्योन्नतकालज्याभिहतिः समशङ्कुभाजिता लब्धम् ।
योज्याख्यं तत्कृत्या युत उन्नतकालदलमौर्व्याः ॥ १९ ॥
वर्गोऽष्टघ्नस्तत्पदमाद्यं योज्येन तद्वसैर्गुणितम् ।
त्रिगुणहृतं पलकर्णः पलभावगमस्ततः सुगमः ॥ २० ॥

प्रकारान्तरेण भङ्गः ।

विज्याविनिघ्नः समशङ्कुवर्गो
दृग्ज्यार्धनिघ्न्युन्नतकालजीवा ।
समुन्नतासूत्क्रमजीवया तौ
भक्तौ भवेतां प्रथमान्यसंज्ञौ ॥ २१ ॥
परकृतिसहिताद्यतः पदं यत्
परहीनं कुगुणोनतद्धृतिः स्यात् ।
इह खलु पलभापमज्यके वा
सुधियातः स्वधियैव साधनीये ॥ २२ ॥

अस्य प्रश्नस्य श्रीमद्गुरुचरणोक्तः प्रकारान्तरेण भङ्गः ।

अत्रोन्नतासूत्क्रममौर्विकाघ्न-
स्त्रिज्याहृतो द्वादशवर्ग आद्यः ।
समप्रभार्धेन हतोन्नतासु-
ज्यका त्रिभज्याविहृतान्यसंज्ञः ॥ २३ ॥
अन्यस्य वर्गेण युताद्यदाद्या-
न्मूलं तदन्यान्वितमक्षकर्णः ।
ततोऽक्षभाया अपि चापमस्य
ज्ञानं द्रुतं स्याद्गणकाग्रणीनाम् ॥ २४ ॥

प्रश्नः ।

तपने समवृत्तमागते यो
विबुधः शङ्कुतलं समुन्नतासून् ।
अभिवीक्ष्य पलप्रभां वदेद् द्रा-
गपमज्यां च न के विदः स्तुयुस्तम् ॥ २५ ॥

अस्य भङ्गः ।

अयाग्राकोटिज्ये प्रकल्प्य समशङ्कुदृग्ज्यके साध्या ।
कुज्योनतद्धृतिः स्यात् कुज्या पलभापमज्यके च ततः ॥ २६ ॥

प्रश्नः ।

भास्वति समवृत्तगते विज्ञाय हृतिं समुन्नतं समयम् ।
यः पलभापमजीवे वक्ति स विद्वद्वरो ज्ञेयः ॥ २७ ॥

अस्य भङ्गः ।

तद्धृत्युन्नतकालज्यावर्गान्तरपदं हतम् ।
त्रिज्ययोन्नतकालस्य व्यस्तमौर्व्या विभाजितम् ॥ २८ ॥
अपमज्या भवेदेवं पलभा द्विविधा ततः ।
सुधिया स्वधिया साध्या विमृश्य प्रोक्तमार्गतः ॥ २९ ॥

प्रश्नः ।

उन्नतकालं च कलां प्रविशति समवृत्तमादित्ये ।
विज्ञायाक्षुब्धः सन्नक्षाभां मे विचक्षणाचक्ष्व ॥ ३० ॥

अस्य भङ्गः ।

अत्रोन्नतासुविपरीतगुणस्य वर्गे-
णार्धीकृतेन रहितस्त्रिगुणस्य वर्गः ।
कुज्योनतद्धृतिहतः प्रथमः परस्तु
कुज्योनतद्धृतिसमुन्नतकालमौर्व्याः ॥ ३१ ॥
वर्गान्तरं त्वथ परात् प्रथमस्य कृत्या
युक्तात् पदं प्रथमहीनमियं चितिज्या ।
अक्षप्रभापमगुणावत एव साध्यौ
जागर्ति चेतसि यदोक्तविधिः सुधीभिः ३२ ॥

प्रश्नः ।

ज्ञात्वा चितिज्यां च समुन्नतासून्
दिनाधिनाथे सममण्डलस्थे ।
पलप्रभां क्रान्तिगुणं च विद्धि
चेन्नैपुणं ते गणिते सगोले ॥ ३३ ॥

अस्य भङ्गः ।

अनन्तरोक्तमार्गेण कुज्यया कुज्ययोनिता ।
तद्धृतिः सिध्यति क्रान्तिज्याक्षभे तत उक्तवत् ॥ ३४ ॥

प्रश्नः ।

चरासुवेदी समवृत्तसंस्थे
रवौ विलोक्योन्नतकालमानम् ॥
वेत्यक्षभां योऽपममौर्विकां च
ज्ञेयः स सिद्धान्तविदां वरिष्ठः ॥ ३५ ॥

अस्य भङ्गः ।

उन्नतकालचरान्तरमौर्व्या चरशिञ्जिनीं विभजेत् ।
तत्पदमर्कहतं स्यात् पलभा सुलभापमज्यातः ॥ ३६ ॥

प्रश्नः ।

ज्ञात्वा नतासूंश्च समुन्नतासून्
दिवाकरे याति समाख्यवृत्तम् ।
योऽक्षप्रभां क्रान्तिगुणं च विद्यात्
स चोदिताशेषविशेषवेदी ॥ ३७ ॥

अस्य भङ्गः ।

नतासून्नतासूद्भवा योगकोटि-
ज्यका स्याच्चरज्या ततोऽक्षप्रभाच ।
बुधैराद्यखण्डोक्तमार्गेण साध्या-
पमज्या च तस्माद्विचिन्त्यावगम्या ॥ ३८ ॥

प्रश्नः ।

अन्त्यामुन्नतकालं समवृत्तस्थे दिवाकरे ज्ञात्वा ।
ब्रूह्यक्षभापमज्ये गणिते गोले च नैपुणं यदि ते॥३९॥

अस्य भङ्गः ।

अन्त्यावर्गादुन्नतकालज्यावर्गविश्लिष्टात् ।
अन्त्योन्नतकालोत्क्रममौर्व्योः कृतियोगसंभक्तात् ॥ ४० ॥
मूलं त्रिभशिञ्जिन्या समाहतं स्यादपक्रमज्यातः ।
द्राक् सिध्यति पलभा चेत् स्फूर्तिः प्रोक्तप्रकाराणाम् ॥ ४१ ॥

प्रश्नः ।

वीक्ष्योर्ध्वखण्डं समवृत्तशङ्कोः
समुन्नतासून् समवृत्तगेऽर्के ।
योऽपक्रमज्यां पलभां वदेद् द्राक्
स एव गोलार्णवतारणे नौः ॥ ४२ ॥

अस्य भङ्गः ।

इह समुन्नतकालदलज्यकां
द्विगुणितां परिकल्प्य तथान्त्यकाम् ।
अथ ततः सुधिया क्रिययोक्तया-
पमगुणं परिसाध्य ततो विदा ॥ ४३ ॥
समवृत्तनरोर्ध्वखण्डवेत्त्रा
पलभा तद्धृतिरन्त्यका च साध्या ।
क्रमतोऽसकृदित्यमेव कुर्या-
दप्रमज्यापलभे स्फुटे भवेताम् ॥ ४४ ॥

अथान्ये प्रश्नाः ।

अथाग्रखण्डमभिवीक्ष्य समाख्यवृत्तं
याते रवौ किल समुन्नतकालमानम् ।
द्रागक्षभां वद तथापममौर्विकां चेद्
गोलस्त्वया गणकमाणवकास्त्यधीतः ॥ ४५ ॥
प्रविशति समाख्यवृत्तं भास्वति वीक्ष्योन्नतं समयम् ।
ज्ञात्वोन्मण्डलशङ्कुं विद्वन् पलभापमज्यके वद मे ॥ ४६ ॥

सवितरि समवृत्तं याति वीक्ष्योन्नतासू-
नथच समभिवीक्ष्याग्रादिखण्डं सुधीर्यः ।
अपमगुणपलाभे शीघ्रमाचक्षतेऽसौ
सकलगणकहृद्यार्थप्रदः कल्पवृक्षः ॥ ४७ ॥

एषां भङ्गाः ।

विद्वान् शश्वदनन्तरोक्तविधिना क्रान्तिज्यकां साधयेत्
प्रोक्तं कर्म समाख्यशङ्क्ववयवाद्यत् तूर्ध्वखण्डाद्बुधैः ।
तच्चाग्राग्रिमखण्डतो वितनुयादुद्वृत्तशङ्कोश्च वा
यद्वाग्रादिमखण्डतोऽपमगुणाक्षाभे भवेतां स्फुटे ॥ ४८ ॥

प्रश्नः ।

ज्ञात्वाक्षजं वलनमुन्नतकालवेदिन्
धाम्नां निधौ तु सममण्डलमाश्रिते द्राक् ।
ब्रूया अपक्रमगुणं पलभां यदि त्वां
मन्ये वसन्ततिलकं गणकर्तुवृन्दे ॥ ४९ ॥

अस्य भङ्गः ।

अनन्तरोक्तेन पथापमज्या
साध्याक्षजं यद्वलनं तदीया ।
कोटिज्यका द्युज्यकया विनिघ्नी
त्रिज्योद्धृता लम्बगुणो भवेत् सः ॥ ५० ॥
अतः प्रसाध्या हृतिरन्त्यकातः
क्रान्तिज्यका लम्बगुणस्ततः स्यात् ।
इत्थं विदध्यादसकृत् स्फुटाः स्युः
क्रान्तिज्यकाद्याः पलभा ततश्च ॥ ५१ ॥

श्रीबालशास्त्रिविदुषां सविधं पठित्वा
प्राक् शब्दशास्त्रमथ तज्जनितावबोधः ।
श्रीबापुदेवगुरुवर्यकृपाकटाक्षात्
सज्ज्यौतिषं प्रपठतीह विनायको यः ॥ ५२ ॥

तन्निर्मिते कतिपयप्रश्नविचाराभिधप्रबन्धेऽस्मिन् ।
सममण्डलप्रवेशप्रकरणमितमुन्नतासुखण्डं च ॥ ५३ ॥

॥ इत्युन्नतासुखण्डम् । समाप्तं च सममण्डलप्रवेशप्रकरणम् ॥

THE VIDVAN-MANO-RANJINI'

OR

REJOICER OF THE MIND OF THE LEARNED.

A COMMENTARY ON SAD-ÁNANDA'S VEDÁNTA-SÁRA, BY RÁMA-TÍRTHA.

(Continued from page 150.)

And in them &c. [*there is the prevalence of darkness in their cause as may be inferred from seeing the excess of senselessness.*] By using the word excess in the phrase *from seeing the excess of senselessness*, as conveying the sense of existence in the effects, the author implies that there is in all products some degree of intelligence. The metaphysicians have therefore said, It is, it appears, It is agreeable, It is a form, It is a name, are the five degrees of entity: the first three are identical with supreme spirit, the other two are the universe. Vasishṭa, moreover, has said: That which is, that which appears, is spirit; and what appears as other therefrom, is naught else. Natural consciousness alone appears, subject and object are only erroneously discriminated. The author next shows how the three qualities are conformable to the product to be described, in the ether and the rest, at the time of production.

Then &c. [*goodness, passion, and darkness are produced in these products, ether &c. in the degree in which they exist in the cause.*] The meaning is that the qualities, goodness, &c. which belong to the undeveloped cause, are produced together with the products in the products, as originating in their respective proportions such qualities in proportion to the products. It may be said: The five proper natures are produced in their order from the undeveloped material cause, for this is a matter of notoriety in revelation, sacred history, and the legendaries, how then is the production of ether &c. recorded at this stage? The author furnishes the reply.

It is these [*five, that are called the subtile elements, the proper natures, and the not yet made into the five gross elements.*] These same, ether and the rest, the subtile elements, cannot become objects of practical apprehension, have only sound &c. for their sole nature, and are called by the great sages in the scriptures &c. the not yet made five, and the not completely integrated. Having thus discussed in its order the erroneous imputation of the elements, the author now posits the erroneous imputation of that which is composed of the elements.

From these [*subtile elements are produced the subtile bodies,*] *and the gross elements.* The author unfolds a part of the promised statement.

The subtile bodies, that is the evidentiary bodies, so called because they are bodies by which the real existence of self-conscious soul is evidenced or made known, and which are bodies because they reside in the body, that is, determine the existence of the body by means of merit and demerit. Accordingly the inference: The organs and the vital airs in question, have as the antecedent of their activities superintendence of intelligence other than themselves but residing in themselves, because they are unintelligent, like a chariot. So also the Vedic text: Who have known the vital air of vital air, the eye of the eye, the ear of the ear, the mind of the mind; He who knows that he smells it, he is soul, the organ of smell. The author now anticipates the question: What are the seventeen constituents of the evidentiary body?

The constituents [*are the five cognitive organs, the understanding and the internal sensory, the five active organs, and the five vital airs.*] It may be asked how the evidentiary body is composed of seventeen constituents. This is determined by Sureśvaráchárya in the scholia on the commentary treating of the quintuple combination of the subtile elements, who calls the subtile body the corporeal octave. They have ascertained that the organs of sense are five, the organs of action five; and the internal sensory, the understanding, ego-

---

तेषु चेति । जाड्याधिक्यदर्शनादित्यत्राधिक्यशब्दं प्रयुञ्जानः सत्तास्फूर्त्तिप्रदत्वेन कार्य्येषु चैतन्यस्यापीषदनुवृत्तिं सूचयति तथा चाहुस्तत्त्वदर्शिनः । अस्ति भाति प्रियं रूपं नाम चेत्यंशपञ्चकं । आद्यत्रयं ब्रह्मरूपं जगद्रूपं ततो द्वयमिति । वशिष्ठोऽप्याह यदस्ति यद्भाति तदात्मरूपं यच्चान्यतो भाति न चान्यदस्ति । स्वभावसंवित्प्रतिभाति केवला ग्राह्यं ग्रहीतेति मृषा विकल्प्यतइति । उत्पद्यमानेष्वाकाशादिषु वक्ष्यमाणकार्य्यानुरूपं गुणत्रयमुपलम्भयति ।

तदानीमिति । कारणस्याव्याकृतस्य ये गुणाः सत्त्वादयस्तेषां प्रक्रमेण तान् गुणानारभ्य यथाकार्य्यक्रमं सत्त्वादिगुणाः सहैव कार्य्यैस्तेषूत्पद्यन्त इत्यर्थः । नन्वव्याकृतात् पञ्चतन्मात्राणि क्रमेण जायन्ते इतिहि स्मृतीतिहासपुराणेषु प्रसिद्धिस्तत्कथमाकाशादेरिहोत्पत्तिराम्नायते इति तत्राह ॥

एतान्येवेति । एतान्येवाकाशादीनि सूक्ष्मभूतानि व्यवहाराक्षमाणि शब्दादितावन्मात्रैकस्वभावानि । अपञ्चीकृतानि परमसंसृष्टानि चेति स्मृत्यादिषूच्यन्ते महर्षिभिरित्यर्थः । तदेवं भूताध्यारोपं श्रौतमनुक्रम्य इदानीं भौतिकाध्यारोपं प्रतिजानीते ॥

एतेभ्यइति । प्रतिज्ञातैकदेशं विवृणोति ॥

सूक्ष्मशरीराणीति । लिङ्ग्यते ज्ञायते प्रत्यगात्मसद्भावएभिरिति लिङ्गानि तानि च तानि शरीराणि च शरीरप्रतिष्ठितत्वात् शरीरसाधनत्वात् धर्म्मादिद्वारेणेति लिङ्गशरीराणीत्यर्थः । तथा च प्रयोगः विमतानि इन्द्रियाणि प्राणाश्च स्वातिरिक्तस्वान्तर्गतचैतन्याधिष्ठानपूर्व्वकप्रवृत्तयः अचेतनत्वात् रथादिवदिति । श्रुतिश्च भवति प्राणस्य प्राणमुत चक्षुषश्चक्षुरुत श्रोत्रस्य श्रोत्रं मनसो ये मनो विदुरिति । यो वेदेदं जिघ्राणीति स आत्मा गन्धाय घ्राणमित्यादिका च । के पुनः सप्तदशावयवा इति तानाह ॥

अवयवास्त्विति । ननु कथं लिङ्गशरीरं सप्तदशावयवमिति निर्द्धार्य्यते । यावता पुर्य्यष्टकं लिङ्गमाचक्षते सुरेश्वराचार्य्याः पञ्चीकरणवार्त्तिके । ज्ञानेन्द्रियाणि पञ्चैव पञ्चकर्म्मेन्द्रियाणि च । मनोबुद्धिरहङ्कारश्चित्तश्चेति चतुष्टयं । प्राणोऽपानस्तथा व्यानउदानाख्यस्तथैव च । समानश्चेति पञ्चैता कीर्त्तिताः प्राणवृत्तयः । खंवाय्वग्न्यब्धरित्र्यश्च भूतसूक्ष्माणिपञ्चच अविद्याकामकर्म्माणि लि ं पुर्य्यष्टकं विदुरिति । अन्यत्र पुनरन्यादृशं वर्णितं भूतसूक्ष्मपञ्चकं एकं कर्म्मज्ञानेन्द्रियपञ्चकं द्वयं चतुर्वृत्तिकमन्तःकरणं पञ्चवृत्तिकः प्राणश्चेति सप्तदशावयवाइति अतः कथं निर्णयइति । उच्यते नचैतेषां पक्षाणां विकल्पोऽभ्युपेयते वस्तुनि तदयोगाच्च समुच्चयः तत्र प्रमा-

tism, and recollection, are four; there are five modifications of the vital air, respiration, flatulence, circulation, pulsation of the throat and head, and assimilation; five subtile elements, ether, air, fire, water, and earth, which with illusion, mental retenta, and actions, are the evidentiary body or the corporeal octave. In other places, again, the evidentiary body is differently described, viz. that the five subtile elements, the five organs of cognition and action, the internal organ with its four functions, and the vital air with its five functions, are the seventeen constituents. How then can we decide which is right? It cannot be said that any of these alternatives is right, because those alternatives cannot exist in the thing itself. Nor can all three alternatives be right, for of this there is no proof. But these seventeen elements described in the text, are variously sometimes given summarily and sometimes in detail. Thus of the seventeen elements thus described in this place, the subtile elements are the material causes, and the material cause of these subtile elements is illusion. There being, then, no difference between the material cause and its effects, illusion is not mentioned apart from the subtile elements. The subtile elements are not regarded as separate from the subtile bodies. Mental retenta and actions, as being modifications of, and therefore dependent on, the internal organ, are identical with it, and therefore not separately enunciated. There is, therefore, nothing to contradict the scholia on the corporeal octave. So on another alternative the subtile element being separated from their products, and the internal organ and the vital airs being taken as the subject of a function and the function, the seventeen are accounted for. And thus according to the Vedic text: Prajâ-pati is seventeen, it being understood that Prajâ-pati or Hiranya-garbha is seventeen, the evidentary body is to be known to consist of seventeen constituents. It has therefore been declared by competent authority: Properly the subtile body is declared to consist of seventeen constituents. The organs which are instruments of cognition are the ear &c. Their definitions are respectively and successively, an organ percipient of sound, touch, colour, taste, and smell. According to the Sânkhyas the organs are made of egotism. To repudiate this view, the author declares them to be composed of the elements.

These [*cognitive organs are produced from the separate pure particles of the ether &c., severally in their order*]. The auditory and other organs are produced from particles of the elements possessing the three qualities produced by the qualities of their cause [viz. the three phases of illusion], such particles being appropriated to the phase purity, and from particles produced by by excess of that quality. The author next defines the understanding and the common sensory.

Understanding [*is the function of the internal organ which consists of assurance.*] Assurance means ascertainment that this is so and so. Determination is limitation of the object; a discrimination of the object in the form. This is blue, that is yellow. The contrary of discrimination is non-discrimination or uncertainty. It may be asked when the fourfold nature of the internal organ is a matter of notoriety, only two parts are treated of. The author, therefore, says.

A. E. G. and G. D.

PANDIT TÁRÁNÁTHA TARKAVÁCHASPATI'S EDITION OF THE SÁNKHYA-TATTVA-KAUMUDÍ.

By the following lines it is desired to call the attention especially of European students, to the merits of Pandit Táránátha Tarkavácháspati's Commentary on the Sánkhya-tattva-kaumudí. The translator has found it useful in his own studies, and would recommend it as a simple and perspicuous exposition of one of the schools of Indian thought. Want of leisure precludes a studied review, which perhaps would be less acceptable than the following specimens translated and allowed to speak for themselves.

THE ILLUSORY EVOLUTION OF THE UNIVERSE, AS TAUGHT BY CERTAIN VEDÁNTINS.

The illusory product of entity as susceptible of sublation in trinal time, absolute, unmodifiable, imagined by the illusion thereof, and terminable by the knowledge thereof, has modification for its distinctive character. Any existence other othan illusory is ascribed to

---

णाभावात् किन्तु इहोक्तस्य सप्तदशकस्यैव संक्षेपविस्तरभेदेन तथा तथा तत्र तत्र कथनं । तथाहि । इहोक्तानां हि सप्तदशावयवानां भूतसूक्ष्माण्युपादानानि तदुपादानञ्चाविद्या अतश्चोपादानोपादेययोरभेदाच्चाविद्या भूतसूक्ष्मेभ्यः पृथग्विवक्ष्यते भूतसूक्ष्माणि च लिङ्गशरीरेभ्यो न पृथगभिप्रेयन्ते कामकर्मणोरप्यन्तःकरणवृत्तित्वेन तदाश्रितत्वेन च तदभेदाच्चपार्थगर्थ्यविवक्षा । अतः पुर्य्यष्टकवार्त्तिकेन न विरोधः । तथा पक्षान्तरेऽपि भूतसूक्ष्माणि तत्कार्य्येभ्यः पृथक् कृत्यान्तःकरण प्राणयोश्च वृत्तिवृत्तिमतोरभेदं गृहीत्वा सप्तदशत्वं निरूपितं । तथा च सप्तदशप्रजापतिरिति श्रुतेः प्रजापतेर्हिरण्यगर्भस्य सप्तदशत्वावगमात् सप्तदशावयवमेव लिङ्गशरीरं मुख्यं ज्ञेयमिति । तदुक्तमभियुक्तैः । मुख्यन्तु सप्तदशकं प्रथितं हि लिङ्गमिति । ज्ञानसाधनानीन्द्रियाणि श्रोत्रादीनि तेषां शब्दस्पर्शरूपरसगन्धग्राहकेन्द्रियत्वानि प्रत्येकं यथाक्रमं लक्षणानि ॥ इन्द्रियाण्याहङ्कारिकाणीति सांख्याभिराकुर्व्वंस्तेषां भौतिकत्वं कथयति ॥

एतानीति । कारणगुणोत्पन्नत्रिगुणानां भूतानां सत्त्वगुणावच्छिन्नांशेभ्यो गुणोद्रेककृतभागेभ्यः श्रोत्रादीनि जातानीत्यर्थः । बुद्धिमनसी लक्षयति ॥

बुद्धिर्नामेति । निश्चयोऽध्यवसायः इदमित्थमेवेतिविषयपरिच्छेदः । सङ्कल्पः इदं नीलं इदं पीतमिति विषयविवेचनं । विकल्पस्तद्विपर्य्ययइति भेदः । नन्वन्तःकरणस्य चतुष्टयत्वप्रसिद्धेः कथमिह द्वयमेव गृहीतमित्यत आह ॥

such product only metaphorically. This illusory product, while it is the whole universe of product being in course of evolution, is not real, that is, is not substantially existent. It is accompanied not with true existence, but only with existence susceptible of practical assurance [that is, it exists only as the object of outward-passing activities.] To exemplify this: There is evinced by the consciousness of all men a cognition of silver and the like in nacre and the like, and this cognition is presentative, as is evinced by such deliverances of consciousness as: I presentatively cognise silver. It is juxtaposition of the organ and the object of sense which constitutes the cause of presentation or perception; and therefore silver existing in another place, not being in juxtaposition to the visual organ, cannot be an object of presentation. Nor can it be maintained that there is an erroneous attribution to the nacre, of silver formerly cognised and resuscitated by cognition; for were we to acknowledge a cognition of an object thus reinstated by cognition, we should have to disallow the consciousness of the presentation. There is not, therefore, in this instance, a mere reminiscence of silver formerly experienced, for this is repugnant to the fact of consciousness. We are thus constrained to the hypothesis that there is produced in this nacre unreal silver, and that the cause of the production of such unreal silver is illusion, the object of which illusion is nacre and the like; while as subsidiary to this cause we must assume the mental retentum the object whereof is silver. Illusory attribution, then, is that whereof the presentative object is the unreal silver thereby produced in identity with the nacre. As in the silver, though thus produced, there is not the least obstruction to the practical existence of the nacre; so in like manner there are produced in absolute, unmodifiable, spirit, enveloped in its own illusion, the illusorily attributed ether and other constituents of the world and the illusion thereof is the cause, and the mental retenta are co-operative to the cause. Thus it is that water-pots and similar gross objects, the matter under discussion, are illusorily surmised in entity, inasmuch as, while destructible by knowledge of pure being, they have the appearance of identity therewith; just as the silver is destructible by knowledge of the nacre, while it has the appearance of nacre. By this argument it is demonstrated how water-pots and the like are illusorily surmised in real being. It has been already stated that to be illusorily surmised is to be an object of presentative perception; and, as even an unreal thing unless produced could not be an object of presentation, we must in order to guard the position of illusory attribution, allow that such production takes place therein. The destructibility of such illusory products by knowledge is inferrible from their falsity, as the unreal silver is destructible by knowledge of the nacre. Dismissing further amplification, such is the doctrine of the Vedántins. (pp. 39, 40.)

And in the doctrine of illusory evolution while the indifference of effects and their causes is admitted, there is admitted by the Vedántins at the same time the falsity of objects, inasmuch as cognitions of water-pots, pieces of cloth, and similar gross objects, are taught to be relative only to objects illusorily surmised. To illustrate this: The cognitions of water-pots &c., the matter under discussion, are conversant about things illusorily surmised, as being cognitions of which the perdurable is not the object. It being evinced by this argument that cognitions of water-pots &c., have for their objects things illusorily surmised; and that which is illusorily surmised being, as destructible by knowledge, false and consequently non-entitative; we cannot adopt this view, as it is vitiated by the supposition of the identity of the existent

सतः—त्रैकालिकबाधरहितात् कूटस्थवदपरिणामिनः विवर्त्तः स्वाज्ञानकाल्पतः स्वज्ञाननिवर्त्यः परिणामविलक्षणः अन्यथाभावापत्तिः उपचारात् तथा उत्पद्यमानं कार्यजातमपि विवर्तः न वस्तु सदिति वस्तुतः पारमार्थिकेन सत्त्वेनान्वितं न किन्तु व्यवहारयोग्यसत्तयान्वितम् । तथाहि शुक्तिकादौ रजतादिज्ञानं सर्वानुभवसिद्धं तच्च प्रत्यक्षमेव रजतं साक्षात् करोमीत्याद्यनुभवात् । प्रत्यक्षे च विषयेन्द्रियसन्निकर्षः कारणं तथाच देशान्तरस्थितरजतस्य चक्षुरसन्निकृष्टतया न प्रत्यक्षविषयता । न च पूर्वज्ञातस्य रजतस्य ज्ञानेन उपनीतस्य शुक्तिकायां भ्रम इतिवाच्यम् ज्ञानोपनीतस्य ज्ञानस्वीकारे साक्षात्कारानुभवापलापापत्तेः । अतएव न पूर्वानुभूतरजतस्मरणमात्रमनुभवविरोधात् । अतोऽगत्या तत्र शुक्तिकायामसद्रजतमुत्पद्यते इत्येव कल्पनीयम् । तदुत्पत्तौ च शुक्तिकादिविषयकमज्ञानं कारणं रजतविषयसंस्कारश्च तत्सहकारितया कल्पनीयः । तदेव अध्यस्तत्वम् यदुत्पन्नस्य तस्यासतोरजतस्य शुक्तिकातादात्म्येन तत्प्रत्यक्षविषयता । तत्रोत्पन्नेऽपि रजते शुक्तिकाया मनागपि व्यावहारिकसत्त्वस्य व्याघातो न भवतीति यथा एवं कूटस्थे अपरिणामिनि आत्मनि स्वाज्ञानेनावृते वियदादिकमध्यस्तमुत्पद्यते तत्र च तदज्ञानं हेतुः तत्संस्कारश्च सहकारीति तथाच विवादाध्यासिता घटादयः सन्ति अध्यस्तास्तज्ज्ञाननाश्यत्वे सति सत्तादात्म्येन प्रतीयमानत्वात् शुक्तितादात्म्येन प्रतीयमानशुक्तिज्ञाननाश्यरजतवदित्यनुमानात् अध्यस्तत्वं घटादीनां सिद्धम् । अध्यस्तत्वं च साक्षात्कारप्रत्यक्षविषयत्वं प्रागुक्तं तच्च तस्यासतोऽप्यनुत्पत्तौ प्रत्यक्षविषयता न स्यादिति अध्यस्तत्वरक्षायै तस्मिन्नुत्पत्तिरप्यङ्गीकार्या । ज्ञाननाश्यत्वं च तेषां मिथ्यात्वात् शुक्तिज्ञाननाश्यासद्रजतवदित्यनुमातव्यमित्यास्तां विस्तरेण इति वेदान्तिमतम् ॥

विवर्त्तवादे च यद्यपि तदनन्यत्वमारम्भणशब्दादिभ्य इति २ । २४ शा० सूत्रेण कार्यकारणयोरभिन्नत्वमेव स्वीकृतं तथापि घटपटादिज्ञानानामध्यस्तविषयकतया विषयाणां मिथ्यात्वं तैरङ्गीक्रियते तथाहि विवादाध्यासितानि घटादिज्ञानानि अध्यस्तविषयकाणि नित्यविषयकज्ञानत्वात् शुक्तिकायां रजतज्ञानवदित्यनुमानेन घटादिज्ञानानामध्यस्तविषयकत्वे सिद्धे अध्यस्तस्य च ज्ञाननाश्यतया मिथ्यात्वमित्यसत्त्वमेव तथाच सदसदोस्तादात्म्योनुपपत्तिदोषेण नैतत्पक्षश्रयणम् । किञ्च मिथ्यात्वं ज्ञाननिवर्त्यत्वं तच्च नेदं रजतमिति बाधबुद्ध्या यथा रजतस्य मिथ्यात्वं प्रसिद्धमेवं घटादेर्मिथ्यात्वसाधकस्य बाधस्यादर्शनान्न तस्य मिथ्यात्वमेवञ्च हेत्वसिद्धेः कथं घटादिज्ञानानामध्यस्तविषयकत्वसिद्धिः । एतदर्थमेव असति बाधक इत्युक्तम् । तथाच शुक्तिरजतबाधकवदत्र बाधकाभावान्न मिथ्यात्वम् । न चाद्वैतश्रुतिरेव बाधिका तस्याः अन्यार्थपरतया द्वैताभावनिषेधपरत्वाभावात् अतएव नाद्वैतश्रुतिविरोधो जातिपरत्वादित्यनेन २ ५४ साङ्ख्यसूत्रेण श्रुतेः समानजातीयबहुजीवपरत्वं समर्थितम् ॥

and the non-existent [thus violating the law of non-contradiction.] Moreover falsity is susceptibility of cessation upon knowledge; and since we experience no sublation exhibiting the falsity of water-pots &c., similar to the tollent intellection This is not silver, whereby the falsity of illusorily surmised silver is a matter of notoriety, we cannot admit the falsity thereof. Since then you have not ascertained your argument, how can you shew that cognitions of water-pots &c. are conversant about objects illusorily surmised? For this reason the words in the text: *There being nothing tollent.* There is, then, no falsity, there being nothing tollent in this case, as there is something tollent in the case of the silver erroneously surmised in the nacre, nor can it be argued that the text Without a second is alone sufficient to sublate these water-pots &c., for it is as relating to another matter, that this text does not purport a denial of the non-existence of a duality of principles; and hence it is that by the Sánkhya Aphorism (1-14) Nor the text of non-duality, there being no contradiction inasmuch as it refers to a class, it is confirmed that this text refers to a plurality of homogeneous individual souls. (p. 43.)

BUDDHIST SENSATIONALISM.

Sensation, the form of which is pleasure, pain, and indifference, is the one predicament; and there is no different or external substratum thereto, to which the attributes pleasure &c., belong. This doctrine of sensation is as follows. As modifications of consciousness such as dreams, illusions, mirages, serpents illusorily surmised in ropes, cities of the Gandharvas [the baseless fabrics of reverie] arise, without any external object, in the form of sensation and sentient; so it is understood that the cognition of posts &c., the objects of waking consciousness should arise, there be no difference between the cognitions. Though there be no external object, a diversity of cognitions arises from a diversity of mental retenta; and transmigratory existence being without beginning, there is nothing to contradict a diversity of retenta, sensations and ideas standing in a reciprocal relation of cause and effect, like seeds and sprouts. The difference is that whereas all admit a diversity of cognitions caused by a diversity of phantasmata in dreams &c., even without an object, the Buddhists suppose the case to be the same also in the waking state. The partiality of experiential cognition for its several objects, whereby it becomes cognition of a post, of a water-jar, of a piece of cloth, cannot be accounted for unless there be some form in the cognitions themselves, and therefore we must admit that the cognitions resemble their objects in form, and if this be allowed, all practical activity being accounted for by this alone, the hypothesis of the real existence of the bodies is useless. The object of the sensation and the sensation are one and the same, for if the one of these be not presented to consciousness, the other is not presented. It is, therefore, possible to have such and such cognitions, even in the absence of external bodies. The author proceeds to invalidate this doctrine in the words: To these he says. The meaning is as follows. The object differs from the subject, because it is an object, like a water-pot &c., illumined by a lamp; or, the subject differs from the objects, because it is a subject, like a lamp which illumines water-jars &c. The difference of subject and object being evinced by this argument, we cannot infer their indifference. Again, if the object be the same as the sensation, you must affirm that it is identical with the sensation which is a modification of the internal organ, and the modifications being differenced according to the individual souls, it will follow that the objects differ with each soul, and in this case how could a plurality of spectators simultaneously attend to a single contraction of the eyebrows of one dancing-girl, while that they do so attend is inferred from their conversing together about it afterwards? Though, therefore, the practical activity of the subject would be possible even under the form of the object, yet as it would differ in each individual soul, [each acting in relation to a different object identical with the modifications of its own internal organs], there cannot be a void of external bodies. (pp. 58, 59.)

A. E. Gough.

हर्षविषादादिः आकारो यस्य तादृशं विज्ञानमेवैकः पदार्थः ततोऽन्यः भिन्नः बाह्यः तद्धर्म्मा तत् हर्षादि धर्म्मो यस्य तदाधारइत्यर्थः न नास्ति । स च विज्ञानवादश्चेत्थम् । यथा स्वप्नमायामरीच्युदकरज्जु पंगन्धर्वनगरादि प्रत्ययाः विनैव बाह्यार्थेन ग्राह्यग्राहकाकारा भवन्ति एवं जागरितविषयस्तम्भादिप्रत्यया अपि भवितुमर्हन्तीत्यवगम्यते प्रत्ययत्वाविशेषात् । असत्यपि बाह्यार्थे वासनावैचित्र्यात् प्रत्ययवैचित्र्यम् अनादौ च संसारे विज्ञानानां वासनानाञ्च बीजाङ्कुरवत् परस्परनिमित्तनैमित्तकभावेन भावनावैचित्र्यम् न विरुध्यते । स्वप्नादिषु च.न्तरेणाप्यर्थं वासनानिमित्तस्य ज्ञानवैचित्र्यस्य सर्वैः स्वीकृतत्त्व त् जागरितेऽपि तथा बौद्धैः कल्प्यते इति विशेषः । अनुभवात्मकस्य ज्ञानस्य योऽयं प्रतिविषयं स्तम्भज्ञानं घटज्ञानं पटज्ञानमिति पक्षपातः नासौ ज्ञानगताकारं विनोपपद्यते इत्यवश्यं विषयाकारसारूप्यं ज्ञानस्याङ्गीकर्त्तव्यम् अङ्गीकृते च तस्मिन् तेनैव सर्वव्यवहारसम्भवात् निरर्थिकाऽर्थसद्भावकल्पना सहोपालम्भनियमादभेदो नीलतद्धियो रित्युक्तेः विषयविज्ञानयोरभेद एव नह्यनयोरेकस्यानुपलम्भेऽन्यस्योपलम्भो भवति । तस्मात् बाह्यार्थाभावेऽपि तत्तत्प्रत्ययसम्भवइति । तन्मतं दूषयितुमुत्थापयति तान् प्रत्याहेति । अयमाशयः । विषयो विषयितोभिद्यते विषयत्वात् प्रदीपप्रकाश्यघटवत् विषयी विषयेभ्यो भिद्यते विषयित्वात् घटादिप्रकाशकप्रदीपवद् वा इत्यनुमानेन विषयविषयिणोर्भेदसिद्धेर्नाभेदानुमानम् । किञ्चविषयस्य विज्ञानस्वरूपत्वे वृत्तिरूपविज्ञानस्वरूपत्वं वाच्यं वृत्तीनाञ्च प्रतिपुरुषं भिन्नतया विषयाणां प्रतिपुरुषं भेदापत्तिः तथा च एकस्मिन् नर्त्तकीभ्रूभङ्गे कथं बहूनां युगपत् प्रतिसन्धानं स्यात् तत्प्रसन्धानञ्च तदुत्तरं मिथस्तेषां तयाभिलापात् अनुमीयते तथाच विषयिणो विषयाकारेणैव व्यवहारोपपत्तावपि प्रतिपुरुषं भेदापत्तेर्न बाह्यार्थविरहः इतिभावः ॥

PRINTED AND PUBLISHED BY THE PROPRIETORS, E. J. LAZARUS AND CO. AT THE MEDICAL HALL PRESS, BENARES.

काशीविद्यासुधानिधि

श्रीगणेशाय नमः

श्रीमद्द्विजयिनीदेवीपाठशालोदयोदितः । प्राच्यप्रतीच्यवाक्पूर्वापरपक्षद्वयान्वितः ॥ १ ॥

अङ्करश्मिः स्फुटयतु काशीविद्यासुधानिधिः । प्राचीनार्यजनप्रज्ञाविलासकुमुदोत्करान् ॥ २ ॥

THE PANDIT.

A Monthly Journal, of the Benares College, devoted to Sanskrit Literature.

No. 80. Benares, January 1st, 1873. Vol. VII.

॥ चिन्तामणेः शब्दखण्डम् ॥

(१) अथ स्वर्गकामो यजेतेत्यादौ इष्टसाधनत्वं कार्यत्वं वा यद्विधिः स समभिव्याहृतक्रियान्वयी तदन्यान्वयी वा। तत्र गुरवः। ना(२)हत्य क्रिया कार्यतया लिङा बोधयितुं शक्यते। (३) स्वर्गकामनियोज्यान्वययोग्यताज्ञानविरहात्। (४) कामनाविशिष्टस्य हि ममेदं कार्य-

॥ शब्दचिन्तामणिव्याख्या रुचिदत्तीया ॥

प्रसङ्गादाह। (१) अथेति। यद्यपि गुरुमते विधिः कार्यात्मा, स च समभिव्याहृतक्रियान्वय्येव तथापि कार्यत्वांशमुभयसिद्धं लिङर्थमादायैव विप्रतिपत्तिर्बोध्या। इष्टसाधनत्वं विधिरितिन्यायमतेनाभ्युपगमवादेन वा बोध्यम्। यद्यप्यौपादानिकसाधनत्वं परमते यागेस्त्येव तथापि प्राथमिकं शब्दोपस्थापितान्वयबोधमभिप्रेत्येदं बोध्यम्। (२) आहत्येति। इष्टसाधनताज्ञानात्प्रागित्यर्थः। (३) स्वर्गेति। स्वर्गकामस्य नियोज्यस्य नियोज्यत्वेन यो ऽन्वयबोधस्तत्र योग्यताज्ञानविरहादित्यर्थः। कुत एवमित्यत आह। (४) कामनेति। विशेष्यान्वय्यनन्वयिनो विशेषणत्वानुपपत्तेरित्यर्थः। न च कामनोपलक्षणमेवाकामव्यावृत्तोपलक्ष्याभावात्। विशेषणत्वे बाधकाभावाच्च। ननु कर्तृत्वेनाधिकारित्वेन वा तदन्वयसंभवे किं नियोज्यत्वेनेति चेत्, न। कृतिसमवायित्वरूपस्य कर्तृत्वस्य स्वर्गरूपफलभागित्वलक्षणस्याधिकारित्वस्य च कामनांशे ऽनन्वयात्। न च कृतिजनकत्वेन कर्तृत्वेनैवान्वयोस्तु, तच्च विशेषणीभूतकामनायामपि, अन्यथा बोद्धृत्वान्वयोपि कथमिति वाच्यम्। नहि न्यायनयइव फलकामना गुरुनये साक्षात्प्रयत्नहेतुः। किं तु ममेदं कार्यमिति बोधद्वारेत्यस्यापि नियोज्यत्वएव विश्रमादिति वदन्ति॥ अन्ये तु शुचिविहितकालजीवित्वे सति फलकामनावत्त्वमिष्टोपायताज्ञानवत्त्वं वाधिकारित्वं, तच्च कामिनो यागे न संभवति, तस्य क्षणिकत्वात्। न च फलस्वाम्यलक्षणेनाधिकारित्वेनान्वयोस्त्विति वाच्यम्। फलवत्त्वे ह्यधिकारिता, तया च तस्य क्रियान्वये सति प्रवृत्तौ सत्यां फलवत्त्वमित्यन्योन्याश्रयात्। नापि कर्तृत्वेनान्वयः। तथाहि। स्वर्गकाम इत्यादिवाक्यं तावदिच्छाविषयत्वेन स्वर्गबलवदिष्टप्रतिपादकम्। न चेदमन्यार्थं संभवति, नेष्टं परनिष्पत्तयइति न्यायात्। किं त्विष्टार्थतैवास्य, सर्वस्य कामना हि तावत् काम्यार्थैव। सा हि स्वर्गे भवन्ती तत्साधने इष्टोपायताधियं ततः कार्यताधियं तच्चोत्पाद्याधिकारिणं तत्र प्रवर्त्य स्वर्गमर्जयतीति। एवं यागोप्युपायतया स्वर्गार्थः। एवं स्वर्गहेतुभूतापूर्वनियोज्यतया पुरुषोपि स्वर्गार्थ एवेति न पुंसः कर्तृत्वेन क्रियायामन्वयः। व्युत्पादितस्वर्गप्राधान्यभङ्गापत्तेः, तदा हि स्वर्गकामकर्तृको याग इत्यन्वये स्वर्गस्य कर्तृकोटिप्रवेशादन्यार्थत्वप्राप्तिः। ननु यजेतेत्यनेनोक्ता भावना शुद्धेन प्रातिपदिकार्थेनान्वीयते उभयाकाङ्क्षाबलात्,तदनुयायिनी लिङुक्ता संख्यापि, एकप्रत्ययोपात्तत्वात्, एवं च एकैव संख्या सुप्तिङ्भ्यामभिधीयतइति शाब्दमपि सामानाधिकरण्यम्। तथा च भावनान्वयेन पुरुषः कर्त्ता भवन्नन्वीयते यागे। एवं चाधिकारित्वेनानन्वये ऽधिकारिणो ऽलाभे प्रवर्त्तकत्वायोगः तत् कथमेवमिति चेत्, न। पश्चात्कर्तृत्वादिनाप्यन्वयस्याभ्युपगमेन सर्वस्योपपत्तेः। अत

मिति (५) बोद्धृत्वं नियोज्यत्वं कामनायास्तद्बोधोपयोगे सति भवति, (६) स च कामनानन्तरं काम्यसाधनताबोधात् कार्यताबोधे सति स्यात् । (७) एवं च स्वर्गसाधनताबोधे सति स्वर्गकामनियोज्यान्वय(८)योग्यता, न च कालान्तरभाविस्वर्गे क्रिया साक्षात्परम्परया वा साधनमिति शब्दो बोधयितुमर्हति । आशुविनाशित्वात् । परम्पराघटकानुपस्थितेश्च । तृतीयप्रकाराभावाच्च । अन्यथा तमादाय साधनत्वसंभवात् कल्प्यमप्यपूर्वं न स्यात् । इष्टसाधनताविधिपक्षे स्फुटैवानुपपत्तिः । कार्यताविधिपक्षे (९) ऽन्वयप्रकारतया साधनत्वं शाब्दमिति फलतो न कश्चिद् विशेषः । अतः क्रियातो ऽन्यत् (१०) स्वर्गसाधनतार्हं क्रियाकार्यतानिर्वाहकं लिङाद्यर्थः । (११) ननु सजातीये ऽन्वयदर्शनं योग्यता, दृष्टं च घृतपानस्याशुविनाशिनः कालान्तरे पुष्टिहेतुत्वमिति चेत् । न । यथाकथं चित्साजात्यस्यायोग्येपि सत्त्वेन योग्यताया अव्यावर्तकतापत्तेः, पदार्थतावच्छेदकेन साजात्यस्या(१२)द्यजातः पयः पिबतीत्यादौ (१३) प्रकृते चासंभवात्, तस्मादन्वयप्रयोजकरूपवत्त्वं साजात्यम् । अत एव द्रवद्द्रव्यत्वं सेककरणत्वे प्रयोजकमित्ययोग्यो वह्निः । तदिहाशुविनाशिनः कालान्तरभाविफलजनकत्वे फलसमयपर्यन्तस्थायिव्यापारजनकत्वं प्रयोजकमतो ऽपूर्वं विना साजात्यमेव न गृह्यते, घृतपानस्य वैद्यकोपस्थितधातुसाम्यमादाय पुष्टिसाधनत्वयोग्यताज्ञानं विज्ञस्य । अथ बाधकप्रमाणाभावो योग्यता, न च साधनत्वमात्रे बाधकं, साक्षात्तद्बाधेपि परम्परासाधनतामादाय तद्विरहान्तिसंभवात् । न च योग्यानुपलब्ध्या द्वारस्य बाधात् परम्परया साधनत्वमपि बाधितं, (१४) संस्कारस्येव तत्संभवात् । अन्यथा वाच्ये ऽप्यपूर्वे क्रिया कामिकार्या न स्यात् । काम्यासाधनत्वात् । नहि यदयोग्यं तत्पश्चाद् योग्यम्, (१५) अयोग्यत्वे च निष्फलः प्रयासः । (१६) न च कामिकार्यमपूर्वं तदर्थिकार्या च क्रियेति वाच्यम् । (१७) यागे रागादित्यनेन विरोधात् । तथापि द्वारानुपस्थित्या परम्परासाधनमिति ज्ञानं न भवेदिति चेत् । सत्यम् । किंतु स्वर्गसाधनं याग इति ज्ञानं साक्षात्परम्परोदासीनं (१८) वस्तुगत्या परम्परासाधनविषयकमुत्पद्यमानं नायोग्यत-

---

यत्र एकादशाक्षे तथैव सिद्धान्तितमिति वदन्ति । ननु निरुक्तनियोज्यत्वमनुपस्थितं कथमन्वयप्रकार इति चेत्, न । योग्यतावच्छेदकप्रकारेणोपस्थितत्वेतरान्वय इति छिद्रेतरत्ववतस्य योग्यताबलादेवोपस्थितेः । संसर्गरूपतयैव तद्भानमित्यप्याहुः । (५) बोद्धृत्वमिति । बोधजनकत्वमित्यर्थः । कामनायाः साक्षात्तद्बोधे पयोगे बाधात्तद्द्वारमाह । (६) स चेति । साक्षाज्जनकत्वबाधे द्वारानुपस्थित्या कामनायां तद्बोधो ऽसंभवी, ततो द्वारोपस्थितिर्वाच्या । द्वारं चेष्टसाधनत ज्ञानं तदसंभवे योग्यताज्ञानविरह इत्यर्थः । तदेवाह । (७) एवं चेति । (८) योग्यता । योग्यताज्ञानमित्यर्थः । (९) अन्वयेति । योग्यताबललब्धान्वयप्रतियोगितयेत्यर्थः । अन्वयरूपतयेत्यर्थ इत्यन्ये । यद्यपि तन्मते औपादानिकं तत्र शाब्दं तथाप्युपादानसहकृतशब्दजन्यतया शाब्दत्वाभ्युपगमादेतदुक्तम् । (१०) स्वर्गेति । साक्षात्स्वर्गसाधनतार्हमित्यर्थः । अन्यथा क्रियातौल्ये दोषतौल्यादित्यवधेयम् । एतच्च काम्यस्थले, नित्ये चेष्टसाधनताज्ञानं विनापि तन्मते कार्यताबुद्धेर्नियोज्यान्वयस्य भावादित्यवधेयम् । (११) नन्विति । तथा च न योग्यताज्ञानविरह इत्यर्थः । (१२) आद्येति । यथा चैतत्तथा व्याख्यातं योग्यतालक्षणे । (१३) प्रकृते चेति । प्रथमं तज्ज्ञानस्यासंभवादिति भावः । (१४) संस्कारस्येवेति । अयोग्यस्य योग्यानुपलब्ध्या बाधो ऽशक्य इति भावः । (१५) अयोग्यत्वइति । यागादिक्रियाया अयोग्यत्वे तद्गोचरो यजमानस्य प्रयत्नो विफल इत्यर्थः । ईश्वरस्य तत्कार्यताबोधनाय प्रयासो व्यर्थ इत्यर्थ इत्यन्ये । (१६) न चेति । तथा च यागः स्वर्गसाधनमेव नेत्यर्थः । (१७) याग इति । रागः स्वर्गादिफलेच्छा तया तत्साधने यागे प्रवृत्तिरङ्गे वैधी विधिरपूर्वं तदर्थतयाङ्गे प्रवृत्तिरिति त्वदुक्तेन तवैव विरोधादित्यर्थः । स्वर्गसाधनताज्ञानजन्यचिकीर्षा राग इत्यन्ये । ननु न्यायनये यदि अपूर्वार्थितयैवाङ्गे प्रवृत्तिस्तदा प्रथमं तदनुपस्थितौ मूकत्वमङ्गबोधकविधेः स्यात् । स्वर्गार्थितया चेत्तदा यागेनाविशेषाद्विनिगमनाविरहात्तदङ्गत्वं न स्यादिति चेत्, न । स्वर्गान्वयाविशेषेपि फलसमभिव्याहारेण यत्र विधिवाक्यं प्रवर्त्तते तत् प्रधानमिति निर्णयाद् इत्येके । प्रथमं साधनत्वेनेष्टसाधनत्वेन वाङ्गविधिप्रवृत्तावपूर्वकल्पनोत्तरमपूर्वरूपेष्टसाधनताज्ञानादङ्गे प्रवृत्तिरित्यन्ये । तदुत्तरमेवाङ्गविधिप्रवृत्तिरित्यप्याहुः । विशेषविनाकृतं सामान्यज्ञानं कथमित्यत आह । (१८) वस्तुगत्येति । विशेषभानमस्त्येव विशेषरूपेण भाननियमो ऽसिद्ध एव, अत एव घटत्वेन नीलघटादेर्विशेषस्य भानमितिभावः । ननु नीलघटत्वातिरिक्तघटत्ववत्त-

या परिभवितुं शक्यम् । (१९) यदि च साक्षात्परम्पराविशेषद्वयव्यतिरिक्तं सामान्यं नास्त्येव तदाऽननुगमः । किं वा विशेषयसि साक्षात्परम्परया वेति । न च यावद्विशेषबाधे तद्बाधितं, परम्परासाधनत्वेऽबाधादिति । मैवम् । योग्यता हि स्वबाधकप्रमाविरहो वा सकलबाधकप्रमाविरहो वा । आद्ये वह्निना सिञ्चतीत्यादौ स्वबाधकप्रमातद्विरहौ समयभेदेन स्त इति तदेव (२०)योग्यमयोग्यं चेति प्राप्तं, द्वितीये तु योग्यानुपलब्ध्या तन्निश्चयो (२१) ऽशक्यः, परप्रमाया अयोग्यत्वात् । न च वाच्यं सकलबाधकप्रमाविरहः स्वरूपसन्नेव प्रयोजक इति । अयोग्ये योग्यताभ्रमादन्वयबोधाभाव(२२)प्रसङ्गात् । अन्यस्य हि तत्र बाधकप्रमासत्त्वाद् अन्वयप्रयोजकरूपवत्त्वेन बाधकप्रमाविरहो निश्चीयतइति चेत् । तर्हि प्राथमिकत्वात्सैव योग्यता, न च सा प्रकृते संभवतीत्युक्तम् । (२३) किं चैकविशेषबाधे शाब्दसामान्यज्ञानं तदितरविशेषप्रकारतानियतं, छिद्रबाधे (२४) छिद्रेतरघटज्ञानवत्, न च द्वारानुपस्थित्या प्रकृते तथा घटते । (२५) एतेन यदुक्तं प्रशस्तरूपवांश्चैत्र इत्यत्र गौरश्यामविशेषानवगमेऽपि रूपवत्त्वमात्रमवगम्यते तद्वद् विशेषावगमेऽपि साधनत्वमात्रमिति तत्प्रत्युक्तम् । तत्रैकविशेषबाधाभावेनौदासीन्यसंभवात् । एतेन स्वर्गकामान्वयबलात् क्रियायाः फलसाधनत्वं तद्वला(२६)च्च पटोः संस्कारस्येव स्थायित्वं कल्प्यतां किमपूर्वेण, संकल्पविशेषस्य यागस्याग्रे प्रत्यक्षानुपलब्धिरात्मविशेषगुणानां (२७) प्रथमक्षणएव स्वविषयकप्रत्यक्षजननस्वभावादस्तु, न चैवं क्रियान्तरमपि तथा, प्रमाणाभावात्, एवं (२८) लोकसिद्धक्रियाकार्यत्वव्युत्पत्तिरपि भग्ना न भवतीति परास्तम् । स्वर्गसाधनतायोग्यतया स्वर्गकामान्वयस्तदन्वये च स्थायित्वमित्यन्योन्याश्रयात् । लोके धर्मिग्राहकमानेन क्रियायाः क्षणिकत्वनिश्चयाच्च । (२९) ननु देवपूजार्थो यजिः, पूजा च आराधना, गौरवितप्रीतिहेतुः क्रिया । अतो देवताप्रीतिद्वारा यागस्य स्वर्गसाधनत्वं, प्रीतेः क्षणिकत्वेऽपि प्रीत्यनुभवजनितसंस्कारद्वारा तत्संभवात् । अत एवाग्नेयादौ प्रीतिभागितयाग्न्यादेरुद्देश्यत्वमिति चेत् । न । यजदेवपूजायामिति हि शाब्दिकस्मृतिः

दुभयातिरिक्तं तत्साधनत्वं नास्त्येवेत्यत आह । (१९) यदि चेति । (२०) योग्यमयोग्यं चेति । न च विरहपदमत्यन्ताभावपरं, तन्निश्चयस्याशक्यत्वादिति भावः । (२१) अशक्य इति । न च नित्यनिर्दोषत्वेन वेदे तदनुमेयं, तस्यैव प्रथमं दुर्ज्ञेयत्वात् । वस्तुतः सर्वत्र तन्निश्चयासंभवाद् न सा योग्यतेति भावः । (२२) प्रसङ्गादिति । तन्मते ऽसंसर्गाग्रहस्य कारणत्वेऽपि न्यायनयमभ्युपेत्योक्तम् । ननु योग्यतासंशयः शाब्दधीहेतुः स्वरूपसती च योग्यता प्रमाहेतुरित्यरुचेराह । (२३) किं चेति । सामान्यघटितविशेषद्वयमध्ये नियमोऽयं बोध्यः । (२४) छिद्रेतरेति । छिद्रेतरत्वप्रकारकघटज्ञानवदित्यर्थः । अत्रेदं चिन्त्यम् । यथा छिद्रबाधे छिद्रेतरत्वेन घटधीः, तथा साक्षात्साधनत्वबाधे तदितरकारणत्वेन द्वारानुपस्थितावपि तद्धीरस्तु, तस्यापि विशेषत्वात् । किं च परंपरासाधनत्वेनापि तद्धीरस्तु, तन्मते छिद्रेतरत्ववद्योग्यतावशादेव तदुपस्थितिसंभवात् । न च परम्पराघटकापूर्वस्य प्रागनुपस्थितिरिति वाच्यम् । नहि तन्मते ऽन्वयप्रतियोगिन एव उपस्थितिरन्वयबोधाङ्गमपूर्ववाच्यत्वेऽपि तदनन्वयप्रसङ्गात् । कार्यत्वेन घटादेरेव शक्तिग्रहविषयतया पदार्थस्मरणे तस्यैव विषयत्वात् । तथा च परम्परासाधनत्वप्रकारकोपस्थितिरपि वाच्या, समानप्रकारकत्वेन हेतुत्वात् । सा च न दुर्लभा । वाक्यार्थानुभवकाले च योग्यताबलात्परंपरात्वेनापूर्वमेव भासतां किमपूर्ववाच्यतया । न च पदाजन्यतया सोपस्थितिर्नाङ्गं, छिद्रेतरत्वोपस्थितावपि तुल्यत्वादिति । भट्टमतं निरस्यति । (२५) एतेनेति । संस्कारस्यापि सर्वस्य न तथात्वमत आह । (२६) पटोरिति । (२७) प्रथमक्षणएवेति । उत्पत्त्यग्रिमक्षणएवेत्यर्थः । एतदपि निर्विकल्पकानपेक्षणपक्षे । केचित्तु प्रथमक्षणएवेत्यस्य द्वितीयतृतीयक्षणान्यतरक्षणएवेत्यर्थः । तेनानुमित्यनन्तरं परामर्शानुव्यवसायसंभव इत्याहुः । ननु नान्योन्याश्रयः । यथा स्वर्गकामान्वयानुपपत्त्या लिङः कार्ये शक्तिस्तथा तत एव धर्मिकल्पनात इति न्यायेन क्रियाया एव स्थायित्वं कल्प्यतामित्यरुचेराह । (२८) लोक इति । क्रिया तावत्फलपर्यन्तो व्यापारः, फलं चावच्छेदकं, तच्च यजेः स्वत्वध्वंस इति तन्नाश्यायं यज्यर्थः सिद्धः प्रसिद्धक्रियान्तरवदिति लोकसिद्धक्षणिकत्वायाः क्रियाया न स्थैर्यं कल्प्यते, धर्मिग्राहकमानबाधादित्यर्थ इत्याहुः । तथा च प्रमाणान्तरबाधेन धर्मिकल्पनापि ज्यायसी, अन्यथा प्रतीतध्वंसानामपि लोके तिरोभावमात्रकल्पने सांख्यमतप्रवेश इति भावः । एवमनुभवस्यापि स्थायित्वे संस्कारोऽपि न कल्प्येत, तथा च संस्कारस्येवेत्यप्ययुक्तं स्यादित्यपि बोध्यम् । तटस्थः शङ्कते । (२९) नन्विति । पितृभ्यो दद्यात्संध्यामुपासीतेत्यादावपि देवताप्रीतिरेवात्रावधृता द्वारमित्यभिमानः । ननु मानान्तरं तत्र स्यादित्या-

स्मृतित्वादेव न स्वतः प्रमाणम् । (३०) न च यागस्य देवताप्रीतिहेतुत्वे स्वर्गस्य देवताप्रीतिसाध्यत्वे वा मानान्तरमस्ति । वस्तुतस्तु चेतनदेहे मानमेव नास्ति । (३१) यत्र च विष्णुप्रीतिकामादिवादोऽस्ति तत्र विष्णुरेव प्रीतिर्न विष्णोः, षष्ठ्यर्थलक्षणा दोषात् । विष्णुशब्दस्य प्रीतिविशेषवाचकत्वं वेदएव कल्प्यते । न च देवपूजार्थयज्यन्वयबलात्तथा, (३२) अन्योन्याश्रयात् । (३३) नन्वेवमाग्नेयादीनां षण्णां क्षणिकत्वाद्योग्यतानवगतौ परमापूर्वकारणत्वानवगमे कथमपूर्वकल्पनेति चेत् । न । (३४) काम्ये ऽपूर्ववाच्यत्वस्थितावाग्नेयादौ (३५) तद्द्वारा साधनत्वस्य योग्यत्वसंभवात् । (३६) ननु यो ब्राह्मणायावगुरेत्तं शतेन यातयादित्यत्र ब्राह्मणवधोद्यमस्य (३७) शतयातनाहेतुतावगमे यथा दुरितापूर्वकल्पनं तथेहापीति चेत् । अवगुरेद् यातयादित्यत्र हेतुहेतुमतोर्लिङित्यनुशासनाल्लिङावगोरणशतयातनयो(३८)र्नियतं पौर्वापर्यं बोध्यते प्रत्यक्षेणानुभवस्मरणयोरिव, तच्च साधनत्वे साधनसाधनत्वे चोभयमपि मध्यवर्त्तिघटितमिति दुरितकल्पनं संस्का-

---

शङ्काह । (३०) न चेति । न चाविगीतत्वादिविशेषितस्मृतित्वाद्वेदो ऽनुमेय इति वाच्यम् । अनुकूलतर्काभावादिति भावः । (३१) यत्र चेति । न च यत्र विष्णोरित्यस्ति तत्र का गतिस्तत्र मानाभावादित्याहुः । न च वरुणप्रीतिरित्यादौ कागतिः, तस्यापि प्रीतिविशेषवाचकत्वकल्पनात् । वस्तुतः पूर्णे यागे देवताप्रीतिरित्यन्तरादृष्टं विना कथं तन्निर्वाहः, तदनुभवजनितसंस्कारस्य च स्वजन्यस्मृत्यादिना नाशे फलाभावप्रसङ्ग इति बोध्यम् । (३२) अन्योन्याश्रयादिति । पूजार्थकयज्यन्वये सति देवतावैजात्यसिद्धिः, तत्सिद्धौ च पूजार्थकयज्यन्वय इत्यन्योन्याश्रयादित्यर्थः । तुल्यन्यायतया शङ्कते । (३३) नन्विति । आग्नेयोऽष्टाकपालो भवत्यमावास्यायामैन्द्रं दधि भवत्यमावास्यायामित्यादयः षडुत्पत्तिविधयः दर्शपूर्णमासाभ्यां यजेतेति विधिवाक्यार्थीभूतं प्रधानापूर्वं प्रति दधिहोमादीनां साधनत्वं बोधयन्ति । प्रतीते च तेषां तत्साधनत्वे तन्निर्वाहाय षडुत्पत्त्यपूर्वाणि कल्प्यन्ते । एवं च सर्वप्रधानवाक्यार्थीभूतमपूर्वं वाच्यम् । उत्पत्त्यपूर्वाणि कल्प्यानि इति त्वत्सिद्धान्तः स न स्यात् । क्रमिकप्रधानापूर्वं प्रति क्षणिकादीनामाग्नेयादिकर्मणामयोग्यतया साधनत्वग्रहासंभवादित्यर्थः । (३४) काम्य इति । फलस्योत्कटरागगोचरतया तत्पूरणक्षमः फलशिरस्कापूर्वबोधकः काम्यप्रधानविधिरेव । तयाश्च प्रथमप्रवृत्तात्तस्मादपूर्वे प्रतीते अपूर्वद्वारैव स्वर्गं प्रति यागस्येव नियोगं प्रत्याग्नेयादीनां कारणतास्त्विति प्रतीतावेवाग्नेयादीनां नियोगसाधनताधीरुदेति । तावत्पर्यन्तस्थायिव्यापारकत्वरूपाया योग्यताया ज्ञानात्, न तु प्रथममुत्पत्तिविधिप्रवृत्तिरिति भाव इत्याहुः । तच्चिन्त्यम् । नहि स्वं प्रति स्वं साधनं तथा च द्वारीभूतापूर्वानुपस्थितौ परमापूर्वकारणताबोधे कथं योग्यताज्ञानं कथं वा साक्षात्साधनताबाधे परम्परासाधनत्वप्रकारकधीः, न च तज्जातीयपरमापूर्वोपस्थितौ स्थायिव्यापारवत्त्वरूपयोग्यतानिश्चयसंभव इति वाच्यम् । तज्जातीयसंस्काराद्युपस्थितावुक्तयोग्यतानिश्चयसंभवे प्रधानापूर्वस्यापि वाच्यतानापत्तेः । तत्र तज्जातीयमिति चेन्न, सर्वथा साजात्यस्य प्रकृतेऽप्यसंभवात् । गुणत्वादिना साजात्यस्य तत्रापि संभवात् । प्रकृते तत्र योग्यताघटकमिति तुल्यमिति । अत्राहुः । देहान्तरोपभोग्यस्वर्गे आशुविनाशिक्रियायाः साक्षात्साधनताबाधे युक्तस्तत्र योग्यताज्ञानविरहः । प्रकृते च परमापूर्वं प्रति साक्षादपि षण्णां हेतुत्वसंभवे योग्यताज्ञानसंभवः । न च यौगपद्याभावान्न तथात्वम् । ऋत्विग्भिरनेकैरेकदा क्रियमाणानां यौगपद्यस्यापि संभवात् । अथ च षण्णामेककर्तृत्वप्रतिसंधाने ऽग्रिमाग्रिमसमये प्रथमनाशाद् अनुपपत्त्या प्रथमगृहीतसाधनतानिर्वाहार्थमुत्पत्त्यपूर्वं कल्प्यतइति तदिदमुक्तं, (३५) तद्द्वारेति । तत्प्रतीत्यर्थः । प्रतिबन्दीमाशङ्कते । (३६) नन्विति । (३७) शतयातना, नरकविशेषः । तथा चात्र तव या गतिः सा ममापीति भावः । (३८) नियतमिति । अन्यथा सिद्धिचतुष्टयरहितनियतपौर्वापर्यमित्यर्थः । तेन मध्यवर्त्तित्वकल्पनं निर्वहति । अन्यथा दण्डरूपादौ तत्कल्पनापत्तेरिति भावः । नन्वेतदप्याशुविनाशित्वेन मध्यवर्त्ति ज्ञानं विना ऽयोग्यतया दुर्ग्रहमन्यथा ऽन्यथासिद्धिपञ्चरहितनियतपौर्वापर्यापर्यवसन्नस्य कारणत्वस्यापि ग्रहे बाधकाभावाज्जितं नैयायिकैः । एतेनोक्तस्य मध्यवर्त्तिज्ञानं विना ग्रहसंभवेपीष्टसाधनता दुर्ग्रहा, सा हीष्टसहभावनिर्मिता तत्सहभावश्च क्षणिकस्य व्यापारनिर्मितशरीरमेव यागस्य स्वर्गसाधनत्वं तत्कथं व्यापाराप्रतीतौ प्रतीयतामेकदेशस्यापरिचयादिति परास्तम् । एवमप्यनन्यथासिद्धनियतपूर्वसत्त्वादिरूपकारणताबोधे बाधकानभिधानादिति । अत्राहुः । उक्तलिङा नियतपौर्वापर्यमात्रं बोध्यते तस्मान्नावगुरितव्यमिति निषेधकवेदभागेनावगोरणाभावविषयकापूर्वकार्यत्वे बोधिते तदन्यथानुपपत्त्या ऽवगोरणस्य शतयातनाहेतुत्वनिबन्धनं पूर्वत्वमित्यनुमीयते । नह्यवगोरणस्यानिष्टसाधनत्वं विना तदभावविषयकापूर्वकार्यत्वमुपपद्यते प्रत्युत रागप्राप्तमवगोरणमेव कुर्यात् तथा चोत्तरकालानुमितकारणत्वनिर्वा-

रवत्, (३९) इह तु विध्यनुशिष्टां लिङ् कार्यतामाह। (४०) किं च (४१) कामी (४२) काम्यादन्यत् (४३) काम्याव्यवहितसाधनतया ज्ञातमेव कर्त्तव्यतया ऽवैतीति नियमाद् न क्रियायां कामिनो ऽन्वयो योग्यः। न च तृप्तिकामस्य पाके प्रवृत्तेर्व्यभिचारः। ओदनकामस्य तत्र प्रवृत्तेः। तृप्तिकामना तु तत्कामनोपयोगिनी, न तु साक्षात्। अन्यथा साधनसाधने प्रवृत्तिर्न स्यात्। काम्यसाधनत्वं प्रवर्त्तकं लाघवादिति चेत्। भोजनकामस्य सिद्धौदनस्य पाके प्रवृत्तिप्रसङ्गात्। तस्यौदनद्वारा भोजनसाधनत्वाविशेषात्। विशेषणे तु (४४) यत्राव्यवहितसाधनं पाकः तन्न काम्यं (४५) यत् काम्यं न तत्राव्यवहितसाधनं पाक इति न प्रवृत्तिः। ननु पाकस्य सिद्धौदनद्वारा भोजनसाधनत्वं न संभवति, द्वारस्यासाध्यत्वात्। (४६) ओदनान्तरद्वारा च तथा प्रतिसंधाने ऽव्यवहितत्वविशेषणेऽपि कुतो न पाके प्रवर्त्तते, ओदनान्तरे द्वारे साक्षात्साधनत्वादिति चेत्। न। पाकस्य भोजनसाधनत्वे विशेषस्याप्रयोजकतयौदनमात्रस्य द्वारत्वात्तस्य च साध्यत्वाविवादात्। (४७) ओदनविशेषे च सिद्धे ओदनकामनाविरहान्न तुल्यत्वम्। (४८) नन्वोदने सिद्धे सिद्धत्वाद्यथा न कामना तत एव द्वारतापि न। अथौदनान्तरमसिद्धमादाय द्वारता तर्हि कामनापि स्यात्तस्यासिद्धत्वादिति चेत्, न। (४९) पाकस्यैकविशेषद्वारताबाधो न विशेषान्तरद्वारताविरोधी, सकलविशेषस्यैकत्र द्वारत्वासंभवात्। एकविशेषसिद्धा तु तन्मात्रकामना विच्छिद्यते। नहि सकलविशेषसिद्धत्वेन सामान्यकामनाविच्छेदः। सकलविशेषसिद्धेरसंभवेन तदनुच्छेदप्रसङ्गात्। (५०) अथ वा काम्यादन्यत्साक्षादसाधनत्वेन ज्ञायमानं यत्कर्तव्यतया कामी बुध्यते तत्काम्याव्यवहितसाधनमन्तराकृत्वैव। (५१) यद्वा काम्यादन्यत्कामी प्रथमं काम्याव्यवहितसाधनं कर्तव्यतयावैति पश्चात्तद्द्वारा व्यवहितसाधनमिति प्रथमं यागे कामिकार्यताबोधो ऽयोग्यतापराहत एव॥ उत्तानास्तु (५२) विवादविषयो लिङ् (५३) समभिव्याहृतक्रियान्वितकार्यताबोधिका, प्रमाणलिङ्त्वात्, लौकिकलिङ्वत्। यद्वा (५४) लिङुपस्थाप्यं कार्यत्वं समभिव्याहृतक्रियान्वितं, लिङुपस्थापितकार्यत्वात्, पचेतेतिकार्यत्ववत्। यागो वा (५५) कार्यत्वान्वितः, (५६) लिङ्शबलधातुप्रतिपाद्यत्वात्, पाकवदित्यनुमानात् क्रियाकार्यत्वावगमेनापूर्वं कल्प्यमिति (५७) तत्र प्रथमे यागान्वितकार्यत्वबोधकत्वं लिङो बोध्यते न तु क्रियते, न च योग्यताज्ञानं विना

हाय दुरितकल्पनं यागे तु नैवमिति न प्रतिबन्दिरिति दिक्॥ (३९) इह त्विति। तत्र चोक्तो योग्यताज्ञानविरहादिदोष इति न तौल्यमित्यर्थः। इतोऽपि क्रियायां न कार्यत्वान्वय इत्याह। (४०) किं चेति। नित्ये व्यभिचारादाह। (४१) कामीति। काम्ये व्यभिचारादाह। (४२) काम्यादन्यदिति। न च पाकत्वात् पाकः कार्य इत्यनुमितौ व्यभिचारः, तन्मते तत्रापि तदपेक्षाभ्युपगमादित्याहुः। न च तन्मते साध्यत्वसाधनत्वयोरेकदा भाने विरोध इति वाच्यम्। वादिभेदेनाविरोधादित्याहुः। अवच्छेदभेदमादायाविरोध इत्यन्ये। (४३) काम्येति। तथा च व्यापके व्यवहितपदवैयर्थ्यमिति भावः। (४४) यत्रेति। ओदनइति शेषः। (४५) यदिति। भोजनमिति शेषः। (४६) ओदनान्तरेति। तथा चासिद्धत्वेन काम्यत्वमित्यभिमानः। (४७) ओदनविशेषे चेति। यत्किंचिद्विशेषसिद्धौ च सामान्येच्छाविच्छेदादिति भावः। आशयमविद्वान् शङ्कते। (४८) नन्विति। आशयमुद्घाटयति। (४९) पाकस्येति। नन्वेवमपूर्वस्य कामिकर्त्तव्यता न बुद्ध्येत काम्याव्यवहितसाधनत्वेन प्रथमं तद्बोधकाभावादित्यरुचेराह। (५०) अथ वेति। (५१) यद्वेति। न च यत्र साक्षात्साधन एव कामिप्रवृत्तिस्तत्र व्यभिचार इति वाच्यम्। परम्परासाधननिष्ठप्रवृत्तिप्रयोजकेच्छावतः कामिपदेन विवक्षितत्वात्। न चैवमपि स्थिरत्वनिर्व्यापारत्वभ्रमवता कामिना यत्र यागः कर्त्तव्यतया बुध्यते तत्र व्यभिचार इति वाच्यम्। परम्परासाधने प्रवृत्तिविषये आशुतरविनाशित्वज्ञानवत्त्वेन कामिनो विशेषणात्। (५२) विवादविषयइति। एतच्च संप्रदायमते लौकिकलिङांऽशतः सिद्धसाधनतावारणाय,। अपूर्वस्यापि क्रियात्वेन सिद्धसाधनादाह। (५३) समभिव्याहृतेति। न चावगुरेदित्यत्र व्यभिचारः, लिङ्विशेषहेतुत्वे तात्पर्यात्। (५४) लिङुपस्थाप्यमिति। नन्वत्र सिद्धसाधनं, कार्यत्वस्यानुगतस्यैक्येन लिङुपस्थाप्यस्यैव तस्य कदा चित् क्रियान्वयात्। एवं च हेतौ व्यर्थविशेषणत्वं कार्यत्त्वमात्रस्यैवाव्यभिचारादिति चे,न। लिङ्जन्या कार्यत्वोपस्थितिः, तत्तत्क्रियान्वितकार्यत्वबोधिका, लिङ्जन्यकार्यत्वोपस्थितित्वा,दित्यत्र तात्पर्यात्। (५५) कार्यत्वान्वित इति। लिङ्जन्यकार्यत्वप्रकारकबोधविशेष्य इत्यर्थः। (५६) लिङिति। लिङ्प्रकृतिधातुप्रतिपाद्यत्वादित्यर्थः। लिङ्पदं च विधिलिङ्परम्। अतो नावगुरेदित्यत्र व्यभिचारः। दूषयति। (५७) तत्रेति। तथा च बाध इति

तत्संभवतीत्युक्तमेव । नहि योग्यतादिकं विनैवैतदनुमानप्रामाण्यप्रयोजनमात्रादन्वितमभिधीयते शब्देन, नान्त्यौ, (५८) कुर्यादित्यादौ व्यभिचारात् (५९) वेदस्यानुवादकतापाताच्च । नन्वपूर्वे व्युत्पत्तिविरहः । तथाहि, (६०) प्रसिद्धार्थस्वर्गकामपदसमभिव्याहारान्यथानुपपत्त्योपस्थिते शक्तिर्ग्रहीतव्या । न च शाब्दानुभवात्पूर्व(६१)मपूर्वमुपस्थितम् । मानाभावादपूर्वत्वव्याघाताद(६२)वाच्यत्वापाताच्च । न च लिङादिना तदुपस्थिति,र्व्युत्पत्त्यनन्तरं तत्प्रवृत्तिरित्यन्योन्याश्रयात् । न च कार्यत्वेनोपलक्षिते तत्र शक्तिग्रहः । उपलक्षणं हि स्मरणमनुमापनं वा, अगृहीते संबन्धाग्रहादशक्यमिति । मैवम् । (६३) कार्ये धर्मिणि कार्यत्वेन शक्तिग्रहात् कार्यत्वविशिष्टं चोपस्थितमेव, ततोन्विताभिधानदशायां (६४) यागविषयकं कार्यमित्यनुभवः स्वर्गकामान्वयायोग्यतया घटादिकं तिरस्कृत्य क्रियाभिन्ने योग्यतावशाद्यागविषयकापूर्वे पर्यवस्यति, न त्वपूर्वत्वेन शक्तिग्रहः, न त्वपूर्वं कार्यमित्यनुभवः । भवति च सामान्यतः संबन्धवशाद्विशेषबुद्ध्युपायः । यथा तवैव कर्तृमात्रे संबन्धग्रहात्कर्तृविशेषसिद्धिः । ननु कार्यत्वेनापि किं घटादौ शक्तिग्रह, उतापूर्वे, उभयत्र वा, नाद्यः । अन्यप्रतिपत्तावन्यशक्तिग्रहानुपयोगात् । नान्त्यौ । प्रागनुपस्थितेरिति चेत् । न । येन हि रूपेण शब्देनानुभवो जन्यते तेन रूपेण शक्तिग्रहः पदार्थस्मरणं च शाब्दानुभवहेतुः । नहि प्रमेयत्वेन शक्तिग्रहः पदार्थस्मरणं च घटत्वेन शाब्दानुभवे हेतुः । एवं च घटादावेव कार्ये शक्ता लिङिति शक्तिग्रहः, ततः कार्यमिति स्मरणं, ततो योग्यतादिवशात्प्रचुरद्रव्यगुणकर्माणि कार्याणि विहाय यागविषयकं कार्यमित्यनुभवो भवन्नपूर्वमालम्बते, (६५) योग्यत्वाच्च तस्य स्थायित्वलाभः । अत एव वाक्यार्थानुभवमात्रविषयत्वात्तदपूर्वम् । (६६) न च स्मृतानामाकाङ्क्षादिवशादन्वयबोधः पदेन क्रियते, न चापूर्वं स्मृतिगोचर इति वाच्यम् । (६७) शक्तिग्रहपदार्थस्मरणशाब्दानुभवानां समानप्रकारतामात्रेण हेतुहेतुमद्भावावधारणात् लाघवादावश्यकत्वाच्च । न तु क्व चित्सहचारमात्रेणान्वयप्रतियोगिन एवोपस्थितिस्तथा, गौरवात् । (६८) गोपदादपूर्वगवाननुभवप्रसङ्गाच्च । विशिष्टवैशिष्ट्यबोधे सर्वत्र तथैव । अन्यथा पर्वतीयवह्निर्व्यापकतया नावगत इति कथं तदन्वयोऽनुमितौ । (६९) ननु सामान्यलक्षणया प्रत्यासत्त्या सर्वा एव व्यक्तयो व्याप्तिग्रहे शक्तिग्रहे च विषयीभवन्ति, कथमन्यथा पर्वतीयधूमव्याप्यग्रहे तस्मादनुमितिरिति चेत् । न । येन रूपेण व्याप्तिग्रहस्तेन रूपेण (७०) व्याप्यत्वेन वा पक्षधर्मताग्रहोऽनुमितौ कारणमस्तु, किं तया । (७१) अपि च । सा यद्यस्ति, ममापि, नास्ति चे, त्तवापि, किं

भावः । (५८) कुर्यादिति । धातुप्रत्ययोपस्थाप्यकृत्योः परस्परमनन्वयादिति भावः । न चाभेदएवान्वयः, भिन्नप्रकारोपस्थितिं विना तदभावात् । अत्र बाधोपि बोध्यः । ननु तद्व्याप्तौ हेतुर्वाच्य इति न व्यभिचार इत्यत आह । (५९) वेदस्येति । प्रथमानुमाने वेदप्रतिपाद्यकार्यत्वादेर्बाध्यतावच्छेदकतया प्रागेव सिद्धेरुत्तरानुमानयोः स्वातन्त्र्येणैवेत्यर्थः । न च भिन्नप्रकारकत्वान्नानुवादकत्वमिति वाच्यम् । समानविषयत्वेन तथात्वमिति मतेनोक्तत्वात् । वस्तुतो नैषामनुवादकत्वमन्यथा तन्मतेप्यापत्तेः, कार्यत्वादेः कदा चिदनुमितस्यैव ततः प्रतीतेः । यदि च नियमतस्तथाभावान्नानुवादकत्वं तदा प्रकृतेपि तुल्यम् । तस्मात्प्रथमदूषणएव तात्पर्यम् । (६०) प्रसिद्धेति । वृद्धव्यवहारादेरभावादिति भावः । (६१) अपूर्वेति । शाब्दानुभवात्पूर्वं मानान्तराविषयत्वमेवापूर्वत्वं तद्व्याहन्यतइत्यर्थः । (६२) अवाच्यत्वेति । प्रकारान्तरेणैतल्लाभे तदेव द्वारमादाय यागे साधनत्वान्वयसंभवे क्रियाकार्यत्वमेव लिङ्वाच्यं स्यान्न त्वपूर्वमित्यर्थः । अनन्यलभ्यस्यैव शब्दार्थत्वादित्यर्थ इत्यन्ये । (६३) कार्यइति । नन्वेवमपि स्वर्गसाधनताबोधे सति स्वर्गकामनियोज्यान्वययोग्यताज्ञानं स्यात्, स च घटादौ अपूर्वे वा । नाद्यो, बाधात् । नान्त्यः । अनुपस्थितेः । अन्यथा क्रियायां तदन्वयेन किमपराद्धमिति चेन्न । नित्यस्थलइव यागविषयकं कार्यमित्यनुभवे जाते तदादाय स्वर्गकामान्वययोग्यताबुद्धौ महावाक्यार्थज्ञानसंभवादित्याहुः । (६४) यागविषयकमिति । विषयत्वं न प्रकारः, किं तु यागकार्ययोर्विषयविषयीभावः संसर्ग इति बोध्यम् । ननु स्थायित्वानुपस्थितौ नियोज्यान्वयानुपपत्तिस्तदवस्थैवेत्यत आह । (६५) योग्यत्वाच्चेति । समानप्रकारकत्वमात्रं न तन्त्रं, किं तु समानविषयकत्वमपि, अन्यत्र तथा दर्शनादित्याशङ्क्य निराकरोति । (६६) न चेति । (६७) शक्तिग्रहेति । यद्यपि शक्तिग्रहस्य शाब्दानुभवहेतुत्वे मानाभावस्तथापि पदार्थस्मरणं प्रति हेतुत्वं बोध्यम् । (६८) गोपदादिति । सामान्यलक्षणा नास्तीत्यभिमानः, एव मग्रेपि । तदेव द्रढयितुं शङ्कते । (६९) नन्विति । (७०) व्याप्यत्वेनेति । परनयेनोक्तम् । (७१) अपि चेति । नह्यभ्युपगमेनार्थाः

त्वतव दर्शने सास्ति, इति (७२) सुतरामपूर्ववाच्यता (७३)।
कार्यत्वेन हि रूपेणापूर्वस्यापि शक्तिग्रहविषयत्वं पदार्थ-
स्मृतिविषयत्वं च। न चैवमपूर्वत्वक्षतिः। (७४) याग-
विषयत्वादेर्विशेषस्य कार्ये लिङं विना ऽनुपस्थितेः। यथा
पर्वतीयत्वभानं वह्नौ नानुमितिं विना। ननु यदि कार्ये
क्रियासाधारणे लिङ्शक्तिः क्रिया चायोग्येति योग्यापूर्व-
लाभः, तदा नित्यनिषेधापूर्वयोरलाभः, नहि तत्रायोग्य-
तया क्रिया त्यक्तुं शक्यते, फलाश्रवणात्, फलकल्पनायां
च बीजाभावात्। (७५) न चैकत्र निर्णीतः शास्त्रार्थो
ऽन्यत्रापि तथैवेति न्यायात्तत्राप्यपूर्वमेव लिङर्थ इति यु-
क्तम्। (७६) नह्यपूर्वत्वेन शक्तिग्रहः, किं तु कार्यत्व-
विशिष्टे धर्मिणि, क्रिया च तथा भवत्येव। न च कार्येण
समं क्रियाया अन्वयानुपपत्त्या ऽपूर्वे पर्यवसानम्। अभे-
दस्याप्यन्वयत्वादिति। मैवम्। नहि लोके पचेतेत्यादौ
कार्ये धर्मिणि शक्तिः कल्पिता, किं त्वनन्यलभ्ये (७७)
कृतिसाध्यत्वरूपे कार्यत्वमात्रे, धर्मिणः पाकादेर्धातोरे-
वोपस्थितिसंभवात्। क्रियाकार्यत्वस्यान्विताभिधानलभ्य-
त्वात्। तथा च धर्मिणि (७८) वेदे शक्तिः कल्पनीया,
सा च क्रियानिरासेनैव, नहि क्रियायाः कार्यत्वान्वययो-
ग्यत्वे धर्मिणि शक्तिः कल्पयितुं शक्यते। तस्मादयोग्यत-
या क्रियानिरासानन्तरं तदतिरिक्ते शक्तिकल्पनम्। न च
क्रियातिरिक्तकार्यमात्रं लघु, ततः क्रियापि शक्यैवेति वा-
च्यम्। यतो न ब्रूमः क्रियातिरिक्तकार्यत्वेन शक्तिः, किं
त्वयोग्यतया क्रियायां निरस्तायां धर्मिणि शक्तिकल्पनस-
मये यत्क्रियातिरिक्तं तत्र शक्तिः। न तु शक्तिग्रहे क्रिया-
प्रवेशः। (७९) नहि यत्प्रयुक्तानुपपत्त्या यत्कल्पनं तदेव
तस्य विषयः। एवं च कार्यत्वेनापि तदतिरिक्तकार्यएव
शक्तिकल्पनान्नित्यनिषेधयोरपि तदेवोपासनाद्यन्वययोग्यं
लिङाभिधीयते, न तु कार्यत्वमात्रं, धर्म्मिणि बाधकाभा-
वात्। (८०) लक्षणाप्रसङ्गाच्च। (८१) घटादिस्तु लिङ्-
शक्तिग्रहे न तिरस्क्रियते न पुरस्क्रियते, उभयथापि गौरवात्।
अन्विताभिधानदशायां त्वयोग्यतया तस्याप्रवेशः। वि-
धिप्रत्ययस्य च तत्राप्रयोगः। केवलस्य तस्यासाधुत्वात्।
धातुसमभिव्याहारे च तदर्थेनान्वयबोधजननियमेन घ-
टाद्यप्रतिपादकत्वात्। अत एवाप्रयोगादेवाप्रयोगो ऽपूर्व-
त्वं वा प्रयोगोपाधिरिति वदन्ति ॥

क्रियन्ते अनभ्युपगमेन वा निवर्त्यन्तइति भावः। (७२) सु-
तरामिति। तत्रोक्तदोषाभावादिति भावः। तदेव विवृणो-
ति। (७३) कार्यत्वेनेति। (७४) यागेति। तथा च विशि-
ष्यपूर्वाप्रतीतित्वमपूर्वत्वमिति भावः। (७५) न चेति। त-
दुक्तं काम्ये क्लृप्तशक्तिर्लिङादिर्नित्यनिषेधे चापूर्वमाहेति भावः।
(७६) नहीति। न च तात्पर्यान्नियमः, तथा तात्पर्ये माना-
भावादन्यथा विवादाभावादित्याहुः। (७७) कृतिसाध्यत्व-
रूपइति। जन्यजनकभावश्च संसर्ग इति मतेनेदम्। वस्तुतः
कार्यत्वएव तात्पर्यं चिकीर्षानुरोधेन तत्प्रकारकज्ञानस्यैव
प्रवर्त्तकत्वादिति। (७८) वेदइति। विधिलिङ्इति शेषः।
तेनावगुरेदित्यादौ न दोषः। न चामुकपापक्षयकामो गङ्गायां
स्नायादित्यादौ विघ्नध्वंसकामस्य स्तवादिबोधने वा नापूर्वं द्वारं
गौरवादिति न क्रियातिरिक्तान्वय इति वाच्यम्। तद्भिन्न-
लिङस्तथात्वादित्याहुः। ननु शक्तिग्रहे क्रियाप्रवेशाभावा,-
द्यदि योग्यापि क्रिया नान्वेति तदा ऽपूर्वमपि तथा स्यात्।
तस्यापि प्रागनुपस्थितत्वेन तदप्रवेशात्। यदि च समान-
प्रकारकत्वेन हेतुत्वात्तदप्रविष्टस्याप्यन्वये न विरोधस्तदा
क्रियायामपि तुल्यमित्यत आह। (७९) नहि यदिति। तथा
च क्रियाप्रयुक्तानुपपत्त्या तत्कल्पनादयं योग्यापि क्रिया ना-
न्वेति उक्तनियमाभ्युपगमादृतएव छिद्रबाधे छिद्रेतरत्वव-
क्रियातिरिक्तकार्यत्वमेवान्वयबोधप्रकार इति वदन्ति। अ-
पूर्वे तु नैवमनुपपत्तिरिति भावः। नन्वेवमपि निषेधापूर्व-
लाभो न स्यात्। क्रियातिरिक्तनिषेधे कार्यताबोधेनोपपत्ता-
वपूर्वकार्यतावगमकल्पने मानाभावात्। न च प्रागभावरूपे
निषेधे कार्यत्वस्य बाधान्नैवमिति वाच्यम्। क्षेमसाधारणस्यैव
तस्य प्रवर्त्तकत्वेन प्रागुक्तत्वात्। तस्य चाबाधादिति चिन्त्यम्।
(८०) लक्षणेति। विशिष्टशक्तपदस्यैकदेशे लाक्षणिकत्वादि-
त्यर्थः। ननु यदि घटादिकार्यत्वेन लिङः शक्तिग्रहस्तदा ना-
पूर्वलाभः, घटाद्यतिरिक्तकार्यत्वेन चेत्तदा शक्तिग्रह एव न स्या-
त्तस्यानुपस्थितेरित्यत आह। (८१) घटादिस्त्विति। कार्य-
त्वमात्रं पुरस्कृत्य तत्र शक्तिग्रह इत्यभ्युपगमादन्यथोभयथा
गौरवादित्यर्थः ॥

॥ अथ वेदान्तसूत्रसंबन्धिशैवभाष्यतृतीयाध्यायस्य ॥

॥ द्वितीयपादारम्भः ॥

॥ संध्ये सृष्टिराह हि ॥ १ ॥

पूर्वत्र जीवस्य गत्यागतिनिरूपणं कृतम्। इह तदवस्था
विचार्यते। संध्ये स्वप्ने "न तत्र रथा न रथयोगा न पन्थानो

भवन्ति, अथ रथान् रथयोगान् पथः सृजते" इत्यादिना सृष्टिरभिधीयते। सैषा जीवकृता परमेश्वरकृता वेति संशयः।

एवं सति जीवकृतेत्यवगम्यते।

"अथ वेशान्तान् पुष्करिण्यः स्रवन्त्यः सृजते, स हि कर्ता" इति स्वप्नदर्शं जीवमेव कर्तारमाह हि श्रुतिः॥ १॥

॥ निर्मातारं चैके पुत्रादयश्च ॥ २॥

"य एव सुप्तेषु जागर्ति कामं कामं पुरुषो निर्मिमाणः" इति जीवमेव स्वप्ने कामानां निर्मातारमेके शाखिनोऽधीयते। ततः कामशब्दनिर्दिष्टाः काम्यमानाः पुत्रादयः, पूर्वत्र "सर्वान् कामान् छन्दतः प्रार्थयते," इत्युक्त्वा "शतायुषः पुत्रपौत्रान् वृणीष्व" इति विवृतत्वात्। ततश्च जीवकृतैव स्वप्नसृष्टिः॥ २॥

इति प्राप्तेऽभिधीयते॥

॥ मायामात्रं तु कार्त्स्न्येनानभिव्यक्तस्वरूपत्वात् ॥ ३॥

स्वप्ने यद्रथादिरूपमर्थजातं, तदिदं मायामात्रमीश्वरकृतं, न जीवकृतं, स्वप्नदृशैकेनानुभाव्यं, तत्कालमात्रावसायित्वात्। आश्चर्यतया मायामात्रमित्युक्तम्। जीवस्य सत्यसंकल्पत्वादिकं तिरोहितमिति तस्य[1] रथादिसृष्टिसामर्थ्यं न संभवति। अतः "पुरुषो[2] निर्मिमाणः" इति न जीवविषयम्। किंतु,

"तदेव शुक्रं तद्ब्रह्म तदेवामृतमुच्यते।
तस्मिंल्लोकाः श्रिताः सर्वे तदु नात्येति कश्चन"॥

इति वाक्यशेषादीश्वरविषयम्। तदैकार्थ्यात् "स हि कर्ता" इत्यपि तद्विषयमेव। अतः[3] परमेश्वरकृता स्वप्नसृष्टिरिति॥ ३॥

जीवस्वरूपानभिव्यक्तिहेतुमाह॥

॥ पराभिध्यानात् तु तिरोहितं ततो ह्यस्य बन्धविपर्ययौ* ॥ ४॥

जीवस्यानाद्यपचारप्रवाहेण पराभिध्यानात् परमेश्वरसंकल्पात् तस्य सत्यसंकल्पत्वादिकं तिरोहितम्। तदपचारतदनुवृत्तिकृतात् तस्मादेव परमेश्वरसंकल्पादस्य बन्धमोक्षौ भवतः। तथाहि श्रुतिः। "यदा ह्येवैष एतस्मिन्नुदरमन्तरं कुरुते, अथ तस्य भयं भवति, यदा ह्येवैष एतस्मिन्नदृश्येऽनात्म्येऽनिरुक्ते निलयनेऽभयं प्रतिष्ठां विन्दते, अथ सोऽभयं गतो भवति" इति[1]॥ ४॥

॥ देहयोगाद्वासोऽपि ॥ ५॥

किंच, इहापि जीवस्य स्वरूपतिरोधानभावोऽपि देवमनुष्यादिदेहाकाराचिद्योगाद्भवति सृष्टिसमये। प्रलये पुनर्नामरूपविभागानर्हसूक्ष्माकाराचिद्योगादित्येवं तस्य तिरोहितसत्यसंकल्पत्वादिकस्य तात्कालिकविचित्रसृष्टिसामर्थ्यं स्वप्ने न संभवति॥ ५॥

उपपत्त्यन्तरमाह॥

॥ सूचकश्च हि श्रुतेराचक्षते च तद्विदः ॥ ६॥

अथ स्वप्नाः।

"यदा कर्मसु काम्येषु स्त्रियं स्वप्नेषु पश्यति।
समृद्धिं तत्र जानीयात् तस्मिन् स्वप्ननिदर्शने॥

"पुरुषं कृष्णं कृष्णदन्तं पश्यति स एनं हन्ति" इत्यादिश्रुतेः। शुभाशुभसूचकश्च हि स्वप्नः। स्वप्नाध्यायविदश्च शुभाशुभसूचकान् स्वप्नविशेषानाचक्षते। अतो न जीवसृष्टाः स्वप्नार्थाः। जीवसृष्टत्वे तदशुभसूचकानां सृष्ट्यभावप्रसङ्गात्। तस्मात् परमेश्वरकृता स्वप्नसृष्टिरिति युक्तमेव॥ ६॥

॥ तदभावो नाडीषु तच्छ्रुतेरात्मनि च ॥ ७॥

स्वप्नाभावः सुषुप्तिः। "अथ यत्रैतत् सुप्तः समस्तः संप्रसन्नः स्वप्नं न विजानाति, आसु तदा नाडीषु सृप्तो भवति" इति। "अथ यदा सुषुप्तो भवति न कंचन वेद हि, ता नाम नाड्यो द्वासप्ततिसहस्राणि हृदयात् पुरीततिमभि प्रतिष्ठन्ते ताभिः प्रत्यवसृत्य पुरीतति शेते" इति। "यत्रैतत् पुरुषः स्वपिति नाम सता सोम्य तदा संपन्नो भवति"। इति च श्रुतिभिर्जीवस्य सुषुप्तौ नाडीषु पुरीतति ब्रह्मणि च शयनमवगम्यते। तेष्वस्य विकल्पः समुच्चयो वेति संशयः। नाड्यादीनि स्थानानि विकल्पितानि भवितुमर्हन्ति। एकप्रयोजनत्वात्। यथा, "व्रीहिभिर्यजेत" "यवैर्यजेत" इत्यत्र पुरोडाशनिष्पादनप्रयोजनस्यैकत्वेन विकल्पः स्वीक्रियते। तथा सुषुप्तिप्रयोजनस्यैकत्वात् कदाचित् पुरीतति शेते, कदाचिन्नाडीषु, कदाचिद् ब्रह्मणीति विकल्प एवात्र समुचित इति पूर्वः पक्षः। समुच्चय इति सिद्धान्तः। कुतः। नैकप्रयोजनत्वात्। तथाहि, जीवस्य हृदयनिष्ठब्रह्मगमनमार्गतया नाडीनां साधनत्वं पुरीतति ब्रह्मणि च प्रासादपर्यङ्कवदविरोधः। अतो नाडीभिरुपसृप्य पुरीतति ब्रह्मणि जीवः शेत इत्युपकारभेदात् समुच्चय एव॥ ७॥

१–तमेव वर्तते। ततस्तस्य इति पा०।

२ "स हि कर्ता पुरुषो इति पा०।

३ सर्वे इति च वचनादीश्वरपरमेव। अतः इति पा०।

* शंकरमते 'सूचकश्च हि श्रुतेराचक्षते च तद्विदः' इति चतुर्थं, 'पराभिध्यानात् तु तिरोहितं ततो ह्यस्य बन्धविपर्ययौ' इति पञ्चमं, 'देहयोगाद्वासोऽपि' इति षष्ठमित्येवं सूत्रक्रमो वेदितव्यः।

१–प्रवाहेण तत् तिरोहितम्। तदपचारानुवृत्त्या तस्य बन्धविपर्ययौ भवतः। तथाहि, "अथ तस्य भयं भवति, अथ सोऽभयं गतो भवति" इति श्रुतेः इत्येव पा०।

॥ अतः प्रबोधोऽस्मात् ॥ ८ ॥

"सत आगम्य न विदुः, सत आगच्छाम" इति ब्रह्मणः सकाशादस्य प्रबोधं श्रुतिराह । अतः समुच्चयः । विकल्पेऽङ्गीकृते ह्यष्टदोषप्रसङ्गः । यदा जीवो नाडीषु शेते तदा पुरीतद्ब्रह्मवाक्ययोः प्रामाण्यं प्राप्तं परित्यज्येत । अप्राप्तं चाप्रामाण्यं स्वीक्रियेत । यदा पुरि तद्ब्रह्मणोः शेते तदा पुरीतद्ब्रह्मवाक्ययोः पूर्वं त्यक्तं प्रामाण्यं स्वीक्रियेत । पूर्वं स्वीकृतं चाप्रामाण्यं परित्यज्येत । इति प्राप्तपरित्यागोऽप्राप्तस्वीकारः परित्यक्तस्वीकारः स्वीकृतपरित्यागश्चेति दोषचतुष्टयम् । पुरितद्ब्रह्मवाक्यकोटौ तथा नाडीवाक्यकोटौ च दोषचतुष्टये योजिते सत्यष्टौ दोषा भवन्ति । ततो न विकल्पः समुच्चयोपपत्ताविति समाधिः ॥ ८ ॥

॥ स एव तु कर्मानुस्मृतिशब्दविधिभ्यः ॥ ९ ॥

अत्र सता सोम्य तदा संपन्नो भवतीति विषयः । पूर्वत्र जीवस्य सुषुप्तावस्था निरूपिता । तत्र ब्रह्मणि सुप्त एव प्रतिबुध्यते, उतान्य, इति संशयः । इहान्य इति प्राप्तम् । ब्रह्मप्राप्तस्यावृत्तेरनुचितत्वात् । निरतिशयानन्दे ब्रह्मणि साम्यं प्राप्तस्य जीवस्य[1] पुनर्न दुःखमयसंसारावृत्तिरुपपद्यते[2], सता संपन्नः कथमुत्तिष्ठेत्, को वात्र विभाग, इति प्राप्ते ब्रूमः । सता संपन्नोऽपि सुप्त एव प्रतिबुद्ध उत्तिष्ठति । ज्ञानवैधुर्येण कृतस्य कर्मणस्तेनानुभाव्यत्वात् । पूर्वानुभूतप्रत्यभिज्ञानाच्च । "त इह व्याघ्रो वा सिंहो वा वृको वा वराहो वा कीटो वा पतङ्गो वा दंशो वा मशको वा यद् यद्भवन्ति तत् तदा भवन्ति" इति तद्भावश्रुतेश्च । मोक्षोपायविधिवाक्यानर्थक्यप्रसङ्गाच्च । सत आगम्य न विदुरिति संपन्नस्य ब्रह्मानन्दज्ञानाभावोक्तेर्मुक्ताविव न तल्लयः[3] । अतः सुप्त एव पुनः समुत्तिष्ठतीति युक्तम् ॥ ९ ॥

॥ मुग्धेऽर्धसंपत्तिः परिशेषात् ॥ १० ॥

मूर्च्छितः पुरुष इति व्यवहारान्मूर्च्छेति काचिदवस्थानुभूयते । सैषा सुषुप्त्यादिभ्यो भिन्ना न वेति संदेहः । तदेवं सति जागरस्वप्नसुषुप्तिभ्यो भिन्नाया अवस्थाया अप्रसिद्धत्वान्मूर्च्छा जागरादिष्वन्तर्भूतेति पूर्वपक्षे प्राप्त उच्यते[4] । मूर्च्छिते पुरुषे यावस्था सा मरणार्धसंपत्तिः । इति परिशेषाद् भिन्ना सुषुप्त्यादेः । प्रपञ्चप्रतीतेरभावान्न जागरस्वप्नयोरन्तर्भावः । सुषुप्तेः प्रसन्नवदनादिलक्षणाया विकृतमुखादिलक्षणाया अस्याश्च विशेषात् ततोऽप्यन्यावस्था मूर्च्छेति सिद्धम् ॥ १० ॥

१–णि मग्नस्य इति पा० ।

२ दुःखरूपे संसारेऽनुवृत्ति–इति पा० ।

३–च्च सुप्त एव जीवः समुत्तिष्ठतीति । सत आगम्य न विदुरिति संपन्नस्य ब्रह्मानन्दज्ञानाभावान्न तत्र श्रेयः इति पा० ।

४ उच्यते सिद्धान्तः इति पा० ।

॥ न स्थानतोऽपि परस्योभयं लिङ्गं सर्वत्र हि ॥ ११ ॥

पूर्वेष्वधिकरणेषु त्वंपदार्थस्य जीवस्य स्वरूपधर्मगत्यागत्यवस्थाविशेषनिरूपणं कृतम् । अतः परं तत्पदार्थस्य परमेश्वरस्य स्वरूपधर्मादिकं निरूप्यते । "सोऽन्तरादन्तरं प्राविशत्," दिशश्चान्तरं स प्राविशत्," "यः पृथिव्यां तिष्ठन्", इत्यादिषु परमेश्वरस्य सर्वात्मकतयानुप्रवेशः श्रूयते । तस्य सर्वान्तर्यामितयावस्थितौ तत्तद्दोषकलङ्कः प्रसज्यते[1] न वेति संशये प्रसज्यत इति पूर्वः पक्षः[2] । तथाहि, "अस्थूलमनण्वह्रस्वम्" ।

"निष्कलं निष्क्रियं शान्तं निरवद्यं निरञ्जनम् ।

इत्यादिना च परमेश्वरस्य रूपादिकं निषिध्यते । तद्दोषस्पर्शभयादेव "सत्यं ज्ञानमनन्तं ब्रह्म" इति च तस्यापरिच्छिन्नसत्यज्ञानमात्ररूपत्वमुच्यते । यदि प्रकृतिविकारसंबन्धोऽप्यस्याभ्युपगम्येत । जीववदसावपि सकलविकारदोषास्पदं भवेदिति । नेति सिद्धान्तः । सर्वावस्थासु सर्वान्तर्यामितया स्थितेरपि परमेश्वरस्य न कश्चिद्दोषकलङ्कप्रसङ्गः । कुतः । सर्वत्र श्रुतिषु चास्य निरस्तदोषकलङ्कत्वं निरतिशयमङ्गलाकरत्वं चेत्युभयलिङ्गं हि प्रसिद्धम् । "एष आत्मापहतपाप्मा विजरो विमृत्युर्विशोको विजिघत्सोऽपिपासः सत्यकामः सत्यसंकल्पोऽस्ति कश्चिदपर्यन्तरमणीयगुणाश्रयः सर्वलोकविनिर्माता पशुपाशविलक्षण" इत्यादिषु । अतः पृथिव्यादिष्वन्तर्यामितयावस्थानत्वेऽपि न दोषः[3] ॥ ११ ॥

॥ न भेदादिति चेन्न प्रत्येकमतद्वचनात् ॥ १२ ॥

यथा जीवस्य स्वतोऽपहतपाप्मत्वादिगुणस्यापि देवादिशरीरसंबन्धित्वावस्थाभेदादुक्तदोषवत्त्वं, तथा परमेश्वरस्यापि "यस्य पृथिवी शरीरम्" इति शरीरसंबन्धित्वावस्थाभेदास्तद्दोषात् स्युः । इति चेन्न । प्रत्येकं प्रतिपर्यायमतद्वचनात् । दोषासंबन्धित्ववचनात् । "यस्य पृथिवी शरीरम्," इत्यादिषु "एष त आत्मान्तर्याम्यमृत" इत्यन्तर्यामिणो हि निर्दोषत्वमुच्यते । जीवस्य तु पराभिध्यानात् तत्स्वरूपं तिरोहितमित्युक्तम्[4] ॥ १२ ॥

१–वस्थितस्यापि तद्दोषस्पर्शकलङ्को विद्यते इति पा०

२ विद्यत इति पूर्वः पक्षः प्राप्नोति इति पा० ।

३ प्रसिद्धम् । इत्यन्तमेव पा० ।

४ ईश्वरस्य श्रुतिसिद्धोभयलिङ्गस्य स्वाभाविकत्वेऽपि जीवस्य पराभिध्यानादित्यत्रोक्ततिरोधानावचनादवस्थाभेदानुवृत्त्या न निर्दोषत्वमिति चेन्न । यतः पृथिव्यादिष्वन्तर्यामितया स्थितेऽपि न दोषः । अत एव तस्य प्रत्येकं प्रतिपर्यायम्, "अन्तर्याम्यमृत" इति नित्यमुक्तत्वमभ्यस्यते इत्येव पा० ।

॥ अपि चैवमेके ॥ १३ ॥

अपिच[1], एकस्मिन् शरीरित्वेनावस्थितयोरपि जीवेश्वरयोर्दोषसंबन्धित्वे तद्विपरीतलक्षणो विशेषो यथा प्रसिध्यत्येवमेके[2] स्वशब्देनाधीयते। "द्वा सुपर्णा सयुजा सखाया समानं वृक्षं परिषस्वजाते तयोरन्यः पिप्पलं स्वाद्वत्त्यनश्नन्नन्योऽभिचाकशीति" इति श्रुतेः। अतो न जीववदीश्वरे दोषप्रसङ्गः[3] ॥ १३ ॥

जीवेश्वरयोः शरीरस्थितिसाम्येऽपि शरीरस्थितिवैषम्यमाह ॥

॥ अरूपवदेव हि तत्प्रधानत्वात् ॥ १४ ॥

परमेश्वरो हि देवादिशरीरेषु शरीरितया स्थितावपि रूपरहितवस्तुवदेव वर्तते। कुतः। नामरूपनिर्वोढृत्वप्रतिपादनात्। तथाहि श्रुतिः। "आकाशो ह वै नामरूपयोर्निर्वहिता" "ते यदन्तरा तद्ब्रह्म" इति। नामरूपयोरन्तराले तत्कार्यस्पर्शरहित एव वर्तते। मध्य इति स्वातन्त्र्यमुक्तम्। कर्मफलभोगार्थं हि जीवस्य शरीरे स्थितिः। अत उभयोर्वैषम्यम् ॥ १४ ॥

॥ प्रकाशवच्चावैयर्थ्यात् ॥ १५ ॥

यथा "सत्यं ज्ञानमनन्तं ब्रह्म" इति वाक्यावैयर्थ्यात् स्वप्रकाशरूपतया ज्ञानरूपं ब्रह्म। तथा "निष्कलं निष्क्रियं शान्तम्", "अपहतपाप्मा", "सत्यात्मप्राणारामं मन आनन्दम्" "यः सर्वज्ञः सर्ववित् प्रधानक्षेत्रज्ञपतिर्गुणेशः परास्य शक्तिर्विविधैव श्रूयते" "अथ कस्मादुच्यते महादेवः, यः सर्वान् भावान् परित्यज्यात्मज्ञानयोगैश्वर्ये महति महीयते तस्मादुच्यते महादेव" इत्यादीनां परःशतानां वाक्यानामवैयर्थ्यात्। निरवद्यं कल्याणगुणास्पदं च ब्रह्म, इत्युभयलिङ्गमेव ॥ १५ ॥

॥ आह च तन्मात्रम् ॥ १६ ॥

"सत्यं ज्ञानमनन्तं ब्रह्म" इति श्रुतिरनवच्छिन्नज्ञानरूपतामात्रं ब्रह्मण आह। नान्यं निवारयति। विशेषाभावादविरोधाच्च। यथा स्वर्णरूपं किरीटमित्येतत् स्वरूपतामात्रकथनपरं, न तत्त्वचितरत्नादिनिषेधपरं, तद्वदिति। अत्र हि "सत्यं ज्ञानमनन्तम्" इति स्वत एव महाप्रकाशरूपतया परब्रह्मणः परज्ञानाकारमभिदधती श्रुतिरनन्तरमुच्यमानं ब्रह्मणो विपश्चित्त्वं निवारयितुं कथं क्षमते। विविधं वस्तुजातं पश्यन्ती विमृशन्ती चिद्यस्य स विपश्चित्। अतो न विरोधः ॥ १६ ॥

॥ दर्शयति चाथो अपि स्मर्यते ॥ १७ ॥

हेयगुणराहित्येन कल्याणगुणसाहित्येन चोभयलिङ्गं ब्रह्म दर्शयति सर्वत्र श्रुतिरेव भगवती। "आकाशशरीरं ब्रह्म", सत्यात्मप्राणारामं मन आनन्दं शान्तिसमृद्धममृतम्" "इति प्राचीनयोग्योपास्व" इति। आकाशत इत्याकाशः प्रकाशस्तद्रूपं, सत्यात्म सत्तारूपं[1], प्राणारामं प्राण आत्मन्येवारामो न बहिरस्येति, मनस्येवानन्दोऽस्य[2] न बाह्यकरणेष्विति मन आनन्दं, मन इति ज्ञानमन्तःकरणमुच्यते। येनानपेक्षितबाह्यकरणेना-परीक्षितसकलबाह्यवस्तुविलासेन नित्येन निष्कलङ्केन प्रमाविशेषेण सर्वज्ञं ब्रह्मोच्यते। तेनापरिमितस्वरूपानन्दमनुभवतीति मनआनन्दं, शान्ति[3]समृद्धं, रागद्वेषगुणा[4]नामत्यन्तराहित्यं शान्तिः, तत्समृद्धं, निरवलेपं निर्धूतनिखिलदोषकलङ्कम्, अमृतमनादिमुक्तमिति, सत्यज्ञानरूपं, सर्वज्ञं निरतिशयात्मानन्दशक्तिविलासं निरस्तसमस्तदोषं परं ब्रह्मेत्युभयलिङ्गमिति दर्शयति। तथा, "निष्कलं निष्क्रियं शान्तधर्मावहं पापनुदं भगेशम्। तमीश्वराणां परमं महेश्वरम्", इत्यादिश्रुतिश्चोभयलिङ्गं ब्रह्माह।

अनादिमलसंश्लेषप्रागभावाद्विशेषतः।
अत्यन्तपरिशुद्धात्मा शिव इत्युच्यते विभुः ॥
अनन्तानन्द[5]कल्याणगुणैकनिधिरीश्वरः।
शिव इत्युच्यते सद्भिः शिवतत्त्वार्थवेदिभिः ॥

इति स्मर्यते च शिवशब्दवाच्यं ब्रह्मोभयलिङ्गमिति। परमविशुद्धिमङ्गलगुणवाचकेन शिवशब्देन निरस्तनिखिलदोषकलङ्कं निरतिशयपुरुषार्थवेदिगुणपरिपूर्णं ब्रह्माभिधीयत इति। ब्रह्मणः शिवशब्दवाच्यतया चोभयलिङ्गसिद्धिः ॥ १७ ॥

॥ अत एव चोपमा सूर्यकादिवत् ॥ १८ ॥

यतः पृथिव्यादिषु सर्वत्र स्थितस्यापि परमेश्वरस्य[7] निर्दोषत्वं कल्याणगुणाकरत्वं च। अत एव शास्त्रेषु जलसूर्यादिवदित्यस्योपमा क्रियते[8]।

---

१ विकारसंबन्धे समानेऽपि जीवेश्वरयोः कुतो वा दोषव्यवस्थेत्यत आह इति पा०।

२ एकस्मिन् शरीरेऽवस्थितयोरपि जीवेश्वरयोर्योगविशेषः प्रसिद्धः। एवमेके इति पा०।

३–रस्य दोषस्पर्शः इति पा०।

१ प्रकाशः परमज्ञानाकारतया तत्स्वरूपं चिदम्बररूपं ब्रह्म महाप्रकाशमयमिति, सत्तास्वरूपं सत्यज्ञानाकारं ब्रह्मेति, तत् पुनः कीदृशगुणविशिष्टं इति पा०।

२ बहिर्यस्य तत् प्राणारामं, मन आनन्दं मनस्येवानन्दो यस्य इति पा०।

३ आनन्दम्, "आत्मशक्त्यमृतास्वादप्रमोदरसिको युवा। अनन्तानन्दसंदोहमकरन्दमधुव्रतः" ॥ इति वायवीयसंहितायामीश्वरस्य स्वभावोक्तिः। शान्ति–इति पा०।

४–षादीनामत्यन्तहेयगुणाना–इति पा०।

५ अथवाशेष–इति पा०।

६–कथन ई–इति पा०।

७–दो सर्वत्र जीवरूपेणान्तर्यामितयावस्थितस्यापि परमेश्वरस्य इति पा०।

८–दिभिरस्योपमा। इति पा।

आकाशमेकं हि यथा घटादिषु पृथग्भवेत् ।
तथात्मैको ह्यनेकस्थो जलाधारेष्विवांशुमान् ॥

इति । अत्र वस्तुतः स्थितमाकाशं वस्तुतोऽनवस्थितं च सूर्यमुपमानमुपादत्ते । अनेनाभिप्रायेण । यथैकमेवाकाशं घटादिषु पृथक् पृथगेव वस्तुतः स्थितं, तथैक एव परमेश्वरः पृथिव्यादिषु पृथक् पृथगात्मतया वस्तुत एव तिष्ठतीति परमेश्वरस्यापि बहुषु वस्तुतः स्थितिरुपपद्यते । इत्याकाशोपमानम् । जलाधारेषु वस्तुतोऽनवस्थितस्य सूर्यस्य यथा न तद्विकारादिदोषस्पर्शः । तथा पृथिव्यादिषु वस्तुतः स्थितस्यापि परमेश्वरस्य न तद्विकारादिदोषस्पर्श इति सर्वान्तर्यामिणः परमेश्वरस्य सिद्धमुभयलिङ्गत्वम् ॥ १८ ॥

अत्राशङ्कते[1] ॥

॥ अम्बुवदग्रहणात् तु न तथात्वम् ॥ १६ ॥

अम्बुनि यथा सूर्योऽपरमार्थो गृह्यते, न तथा परमेश्वरः पृथिव्यादौ । किंतु परमार्थतस्तत्र स्थित एव गृह्यते । अतः कथमस्य निर्दोषत्वम् ॥ १९ ॥

इति शङ्कायाः परिहार उच्यते ॥

॥ वृद्धिह्रासभाक्त्वमन्तर्भावादु-
भयसामञ्जस्यादेवं दर्शनाच्च * ॥ २० ॥

नेत्यनुवर्तते[2] । वस्तुतः पृथिव्यादिष्वन्तर्भावादपि परमेश्वरस्य तद्गतवृद्धिह्रासभाक्त्वं न संभवति । पूर्वोक्तोभयदृष्टान्तग्रहणसामञ्जस्यादवगम्यते[3] । उक्तं हि, वस्तुतोऽनवस्थितस्य सूर्यस्य स्थितस्य चाकाशस्योपमानत्वेन ग्रहणं सर्वत्रावस्थितस्यापि परमेश्वरस्यानवस्थितस्येव न तद्दोषस्पर्श इति ज्ञापयितुमिति[4] । तथाहि, दृश्यते विवक्षितधर्मसाम्यज्ञापनमात्रेण[5] चन्द्रवन्मुखमिति दृष्टान्तः । तस्मादुभयलिङ्गसिद्धिरीश्वरस्य सामर्थ्यात् पृथिव्यादिषु स्थितस्यापि । अथवा दर्शनाच्च, अथवा श्रुतावपि दृश्यते विवक्षितधर्मसाम्येन दृष्टान्तः । "अश्व इव रोमाणि विधूय पापम्" इत्यादौ । अतो विवक्षितधर्मसाम्येनोभयदृष्टान्तसामञ्जस्यादुभयलिङ्गमेव ब्रह्मेति सिद्धम् ॥ २० ॥

उभयलिङ्गाभावमाशङ्क्याह ॥

॥ प्रकृतैतावत्त्वं हि प्रतिषे-
धति ततो ब्रवीति च भूयः ॥ २१ ॥

पूर्वत्र ब्रह्मण उभयलिङ्गत्वं साधितम् । तद्बाधोऽस्ति न वेति संदिह्यते । "द्वे वाव ब्रह्मणो रूपे मूर्तं चामूर्तं च" इति पृथिव्यप्तेजोवाय्वाकाशात्मकं मूर्तामूर्तप्रपञ्चरूपत्वं ब्रह्मण उक्त्वा, "अथात आदेशो नेति नेति" इति श्रूयते । अत्रेतिशब्दस्य पूर्वप्रकृतपरामर्शित्वाद् ब्रह्मणः पूर्वप्रतिपादितं मूर्तामूर्तप्रपञ्चरूपत्वं निषिध्यते नेति नेति[1], इति प्राप्ते ब्रूमः । "नेति नेति" इति पूर्वसिद्धं ब्रह्मणः प्रपञ्चरूपत्वं न निषिध्यते । अप्रज्ञातत्वेन विहितस्यास्य प्रतिषेधायोगात् । किंतु, प्रकृतैतावन्मात्रं ब्रह्म न भवतीति प्रकृतेयत्तामेव "नेति नेति" इति प्रतिषेधतीति युक्तम् । यतः पश्चात् पूर्वमनुक्तं भूयो गुणजातं ब्रवीति । "न ह्येतस्मादिति, नेत्यन्यत् परमस्ति, अथ नामधेयं सत्यस्य सत्यमिति, प्राणा वै सत्यं, तेषामेष सत्यम्," इत्यादिना । अत्र[2] "न ह्येतस्मात्," इति वाक्येन "नेति नेति" इति निर्दिष्टाद् ब्रह्मणोऽन्यत्रास्त्युत्कृष्टमित्युच्यते[3], अथ नामधेयमुच्यते सत्यस्य सत्यम्" इति । तदर्थनिर्वचनं[4] तु प्राणा वै सत्यं तेषामेष सत्यमिति । प्राणा जीवात्मानः सत्यं वियदादिवदुत्पत्त्यभावात् । तेभ्यः सत्येभ्यो ह्येष सत्यम् । तद्वज्ज्ञाने[5] संकोचाद्यभावात् । अतः प्रकृतधर्मेयत्ताप्रतिषेधपरत्वात्, "नेति नेति' इति वाक्यस्य ब्रह्मणः पूर्वसिद्धमुभयलिङ्गत्वं न हीयत एव[6] ॥ २१ ॥

ननु सन् घटः सन् पट इत्यादिष्वनुवृत्तं सद्रूपं तद् ब्रह्म सत्यम् । अन्यद् व्यावर्तमानं घटादिकं "नेति नेति" इति प्रतिषेधति श्रुतिरित्याह ॥

॥ तदव्यक्तमाह हि ॥ २२ ॥

ब्रह्मस्वरूपं प्रत्यक्षादिना प्रमाणान्तरेण नाभिव्यज्यते । "न सदृशे तिष्ठति रूपमस्य न चक्षुषा पश्यति कश्चनैनं हृदा" इत्यादिना यतः श्रुतिराह । अतः प्रत्यक्षादिना सिद्धा सत्ता न[7] ब्रह्मेति ॥ २२ ॥

ब्रह्मस्वरूपग्रहणे हेतुमाह ॥

---

१ आशङ्क्य परिहरति इति पा० ।

* शंकरमते वृद्धिह्रासभाक्त्वमन्तर्भावादुभयसामञ्जस्यादेवम्, इत्येकं दर्शनाच्च इत्यपरमिति सूत्रद्वयम् ।

२ नेति वर्तते इति पा० ।

३–भयसा–इति पा० ।

४–मेव इति पा० ।

५–नाय इति पा० ।

१–तेऽनेन, इति पा० ।

२ अतः प्रकृतधर्मेयत्ताप्रतिषेधपरत्वान्नेति नेतीति वाक्यस्य ब्रह्मणः सिद्धमुभयलिङ्गत्वं न हीयत एव । अत्र इति पा० ।

३–न्यत्रह्युत्कृष्टमस्ति इति पा० ।

४–यं सत्यस्य सत्यमिति, अर्थनिर्वचनं इति पा० ।

५–त्यमिति ज्ञाने इति पा० ।

६–प्रतिषेध एव इत्येव पा० ।

७ सिद्धघटादिष्वनुवृत्तं न सत्ता इति पा० ।

॥ अपि संराधने प्रत्यक्षानुमानाभ्याम् ॥ २३ ॥

अपितु ध्यानरूपे ज्ञानेन सम्यगाराधने ब्रह्मस्वरूपं गृह्यते। ये ब्रह्मभाविता ब्रह्मोपासते, तेषां ब्रह्मस्वरूपं ग्रहणयोग्यं भवतीति श्रुतिस्मृतिभ्यामवगम्यते। "नायमात्मा प्रवचनेन लभ्यो न मेधया न बहुना श्रुतेन, यमेवैष वृणुते, तेन लभ्यस्तस्यैष आत्मा वृणुते तनूं स्वाम्" इति। "ततस्तु तं पश्यति निष्कलं ध्यायमान"इत्यादिका श्रुतिः। स्मृतिरपि।

"नासौ प्रत्यक्षविषयः",

इत्यादिका ॥ २३ ॥

॥ प्रकाशादिवच्चावैशेष्यं प्रकाशश्च कर्मण्यभ्यासात् ॥ २४ ॥

अविच्छिन्नानुध्यानसंराधनेन येषां ब्रह्म प्रकाशते, तेषां तेन ब्रह्मदर्शनेन विषयीकरणे तज्ज्ञानानन्दादेर्जगदैश्वर्यस्य च वैशेष्यं नास्ति। तथाहि दृश्यते। "अहं मनुरभवं सूर्यश्च, तं मामायुरमृतमुपास्व" इत्यादिषु ब्रह्मोपासकानां तेन भावेनैक्येन[1] तदसाधारणगुणप्राप्तिः।

"दिव्यं ददामि ते चक्षुः पश्य मे योगमैश्वरम्"।

इत्यादिषु हि कृष्णादीनां तदैक्यभावनया तदैश्वर्यप्रकाशनं दृश्यते। ब्रह्मभावनाभ्यासेन च विश्वामित्रागस्त्यादीनां स्वर्गान्तरकरणजलधिकवलनादिसामर्थ्यम्। लोके च मन्त्रिणां गरुडभावनया गरुडासा[2]धारणधर्मप्राप्तिः। तस्माद् ब्रह्माहंतायाः प्रौढभावे सति ब्रह्मासाधारणधर्मांशवैशिष्ट्यमुपासकानामनवद्यम्। अतो घटादिष्वनुवृत्तं सन्मात्रं प्रत्यक्षं ब्रह्मेति न विरुद्धमेव। तस्मात् साक्षात्कारहेतूनां निदिध्यासनादीनां वैयर्थ्यप्रसङ्गात्, अप्रत्यक्षेऽपि तादृशि तल्लिङ्गादर्शनाच्च। अतः सन्मात्रं प्रत्यक्षं ब्रह्म तदन्यत् सर्वं निषेधति नेति नेतीति युक्तमेवं[3] ॥ २४ ॥

॥ अतोऽनन्तेन तथाहि लिङ्गम् ॥ २५ ॥

यतो ब्रह्मोपासकानामपि तदसाधारणज्ञानानन्दपरमैश्वर्यादिकं प्रकाशते। अतो "द्वे वाव[4] ब्रह्मणो रूपे" इत्यादिनाभिहितेनानन्तेन कल्याणगुणेन योगो ब्रह्मणः सिद्ध एव। तस्मादुभयलिङ्गं ब्रह्मेति ॥ २५ ॥

ननु "द्वे वाव ब्रह्मणो रूपे" इत्यादिनोक्तं प्रपञ्चस्य ब्रह्मरूपत्वं ब्रह्मप्रपञ्चयोराध्यासिकसंबन्धेनैव निर्वाह्यम्।

१ भावनयैक्येन इति वरपा०।

२—णामङ्गारादिभावनयाङ्गाराद्यसा—इति पा०।

३—भावे ब्रह्मासाधारणधर्माणां वैशेष्यमुपासकानामिति सिद्धम् इत्येव पा०।

४ एव इति पा०।

विधान्तरेण तन्निर्वाहासंभवात्। ततश्च, "अथात आदेशो नेति नेति" अस्याध्यस्तप्रपञ्चपरत्वमेव युक्तम्। इत्याशङ्क्य विनाप्यध्याससंबन्धं स्वाभिमतेन प्रकारेण तन्निर्वाहं वक्ष्यन् प्रथमं पक्षान्तरमाह[1] ॥

॥ उभयव्यपदेशात् त्वहिकुण्डलवत् ॥ २६ ॥

"सर्वो वै रुद्रो" "द्यावापृथिवी जनयन् देव एकः" इत्येकत्वबहुत्वव्यपदेशादहेः कुण्डलभावर्जुभाववत् परमेश्वरस्यैव "द्वे वाव ब्रह्मणो रूपे" इत्यादिनोक्तः पृथिव्यादिभावसंस्थानविशेषः[2] ॥ २६ ॥

॥ प्रकाशाश्रयवद्वा तेजस्त्वात् ॥ २७ ॥

प्रकाशतदाश्रययोर्यथा स्वरूपभेदेऽपि तेजस्त्वयोगेनैक्यम्। एवमचिद्ब्रह्मणोरेकजातियोगेनेति वा तस्य पृथिव्यादिभावः[3] ॥ २७ ॥

॥ पूर्ववद्वा ॥ २८ ॥

वाशब्दः पक्षद्वयव्यावृत्त्यर्थः[4]। यथा पूर्वत्र प्रकाशजातिगुणशरीरवद्विशेषणैकस्वभावतया विशिष्टैकदेशत्वेनांशत्वमुक्तं चिद्वस्तुनः। एवमचिद्वस्तुनोऽपि, "सर्वो वै रुद्र" इति चिदचिद्वस्तुनोरेकेन शब्देनाभिधानं हि शक्यम्। एकरूपभूतयोः पूर्वोक्तसंबन्धे सत्येव। इतरपक्षद्वये ब्रह्मणः सदोषत्वं दुर्वारम्[5]। "यस्य पृथिवी शरीरं यस्यात्मा शरीरम्" इत्यादिश्रुतिः।

"विद्येति चेतनां प्राहुस्तथाविद्यामचेतनाम्।

विद्याविद्यात्मकं सर्वं विश्वं विश्वगुरोर्विभोः॥

रूपमेव न संदेहो विश्वं तस्य वशे यतः।

इत्यादिपुराणवचनप्रामाण्याच्च, चिदचिद्वस्तुनोरष्टमूर्तेर्ब्रह्मणः शरीरता[6] च सिद्धा ॥ २८ ॥

॥ प्रतिषेधाच्च ॥ २९ ॥

"नास्य जरयैतज्जीर्यति", "अस्थूलमनण्वह्रस्वम्," इत्यादिषु चिदचिदात्मत्वेऽपि[7] ब्रह्मणस्तद्धर्मप्रतिषेधाच्च चिदचिद्विशिष्टमपि ब्रह्म निर्दोषं निखिलमङ्गलगुणास्पदं च। एतदुक्तं भवति। चिदचितोः कारणत्वेऽपि तद्विशिष्टत्वेऽपि ब्रह्मणः शिवस्य विकारज्ञत्वाद्यपुरुषार्थधर्मरहितत्वं सर्वज्ञत्वनित्यतृप्तत्वाना-

१ पक्षान्तरमाह इत्येव पा०।

२—शात् परमेश्वरस्याहिकुण्डलादिवत् स्वरूपस्य "द्वे वाव ब्रह्मणो रूपे" इत्यादिनोक्तः पृथिव्यादिभावः इति पा०।

३—तीययोगेनेति इत्येव पा०।

४—त्तये इति पा०।

५—नमेकस्वरूपमिति पूर्वोक्तमेव। इतरपक्षनये ब्रह्मणः सदोषत्वं दुर्वारं भवति इति पा०।

६—रतत्स्वभावता इति पा०।

७—चिदचितोरात्मत्वेऽपि इति पा०।

दिबोधत्वं स्वतन्त्रत्वालुप्तशक्तित्वानन्तशक्तित्वादिपरमपुरुषार्थधर्मवत्त्वं च नित्यसिद्धमेवेति ॥ २९ ॥

तदिह सकलचिदचिदाकारपरमशक्तिविलासरसात्मनः सर्वदोषवासनाकलङ्करहितात् सर्वज्ञतादिसकलमङ्गलगुणरत्नाकरात् परब्रह्मणो विरूपाक्षाच्छिवादेतस्मात् परं किंचिदपि वस्त्वन्तरं नास्तीति वक्तुं प्रथममाशङ्कते ॥

॥ परमतः सेतून्मानसंबन्धभेदव्यपदेशेभ्यः ॥ ३० ॥

'जन्माद्यस्य यत' इत्यादिना, "प्रतिषेधाच्च" इत्यन्तेन, यः परमकारणतया प्रतिपादितः परमेश्वरः । इतः परमपि वस्त्वस्ति न वेति संशयेऽस्तीति पूर्वः पक्षः[1] । तथाहि, "अथ य आत्मा स सेतुर्विधृतिरेतं सेतुं तीर्त्वा, अन्धः सन्ननन्धो भवति" इति, "चतुष्पाद्ब्रह्म", "अमृतस्यैष सेतुः" इत्यादिभिरस्य परब्रह्मणः सेतुत्वतरितव्यत्वपरिमितत्वप्रापकत्वादीनि व्यपदिश्यन्ते । अतोऽस्मादपि परं किंचिद्वस्त्वस्तीति ॥ ३० ॥

उच्यते नैतदिति ॥

॥ सामान्यात् तु ॥ ३१ ॥

तुशब्दः पूर्वपक्षनिवर्तकः । अतस्तस्मात् सर्वोत्तराच्छिवात् परमस्तीति वादो न युक्तः । "अधिकं तु भेदनिर्देशात्", "विश्वाधिको रुद्रो महर्षिः", इत्यादिश्रुतिभिस्तस्य विश्वाधिकत्वसिद्धेः । अत्र च सेतुत्वादिव्यपदेशस्तत्साम्यादेव सर्वलोकासंकरकरत्वेन, "अथ य आत्मा स सेतुर्विधृतिरेषां लोकानामसंभेदाय" इति श्रूयते । "सर्वं खल्विदं ब्रह्म" इति[2] प्रतिपादितजगन्निमित्तोपादानभावस्य ब्रह्मण एव "इतः प्रेत्याभिसंभवितास्मि", इति प्राप्यत्वमवगम्यते । अन्यत्र च,

"त्रिलोचनं नीलकण्ठं प्रशान्तम्" ।
ध्यात्वा मुनिर्गच्छति भूतयोनिं
समस्तसाक्षिं तमसः परस्तात् ॥

इति तमःपरस्य सकलकारणस्य सर्वज्ञस्य त्रिलोचनत्वादिलक्षणस्य ब्रह्मण एव सर्वोत्तरतः प्राप्यत्वमुच्यते । तस्मादत्र तरतिः परप्राप्तिवचनः । अन्यथा परमप्राप्याद्विश्वाधिकात् परमकारणादुपरि वस्तुसद्भावे त्वेतदुपर्यपि वस्तुसद्भावप्रसङ्गेनानवस्था वेदान्तवाक्यानां भवेत् । अतः सर्वातीतः[3] परमशिव इति सर्वोत्कृष्टत्वं ब्रह्मण एव ॥ ३१ ॥

यदुक्तं परिमितत्वमिति तत्राह ॥

॥ बुद्ध्यर्थः पादवत् ॥ ३२ ॥

चतुष्पादित्युन्मानव्यपदेशो वाक्पादश्चक्षुष्पाद इतिवदुपासनार्थः ॥ ३२ ॥

॥ स्थानविशेषात् प्रकाशादिवत् ॥ ३३ ॥

अपरिमित एव यद्यपि परमेश्वरः । तथाप्यस्य स्थानविशेषादवच्छिद्यानुसंधानं युज्यते[1] । यथा वातायनादिस्थानसंबन्धात् प्रकाशादेः । तथेति न विरोधः ॥ ३३ ॥

प्राप्यस्यापि प्रापकत्वं चास्तीत्याह ॥

॥ उपपत्तेश्च ॥ ३४ ॥

प्राप्यस्यैव परमेश्वरस्य प्रापकत्वं चोपपद्यते । यथाह, "यमेवैष वृणुते तेन लभ्य" इति । अतः परमेश्वरान्नास्ति परमिति सिद्धम् ॥ ३४ ॥

॥ तथान्यप्रतिषेधात् ॥ ३५ ॥

सर्वत्र विरूपाक्षात् परब्रह्मणः शिवान्नास्ति परमिति निरूपितम् । पुनरिह तत्सदृशोऽस्ति न वेति संशये पूर्वः पक्षः[2] । परमेश्वरादुत्कृष्टवस्त्वभावेऽपि जगत्कारणत्वेनेश्वरत्वादिना तत्सदृशोऽस्त्येव । तथा हि श्रूयते । "सहशीर्षा पुरुषः सहस्राक्षः सहस्रपात्", इत्यत्र कश्चित् पुरुषः, तस्य हि सहस्रशीर्षा पुरुष इत्यादिना बहुमुखपादादित्वं, "पादोऽस्य विश्वा भूतानि" इति जगदंशविशिष्टत्वं, "त्रिपादस्यामृतं दिवि" इति परमाकाशवर्तित्वं, "तस्माद्विराडजायत विराजो अधिपूरुष" इत्यव्यक्तहिरण्यगर्भोपादानत्वम्, "आदित्यवर्णं तमसस्तु पारे"इति तमःपरत्वं, "तमेवं विद्वानमृत इह भवति" इति मोक्षहेतुत्वं, चावगम्यते । तस्य पुनः "सहस्रशीर्षं देवम्" इत्यारभ्य "पतिं विश्वस्य" इति विश्वपतित्वं, "नारायणपरं ब्रह्म" इति नारायणशब्दवाच्यत्वं परब्रह्मत्वं, "परमात्मा व्यवस्थित" इति दहराकाशोपास्यत्वं, चावगम्यते । अतो नारायणोऽसौ परमेश्वरसमानधर्मा । एत एव हि परमेश्वरस्य धर्माः ।

"सर्वाननशिरोग्रीवः सर्वभूतगुहाशयः ।
सर्वव्यापी च भगवांस्तस्मात् सर्वगतः शिवः" ॥

इति । मन्त्रोपनिषदि, "विश्वतश्चक्षुरुत विश्वतोमुख' इति महोपनिषदि,शिवसङ्कल्पे च, "सर्वतोमुख" इति, अथर्वशिरसि, बहुमुखपादादिमत्त्वं परमेश्वरस्य श्रूयते ।

मायां तु प्रकृतिं विद्यान्मायिनं तु महेश्वरम् ।
तस्यावयवभूतेन व्याप्तं सर्वमिदं जगत् ॥

१–यः । विद्यतेऽस्मादपि परमिति पूर्वः पक्षः प्रवर्तते । इति पा० ।
२ इत्यारभ्य इति पा० ।
३–तस्तत्त्वातीतः इति पा० ।

१ विद्यत एव इति पा० ।
२–ग्रयः । तथा सत्यस्मात् इति पा० ।

इति जगदंशविशिष्टत्वं,

"हिरण्यगर्भं पश्यत,"

इत्यादिषु हिरण्यगर्भकारणत्वं,

"समस्तसाक्षिं तमसः परस्तात्,"

इत्यादिषु तमःपरत्वं "दहरं विपाप्मम्," इत्यादिषु दहरोपास्यत्वं,

"ज्ञात्वा शिवं शान्तिमत्यन्तमेति,"

इत्यादिषु मोक्षहेतुत्वं, "सर्वैश्वर्यसंपन्न", इत्यादिषु जगदीश्वरत्वं चावगम्यते। एवं विश्वरूपत्वादिधर्मसाम्यमनयोर्नारायणपरमेश्वरयोः स्मृत्यादिषु पूजाविधाने।

"शिवं वा विष्णुमेव वा,"

इति समानतया विकल्पः श्रूयते। समानमेव च तयोर्लोके पूजास्थानादिकं तत्प्रतिपादकपुराणागमादिकं च। तस्मात्[1] परमेश्वरसदृशः पुरुषो नारायण इति प्राप्ते ब्रूमः। परमेश्वरादुत्कृष्टं नास्ति यथा, तथा सदृगपि[2] नास्त्येव। जगत्कारणत्वेश्वरत्वादौ तदन्यप्रतिषेधात्। तथाहि,

"एक एव रुद्रो न द्वितीयाय तस्थुर्य इमांल्लोकानीशत ईशनीभिः। जननीभिः परमशक्तिभिः,"
"द्यावाभूमी जनयन् देव एकः", "य एको रुद्र उच्यते,"
"हरः क्षरात्मानावीशते देव एकः",

यदा चर्मवदाकाशं वेष्टयिष्यन्ति मानवाः।
तदा शिवमविज्ञाय दुःखस्यान्तो भविष्यति॥

"शिव एको ध्येयः शिवंकरः सर्वमन्यत् परित्यज्य",
"यदा तमस्तन्न दिवा न रात्रिर्न सन्न चासंश्छिव एव केवलः"।

इत्यादिभिः परमेश्वरादन्यस्य जगत्कारणत्वादौ निषेधः क्रियते। अतः परमेश्वरेण सदृशः कश्चिन्नास्ति। परमशक्तिमत्त्वान्निमित्तभूतः परमेश्वर एव पुरुष उपादानमिति। "पुरुषो वै रुद्रः", "पुरुषस्य सहस्राक्षस्य महादेवस्य धीमहि" इति श्रवणात् पुरुषस्य हिरण्यगर्भकारणत्वम्। उपादानत्वात्। ईश्वरस्य निमित्तत्वादुच्यते। उभयोरपि जगत्कारणत्वमत एव प्रतीयते। "तस्माद्विराट्" इति हि पुरुषस्योपादानत्वं "हिरण्यगर्भं पश्यत जायमानं", "द्यावाभूमी जनयन् देव एक" इति परमेश्वरस्य निमित्तत्वं च प्रतिपाद्यते। सर्वज्ञात् सर्वशक्तिमतः परब्रह्मणः शिवाद्विश्वाधिकात् प्रथमं परप्रकृतिभूता परा शक्तिः प्रादुर्भवति। सा प्रथमभोक्तृत्वदशायां पुरुष उच्यते। यः सहस्रशीर्षा पुरुष इति श्रूयते। तदात्मन एव शिवात् सकल-

१–तस्माज्जगत्कारणत्वादिना इति पा०।

२ तत्सदृशोऽपि इति पा०।

चेतनाचेतनप्रपञ्चपरिणामः। अत एव "सर्वो वै रुद्र" इति परमेश्वरस्य सर्वात्मनाभिधानमुपक्रम्य पुरुषस्य नारायणस्य सर्वात्मत्वमुपादानत्वात्[1]। कथमस्य सर्वात्मत्वमित्याशङ्कायां "पुरुषो वै रुद्र" इति, "पुरुषस्य महादेवस्य धीमहि" इति, पुरुषस्य विद्महे," "सहस्राक्षस्य महादेवस्य धीमहि" इति च पुरुषोऽपि[2] परमेश्वरस्य महाविभूत्यात्मा जगदाकार इति निरूपितम्। सर्वज्ञं सर्वशक्तिकं नित्यतृप्तं स्वतन्त्रं विश्वाधिकं निमित्तभूतमेव परं ब्रह्म सर्गसमये बहु स्यामिति संकल्प्य स्वात्मनामुं पुरुषं विभजति। स्वविभक्तस्वांशभूतेनै[3] सकलं जगद्भवतीति, "तत् सृष्ट्वा तदेवानुप्राविशत्," "तदनु प्रविश्य सच्च त्यच्चाभवत्" इत्यादिना,

"मायां तु प्रकृतिं विद्यान्मायिनं तु महेश्वरम्।
तस्यावयवभूतेन व्याप्तं सर्वमिदं जगत्॥

इत्यादिना च श्रुतिवाक्येनावगम्यते। निमित्तसंकल्पमूलत्वादुपादानभावस्य निमित्तस्योपादानस्य निमित्तसंक्रमाविभागान्निमित्त[4]धर्माणामुपादाने श्रवणम्। अतः परमेश्वरेण सदृशमुत्कृष्टं वा वस्तु नास्त्येव॥ ३५॥

अतोऽपि परमेश्वरेण सदृशं तदुत्कृष्टं च किंचिदपि वस्तु नास्तीत्याह॥

॥ अनेन सर्वगतत्वमायामशब्दादिभ्यः॥ ३६॥

आयामो महाव्याप्तिः "सर्वाननशिरोग्रीव" इत्यादिभिर्मन्त्रोपनिषद्वाक्यैः, "विश्वतश्चक्षुरुत विश्वतोमुख" इत्यादिभिः, "अणोरणीयान्" इत्यारभ्य "सर्वो ह्येष रुद्र" इत्येतत्पर्यन्तैर्महोपनिषद्वाक्यैः, "यो वै रुद्रः स भगवान्" इत्यारभ्य "यश्च स वै नित्यम्," इत्यन्तैराथर्ववाक्यैश्च, सकलजगद्व्याप्तिप्रतिपादनपरैरनेन स्वधर्मांशभूतेनोपादानपुरुषेण[5] सर्वगतत्वमवगम्यते निमित्तस्य परब्रह्मणः। तस्मात् परमेश्वरस्य विभूतिमयं विश्वमिति तत्सदृशस्तदुत्कृष्टश्च नास्त्येव॥ ३६॥

एवं सर्वेश्वरतया सर्वात्मकतया स[6] एव परमेश्वरः सर्वकर्मणां तत्तद्देवतारूपेण स्वरूपेण च फलदाता भवतीति निरूपयितुमाह॥

॥ फलमत उपपत्तेः॥ ३७॥

इह पूर्वत्र सर्वेश्वरतया प्रतिपादितस्य परब्रह्मण एव स-

१–मः। "सर्वो वै रुद्र" इति परमेश्वरस्य सर्वात्मत्वाभिधानात्। पुरुषस्य नारायणस्य सर्वात्मत्वादुपादानत्वात्। इति पा०।

२ रुद्र इति। पुरुषोऽपि इति पा०।

३–ति। प्रविश्य तमनेन स्वांशभूतेन इति पा०।

४–दुपादानस्य निमित्तस्योपादानादाधिक्यम्। उपादानस्य निमित्तत्वस्वरूपत्वाविभागेन निमित्त–इति वरपा०।

५–रचेतनतत्तद्धर्मोपादानपुरुषेण इति पा०।

६–रः सर्वात्मकः स इति पा०।

वानुष्ठातॄणामनुष्ठानफलदातृत्वमुतान्यस्येति संशयः । अनुक्षणविनाशिनोऽपि कर्मणोऽपूर्वव्यवधानेन कालान्तरभाविफलदाने सामर्थ्यमस्त्येव । ततः कर्मणः फलदातृत्वे सिद्धे तदतिरिक्ताप्रसिद्धपरमेश्वरकल्पने गौरवप्रसङ्गात् तस्य न फलदातृत्वमिति पूर्वः पक्षः । सिद्धान्तस्तु परमेश्वरादेवाराधितात् सर्वेषां कर्मफलसिद्धिः । उपपत्तेः । सेवितराजादिवदुपासकानां फलसिद्ध्युपपत्तेः । अचेतनस्य* कर्मणोऽपूर्वस्य वा । तारतम्येन प्रतिनियतं फलं ज्ञातुं सामर्थ्यं नास्ति । सेवाक्रियाया[1]मचेतनायां तथा दर्शनात् । इह शास्त्रसिद्धस्य परमेश्वरस्याकल्प्यत्वान्न कल्पनागौरवम्[2] । तथाहि, "एष ह्येव साधु कर्म कारयति तं यमेभ्यो लोकेभ्य उन्निनीषति, एष एवासाधु कर्म कारयति तमधो निनीषति" इति श्रुतिरीश्वरस्यैव धर्माधर्मफलदातृत्वं तत्कारयितृत्वं च वदति । प्रत्युत,अपूर्वस्यैवाश्रुतस्य कल्पने गौरवम् । तस्मात् कर्मभिराराधितः परमेश्वरः फलदाता न कर्मेति निर्णयः ॥ ३७ ॥

॥ श्रुतत्वाच्च ॥ ३८ ॥

श्रूयते हि सर्वकर्मणामधिपतिः परमेश्वरः। तदाराध्यत्वात्। तत्फलदातृत्वाच्च । "गाथपतिं मेधपतिं रुद्रं, अावो राजानमध्वरस्य रुद्रम्" इत्यादिषु । एतन्मूला[3] स्मृतिरपि परमेश्वरस्य सर्वयज्ञाधिपत्यं वदति ।

"सोमेनाराधयेद् देवं सोमं सोमविभूषणम्" ।

इति[4] ।

"नाश्वमेधात् परो यज्ञो रुद्रस्याराधनं प्रति" ।

इति च रामायणम् । चमकेषु "वाजश्च मे प्रसवश्च मे धाता च मे विष्णुश्च मे" इत्यादिषु च वाजादीनां वस्तूनां विष्णवादीनां देवतानां देयत्वप्रतीतेः परिशेषादीश्वरस्य सर्वकर्मफलदातृत्वसिद्धिः । अतः परमेश्वर एव सर्वयज्ञाराध्यः सर्वफलदाता ॥ ३८ ॥

पक्षान्तरमाह ॥

॥ धर्मं जैमिनिरत एव ॥ ३९ ॥

धर्ममेवोपपत्तेः श्रुतत्वाच्च फलदायिनं जैमिनिर्मेने । उपपत्तिः कृष्यादेर्मर्दनादेश्च कर्मणः साक्षात् परंपरया वा फलसिद्धिनिदर्शनम्[5] । श्रुतं च कामिनः कर्तव्यतया कर्मविधानान्यथानुपपत्त्या कर्मैवापूर्वरूपेण तत्तत्फलसाधनमिति ॥ ३९ ॥

* न ह्यचेतनस्य इति पाठे, चरमे सामर्थ्यमस्तीति पाठो बोध्यः।

१–स्ति । स्वोपासनक्रिया–इति पा० ।

२–वदोषप्रसङ्गः इति पा० ।

३–पु । अत एव हि निरूपितमीश्वरेण । "यद्यज्ञवास्तौ हीयते मम वै तत्" इति । तदेतत्प्रत्यक्षश्रुतिमूला इति वरपा० ।

४ इत्यादि पुराणम् । इति पा० ।

५ उपपादितस्तु कृष्यादेः कर्मणः साक्षात् परंपरया वा फलसिद्धिदर्शनात् इति पा० ।

॥ पूर्वं तु बादरायणो हेतुव्यपदेशात् ॥ ४० ॥

पूर्वोक्तं परमेश्वरस्यैव कर्मफलदातृत्वं भगवान् बादरायणो मन्यते । "वायव्यं श्वेतमालभेत भूतिकामः, स एवैनं भूतिं गमयति" इत्यादिषु परमेश्वरात्मकतया वाय्वादीनां कर्मविधिष्वेव फलहेतुत्वव्यपदेशात् । तदभावे हि क्षणिकस्य कर्मणः फलसाधनत्वनिर्वाहार्थमपूर्वत्वं कल्प्येत । वाक्यशेषोपपादितविध्यपेक्षितफलसाधनत्वप्रकारसद्भावे तु स एव स्वीकर्तव्यः । यथा वाक्यशेषस्थं विध्यपेक्षितं "प्रतितिष्ठन्ति, ह वा एता रात्रीरुपयन्ति" इत्यादिषु फलं स्वीक्रियते । "यो वै रुद्रः स भगवान्," इत्यादिना वाय्वादिसर्वदेवतारूपत्वमीश्वरस्यावगम्यते । अथर्वशिरसि "तत्रैव परमेश्वरेण यो मां वेद स सर्वान् देवान् वेद" इति स्वज्ञानात् स्वात्मकसकलदेवताज्ञानमुपपादितम् । अतः सकलदेवतारूपः सर्वकर्माराध्यः सर्वफलदाता परमेश्वरः परं ब्रह्म शिवः साक्षादुमापतिरिति सिद्धम् ॥ ४० ॥

इति श्रीकण्ठशिवाचार्यविरचिते ब्रह्ममीमांसाभाष्ये तृतीयस्याध्यायस्य द्वितीयः पादः ॥ २ ॥ :: :: ॥

॥ श्रीमन्महानुभावमहादेवस्वामिजीवितवृत्तान्तः ॥

अभूदभूतपूर्वः कोऽपि सर्वराजन्यमान्यमानपादाङ्गुलिर्निजगौरवोपार्जितसमस्तक्षितिकुलक्षतप्रणामाञ्जलिः सकलशास्त्रपारदृश्वा सदेहोऽपि विरागप्रचुरप्रकृतितया विदेहो वयसा वृद्धोऽपि तपश्चर्यातरुणः कृपालुतासाञ्जनोऽपि पूर्वाश्रमे रामनिरञ्जनसंज्ञां भजमानो नैकदेशवर्तिपूज्यपादद्विवेददेवदत्तश्रीधरप्रभृतिप्रसिद्धविदुषामनेकेषां राज्ञां च मन्त्रोपदेष्टा विपद्द्वेष्टा परमार्थपथगामी महादेवाश्रमस्वामी ॥

एष किल 'आजमगढ़' इति प्रसिद्धमण्डलान्तर्गतस्य 'नगरासिकंदरपुर' इत्याख्यप्रदेशस्यान्तः 'तुरकी' इतिनामग्रामे घृतकौशिकगोत्रभाजो यजुर्वेदिनो हरिनारायणदत्तमिश्रात् त्र्यग्निवसुचन्द्रमिते १८३३ वत्सरे समजनि । 'कंधिया' इतिनामग्रामे च महादेवमिश्रगृहे मन्त्रोपदेशं प्राप । नववर्षवयसोऽस्य पण्डितपुरे रामप्रसादस्य सुतयोपयमनं बभूव । ततः स्वर्गतायां तस्यां 'महुवारी' इत्यभिधाने ग्रामे अजायवशर्मत्रिपाठितनूजयोद्वाहोऽभवत् । अतस्त्वैका कन्योत्पद्य वर्षत्रयवयस्कैव दिवं जगाम॥

षोडशवर्षवयःसमये स्वपितामहरामधनमिश्रादधीत्य पाण्डित्यमवाप्य पुनः काश्यामागत्य बालंभट्टसविधे प्राणनाथाचार्यपार्श्वे सविशेषपरिष्कारं व्याकरणमधीत्याहोबलशास्त्रिसंनिधौ मीमांसां वेदान्तं सांख्ययोगादीन्यधिजगे । एतस्मै रामधनमिश्राय महाराजः 'फतेसाह' इतिनामा वारामुकुन्दनामानं रामचन्द्रपुरनामकं च ग्रामं दत्तवान् ॥

तदित्थं सर्वशास्त्रदक्षतामासाद्य छेकूमिश्रनामकं प्राचीनं महामहोपाध्यायं वादीन्द्रं निर्जित्य परमं गौरवमवाप ॥

अस्य बुद्धिविद्याप्रशंशामहोबलशास्त्रिभवदेवमिश्रदामोदरशास्त्रिकाशीनाथशास्त्रिप्रभृतयो दिगन्तविख्यातकीर्तयोऽप्यधिकं चक्रुः । अथ मिथिलां जिगमिषुः स्वजनन्याज्ञामनुरुन्धता 'हथुवा' इति प्रसिद्धराजधानीशेन छत्रधारिमहाराजेन 'भगवन् मामशरणमपहाय क्व यास्यसि, इहैव मामभिरक्षन् यथेप्सितशिष्यनिकराध्यापनं विधीयतां, सर्वेभ्यश्छात्रेभ्यो वेतनमहं वितरिष्यामीति' पुनः पुनः सादरमुपरुध्यमानो द्वादशवर्षपर्यन्तमुमादत्तत्रिपाठिसीतारामद्विवेदप्रमुखान् शतशः पण्डितविद्यार्थिनोऽध्यापयामास ॥

यदा 'बाबू अलरखसिंह' इतिनामा स्वपुत्रपरिणयनाय 'हथुवा' राजधानीमगमत्, तदा तेन सह गतैः सदाशिवभट्टप्रभृतिविद्वद्भिरहमहमिकया शास्त्रार्थं विधातुं कामयमानैः सार्धमायातं स्वगुरुं प्राणनाथमाचार्यं प्रणन्तुमागतस्तथा घण्टाचतुष्टयं ब्राह्मणप्रशंशां देवगिरा विचित्रयोपपादितवान्, यथा तत्पाण्डित्यगौरवमालक्ष्य सर्वे एव तुतुषुः किमपि च नोचुः । 'मझौली' इति विदितराजधानीपतिना महाराजेनाजितमल्लसिंहेनास्मै 'सिसवा' 'कर्णपट्टी' इत्यभिधानौ ग्रामौ प्रदत्तावास्ताम् ॥

सोऽयं महाशयो महामहिमा पितरि दिवं गते वैराग्यमयचेताः पूर्वं गयायां पितृश्राद्धं विधाय तीर्थराजमागत्याशरीरस्थिति काषायवासा वाराणस्यामेव निवसानीति प्रार्थ्य सार्धद्विचत्वारिंशत्तमे वयसि शरशैलवसुशशिमिते १८७५ वैक्रमे हायने महामहिमश्रीपूर्णानन्दस्वामिनः सकाशात् तुरीयाश्रमदीक्षामभ्युपगम्याद्यावधि काशीमिमामलंचकार ॥

अथास्मिन् क्षेत्रे क्षणभङ्गुरमात्मविग्रहमञ्जसोत्सृज्य ग्रहद्विनवेन्दुमिते १९२९ वैक्रमेऽब्दे मार्गशीर्षे दर्शतिथौ शनौ पञ्चनवतिवर्षमिते वयसि शाश्वतं पदं प्रविवेश ॥

महादेवाश्रमस्वामी दिनस्वामीव पूजितः ।
काश्यां प्रकाश्य सुखदैः स्वैस्तपोभिस्तिरोहितः ॥१॥

महामनसि काष्ठजिह्वस्वामिनि स्वगुरौ शरीरं जहति महाराजेन काशीनृपेण श्रीमदीश्वरीप्रसादनारायणसिंहदेवेनाकुलीभूयानुयुक्ते सति महादेवस्वामिनं सर्वसिद्धान्तवेत्तारं मदन्त मामेव मन्येथा इत्युपदिष्टेनाद्यावधि तदवलम्बतो दिनान्यनायिषतेत्यलं पल्लवितेनेति शिवम् ॥

पं॰ वेचनरामत्रिपाठी ॥
पं॰ शीतलप्रसादत्रिपाठी ॥

PRESS ADVERTISEMENT.

SANSKRIT and ENGLISH DICTIONARY, being an abridgment of PROFESSOR WILSON'S DICTIONARY with an Appendix explaining the use of affixes in Sanskrit, by PANDIT RÁM JASAN, cloth bound and lettered Rs. 10.

THE RÁMÁYAN of VÁLMIKÍ, translated in English verse by RALPH T. H. GRIFFITH, M. A. Vol. I. Rs. 6. Vol. II. Rs. 6. and Vol. III. Rs. 4-8. Postage 6 annas each.

THE HITOPADEŚA, containing the Sanskrit text with a Hindí translation and a Glossary, by PANDIT RÁMAJASAN, 2nd Edition. Rs. 2.

THE LAGHU KAUMUDÍ, a Sanskrit Grammar with an English version, commentary and references by DR. BALLANTYNE, late Principal of the Sanskrit College, Benares, reedted- by hRALP GRIFFITH, M. A., Principal of the Sanskrit College, Benares. *Price 8 Rupees.*

"The Translation of Laghu Kaumudi made by the late Dr. Ballantyne has enabled even beginners to find their way through the Labyrinth of Native Grammar." *Prof. Max Müller.*

"THE BIBLE FOR THE PANDITS." The first three chapters of Genesis diffusely and unreservedly commented, in Sanskrit and English,—with an introduction, by JAMES R. BALLANTYNE, LL. D. Rs. 3.

"THE PANDIT." A Monthly Journal of the Benares College, devoted to Sanskrit Literature. Terms. Rs. 12-0. for annum, including postage.

The object of the *Pandit* is to publish rare Sanskrit works which appear worthy of careful editing hereafter: to offer a field for the discussion of controverted points in Old Indian Philosophy, Philology, History and Literature; to communicate ideas between the Aryan scholars of the East and of the West; between the Pandits of Benares and Calcutta and the Sanskritists of the Universities of Europe.

THE BÁLARÁMÁYANA, a Drama by RÁJAŚEKHARA, edited by PANDIT GOVINDA DEVA ŚÁSTRI, late Professor. of Hindu Astronomy in the Sanskrit College, Benares Rs. 2.

THE PRASANNARÁGHAVA, a Drama by Jayadeva, edited by PANDIT GOVINDA DEVA ŚÁSTRI. Rs. 1-4

LAGHU KAUMUDÍ VYÁKARAN, in Sanskrit (only); the text taken from Dr. Ballantyne's Edition. Re. 1-2.

BODH CHATUSPATH CHANDRIKÁ, a Hindí and Sanskrit Primer. Annas 3.

In the Press, and will shortly be published, The VAISESHIKA APHORISMS OF KANÁDA, reprinted from the "Pandit" with corrections and emendations, by A. E. GOUGH, B. A., Anglo-Sanskrit Professor, Benares College.

PRINTED AND PUBLISHED BY THE PROPRIETORS, E. J. LAZARUS AND CO. AT THE MEDICAL HALL PRESS, BENARES.

काशीविद्यासुधानिधिः

श्रीगणेशाय नमः

श्रीमद्विजयिनीदेवीपाठशालोदयोदितः । प्राच्यप्रतीच्यवाक्पूर्वापरपक्षद्वयान्वितः ॥ १ ॥
अङ्कुरश्मिः स्फुटयतु काशीविद्यासुधानिधिः । प्राचीनार्यजनप्रज्ञाविलासकुमुदोत्करान् ॥ २ ॥

THE PANDIT.

A Monthly Journal, of the Benares College, devoted to Sanskrit Literature.

No. 81. Benares, February 1st, 1873. Vol. VII.

॥ चिन्तामणेः शब्दखण्डम् ॥

अथाप्रतिपाद्यघटादिवृत्तितया न कार्यत्वं प्रवृत्तिनिमित्तं, प्रतिपाद्यमात्रवृत्तेरेव तथात्वात्,अन्यथा प्रमेयत्वमेव तथास्त्विति चेत्, न । (१) यत्प्रकारिका हि प्रतिपत्तिः पदजन्या तदेव तत्र प्रवृत्तिनिमित्तं, फलकल्प्यत्वाद् शक्तेः, न तु प्रतिपाद्यमात्रवृत्ति, (२) साक्षादौ व्यभिचारात् । न च प्रमेयत्वं तथा, तद्बोधस्याप्रवर्त्तकत्वात्, अत एव लोके लिङ् लाक्षणिकी (३) क्रियाभिन्ने धर्मिणि वेदे शक्तिकल्पनात् । (४) न च लौकिकानामपूर्व्वे तात्पर्यं संभवति, पूर्वं प्रमाणान्तरेणाप्रतीतेः । (५) क्रियासाधारणशक्तावपि लोके लक्षणैव, पचेतेत्यत्र हि पाककार्यता ऽवगम्यते । तत्र कार्यत्वे लिङस्तात्पर्यं लाघवात्, न धर्मिणि, (६) क्रियाया धातुलभ्यत्वात् । तदाहुः । तात्पर्याद्धि वृत्तिर्न तु वृत्तेस्तात्पर्यमिति । तृतीयायाः करणत्वैकत्ववन्न कार्यं कार्यत्वं च स्वतन्त्रं शक्यं किं तु विशिष्टं (७) विशिष्टाच्च विशेषणमन्यदेवेति कार्यत्वे लक्षणा । न च कार्यत्वविशिष्टधर्म्युपस्थितावपि धर्म्यंशमपहाय क्रियायां कार्यत्वान्वयो ऽस्तु, किं लक्षणये-

॥ शब्दचिन्तामणिव्याख्या रुचिदत्तीया ॥

(१) यत्प्रकारिका हीति । एकविशेषबाधकं विनेत्यर्थः । तेन छिद्रेतरत्वादौ न प्रसङ्गः । न च तीरत्वादौ प्रसङ्गः, शक्त्या यत्प्रकारिका प्रतीतिः पदजन्या तत्प्रवृत्तिनिमित्तमित्यर्थात् । आकृतिर्न प्रकार इति मतेनेदम् । (२) साक्षादाविति । यद्यपि प्रतिपाद्यमात्रवृत्त्यैव प्रवृत्तिनिमित्तमित्याक्षेपो न यावत्प्रतिपाद्यमात्रवृत्ति तावत्तया तथा च व्यापकव्यभिचारोयमयुक्तस्तथापि तत्त्वं न प्रवृत्तिनिमित्तत्वप्रयोजकं साक्षादौ तत्त्वेपि तथात्वाभावादिति तात्पर्यम् । अत एवेत्यतिदेश्यमाह । (३) क्रियाभिन्न इति । आदौ लोके लिङः कार्यत्वे शक्तिकल्पनेपि वेदे कार्ये शक्तिकल्पनसमये लाघवाल्लिङ्त्वावच्छेदेनैव क्रियाभिन्ने कार्ये शक्तिः कल्प्यते । तथा च क्रियायाः कार्यभेदानन्वये कार्यत्वमात्रोपस्थितये लौकिकी लिङ् लाक्षणिकीत्यर्थः । के चित्तूभयत्र शक्तिकल्पने गौरवाल्लोके लक्षणा । न च लोके कार्यत्वशक्ताया लिङो वेदएव कार्ये लक्षणास्तु विनिगमकाभावादिति वाच्यम् । अपूर्वाननुभवापत्तेरित्यये स्फुटमिति भावः । ननु लोकेपि न लक्षणा किं त्वपूर्वबोध एवास्त्वित्यत आह । (४) न चेति । (५) क्रियेति । एतच्चाभ्युपगमवादेन । अन्यथा नित्यस्यलेऽगतेरिति बोध्यम् । तत्रापूर्वानङ्गीकर्तृमते इदमित्यन्ये । (६) क्रियाया इति । अन्यलभ्यतया न तत्र तात्पर्यं, तदभावाच्च सत्यपि वृत्तिस्तत्राप्रयोजिकेति भावः । न चैवं नीलो घटइत्यादौ नीलपदं नीलमात्रपरं स्यान्न तु धर्मिपरमन्यलभ्यत्वादिति वाच्यम् । तुल्यविभक्तिकप्रातिपदिकार्थयोरभेदान्वयस्यैव व्युत्पत्तिसिद्धत्वादित्याहुः । आकाङ्क्षानुपपत्तेस्तथात्वमित्यन्ये । ननु विशेषणस्य कार्यत्वस्य विशिष्टप्रविष्टतया न शक्यसंबन्धस्तस्य भेदाधिष्ठानत्वादित्यत आह । (७) विशिष्टाच्चेति । न च किं तु कार्यत्वमात्रइत्ययेतनेन विरोधः । तस्याभ्युपगमरीत्या क्रियानिरा-

ति वाच्यम् । नहीतरधर्म्मिगतत्वेनोपस्थितस्य धर्म्यन्तराकाङ्क्षा ऽस्ति । अतः स्वतन्त्रकार्यत्वोपस्थितये लक्षणा । (८) यथा "पुरोडाशकपालेन तुषानुपवपती"त्यत्र पुरोडाशार्थतया तदन्वितत्वेनोपस्थितस्य नोपवापाकाङ्क्षेति स्वतन्त्रकपालोपस्थितये ऽधिष्ठानलक्षणा । (९) न च व्युत्पत्तिविरोधः । नहि लोके क्रियाकार्यत्वे शक्तिरवधारिता येन विरोधो भवेत्, किं तु कार्यत्वमात्रे, क्रियाया धातुलभ्यत्वात् । (१०) न च धर्म्यन्तरे शक्तावपि तद्भङ्गः, (११) तस्मात्प्रकृत्यर्थान्वितस्वार्थबोधकत्वं प्रत्ययानां गृहीतं, प्रत्ययार्थश्चापूर्वमपीति न विरोधः । अस्तु वा लोके लिङः (१२) क्रियाकार्यत्वे शक्तिस्तथा ऽपि तद्भङ्गं विनैव नानार्थन्यायेन वेदे धर्म्यन्तरे शक्तिः, तां विना स्वर्गकामान्वयासंभवात् । अन्ये तु पचेत्यादौ धातुनैव पाकः कार्यो ऽभिधीयते (१३) लिङ् तत्र तात्पर्यग्राहिका न शक्ता, नियमतस्तादृश्येव तत्प्रयोगात् । (१४) सामान्यशब्दस्य विशेषपरत्वं च न शक्त्यन्तरनिर्वाह्यम्, (१५) अत एव वर्त्तमानत्वादौ न लडादिशक्तिरिति लोके शक्त्यग्रहाद् न व्युत्पत्तिविरोध इति । तदसत् । लिङः (१६) कार्यत्वे ऽशक्तौ पंचपदात् कार्यत्वज्ञानानुपपत्तेः, । (१७) युगपद्वृत्तिद्वयविरोधात् । न चाजहत्स्वार्था, उभयसाधारणस्यानुपस्थितेरिति (१८) दिक् । (१९) यद्वा ज्ञाने पदानां शक्तिः, (२०) शक्यत्वात् । एवं च लिङ्पदमेकचोच्चारणे (२१) स्थायित्वस्वर्गजनकत्वकार्यत्वानां ज्ञाने शक्तमिति व्युत्पत्तिः, (२२) स्थायिज्ञानादिकं चोपस्थितमेव । ततो लिङ्पदेनैकचोच्चारणे योग्यतादिवशाद्यागविषयकं स्थायिस्वर्गजनकं कार्यमित्येकं ज्ञानमनुभवरूपं प्रचुरद्रव्यगुणकर्मविलक्षणविषयं क्रियते । न चैवं नानार्थवदे(२३)कैकज्ञाने शक्तिग्रहादेकैकविषयो ऽनुभवो भवेन्न समुदितविषय इति वाच्यम् । शक्तिग्रहकाले एकोच्चारणइति विशेषणमहिम्ना तत्संभवात् । नानार्थे तु (२४) प्रमाणाभावेन गौरवेण च शक्तिग्रहे तस्याप्रवेशात् । (२५) तथाप्यमीषां समूहालम्बनं स्यान्न तु परस्परवैशिष्ट्यज्ञान-

---

सपरत्वादित्येके । मतान्तरेण तदित्यन्ये । (८) यथेति । ननु घटार्थेन दण्डेन गामभ्याजेत्यादावपि लक्षणा स्यात् । यदि च तत्र वाक्यैकवाक्यतया ऽन्वये न निराकाङ्क्षत्वं तदा प्रकृतेपि तुल्यमिति चेत् । अत्राहुः । वेदे न्यायलभ्यं तात्पर्यमिति लाघवादुभयप्रयोजनान्वये तात्पर्याभावादत्र लक्षणा । लोके च न्यायाविषयेपि तात्पर्यादुभयत्र तदविरोधादुभयान्वयबोधाच्च लक्षणेति दिक् । ननु लोके क्रियाकार्यत्वं वेदे त्वपूर्वकार्यत्वं लिङर्थ इति व्युत्पत्तिविरोध इत्यत आह । (९) न चेति । नन्वेवमपि तत्र कार्यत्वे ऽत्र धर्मिणीति विरोध एवेत्यत आह । (१०) न चेति । तस्या एव शक्तेः क्रियातिरिक्तधर्मिविषयत्वमात्रं कल्प्यते न तु तद्भङ्ग इत्यर्थः । ननु प्रकृत्यर्थान्वितस्वार्थप्रतिपादकत्वं प्रत्ययानां व्युत्पन्नं, न च यागान्वितकार्यत्वं लिङा बोध्यत इति व्युत्पत्तिविरोध एवेत्युपसंहरन्नेव निरस्यति । (११) तस्मादिति । (१२) क्रियेति । क्रियोपलक्षितकार्यत्व इत्यर्थः । न च पूर्वमपि प्रवृत्तिनिमित्तभेदान्नानाशक्तिरिति पूर्वाभेद इति वाच्यम् । तत्र कार्यत्वशक्तेरेवातिरिक्तधर्मिविषयत्वमात्रं कल्प्यते न तु शक्त्यन्तरमत्र तु शक्त्यन्तरमेवेत्याशयात् । यद्यप्येवं नानार्थतैव न तु तन्न्यायस्तथापि शक्ततावच्छेदकभेदात्तथात्व, लौकिकवैदिकविधिलिङ्त्वावच्छेदेन शक्तिभेदा,न्नानार्थे तु नैवमित्याहुः । के चित्तु नानार्थे परस्परासंकीर्णार्थद्वये शक्तिद्वयमत्र चैकशक्तिविषयकार्यत्वघटिते विशिष्टे ऽपरशक्तिरिति नानार्थन्यायाभिधानमित्याहुः । नन्वेवं पचतीत्यादावपि तद्वृत्तिः स्यादित्यत आह । (१३) लिङिति । शक्तिरेव कथं नेत्यत आह । (१४) सामान्येति । यथा घटपदेन नीलघटधीः शक्त्यन्तरं विनैवेति भावः । (१५) अत एवेति । धातुनैव वर्त्तमानत्वादिविशिष्टाभिधानं लडादिकं तु तात्पर्यग्राहकमिति भावः । (१६) कार्येति । कार्यत्वप्रकारकज्ञानानुपपत्तेरित्यर्थः । अत एव घटपदादपि नीलघटधीर्न नीलघटत्वप्रकारिकेति भावः । लक्षणया तत्स्यादत आह । (१७) युगपदिति । न च प्रकृष्टजयवत्कार्यत्वविशिष्टे पाके लक्षणास्तु केवलस्य विशिष्टान्यत्वादिति वाच्यम् । युगपद्वृत्तिद्वयाङ्गीकर्तृमतेन कथं चित्तस्योपपाद्यत्वात्तद्विरोधाभ्युपगन्तृमतेनात्र तदभावात् । एतदभिप्रायेणैवाह । (१८) दिगिति । योग्यताबलाच्च स्थायित्वादिलाभ इति मतेन कल्पान्तरमाह । (१९) यद्वेति । एतन्मते कार्यत्ववत्साधनत्वबोधेपि शाब्दो न विरुद्ध इत्यपि बोध्यम् । (२०) शक्यत्वादिति । ज्ञानस्येति शेषः । शक्यएव शक्तेरुचितत्वादिति भावः । अर्थस्य तु शक्यज्ञानविषयतया शक्योक्तिरिति ध्येयम् । (२१) स्थायित्वेति । स्थायित्वादिप्रकारके स्थाय्यादिज्ञाने शक्तमित्यर्थः । अत एवाह । (२२) स्थायीति । प्रत्येकमिति शेषः । (२३) एकैकेति । विशिष्टस्य प्रागनुपस्थितेरिति भावः । (२४) प्रमाणाभावेनेति । प्रकृते च स्वर्गकामान्वयानुपपत्तेरेव मानत्वा,दत एव न गौरवं दोषायेति भावः । प्रकृते नानार्थानुभवबलादेव तत्प्रवेश इत्यन्ये । (२५) तथापीति । शक्तिग्रहकालइव स्थाय्यादीनां वैशिष्ट्यज्ञानमभेद-

मिति चेत्, न। (२६) साकाङ्क्षधर्मधर्म्मिगोचरैकज्ञानस्यैव विशिष्टज्ञानत्वात्। न च समूहालम्बनसंभेदः। तस्य निराकाङ्क्षविषयत्वात्। अस्तु वोपस्थितेष्व(२७)गृहीतासंसर्गेषु स्थायित्वस्वर्गजनकत्वकार्यत्वेषु शक्तिः, (२८) अगृहीतासंसर्गस्यापि विशिष्टज्ञानसमानशीलत्वात्। अत उक्तन्यायेन तावद्विषयकमेकं ज्ञानं लिङ्पदेन जन्यते। (२९) एवमेवालौकिकार्थेषु स्वर्गादिपदेषु शक्तिग्रहः। (३०) ननु भवदुक्तप्रकारेण शक्तिग्रहस्तथापि लिङ्पदाद्यागविषयकार्यानुभवे सत्यपूर्वलाभात्स्वर्गकामान्वयः संभवतीत्युपपादकप्रतिसंधाने प्रसिद्धार्थस्वर्गकामपदसमभिव्याहारान्यथानुपपत्त्या लिङः कार्ये शक्तिकल्पनं, (३१) नहि प्रथममुपपादकप्रतिसंधानं विना ऽर्थापत्तिः संभवति। न च शक्तिकल्पनात् पूर्वमुपपादकशरीरनिविष्टमपूर्वं ज्ञातमिति चेत्। तत्किं य एव विशेष उपपादकः पक्षधर्मताबलात्सिद्ध्यति तत्प्रतिसंधानमर्थापत्तौ करणं, तथात्वे पूर्व्वगृहीतमात्रस्य कल्प्यत्वे कल्पनोच्छेदापत्तिः। तस्माद्यथा सामान्यतो भोजनस्य पीनत्वसंबन्धावगमाद् उपपादकतर्के सति कल्पनातो विशेषावगमो, यथा वा सामान्यशक्तव्यक्तिवाचकपदेन समभिव्याहारवशाद्विशेषाभिधानमेवमत्रापि कार्यमात्रवाचकत्वे विशेषलाभः संभवती(३२)ति तर्कितोपपादकप्रतिसंधानाद्भवत्यर्थापत्त्या शक्तिकल्पनं, (३३) यागविषयकं च कार्यं न घटादि, तस्य सविषयकत्वाभावात्, (३४) विषयत्वं च (३५) ज्ञानघटयोरिव स्वभावसंबन्धो वा (३६) तन्निरूपणाधीननिरूपणं (३७) तत्समानसंविद्वेद्यत्वं वा (३८) व्यावृत्तसाधनत्वं वेति। (३९) अस्ति हि यागदानहोमजन्यापूर्वाणां (४०) तुल्यरूपसाधनान्तरव्यवच्छेदेन प्रत्येकमात्रजन्यत्वम्। (४१) तदुक्तम्॥

विशब्दो हि विशेषार्थः सिनोतिर्बन्ध उच्यते।
(४२) विशेषेण सिनोतीति विषयो ऽतो नियामकः॥

ज्ञानं न स्यादित्यर्थः। यद्वा स्थायित्वादीनामेकस्मिन् धर्मिणि सामानाधिकरण्यज्ञानं न स्यादित्यर्थः। यद्यपि प्रत्येकमप्युपस्थितानामाकाङ्क्षादिवशात्संसर्गबोधः संभवत्येव तथाप्यभ्युपेत्य स्वमतेन समाधत्ते। (२६) साकाङ्क्षेति। अगृहीतसंसर्गेत्यर्थः। संभेदो विशेषः। नन्वेवं नित्यस्थले का गतिस्तत्र स्वर्गजनककार्याभावात्, कथं वा ऽपूर्वलाभ इति चेन्न। अयोग्यतया स्वर्गजनकत्वांशमपहाय स्थायि कार्यमित्येवान्वयादित्येके। लक्षणया तथा बोध इत्यन्ये। न च वैदिकलिङादौ का गतिस्तत्र धातुसाम्यद्वारा साधनत्वज्ञानात्क्रियायामेव कार्यत्वान्वयादिति वाच्यम्। तदतिरिक्तलिङ एवोक्तशक्तिग्रहादित्येके। लक्षणया तथा ऽन्वय इत्यन्ये। (२७) अगृहीतासंसर्गेष्विति। एकस्मिन्धर्मिण्यगृहीतासामानाधिकरण्येष्वित्यर्थः। एतच्च विशेषणं स्वरूपसत्तु शक्तिप्रकार इति बोध्यम्। (२८) अगृहीतेति। तथा च विशिष्टशक्तिग्रहादिवाधे ततोविशिष्टज्ञानाविरोध इति भावः। (२९) एवमिति। तन्मते यन्न दुःखेनेत्याद्यर्थवादस्याप्रमाणत्वेन ततः स्वत्वविशिष्टस्यानुपस्थितेरगृहीतासंसर्गपुरस्कारेणैव शक्तिग्रह इत्यर्थः। ननु लिङः कार्ये शक्तिकल्पने सत्यपूर्वोपस्थितिस्तदुपस्थितौ च शक्तिकल्पनमित्यन्योन्याश्रयमभिप्रेत्याह। (३०) नन्विति। कार्यइत्युपलक्षणं स्वर्गजनकइत्यादिकं बोध्यम्। कार्ये शक्तिरिति पूर्वमते शङ्केयमित्यप्याहुः। (३१) नहीति। तदुक्तं, यतो ऽन्यत्वं तत्सिद्धेरग्रे तदसिद्धेरिति। उपसंहरति। (३२) इति तर्कितेति। नन्वर्थापत्त्या शक्तिग्रहो भवन् कथं नापूर्वं विषयीकरोति सामग्रीसत्त्वात्। नहि तन्मते कल्प्यज्ञानमपि पूर्वं मृग्यत इति चिन्त्यम्। ननु शाब्दबोधे घटादिकार्यान्वय एव कथं नेत्यत आह। (३३) यागेति। नन्वपूर्वमपि घटवन्निर्विषयकमेवेति कथं तथेत्यत आह। (३४) विषयत्वं चेति। तद्विषयत्वं चेत्यर्थः। (३५) ज्ञानेति। घटज्ञानस्येवेत्यर्थः। ननु स्वभावसबन्धो विषयादिसाधारण इत्यत आह। (३६) तन्निरूपणेति। तन्निरूपणाधीननिरूपणमित्यर्थः। एतदपि यागज्ञानादावतिप्रसक्तमत आह। (३७) तत्समानेति। यदा कदा चित्समानवित्तिवेद्यत्वं घटादावपि, नियमेन प्रकृतेप्यसंभवीत्यत आह। (३८) व्यावृत्तेति। व्यावृत्तसाधनत्वं यागस्य विषयत्वं तत्साध्यत्वमपूर्वे सविषयकत्वमित्यर्थः। एतच्च प्रागनुपस्थितमपि संसर्गमर्यादया भासतइति स्मर्तव्यम्। व्यावृत्तत्वमुपपादयति। (३९) अस्ति हीति। अनभिसंहितपरस्वत्वापत्तिफलकस्त्यागो यागः, अभिसंहितपरस्वत्वापत्तिफलकस्त्यागो दानं, देशविशेषगतद्रव्यप्रक्षेपोपाधिकस्त्यागो होम इत्याहुः। (४०) तुल्येति। यागापूर्वस्य दानादिव्यावृत्तो यागः कारणमेवमन्यत्रापीत्यर्थः। यद्यप्येतदपि तज्जन्यस्वर्गादावतिप्रसक्तं तथापि तद्व्यावृत्तं निर्वाच्यम्। एतदतिप्रसक्तिर्न दोषायेत्यप्याहुः। वस्तुतः स्वभावसंबन्धविशेष एवेतरव्यावृत्तस्तादिति बोध्यम्। अत्र वृद्धसम्मतिमाह। (४१) तदुक्तमिति। (४२) विशेषेणेति। अन्यतो व्यावृत्त्या ऽसाधारण्येनेत्यर्थः। सिनोति

इति। (४३) ननु येन रूपेण शक्तिग्रहस्तेन कार्यत्वशक्ताल्लिङ्पदाल्लक्षणया कार्योपस्थितौ योग्यतादिवशादपूर्वलाभो ऽस्तु (४४) कार्यस्मरणं ह्यन्विताभिधानोपयोगि न त्वपूर्वस्मरणं, तच्च पदेन (४५) पदार्थेन वेति न कश्चिद्विशेषः। कार्यं च शक्यकार्यत्वसंबन्धितया ऽवगतमिति चेत्, न। लिङो लाक्षणिकत्वेनापूर्वाननुभावकत्वात्। न चेतरान्वितस्वार्थशक्तस्य यज्यादिपदस्येतरदपूर्वमादायानुभावकत्वमिति वाच्यम्। इतरोपलक्षितस्वार्थान्वयमात्रे हि पदानां शक्तिर्न त्वितरत्र, गौरवात्। पदान्तरलभ्यत्वाच्च। (४६) लक्षणायां च तीरोपलक्षितान्वयशालिस्वार्थानुभावकत्वमितरपदस्य तीरस्य तु संस्कारादुपस्थितिः, (४७) असन्निहितेनान्विताभिधानाभावात्। न चापूर्वे संस्कारविषयः। (४८) किं च यजिपदेन स्वर्गकामकार्यविषयो याग इत्यनुभवो भवेत्, (४९) लक्षणायामितरपदस्य लक्षणीयविशेषणस्वार्थविशेष्यकानुभवजनकत्वात्। (५०) न चैतादृशो बोध आकाङ्क्षितः। (५१) न च यागाविशेषितकार्यमात्रेण स्वर्गकामान्वयः प्रतीयते, किं तु यागविषयककार्यविशेषे। तथा च तथाविधबोधार्थं लिङः कार्ये शक्तिरेवेति। अत्रोच्यते। अन्वयप्रयोजकरूपवत्त्वं न योग्यता। अनाप्तोक्ते पयसा सिञ्चतीत्यत्र सत्यप्यन्वयप्रयोजकद्रवद्रव्यत्वे बाधकप्रमायामन्वयाबोधात्। अथ योग्यत्वेऽपि स्वबाधकप्रमाविरहः कारणं (५२) तर्हि सो ऽवश्यमपेक्षणीय इति लाघवात्सैव योग्यता। एवं च तदेवं योग्यमयोग्यं चेति स्यादिति चेत्, सत्यम्। यथा दशाविशेषे तदेव (५३) साकाङ्क्षमनाकाङ्क्षमासन्नमनासन्नं च, तथा (५४) स्वबाधकतत्प्रमाविरहदशायां तदेवान्वयबोधे योग्यमयोग्यं चाभिधीयते स्वबाधकप्रमायां तद्विरहे वा योग्यायोग्यताव्यवहारदर्शनात्। स्वबाधकप्रमाविरहदशायां योग्यतादिसत्त्वे ऽपि वन्हिना सिञ्चतीत्यत्रान्वयबोधो ऽप्रमा, दोषवत्पुरुषप्रणीतत्वात् (५५) सामान्यभानस्य किंचिद्विशेषभाननियतत्वाद्विशेषाभाने कथं तद्भासतइति चेत्। वस्तुगत्या परम्परासाधनं विशेषो भासतएव, परम्परासाधनत्वं तु प्रकारो न भासते, तत्प्रकारभाने परम्पराघटकज्ञानस्य हेतुत्वाद्, यथा घटेन जलमाहरेत्यत्र योग्यतया छिद्रेतरघटो घटत्वेन भासते। न तुच्छिद्रेतरत्वेन, (५६) तथा सति लक्षणायां युगपद्वृत्तिद्वयविरोधेन घटानन्वय-

---

संबध्नाति जनयतीति यावत्। ननु वेदे ऽपि लिङः कार्यत्वमात्रएव शक्तिरस्तु धर्मिणो ऽन्यलभ्यत्वादित्याशङ्कते। (४३) नन्विति। तथा च न व्युत्पत्तिविरोधोऽपीति भावः। येन रूपेण त्वन्मते शक्तिस्तेन रूपेण लक्षणया कार्योपस्थितावित्ति बोध्यम्। ननु लक्ष्यापूर्वस्मरणे कथं लक्षणेत्यत आह। (४४) कार्यस्मरणमिति। अन्यथा शक्तिपक्षे ऽप्यप्रतीकार इति भावः। पूरस्यैव तीरस्मारकत्वमिति मतेनाह। (४५) पदार्थेति। न च कार्यत्वोपस्थितिः शक्त्यैवेति युगपद्वृत्तिद्वयविरोधः,विशिष्टस्य केवलानन्यतया प्रकृष्टजयवत्तदभ्युपगमात्। तर्हि गङ्गायां घोष इत्यत्र का गतिरित्यत आह। (४६) लक्षणायामिति। (४७) असन्निहितेनेति। अनासन्नेनेत्यर्थः। पदजन्योपस्थितेरेवासत्तित्वादत्र च पदार्थस्यैवोपस्थापकत्वाभ्युपगमादिति भावः। ननु त्वन्मते ऽर्थाध्याहारवदासन्नत्वमितरपदेनानुभवश्च स्यात्.किं च तीरस्यशाब्दबोधविषयत्वमवश्यं वाच्यम्, अन्यथा विभक्त्यर्थानन्वयापत्तेः,तथा च यथा तत्र शब्दत्वं तथा प्रकृतेऽपि कार्यस्मरणे सति समानप्रकारकत्वस्य नियामकत्वेन योग्यतया शाब्दानुभवो ऽपूर्वमादाय पर्यवस्येदित्यरुचेराह। (४८) किं चेति। (४९) लक्षणायामिति। यद्यपि मञ्चाः क्रोशन्तीत्यादौ व्यभिचारस्तथापि व्यभिचारममुं यथा हि मञ्चा इत्यादिना छलतो ग्रन्थकार एवाग्रे विभावयिष्यतीति बोध्यम्। ततः किमित्यत आह। (५०) न चेति। कृतिसाध्यत्वाप्रकारकत्त्वादित्याहुः। तच्चिन्त्यम्। कार्यांशे कार्यत्वप्रकारकत्वस्याविरोधात्। तस्मात्स्वर्गकामत्रो-

द्वृकं यागविषयकं कार्यमिति कार्यविशेष्यकज्ञानस्यैव प्रवर्त्तकत्वाभ्युपगमात्तदनाकाङ्क्षितत्वमिति मन्तव्यम्। ननु स्वर्गकामकार्यमित्येव ज्ञानं कार्यविशेष्यकतया प्रवर्त्तकमस्त्वित्यत आह। (५१) न चेति। आपाततो ऽभ्युपगमवादेनाह (५२) तर्हीति। न चैवं स्वबाधकभ्रमदशायामन्वयबोधापत्तिः। प्रमापदस्य निश्चयपरत्वात्। (५३) साकाङ्क्षमिति। अन्वयबोधजननाजननदशायां साकाङ्क्षमनाकाङ्क्षं च। एवं स्मरणास्मरणदशायामासन्नमनासन्नं चेत्यर्थः। नन्वेवं शाब्दप्रमाप्रयोजकयोग्यतासत्त्वे कथं शाब्दभ्रम इत्यत आह। (५४) स्वेति। यद्यपि भ्रान्तप्रतारकवाक्यं करणापाटवजन्यं च वाक्यं दोषजन्यत्वेपि प्रमाजनकं, तथापि वक्तृयथार्थवाक्यार्थज्ञानं गुणः तदभावो दोष इति मते तात्पर्यम्। तथा च यागे स्वर्गसाधनत्वान्वयो नायोग्यतापराहत इति भावः। अत्र शङ्कते। (५५) सामान्येति। (५६) तथा सतीति। यद्यपि युगपद्वृत्तिद्वयाङ्गीकर्तृमते प्रकृष्टजयवत्तत्त्वेन भानं संभवति तथापि यत्र न तथा तात्पर्यं तत्र योग्यतादिज्ञानसत्त्वे शाब्दबोधोपपत्तौ लक्षणाक-

प्रसङ्गात् । उभयसाधारणरूपेणानुपस्थितेश्च नाजहत्स्वार्थो । अथ संस्कारात्तदुपस्थितिः । न च सुब्विभक्तीनां प्रकृत्यर्थगतस्वार्थान्वयबोधकत्वव्युत्पत्तेस्तत्र विभक्त्यर्थो नान्वीयेतेति वाच्यम् । प्रकृत्यर्थो हि प्रकृतिप्रतिपाद्यः, लक्षणीयान्वयानुरोधात्, (५७) स च संस्कारसहकारात्प्रकृतेपि, न च तस्यानियतोद्बोधान्न नियता तदुपस्थितिः । फलबलेन तथा कल्पनादिति चेत्, न । (५८) शब्दोपस्थापितेनैव शब्दस्यान्वयबोधकत्वात् । न चैवमाकाशपदाशक्यस्य संस्कारोपस्थितस्य शब्दाश्रयत्वस्य कथं शाब्दानुभवविषयत्वमिति वाच्यम् । नियमतो यद्धर्मवत्त्वेनोपस्थिते यत्र शक्तिग्रहः तत्स्मरणजनकसंस्कारस्य तद्धर्म्मविषयतानियमेन तदुद्बोधकादेव तदंशेपि उद्बोधनियमेनाकाशपदादशक्यस्यापि तस्य भानात् । (५९) अस्तु वा तदपि शक्यं, यदि (६०) नियमत उपस्थितिः, (६१) सहप्रयोगस्य वाच्यादिपरत्वेनाप्युपपत्तेः । (६२) वस्तुतस्तु नियतोपस्थितिरेव नास्ति । (६३) अस्तु वा पदादपि निर्व्विकल्पकं, तर्ह्यन्वयबोधदशायामितरान्वयानुपपत्त्यभावादग्रे ऽपि कल्पना न स्यादिति चेत्, तर्हि (६४) तवापि कार्यत्वबोधानन्तरमौपादानिकसाधनताबोधो न स्यात् । औपादानिके बोधे ऽनुपपत्तिबोधस्य हेतुत्वात्, कल्पनामात्रोच्छेदश्चैवं स्यात्, प्रतीतानुपपत्तिमूलकत्वात्कल्पनायाः । (६५) वस्तुतस्तु बाधकप्रमाविरहस्य योग्यतात्वे संशयसाधारणं ज्ञानमात्रमेव तस्याः प्रयोजकं तेन

स्पने मानाभावाच्च तथात्वेन भानमित्यत्र तात्पर्यं, तन्मते गङ्गातीरत्वेन न यथा शाब्दबोध आकाङ्क्षाविरहात्तथा प्रकृतेपीत्यन्ये । (५७) स चेति । संस्कारसहकृतस्य घटपदस्येव तदुपस्थापकत्वाभ्युपगमात्तस्यापि प्रकृत्यर्थतया छिद्रेतरत्वावच्छेदेन विभक्त्यर्थान्वय इत्यर्थः । न च वृत्त्या प्रकृतिप्रतिपाद्यत्वं प्रकृत्यर्थत्वं, गौरवाद्वित्याशयः । (५८) शब्देति । वृत्त्येति शेषः । अन्यथोक्तन्यायेन तीरेपि सप्तम्यर्थान्वयसंभवे लक्षणोच्छेदः स्यात् । पदात्समवायसंबन्धेनाकाशोपस्थितौ तदन्वयबोधापत्तेश्चेति बोध्यम् । नन्वेतावता स्मरणे नियमसंभवे ऽप्यन्वयानुभवप्रवेशे न हेतुरुक्तः । न चोपस्थितपरित्यागे वीजाभावान्नियतोपस्थितं शब्दाश्रयत्वमादायैवानुभव इति वाच्यम् । छिद्रेतरत्वेपि तथात्वापत्तेः । यदि च तत्र नियतोपस्थितिकं तदा ऽष्टद्रव्यातिरिक्तद्रव्यत्वेन शक्तिग्रहे शब्दाश्रयत्वस्यापि तथात्वाभावात्तुल्यं, वृत्त्यनुपस्थापितस्याप्यन्वये प्रागुक्तदोषश्च, वृत्त्युपस्थापितत्ववन्नियमत इत्यादेरपि तत्प्रयोजकत्वकल्पने गौरवम् । किं चैवं गोत्वादिकमपि शब्दाश्रयत्ववन्न शक्यं स्यादित्यस्वरसादाह । (५९) अस्तु वेति । तथा च वृत्त्युपस्थापितमादायैवान्वयबोधः । छिद्रेतरत्वं तु न तथेति भावः । (६०) नियमत इति । नन्वष्टद्रव्यातिरिक्तद्रव्यत्वेनाप्युपस्थितेर्न नियतोपस्थितिरत एवानुपदं तथैव तं वक्ष्यति, तथा च कथं तत्र शक्तिरिति चेत् । अत्राहुः । नियमतो ऽनुपस्थितावपि शब्दाश्रयत्वं प्रवृत्तिनिमित्तं विनिगमकाभावादन्नादिपदवन्नानार्थत्वे ऽप्युपपत्तेः । न चैकस्यां व्यक्तौ नानेकं प्रवृत्तिनिमित्तमिति वाच्यम् । अप्रयोजकत्वात् । किं च त्वतलोर्मुख्यार्थत्वेनोपपत्तावुपचरितार्थत्वे मानाभावादिति । वस्तुतस्तु लाघवाच्छब्दाश्रयत्वमेव प्रवृत्तिनिमित्तं न त्वष्टद्रव्यातिरिक्तद्रव्यत्वादिकमपि, गौरवात् । क्व चित्तथात्वेन शक्तिभ्रमात्तदुपस्थितेः, अन्यथा कम्बुग्रीवत्वादिनापि शक्तिग्रहात्तदुपस्थितौ तदपि शक्यं स्यात् । यदि च लाघवाद्घटत्वमेव तथेति तत्र शक्तिग्रहो भ्रमस्तदा प्रकृतेपि तुल्यमिति न नानार्थत्वमिति । नन्वेवं घटः कुम्भ इतिवदाकाशः शब्दाश्रय इति सह प्रयोगो न स्यादत आह । (६१) सहेति । आकाशपदवाच्य इति तदर्थ इत्यर्थः । (६२) वस्तुतस्त्विति । तथा च नियमतो ऽनुपस्थितस्यापि शक्यत्वं विनिगमकाभावे नानार्थत्वमन्यथा न तथेत्यन्यदेतदिति भावः । शक्त्यभावपक्षे संस्कारस्य कदाचिदनुद्बोधमभ्युपेत्याह । (६३) अस्तु वेति । अत्राकाशपदान्निष्प्रकारकमेवाकाशस्मरणं । स्मृतेर्विशिष्टज्ञानत्वनियमो ऽसिद्ध एवेति भावः । न चाकाशो द्रव्यमित्यादौ भिन्नप्रकारोपस्थितिं विना कथमभेदान्वय इति वाच्यम् । विभक्त्युपनीतसंख्यामादाय तथात्वादित्याहुः । (६४) तवापीति । न चान्वयप्रकारतया साधनत्वं शाब्दमिति काम्याव्यवहितसाधनतया ज्ञातमेवेति च परेण प्रागभिधानात्तद्विरोधः । मतान्तरेणास्योक्तत्वादित्येके । विशेषरूपेणायमबोधमभिप्रेत्येदमित्यन्ये । न चौपादानिकस्वर्गसाधनत्वपक्षे कथं योग्यताग्रहः, यागविषयकं कार्यमित्यनुभवानन्तरमनुपपत्तिप्रभवेष्टसाधनताज्ञाने सति स्वर्गकामबोद्धृकं यागविषयकं कार्यमित्यनुभवादित्याहुः ॥ कार्यत्वमात्रं नित्यस्थलवन्नानुपपन्नं स्वर्गकामकार्यत्वं तदा ऽप्रतीतमेवेति कथमनुपपत्तिप्रभवं तज्ज्ञानमिति चिन्त्यम् । ननु दोषस्याप्रामाण्यप्रयोजकत्वमुक्तयोग्यतापक्षे प्रागुक्तं तच्च भ्रान्तप्रतारकवाक्ये तदभावादयुक्तम् । आवश्यकयोग्यताप्रमात्वाप्रमात्वाभ्यामेवोपपत्तौ वक्तुर्यथार्थवाक्यार्थज्ञानतदभावयोर्गुणदोषतया हेतुत्वकल्पने गौरवात् । किं च परबाधकप्रमानिश्चये स्वबाधकप्रमाविरहतन्निश्चयदशायामपि न शाब्दधीरिति तद्विरहोपि योग्यतान्तर्भूत इत्यरुचेराह । (६५)

यत्र बाधकप्रमानिश्चयस्तत्रैवान्वयबोधाभावो ऽन्यत्र तु तद्बीमात्राच्छाब्दबोध इति यागेपि योग्यतासंशयेनान्वयबोधाप्रतिबन्धः, बाधसंशयस्याप्रतिबन्धकत्वात्, (६६) अन्यथा ऽनुमानाद्युच्छेदप्रसङ्गाद् (६७) अपूर्व्ववाच्यत्वेप्यपूर्व्वे स्वर्गसाधनतासंशयादयोग्यतासंशय एव प्रथममपूर्वे स्वर्गसाधनत्वानिश्चयाद् उपादानस्यान्विताभिधानोत्तरकालीनत्वात् साधकबाधकप्रमाणाभावेन द्वारसंभावनया साधनत्वसंभावनातः स्वर्गकामान्वय इति तुल्यम् । (६८) अपि च यथा न क्रिया स्थिरेत्ययोग्या तथा कार्यमपूर्वमपि (६९) विशिष्टं न स्थिरं कृतेर्विनष्टत्वात् । न चाधिष्ठाने ऽपूर्वमात्रे साधनत्वं, (७०) तस्य पदार्थैकदेशत्वेनान्वयाप्रतियोगित्वात् । (७१) अन्ये त्वन्वयविरोधिरूपविरहो योग्यता । अत एव वह्निना सिञ्चतीत्यत्र तद्भ्रमे ऽन्वयभ्रमः । यागे चान्वयविरोधिरूपविरहो (७२) योग्यानुपलब्ध्या सुगम एव । न च यागे आशुविनाशित्वं कालान्तरभाविफलजनकत्वविरोधीति वाच्यम् । अनुभवे क्वाथपाने चाशुविनाशिनि कालान्तरभाविफलजनकत्वाद् यागेप्य(७३)न्ततस्तत्सत्त्वात्, अन्यथा ऽपूर्व्ववैफल्यात् । अस्मादन्वयप्रयोजकरूपवत्त्वं लघ्विति चेत्,न । तत्सत्त्वेप्यनाप्तोक्ते (७४) व्यभिचाराद्, (७५) अन्वयविरोधित्वेन यत्किंचित्प्रतिसंधानं तत्रास्त्येव, अन्ततो बाधकप्रमाविषयत्वस्यैव विरोधिनो ज्ञानादिति । (७६) काम्यसाधनत्वज्ञानमेव प्रवर्तकं लाघवात् । सिद्धौदनस्तृप्तिकामो लघूपाये प्रवर्त्तते भोजने, न पाके, गुरूपायत्वात् । जलाद्यर्थी च संनिहिते । अत एव ज्योतिष्टोमादौ श्रुतस्वर्गफलत्वेपि गुरूपायत्वेनाननुष्ठानलक्षणाप्रामाण्यापत्त्या फल(७७)भूमा कल्प्यते । (७८) इष्टोत्पत्त्यनान्तरीयकश्रमजनकत्वं वा प्रतिबन्धकम् । अपि च काम्याव्यवहितसाधनतया ज्ञातमेव यदि कामी कर्तव्यतया ऽवैतीति नियमस्तदा तवापूर्व्वमपि कार्यतया नावगम्येत, अन्विताभिधानात् पूर्व्वे काम्यसाधनता (७९) बोधकाभावाद् । उपादानस्यान्विताभिधानोत्तरकालीनत्वात् । (८०) अत एव काम्यादन्यदित्यादिप्रकारद्वयं निरस्तम् । कर्तव्यताबुद्धौ प्रवृत्तौ वा काम्यसाधनत्वस्यैव हेतुत्वात् । (८१) न च कार्ये घटादौ लिङ्शक्तिग्रहः, यथा हि लिङ्शक्तिग्रहकाले स्वर्गकामान्वयायोग्यत्वात् क्रियानिरासस्तथा यागान्वयानुप-

---

वस्तुतस्त्विति । (६६) अन्यथेति । विशेषदर्शनेपि संशयो वर्तते ऽनुमित्या नाश्यते इति मतेनेदमित्येके । संदेहोत्तरक्षणे यत्र स्मरणात्मकपरामर्शस्तदभिप्रायेणेदमित्यन्ये । (६७) अपूर्वेति । न च यागविषयकं कार्यमित्यनुभवानन्तरमौपादानिकस्वर्गसाधनताबोधे सति स्वर्गकामान्वय इति वाच्यम् । स्वर्गकामकार्यस्यैवानुपपन्नतया तदुपपादकत्वेनैव तत्कल्पनात्,अन्यथा नित्येपि कार्यत्वमात्रानुपपत्त्या तत्कल्प्येतेति । (६८) अपि चेति । यद्यपि घटमानयेत्यादौ घटत्वमिवावच्छेदकतया वासस्वी देवदत्तपदवाच्य इत्यत्र वासस्त्वोपलक्षणतया ऽन्वयो योग्य एव, तथापि विशेषणतयान्वये ऽयोग्यत्वं बोध्यम् । अत एवाह । (६९) विशिष्टमिति । वस्तुतस्तु पूर्वदोष एव तात्पर्यम् । (७०) तस्येति । यद्यपि शङ्खः पाण्डुर एवेत्यादावयोगव्यवच्छेदादौ पदार्थैकदेशपाण्डुरत्वाद्यन्वयो दृष्टस्तथाप्यनन्यगत्या तत्र तथात्व,मत्र तु न तथेत्याशयः । नन्वेकविशेषबाधे सामान्यज्ञानमपरप्रकारनियतमवश्यं वाच्यमन्यथैकप्रकारबाधे सामान्यनिश्चये ऽपरप्रकारसंशयः कदाचित्स्यात् । न चैवं, तथा चापूर्ववाच्यतेति । मैवम् । तादृशसामान्यस्यापरप्रकारव्याप्यतया तन्निश्चयस्यैव विशेषदर्शनत्वादित्याहुः । (७१) अन्ये त्विति । अन्वयविरोधित्वमन्वयाभावव्याप्यत्वं यदि, तदा केवलान्वयिन्यव्याप्तेरिति ग्रन्थकृदुक्तयोग्यतापरत्वे ऽस्य पूर्वाविशेष इत्यनभिमतिबीजमत्रेत्याहुः । (७२) योग्येति । यद्यपि बाधकप्रमाविषयत्वादेरतीन्द्रियस्याप्यन्वयविरोधित्वात्तदभावोऽशक्यनिश्चय एव, तथापि योग्यतामात्राभिप्रायेणेदम् । अयमपि वा ऽस्वरसो ऽत्र बोध्यः । (७३) अन्तत इति । वस्तुतस्तादृशफलजनकत्वसत्त्वादित्यर्थः । (७४) व्यभिचारादिति । तज्ज्ञानेप्यन्वयबोधाभावादित्यर्थः । प्रकृते तु नायं दोष इत्याह (७५) अन्वयेति । कामी काम्यादन्यदित्यादि दूषयति । (७६) काम्येति । (७७) भूमेति । बाहुल्यमुत्कर्षरूपवैनात्यं चेत्यर्थः । वस्तुतस्तु विशिष्य कल्पकाभावाद्वैलक्षण्यत्वेन सामान्यतः कल्पनमबाधितं विषयीकरोतीति बोध्यम् । गुरुत्वमननुगतमतः प्रतिबन्धकान्तरमाह । (७८) इष्टेति । बलवद्द्वेषविषयदुःखजनकत्वज्ञानमित्यर्थः । (७९) बोधकाभावादिति । न च ज्ञानपदं ज्ञायमानपरं शाब्दबोधदशायां च तत्संभवत्येवेति वाच्यम् । तदा व्याप्तेरप्रयोजकत्वात् । तदौपादानिकत्वपक्षे दोषतादवस्थ्याच्च । यद्वा ऽव्यवहितत्वांशबोधकाभावाच्च तथात्वमिति भावः । (८०) अत एवेति । वक्ष्यमाणादेवेत्यर्थः । अप्रयोजकत्वे तात्पर्यं व्युत्पत्तिविरहमाह । (८१

पत्त्या घटादिनिरासोपि भवेत् । (८२) नहि यागविषयको घटादिः संभवति । अन्यथान्विताभिधानदशायामपि तन्निरासोपि न स्यात् ॥ स्यादेतत् ॥ स्वर्गकामान्वयानुपपत्त्या तदन्वययोग्ये लिङ्शक्तिग्रहः स्थायिकार्ये च तथा, अतः शक्तिग्रहकाले क्रियानिरासो युज्यते न घटादेः । यजिपदमन्तर्भाव्यस्वर्गकामपदलिङ्पदाभ्यामन्विताभिधानदशायां घटादिनिरासो यागान्वयायोग्यत्वादिति तत्किं शक्तिग्रहकाले यागान्वयानुपपत्तिर्हस्तपिहिता येन घटादिनिरासिका सा न प्रतिसंधीयेत । प्रत्युत प्रत्ययस्यान्तरङ्गप्रकृत्यर्थान्वयं बोधयत एवेतरान्वयबोधकत्वमिति तदन्वयानुपपत्तिप्रतिसंधानमेव प्राथमिकं पुरुषदोषा(८३)दप्रतिसंधाने शक्तिग्रहो भ्रम एव, घटादेरशक्यत्वात् । (८४) पुरुषविशेषं प्रत्यवाच्यत्वापत्तेश्च । घटादीनामनन्तत्वेन यदि तन्निरासो न शक्यः तदा ऽन्विताभिधानदशायामपि न स्यात्, पाकादीनां क्रियात्वेनेव पृथिवीत्वादिना निराससंभवाच्च । (८५) एवं च प्रचुरद्रव्यगुणकर्मसु निरस्तेषु क्व कार्ये धर्मिणि शक्तिग्रहः । न च विशेषे निरस्तेपि कार्यसामान्यं न निरस्तमिति वाच्यम् । (८६) नहि विशेषाविषयं सामान्यज्ञानं संभवति । (८७) एतेनापूर्व्वसाधारणकार्यत्वेन घटादौ शक्तिग्रह इति परास्तम् । (८८) अगृहीतासंसर्गेषु स्थायित्वकार्यत्वस्वर्गजनकत्वेषु (८९) तज्ज्ञानेषु वा शक्तिग्रह इति परास्तम् । घटादीनां निरासाद् धर्ममात्रे च शक्तिग्रहस्य प्रकृते (९०) ऽनुपयोगात् । किं च तेषु (९१) समुदितेषु शक्तिग्रहः प्रत्येकं वा । नाद्यः । (९२) प्रथमं समुदायस्यैकज्ञानाविषयत्वाद्, (९३) विषयत्वे वा पूर्व्वमेव विशिष्टस्य (९४) सत्त्वे ऽपूर्व्वत्वव्याघातः । (९५) एकज्ञानविषयसाकाङ्क्षधर्म्मधर्मिणोरेव विशिष्टत्वात् । न द्वितीयः । एवं हि लिङ्पदात्स्मरणत्रयं यजिपदाच्च यागस्मरणं, न चतुर्णां तेषां यौगपद्यमस्ति । न च प्रत्येकं शक्तिग्रहेपि समुदितविषयमेकमेव स्मरणं लिङ्पदादिति युक्तम् । समुदायस्य पूर्व्वमननुभवात् । (९६) स्मरणं च यदि साकाङ्क्षधर्म्मधर्म्मिविषयमेकं तदाऽपूर्व्वत्वक्षतिः, एकज्ञानारूढयोः साकाङ्क्षधर्म्मधर्म्मिणोरेव विशिष्टत्वात् । (९७) तन्नियतत्वाद्वा । (९८) एतेन स्वर्गादिपदेष्वगृहीतासंसर्गधर्मधर्मिषु शक्तिग्रह इति व्यदस्तं, प्रत्येकसमुदायविषयस्मरणविक-

---

न चेति । (८२) नहीति । प्रागुक्तं विषयत्वमसंभवीति भावः । (८३) अप्रतिसंधाने, घटाद्यन्वयानुपपत्तेरप्रतिसंधाने । नन्वप्रतिपाद्यघटादिवृत्त्यपि कार्यत्वं प्रवृत्तिनिमित्तमित्युक्तं तदाश्रयतयैव घटादेरपि शक्यत्वं स्यादित्यत आह । (८४) पुरुषेति । तथा च यत्रानुपपत्तिप्रतिसंधानं तत्र शाब्दबोधो न स्यात् । न चेष्टापत्ति,रनुभवविरोधात् । तदप्रतिसंधाने क्रियायामपि कार्यत्वान्वयस्य सुवचत्वमित्यपि बोध्यम् । (८५) एवं चेति । ननु सामान्यलक्षणाभ्युपगमपक्षे कार्यत्वेनोपस्थिते ऽपूर्वे शक्तिग्रहोस्तु, यथा च नापूर्वत्वक्षतिस्तथा प्रागुक्त मिति चेत्, तन्मते पूर्वदोष एव तात्पर्यात् । (८६) नहीति । ननु विशेषरूपेण बाधिते ऽपि सामान्यतः कार्यत्वेन तत्रैव शक्तिग्रहोस्तु, अन्यथा निर्वह्निपर्वते पर्वतेतरवृत्तिर्वह्निरत्र नास्तीति ज्ञाने ऽनुमितेर्निर्विषयत्वापत्तिरिति चेत्, न । विशेषबाधकस्यापि दोषत्वात् । यथा चैतत्तथानुमानप्रकाशे विपञ्चितम् । (८७) एतेनेति । यद्यपि प्रागपि तदेव निरस्तं तथापि पूर्वं घटत्वादिनोपस्थिते कार्यत्वन शक्तिग्रह इत्यपास्तम् इदानीं कार्यत्वेनोपस्थिते घटादौ शक्तिग्रह इति निरस्तमिति भावः । यद्वेत्यादिमतद्वयं निरस्यति । (८८) अगृहीतेति । (८९) तज्ज्ञानेष्विति । यद्यपि तेषामेकमेव ज्ञानं प्रागुक्तं तथापि व्यक्त्यभिप्रायकं बहुवचनम् । (९०) अनुपयोगादिति । अपूर्वभानापत्तेरित्यर्थः । (९१) समुदितेष्विति । एकाधिकरणवृत्तित्वं समुदायः । (९२) प्रथममिति । त्वयान्यथाख्यातेरनभ्युपगमादिति भावः । एकपदं संपातायातम् । अत एवाग्रे पूर्वमननुभवादित्येव वक्ष्यतीति ध्येयम् । नन्वपूर्वमादाय तथा बोधः स्यादित्यत आह । (९३) विषयत्वे वेति । ननु तावद्धर्मविशिष्टशरीरादेस्तथात्वमस्तु तथा चापूर्वस्य तदविषयत्वात्कथमपूर्वत्वव्याघातः । न च क्रियानन्तरभावित्वमपि विवक्षितम् । परेणापूर्वत्वनियतएव शक्तिग्रहाभ्युपगमादिति वाच्यम् । स्वर्गिशरीरादौ तथा ऽप्यतिप्रसक्तेरिति चे,न्न । अव्यवहितानन्तर्यस्य विवक्षितत्वादिति दिक् ॥ (९४) सत्त्वे । उपस्थितत्वे । तन्मतेनैवाह । (९५) एकेति । ननु समुदायमतिरिक्तं न ब्रूमः किं तु स्थायित्वादिकमेव तथा च तत्तदुद्बोधकसमाजात्तद्बोधकात्समूहालम्बनमेकमेव स्मरणं तदेव समुदितविषयमित्यत आह । (९६) स्मरणं चेति । अन्यतरमात्रविषयत्वे निराकाङ्क्षविषयत्वे वा प्रकृतानुपयोग एव दोष इति रहस्यम् । (९७) तन्नियतत्वाद्वेति । साकाङ्क्षधर्मधर्मिगोचरैकज्ञानारूढत्वस्य विशिष्टत्वनियतत्वाद्वेत्यर्थः । एतेन तन्मते ज्ञानाभावकालेपि विशिष्टसत्त्वमुपपादितमिति ध्येयम् । (९८) एतेनेति । स्वर्गस्य वाक्यार्थधीमात्रगोचरत्ववादिनस्तव मते

ल्पग्रासात्। (९९) अस्तु वा लिङः कार्यं लक्षणा, (१००) यथा हि मञ्चाः क्रोशन्तीत्यत्र पुरुषविशेषः (१०१) प्रागननुभूतो ऽप्यनुभूयते इतरपदाल्लाक्षणिकस्यानुभावकत्वाद्वा तथा ऽपूर्वमपि, (१०२) अस्तु वा स्वर्गकामकार्यविषयो याग इत्यनुभवे स्वर्गकामयागयो (१०३) रन्वयप्रकारतया ऽपूर्वलाभः ॥

स्वर्गपदेप्येवं शक्तिग्रहो निरस्त इत्यर्थः। त्वन्मतेप्यपूर्वशक्तिकल्पनमत्यन्तासंगतमित्याह। (९९) अस्तु वेति। नन्वेवमपूर्वं नानुभूयेतैव लाक्षणिकस्याननुभावकत्वादित्यत आह। (१००) यथा हीति। एतेन लक्षणायामितरपदस्येत्यादिप्रागुक्तव्याप्तौ व्यभिचाराप्रयोजकत्वे अपि सूचिते इति मन्तव्यम्। ननु पुरुषः संस्कारादुपतिष्ठते न त्वनुभूयते इत्यत आह। (१०१) प्रागिति। एतच्च परमताभ्युपगमेनैव। न च तत्रापि कथमनुपस्थितस्यानुभवः, पुरुषत्वादिसामान्यप्रकारकस्मरणे सति योग्यताबलाद्विशेषानुभवात्। समानप्रकारकत्वेनैव तस्य हेतुत्वाभ्युपगमात्। यद्यपि स्वार्थादन्येन रूपेण ज्ञाते भवति लक्षणा, न चेह कार्यत्वादन्येन रूपेण तदुपस्थितिः तथाप्युक्तनियमो ऽप्रयोजको ऽत एव नीलो घट इत्यादौ तथैव लक्षणेति पराभ्युपगमानुसारेणेदमुक्तमिति ध्येयम्। ननु विधौ न लक्षणा, तदुक्तं 'न विधौ परः शब्दार्थ' इति चेत्, न। तस्य मतान्तरत्वात्, अत एव परस्य लौकिकी लिङ् लाक्षणिकीति। यजिपदेन स्वार्थविशेष्यकं ज्ञानं स्यादित्यत्रेष्टापत्तिमाह। (१०२) अस्तु वेति। यथातथा बोधो ऽस्त्वपूर्वलाभः परं मृग्यतइति भावः। (१०३) अन्वयप्रकारतया। अन्वयघटकतया॥

॥ अथ वेदान्तसूत्रसंबन्धितृतीयाध्यायस्य ॥

॥ तृतीयपादारम्भः ॥

पूर्वत्र निरूपितो नित्यत्वादिगुणकस्त्वंपदार्थः पशुरुपासकः। सर्वज्ञतादिगुणकस्तत्पदार्थ उमापतिरुपास्यः शिवश्च। तदिह कथमुपासनमित्याकाङ्क्षायां तन्निरूपणमुत्तरत्राभिवर्तते॥

॥ सर्ववेदान्तप्रत्ययं चोदनाद्यविशेषात् ॥ १ ॥

सर्वेषु वेदान्तेषु दहराद्युपासनं श्रूयते। तदेकम्। उत शाखाभेदादिना भिन्नमेव। इति संदेहः। शाखाभेदेन प्रकरणभेदात् प्रतिशाखमुपासनं भिद्यते। तथा छान्दोग्ये तैत्तिरीयके च दहरोपासनमाम्नायते। एकत्र "य आत्मापहतपाप्मा विजरो विमृत्युः" इत्यारभ्य, अपहतपाप्मत्वादयो गुणा आम्नाताः। अन्यत्र "ऋतं सत्यम्," इत्यारभ्य कृष्णपिङ्गलत्वादयो गुणाः। तत्र गुणभेदेनोपासनं भिद्यते। छान्दोग्ये पञ्चाग्निविद्यायां कौथुमकमिति नाम, बृहदारण्यके वाजसनेयमिति नाम। तत्र नामभेदादुपासनं भिद्यते। मुण्डकशाखायां शिरोव्रताख्यो धर्मः श्रूयते। "तेषामेवैतां ब्रह्मविद्यां वदेच्छिरोव्रतं विधिवद्यैस्तु चीर्णम्," इति। शिरोव्रतं नाम वेदव्रतविशेषः। आथर्वणिकान् प्रति हितो नेतरान् प्रति। अतो धर्मभेदादुपासनाभेदः। ततः शाखादिभेदादुपासनाभेद इति पूर्वः पक्षः।

सिद्धान्तस्तु सर्ववेदान्तप्रत्ययं दहराद्युपासनमेकमेव। "संध्यामुपासीत" इति। कर्मविधिष्विव चोदनाफलसंयोगरूपाख्यानामविशेषात्। "विद्यात्" "उपासीत" इति चोदना तावत् शाखाभेदे ऽप्यविशिष्टा। फलसंयोगो ब्रह्मप्राप्तिरूपो ऽविशिष्टः। वेद्यमपि वैश्वानरादिरूपं ब्रह्माविशिष्टम्। आख्यापि वैश्वानरविद्येत्येवमादिरविशिष्टैव। इत्येकमेवोपासनम्। विध्यभेदे ह्युपासनं न भिद्यते। "तस्मिन् यदन्तस्तदन्वेष्टव्यम्," इति छान्दोग्ये दहरविद्याविधिः। "तस्मिन् यदन्तस्तदुपासितव्यम्" इति तैत्तिरीयके च। तत्र स्थानाद्यभेदादुपास्यस्य ब्रह्मणो ऽप्यभेदात्, उभयत्रोक्तानां धर्माणाविरोधाद्विद्यैक्यमेव। छान्दोग्यबृहदारण्यकशाखयोर्द्युपर्जन्यपृथिवीपुरुषयोषिदाख्यस्याग्निपञ्चकस्य वेद्यतया यत् स्वरूपमाम्नातं तदुभयत्रापि समानम्। अतो न विद्याविधिभेदः ॥ १ ॥

॥ भेदान्नेति चेन्नैकस्यामपि ॥ २ ॥

धर्मविशेषे पुनः श्रुतिः प्रकरणान्तरसहिता भेदापादिका। अतो न विद्यैक्यमिति चेत्। विद्यैक्ये ऽपि शाखान्तरे प्रतिपत्तृभेदादुपपन्ना सा न भेदावहा[2] ॥ २ ॥

॥ स्वाध्यायस्य तथात्वेन हि समाचारे ऽधिकाराच्च सववच्च तन्नियमः ॥ ३ ॥

अथर्ववेदोक्तं "तेषामेवैतां ब्रह्मविद्यां वदेत्" इति शिरोव्रतवतां नियमः। शिरोव्रतस्य च स्वाध्यायाङ्गत्वेन नैतदचीर्णव्रतो ऽधीत इति तस्याध्ययनसंबन्धावगमात् समाचारग्रन्थ इदमपि वेदव्रतेन व्याख्यातमिति वेदव्रतत्वप्रतिपादनाच्च[3]। "ब्रह्मविद्याम्" इत्यत्र ब्रह्मशब्दो वेदविषयः। तस्माद्यथा सवो होमस्तेषामेव। तथा शिरोव्रतमपि। अतस्तत्र विद्याभेदे लिङ्गम् ॥ ३ ॥

१—यः। गु—इति पा०।
२ विद्यैक्ये शाखान्तरप्रतिपत्तृमात्रभेदो न भेदावहः इति पा०।
३—त्वावगमाच्च इति पा०।

॥ दर्शयति च ॥ ४ ॥

श्रुतिरेव विद्यैक्यं दर्शयति । महोपनिषत्कैवल्योपनिषद्दोर्दहरविद्यायाम् ।

"ऋतं सत्यं परं ब्रह्म पुरुषं कृष्णपिङ्गलम् ।
ऊर्ध्वरेतं विरूपाक्षम्,
"उमासहायं परमेश्वरं प्रभुं
त्रिलोचनं नीलकण्ठं प्रशान्तम्" ।

इत्यादिना निर्दिष्टमीश्वरस्य रूपमपेत्य रूपवत्त्वात् पाप्मजरामरणादिप्रसक्तौ छान्दोग्ये[1]"अथ यदिदमस्मिन्" इत्यारभ्य तस्य गुणाष्टकविशिष्टत्वं केवलमुच्यते। तत्र तत्र धर्मविशेषापादिका पुनः श्रुतिर्विद्याभेदिकेति शङ्काया अपि नावकाशः[2] । ततश्चोदनाद्यविशेषात् सकलवेदान्तप्रत्ययमेकमेवोपासनम् । तद्भेदकशब्दान्तराद्यदर्शनात् । इति सिद्धम् ॥ ४ ॥

सर्ववेदान्तचोदितानां विद्यानामैक्यप्रतिपादनफलमाह ॥

उपसंहारोऽर्थाभेदाद्वि-
धिशेषवत् समाने च ॥ ५ ॥

इह विद्यैक्ये सत्यपि शाखान्तर उपसंहारो न कर्तव्यः कर्तव्यो वेति संशये न कर्तव्य इति पूर्वः पक्षः[3] । तथाहि, छान्दोग्ये दहरविद्यायामपहतपाप्मत्वादयो गुणा आम्नाताः । न तैत्तिरीये[4] । तत्र तेषामुपसंहारः कर्तव्यः[5] । तत्रानुक्तत्वात् । विद्योपकारस्तत्रोक्तैरेव कृष्णपिङ्गलत्वादिगुणैर्भविष्यति । किमुपसंहारेणाचोदितेन। इति प्राप्तेऽभिधीयते। सर्वत्र विद्यैक्ये छान्दोग्यादिषूक्तानां दहराद्युपासनधर्माणामपहतपाप्मत्वादीनामन्यत्र तैत्तिरीयकदहरादिषूपसंहारः कार्यः । विद्योपकाररूपस्यार्थस्यैकत्वात् । यथैकविधिशेषतया विहितानामङ्गानामग्निहोत्रादिषु[6], तथैव चोदनादिभिः समाने[7] दहराद्युपासने गुणानां प्राप्तिरिति गुणोपसंहारो युक्त एव ॥ ५ ॥

॥ अन्यथात्वं शब्दादिति चेन्नाविशेषात् ॥ ६ ॥

वाजिनां छन्दोगानां चोद्गीथे प्राणदृष्ट्योपासनं शत्रुपरिभवफलं विधीयते । तत्र विद्यैक्यमस्ति न वेति संदेहे चोदनाद्यविशेषाद्विद्यैक्यमस्तीति पूर्वः पक्षः ।

१–मीश्वरस्वरूपोपासनं छा–इति पा० ।

२–षोपाधिका पुनः श्रुतिरिति न विद्याभेदः इति पा० ।

३–रः कर्तव्यो न वेति संशयः । तथा सति नोपसंहार इति पूर्वं प्राप्नोति इति पा० ।

४–यकदहरविद्यायां इति पा० ।

५ प्राप्तः इति पा० ।

६–त्राद्यनुष्ठानेषु इति पा० ।

७–नाभिस्तत्समाने इति पा० ।

ननु वाजिनां प्राणदृष्ट्योपासनमुदानकर्तृविषयमिति । "अथ[1] हेममासन्यं प्राणमूचुस्त्वं न उद्गायेति तथेति तेभ्य" एष प्राणशब्दात् प्रतीयते[2] । छन्दोगानां तु तदुद्गानकर्मविषयमिति, "य एवायं मुख्यप्राणस्तमुद्गीथमुपासांचक्रिर इति शब्दात् प्रतीयते, तस्मादन्यथात्वं विद्ययोर्नैक्यमिति चेन्न । उ[3]पक्रमाविशेषात् । "द्वया ह प्राजापत्या ह देवाश्चासुराश्च ततः कानीयसा एव देवाः, ज्यायसा असुरास्त एषु लोकेषु अस्पर्धन्त, ते ह देवा ऊचुः,हन्ता[4]सुरान् यज्ञ उद्गीथेनात्ययाम" इत्येकत्र, "देवासुरा ह वै यत्र संयेतिरे उभये प्राजापत्यास्तद्ध[5] देवा उद्गीथमाजह्रुरनेनैवासुरानभिभविष्याम" इत्याद्यन्यत्र । तस्मादुपक्रमाविशेषा[6]दुभयत्र विद्यैक्यमिति ॥ ६ ॥

सिद्धान्तमाह ॥

॥ न वा प्रकरणभेदात् प-
रोवरीयस्त्वादिवत् ॥ ७ ॥

नोभयत्र विद्यैक्यम् । प्रकरणभेदात् । तथाहि, "ओमित्येतदक्षरमुद्गीथमुपासीत" इत्युद्गीथावयवभूतप्रणवविषयं प्रकरणं छन्दोगानाम् । वाजिनां तु[7] कृत्स्नोद्गीथविषयमिति प्रक्रमभेदेन रूपभेदाद्विद्याभेदः[8] । यथैकस्यामपि शाखायामुद्गीथोपासनेषु हिरण्मयदृष्टेः[9] परोवरीयस्त्वादिदृष्टिर्भिद्यते, तथात्रापीति ॥ ७ ॥

आशङ्क्य परिहरति ॥

॥ संज्ञातश्चेत् तदुक्तमस्ति तु तदपि ॥ ८ ॥

उद्गीथविद्येति संज्ञैक्यादुभयत्राभेद[10] इति न वाच्यम् । अस्ति हि विधेयभेदेऽपि संज्ञैक्यम् । यथा नैयमिकाग्निहोत्रे कुण्डपायिनामयनाग्निहोत्रे च नामैक्येऽपि[11] कर्मभेदः । तद्वदत्रापि न विरोधः ॥ ८ ॥

१–र्वपक्षयति । यथा वाजिनां प्राणदृष्ट्योपासनमुद्गीथे । इतरत्र कर्मविषयमिति शब्दादेव प्रतीयते "अथ इति पा० ।

२–येति स तथेति तेभ्य उदगायत्" इत्यादिना, इति पा० ।

३–योरतो नैक्यमिति वक्तव्यम् । तत्रैवोप–

४–त् । हन्ता–इति पा० ।

५–त्र, तद्ध इति पा०

६ एवमुपक्रमे फलैक्येन विशेषाभावा–इति पा० ।

७–गानाम् । "हन्तासुरान् यज्ञ उद्गीथेनात्ययाम" इति वाजिनां इति पा० ।

८–द एव इति पा० ।

९–षु राजादिदृष्टेः इति पा० ।

१०–ति संज्ञाभेदाभावादुभयत्र न भेद इति पा० ।

११–त्रे कश्यपानामयनाग्निहोत्रे च दृष्टो नामैक्येऽपि हि इति पा० ।

॥ व्याप्तेश्च समञ्जसम् ॥ ६ ॥

छन्दोग्ये "ओमित्येतदक्षरमुद्गीथमुपासीत" इति श्रूयते। इह प्रणवोद्गीथयोस्तन्त्रमुपासनमुतैकविषयमिति संशये पूर्वः पक्षः। यद्यपि[1] प्रणवोद्गीथयोरिह सामानाधिकरण्यमवगम्यते। तच्च विशेषणविशेष्यतया संभवति। तथाप्युद्गीथेन प्रणवो विशेष्यते प्रणवेन चोद्गीथ[2] इत्यत्र नियामकाभावात् तन्त्रमुपासनमित्येवं प्राप्ते ब्रूमः। न तन्त्रमुद्गीथप्रणवयोरुपासनम्। छान्दोग्ये[3] प्रथमप्रपाठके, "ओमित्येतदक्षरमुद्गीथमुपासीत" ओमित्युद्गायति, तस्योपक्रमवदुत्तरत्रापि खल्वेतस्यैवाक्षरस्योपव्याख्यानं भवतीति प्रणवस्योपास्यत्वव्याप्तेरुद्गीथेन प्रणवो विशेष्यत इति प्रणवविषयत्वमेव समञ्जसम्। अतः प्रणव एवोपास्यः[4] ॥ ९ ॥

॥ सर्वाभेदादन्यत्रेमे ॥ १० ॥

"यो ह वै ज्येष्ठं च श्रेष्ठं च वेद, ज्येष्ठश्च ह वै श्रेष्ठश्च भवति, प्राणो वाव ज्येष्ठश्च श्रेष्ठश्च" इति छन्दोगा वाजिनश्च प्राणविद्यायां ज्येष्ठत्वादिकमधीयते। कौषीतकिनश्च त्रिभिरपि वागादिकरणयामश्रुतेस्तत्कार्यस्य प्राणतुल्यत्वेनैकरूपेण प्राणस्य ज्यैष्ठ्यमुपपादितम्। वागादिगतवसिष्ठत्वादिसंबन्धित्वं प्राणस्योभयेषामुक्तम्। "अथ हैनं वागुवाच, यदहं वसिष्ठोऽस्मि त्वं तद्वसिष्ठोऽसीति" "अथ हैनं चक्षुरुवाच, यदहं प्रतिष्ठास्मि त्वं तत् प्रतिष्ठासीति" "अथ हैनं श्रोत्रमुवाच, यदहं सपदस्मि त्वं तत् सपदसीति" "अथ हैनं मन उवाच, यदहमायतनमस्मि त्वं तदायतनमसीति"। कौषीतकिनां तु मयि वसिष्ठत्वादिकमुपसंहार्यं न वेति संशय एवं विद्वानित्येवंशब्देन[5] तच्छाखोक्तगुणानामेवावधारणान्नोपसंहार्यमिति प्राप्ते ब्रूमः। अनुक्तमपि वशिष्ठत्वादिकमुपसंहार्यमेव। एवंशब्देनानुक्तगुणानामप्युक्तगुणवत् परामर्शात्। प्राणस्य गुणिन एकत्वेन[6] गुणानामपि बुद्धिस्थत्वात्। यथा देवदत्तो मथुरायामध्यापयन् दृष्टः पुनर्माहिष्मत्यामध्यापकत्वेन[7] प्रत्यभिज्ञायते। तथा छान्दोग्यादिषु वसिष्ठत्वादिनोक्तः पुनरन्यत्र केवल उच्यमानेऽपि[1] तद्गुणविशिष्टतया बुद्धिस्थो भवति। तत एवंशब्देन परामर्शाद्वसिष्ठत्वादिकमुपसंहार्यमिति ॥ १० ॥

॥ आनन्दादयः प्रधानस्य ॥ ११ ॥

अभेदादिति शेषः। "सत्यं ज्ञानमनन्तं ब्रह्म" "आनन्दो ब्रह्म",

ऋतं सत्यं परं ब्रह्म पुरुषं कृष्णपिङ्गलम्"।

"आकाशशरीरं ब्रह्म" "प्राणारामं मनआनन्दं शान्तिसमृद्धम्" इत्यादिष्वानन्दादयो गुणाः परविद्यासु प्रधानस्य ब्रह्मणः श्रूयन्ते। ते सर्वासु परविद्यासूपसंहार्या न वेति संशये नोपसंहार्याः। ब्रह्मण एकस्यानन्दाद्यनेकगुणविशिष्टत्वेऽनेकत्वप्रसङ्गात्[2]। विशेषणानां विशेष्यभेदकत्वात्। अथवा तत्र तत्रोक्तगुणमात्रेणापि तदुपासनसंभवात्। इत्येवं प्राप्तेऽभिधीयते। गुणिनो ब्रह्मण एकत्वात् सर्वासु परविद्यासूपसंहार्या आनन्दादयः। नीलो धवलो रक्तः खण्डः[3] पूर्णशृङ्ग इत्यादीनां विरुद्धधर्माणामेव विशिष्टधर्मिभेदावहत्वम्। नतु नीलं सुगन्धि महदुत्पलमित्यत्र नीलिमादीनाम्। अतो ब्रह्मणो गुणानामविरोधान्न भेदावहत्वम्। तस्माद्गुणिनो ब्रह्मणः सर्वत्राभेदादुपसंहार्या आनन्दादय इति ॥ ११ ॥

॥ प्रियशिरस्त्वाद्यप्राप्तिरुपचयापचयौ हि भेदे ॥ १२ ॥

"तस्य प्रियमेव शिर" इत्यादौ प्रियशिरस्त्वादयो ब्रह्मधर्मत्वेन श्रूयन्ते। तेऽप्यानन्दादय इव परविद्यासूपसंहार्या न वेति संशये तेषामपि[4] सत्यसंकल्पादिवदुपसंहारे को विरोध इति प्राप्ते ब्रूमः। नास्ति प्रियशिरस्त्वादीनामुपसंहारः परविद्यायाः। सत्यसंकल्पादिवत् तेषां ब्रह्मगुणत्वाभावात्[5]। उपसंहारे तेषां ब्रह्मणः सावयवत्वेनोपचयापचयप्रसक्तिः। भेदो हि प्रियशिरस्त्वादिकल्पने ब्रह्मणो भवति। अतस्तेषां नोपसंहारः ॥ १२ ॥

आनन्दादीनामिव सर्वज्ञतादीनां[6] ब्रह्मस्वरूपान्तर्भूतगुणत्वादविरोध इत्याह ॥

॥ इतरे त्वर्थसामान्यात् ॥ १३ ॥

इतरे सर्वज्ञत्वनित्यतृप्तत्वादयो ब्रह्मस्वरूपान्तर्गततयार्थसामान्यात् सर्वत्रोपसंहार्याः। प्रियशिरस्त्वादीनामनन्तर्भावान्नोपसंहार इति ॥ १३ ॥

१–ये तन्त्रमिति पूर्वमुच्यते। तथाहि, इति पा०।

२–ते, किंवा प्रणवेनो–इति पा०।

३ पूर्वत्र इति पा०।

४–के उपक्रमवत् सर्वत्रोत्तरत्र च प्रणवस्यैवोपास्यत्वव्याप्तेरुद्गीथेन प्रणव एव विशेष्यते। ततः प्रणवविषयत्वमेवोद्गीथस्य समञ्जसमिति प्रणवस्यैवोपास्यत्वमिति सिद्धम् इति पा०।

५–पपादितम्। वागादिगतवशिष्ठत्वादिसंबन्धित्वमपि प्राणस्यैवोभयत्रोक्तम्। कौषीतकिनां च नोक्तम्। अनुक्तं वशिष्ठत्वादिकमुपसंहार्यं न वेति संशये य एवं वेदेत्येवंशब्देन इति पा०।

६–र्थः क्रियते। कुतः। प्राणस्य गुणिन एकत्वात्। इति पा०।

७–त्यामनध्यापयन्नप्यध्यापकत्वेनैव इति पा०।

१–षु वशिष्ठत्वादिकमुक्तं तत्रोपलभ्यते। पुनस्तत्रापि नैकफलोऽपि इति पा०।

२–यः। तथा सति नोपसंहार्या इति प्राप्नोति। ब्रह्मण एकस्यानन्दा भिद्यन्ते। गुणविशिष्टत्वेऽनेकत्वप्रसङ्गः इति पा०।

३–क्तो मुण्डः इति पा०।

४–यः। तथा सति प्रियशिरस्त्वादीनामपि इति पा०।

५– वदेतेषां ब्रह्मणो गुणत्वायोगात् इति पा०।

६ सत्यज्ञानादीनां इति पा०।

॥ आध्यानाय प्रयोजनाभावात् ॥ १४ ॥

इह पूर्वोक्तानन्दमयात्मानुसंधानवदन्नमयादीनामप्यनुसंधानं नियतमस्ति न वेति संशयः। अन्नमयादिसर्वान्तरस्यानन्दमयस्यान्नमयाद्यनुसंधानक्रममन्तरेण तदन्तरत्वेनानुसंधानायोगात् तेषामनुसंधानं नियतमिति प्राप्ते[2]ऽभिधीयते। अन्नमयादीनामनुसंधानं न नियतम्[3]। प्रयोजनाभावात्। तस्यानन्दमयब्रह्मात्मसिद्धिः प्रयोजनम्। अतस्तत्सिद्धिपर्यन्तमेवान्नमयादीनामनुसंधानमिति तेषा[4]मनियतमनुसंधानम् ॥१४॥

॥ आत्मशब्दाच्च ॥ १५ ॥

"एतमन्नमयात्मानमुपसंक्रम्य" इत्यादिषु प्रत्येकमात्मशब्दादन्नमयादीनामन्नाद्यधिष्ठातृचेतनत्व[5]मवगम्यते। ब्रह्मव्यतिरिक्तानां चेतनानां मुमुक्षुध्येयत्वनिषेधाद्ध्यानकाले तेषां नानुसंधानम्[6]। तथाथर्वशिखायाम्। "शिव एको ध्येयः शिवंकरः सर्वमन्यत् परित्यज्य" इति शिवव्यतिरिक्तानां मुमुक्षुध्येयत्वं निषिध्यते। ततोऽन्नमयादीनामनुसंधानानियमः ॥ १५ ॥

॥ आत्मगृहीतिरितरवदुत्तरात् ॥ १६ ॥

इह "अन्योऽन्तर आत्मानन्दमय" इत्यात्मगृहीतिः परमात्मविषया, न प्रत्यगात्मविषया। "आत्मन आकाशः संभूत" इत्यत्रात्मशब्दवत्। तदिदमुत्तरात् "आनन्दमयमात्मानमुपसंक्रम्य" इत्येतस्मादवगम्यते। तस्मादानन्दमुख्यं ब्रह्मानुसंधानमिति[7] ॥ १६ ॥

॥ अन्वयादिति चेत् स्यादवधारणात्। १७ ॥

अन्नमयादीनामप्यात्मशब्दान्वयात् परमात्मत्वेन तेषामुपासनमविरुद्ध[8]मिति चेत्। "अन्योऽन्तर आत्मानन्दमय" इत्यानन्दमयस्य परमात्मनः शिवस्यान्नमयादिभ्यो भिन्नत्वावगमात् "शिव एको ध्येयः शिवंकरः सर्वमन्यत् परित्यज्य" इति सकलेतरपरित्यागपूर्वकं शिवस्यैकस्यैव ध्येयत्वावधारणात्। अत्र हि निरस्तसमस्तकलङ्कतया निखिलमङ्गलभाजनतया च शिवशब्देन परं ब्रह्मोच्यते। यद्विरूपाक्षं कृष्णपिङ्गलं तदनुसंधाननैरन्तर्याद्धि तत्सारूप्यापत्तिर्मुक्तिः। अतो यथोपासनं फलमिति तद्व्यतिरिक्तानां शिवताशून्यानामनुसंधानं न शिवत्वापादकम्। यतो मुक्तिरुपपद्यते, अत आनन्दमयः शिव एक एवानुसंधेय इति ॥ १७ ॥

॥ कार्याख्यानादपूर्वम् ॥ १८ ॥

"यो ह वै ज्येष्ठं च श्रेष्ठं च वेद" इत्यारभ्य किं मे वास इति वागादीन् प्रति प्राणप्रश्नस्योत्तरम्। अपां प्राणवासस्त्वमुक्त्वा "तस्माद्वेवंविदशिष्यं नाचामेदशित्वा चाचामेद्वेतमेव तदन्नमनग्नं कुरुत" इति श्रूयते। अत्राचमनं प्राणवासस्त्वं चेत्युभयं विधीयते। उत प्राणवासस्त्वमेव। इति संशये विशेषाभावादुभयमपीति प्राप्त आचमनस्य स्मृत्याचारेण प्राप्तत्वादप्राप्तं प्राणवासस्त्वमेवापूर्वं विधीयते[1]। अप्राप्तस्यैव विधेयत्वाख्यानादनुवादस्वरूपे विधिकल्पना। तस्मादपूर्वं प्राणवासस्त्वानुसंधानमेव विधेयमिति युक्तम् ॥ १८ ॥

॥ समान एवं चाभेदात् ॥ १९ ॥

अग्निरहस्ये बृहदारण्यके च शाण्डिल्यविद्याम्नायते। एकत्र "आत्मानमुपासीत मनोमयं प्राणशरीरं भारूपं सत्यसंकल्पमाकाशात्मानम्,[2]" इति। इतरत्र "मनोमयोऽयं पुरुषो भासत्यस्तस्मिन्नन्तर्हृदये यथा व्रीहिर्वा यवो वा स एव सर्वस्य वशी सर्वस्येशानः सर्वस्याधिपतिः सर्वमिदं प्रशास्ति" इति। उभयत्र विद्या भिन्ना न वेति संशयः। एकत्राकाशात्मकत्वेन महत्त्वम्, इतरत्र यवसादृश्येनाल्पत्वम्, एकत्र सत्यसंकल्पत्वम्, इतरत्र वशित्वादिकम्। इति धर्मभेदाद्भिन्नेति प्राप्ते ब्रूमः। सर्वत्र मनोमयत्वादिके समान आकाशात्मेत्यस्याकाशवत् स्वच्छतापरत्वेन माहात्म्यपरतया स्तावकत्वेन वोपपत्तेः। वशित्वादेः सत्यसंकल्पत्वविशेषरूपत्वेन तदभेदाच्च वि[3]द्यैक्यम् ॥ १९ ॥

॥ संबन्धादेवमन्यत्रापि ॥ २० ॥

बृहदारण्यके "य एष एतस्मिन् मण्डले पुरुषो यश्चायं दक्षिणेऽक्षिणि" इत्युपक्रम्य सत्यस्य ब्रह्मणो व्याहृतिशरीरत्वेनादित्यमण्डलेऽक्षिणि चोपास्यत्वमुक्त्वा "तस्योपनिषदहरित्यधिदैवतं" "तस्योपनिषदहमध्यात्ममिति द्वे नामनी आम्नायेते। उभयत्रोपसंहार्ये न वेति संशये सत्युपास्यैक्याद्विद्यैक्यम्। अत उभयत्रापि द्वे नामनी इति पूर्वः पक्षः ॥ २० ॥

सिद्धान्त उच्यते ॥

॥ न वा विशेषात् ॥ २१ ॥

नात्र विद्यैक्यम्। आदित्याक्षिस्थानविशेषसंबन्धित्वेनोपास्यभेदात्। अतस्तत्र नियते नामनी[4] ॥ २१ ॥

१–यः। किमुच्यते। अत्रान्न–इति पा०।

२–ति। अत्रा–इति पा०।

३–यतमिति कथम्। इति पा०।

४–धानम्। अन्यथा प्रयोजनाभावः। अतस्तेषा–इति पा०।

५–दिनान्नमयानां प्रत्येकमात्मशब्दाच्चेतनाधिष्ठातृत्व–इति पा०।

६–धात् तेषामनुसंधाने प्रयोजनाभावः। इति पा०।

७–न्दमयात्मानुसंधानं ब्रह्मानुसंधानमेव मुख्यमिति इति पा०।

८–याच्चेतनवाचकत्वेनानुसंधानमवि–इति पा०।

१–प्ते ब्रूमः। आचमनस्य प्राप्तत्वात् स्मृत्याचारेणापां प्राणवासस्त्वमपूर्वमेव विधीयते। तथाहि इति पा०।

२–सत्यं सत्यसंकल्पमीशानम् इति पा०।

३–माने शिवत्वादेः सत्यसंकल्पत्वादिरूपेणाभेदाद्वि–इति पा०।

४–स्थानसंबन्धविशेषभेदादुपास्यस्यापि भेदः। अतस्तत्र नियते नामनी नोभयत्रैव इति पा०।

॥ दर्शयति च ॥ २२ ॥

छान्दोग्ये तैत्तिरीये च मण्डलविद्याम्नाता । सैका भिन्ना न वेति संशये पूर्वः पक्षः । एकत्र "य एषोऽन्तरादित्ये हिरण्मयः पुरुषो दृश्यते हिरण्यश्मश्रुर्हिरण्यकेश आ प्रनखात् सर्व एव सुवर्ण" इत्यादि श्रूयते। अन्यत्र "य एषोऽन्तरादित्ये हिरण्मयः पुरुषे" इति त्रयीमयमण्डलान्तर्वर्तिपुरुषान्तर्वर्तितया हिरण्मयं पुरुषं प्रस्तुत्य तस्योपसंहारे "सर्वो वै रुद्र" इत्यारभ्य "नमो हिरण्यबाहवे हिरण्यवर्णाय हिरण्यपतयेऽम्बिकापतय उमापतये पशुपतये नमो नम" इत्यन्तेन सर्वात्मत्वं हिरण्यबाहुत्वं हिरण्यपतित्वमुमापतित्वं चाम्नायते । तत्रैकत्र सर्वाङ्गसुवर्णत्वमन्यत्र बाहु[1]मात्रसुवर्णत्वमिति रूपभेदः । एकत्र "सर्वो वै रुद्र" इति सर्वात्मत्वम्, अन्यत्र सर्वेषां लोकानामीष्ट" इति सर्वाधिपत्यम्। अतो धर्मभेदः । तस्मान्न विद्यैक्यमिति[2] प्राप्ते ब्रूमः । न भिन्ना विद्या । अन्तरादित्य इति स्थानैक्यमेव विद्यैक्यं दर्शयति । तैत्तिरीये "हिरण्मयः पुरुष" इत्युपक्रमेण बाहुग्रहणस्योपलक्षणत्वादुपसंहारेऽपि सर्वाङ्गसुवर्णत्वमेव विवक्षितम् । जगदीश्वरस्यापि तदनुप्रवेशात् तदात्मत्वं युक्तमिति निरूपितम् । तस्मादुभयत्रैकस्य प्रतिपाद्यत्वादुभयत्राप्युमापतित्वादिकमुपसंहार्यम्[3] ॥ २२ ॥

॥ संभृतिद्युव्याप्त्यपि चातः ॥ २३ ॥

राणायनीयानां खिलेषु श्रूयते। "ब्रह्मज्येष्ठा वीर्यासंभृतानि ब्रह्माग्रे ज्येष्ठं दिवमाततान ब्रह्मा भूतानां प्रथमो जज्ञे तेनार्हति ब्रह्मणा स्पर्धितुं कः" इति[4] । यानि लोके त्रिपुरदहनकालकूटकवलनादीनि, तानि निरतिशयानि ज्येष्ठान्यनन्यसुकराणि श्रीकण्ठमूर्त्यादिभिः संभृतानि परं ब्रह्म आततान संपादितवत्, ज्येष्ठं हरिहिरण्यगर्भादिभ्योऽप्युत्कृष्टं ब्रह्मेति, अग्रे तेषामपि सृष्टेः प्राग्दिवं परमाकाशपदमाततान, व्याप्याध्यास्तेति तेषां महतां वीर्याणां संभृतिर्द्युव्याप्तिश्च सर्वासु परविद्यासूपसंहार्या न वेति संशये ब्रह्मगुणत्वाविशेषादनारभ्याधीतत्वाच्च सर्वासु परविद्यासूपसंहार्येति प्राप्तेऽभिधीयते । न सर्वासूपसंहार्या व्याप्तिः । सामर्थ्यादल्पस्थानव्यतिरिक्तेषूपसंहार्या। "देवा ह वै स्वर्गं लोकमगमन्, ते देवा रुद्रमपृच्छन्, को भवानिति", निरतिशयसुखास्पदतया स्वर्गशब्दवाच्यं ब्रह्मादिपदेभ्योऽपि महत्तरं महास्थानं हि श्रूयते। ततः स्वल्पस्थानव्यतिरिक्तेषु वैश्वानराद्युपासनेषु द्युव्याप्तिरुपसंहार्येति । तत्सहचारान्महावीर्यसंभृतिस्तत्रैवोपसंहार्या[1] ॥ २३ ॥

॥ पुरुषविद्यायामपि चेतरेषामनाम्नानात् ॥ २४ ॥

छान्दोग्यतैत्तिरीयकयोः पुरुषविद्याम्नाता । "पुरुषो वाव यज्ञस्तस्य यानि चतुर्विंशतिवर्षाणि तत् प्रातःसवनम्" इत्यादिरेकत्र, "तस्यैवं[2] विदुषो यज्ञस्यात्मा यजमानः श्रद्धा पत्नी शरीरमिध्ममुरो वेदिः"; अन्यत्र सोभयत्राभिन्ना भिन्ना वेति संशयः। उभयत्र पुरुषविद्येति नामाभेदाद्यज्ञावयवकल्पनासाम्याच्च भिन्नेति प्राप्तेऽभिधीयते । तैत्तिरीये समाम्नातानां[3] यजमानपत्न्यादीनां यज्ञावयवानां सवनत्रयादीनां च छान्दोग्येऽनाम्नानात् तत्रान्यथैव सवनत्रयादिकल्पनाच्च भिन्नैवोभयत्र पुरुषविद्या। तैत्तिरीयके हि "यत् सायं प्रातर्मध्यं दिनं च तानि सवनानि" इति सवनत्रयकल्पनम् । छान्दोग्ये पुरुषायुषं त्रेधा विभज्य सवनत्रयकल्पम् । न तैत्तिरीये[4] । फलश्रवणात्। "ब्रह्मणे त्वा महस ओम्" इत्यात्मानं युञ्जीत" इति ब्रह्मविद्यामभिधाय "ब्रह्मणो महिमानमाप्नोति" इति तत्फलं चाभिधाय "तस्यैवं विदुष" इत्यादिनाम्नाता पुरुषविद्या प्रस्तुतब्रह्मविद्याङ्गमिति । तत्फलं ब्रह्मप्राप्तिरेव[5] छान्दोग्ये प्राह "षोडशं वर्षशतं जीवति" इति फलं श्रुतम् । ततः फलभेदादवयवभेदाच्च न विद्यैक्यमिति ॥ २४ ॥

॥ वेधाद्यर्थभेदात् ॥ २५ ॥

तैत्तिरीयाणामुपनिषदुपक्रमे श्रुतौ "शं नो मित्रः शं वरुणः सह नाववतु इति मन्त्रौ [6]विद्याङ्गभूतौ न वेति संशये विद्यासंनिधिवशाद्विद्याङ्गभूताविति प्राप्ते,

उच्यते ।

यथा, आथर्वणिकानामुपनिषदारम्भे पठितः "शुक्रं प्रविध्य हृदयं प्रविध्य" इत्यादिमन्त्रो हृदयवेधादिप्रकाशनसामर्थ्यरूपाल्लिङ्गादभिचारशेषः । यथा वा, ऐतरेयिणां वाजसनेयिनां चोपनिषदारम्भे पठितं महाव्रतप्रवर्ग्यरूपं च कर्म श्रुत्योर्विनियोगात् क्रतुशेषः । तथेमावपि मन्त्रौ "ऋतं वदिष्यामि, तेजस्वि नावधीतमस्तु" इत्यादिलिङ्गादध्ययनशेषभूतावेव ।

१–ते । "सर्व एष सुवर्ण" इत्येकत्र सर्वाङ्गसुवर्णत्वम्, अन्यत्र "हिरण्यबाहव" इति बाहु–इति पा० ।

२ तस्मादभिन्ना विद्येति इति पा० ।

३–पितमेव तस्योभयत्र प्रतिपाद्यत्वादविरोधः । तस्मादुभयत्राप्युमापतित्वादिलिङ्गं सिद्धमेव इति पा० ।

४ इत्यस्य विषयः । इति पा० ।

१ स्वल्पेतरस्थानवर्ति ब्रह्म महावीर्यादिसंभृतमुपास्यमिति पा० ।

२–विद्या श्रुता । तत्र संज्ञैक्याद्विद्यैक्ये प्राप्त उच्यते । तस्यैवं इति पा० ।

३–रीरम्" इत्यादिनाम्नातानां इति पा० ।

४–दीनां चान्यत्राम्नानादनाम्नानाच्च भिन्नैव । तैत्तिरीये इति पा० ।

५–फलश्रवणात् । ब्रह्मप्राप्तिरेव प्रस्तुतविद्याङ्गं भवति इति पा० ।

६ "शं नो मित्रः शं वरुणः सह नाववतु" इति मन्त्रौ तैत्तिरीयके श्रूयेते । तदेतौ वि–इत्येव पा० ।

न विद्याङ्गभूतौ । प्रयोजनभेदात् । श्रुतिलिङ्गवाक्येभ्यः संनिधेर्दुर्बलत्वात्[1] ॥ २५ ॥

॥ हानौ तूपायनशब्दशेषत्वात् कुशाच्छन्दस्तुत्युपगानवत् तदुक्तम् ॥ २६ ॥

विदुषो ब्रह्म प्राप्नुवतः पुण्यपापयोर्विमोचनमेकस्यां शाखायामाम्नातम्[2] । विमुक्तयोः पुण्यस्य प्रवेशस्थानं सुहृदः, पापस्य प्रवेशस्थानं शत्रव, इति एकस्यां शाखायामाम्नातम् । अन्यस्यां विमोचनं प्रवेशस्थानं चेत्युभयमाम्नातम् । सर्वं चिन्तनार्थमेव । इह विमोचनं प्रवेशस्थानं चेत्यनयोः समुच्चयेन सर्वत्र चिन्तनम्, उत विकल्पेनेति संशयः । किं तावत् प्राप्तम् । "तस्य पुत्रा दायमुपयन्ति सुहृदः साधुकृत्यां द्विषन्तः पापकृत्याम्" इति शाट्यायनके श्रूयते । ताण्डिशाखायाम्, "अश्व इव रोमाणि विधूय पापं, चन्द्र इव राहोर्मुखात् प्रमुच्य" इति श्रूयते । "तदा विद्वान् पुण्यपापे विधूय निरञ्जनः परमं साम्यमुपैति" इति चाथर्वणे । अत्र विदुषः पापपरित्यागप्रतिपादकश्रुतौ परित्यक्तयोः पुण्यपापयोः प्रवेशस्थानं नोपसंहार्यम् । परित्यागश्रुतावश्रुतत्वात् । इति प्राप्ते ब्रूमः । हानिर्विमोचनमुपायनं प्रवेशः । केवलहानावाम्नातायां केवलोपायने चाम्नात इतरेतरसमुच्चय एव न्याय्यो न विकल्पः । उपायनशब्दस्य हानिवाक्यशेषत्वात् तच्छेषत्वम् । त्यक्तयोः प्रवेशस्थानवाचित्वेन तदपेक्षत्वात् । प्रदेशान्तराम्नातवाक्यस्य प्रदेशान्तरवाक्यं कथं शेषभूतमिति चेत् । यथा "वानस्पत्याः कुशा" इत्येतद्वाक्यशेषभूतम्, "औदुम्बर्यः कुशा" इत्येतत्, तद्विशेषकं प्रदेशान्तरस्थम् । यथा "देवासुराणां छन्दोभिः", इत्येतच्छेषभूतं "देवच्छन्दांसि पूर्वम्", इति प्रदेशान्तरस्थम् । यथा षोडशिनः स्तोत्रमुपाकरोति", इत्येतच्छेषभूतं "समयाध्युषिते सूर्ये षोडशिनः स्तोत्रम्" इति । यथा "ऋत्विज उपगायन्ति" इत्येतच्छेषभूतं "नाध्वर्युरुपगायेत्" इति । पर्युदासवाक्यस्य हानिवाक्यशेषतया संभवन्त्यां गतौ न विकल्पो न्याय्यः । तदुक्तं प्रमथतन्त्रे, "अपितु वाक्यशेषः स्यादन्याय्यत्वाद्विकल्पस्य" इति स्तुत्यर्थं प्रकर्षार्थं वेति[3] । नन्वर्थवादः कथं देशान्तरस्थार्थवादसापेक्ष इति चेत् । न । सामोपास्तिस्तावकत्वेन श्रुतस्य "एकविंशो वा इतोऽसावादित्य" इत्यर्थवादस्यैकविंशत्वनिर्णयाय तैत्तिरीयकगतसत्रप्रकरणस्थार्थवादापेक्षत्वदर्शनाद्, "द्वादश मासाः पञ्चर्तवस्त्रय इमे लोका असावादित्य एकविंश" इति हि तत्र संख्यानिर्वाह उक्तः । ततोऽर्थवादत्वेऽप्युपायनमुपसंहार्यम् । हानोपायनयोरेकत्राप्यवगतिरस्ति कौषीतकिश्रुतौ । "तत् सुकृतदुष्कृते विधूनुते, तस्य प्रिया ज्ञातयः सुकृतमुपयन्ति, अप्रिया दुष्कृतम्", इति । अतस्तयोः समुच्चयः ॥ २६ ॥

॥ सांपराये तर्तव्याभावात् तथाह्यन्ये ॥ २७ ॥

पूर्वोक्तं पुण्यपापविमोचनं देहवियोगकाल एव चिन्तनीयम्, उत मार्गे वेति संदिह्य पूर्वपक्षं प्रवर्तयति । तथाहि, "अश्व इव रोमाणि विधूय पापम्" "धूत्वा शरीरम्" इति कुत्रचिद्देहवियोगकाल एव श्रुता सुकृतदुष्कृतहानिः । कुत्रचित् "स आगच्छति विरजां नदीं तां मनसात्येति", "तत् सुकृतदुष्कृते विधूनुत" इत्यध्वनि श्रुता । एवमुभयश्रुतिसद्भावेऽपि सांपराये देहवियोगकाल एव चिन्तनीया । तदूर्ध्वं ब्रह्मप्राप्तिव्यतिरेकेण प्राप्तस्य कर्मासाध्यस्य सुखदुःखभोगस्याभावात् । तथाह्यधीयतेऽन्ये । "तस्य तावदेव चिरं यावन्न विमोक्ष्ये, अथ संपत्स्य" इति देहवियोगादूर्ध्वं ब्रह्म प्राप्तमेव ॥ २७ ॥

॥ छन्दत उभयाविरोधात् ॥ २८ ॥

देहवियोगकाले पुण्यपापविमोचनश्रुतेस्तदूर्ध्वं ब्रह्मप्राप्तिश्रुत्यविरोधाद्धेतोः,[1] "तत् सुकृतदुष्कृते विधूनुत" इति श्रुतिखण्डश्छन्दतो नेतव्यः । "एतं देवयानं पन्थानमापद्य" इति वाक्यखण्डात् प्रागुपनेतव्यः[2] ॥ २८ ॥

॥ उपपन्नस्तल्लक्षणार्थोपलब्धेर्लोकवत् ॥ २९ ॥

देहवियोगकाले सर्वकर्मक्षयेऽपि गतिविधिरुपपन्न एव ब्रह्मोपासकानाम् । तत्र विहाररूपार्थोपलब्धेः । "स स्वराड्भवति तस्य सर्वेषु लोकेषु कामचारो भवति" इति दृश्यते । लोकवत् । यथा लोके राजाश्रितानां पुरुषाणामनितरपुरुषसाधारण[3]सर्वार्थसिद्धिः । अतो मार्गश्रुतिरपि न बाध्यते । देहवियोगकाले सकलकर्मक्षयेऽपि विद्यामाहात्म्याल्लिङ्गशरीरावस्थानेन मार्गगतिस्तत्तद्देशविहारचन्द्रसंवादादिसर्वार्थसिद्धिसंभवादिति ॥ २९ ॥

एवं प्राप्ते सिद्धान्त उच्यते ॥

॥ गतेरर्थवत्त्वमुभयथान्यथा हि विरोधः ॥ ३० ॥

देहवियोगकाले विरजानद्यतिक्रमणकाले चेत्युभयथा कर्मक्षये सत्येव देवयानगतेः प्रयोजनवत्त्वम् । अन्यथा देहवियोग-

---

१—फ्तं, तत उच्यते । "शुक्रं प्रविध्य" इत्यादिमन्त्रवन्महाव्रतादिवदिमावपि सामर्थ्येन प्रयोजनभेदावगमादध्ययनशेषभूतावेव न विद्याङ्गभूतौ । लिङ्गसंनिधौ वाक्यं दुर्बलमेव । ततो न विरोध इति पा० ।

२—यां तच्चिन्तनार्थमधीतम् इति पा० ।

३—ल्पस्येत्यादिना इति पा० ।

१—श्रुतिरित्युभयाविरो—इति पा० ।

२—व्यः । एवमेव हि प्रपद्यत इति वाक्यशेषात् इत्येव पा० ।

३—णामितरपुरुषासाधारण—इति पा० ।

काल एव सर्वकर्मक्षये तदनन्तरमेवासौ मुक्त इति देवयानगतेर्निष्प्रयोजनत्वात् । "देवयानगतिमुपपद्य स्वेन रूपेणाभिनिष्पद्यत" इति देवयानेन ब्रह्मप्राप्त्यनन्तरमेव धीविकाशादिरूपस्वरूपाविर्भावश्रवणस्य च विरोधः स्यात् । एवं च यद्यपि विद्यासामर्थ्याद्देवयानेन गतिस्तत्तद्देशविहारचन्द्रसंवादादिकमणिमविहारादिवदुपपद्यते । तथापि यावद् ब्रह्मप्राप्तिधीसंकोचरूपसंसारानुवृत्तिर्विद्यासामर्थ्यान्नोपपद्यत इति तन्मूलभूतकर्मलेशानुवृत्तिरवश्यमेष्टव्या । नच परमेश्वरसंकल्पविशेषादेव तदनुवृत्तिः स्यादिति वाच्यम् । तस्यैवास्माभिः कर्ममूलतयोच्यमानत्वात् । न ह्यस्मन्मते विहितनिषिद्धाचरणप्रयुक्तः परमेश्वरसंकल्पः कश्चिदस्ति । तत्संकल्पानपेक्षे वा पुण्यपापे स्तः ।

ननु ब्रह्मप्राप्त्यनन्तरं धीविकाशादिस्वरूपाविर्भावश्च, तावत्पर्यन्तं धीसंकोचहेतुकर्मानुवृत्त्या भाव्यम् । कथं विरजानद्यतिक्रमणानन्तरमेव कर्मक्षयः ।

उच्यते । प्राकृतप्रपञ्चसीमावध्यतिक्रमणमेव परमाकाशरूपपरमशिवपदप्राप्तिरिति सैव "परं ज्योतिरुपसंपद्य" इत्यनेन ब्रह्मप्राप्तिर्विवक्षिता । विष्णुपदसंबन्धिनी विरजा नदी प्राकृतप्रपञ्चसीमावधिः । तदनुप्रवेशतः प्रक्षीणसर्वकर्मलेपा योगिनो विष्णुपदादूर्ध्वमप्राकृतशिवपदं परमानन्दमयमनुविशन्ति । तथा हि श्रूयते । "सोऽध्वनः परमाप्नोति तद्विष्णोः परमं पदम्," इति । अतो न विरोधः[1] ॥ ३० ॥

॥ यावदधिकारमवस्थितिराधिकारिकाणाम् ॥ ३१ ॥

पूर्वत्राभिहित[2]मुपासकानां पुण्यपापविमोचनं, ब्रह्मप्राप्तिश्च । तदिहाधिकारिकाणामधिकारं भोगमन्तरेण मुक्तिरस्ति न वेति संशयः । किं तावत् प्राप्तम् । वसिष्ठादीनामधिकारिणां तत्र तत्र पुराणादिषु जन्मान्तरश्रवणात् तेषां मुक्तिर्नास्त्येव । अतस्तत्त्वविदां पाक्षिकी मोक्षप्राप्तिरिति । अत्रोच्यते । अधिकारिपुरुषाणां देहपातादूर्ध्वमपि फलान्तरानुभव एव । आ प्रारब्धाधिकारहेतुकर्मविनाशात् । एवंच यावदधिकारसमाप्तिस्तावत् तद्धेतुकर्मानुभवाय तत्रैव तेषामवस्थितिर्नार्चिरादिप्राप्तिः । ज्ञानिनामपि प्रारब्धं कर्मानुभवादेव नश्यति । अतोऽधिकारिणामधिकारनिवृत्तेरनन्तरं मुक्तिर्न पाक्षिकी मोक्षप्राप्तिरिति ॥ ३१ ॥

॥ अनियमः सर्वेषामविरोधः शब्दानुमानाभ्याम्* ॥ ३२ ॥

उपकोशलाद्युपासनेष्वर्चिरादिगतिराम्नायते । सा किं तन्निष्ठानामेव, उत सर्वोपासकानामिति संशयः । छान्दोग्ये पञ्चाग्निविद्यायामुपकोशलविद्यायां चार्चिरादिगतिः पठिता । पाशुपतविद्यायामथर्वशिरसि सूचिता । शाण्डिल्यविद्यादिषु न पठिता । प्रकरणवशाद् यासु श्रुता तास्वेव नियता नापरास्विति पूर्वपक्षे प्राप्ते ब्रूमः । यासु श्रुता तास्वेवेति न नियमः । अपितु सर्वासूपासनासु भवति[1] । तथा सत्येव श्रुतिस्मृतिभ्यामविरोधः । पञ्चाग्निविद्यायां "ये चामी अरण्ये श्रद्धां सत्यमुपासते तेऽर्चिषमभिसंभवन्ति" इत्यविशेषेण श्रुतिः । स्मृतिरपि, "अग्निर्ज्योतिरहः शुक्ल" इत्यविशेषिका । ततः सर्वेषामुपासकानामर्चिरादिगतिर्नियतैव । केचिदाहुः । अनियमः सर्वेषामुपासकानामर्चिरादिगतौ, नियमाभावः । तथासति श्रुतिस्मृतिभ्यामविरोध इति तत्रापि न दोषः । निरन्वयोपासकानां तदपेक्षाभावादिति ॥ ३२ ॥

॥ अक्षरधियां त्ववरोधः सामान्यतद्भावाभ्यामौपसदवत् तदुक्तम् ॥ ३३ ॥

गार्ग्यब्राह्मणे "अस्थूलमनण्वह्रस्वम्" इत्यादौ ब्रह्मबोधाय केचन निषेधाः श्रुताः । कठवल्लीषु "अशब्दमस्पर्शमरूपम्" इत्यादौ, आथर्वणे च "यत् तदद्रेश्यमग्राह्यमगोत्रमवर्णम्" इत्यादौ श्रुताः । तेषामानन्दादिवदुपसंहारोऽस्ति न वेति संशयः । किं प्राप्नोति । तेषां निषेधानामानन्दादिगुणत्वाभावान्न सर्वासु परविद्यासूपसंहार इति प्राप्ते ब्रूमः[2] । अक्षरसंबन्धिनीनां निषेधधियां सर्वासु परविद्यासूपसंहारो युक्तः । गुणिनो ब्रह्मणः सर्वत्रैकत्वात् । एतैर्हि गुणैः सकलेतरव्यावृत्तेर्ब्रह्मानुसंधानोपपत्तिर्नान्यथा हेयगुणसंबन्धानर्हा आनन्दादयो हि प्रत्यगात्मनः सकाशाद् ब्रह्मणो व्यावर्तकाः । प्र-

---

१—॥ २८ ॥ अत्र शङ्कते ॥ गतेरर्थवत्त्वमुभयथान्यथाहि विरोधः ॥ २९ ॥ देवयानगतिश्रुतेरर्थवत्त्वं देहवियोगकालेऽध्वनि वेत्युभयथा कर्मक्षये सत्येव । अन्यथा देहवियोगकाल एव सर्वकर्मक्षये सति सूक्ष्मशरीरस्याप्यारम्भकनाशे शरीरनाशाद्गतिश्रुतिर्विरुध्यते । अतश्चरमश्रुतोऽपि कर्मक्षयः कथं प्रागुपनेतव्य इति ॥ २९ ॥ उपपन्नस्तल्लक्षणार्थोपलब्धेर्लोकवत् ॥ ३० ॥ देहवियोगकाले सर्वकर्मक्षयेऽपि गतिरुपपन्नैव ब्रह्मोपासकानाम् । अत्र विद्यारेऽर्थं फलोपलब्धेः स स्वराड्भवति सर्वेषु लोकेषु तस्य कामचार इति हि द्रूश्यते । यथा लोके राजाश्रितानां पुरुषाणामितरपुरुषासाधारणसर्वार्थसिद्धिः । अतो मार्गश्रुतिरपि न बाध्यते । तेषु सर्वसिद्धिसंभवात् । विष्णुसंबन्धिनी विरजा नदी प्राकृतप्रपञ्चसीमावधिः । तदनुप्रवेशतः प्रक्षीणसकलकर्मलेपयोगिनो विष्णुपदादूर्ध्वमप्राकृतं शिवपदं परमानन्दाश्रयमनुप्रविशन्ति । तथेति । सोऽध्वनः परमाप्नोति परमं पदमिति तत्राविरोधः ॥ ३० ॥ इति पा० । शंकरसंमतसूत्रक्रमानुगतं च ॥

२—त्र निरूपितमु—इति पा० ।

* शंकरभाष्ये "अनियमः सर्वासामविरोधः । शब्दानुमानाभ्याम्" इति रूपेण प्रथमं "यावदधिकार"—इत्यादि पश्चाद् व्याख्यातम् ।

१ अपितु सर्वोपासकानाम् । इति पा० ।

२—ताः । तदेतेषामानन्दसमन्वयवत् समन्वयो युक्तो न वेति संशयः । न युक्त इति पूर्वः पक्षः । कुतः । अब्रह्मरूपत्वात् । अनन्तत्वात् । अन्यथा सिद्धेश्च । इति प्राप्त उच्यते इति पा० ।

धानानुवृत्तित्वं गुणस्य स्वभावः । यथा जामदग्न्यचतूरात्रपुरोडाश्युपसद्गुणभूतस्य "अग्नेर्वै होत्रं वेरध्वरम्" इत्यादिमन्त्रस्य सामवेदपठितत्वेन सामवेदस्वरस्योच्चैस्त्वस्य प्राप्तावपि यजुर्वेदिकप्रधानोपसदनुवृत्तित्वादुपांशुगुणत्वम्[1] । तदुक्तं प्रथमे काण्डे गुणमुख्यव्यतिक्रमे तदर्थत्वान्मुख्येन वेदसंयोग इति ॥ ३३ ॥

नैतावता सर्वेषामुपसंहार्यत्वप्रसक्तिरित्याह ॥

॥ इयदामननात् ॥ ३४ ॥

आमननमाभिमुख्येनामननम् । इयदेव गुणजातं सर्वत्रोपसंहार्यम् । येन गुणजातेन सकलेतरव्यावृत्तब्रह्ममननं भवति । अतोऽक्षरब्रह्मसंबन्धिनीनां स्थूलत्वादिनिषेधधियामेव सकलेतरव्यावर्तकधर्मरूपत्वादुपसंहारः परविद्यासु । ननु "सर्वकर्मा सर्वकामः सर्वगन्धः सर्वरस" इत्यादीनामपीति ॥ ३४ ॥

॥ अन्तरा भूतग्रामवत् स्वात्मनोऽन्यथा
भेदानुपपत्तिरिति चेन्नोपदेशान्तरवत्* ॥ ३५ ॥

बृहदारण्यके "यत् साक्षादपरोक्षाद् ब्रह्म", "य आत्मा सर्वान्तरस्तं मे व्याचक्ष्व" इत्युषस्तिप्रश्ने प्रतिवचनमेवमाम्नायते । "यः प्राणेन प्राणिति स त आत्मा सर्वान्तरो योऽपानेनापानिति स त आत्मा सर्वान्तर इत्येतद्यतोऽन्यदार्तम्" । इत्यन्तम् । तदनन्तरं "यदेव साक्षाद् ब्रह्म" "य आत्मा सर्वान्तरस्तं मे व्याचक्ष्व" इति कहोलप्रश्ने तु प्रतिवचनमेवमाम्नायते । "योऽशनायापिपासे शोकं मोहं जरां मृत्युं मन्येतेत्येतं हैवमात्मानं विदित्वैतद्यतोऽन्यदार्तम्" इत्यन्तम् । इहोभयत्र[2] विद्यैक्यं न वेति संशयः । तथा सति य आत्मेत्युषस्तिप्रश्नो भूतग्रामवत् प्रत्यगात्मविषयः । अन्यथा "यः प्राणेन प्राणिति स त आत्मा" इति तत्प्रतिवचनविषयस्य कहोलप्रश्नप्रतिवचनविषयस्याशनायाद्यतीतत्वादेश्च भेदानुपपत्तिरिति चेत्, इति पूर्वपक्षशङ्कायां सिद्धान्तयति नोपदेशान्तरवदिति । "य आत्मा सर्वान्तर" इत्युभयत्र प्रश्नैकरूप्यात् परमेश्वर एवोभयत्र प्रश्नविषयः प्रतिवचनगतं निरुपाधिकं प्राणनादिहेतुत्वमशनायाद्यतीतत्वं च तत्रैव समुपपद्यते । तद्विद्योपदेशवत् प्रश्नप्रतिवचनावृत्तिरेकविषया । प्रष्टृभेदो रूपभेदश्च न विद्याभेदावहः ॥ ३५ ॥

तथाह्याह ॥

॥ व्यतिहारो विशिंषन्ति हीतरवत् ॥ ३६ ॥

अर्थैक्ये निश्चिते सति प्रष्ट्रोर्बुद्धिव्यतिहारः कर्तव्यः । उषस्तिनाप्यशनायाद्यतीतत्वधीः कहोलेनापि प्राणनादिहेतुत्वधीः कार्या । उभयप्रकरणगतानि हि वाक्यानि परमेश्वरं विशिंषन्ति । यथेतरत्र सद्विद्यायाम् । तस्मादेकस्यैव प्रश्नप्रतिवचनगतत्वान्न विद्याभेदः । पुनरुक्तिस्तु[1] शङ्कानिरासाय । तत् त्वमसीतिवत्[2] ॥ ३६ ॥

॥ सैव हि सत्यादयः ॥ ३७ ॥

यद्दृष्टान्तेन पूर्वाधिकरणनिर्णयः । तत्रापि सद्विद्यायां संशयः । भिन्नेयमभिन्ना वेति । प्रश्नावृत्तिदर्शनात् प्रतिवचनभेददर्शनाच्च प्रत्यावृत्ति भिन्ना, इति प्राप्ते ब्रूमः । न भिन्नेयं सद्विद्या । "सेयं देवता" इति प्रस्तुताया एव महादेवतायाः प्रश्नप्रतिवचनेष्वनुवृत्तेः । यतः । "तत् सत्यं स आत्मा" "तत् त्वमसि" इति पुनः पुनः सत्यादीनामावृत्तिर्गम्यते । अतो वस्त्वैक्यादभिन्नेयं विद्येति सिद्धान्तः ॥ ३७ ॥

॥ कामादयस्तत्र[3] तत्र चायतनादिभ्यः ॥ ३८ ॥

छान्दोग्ये तैत्तिरीयके वाजिशाखायां कैवल्योपनिषदि च दहरविद्या श्रुता । सेयमभिन्ना भिन्ना वेति संशये पूर्वः पक्षः । "यदिदमस्मिन् पुरे दहरं पुण्डरीकं वेश्म दहरोऽस्मिन्नन्तराकाश" इत्यारभ्य दहराकाशशब्दोक्तस्य दहरपुण्डरीकवर्तिनोऽपहतपाप्मत्वादिगुणाष्टकं मुख्यमाम्नातम् । तैत्तिरीयके "दहरं विपाप्मम्" इत्यारभ्य दहरपुण्डरीकवर्तिनः प्रणवप्रकृत्यात्मवाच्यत्वं महेश्वरशब्दवाच्यत्वकृष्णपिङ्गलत्वविरूपाक्षत्वादयो धर्माः प्रदर्शिताः । वाजिशाखायां "य एषोऽन्तर्हृदय आकाशस्तस्मिन् शेते सर्वस्य वशी सर्वस्येशानः सर्वस्याधिपतिः सर्वमिदं प्रशास्ति" इति वशित्वादयः । कैवल्योपनिषदि "हृत् पुण्डरीकं विरजम् इत्यारभ्य",

"विभुं चिदानन्दमरूपमद्भुतम् ।
उमासहायं परमेश्वरं प्रभुं त्रिलोचनं नीलकण्ठं प्रशान्तम्" ।

इत्यन्तेन हृदयपुण्डरीकवर्तिनः परस्य त्रिलोचनत्वनीलकण्ठत्वचिदानन्दरूपत्वोमासहायत्वादयो धर्माः । तत्र नीलकण्ठत्वादीनां शरीरधर्मत्वेन सत्यत्वादीनामात्मधर्मत्वेन विरोधादुपसंहारो न न्याय्यः । तस्माद्विद्या भिन्नेति । एवं प्राप्त उच्यते[4] । तत्र तत्र हृदयपुण्डरीकायतनादिभ्यो विद्यैक्यमेव । अतः सत्यकामादयः सर्वत्रोपसंहार्याः । छान्दोग्यगता अपहतपाप्मत्वादयो वाजिशाखागता वशित्वादयस्तैत्तिरीय-

1—मन्त्रस्य प्रथमोपसद—इति पा० ।

* अन्तरा भूतग्रामवत् स्वात्मनः इति अन्यथा भेदानुपपत्तिरिति चेन्नोपदेशान्तरवत् इति च सूत्रद्वयत्वेन शंकरभाष्ये व्याख्यातम् ।

2. ॥ ३५ ॥ इह कहोडकोषस्तिप्रश्नप्रतिवचने इति पा० ।

1 द्वि—इति पा० ।

2—द्भवतीति निश्चयः इति पा० ।

3 कामादीतरत्र इति शंकरमतपाठः ।

4 तस्माद्भिन्नैव विद्या भवतीति प्राप्तम् । तत उच्यते इति पा० ।

गताः प्रणववाच्यत्वादयः कैवल्यगताश्चिदानन्दरूपत्वादयश्च सर्वे एते गुणा दहरविद्यायां ब्रह्मणोऽनुसंधेयाः । कैवल्योपनिषद्गतमुमासहायत्वं त्रिलोचनत्वमन्यत्र कृष्णपिङ्गलत्वं विरूपाक्षत्वं चैकार्थम् । आवृत्तिरादरार्था । सर्वत्र गुणानामावृत्तौ तथा द्रष्टव्यम् । अत्र गुणित्वेन[1] ब्रह्मण एकस्यैवोपास्यत्वादपहतपाप्मत्वादियोगि[2] सर्वेश्वरमोङ्कारवाच्यमुमासहायं त्रिलोचनं नीलकण्ठं चिदानन्दरूपमनन्तममृतमद्भुतं परं ब्रह्म दहरपुण्डरीकमध्येऽनुसंधेयमिति परविद्यास्वियमेव प्रधानभूता । छान्दोग्ये कैवल्योपनिषदि चैतद्विद्यानिष्ठस्य "परं ज्योतिरुपसंपद्य स्वेन रूपेणाभिनिष्पद्यते" ।

ध्यात्वा मुनिर्गच्छति भूतयोनिं
समस्तसाक्षिं तमसः परस्तात् ।

इति साक्षात् तस्यैवोपास्यस्य परब्रह्मणः प्रकृतिमण्डलातीतस्य प्राप्तिर्हि फलमवगम्यते । अत एव नीलकण्ठत्वादिधर्मस्यापहतपाप्मत्वादिगुणानां च ब्रह्मणि नित्यत्वादन्योन्यसापेक्षत्वाच्चोपसंहारे न [3]विरोधः । अप्रसक्तस्य प्रतिषेधायोगात् । त्रिलोचनत्वादिलक्षणशरीरविशिष्टे परब्रह्मणि प्रसक्तानां शरीरधर्माणां पापजरामरणक्षुत्तृडसत्यकामासत्यसंकल्पानां निषेधाय ह्यपहतपाप्मत्वादयः प्रतिपादिता[4]ः । त्रिलोचनत्वादिलक्षणशरीरकमपि परं ब्रह्मापहतपाप्मकं जरारहितमशोकमविजिघत्समपिपासं सत्यकामं सत्यसंकल्पं चिदानन्दरूपं[5] भवतीति न विरोधः ॥ ३८ ॥

ननु प्रियशिरस्त्वादीनामिव नीलकण्ठत्वादीनामवयवानां ब्रह्मस्वरूपान्तर्भावे तस्योपचयापचयप्रसक्तिरित्यतो[6] नीलकण्ठत्वं लुप्यत इत्यत आह ॥

॥ आदरादलोपः ॥ ३९ ॥

पूर्वत्र नीलकण्ठत्वादिविशिष्टं रूपमुमाभिधानपरमशक्तिसाहित्यं सत्यसंकल्पत्वादिगुणजातं च निरूपितम् । इह तेषां परब्रह्मणि लोपोऽस्ति कदाचित्, अथवा कदाचिदपि न लोप, इति संशयः । किं तावत् प्राप्तम् । उपासनार्थं परब्रह्मणि कल्पितत्वात् तेषां कदाचिल्लोप इति प्राप्ते ब्रूमः । परब्रह्मण उमासहितत्वादीनां सर्वत्र श्रुतिष्वभ्यासादादरादलोप एव । अत एवालुप्तशक्तिकमुच्यते परं ब्रह्म । कुत्रादरादभ्यास इति चेत् । सर्वत्रैव । कृष्णपिङ्गलं विरूपाक्षम् इति शक्तिसाहित्ये सिद्धेऽपि त्रिलोचनत्वेन च पुनरादरार्थं ह्युमासहायं परमेश्वरं प्रभुं त्रिलोचनमित्यभ्यस्तम् । सवितृमण्डलविद्यायां च "नमो हिरण्यबाहवे हिरण्यपतयेऽम्बिकापतय उमापतय" इति ह्यादरार्थमुमापतित्वमभ्यस्तम् । अन्यत्र "नीलग्रीवो विलोहितः", "नीलग्रीवाय च शितिकण्ठाय च" इत्यादिषु नीलग्रीवत्वमीश्वरस्यादरादभ्यस्तम् । सत्यसंकल्पत्वादीनामेकत्र सिद्धानामन्यत्र पुनर्वचनमादरार्थमेव । तस्मादुमापतित्वादीनामभ्यासादादरादलोप एव परब्रह्मण इति । धर्मब्रह्मणोः प्रमाणान्तरागम्ययोर्यादृशं स्वरूपमभिधत्ते भगवती श्रुतिस्तादृशमेवाभ्युपेयं श्रुतिप्रामाण्यावलम्बिनाम् । अन्यथा तद्विरुद्धतर्कावलम्बने जगदुपादानत्वादिकं न सिध्येत् । अतः श्रुतिरेव च "सत्यंज्ञानमनन्तं ब्रह्म" इति सत्यज्ञानाकारमपरिच्छिन्नं ब्रह्मेत्युक्त्वा,

"ऋतं सत्यं परं ब्रह्म पुरुषं कृष्णपिङ्गलम् ।
ऊर्ध्वरेतं विरूपाक्षम्",

इत्यादिना तस्यैव त्रिलोचनत्वपरमशक्त्युमाशवलितत्वरूपं विशिष्टमभिधत्ते । पुनश्च तस्य[1] "स एको ब्रह्मण आनन्द" इति निरतिशयानन्दवत्त्वमाह । तस्यैव च "आकाशशरीरं ब्रह्मसत्यात्मप्राणारामं मनआनन्दं शान्तिसमृद्धममृतम्" इत्यादिना चित्प्रकाशरूपत्वमात्मारामत्वं बाह्यकरणनिरपेक्षान्तःकरणैकानुभूयमानपरमानन्दविलासत्वमुपशान्तसकलोपद्रवकलङ्कत्वमनादिमुक्तत्वं च प्रकाशयति । अस्य हि विरूपाक्षत्वादिलक्षणशरीरसंबन्धेन जीववत् प्रसक्तान् दोषांश्च[2] "अपहतपाप्मा" इत्यादिना निराकरोति । "यः सर्वज्ञः सर्ववित्", "परास्य शक्तिः", "पशूनां पतय" इत्यादिभिरस्य सर्वज्ञत्वसर्वशक्तित्वस्वतन्त्रत्वादिकं च निरूपयति । एवं श्रुतिरेव सकलप्रमाणशेखरस्थानीया सत्यज्ञानानन्दमपरिच्छिन्नस्वरूपं सर्वज्ञं नित्यतृप्तं स्वतन्त्रमनादिप्रकाशमनन्तालुप्तशक्तिकमात्माराममन्तरनुभवैकविषयपरमानन्दमुपशान्तममृतं नीलकण्ठं विरूपाक्षमुमासहितं परं ब्रह्म सर्वात्मकं मुक्तिसाधकमिति सर्वत्र घोषयन्ती केन निवार्यते । ततः परब्रह्मण उक्तस्वरूपधर्माणामलोप एव ॥ ३९ ॥

॥ उपस्थितेऽतस्तद्वचनात् ॥ ४० ॥

इह पूर्वाधिकरणोक्तं ब्रह्मस्वरूपमेव मुक्तप्राप्यम्[3]उतान्यदिति संशयः । किं तावत् प्राप्तम् ।

१–णिनो इति पा० ।
२–दिभिः इति पा० ।
३–त्वादवि–इति पा० ।
४ प्रसञ्जिताः इति पा० ।
५–न्दघनं इति पा० ।
६–क्तिर्भवति । ततो इति पा० ।

१–ना पूर्वं सामान्यसिद्धस्य तस्य विशेषेण विरूपाक्षशब्देन त्रिलोचनत्वविशिष्टं कृष्णपिङ्गलशब्देन परमशक्त्युमाशावल्यविशिष्टं रूपं विधत्ते। पुनरस्य इति पा० ।
२–वत् शरीरित्वप्रयुक्तसंसारधर्मप्रसक्तौ शरीरिधर्मान् इति पा० ।
३–व मोक्षफलमु–इति पा० ।

"निष्कलं निष्क्रियं शान्तं निरवद्यं निरञ्जनम्" ।

इत्यादिषु ब्रह्म निर्विशेषमेव श्रूयते । "ब्रह्म वेद ब्रह्मैव भवति" । इति मुक्तस्य तत्स्वरूपापत्तिरेव मुक्तिः । अतो निर्विशेषमेव ब्रह्म मुक्तप्राप्यं[1] नान्यत् । इति प्राप्ते ब्रूमः । पूर्वोक्तं सविशेषमेव ब्रह्मस्वरूपं मुक्तप्राप्यं[2] दहरकमलान्तर्भावनीयतया प्रतिपादिते विरूपाक्षे परब्रह्मणि "परं ज्योतिरुपसंपद्य" इति मुक्तेन प्राप्ते "स्वेन रूपेणाभिनिष्पद्यत" इति स्वरूपाभिनिष्पत्तेरेव हेतोः, "जक्षन् क्रीडन् रममाणः स्त्रीभिर्यानैर्वा ज्ञातिभिर्वा" इत्यादिना स्वच्छन्दतो ज्ञात्यादिप्राप्त्यभिधानात् । "परमं साम्यमुपैति" इति श्रुत्या,

"मुक्तः शिवसमो भवेत्"

इति स्मृत्या च मुक्तस्य परब्रह्मसादृश्यप्राप्त्यभिधानाच्च[3] । अतः साक्षान्मुक्तप्राप्यमेव[4] । पूर्वोक्तं नीलकण्ठत्वादिलक्षणं परब्रह्मस्वरूपं न सांसारिकम् । तस्य "अपहतपाप्मा" इत्यादिना सांसारिकधर्मनिषेधात् । सगुणैवातः परविद्या । "निष्कलं निष्क्रियम्" इत्यादिषु हेयगुणनिषेधः[5] क्रियते, न कल्याणगुणनिषेधः[6] । तथाहि, "निष्कलं निष्क्रियम्" इत्यादिना "प्रधानक्षेत्रज्ञपतिर्गुणेश" इत्यादिना च निर्गुणत्वे सगुणत्वे सामान्येन प्राप्ते "अपहतपाप्मा" "यः सर्वज्ञः सर्ववित्" इत्यादिभिर्विशेषश्रुतिभिर्निर्गुणश्रुतेर्हेयगुणराहित्यमर्थः । सगुणश्रुतेः कल्याणगुणसाहित्यम्, इति विज्ञायते ।

किंच[7], वचनमेव सगुणं मोक्षफलं प्रकाशयति । "सोऽश्नुते सर्वान् कामान् सह ब्रह्मणा विपश्चिता" इति । "विपश्चिता सर्वज्ञेन ब्रह्मणा सर्वानपि कामान् मुक्तः सह प्राप्नोति" इति । सहशब्दो ब्रह्मणानन्दभोगस्य[8] यौगपद्याभिप्रायः । अतः सगुणमेव ब्रह्मस्वरूपं मुक्तप्राप्यं फलमिति[9] ॥ ४० ॥

॥ तन्निर्धारणानियमस्तद्दृष्टेः पृथग्घ्यप्रतिबन्धः फलम् ॥ ४१ ॥

उद्गीथादिविद्याः कर्माङ्गावबद्धा उपास्तयः कर्मसु नियता उतानियता इति संशयः । किं तावत् प्राप्नोति । कर्मानुष्ठाने कर्माङ्गत्वायत्ति[10]मेनानुष्ठेयाः । कर्मप्रकरणमनारभ्याधीतत्वेऽपि वाक्यादेव क्रतुसंबन्धोपपत्तिः । यथा "यस्य पर्णमयी जुहूर्भवति" इत्यनारभ्याधीतस्य पर्णमयत्वस्याव्यभिचरितक्रतुसंबन्धिजुहूद्वारा वाक्यतः क्रतुसंबन्धः । तथा "य एवं विद्वानुद्गायति" "य एवं विद्वान् साम गायति" इत्यव्यभिचरितक्रतुसंबन्धिसामोद्गीथादिद्वारा तदुपासनानां क्रतुसंबन्धः । अतः कर्मसु नियता उद्गीथाद्युपास्तय इत्येवं प्राप्ते ब्रूमः । गोदोहनादिवदनियता उपास्तयः । यथा "चमसेनापः प्रणयेद् गोदोहनेन पशुकामस्य" इत्यपां[1] प्रणयनमाश्रित्य विधीयमानं गोदोहनमक्रत्वर्थत्वादैच्छिकमेव । नतु प्रणयनादिवन्नियतम् । तथा कर्माण्याश्रित्य विधीयमाना उपास्तयः क्रत्वर्था न भवन्ति । "तेनोभौ कुरुतो, यश्चैवं वेद यश्च न वेद" इत्युद्गीथाद्युपासनरहितस्यापि क्रत्वनुष्ठानदर्शनात् । "यदेव विद्यया करोति श्रद्धयोपनिषदा तदेव वीर्यवत्तरं भवति" इति वर्तमाननिर्देशेऽपि क्रतुवीर्यवत्तरत्वसाधनतयोपासनाविधिः कल्प्यते । वीर्यवत्तरत्वं नाम प्रबलकर्मान्तराप्रतिबन्धेनाविलम्बितफलत्वमेव । तथा कामदृष्ट्यादिपृथक्फलश्रवणाच्च न नियता उपास्तयः[2] ॥ ४१ ॥

॥ प्रदानवदेव तदुक्तम् ॥ ४२ ॥

एकस्यैव शिवस्य परब्रह्मणः परविद्यासु सर्वासु तत्तद्गुणविशिष्टतया[3] पृथक् चिन्तनीयत्वमुक्तम् । तदिह संभवति न वेति संशयः । किं तावत् प्राप्तम् । गुणभेदेऽपि गुणिनो ब्रह्मण एकत्वादुपासनं न भिद्यते । यथैकस्य राज्ञस्तत्तद्गुणादिविशेषभेदेन युक्तस्यापि कार्यदर्शनव्यायामभोजनासनमृगयासमरादिव्यापारेषु सिंहासनादिस्थानभेदेऽपि भेदो न दृश्यते । तथा दहरादिस्थानभेदेऽपि तत्तद्गुणभेदविशिष्टस्यापि ब्रह्मण एकत्वात् तदनुसंधानमेकमेव । इत्येवं प्राप्ते ब्रूमः । एकस्यैव परब्रह्मणः शिवस्य स्वरूपाभेदेऽपि तत्तद्गुणविशिष्टस्वरूपतया गुणविशेषणभेदेन भेदाद्विशिष्टगुण्यावृत्त्या पृथक् तदुपासनप्रयोगः । इन्द्रप्रदानवत् । यथा, "इन्द्राय राज्ञे पुरोडाशमिन्द्रायाधिराजायेन्द्राय स्वाराज्ञे" इति गुणभेदात् पृथक् पुरोडाशप्रदानं नानादेवतापृथक्त्वादिति, संकर्षे तथोक्तत्वात् । तथैकस्यापि परब्रह्मणो गुणभेदादुपासनपृथक्त्वमिति । यदुक्तमेकस्य राज्ञ इति । तत्रापि राजस्वरूपाभेदेऽपि स्थानगुणादिभेदादुपासनप्रकारो भिन्न एव सेवकानामिति[4] ॥ ४२ ॥

---

१ मुक्तिफलं इति पा० ।

२ मुक्तिफलं इति पा० ।

३–त्या परब्रह्मणस्तस्य सदृशरूपत्वं मुक्तस्य सिध्यति इति पा० ।

४–न्मोक्षफलत्वमेव इति पा० ।

५–गुणविशेषनि–इति पा० ।

६–गुणविशेषनि–इति पा० ।

७–ते । ततः सगुणैव ब्रह्मविद्या । इति पा० ।

८ ब्रह्मभावस्य इति पा० ।

९ मुक्तिफल–इति पा० ।

१०–ह्वचि–इति पा० ।

१–ति तत्रा–इति पा० ।

२ च्च कर्मस्वनियता उपास्तयः पृथक्फला इति पा० ।

३–सु गुणविशेषवि–इति पा० ।

४ न भिद्यते । यथैकस्यैव ब्रह्मणः सत्यसंकल्पादिगुणविशेषभेदात् तदावृत्त्या न पृथगुपासनम् । इति प्राप्ते ब्रूमः । एकस्यैव परब्रह्मणः शिवस्य स्वरूपाभेदेऽपि तत्तद्गुणविशिष्टस्वरूपतया गुणविशेषणभेदेन भेदाद्विशिष्टगुण्यावृत्त्या पृथक् तदुपासनप्रयोगः । राजादिगुणभेदविशिष्टेन्द्रपुरोडाशप्रदानभेदवदिह प्रधानाया देवताया गुणभेदेन पृथक्त्वादिति इदमेव पा० ।

॥ लिङ्गभूयस्त्वात् तद्धि बलीयस्तदपि ॥ ४३ ॥

पूर्वं सर्वासु परविद्यासु ब्रह्मोपास्यमिति स्थितम्। तस्योपास्यस्य ब्रह्मणो विशिष्य निर्धारणार्थमिदमधिकरणम्। तैत्तिरीये "सर्वो वै रुद्रस्तस्मै रुद्राय नमोऽस्तु" "पुरुषो वै रुद्रः सन्महो नमो नमः" "विश्वं भुवनं चित्रं बहुधा जातं जायमानं" च "यत् सर्वो वै रुद्रस्तस्मै रुद्राय नमोऽस्तु" "कद्रुद्राय प्रचेतसे मीढुष्टमाय तव्यसे वोचेम शन्तमं हृदे" "सर्वो ह्येष रुद्रस्तस्मै रुद्राय नमोऽस्तु" "नमो हिरण्यबाहवे हिरण्यपतयेऽम्बिकापतय उमापतये नमो नम" इति।[1] अत्र सर्वात्मत्वादिभिरुमापतित्वेन च श्रूयमाणं परं ब्रह्म प्रकृते सवितृमण्डलविद्यामात्र उपास्यमुत सर्वासु परविद्यास्विति संशयः। किं तावत् प्राप्तम्। प्रकरणबाधायोगात् प्रकृतसवितृमण्डलविद्यायामेवोपास्यमिति प्राप्ते ब्रूमः। इदं सर्वात्मकमुमासहितं परं ब्रह्म सर्वास्वपि परविद्यासूपास्यम्। तत्तल्लिङ्गसंबन्धिवाक्यभूयस्त्वात्। तथाहि, "सर्वो वै रुद्र" इत्यादिवाक्ये "सर्वं खल्विदं ब्रह्म तज्जलानिति शान्त उपासीत" इतिशाण्डिल्यविद्योपास्यलिङ्गम्। "पुरुषो वै रुद्र" इति वाक्ये पुरुषसूक्तोपकोशलविद्योद्युपास्यलिङ्गं[2] सदित्यत्र "सदेव सोम्येदमग्र आसीत्" इति सद्विद्योपास्यलिङ्गम्। "मह" इत्यत्र "महदिति तद् ब्रह्म स आत्मा अङ्गान्यन्या देवता" इति व्याहृतिविद्योपास्यलिङ्गम्। "शन्तमं हृदे" इति हृदयाकाशद्योतनाद् दहरविद्योपास्यलिङ्गम्। "हिरण्यबाहव" इति हिरण्यरूपत्वं सवितृमण्डलोपास्यलिङ्गम्। "उमापतय" इति सर्वपरविद्योपास्यलिङ्गम्। संसाररुग्द्रावकत्वाद् रुद्र इत्युच्यते परमात्मा शिवः। एवमुमापतेः परब्रह्मणः शिवस्य सर्वपरविद्योपास्यत्वं वाक्यैरवसीयते। वाक्यं हि प्रकरणाद्बलीयः। तदप्युक्तम्। "श्रुतिलिङ्गवाक्यप्रकरणस्थानसमाख्यानां समवाये पारदौर्बल्यमर्थविप्रकर्षात्" इति। तस्मादुमासहितं संसाररुग्द्रावकं परवस्तु सकलपरविद्योपास्यमिति सिद्धम् ॥ ४३ ॥

॥ पूर्वविकल्पः प्रकरणात्
स्यात् क्रियामानसवत् ॥ ४४ ॥

अग्निरहस्यब्राह्मणे श्रूयते "षट्त्रिंशतं सहस्राण्यपश्यदात्मनोऽग्नीन्, अर्कान्मनोमयान्मनश्चित" इति, तथा "वाक्चितः प्राणचितश्चक्षुश्चितः श्रोत्रचितः कर्मचितोऽग्निचित", इति पुरुषस्य शतसंवत्सरमित आयुषि षट्त्रिंशत्सहस्राणि दिनानि।

१ पूर्वत्र सर्वविद्यासु ब्रह्मोपास्यं तत्तल्लिङ्गेनेत्युक्तम्। तदिह विचार्यते। श्रूयते "सर्वो वै रुद्र" "उमापतये नम" इति। अत्र इति पा०।

२—सीत "इत्युपकोशलविद्योपास्यलिङ्गम्। पुरुषो वै रुद्रः" "योऽयं पुरुषो भाः सत्यम्" इति शाण्डिल्यविद्योपास्यलिङ्गम्। इति पा०।

तत्रैकैकस्मिन् दिने यावती मनोवृत्तिः, तस्या एकैकाग्नित्वे सत्यग्नयः षट्त्रिंशत्सहस्राणि संपद्यन्ते। ते च प्रत्यगात्मस्वरूपेण ध्यातव्याः। एवं वाक्चितादयोऽपि ते विद्यामयक्रत्वङ्गभूता उत क्रियामयक्रत्वङ्गभूता इति संशये[1] पूर्वपक्षः प्रवर्तते। "मनश्चितो वाक्चित" इत्यादीनां सांपादिकाग्नीनाम्, "असद्वा इदमग्र आसीत्" इत्यादिना पूर्वप्रकृतेष्टकचिताग्निशेषभूतक्रियामयक्रत्वनुप्रवेशः स्यात्। ततश्च तेषामग्नीनाम्, इष्टकचिताग्निना विकल्पः। द्वादशाहाङ्गभूतमानसवत्। यथा द्वादशाहे दशमेऽहन्यविवाक्ये पृथिवीपात्रस्य प्रजापतिदेवताकस्य समुद्रद्रव्यस्य मानसग्रहस्य मनःसंपाद्यग्रहणासादनस्तोत्रशस्त्रस्तवनप्रत्याहरणभक्षणत्वेन मानसस्यापि क्रियामयक्रत्वङ्गत्वम्। एवमेषां मानसानामपि क्रियामयक्रत्वङ्गत्वम् ॥ ४४ ॥

॥ अतिदेशाच्च ॥ ४५ ॥

"तेषामेकैक एव तावान् यावानसौ पूर्व" इति तेष्विष्टकचिताग्निकार्यातिदेशाच्च तदङ्गत्वमिति ॥ ४५ ॥

एवं प्राप्ते सिद्धान्त उच्यते ॥

॥ विद्यैव तु निर्धारणाद्दर्शनाच्च* ॥ ४६ ॥

विद्यैव विद्यामयक्रत्वङ्गभूता इत्यर्थः[2]। सांपादिकाग्नित्वेनैषां विद्यामयत्वे सिद्धेऽपि "ते हैते विद्याचित एव" इति निर्धारणा हि विद्यामयक्रत्वङ्गत्वख्यापनाय। दृश्यते च विद्यामयक्रतुः। अत्रैव "ते मनसैवाधीयन्त मनसैवाचीयन्त मनसैव ग्रहा अगृह्यन्त, मनसास्तुवन्, मनसाशंसन् यत् किंचिद् यज्ञे कर्म क्रियते, यत् किंचिद् यज्ञीयं कर्म मनसैव तेषु मनोमयेषु मनश्चित्सु मनोमयमक्रियत" इति। अतस्तेषां विद्यामयक्रत्वत्वमेव ॥ ४६ ॥

श्रुत्यादिबलीयस्त्वाच्च न बाधः ॥ ४७ ॥

"ते हैते विद्याचित एव विद्यया हैवैत एवं विदश्चिता भवन्ति तान् हैतानेवं विदे सर्वदा सर्वाणि भूतानि चिन्वन्त्यपि स्वमत" इति श्रुत्या वाक्येन लिङ्गेन चावगतस्य विद्यामयक्रत्वन्वयस्य दुर्बलेन प्रकरणेन न बाधः ॥ ४७ ॥

ननु "मनसैव ग्रहा अगृह्यन्त" इत्यादिषु विधिप्रत्ययाश्रवणात् क्रियामयात् क्रतोरन्यो विद्यामयः क्रतुर्नास्तीत्यत आह॥

अनुबन्धादिभ्यः प्रज्ञान्तर-
पृथक्त्ववद् दृष्टश्च तदुक्तम् ॥ ४८ ॥

१—यकलहे इति पा०

* शंकरमते विद्यैवतु निर्धारणात् इत्येकं दर्शनाच्च इत्यपरमिति सूत्रद्वयम्।

२ विद्यैव ते विद्यामयक्रत्वङ्गभूता इति इति पा०।

"ग्रहा अगृह्णन्त" इत्यादिक्रत्वनुबन्धैः, ते हैते विद्याचित एव" इति श्रुत्यादिभिश्च, विद्यामयक्रतुविधिः कल्पनीयः। दहरविद्यादीनां क्रियामयानां पृथक्त्ववदस्यापि विद्यामयक्रतोः सानुबन्धैः श्रुत्यादिभिः पृथक्त्वमवगम्यते। दृष्टश्चानुवादत्वरूपे विधिः "यदेव विद्यया करोति" इत्यादौ। तदुक्तम्। "वचनानि त्वपूर्वत्वात्" इति। अतो विद्यामयक्रत्वङ्गत्वमेव[1] युक्तम् ॥ ४८ ॥

आशङ्क्य परिहरति ॥

॥ न सामान्यादप्युपलब्धे-
र्मृत्युवन्न हि लोकापत्तिः ॥ ४६ ॥

"तेषामेकैक एव तावान् यावानसौ पूर्व" इतीष्टकचिताग्निफलसामान्येनातिदेशः। इष्टकचिताग्नेः स्वक्रतुद्वारेण यत् फलं तदेषां विद्यामयक्रतुप्रवेशेन फलमिति। न पुनरिष्टकचिताग्नितुल्यदेशत्वमेषामिति[2]। केनापि सामान्येनातिदेशोपलब्धेः। "स वा एष एव मृत्युर्य एतस्मिन् मण्डले पुरुष" इति संहर्तृत्वमात्रेण नहि तत्र मण्डलपुरुषस्य मृत्युतुल्यदेशत्वम्[3]। अतः केनचित् सामान्येनातिदेशेन न विरोधः ॥ ४९ ॥

हेत्वन्तरमाह ॥

॥ परेण च शब्दस्य ताद्वि-
ध्यं भूयस्त्वात् त्वनुबन्धः ॥ ५० ॥

परेण च ब्राह्मणेनास्य मनश्चिदादिवाचिनः शब्दस्य विद्यामयत्वप्रतिपादकत्वमवगम्यते। तथाहि, "अयं वाव लोक एषोऽग्निचितस्तस्याप" इत्यादिना पृथक्फला विद्या विधीयते। क्रियाप्रकरणे मनश्चिदादीनामनुबन्धस्तु संपादनीयानामग्न्यङ्गानां भूयस्त्वात् त्वेतेषां[4] विद्यामयक्रत्वङ्गत्वम् ॥ ५० ॥

॥ एक आत्मनः शरीरे भावात् ॥ ५१ ॥

इह पूर्वोक्तब्रह्मस्वरूपानुसंधानं सर्वासु परविद्यासु युज्यते न वेति संशयः। तत्रैके मन्यन्ते। शरीरे वर्तमानत्वादुपासितुः कर्तृत्वभोक्तृत्वरूपापन्नत्वात् तथावस्थितस्यात्मतया परविद्यासु परमेश्वरस्य त्रिलोचनत्वादिलक्षणस्वरूपानुसंधानं न युज्यत इति ॥ ५१ ॥

सिद्धान्त उच्यते ॥

॥ व्यतिरेकस्तद्भावभावित्वान्नतूपलब्धिवत् ॥ ५२ ॥

नैवं यत्कर्तृत्वभोक्तृत्वादिरूपापन्नस्योपासितुरात्मतया परमात्मानुसंधेय इति। अपितु सांसारिकस्वभावान्मुक्ते यो[1] व्यतिरेक अपहतपाप्मत्वादिगुणरूपः सोऽनुसंधेयः। तथानुसंधानसद्भावभावित्वात् स्वरूपोपलब्धेः। यथावस्थितस्वरूपब्रह्मानुसंधानभाविनी ब्रह्मोपलब्धिः। "तद्‌ यथा क्रतुरस्मिल्लोके पुरुष" इत्यादिश्रुतेः। अतः सांसारिकस्वभावनिर्मुक्तापहतपाप्मत्वादिस्वरूपतयोपासितुरनु, संधेयत्वात् तदात्मतयानुसंधेयस्य परमेश्वरस्य त्रिलोचनत्वादिलक्षणस्वरूपानुसंधाने नास्ति विरोधः[2] ॥ ५२ ॥

अङ्गावबद्धास्तु न शाखासु हि प्रतिवेदम् ॥ ५३ ॥

कासु चिच्छाखासु श्रूयमाणा उपासनाङ्गावबद्धाः सर्वासूपासनास्वङ्गत्वेनोप[3]संहार्या न वेति संशयः। तथाहि,

"आत्मानमरणिं कृत्वा प्रणवं चोत्तरारणिम्।
ध्याननिर्मथनादेव पाशं दहति पण्डितः" ॥

इति कैवल्योपनिषदि दहरोपासनायाः[4] प्रणवाभ्यासः श्रूयते। "अग्निरित्यादिना भस्म गृहीत्वा विमृज्याङ्गानि संस्पृशेत्, तस्माद्व्रतमेतत् पाशुपतं पशुपाशविमोक्षाय" इति। अथर्वशिरसि पाशुपतविद्यायां भस्मोद्धूलनं श्रूयते[5]। अन्यत्र "तिस्रो रेखाः प्रकुर्वीत" इति त्रिपुण्ड्रधारणविधिः श्रूयते। तस्य शिवसायुज्यमिति फलश्रवणात् परविद्याङ्गत्वम्। तदेवं विद्याङ्गावबद्धा यासु शाखासु श्रुतास्तासु विहितेषूपासनेषूपासकैः कार्याः संनिधानात्। न सर्वत्रेति प्राप्ते ब्रूमः। भस्मोद्धूलनादय उपासनाङ्गावबद्धा यासु शाखासु श्रुतास्तास्वेवेति न नियमः। किंतु प्रतिवेदं सर्वत्र सर्वासु शाखासु सर्वैरपि ब्रह्मोपासकैः कार्या एव। श्रुत्या संनिधेर्बाधः ॥ ५३ ॥

॥ मन्त्रादिवद्वाविरोधः ॥ ५४ ॥

वाशब्दोऽवधारणे। यथा क्रत्वङ्गभूतानां मन्त्राणामेकैकशाखागतानामपि सर्वशाखागतक्रत्वन्वयेऽपि न विरोधः। तथात्रापीति ॥ ५४ ॥

॥ भूम्नः क्रतुवज्ज्यायस्त्वं तथाहि दर्शयति ॥ ५५ ॥

इह वैश्वानरविद्यायामु[6]पासनमंशेन समस्तेन वेति संदिह्यते। तथाहि, तत्र[7] द्युलोकसूर्यवाय्वाकाशोदकपृथिव्यो वै-

१–यत्व–इति पा०।

२–ग्न्यनुप्रवेशनातिदेशत्वात् तेषामिति इति पा०।

३–त्युलोकातिदेशत्वम् इति पा०।

४ तु। तत एतेषां इति पा०।

१–न्मुक्तस्वभावस्य यो इति पा०।

२–वान्मुक्तस्वभावतया त्रिलोचनत्वादिलक्षणस्य ब्रह्मस्वरूपानुसंधाने विरोधाभाव इति पा०।

३ सर्वत्रोप–इति पा०।

४–नाङ्गतया इति पा०।

५–क्षाय" इति पाशुपतविद्याङ्गत्वेन भस्मोद्धूलनादिकमथर्वशिरसि श्रूयते इति पा०।

६–यां तदुपा–इति पा०।

७ वैश्वानरविद्यायां इति पा०।

श्वानरस्य मूर्धचक्षुःप्राणमध्यशरीरसूत्रस्थानपादरूपा ध्यातव्या इति निरूपितम् । तेषामङ्गानामपि प्रत्येकमुपासनमभिहितम् । "अत्त्यन्नं पश्यति प्रियं भवत्यस्य ब्रह्मवर्चसं कुले य एतमेवात्मानं वैश्वानरमुपास्त" इति पृथक् पृथग्दिवादिपर्यायगतैर्वाक्यैः । एवं सत्युपास्तिशब्दस्य फलवचनस्य च प्रत्येकमुपलभ्यमानत्वादंशोपासनमुचितमिति पूर्वः पक्षः । सिद्धान्ते तु समस्तोपासनमेव मुख्यमित्युच्यते । तथाहि, तत्र त्रैलोक्यशरीरतयोपास्यस्य वैश्वानरात्मनः स्वर्लोकादिपृथिव्यन्तानां मूर्धादिपादान्तावयवत्वमभिधाय, "यस्त्वेतमेवं प्रादेशमात्रमभिविमानमात्मानं वैश्वानरमुपास्ते स सर्वेषु लोकेषु सर्वेषु भूतेषु सर्वेष्वात्मस्वन्नमत्ति" इति ब्रह्मानुभवः फलं[3] चाभिहितम् । तत्र मूर्धाद्यवयवोपादानाद् भूम्नः समस्तोपासनस्य ज्यायस्त्वं प्रामाणिकमस्ति । तत्रैव ब्रह्मानुभवफलाभिधानात् । तत्रावयवोपासनं फलकीर्तनं च क्रतुवदविवक्षितम् । "वैश्वानरं द्वादशकपालं निर्वपेत् पुत्रे जात" इत्युक्त्वा, "यदष्टाकपालो भवति गायत्र्या एवैनं ब्रह्मवर्चसेन पुनाति" इत्यादिनोच्यमानमष्टाकपालादिकं तत्फलं च यथा न विवक्षितं तद्वत् । तथाहि, समस्तो[4]पासनस्यैव ज्यैष्ठ्यं दर्शयति श्रुतिः । तत्र "औपमन्यवकं त्वमात्मानमुपास्से प्राचीनशालयोग्यकं त्वमात्मानमुपास्स" इत्यादिप्रश्नानन्तरं "दिवमेव भगवो राजन्नादित्यमेव भगवो राजन्", इत्यादिप्रतिवचनैरवयवोपासनेऽभिहिते "अत्त्यन्नं पश्यति प्रियम्", इत्यादिना तत्र तत्र फलनिर्देशं कृत्वापि "मूर्धा त्वेष आत्मन इति होवाच, मूर्धा[5] ते व्यपतिष्यति, यन्मां नागमिष्यः", इत्यादिराजवचनैरनर्थं ब्रवीति । अतः समस्तोपासनमेव मुख्यम् ॥५५॥

॥ नाना शब्दादिभेदात् ॥ ५६ ॥

इह परविद्यायामेकीकरणेनोपासनमुत भेदेनेति संशये नानाशाखाश्रुतानामपि विद्यानां वेद्यस्य ब्रह्मण एकत्वादे[6]कीकरणेनोपासनमिति प्राप्त उच्यते । अनन्तश्रुतिबोध्यानामनन्तानां विद्यानामेकीकृत्यानुष्ठानायोगात् स्वरूपैक्येऽपि ब्रह्मणो गुणभेदाद् विद्याभेदः । यत्र गुणभेदो नास्ति, तत्र स्थानादिभेदाद्विद्याभेदः । राजादिगुणभेदादिन्द्रस्य पुरोडाशदानभेदवद् गार्हपत्यस्थानादिभेदादग्नेरुपचारभेदवच्च विद्याभेद उपपन्न इति निरूपितम् । अतो नानाप्रकारा विद्या[7]-स्तत्तच्छब्दाद्यनुबन्धभेदात् । इति निर्णयः । पुनरधिकरणारम्भोऽयं ज्ञानस्याविधेयतानिरासार्थः ॥ ५६ ॥

॥ विकल्पोऽविशिष्टफलत्वात् ॥ ५७ ॥

एवं नानाप्रकाराः परविद्या निरूपिताः । तासूपासकस्य विकल्पः समुच्चयो वेति संशयः । किं प्राप्नोति । दहरविद्यासद्विद्यादीनां समुच्चयेनानुष्ठानमुचितम् । कर्मभूयस्त्वेन फल[2]भूयस्त्वसंभवात् । विकल्पे तु किंचिन्नियामकं नास्तीति प्राप्ते ब्रूमः । एकस्मिन्नुपासके सर्वासां परविद्यानां विकल्प एव । कुतः । निरतिशयब्रह्मानन्दानुभवस्य ब्रह्मसाक्षात्कारफलस्याविशिष्टत्वात् । प्रयोजनमेकेनोपासनेन यदि सिध्यति । किमन्यैरप्रयोजनैः ।

किंच, एकेनोपासनेन प्रमाणजन्यं ब्रह्मस्वरूपापरोक्षं निरतिशयभावनया सिध्यति । ध्येयतादात्म्याभिमानात् । तदेकं परित्यज्यान्यत्र गमने चित्तविक्षेपः स्यात् । अतो विकल्प एव ॥ ५७ ॥

॥ काम्यास्तु यथाकामं समुच्चीयेरन्, न वा पूर्वहेत्वभावात् ॥ ५८ ॥

इह ब्रह्मसाक्षात्कारव्यतिरिक्तफलानामपि विद्यानां पूर्वाधिकरणन्याय इति संदेहे प्राप्तेऽभिधीयते । न पूर्वाधिकरणन्याय इह संभवति । वैषम्यात् । "देवो भूत्वा देवानप्येति" इति जीवभावनाप्रकर्षवशाद्देवभावसाक्षात्कारप्राप्तिरवगम्यते । परविद्यास्वहंग्रहवतीषु न तथा नाम ब्रह्माद्युपासनासु काम्यासु साक्षात्कारफलत्वे किंचिन्मानमस्ति । तत्फलत्वाभावे च तत्र भोगभूयस्त्वापेक्षया समुच्चय एव युक्तः । ब्रह्मफलवदेकत्वाभावात् । तत एकं वा बहु वा समाश्रित्यानुष्ठेयमिति निर्णयः ॥ ५८ ॥

॥ अङ्गेषु यथाश्रयभावः ॥ ५९ ॥

इह पुनरुद्गीथाद्यङ्गावबद्धानां क्रत्वङ्गभावः स्वातन्त्र्यं वेति संशये पूर्वपक्षन्यायः प्रवर्तते । "उद्गीथमुपासीत" इत्युद्गीथादिष्वङ्गेषु श्रुतानामुपासनानामुद्गीथादिवत् क्रत्वङ्गभाव[4] एव । गोदोहनादिवत् स्ववाक्ये फलाश्रवणात्[5] ॥ ५९ ॥

॥ शिष्टेश्च ॥ ६० ॥

"उद्गीथमुपासीत" इति विधेः, "यदेव विद्यया करोति", इत्यत्र विध्यभावाच्चाङ्गभाव एव ॥ ६० ॥

१ प्रत्यङ्ग–इति पा० ।
२–दङ्गो–इति पा०
३–मत्ति इत्यादिना ब्रह्मात्मत्वं भूयः फलं इति पा० ।
४ भवति इत्यादौ समस्तो–इति पा० ।
५–भिहिते मूर्धा इति पा० ।
६–देकोपा–इति पा० ।
७–सिद्धा–इति पा० ।

१–यतां वदतां नि–इति पा० ।
२–नात्मनः फल–इति पा० ।
३–यः, तथा सति पू–इति पा० ।
४ इत्युद्गीथाद्यङ्गेषु श्रुतानामुद्गीथादीनां क्र–इति पा० ।
५–श्रवणादुद्गीथसंबन्धितया क्रत्वङ्गभाव एव इति पा० ।

॥ समाहारात् ॥ ६१ ॥

"होतृषदनाद्धैवापि दुरुद्गीयमनुसमाहरन्ति" इत्युपासनस्य समाहारे नियमो दृश्यते। अतोऽपि क्रत्वङ्गभावः। "दुरुद्गीथो वेद न हीन उद्गीथो वेद न आहानौ" अन्येन समाधानं ब्रुवद्वाक्यं हि तस्य नियमेनोपादानं दर्शयति। नियमाच्चाङ्गभावः[1] ॥ ६१ ॥

॥ गुणसाधारण्यश्रुतेश्च ॥ ६२ ॥

"तेनेयं त्रयी विद्या वर्तते, ओमित्याश्रावयति, ओमिति शंसति, ओमित्युद्गायति", इति सर्वतः संचरतः प्रणवस्य गुणत्वेनोपासनस्य संचारादप्युपासनोपादाननियमोऽवगम्यते। तेनेति हि प्रकृतपरामर्शशब्दः प्रकृतं सोपासनमेव प्रणवं परामृशति। अतः पूर्वोक्त उद्गीथाद्युपासनानामनियमो न संभवति[2] ॥ ६२ ॥

इति प्राप्ते सिद्धान्त उच्यते ॥

न वा तत्सहभावाश्रुतेः ॥ ६३ ॥

अङ्गभावो हि सहभावः। तदश्रवणादेषां न तद्भावः। "यदेव विद्यया करोति तदेव वीर्यवत्तरम्," इति फलान्तरसाधनतयावगतानामुपासनानामङ्गत्वाभावात्[3]। "उद्गीथमुपासीत" इत्युद्गीथाश्रयतामात्रप्रतिपादनान्न तेषामङ्गावबद्धानां[4] क्रत्वङ्गभावः ॥ ६३ ॥

॥ दर्शनाच्च ॥ ६४ ॥

"एवंविद्ध वै ब्रह्मा यज्ञं यजमानं सर्वांश्चर्त्विजोऽभिरक्षति" इति ब्रह्मणो वेदनेन सर्वरक्षणं वदन्ती श्रुतिरुद्गातृप्रभृतीनां वेदनस्यानियमेनानङ्गतां दर्शयति। अतः पूर्वोक्त उपासनानामनियमो युक्त[5] एव ॥ ६४ ॥

इति श्रीकण्ठशिवाचार्यविरचिते ब्रह्ममीमांसाभाष्ये तृतीयस्याध्यायस्य तृतीयः पादः* ॥ ३ ॥ :: :: ॥

1 "उद्गीथमनुसमाहरन्ति" इति वेदमसमाधानं ब्रुवदस्याङ्गतां द्योतयति इत्येव पा०।

2 प्रकृतस्योपासनस्यैव "ओमिति श्रावयति, ओमिति शंसति, ओमित्युद्गायति," इति सर्वत्र संचरतः प्रणवस्य गुणत्वेनोपासनस्यापि संचारादुपासनोपादाननियमो गम्यते। अतः पूर्वोक्तोपासनानियमो न संभवति इत्येव पा०।

3–तयावगतस्योपासनस्याङ्गत्वाभावात् इति पा०।

4 तेषामुद्गीथानङ्गानां इति पा०।

5–क्तोपादाननियमो न सिद्ध इति पा०।

* अशीतितमे क शीविद्यासुधानिधिपत्रे स्यैवाध्यायस्य द्वितीयपादान्ते. महादेवस्वामिवृत्तान्ते बाणवसुचन्द्रमिते पृष्ठे वयस्केव इत्यत्र वयस्कैव इति, रसवसुचन्द्रमिते पृष्ठे च मदन्त इत्यत्र मदन्ते इति बोध्यम्। मुद्रणसमये मुद्रकप्रमादात् तु तदाहित्यं ज्ञेयम्। यथा तस्मिन्नेव पण्डितपत्रे प्रारम्भ एव काशीविद्यासुधानिधिशब्दादग्रे विसर्गापहारः। प्रशंसाशब्दे तालव्यशकारद्वयद्वर्निवेशस्त्वपाणिनीयत्वेऽपि महामहोपाध्यायश्रीयुतविल्सनसाहेबकृतबृहत्कोशानुरोधाद्वैचित्र्यार्थः। वस्तुतस्तत्र मूलं मग्यम्।

THE VIDVAN-MANO-RANJINI

OR

REJOICER OF THE MIND OF THE LEARNED,

A COMMENTARY ON SAD-ÁNANDA'S VEDÁNTA-SÁRA, BY RÁMA-TÍRTHA.

(Continued from page 168.)

In these two [*in understanding, and the common sensory, recollection, and egotism are included.*] Recollection is a modification of the internal organ, identical with resuscitation. Egotism is a modification of the internal organ identical with self-assertion. Recollection is included in the understanding, both indifferently consisting of limitation of their object; and egoism is included in the common sensory, it also consisting indifferently of determination. Thus, though there is no essential distinction, yet somtimes recollection and egotism are enunciated separately from understanding and the common sensory, in consequence of their difference of objects. For the object of understanding does not depend on an antecedent cognition, while the object of recollection must have been previously perceived. Thus all objects whether internal or external, each in its own manner, are objects of the common sensory; while the object of egotism is only spirit tinged by that which is not spirit. Therefore, there being a difference of objects without any essential difference, there is nothing to prevent the inclusion. The author states, as in the former case, that the four varieties also of the internal organ are composed of the elements.

These again [*from the mingled pure particles belonging to the ether &c.*] He next states the reason why the aforesaid cognitive organs, and the internal organ are the products of pure particles of the elements.

Because they consist of enlightenment. To this effect there being a traditional text: Purity, as being void of impurity, is illuminant, and unblemished. Enlightenment which is the product of purity, being observed in the sense-organs and the internal organ, infers that they

अनयोरेवेति। अनुसन्धानात्मिकान्तःकरणवृत्तिश्चित्तं अभिमानात्मिकान्तःकरणवृत्तिरहङ्कारः चित्तस्य बुद्धावन्तर्भावः विषयपरिच्छित्तिरूपत्वाविशेषात्। अहङ्कारस्य मनस्यन्तर्भावः तस्यापि सङ्कल्पात्मकत्वाविशेषात्। एवं स्वरूपाभेदेऽपि विषयभेदात् क्वचिच्चित्ताहङ्कारयोर्बुद्धिमनोभ्यां पृथग्निर्देशः बुद्धेरपूर्व्वो विषयः चित्तस्य पूर्व्वानुभूतः तथा मनसो बाह्याभ्यन्तरश्च सर्व्वो विषयः यथायोगम्। अहङ्कारस्यत्वनात्मोपरक्त आत्मैवेति अतो विषयभेदेऽपि स्वरूपाभेदाद्युक्तोऽन्तर्भाव इति भावः। पूर्व्ववदेषां चतुर्णामप्यन्तःकरणभेदानां भौतिकत्वमाह

एते पुनरिति। उक्तानां ज्ञानेन्द्रियाणामन्तःकरणानाञ्च भूतगतसात्त्विकांशकार्य्यत्वे हेतुमाह ॥

तेषां प्रकाशात्मकत्वादिति। तत्र सत्वं निर्म्मलत्वात् प्रकाशकमनामयमिति स्मृतेः। सत्त्वकार्य्यभूतः प्रकाशः इन्द्रियान्तःकरणेषूपलभ्यमानस्तेषां सत्त्वकार्य्यतां गमयतीत्यर्थः। निरूप्यमाणे लिङ्गशरीरे उक्तावयवैः सिद्धमवान्तरभेदं कथयति ॥

are the effects of purity. The author next states a subdivision established by the constituents declared as those of the evidentiary body under description.

This understanding [*being associated with the cognitive organs, is the sensational sheath.*] By employing the word understanding the exclusion of the common sensory is implied. The author next enumerates a particular appellation of intelligence conditioned by the sensational sheath.

This [*passing through this and other worlds by reason of its self-assertion of agency and fruition, is called the conventional or practical individuated spirit.*] The connection of the words in the text is: This intelligent spirit as conditioned by the sensational sheath, is called the individuated spirit. A difference of this from pure intelligence is stated.

Practical. He explicates the convention or practical activity by another character.

Passing through this and other worlds. The reason of this is stated.

By reason of its self-assertion of agency and fruition. Accordingly the Vedic text: Sensation spreads sacrifice, and spreads also actions. The agency of intelligent spirit is not real, but only self-asserted, therefore the words by reason of its self-assertion are subjoined. To this effect there is a Vedic text: He being equal goes through both worlds, and as it were meditates, and and keeps moving. By the words as it were, the mere seemingness of practical activity is indicated. Accordingly the aphorisms: An agent, because he knows the meaning of the system, And like a carpenter in both ways, establish the practical existence of agency and the real existence of non-agency. As before, he states a subdivision connected with the common sensory.

The common sensory [*being associated with the organs of action, becomes the sensorial sheath.*]. The organs of action are the instruments effective of action.

इयं बुद्धिरिति । बुद्धिग्रहणेनार्थान्मनोव्यावृत्तिरभिप्रेतातदुपहितचैतन्यस्य च व्यपदेशभेदमाह ॥

अयमिति । अयं विज्ञानमयकोशावच्छिन्नश्चिदात्माजीव इत्युच्यते इत्यन्वयः । तस्य प्रज्ञात्मनो विशेषमाह ॥

व्यावहारिक इति । व्यवहारमेव विशेषणान्तरेण व्यनक्ति ॥

इह लोकेति । तत्र हेतुमाह ॥

कर्तृत्वेति । तथा च श्रुतिः । विज्ञानं यज्ञं तनुते कर्म्माणि तनुतेपि चेति । कर्तृत्वादिकं चैतन्यात्मनो न वास्तवं किन्त्वाभिमानिकमित्यभिमानित्वेनेत्युक्तं । तथा च श्रुतिः । स समानः सन्नुभौ लोकावनुसञ्चरति ध्यायतीव लेलायतीवेत्याद्या । इवशब्देन व्यवहारस्याभासतां दर्शयति । तथा न्यायौ च कर्त्ता शास्त्रार्थवत्त्वादिति । यथा च तक्षोभयथेति च कर्तृत्वाकर्तृत्वयोर्व्यावहारिकपारमार्थिकत्वे व्यवस्थापयतः । पूर्व्ववन्मनःसम्बद्धमवान्तरभेदमाह ॥

मनस्त्विति । कर्म्मसाधनानीन्द्रियाणि कर्म्मेन्द्रियाणि । वचनादानगमनविसर्गानन्दसाधनेन्द्रियत्वं यथाक्रमं वागादीनां प्रत्येकं लक्षणं । एतेषामपि पूर्व्ववद्भौतिकत्वमाह ॥

The respective definitions, in their order, of the voice &c., are an organ efficient of speech, handling, walking, excretion, and delight. As in the former instances, it is stated that these also are composed of the elements.

These [*organs of action*] *again* [*are severally produced from the passionate particles of the ether &c. separately.*]

It may be asked: Why is it indicated that the organs are elementary, for they are revealed to have been produced from the first cause itself, which is the source of the elements, in the words: From this [supreme] springs vital air, the internal sense, and all the organs? True, there is such a Vedic text: and in regard to it, adopting the order of the facts, we allow the genesis of the organs from this source of the elements when it has assumed the nature of the elements. Accordingly the

---

एतानि पुनरिति । ननु कथमिन्द्रियाणां भौतिकत्वं निर्दिश्यते यतएषां भूतयोनेः परमकारणादेवोत्पत्तिः श्रूयते एतस्माज्जायते प्राणोमनः सर्व्वेन्द्रियाणि चेति सत्यं श्रूयते तत्रार्थक्रममेवाश्रित्य भूतभावमापन्नात्तस्माद्भूतयोनेरिन्द्रियोत्पत्तिराश्रिता । तथाच न्यायः । अन्तरा विज्ञानमनसीक्रमेण तल्लिङ्गादिति चेन्नाविशेषादिति । नचैतेषां भौतिकत्वे प्रमाणाभावः । अन्नमयं हि सौम्यमनआपोमयाः प्राणास्तेजोमयीवागिति श्रौतलिङ्गस्य प्रमाणत्वात् । नच वागादिष्विन्द्रियत्वमप्रसिद्धमिति वाच्यं प्रज्ञया वाचं समारुह्यवाचाहिसर्व्वाणि नामान्याप्नोतीति कौषीतक्यादौ चक्षुरादिभिः सह वाचः समभिव्याहृतत्वात् आथर्व्वणेच चक्षुश्च द्रष्टव्यमित्यादिना सविषयाणीन्द्रियाण्युपक्रम्य हस्तावादातव्यं चोपस्थश्चानन्दयितव्यञ्च पायुश्च विसर्जयितव्यञ्च पादौ च गन्तव्यञ्चेति हस्तादीनामपि सविषयाणां समभिव्याहृतत्वात् । एतानि चेन्द्रियाण्येकादशैव भवन्ति न न्यूनानि नाधिकानि दशेमे पुरुषे प्राणाआत्मैकादशइति श्रुत्यन्तरबोधेन सिद्धान्तितत्वात् । अत्रात्मशब्दोमनोविषयः प्राणशब्दइतरेन्द्रियविषयइति भेदः । अतीन्द्रियत्वं सूक्ष्मत्वं इन्द्रियाग्राह्यत्वमिति यावत् । अणुत्वञ्चैषां परिछिन्नत्वे सति सूक्ष्मत्वलक्षणमभ्युपगन्तव्यं नतु परमाणुलक्षणं तथा सति सर्व्वशरीरव्यापिकार्य्यानुपपत्तिप्रसङ्गात् अपरिछिन्नत्वे चोत्क्रान्तिगत्यागतिश्रुतिव्याकोपप्रसङ्गः । स्थूलत्वे चोत्क्रान्तिसमये बिलान्निर्गछन्तइव सर्पाः शरीरछिद्रेभ्यो निष्क्रममाणानीन्द्रियाणि प्रत्यक्षेणोपलभ्येरन् । नचोपलभ्यन्ते तस्मादुक्तप्रकारेणाणूनीन्द्रियाणि । नन्वग्निर्व्वाग्भूत्वा मुखं प्राविशदित्यादिश्रुतेरग्न्यादिदेवतानामेव मुखादिस्थानेषु वागादीन्द्रियात्मना प्रवेशश्रवणात् कथमेषां भौतिकत्वमुच्यते इति चेन्नैषदोषः देवतानामप्याधिदैविकप्राणात्मनां भौतिकदेहविशिष्टचेतनानामेवैश्वर्य्ययोगात् आध्यात्मवागादिरूपेण मुखादिष्ववस्थानस्येष्टत्वात् तथाच भौतिकान्यपीन्द्रियाणि देवताशरीराणि चेति न विरुध्यते । यद्वा इन्द्रियाण्युक्तलक्षणानि भौतिकान्येव देवतानां पुनस्तदधिष्ठातृत्वेन तच्छरीरतया तत्र प्रवेश एवाग्निर्वाग्भूत्वेत्यादावाम्नायतइति । तथाच न्यायोज्योतिराद्यधिष्ठानन्तु तदाम्ननादिति । लिङ्गञ्च स एतास्तेजोमात्राः समभ्याददानोहृदयमेवानुक्रामतीति तेजोमात्राणामिन्द्रियाणामुत्क्रान्तिसमये हृदय प्रवेशमुक्त्वा स यत्रैषचाक्षुषः पुरुषः पराङ्पर्य्यावर्त्ततेतथाच रूपज्ञो भवतीत्यादित्यपुरुषस्य चक्षुषोपक्रमणं दर्शयति । ये पुनर्म्मुख्यप्राणस्य वृत्तिभेदावागादयइति वदन्ति तेप्यनयैव रीत्या निराकरणीयाः । ते हवाचमूचुस्त्वं न उद्गायेत्युपक्रम्यासुरपापविद्धत्वेन वागादीननुद्गातॄन्निर्धार्य्य समाप्य च वागादिप्रकरणमथाहेममासन्नं प्राणमूचुरिति पृथगेव मुख्यप्राणस्य निर्देशात् । तथा सुषुप्तावपि वागादीनामुपसंहारेमुख्यप्राणस्य सवृत्तिकस्यास्तिजागरणमिति वैषम्यलिङ्गाच्च प्राणादिन्द्रियाणां भेदः एवमादिन्यायकलापोद्वितीयेऽध्याये चतुर्थपादे विस्तृतः इह पुनर्वेदान्तसारत्वात् ग्रन्थस्य वेदान्तविहिता न्यायलेशतादर्शिता इति तस्माद्युक्तमिन्द्रियाणां भौतिकत्वादीति स्थितं । इदानीं वायुपञ्चकं विभजते ॥

aphorism: Excepting the sensations and the internal organ, the [organs] respectively result from that sign; if this be maintained, we deny it, there being no difference. Nor is there any want of proof that the organs are composed of the elements; for the words of the Veda, The internal sense, fair sir, is made of earth, the vital airs of water, the voice of light, are proof of this. It cannot be objected that the nature of an organ is not ascribed with universal consent to the voice [and other organs of action]: for the voice is enumerated together with the eye and other organs in the Kaushîtakî and other Upanishads in the words, By wisdom attaining to speech, With the voice he acquires all names; and in the Âtharvaṇa the hand and other active organs are mentioned together with their objects in the words beginning with The eye, therfore one may see, and thus specifying the organs and their functions, and proceeding The hands, therefore one may handle, the feet therefore one may walk.

These organs are eleven in number, neither more nor less; a principle established by the evidence of another text: Ten are these organs in a person, soul is the eleventh. In this text the term soul stands for the internal organ, and the word organ for the other sensories. Supersensibility means minuteness, that is inappreciability to sense. Their infinitesimal size is to be understood as minuteness under limitation, not as atomic dimension. For were the senses of atomic dimension, it would be impossible that an effect should be produced in them which is diffused over the whole body. Again, were they unlimited, a contradiction to the texts affirming their ascension, going, and coming, would emerge. Were they of perceptible dimension, the organs of sense when issuing forth from the outlets of the body, would be apprehended by perception like snakes issuing from their holes. They are not thus apprehended, and are therefore minute in the aforesaid manner [that is, are of limited dimension, but not of atomic dimension as the Naiyâyikas maintain.]

It may be urged: According to the text Fire became the voice and entered the mouth &c., it being revealed that it was the god Agni and the other deities that entered the mouth and other parts as the voice and other organs, why then are they said to be composed of the elements? This we do not allow to be any objection, for we admit that the gods also as identical with the divine senses, since only spirits possessed of an elementary body can possess the power of dominion, reside in the mouth and other parts in the form of divine or spiritual speech &c. There is nothing contradictory in the view that the organs are at once elementary and embodiments of the deities. Or else the organs, as characterised above, are only composed of the elements; and it is only revealed in the text Fire became the voice &c. that the gods as the rulers thereof, and as embodied therein, entered those places. Accordingly the aphorism: Light &c. is the ruler, this being revealed. Another testimomy is given in the words: The spirit taking these particles of light ascends unto the heart. After shewing that the organs composed of light at the time of their ascension enter the heart, the text proceeds to shew in the words Where this visive spirit turns back again, and thus comes to know colours, that the solar spirit issues forth from the eye.

Those, again, who maintain that the voice and other organs are special modifications of the principal organ, may be refuted in a similar manner; for the principal organ is separately pointed out in the texts beginning They [the tutelary deities of the senses] spake with the voice, Sing thou for us, and thus indicating that the voice and other organs as tainted with concupiscence, are incapable of hymning aright, in closing the treatment of the voice &c. address the proximate organ. So also in dreamless sleep the voice and other organs are retracted, while the principal organ with its function remains awake; another indication of difference between the senses and the principal organ. These and other aphorisms are treated in detail in the fourth quarter of the second book [of the Vedânta-sûtra.] In this treatise, which gives but a summary of the Vedânta, only a few of the aphorisms laid down in that system are propounded. It is determined, then, sufficiently that the organs of sense are composed of the elements &c.

The author now proceeds to enumerate the five vital airs.

The vital airs [are respiration, flatulence, circulation, pulsation of the throat and head, and assimilation]. Forward motion means progress forwards. Respiration is said to reside in the forepart of the nose, it being a matter of presentative consciousness that it

---

वायवइति प्रागगमनमग्रतोनिःसरणं यद्यपि प्राणोहृदयइति श्रुतेः हृदि प्राणइत्यभिधानाच्च हृदयं स्थानं प्राणस्य तथापि नासाग्रे प्रत्यक्षमुपलभ्यमानत्वान्नासाग्रस्थानवर्त्तीत्युक्तं अधोनाभेरधस्तात् गमनवान् मलाद्यानयनव्यापारेण। पायुर्गुदं तत्स्थानवर्त्तीत्यर्थः। आदिशब्दादुपस्थग्रहः तत्रापि मूत्ररेतोविसर्गस्यापानकर्म्मत्वात्। विष्वक्परितः सर्व्वतोगमनं विद्यते यस्य स तथा। प्राणापानयोर्नियमनकर्ताअरण्यामग्न्युत्पादनादिवीर्य्यवत् कर्म्महेतुत्वादखिलशरीरवर्ती व्यान इत्यर्थः। तथाच श्रुतिः अथ यः प्राणापानयोः सन्धिः सव्यानइत्युपक्रम्य यथा अग्नेर्मन्थनमाजेः स्मरणं दृढस्य धनुषआयमनमबन्नान्नपानांतानि करोतीति यद्यपि चक्षुषो वा मूर्द्ध्नो वा अन्येभ्यो वा शरीरदेशेभ्यइति श्रुतेरुत्क्रमणस्य चक्षुरादिद्वारेष्वनियमस्तथापि कण्ठसम्बन्धस्य प्रायेण नियतत्वात् कण्ठस्थानवर्त्ती उदानइत्युक्तं। अशितादेः समनयनात् समान इत्यर्थः। मतान्तरमुत्थापयति स्वमतपरिशुद्धये॥

केचित्त्विति। तेषां लक्षणान्याह।

exists there; though according to the text Respiration is in the heart, and to the common saying to the same effect, the heart is the seat of respiration. [*That is called flatulence which goes downwards.*] Downwards means possessing a motion below the navel, in its office of conducting the excreta. [*That called circulation, which goes everywhere.*] Every where means that which moves round about in all directions. Circulation is that which has for its office the controlling of the circulation and flatulence, because it is the cause of their action, like the fire-producing power of the fire-drill, and which pervades the whole of the body. So also the Vedic text beginning Circulation is that which is the juncture of respiration and flatulence, which effects the suscitation of fire, the recollection of the reach [of a jump, a throw &c], the stretch of a strong bow, and the consumption of meat and drink. Though according to the text From the eye, the head, or other parts of the body, the egress is not limited to the eye and other points of issue; yet as it is almost invariably connected with the throat, pulsation is said to reside in the throat as its seat. Assimilation is so called from the reduction of food &c. to similarity [with the organism.] To make his own doctrine clear, the author cites another opinion.

But some [*say there are five other vital airs.*] Their characteristics are stated.

The snake &c. [*the tortoise, partridge, the conch-shell of Arjuna, and the god of fire.*] Vomiting is eructation. The term opening indicates secondarily the closing of the eyes. Nutrition is feeding. The other words are easily understood. The doctrine thus set up the author proceeds to impugn.

[*Some say there are only five*] *these,* [*the snake &c. being included in the vital airs called respiration &c.*] The word some designates the Vedântins, the adherents of the Upanishads. The meaning of the words Because the snake &c. are included in respiration &c., is as follows. Retching or vomiting is the action of vertical vital air, and this vertical air is pulsation. Thus as eructation is accounted for by pulsation, the snake or agent therein being included in pulsation, is not distinct therefrom. As the opening of the eyes is included among the muscular activities of the body, and these are caused by circulation, the tortoise or agent in the opening of the eyes is included in circulation. Hunger is produced by assimilation or digestion of liquid and solid food, in the state of chyle, when it effects an entrance into all the parts of the body; and therefore the partridge the agent therein, is included in assimilation. Yawning being caused by drowsiness and the like, and these being caused by food which produces flatulence &c., and the reception of food being the office of flatulence, the conch of Arjun a or cause of yawning is mediately included in flatulence. That the vital air called flatulence, which being directed inwards enters within the body, is the cause of the reception of food, is revealed in the Aitareyaka Upanishad, in the words: Then by flatulence he smelt, and then retained the chyle. The god of fire is included in assimilation the agent of nutrition, feeding being a synonym for nutrition, which takes place when the food is changed successively into chyle, blood, muscle &c. Since, therefore, the designations snake &c. are accounted for as being the vital airs respiration &c., having the respective functions of eructation &c., under different conditions, the hypothesis of the snake &c. being distinct principles is invalidated as violating the law of parcimony. Moreover in different passages of the Veda there are mentioned only five vital airs, and the hypothesis is thus repugnant to revelation.

Respiration and the rest are all only special modifications of one dominant vital air, and not distinct principles; for vital air susceptible of modifications, and designated by the term *and* without any prepositional prefix, is separately enumerated in the Bṛihad-âraṇyaka in the words Respiration, flatulence, circulation, pulsation, and assmilation, are vital airs. Conformably

---

नागइत्यादिना। उद्गिरणं छर्द्दिः। उन्मीलनशब्दो निमीलनस्याप्युपलक्षणपरः पोषणं पुष्टिः अन्यत्प्रसिद्धं। उत्थापितं मतं प्रत्याचष्टे॥

एतेषामिति। केचिच्छब्दश्चौपनिषदविषयः। एतेषां नागादीनां प्राणादिष्वन्तर्भावादित्ययमर्थः। उद्गिरणं हि ऊर्द्ध्वमुखस्य वायोः क्रिया ऊर्द्ध्वमुखश्च वायुरुदानइत्युक्तं तथाचोदानेनैवोद्गिरणस्यापि सिद्धौ नागस्य तत्कर्त्तुरुदानेऽन्तर्भावान्न ततः पृथक्त्वं। उन्मीलनस्याङ्गचेष्टान्तर्गतत्वात्तस्याश्च व्याननिमित्तकत्वात् उन्मीलनकर्त्तुः कूर्म्मस्य व्यानेऽन्तर्भावः। समानेनाशितपीतादीनां पाकेन रसादिभावमापद्य सकलशरीरदेशेषु तत्प्रवेशने कृते सत्येव क्षुधोत्पत्तेः तत्कर्त्तुः कृकरस्य समानेऽन्तर्भावः। जृम्भणस्य निद्रालस्यादिहेतुकत्वान्निद्रालस्यादेश्च वातुलाद्यन्नोपजीवननिमित्तकत्वादन्नस्वीकरणस्य चापानकर्म्मत्वादपानएव परम्परया जृम्भणहेतोर्देवदत्तस्यान्तर्भावः अपानाख्यस्यान्तर्म्मुखतया शरीरान्तः प्रविशतो वायोरन्नस्वीकरणे हेतुत्वमैतरेयके समाम्नायते तदाऽपानेनाजिघ्रत्तदावयदिति। रसलोहितमांसादिक्रमेण शरीरेऽन्नपरिणामे सत्येव पोषणपर्य्यायाः पुष्टेः सम्भवाद्रसादिकर्त्तरि समाने धनञ्जयस्यान्तर्भावः। तथाच प्राणादीनामेव यथायथमुद्गारादिक्रियानिमित्ततयावस्थान्तरमापद्यमानानां नागादिसंज्ञायाश्चाप्युपपत्तौ तत्त्वान्तरकल्पनं तेषां गौरवमप्रामाणिकमिति भावः। श्रुतौतु पञ्चानामेव प्राणादीनां तत्र तत्र श्रवणात्तद्विरुद्धा चेयं कल्पना। प्राणादयोपि मुख्यस्यैकस्यप्राणस्य वृत्तिविशेषा एव न तत्त्वान्तरभूताः प्राणोऽपानव्यानउदानः समानोऽनइति बृहदारण्यके वृत्तिमतः प्राणस्य निरुपसर्गानशब्दवाच्यस्य पृथङ्निर्देशात्। तथाच न्यायः पञ्चवृत्तिर्मनोवद्व्यपदेश्यादिति। तथाच मुख्यप्राणोऽपि वायोर्बाह्यस्य सूत्रात्मरूपस्य विकारो न शरीरमध्ये नभोवद्वृत्तिलाभमात्रेणावस्थितोवायुरेव। नापि वागादीनां सामान्यवृत्तिरूपा वा क्रिया। एतस्माज्जायते प्राणोमनः सर्व्वेन्द्रियाणिच खं वायुरिति श्रुतौ वायोरिन्द्रियाणाञ्च प्राणात् पृथगेव निर्देशात् तथाच न्यायः न वायुक्रिये पृथगुपदेशादिति। अणुश्चेत्यादिन्यायवशादिन्द्रियवत् सूक्ष्मत्वादिकमपि प्राणस्यानुसन्धेयमिति संग्रहः। प्राणादीनामपि पूर्व्ववदुपादानादिविशेषं सङ्कीर्त्तयति॥

to this the aphorism: With five modifications, because of designations like those of the internal organ. The dominant vital air, therefore, is a modification of the environing atmosphere its material cause, not that atmosphere itself residing within the organism in the same manner as ether. Nor is it a function, the common modification of the voice and other active organs; for the atmosphere and the organs of sense are enumerated separately from the vital air in the text, From it proceeds the vital air, the internal organ, and all the organs of sense, the ether and the air. Accordingly the aphorism Neither atmosphere nor a function, for it is separately declared. And from such aphorisms as Minute &c., we must collect that the vital air is imperceptible &c. like the sense-organs. Such is a summary of the doctrine of vital air. The author, as in former cases, recounts the details of the material causes &c. of respiration and the other vital airs.

This &c. [*this aggregate of five vital airs, respiration and the rest, is produced from mingled passionate particle that belong to ether &c.*] As in former cases the author states a specific difference of the aforesaid organs of action together with the five vital airs.

This aggregate of five [*vital airs together with the organs of action becomes the vital sheath.*] The author states a sign that the five vital airs are the educt of passionate particles.

[*That it is made of passionate particles is shown by the fact*] *of this* [*sheath's consisting of activity.*] Recalling the afore-mentioned three sheaths [*viz.* the sensational, sensorial, and vital], he describes their respective circumstances. *Among these sheaths &c.* According the text: The sensational sheath is that spirit which is the inner light of the heart among the vital airs; the sensational sheath being proximate pure intelligence, possesses cognitive faculty. According to the texts: Desire, intention, deliberation &c., wish another synonym of desire being ascertained to be a modification of the internal sensory, the cognitive faculty pertains to the sensorial sheath. According to such texts as: As an insect confined within a garment produced by itself, so is this vital air within this body; What having issued forth, shall I issue forth, and what staying behind shall I stay behind? He created the vital air; —according to such texts the active faculty belongs to the vital sheath. [*They say that this is the division*

एतदिति । उक्तानामेव कर्म्मेन्द्रियाणां प्राणादिभिर्मिलितानां पूर्व्ववदवान्तरविशेषमाह ॥

इदं प्राणादीति । प्राणादिपञ्चकस्य रजोंऽशकार्य्यत्वे लिङ्गमाह ॥

अस्येति । उक्तं कोशत्रयमनूद्य तेषां प्रतिनियतां व्यवस्थां दर्शयति ॥

of these three sheaths, for there is a fitness in their mutual relations thus regarded.] The meaning of the words *For there is a fitness* is as follows. It has been shown that the sensational sheath is an agent. The sensorial sheath is an instrument, being the means of discrimination. The internal sensory is that in the concomitance and non-concomitance whereof there is or is not cognition, though the soul, sense-organs, and sensible objects, be in juxta-position. It is included under the category of instruments, because it is a means of discrimination. The sensorial sheath is, therefore, properly described as an instrument. So the sacred text: I was with with my internal sense elsewhere and saw not, I was with my internal sense elsewhere and heard not, Thereafter touched on the back he knows it not with his internal sense. Also there is an aphorism Either there is constant perception or not constant perception, or one or other may be constant. So also according to the text They two became a pair, thence the vital air arose, the vital air being declared to be produced by the voice and the internal organ united in a pair, it is proper to describe the vital sheath as an effect or product.

Having thus described the parts of the subtile body together with their characteristics, the author proceeds to describe the whole.

This triad of sheaths [*being united is called the subtile body.*] The subtile body is that wherein the internal organ resides. The subtile body being revealed in such texts as Infinite is the internal organ, Infinite are all the gods, as one and as many, the author proceeds to show that this unity and plurality depends on illusion.

The totality of the subtile [*bodies, is either collective as being the object of one cognition, like a forest or a tank, or distributive as being the object of a plurality of cognitions, like the trees of the forest or the waters of the tank.* The unity of the collective whole and the collective parts is manifestly declared in the Vṛibadāraṇyka Upanishad in the words Air is distributive, air is collective. The author proceeds to declare the various designations in general acceptation of pure intelligence conceiting itself to be the subtile bodies collectively.

एषु कोशेष्वित्यादिना । विज्ञानमयः प्राणेषु हृद्यन्तर्ज्योतिः पुरुष इति श्रुतेर्विज्ञानस्य चैतन्यं प्रत्यतिसन्निहितत्वात् ज्ञानशक्तिमत्त्वं कामः सङ्कल्पोविचिकित्सेत्यादिश्रुतेः कामापरपर्य्यायायाः इच्छाया मनोवृत्तित्वावधारणादिच्छाशक्तिमत्त्वं मनोमयकोशस्य। स यथा प्रयोज्य आवरणे युक्तः एवमेवायमस्मिन् शरीरे प्राणोयुक्तः कस्मिन्नहमुत्क्रान्ते उत्क्रान्तो भविष्यामिकस्मिन्वा प्रतिष्ठिते प्रतिष्ठास्यामीति सप्राणमसृजतेत्यादिश्रुतेः प्राणमयकोशस्य क्रियाशक्तिमत्वं । योग्यत्वादित्यस्यायमर्थः । विज्ञानमयस्य तु कर्तृत्वमुपपादितं मनोमयकोशस्य करणत्वं विवेकसाधनत्वात् आत्मेन्द्रियविषयाणां सन्निकर्षे विद्यमानेपि यदन्वयव्यतिरेकाभ्यां ज्ञानभावाभावौ त-

Conditioned by this aggregate [*of subtile bodies, pure intelligence is called the thread-soul, the embryo of light, and vital air.*] He assigns the reason of the three designations.

Because it is passed like a thread through all, [*and because it is associated with that sheath which possesses cognitive, and with that which possesses active, power.*] It is called the thread-soul, because it is passed like a thread through all. It is called the embryo of light, because it is associated with the internal organ possessing the faculty of cognition. It is called vital air, because it consists of divine air possessing the power of action, or because it consists of such internal air. Or else it may be explained that the collective subtile body possessing the faculty of cognition, consists of the aggregate of all the vital airs and organs, and that as being conditioned hereby pure intelligence, when there is a predominance of cognition, is called the embryo of light; and when there is a predominance of action is called vital air. Accordingly the texts of the Veda: Air indeed, O Gautama, is the thread thereof; By air, O Gautama, the thread thereof; The embryo of light existed aforetime; He begot the embryo of light aforetime; Which is that one god; and such as it is vital air; It is called vital air. By the particle *and* in the enumeration such other designations are understood as Who, Prajâ-pati, Brahmâ.

After thus enumerating the particular designations of pure intelligence conditioned by the subtile body, the author describes the different names of the condition or concomitant subtile body.

This [*collective totality of the subtile bodies, from its being subtile in comparison with the totality of the gross objects, is called the subtile body*] *of that* [*Hiranya-garbha or embryo of light.*] The gross world is Virât [or the gross universal body]; the three sheaths, sensational, sensorial, and vital, are called the subtile body. [*It is called a dream because it is made up of the phantasmata or representations of waking presentations*]. The term triad of sheaths has a double connection [with both the preceding and following clauses], after the manner of lamp placed in the middle of a door [and throwing light both inwards and outwards.] That this is composed of phantasmata is declared by a Vedic text beginning The colour of that twofold spirit [that is, of spirit associated with illusion], is like a deeply coloured cloth, and like pale woollen cloth, and ending When once well washed. It is a dream, because it is the place of union between the subtile and the gross universal frames, it being similarly declared by revelation that union is the third place of dreaming. The construction is that it is so because it consists of phantasmata. The text beginning After taking portions of every limb, of himself by nature, and the text beginning Having formed a body by dreaming, which text shows that the gross body is dissolved in dreaming, indicate that dissolution of the collective totality that is the whole universe in that union.

After thus enumerating the names of the collective subtile body and of intelligence associated therewith, the author recounts the designations of the distributive subtile body and of intelligence thereby conditioned. [*Intelligence conditioned by*] *this* [*distribution of subtile body, is called luminous.*] He next designs the reason of the designation luminous.

[*Because it is conditioned by the internal organ*] *composed of light.* It is said to be composed of light, it being explained that in the text Having created himself with his own light, the word light means the internal organ identical with the phantasmata. [*Of this, that is, of the luminous, the distributive totality of subtile bodies, being more subtile than the gross body is called the subtile body.*] The meaning of the words Of this &c., is plain. After thus establishing the indifference or identity of the collective and distributive subtile bodies, and of the junctions between those conditions, the author proceeds to indicate the special junction or experience of the luminous spirit and of the thread-soul respectively.

A. E. G. & G. D.

न्मनोविवेकसाधनत्वात् करणपक्षपातीति युक्तं मनोमयस्य करणरूपत्वं। तथाच श्रुतिः। अन्यत्र मनाअभुवं नादर्शं अन्यत्र मनाअभूवं नाश्रौषमिति तस्मादपि पृष्ठतउपस्पृष्टोमनसा विजानातीति च न्यायश्च भवति नित्योपलब्ध्यनुपलब्धिप्रसङ्गोऽन्यतरनियमोवान्यथेति। तथातौ मिथुनंसमेतां ततः प्राणोऽजायतेति श्रुतेः। प्राणस्य वाङ्मनसयोर्मिथुनीभूतयोरुत्पत्तिश्रवणात् प्राणमयस्य कार्य्यरूपत्वं युक्तमिति। एवं सूक्ष्मशरीरस्यावयवान् सविशेषान्निरूप्यावयविनं निर्दिशति॥

एतत् कोशेति। लिङ्गं मनो यत्र निषक्तं। अनन्तं वैमनोऽनन्ता विश्वे देवा इत्यादिश्रुतिषु लिङ्गशरीरस्याप्येकत्व बहुत्वश्रवणात्तदेकत्वानेकत्वयोरप्यज्ञानादेव व्यवस्थेत्यभिप्रेत्याह॥

अखिलसूक्ष्मेति। अनयोर्व्यष्टिसमष्ट्योरेकत्वं स्पष्टमेवपद्यते वायुरेव व्यष्टिर्वायुः समष्टिरिति बृहदारण्यके। समष्टिलिङ्ग शरीराभिमानिनश्चेतन्यस्य व्यवहारसिद्धान् व्यपदेशविशेषानाह॥

एतत् समष्टीति। व्यपदेशत्रये निमित्तमाह॥

सर्व्वान्वित्यादिना। सर्व्वत्रानुस्यूतत्वात् सूत्रात्माज्ञानशक्तिमदन्तःकरणोपहितत्वाद्धिरण्यगर्भः। क्रियाशक्तिमदधिदैवतप्राणरूपत्वात् प्राणः। तादृगध्यात्मप्राणरूपत्वाद्वा। यद्वा ज्ञानक्रियाशक्तिमत् समष्टिप्राणेन्द्रियसमुदायात्मकं समष्टिलिङ्गशरीरं तदुपहितत्वात् ज्ञानशक्तिप्राधान्येन हिरण्यगर्भः क्रियाशक्तिप्राधान्येन प्राणइति च व्यपदेशइति योजना। तथा च श्रुतिवचनानि वायुर्वै गौतम तत्सूत्रं वायुना गौतम तत्सूत्रेणेति हिरण्यगर्भः समवर्त्तताग्रे हिरण्यगर्भं जनयामास पूर्व्वमिति कतमएकोदेवइति प्राणइतिचैवमादीनि प्राणइति चोच्यते इति च शब्दात् कः प्रजापतिर्ब्रह्मेत्यादि व्यपदेशान्तराणि समुच्चीयन्ते। एवमुपहितव्यपदेशभेदानुक्त्वोपाधेरपितानाह॥

PRINTED AND PUBLISHED BY THE PROPRIETORS, E. J. LAZARUS AND CO. AT THE MEDICAL HALL PRESS, BENARES.

काशीविद्यासुधानिधिः

श्रीगणेशाय नमः

श्रीमद्विजयिनीदेवीपाठशालोदयोदितः । प्राच्यप्रतीच्यवाक्पूर्वापरपचद्वयान्वितः ॥ १ ॥
अङ्करश्मिः स्फुटयतु काशीविद्यासुधानिधिः । प्राचीनार्यजनप्रज्ञाविलासकुमुदोत्करान् ॥ २ ॥

THE PANDIT.

A Monthly Journal, of the Benares College, devoted to Sanskrit Literature.

No. 82. Benares, March 1st, 1873. Vol. VII.

॥ चिन्तामणेः शब्दखण्डम् ॥

(१) यद्वा स्वर्गकामकार्यविषयो याग इति शाब्दानुभवानन्तरमर्थाद्यागविषयकं कार्यमिति ज्ञानमनुपपत्तिप्रभवम् । अत एव शाब्दबोधानन्तरमौपादानिकबोधात्प्रवृत्तिः । (२) किं चापूर्व्ववाच्यत्वेपि न कलञ्जं भक्षयेदित्यादितः कलञ्जभक्षणाभावविषयकमपूर्व्वमवगम्यापि न प्रवर्त्तेत तदभावे । तथाहि, कलञ्जभक्षणे रागादस्य कर्त्तव्यताबुद्धिर्जाता, शब्दाच्च भक्षणाभावे, निष्फलात्कार्यात्सफलं गरीय इति न्यायेन सुखहेतौ भक्षणएव प्रवर्त्तेत (३) न तदभावे, निषेधापूर्व्वमेव (४) फलमिति चेत्, न । तस्य सुखदुःखाभावान्यतया षण्डत्वेन तदजनकतया च (५) गौणमुख्यप्रयोजनत्वाभावात् । सुखवदपूर्वमपि प्रयोजनमिति चेत्, न । लोके तथा ऽनवगमात् । (६) अलौकिकयोः स्वर्गापवर्गयोर्लोकावगतप्रयोजनसुखदुःखाभावजातीयतया प्रयोजनत्वं, (७) वेदेपि काम्यस्थले काम्यसाधनस्यैवापूर्वस्य गौणप्रयोजनस्य (८) लिङाभिधानं, काम्यसाधनताज्ञानं विना कामिकार्यत्वस्य बोधयितुमशक्यत्वात्, न तु स्वतःप्रयोजनत्वेन, तच्चासामर्थ्यादनुपयोगाच्च, (९) प्रवृत्तेर्भोजनादाविव लोकक्लृप्तकाम्यसाधनताज्ञाना(१०)त्कार्यत्वज्ञानाद्वा गौणप्रयोजनत्वेनैवोपपत्तेः । नापि नित्यनिषेधयोरपूर्व्वं स्वतःप्रयोजनं लिङा ऽभिधीयते, (११) काम्यस्थले हि धर्म्मिग्राहकलिङादिना प्रवर्तककार्यत्वेनापूर्वमभिहितमतो नित्यादावपि कार्यत्वेनैवापूर्व्वबोधनं (१२) न तु स्वतःप्रयोजनत्वेन । ननु नित्ये लोकवेदावगतगौणमुख्यप्रयोजनाभावे सति लिङेवापूर्वस्य स्वतःप्रयोजनत्वं बोधयति, तेन विना प्रवृत्ति-

---

॥ शब्दचिन्तामणिव्याख्या रुचिदत्तीया ॥

नन्वेतादृशो बोधो नाकाङ्क्षितः, कार्यविशेष्यकज्ञानस्यैव प्रवर्तकत्वाभ्युपगमादित्यत आह । (१) यद्वेति । नित्यनिषेधयोरपि तदेव लिङा विधीयतइति प्रागुक्तं दूषयति । (२) किं चेति । तथा चेष्टसाधनत्वे शक्तिर्नापूर्वइति भावः । (३) न तदभावइति । इष्टसाधनतालिङ्गककार्यत्वज्ञानस्य प्रवर्तकत्वादिति भावः । (४) फलमिति । तथा च तदेव फलमादायेष्टसाधनत्वसत्त्वान्नोक्तदोष इति भावः । (५) गौणेति । तथा च स दोषस्तदवस्थ एवेत्यर्थः । नन्वेवं स्वर्गापवर्गावपि न प्रयोजने स्यातां, लोके तथा ऽनवगमादित्यत आह । (६) अलौकिकयोरिति । ननु वेदे तथा स्याल्लोकएव लोकावगमादरादत आह । (७) वेदेपीति । (८) लिङेति । त्वन्मतइति शेषः । अनुपयोगमेवाह । (९) प्रवृत्तेरिति । प्रवृत्तावनुपयोगशङ्कापिशाच्यन्यथैवोपपन्नेत्यर्थः । परमतेनाह । (१०) कार्यत्वेति । तन्मतेनैवाह । (११) काम्येति । ननु काम्ये यथा तथास्तु, नित्ये तु तथा स्यादित्यत आह । (१२) न त्विति । तथा चानन्यगत्या लिङस्तत्र सामर्थ्यमपि कल्प्य-

परत्वानिर्वाहादिति चेत्, न। निरुपाधीच्छाविषयत्वं हि स्वतः प्रयोजनत्वमपूर्व्वस्य सिद्धं लिङा बोधनीयं, (१३) न च तादृगिच्छाविषयो ऽपूर्वं क्वचिदपि सिद्धम्। न च लिङेवापूर्वेच्छां जनयित्वा तां बोधयति। तस्यास्तत्रासामर्थ्यात्, इच्छायाः सामग्र्यन्तरजन्यत्वाच्च। (१४) अतोपि काम्ये नित्ये चेच्छाविषयत्वं प्रयोजनत्वमपूर्वस्य लिङादिना न बोध्यते, (१५) अपूर्वेच्छायाः शाब्दज्ञानात् पूर्व्वमसत्त्वात्, किं तु शाब्दकार्यताज्ञानात्सेति। अथ नित्ये कार्यत्वेनैवापूर्वस्याभिधानं न तु स्वतःप्रयोजनत्वेन, किं तु लिङा ऽपूर्वं बोधिते तस्य स्वतःप्रयोजनत्वमिच्छाविषयत्वं भवति, सुखज्ञानवदपूर्व्वज्ञानस्यापि स्वत एवेच्छाजनकत्वात्। ततः (१६) काम्यापूर्व्वसाधनताज्ञानान्नित्ये कार्यताबोधात् प्रवृत्तिरिति चेत्। न। अपूर्व्वज्ञानस्येच्छाहेतुत्वेनाक्लृप्तत्वात्। (१७) काम्यापूर्व्वे हि लोकक्लृप्तेष्टसाधनताज्ञानादेवेच्छा न त्वपूर्वत्वज्ञानात्। शास्त्रज्ञस्य शास्त्रजन्यकर्त्तव्यताज्ञानं बलवदिति चेत्, सफलविषयं तथा, इदं च निष्फलविषयम्। अथ प्रवृत्तिमतो निवृत्तिनियोगे ऽधिकार इति यदा भक्षणे प्रवृत्तस्तदा तन्निषेधे शास्त्रकार्यताधीरिति तया विपरीतप्रयत्ने जनिते न रागात्क्रियोत्पत्तिः। तेनैव प्रतिबन्धात्। (१८) रागकारितप्रवृत्तिमुपजीव्य हि निवृत्तिकार्यता शास्त्रेण बोधिता, अतस्तेन बोधेन स्वफलं विपरीतकृतिरवश्यमुत्पाद्येति शास्त्रबलवत्त्वमिति चेत्, न। (१९) निवृत्तिकार्यताबोधे ऽपि निवृत्तौ प्रयत्न एव नोत्पद्यते, कस्य प्रतिबन्धकता स्यात्, स्याच्च निवृत्तिकार्यताबोधक(२०)मप्रमाणं, निष्फलत्वेन तत्र कृतेरभावात्। अथ कलञ्जभक्षणस्य निन्दार्थवादेन बलवदनिष्टसाधनत्वावगमात्तद्भक्षणे न प्रवर्त्तत इति चेत्, एवमपि कलञ्जभक्षणे निवर्त्ततां, तदभावे निष्प्रयोजनतया प्रवृत्तौ किमायातमिति। एतेन नित्यापूर्व्वसाधने संध्यावन्दनादावपि प्रवृत्तिरपास्ता। क्रियायाः कष्टत्वात् तदपूर्वस्य पण्डत्वात् स्वतो ऽप्रयोजनत्वाच्च। (२१) तस्माल्लोके पचेतेत्यादौ कार्यत्वेष्टसाधनत्वरूपधर्म्मशक्तत्वेन ज्ञाता लिङ् स्वर्गकामो यजेतेत्यादौ तदन्वयं यागे योग्यतादिवशाद्बोधयतीति न वेदे धर्म्मिणि शक्तिकल्पना। (२२) प्रतीता च स्वर्गसाधनता साक्षादसाधनस्य यागस्य व्यापारमन्तरेणानुपपद्यमाना स्वनिर्वाहकं व्यापारमपूर्वं कल्पयति। (२३) ननु निरुपाधिपूर्व्ववर्त्तिता कारणता, सा व्यापारेण निर्वाह्यत इति कोर्थः। किं क्रियते उत ज्ञाप्यते। नाद्यः। उत्तरवर्तित्वेन व्यापारस्य तत्रासामर्थ्यात्। नोत्तरः। लिङैव तद्बोधनात्। चिरध्वस्तं कारणं व्यापारव्याप्तमिति चेत्। न। विपक्षे बाधकाभावेनाप्रयोजकत्वात्। (२४) अन्य-

---

मिति भावः। (१३) न चेति। तथा चायोग्यत्वान्न तद्बोध इति भावः। तर्हि कार्यताज्ञानरूपसामग्र्यन्तरजनितामेवेच्छां सा बोधयत्वित्यत आह। (१४) अतोपीति। यद्यप्यनागतस्यापि शब्देन बोधने न दोषस्तथापि लिङस्तत्रासामर्थ्यमेव मूलदूषणं बोध्यं, नित्य इत्युपलक्षणं निषेधे ऽपीति द्रष्टव्यम्। अत इत्यतिदेश्यमाह। (१५) अपूर्वेति। (१६) काम्येति। काम्यं च तदपूर्वं चेति काम्यापूर्वमित्यर्थः। (१७) काम्यापूर्वे हीति। काम्यस्थलापूर्वे हीत्यर्थः। न च नित्यनिषेधविषयकापूर्वकार्यताज्ञानत्वेनैवेच्छाहेतुत्वं कल्प्यं, मानाभावात् प्रवृत्त्यादेरन्यथैवोपपाद्यत्वादिति भावः। ननु रागशास्त्रयोर्बलवत्त्वे विनिगमकाभावाद्वैपरीत्यमेवास्त्वित्यत आह। (१८) रागेति। अन्यथा शास्त्रवैयर्थ्यं स्यात्तेन फलबलात्तथा कल्प्यत इति भावः। (१९) निवृत्तीति। लक्षणादिनिषेधेत्यर्थः।

(२०) अप्रमाणमिति। न च फलभ्रमाज्जायमानकृतिमादाय कृतिसाध्यत्वमबाधितमिति तद्बोधकं प्रमाणमिति वाच्यम्। ममेदं कार्यमिति ज्ञानं ततः, तथा च यस्य न भ्रमः तं प्रति मदंशान्वितकृतेर्बाधात्तथात्वमित्याहुः। उपसंहरति। (२१) तस्मादिति। नन्वेवमपूर्वमप्रमाणकं स्यादित्यत आह। (२२) प्रतीता चेति। ननु यदि इष्टसाधनतानिश्चयः प्रवर्त्तकस्तदा यागे सत्यवश्यं फलमिति निश्चयाभावेपि तन्निश्चयात्प्रवर्तेत, न चेष्टापत्तिः, बहुवित्तव्ययायाससाध्ये फलसंदेहे प्रवृत्त्यनुपपत्तेः। वैदिके कर्मणि फलनिश्चयादेव प्रवृत्तिरित्युक्तत्वाच्चेति चेद्,अत्राहुः। साङ्गाद्वैदिककर्मण इति न्यायादङ्गाद्युपहितयागादवश्यं फलमिति निश्चयादेव यागे प्रवर्त्तते। न च कर्मनाशापारगमनादिशङ्कया प्रथमं फलनिश्चयो ऽशक्य एवेति वाच्यम्। अतीन्द्रियोपाधिशङ्कापिशाचीवत्तादृशशङ्कापिशाच्या अकिंचित्करत्वात्। तादृशशङ्काविरहकाल एव प्रवर्त्तत इत्यन्ये। नन्वपूर्वसत्त्वे तस्य वाच्यत्वकल्प्यत्वविवादः स्यात्तदेव नास्ति, मानाभावादिति तटस्थः शङ्कते। (२३) नन्विति। (२४) अन्यथेति। यदि सहचारदर्शनमात्राद्वस्तुसिद्धिस्तदेत्यर्थः। एवं दण्डादावप्यतीन्द्रि-

था ऐन्द्रियकं कारणमतीन्द्रियव्यापारकमिति यागानुभवयोर्दर्शनात्तथा कल्प्येत । (२५) प्रायश्चित्तादीनां च फलप्रतिबन्धकत्वमेव । प्रायश्चित्तस्य तस्मादेनसः पूतो भवतीति यत्फलं श्रुतमस्ति तस्य निषिद्धक्रियातः फलभाङ्न भवतीत्यर्थः । धर्म्मः क्षरति कीर्त्तनादिति च कीर्त्तनाद्विहितक्रिया क्षरति फलं न जनयतीत्यर्थः । क्षरतीत्यत्र बाधकं विना न लक्षणेति चेत् । न । (२६) उपस्थितत्वेन विहितक्रियायामेव धर्म्मपदशक्तिग्रहस्य बाधकत्वात् । न चैतस्य मुख्यत्वार्थं पदार्थान्तरे शक्तिः । लक्षणोच्छेदापत्तेः । विहितक्रियाकर्तृत्वज्ञानेन धार्म्मिकपदप्रयोगाच्च । एतेन (२७) देवदत्तशरीरं, देवदत्तविशेषगुणप्रेरितभूतपूर्वकं, जन्यत्वे सति (२८) तद्भोगसाधनत्वात्, (२९) तन्निर्मितस्रग्वत्, इत्यनुमानात् तत्सिद्धिरिति परास्तम् । जन्मान्तरीयज्ञानादिभिरेव तज्जनकत्वाभिमतेः (३०) सिद्धसाधनादिति । मैवम् । (३१) चिरध्वस्तस्य व्यापारसत्त्वे कारणत्वमिति निरुपाध्यन्वयव्यतिरेकाभ्यां व्याप्त्यवधारणात्, यागस्य चिरध्वस्तकारणत्वेन व्यापारकल्पनात्, कार्ये व्यापारस्य पृथगन्वयव्यतिरेकग्रहस्तद्व्यापारकत्वउपाधिरिति चेत् । न । (३२) संस्कारे तदभावेऽप्यनुभवस्य तद्व्यापारकत्वात् । न चाप्रयोजकत्वं, (३३) यागो यदि चिरध्वस्तत्वे सति सव्यापारो न स्यात् स्वर्गकारणं न स्यात् घटवदिति विपक्षे बाधात् । न चात्र कारणताग्राहकाभाव उपाधिस्तेनापि समं व्याप्त्यवधारणेन तस्याप्यापादनात् । (३४) न चैन्द्रियकस्यातीन्द्रियव्यापारवत्त्वनियमः । सव्यापारत्वे कार्याव्यवहितपूर्वसमये ऽसत्त्वस्यो(३५)पाधित्वेनाप्रयोजकत्वात् ।

यो व्यापारः सिध्येदप्रयोजकता च तुल्येति भावः । प्रायश्चित्तादिनाश्यतया ऽपूर्वं सिध्येदित्याशङ्क्याह । (२५) प्रायश्चित्तादीनामिति । न च तत्प्रागभावस्यात्यन्ताभावत्वापत्तिः पापनाशे च पापान्तरमासाद्य तदुत्पत्तेर्न तथात्वमिति वाच्यं, निषिद्धक्रियाविशेषस्यैव प्रतिबध्यत्वात् क्रियान्तरमादाय तत्संभवादिति भावः । (२६) उपस्थितत्वेनेति । पदार्थान्तरकल्पने गौरवादिति भावः । (२७) देवदत्तशरीरमिति । अत्र देवदत्तपदमन्यदीयशरीरांशे बाधवारणाय, आद्यत्वमपि शरीरविशेषणं बोध्यं, यद्वांशतः सिद्धसाधनं न दोष इति मतेनेदम् । ईश्वरगुणमादायार्थान्तरवारणाय साध्ये देवदत्तेति, संख्यादिनार्थान्तरवारणाय विशेषेति । न च संस्कारेणार्थान्तरम्, संस्कारान्येति विशेषगुणविशेषणादित्येके । संस्काराजन्यत्वं पक्षविशेषणमित्यन्ये । यत्तु संस्कारस्य प्रेरकत्वाभावात्प्रेरितपदेनैव तद्वारणमिति । तच्चिन्त्यम् । प्रेरितत्वं हि सहकृतत्वं, तच्च तत्रापि । मनसि व्यभिचारवारणाय सत्यन्तम् । द्वीपान्तरघटादौ व्यभिचारादाह । (२८) तदिति । तद्भोगसाधनद्रव्यत्वादित्यर्थः । तेन नात्ममनःसंयोगादौ व्यभिचारः । (२९) तन्निर्मितेति । तद्भोगसाधनेत्यपि बोध्यम् । (३०) सिद्धेति । यागादिवच्चिरातीतस्य जनकत्वाभ्युपगमादिति भावः । (३१) चिरेति । भ्रम्यादिव्यापारके चक्रदण्डसंयोगादौ तथा दर्शनादिति भावः । (३२) संस्कार इति । तत्रावश्यं तत्कल्पनमन्यथा नष्टसंस्कारकत्वाभिमतानुभवादपि स्मरणप्रसङ्ग इति भावः । (३३) याग इति । चिरध्वस्तत्वे सति व्यापारवद्भिन्नत्वमापादकं, तथा च चिरध्वस्तत्वस्य भिन्नेन्वयः । अन्यथा प्रतियोग्यन्वये व्यवहितस्वर्गसाधने व्यभिचारवारणार्थोपात्तसत्यन्तदानेपि व्यभिचारतादवस्थ्यापत्तेः । विशिष्टविरहस्य तत्र सत्त्वात् । सत्यन्तमात्रे च कृतेर्थान्तरं व्यवहितस्वर्गसाधने व्यभिचारश्चेत्यग्रिमपदम् । स्वर्गपदं दृष्टान्तासिद्धिवारणाय । स्वध्वंसादिकं प्रत्यपि तस्य हेतुत्वात् । न च विषयपरिशोधकोऽयं न व्याप्तिग्राहक इति वाच्यम् । व्याप्तिग्रहपूर्वं तत्परिपन्थिशङ्कापनायकत्वात् । न च पक्षे तच्छङ्का न परिपन्थिनीति वाच्यम् । अप्रयोजकत्वाद्याहितायास्तस्यास्तथात्वात् । अत एव पक्षेप्युपाधिसंदेहाहितायास्तस्यास्तथात्वम् । यत्तु विषयपरिशोधकतर्कस्यापि विरोधिजिज्ञासानिवृत्तिद्वारोपयोग इति स एवाभिहित इति । तन्न । तस्य शङ्किताप्रयोजकत्वनिरासाक्षमत्वेन प्रकृतासंगतत्वात् । यदि चोक्तरीत्या तथात्वं तदा व्याप्तिग्राहकत्वमेवेति । अन्यथैन्द्रियकमित्यादि प्रागुक्तं दूषयति । (३४) न चेति । (३५) उपाधित्वेनेति । प्रयोजकत्वेनेत्यर्थः । तथा च कार्याव्यवहितपूर्वसमयसत्कारणं सव्यापारकमेवेति मन्नियमस्य निष्कलङ्कत्वेन त्वन्नियमस्यैव परमप्रयोजकत्वादित्यर्थः । एतेनाप्रयोजकतया प्रागुक्तं तौल्यमपाकृतं बोध्यम् । अत एव चक्षुरादावुक्तोपाधेः साध्याव्यापकत्व,मैन्द्रियकत्वविशेषणे च शब्दादिजनके दण्डादौ साध्याव्यापकत्वमित्यपास्तम् । ननु त्वदुक्ततर्केप्यप्रयोजकत्वशङ्का । न च निरुपाधित्वमेव विपक्षबाधकं, प्रतीतिविशेषविषयत्वादीनामुपाधित्वसंभवात् । न च साध्यव्यापकत्वादिसंदेहः, तथाप्युपाधित्वसंदेहस्य दूरीकर्त्तुमशक्यत्वात् । किं च तादृशातीन्द्रियातिरिक्तपदार्थकल्पने व्यापारकल्पने वा गौरवमेव बलवद्बाधकम् । यत्तु कार्याव्यवहितपूर्वसमयविद्यमानता करणता, सा च साक्षाद् व्यापारद्वारा

(३६) नन्वेवं संध्यावन्दनाकरणस्य दुःखसाधनत्वश्रुतेः तत्करणप्रागभावो दुःखहेतुः, तथा च तस्य स्थिरत्वेन दुःखजननसंभवान्न (३७) पापे प्रमाणम् । न च प्रायश्चित्तवैफल्यं, प्रायश्चित्ताभावसहकृतस्यैव तस्य तज्जनकत्वात् । यत्तु प्रागभावनाश एव तेन क्रियतइति । तन्न । (३८) ध्वंसप्रागभावानवच्छिन्नकालस्य प्रतियोगिकालत्वेन तदा करणापत्तेरिति चेत् (३९) संध्याकालीनाकरणस्य दुःखसाधनत्वाद्विशिष्टस्य संध्याकालापगमे ऽपगमात् । न च संध्याकालो नाकरणे विशेषणं, किं तु प्रतियोगिनि करणे, तथा च विशिष्टाभावः स्थिर एवेति वाच्यम् । संध्याया ह्यकरणे ऽन्वयस्तस्य पदार्थत्वात्, न तु करणे तस्य (४०) पदार्थैकदेशत्वेनाप्रधानत्वात् । (४१) तथापि ध्वंस एव

वा, स्वाङ्गमव्यवधायकमिति न्यायात् । तथा च व्यापारकल्पनमावश्यकमिति । तच्च । नियमानन्यथासिद्धोरवश्यं तत्र प्रवेशे ऽव्यवहितत्वस्य व्यर्थत्वात् । न च वह्न्यादिक्रियानियामकत्वेनादृष्टसिद्धिः । तादृशयागादिवदात्मसंयोगादीश्वरसंयोगाद्वा तदुपपत्तेः । यागादेश्च स्वभावादेव नियतकालीनसावधिकफलजनकत्वम्, अन्यथा ऽपूर्वेपि कल्पिते फलस्यानन्त्यापत्तिरिति चेत् । अत्राहुः । यदि नादृष्टं तदा प्रायश्चितादीनामपि वैफल्यं स्यात् । न च तेषां फलप्रतिबन्धकत्वं, तेषामाशुविनाशितया तदभावानन्तरं फलप्रसङ्गात् । न च तदुत्तरसमयस्य प्रतिबन्धकत्वं, तस्य तथात्वे मानाभावात्, तेषामप्रतिबन्धकत्वापाताच्च । न च तत्प्रागभावसहभूता निषिद्धक्रिया फलहेतुरिति वाच्यम् । अन्यप्रायश्चित्तप्रागाभावमादाय फलप्रसङ्गात् । तत्तत्क्रियोद्देश्यकतत्प्रायश्चित्तप्रागभावस्य तथात्वे यत्र कर्मणि न प्रायश्चित्तं जातं तत्र प्रतियोग्यप्रसिद्धा तदभावासिद्धा फलाभावप्रसङ्गात् । एवं विहितक्रियायां कीर्त्तनादिवैफल्यमपि द्रष्टव्यम् । किं च सत्कर्मादिदानं ततश्च फलमिति श्रूयते तद्विरुध्येत, नहि तत्र प्राचीनविहितक्रियाया एव दानं, तस्या विनष्टत्वात्, अदृष्टस्यानभ्युपगमात्, अकर्मिकाया दानक्रियाया अभावात् । भावे वा तस्याः फलजनकत्वेतिप्रसङ्गात् । तस्माददृष्टदानेनादृष्टान्तरं जन्यतइत्यकामेनाप्यभ्युपेयम् । यत्तु एवं सति निरन्वयध्वस्तबीजदण्डादेरङ्कुरभ्रम्यादिकार्यं कालान्तरेपि स्यादिति बाधकमिति । तच्च । तत्र फलबलेन तथैव हेतुत्वात् । यागादेश्च व्यवहितस्यापि हेतुत्वे विरोधाभावादिति । नन्वस्तु व्यापारस्तथापि संस्कार एवास्त्विति चेत् । न । तस्य स्मृतिमात्रहेतुतया स्वर्गाद्यहेतुत्वापत्तेः । अनुभवमात्रजन्यतया यागाद्यजन्यत्वाच्च । वैजात्यकल्पने च सिद्धं नः समीहितम् । वेगादिवत्तद्विशेषोस्तु, गुणान्तरकल्पने गौरवादिति चेत् । न । गुरुत्वादेरपि तथात्वापत्तेरिति दिक् । एवं च पक्षे साध्यसिद्धौ शङ्कितोपाधीनां तत्रैव साध्याव्यापकत्वं, तदिदमुक्तं निरुपाध्यन्वयव्यतिरेकाभ्यामिति । (३६) नन्वेवमिति । एवं, चिरध्वस्तत्वस्य व्यापारकल्पनाप्रयोजकत्वे । (३७) पापइति । यद्यप्यगम्यागमनादेराशुविनाशित्वात्तज्जन्यपापे बाधकाभावस्तथापि सन्ध्यावन्दनाकरणजन्ये पापे प्रमाणाभाव इत्यर्थः । (३८) ध्वंसेति । न च प्रागभावनाशस्यापि तद्विरोधित्वान्न तदा तदापत्तिरिति वाच्यम् । प्रतियोगिन एव तन्नाशत्वादिति भावः । (३९) संध्येति । नःवेवं संध्याकालीनकरणप्रागभावो हेतुरित्यायातं तत्र तत्कालीनं करणं प्रतियोगि यदि तदा ऽसंभवः, प्रागभावप्रतियोगिनोरेककालत्वाभावात्, यदि चान्यकालीनं तदा तत्कारिणोपि पापापत्तेरिति चेत्, न । तत्पुरुषे करणसामान्यसंसर्गाभावः संध्याकालीनः सन् तद्धेतुरित्यर्थात् । ननु संध्याकाल उपलक्षणं, न च विशेषणत्वे बाधकाभावान्न तथात्वं, विशेषणस्यापि हेतुत्वकल्पने गौरवस्यैव बाधकत्वादिति चेत्, न । व्यावृत्तोपलक्ष्यतावच्छेदकरूपाभावादित्याहुः । तच्चिन्त्यम् । संध्याकालस्य स्ववृत्तिकरणाभावोपलक्षकत्वसंभवात् । यथासन्नसमयसमाप्तेः फलत्वे तत्समयस्य स्ववृत्तिसमाप्त्युपलक्षकत्वम् । वस्तुतस्तु अरुणान्यायेन विशेषणत्वम्, अन्यथोक्तगौरवेणारुण्यस्यापि क्रयसाधनत्वं न स्यात् । तस्यापि स्वाधिकरणव्यक्त्युपलक्षकत्वसंभवात् । यदि त्वौत्सर्गिकं विशेषणत्वमिति गौरवमपि न्याय्यं तदा प्रकृतेपि तुल्यमिति प्रागुक्तरीत्या प्रायश्चित्तवैफल्यमपि स्यादित्यपि बोध्यम् । (४०) पदार्थैकेति । यद्यपि पदार्थत्वमेव करणस्य न तु पदार्थैकदेशत्वं तथापि करणाभावरूपविशिष्टापेक्षया प्रतियोगिन एकदेशत्वोक्तिरिति ध्येयम् । नन्वेवं करणएव तदन्वयोस्तु, तस्य वस्तुतः पदार्थैकदेशत्वाभावेन विनिगमकाभावादिति चेत् । अत्राहुः । तत्राकाङ्क्षाविरहः । न च चक्षुषा न पश्यतीत्यत्रेव तत्संभवः । तत्र तथा तात्पर्येण तथात्वात् । प्रकृते च तथा तात्पर्यानवधारणात् । प्रधानविशेषणत्वे संभवति नाप्रधानविशेषणतायामाकाङ्क्षेति । तदिदमुक्तमप्रधानत्वादिति । यत्तु संध्याकालीनकरणस्य तदीयस्याभावो यदि तथा, तदा प्रतियोग्यप्रसिद्धिः । अन्यदीयस्य चेत्तदातिप्रसङ्ग इति, तच्चिन्त्यम् । संध्याकालीनकरणत्वावच्छिन्नाभावस्य तत्पुरुषे तथात्वसंभवात् । अत्र संध्याकालस्य विशेषणध्वंसे विशिष्टध्वंस इत्यभ्युपगमे ऽनुमानखण्डोक्तविशिष्टप्रतियोगिकध्वंसानङ्गीकाराद्विरोधश्चिन्त्य इति । अन्यथा विशेषणमात्रस्यैव व्यापारकल्पने ऽकरणस्य पापहेतुत्वं न स्यादिति । दृष्टेनोपपत्तौ नादृष्टकल्पनमित्याशयेनाह । (४१) तथापीति । ननु ध्वंसो न यागव्यापारः

व्यापारोस्तु (४२) तव सहभावानिरूपकस्यापि कारणत्वात् । (४३) तस्यानंन्तत्वेपि स्वभावात् सावधिफलजनकत्वं, यच यद्ध्वंसो हेतुस्तत्र तत्प्रागभावोपीति चेत् । दुग्धध्वंसजन्यदध्नि मिथ्याज्ञानादिध्वंसजन्यमुक्तौ च व्यभिचारात् प्रतिबन्धकाभावत्वेन हेतुत्वे तथाभावाच्च । ध्वंसेनानुपपत्तिः कथं तेनैव समाधातव्येति चेत् । न । ध्वंसे सति तद्व्यापारत्वज्ञानं विनानुपपत्तेस्तद्व्यापारत्वकल्पनया शान्तेरिति । मैवम् । प्रतियोगिध्वंसयोरेकत्राजनकत्वात्, (४४) नहि नियमतो यद्ध्वंसे सति यद्भवति तत्तत्र कारणं, न च संसर्गाभावत्वेन हेतुत्वे तथेति वाच्यम् । व्यभिचाराभावेन तस्यापि प्रयोजकत्वात् । (४५) अथ शब्दाद्यागकारणता व्यापारं विना तदनुपपत्तेस्तज्जन्यध्वंसस्य कारणत्वकल्पनमित्युभयमपि जनकम्, अन्यत्र तु मानाभावान्न तथेति चेत् । न । यागध्वंसस्य यागजन्यस्वर्गं प्रति जनकत्वस्य (४६) प्रमाणान्तरविरोधेनार्थापत्त्याप्यकल्पनात् । (४७) अस्तु तर्हि देवताप्रीतिरेव व्यापार इति चेत् । न । यागस्य देवताप्रीतिहेतुत्वे (४८) मानाभावात्, गङ्गास्नानादो देवताविरहेण तदसंभवात् । न च तत्रापि (४९) तत्प्रीति,स्तस्य तत्प्रीतिहेतुत्वे मानाभावात् । (५०) लाघवेन कर्तृभोक्तृगतव्यापारकल्पनाच्च ॥ (५१) ननु नायं नियमः । पुत्रकृतगयाश्राद्धादिना पितरि पितृकृतजातेष्ट्या पुत्रे चादृष्टोत्पत्तेः । अथ तत्रापि कर्तर्यैवादृष्टं,.(५२) विहितक्रियाया यागस्येव कर्तृगतादृष्टजनकत्वात् । न च मुक्ते पुत्रे तददृष्टनाशात् पितरि न स्वर्गः स्याद् इति वाच्यम् । अदृष्टस्य (५३) फलनाश्यतया पितरि स्वर्गाभावेनादृष्टानाशात् (५४) स्ववृत्तिभोगजनकादृष्टस्य मुक्तिविरोधित्वात् । न तु पितृगतमदृष्टं जन्यते, मुक्ते पितरि दोषाभावेन योगिनामिव विहितक्रियायाः पित्रदृष्टाजनकत्वात् । तथात्वे च साङ्गमपि श्राद्धा-

---

यागासहभावित्वेन तदजन्यत्वादित्यत आह । (४२) तवेति । अन्यथा यागः स्वर्गेपि कारणं न स्यादित्यर्थः । फलानन्त्यमाशङ्काह (४३) तस्येति । अपूर्वकल्पनेपि स्वभावस्यैवाश्रयणीयत्वादिति भावः । (४४) नहीति । यद्यप्येवमपूर्वपक्षे ऽपि यागस्य स्वर्गकारणत्वं न स्यात्, नियमतस्तद्ध्वंसे सत्येव तदुत्पत्तेः, यदि च तथात्वेपि वेदबोधितकारणत्वमप्रत्यूहं, तदा तुल्यं, तथाप्युक्तव्याप्तावेव तात्पर्यं तस्यापीत्यर्थः । तथा च ध्वंसत्वेनापि हेतुत्वे प्रतियोगी न कारणमिति व्याप्तिरेव, व्यभिचाराभावादिति भावः । (४५) अथेति । तथा चोक्तव्याप्तौ कारणताग्राहकाभाव उपाधिरिति भावः । (४६) प्रमाणान्तरेति । स्वर्गो न यागध्वंसजन्यः, यागजन्यत्वादित्याद्यनुमानविरोधेनेत्यर्थः । नन्वत्राप्यप्रयोजकत्वम्, उक्तव्याप्तिरेव हि अत्र मूलं, सा चोक्तोपाधिना ऽप्रयोजकत्वकवलितैव । न च यागस्य प्रतिबन्धकत्वापत्तिरेव प्रमाणान्तरविरोधः । संसर्गाभावत्वेनैव हेतुत्वे तथात्वात् । न च ध्वंसत्वेनापि हेतुत्वे तथा खण्डपटोत्पत्तौ महापटवदिति वाच्यम् । तत्र कारणताग्राहकाभावादत्र च तत्सत्त्वे प्रतिबन्धकत्वं न किं तु हेतुत्वमेव । किं च धर्मिकल्पनात इति न्यायेन ध्वंसस्यैव व्यापारत्वमिति चेत्, न । प्रागुक्तरीत्या ऽदृष्टसिद्धौ तत्रैव व्यापारत्वं कल्प्यते,. लाघवा, न तु ध्वंसे, तस्याभावतया गुरुत्वात् । एवं च व्यभिचाराभावे उक्तव्याप्तिरप्यविकला । तदिदमुक्तं व्यभिचाराभावेनेत्यादि । प्रमाणान्तरविरोधोप्ययमेव बोध्य इति । ननु चरमदुःखोत्पत्तौ मिथ्याज्ञानध्वंसो हेतुरन्वयव्यतिरेकात्तदपि च रागादिद्वारा कारणमिति दृष्ट एव व्यभिचार इति चेत् । न । तदनङ्गीकारात्तथैव चतुर्थटीकादर्शनादित्याहुः । न च पदप्रत्यक्षे पूर्ववर्णांशे तद्ध्वंसो व्यापार इति वाच्यम् । तदनभ्युपगमा,दभ्युपगमे वा तदंशे तत्प्रत्यक्षस्यालैाकिकत्वेन विषयाजन्यतया तद्व्यापाराकल्पनात् । न च शब्दध्वंसप्रत्यक्षे शब्दस्य श्रोत्रव्यापारतया व्यभिचारः । तत्र तद्ध्वंसस्यैव व्यापारत्वसंभवादिति दिक् । के चित्तु फलसमानाधिकरणमेव जनकमिति स्थितौ पुण्यदानात्परस्मिन् दानध्वंसादेरभावादपूर्वमनन्यगत्याङ्गीकार्यमित्याहुः । (४७) अस्त्विति । पूर्वमन्वयप्रयोजकतया शङ्कितमिह व्यापारतयेति विशेष इत्येके । अधिकनिर्वचनाय तदेव स्मारितमित्यन्ये । (४८) मानाभावादिति । यजदेवपूजायामिति शाब्दिकस्मृतिः स्मृतित्वादेव न प्रमाणमिति भावः । (४९) तत्प्रीतिः । गङ्गाप्रीतिः । न च स्वर्गिशरीरमेव व्यापारः, पूर्वादृष्टेन प्रलयोत्तरं स्वर्गानुपपत्तेः । (५०) लाघवेनेति । कृतिहेतुत्वनिर्वाहाय कल्प्यमानो व्यापारः तत्समानाधिकरण एव कल्प्यते, एवं भोगोपपादकस्तत्समानाधिकरण इत्यर्थः । कर्तृभोक्तिति तु मतभेदेनोभयथा देवताप्रीतिर्न व्यापार इति भावः । कर्तृगतत्वनियममाक्षिपति । (५१) नन्विति । (५२) विहितेति । विहितक्रियाविशेषस्येत्यर्थः । तेन वैद्यकविहितक्रियायां न व्यभिचार इत्याहुः । (५३) फलेति । न चाकृतप्रधानाङ्गापूर्वे व्यभिचारः, यत्र न प्रधानं तत्र तदपूर्वे मानाभावात्, भावे वाऽदृष्टविशेषाभिप्रायकत्वात् । नन्वेवमदृष्टसत्त्वे मुक्तिविरोध इत्यत आह । (५४) स्ववृत्तीति । नन्वेवं मुक्तस्यापि स्वर्गोपभोगः स्यादित्यत आह ।

दिकं निष्फलं स्यादिति तद्विधेरप्रामाण्यापत्तिः । (५५) पुत्रगतादृष्टेन च मुक्ते पितरि सुखोत्पत्तौ न विरोधः । योगिनामिव सुखोत्पत्तौ दोषस्याहेतुत्वात् । अथ पितृसुखं पितृपुण्यजन्यमिति पितरि पुण्यं, तेन विना तदभावात् । न पुत्रे, तत्र फलप्रसङ्गात् । पितृस्वर्गकामनाजन्यक्रिया पितृपुण्यहेतुरिति पुत्रक्रियापि तज्जनिकेति चेत् । एवं पितृक्रिया पितृपुण्यजनिकेति न तां विना पितरि पुण्यं पुत्रक्रिया च पुत्रपुण्यजनिकेति पुत्रे पुण्यं पितृस्वर्गकामनाजन्यपुण्यत्वेन पितृस्वर्गहेतुरस्तु । ननु (५६) तत्पुण्यं पितृवृत्ति, तत्सुखहेतुपुण्यत्वात् । न पुत्रवृत्ति, तत्सुखाहेतुपुण्यत्वादिति चेत् । (५७) न । तत्पुण्यं न पितृवृत्ति, तत्कृत्यजन्यपुण्यत्वात्, पुत्रवृत्ति वा तत्कृतपुण्यत्वात् । तस्मात्पितृस्वर्गकामनाजन्यपुण्यत्वेन पितृस्वर्गहेतुतेति पुत्रएव तत्पुण्यमिति, (५८) मैवम् । स्वर्गोपपादकं ह्यपूर्वं स्वर्गाश्रये कल्प्यते (५९) प्रथमोपस्थितत्वा (६०) ल्लाघवात् । कल्पनायाः (६१) साक्षादुपपादकविषयत्वाच्च । न तु स्वर्गहेतुकामनाश्रये स्वर्गकामनाजन्यक्रियाकर्त्तरि वा, विलम्बोपस्थितिकत्वात् गौरवात् परम्परया स्वर्गोपपदकत्वाच्च, (६२) यदि च पुत्रगतपुण्येन मुक्तस्य शरीराद्युत्पत्तिः सुखं च स्यात् तदा साक्षिविधया ऽसत्याभिधानादिपुत्रक्रियाजन्यपापेन "स विष्ठायां कृमिर्भूत्वा पितृभिः सह पच्यत" इत्यादिबोधितनरकभागितापि मुक्तस्य पितुः स्यात् । तथा च पुत्रकृततंथाविधशङ्कया न कश्चिन्मोक्षार्थी ब्रह्मचर्यादिदुःखेनात्मानमवसादयेत् दुःखेनात्यन्तं विमुक्तश्चरति (६३) न स पुनरावर्त्ततइति श्रुतिविरोधश्च । तथा च मुक्तस्य सुखदुःखे शरीरादिकं च भवतीत्यपदर्शनं, (६४) मुक्ते पितरि श्राद्धादिना दोषाभावादेव नादृष्टमुत्पद्यते, न चैवं साङ्गस्य वैफल्य,मदृष्टोत्पत्तौ स्वरूपसतो दोषस्याङ्गस्य वैगुण्यात् । यथा (६५) विघ्नहेतुदुःखशून्येन कृतं मङ्गलं न पापध्वंसं जनयति स्वरूपसतः पापस्याङ्गस्याभावादिति, (६६) तस्माद् यागस्यापि व्यधिकरणव्यापारो भविष्यतीति । उच्यते । विहितक्रियया कर्तृगतव्यापारद्वारा (६७) कालान्तरफलं जन्यतइत्युत्सर्गः । स च बलवता बाधकेनापोद्यते । (६८) प्रकृते च बाधकं नास्ति । यथा शास्त्रदेशितं फलमनुष्ठातरीत्युत्सर्गः । पुत्रकृतगयाश्राद्धस्य पितृस्वर्गं प्रति पितृकृतजातेष्टेः पुत्रपूतत्वादिकं प्रति च हेतुत्वस्य शास्त्रेण बोधनात् । (६९) नन्वयं नियम एव पुत्रजातेष्टिपितृयज्ञादौ परम्परासंबन्धेन

---

(५५) पुत्रेति । तथा चेष्टापत्तिरिति भावः । अनियमवादी शङ्कते । (५६) तत्पुण्यमिति । गयाश्राद्धजन्यमित्यर्थः । नियमवादी दूषयति (५७) नेति । एवं च जातेष्टिस्थले ऽपि कर्तृगतादृष्टादेव फलसिद्धिरिति स्मर्त्तव्यम् । अनियमवादी समाधत्ते । (५८) मैवमिति । (५९) प्रथमेति । पितृस्वर्गकाम इत्यादितः स्वर्गाश्रयः पिता प्रथमोपस्थित इत्यर्थः । (६०) लाघवादिति । स्वर्गहेतुकामनाश्रयत्वापेक्षया स्वर्गाश्रयत्वस्य लघुत्वादित्यर्थः । उत्सर्गमाह । (६१) साक्षादिति । साक्षात्संबन्धेनोपपादकविषयत्वादित्यर्थः । पुत्रगतादृष्टेन चेति दूषयति । (६२) यदि चेति । यद्यपि शरीराद्युत्पत्तिः प्राङ्नोक्ता, तथापि स्वर्गस्य तज्जन्यतानियमेन तदप्युक्तप्रायमिति दूषितमिति ध्येयम् । नन्वेवं दुःखाभावः सिध्यतु शरीरसुखादिसंभवे को दोष इत्यत आह । (६३) न स पुनरिति । न शरीरी भवतीत्यर्थे शरीरनिषेधे तत्कारणकसुखमपि निषिद्धमित्यर्थः । विधेरप्रामाण्यमपाकरोति । (६४) मुक्तइति । (६५) विघ्नहेत्विति । प्रतिबन्धहेत्वित्यर्थः । उपसंहरति । (६६) तस्मादिति । जातेष्ट्यादिवद्यागस्यापि कृतिव्यधिकरणो व्यापारो ऽस्त्वित्यर्थः । नन्ववं यस्य कर्मणो बहुपुरुषगतः स्वर्गः फलं श्रूयते तत्रानेकादृष्टकल्पने गौरवं, कथं वा नरकादिस्थितानां तेषां शौचाद्यभावे ऽदृष्टोत्पत्तिरिति चेत्, न । उक्तप्रमाणबलेन सर्वस्योपपत्तेः । प्रायश्चित्तादौ व्यभिचारादाह । (६७) कालान्तरेति । न च यत्रानेकक्रियात्मकं प्रायश्चित्तं तत्र का गतिरिति वाच्यम् । तत्र फलस्यापि कालान्तरीयतया दृष्टापेक्षणे ऽप्यदोषात् । यद्यपि बाधकेनोत्सर्गः संपाद्यते न तु बाध्यते, तथात्वे नियमापत्तेः । तथापि स चेत्यस्य नियमश्चेत्यर्थ,स्तेन नियमस्य बलवद्बाधादुत्सर्गः फलतीति भावः । ननूत्सर्गो ऽप्यनियम इत्यनियमवादिमतमेव साधितमित्यत आह । (६८) प्रकृते चेति । तथा च बलवद्बाधकेन गयाश्राद्धादौ कृतव्यधिकरणव्यापाराभ्युपगमेपि यागे कृतिसमानाधिकरण एव व्यापारस्तन्मते तु व्यधिकरणो देवताप्रीत्यादिरिति विशेषः । के चित्तूत्सर्गो न नियमः किं तु सर्वत्र प्रसक्तिज्ञानमिति यावत्, तस्य क्वचिदपवादो ऽयथार्थ्यमिति नियमाद्भेदः । एवं च स चेत्यस्यापि यथाश्रुतएव तात्पर्यमित्याहुः । दृष्टान्तं दूषयति । (६९) नन्विति । तादृशफलस्य कर्तृगामित्वे नि-

कर्तृगतमेव फलं, नहि यस्य कस्यापि पितरि पुत्रे फलं, किं तु स्वपितृपुत्रयोः, तथा च स्वपितृगतत्वं स्वर्गभागिपितृकत्वं वा परम्परासंबन्धः फलेन पुत्रस्य । (७०) एवं पूतपुत्रकत्वादिकमपि पितृगतमेव । न च फलस्य कर्तृगतत्वं साक्षात्संबन्धेनैवेति वाच्यम् । (७१) ग्रामपशुपुत्रहिरण्यादीनां परम्परया कर्तृगतत्वमिति व्यभिचारात् । नहि ग्रामादयः साक्षात्कर्त्तरि संबद्धाः, (७२) एवं फलस्य साक्षात्कर्तृगामिताबोधने शास्त्रस्योत्सर्गो न तु फलस्य कर्तृगामिताबोधने । (७३) यत्तु स्वर्गभागिपितृकत्वं न फलं तत्कामनाया अधिकारिविशेषणत्वाभावात्पितृगतस्वर्गादिकाम इति श्रुतेः । स्वतश्च तथा कामनया प्रवृत्तौ श्रुतकामनाविरहेण प्रयोगे ऽङ्गवैगुण्यात् फलाभावप्रसङ्गः । किं च स्वर्गभागिपितृकत्वं विशिष्टं तत्र विशेष्यं तत्पितृकत्वं न काम्यं न वा फलं, सिद्धत्वात्तदसाध्यत्वाच्च, किं तु विशेषणं पितृगतः स्वर्ग इति स एव फलमिति । तन्न । (७४) नहि स्वर्गफलभागिपितृकत्वं फल, मपि तु स्वर्गेण समं पुत्रस्य परम्परासंबन्धरूपं तदुक्तमिति । उच्यते । परम्परासंबन्धेन यदि पुत्रगतत्वं पितृस्वर्गस्य तदा संयुक्तसमवायेन पुत्रेतरस्यापि फलं स्यात् । स संबन्धो न शास्त्रेण बोधित इति चेत्, तर्हि स्वर्गभागिपितृकत्वमपि न तथा, शास्त्रेणाबोधितत्वात्, ग्रामपशुहिरण्यादीनां च सिद्धत्वेन न काम्यत्वं, किं तु तद्विषयकं स्वत्वं काम्यं फलमपि तदेव, (७५) तच्च साक्षादेव कर्तृगतमिति (७६) कर्तृगतत्वेन फलस्य साक्षात्संबन्धो नियत एव, (७७) तस्माद्यद्गतत्वेन फले कामना तद्गतमेव शास्त्रदेशितं फलम् । (७८) अत एव कामनाविषयः स्वगत एव स्वर्गः फलं यागादेः स्वर्गपूतत्वादेश्च पितृपुत्रगतत्वेन काम्यत्वमिति श्राद्धजातेष्ट्यादेः पितृपुत्रगतमेव फलम् । एवं च मातापित्रादिगतस्वर्गकामनया पुत्रादिना कृतं पुष्करिणीमहादानादिकं मातापित्रादिस्वर्गजनकमेव, कामनाविषयस्वर्गसाधनत्वेन तेषां श्रुतत्वात् । नहि स्वगतस्वर्गकामस्य कर्त्तव्यतां पुष्करिण्यादेर्विधिर्बोधयति । तथा ऽश्रुतेः । किं तु स्वर्गकामस्य, स्वर्गश्च स्वगतः परगतो वेति स्वर्गकामत्व(७९)मविशिष्टं, (८०) यजेतेत्यात्मनेपदमपि कर्त्रभिप्रेतक्रियाफलमात्रजनकत्वेन च स्वर्गकामो दद्यादित्यादौ स्वगतस्वर्गकामनाया अन्तरङ्गत्वाद् औत्सर्गिकत्वाच्च स्वर्गकामत्वेन स्वगतस्वर्गकाम एवोच्यते । सामान्ये बाधकं

यम एवेत्यर्थः । (७०) एवमिति । पूतपुत्रत्वादिना परम्परासंबन्धेनेति शेषः । (७१) ग्रामेति । स्वत्त्वं हि तत्र संबन्धः । तच्च शास्त्राविरुद्धोपायविषयत्वमित्युपायादिघटितं न साक्षादित्याहुः । एवं सत्युत्सर्गत्वप्रवादं समर्थयति । (७२) एवमिति । संबन्धस्य फलत्वमिति भ्रमवतः समाधानं निरस्यति । (७३) यत्त्विति (७४) नहीति । नन्वेवमधिकारः फलस्वाम्यं, तच्च फलसंबन्धित्वमिति स न स्यादिति चेत्, न । एतन्मते फलकामनाया एवाधिकारत्वात् । (७५) तच्चेति । स्वरूपसंबन्धेनेति भावः । एवं फलस्येत्यादि दूषयति (७६) कर्तृगतत्वेनेति । शास्त्रदेशितं फलमनुष्ठातरीत्युत्सर्ग इत्युपसंहरन्नियमान्तरं दर्शयति । (७७) तस्मादिति । (७८) अत एवेति । यतस्तद्गतत्वेन कामनेति भावः । (७९) अविशिष्टमिति । तथा च तत्र परगतस्वर्गकामनैव वाधिकार इति भावः । इतो ऽप्यनुष्ठातरीत्युसर्ग इति बोध्यम् । न च व्यक्तिवचनानां सन्निहितविशेपपरत्वमिति स्वकीयस्वर्गसाधनतैव श्रुत्या बोध्यतइति वाच्यम् । स्वर्गत्वेन तस्यापि बुद्धिविपयतया बोद्धसन्निधानस्याविशेपात् । नन्वेवमतिप्रसङ्गः, येन केन चित्कृतस्य यस्य कस्य चित्स्वर्गादिकामनया महादानादेः फलोदयः स्यात्, तथा च राजादीनां परद्वारैव तत्संभवादुपोषणादिदुःखाननुभवप्रसङ्ग इति चेत्, न । यत्र सामान्यतो ऽधिकारबोधनं विशेषतस्तद्बाधकं नास्ति तत्र तथात्वस्येष्टत्वात् । अत एव परगतफलार्थितयैव दुर्गास्तवपाठाद्याचरन्ति । राजादीनां दुःखानुभवश्चाधिकफलकामुकतया कायक्लेशस्य फलाधिक्यहेतुत्वमित्यन्ये । नन्वेवं यजेतेति न स्यात्, कर्तृगतक्रियाफलएवात्मनेपदस्मरणात् । अत एव परार्थे पचतीति प्रत्युदाहरणम् । अत एव यजेतेत्यात्मनेपदबलादपि फलस्य कर्तृगामितैव प्रतीयतइति तृतीयटीकापि संगच्छतइत्यत आह । (८०) यजेतेति । न च टीकाविरोधः, तस्य मतान्तरत्वादन्यार्थत्वाद्वा, प्रत्युदाहरणमप्यनिच्छाविपयकमेवेति । न च "यत् ज्वलन्ति हि काष्ठानि तत्किं पाकं न कुर्वते" इत्यादावकर्त्रभिप्रायेपि तत्प्रयोगाच्चैवमिति वाच्यम् । तत्रात्मनेपदस्य प्रयोगसाधुत्वार्थत्वादित्येके । शिष्टप्रयोगत्वमेवात्र समाधिरित्यन्ये । यत्तु पितृगतस्वर्गकामनया न कर्म क्रियते, किं तु फलमुत्पाद्य तस्मै दीयते "पुण्यदः पुण्यमाप्नोती"ति वचनादिति । तन्न । उक्तरीत्या तथात्वे बाधकाभावात्, मृतस्य स्वीकाराभावेन संप्रदानत्वासिद्धौ दानासिद्धेश्च । विष्णवे दद्यादित्यादौ च दानपदं गौणं,वेदबलादिह तु जीवते पुण्य-

विना विशेषपरत्वे मानाभावात् । केचित्तु (८१) सम्यग्गृहस्थाश्रमपरिपालनस्य ब्रह्मलोकावाप्तिः फलं श्रूयतइति जातेष्टिपितृयज्ञयोरपि गृहस्थकर्म्मत्वेन तदेव फलमिति फलस्य कर्तृगामित्वनियम एव । (८२) प्रातिस्विकफलाभिप्रायेणोत्सर्ग इत्याहुः ॥

दानेनैवोपपत्तेर्मुख्यार्थत्वे बाधकाभावादिति दिक् । (८१) सम्यगिति । समस्तेत्यर्थः । तर्हि कथमुत्सर्ग इत्यत आह । (८२) प्रातिस्विकेति । प्रत्येकेत्यर्थः ॥

॥ अथ वेदान्तसूत्रसंबन्धिशैवभाष्यतृतीयाध्यायस्य ॥

॥ चतुर्थपादारम्भः ॥

॥ पुरुषार्थोऽतः शब्दादिति बादरायणः ॥ १ ॥

पूर्वत्रोपपादितः परविद्याप्रकारः । इह तु विद्यासहकारिण आश्रमधर्मादीन् निरूपयितुं विद्यात एव पुरुषार्थ इति दर्शयति । अतो विद्यात एव पुरुषार्थः[1] । "ब्रह्मविदाप्नोति परम्",

"ज्ञात्वा शिवं शान्तिमत्यन्तमेति",

इत्यादिशब्दादिति भगवान् बादरायणो मन्यते ॥ १ ॥

तत् संभवति न वेत्युभयश्रुतिदर्शनात् संशये सति पूर्वः पक्षः[2] प्रवर्तते ॥

॥ शेषत्वात् पुरुषार्थवादो यथान्येष्विति जैमिनिः ॥ २ ॥

न विद्यातः पुरुषार्थः[3] । कुतः । "तत् त्वमसि" इत्यादिसामानाधिकरण्येन कर्मसु कर्तुरेव ब्रह्मत्वावगमात् । तद्वेदनस्य तत्संस्कारतया कर्मशेषत्वात् । फलश्रुतिस्तु द्रव्यसंस्कारकर्मस्विति न्यायेनार्थवाद एव । अतो न विद्यातः पुरुषार्थ इति जैमिनिराचार्यो मन्यते[4] ॥ २ ॥

आचारदर्शनात् ॥ ३ ॥

आचारोऽपि दृश्यते । "अश्वपतिः केकयो ब्रह्मवित्", "यक्ष्यमाणो ह वै भगवन्तोऽहमस्मि" इत्यादौ । एवं केकयप्रभृतीनां ब्रह्मविदामपि कर्म प्राधान्येनावगम्यते । अतोऽपि विद्या कर्माङ्गमेव ॥ ३ ॥

॥ तच्छ्रुतेः ॥ ४ ॥

"यदेव विद्यया करोति" इति श्रुत्यैव विद्यायाः कर्मसु विनियोगादपि कर्माङ्गत्वम् । 'यत् करोति तद्विद्यया, इति हि श्रुतेरर्थः'[1] ॥ ४ ॥

॥ समन्वारम्भणात् ॥ ५ ॥

"तं विद्याकर्मणी समन्वारभेते" इति विद्याकर्मणोरेकस्मिन् पुरुषे साहित्यं दृश्यते । अतश्च तदङ्गत्वमेव विद्यायाः[2] ॥ ५ ॥

॥ तद्वतो विधानात् ॥ ६ ॥

"आचार्यकुलाद्वेदमधीत्य यथाविधानं गुरोः कर्मातिशेषेणाभिसमावृत्य कुटुम्बे शुचौ देशे स्वाध्यायमधीयानो धार्मिकान् विदधत्" इत्यादावर्थज्ञानपर्यन्ताध्ययनवतः कर्म विधीयते । अतश्च ज्ञानस्य कर्माङ्गत्वम् ॥ ६ ॥

॥ नियमात्* ॥ ७ ॥

"कुर्वन्नेवेह कर्माणि जिजीविषेच्छतं समाः" इत्यात्मविदो जीवनस्य कर्मसु विनियोगो नियम्यते । अतश्च विद्या कर्माङ्गमिति । नातः पुरुषार्थ इति ॥ ७ ॥

अथ सिद्धान्त उच्यते ॥

॥ अधिकोपदेशात् तु बादरायणस्यैवं तद्दर्शनात् ॥ ८ ॥

न विद्यायाः कर्मशेषत्वम् । अपितु विद्ययैव पुरुषार्थ इति बादरायणस्य मतमेव युक्तम् । कर्तुः प्रत्यगात्मनोऽर्थान्तरभूतस्यैव वेद्यतयोपदेशात् । तथाहि । "बहु स्यां प्रजायेय" इति, "स कारणं करणाधिपाधिपः", "विश्वाधिको रुद्रो महर्षिः", इत्यादिवाक्येषु वेद्यस्य ब्रह्मण आधिक्यं दृश्यते । अतो न विद्यायाः कर्मशेषत्वम् ॥ ८ ॥

यदुक्तमाचारदर्शनं तत्राह[3] ॥

॥ तुल्यं तु दर्शनम् ॥ ९ ॥

विद्यायाः प्राधान्येऽपि तुल्यमाचारदर्शनम् । न केवलं कर्मण एव । "एतद्ध स्म वै तद्विद्वांस आहुर्ऋषयः कावषेयाः किमर्था वयमध्येष्यामहे किमर्था वयं यक्ष्यामहे किं प्रजया करिष्याम" इत्यादौ ब्रह्मविदां कर्मत्यागो हि दृश्यते । अनुष्ठानं तु फलाभिसंधानरहितस्य कर्मणो विद्याङ्गत्वेन ।

१–तो हि परविद्याप्रकारः । तदिह विद्यात एव पुरुषार्थ इति इति पा० ।

२–श्रुत्या संशयः । तथा सति पूर्वपक्षः इति पा० ।

३–र्थसिद्धिरिति जैमिनिर्मन्यते इति पा० ।

४–स्तु द्रव्यादिष्विवार्थवाद एव । अतो न विद्या पुरुषार्थहेतुः इति पा० ।

१–विनियोगात् । "यत् करोति तद्विद्यया" इति हि श्रुतिः । यद्विद्यया साधनभूतया कर्म करोति तद्वीर्यवत्तरमिति वा सिध्यति । अतो विद्यायाः कर्माङ्गत्वमेव इति पा० ।

२ साहित्यं च विद्यायाः कर्माङ्गत्वे भवति इति पा० ।

* नियमाच्च इति पा० ।

३–नादिति तत्राह इति पा० ।

त्यागस्तु फलाभिसंधानयुक्तस्येति विरोधाभावात् कर्मण एव विद्याङ्गत्वमिति विद्यायाः प्राधान्यमेव ॥ ९ ॥

"यदेव विद्यया" इति यदुक्तं तत्राह ॥

॥ असार्वत्रिकी ॥ १० ॥

"यदेव विद्यया करोति" इति न सार्वत्रिकी विद्योच्यते । यदेव विद्ययेति प्रसिद्धवन्निर्देशात् । प्रसिद्धिरप्युद्गीथविद्याया एव । "यदेव विद्यया करोति तदेव वीर्यवत्तरम्", इति प्रकृतोद्गीथविद्यायुक्तस्य कर्मणो वीर्यवत्तरत्वसाधनभावो विधीयत इति न विद्या कर्माङ्गम् ॥ १० ॥

यदुक्तं "तं विद्याकर्मणी" इति, तत्राह ॥

॥ विभागः शतवत् ॥ ११ ॥

"तं विद्याकर्मणी समन्वारभेते" इत्यत्र विद्याकर्मणोर्भिन्नफलत्वेन विद्या च स्वस्मै फलायान्वेति, कर्म च स्वस्मै फलायान्वेति, इति विभागः । यथा क्षेत्ररत्नविक्रयिणे शतद्वयमित्यत्र क्षेत्रार्थं शतं, रत्नार्थं शतमिति विभागः[1] ॥ ११ ॥

॥ अध्ययनमात्रवतः ॥ १२ ॥

वेदमधीत्येत्यध्ययनमात्रवत एव कर्मविधानान्न विद्या कर्माङ्गम् । अध्ययनविधिर्ह्यक्षर[2]ग्रहणमात्रे पर्यवस्यति । अर्थावबोधपर्यन्तत्वेऽप्यर्थज्ञानार्थान्तरभूता विद्योपासीतेति विहिता विद्या प्रत्ययावृत्तिरूपा । अतोऽस्याः क्वापि न विशेषभावः ॥ १२ ॥

॥ नाविशेषात् ॥ १३ ॥

"कुर्वन्नेवेह कर्माणि" इत्यत्र स्वतन्त्रे कर्मणि विद्वदायुषो विनियोग इति विशेषहेतुर्न दृश्यते । "ईशावास्यमिदं सर्वम्" इति विद्याप्रकरणाच्च विद्याङ्गभूतमेतत् कर्मेति विज्ञायते । अतो न विद्यायाः कर्माङ्गत्वम् ॥ १३ ॥

॥ स्तुतयेऽनुमतिर्वा ॥ १४ ॥

विद्यामाहात्म्यात् सर्वदा कर्माणि कुर्वन्नपि तैर्न लिप्यते, इति हि वाक्यशेषः[3] । अतश्च विद्याया एव प्राधान्यम् ॥ १४ ॥

॥ कामकारेण चैके ॥ १५ ॥

'किं प्रजया करिष्यामः' इत्यादिना कामकारेण विदुषो गार्हस्थ्यस्य त्यागमधीयत एके । अतोऽपि विद्या प्रधानभूता लक्ष्यते ॥ १५ ॥

॥ उपमर्दं च ॥ १६ ॥

विद्यया सर्वकर्मोपमर्दं चाधीयत एके । "क्षीयन्ते चास्य कर्माणि तस्मिन् दृष्टे परावरे" इति[1] । अतो न कर्मप्राधान्यम् ॥ १६ ॥

॥ ऊर्ध्वरेतःसु च शब्दे हि ॥ १७ ॥

ऊर्ध्वरेतःसु चाश्रमेषु विद्याया एव दर्शनात् तेष्वग्निहोत्राद्यसंभवाच्च न विद्या कर्माङ्गम् । तथाहि, त्रयो धर्मस्कन्धा इति वैदिके शब्दे दृश्यन्ते । त्रय एवाश्रमा धर्माश्रयाः । अतो विद्यैव प्रधानभूता पुरुषार्थहेतुः । तस्यास्त्वङ्गतया प्रधानफलाभिसंधिरहितस्य विहितकर्मणोऽनु[2]वृत्तिरिति सिद्धम् ॥ १७ ॥

॥ परामर्शं जैमिनिरचोदना-
न्नापवदति हि ॥ १८ ॥

पूर्वत्र 'त्रयो धर्मस्कन्धा' इति त्रयाणामेवाश्रमाणां धर्माधारत्वमुक्तम्[3] । अत एवात्र चतुर्थाश्रमधर्मसद्भावे संदेहे सति पूर्वपक्षः । 'त्रयो धर्मस्कन्धा' इत्यादौ चतुर्थाश्रमाचोदनात् । "एतमेव प्रव्राजिनो लोकमिच्छन्तः प्रव्रजन्ति" इत्यादिचतुर्थाश्रमवचनमुपासनस्तुत्यर्थवादमेव जैमिनिर्मन्यते । अपवदति हि "वीरहा वा एष देवानां योऽग्निमुद्वासयते" इति श्रुतिः । चतुर्थाश्रमेऽतोऽग्निहोत्रपरित्यागे महान् दोष इति नास्ति तत्परित्यागेनाश्रमान्तरमिति ॥ १८ ॥

अथ[4] सिद्धान्तः ॥

अनुष्ठेयं बादरायणः साम्यश्रुतेः ॥ १९ ॥

गृहस्थाश्रमादिवदाश्रमान्तरं पर्यनुष्ठेय[5]मिति भगवतो बादरायणस्य मतम् । तत्र "त्रयो धर्मस्कन्धा एतमेव प्रव्राजिनो लोकमिच्छन्तः प्रव्रजन्ति" इति सर्वाश्रमसाम्यश्रुतेरग्न्युद्वासनदोषो गृहस्थविषय एव । अतश्चतुर्थाश्रमधर्मसद्भावः[6] ॥ १९ ॥

॥ विधिर्वा धारणवत् ॥ २० ॥

"उपरि हि देवेभ्यो धारयति" इत्यत्राप्राप्तत्वेन यथा विधिः । तद्वदत्रापि विधिरेव । अथवा जाबालश्रुतौ प्रत्यक्षेण विधिरप्यस्ति । "ब्रह्मचर्यं समाप्य गृही भवेत्, गृही भूत्वा वनी भूत्वा प्रव्रजेत्" इति । नात्र क्रमे[7] नियमः । "उत्सन्नाग्निरन-

---

१-मिति । अतो न विरोधः इति पा० ।

२-नं खच्च-इति पा० ।

३ विद्यास्तुतये कर्मानुमतिर्वा विद्यामाहात्म्यम् । सदा कर्म कुर्वन्नपि न तैर्लिप्यत इति विद्या स्तुता स्यात्, 'न कर्मणा लिप्यते पापकेन नर' इति वाक्यशेषः इति पा० ।

१ इत्यादिना इति पा० ।

२-या फलाभिसंधिरहितस्य विवक्षितकर्मण एवानु-इति पा० ।

०-ना चा-इति शंकरभाष्यसंमतः पाठः ।

३-त्वं सूचितम् इति पा० ।

४ संदेहः । एवं च सति मतान्तरेणाभिधीयत इति । अतोऽग्निहोत्रवतः परस्तादाश्रमान्तरं नास्तीति पूर्वः पक्षः ॥ १८ ॥ उच्यते इति पा०

५-रमप्यनुष्ठेय-इति पा० ।

६-मे न धर्मासंभवः इति पा० ।

७ इति । अतश्चतुर्थाश्रमधर्मसंपत्तिः । नात्र क्रम-इति पा० ।

ग्निको वा यदहरेव विरजेत् तदहरेव प्रव्रजेत्" इति श्रुतेः । जन्मान्तरसुकृतपरिपाकेन विशुद्धान्तःकरणस्य ब्रह्मचर्यादेव पारिव्राज्यं भवति ।

ऋणानि त्रीण्यपाकृत्य मनो मोक्षे निवेशयेत् ।
अनपाकृत्य मोक्षं तु भजमानो व्रजत्यधः ॥

इत्यादिनिषेधस्त्वविरक्तविषयः[1] । "वीरहा वा एष देवानां योऽग्निमुद्वासयते" इत्यग्न्युद्वासननिषेधाद् ब्रह्मचर्यादेव पारिव्राज्यं न गार्हस्थ्यात् परमिति केचित् । तथा सति "वनी भूत्वा प्रव्रजेत्" "उत्सन्नाग्निरनग्निको वा" "यदहरेव विरजेत् तदहरेव प्रव्रजेत्" इत्यादिविधिवैयर्थ्यं स्यात् । अतो ब्रह्मचर्यादेव प्रव्रजेदिति वा वनी भूत्वा प्रव्रजेदिति वा न[2] निर्बन्धः कार्यः । ब्रह्मचर्यादेव प्रव्रजेदिति वदतामयमभिप्रायः । साग्निरनग्निकश्चेति द्वावेवाश्रमौ । तत्र ब्रह्मचारी परिव्राट् चानग्निर्गृहस्थो वानप्रस्थश्च[3] साग्निरग्निमाधायोद्वास्य पारिव्राज्याद् ब्रह्मचर्यात् पारिव्राज्यमेवातीव मुख्यमिति । अन्यथा श्रुतिविरोधापत्तेः । अतः सर्वाश्रमधर्मसिद्धिः ॥ २० ॥

॥ स्तुतिमात्रमुपादानादिति चेन्नापूर्वत्वात् ॥ २१ ॥

"ओमित्येतदक्षरमुद्गीथमुपासीत" इत्युपक्रम्य "स एष रसानां रसतमः परमः परार्ध्योऽष्टमो यदुद्गीथ" इत्येवं जातीयक उदाहरणे उद्गीथादिषु[4] रसतमत्वादिदृष्टिर्विधीयते न वेति संशयः । किं तावत् प्राप्तम् । नोद्गीथादिषु रसतमत्वादिदृष्टिर्विधीयते । किंतु, इयमेव जुहूः स्वर्गो लोक आहवनीय इतिवत् कर्माङ्गभूतोद्गीथाद्युपादाय तस्य रसतमत्वादिवचनं स्तुतिमात्रमिति चेत्, इति पूर्वपक्षसमाप्तिः[5] । सिद्धान्त उच्यते । नापूर्वत्वादिति, न स्तुतिमात्रं, किंतूद्गीथादिषु रसतमत्वादिदृष्टिर्विधीयत एव । अपूर्वत्वात् । नचैवं जुहूरित्यादिन्यायावतारः । जुह्वादिविधिवदुद्गीथादिविधेरत्रासंनिधानात् । अतो रसतमत्वादिदृष्टिविधिरेव[6] ॥ २१ ॥

॥ भावशब्दाच्च ॥ २२ ॥

"उद्गीथमुपासीत" इति विधिप्रत्ययश्चात्र श्रूयते । अतोऽपि रसतमत्वादिदृष्टिविधिरिति ॥ २२ ॥

॥ पारिप्लवार्था इति चेन्न विशेषितत्वात् ॥ २३ ॥

वेदान्तेषु विद्यारम्भे 'प्रतर्दनो ह वै दैवोदासिः', इत्याद्याख्यायिका आम्नाताः । ताः पारिप्लवार्था उत विद्यास्तुत्यर्था इति संशयः । किं तावत् प्राप्तम् । पारिप्लवार्था इति । अश्वमेधयागे 'राजानं सकुटुम्बमुपवेश्य तत्पुरतो वैदिकान्याख्यानान्यध्वर्युणा वक्तव्यानि, तदिदं पारिप्लवमाचक्षीत" इति[1] वाक्येन विहितम् । तत्र "सर्वाण्याख्यानानि पारिप्लवे सन्ति" इति विनियोगादुपनिषदारम्भगता अप्याख्यायिकास्तदर्था[2] इति चेदिति पूर्वः पक्षः । तत्रोत्तरम् । न विशेषितत्वादिति । न पारिप्लवार्थास्ताः । "प्रथमेऽहनि मनुर्वैवस्वतो राजा द्वितीयेऽहनि यमो वैवस्वतो राजा" इत्यादिना पारिप्लवार्थानामाख्यायिकानां विशेषितत्वात् ॥ २३ ॥

औपनिषदाख्यायिकाः संनिहितविद्याविधिभिरेकवाक्यत्वाद् विद्यार्था इत्यर्थ इत्याह[3] ॥

॥ तथा चैकवाक्यतोपबन्धात् ॥ २४ ॥

यथा 'सोऽरोदीत्' इत्याद्याख्यानानां कर्मविधिभिरेकवाक्यता, तथा विद्याविधिभिरेकवाक्यतोपसंबन्धाच्च विद्यास्तुत्यर्था एवेति ॥ २४ ॥

॥ अत एव चाग्नीन्धनाद्यनपेक्षा ॥ २५ ॥

पूर्वत्रोपपादितोऽन्त्याश्रमसद्भावः । तस्य विद्यार्थमाधानाद्यपेक्षास्ति न वेति संशयः । किं तावत् प्राप्तम् । विद्याङ्गत्वेन कर्मणो विधानाद् विद्यावतामूर्ध्वरेतसां विद्याङ्गत्वेनाधानाद्यनुष्ठेयमिति प्राप्ते ब्रूमः । न तेषामाधानाद्यपेक्षा विद्या । "एतमेव प्रव्राजिनो लोकमिच्छन्तः प्रव्रजन्ति" इत्यादिश्रुतेस्तेषां कर्मत्यागेनैव विद्यावत्त्वावगमात् । किंतु स्वाश्रमधर्मापेक्षा सा । तेषामाधानाद्यनुपपत्तेरिति[4] ॥ २५ ॥

॥ सर्वापेक्षा च यज्ञादिश्रुतेरश्ववत् ॥ २६ ॥

पूर्वाधिकरणे निरूपितमन्त्याश्रमिणामनुपपत्तेराधानाद्यनपेक्षा विद्येति । तदिह गृहिणां विद्या तदपेक्षा न वेति संशयः । एवं सति गृहस्थानामपि विद्याग्नीन्धनादिकर्मानपेक्षिणीति ब्रूमः । तस्य व्यभिचारेण विद्याङ्गत्वानुपपत्तेः[5] । यत् तु विमता विद्या स्वाङ्गभूतकर्मापेक्षा । अङ्गित्वात् । प्रयाजाद्यपेक्षदर्शपूर्णमासवत् । इत्यनुमानम् । तत्राधानादेव कीदृ-

१–त्त्वज्ञानिविषय एव इति सिद्धम् इति पा० ।

२–त्, वनी भूत्वैव प्रव्रजेदिति न इति पा० ।

३–नग्निर्गृहस्थो वनस्थश्च इति पा० ।

४ इहोद्गीथविद्याया इत्येव पा० ।

५–मात्रम् । अतो न सिद्धिरुद्गीथादिषु रसतमत्वादिदृष्टेरिति चेदिति पूर्वपक्ष–इति पा० ।

६ उच्यते । उद्गीथादिषु रसतमत्वादिदृष्टिर्विधीयत एव । "ओमित्येतदक्षरमुपासीत" इति संनिहितेन विधिनैव जुह्वादिविधिवदुद्गीथसामादिविधिरेव । संनिधानाद्रसतमत्वादिदृष्टिर्विधिरेव । इति पा० ।

१ पारिप्लवाख्यं कर्म पारिप्लवमाचक्षत इति इति पा० ।

२ विहितत्वात्, आख्यानानि सन्तीति तत्र तत्र विनियोगादुपनिषदारम्भपठिताख्यायिका अत–इति पा० ।

३–दानामाख्यायिकानां तच्छेषत्वं न संभवतीति संनिहितविधिनैकवाक्यत्वाद्विद्यार्था इति । अतश्चाह इति पा० ।

४–त्वात् । तेष्वाधानाद्यनापेक्षा विद्यास्याश्रमधर्मापेक्षा । तेषामाधानादेरनुपपन्नत्वादिति युक्तमेव इति पा० ।

५–मः । कर्मणो वि–इति पा० ।

शमङ्गत्वं साध्यम् । प्रयाजादिवत् फलोपकारित्वं वा, अवघातादिवत् स्वरूपोपकारित्वं वा । नाद्यः । तज्जन्यत्वे मुक्तेरनित्यत्वं स्यात् । द्वितीये साध्यविकलो दृष्टान्तः । अतो न विद्याङ्गत्वं कर्मणः ।

तस्माद् गृहिणामपि विद्या कर्मानपेक्षेति पूर्वः पक्षः । सिद्धान्तस्तु, कर्मवत्सु गृहस्थेषु विद्याग्निहोत्रादिसर्वकर्मापेक्षा । "यज्ञेन दानेन" इति श्रुतेः । यज्ञादीनां पारमेश्वरनियोगसिद्धत्वाच्च । यथाश्वो गमनसाधनभूतोऽपि स्वपरिकरबन्धापेक्षो गमने, तथा विद्यापीति कर्मणः फलाभिसंधिरहितत्वेन विद्यास्वरूपोपकार्यङ्गत्वान्न तज्जन्यत्वं मोक्षफलस्य । किंतु साक्षाज्ज्ञानफलमेव मोक्षः । अतो गृहस्थानां यज्ञादिसापेक्षा विद्या सर्वेषामाश्रमविद्यायाः कर्मापेक्षत्वम्[1] ॥ २६ ॥

॥ शमदमाद्युपेतः स्यात् तथापि तु तद्विधेस्तदङ्गतया तेषामप्यवश्यानुष्ठेयत्वात् ॥ २७ ॥

"शान्तो दान्त उपरतस्तितिक्षुः समाहितो भूत्वात्मन्येवात्मानं पश्येत्, श्रद्धाभक्तिध्यानयोगादवेहि" इत्यादिना विद्यायाः[2] शमादिसंपत्त्यपेक्षा श्रुतेति । सा शमादिसंपत्तिर्गृहिणां संभवति न[3]वेति संशयः । यज्ञादिमत्तया[4] बहुव्यापारव्याकुलानां तेषां तदुपरतिरूपा शमदमादिसंपत्तिर्न संभवतीति प्राप्त उच्यते । गृहस्थो विहितकर्मव्यापृतोऽपि निषिद्धकाम्यादिकर्मसु व्यापाररहितः शमाद्युपेतः स्यात् । 'शान्तो दान्त' इत्यादिना 'श्रद्धाभक्तिध्यानयोगादवेहि' इत्यादिना च शमादेर्विहितत्वाद् विद्यानिष्पत्तये तदङ्गत्वेन तेषामवश्यानुष्ठेयत्वात् । आन्तराणां रागद्वेषादिकषायाणामनाविर्भूतिः शमः । सर्वेषामिन्द्रियाणामविहितव्यापारेभ्यो निवर्तनं[5] दमः । निषिद्धकाम्यकर्मव्यापारोपरम उपरतिः ।

द्वन्द्वसहिष्णुत्वं तितिक्षा । विसृष्टकामादिव्याक्षेपस्य चित्तस्य परत्वाभिमुख्यं समाधानम् । अपुरुषार्थसकलेतरशास्त्रपराङ्मुखी परविद्यामयपरमात्मतन्त्रोपनिषद्गोष्ठीसमुत्कण्ठारूपा सत्त्वकला श्रद्धा । विनिर्मुक्तसकलेतरदेवतानुरागा त्रिविधकरणसंपाद्या विशिष्टाष्टाङ्गयोगिनी परमशिवपरिचर्यामयी वैदिकी क्रिया भक्तिः । परमानन्दावेशमय[7]महामोक्षलक्ष्मीदर्शनत्वरा मुमुक्षा । ऐहिकामुष्मिकसकलभोगपराङ्मुखत्वरूपेण वैराग्येण नित्यानित्यवस्तुनिर्धारणाकारेण विवेकेन च विशिष्टस्य शमादिसंपत्तिक्रमेण संभवति मुमुक्षा[1] । एते विवेकादयो मुमुक्षापर्यन्ताः परमा धर्माः सर्वेषामाश्रमिणां विद्यार्थमविशेषेणानुष्ठेया इति ॥ २७ ॥

॥ सर्वान्नानुमतिश्च प्राणात्यये तद्दर्शनात् ॥ २८ ॥

प्राणविद्यायां पठ्यते । "न ह वा एवंविदि किंचानान्नं भवति" इतीह प्राणविद्यानिष्ठस्य सर्वान्नानुमतिः प्रतीयते । तदेषा युक्ता न वेति संशयः । किं तावत् प्राप्तम् । मानान्तरप्राप्तस्य भोजनस्याविधेयत्वादिह सर्वान्नानुमतिरप्राप्ता विधीयते । इति प्राप्ते समाधीयते । प्राण[2]विद्यानिष्ठस्यापि सर्वान्नानुमतिर्न सर्वदा, किं तु प्राणात्यय एव । अधिकशक्तिरूपस्तैर्ब्रह्मविदोऽपि हि प्राणात्यय एवोच्छिष्टभक्षणादौ श्रुतिर्दृश्यते । "मटचीहतेषु कुरुष्वाटक्या सह जाययोषस्तिर्ह चाक्रायण इभ्यग्रामे यद्राणक उवास स हेभ्यं कुल्माषान् खादन्तं बिभिक्षे, स होवाच, नेतोऽन्ये विद्यन्ते यच्च येम, इम उपनिहिता इत्येतेषां मे देहीति होवाच, तानस्मै प्रददौ, हन्तानुपानमित्युच्छिष्टं मे पीतं स्यादिति होवाच मस्विदेतेऽप्युच्छिष्टा इति न वा अजीविष्यमिमानखादन् इति होवाच, कामो म उदपानम्" इत्यादिरूपा । अतः प्राणात्यय एव सर्वान्नानुमतिः परविद्यावतोऽपीति ॥ २८ ॥

॥ अबाधाच्च ॥ २६ ॥

"आहारशुद्धौ सत्त्वशुद्धिः सत्त्वशुद्धौ ध्रुवा स्मृतिः स्मृतिप्रतिलम्भे सर्वग्रन्थीनां[3] विमोक्ष" इत्याहारशुद्धेतरबाधाच्च प्राणसंशय एव सर्वान्नानुमतिः ॥ २९ ॥

॥ अपि च स्मर्यते ॥ ३० ॥

प्राणसंशय एव सर्वान्नानुमतिः स्मर्यतेऽपि ।

प्राणसंशयमापन्नो योऽन्नमत्ति यतस्ततः ।
लिप्यते न स पापेन पद्मपत्रमिवाम्भसा ॥

इति[4] ॥ ३० ॥

॥ शब्दश्चातोऽकामकारे ॥ ३१ ॥

तस्माद् "ब्राह्मणः सुरां न पिबेत्" इति कामकारनिवृत्तौ शब्दश्च भवति । अतश्च प्राणसंशय एव विदुषोऽपि सर्वान्नानुमतिः । अन्यथा निषिद्धाचरणेन परमेश्वराज्ञाद्रोहो स्यादिति भावः ॥ ३१ ॥

१—षामाश्रमिणां स्वविहितकर्मापेक्षा विद्येति युक्तमेव इति पा० ।

२ विद्यावतां इति पा० ।

३—त्तिः श्रूयते । तदेषां विद्यावत्त्वे सर्वाश्रमसाधारणी न इति पा० ।

४—यः । किं तावत् प्राप्यते । यज्ञादिरहितानामन्त्याश्रमिणामेव व्यापारोपशमरूपता शमादिसंपत्तिरुपपद्यते । विद्यावत्त्वेऽपि गृहिणां यज्ञादिमत्तया इति पा० ।

५ निग्रहो इति पा० ।

६ विनष्टतन्द्रीव्या—इति पा० ।

७—न्दलाभमय—इति पा० ।

१—त्तिः क्रमेण संभवति इति पा० ।

२ ब्रह्म—इति पा० ।

३—नां वि- इति पा० ।

४ अतश्चेति इति पा० ।

॥ विहितत्वाच्चाश्रमकर्मापि ॥ ३२ ॥

विद्याहीनस्य विद्यावतोऽपि गृहस्थस्याश्रमकर्म यज्ञादिकं "यावज्जीवमग्निहोत्रं जुहोति" इति विहिततया च "यज्ञेन दानेन" इति श्रुतेर्विद्यासाधनतया चानुष्ठेयमवगम्यते ॥ ३२ ॥

॥ सहकारित्वेन च ॥ ३३ ॥

विद्यावतोऽपि "विद्यां चाविद्यां च" इतिश्रुतेर्विद्याङ्गतया[1] विहिततया चानुष्ठेयमवगम्यते ॥ ३३ ॥

तदिह विद्याहीनेन विद्यावता च यज्ञादिकं विद्यासाधनत्वेनाङ्गत्वेन च द्विरनुष्ठेयं सकृदनुष्ठेयं वेति संशये सत्युभयविधिबलाद् द्विरनुष्ठेयमिति प्राप्ते सिद्धान्त उच्यते ॥

॥ सर्वथापि त एवोभयलिङ्गात् ॥ ३४ ॥

उभयत्र विनियोगेनोभयाकारत्वेऽपि त एव यज्ञादयः सर्वत्र प्रत्यभिज्ञानात् । एवं च कर्मस्वरूपैक्ये[2] सति संयोगपृथक्त्वन्यायेन न विरोधः । सकृत् प्रयोगेऽपि वचनद्वयबलेन कर्मण एकस्याप्याकारद्वयोपपत्तेः । यथा "खादिरो यूपो भवति" "खादिरं वीर्यकामस्य यूपं कुर्वन्ति[3]" इत्यत्र वचनद्वयबलेन नित्यत्वं काम्यत्वं चैकस्य[4] खादिरत्वस्य तद्वत् । ततो विदुषोऽप्यविदुषोऽपि विद्याङ्गतया विद्याहेतुतया विहिततया च सकृदेवानुष्ठेयं यज्ञादिकमिति ॥ ३४ ॥

॥ अनभिभवं च दर्शयति ॥ ३५ ॥

"धर्मेण पापमपनुदति" इति श्रुतिर्विद्योत्पत्तिप्रतिबन्धकदुरितनिवर्तनेन विद्याया अनभिभवं कर्मानुष्ठानकार्यं च दर्शयति । अतो न पूर्वोक्तविरोधः ॥ ३५ ॥

॥ अन्तरा चापितु तद्दृष्टेः ॥ ३६ ॥

उक्ताश्रमिणां विद्या संपद्यत इति ।

इहानाश्रमिणां विद्या संपद्यते न वेति नियामकाभावात् संदेहः । अनाश्रमिणः स्नातकविधुराश्च, तेषां ब्रह्मविद्या न संभवति । चित्तशुद्धिहेतुत्वेन विद्यायाः साधनभूतानामाश्रमधर्माणामभावादिति प्राप्ते वदामः । रैक्वादिषु विद्यादर्शनादनाश्रमिणामपि विद्या संभवत्येव ॥ ३६ ॥

यदुक्तं विद्यासाधनाश्रमधर्माभावादिति । तत्राह ॥

॥ अपि च स्मर्यते ॥ ३७ ॥

अनाश्रमिणामपि जपादिना विद्यानुग्रहः स्मर्यते ।

जप्येनैव तु संसिध्येद् ब्राह्मणो नात्र संशयः ।
कुर्यादन्यन्न वा कुर्यान्मैत्रो ब्राह्मण उच्यते ॥

अतस्तस्यापि ज्ञानसंपत्तिः ॥ ३७ ॥

॥ विशेषानुग्रहश्च ॥ ३८ ॥

आश्रमनियतधर्मविशेषेणापि विद्यानुग्रहः श्रूयते । "तपसा ब्रह्मचर्येण श्रद्धया विद्यया चात्मानमन्विष्य" इति ॥ ३८ ॥

॥ अतस्त्वितरज्ज्यायो लिङ्गाच्च ॥ ३९ ॥

अनाश्रमित्वादितरदाश्रमित्वं ज्यायः । धर्मभूयस्त्वात् ।

"अनाश्रमी न तिष्ठेत दिनमेकमपि द्विजः" ।

इति स्मृतेश्च । एवमनाश्रमित्वादाश्रमित्वं वरमेव । तथाप्यापद्विषयेऽनाश्रमिणामपि जप्यादिसाधनेन विद्या संपद्यत एवेति ॥ ३९ ॥

॥ तद्भूतस्य तु नातद्भावो जैमिनेरपि
नियमात् तद्रूपाभावेभ्यः ॥ ४० ॥

इहोर्ध्वरेतसां पूर्वाश्रमावरोहोऽस्ति न वेति संदेहः । "ब्रह्मचर्यं समाप्य गृही भवेद्, गृहाद्वा वनी भूत्वा प्रव्रजेत्", इत्याश्रमारोहो यथा स्वेच्छाधीनस्तथावरोहोऽपीति प्राप्ते सिद्धान्तयामः । नैष्ठिकादिभूतस्यातद्भावः । ततः प्रच्युतिर्न संभवति । कुतः । नियमात् तद्रूपाभावेभ्यः । नियच्छन्ति ह्यत्यन्तमात्मानमाचार्यकुलेऽवसादयन्ति, इति । "अरण्यमियात्, ततो न पुनरेयात्", इति "संन्यस्याग्नीन् न पुनरावर्तयेत्", इति च शास्त्राणि नियच्छन्ति । नचारोहरूपशास्त्रवदवरोहरूपशास्त्राणि सन्ति । अतस्तेषामप्रच्युतिनियमश्रुतेः प्रच्युतौ श्रुत्याद्यभावाच्च न तेषां विद्याधिकारः । जैमिनेरप्येवमेव मतम्[1] ॥ ४० ॥

आरूढपतितस्य प्रायश्चित्तादिना विद्याधिकारो नास्तीत्याह ॥

॥ नचाधिकारिकमपि पतनानुमानात् तदयोगात् ॥ ४१ ॥

यदवकीर्णिनो गर्दभपश्वालम्भनम् । अवकीर्णिपशुश्च । तद्वदित्यधिकारिलक्षणोक्तं प्रायश्चित्तं, तदप्यारूढपतितस्य न संभवति ।

"आरूढो नैष्ठिकं धर्मं यस्तु प्रच्यवते नरः ।
प्रायश्चित्तं न पश्यामि येन शुध्येत् स आत्महा" ॥

---

१ विद्यावतामपि "तमेतं वेदानुवचनेन" इत्यादिना विद्याङ्गतया इति पा० ।

२—नाल्लिङ्गात् कर्मस्व—इति पा० ।

३ कुर्यात्" इति पा० ।

४—कस्य कर्मणस्तदुभयविधानाद् यज्ञादिकर्मणः सकृत् प्रयोगात् इति पा० ।

१ उक्ता ह्याश्रमभेदाः । इहान्त्याश्रमस्य पूर्वाश्रमावरोहोऽस्ति न वेति संदेहः । किमुच्यते । 'ब्रह्मचर्यं समाप्य गृही भवेत्, गृहाद्वनी भूत्वा प्रव्रजेत्, इत्याश्रमारोहवदवरोहोऽप्यस्तीति प्राप्त उच्यते । 'न पुनरेयात्' इति 'संन्यस्य न च पुनरावर्तयेत्' इति । अतस्तेषां प्रत्यावृत्य स्थित्यभावान्न विद्याधिकारः । जैमिनेरप्येवमेव मतम् । तस्मादारोहवन्नावरोहोऽन्त्याश्रमिण इति ॥ ४० ॥ इत्येव पा० ।

इति तस्य प्रायश्चित्तानधिकारस्मृतेस्तदसंभवात्[1] ॥ ४१ ॥

॥ उपपूर्वमपि त्वेके भावमशनवत् तदुक्तम् ॥ ४२ ॥

उपपातकत्वात् प्रायश्चित्तमप्येके मन्यन्ते । मध्वशनप्रायश्चित्तवत् । तदुक्तम् । "उत्तरेषां चैतदविरोधि" इति । उपकुर्वाणस्य यदुक्तं तत् स्वाश्रमाविरोध्यन्येषामप्याश्रमिणां भवतीत्यर्थः ॥ ४२ ॥

॥ बहिस्तूभयथापि स्मृतेराचाराच्च ॥ ४३ ॥

उपपातकत्वे महापातकत्वेऽपि कर्माधिकारादिबहिष्कृता एते ।

"प्रायश्चित्तं न पश्यामि येन शुध्येत् स आत्महा" ।

इति स्मृतेः । शिष्टबहिष्काराच्च । अतः सर्वथैवारूढपतितानां न[2] विद्याधिकारः ॥ ४३ ॥

॥ स्वामिनः फलश्रुतेरित्यात्रेयः ॥ ४४ ॥

उक्तमुद्गीथाद्युपासनं, तदनुष्ठानं यजमानस्य, उत ऋत्विजामिति संशयः । किं प्राप्तम् । उद्गीथाद्युपासनं यजमानस्यैवानुष्ठेयम् । तस्यैव वीर्यवत्तरत्वफलश्रवणात् । नर्त्विजामित्यात्रेयमतम् ॥ ४४ ॥

सिद्धान्त उच्यते ॥

॥ आर्त्विज्यमित्यौडुलोमिस्तस्मै हि परिक्रीयते ॥ ४५ ॥

"एवंविदुद्गाता ब्रूयात्[3]" इति वाक्यशेषादुद्गातुरुपासकत्वं स्फुटं श्रूयते । आर्त्विज्यमेव तदनुष्ठानमित्यौडुलोमिमतम् । कथमन्यकर्तृकमन्यगामिफलं स्यादिति चेत् । ऋत्विजां कर्मस्वरूपवदशेषाङ्गानुष्ठानाय यजमानेन क्रीतत्वात् । साङ्गकर्मानुष्ठानाय हि ऋत्विजो यजमानेन परिक्रीयन्ते । तस्मादृत्विक्कृतं यजमानकृतमेवेति । फलं च तस्य स्वामिन एवेति न विरोधः ॥ ४५ ॥

॥ सहकार्यान्तरविधिः पक्षेण तृतीयं तद्वतो विध्यादिवत्* ॥ ४६ ॥

कहोलब्राह्मणे श्रूयते । "तस्माद् ब्राह्मणः पाण्डित्यं निर्विद्य बाल्येन तिष्ठासेत्, बाल्यं च पाण्डित्यं च निर्विद्याथ मुनिः", इति बहूपनिषत्तात्पर्यनिर्णयरूपं पाण्डित्यं निःशेषेण संपाद्य बाल्येन रागद्वेषादिरहितत्वात् बाल्यसदृशेनावस्थान्तरेणावतिष्ठेत । ततः "पाण्डित्यं बाल्ये निःशेषं संपाद्याथ मुनिः", इति । अत्र पाण्डित्यबाल्यवन्मौनमपि विधीयते न वेति संशये मुनिरित्यत्र भवेदित्यादिविधिप्रयोगाभावान्न विधीयत इति प्राप्तेऽभिधीयते । विद्यावतो यज्ञादिवत् पाण्डित्यबाल्ययोस्तृतीयं सहकार्यन्तरं मौनं विधीयत एव । प्रकृष्टमननशीले मुनिशब्दस्य प्रसिद्धेः विद्यानिष्पत्त्यर्थमुपास्यविषयाभ्यां सरूपमिदं प्रकृष्टमननं तिष्ठासेदिति पदानुवृत्त्या विधिरप्युपपद्यते । ततो मौनविधिः संभवति विद्यावत इति ॥ ४६ ॥

॥ कृत्स्नभावात् तु गृहिणोपसंहारः ॥ ४७ ॥

इह सर्वेषामाश्रमाणां विद्या साधारणी, उत विशेषोऽस्तीति संशयः । ब्रह्मचारिणो वेदाभ्यास आचार्यपरवशत्वाद् गृहस्थस्य कुटुम्बभरणायासितत्वाद् वनस्थस्य वैखानसधर्मव्यापृतत्वान्न तेषां ज्ञानध्याने संभवतः[1] ।

"वेदान्तविज्ञानसुनिश्चितार्थाः संन्यासयोगाद्यतयः शुद्धसत्त्वाः" ।

इति वेदान्तार्थज्ञानवतां संन्यासयोगश्रवणात्, "अन्त्याश्रमस्य इति ध्यानविधौ दर्शनाच्चान्त्याश्रमिणामेव ज्ञानध्याने । नापरेषामिति पूर्वः पक्षः । सर्वेष्वाश्रमेषु विद्या संभवत्येव । छान्दोग्ये "कुटुम्बे शुचौ देशे स्वाध्यायमधीयान" इत्यारभ्य "स खल्वेवं वर्तयन् यावदायुषं ब्रह्मलोकमभिसंपद्यते, नच पुनरावर्तत" इति कृत्स्नाश्रमेषु विद्यासद्भावप्रदर्शनात् । तत्र गृहिणोपसंहारः सर्वेषां प्रदर्शनार्थः । एवमन्त्याश्रमवचनमपि सर्वेषामाश्रमाणां प्रदर्शनार्थम् । अतः सर्वेषामाश्रमिणां विद्यास्त्येव[2] । फलत्यागः संन्यासः[3] । यतित्वं जितेन्द्रियत्वम् । सर्वमिदं सर्वेषां संभवत्येव[4] ॥ ४७ ॥

मौनवदितरेषामप्युपदेशात् ॥ ४८ ॥

अथर्वशिरसि श्रूयते ।

"तृष्णां छित्त्वा हेतुजालस्य मूलम् ।
बुद्ध्या संचिन्त्य स्थापयित्वा च रुद्रे" ॥

"रुद्र एकत्वमाहुः" । "रुद्रं शाश्वतं वै पुराणमिषमूर्जं तपसा नियच्छत व्रतमेतत् पाशुपतम्", इति । तत् पाशुपतव्रतमथर्वशिरसि श्रुतम् । पुराणेषु च प्रसिद्धमेव । तन्निष्ठानां विद्याप्राप्तिर्मुक्तिश्च संभवति न वेति संशयः । किं प्राप्तम् । आश्रमेष्वनन्तर्भावात्, अवसाने[5]दर्शनात् पुत्राद्यर्थे कृष्णादि-

---

१ आधिकारिकमधिकारिलक्षणोक्तं प्रायश्चित्तमपि तस्य न संभवति । तस्य प्रायश्चित्तानधिकारस्मृतेस्तदसंभवात् । 'आरूढो नैष्ठिकम्' इत्यारभ्य 'प्रायश्चित्तं न पश्यामि' इति स्मृतेस्तदसंभवः ॥ ४१ ॥ इति पा० ।

२–यान्त्याश्रमिणोऽवरोहो न नवा तस्य इति पा० ।

३ उद्गायेत्, इति पा० ।

* अतः पूर्वं मुद्रितशंकरभाष्ये श्रुतेश्च इत्येतत् सूत्रमस्ति, तदेतन्मते नास्त्येव ।

१–यासितत्वाच्च तयोर्निवृत्तिरूपं ज्ञानं संभवति इति पा० ।

२–मिति प्राप्त उच्यते । यतः सर्वेषामाश्रमिणां विद्यास्त्येव । इति पा०

३ संन्यासः । "काम्यानां कर्मणां न्यासं संन्यासं कवयो विदुः" । इति स्मृतेः । इति पा० ।

४–समानमेव इति पा० ।

५ अवस्था–इति पा० ।

भिरनुष्ठितत्वात्, अवान्तरफलसिद्धिमन्तरेण तेषां न मोक्षसिद्धिरस्तीति प्राप्ते ब्रूमः। तेषामत्यन्तव्रतधारिणां मुक्तिरेव फलं संभवति। विद्यासंपत्तिश्च परब्रह्मणो रुद्रस्यानुसंधानरूपा। मुनिधर्मवदितरेषामपि भिक्षाचर्यशमदमादीनां परधर्माणां पाशुपताख्ये व्रतेऽप्युपदेशात्। तन्निष्ठानामपि "रुद्र एकत्वमाहुः"। "रुद्रं शाश्वतं वै पुराणमिषमूर्जं तपसा नियच्छत, व्रतमेतत् पाशुपतम्"। "अग्निरित्यादिना भस्म गृहीत्वा विमृज्याङ्गानि संस्पृशेत् तस्माद्व्रतमेतत् पाशुपतं पशुपाशविमोक्षाय" इति रुद्राध्यायस्य पाशविच्छेदरूपस्य मोक्षफलस्य संबन्धावगमाच्च[1]। अतो यावदायुषं पाशुपतव्रतधारिणां मुक्तिरेव फलम् ॥ ४८ ॥

यदुक्तमाश्रमेष्वनन्तर्भाव इति तत्राह ॥

॥ अनाविष्कुर्वन्नन्वयात् ॥ ४६ ॥

आश्रमान्तररूपेणात्मानमनाविष्कुर्वन्नव्यक्तीभवन्नपि पाशुपताश्रमो विद्यासाधनब्रह्मचर्यादियतिधर्मसमन्वयाश्रमसंज्ञकोऽयमाश्रमभेदः स्वतन्त्रः परमशिवप्राप्तिहेतुः। "यावच्छरीरपातं द्वादशाब्दमथापि वा" इत्युक्तेरात्यन्तिकसावधित्वेन पाशुपतव्रतस्य विकल्पः। तत्रात्यन्तिकमन्त्याश्रमसंज्ञकमपवर्गहेतुः। तदन्यद्भोगहेतुरिति व्यवस्था। एवं भुक्तिमुक्तिहेतुतयोभयात्मकमिदं व्रतं शिवप्रसादकरं श्रुतिरेव विदधाति। यथा नाप्रामाण्यपातोऽस्या भवति तथा योजनीयम् ॥ ४९ ॥

॥ ऐहिकमप्रस्तुत[2]प्रतिबन्धे तद्दर्शनात् ॥ ५० ॥

उक्तक्रमोपासननिष्ठानामैहिकं मुक्तिफलम्, उत जन्मान्तरे वा भवतीति संशये विचार्यते। इहैव मे जन्मनि मुक्तिर्जायतामित्यभि[3]संधाय पुरुष उपासने प्रवर्तते, नतु जन्मान्तर इति कः प्रयोजनस्य विलम्बनमीहते। तस्मादैहिकमेव मुक्तिफलं भवति। न चेत् कदाचिदपि न भवति। इति प्राप्ते वदामः। प्रबलकर्मान्तरप्रतिबन्धाभावे परोपासनफलमिह जन्मनि भवति। तत्सद्भावे तु जन्मान्तरे। यथाभ्युदयफलं स्वसाधनभूतपुण्यं कर्मानन्तरमेव संपद्यत इति न नियमः। किंतु प्रतिबन्धकसद्भावे जन्मान्तरे भवति, तद्वद्। वामदेवादिषु जन्मान्तरश्रवणादिबलेन तत्फलदर्शनात्। ततो नैहिकत्वे मुक्तिफलस्य नियम इति ॥ ५० ॥

॥ एवं मुक्तिफलानियमस्तदवस्थावधृतेः

स्तदवस्थावधृतेः ॥ ५१ ॥

केवलकर्मफलाभ्युदयवन्मुक्तिफलमपि प्रबलकर्मान्तरप्रतिब-

१–स्यात्र संबन्धोऽवगम्यते इति पा०।

२ मुद्रितशंकरभाष्यसंवलितपुस्तके ऐहिकमप्यप्रस्तुत–इति पा०।

३–मिति मनस्यभि–इति पा०।

न्धाभावे भवतीति निरूपितम्। तन्न्यायेन[1] कर्मफलवज्ज्ञा[2]नफलस्यापि सातिशयत्वा[3]नियमोऽस्ति, न वेति, संशयः। किं तावत् प्राप्तम्। कर्मफलवन्मुक्तिफलमपि सातिशयम्[4]। "ज्योतिष्टोमेन स्वर्गकामो यजेत", "वाजपेयेन स्वाराज्यकामो यजेत", इत्यादिभिः कर्मफलस्य सातिशयत्वमवगम्यते। तद्वदुपासनज्ञानफलस्यापि। इति प्राप्तेऽभिधीयते। कर्मफलस्य न सातिशयत्वनियमः[5]। ब्रह्मस्वरूपावस्थाया एव फलत्वावधृतेः[6]। सर्वेषामपि विद्यावतां ब्रह्मस्वरूपस्यैकत्वाच्च वैषम्यकथात्र संभवति। नचोपासनतारतम्यान्मुक्तिरूपस्य तत्फलस्य तारतम्यं स्यादिति वाच्यम्[7]। उपासनकर्मणां मुक्तिफलव्यतिरेकेण फलान्तराभावात्। ब्रह्मणा एकत्वेन तद्रूपस्य मुक्तिफलस्याप्येकत्वात्[8]। अतो न मोक्षफलवैषम्यमिति ॥ ५१ ॥

इति श्रीकण्ठशिवाचार्यविरचिते ब्रह्ममीमांसाभाष्ये तृतीयस्याध्यायस्य चतुर्थः पादः ॥ ४ ॥ समाप्तश्च तृतीयोऽध्यायः ॥ :: :: ॥

१ एवं न्यायेन इति पा०।

२–वन्मुक्ति–इति पा०।

३–त्वादिनि–इति पा०।

४ सातिशयवत्, इति पा०।

५–ते। न कर्मफलस्येव ज्ञानोपासनस्य सातिशयत्वादिनियमः इति पा०।

६ एव प्राप्यतयावगतेः इति पा०।

७–कथा। तत्रापि चोपासनकर्मतारतम्यान्मुक्तिरूपस्य फलस्य तारतम्यमिति न वाच्यम् इति पा०।

८–स्य चैकत्वमेव। इति पा०।

॥ अथ वेदान्तसूत्रभाष्यसंबन्धिचतुर्थाध्यायस्य ॥

॥ चतुर्थपादारम्भः ॥

॥ आवृत्तिरसकृदुपदेशात् ॥ १ ॥

विचारिताः खलूपासकोपास्योपासनभेदाश्रमधर्मादयस्तृतीयाध्याये[1]। इह पुनश्चतुर्थाध्याये प्रथमे पाद उपासनाप्रकारः। द्वितीये जीवस्योपासकस्योत्क्रान्तिदशा। तृतीयेऽर्चिरादिगतिः। चतुर्थे ब्रह्म प्राप्तस्यावस्था च निरूप्यते। प्रथमाधिकरणेऽत्र "ब्रह्मविदाप्नोति परम्"। "ज्ञात्वा शिवं शान्तिमत्यन्तमेति" इत्यादिषु मोक्षसाधनतया विहितं वेदनं सकृदनुष्ठेयम्[2]। उतावर्तनीयम्। इति संशयः। किं तावत् प्राप्तम्। सकृदनुष्ठेयम्। 'सकृत् कृते कृतः शास्त्रार्थ' इति न्या-

१–तः खलूपासकोपास्यजीवेश्वरोपासनभेदाश्रमादिव्यवस्थापकस्तृतीयोऽध्यायः। इति पा०।

२–तमुपासनज्ञानं सकृदनुसंधेयम् इति पा०।

यात् । प्रयाजादिवत् । सकृदनुष्ठानेऽपि वेदनज्ञानशब्दार्थसिद्धेः[1]। इति प्राप्ते ब्रूमः। "ब्रह्मविदाप्नोति परम्"इत्यादिषु मोक्षसाधनतया विहितं वेदनमसकृदावर्तनीयम् । "मनो ब्रह्मेत्युपासीत","भाति च तपति च कीर्त्या यशसा ब्रह्मवर्चसेन य एवं वेद स मयैतदुक्तः," "अनुम एतां भगवो देवतां शाधि यां देवतामुपास्से," इत्यादिश्रुतिषूपक्रमोपसंहारयोर्विद्योपास्त्योर्व्यतिकरोपदेशेन च मोक्षसाधनरूपस्य वेदनस्योपासनारूपत्वावगमात् । उपासनशब्दस्य च स्मृतिसंतानवाचित्वात्[2]। यदुक्तं, प्रयाजादिवदिति । तस्यादृष्टफलत्वाद्युक्तं सकृदनुष्ठानम् । वेदनफलस्य साक्षात्कारस्य[3] दृष्टत्वात् तस्याफलोदयमावृत्तिः । अवघातादिवदिति ॥ १ ॥

॥ लिङ्गाच्च ॥ २ ॥

अस्मिन् विषये लिङ्गं चास्ति ।

"क्षेत्रज्ञस्येश्वरज्ञानाद्[4]विशुद्धिः परमा मता ।
महापातकयुक्तो वा युक्तो वाप्युपपातकैः ॥
प्रविश्य रजनीपादं ब्रह्मध्यानं समभ्यसेत् ।
आध्यात्मिकान् योगाननुतिष्ठेत् ।
रुक्माभं[5] स्वप्नधीगम्यं विद्यात् तु पुरुषं परम्" ॥

इत्यादि । अतश्च ब्रह्मवेदनस्यावृत्तिरिति ॥ २ ॥

॥ आत्मेति तूपगच्छन्ति ग्राहयन्ति च ॥ ३ ॥

पूर्वत्र ब्रह्मण उपासनमावृत्तिमदभिहितम् । तदात्मनस्तद्भावेनोपासनमुत तदर्थान्तरत्वेनेति विचारः । एवं सति "विश्वाधिको रुद्रो महर्षिः," "अधिकं तु भेदनिर्देशात्" इत्यादिश्रुतिसूत्रेषु प्रत्यगात्मनः पशोर्जीवात् पत्युः परब्रह्मणोऽर्थान्तरत्वेन निरूपितत्वात् सर्वज्ञत्वादिना जीवस्य ब्रह्मभावाघटनाच्च ब्रह्मोपासनं जीवस्य स्वभिन्नत्वेनैव युज्यत इति पूर्वः पक्षः ।

सिद्धान्तस्तु[6],

यद्यपि जीवादधिकमेव शिवाख्यं परं ब्रह्म, तथाप्युपासिताहं ब्रह्मास्मीति तदुपासीत । यतः पूर्वेऽप्युपासितारस्त्वं वाहमस्मि भगवो देवते, अहं वै त्वमसीत्यात्मन्येवावग-

१ वेदनोपासनस्य सिद्धत्वम् । इति पा० ।
२ मोक्षसाधनमसकृदावृत्तम् । "विद्यादुपासीत" इति विद्योपास्त्योरुपक्रमोपसंहारयोर्व्यतिरेकेणोपदेशात् । इति पा० ।
३ ब्रह्मसाक्षात्काररूपत्वेन इति पा० ।
४ प्रत्यक्षेणेश्वर—इति पा० ।
५ मता । रुक्माभं इति पा० ।
६—दिना चाप्यत्वादिना च ब्रह्मभावो जीवस्य न संभवति । ततो ब्रह्मोपासनं जीवस्य तद्भिन्नत्वेन हि युज्यत इति पूर्वं प्राप्तम् । अथोच्यते सिद्धान्तः इति पा० ।

च्छन्ति । उपासितुरर्थान्तरत्वेऽपि तानुपासितॄननुगृह्णाति स्वस्वरूपतया परं ब्रह्म । ते च पुनः स्वात्मतया ग्राहयन्ति परानपि शिष्यांस्तत्त्वमसीत्यादिना । निरतिशयदुःखात्मकनिखिलपाशसंबन्धोच्छेदो निरवधिकपरमानन्दमयनिष्कलङ्कशिवत्वप्राप्तिर्हि मुक्तिः । शिवत्वप्राप्तिरात्मनः[1] पशुत्वनिवृत्तिमन्तरेण न संभवति । पशुत्वनिवृत्तिश्च न तद्भावनां विना । अतो निरन्तरं शिवोऽहमिति भावनाप्रवाहेन शिथिलितपाशतयापगतपशुभाव उपासकः शिव एव भवति । निरस्तसमस्तदोषकलङ्कशङ्कं निरतिशयमङ्गलास्पदं हि शिवतत्त्वं, परं ब्रह्म च तादृगेव । तद्भावनयोपासकश्च तथैव भवति । अत एव तदन्यस्य मुमुक्षुध्येयत्वं निषिध्यते । "शिव एको ध्येयः शिवंकरः सर्वमन्यत् परित्यज्य"इत्यादिश्रुतिषु । निवृत्तब्राह्मणादिदेहाभिमानमयपशुभावस्य निरतियस्वरूपानन्दसाक्षिस्वप्रकाशशिवरूपपराहंभावापत्तिर्मुक्तिरिति सर्वश्रुतितात्पर्यात्[2] ॥ ३ ॥

ब्रह्मभावेनोपासनमुपासकस्य मुक्तिकरम्, अन्यथा संसारानिवृत्तिरिति विशेषमाह ॥

॥ न प्रतीके न हि सः ॥ ४ ॥

"मनो ब्रह्मेत्युपासीत" इत्यादिषु मनःप्रभृतिषु ब्रह्मोपासनमवगम्यते । तेष्वप्यात्मत्वेनो[3]पासनमुत भिन्नत्वेनेति संशये पूर्वपक्षः । "मनो[4] ब्रह्मेत्युपासीत" "आदित्यो ब्रह्मेत्युपासीत" इत्यादिना सिद्धेषु प्रतीकोपासनेषु ब्रह्मदृष्ट्या संस्तुतं मनःप्रभृतिकमुपास्यमवगम्यते । अतः प्रतीकमुपासकेन ब्रह्मात्मतया भावितमित्यात्मवदुपासने को विरोध इति प्राप्त उच्यते। नात्मग्रहणम्। प्रतीकेषु तेषु तेषु हि न परं ब्रह्मोपास्यम्। किंतु ब्रह्मदृष्ट्या मनःप्रभृतिकमुपास्यम्[5] । तत्र मनआदिविशिष्टस्य ब्रह्मण एवोपास्यत्वेऽपि मनआदेर्ब्रह्मगुणत्वाभावात् । विकारत्वेन तु तद्विविशिष्टे ब्रह्मणि नात्मग्रहणम् । किंतु सत्यसंकल्पत्वादिविशिष्टे । अन्यथा ह्यात्मनोऽपि विकारास्पदत्वं स्यात् । अतः प्रतीके नात्मग्रहणमुपासकानाम् । न तत्र परमेश्वरः साक्षादुपास्य इति ॥ ४ ॥

॥ ब्रह्मदृष्टिरुत्कर्षात् ॥ ५ ॥

प्रतीकोपासने मनआदित्यादिप्रतीके न कर्तव्या, उत ब्रह्मणि दृष्टिरिति संदेहे पूर्वः पक्षः[6] । "मनो ब्रह्मेत्युपासीत"

१ पशुत्वनिवृत्तिः शिवत्वप्राप्तिरिहोक्तं भवति । कथं, शिव—इति पा० ।
२—साक्षित्वप्रकाशः । शिवरूपपरमाहंभावापत्तिर्मुक्तिरिति तात्पर्याच्च इति पा० ।
३ तदिह पूर्वन्यायेन तेष्वपि तद्भावेनो—इति पा० ।
४—पासनमिति संशयः । किमुक्तं भवति । मनो इति पा० ।
५ तेषु न ब्रह्मदृष्ट्या मनःप्रभृतिकमुपास्यम् । इति पा० ।
६ उक्तं प्रतीकोपासनमभ्युदयफलम् । तदिह मनआदिके ब्रह्मदृष्टिरुपासकेन कर्तव्या, उत ब्रह्मणि तद्दृष्टिरिति संदिह्यते । तथा सति पूर्वमिदं प्राप्तं भवति । इति पा० ।

इत्यादिषु मनआदिदृष्टिं ब्रह्मणि कृत्वा ब्रह्मोपासनीयम् । तस्यैव फलदातृत्वात् । इत्येवं प्राप्त उच्यते । "विश्वाधिको रुद्र" इत्यादिषु ब्रह्मण उत्कृष्टत्वावगमात् तद्दृष्टिरेव निकृष्टेषु मनआदिषु कर्तव्या । लोके हि निकृष्टे भृत्यादौ राजदृष्टिं कृत्वा राजवत् तमुपासते, नतु भृत्यदृष्टिं कृत्वा राजानमुपासते केचिदपि । इदमेव च परमौचित्यम् । यदुत्कृष्टं वस्तु तदेव सर्वे नमन्ति । अतः[1] परं ब्रह्म सर्वोत्कृष्टतयैव सर्वनमस्कारविषयोऽवगम्यते । "ऋतं सत्यम्" इति मन्त्रैरुक्तं विशिष्टं यत् परं ब्रह्म[2], विश्वरूपाय तस्मा एव नमस्कारः । नान्यस्मै क्वचिदपीति । किंचास्य परब्रह्मण उत्कृष्टतयैव नमस्कारविषयत्वं लक्षणमुक्तम् । तथाहि, तैत्तिरीये श्रुतौ, "यस्मै नमस्तच्छिरोधर्मो मूर्धानं ब्रह्मोत्तरा हनुर्यज्ञोऽधरं विष्णुर्हृदयं संवत्सरः प्रजनम्" इत्यादिना शिशुमारात्मत्वनिरूपणे हृदयादिरूपेभ्यो विष्णवादिभ्यः पार्थक्येन सर्वोत्कृष्टत्वादेवास्य परब्रह्मणः शिवस्य प्रधानशिरोरूपत्वम् । 'यस्मै नमस्तच्छिर' इति नमस्कारविषयत्वेन लक्षणेनैवानूद्याभिहितम् । अवसाने च "त्वं भूतानामधिपतिरसि, त्वं भूतानां श्रेष्ठोऽसि" इत्यस्यैव सर्वभूतविषयमाधिपत्यं श्रेष्ठत्वं चोक्त्वा "नमस्ते नमः सर्वे ते नम" इति सकलभूतोत्कृष्टत्वात् सिद्धमखिलनमस्कारपर्यवसानभूमित्वमुक्तम् । सर्वत्र च "नमस्ते रुद्र मन्यव" इत्यादिषु सर्वोत्कृष्टतयैव पुनः पुनरस्मै नमः प्रयुज्यते । ऐश्वर्यादिना हि लोकेऽधिकं नमन्ति । ततः सर्वनमस्कारविषयतया सर्वोत्कृष्टमुमासहितं विरूपाक्षमीश्वरशब्दैकविषयभूतं परं ब्रह्म । अस्य सर्वोत्कृष्टस्य सर्वनमस्कार्यस्य व्याप्तिदृष्ट्या सर्वेषां मनआदित्यादीनां प्रतीकानामुपास्यत्वम् । अत एव "श्वभ्यः श्वपतिभ्यश्च वो नम" इत्यादिषु श्वादिष्वत्यन्तनिकृष्टेषु ब्रह्मव्याप्तिदृष्ट्या श्रुतिर्नमः प्रयुङ्क्ते । तस्मादुत्कृष्टसंबन्धान्निकृष्टेषूपचारदर्शनाद् विश्वाधिकब्रह्मदृष्ट्या मनःप्रभृतीनामुपास्यत्वं सिद्धम्[3] ॥ ५ ॥

॥ आदित्यादिमतयश्चाङ्ग उपपत्तेः ॥ ६ ॥

पूर्वत्र ब्रह्मण उत्कृत्वादादित्यादिषु तद्दृष्टिरुपासनेऽभिहिता । "य एवासौ तपति तमुद्गीथमुपासीत" इत्यादिषु कर्माङ्गोपासनेषूद्गीथादिदृष्टिरादित्यादिषु कार्या, उत विपर्यासेनैव । इति संशयः । किं तावत् प्राप्तम् । उद्गीथादीनामादित्यादीनां च कर्माङ्गत्वब्रह्मरूपत्वाविशेषादनियम इत्येवं प्राप्ते ब्रूमः ।

1 तथाहि इति पा० ।

2 'ऋतं सत्यं परं ब्रह्म पुरुषं कृष्णपिङ्गलम् । ऊर्ध्वरेतं विरूपाक्षं विश्वरूपाय वै नमः" ॥ वाङ्गर्षविपर्यासरहितं पुरि शयानं परशत्त्वमाशवलाकारतया कृष्णपिङ्गलं विरूपाक्षं त्रिलोचनमूर्ध्वज्वलनरेतसं परं ब्रह्म इति पा० ।

3 स्यादिति पा० ।

आदित्यादेः कर्माराध्यत्वेनोत्कृष्टत्वात् कर्माङ्ग उद्गीथादौ तद्दृष्टिः कार्या । तद्दृष्टिसंस्कृतस्योद्गीथादिकर्मणः फलातिशयसंभवात् । यत् खलु स्वतो वीर्यवत् क्रियमाणं च, तस्यैव विद्यया संस्कृतस्य वीर्यवत्तरत्वरूपफलातिशयो "यदेव विद्यया करोति तदेव वीर्यवत्तरं भवति" इति वाक्यादवगम्यते । एवं च ब्रह्मात्मत्वादिसाम्येऽप्युद्गीथादिक्रियाचोदनादुद्गीथादेः क्रियमाणत्वेन फलसाधनत्वात् तद्विपरीतसिद्धस्वभावादित्यादेस्तथा फलसाधनत्वादादित्यादिदृष्टिरुद्गीथादिष्वङ्गेष्विति निर्णयः ॥ ६ ॥

॥ आसीनः संभवात् ॥ ७ ॥

उपपादितमुपासनाव्यवस्थापनम्[1] । तदिहोपासनस्यासननियमोऽस्ति नवेति संशयः । तथा सति "क्वचिदप्यासीन उपासीत" इति नियमाश्रवणान्मानस[2]व्यापाररूपस्योपासनस्य सर्वावस्थायामपि संभवान्नास्त्यासननियम उपासकस्येति[3] पूर्वः पक्षः । सिद्धान्तस्तु, आसीन एव ब्रह्मोपासीत । तस्यैवैकाग्र्यसंभवात् । अस्ति चासननियमश्रुतिरपि ।

"विविक्तदेशे तु सुखासनस्थः
शुचिः समग्रीवशिरःशरीरः ।
अन्त्याश्रमस्थः सकलेन्द्रियाणि
निरुध्य भक्त्या स्वगुरुं प्रणम्य ॥
हृत्पुण्डरीकं विरजं विशुद्धं
विचिन्त्य मध्ये विशदं विशोकम् ।
अनन्तमव्यक्तमचिन्त्यरूपं[4]
शिवं प्रशान्तममृतं ब्रह्मयोनिम् ॥
तथादिमध्यान्तविहीनमेकं
विभुं चिदानन्दमरूपमद्भुतम् ।
उमासहायं परमेश्वरं प्रभुं
त्रिलोचनं नीलकण्ठं प्रशान्तम् ॥
ध्यात्वा मुनिर्गच्छति भूतयोनिं
समस्तसाक्षिं तमसः परस्तात्" ।

इति कैवल्योपनिषदि । अत आसीन एव ब्रह्मोपासीतेति ॥ ७ ॥

॥ ध्यानाच्च ॥ ८ ॥

"ध्यात्वा मुनिर्गच्छति भूतयोनिम्", ।

1–दित उपासनव्यवस्थामार्गः ।

2–णाच्चित्त–इति पा० ।

3–वादतीव विरोधाभावादनियम एवोपासकस्येति इति पा० ।

4 अचिन्त्यमव्यक्तमनन्तरूपं इति पा० ।

"कारणं तु ध्येयः सर्वैश्वर्यसंपन्नः सर्वेश्वरः शंभुराकाशमध्ये," "ध्याननिर्मथनादेव," इत्यादिश्रुतौ पाशविच्छेदकारणस्योपासनस्य ध्यानरूपत्वावगमात्। ध्यायतेश्च 'ध्यायति बको, 'ध्यायति प्रोषितं बन्धुः, इत्यादौ च प्रशिथिलाङ्गचेष्टेषु प्रतिष्ठितदृष्टिष्वेकविषयाक्षिप्तचित्तेषु व्यवहारात्। विजातीयप्रत्ययान्तराव्यवहिते तैलधारावदविच्छिन्नस्मृतिसंतानरूपध्याने चित्तैकाग्र्यावश्यंभावाच्च ध्यानसिद्ध्येऽवश्यमासननियम आदर्तव्यः[1] ॥ ८ ॥

॥ अचलत्वं चापेक्ष्य ॥ ९ ॥

पृथिव्यादीनामचलत्वमपेक्ष्य 'ध्यायतीव पृथिवी ध्यायतीवान्तरिक्षम्' इत्यादिप्रयोगाच्चासीन एवोपासीत। ध्यानसंततिर्हि पृथिव्यादिवदचलत्वेनासीनस्यैव संभवति ॥ ९ ॥

॥ स्मरन्ति च ॥ १० ॥

"शुचौ देशे प्रतिष्ठाप्य स्थिरमासनमात्मनः।
नात्युच्छ्रितं नातिनीचं चैलाजिनकुशोत्तरम् ॥
तत्रैकाग्रं मनः कृत्वा यतचित्तेन्द्रियक्रियः।
उपविश्यासने युञ्ज्याद् योगमात्मविशुद्धये" ॥

इत्युपासकानामासननियमादिस्मरणाच्चासीन एव ब्रह्मोपासीतेति सिद्धम् ॥ १० ॥

॥ यत्रैकाग्रता तत्राविशेषात् ॥ ११ ॥

उक्त उपासकस्यासननियमः। तद्वद्धि देशकालनियमोऽस्ति न वेति संदेहे सत्यस्तीति युज्यते। यथा "चोदिते कर्मणि ब्रह्मयज्ञेन यक्ष्यमाणः प्राच्यां दिशि" इति दिङ्नियमः। "प्राचीनप्रवणे वैश्वदेवेन यजेत" इति देशनियमः। "अपराह्णे पिण्डपितृयज्ञेन चरन्ति" इति कालनियमः। तथात्रापि चोदितत्वाविशेषादुपासने दिगादिनियमो युक्त इति पूर्वः पक्षः[2]। सिद्धान्तस्तु, उपासने नास्ति दिगादिनियमः। ऐकाग्र्यं हि ध्यानस्य प्रधानसाधनम्। नहि तत्र दिगाद्यपेक्षा। यत्र रागद्वेषादिकालुष्यहेतुर्नास्ति, तत्र हि मनस ऐकाग्र्यं भवति, तावदेवापेक्षणीयम्। "विविक्तदेशे[3] तु सुखासनस्थ" इति श्रवणात्। "अनन्तं शिवसंनिधौ" इत्यादिकं जपादिविषयम्[4]। तत्राप्यैकाग्र्यं यदि मुख्यतमं भवति। तस्मादैकाग्र्यमात्रसाधनकस्य ध्यानरूपोपासनस्य न दिग्देशकालनियमः ॥ ११ ॥

॥ आ प्रायणात् तत्रापि हि दृष्टम् ॥ १२ ॥

१–मध्ये" आत्मानमरणिं कृत्वा प्रणवं चोत्तरारणिम्। ध्याननिर्मथनाभ्यासात् पाशं दहति पण्डितः ॥ इत्यादिश्रुतेः पाशविच्छेदकारणस्योपासनस्य ध्यानरूपत्वाद् ध्यानसिद्धये चासननियमः ॥ ८ ॥ इत्येव पा०।

२–मः प्राप्त इति पूर्ववादः इति पा०।

३–तिसामान्येन विविक्तदेशे इति पा०।

४ इत्यादिकस्य जपादि कर्म विषयो न ध्यानमात्रं विषयः इति पा०।

पूर्वत्र ब्रह्मोपासनायां दिगादिनियमाभाव उक्तः[1]। इह पुनस्तस्योपसंहारोऽस्ति न वेति विचारे यावदिच्छा, तावदुपासना कर्तव्या। अन्यथा तदुपसंहारः। इति पूर्वपक्षे प्राप्ते सिद्धान्तः। आ प्रायणादहरहरुपासना कार्या। न कदाचिदपि तदुपसंहारः। "अहरहर्वा एवंवित् स्वर्गं लोकमेति, स खल्वेवं वर्तयन् यावदायुषं[2] ब्रह्मलोकमभिसंपद्यत" इत्यादावाप्रायणादुपासनश्रवणात्। स्वस्य ब्रह्मस्वरूपत्वापादिन्या ब्रह्मभावनाया मध्ये विच्छेदो न कार्यः[3]। स्वात्मतया नैरन्तर्येण ब्रह्मणि भाविते हि ब्रह्म तद्रूपमुपासकेषु प्रकाशते। अतः सर्वज्ञं नित्यतृप्तं स्वयंप्रकाशं स्वतन्त्रमलुप्तशक्तिकमनन्तशक्तिकं परं ब्रह्म नैरन्तर्येण भावनीयं तत्स्वरूपप्रकाशायेति। तथा श्रूयते। ब्रह्मस्वरूपमुपासकेषु प्रकाशत इति। "या ते रुद्र शिवा तनूरघोरापापकाशिनी तया नस्तन्वा शंतमया गिरिशंताभिचाकशीहि" इति। अनादिमलकर्मवासनारूढदेवादिशरीराभिमानप्रवाहसिद्धामध्यात्मिकादिभेदभिन्नामसह्यां संसाररुजं द्रावयत्युपासकानामिति रुद्र इत्युच्यते परं ब्रह्म शिवः। तस्यामन्त्रणं रुद्रेति। हे रुद्र परमेश्वर या ते तनूर्मूर्तिः शिवा नित्यसिद्धापहतपाप्मादित्वेन परमविशुद्धा परममङ्गलमयी परममङ्गलप्रदाघोरा, शिवत्वयोगेनैव सर्वहृदयंगमापापकाशिनी, पापग्रहणस्योपलक्षणत्वाज्ज्ञानाग्निदग्धनिखिलपुण्यपापा, इहापापा इत्युच्यते। मुक्तात्मनस्तेषु प्रकाशमानत्वादपापकाशिनी, ईदृशी या ते तनूः, तया शंतमया स एको ब्रह्मण आनन्द इत्यादिश्रुतिसिद्धनिरतिशयानन्दलक्षणया तन्वा नोऽस्माकमपि संसारनिमित्तं पुण्यपापसंचयमपनीय स्वरूपतया साक्षादतीव[4] प्रकाशस्वेति प्रार्थनेयमुपासकानाम्। अत उपासकानामात्मनि ब्रह्मस्वरूपस्य प्रकाशदर्शनात् तत्प्रकाशकारणभूता ब्रह्मभावना नैरन्तर्येण यावदायुषं कर्तव्या। न कदाचिदपि विच्छेद्येति ॥ १२ ॥

॥ तदधिगम उत्तरपूर्वाघयोरश्लेषविनाशौ तद्व्यपदेशात् ॥ १३ ॥

पूर्वत्र प्रकर्षेणापापानामुपासकानामात्मनि[5] ब्रह्मस्वरूपं प्रकाशत इति सोपपत्तिकमुपपादितम्। तदिहोपासकस्य पापक्षयोऽस्ति न वेति संशयः। किं तावत् प्राप्तम्। उपासकानामपि भोगमन्तरेण पापक्षयो न भवति। "नाभुक्तं क्षीयते कर्म कल्पकोटिशतैरपि" इति वचनाद्, भोगाय शरीरापत्तौ

१ पूर्वत्र ब्रह्मोपासनस्य देशकालाद्यविशेषत्वमुक्तम् इति पा०।

२–वंविद् या–इति पा०।

३ न युक्त एव इति पा०।

४–क्षात्कृत्यातीव इति पा० ॥

५ प्रक्षीणपा–इति पा०।

पुनरपि कर्मोपत्तिरिति न मोक्षावसर, इत्येवं प्राप्ते ब्रूमः । क्षीयते पापं कर्मोपासकानामिति । कथम् । उपासने प्रारब्धे तत्सामर्थ्यादेव पूर्वकृताघनाशः । उत्तराघाश्लेषश्च भवति । तथाहि व्यपदिश्यते, 'तद्यथेषीकातूलमग्नौ प्रोतं प्रदूयते । एवं ह्यस्य सर्वे पाप्मानः प्रदूयन्ते । यथा पुष्करपलाश आपो न श्लिष्यन्ते । एवमेवंविदि पापं कर्म न श्लिष्यत' इति । तस्मादुपासकानां पूर्वोत्तराघयोरश्लेषविनाशौ भवत एव । यदुक्तम्[1] । "नाभुक्तं क्षीयत" इति । तस्याज्ञानिविषयत्वादविरोधः ॥ १३ ॥

॥ इतरस्याप्येवमसंश्लेषः पाते तु ॥ १४ ॥

विदुषः पापलेपो न भवतीति निरूपितम् । इह तद्विरोधिपुण्यलेपोऽस्ति न वेति विचारः । किं प्राप्तम् । विद्याविरोधिनः पापस्य क्षयो युक्तः । नतु पुण्यस्य । तस्य विद्याङ्गत्वेनानुवृत्त्यौचित्यात् । इत्येवं प्राप्ते निरूप्यते । विदुषः पुण्यस्यापि मोक्षविरोधित्वेनानिष्टफलत्वसाम्यादश्लेषविनाशौ[2] । विद्यानुगुणस्यारोग्यादिफलस्य पुण्यस्य शरीरपाते लयः । विद्याङ्गकर्मणस्तु काम्यफलादिसंबन्धाभावाच्च[3] श्लेषः । अतो विदुषः पुण्यलेशोऽपि नास्तीति निर्णयः ॥ १४ ॥

॥ अनारब्धकार्ये एव तु पूर्वे तदवधेः ॥ १५ ॥

पूर्वत्र विदुषः पुण्यपापयोरुत्तरपूर्वयोरश्लेषविनाशौ निरूपितौ । इह प्रारब्धकार्ययोस्तयोः स्थितिरस्ति न वेति संशयः । "सर्वे पाप्मानः प्रदूयन्त" इत्यविशेषेण श्रवणाद् विद्याधिकृतेः पूर्वत्वाविशेषेण तयोरपि विनाश इति प्राप्त उच्यते[4] । विद्याधिकृतेः पूर्वकृते पुण्यपापे फलदानायाप्रवृत्ते एव विनश्यतः । "तस्य तावदेव चिरं यावन्न विमोक्ष्ये अथ संपत्स्य" इति शरीरपातावधिः श्रूयते । अतः प्रारब्धयोर्न विलयः[5] ॥ १५ ॥

॥ अग्निहोत्रादि तु तत्कार्यायैव तद्दर्शनात् ॥ १६ ॥

पूर्वत्र विदुषः पुण्यपापाश्लेषविनाशौ निरूपितौ । यावदायुषमुपासनावृत्तिरप्युपपादिता । तस्येह पुनरग्निहोत्राद्यनुष्ठानमपि यावच्छरीरपातमनुवर्तते, उत मध्ये विच्छिद्यत इति विचारः । किं प्राप्तम् । अग्निहोत्रादिकमाप्रायणं[6] नानुष्ठेयम् । क्रियमाणेऽपि विनाशाभ्युपगमात् । अप्रयोजने कस्य मनः प्रवर्तते । इत्येवं[7] प्राप्ते ब्रूमः । अग्निहोत्रादिकमाप्रायणमनुष्ठेयं विद्याकार्यायैव । तथा हि दृश्यते । "तमेवं वेदानुवचनेन ब्राह्मणा विविदिषन्ति, यज्ञेन दानेन तपसानाशकेन" इत्यादि । अत्र वेदानुवचनं वेदाभ्यासः । परमेश्वरप्राप्तिसाधनपरमज्ञानहेतूनामध्यात्मवादिनां वेदमन्त्राणां जपावृत्तिः । "तथा जाबालोपनिषदि । "अथ हैनं ब्रह्मचारिण ऊचुः, भगवन् किं जप्येनामृतत्वं ब्रूहि" इति "स होवाच याज्ञवल्क्यः शतरुद्रीयेण" इति "एतानि ह वा अमृतस्य नामधेयानि एतैर्ह वा अमृतो भवति" इति कैवल्योपनिषदि । "यः शतरुद्रीयं ब्राह्मणो नित्यमधीते, सोऽग्निपूतो भवति, स वायुपूतो भवति, सुरापानात् पूतो भवति, ब्रह्महत्यायाः पूतो भवति, अत्याश्रमी, सर्वदा सकृद्वा जपेत्, परमं[2] ज्ञानमाप्नोति, संसारार्णवनाशनम्" इति । इह शतरुद्रीयसंज्ञानां ब्रह्मबोधकानां मन्त्राणामभ्यासात् संसारनाशनस्य परमज्ञानस्य प्राप्तिः, तद्विरोधिपापक्षयश्चावगम्यते । "एतानि ह वा अमृतस्य नामधेयानि" इत्यमृतस्यानादिमुक्तस्य शिवस्य नामधेयत्वाद्वेतोः शतरुद्रीयजपात् सकलपापक्षयादिप्रतिपादनात् परमेश्वरस्य शिवादिनामधेयानामभ्यासोऽपि विद्याविरोधिसकलपापक्षयहेतुरवगम्यते[3] । तथैव मुण्डकोपनिषदि श्रूयते । "अपिवा यश्चाण्डलः शिव इति वाचं वदेत्[4] तेन सह संवदेत्, तेन सह संवसेत्, तेन सह भुञ्जीत" इति । अत्र हि शिवशब्दस्य ब्रह्मबोधकस्य समुच्चारणमात्रेणात्यन्ताविशुद्धस्य[5] पातकिनः परमविशुद्धिप्राप्तिरवगम्यत इति । अन्यत्र च, "योऽथर्वशिरसं[6] ब्राह्मणो नित्यमधीत" इत्यारभ्य तदभ्यासिनः सकलपापक्षयमुक्त्वा सकृज्जप्त्वा शुचिः पूतः कर्मण्यो[7] भवति, द्वितीयं जप्त्वा गाणपत्यमाप्नोति, तृतीयं जप्त्वा देवमेवानुप्रविशति" । इति मोक्षफलं प्रतिपाद्यते[8] ।

"आत्मानमरणिं कृत्वा प्रणवं चोत्तरारणिम्" ।

इत्यादिषु च प्रणवाद्यभ्यासस्य पाशविच्छेदहेतुत्वमुच्यते । एवमन्यत्रापि द्रष्टव्यम् । अतः परमेश्वरपराणां वेदमन्त्राणां पापक्षयद्वारा परमज्ञानहेतुत्वेन मोक्षसाधनत्वावगमात् तदभ्यासः कर्तव्यो विद्यावतापि यावज्जीवम् । एवमग्निहोत्रादी-

१ अतो ह्युपासकस्य पूर्वोत्तराघयोर्निःश्लेषविनाश एव भवति । तदुक्तम् इति पा० ।

२–दश्लेषविनाशः । इति पा० ।

३–णोऽपि फलाभिसंध्यभावाच्च इति पा० ।

४–यः । तथा सति विद्याधिकृतेः पूर्वारब्धयोरपि विनाश इति प्राप्त उच्यते सिद्धान्तः । इति पा० ।

५–धिश्रुतेः । अतोऽप्रारब्धयोर्विलय एव इति पा० ।

६–त्रादि यत् कर्म तदपि विदुषः प्राणान्तिकं ना–इति पा० ।

७ अतो नानुष्ठेयं नियमेनेति इति पा० ।

१–माप्राणान्तिकं विदुषानु–इति पा० ।

२ अनेन इति पा० ।

३–नात् सर्वार्थसाधनता प्रतीयते । अतः परमेश्वरस्य नामधेयानामभ्यासेऽपि सकलपापक्षयः । इति पा० ।

४ वदेत् सह वाचं वदेत्, इति पा०

५–णापि इति पा० ।

६–शिरो ब्रा–इति पा० ।

७ कर्मणां इति पा० ।

८ इति देवानुप्रवेशरूपमोक्षप्राप्तिरवगम्यते । "त्रिसूपर्णं पठन्ति ते सोमं प्राप्नुवन्ति" इति सोमस्योमासहितस्य ब्रह्मणः प्राप्तिरवगम्यते इति पा० ।

नामपि यज्ञानां परमेश्वरसमर्पितफलानां तदाज्ञासिद्धत्वात् तदाराधनरूपत्वाच्चाभ्यासः कार्यः। एवं दानादीनामपि[1]। तस्माद्विदुषापि विद्यानिष्पत्तिकार्यायाग्निहोत्रादिकमनुष्ठेयमिति। कर्म तपोजपध्यानज्ञानरूपम्। ईश्वरोपासनं कर्माग्निहोत्रादिकम्। तपो नियमः, कायशोषणं वा। जपः पूर्वोक्तप्रणवाद्यभ्यासः। एतेषां पापशोषणद्वारा मोक्षहेतुत्वम्। ज्ञानध्यानयोस्तु साक्षाद् ब्रह्मस्वरूपापत्तिहेतुत्वम्। अतः सर्वेषामेषामनुष्ठानं कार्यम्[2] ॥ १६ ॥

ननु यद्यग्निहोत्रादिसाधुकृत्या विद्योत्पत्त्यर्था। तदन्या च पूर्वकृतासाधुकृत्या विद्याप्रारम्भे सति विनष्टा। तर्हि सुहृदः "साधुकृत्याम्" इत्यस्य को विषय इत्याशङ्क्याह ॥

॥ अतोऽन्यापि ह्येकेषामुभयोः ॥ १७ ॥

"तस्य सुहृदः साधुकृत्याम्, द्विषन्तः पापकृत्याम्", इत्येकेषां शाट्यायनशाखिनां वचनस्य विद्यानिष्पत्त्यर्थाग्निहोत्रादिसाधुकृत्याया अन्याप्यनादिकालप्रवृत्ता साधुकृत्या प्रबलकर्मान्तरप्रतिबद्धफला विद्यानुगुणा, आरोग्यचित्तशुद्ध्यादिजननयोग्यतया विद्यानुगुणफलत्वाद् विद्ययाप्यविनष्टपूर्वोत्तरयो[3]रुभयोरपि कर्मणोरप्यस्त्येव विषयः ॥ १७ ॥

॥ यदेव विद्ययेति हि ॥ १८ ॥

"यदेव विद्यया करोति" इत्यत्र कर्मफलाप्रतिबन्धस्योद्गीथविद्याफलत्वोक्त्या प्रबलकर्मान्तरेणाकर्मणां फलप्रतिबन्धसद्भावो[4]ऽवगम्यते। अतो विद्यानुगुणकर्मणां फलप्रतिबन्धोच्छेदायाप्यग्निहोत्रादिकमनुष्ठेयमिति भावः ॥ १८ ॥

॥ भोगेन त्वितरे क्षपयित्वा संपद्यते ॥ १९ ॥

इह विद्यावतामधिकारपदे स्थितानां तद्व्यतिरेकेण मुक्तिफलमस्ति न वेति चिन्तायां[5] प्रारब्धभोगाय बहुजन्मस्वीकारे पूर्वविद्यायां लुप्तायां यत् कर्म क्रियते, तदपि फलभोगहेतुर्भवति। अतो जन्मपरंपरायाः संभवान्न तेषां[6] मुक्तिरिति प्राप्ते ब्रूमः। प्रारब्धकर्मणः स्वफलभोगायत्तत्वमात्रेण पूर्वार्जितविद्यालोपहेतुः। अतस्तेषां[7]. मुक्तिरेव। न जन्मपरंपरा। कारणाभावात्। सुषुप्तिव्यवधानवज्जन्ममरणव्यधानं न तेषां विद्यालोपहेतुरिति ॥ १९ ॥

इति श्रीकण्ठशिवाचार्यविरचिते ब्रह्ममीमांसाभाष्ये चतुर्थस्याध्यायस्य प्रथमः पादः ॥ १ ॥ :: :: ॥

---

१ शमादीनामपि दाना—इति पा०।
२—ष्ठाने विरोधाभावः इति पा०।
३ प्रतिबन्धबलात् तद्विद्याननुगुणबलप्रतिबद्धा चेति पूर्वा—इति पा०।
४—त्यत्र फलप्रतिबन्धोऽस्तीत्य—इति पा०।
५—यामिदं प्राप्तं भवति इति पा०।
६—त् कथं तेषां इति पा०।
७—हेतुत्वात् तत्फलस्य भोगावसाने तेषां इति वरपा०।

THE VIDVAN-MANO-RANJINI

OR

REJOICER OF THE MIND OF THE LEARNED,

A COMMENTARY ON SAD-ÁNANDA'S VEDÁNTA-SÁRA, BY RÁMA-TÍRTHA.

(Continued from page 212.)

These two [the thread-soul and the luminous soul then by subtile modifications of the internal organ, experience the subtile objects.] Then means in the dreaming state. These two experience the subtile objects which consist of plantasmata, the relics of waking presentations, somewhat indistinct, by means of those modifications which are produced by representations belonging to the internal organ, vitiated by sleep and other defects, and assisted by particular impressions resuscitated by requitative efficacy, which modifications have as their form the objects displayed by the power of illusion in the intelligence associated with such an internal organ. Nor is dreaming a case of reminiscence, for it reveals that which has never been presented. Nor is it a presentation or perception, for there is neither authority nor evidence to this effect. Nor is it dormant unconsciousness, for there is a distinct experience of objects. Nor is it identical with the waking consciousness, for the place, time, and requisites of such are impossible. And thus it is that the Veda declares in the text beginning As a hair split into a thousand parts, where it compares the arteries to the thousand parts of a hair, and in the text This comes through these, that to dream the internal organ must pass through such arteries. One then who beholds a dream in these subtile arteries, has no suitable place to enter rivers, seas, forests, or mountains, that he should behold in those arteries rivers and the like. But if it be argued that according to the Vedic text Walking immortal outside the body, the mind beholds the objects of its dreams externally; we reply that this is not so, for the word outside is employed to designate the mere experience of the connection with

---

अस्यैवेत्यादिना। स्थूलप्रपञ्चो विराट्विज्ञानमयादिकोशत्रयंलिङ्गशरीरं सूक्ष्मशरीरमिति सम्बन्धः मध्यप्रदीपन्यायेनोत्तरत्रापि जाग्रद्वासनेत्यत्र कोशत्रयपदं सम्बध्यते वासनामयत्वञ्चास्य श्रुतिराह तस्य हैतस्य पुरुषस्य रूपं यथा महारजनं वासोयथापाण्डवाविकमित्यादिना सकृद्विधूतमित्यन्तेन। स्वप्नत्वं चास्य अव्याकृतविराजोः सन्ध्यस्थानत्वादुपपन्नं सन्ध्यं तृतीयं स्वप्नस्थानमिति श्रुतेरविशेषात्। यतोवासनामयोऽतएवेति योजना। अस्य लोकस्य सर्व्वावयवतोमात्रामुपादाय स्वयं हि प्रहृत्येत्याद्या स्वप्नेन शरीरमभिप्रहृत्येत्याद्या च श्रुतिः स्थूलशरीरस्य स्वप्ने लयं दर्शयन्ती समष्टेर्महाप्रपञ्चस्यापिसन्धौ तं सूचयति। एवं समष्टिलिङ्गतदुपहितचैतन्ययोर्व्यपदेशानुक्त्वा व्यष्टिलिङ्गतदुपहितचैतन्ययोरपि तानाह ॥

एतदिति। तैजसव्यपदेशत्वे हेतुमाह ॥

तेजोमयेति। तेजोमयत्वं स्वयं निर्म्माय स्वेन भासेति श्रुतौ भाः शब्देन अन्तःकरणस्य वासनात्मनोव्याख्यातत्वात् अस्यापीति स्पष्टार्थः योवैप्राणः सवायुरिति श्रुतेः समष्टिव्यष्टिलिङ्गयोस्तदवस्थयोरपिसन्ध्ययोरभेदं सिद्धवत्कृत्य तत्र तैजससूत्रयोर्भोगविशेषं निर्दिशति ॥

the gross body; otherwise [if the soul when dreaming actually left the body] it could not regularly wake up in the same body. And thus it is that another text declares that the awakening takes place in the same body which was the locus of the dream, even when a man returns from another place seen in his dream, in the words: I as I slept in the country of the Kurus, wafted by sleep, visited in a dream the country of Pañchâla, and there awoke. There cannot, then, be there the place appropriate to the waking state. Nor can there be appropriate time; for when dreaming one may experience in a short space of time hundreds of years. Nor is the appropriate requisite or occasion possible; for a house, for instance, may be seen to be built without carpenter, wood, earth, and the like. After showing that the things present in the waking state are absent in dreaming, the text shows, that new phantastic objects are created, in the words There there are no chariots, no chariot-horses, no roads, then he creates chariots, chariot-horses, and roads. It is to be understood, therefore, that dreams consists of illusion So the aphorism: It is merely illusion, the real nature being altogether unmanifested.

The author cites authority in the aforesaid matter.

The enjoyer of the subtile &c. The words *et cætera* imply the addition of such texts as This becomes the more discriminate percipient. The meaning of the words Here also, is plain. The author here concludes the treatment of the world of subtile body.

एताविति । तदानीं स्वाप्नावस्थायां निद्रादिदोषदूषितस्यादृष्टादिसमुद्बोधितसंस्कारविशेषसचिवस्यान्तःकरणस्य याः संस्कारानुरूपाः वृत्तयः तादृगन्तःकरणसंसृष्टचैतन्यस्याविद्याशक्तिविजृम्भितविषयाकारास्ताभिःसूक्ष्मविषयान् जाग्रद्वासनामयानीषदस्फुटाननुभवतइत्यर्थः । नच स्वप्नः स्मृतिरपरोक्षावभासित्वात् । नापि प्रत्यक्षं प्रमाणसंप्रयोगाद्यभावात् नच सुषुप्तिः स्पष्टं विषयानुभवात् नापि जागरितं तदुचितदेशकालनिमित्तानामसम्भवात् । तथाहि यथा केशः सहस्रधाभिन्नइत्यादिना केशसहस्रांशैर्नाडीरूपमीय एताभिर्व्वा एतदास्रवतीति स्वप्नाय तादृशनाडीप्रवेशं दर्शयति श्रुतिः तथाच अतिसूक्ष्मासु नाडीषु स्वप्नं पश्यतो न नदीसमुद्रवनगिरिनिवेशोचितोदेशोऽस्ति येन तत्र स्थिताचक्ष्यादीन् पश्येत् । ननु बहिः कुलायादमृतश्चरित्वेति श्रुतेर्व्वहिरेव स्वप्नान् पश्यतीति चेन्न तत्र बहिःशब्देन स्थूलशरीरोपरागानुभवमात्रस्य विवक्षितत्वात् अन्यथा तस्मिन्नेव शरीरे नियमेन पुनर्जागरणानुपपत्तेः । तथाच श्रुत्यन्तरं कुरुष्वहमद्यशयानोनिद्राभिप्लुतः स्वप्ने पाञ्चालानधिगतश्चास्मिन् प्रतिबुद्धश्चेति स्वप्नप्रदेशान्तरात् पुनरागमनसहितस्यापि स्वप्नदेशस्थशरीरे जागरणं दर्शयति अतो न तत्र जाग्रदुचितोदेशः । नापि कालः समुचितः सम्भवति मुहूर्त्तमात्रेऽपि सम्वत्सरशतानामनुभवात । नाप्युचितं निमित्तं तत्र सम्भवति तक्षदारुमृदाद्यभावेऽप्यकस्मादेवप्रासादादेर्निष्पत्तिदर्शनात् जाग्रदवस्थासम्पन्नानां वस्तूनां स्वप्नेऽभावं दर्शयित्वा नूतनानां वासनात्मकानां निर्म्माणं दर्शयति न तत्र रथा न रथ योगान पन्थानोभवन्त्यथरथान् रथयोगान् पथः सृजतइत्यादिना तस्मान्मायामयएव स्वप्नइतिद्रष्टव्यं तथाच न्यायः । मायामात्रन्तु कार्त्स्न्येनानभिव्यक्तस्वरूपत्वादिति । उक्तेऽर्थे प्रमाणमाह ॥

प्रविविक्तभुगिति । आदिशब्दादेष प्रविविक्ताहारतरइव भवतीत्यादिश्रुत्यन्तरग्रहः । अत्रापीति स्पष्टार्थः सूक्ष्मशरीरप्रपञ्चमुपसंहरति ॥

Thus [*is the production of the subtile body.*] The author treats in detail of the gross elements mentioned above.

The gross elements [*are quintupled.*] Quintuplication is the assumption of a gross nature by the aforementioned elements when compounded in various proportions dependent on efficient causes such as the proximity of God presupposing the merit and demerit of souls with merit, and on these elements. The author, therefore, proceeds to say:

But quintuplication: [*having divided each of the five elements, ether &c., into two equal parts; having next divided severally into four equal parts the first five portions of those ten portions; the uniting of those four portions after having abandoned the second portion of the bipartite division, with the other portions of the other elements,—this is what is called the making one to possess the various qualities of the five, i. e. quintuplication.*] The author proceeds to anticipate the objection: Why is this quintuplication described in such proportions, there being no evidence thereof.

[*The doubt is not to be entertained that there is no proof*] *of this* [*because the text declaratory of triplication indicates the quintuplication.*] The text declaratory of triplication is: This same deity desired, So I enter-

---

एवमिति । पूर्व्वत्र प्रतिज्ञातानि स्थूलभूतानि प्रपञ्चयति ॥

स्थूलेति । पूर्व्वोक्तानामेव भूतानां परस्परं व्यवहर्तृप्राणिनिकायव्यवहारनिर्व्वाहकतदीयधर्म्माधर्म्मापेक्षपरमेश्वरसान्निध्यादिनिमित्तापेक्षया विभागेन मिलितानां स्थूलतापत्तिः पञ्चीकरणमित्याह ॥

पञ्चीकरणन्त्विति । ननु कथमित्थं विभागेन पञ्चीकरणं निरूप्यते तत्र प्रमाणाभावादित्याशङ्क्याह ॥

अस्येति । सेयं देवतैक्षत हन्ताहमिमास्तिस्रोदेवता अनेन जीवेनात्मनानुप्रविश्य नामरूपे व्याकरवाणि तासां त्रिवृतं त्रिवृतमेकैकां करवाणीति इक्षित्वा सा सदाख्या परमात्मादेवता सृष्टानां तिसृणां देवतानां तेजोवन्नात्मिकानां मध्ये एकैकां देवतां त्रिवृतं त्रिरूपां त्रिरूपामकरोत् कृतवतीति त्रिवृत्करणश्रुतिः सा पञ्चीकरणमप्युपलक्षयति आक्षिपतीत्यर्थः. त्रिवृत्करणं नाम तेजोवन्नानां त्रयाणां मध्ये एकैकं द्विधासमं विभज्य पुनरेकैकभागस्य द्विधा विभागं कृत्वा स्वंस्वं द्वितीयं स्थूलभागं परित्यज्यान्यदीयस्थूलभागयोरेकैकस्य भागस्य संयोजनं । अत्र केचित्प्रगल्भन्ते संप्रदायाध्वना पञ्चीकरणं यद्यपि स्थितं तथापि युक्तिबुद्धत्वाद्वाचस्पतिमतं शुभमित्यादिना तत्र युक्तिञ्चेत्थमाचक्षते । गगनपवनयोः किल पृथिव्याद्यात्मकत्वे रूपवत्त्वमहत्त्वाभ्यां चाक्षुषत्वं तयोः प्रसज्येतेति । तत्र त्रिवृत्करणपक्षेऽपि तेजसःपृथिव्याद्यात्मत्वे कठिनत्वद्रवत्वाभ्यां विशिष्टतयोपलम्भप्रसङ्गइति दोषसाम्ये शङ्किते । अर्द्धभूयस्त्वान्नदोषइति परिहारस्य पञ्चीकरणपक्षेऽपि समानत्वेन दूषणोद्धारस्य । व्यवहारमार्गप्राप्तपञ्चीकृतिर्मुधा पञ्चीकरणस्य कुत्राप्यश्रवणादिति । तत्रेदं वक्तव्यं किं पञ्चीकरणस्य व्यवहारमार्गसिद्धत्वादप्रामाण्यं किम्वाऽश्रुतत्वादाहोस्वित्त्रिवृत्करणश्रुतिविरोधाद्वेति । आद्ये अष्टकाकरणादीनां शिष्टव्यवहाराणामप्रामाणिकत्वापत्तिः । द्वितीयेऽपि किं साक्षात्श्रवणाभावोहेतु रुत श्रुतार्थापत्त्यभावोऽपि नाद्यः साक्षादश्रुतस्य प्रत्याख्याने परमापूर्व्वादीनामपि प्रत्याख्यानप्रसङ्गात् । न द्वितीयः श्रुतार्थापत्तेर्विद्यमानत्वात् तथाहि छान्दोग्ये तेजः प्रभृतीनां त्रयाणां सृष्टिश्रुतौ तावत् श्रुत्यन्तरप्रसिद्धाकाशवायुसृष्टेरप्युपसंहरणीयत्वं वियदधिकरणे तेजोधिकरणे च निर्द्धारितं एकविज्ञानेन सर्व्वविज्ञानप्रतिज्ञाहान्यादिभिर्हेतुभिः । तथाच श्रुत्यन्तरैकवाक्यतया पञ्चानां भूतानां

ing with this individuated soul these three deities, would fain manifest name and form; of those three deities fain would I make each threefold; desiring thus that deity, the supreme soul, styled entity, made each of these three create deities, light, water, earth, threefold. This text indicates or implies quintuplication. Triplication means the division of each of the three, light, water, and earth, into two equal parts, the subdivision of one of each halves into two equal parts, the abandonment of each undivided half, and the combination of each quarter with the other kind of half. On this point some presume to say that though according to ancient custom quintuplication is posited, the doctrine of Vṛihaspati is better, being confirmed by reasoning. This reasoning they give as follows:—Were ether and air partly composed of earth &c., it would follow that being coloured and extended they would be visible. We reply that according to such an objection it will follow even in the doctrine of triplication that light being partly composed of earth and water, must be cognised as characterised by hardness and fluidity. Thus the objection would apply to triplication as well as to quintuplication. If our opponent rejoin that the predominance of the half obviates the objection, we reply that this obviation applies equally to the doctrine of quintuplication, as relieving both difficulties alike.

Again it may be objected that the quintuplication grounded on merely practical apprehension is null, such quintuplication being nowhere revealed. To this we may rejoin: Do you mean that quintuplication is unauthenticated, because it is evident by mere practical apprehension; or is it unauthenticated because it is nowhere revealed; or because it is repugnant to the revelation of triplication? On the first alternative, we continue, the observance of divine and obsequial rites and other practices of the righteous, will become unauthenticated. On the second alternative, we ask again whether the want of direct revelation is your plea, or the want of a disjunctive inference from revelation. The former plea will not hold good, for if you reject what is not directly revealed, you will have to reject the supreme requitative efficacy; nor will the second, for there does exist a disjunctive inference from revelation, *e. g.* in the Chhândogya Upanishad it is determined in the text describing the creation of light, water, and earth, that the creation of ether and air well known from other texts, is implicated. This is determined in the section on ether and in the section on light, on such grounds as that otherwise by the cognition of one there could be no examination of the cognition of all. Moreover, if the text concerning the creation of the five elements, in conformity with the other text, and which declares the triplication in order to explain the practical apprehension of these which are in themselves too subtile to be practically apprehended;—if this text does not imply a quintuplication, then as air and ether will remain insusceptible of practical apprehension through their subtile nature, what is there to hinder the inutility of the text declaratory of triplication as an explanation of the practical apprehension of the created elements? Nor can you reply that there is no such practical apprehension of ether and air, for there is common among all mankind the notion and expression of extended air and extended ether. If again you reply: The triplication stated in the revelation we allow, but not as an explanation of practical apprehension;—we demur for the declaration of triplication could then have no appropriate end. If you rejoin that the text repeats the sense of the text declaring the fruitful knowledge of the unity of spirit, we reply that the triplication is proper only according to the order of nature, for such a half admission is incomplete.

It may be urged: The creation of the two elements ether and air being revealed in another treatise, and thus not to be disallowed, the avoidance of a contradiction between the texts of the Chhândogya and Taittirîya Upanishads, is briefly made; but not in your

सृष्टिं प्रक्रम्य तेषां सूक्ष्मतया अव्यवहार्य्याणां व्यवहारसिद्धये त्रिवृत्करणं ब्रुवन्ती श्रुतिः पञ्चीकरणाभिप्राया चेन्न स्यात्तदा वाय्वाकाशयोः सूक्ष्मत्वानिवृत्तेरव्यवहार्य्यतापत्तौ सृष्टानां भूतानां व्यवहाराय त्रिवृत्करणोपदेशानुपपत्तिः केन वार्य्यते"। न च वाय्वाकाशयोर्व्यवहार एव नास्तीति वाच्यं महान्वायुर्महन्नभ इति व्यवहारस्य सर्व्वजनीनत्वात्। ननु श्रुत्युक्तमित्येव त्रिवृत्करणं स्वीक्रियते न व्यवहारायेति चेन्न। त्रिवृत्करणवाक्ये स्वसम्बन्धिनः फलस्याभावात् फलवदात्मैक्यज्ञानार्थवादत्वे यथासृष्टिन्यायं त्रिवृत्करणं युक्तं अर्द्धजरतीयस्यान्याय्यत्वात्। ननु शाखान्तरे भूतद्वयसृष्टेः श्रुतत्वात् तत्परित्यागानुपपत्तेः छान्दोग्यतैत्तिरीयादिश्रुत्योर्विरोधपरिहारोपसंहारः क्रियते न। तथा पञ्चीकरणं क्व श्रुतमस्ति येन तन्न्यायेऽनुसरणीयः स्यादिति चेत् सत्यं तथापि न्यायानुसरणं युक्तं यथा त्रिसर्गश्रुतौ सृष्टानां भूतानां स्फुटतरव्यवहारनामरूपव्याकरणोपायतया त्रिवृत्करणं श्रुतं तद्वत् भूतपञ्चकसर्गश्रुतावपि तथा नामरूपव्याकरणोपायः कश्चिदीश्वरस्येच्छितुर्युक्तः स चोपायविशेषस्तस्यैवेश्वरस्य भूतयोनेः शाखान्तरे त्रिवृत्करणरूपः श्रुतः तत्परित्यागेनान्यस्य कल्पनायां प्रमाणाभावात्तस्यैव भूतपञ्चकसर्गश्रुतावपि उपसंहारे प्राप्ते तस्य पञ्चीकरणार्थमन्तरेण पञ्चानां भूतानां स्फुटतरव्यवहारोपायतानुपपत्तेर्युक्तं त्रिवृत्करणवाक्यस्य पञ्चीकरणोपलक्षणत्वमिति। एतेन चरमः पक्षः प्रतिक्षिप्तः त्रिवृत्करणश्रुतेः पञ्चीकरणार्थनिरूपणेकृते तेन पञ्चीकरणस्य विरोधासम्भवात्। श्रुत्यभिप्रायश्चैवं वर्णितो विद्वत्तमैराचार्य्यैः आकाशस्य सर्व्वावकाशतया सर्व्वाव्यतिरेकाद्वायोश्च सर्व्वचेष्टाहेतुत्वेन सर्व्वाविनाभूतत्वात्तयोस्तेजःप्रभृतिष्वन्तर्भावं सिद्धवत्कृत्य त्रिवृत्करणं प्रयोगसौकर्य्यार्थं श्रुतिर्व्वर्णयाम्बभूवेति तस्मादस्ति पञ्चीकरणं प्रामाणिकमित्यलमतिनिबन्धेन। ननु पृथिव्यादीनां भूतानां चेत्सर्व्वभूतात्मकत्वं तथावतिव्यवहारसाङ्कर्य्यप्रसङ्ग इत्याशङ्क्याह पञ्चानामिति वैशेष्याद्विशेषभावात् भागाधिक्यात्तद्वादो नभः पवनस्तेजो जलं पृथिवीत्यादि व्यपदेशो भवतीति द्वितीयाध्यायसमाप्त्यधिकरणे न्यायेन निर्णयः कृतस्तेन न्यायेनाकाशादौ व्यवहारसाङ्कर्य्यं सिध्यतीत्यभिप्रायः। इदानीं भूतानां पञ्चीकृतत्वे लिङ्गमाह॥

manner [by invoking the order of nature], for where is quintuplication revealed that such order of nature should be followed? This we admit, yet it is proper to follow the order of creation; for as triplication is revealed in the text treating of threefold creation, as the means of the manifestation of the name and form and of the clear practical apprehension of the created elements, so in like manner in the text declaring the creation of the five elements, some means of manifesting the names and forms is required for the God willing to manifest. This kind of means employed by God, the source of the elements is declared in another treatise to consist of triplication by him. There being no authority for neglecting this and supposing the other means, and this means being indicated in the text describing the creation of the five elements, if this means, *viz*, triplication, is not sufficient as a means for the clearer practical apprehension unless we assume a quintuplication, it follows that the text declaratory of triplication implies also quintuplication. By this argument the latter alternative is repudiated, for if the text about triplication be explained to imply quintuplication, it cannot conflict with the doctrine of quintuplication.

The purport of the text has been explained by the most learned authorities as follows:—Ether or space as containing all things cannot be excluded from any, and air as the condition of all movement must be inseparable from all. The text presupposing them therefore, to be included in light, earth and water,, describes only a triplication for the greater facility of exposition.

Quintuplication, therefore, is authenticated, and we dismiss further prolixity. The author now proceeds to anticipate the objection that if earth and the other elements are composed each of all the elements, in this case, there will ensue a confusion in the practical apprehension of each.

[*Although*] *the five* [*gross elements are alike in respect that each is made up of all the five, yet the name of ether is appropriate to one, and of another to another, according to the aphorism from their diverse characteristic there is diversity of appellations.*] Characteristic means the nature of diverse things, that is predominance of portions. The appellations ether, air, light, water, earth are the names. This is ascertained in the aphorism in the last section of second chapter of the Vedânta-sûtra. The author means that according to this aphorism it is proved that there is no confusion in the practical apprehension of ether and the rest. The author now proceeds to give a proof of the quintuple nature of the elements.

Then [*in the ether sound as its quality is manited; in air sound and touch; in fire sound, touch, and colour; in water, sound, touch, colour, and taste; in earth, sound, touch, colour, taste, and smell.*]

Then that is after the quintuplication, in ether sound is manifested. The word clearly is to be added in each clause. The meaning is this, that ether and the other elements being each the cause of the next in the series, and therefore each being more pervasive than its effect, though it is commingled with that part which is the educt, there is no manifestation of them as substrata of the qualities inhering in the educt, but they are manifested only as substrata of their several qualities. Moreover the educts being smaller than their causes, they are manifested as possessing the qualities of their causes, they being commingled with part of their causes. Thus the common experiences The wind with fierce sound is roaring, The flame dries up the stream, The stone as it is cleft cries out, or in other words the cognition of touch &c. in light &c. is undisputed. Nor is such experience an error, for we observe no sublation thereof in the state of practical existence. Colour, therefore, and the other qualities, though restricted each to its proper substratum,—these being experienced in other elements also, infer the truth of the doctrine of quintuplication.

The author, having thus articulately expounded the illusory surmisal of the elements, proceeds to discuss the illusory attribution of elementary things. *From these* [*quintupled elements is the genesis of the higher and higher spheres, the heavens called Bhûr, Bhuvar, Svar, Mahar, Janar, Tapar, and Satya; and the lower and lower spheres, the hells called Atala, Vitala, Sutala, Rasâtula, Talâtala, Mahât.la, and Pâtâla; also that of the mundane egg, with the four kinds of gross bodies*

तदानीमिति । तदानीं पञ्चीकरणानन्तरं आकाशे शब्दोऽभिव्यज्यते स्फुटतयेति सर्व्वत्र योजनीयं । एतदुक्तं भवति आकाशादीनां पूर्व्वपूर्व्वस्य उत्तरोत्तरंप्रति कारणत्वेन स्वस्वकार्य्यापेक्षया व्यापकत्वात् कार्य्यांशसम्वलितत्वेऽपि न कार्य्यगतगुणाश्रयतयाप्यभिव्यक्तिः किन्तु स्वस्वगुणाश्रयतयैव तथाकार्य्याणां स्वकारणापेक्षया अल्पत्वात्तेषां कारणभागसंमिश्रितानां कारणगुणाश्रयतयापि भवत्यभिव्यक्तिरिति तथाच लोकेनुभवः प्रचण्डशब्दोवायुः प्रज्वल्पति ज्वालानदीं संशुष्यति । स्फुट्यमानः पाषाणः क्रोशतीत्यादिः स्पर्शादीनां तेजःप्रभृतिषु सम्वादोविवादएव । न चैवमनुभवोभ्रान्तिः व्यवहारदशायां बाधादर्शनात् । तथाच प्रतिनियताश्रया अपि शब्दादयोगुणः यथायथं भूतान्तरेष्वप्युपलभ्यमाना भूतानां पञ्चीकृतत्वं गमयन्तीति । एवं भूतारोपं प्रपञ्चयभौतिकारोपमाह ॥

एभ्यइति । भूरादयः प्राणिनां कर्म्मज्ञानफलभोगस्थानविशेषा यथापाठक्रममुपर्य्युपरिवर्त्तमानाः सप्त । अधोऽधः पाठक्रमेण वर्त्तमाना अतलादयः सप्तेत्येवं चतुर्द्दशलोकाः एतएव स्वावरणभूतलोकालोकपर्व्वततद्बाह्यपृथिवी तद्बाह्यसप्तसमुद्रैः सहिता ब्रह्माण्डमित्युच्यते । अस्यच परिमाणं श्रुतौ संकीर्त्तितं द्वात्रिंशतं वैदेवरथाह्नान्ययं लोकस्तं समन्तंपृथिवीद्विस्तावत्पर्य्येति । तां पृथिवीं द्विस्तावत् समुद्रः पर्य्येतीति । शरीराणां चातुर्विध्यं स्पष्टयति ॥

शरीराणीति । यथोद्देशक्रमं शरीराणि लक्षयति ॥

contained in it, and their food and drink &c] Bhûr and the other six are particular places for the enjoyment of the fruit of good works and knowledge by sentient creatures, seven in number, each being above the other according to the order of enumeration. Atala and the other hells, situated one below the other according to the order of enumeration, are seven in number. There are, therefore, fourteen such spheres in all. These together with the mountainous belt Lokâloka, the land beyond that, and the seven oceans, are called the mundane egg. The dimension of this mundane egg is recorded in the text: This world is traversed by the chariot of the Sun in two-and-thirty days, the earth around it is twice as great, the ocean around the earth again is twice as great. The author enumerates the four kinds of bodies or animated beings.

Bodies [*are those called viviparous, oviparous, equivocally generated and germinant.*] He proceeds to characterise bodies in the order of enumeration.

The vivaparous [*are those which are born from the womb, such as men and the lower animals; oviparous are those produced from an egg, as birds, and snakes; the equivocally generated are those produced from sweat or hot moisture as lice and mosquitoes; the germinant are those which spring from the soil, as creepers and trees.*] The Vaiśeshikas who teach that that which exists in both the perceptible and the imperceptible cannot be itself preceived, and that therefore the composition of bodies from the five elements is impossible, maintain that if bodies were originated by earth, water, and light, together with ether and air which are perceptible, it would follow that bodies themselves would be altogether imperceptible; and that consequently the body is not compounded of the five elements. If we be asked; How then from five elements can there be affirmed genesis of the four kinds of animated organisms? We reply that the effect of all the elements is observed in the body, inasmuch as contraction, expansion, digestion, moisture, and hardness are matters of universal experience. It is therefore laid down that all the five elements, as the causes of these properties, exist in the body. If these elements, then, only existed there, but were not the co-efficients of the body, the waste and repair of the organism could not result from their accession and recession; but waste and repair are observed to have these for their condition. We may fairly affirm, therefore, that there exists between the five elements and the body the relation of integrant parts and integrate whole, as between the threads and the cloth.

But were it asserted that the non-terrestrial elements barely exist in the terrene educt, the waste and repair of the organism could not be said to depend on their coming and going. For a piece of cloth, when wetted with water which is no co-efficient of cloth, receives no increase or diminution from the presence or absence of the water, inasmuch its breadth and length are seen under the same condition. Similarly there is observed no change in the size of water and earth consequent on the coming and going of fire and air. Again if the other elements barely existed in the organism made of earth, as air exists in the bellows, it would follow that the existence and non-existence of expansion and the like, would be equally applicable to the bellows and to the body; for in both instances we might equally suppose another cause, viz. connection with soul possessing requitative efficacy, and volitions &c. generated thereby.

Nor can the doubt be raised that the body residing in the perceptible may be imperceptible; for it would follow that wholes residing in perceptible and imperceptible integrants would be imperceptible.

Nor can it be maintained that ether cannot be a constitutive cause, because it is void of touch, and without parts, an indivisible substance: for we do not admit the doctrine of constitutive causes, for milk which is a single whole is observed to produce curds. You may

---

जरायुजादीनीत्यादिना। ननु वैशेषिकाः प्रत्यक्षाप्रत्यक्षवृत्तेरप्रत्यक्षत्वात् पञ्चात्मकत्वं न विद्यतइति वदन्तोऽप्रत्यक्षाभ्यांवाय्वाकाशाभ्यां सह पृथिव्यादिभिरारभ्यमाणानां शरीराणामत्यप्रत्यक्षत्वप्रसङ्गात् न पाञ्चभौतिकं शरीरमित्याहुः तत्कथं पञ्चभ्योभूतेभ्यश्चतुर्व्विधभूतग्रामस्योत्पत्तिरुच्यते इति चेन्नाहुः। अस्ति हि शरीरे सर्व्वेषामपि भूतानां कार्य्यसंप्रतिपत्तिः अवकाशव्यूहनपचनक्लेदनकाठिन्यानां सर्व्वजनानुभवसिद्धत्वात् अतस्तत्कारणतया पञ्चापि भूतान्येकस्मिन् देहे सन्तीति स्थिते यदि तेषां भूतानां देहावयवत्वाभावो वृत्तिलाभमात्रतैव स्यात् तदा तदपगमानपगमाभ्यां देहस्यापचयोपचयैानस्यातां। दृश्यते च तयोः सतोरुपचयापचयो। अतस्तन्तुपटयोरिवावयवावयवित्वमेव पञ्चभूतदेहयोर्युक्तं। पार्थिवे कार्य्येऽपार्थिवानां वृत्तिलाभमात्रत्वे तु तदुपगमापगमाभ्यां तस्योपचयापचयायोगात्। नहि वस्त्रस्यानारम्भकसलिलद्रव्यार्द्रीकृतस्य तदवस्थायामुपचयस्तदपगमेवापचयोऽस्ति तदायामविस्तारयोस्तदवस्थात्वदर्शनात् तथा जलमृदोरपि पावकपवनोपगमापगमाभ्यां परिमाणान्यथात्वं न दृश्यते तथाच यदि भस्त्रादाविव पार्थिवे देहे भूतान्तरस्य प्रवृत्तिमात्रं स्यात्तर्हि भस्त्रादिदेहयोरविशेषेण व्यूहनादीनां सत्त्वमसत्त्वस्वातुल्यवत्प्रसज्येत अदृष्टवदात्ममनः संयोगतज्जन्यप्रयत्नादिकारणान्तरस्याप्युभयत्र समानस्यापादयितुं शक्यत्वात्। नच प्रत्यक्षवृत्तेः शरीरस्याप्रत्यक्षत्वं शङ्कनीयं प्रत्यक्षाप्रत्यक्षावयववृत्तीनामवयविनामप्रत्यक्षत्वप्रसङ्गात्। नच स्पर्शशून्यत्वादेकद्रव्यत्वाच्चाकाशस्यारम्भकत्वानुपपत्तिरिति वाच्यं। आरम्भवादस्यानङ्गीकारात्। एकस्यापि दुग्धावयविनोदध्यारम्भकत्वदर्शनात्। नच तत्र दुग्धावयवैरेव दध्यारभ्यतइति वाच्यं। तथा सति दधिदुग्धयोर्गन्धरसादिवैषम्यं न स्यात् दुग्धस्यैव सतः परिणामोदधीत्यभ्युपगमे स्याद्गन्धादिवैषम्यं। स्पर्शशून्यमपि द्रव्यं यथागुणारम्भकं दृष्टं तथाद्रव्यारम्भकमप्यस्तु श्रुतिरपि शरीरस्य संकीर्णद्रव्यारब्धतां श्रावयति। अक्षमथितं द्वैधाविधीयत इत्यादो याज्ञवल्क्योप्याह पञ्चधातून् स्वयं षष्ठआदत्ते युगपत्प्रभुरिति। वस्तुतस्तु पञ्चानां भूतानां पञ्चात्मकत्वस्य दर्शितत्वांदारम्भवादस्य निराकृतत्वाच्च नात्रोदयनाद्युक्तदोषशङ्कावकाशोपीति गमयितव्यं। तस्मात् सिद्धं शरीरं पाञ्चभैातिकमिति अत्रापीति स्पष्टार्थः। स्थूलसमष्ट्युपहितचैतन्यस्य व्यपदेशानाह॥

not rejoin that it is by the portions of the milk that the curds are originated, for were this the case there could be no disparity between the smell, taste, and other qualities of the milk and the curds; whereas if it be admitted that the curds are only a modification of the milk still existing [under the form of curds], the disparity of smell and the other qualities would be accounted for.

Let intangible substance be productive of substance, in like manner as it has been observed to produce qualities. The Veda also proclaims that the body is produced by a plurality of substances, in the text The food which is eaten is parted into three, and in other passages. Yâjnavalkya also says: The spirit being itself the sixth, assumes at once the five elements.

It must therefore, be understood that, the five elements having been shown to be each composed of the five, and the doctrine of constitutive casuality being repudiated, there is no room even for a suspicion of the objections urged by Udayanâchârya and others. It is evident, then, that the body has been shown to be composed of the five elements.

The author proceeds to enumerate the appellations of pure intelligence when associated with the gross aggregate.

[*Intellect associated with*] *the collective aggregate thereof* [*is called the spirit of mankind, and the various ruler*]. By the particle *and* are indicated such titles as spirit. There is an ellipse of the following words: By such texts as But he who thinks himself a spirit existing within a span, esteems himself the spirit of mankind This same aggregate as the various ruler, the spirit, &c., this universe is spirit.

The author gives the reasons of these titles.

Because it conceits itself to be all men [*and because it rules variously.*] It is called the spirit of mankind because it conceits itself to be all men, and the various ruler because it governs variously. By the particle *and* we are to understand that it is called spirit *(purusha)*, because it is contained in or occupies the body *(pûrṇatvât)*, After thus explaining the titles of spirit conditioned, the author gives those of that which conditions or illusorily determines it.

This collective aggregate thereof [*is the gross body of the spirit; and since it is a modification of food it is called the nutrimentitious sheath; and since it is the place of fruition of gross things, it is called the waking world.*] It is a modification of food according to the text: Food is the various ruler. The fruition of gross things is exceedingly vivid experience. Having thus explained the nomenclature of the aggregate of gross things, and of pure intelligence as conditioned or illusorily determined thereby, the author proceeds to explain that of the distributive gross, and of intelligence thereby conditioned.

[*Intelligence conditioned*] *by the distribution hereof* [*is called the Pervader.*] He assigns the reason why the intelligence conditioned by the distributive gross body is termed the Pervader.

A. E. G. & G. D.

एतत्समष्टीति । चकारात् पुरुषादिशब्दग्रह उच्यते । यस्त्वेतमेव प्रादेशमात्रमभिविमानमात्मानं वैश्वानरमुपास्ते सैषा विराडन्नादीति । पुरुष एवेदं इत्यादिश्रुतिभिरिति शेषः । तत्र हेतूनाह ॥

सर्व्वनरेति । सर्व्वशब्दो विश्वपदपर्य्यायः । विश्वनराभिमानित्वाद्वैश्वानरः विविधं राजमानत्वाद्विराट् चकारात् पुरुष इति च द्रष्टव्यं । उपहितस्य व्यपदेशानुक्त्वा उपाधेरपि तानाह ॥

अस्यैषेति । अन्नं वै विराडिति श्रुतेरन्नविकारत्वं स्थूलभोगोऽतिस्पष्टो भोगः । एवं समष्टिस्थूलतदुपहितचैतन्ययोर्व्यपदेशमिमं दर्शयित्वा व्यष्टिस्थूलतदुपहितयोरपि तमाह ॥

FOR SALE AT THE
MEDICAL HALL PRESS BENARES.

SANSKRIT and ENGLISH DICTIONARY, being an abridgment of PROFESSOR WILSON'S DICTIONARY with an Appendix explaining the use of affixes in Sanskrit, by PANDIT RÁM JASAN, cloth bound and lettered Rs. 10.

THE RÁMÁYAN of VÁLMIKÍ, translated in English verse by RALPH T. H. GRIFFITH, M. A. Vol. I Rs. 6. Vol. II. Rs. 6. and Vol. III. Rs. 4-8. Postage 6 annas each.

THE LAGHU KAUMUDÍ, a Sanskrit Grammar with an English version, commentary and references by DR. BALLANTYNE, late Principal of the Sanskrit College, Benares, re-edited by RALPH GRIFFITH, M. A., Principal of the Sanskrit College, Benares. *Price 8 Rupees.*

"The Translation of Laghu Kaumudí made by the late Dr. Ballantyne has enabled even beginners to find their way through the Labyrinth of Native Grammar." *Prof. Max Müller.*

"THE BIBLE FOR THE PANDITS." The first three chapters of Genesis diffusely and unreservedly commented, in Sanskrit and English,—with an introduction, by JAMES R. BALLANTYNE, LL. D. Rs. 3.

THE BÁLARÁMÁYANA, a Drama by RÁJAŚEKHARA, edited by PANDIT GOVINDA DEVA ŚÁSTRI, late Professor of Hindu Astronomy in the Sanskrit College, Benares Rs. 2.

THE PRASANNARÁGHAVA, a Drama by Jayadeva, edited by PANDIT GOVINDA DEVA ŚÁSTRI. Rs. 1-4.

The VAIŚESHIKA APHORISMS OF KANÁDA, reprinted from the "Pandit" with corrections and emendations, by A. E. GOUGH, B.A., Anglo-Sanskrit Professor, Benares College. *Price Rs. 4-0.*

PRINTED AND PUBLISHED BY THE PROPRIETORS, E. J. LAZARUS AND CO. AT THE MEDICAL HALL PRESS, BENARES.

काशीविद्यासुधानिधिः

श्रीगणेशाय नमः

श्रीमद्द्विजयिनीदेवीपाठशालोदयोदितः । प्राच्यप्रतीच्यवाक्पूर्वापरपक्षद्वयान्वितः ॥ १ ॥
अङ्कुरश्मिः स्फुटयतु काशीविद्यासुधानिधिः । प्राचीनार्यजनप्रज्ञाविलासकुमुदोत्करान् ॥ २ ॥

THE PANDIT.

A Monthly Journal, of the Benares College, devoted to Sanskrit Literature.

No. 83. Benares, April 1st, 1873. Vol. VII.

॥ चिन्तामणेः शब्दखण्डम् ॥

ननु यावन्नित्यपरिपालनस्य तत्फलं, न तु काम्यश्राद्धादेः, काम्यान्तर्भावे मानाभावात् (१) यावत्काम्यानुष्ठानाशक्तेश्च यावच्छक्यानुष्ठानस्यापि नान्तर्भावः । कामनाविरहादिनाप्यकरणात् (२) यावन्नित्यानुष्ठाने तत्फलाभावप्रसङ्गात्, नित्यस्यैवावश्यकत्वेनोपस्थित्या ऽन्वयाच्च । अपि च तैः कर्मभिः प्रत्येकमुत्पत्त्यपूर्वं तैश्च परमापूर्वं जन्यतइति न, (३) गौरवात् (४) मानाभावाच्च । किं त्वन्तिमक्रियया परिपालनरूपक्रियान्तरेण वेति न सर्वं कर्म ब्रह्मलोकावाप्तिफलकमिति । मैवम् । (५) भगवदुद्देशेन कृतस्य काम्यस्य नित्यस्य वा यस्य कस्यापि कर्मणः पालनाद्ब्रह्मलोकावाप्तिः फलं श्रूयतइति जातेष्टिपितृयज्ञयोरपि तथा कृतयोस्तदेव फलम् । तथा च भगवद्गीता ॥

(६) "यज्ञायाचरतः कर्म (७) कर्मग्रन्थिर्विलीयते ।
यज्ञार्थात्कर्म्मणोन्यच लोकोयं कर्म्मबन्धनः" ॥

इति । तच्च कर्म्म यज्ञार्थतया प्रत्येकमेव तत्फलसमर्थम् । संवलनं तु (८) मङ्गलवदुपयुज्यते । अन्यथैकैकप्रयोगस्य व्यवधानादसंभवः । (९) परिपालनं तु कर्त्तव्यमित्येव करणम् । तदुक्तम्

॥ शब्दचिन्तामणिव्याख्या रुचिदत्तीया ॥

ननु सामस्त्यार्थकसम्यक्पदमेव मानमित्यत आह (१) यावत्काम्येति । तथा चानन्यगत्या संकोच इति भावः । एवं सत्ययं दोष इत्याह । (२) यावन्नित्येति । नित्यमावश्यकम् । तेन नैमित्तिकस्यापि संग्रहः । (३) गौरवादिति । अन्तिमक्रियामात्रात्तत्संभवे क्रियान्तरे हेतुत्वकल्पने गौरवादित्यर्थः । न चैवं पूर्वाशेषकर्मानुपयोगीति वाच्यम् । तदभावेन्तिमत्वासिद्धौ तेषामवच्छेदकत्वपर्यवसानात् । ननु प्रामाणिकं गौरवमपि न्याय्यमित्यत आह । (४) मानेति । यद्यपि संध्यावन्दनवत्सर्वकर्मणां तत्फलसंबन्धो युज्यते, तद्वदेवोत्पत्त्यपूर्वाणि परमापूर्वं च, तद्वदेव च व्यवधानेप्येकप्रयोगत्वं, तथापि काम्यान्तर्भावे मानाभाव इत्यादिदूषणएव तात्पर्यमित्याहुः । संध्यावन्दने ऽप्यन्तिमस्यैव ब्रह्मलोकफलकत्वमित्यन्ये । परिपालनं च भगवत्समर्पणरूपं कर्मान्तरमित्याशयः । (५) भवगदिति । तथा च भगवदुद्देशकृतत्वं सम्यक्त्वमिति भावः । (६) यज्ञायेति । इज्यतइति यज्ञो विष्णुः, तत्प्रीतये सर्वजगत्कर्त्रभिन्न इति न तत्र प्रीतिर्विरुद्धा । तत्समर्पणायेत्यन्ये । (७) कर्मग्रन्थिः, कर्मजनितो धर्मो ऽधर्मश्च ग्रन्थिः,बन्धहेतुत्वादित्यर्थः । (८) मङ्गलवदिति । तथा च यथा तत्रानेकविघ्नध्वंसस्तथात्राप्यनेकफलमित्याहुः । तच्चिन्त्यम् । मुक्तेर्नानात्वाभावात् । सारूप्यसालोक्यादिभेदात्तथात्वमित्येके । अन्ये तु एकस्य कर्मणः तत्फलकत्वे ऽप्यसाङ्गत्वशङ्कया मङ्गलवत्कर्मान्तराचरणमित्यर्थ इत्याहुः । ननु परिपालनरूपक्रियान्तरमेव तत्फलत्वेन श्रूयते, न जातेष्ट्यादीत्यत आह । (९) परिपालनं त्विति । एवकारः फलकामनाव्यवच्छेदार्थः । तदुक्तम् । असंकल्पितफलकाम्यकर्त्तारो हि हिरण्य-

"ददामि देयमित्येव यजे यष्टव्यमित्यहम्" ।

इति । यत्तु निषिद्धासंबन्धएव सम्यक्त्वं न तु विहितमात्रानुष्ठानमिति, तन्न । यत्किंचिन्निषिद्धासंबन्धस्याभावात्, सर्वनिषिद्धासंबन्धस्य सर्वत्र सुलभत्वादिति संप्रदायः । अत्र ब्रूमः, भगवदुद्देशेन कृतं किंचिदेव कर्म, सर्वं वा, काम्यं वा सर्वं, नित्यं वा सर्वं,मिति । नाद्यः, (१०) एकेनैव काम्येन नित्येन वा स्नानेन तथा कृतेन तत्फलसिद्धौ बहुवित्तादिसाध्ये श्राद्धादावप्रवृत्त्यापत्तेः । नापरौ, अशक्यत्वात् । न तुर्यः । जातेष्ट्यादेर्नित्यत्वाभावात् । तस्मात्सम्यग्गृहस्थाश्रमपालनस्य तत्फलम्, सम्यक्त्वं तु (११) सामस्त्यमेव, अतो न श्राद्धादेर्ब्रह्मलोकावाप्तिः फल(१२)मिति साधूक्तं "शास्त्रादेशितं फलमनुष्ठातरीत्युत्सर्ग" इति, तच्च फलं (१३) क्व चिद्विधिवाक्यश्रुतं (१४) क्व चिच्चार्थवादिकमिति ॥

इत्यपूर्ववादः ॥

(१५) नन्वर्थवादादीनां सिद्धार्थतया न प्रामाण्यं, कार्यान्वितएव पदानां शक्त्यवधारणात् । (१६) व्यवहारादेव सर्वेषामाद्या व्युत्पत्तिः (१७) उपायान्तरस्य शब्दव्युत्पत्त्यधीनत्वात् । तथाहि । प्रयोजकवाक्योच्चारणानन्तरं प्रयोज्यप्रवृत्तिमुपलभमानो बालः प्रेक्षावद्वाक्योच्चारणस्य प्रयोजनजिज्ञासायां तदन्वयव्यतिरेकानुविधायित्वादुपस्थितत्वाच्च प्रयोज्यप्रवृत्तिमेव प्रयोजनमवधारयति । (१८) न चाकिंचित्कुर्वतस्तादर्थ्यं संभवतीति तज्जन्यं प्रवृत्त्यनुकूलं कार्यताज्ञानमेव कल्पयति, स्वप्रवृत्तौ च तेन कार्यताज्ञानस्य हेतुत्वावधारणात् । नान्यत्, प्रवृत्तेः कार्यताज्ञानावरुद्धत्वात् । (१९) न चैवं शब्दस्य ज्ञानद्वारा प्रवृत्तिहेतुत्वम् । स्वप्रवृत्तौ बालेन (२०) शब्दाहितविशेषकार्यताज्ञानस्य हेतुत्वेनानवधारणात् । (२१) ज्ञाने च प्रत्यक्षादिनानोपायकत्वदर्शनात् शब्दोऽपि कार्यताज्ञानहेतुरित्यवधार्य तत्रैव शक्तिं कल्पयति, उपस्थितत्वात् । (२२) पश्चादावापोद्धारेण क्रियाकारकपदानां (२३) कार्यान्विततत्तदर्थेषु शक्तिं गृह्णाति, प्रथमगृहीतसामान्यशक्त्यनुरोधात् ॥

स्यादेतत् । यद्यपि वृद्धव्यवहारादादौ कार्यान्वितधीरनुमिता तथाऽप्यन्वितमात्रशक्त्यैव कार्यवाचकपदसमभिव्याहारादाकाङ्क्षादिमहिम्ना कार्यान्वितधीसंभवान्न कार्यांशेऽपि शक्तिः । (२४) परम्परयापि शब्दस्य कार्यान्वित-

गर्भपदवीमवाप्यापत्स्यन्त" इति । न च फलकामनां विना प्रवृत्तिरेव न स्यादिति वाच्यम् । उत्कटफलकामनानिषेधात् । (१०) एकेनैवेति । विशेषतः सालोक्यादिफलबोधकश्रुत्यादेरभावादेकेनैव तावत्सिध्यापत्तेः । तथापि चाल्पायाससाध्यद्विव्रादिकर्मणैवोपपत्तौ बह्वायाससाध्यबहुलकर्माकरणप्रसङ्गः । न चासाङ्गत्वशङ्कया तदिति वाच्यम् । सावधानं साङ्गेऽपि कृतेऽन्यकर्मकरणादर्शनात् । (११) सामस्त्यमेवेति । आवश्यककर्मणामिति शेषः । तथा च तेषामेव कर्तव्यमित्येव कृतानां ब्रह्मलोकावाप्तिः फलं, न तु जातेष्ट्यादेः । तत्र च विनिगमनाविरहेण संध्यावन्दनवत् सर्वकर्मणामेव तत्फलहेतुत्वमुत्पत्त्यपूर्वादिकल्पनमपि प्रामाणिकमित्युत्सर्ग एवेत्युपसंहरति । (१२) इति साधूक्तमिति । (१३) क्व चिदिति । "स्वाराज्यकामो राजसूयेन यजेते"त्यादौ । (१४) क्व चिच्चेति । "तरति मृत्यु" मित्यादौ ॥

आर्थवादिकमित्याक्षिपति । (१५) नन्विति । एतदेव कुत इत्यत आह । (१६) व्यवहारादिति । (१७) उपायान्तरस्येति । प्रसिद्धार्थपदसामानाधिकरण्यवाक्यशेषव्याकरणकोशाप्तोपदेशोपमानादेरित्यर्थः । तदुक्तम् ।

शक्तिग्रहं व्याकरणोपमानकोशाप्तवाक्यव्यवहारतश्च ।
वाक्यस्य शेषाद्विवृतेर्वदन्ति सान्निध्यतः सिद्धपदस्य वृद्धाः ॥

इति । (१८) न चाकिंचिदिति । आशुविनाशित्वादिति भावः । तर्हि शब्दस्य ज्ञानद्वारा प्रवृत्तिहेतुत्वमस्त्वित्याशङ्क्य निराकरोति । (१९) न चेति । (२०) शब्देति । शब्दप्रयोज्यजातिमत इत्यर्थः । तथा च तत्र व्यभिचारादत्रापि ज्ञाने एवान्यथासिद्धः शब्दः । न च प्रवृत्तिविशेषे तथा हेतुत्वं, सामान्यसामग्रीत एवोपपत्तौ तथा हेतुत्वकल्पने गौरवात्मानाभावाच्चेति भावः । तर्हि व्यभिचारान्न ज्ञानेऽपि हेतुत्वं कलयेदित्याशङ्क्याह । (२१) ज्ञाने चेति । तथा चानन्यथासिद्धान्वयादिना शब्दस्य ज्ञानहेतुत्वं, वैजात्याच्च न व्यभिचार इति भावः । विशिष्य शक्तिग्रहार्थमाह । (२२) पश्चादिति । आवापः, संग्रहः, उद्धार,स्त्यागः । क्व चिदुद्धापेति पाठः । (२३) कार्यान्वितेति । नन्वेवं कार्यान्वितघटत्वादिकं शक्यतावच्छेदकमिति घटपदादेस्तत्प्रकारिकैव पदार्थस्मृतिः स्यादिति चेत्, न । इष्टापत्तेरित्येके । वस्तुतस्तु यथा पदानामन्वितज्ञानजनननियमेऽप्यन्वयांशे स्वरूपसती शक्ति,स्तथात्र कार्यान्वितत्वज्ञानजनननियमाभ्युपगमात्तत्र शक्तावपि तदंशे स्वरूपसती सा व्याप्रियतइति न तथात्वमिति ।

ननु कार्यांशे शक्तिं विना कार्यान्वितधीर्न स्यादित्यन्यथाऽनुपपत्त्या तदंशे शक्तिकल्पनमित्यत आह । (२४) परम्परयेति ।

ज्ञानानुकूलत्वादर्थापत्तावन्यथोपपत्तिरपि । अवश्यं चाकाङ्क्षादेः कारणत्वं, कार्यांशे शक्तावपि (२५) तद्व्यतिरेकादन्विताभिधानव्यतिरेकनियमात् । (२६) सति चाकाङ्क्षादौ कार्यस्य व्यतिरेकदर्शनादन्विताभिधानव्यतिरेको न क्वाप्यस्ति । (२७) अन्यथा गवादिपदानां व्यक्तावपि शक्तिः स्यात् । संस्कारादेव व्यक्तिलाभदर्शनान्न तथेति यदि तदा कार्यवाचकपदादेव कार्यान्वितलाभ इति किं शक्त्या । वृद्धव्यवहारे नियमतः कार्यान्वितज्ञानं दृष्टमिति तत्र शक्तिकल्पने वृद्धव्यवहारे शब्दोपस्थापितेनैवान्वयबोधदर्शनाच्छब्दसंनिधेरप्यन्वयहेतुत्वकल्पने द्वारमित्यादौ शब्द एवा(२८)ध्याह्रियेत । क्व चिदसंपूर्णवाक्ये वृद्धव्यवहारादाद्यव्युत्पत्तेः शब्दसंनिधिर्व्यभिचरतीति चेत्, तर्हि सिद्धेर्थेप्यन्वयप्रतीतिदर्शनात् कार्यत्वमपि व्यभिचारि । न च तत्र लक्षणा, बाधकाभावात् । (२९) शक्तिकल्पनभिया ह्यन्यत्र लक्षणा मता । इह तु लघीयस्योभयसाधारणपदार्थमात्रशक्त्या मुख्यत्वस्यैवोचितत्वात् । (३०) किं च कार्यवाचिलिङादीनामाकाङ्क्षाद्युपेतपदार्थान्वितस्वार्थबोधकत्वमवश्यं वाच्यम् । अतो विशेषात्पदान्तराणामपि तथात्वमस्तु लाघवादिति । मैवम् । व्यवहारहेतुतया ऽनुमिते हि कार्यान्वितज्ञाने ऽन्वयव्यतिरेकाभ्यां (३१) शब्दस्य साक्षात्कारणत्वमवधारयति न परम्परया । साक्षात्त्वस्यौत्सर्गिकत्वेन तत्संभवे परम्पराया अन्याय्यत्वाद् इति (३२) तत्रैव शक्तिं कल्पयति, नान्वितज्ञाने पदार्थज्ञाने वा, ऽप्रवर्त्तकतया प्रवृत्त्या स्वकारणत्वेन तयोरनुपस्थापनात् । न चान्वितज्ञानशक्तावपि परम्परया कार्यत्वधीः संभवतीत्यर्थापत्त्या सैव कल्प्यतां, लाघवात्, न तु विशिष्टज्ञाने शक्तिरन्यलभ्यत्वाद् इति वाच्यम् । अर्थापत्तेः साक्षादुपपादकमात्रविषयत्वेन न्यूनाधिकार्थाग्राहकत्वात् (३३) साक्षादुपपादककार्यान्वितज्ञाने शक्तिः कल्प्यते । लिङादीनां शक्तेरकल्पनादन्यलभ्यत्वतर्कस्याप्यभावात् । आद्यव्युत्पत्तेर्विचार्यत्वात् । किं च प्रवृत्तिकारणतयोपस्थितं कार्यान्वितज्ञानमपहायानुपस्थितान्वितज्ञानमात्रे शक्तिकल्पनमयुक्तम् । (३४) हेत्वभावात्, उपस्थित्यन्तरे गौरवाच्च । अथ कार्यान्वितज्ञानोपस्थितावप्यन्वितज्ञानमप्युपस्थितमिति लाघवात् कार्यांशमपहायान्विते शक्तिर्गृह्यतामिति चेत् । ज्ञाने हि पदानां शक्तिः शक्यत्वात्, नार्थे । अन्यच्च कार्यान्वितज्ञानमन्यदन्वितज्ञानं, विषयभेदेन ज्ञानभेदात् । तदुक्तमभाववादे । अन्यद्भूतलज्ञानमन्यच्च घटवद्भूतलज्ञानमिति । अन्वितज्ञानमुपस्थाप्य तत्र शक्तिग्रह इति गौरवमेव । लघुनि शक्ये संभवति अन्यलभ्यं गुरु न तथेति चेत्, न । युगपदुपस्थितौ तथात्वात् । न च तस्याप्यनुपस्थितः । पुरुषविशेष(३५)दोषात्,

---

यद्यपि पदार्थस्मरणद्वारा ऽऽकाङ्क्षासहकारेणोभयमते ऽपि कार्यान्वितधीरिति परस्यापि परम्परयैव तज्ज्ञानानुकूलत्वं, तथापि कार्यानन्वितावान्तरवाक्यार्थज्ञानद्वारा तद्धीरिति परम्परा, तन्मते तु कार्यान्वितज्ञानएव पदे सामर्थ्यात्साक्षादेव कार्यान्विततज्ज्ञानमित्यवान्तरवाक्यार्थबोधो ऽपि कार्यान्वितविषयत्वनियत एवेति साक्षात्त्वम् । अत एव रूढिपूर्वकलक्षणास्थले ग्रन्थकार एव वक्ष्यति । यथा पङ्कजमानयेत्यत्र प्रथमं डार्थवाक्यार्थधीस्ततस्तदन्वितजन्मधीस्तदनु च तथाभूतजन्मनि पङ्कपदार्थान्वयधीः, कार्यान्वितव्युत्पत्त्यनुसारात्, न तु सिद्धपङ्कजन्मकर्तृत्वानां प्रथममन्वयधीरिति वयमालोचयामः । (२५) तद्व्यतिरेकादिति । स्वरूपसदाकाङ्क्षाहेतुत्वपक्षे । (२६) सति चेति । सिद्धार्थे ऽप्यन्वयबोधादित्याशयः । (२७) अन्यथेति । उपस्थितत्वमात्रादेव यदि शक्तिकल्पनं तदेत्यर्थः । अत्र त्वन्मतइति शेषः । (२८) अध्याह्रियेतेति । त्वन्मतेपीति शेषः । (२९) शक्तीति । शक्त्यन्तरेत्यर्थः । ननु प्रथमशक्तिग्रहस्योपजीव्यत्वात्तद्विरोध एव बाधक इति लक्षणा स्यादित्यत आह । (३०) किं चेति । कार्यवाचिनि कार्यान्विते शक्तिकल्पने ऽनन्वय एवेति व्यभिचारात्प्रथममेव कार्यान्विते शक्तिग्रहो भूतो वाये त्याज्य इति भावः । (३१) शब्दस्येति । पदार्थस्मरणव्यापारादिविशिष्टस्येति शेषः । अन्यथा स्मरणद्वारे हेतुत्वे साक्षात्त्वानुपपत्तेः, उक्तरीत्या साक्षात्परम्परे बोध्ये । यत्तु कार्यवाचिपदसमभिव्याहारात्तल्लाभो न्यायमते परम्परेति । तन्न । परमते ऽपि तत्समभिव्याहारस्यापेक्षणात्, अन्यथा कार्यान्वितशक्तावपि सिद्धार्थे ऽन्वयबोधस्य दुर्वारत्वात् । व्यवहारोपपादकतावच्छेदककार्यान्वितज्ञानत्वावच्छेदेन कारणत्वमेव साक्षात्कारणत्वमिहेत्यन्ये । (३२) तत्रैवेति । प्रथमगृहीतसाक्षात्कारणतारक्षार्थमिति भावः । (३३) साक्षादिति । साक्षादुपपादिका कार्यान्वितज्ञानशक्तिः कल्प्यतइत्यर्थः । यद्वा व्यवहारस्य साक्षादुपपादके कार्यान्वितज्ञाने शक्तिः कल्प्यतइत्यर्थः । (३४) हेत्वभावादिति । उपस्थितिरूपहेत्वभावादित्यर्थः । (३५) दोषादिति । न चेति संबन्धः । अत्र हे-

(३६) सर्वैरेवाद्यप्रवृत्तौ तथानवगमात् । तथापि न कार्या-
न्विते शक्तिः, कार्यवाचिलिङादीनां व्यभिचारादिति चेद् ।
न । (३७) सर्वपदानां कार्यत्वविशिष्टधीजनकत्वात् । तच्च
कार्यान्वितस्वार्थप्रतिपादकतयेतरान्वितस्वार्थकार्यप्रतिपाद-
कतया वेति । एवं कार्यान्वितव्युत्पत्तौ सत्यामनाकाङ्क्षादौ
व्यभिचारादाकाङ्क्षादे(३८)रुपाधित्वम् । तथा चोपजीव्य-
प्रथमभाविकार्यान्वितव्युत्पत्त्यनुरोधेन विध्यश्रुतावपि का-
र्याध्याहारः (३९) क्व चिल्लक्षणा क्व चिदसंसर्गाग्रह इति ।
सिद्धार्थे ऽन्वयप्रतीतिदर्शनादुत्तरकालमन्वितमात्रे शक्तिरेव
कल्प्यतां, प्राचीनकार्यान्वितज्ञानं॰ बाध्यतामित्यप्यत एव
निरस्तम् । पूर्वकल्पनातः कल्पनान्तरप्रसङ्गाद् उत्तरका-
लभाविसिद्धार्थप्रयोगस्य लक्षणादिभिरप्युपपत्तेः, (४०) अ-
नन्यथासिद्धत्वाभावेन प्राचीनज्ञानाबाधकत्वात् (४१)
उपजीव्यव्याघाताच्च ॥ (४२) अथ सिद्धार्थेपि व्युत्पत्तिः
संभवति । तथाहि, उपलब्धचैत्रपुत्रजन्मा बालस्तादृशेनैव
वार्त्ताहरेण चैत्रसमीपं गतश्चैत्र पुत्रस्ते जात इति वार्त्ता-
हरवाक्यं शृण्वन् चैत्रस्य मुखप्रसादं पश्यन् श्रोतुर्हर्षमनु-
मिनोति । हर्षाच्च तत्कारणं पुत्रजन्मज्ञानं कल्पयति, ।
उपस्थितत्वात्, उपपादकविषयत्वाद्, अन्योपस्थितौ गौ-
रवाच्च । तत्र वाक्यस्य कारणतां कल्पयति, लाघवादिति
चेत्, न । हर्षहेतूनां बहूनां संभवात्, हर्षेण लिङ्गेन पुत्रजन्म-
ज्ञानस्य बालेनानुमातुम(४३)शक्यत्वात् । (४४) प्रि-
यान्तरज्ञानस्य (४५) परिशेषयितुमशक्यत्वात् । अथ
पुत्रजन्मज्ञानाव्यभिचारिवृद्धिश्राद्धादिक्रियाविशेषदर्शनात्पु-
त्रजन्मज्ञानानुमानमिति चेत् । तर्हि पुत्रस्ते जात इति
वाक्यं तत्क्रियाकर्त्तव्यतापरमेवेति कार्यान्वितज्ञानजनक-
त्वमेव तस्य प्रथमतो गृह्यते । तदुत्तरकालं पुत्रजन्मज्ञाना-
नुमानमिति न व्युत्पत्तिः कार्यं जहाति । (४६) यत्रापीह
सहकारतरौ मधुरं पिको रौतीति प्रसिद्धार्थपदसामाना-
धिकरण्यादिभिर्व्युत्पत्ति(४७)स्तत्रापि व्यवहाराधीनव्यु-
त्पत्तिपूर्विका कार्यान्वितएव युक्ता । पिकपदशक्तिः पूर्वं
नावधृतेति चेत् । न । तत्रापि पिकमानयेत्यादौ (४८)
कस्य चित् कार्यान्वितएव व्युत्पत्तेः । (४९) उपजीव्य-
जातीयतया च तस्या बलवत्त्वम् । किं चे(५०)द-
मपि पदं कार्यान्वितज्ञानशक्तं, पदत्वादिति सामान्य-
तो ऽवगतम्, स्वार्थविशेषः परं नाधिगतः, स इदानीं
सुहृदुपदेशादिभिरवगम्यते । अतः सिद्धं प्रवृत्तिपराणां
शब्दानां प्रवर्तकज्ञानजनकत्वं, तच्च क्वचित् साक्षात् क्वचि-
त्परम्परया कार्यान्वयात् । अत एव विधिशेषीभूतार्थवादा-
नां स्वर्गादिपदशक्तिग्राहकाणां च प्रवृत्तिपरत्वेन परम्पर-
या कार्यान्वयात् कार्यान्वितस्वार्थबोधकत्वमिति । यत्र

तुमाह । (३६) सर्वैरिति । (३७) सर्वपदानामिति । नन्वेवं
कार्यान्वितशक्तौ कार्यान्वितत्वेनैव पदार्थोपस्थितिरिति पक्षे
सिद्धार्थेपि विशेषणीभूतकार्यमादाय कार्यत्वविशिष्टधीजनक-
त्वमस्तु । न च कार्यवाचिलिङादिपदाभावान्न तद्धीरिति वाच्य-
म् । कार्यत्वोपस्थित्यर्थे हि तदपेक्षा, सा च सिद्धार्थादेव जाता,
तथा च तदपेक्षायां कार्यस्याध्याहारेण लक्षणया वोपस्थितौ
तद्विशिष्टधीर्न स्यात् । स्वीकृतं चानुपदमेव तथा । किं च
कार्याभाव इत्यादिशब्दोपि तन्मते प्रमाणं स्यात् । अत्राहुः ।
प्रवृत्तिहेतुज्ञानएव व्युत्पत्तिग्रहाद्यादृशकार्यत्वोपस्थित्या तथा
निर्वहति तादृशप्रयोजकत्वं, प्रकृते तु न तथा । यद्वा ऽयम-
पि दोषस्तन्मते बोध्य इति । (३८) उपाधित्वमिति । प्रयो-
जकत्वमित्यर्थः । यत्र न तथा तात्पर्यग्रहस्तत्रासंसर्गाग्रह
इत्याह । (३९) क्व चिदिति । ननु पूर्वमपि भ्रमज्ञानमनन्य-
थासिद्धत्वेनोत्तरेण बाध्यतएवेत्यत्रापि तथा स्यादित्यत आ-
ह । (४०) अनन्यथेति । (४१) उपजीव्येति । कार्यान्वित-
व्युत्पत्तिमुपजीव्य सिद्धार्थे ऽन्वयप्रतीतिरिति तन्मूलिकान्वि-
तशक्तिकल्पना तां न बाधतइत्यर्थः । (४२) अथेति । तथा
च कार्यान्वितशक्तेर्नोपजीव्यत्वमिति न तद्व्याघातो न वा
कल्पनान्तरप्रसङ्ग इति भावः । (४३) अशक्यत्वादिति ।
व्यभिचारादिति भावः । ननु परिशेषाद्बोध्यमत आह । (४४)
प्रियान्तरेति । (४५) परिशेषयितुमिति । निरसितुमित्यर्थः ।
यद्वा प्रियान्तरज्ञानस्य संभवेन पुत्रजन्मज्ञानस्य परिशेषयितु-
मिति पूरयित्वा व्याख्येयम् । अन्यत्रापि सिद्धार्थे व्युत्पत्तिमा-
शङ्क्य निराकरोति । (४६) यत्रापीति । यद्यप्युपायान्तर-
स्येति प्रागुक्तं तथाप्यधिकवचनाय पुनराशङ्कितमिति ध्येयम् ।
यद्यपि पिकपदशक्त्यनवधारणेपि सहकारादिपदव्युत्पत्तिपूर्व-
कतयापि तथा युज्यते तथाप्यभ्युपगमरीत्या समाधत्ते । (४७)
तत्रापीति । (४८) कस्य चिदिति । प्रयोक्तुरित्यर्थः । एवं
चोपजीव्यकार्यान्वितव्युत्पत्तिजातीयतयेदानींतन्यपि पिकप-
दस्य कार्यान्वितशक्तिरेव बलवतीत्याह । (४९) उपजीव्ये-
ति । (५०) इदमिति । पिकपदमित्यर्थः ॥ प्रथमगृहीतसा-
मान्यशक्त्यनुरोधादग्रे न कार्यांशत्याग इति युक्तं, प्रथमं वा-
क्यसामान्यकार्यान्वितज्ञानसामान्ययोर्हेतुहेतुमद्भावग्रहे प्रथ-

पुराणभारतादिपाठे फलश्रुतिरस्ति तत्रार्थवादकल्पितविधिशेषीभूतत्वेन प्रवृत्तिपरत्वमेव तेषामिति परम्परया कार्यान्वयात् कार्यान्वितस्वार्थबोधकत्वं, स्वरूपाख्यानपराणां तु काव्यनाटकादीनां पदार्थासंसर्गग्रहेण संसर्गव्यवहारो न संसर्गग्रह इति ॥

अत्रोच्यते । (५१) घटमानयेतिवाक्यश्रवणानन्तरं प्रयोज्यस्य घटानयनगोचरप्रवृत्त्या घटानयनकार्यताज्ञानमनुमितं बालेन, न तु कार्यान्वितज्ञानम् । प्रवृत्तिविशेषे तस्याहेतुत्वात् । घटादिपदशक्तिग्रहे तस्यानुपयोगाच्च, तत्र च ज्ञानविशेषे घटमानयेतिवाक्यविशेषस्यानाकलितपदविभागस्य हेतुत्वमवधार्य घटपदद्वितीयाधातुविधिप्रत्ययानां प्रत्येकमावापोद्धारेण घटकर्मत्वानयनकार्यत्वज्ञानेषु प्रत्येकं कारणत्वमवगम्य शक्तिं कल्पयति, पश्चात्प्रवृत्तिसामान्येनानुमितकार्यान्वितज्ञाने वाक्यमात्रस्यान्यलभ्यत्वेन (५२) कार्यांशमपहायान्वितज्ञानमात्रे शक्तिं कल्पयति । न तु प्रथमं वाक्यमात्रस्य कार्यान्वितज्ञानमात्रहेतुत्वकल्पनम् ॥ अथ घटानयनक्रियायां प्रथमं (५३) क्रियात्वज्ञानात् प्रवृत्तिमात्रानुमानं, तेन च कार्यान्वितज्ञानमनुमाय तत्र वाक्यमात्रस्य हेतुत्वं कल्पयित्वा शक्तिं कल्पयति । तदुत्तरं विशेषयोः कार्यकारणभावधीरिति चेत् । न । प्रथमं प्रवृत्तिमात्रकार्यान्वितज्ञानमात्रयोरनुमानं बालस्य क्रमशो भवतीत्यत्र मानाभावात् । (५४) घटादिपदशक्तिग्रहस्य तेन विनापि संभवात् । न च तदनुमानसामग्री तदा वृत्तेति वाच्यम् । तदा व्याप्त्यादिस्मृतौ मानाभावात् । (५५) सामान्ययोः कार्यकारणभावग्रहो विशेषयोस्तथात्वग्रहे हेतुरिति चेत्, न । (५६) विशेषयोरन्वयव्यतिरेकाभ्यामेव तद्ग्रहात् । ननु (५७) यथा धूमवह्निविशेषयोः कार्यकारणभावग्रहे तत्सामान्ययोरपि हेतुहेतुमद्भावो भासते, (५८) अन्यथा न सकृद्दर्शनगम्या व्याप्तिः स्यात् । तथा ऽत्रापि विशेषयोः कार्यकारणभाववित्तिवेद्य एव सामान्ययोस्तथाभाव इति चेत्, न । प्रत्यक्षेण (५९) विशेषग्रहे योग्यत्वा(६०)त्सामान्यमपि भासते । प्रकृते च कार्यविशेषेण कारण(६१)विशेषो ऽनुमितो न सामान्यमिति न (६२) युगपदुपस्थितिः । अथ विशेषयोः कार्यकारणभावात्सामान्ययोरपि तथात्वमनुमापयतीति चेत्, तर्हि विशेषयोः कार्यकारणभावावगमः प्राथमिक इति तन्मूलकः प्रथमं पदविशेषशक्तिग्रह एव स्यात् । (६३) निष्प्रयोजनत्वेनान्तरानुमितौ मानाभावात् । यच्चोक्तं प्रवृत्तिकारणतयोपस्थितं कार्यान्वितज्ञानमपहायान्वितज्ञानं कल्पयित्वा तत्र शक्तिकल्पनमयुक्तम्, उभयथापि गौरवादिति । तन्न । (६४) कार्यान्वितज्ञाने ऽन्वितज्ञानत्वस्य सत्त्वात् । तद्विशेषत्वात्तस्य, अतस्तत्रैव शक्तिग्रहो न कार्यत्वांशेपि । (६५) अत एव घटवद्भूतलज्ञाने भूतलज्ञानत्वमपीति तद्भिन्नं तज्ज्ञानमभावव्यवहारे कारणं त्वया स्वीकृतम् । अस्त्वेवं किं तु

मं सामान्यशक्तेरग्रहादित्याह । (५१) घटमिति । (५२) कार्यांशमिति । प्रथमं विधिप्रत्ययानां शक्तिग्रहादन्यलभ्यत्वप्रतिसंधानस्य सुकरत्वादन्यथा घटाद्यन्तर्भावेणापि सर्वत्र शक्तिग्रहः स्यादिति भावः । (५३) क्रियात्वेति । यद्यपि तन्मते क्रियात्वं प्रवृत्तिं प्रति व्यभिचरत्येव तथापि जन्यकृतिजन्यक्रियामात्रे विशेषोऽस्तीत्यभिमान इत्येके । व्यभिचाराप्रतिसंधानदशायामनुमानाविरोध इत्यन्ये ।.(५४) घटादीति । तथा च तदन्यथानुपपत्तिर्न तत्र मानमिति भावः । एतच्च परीत्या परस्मै दूषणम्, स्वनये कार्यान्वितज्ञानोपस्थितावन्वितज्ञानत्ववद् घटानयनकार्यताज्ञानोपस्थितौ कार्यताज्ञानोपस्थितिध्रौव्यात् तदुपस्थितावपि सामान्यतो हेतुत्वाग्रहान्न सामान्यशक्तिग्रहमन्यत्र वा तात्पर्यम्, अत एव सामान्यहेतुत्वग्रहमेव शङ्कते । (५५) सामान्ययोरिति । विशेषहेतुत्वग्रह एव प्राथमिक इति वैपरीत्यमित्याह । (५६) विशेषयोरिति । शङ्कते । (५७) यथेति । स्वमतदार्ढ्येनाह । (५८) अन्यथेति । यद्यपि कार्यकारणभाव एव न व्याप्तिर्दण्डघटयोस्तत्सत्त्वेपि तदसत्त्वाद् उपाध्यभावस्य तन्मते व्याप्तित्वाच्च तथापि मतविशेषेण तदुक्तमित्याहुः । (५९) विशेषग्रहे, कार्यकारणभावग्रहे, । (६०) सामान्यमपि, सामान्यकार्यकारणभावोपीत्यर्थः । एतदपि क्वाचित्काभिप्रायं, (६१) विशेष इति । कारणत्वेनेति शेषः । (६२) युगपदुपस्थितिः । विशेषसामान्यकार्यकारणभावयोरिति शेषः । यद्वा प्रत्यक्षेण सामान्योपस्थितौ सामान्यकार्यकारणभावग्रहशङ्का, प्रकृते च तदनुपस्थितौ न तच्छङ्कापीति यथाश्रुतमेव योज्यम् । (६३) निष्प्रयोजनकत्वेनेति । व्याप्त्यादिस्मृतिविरहादिति भावः । प्रथमं सामान्यस्योपस्थितिमभ्युपेत्य कार्यत्वांशे गौरवाच्च शक्तिग्रह इत्याह । (६४) कार्यान्वितज्ञानइति । तदुक्तमभाववादइति । उपोद्बलके प्रत्युपोद्बलकमाह । (६५) अत एवेति ।

तदुपस्थितावप्यन्वितज्ञानत्वं न विषय इति तस्यवोपस्थित्यन्तरं कल्प्यमिति चेत् । न । कार्यान्वितज्ञाने ऽन्वितज्ञानत्वं विशेष्यमिति तदुपस्थितौ तस्यापि विषयत्वात् । (६६) विशिष्टज्ञानसामग्रीतो विशेष्यभानावश्यंभावात् । (६७) अन्यथा ऽन्यज्जातिज्ञानमन्यच्च जातिविशिष्टज्ञानमिति व्यक्तिज्ञानमपहाय जातिज्ञानं क्वापि नोपस्थितमिति न तव जातिरेव पदार्थः स्यात् । जातेः केवलोपस्थितौ च न व्यक्तिसमानसंवित्संवेद्यत्वम् । अथ जातिविशिष्टज्ञानोपस्थितेर्व्यक्तिज्ञानविषयत्वेपि गौरवात्, व्यक्तेरन्यलभ्यत्वाच्च जातिविशिष्टज्ञानत्वं न शक्यतावच्छेदकं, किं तु जातिज्ञानत्वं, लाघवादिति मतम् । तर्हि तुल्यम् । न च युगपदुपस्थितौ लाघवावतारो, (६८) न चात्र युगपदुपस्थितिरिति वाच्यम् । (६९) विशिष्टज्ञानस्य विशेष्यविषयत्वनियमात् । (७०) किं च ममेदं कार्यमितिज्ञानं साक्षादुपपादकं प्रवृत्त्या स्वकारणत्वेनानुमित,मतस्तत्र शक्तिं गृह्णीयात् । साक्षादुपपादकविषयत्वात्कल्पनायाः । न त्विदं कार्यमिति ज्ञाने तस्य साक्षादुपपादकोपपादकत्वात् । अथेदं कार्यमिति ज्ञानशक्त्यैव परम्परया(७१)नुमानद्वारा ममेदं कार्यमिति ज्ञानसंभवादन्यलभ्यत्वेन न तत्र शक्तिकल्पनमिति, तर्हीतरान्वितज्ञानशक्त्यैव कार्यवाचकसमभिव्याहारेणैव कार्यान्वितज्ञानसंभवादन्यलभ्यत्वेन च न तत्र शक्तिकल्पनमिति तुल्यम् । (७२) नन्विदं कार्यमिति ज्ञानं साक्षादेव प्रवर्तकं (७३) कर्तव्यताप्रयोजक(७४)यावदेकविशेषणस्य स्वगतत्वप्रतिसंधानं सहकारि । तेन नातिप्रसङ्गः । न च सहकारिविलम्बेन कार्यानुत्पादे साक्षात्साधनत्वं निवर्त्ततइति चेत् । न । लाघवेन (७५) ममेदं कार्यमिति ज्ञानादेव प्रवृत्तेः । (७६) यथा च भविष्यद्विषयकार्यतानुमितिस्तथोक्तमधस्तात् । अपि च यादृशस्य पुरुषस्याविगीतकृतिसाध्यमिदं तादृशोहमिति धीर्न प्रवृत्तिहेतुः । कृतक्रियमाणविषयकृतिसाध्यताज्ञानस्य सिद्धविषयस्यासिद्धविषयेच्छानुत्पादकत्वात् । (७७) इच्छायाः स्वप्रकारकधीसाध्यत्वेन कृत्या साधयामीतीच्छायाः स्वकृत्यनन्तरं भविष्यत्तारूपकृतिसाध्यताधीजन्यत्वाच्च । (७८) अपि चास्तु प्रथमं कार्यान्वितज्ञाने वाक्यस्य साक्षात्कारणत्वबोधात् तत्र शक्तिग्रहः । तथापि पश्चादावापोद्धारेण पदविशेषस्येतरान्वितस्वार्थज्ञाने शक्तिं कल्पयति लाघवात्, न तु कार्यत्वांशेपि, गौरवात्, (७९) अन्यलभ्यत्वाच्च । न चैवं प्रथमप्रवृत्तस्य साक्षात्कारणताबोधस्य (८०) तन्मूलककार्यान्वितशक्तिग्रहस्य च बाधा स्यादिति वाच्यम् । इष्टत्वात् । अन्यथासिद्धिमपश्यतो हि (८१) बालस्य (८२) स भूत इति तस्या बलवत्त्वात् । गौरवान्यलभ्यत्वतर्कसहकृतप्रमाणजन्यत्वेनो(८३)त्तरस्य बलवत्त्वात् । न चोपजीव्यबाधान्न तथा प्रत्येतीति वाच्यम् । उपजीव्यत्वे मानाभावात् ।

---

(६६) विशिष्टेति । अन्यथा विशेषणस्याप्यविषयत्वे विशिष्टबुद्धिर्निर्विषया स्याद्, विशिष्टस्यातिरिक्तस्यानभ्युपगमादिति भावः । अनिष्टान्तरमप्याह । (६७) अन्यथेति । अस्तु तदुपस्थितिस्तथापि न यौगपद्येनेति न लाघवावतार इत्याशङ्क्य निराकरोति । (६८) न चेति । (६९) विशिष्टेति । तथा च विशिष्टविशेष्ययोर्युगपदुपस्थितिरेवेत्यर्थः । यदि प्रवृत्तिसाक्षादुपपादकत्वेन तत्र शक्तिकल्पना तत्राह । (७०) किं चेति । तथा मदंशोपि शक्यः स्यादन्यलभ्यत्वं गौरवं च तुल्यमिति भावः । परम्परामेवाह । (७१) अनुमानद्वारेति । नवीनमतेनाशङ्कते । (७२) नन्विति । (७३) कर्त्तव्येति । तदुक्तं मोदनकामस्य तण्डुलाद्युपकरणवत इत्यादि (७४) यावदेकेति । लोकोक्त्या सकलेत्यर्थस्तेन नैकपदानर्थक्यानन्वयावित्यर्थः । (७५) ममेदमिति । यद्यपीष्टसाधनत्वादिविषयकत्वमपि तत्र तथापि तदन्यस्य परोक्षस्य एवकारव्यवच्छेद्यत्वे तात्पर्यम् । नन्वेतद्दुर्ग्रहं, मदुक्तं तु परकृतपाकादौ सुग्रहमित्याशङ्क्य निराचष्टे । (७६) यथेति । स्वसमानप्रकारकत्वेनैव हेतुत्वं न तु समानविषयत्वमपि तन्त्रं, गौरवादित्यत आह । (७७) इच्छाया इति । इदानीं कृतिसाध्यताज्ञानं हेतुः सिद्धे च पाकादौ तद्बाधितमित्यपि दोषो बोध्यः । औत्सर्गिकत्वेन साक्षात्कारणत्वमवधारयतीत्यत्राह । (७८) अपि चेति । (७९) अन्यलभ्यत्वाच्चेति । एतच्च लिङादीनां शक्तिकल्पनोत्तरमिति मन्तव्यम् । (८०) तन्मूलकेति । यत्रैव कारणत्वस्थैर्यं तत्रैव तदवच्छेदकतया कल्पना, शक्तिश्च तन्मते पदार्थान्तर,मस्मन्मते चेश्वरेच्छेत्यन्यदेतदिति भावः । अदर्शने हेतुमाह । (८१) बालस्येति । (८२) सः, कार्यान्वितशक्तिग्रहः । अनन्यलभ्यत्वं यद्यपि न तर्कस्तथापि यदि शक्यं स्यादन्यलभ्यं न स्यादित्यादितर्कप्रयोजकतया तर्कतोक्तिरित्याहुः । तर्कपदेन तर्कान्तरमेवोक्तं, न तु तदुभयान्वितं तदित्यन्ये । तर्कपदं ज्ञानपरमित्यपरे । (८३) उत्तरस्य । अ-

द्वैवाद्धि प्रथमं तद्वृत्तं न तु पदविशेषशक्तिग्रहे तस्य हेतुत्वं, (८४) तेन विनापि तत्संभवात् । न च प्राथमिकत्वेन बलवत्त्वम् । (८५) व्यभिचारात्, नापि (८६) सर्वैः प्रथमं प्रतीयमानत्वेन बलवत्त्वम् । सर्वेषां शरीराहंप्रत्यये चन्द्रतारकापरिमाणस्य सर्वैरल्पत्वग्रहे च व्यभिचारात् । अत एव पूर्वकल्पनातः कल्पनान्तरप्रसङ्गः स्यादिति निरस्तम् । (८७) यत्रानन्यथासिद्धतयोपजीव्यतया वा बलवत्त्वं पूर्वकल्पनायास्तत्र तथात्वात् । (८८) किं च प्रथमं कार्यान्वितज्ञाने वाक्यस्य साक्षात्परम्परोदासीनं कारणत्वमात्रं गृह्यते न तु विशेषोऽपि, (८९) उपायस्यान्वयव्यतिरेकादेरुभयविशेषसाधारणत्वेन तत्संशायकत्वात् । (९०) उत्सर्गोऽपि बाधकाभावनिश्चयसहकृतो निश्चायकः । न चान्यलभ्यत्वस्य बाधकस्याभावमापाततः स्वतो दर्शनमात्रेण बालो निश्चेतुमर्हति । अत एव प्रामाण्यस्यौत्सर्गिकत्वेऽपि बाधकाभावसहकृतनिश्चयादेव निश्चयः । (९१) अन्यथा प्रमा ऽप्रमा वा साक्षात्परम्परासाधनं चेति संशयः क्वापि न स्यात् । यच्च हर्षहेतूनां बहूनां संभवादित्यादि । तन्न । स्वतो गृहीतहर्षहेतुस्तनपानादेर्बाधावतारादन्यस्य हर्षहेतोरग्रहात्, उपस्थितत्वात्, उपपादकत्वाच्च पुत्रजन्मज्ञानस्यैव हर्षहेतुत्वेन कल्पनात् । अन्यप्रियज्ञानं हर्षकारणं भविष्यतीतिशङ्कायां कथमेवमिति चेत् । (९२ एवं हि कार्यान्वितज्ञानेऽपि शक्तिर्न गृह्येत । प्रयोज्यज्ञानहेतूनां बहुत्वात् । अनन्यथासिद्धशब्दानुविधानस्य च तुल्यत्वा(९३)दन्यप्रियज्ञानस्याज्ञानाच्च । ज्ञानेऽपि वा तदा तदुपस्थिति(९४)नियमे मानाभावात् संदेहाभावोपपत्तेः । (९५) लिङ्गाभासजन्यकाकतालीयसंपन्नसंवादानुमितिवद्धर्षेण लिङ्गेन पुत्रजन्मज्ञानानुमानसंभवाच्च । न चाभासत्वेनानुमितेर्भ्रमत्वे तद्धेतुकशक्तिग्रहो भ्रमः । विषयस्य तथाभावेन (९६) तयोर्यथार्थत्वात् । (९७) यथा कश्चित् सूत्रसंचाराधिष्ठितं दारुपुत्रकं घटमानयेति नियुङ्क्ते, (९८) स च तमानयति । तदा चेतनव्यवहारादिवत् तद्दर्शी बालो व्युत्पद्यते, इयं क्रिया (९९) कृतिजन्या, सा ज्ञानजन्या, ज्ञानं तद्वाक्यजन्यमित्यनुमितिपरम्परया भ्रमत्वेऽपि तद्धेतुकशक्तिग्रहस्तज्जन्यशाब्दबोधश्च यथार्थ एव विषयस्य यथाभावादिति सिद्धं

न्वितमात्रशक्तिग्रहस्य । (८४) तेन विनापीति । पूर्वोक्तन्यायेनेति शेषः । तथा च कार्यान्वितशक्तिग्रहस्य पदविशेषशक्तिग्रहे नोपजीव्यत्वमिति भावः । (८५) व्यभिचारादिति । भ्रमस्य प्राथमिकस्याप्यबलत्वादित्यर्थः । (८६) सर्वैरिति । सर्वस्य प्रत्ययत्वेनेत्यर्थः । तेन प्रत्यये व्यभिचारोऽग्रे न विरुध्यतइति बोध्यम् । एतच्चाभ्युपगमवादेनेति मन्तव्यम् । (८७) यत्रेति । अन्यथा ज्ञानं स्वविषये प्रवर्त्तकमिति प्रथमकल्पनाया अबाध्यत्वे तवान्यथाख्यात्यापत्तिरिति भावः । एतच्चाभ्युपेत्य समाहितं, वस्तुतस्तु साक्षात्कारणत्वं गृह्यतएव नेत्याह । (८८) किं चेति । (८९) उपायस्येति । यद्यपि प्रत्यक्षे ऽन्वयव्यतिरेकादिरुपायस्तथा ऽप्यनुमाने लिङ्गघटकतया तथात्वे तात्पर्यं न तूत्सर्गसहकारात्साक्षात्वनिश्चयः स्यादित्यत आह । (९०) उत्सर्गोपीति । कदा चित्तन्निश्चये वाग्रे त्याग इति पूर्वोक्तएव तात्पर्यम् । ननु यदि बाधकाभावनिश्चयसहकृत एवोत्सर्गो निश्चायकस्तदा किमुत्सर्गेण, बाधकाभावनिश्चयादेव तन्निश्चयसंभवाद्, बाधकापोद्यनियमरूपतया बाधकनिश्चये परं नोत्सर्गावतार इति तन्निश्चयाभावः परमपेक्ष्यते न तु तदभावनिश्चयो ऽपि, तथा च बाधकसंदेहेऽपि तदवतार इत्युपेयमित्यत आह । (९१) अन्यथेति । एवं सति सर्वत्रौत्सर्गिकार्थनिश्चये तत्संशयो न स्याद्दित्यर्थः । न चोत्सर्गवैयर्थ्यं,मन्वयव्यतिरेकाभ्यां तस्यापि लाघवादिवत् प्रमाणसहकारित्वाभ्युपगमादिति दिक् । (९२) एवं हीति । यदि च शङ्काया अनावश्यकत्वं शङ्कापिशाचीत्वेन वा ऽप्रतिबन्धकत्वं तदा तुल्यमिति भावः । कोटिज्ञानाभावादपि न शङ्केत्याह । (९३) अन्येति । (९४) नियम इति । यथा च यत्रैव तदनुपस्थितिस्तत्र सिद्धार्थशक्तिग्रहो ऽविकल एवेत्यर्थः । नन्वेवमन्यप्रियज्ञानाभावविशेषितो हर्षो न पुत्रजन्मज्ञानानुमाने लिङ्गं तदनुपस्थितेस्तदविशेषितं व्यभिचारीत्यत आह । (९५) लिङ्गाभासेति । तथा च व्यभिचारास्फुरणदशायां लिङ्गभ्रमात्तत्संभव इति भावः । (९६) तयोः । अनुमितिशक्तिग्रहयोः । अत्रानुरूपं दृष्टान्तमाह । (९७) यथेति । (९८) स चेति । दारुपुत्रक इत्यर्थः । (९९) कृतीति । आत्मकृतिजन्येत्यर्थः, तथा च पक्षधर्मताबलात्तदीयत्वं कृतौ भावमिति भ्रमत्वं, न चैवमग्रे पक्षाप्रसिद्धिः, काञ्चनमयोद्रिरितिवत्तदीयत्वेन प्रसिद्धकृतेरेव पक्षत्वाद्, अत एव तद्धदेव तदंशएव भ्रमत्वं प्रसिद्धकृतौ ज्ञानजन्यत्वस्याबाधितत्वाद्, एवं तदीयत्वेन प्रसिद्धज्ञानं पक्षीकृत्य तद्वाक्यजत्वं साध्यं तत्र चोभयांशएव भ्रमत्वम् । यद्वा कृतिसाक्षाज्जन्येति साध्यं,न चेदमबाधितम्, । अत एवानुमितेर्भ्रमत्वाद् दारुपुत्रकक्रिया स्वकृतिजन्येति सा-

सिद्धार्थे शक्तिग्रह इति । (१००) अत एव

यन्न दुःखेन संभिन्नं न च ग्रस्तमनन्तरम् ।
अभिलाषोपनीतं च तत्सुखं स्वःपदास्पदम् ॥

इत्यर्थवादोपस्थिते सुखे (१०१) वेदादेव स्वर्गपदस्य शक्तिग्रहः ॥

मान्यव्याप्तिपुरस्कारेण साध्यमित्याहुः । (१००) अत एवेति । सिद्धार्थस्यापि व्युत्पन्नतया वाक्यार्थानुभावकत्वादेवेत्यर्थः । ननु दुःखासंभिन्नत्वमत्रासंभवि । आद्यन्तयोस्तन्नियमात्, यदि च तदसहवृत्तित्वं त,त्तदास्मदादिसुखेप्यस्ति, नचानन्तरमित्यनेनाविरललग्नप्रवाहो दुःखासंभिन्न इत्यर्थान्न दोष इति वाच्यम् । कतिपयकालावच्छेदेनास्मदादेरपि तथा संभवात् । न चाभिलाषोपनीतमित्यनेन तन्निरासः । चक्रवर्त्तिसुखे तस्यापि संभवाद्, अन्यथा तत एवातिप्रसङ्गनिरासे विशेषणान्तरवैयर्थ्यादिति । अत्र के चित्, एकजन्मावच्छेदेन दुःखासंभिन्नत्वादिकं नानैव प्रवृत्तिनिमित्त, मन्यथा विशेषणवैयर्थ्यात्, तदुपस्थितिस्तु तात्पर्यग्राहकाद्, एवं च न चक्रवर्तिसुखातिप्रसङ्ग इत्याहुः । तच्चिन्त्यम् । एवं हि नानार्थत्वपर्यवसाने गौरवात् तथा तात्पर्यग्राहकाभावाच्च यावति न वैयर्थ्यं तावदेकमेव प्रवृत्तिनिमित्तमभिमतमित्येके । अन्ये त्वधर्माजन्यशरीरजन्यसुखत्वोपलक्षकमिदं,न च योगिनस्तादृशं शरीरं तत्र दुःखोत्पत्तेरधर्मजन्यत्वात् सुखमात्रावच्छेदके तच्छरीरे मानाभावात् । न च स्वर्गिशरीरेपि मरणजन्यदुःखसंभवादधर्मजन्यत्वं मरणस्य दुःखव्याप्यत्वात् ते नराः सुखस्मृत्यव इति च दुःखाल्पत्वपरमिति वाच्यम् । विपक्षबाधकाभावेन व्याप्तेरसिद्धेः, सिद्धौ वा मरणदुःखजनकाधर्मान्याधर्माजन्यशरीरजन्यसुखत्वे तात्पर्यात् । न च स्वर्गहेतुपुण्यक्षयशङ्कया स्वर्गेपि दुःखोत्पत्तेर्दोषतादवस्थ्यं, तदुक्तं स्वर्गेपि पातभीतस्येत्यादीति वाच्यम् । तदन्यत्वेनाप्यधर्मविशेषणादित्येके । वस्तुतस्तु स्वर्गिशरीरं सुखमात्रावच्छेदकमिति यदि तत्र दुःखधीस्तदा भ्रान्ता ऽत एव तद्धर्ममात्रजन्यमेव । के चित्तु अविरललग्नप्रवाहचिरस्थायीच्छामात्रयोनिदुःखासंभिन्नसुखत्वं तया, ऽत एव तत्प्रकारिकैव धीः चक्रवर्तिसुखे ऽवश्यमन्यतमविशेषणवैकल्यमित्याहुः । अग्रस्तत्वं चिरस्थायित्वं प्रवाहस्य बोध्यम् । (१०१) वेदादेवेति । स्वःपदास्पदमिति वेदादेवेत्यर्थः ॥

॥ अथ वेदान्तसूत्रीयशैवभाष्यसंबन्धिचतुर्थाध्यायस्य ॥

॥ द्वितीयपादारम्भः* ॥

॥ वाङ्मनसि दर्शनाच्छब्दाच्च ॥ १ ॥

॥ अत एव च सर्वाण्यनु ॥ २ ॥

पूर्वमुपासकस्योपासनव्यवस्थानादिकमुक्तम् । इह पादेऽस्य शरीरादुत्क्रान्तिर्निरूप्यते । "अस्य सोम्य पुरुषस्य प्रयतो वाङ्मनसि संपद्यते, मनः प्राणे, प्राणस्तेजसि, तेजः परस्यां देवतायाम्", इति श्रुतौ प्रयतो[1] वागादीनां मनसि लयोऽवगम्यते । अयमुपपन्नो न वेति संशयः । किं प्राप्तम् । कार्यस्य ह्युपादाने लयः[2] । मृद्घटादौ व्याप्तिदर्शनात् । वागादीनां ब्रह्मोपादानं, न मनः । अतोऽस्मिन्नेव तेषां लयो युक्त इति प्राप्तेऽभिधीयते । "अस्य सोम्य पुरुषस्य प्रयतो वाङ्मनसि संपद्यत" इति, "इन्द्रियैर्मनसि संपद्यमानैः", इति च वचनादुत्क्रान्तौ[3] मनसः प्रागेव वागादीनामुपरमदर्शनाच्च वाङ्मनसि प्रथमं संपद्यते तदुह[4] सर्वाणीन्द्रियाणि मनसि संपद्यन्ते । यदुक्तमुपादान एव लय इति । तन्न[5] । स्वरूपलयस्यैवोपादानापेक्षा । वागादीनां मनसि न स्वरूपलय उच्यते । किंतु वृत्तिलय एव । यथा जलमध्ये क्षिप्तस्याङ्गारस्य प्रकाशादिवृत्तिलयः । तथानुपादानेऽपि मनसि वागादीनां वृत्तिलयो युक्त एव । वृत्तिमतो वागादेर्लयश्रुत्या वृत्तिलयो लक्ष्यते । वृत्तिवृत्तिमतोरभेदोपचारात् । इति ॥ १ ॥ २ ॥

॥ तन्मनः प्राण उत्तरात् ॥ ३ ॥

मनः प्राण इति वागादिसर्वेन्द्रिययुक्तस्य मनसः प्राणे लयः श्रूयमाणः कीदृश इति संशयः । वा[6]गादीनामनुपादाने मनसि वृत्तिलयोऽस्तु । मनसस्तु प्राणे स्वरूपलय एव । मनसः प्राणोपादानकत्वात् । तथा "अन्नमयं हि सोम्य मनः", "आपोमयः प्राण" इति श्रुतेरन्नमयत्वेन पार्थिवस्य मनस आपोमयत्वेनोपादाने प्राणे स्वरूपलयस्याविरोधादिति[7] पूर्वपक्षः । सिद्धान्तस्तु पूर्ववन्मनसोऽपि प्राणे वृत्तिलय एव । 'मनः

---

* द्व्यशीतितमे ८२ पण्डितपत्रे रसयुग्मयुग्ममिते पृष्ठे २२६ चतुर्थपा इत्यस्य स्थाने प्रथमपा—इति । तथा तत्रैवाग्नियुग्मद्विमिते पृष्ठे २२३ रसशशिमितपङ्क्तौ १६ 'यच्चयेम' इत्यस्य स्थाने 'यत् पचेम' इति । वसुशशिमितपङ्क्तौ १८ च 'मस्विदेते इत्यस्य स्थाने किं स्विदेते इति विज्ञेयम् ।

१—द्यत इत्यादिषु प्रयतो इति पा० ।

२—स्य च कारणे लयो दृश्यते इति पा० ।

३—त् । नैवं वाङ्मनसोरिति प्राप्तौ ब्रूमः । उत्क्रान्तौ इति पा० ।

४ ततः इति पा० ।

५ तदयुक्तमेव इति पा० ।

६ श्रूयते । स चायं पूर्ववदुपपद्यते न वेति संशयः । एवं प्राप्ते वा—इति पा० ।

७—लयो न विरुद्ध इति इति पा० ।

प्राण' इत्युत्तराद्वाक्यात् स्वरूपलयः। प्राणस्य मुख्योपादानत्वाभावान्मनसस्तत्रानुत्पत्तेः[1]। अतः प्राणे मनसो वृत्तिलय एव न्याय्यः ॥ ३ ॥

॥ सोऽध्यक्षेण तदुपगमादिभ्यः ॥ ४ ॥

पूर्वत्र सर्वेन्द्रिययुक्तस्य मनसः प्राणे लयः प्रतिपादितः। इह तस्य प्राणस्य कुत्र लय इति संशयः। किं तावत् प्राप्तम्। "प्राणस्तेजसि" इति श्रुतेः प्राणस्य तेजसि लय इति प्राप्ते ब्रूमः। स प्राणस्ततो जीवेनाध्यक्षेण संयुज्यते, न तस्य तेजसि लयः ॥ ४ ॥

"एवमेवेममात्मानमन्तकाले सर्वे प्राणा अभिसमायन्ति" इत्यादिश्रुतिषु तस्य जीवोपगमनादि[2]श्रवणात् "प्राणस्तेजसि" इति श्रुतिक्रमविरोधं परिहरति ॥

॥ भूतेषु तच्छ्रुतेः ॥ ५ ॥

"प्राणस्तेजसि" इति भूतान्तरसंसृष्टं तेजोऽभिधीयते। ततः प्राणो जीवेन सह भूतेषु संयुज्यत इति न विरोधः ॥ ५ ॥

॥ नैकस्मिन् दर्शयतो हि ॥ ६ ॥

न तेजोमात्रे प्राणलयः। त्रिवृत्करणश्रुतिर्हि भूतान्तरसंसृष्टिं दर्शयति। अतो भूतेषु जीवेन सह प्राणः संपद्यत इति न श्रुतिविरोधः ॥ ६ ॥

॥ समाना चासृत्युपक्रमादमृतत्वं चानुपोष्य ॥ ७ ॥

इह निरूप्यमाणोत्क्रान्तिरर्चिरादिगत्यु[3]पक्रमात् प्राग्विद्वदविदुषोः समाना, उत भिन्नेति संशयः। किं तावत् प्राप्तम्। संसारफलस्य मोक्षस्य चातिवैषम्यादज्ञानिज्ञानिनोरपि सदृशैवोत्क्रान्तिरित्येवं प्राप्ते ब्रूमः। अर्चिरादिमार्गोपक्रमात् प्राग्विद्वदविदुषोः समानैवोत्क्रान्तिः। ज्ञानिनस्तु मूर्धन्यनाड्या निष्क्रान्तिरमृतत्वं च, नेतरस्य, इति वैषम्यम्। "शतं चैका च हृदयस्य नाड्यस्तासां मूर्धानमभिनिःसृतैका, तयोर्ध्वमायन्नमृतत्वमेति विष्वङ्, अन्या उत्क्रमणे भवन्ति" इति श्रुतेः। अतः प्रागु[4]त्क्रान्तिः समानैव ॥ ७ ॥

॥ तदापीतेः संसारव्यपदेशात् ॥ ८ ॥

पूर्वमुपपादिता मूर्धन्यनाड्या विदुष उत्क्रान्तिः, ततोऽर्चिरादिगतिरिति। इह देहादुत्क्रान्तस्य विदुषोऽर्चिरादिगतिरुपपद्यते न वेति संदेहः।

"यदा सर्वे प्रमुच्यन्ते कामा येऽस्य हृदि स्थिताः"।

"अथ मर्त्योऽमृतो भवति" इत्यत्र 'ब्रह्म समश्नुते" इति देहपातानन्तरमेवामृतत्वं श्रूयते। "तेऽर्चिषमभिसंभवन्ति" इत्यर्चिरादिगतिश्च श्रूयते। एवमुभयश्रवणाल्लयसंदेहः। तत्र ब्रह्मणि[1] लीनानां वागादीनां पुनरुत्पादासंभवान्मुक्तस्य[2] गत्यनुपपत्तेरर्चिरादिगतिर्न मुक्तात्मनामिति प्राप्ते सिद्धान्त उच्यते। अर्चिरादिना[3] ब्रह्मप्राप्तेः प्राक् शरीरसंबन्धव्यपदेशान्न संसारापगमः। अमृतत्ववचनमासन्नामृ[4]तत्वाभिप्रायम्। अत उत्क्रान्तस्यार्चिरादिगतिरुपपन्ना ॥ ८ ॥

यदुक्तं वागादिविलयात् तस्य गत्यनुपपत्तिरिति तत्राह ॥

॥ सूक्ष्मं प्रमाणतश्च तथोपलब्धेः ॥ ९ ॥

शरीरादुत्क्रान्तस्यापि सूक्ष्मशरीरमनुवर्तते। अन्यथा गत्यनुपपत्त्या चन्द्रसंवादाद्यनुपपत्तेः। श्रूयते हि पर्यङ्कविद्यायां देवयाने पथि विदुषश्चन्द्रमसा संवादः "ये वै के चास्माल्लोकात् प्रयन्ति चन्द्रमसमेव ते सर्वे गच्छन्ति" इत्युपक्रम्य "एतद्वै स्वर्गस्य द्वारं, यश्चन्द्रमाः, तं यः प्रत्याह, तमति सृजते, अथ य एतं न प्रत्याह, तमिह वृष्टिर्भूत्वा वर्षति, स इह कीटो वा पतङ्गो वा शकुनिर्वा शार्दूलो वा सिंहो वा मत्स्यो वा परस्वान् वा पुरुषो वान्यो वैतेषु स्थानेषु प्रत्याजायते यथाकर्म यथाविद्यं तमागतं पृच्छति कोऽसीति, तं प्रति ब्रूयात्," इत्यादि[5]। अतः शरीरादुत्क्रान्तस्य विदुषोऽर्चिरादिगतिरुपपन्ना ॥ ९ ॥

॥ नोपमर्देनातः ॥ १० ॥

अत उक्त[6]न्यायात्, "अथ मर्त्योऽमृतो भवति" इत्यमृतत्ववचनं न देहसंबन्धोपमर्देन तदानीमेवामृतत्ववदिति[7] ॥१०॥

॥ अस्यैव चोपपत्तेरूष्मा ॥ ११ ॥

अस्य सूक्ष्मशरीरस्य क्वचिद्विद्यमानत्वोपपत्तेश्च न तदुपमर्दन। उपलभ्यते ह्युत्क्रामतो विदुषोऽपि क्वचित् सूक्ष्मदेहगुण उष्मा, न स स्थूलदेहगुणः। अन्यत्रानुपलम्भात्[8]। अतश्च गत्युपपत्तिः ॥ ११ ॥

१–स्तत्र तदसद्भावात्। इति पा०।

२–षु जीवे तस्य लयश्च–इति पा०।

३–दिमार्गो–इति पा०।

४–म्यम्। अतस्तदु–इति पा०।

१–त्वमवगम्यते। तेऽर्चिषमभिसंभवन्ति" इति विदुषां ह्यर्चिरादिगतिश्च। कस्यचेोपपत्तिरिति प्राप्ते ब्रह्मणि इति पा०।

२–दाभावादस्य इति पा०।

३–दिगमने इति पा०।

४–नं वागाद्यम–इति पा०।

५ अन्यथा गत्यनुपपत्तेः। तत्रानुपपत्त्या कल्प्यते शरीरम्। प्रमाणमत्र विद्यत एव। चन्द्रमसा संवादादिप्रमाणदर्शनात् तदुपलब्धेः। "तं ब्रूयात् इति इति पा०।

६ अत एव इति पा०।

७–न भवति ॥ १० ॥ इति पा०।

८–र्दन उष्मा उपपन्नः। अन्यत्रानुपलम्भात्। न सकलगुणः। इति पा०।

॥ प्रतिषेधादिति चेन्न शरीरात् स्पष्टो ह्येकेषाम्* ॥ १२ ॥

बृहदारण्यके "तस्य हैतस्य हृदयस्याग्रं प्रद्योतते, तेन प्रद्योतनेनैष आत्मा निष्क्रामति, चक्षुषो वा मूर्ध्नो वा अन्येभ्यो वा शरीरदेशेभ्यः, तमुत्क्रामन्तं प्राण उत्क्रामति, प्राणमनूत्क्रामन्तं सर्वे प्राणा अनूत्क्रामन्ति" इत्यादिवाक्यैरविदुषोऽप्युत्क्रान्त्यादि प्रकाममभिधाय, "इति तु कामयमान" इत्यविद्वद्विषयं परिसमाप्य, "अथाकामयमानो योऽकामो निष्काम आप्तकाम आत्मकामो, न तस्य प्राणा उत्क्रामन्ति", "ब्रह्मैव सन् ब्रह्माप्येति" इति विदुष उत्क्रान्तिप्रतिषेधादत्रैव साक्षाद् ब्रह्मप्राप्तिरिति चेत्। न। विदुष उत्क्रममाणस्यार्चिरादिगमनाय प्रस्थितस्य प्राणास्तस्मान्न विश्लिष्यन्त[1] इति ह्युच्यते न तस्य प्राणा उत्क्रामन्तीति। अयमर्थो माध्यंदिनानां शाखायां स्पष्टोऽभिधीयते। "योऽकामो निष्काम आप्तकाम आत्मकामो न तस्मात् प्राणा उत्क्रामन्ति" इति ॥ १२ ॥

विदुषो मूर्धन्यनाड्या गमनं स्मर्यते ॥

॥ स्मर्यते च ॥ १३ ॥

"ऊर्ध्वमेकः स्थितस्तेषां यो भित्त्वा सूर्यमण्डलम्।
ब्रह्मलोकमतिक्रम्य तेन याति परां गतिम्" ॥

इति। अतोऽर्चिरादिगतिरुपपद्यते विदुष उत्क्रान्तस्य जीवस्येति। केचिचिरन्वयोपासकानामिह शरीरस्यान्त एव मुक्तिरित्यर्चिरादि[2]गतिमनियतामाहुः ॥ १३ ॥

॥ तानि परे तथाह्याह ॥ १४ ॥

पूर्वत्र प्राणसहितस्य जीवस्य तेजउपलक्षितेषु भूतेषु लय उपपादितः। "तेजः परस्यां देवतायाम्" इति तस्य भूतान्तरसंसृष्टस्य जीवसंयुक्तस्य तेजसः परस्यां देवतायां लयोऽवगम्यते। स पर[3]ब्रह्मणि स्वरूपलय उच्यते, उताविभागापत्तिमात्रमिति संशयः। स्वरूपलय इति युक्तम्[4]। तथाहि देवतालयेति हृदयान्तर्वर्तिदेव एव देवतेत्युच्यते। परशब्दो महत्त्ववाची। अतः परो देवो हि महादेव इति सिद्धम्। "सेयं देवतैक्षत," "द्यावाभूमी जनयन् देव एक" इति स महादेव एव सकलभूतकारणं परब्रह्म श्रूयते। अतस्तस्मिन्नुपादाने सजीवानां भूतानां स्वरूपलय इत्येव युक्त इति पूर्वः पक्षः।

सिद्धान्तस्तु ब्रह्मण्युपादानेऽपि न स्वरूपलयो भूतानाम्। किंत्वविभागमात्रम्। 'वाङ्मनसि संपद्यत' इति वचनस्यैकार्थान्तरपरत्वे प्रमाणाभावात्। अतो मनःप्रभृतिवदविभागमात्रपरत्वम्। अतो वृत्तिलय एवेति वदन्ति ॥ १४ ॥

। अविभागो वचनात् ॥ १५ ॥

संपत्तिवचनादविभागमात्रं ब्रह्मणि भूतानामिति युक्तमेव ॥ १५ ॥

॥ तदोकोऽग्रज्वलनं तत्प्रकाशितद्वारो विद्यासामर्थ्यात् तच्छेषगत्यनुस्मृतियोगाच्च हार्दानुगृहीतः शताधिकया ॥ १६ ॥

पूर्वत्र विद्वदविदुषोरर्चिरादिगत्युपक्रमपर्यन्तमुत्क्रान्तिः समानेत्युक्तम्। निष्क्रमणवेलायामुभयोर्विशेषोऽस्ति, न वेति विचार्यते। तेजःपरस्यां देवतायामिति श्रुतेः सह परमकारणे परदेवे परे ब्रह्मणि परमाकाशरूपे विद्वानविद्वांश्च विलीयाविभागेन क्षणं विश्रम्य तिष्ठतीति सममभिहितम्। अतः समानैवोत्क्रान्तिः। तयोर्हृत्प्रद्योतनादेः समत्वश्रवणात्। "तस्य हैतस्य हृदयस्याग्रं प्रद्योतते। तेनैष आत्मा निष्क्रामति चक्षुषो वा मूर्ध्नो वान्येभ्यो वा शरीरदेशेभ्य" इति श्रूयते। अतः समानत्वादुत्क्रान्तेस्तयोरविशेष इति पूर्वपक्षे प्राप्ते विशेषोऽस्तीति सिद्धान्त उच्यते। तथाहि, हार्दस्य हृदयगतस्य परमेश्वरस्याराधनरूपविद्यासामर्थ्यात् तदङ्गगत्यनुसंधानाच्च प्रीतेन तेन सर्वानुग्राहकेणानुगृहीतः स्वस्वरूपावरणमलध्वंसनविदग्धयानुग्रहदृष्ट्या निरीक्षितस्तदनुग्रहप्रकाशितद्वारो जीवः शताधिकया मूर्धन्यनाड्या विद्वानुत्क्रामति। न तथा परः। किंत्वितरनाडीभिरेव। तथा च श्रुतिः। "शतं चैका च हृदयस्य नाड्यस्तासां मूर्धानमभिनिःसृतैका, तयोर्ध्वमायन्नमृतत्वमेति विष्वङ्, अन्या उत्क्रमणे भवन्ति" इति। स एष विदुष उत्क्रमणे विशेषः। एतदुक्तं[1] भवति। "रुद्रो जनानां हृदये संनिविष्टः," "हृत्पुण्डरीकं विरजं विशुद्धम्", इत्यादिश्रुतिषु,

"ईश्वरः सर्वभूतानां हृद्देशेऽर्जुन तिष्ठति"।

इत्यादिस्मृतिषु च, सर्वजनहृदयगतो[2] हि परमेश्वरोऽवगम्यते। यत्र सुषुप्तौ जीवः स्वेन्द्रियवृत्तिभिः सह विलीय तदेकरसो भवति। यश्च "विश्वाधिको रुद्रो महर्षिः", "सर्वो वै रुद्र" इत्यादिश्रुतिषु निमित्तत्वाद्विश्वाधिकत्वेनोपादानाद्विश्वात्मकत्वेनोपादानत्वेन चावगम्यते। "एक एव रुद्रो न द्वितीयाय तस्थुः," इत्यादिश्रुतिषु यस्य विश्वाधिपत्यं श्रूयते। "शिव एको ध्येयः," "यदा चर्मवदाकाशम्" इति, यम-

* शंकरमते स्पष्टो ह्येकेषाम् इति सूत्रान्तरम्।

१–य प्राणा अपि सह वर्तन्त इति पा०।

२ केचिदिह मुक्तिः शरीरपात इति। तेनापास्ततिमिराणां निरन्वयोपासकानामर्चिरादि–इति पा० ॥

३ तदेषामिह भूतानां पर–इति पा०।

४ "तेजःपरस्यां देवतायाम्" इत्यत्र तेजउपलक्षितानां भूतानां परस्यां देवतायां स्वरूपेण लयो युक्तः। इति पा०।

१ किमुक्तं इति पा०।

२–गतत्वेन

न्तरेण मुमुक्षूणां ध्येयं ज्ञेयं च वस्तु नास्तीति विज्ञायते । अस्य हि जन्तोः प्राणेषूत्क्रममाणेषु रुद्रस्तारकं ब्रह्म व्याचष्टे, येनासावमृतो भूत इति, यदुत्क्रान्तिसमये विदुषां स्वरूपप्रकाशकतारकब्रह्मोपदेष्टृत्वेनाम्नायते । "आवो राजानम्," इत्यादिषु यस्याराध्यत्वेन सर्वयज्ञाधिपत्यं वर्ण्यते । "उरु नो वीरा अर्पय भेषजेभिर्भिषक्तमं त्वा भिषजां शृणोमि" इति यः संसाररोगस्य भिषक्तम इति निरूप्यते ।

"मायां तु प्रकृतिं विद्यान्मायिनं तु महेश्वरम्" ।

इति सकलप्रपञ्चविचित्रकलिकानिकुरम्बावलम्बिनी[1] मायालक्षणा परमशक्तिर्यस्य रूपैकदेशस्वभावतया प्रतिपाद्यते । स खलु हृदयगतो हार्दः परं ब्रह्म परमेश्वरः परममङ्गलस्वरूप उमापतिः परमात्मा स्वाज्ञारूपश्रुतिचोदितेषु कर्मस्वग्निहोत्रादिषु नियतस्वाराधनरूपेषु नियतं निर्मुक्तसकलाविहितकर्मलवं[2] स्वार्पित[3]सकलकर्मफलं स्वायत्तचित्तं स्वज्ञानामृतपरिपूर्णं निरस्तसमस्तकाम्यफलं स्वविवेकादिसंपन्नस्वभक्तिमात्रैकनिरतं स्वप्रसादाकाङ्क्षिणं विद्यावन्तं साधकमवलोक्य शरीरपरित्यागसमये तद्विषय[4]संपन्नप्रसादस्तस्मिन् संसारमलकलङ्कापकर्षिणीमनुग्रहदृष्टिं निदधाति । तदनुग्रहविशेषेणासौ विगलितसांसारिकमलः प्रकाशितात्मज्योतिर्मूर्धन्यनाड्या निर्गत्यार्चिरादिना तदीयं परं पदमप्राकृतं निरतियानन्दस्वभावं संप्राप्य तदाकारो भूत्वा नित्यनिरतिशयानन्दस्वरूपो भवति । तस्मादविदुषो विदुषश्च गतिवैषम्यमस्तीति युक्तमेव ॥ १६ ॥

॥ रश्म्यनुसारी ॥ १७ ॥

पूर्वत्र साधकस्य हृदयगतपरमेश्वरानुगृहीतस्य मूर्धन्यनाड्या निर्गम उक्तः । निर्गतस्य तदूर्ध्वगमनं निशि दिवा च संभवतीति संशयः । किं तावत् प्राप्तम् । "यत्रैतदस्माच्छरीरादुत्क्रामत्यथैतैरेव रश्मिभिरूर्ध्वमुत्क्रामति" इति समुत्क्रान्तस्य रश्मिसंबन्धेनोर्ध्वदेशाक्रमणमवगम्यते । रश्मिसंबन्धस्तु[5] दिवैव संभवति । न तु रात्राविति प्राप्ते ब्रूमः । उत्क्रान्तो विद्वान्[6] रश्मिसंबन्धादेवोर्ध्वं गच्छतीति सत्यम् । स तु दिवा च रात्रौ च संभवतीति । दाह्ने[7]वूष्मदर्शनेन निश्यपि रश्मिसत्त्वात् । तस्माद्दिवा च रात्रौ च रश्म्यनुसारी गच्छत्यूर्ध्वमिति निर्णयः ॥ १७ ॥

आशङ्क्य परिहरति ॥

१–म्वभित्तिस्थानीया इति पा०
२–लविकर्मलयं इति पा० ।
३ समर्पित–इति पा० ।
४ तन्नियत–इति पा० ।
५–न्धोऽवगम्यते स तु इति पा० ।
६ स चायमुत्क्रान्तो इति पा० ।
७ भावेषु–इति पा० ।

॥ निशि नेति चेन्न संबन्धस्य
यावद्देहभावित्वाद्दर्शयति च ॥ १८ ॥

निशि मृतस्यापि रश्मिसंबन्धेन[1] ब्रह्मप्राप्तिरभिहिता । सा न संभवति ।

"दिवा च शुक्लपक्षश्च उत्तरायणमेव च ।
मुमूर्षतां प्रशस्तानि विपरीतं तु गर्हितम्" ॥

इति निशामरणनिन्दनात् । इति चेन्न । संसारबन्धस्य यावद्विद्याभावित्वात् । विद्ययानारब्धकार्येषु बन्धहेतुषु कर्मसु नाशितेषु वर्तमानस्य प्रारब्धस्यापि यावच्चरमदेहावसानभावित्वाच्चरमे देहावसाने प्रारब्धेऽपि नष्टे सति पुनर्ब्रह्माप्राप्तिवचने हेत्वभावात् । तथा दर्शयति श्रुतिः । "तस्य तावदेव चिरं यावन्न विमोक्ष्येऽथ संपत्स्ये" इति । निशानिन्दा त्वितर[2]पुरुषविषया । अतो निश्यपि मृतस्य ब्रह्मप्राप्तौ न विरोधः ॥ १८ ॥

॥ अतश्चायनेऽपि दक्षिणे ॥ १९ ॥

अत एव बन्धहेत्वभावादेव दक्षिणायनमृतस्यापि विदुषो ब्रह्मप्राप्तिरस्त्येव ॥ १९ ॥

॥ योगिनः प्रति च स्मर्यते स्मार्ते चैते ॥ २० ॥

ननु विदुष एव मुमूर्षून् प्रति पुनरावृत्तिहेतुत्वेन कालविशेषः स्मर्यते ।

"यत्र काले त्वनावृत्तिमावृत्तिं चैव योगिनः ।
प्रयाता यान्ति तं कालं वक्ष्यामि भरतर्षभ ॥
अग्निर्ज्योतिरहः शुक्लः षण्मासा उत्तरायणम् ।
तत्र प्रयाता गच्छन्ति ब्रह्म ब्रह्मविदो जनाः ॥
धूमो रात्रिस्तथा कृष्णः षण्मासा दक्षिणायनम् ।
तत्र चान्द्रमसं ज्योतिर्योगी प्राप्य निवर्तते ॥
शुक्लकृष्णे गती ह्येते जगतः शाश्वते मते ।
एकया यात्यनावृत्तिमन्ययावर्तते पुनः" ॥

इति । तस्मादविद्वद्विषया निशादक्षिणायननिन्देत्ययुक्तमिति शङ्कोत्तरमिदं सूत्रम् । विदुषामर्चिरादिगतिः, तद्विपरीतान्येषामिति । योगिनो योगयुक्तादिना, नतु विदुषः प्रति मरणकालविशेषः स्मर्यते ।

"नैते पार्थ गती जानन् योगी मुह्यति कश्चन ।
तस्मात् सर्वेषु कालेषु योगयुक्तो भवार्जुन" ॥

१ रश्म्यनुसारेण इति पा० ।
२–नित्यपुरुषार्थवि–इति पा० ।

इत्युपसंहारात्, "अग्निर्ज्योतिः", "धूमो रात्रिः" इति श्लोकयोर्देवयानपितृयानगतिप्रत्यभिज्ञानाच्च, "यत्र काले तु" इति कालशब्दस्त्वातिवाहिकगणस्य कालाभिमानिदेवताभूयस्त्वात् । अतः सर्वथा विदुषां[1] ब्रह्मप्राप्तौ निशादक्षिणायनकृष्णपक्षनिषेधो नास्त्येव । यदा देहापगमस्तदानीमेव तत्प्राप्तिरिति[2] ॥ २० ॥

इति श्रीकण्ठशिवाचार्यविरचिते ब्रह्ममीमांसाभाष्ये चतुर्थाध्यायस्य द्वितीयः पादः ॥ २ ॥ :: :: ॥

॥ अथ वेदान्तसूत्रशैवभाष्यसंबन्धिचतुर्थाध्यायस्य ॥

॥ तृतीयपादारम्भः ॥

॥ अर्चिरादिना तत्प्रथितेः ॥ १ ॥

पूर्वत्रोपासकस्य हृदयगतपरमेश्वरानुग्रहेण प्रकाशितद्वारस्य मूर्धन्यनाड्या देहाविक्रान्तिरभिहिता । एवंविधस्य ब्रह्मप्राप्तिरर्चिरादिना मार्गेण, उतान्यथापि संभवतीति, प्रथममिह विचार्यते । तथाह्येकत्र[3], "यत्रासौ केशान्तो विवर्तते, व्यपोह्य शीर्षकपाले, भूरित्यग्नौ प्रतितिष्ठति, भुव इति वायौ, स्वरित्यादित्ये, मह इति ब्रह्मणि, आप्नोति स्वाराज्यम्" इति[4] ब्रह्मप्राप्तेरर्चिरादिगतिमन्तरेणाप्युपपत्तिरवगम्यते । तस्माद् ब्रह्मप्राप्तौ नार्चिरादिनियम इति प्राप्तेऽभिधीयते । विद्वानर्चिरादिनैव ब्रह्म प्राप्नोति । पञ्चाग्निविद्यादिषु "तेऽर्चिषमभिसंभवन्ति" इत्यादिनार्चिरादेर्ब्रह्मप्रापकत्वेन प्रसिद्धत्वात् । भूरित्यादिषु न ब्रह्मप्राप्तिमार्ग उच्यते । किंतु तत्तद्विभूतिप्राप्तिरेव । ततः परप्राप्तिरर्चिरादिनैव निरन्वयोपासकानां, नार्चिरादिरिति[5] केचित् ॥ १ ॥

॥ वायुशब्दादविशेषविशेषाभ्याम् ॥ २ ॥

अत्र श्रुतस्यार्चिरादिक्रमस्य मध्ये श्रुत्यन्तरसिद्धक्रमोऽत्र निवेशनीयः । अथवायमेव क्रमः । इति संदिह्यते । "तेऽर्चिषमभिसंभवन्त्यर्चिषोऽहरह्न आपूर्यमाणपक्ष आपूर्यमाणपक्षाद्यान्[7] षडुदङ्ङेति मासांस्तान्[8] मासेभ्यः संवत्सरं संवत्सरादादित्यमादित्याच्चन्द्रमसं चन्द्रमसो विद्युतं तत्[1] पुरुषोऽमानवः स एनान् ब्रह्म गमयति" इत्यर्चिरादिक्रमश्छान्दोग्यसिद्धः । बृहदारण्यके "यदा वै पुरुषोऽस्माल्लोकात् प्रैति स वायुमागच्छति तस्मै स तत्र विजिहीते, यथा रथचक्रस्य खं तेन स ऊर्ध्वमाक्रमते स आदित्यमागच्छति" इति संवत्सरादित्ययोर्मध्ये वायुः श्रुतः । स निवेश्यो न वेति संशये न निवेश्योऽश्रवणात् । इति प्राप्ते ब्रूमः । गुणोपसंहारन्यायेन संवत्सरादूर्ध्वमादित्यात् पूर्वं वायुर्निवेश्यः । बृहदारण्यक एवान्यत्र "मासेभ्यो देवलोकं देवलोकादादित्यम्" इति पठितेऽर्चिरादिक्रमे छान्दोग्यश्रुतित उपसंहार्यान्मासाधिककालरूपत्वेन मासेभ्य उपरि निवेशनीयात् संवत्सरादुपरि देवलोकः श्रुतः । सोऽपि वायुरेव । देवलोकशब्दो देवानां लोक इति व्युत्पत्तेरविशेषेण वायुवाचको, वायुशब्दस्तस्यैव विशेषेण वाचक इत्यविशेषविशेषाभ्यां देवलोकवायुशब्दाभ्यां वायुरेक एवाभिहित इत्यब्दादूर्ध्वमादित्यात् पूर्वं वायुर्निवेश्यः । "वायुर्देवानामासनभूत" इति श्रूयते । "योऽयं पवत एष देवानां गृह"[2] इति ॥ २ ॥

तडितोऽधिवरुणः संबन्धात् ॥ ३ ॥

कौषीतकिनामुपनिषदि श्रूयते । "स एतं देवयानं पन्थानमापद्याग्निलोकमागच्छति स वायुलोकं, स वरुणलोकं स ब्रह्मलोकम्" इति । तत्राग्निलोकशब्दोक्तस्यार्चिषः प्राथम्यमविरुद्धम् । वायोरादित्यस्य च श्रुत्यन्तरसिद्धश्रौतक्रमेणात्रत्यपाठक्रमबाधात् । संवत्सरादूर्ध्वं क्रमेण विनिवेशः । अत्र वरुणादयोऽपि श्रुताः[3] ।

तेऽर्चिरादिमार्गे निवेशयितुं शक्या उत न शक्या इति संशये नियामकाभावादशक्यसंनिवेशा इति प्राप्ते ब्रूमः । वरुणादीनामपि संनिवेशः कार्यः[4] । तत्र विद्युल्लोकस्योपरि वरुणलोकस्य संबन्धवशाद् व्यवस्था युक्ता । विद्युत्पूर्वकवृष्टिगतनीरस्य वरुणोऽधिपतिः प्रसिद्ध इति विद्युद्वरुणयोः

---

१ योगिनामर्चिरादिका, तद्विपरीतान्येषाम्, इति गती स्मर्यते । "नैते पार्थ गती जानन् योगी मुह्यति कश्चन । इत्यादौ । अतः सर्वथा योगिनां इत्येव पा० ।

२ तदानीमेवास्य तत्सिद्धिरिति इति पा० ।

३ तथाहि इति पा० ।

४ इत्यादिषु इति पा० ।

५–नेति । निरन्वयोपासकानामनियम इति इति पा० ।

६ अथार्चिष–इति पा० ।

७–षड्यान् इति पा० ।

८ मासान् इति पा० ।

१–तं च इति पा० ।

२–क्रमः । श्रुत्यन्तरे 'स वायुमागच्छति, स आदित्यमागच्छति' इति संवत्सरादित्ययोर्मध्ये वायुः श्रुतः । स तत्र निवेश्यो न वेति । तत्र निवेशयितुमयुक्त एव । तथाश्रवणात् । इति प्राप्ते ब्रूमः । गुणोपसंहारन्यायेन संवत्सरादित्ययोर्मध्ये वायुर्निवेश्यः । बृहदारण्यके संवत्सरादुपरि देवलोकः श्रुतः । सोऽपि वायुवाचक एव । देवानां लोक इत्यविशेषेण वायुशब्दश्च तत्रैव विशेषेण वाचक इत्यविशेषविशेषाभ्यां वायुरेक एवाभिहित इत्यब्दादूर्ध्वमादित्यात् पूर्वं वायुर्निवेश्य इति पा० ।

३ कौषीतक्युपनिषदि 'स वरुणलोकं, स इन्द्रलोकं स प्रजापतिलोकम्' इति वरुणादयोऽपि श्रुता भवन्ति । इति इति पा० ।

४ अत्र वरुणादीनां मध्ये संनिवेश एव इति पा० ।

संबन्धः। तदनन्तरमिन्द्रप्रजापतिलोकौ परिशेषात्। इत्यविरोधः[1] ॥ ३ ॥

॥ आतिवाहिकास्तल्लिङ्गात् ॥ ४ ॥

अर्चिरादयो मार्गचिह्नभूताः स्थानभेदा उत विदुषां गमयितारो देवताविशेषा इति संदेहः[2]। किं तावत् प्राप्तम्। स्थानभेदाः। तल्लाञ्छनसत्त्वात्। लोके हि[3] ग्रामान्निर्गत्य नदीं गत्वा ततो घोषः प्राप्तव्य इति व्यवहरन्ति। तद्वदर्चिरादयोऽपीति प्राप्तेऽभिधीयते। अर्चिरादयो मार्गाभिमानिनो विदुषां गमयितारो देवताविशेषा एव। "तत्पुरुषोऽमानवः स एतान् ब्रह्म गमयति" इति विद्युत्पुरुषस्य गमयितृत्वलिङ्गेनार्चिरादीनामविशेषनिर्दिष्टानामपि गमयितृत्वमेव संबन्ध इति निश्चय उपपन्नः[4] ॥ ४ ॥

॥ उभयव्यामोहात् तत्सिद्धेः ॥ ५ ॥

उभयेषामर्चिरादिरादिमार्गस्य तद्गन्तॄणां च व्यामोहात्, मार्गाज्ञानात्, तत्सिद्धेः। तदभिमान्यातिवाहिकचेतनसिद्धेरित्यर्थः ॥ ५ ॥

विद्युत्पुरुषस्य ब्रह्मगमयितृत्वे वरुणादिभिः किं फलमित्यत आह ॥

॥ वैद्युतेनैव ततस्तच्छ्रुतेः ॥ ६ ॥

वैद्युतपुरुषात् परस्तात् स एव ब्रह्म गमयति। "तत्पुरुषोऽमानवः स एतान् ब्रह्म गमयति" इति श्रुतेः। वरुणादीनां तदनुग्राहकत्वेन गमयितृत्वमिति न विरोधः ॥ ६ ॥

॥ कार्यं बादरिरस्य गत्युपपत्तेः ॥ ७ ॥

किममानवः पुरुष उपासकान् साक्षादेव ब्रह्म गमयति, उतान्यमिति संशये पूर्वपक्षः। कार्यं हिरण्यगर्भमेव गमयति, अस्य हि गतिरुपपद्यते, न व्यापिनः परब्रह्मणः[5] ॥ ७ ॥

पुनरुपपत्तिमाह ॥

---

१ युक्ता विद्युत्संबन्धो वृष्टौ तत्संबन्ध आधिपत्येन वरुणस्य, ततो विद्युद्वरुणयोः संबन्धात्। विद्युतोऽनन्तरं वरुणः, तदनन्तरमिन्द्रप्रजापतिलोकौ, तद्विशेषसंबन्धादेवाविरोधः ॥ इति पा०।

२ इह श्रूयमाणा अर्चिरादयो देवताविशेषा उत स्थानभेदा इति संदेहः इति पा०।

३ अर्चिरादयो मार्गभेदाः। न देवताविशेषाः। तत्तल्लाञ्छनसंभवात्। तथाहि लोके इति पा०।

४–त्पुरुषस्य गमयितृत्वचेतनलिङ्गाद्विदुषामातिवाहिका इति विज्ञायते ॥ ४ ॥ इति पा०।

५ इह 'तत्पुरुषोऽमानवः स एतान् ब्रह्म गमयति" इति ह्यत्र तत्पुरुषोऽमानव उपासकान् प्रजापतिलोकान् परंपरया, साक्षाद् ब्रह्म गमयति, उतान्यदिति संशयः। तथा सति मतान्तरेण पूर्वः पक्षः प्रवर्तते। कार्यं हिरण्यगर्भमेवार्चिरादिनामानवो गमयत्युपासकान्। अस्य हि गत्युपपत्तिः। न व्यापिनि परब्रह्मणि। ततः कार्यं हिरण्यगर्भं परिच्छिन्नमिति बादरिः। हिरण्यगर्भस्य कार्यत्वं "हिरण्यगर्भं पश्यत जायमानम्" इति विश्वाधिकस्य ब्रह्मणः प्रथमकार्यत्वमस्यावगम्यते ॥ ७ ॥ इति पा०।

॥ विशेषितत्वाच्च ॥ ८ ॥

ब्रह्म गमयतीत्यत्र ब्रह्मलोकं गमयतीति। "प्रजापतेः सभां वेश्म प्रपद्ये" इति विशेषितत्वात्। अतश्च हिरण्यगर्भपदमेव गमयति ॥ ८ ॥

॥ सामीप्यात् तु तद्व्यपदेशः ॥ ९ ॥

ब्रह्म गमयतीति ब्रह्मव्यपदेशस्तु हिरण्यगर्भस्य तत्सामीप्यात्। "हिरण्यगर्भं पश्यत जायमानम्" इति प्रथमकार्यत्वश्रवणादस्य सामीप्यम् ॥ ९ ॥

॥ कार्यात्यये तदध्यक्षेण
सहातः परमभिधानात् ॥ १० ॥

प्रथमं हिरण्यगर्भपदप्राप्तावपि तदनावृत्तिश्रुतिर्न विरुध्यते। हिरण्यगर्भलोकात्यये तदध्यक्षेण सहातः परं कार्यब्रह्मलोकात् परं परमपदं[1] गच्छन्तीति। तथाभिधीयते।

"ते ब्रह्मलोके तु परान्तकाले
परामृतात् परिमुच्यन्ति सर्वे"।

इति श्रुत्या। अतो न विरोधः ॥ १० ॥

॥ स्मृतेश्च ॥ ११ ॥

"ब्रह्मणा सह ते सर्वे संप्राप्ते प्रतिसंचरे।
परस्यान्ते कृतात्मानः[2] प्रविशन्ति परं पदम्"॥

इति स्मृतेरप्येवमवगम्यते। अतो हिरण्यगर्भपदमर्चिरादिगणो नयति प्रथमम्। ततः प्रलये परब्रह्मण एवोपादानावस्थान्तरत्वेन तत्र ब्रह्मव्यपदेशस्य प्राप्यत्वं दृश्यते। अतश्च तमेव गमयतीति[3] ॥ ११ ॥

॥ परं जैमिनिर्मुख्यत्वात् ॥ १२ ॥

ब्रह्म गमयतीति हिरण्यगर्भात् परमुत्कृष्टं नारायणमेव अर्चिरादिर्गमयति। परब्रह्मण एवोपादानावस्थान्तरत्वेन ब्रह्मव्यपदेशस्य मुख्यत्वादिति जैमिनिः ॥ १२ ॥

तत्रोपपत्तिमाह ॥

॥ दर्शनाच्च ॥ १३ ॥

"सोऽध्वनः पारमाप्नोति तद्विष्णोः परमं पदम्"।

इति तत्पदस्य प्राप्यत्वं दृश्यते। अतश्च तमर्चिरादिर्गमयतीति ॥ १३ ॥

॥ न च कार्ये प्रत्यभिसंधिः ॥ १४ ॥

१–तः परमपि इति पा०।

२ अनावृत्तिपदं भूयः इति पा०।

३ प्रथमम्। ततः प्रतिसंचरे ब्रह्म प्राप्यं तेन सहेति इति पा०।

"प्रजापतेः सभां वेश्म प्रपद्ये[१]" इति युक्तम् । न[२] तत्र कार्ये हिरण्यगर्भे प्रत्यभिसंधिः । प्रजापतिशब्दस्य प्रजापालनत्वेन नारायणवाचकत्वसंभवात्[३] । यदुक्तम् ।

"ते ब्रह्मलोके तु परान्तकाले परामृतात् परिमुच्यन्ति सर्वे" ।

इति । तत्रापि ब्रह्मशब्दो नारायणपरः । तस्य लोके पदे स्थित्वा योगिनः परान्तकाले पश्चिमदेहसमाप्तौ परामृतं विश्वाधिकं ब्रह्म प्राप्य मुक्ता भवन्तीति न विरोधः । "एतानि ह वा अमृतस्य नामधेयानि" इत्यादौ शिवस्य परब्रह्मणोऽमृतशब्दाभिधेयत्वमनादिमुक्तत्वं चावगतम् । अतो विष्णुपदे प्रारब्धकार्यदेहावसाने प्रारब्धभोगपर्यन्तं स्थित्वा योगिनः परामृतं विश्वाधिकं ब्रह्म प्राप्य मुक्ता भवन्तीति ॥ १४ ॥

अथ सिद्धान्त[४] उच्यते ॥

॥ अप्रतीकालम्बनान्नयतीति बादरायण उभयथादोषात् तत्क्रतुश्च ॥ १५ ॥

प्रतीकालम्बना हि ते ये चेतनमचेतनं वा ब्रह्मदृष्ट्या केवलमुपासते । अप्रतीकालम्बनास्तु ते ये विश्वाधिकं ब्रह्म साक्षादुपासते । "परं[५] ज्योतिरुपसंपद्य स्वेन रूपेणाभिनिष्पद्यते" ।

"उमासहायं परमेश्वरं प्रभुं
त्रिलोचनं नीलकण्ठं प्रशान्तम् ।
ध्यात्वा मुनिर्गच्छति भूतयोनिं
समस्तसाक्षिं तमसः परस्तात्" ॥

इत्यादिषु साक्षाद् ब्रह्मप्राप्त्यवगमात् । पूर्वोक्तपक्षद्वयेऽपि दोषः श्रुतिविरोधाद्भवति । तत्क्रतुर्ब्रह्मोपासको ब्रह्मैव गच्छति । न मध्ये विलम्बते । प्रयोजनाभावात् । सकलकार्यसमष्टिरूपाद्धिरण्यगर्भात् परो नारायणस्तदुपादानत्वात् । ततोऽपि परं शिवाख्यं निमित्तं विरूपाक्षं परं ब्रह्म सर्वज्ञं सर्वशक्तिकं नित्यतृप्तं स्वतन्त्रं स्वप्रकाशमिति । तथा शिवसंकल्पोपनिषदि ।

"परात् परतरो ब्रह्मा[६] तत्परात् परतो हरिः ।
तत्परात् परतोऽपीशः",

इति । रेफश्छान्दसः । अन्यत्र च ।

"नारायणपरं ब्रह्म" ।

इति नारायणात् परत्वेन ब्रह्माभिधीयते । तत् कीदृशमित्याकाङ्क्षायाम् । "ऋतं सत्यम्" इति मन्त्रेण सर्वज्ञतया मनोवाग्विपर्यासरहितं स्वशक्तिमरीचिभिः सकलजगत्पूरकं[१] स्वाविभक्तया परप्रकृतिरूपया परमानन्दचिदेकरसपरमाकाशलक्षणया स्वावस्थाभेदपरमचेतननारायणारब्धहिरण्यगर्भादिसकलकार्यप्रपञ्चया परशक्त्योमया शवलितरूपं[२] निर्विकारं[३] त्रिलोचनं[४] परं ब्रह्म सर्वोत्तरमिति निरूपितम् । "विश्वाधिको रुद्र" इति च विश्वस्मादधिकत्वेन चावगतम् । तस्माद्धै[५]दिकानामतः परं कल्पयितुमन्याय्यमेव ॥ १५ ॥

॥ विशेषं च दर्शयति ॥ १६ ॥

ब्रह्मणो विश्वाधिकस्य तदवस्थाभेदस्योपादानस्य विष्णोस्तत्कार्यभूतस्य हिरण्यगर्भस्य च विशेषं दर्शयति श्रुतिरेव ।

"परात् परतरो ब्रह्मा" "हिरण्यगर्भं पश्यत जायमानम्", "पुरुषो वै रुद्र"

इत्यादिका । ततश्च ब्रह्म विष्णोः पदम् । परब्रह्मणः शिवस्य पदं परमाकाशरूपं परमानन्दमयममानवः पुरुषो गमयतीत्येव युक्तम् । यच्छङ्कितम् ।

"सोऽध्वनः पारमाप्नोति तद्विष्णोः परमं पदम्" ।

इति । तत्र विष्णुशब्दः परब्रह्म[६]वाचकः । यद्विधस्याध्वनः पारं तदतीतं पदं विश्वाधिकस्य शिवस्यैवोपपन्नम्[७] । यद्वा, विष्णोः प्रपञ्चावस्थितस्य परमुत्कृष्टं परं स्वरूपं परमाकाशरूपं परमानन्दलक्षणं शिवस्य परब्रह्मणः पदमेव । यत्रासौ निहितात्मा प्रपञ्चाकारोऽपि न संसरति । अतो न कश्चन विरोधः[८] ।

अत्र केचित् "परान्तकाले परामृतात् परिमुच्यन्ति सर्वे" इति श्रुतेः परब्रह्मणः शिवस्य परमविभूतित्वेन ये विष्णुमुपासते, ते तदवस्थत्वाद् ब्रह्मशब्दवाच्यस्य तस्य लोकं प्राप्य प्रादुर्भूततद्विभूतयः परान्तकाले चरमदेहावसाने परामृतं शिवं प्राप्य मुक्ता भवन्तीति विष्णूपासकानामर्चिरादिना विष्णुपदप्राप्तेः पूर्वं, विलम्बेन[९] शिवपदप्राप्तिरिति वचनादत्र न विरोधः ॥ १६ ॥ •

इति श्रीकण्ठशिवाचार्यविरचिते ब्रह्ममीमांसाभाष्ये चतुर्थस्याध्यायस्य तृतीयः पादः ॥ ४ ॥ ;; ;; ॥

१ प्रपद्यत इति सर्वत्र पा० ।
२ यदुक्तं न इति पा० ।
३—कत्वेनापि इति पा० ।
४—न्तीति सिद्धान्त उच्यते ॥ १४ ॥ इति पा० ।
५—सते । साक्षाद् ब्रह्मोपासकान् साक्षात्पुरुषः साक्षाद् ब्रह्मैव गमयति । यद्विश्वाधिकं कृष्णपिङ्गलं विरूपाक्षं श्रूयते । हिरण्यगर्भं नारायणो गमयति । इत्युभयथादोषः साक्षाद्ब्रह्मोपासकस्य, परं इति पा० ।
६ परात् परतरं ब्रह्म इति पा० ।

१—त्पूरकतया पुरुषशब्दवाच्यम् । इति पा० ।
२—तद्रूपतया कृष्णपिङ्गलं इति पा० ।
३ निर्विकारित्वादूर्ध्वरेतसं इति पा० ।
४—चनं त्रीक्षणतया इति पा० ।
५—ति श्रुतेर्विश्वस्मादधिकत्वेनास्य श्रुतत्वाद्वै—इति पा० ।
६—ह्म उपादानपरब्रह्म— इति पा० ।
७—दमीशशब्दो वक्ति । विश्वाधिकस्य शिवस्यैवोपपन्नत्वात् इति पा० ।
८—पि न सज्जति । अतश्चाविरोधः इति पा० ।
९—प्तिपूर्वकं वैष्णवेन इति पा० ।

THE VIDVAN-MANO-RANJINI'

OR

REJOICER OF THE MIND OF THE LEARNED,

A COMMENTARY ON SAD-ÁNANDA'S VEDÁNTA-SÁRA, BY RÁMA-TÍRTHA.

(*Continued from page 236.*)

[*Because without abandoning*] the subtile [*body, it enters into all the gross bodies.*] The subtile body is the causal body. The body which is grosser than this, is the evidentiary body. It enters into the most gross body to which these and other bodies belong. Thus there are three concomitants or illusory determinants of individuated spirit. In dreamless sleep &c., mere illusion tinged by the retenta of the understanding &c. is the concomitant. In ordinary sleep the evidentiary body composed of the retenta of waking experience is the concomitant. In the waking state the gross body conjoined with the subtile body is the concomitant. The title, then, of pervader is given to spirit conceiting itself to be the place of the fruition of gross things because it enters into all bodies, since it enters into the last concomitants only when characterised by the first concomitant. Another explanation is that the subtile body is the evidentiary body, and the reason is explained to be that the intelligence enters into the modifications of visual and other senses which have received the form of their objects, which originate in the gross body, the various ruler, and the distributive aggregate, without abandoning the evidentiary body. Taking the reading of some copies Without abandoning the gross body, the reason may be explained by understanding that the intelligence, while existing in the gross body, occupies at the same time the subtile and causal bodies. We mean that in any case intelligence thus conditioned is called the pervader because it resides in all bodies.

[*The distributive aggregate*] *thereof also* [*is the gross body of the pervader; and since it is a modification of the food it is called the nutrimentitious sheath; and since it is the place of fruition of gross things it is called the awake.*] This is to be explained as above.

This &c. This means the distributive aggregate. As in former cases the author describes articulately the peculiar fruition of the pervader and spirit of mankind when in the waking state, together with the modes in which it takes place.

Then [*these two cognise sounds, touches, colours, tastes, and smells, by means respectively of the five organs of sense of which the ear is the first, which are presided over, in their order, by the Sky, the Wind, the Sun, the Regent of the waters, and the Aśvins; again they are concerned about speaking, handling, walking, evacuating, and enjoying, by means respectively of the five organs of action, of which the voice is the first, which are presided over respectively by Agni, Indra, Upendra, Yama, and Prajápati; and lastly they are conversant about judging, determining, self-conceit, and cogitation, by means respectively of the four internal organs called the common sensory, the understanding, self-conceit, and cogitation, which are presided over in their order by the Moon, Brahmá, Śiva, Vishnu. Thus these two are conversant about all gross objects.*] These two by means of the ear and other four organs, presided over by the Sky and four other deities, cognise according to the order of the text the gross objects, beginning with sounds and ending with smells. This is the construction in each of the clauses. That is to say, these two, by means of the voice and four other organs of action presided over by Agni and four other deities, are conversant about speaking and four other operations, of which enjoyment is the last. In like manner they experience by means of the common sensory and three other internal organs, presided over by the Moon and three other deities, the operations of which judgment is the first and cogitation the last.

[*They two experience*] all these. That is, they experience according to their respective order all these objects of gross fruition. For this the author cites authority.

According to the text, The soul, in its waking state outside, &c. The words *et cætera* indicate the remain-

---

सूक्ष्मेति । सूक्ष्मशरीरं कारणशरीरं तदपरित्यज्यस्थूलशरीरादो तदपेक्षया स्थूलशरीरं लिङ्गशरीरं तदादिर्यस्य परमस्थूलशरीरस्येति तद्गुणसम्विज्ञानो-बहुब्रीहिः तस्मिन् प्रवेष्टृत्वात् । तथाहि जीवस्य त्रयउपाधयः सुषुप्त्यादो बुद्ध्यादिसंस्कारोपरञ्जितमज्ञानमात्रमुपाधिः । स्वप्ने जाग्रद्वासनामयंलिङ्ग शरीरं उपाधिः जाग्रदवस्थायान्तु सूक्ष्मशरीरसंसृष्टस्थूलशरीरमुपाधिः । तथाच पूर्व्वोपाधिविशिष्टस्यैवोत्तरोपाधिप्रवेशात् सर्व्वशरीरप्रवेष्टृत्वेन स्थूलभोगायतनाभिमानिनो विश्वइति संज्ञेति यद्वा सूक्ष्मशरीरं लिङ्गशरीरं तदपरित्यज्य स्थूलशरीरं विराड्व्यष्टिस्तदादिर्यासांचक्षुरादिवृत्तीनां तत्तद्विषयाकाराणां तत्प्रवेष्टृत्वादिति हेतुयोजना । स्थूलशरीरमपरित्यज्येति क्वचित्पाठे स्थूलशरीरे वर्तमानस्यैव सूक्ष्मशरीरकारणशरीरयोरप्यनुगतत्वादिति हेत्वर्थोऽनुसन्धेयः । सर्व्वथा विश्वशरीरवर्त्तित्वाद्विश्वइत्युक्तं भवतीति भावः ॥

अस्यापीति । पूर्व्ववत् ॥

एषेति । व्यष्टिरुच्यते । पूर्व्ववद्विश्ववैश्वानरयोरपि जाग्रत्स्थित्यवस्थापन्नं भोगविशेषं सप्रकारं प्रपञ्चयति ॥

तदानीमित्यादिना । दिगादिपञ्चदेवतानियन्त्रितेन श्रोत्रादीन्द्रियपञ्चकेन यथा पाठक्रमं शब्दादिगन्धान्तान् स्थूलविषयाननुभवतइति प्रत्येकं योजनीयं अग्न्यादिदेवतापञ्चकनियन्त्रितवागादिपञ्चकेन वचनाद्यानन्दान्तान् । तथा चन्द्रादिदेवताचतुष्टयनियन्त्रितेन मनआदि चतुष्केण संकल्पादिचित्तान्ताश्चतुरः ॥

एतद्व्यष्टीति । व्यष्टिस्थूलशरीरोपहितस्य विश्वशब्दवाच्यत्वे हेतुमाह ॥

der of the text, viz. Enjoying the gross, the spirit of humanity. Here we should bear in mind that in the waking state there practically exist those who know the truth, the criteria of truth, and the truths knowable. Of these one who ascertains a matter by criteria of truth is he who knows the truth; that whereby he ascertains it is a criterion. This is a position allowed in all the systems. In the next place we have to consider by what relation does the ascertainer of the truth, that is the individuated spirit, conscious soul ascertain what he does ascertain. Some one may say that it does so mediately through a conjunction successively of the soul, the internal organ, the sense-organ, and the object. This view we repudiate, for it would follow from it that all things would be simultaneously presented, mediately through a conjunction existing in the senses conjunct with the objects, the internal organ conjunct with the senses, and the soul conjunct with the internal organ [because the soul is omnipresent, and the organs in constant proximity to objects.] But if you rejoin that there is no super-extensiveness [that is, too much is not proved], because the presentation would be co-extensive with the connection between the organs and their objects; we disallow this rejoinder since the amount of connection between objects and organs cannot be precisely determined. And if you reply again, that only so much is presented as reveals itself objectively after concurrence with the sense-organs; we demur, for in this case, the object self-manifested being determined by the extent of juxta-position to the sense-organs, and the amount of juxta-position to the sense-organs being determined by that, there results a mutual dependency or logical seesaw. Moreover the aforesaid juxta-position having been shown to exist only during the production of the cognition, and there being reason to suppose that it perdures after the cognition is produced, it would follow that absence of cognition would be associated with the presence of the object, and thus it would follow that there could be no representation of the relation of the cognition to self, in the form I have known this. Nor can you reply that this relation may exist by virtue of its substratum the soul, for if cognition has the omnipresent soul as its substratum, there will follow a simultaneous cognition of all objects, cognition being connected with all objects at the same time. But if you say that cognition inheres only in that part of the soul which is appropriated to the body, it will follow that nothing can be presented, for the body has no connection with external percepts. Some one may reply that though there be no such connection, cognition of the object preferred, whether of knowledge or the knowable, produces intensity of manifestation, and thus there is no difficulty. This we disallow, since we observe that intensity of manifestation is produced by cognition of undesirable objects, such as malodours. Again, should any one argue that a determinate amount of manifestation arises by reason of the desert of the cogniser; we refuse this argument, the fact being otherwise accounted for, the efficacy of works producing only the visible causes of perception, and there being no help for the refusal. This argument then is null, and we must affirm that there is a fixed order of practical apprehension of objects by individuated spirits.

सर्व्वानेतानिति । यथायथं यथाक्रमानुरोधेन सर्व्वानेतान् स्थूलभोगान् विषयाननुभवतइत्यर्थः । अत्रापि प्रमाणमाह ॥

जागरितेति । आदिशब्दात्स्थूलभुग्वैश्वानरइति वाक्यशेषग्रहः । इदमत्र बोद्धव्यं जाग्रदवस्थायां हि प्रमातृप्रमाणप्रमेयव्यवहाराभवन्ति । तत्र प्रमाणैर्योऽर्थं प्रमिणोति स प्रमाता येन प्रमिणोति तत् प्रमाणं यत्प्रमीयते तत्प्रमेयमिति सर्व्वतन्त्रसिद्धान्तः । तत्र यः प्रमाता जीवश्चेतनः स विषयं प्रमिन्वन् कया प्रत्यासत्त्या प्रमिणोतीति विचारणीयं । आत्ममनइन्द्रियविषयक्रमेण संयोगपरम्परयेति चेन्न । विषययुक्ततत्संयुक्तेर्व्वापि संयोगपरम्परया युगपत्सर्व्वावभासप्रसङ्गात् यावदिन्द्रियसम्बन्धस्तावदेव भासेतेति नातिप्रसङ्ग इति चेन्न इन्द्रियसन्निकर्षस्य इयत्तानवधारणात् इन्द्रियसन्निकर्षानन्तरं योऽर्थः स्फुरति तावन्मात्रं सन्निकृष्यतइति चेन्न इन्द्रियसन्निकर्षस्येयत्तावधारणात् स्फुरणस्य विषयनियमः तस्मिन् सतीन्द्रियसन्निकर्षेयत्तावधारणमिति परस्पराश्रयात् । किञ्चोक्तसन्निकर्षस्य ज्ञानोत्पत्तिमात्रे कृतत्वात्तदनन्तरं तस्यावस्थाने कल्पकाभावादज्ञानस्य विषयेण सम्बन्धः स्यात्तथाच मयेदं विदितमिति आत्मनि सम्बन्धानुसन्धानाभावप्रसङ्गः । नचाश्रयद्वारा सम्बन्धइतिवाच्यं ज्ञानस्य सर्व्वगतात्माश्रयत्वे युगपत्सर्व्वविषयसम्बन्धात् सर्व्वावभासप्रसङ्गः । देहावच्छिन्नात्मप्रदेशाश्रितत्वे देहस्य बाह्यविषयासम्बन्धान्नबाह्यं किञ्चिदपि भायात् । ननु सम्बन्धाभावेपि ज्ञानज्ञेययोरुद्दिष्टे विषये ज्ञानमतिशयं जनयतीति नाव्यवस्थेति चेन्न । अनुद्दिष्टेष्वपि दुर्गन्ध्यादिषु ज्ञानकृतातिशयदर्शनात् अदृष्टवशात् किञ्चिदेव भासतइति चेन्न तस्य दृष्टसामग्रीसम्पादकत्वेनान्यथासिद्धत्वादगतिकत्वाच्च तस्माच्च किञ्चिदेतदतोवक्तव्या जीवस्य विषयग्रहणव्यवहारेव्यवस्थेति तदुच्यते न तावदस्मिन्मतेऽनुपपत्तिरस्ति यतो जीवस्य सर्व्वगतत्वासर्व्वगतत्वपक्षयोरप्यन्तःकरणकृता व्यवस्था सम्भवति तथाहि अपरिच्छिन्नपक्षे तावदन्तःकरणमेव मनोबुद्ध्यादिशब्दवाच्यं प्रमातृत्वादिव्यवहारापादकं यतोऽविद्यावृततया सर्व्वत्राप्रकाशमानमप्यात्मचैतन्यमन्तःकरणसंसृष्टं सदवभासते दर्पणद्रव्यसंसृष्टरविरश्मिवत् । तदान्तःकरणमदृष्टादिसहायं विषयसंवेदनवेलायां तडागकुल्याक्षेत्रगतोदकप्रवाहवत् देहतद्बाह्यदेशतद्विषयानभिव्याप्यावतिष्ठते । तत्रच तिसृष्ववस्थासु आत्मचैतन्यं तदात्मनैवाभिव्यज्यते । तत्र देहमध्यान्तःकरणभागावच्छिन्नं चैतन्यं प्रमातृसंज्ञां लभते । देहविषययोर्म्मध्ये दीर्घप्रभाकारेणेन्द्रियद्वारानिर्गतान्तःकरणभागावच्छिन्नं प्रमाणसंज्ञां विषयमभिव्याप्य विषयाकारतयावस्थितान्तःकरणभागावच्छिन्नं प्रमेयसंज्ञामिति प्रमातृप्रमाणप्रमेयव्यवस्थोपपत्तिः एवमभ्युपगमे येन विषयेणसहेन्द्रियस्य सन्निकर्षो दूरेवान्तिकेवावतिष्ठमानेन तत्रैव तदाकारमेवान्तःकरणं परिणमतेनान्यत्र नान्याकारमिति चोपलभ्यते तदनुरक्तचैतन्यात्मनश्चैकत्वान्मयेदं विदितमिति सम्बन्धानुभवश्चोपपद्यते नान्यथापरिच्छिन्नात्मपक्षेऽपि जीवत्वोपाध्यन्तःकरणस्य पूर्व्वोक्तप्रकारेणावस्थाभेदसम्भवे उपाध्यनुगामित्वादुपस्थितस्य सोपाध्यन्तःकरणं यद्यदात्मनावतिष्ठते तत्तदात्मनाप्रत्यगात्मचैतन्यमप्यवभासमानं ग्राह्यग्रहणग्राहकभेदव्यवस्थामनुभवति अग्निरिवायः पिण्डादिसमारूढइत्यनवद्यं । न चेयं कल्पना तार्किककल्पनावत् पुरुषबुद्ध्युत्प्रेक्षामूला किन्तु श्रुतिमूला तथाच श्रुतयः यःसमानः सन् उभौ लोकावनुसञ्चरति ध्यायतीव लेलायतीवसुधीः स्वप्नोभूत्वेमं लोकमतिक्रामति। नवद्वारे पुरेदेही हंसोलेलायते बहिः । आसीनोदूरं व्रजति मनोमयोविज्ञानमयइत्याद्याः । उक्तञ्च भगवत्पादैः सर्व्वश्रुत्यर्थसंग्रहे दक्षिणामूर्त्तिस्तोत्रे नानाच्छिद्रघटो

We therefore reiterate that there is no incompetency in this doctrine of ours for whether the soul be ubiquitous or not, a fixed order determined by the internal organ is impossible. On the supposition of its ubiquity, it is only the internal organ that may be called the common sensory, the understanding, and so forth and which gives rise to the practical assurance of the knower and the knowable. For the intelligence of the soul being enveloped in illusion, must appear in commixture with the internal organ, like the rays of the sun commingled with the substance of the looking-glass. Then during an act of perception, the internal organ, to which the efficacy of works and the like is subservient, keeps pervading the body, the adjacent places, and the objects situated there, like a stream of water conducted into a field by a channel from a tank. In this internal organ during its three states [whether it be awake, dreaming or in dreamless slumber], the intelligence of spirit is manifested as identical therewith.

The intelligence therefore appropriated to the part of the internal organ then in the body, receives the appellation of the cogniser.

The intelligence which is appropriated to that portion of the internal organ which has issued forth in the form of a long ray of light through the senses between the body and the object, is called the instrument of knowledge or criterion of truth.

The intelligence appropriated to that portion of the internal organ which exists in the form of the object and which pervades the object, receives the name of the knowable object. Thus is established the order of the cogniser and the instrument, and the object of cognition.

If this be admitted, it follows that the internal organ is modified into such and such form and place according to the object to which there is juxta-position of the sense-organ whether near or remote, and not into any different form or place. And accordingly the intelligent spirit tinged by that internal organ being one, the consciousness of the relation I have known this, is competent, but not otherwise.

On the supposition that the soul is not ubiquitous, there being possible a plurality of states as aforesaid, in the internal organ which is the illusory concomitant of the individuated spirit, since the individuated spirit conforms to the internal organ, with whatever percept the internal organ together with its concomitant becomes identical, the self-conscious intelligence also being manifested as identical therewith, experiences an order differenced by the apprehensible object, the instrument of apprehension, and the apprehending person, just as fire which permeates an iron-ball.

And this hypothesis is not like the hypotheses of the dialecticians founded only on the speculations of the human intellect, but is grounded on revelation. Thus the texts: Being homogeneous to itself, it travels through both worlds, It ponders, it looks about, though highly wise it becomes a dream and passes beyond this world. The spirit is in a city with nine gates, the spirit looks about outside, while sitting travels far, Identical with mind, identical with sensation.

It has been said by a revered authority in the Sarva-śruty-artha-sangraha, in the Hymn to Śiva Dakshiṇá-múrti: He whose knowledge bright as the light of a lamp inside a jar perforated with holes [such as that to which adoration is performed in the Garbhá-pújá], flows outwards through the eye and other organs,—the whole world shines after him, as he shines, when it says I know; to him, the holy preceptor, be adoration, even to the holy fire.

There is also an argument as follows:—If the internal organ did not go outside the body to the place of the external object, and if it were admitted that mediately through juxta-position to the sense-organ it becomes identical with the object inside the body, then

---

दूरस्थितमहादीपप्रभाभास्वरंज्ञानं यस्य तु चक्षुरादिकरणद्वारा बहिः स्पन्दते । जानामीति तमेव भान्तमनुभात्येतत् समस्तं जगत् तस्मै श्रीगुरुमूर्त्तये नमइदं श्रीदक्षिणामूर्त्तयइति । युक्तिरपि मनसोबाह्यविषयदेशगमनाभावे इन्द्रियसन्निकर्षपरम्परया देहाभ्यन्तरे च विषयाकारतायाः स्वीकारे बहिरेतावति दूरेऽयं विषयोपलब्धइति प्रतिसन्धानं न स्यात् अनेकायामविस्तीर्णदेशवर्त्तिप्रष्ठरथगजाकारभावस्यान्तर्हृदयेऽनुपपत्तेः । नच स्वप्नवदुपपद्यते इति वाच्यं स्वप्नस्य मायामयत्वस्योक्तत्वात् जाग्रदपि मायामयमेवेति चेत्सत्यं तथापि स्वप्नात् व्यवहारसिद्धये तस्य कियदप्यस्ति वैषम्यं सति प्रमातरिबाध्यमानत्वाबाध्यमानत्वाभिमानादिलक्षणं । नन्वखण्डब्रह्माकारावृत्तिरन्तरे जायते इति चेत् बाढं साहि देहाद्यावरणमुपमर्द्दयन्ती जायते बाह्यविषया तु नैवमिति वैषम्यं स्यात् । किञ्च यदि विषयेन्द्रियसम्बन्धमात्रमन्तःकरणस्य विषयाकारताहेतुस्तदा दूरवर्त्तिविषयगतपरिमाणरूपसंख्यादीनामपितदाकाराकारितेऽन्तःकरणे यथावदवभासप्रसङ्गः । नच दूरत्वगुणाद्दोषात्तया नावभासते इति वाच्यं तस्येन्द्रियसम्बन्धमात्रे प्रतिबन्धकत्वाभावात् । ननु तवापीन्द्रियसंसृष्टाकारता मनसइति स्थिते कथं दूरस्य विषयेयत्ताद्याकारतामनसोनभवेदिति चेन्नैवं मम तु मनसोबहिरस्वातन्त्र्याद्यावद्भिरवयवैरवयविभिर्वा चक्षुःसन्निकर्षएतावन्मात्राकारमेव मनः परिणमतइति श्लिष्यते तव तु पदार्थसन्निकृष्टे इन्द्रिये ऽतितद्गतभूयस्त्वाल्पत्वदृढादृढत्वविशेषानादरेऽप्य ?स्तदाकारवृत्त्युदयोपपत्तेर्विषयेयत्तादेः स्फुरणं प्रसज्येतेति वैषम्यं स्यात् तस्मादस्ति प्रत्यक्षव्यवहारे बाह्यमनोवृत्तिर्विषयाकारेतिस्थितं । परोक्षव्यवहारे तु विशिष्टशब्दलिङ्गादिग्रहनिबन्धनात्तदर्थाकाराधीरन्तरेवसमुन्मिषति विषयसत्तामात्रस्यैव तत्र स्फुरणात् तद्गतविशेषादेरस्फुरणाच्चेति दिक् । तथाच स्वप्नावस्थायां आत्मा बुद्ध्युपाधिः स्वप्नदर्शनहेतुकर्मक्षये जागरितमागच्छन् पूर्व्वगृहीतेषु करणेषु इन्द्रियेषु पुनः स्वस्वगोलकस्थानेषु तथैव बुद्ध्या प्रसारितेषु सत्सु स्वयं तद्बुद्ध्यनुगतस्तत्तद्गोलकादिदेशं गच्छन् स्वोपाध्यन्तःकरणेन्द्रियसचिवस्तदिन्द्रियविषयाननुमेयांश्च स्थूलान् व्यवहारिकान् पदार्थाननुभवति तदिदमस्य जागरितं तदुक्तमिन्द्रियैरर्थोपलब्धिर्जागरितमिति अयमेव विश्ववैश्वानरात्मनोः स्थूलभागइति अत्रापि अनयोः स्थूलेत्यादिपूर्व्ववत् । स्थूलप्रपञ्चाध्यासं सावत्यनुपपादितमुपसंहरति ॥

there could be no such resolution as that I must cognise this object at such and such a distance externally. It is impossible that there should exist within the heart the forms of places of various extensions and the chariots, elephants, and so forth, situate therein. Nor can any one reply that this may take place as in a dream as we have declared that a dream is made of illusion, and that the waking state is also made of illusion. We allow the latter part of the statement; but to account for conventional activity, some difference must be assumed between waking sense and dreams, such difference being constituted by the recognition of the sublation [of the experience given in dreams], and the non-sublation [of waking experience] where there is a subject of true knowledge.

If one say that the modification identical with the impartite absolute arises in the internal organ inside the body, we concede the point, for this modification arises to the displacement of such envelopments as the body. But the modification corresponding to external objects cannot thus displace the envelopments, and there must therefore be a disparity between these two kinds of modification.

Moreover if the cause of the identity of the internal organ with the object were only connection of the object and the organ, it would follow that there would be exactly manifested in the internal organ thus identified with the object, the extension, colour, number &c. of remote objects. But you cannot say that this does not thus appear exactly, on account of the defect of vision constituted by remoteness, for this defect cannot be an obstructive, if the reason be merely connection between the object and the organ. If you ask why on our hypothesis also, in which we allow that the internal sense assumes the form of the object juxta-posed to the organ, there does not arise in the internal sense identity with the exact dimension &c. of remote objects; we refuse this objection, for with us the common sensory which is outside is not independent, it is modified into identity only with such parts and wholes as are in juxta-position to the eye. But on your hypothesis when the object is in contiguity with the organ, while no attention is given to the differences residing in the object, such as greatness, smallness, hardness, softness and the like, an internal modification identical with these differences being possible, it would follow that there should a distinct manifestation of the exact size &c. of the objects, and thus there would be a discrepancy. It is thus established that in ordinary presentation there is an external modification of the common sensory, identical with the object.

But in other than presentative cognitions [as in inference, testimony, and so forth], a notion identical with the meaning of such and such a word, caused by the force of such and such words and signs, shines forth [or appears in the light of consciousness], for in this case the mere existence of the object shines forth, while the differences &c., residing therein, do not shine forth.

So also in the dreaming state, the soul illusorily accompanied by the understanding, when the merits are exhausted which were the cause of seeing the dream, recovering its waking state, and resuming its instruments, the organs of sense, and these organs being adjusted by the same understanding to their sockets,—the soul followed by that same understanding, resorting to the several sockets and other places, and assisted by the internal organ and the senses, which are its own proper illusory accompaniment, experiences such and such objects of perception, and of inference, gross and conventional bodies. This is called its waking state. It has therefore been said: Consciousness of objects by the sense organs is the waking state. This is the gross fruition of the universal soul, and of the spirit of humanity. The word gross is to be explained as in former cases.

The author, proceeds to recapitulate the illusory attribution of the gross universe, with its three conditions [of waking, dreaming, and dreamless sleep], as already laid down.

Thus [does the gross material world arise out of the five elements rendered gross by quintuplication.] The author proceeds to set forth as before the aforesaid three worlds, and the three intelligences thereby illusorily accompanied, with examples.

[The collective aggregate] of these [worlds, the gross the subtile, and the causal, is one great world; just as the collective aggregate of all the included forests constitutes one great forest; or as the collective aggregate of all the included masses of water included in a vast reservoir, is one reservoir. So too the intelligence illusorily associated thereby, from the pervader and the spirit of humanity up to the Lord, is one only—just as is the space which is designated and occupied by the various groves contained in the forest, and as the sky is but one which is reflected in the various smaller masses of water included in the reservoir.] This passage is perspicuous enough. The author proceeds to state the general result.

[Intelligence which is not really invested] with these two [when not discriminated from these two, viz.

the great universe and intelligence illusorily accompanied therewith, when undiscriminated like the heat undiscriminated from the iron in an ignited iron ball, is what is designated in the great sentence, All this truly is God only. Pure existence also is indicated thereby.] He briefly recapitulates the illusory attribution relative to the sense of the word that [in the text That art thou.] *Thus* [*have we exhibited generally the illusory attribution of the unreal to the real*] The author now proceeds to explain, by citing the doctrines of various controversialists, the illusory attribution as respects the meaning of the word thou.

Now [*this or that person makes, this or that illusory attribution to self-conscious spirit.*] The author next proceeds, in the manner of one who points out the small star Arundhatí in the Saptarshi constellation or the Great Bear, or of one who extracts the pith of a reed, with the purpose of showing that self-conscious spirit abstract from the organism &c. is pure intelligence alone, to state the doctrine of an exceedingly uncultivated man.

A very uncultivated man [*says my son is my soul.*] As it will be asked why the uncultivated man says so, the author proceeds to cite in order fallacious semblances of revelation, argumentation, and experience, in favour of that opinion.

[*Because revelation says, for example:*] *Soul* [*is born just as one's soul; and because love towards one's son is seen to be like love towards one's self; and because one feels, If my son be destroyed or thriving, I myself am destroyed or thriving.*] Like love towards one's self—these words introduce the argumentation. Thus in common life, fathers when at a sacrifice to themselves they bestow dainty food, upon their children, and entertain the warmest affection towards them, manifestly show that they regard their children as themselves. The words If my son be destroyed, express the experience.

The author proceeds to state another doctrine.

But a Chárváka [*or sensualist, says that the gross body is the soul.*] Here as before, the author cites the authority of revelation &c. claimed in favour of the obnoxious opinion, and indicates the mode of refuting the doctrine adduced.

[*Because the Veda declares for example:*] *This same person* [*is made of chyle.*] Similarly we may observe the citation of confirmatory passages in relation to views stated in the sequel. The sense of the text is: This man, the object of perception, consisting of head, hands &c., and generally known to be the educt of herbs modified to the nature of generative seed, is made up of chyle, since it is by means of chyle that he receives accretion. Here it is supposed that the soul is the body, the word person being ordinarily employed to denote the soul, while in the Veda it is applied to the body which is built up of chyle.

The chief object of our love is the soul or self only, and all else is dear as subservient to that. Thus the text: That other thing, more dear than son, more dear than wealth, more dear than all beside, that other thing is self. This love is seen to be given more abundantly to one's own frame more than even to a son, beyond all other love: else how could a man forsake his child and fly when his house is on fire, and the slayers at hand? Such is the meaning of the argumentation.

The notion of the Ego is conversant about the soul, as is allowed by all controversialists without dispute. This notion is observed in the judgments I am thin, and so forth, to have the body as its object, and thus the soul is identical with the body.

The author next goes on to state the peculiar doctrines of the Lokáyatas, a branch of the Chárváka sect.

Another Chárváka [*says the organs of sense and action are the soul, because the Veda declares Those vital airs drew nigh unto Prajá-pati and said &c.; also because in the absence of the organs there is absence of motion in the body; and because there are such deliverances of conciousness as I am one-eyed, I am deaf.*] The construction &c. of the text is as before. The disjunctive argumentation whereby it is inferred from revelation that as the vital airs, and organs, the voice and the rest could not go to Prajá-pati and make inquiries

---

एवमिति। उक्तं प्रपञ्चत्रयं तदुपहितचैतन्यत्रयञ्च पूर्ववत् सदृष्टान्तभावमुपपादयति ॥

एषामित्यारभ्य आभ्यामित्यतः प्राक्तनेन ग्रन्थेन। स्पष्टार्थोऽयं ग्रन्थः ॥ फलितमाह ॥

आभ्यामिति। तत्पदार्थविषयमध्यारोपमुपसंहरति ॥

एवमिति। अधुना त्वंपदार्थविषयमध्यारोपं बहुवादिमतोपन्यासेन दर्शयति ॥

इदानीमिति। तत्रारुन्धतीप्रदर्शनन्यायेन मुञ्जादीषिकाग्रहणन्यायेन वा प्रत्यञ्चदेहादिविविक्तं चिदेकतानमात्मानं दिदर्शयिषुरतिमूढमतेर्मतं तावदाह ॥

अतिप्राकृतइति। अतिप्राकृतस्तु पुत्रआत्माइति वदतीत्यन्वयः। कुतइत्यपेक्षायां श्रुतियुक्त्यनुभवाभासान् क्रमेण प्रमाणयति ॥

आत्मावाइत्यादिना ॥ स्वस्मिन्निवेति युक्तिकीर्त्तनं। लोके हि पुत्रिण इष्टमिष्टं खाद्यादिस्वात्मवञ्चनेनापि पुत्रेषु समर्पयन्तस्तेषु परमप्रेमकुर्व्वन्तस्तेषामात्मत्वमेव प्रकटयन्तीतिभावः। पुत्रे नष्टइत्याद्यनुभवोक्तिः। मतान्तरमाह ॥

of him, if they were unsentient, and that they must therefore be endowed with conciousness,—this is to be regarded as the proof from revelation.

From observing that in the absence of the organs, that is, upon their becoming inactive as in sleep, the movements of the body which are the results of sensibility are no longer observed, and that when they do not become inactive this cessation of bodily motion is not observed, it is determined by induction from concomitance positive and negative, that it is the organs that are sentient, and not the body. Nor, these sectaries would add, can you argue that the concomitance positive and negative of cognition may be due to the instrumentality of the organs, and that the hypothesis of their being the seat of consciousness is unsuitable; for your hypothesis of instrumentality, they would continue, is chronologically posterior to the fact of their being the seat of sensibility, and as it cannot be shown that the body is this seat of sensibility, no other hypothesis than ours is admissible. The organs therefore it is that are souls, and there is nothing to disprove the fact that the organs &c. are the object matter of the notion of Ego, whereas the opinion that it is the body which is this object matter, being contradicted by the assurance that the body belongs to me, is secondary and derived.

The author next brings forward the doctrine of those that hold that the principal vital air is the soul.

A. E. G. and G. D.

चार्व्वाकइति । स्थूलशरीरमात्मेति वदतीत्यन्वयः । अत्रापि श्रुत्यादिप्रमाणं वदन् प्रागुपन्यस्तपक्षदूषणं सूचयति ॥

सवा एषइत्यादिना। एवमेवोत्तरेष्वपि पक्षेषु प्रमाणादिग्रन्थोत्थानं द्रष्टव्यं। सर्व्वस्यौषधीनां रेतो रूपेण परिणतानां परिणामः प्रसिद्धः एष प्रत्यक्षः पुरुषः शिरः पाण्यात्मकः अन्नरसमयोऽन्नरसेनैवोपचीयमानत्वादिति श्रुतेरर्थः । इह पुरुषशब्दस्य लोके आत्मनि प्रयोगात्तस्य च श्रुतावन्नरसमये देहे प्रयुक्तत्वाद्देहआत्मेति गम्यतइत्यभिप्रायः । परमप्रेमगोचरत्वमात्मन्येव विश्रान्तं इतरस्य सर्व्वस्यापि तच्छेषत्वेनैव प्रियत्वात् । तदेतत् प्रेयः पुत्रात् प्रेयोवित्तात् प्रेयोऽन्यस्मात् सर्व्वस्मादन्तरं यदयमात्मेति श्रुतेश्च । सा च प्रीतिः पुत्रादपिदेहेऽधिकतरानिरतिशया च दृष्टा । अन्यथा दह्यमाने गृहादौ हन्तृषु वोपस्थितेषु पुत्रं परित्यज्य स्वस्य पलायनानुपपत्तेरिति युक्त्यर्थः । अहं प्रत्ययश्चात्मानमवगाहतइति सर्व्ववादिनामविवादः । सच कृशोऽहमित्यादिना देहावलम्बनोऽनुभूयते अतो देहएवात्मेत्यर्थः । लोकायतानां चार्व्वाकविशेषाणां मतभेदानाह ॥

अपरश्चार्व्वाकइत्यादिना बौद्धस्त्वित्यतः प्राक्तनेन । अन्वयादि पूर्व्ववत् । प्राणादीनां वागादीनां प्रजापतिगमनं तं प्रतिप्रश्नकरणञ्चचितनत्वेन सम्भवतीत्यनुपपत्त्यातेषां चैतन्यमवश्यं भावीति श्रुतार्थापत्तिरिह मानं श्रुतिरेवेतिद्रष्टव्यं । इन्द्रियाणामभावे उपरमे स्वापादौ देहचलनस्यचैतन्यकार्य्यस्यादर्शनात्तदनुपरमे च तद्दर्शनादन्वयव्यतिरेकाभ्यामिन्द्रियाण्येव चेतनानि । न देह इति निश्चीयते । नच तेषां करणत्वेनापि ज्ञानान्वयव्यतिरेकोपपत्तौ तदाश्रयत्वकल्पनमयुक्तमिति वाच्य' आश्रयसिद्ध्युत्तरकालीनत्वात् करणत्वकल्पनायास्तस्य चाश्रयत्वस्य देहेऽप्यसिद्धेर्नान्यथोपपत्तिः । अतइन्द्रियाण्येवात्मानः करणादेश्चाहमालम्बनत्वमबाधितं देहे तु ममप्रत्ययबाधितत्वाद्भाक्तमिति भावः । मुख्यप्राणात्मवादिमतमुत्थापयति ॥

FOR SALE AT THE

MEDICAL HALL PRESS, BENARES.

SANSKRIT and ENGLISH DICTIONARY, being an abridgment of PROFESSOR WILSON'S DICTIONARY with an Appendix explaining the use of affixes in Sanskrit, by PANDIT RÁM JASAN, cloth bound and lettered. Rs. 10.

THE RA'MA'YAN of VA'LMI'KI, translated in English verse by RALPH T. H. GRIFFITH, M. A. Vol. I. Rs. 6. Vol. II. Rs. 6. and Vol. III. Rs. 4-8. Postage 6 annas each.

THE LAGHU KAUMUDI', a Sanskrit Grammar with an English version, commentary and references by DR. BALLANTYNE, late Principal of the Sanskrit College, Benares, re-edited by RALPH GRIFFITH, M. A., Principal of the Sanskrit College, Benares. *Price* 8 *Rupees.*

"The Translation of Laghu Kaumudí made by the late Dr. Ballantyne has enabled even beginners to find their way through the Labyrinth of Native Grammar." *Prof. Max Müller.*

"THE BIBLE FOR THE PANDITS." The first three chapters of Genesis diffusely and unreservedly commented, in Sanskrit and English,—with an introduction, by JAMES R. BALLANTYNE, LL. D. Rs. 3.

THE BA'LARA'MA'YANA, a Drama by RÁJAŚEKHARA, edited by PANDIT GOVINDA DEVA ŚÁSTRI, late Professor of Hindu Astronomy in the Sanskrit College, Benares, Rs. 2.

THE PRASANNARA'GHAVA, a Drama by Jayadeva, edited by PANDIT GOVINDA DEVA ŚÁSTRI. Rs. 1-4.

The VAIS'ESHIKA APHORISMS OF KAN'A'DA, reprinted from the "Pandit" with corrections and emendations, by A. E. GOUGH, B.A., Anglo-Sanskrit Professor, Benares College. *Price Rs.* 4-0.

PRINTED AND PUBLISHED BY THE PROPRIETORS, E. J. LAZARUS AND CO. AT THE MEDICAL HALL PRESS, BENARES.

काशीविद्यासुधानिधिः

श्रीगणेशाय नमः

श्रीमद्विजयिनीदेवीपाठशालोदयोदितः । प्राच्यप्रतीच्यवाक्पूर्वापरपक्षद्वयान्वितः ॥ १ ॥
अङ्कुरश्मिः स्फुटयतु काशीविद्यासुधानिधिः । प्राचीनार्यजनप्रज्ञाविलासकुमुदोत्करान् ॥ २ ॥

THE PANDIT.

A Monthly Journal, of the Benares College, devoted to Sanskrit Literature.

No. 84. Benares, May 1st, 1873. Vol. VII.

॥ चिन्तामणेः शब्दखण्डम् ॥

ननु चन्दनादौ सुखोपरागेण स्वर्गपदप्रयोगाद्दुःखासंभिन्नत्वाद- शायां चाप्रयोगात्सुखमेव शक्यम् । बहुवित्तव्ययायाससाध्यतत्तत्कर्मणि सुखमात्रार्थी न प्रवर्ततइत्यर्थवादोपस्थिते स्वर्गपदतात्पर्यम् । न चार्थवादस्योपजीव्यत्वात् तदुपनीते तत एव शक्तिग्रहः, तस्य स्वर्गपदतात्पर्यविषयत्वेनास्पदतोपपत्तेर्न वाच्यत्वाभिधायकत्वं (१) गौरवात् । (२) सुखमात्रे वा प्रयोगादतिशयितसुखत्वं वाच्यं प्रयोगोपाधिर्वातिशयः । न चातिशयस्य सावधित्वेन चन्दनसुखेऽस्मादयं स्वर्ग इति धीः स्यात् । रसादाविवातिशयस्य जातित्वेनावध्यनिरूप्यत्वात् । अतिशयपदप्रयोगस्तु इतरज्ञानापेक्ष इति चेन्न । (३) विचित्रहेतुसाध्यतया विलक्षणातिशयस्यानेकत्वेनाननुगमात् । (४) सुखत्वावान्तरातिशयत्वेनास्यानुगमेप्यनध्यवसायेन शक्तिग्रहादप्रवृत्त्यापत्तेः । (५) सुखत्वावान्तरजातेश्च सुखमात्रसाधारणत्वात् । प्रयोगोपाधेर्निराकार्यत्वात् । लोके च लक्षणा । ननु दुःखासंभिन्नसुखस्य शक्यत्वे चन्दनादौ स्वर्गपदप्रयोगो लक्षणयापि न स्यात् । सातिशयसुखस्य शक्यत्वे (६) तत्संबन्धितया चन्दनादौ लक्षणा भवति, (७) तस्माद् दुःखासंभिन्नत्वादिनोपलक्षिता (८) सुखत्वावान्तरजातिरेव शक्या, लाघवादिति चेत् । न । एकजातीयहेतुसाध्ये एकजातिसत्त्वेपि विलक्षणहेतुसाध्यस्वर्गेष्वेकजातौ मानाभावात् । (९) विहितकर्मजन्यता च

॥ शब्दचिन्तामणिव्याख्या रुचिदत्तीया ॥

(१) गौरवादिति । विशिष्टवाच्यत्वे गौरवादित्यर्थः । स्वर्गपदशक्तिग्रहश्च प्रकारान्तरेणेति भावः । तर्हि सुखमात्रे एव स्वर्गपदप्रयोगः स्यादित्यत आह । (२) सुखमात्रे वेति । (३) विचित्रेति । विचित्रो हेतुर्यागदानादिः । प्रत्येकं शक्यत्वे नानार्थत्वापत्तिरिति भावः । (४) सुखत्वावान्तरातिशयत्वेनेति । यद्यपि विलक्षणनानातिशयसाधारणं नैकमतिशयत्वमिति दोषान्तरतादवस्थ्यं, तथाप्यतिशयत्वं जातिरित्यनुगम इति भावः । तादृशातिशयस्य सुखमात्रवृत्तित्वात्कुत्र शक्तिरित्यनध्यवसायः, विशिष्याज्ञानमित्यर्थः । ननु सुखत्वावान्तरजातिमत्त्वेन सर्वत्रैव शक्तिग्रह इति नाननुगमो न वानध्यवसाय इत्यत आह । (५) सुखत्वेति । तथा च सुखमात्रएव प्रयोगः स्यादिति भावः । तथात्वे लाघवात् सुखत्वेनैव शक्यतापत्तेश्चेत्यपि बोध्यम् । (६) तत्संबन्धितयेति । तत्साक्षात्संबन्धितयेत्यर्थः । शक्यसाक्षात्संबन्ध एव लक्षणेत्यभिमानः । (७) तस्मादिति । लाघवाज्जातिविशेषः शक्यस्तदुपस्थापकतया च नार्थवादवैयर्थ्यमिति भावः । सुखमात्रे प्रयोगं परिहर्त्तुमाह । (८) सुखत्वेति । ननु विहितकर्मजन्यतावच्छेदकत्वेन सा जातिः सिध्येदित्यत आह । (९) विहितेति । ननु तत्तद्विहितकर्मविशेषजन्यतावच्छेदकत्वं तेषामिति यद्विशेषयोरितिन्यायेन सामान्ययोरपि कार्यकारणभावश्च स्यात्,

तत्तद्विशेषत्वेनैव। अननुगतस्यापि जन्यत्वावच्छेदकत्वात्। (१०) संबन्धमात्रं च लक्षणाबीजमिति वक्ष्यते। एवं देवतादावपीन्द्रमुपासीतेत्यादौ (११) लोके प्रयोगस्यानियमा(१२)द्गौणतयैव व्यवहाराच्चार्थानध्यवसाये लौकिकसहस्राक्षादाविन्द्रादिपदशक्तिग्रहः। प्रमाणं चेन्द्रः सहस्राक्ष इत्यादि(१३)विधिसमभिव्याहृतोऽर्थवाद एव, स्वर्गपदवत्॥ अथ स्वर्गपदे प्रवृत्त्यन्यथानुपपत्त्या "तत्सुखं स्वःपदास्पद"मिति श्रुतेः स्वार्थवादादेव शक्तिग्रहः। न चेह तथाऽर्थवादः, (१४) किं त्विन्द्रः सहस्राक्ष इत्यादि स्तावकत्वेन प्रवृत्तिपरमिति चेत्, न। इन्द्रः सहस्राक्ष इत्यादिप्रसिद्धपदसामानाधिकरण्यश्रुतितो (१५) बाधकं विना सहस्राक्षस्य चेन्द्रादिपदवाच्यत्वावधारणात्। प्रसिद्धपदसमन्वयबलेन प्रतीयमानमर्थमबाधितमादायैव तेषां

अन्यथा साक्षात्कारत्वमपि जन्यतावच्छेदकं न स्यात्, न वा कर्तृजन्यतावच्छेदकं जन्यत्वमिति, मैवम्। अस्त्वेवं तथापि लौकिकोत्कटसुखस्य विहितकर्माजन्यतया चन्दनादौ तज्जातीयसुखसंबन्धाभावाल्लक्षणानुपपत्तेः। ननु लौकिकस्याप्यदृष्टद्वारा विहितकर्मजन्यत्वमिति चेत्, हन्त तर्हि सुखत्वमेव तज्जन्यतावच्छेदकं तस्यैव शक्यत्वेतिप्रसङ्ग इत्युक्तमेव। तस्माल्लौकिकातिशयितसुखव्यावृत्तपारलौकिकसुखमात्रवृत्तिजातिर्न तज्जन्यतावच्छेदकतया न वा मानान्तरेण सिध्यतीत्यत्रैव तात्पर्यमिति वयमालोचयामः। के चित्तु विहितकर्मत्वं वेदबोधितकारणताककर्मत्वं, तथा च तस्यावच्छेदकत्वे कारणतैव कारणतावच्छेदिका स्यादित्याहुः। (१०) संबन्धेति। स्ववृत्तिसुखवृत्तिसुखत्वजातिमज्जनकत्वरूपपरम्परासंबन्धस्तथेत्यर्थः। एवं दुःखासंभिन्नत्वादिसमानाधिकरणसुखत्वस्य विशिष्टस्यैव स्वर्गपदजन्यप्रतीतिप्रकारत्वात्सामानाधिकरण्यांशेऽपि शक्तौ गौरवं न दोषः, प्रामाणिकत्वात्। अत एव दुःखासंभिन्नत्वादिकं शक्त्युपाधिरिति नातिप्रसङ्गः, तस्यापि शक्यत्वे च गौरवमिति निरस्तम्। पदान्वियतोपस्थितेः शक्तिसाध्यत्वात्। (११) लोकइति। राजादौ तत्प्रयोगस्यानियमादित्यर्थः। तर्हि तत्रैवोभयत्र वा शक्तिरस्त्वित्यत आह। (१२) गौणतयैवेति। (१३) विधीति। तथा च प्रवृत्त्यन्यथानुपपत्त्यावश्यं तस्य शक्तिग्राहकत्वमिति भावः। प्रामाण्यस्योभयसिद्धत्वाय तदुक्तमित्यन्ये। (१४) किं त्विति। तथा च न शरीरिणी देवतेति तात्पर्यम्। (१५) बाधकं विनेति। तथा च सामानाधिकरण्यानुपपत्तिरेव शक्तिग्राहिकेत्यर्थः। नन्वेवमपि सहस्राक्षदेवताया-मिन्द्रपदशक्तिग्रह इत्ययुक्तं, देवतायास्त्वचैतन्यनियमे सहस्रा-

प्रवृत्तिपरत्वात्। (१६) मन्त्रप्रकाशितशशिशेखराद्युपेतमुद्दिश्य हविस्त्यागेन तत्रैव याज्ञिकानां देवताव्यवहारात्। (१७) अपि च शिवाय गां दद्यादित्यादिना देवतासंप्रदानत्वश्रुतेः (१८) शिवादिसहस्रनाम्नां पर्यायत्वेन श्रुतेर्महाजनपरिग्रहेण प्रमाणत्वादाराधितदेवताया वरदातृत्वश्रुतेश्च (१९) बाधकं विना चेतनैव देवता। (२०) अथ देवताचैतन्ये तत्प्रीतिरेव यागव्यापार इति नापूर्वसिद्धिरिति चेत्, न। प्रीतेः सुखस्य तदनुभवस्य चाशुतरविनाशित्वात्। तज्जन्यसंस्कारस्य स्वाविषये फलाहेतुत्वात्। फलहेतुस्थायिकृतिव्यापारापेक्षायां (२१) लाघवेन कृतिसमानाश्रयस्यैव व्यापारत्वकल्पनात्। नानायागेष्वेकदाह्वाने चैकदा सन्निधानं (२२) तद्बुद्धिविशेष एव। प्रतिष्ठाविधिना प्रतिमादावहंकारवत्। (२३) अथ राजसूयादिफलत्वेन श्रुतेरिन्द्रादिश्चेतन एव, देवतात्वं तु तस्य नास्ति, मानाभावात्। किं तु (२४) देशनादेशि-

क्षस्य तद्भिन्नत्वनियमादित्यत आह। (१६) मन्त्रेति। आदिपदादक्षिसहस्रादिसंग्रहः। ननु तत्र भाक्तः प्रयोग इत्यस्वरसादाह। (१७) अपि चेति। संप्रदानत्वं चेतनस्यैवेत्यर्थः। ननु वृक्षायोदकमासिञ्चतीतिवत् संप्रदानत्वं वैवक्षिकमादाय चतुर्थी न तु वास्तवं संप्रदानत्वं, स्वीकरणविरहादिति यदि परो ब्रूयात्तदा दोषान्तरमाह। (१८) शिवादीति। पर्यायत्वमर्थैक्य एवेति शब्दभिन्न एकोऽर्थः सिद्ध इत्यर्थः। अन्यथा नेकदेवताकल्पनापत्तिश्चेत्यपि बोध्यम्। ननु यावस्तवनश्रुतिवदुपचरितार्थव श्रुतिः स्यादत आह। (१९) बाधकं विनेति। निराकृतमपि प्रसङ्गान्तरेण शङ्कते। (२०) अथेति। (२१) लाघवेनेति। बाधकं विनेति भावः। (२२) तद्बुद्धीति। नन्विन्द्रादेः सर्वज्ञत्वाभावात्संग्रामादिव्यासङ्गदशायामाराधककोटिभिरेकदा ध्याने कथं ज्ञानमिति चेत्, न। अदृष्टविशेषस्मारितलिङ्गादिप्रतिसंधानादित्येके। अदृष्टविशेषप्रत्यासत्त्यानन्यगत्या मनसैव तज्ज्ञानमित्यन्ये। (२३) अथेति। वरदातृत्वमपि तस्यैव न देवताया इति भावः। (२४) देशनेति। आग्नेयोऽष्टाकपाल, ऐन्द्रं दधीत्यादिना तद्धितेनाग्न्यादेः प्रकृत्यर्थस्य चतुर्थ्यन्तपदनिर्देश्यत्वं बोध्यतइति तत्रतत्र हविषि तस्यतस्य देवतात्वं न तु साऽस्यदेवतेति देवताधिकार्यत्वात्तद्धितस्य देवतात्वमित्यर्थः। तदुक्तम्

तद्धितेन चतुर्थ्या वा मन्त्रलिङ्गेन वा पुनः।
देवतासंगतिस्तत्र दुर्बलं तु परम्परम्॥

तच्चतुर्थ्यन्तपदनिर्देश्यत्वं देवतात्व,मितीन्द्रायेत्यादिपदमेव देवता । अत एवाग्निप्रकाशकमन्त्रेणाग्निप्रकाशनानन्तरमग्नयइति नियमतो हविस्त्यागो न पर्यायान्तरेण । (२५) न चेन्द्रोद्देशेन हविस्त्याग इन्द्रनिष्ठकिंचिज्जनकः । (२६) तत्स्वरूपाजनकत्वे सति तदुद्देशेन क्रियमाणत्वात्, ब्राह्मणाय दानवदिति वाच्यम् । अप्रयोजकत्वात् । (२७) तदर्थत्वेन क्रियमाणत्वस्योपाधित्वात् । (२८) इन्द्राय स्वाहेत्यत्र न तादर्थ्ये चतुर्थी, किं तु स्वाहादिपदयोगउपपदविभक्तिरेव । अन्यथा नमःस्वस्तिस्वाहास्वधेत्यादिसूत्रवैयर्थ्यात् । मैवम् । (२९) चतुर्थ्यन्तपदस्य, देवतात्वे मानाभावात् । (३०) चतुर्थीं विनापि इन्द्रो देवतेति व्यवहारदर्शनात् । अग्नये कव्यवाहनायेत्यादौ (३१) देवताद्वयप्रसङ्गात् । इन्द्रः सहस्राक्ष इत्यर्थवादस्य इन्द्रमुपासीतेत्यादिविधिसमभिव्याहारेणैकवाक्यतया तस्यैवोपास्यत्वात् । (३२) शिवस्वं नाददीतेत्यत्र महादेवमुद्दिश्य त्यक्ते शिष्टानां शिवस्वत्वेन व्यवहाराच्च । अग्नयइतिपदेन नियमतस्त्यागस्य श्रुतिबोधितत्वेन तथा त्यागस्य फलहेतुत्वात् । (३३) न च बीजाक्षराणां देवतात्वात् तत्रैव शिवादिपदशक्तिग्रह इति वाच्यम् । बीजाक्षराणां चतुर्थ्यन्तत्वानियमात् । (३४) तदप्रतीतावपि मन्त्रप्रकाशितशशिशेखराद्युपेतमुद्दिश्य हविस्त्यागेन तत्रैव याज्ञिकानां व्यवहारः । बीजाक्षराणां हविस्त्यागभागित्वेना-

---

इति । तथा च देवतात्वे ज्ञाते तद्धितात्मकदेशनाप्रवृत्तिः, तत्प्रवृत्तौ तु देशनादेशिततद्घटितदेवतात्वज्ञानमित्यन्योन्याश्रय इति चेत्, न । देवतैकदेशस्य तत्पदनिर्देश्यत्वमात्रत्वस्यैव तदर्थत्वात् तत्पुरस्कारेण प्रवृत्ते तद्धिते देशनादेशिततत्पदनिर्देश्यत्वरूपं तद्गृह्यतइति । न चैवंप्रकृत्यर्थस्य तद्धितादिना तथात्वबोधनात्तस्यैव देवतात्वं स्यादिति वाच्यम् । शब्दात्मकस्यैव प्रकृत्यर्थत्वाभ्युपगमात् । नन्वेवमपीन्द्रायेत्यादिपदमेव देवतेत्ययुक्तं, नहि चतुर्थ्यन्तस्यैव तस्य तदन्तपदनिर्देश्यत्वं तेन बोध्यतइति चेत् । अत्राहुः । अर्थोपहितशब्दस्य देवतात्वमिति मते देशनादेशितं यस्य तत्पदनिर्देश्यत्वं तदर्थोपहितं चतुर्थ्यन्तपदमेव देवतेत्यर्थः । एवं च यद्यप्यर्थस्यापि देवताशरीरान्तर्भावस्तथापि विशिष्टस्य चैतन्यं चतुर्थ्यन्तपदस्यैव प्राधान्याच्चेन्द्रायेत्यादिपदमेव देवतेत्युक्तमिति मन्तव्यम् । यद्वाऽर्थस्योपलक्षणत्वाभ्युपगमेन तथोक्तम् । एतेन तिर्यगधिकरणे तिर्यक्पङ्ग्वार्षेयविमुखदेवतानामनधिकार इत्युक्तं, तत्र तिरश्चां विशिष्टान्तःसंज्ञाविरहात् पङ्गोः प्रचरणविरहात् तिस्रो दृष्टिश्रुतिवाचः आर्षेया ऋषियोग्याः स्वस्वविषये विमुखा येषां तेषामन्धबधिरमूकानामवेक्षणश्रवणोच्चारणाशक्ततया युक्तोऽनधिकारः, देवतानां त्वत्यन्तविदुषीणां कथमनधिकार इति पूर्वपक्षे, तदचैतन्यं न घटेत, घटादिवदप्रसङ्गात् । किं च देवतानामचैतन्ये आवाहनमन्त्रानर्थक्यं बोद्धुस्य शरीरस्य वा सन्निधेरसंभवात् । एवं च तीर्थेषु देवतानां नित्यसन्निहितत्वादावाहनबाध इति यदुक्तं तद्विरुध्येतेत्यादि निरवकाशं वेदितव्यं, विशेषणीभूतार्थस्य चैतन्यमादाय सर्वस्योपपत्तेः धृतिहोमादावर्थतश्चतुर्थ्या ऊहनमन्यथा स्वाहेति न स्यात् तत्र धृत्यादेर्न देवतात्वमित्यप्याहुः ॥ चतुर्थ्यन्तत्वेन चतुर्थ्यर्थकत्वं विवक्षितमित्यन्ये ॥ केचित्तु देशनादेशितं यत्र चतुर्थ्यन्तपदे निर्देश्यत्वमुच्चार्यत्वं त,त्तथात्वं चेन्द्रायेत्युच्चार्य दद्यादिति वेदेन बोधनात्तत्र लक्षणागमनं, न च पितृभ्य इत्युच्चार्य दद्यादित्यादावतिप्रसङ्ग,स्तादृशवेदाभावादित्याहुः ॥ (२५) न चेति । इन्द्रपदं देवतापरं, स च जन्यः स्वस्वामिभावः संबन्ध इति देवताचैतन्यमिति भावः । (२६) तत्स्वरूपेति । घटोत्पत्तये क्रियमाणे दण्डव्यापारादौ व्यभिचारादाह सत्यन्तम् । क्रियमाणत्वं प्रमाप्रयोज्यकृतिविषयत्वम् । शिष्टैरिति वा विशेषणमतो न भ्रमेण क्रियमाणे व्यभिचारः, सामान्यव्याप्त्यभिप्रायकमिदमिति न तन्मते साध्याप्रसिद्धिः । न वा दृष्टान्ते साध्यवैकल्यं, न चोभयमते नैकं देवतात्व,मनुगतदेवतापदवाच्यत्वेनानुगमादित्याहुः ॥ ननु निरुपाधित्वमेव विपक्षबाधकमित्यत आह । (२७) तदर्थत्वेनेति । तन्निष्ठफलजननायेत्यर्थः । अयं तु स्वनिष्ठफलजननाय क्रियतइति भावः । कथं तर्हि तादर्थ्ये चतुर्थीत्यत आह । (२८) इन्द्रायेति । लाघवेन विशेषणीभूतार्थस्यैव देवतात्वमित्याशयेनाह । (२९) चतुर्थ्यन्तेति । तर्हि विशेष्यमात्रस्यैव तथात्वमस्त्वित्यत आह । (३०) चतुर्थीमिति । (३१) देवताद्वयेति । अथास्मिन् हविषि चतुर्थ्यन्तपदनिर्देश्यतया विशिष्ट एव देशनया देशित इति कव्यवाहनत्वविशिष्टाग्निरेव देवतेति चेत्, न । विशेषणचतुर्थीवैयर्थ्यापत्तेः । विशिष्टदेवतात्वेपि तत्प्रयोगो देशनानुरोधादिति चेत्,तर्हि सापि चतुर्थी देशनादेशितैवेति देवताद्वयापत्तिरेवेति वदन्ति ॥ (३२) शिवस्वमिति । अचेतनस्य स्वत्वासंभवादिति भावः । न च देवताभिन्नं शिवमादाय तदुपपत्तिः,तथापि तद्देवतास्वमित्यनागतेः । न चाकाशादेरचेतनस्य कथं देवतात्वमिति वाच्यम् । तदधिष्ठातुश्चेतनस्यैव देवतात्वात् । तदेकदेशिमतमाशङ्क्य निराकरोति । (३३) न चेति । नन्वेकदेशिनो न तद्देवतालक्षणमत आह । (३४) तदिति ।

नुद्देश्यत्वात् । शिवस्य प्रतिमन्त्रं बीजाक्षराणां नानात्वादननुगमेन (३५) शिवपदशक्तिग्रहस्याशक्यत्वात् । न च मूर्त्तिभेदेन शिवशरीराणामननुगतत्वेन तत्रापि न शक्तिग्रह इति वाच्यम् । बाल्यादिना भिन्नशरीरेषु चैत्रत्ववच्छिवत्वजातेरदृष्टविशेषोपगृहीतत्वस्य वा ऽनुगतत्वात् । (३६) अदृष्टशून्यस्य चे(३७)श्वरस्य न देवतात्वम् ईशानश्च तद्भिन्न एव । तस्मा(३८)न्मन्त्रकरणकहविस्त्यागभागित्वेनोद्देश्यत्वं देवतात्व(३९)मन्येषां हविस्संबन्धे मन्त्रस्याहेतुत्वादिति । क्वचिच्च (४०) वाक्यशेषाच्छक्तिग्रहः । यथा यवमयश्चरुर्भवति, वाराही चोपानत्, वैतसे कटे प्राजापत्यं चिनोतीत्यत्र यववराहवेतसशब्दाः किं कङ्गुवायसजम्बूनां वाचका, उत दीर्घशूकसूकरवञ्जुलानामिति म्लेच्छार्यव्यवहारदर्शनाद् विप्रतिपत्तौ मुख्यार्थानध्यवसायात्तत्पदवद्वेदे प्रामाण्यानिश्चये व्यवहाराद्व्युत्पत्तिः । स चाविशिष्टः पिकादिपदेषु म्लेच्छव्यवहाराद्व्युत्पत्तेः, (४१) सूकरस्येव चर्मणा काकस्याप्युपानहोः संभवाद् इति पूर्वपक्षे ।

> वसन्ते सर्वसस्यानां जायते पत्रशातनम् ।
> मोदमानाः प्रदृश्यन्ते यवाः कणिशशालिनः ॥

वराहं गावो ऽनुधावन्ति । अप्सुजो वेतस इतिवाक्यशेषरूपवेदविरोधिनी म्लेच्छप्रसिद्धिः स्मृतिरिव (४२) वेदविरुद्धा हेयेति निरस्तायां म्लेच्छप्रसिद्धौ निष्प्रतिपक्षार्थव्यवहाराच्छक्तिग्रहः । (४३) ननु वाक्यशेषाच्छूकरादिषु तात्पर्यनिश्चयो न शक्तिनिर्णयः, काकादिसदृशतया काकशूकरादौ प्रयोगस्य गौण्यादिनापि संभवादिति चेत् । न । सूकरादौ तात्पर्यवद् शक्तेरपि निश्चयात् । तथाहि । यद्यप्यनादिप्रयोगयोगिता न शक्तिनियता । वैदिकगौण्यादिना व्यभिचारात्, तथापि शक्तिरनादिप्रयोगनियता । अतो वराहशब्दस्यानादिप्रयोगयोगिता, शक्तिश्च काके कल्प्येति गौरवम् । सूकरे त्वनादिवेदसंबन्धात् प्रयोगो ऽनादिसिद्ध एव । शक्तिमात्रं कल्प्यतइति लाघवमित्यनादितात्पर्याच्छूकरे (४४) शक्तिरेव । अथ काकवद् शूकरोप्यसदृश एव, सुसदृशस्य गवयादेः सत्त्वात्, कथं चित्सादृश्यं काकस्याप्यस्तीति चेत् । न । काकशूकरयोः (४५) र्वराहशब्दाद्बुद्धिस्थत्वे ऽनयोः को वाच्य इति जिज्ञा-

---

तस्य च भाक्तत्वे मानाभावादिति भावः । (३५) शिवपदेति । नानार्थत्वकल्पने गौरवादिति भावः । ननु नानासर्गे शिवे एकजातौ मानाभावः,भावे वा बीजाक्षराणामेव तथानुगमोस्त्वित्यत आह । (३६) अदृष्टेति । विशेषो जातिरूप इत्यनुगमः । न चेन्द्रपदे तथात्वादिदानीं बलौ तद्व्यवहारापत्तिः । उत्तरकालीनाखण्डलशरीरस्यैवादृष्टोपगृहीतत्वेन तत्र तद्व्यवहारस्येष्टत्वादिति दिक् । (३७) ईश्वरस्येति । अदृष्टाभावेन तस्य हविरसंबन्धात्तथा च यापीश्वरायाहुतिः सापीशानाय तस्येश्वरभिन्नस्य देवतात्वसंभवात् । (३८) मन्त्रेति । मन्त्रप्रयोज्यहविःसंबन्धवत्त्वेनोद्देश्यत्वमित्यर्थः । हविष्ट्वं च त्यागकर्मत्वं तदुपादानं च तादृशस्वर्गसंबन्धत्वेनोद्देश्यतया त्यागकर्त्रंर्यतिव्याप्तिवारणाय । न चैवमपि प्रतिग्रहीतुः कोदादितिमन्त्रप्रयोज्यघृतादिस्वत्वसंबन्धवत्त्वेनोद्देश्यतया देवतात्वापत्तिः, त्यागकर्तृमन्त्रप्रयोज्यत्वस्य विवक्षितत्वात् । न चोद्देश्यपदं व्यर्थं, पार्वणादौ पित्रादेर्देवतात्वाभ्युपगमेपि तत्पत्न्या अपि देवतात्वापत्तिः । न योषिद्भ्यः पृथक् दद्यादित्यादिना तस्या अपि तत्र तादृशहविःसंबन्धित्वप्रतिपादनात् । न चैवं शूद्रपित्रादेरपि देवतात्वेन तत्र मन्त्रप्रयोज्यत्वाभावादव्याप्तिः, तस्य देवतात्वानभ्युपगमात्, अभ्युपगमे वा तज्जातीयहविःसंबन्धस्य विवक्षितत्वात् । प्रेतस्य च देवतात्वमिष्टमेवेत्येके । तदन्यत्वेन विशेषणाच्च तत्रातिव्याप्तिरित्यपरे । ननु नात्मनि देवतात्वं, शरीरान्तरावच्छिन्नत्वदशायामतिप्रसङ्गात् । किंतु शरीरे । तथा चात्मन्यतिव्याप्तिरिति चेत्, न । तथात्वे उद्देश्यत्वेनैव तद्वारणात् । देवतामुद्दिश्य हविस्त्यागात् । वस्तुतो विशिष्टस्यैवोद्देश्यत्वं देवतात्वं चेति नोक्तदोष इति दिक् । (३९) अन्येषामिति । उत्सर्ग इति शेषः । (४०) वाक्यशेषादिति । प्रयोजकत्वे पञ्चमी, तेनार्थव्यवहाराच्छक्तिग्रह इत्युपसंहारेण न विरोधः । (४१) सूकरस्येवेति । उपलक्षणं चैतत् । यवेनेव कङ्गवापि चरोर्वञ्जुलवल्कलैरिव जम्बूवल्कलैरपि कटस्य संभवादित्यपि द्रष्टव्यम् । (४२) वेदविरुद्धेति । यद्यपि वेदस्य दीर्घशूकादिशक्तिग्रहप्रयोजकत्वमात्रं न तु कङ्ग्वादिशक्तिविरहबोधकत्वं तथा च नानार्थत्वेप्युपपत्तेर्न वेदविरोधः । तथाप्यन्यायश्चानेकार्थत्वमिति निश्चये वेदस्य बलवत्त्वात्तत्सहकृतार्यव्यवहारस्यैव शक्तिग्राहकत्वमिति विनिगमकमुक्तमिति तात्पर्यम् । (४३) नन्विति । वाच्यतादिप्रतिपादकास्पदादिशब्दाभावादिति भावः । (४४) शक्तिरिति । आधुनिकचैत्रादिपदशक्तिभिन्नशक्तिरित्यर्थः । (४५) वराहशब्दादिति । न च शक्तिग्रहात् पूर्वं कथं ततस्तयोरुपस्थितिरिति वाच्यम् । प्रथममुभयत्रैव शक्तिग्रहाभ्युपगमात् । ततश्चोक्तन्यायेनैकार्थत्वनिश्चये कोनयोर्वाच्य इत्यत्र विनिगमकानुसर-

सानुरोधात् तयोरन्योन्यापेक्षया गोसादृश्यमुद्भूतं जिज्ञासमानस्य स्मृतिविषय इति तन्निरासात्। (४६) अन्यथा तात्पर्यग्राहकवाक्यशेषस्यापि निष्प्रयोजनत्वं स्यात्, कथंचित्सादृश्यस्य सर्वत्र सुलभत्वेन तात्पर्यानध्यवसायादिति ॥ इतरान्विते शक्तिरित्यपि गुडजिह्विका। वस्तुतोऽन्वयेपि न शक्तिः। ननु व्यवहारादनुमिते इतरान्वितज्ञाने पदकारणत्वग्रहात्तत्रैव शक्तिं गृह्णाति। उपस्थितत्वात्। न चाग्रे तत्त्यागो, हेत्वभावात्। न तु पदार्थमात्रे, व्यवहारात्तस्यानुपस्थितेः, उपायान्तरात्तदुपस्थित्यन्तरकल्पने मानाभावात्। अत इतरान्वितस्वार्थज्ञानशक्तत्वेन ज्ञातं पदं स्वार्थान्वयानुभावकमित्यन्विताभिधानमिति चेत्। न। इतरान्वितपदार्थज्ञानोपस्थितौ पदार्थज्ञानं विशेष्यमिति तदुपस्थितौ तस्यापि विषयत्वात्, विशिष्टज्ञानस्य विशेष्यविषयत्वनियमादिति तत्रैव शक्तिं कल्पयति, लाघवात्। न त्वन्वयांशेपि, गौरवात्। (४७) अस्तु वा प्रथममितरान्विते शक्तिग्रहोऽग्रे तत्त्यागः। अन्यलभ्यत्वप्रतिसंधानात्। अनन्यलभ्यस्यैव शब्दार्थत्वात्। प्रथमगृहीतमात्रं च न बलमित्युक्तमेव। तस्मात्सर्वैः प्रथमं व्यवहारादुपस्थितकार्यान्वितज्ञाने ऽन्वितज्ञाने वा पदकारणत्वग्रहात्तत्र शक्तिग्रहोग्रेपि गौरवान्यलभ्यत्वप्रतिसंधानेपि न तत्त्यागः पूर्वकल्पनाविपरीतत्वादित्यपि स्वशिष्यव्यामोहनम्। अथ कार्यस्येतरपदलभ्यत्वेन तथा। न त्वेवमन्वये। तस्येतरपदाशक्यत्वात्। शक्यत्वे वा विवादादिति चेत्। न। घटशक्तत्वेन ज्ञातं पदं स्वार्थस्मरणद्वारा ऽऽकाङ्क्षादिसहकारिवशात्समभिव्याहृतपदार्थेन सह स्वार्थस्यान्वयमनुभावयति स्वभावादित्यन्यथैवान्वयज्ञानलाभात् किं शक्त्या। (४८) अन्वयमात्रशक्तावप्यन्वयविशेषज्ञानार्थमाकाङ्क्षादेरवश्यमपेक्षणात्। (४९) क्रियाकारकपदयोः प्रत्येकमितरान्वितस्वार्थबोधकत्वे वाक्यार्थद्वयधीप्रसङ्गात्। न चैकमेवान्विताभिधायकम्, इतरत्तु प्रतियोगिस्मारकमिति वाच्यम्। अविशेषात्। (५०) अशक्यान्वयानुभवेऽतिप्रसङ्गात्। अन्वयेपि शक्तिरिति चेत्। न। अशक्यमपि हि शक्यान्वयं बोधयति, नान्यं, शक्यान्वये स्वस्य स्वरूपसतो (५१) नियामकत्वात्। अन्यथा तवाप्यप्रतीकारात्। नन्वेवं पदानामन्वितज्ञानजनकत्वात्तत्र शक्तिरस्त्येव। (५२) अशक्तस्याजनकत्वात्। (५३) तवापि पदादन्वयबोध इतीश्वरेच्छासत्त्वात्, इति चेत्। सत्यम्। (५४) किं त्वन्वयबोधे स्वरूपसती सा व्याप्रियते। न तु ज्ञाता, घटज्ञानशक्तत्वेन ज्ञानादेव घटान्वयबोधोपपत्तेः। (५५) यथा तव जातिशक्तपदस्यात्मव्यक्तिज्ञाने दृष्टं च ज्ञानकरणे सामान्यसंबद्धतया ज्ञातस्यापि विशेषबुद्ध्युपायत्वं, यथा वह्निसामान्यव्याप्ततया गृहीतधूमस्य (५६) वह्निविशेषबुद्धिजनकत्वम्। अथ घटज्ञानत्वमितरान्वितघटज्ञाने ऽप्यस्तीति तेन रूपेणान्वितघटज्ञानेपि ज्ञाता शक्तिर्व्याप्रियतइति चेत्। सत्यं, किं तु घटज्ञानत्वं शक्यतावच्छेदकं (५७) न त्वन्वितघटज्ञानत्वं, गौरवात्, अन्यलभ्यत्वाच्च। एवं च जाति-

---

णमिति भावः। यत्र च विनिगमकाभावस्तत्र नानार्थत्वमिति ध्येयम्। (४६) अन्यथा, उद्भूतत्वस्यापुरस्कारइत्यर्थः। नन्वनन्यलभ्यत्वे गौरवमप्रयोजकं, तथा च तदानीमन्यलभ्यत्वप्रतिसन्धानाभावाच्छक्तिग्रहः स्यादित्यरुचेराह। (४७) अस्तुवेति। नन्वाकाङ्क्षादिसहकारित्वकल्पनायामेव गौरवमत आह। (४८) अन्वयमात्रेति। अन्वयसामान्येत्यर्थः। (४९) क्रियेति। यद्यप्येक एवान्वय उभयप्रतियोगिक इति न वाक्यार्थद्वयधीप्रसङ्गस्तथापि घटान्वितानयनस्यानयनान्वितघटस्य च विशेषणविशेष्यभावभेदेन भिन्नत्वात्तथात्वं बोध्यम्। अन्वयप्रकारकधीप्रसङ्ग इत्यत्र तात्पर्यमित्यन्ये। (५०) अशक्येति। प्रकृतपदप्रयोज्यनियतस्मृत्यविषयानुभव इत्यर्थः,। तेन तन्मते व्यक्तेरशक्यतया न दोष इति ध्येयम्। (५१) नियामकत्वादिति। यद्यपि शक्यान्वयत्वं न कारणं न वा कारणतावच्छेदकम्, अन्वयबोधे तस्याकारणत्वाद् अनवच्छेदकत्वाच्च, तथाप्यन्वयांशविषयकज्ञानत्वमपि न कार्यतावच्छेदकं गौरवात्, अन्वये चाकाङ्क्षादिसामग्रीसत्त्वादन्यत्र तदभावाच्चातिप्रसङ्ग इत्यत्र तात्पर्यम्। (५२) अशक्तस्येति। अपभ्रंशे तन्मते जनकत्वं नेति न व्यभिचारः। त्वदभ्युपगतापि शक्तिस्तत्रास्तीत्याह। (५३) तवापीति। विषयाबाधादिति भावः। (५४) किं त्विति। तथा च यद्विषयतया ज्ञाता शक्तिरनुभावयति स एव शक्य इत्युच्यतइति नान्वयः शक्य इत्यर्थः। प्रतिबन्द्यभिप्रायेण दृष्टान्तमाह। (५५) यथेति (५६) वह्निविशेषेति। पर्वतीयत्वादिविशिष्टेत्यर्थः। तद्वत्पदार्थसामान्यशक्तस्याप्यन्वितपदार्थबोधकत्वं तत्र पक्षधर्मताबलात्पर्वतादिसंबन्धभानम्, अत्र च योग्यतादिबलात्पदार्थान्वयभानमिति भावः। (५७) न त्विति। अन्वयांशे शक्तत्वज्ञानस्य गौर-

वाचकपदस्य (५८) व्यक्ताविवेकैव शक्तिरन्वयांशे स्वरूपसती पदार्थांशे ज्ञाता व्याप्रियते । ननु (५९) जातिव्यक्त्योः समानसंवित्संवेद्यत्वात् तथा । घटज्ञानादिकं तु नान्वयविषयतानियतं, स्मरणे व्यभिचारादिति चेत् । (६०) घटानुभवविशेषं प्रति घटपदत्वेन कारणता, स च शाब्दानुभवो ऽन्वयविषयतानियत एव । केवलस्य शब्देनाननुभवात् । (६१) स्मरणं च प्रति पदत्वेन न जनकता, व्यभिचारात् । (६२) किं तु संबन्धितया (६३) ज्ञातत्वेन । (६४) स्यादेतत् । अन्वयतात्पर्यकतया तत्प्रतिपादकं पदमित्यविवादं, तात्पर्यनिर्वाहिका वृत्तिः सा चेह न गौणी, न वा लक्षणेति शक्तिः । (६५) अथान्वये लक्षणैव, स्वार्थसंबन्धिनि तात्पर्यात् । पदार्थोपस्थित्यनन्तरं (६६) तदन्वयोपपत्तेश्च । न च वृत्तिद्वयविरोधः, (६७) अन्वयविशेषणतया पदार्थोपस्थितेः । न च लाक्षणिकानामन्वयाननुभावकत्वादन्वयानुभवः कथमिति वाच्यम् । पदार्थस्मरणादन्वये ऽशक्तत्वाच्च, (६८) पदानां शक्त्या ऽननुभावकतया सर्वत्र लाक्षणिकस्यैवानुभावकत्वादिति, तन्न । वृत्तिर्हि ज्ञातोपयुज्यते न स्वरूपसती, अतिप्रसङ्गात् । न चेह स्वार्थसंबन्धितयान्वयः प्रागवगतः, वाक्यार्थस्यापूर्वत्वात् । किं च शक्यसंबन्धितया ऽन्वये लक्षणार्थं पदार्थे शक्तिकल्पनम् । तद्वरं (६९) लाघवादन्वये शक्तिरस्तु किं वृत्तिद्वयकल्पनया, एवं स्थिते प्रयोगेपि, । अन्वयः, पदशक्यः । (७०) वृत्त्यन्तरं विना पदप्रतिपाद्यत्वात्, पदार्थवदिति । उच्यते । वृत्तिं विना ऽपि तात्पर्यनिर्वाहात् किं वृत्त्या । पदानामुक्तक्रमेणान्वयबोधजनकत्वसंभवात् । अन्यथा शक्त्या तात्पर्यनिर्वाहो दृष्ट इति लक्षणोच्छेदः । अथ शक्तिं विनापि शक्यसंबन्धात्तन्निर्वाह इति न तत्र शक्तिः । तर्हि वृत्तिं विनापि तन्निर्वाह इति किं वृत्त्या । अत एवानुमानमप्रयोजकम्, अन्यथा पदप्रतिपाद्यत्वादेव शक्तिसाधने वृत्त्यन्तरोच्छेदः । अत एव धूमोस्तीत्यत्र धूमपदस्य वह्निपरत्वेपि वह्नौ न लक्षणा, शक्त्या धूमोपस्थितावनुमानद्वारा तत्प्रतीतिसंभवात् । तथा ।

गच्छ गच्छसि चेत्कान्त पन्थानः सन्तु ते शिवाः ।
ममापि जन्म तत्रैव भूयाद्यत्र गतो भवान् ॥

इति वाक्यस्य मा गच्छेत्यत्र तात्पर्ये ऽपि न लक्षणा । (७१) गमनस्य प्रियामरणहेतुत्वं हि वाक्यार्थः, ततो गमनं मया न कर्तव्यं, प्रियामरणहेतुत्वादित्यनु-

---

वेणाप्रयोजकत्वाच्च तत्र शक्तिरिति भावः । (५८) व्यक्ताविति । त्वन्मत इति शेषः । वैषम्यं शङ्कते । (५९) जातीति । (६०) घटेति । शब्दप्रयोज्यजातिविशेषविशिष्टघटानुभवं प्रतीत्यर्थः । एवं चान्वयविषयत्वमन्यथासिद्धतया न कार्यतावच्छेदकतया प्रविष्टमतस्तत्र न शक्तिरिति भावः । (६१) स्मरणं चेति । यद्यप्यत्रापि तत्त्वेन जनकत्वेनानुगतस्यापि जन्यतावच्छेदकत्वात्प्रकृते न कोपि दोषस्तथापि स्मरणे केन रूपेण जनकत्वमित्याकाङ्क्षायामेतदुक्तमित्येके । अन्ये तु यत्र पदत्वेन कारणता तत्रान्वयविषयतानियमः, एवं च शब्दजानुभववत्तज्जन्यस्मरणेपि तथा स्यादित्याकाङ्क्षायामेतदुक्तमित्याहुः (६२) किं त्विति । यद्यप्येवमदृष्टादिकारितस्मरणे व्यभिचार एव, यदि च तद्विशेषहेतुत्वं तदा पदत्वेनापि तस्य हेतुत्वे तुल्यं, तथापि हस्त्यादिदर्शनस्य हस्तिपकादिस्मरणे संबन्धिज्ञानत्वेन हेतुत्वमावश्यकमिति सामान्यसामग्रीत एव तदुपपत्तौ विशेषसामग्र्यन्तरकल्पने मानाभाव इत्यत्र तात्पर्यम् । (६३) ज्ञातत्वेनेति । यद्यपि चिरनष्टपदस्य न हेतुत्वं तथापि संप्रदायमतेनेदम् । प्रामाणिकं गौरवमित्याशयेन शङ्कते । (६४) स्यादेतदिति । तटस्थ आह । (६५) अथेति । (६६) तदिति । अन्वयेत्यर्थः । यथा पूरोपस्थित्यनन्तरं तीरान्वयबोधात्तत्र लक्षणा तथेहापीति भावः । (६७) अन्वयविशेषणतयेति । यद्यपि शक्यस्य शक्त्या विशेषणतयोपस्थितौ अदोषत्वे गङ्गायां घोष इत्यादावपि तथात्वापत्तिस्तथाप्यन्वयस्य संबन्धरूपतया यद्धि येन विना न भासत इति न्यायेन तल्लक्षणयैव पदार्थोपस्थितिरिति न वृत्तिद्वयविरोधः । अत एव राजपुरुष इत्यादावपि तथा । गङ्गायामित्यादौ तु नैवमित्याहुः । ग्रन्थकारमते वृत्तिद्वयविरोधाभावादेतदुक्तमित्यन्ये । (६८) पदानामिति । यदि च पदार्थशक्त्यैव लाक्षणिकार्थानुभावकत्वं तदा प्रकृतेपि तथा ऽस्त्विति भावः । (६९) लाघवादिति । विशिष्टएव शक्तिकल्पने लाघवं गङ्गापदे च नानाशक्तिकल्पनाप्रसक्त्या न तथात्वमिति भावः । यद्यप्यन्वयस्य लक्षणालभ्यत्वे विशिष्टशक्तावेव गौरवम् । अत एव शुक्लादिपदस्य द्रव्ये लक्षणा तथाप्युक्तरीत्या लक्षणालभ्यत्वमेव नेति भावः । (७०) वृत्त्यन्तरं विनेति । यद्यपि त्वन्मते व्यक्तौ छिद्रेतरत्वादौ पद्मे च व्यभिचारस्तथापि पररीत्या तदनभ्युपगमेनापातत इदमुक्तम् । वस्तुतोप्रयोजकत्वाभिधानमुपलक्षणमत्रापि दूषणे तात्पर्यम् । (७१) गमनस्येति । कान्तगमनस्येत्यर्थः । यद्यपि प्रिया-

मानादेव गमने ऽकर्त्तव्यताबोधनेन तात्पर्यनिर्वाहात् ।
(७२) यत्र हि मुख्यया साक्षात्परम्परया वा न तात्पर्यं
निर्वहति तत्र न लक्षणा । ननु घटमानयेत्यत्र प्रत्येक-
मन्वयविशेषे जिज्ञासा भवति, न च सामान्यानवगमे
विशेषे सा स्यादित्यन्वयसामान्ये शक्तिरिति चेत् । न ।
कारकेण क्रियया च (७३) क्रियाकारकसामान्याक्षेपात्
तदुपपत्तेः । (७४) दृष्टे फलादौ रसविशेषजिज्ञासावत् ।
एतेन यदुक्तमन्वितपदार्थे ममैकैव शक्तिः, तव त्वेका
पदार्थे, ऽपरा त्वन्वय,इति निरस्तम् । अन्वये शक्त्यभा-
वात् । न चैवमन्वयानुभवे पदविनियोगो न स्यादिति
वाच्यम् । अन्वयानुभवार्थमेव पदार्थे पदानां शक्तिकल्प-
नात् । तस्मा(७५)त्पदं करणं पदार्थस्मरणं व्यापारः ।
(७६) आकाङ्क्षादिसहकारात्स्मारितान्वयानुभवः फलं,
पदार्थस्मरणं न व्यवधायकं, व्यापारत्वात् । (७७) न
च स्मरणद्वारा पदार्थ एव करणं, तस्यानागतत्वादिना
स्वस्मरणेन्वयानुभवे चाजनकत्वात् । तथापि पदार्थस्म-
रणमेव करणमस्तु । (७८) आवश्यकत्वात् । (७९)
अत एव चिन्तावशोपस्थितपदार्थानामन्वयबोधात् का-
व्यादिरिति चेत् । न । (८०) स्मरणस्य निर्व्यापारत्वे-
नाकरणत्वात् । (८१) अनन्यथासिद्धान्वयव्यतिरेकाभ्या-
माकाङ्क्षादिमत्पदस्यान्वयानुभव(८२)विशेषे कारणत्वात् ।
पदार्थस्योपस्थितेः संसर्गधीमात्रहेतुत्वेपि शाब्दसंसर्गधी-
विशेषे पदस्यैव हेतुत्वात् । (८३) गौः कर्मत्वमानयन-
मित्यत्र पदार्थज्ञानेप्यन्वयज्ञानानुदयात् । (८४) पदवि-
शेषोपस्थितपदार्थज्ञानस्य हेतुत्वे पदविशेषस्यैवावश्यक-
त्वेन (८५) हेतुत्वाच्च । काव्यस्थले च पदार्थज्ञानव्या-
पारकमुत्प्रेक्षादिसहकृतं मन एवान्वयानुभवकरणं, न चैव-
मुत्प्रेक्षायाः पृथक् प्रमाणत्वं, (८६) व्यभिचारिजातीय-
लिङ्गादाविव प्रमाणकरणतावच्छेदकानतिप्रसक्तानुगतरूपा-
भावात् । निर्व्यापारत्वाच्च । किं तु प्रमाणसहकारिणी
सा । अत एव मानसे लिङ्गपरामर्शे व्याप्तिस्मृत्यादि न

मरणहेतुत्वं न वाक्यार्थः, पदार्थसंसर्गस्यैव वाक्यार्थत्वात्, किं
तु मरणं विना जन्माभावात्तेन तदाक्षिप्यते तथापि वाक्यप्र-
योज्यज्ञानविषयत्वेन वाक्यार्थत्वं बोध्यम् । वाक्यतात्पर्यवि-
षयत्वेन वा तदर्थत्वम् । यदा च लिङ्गव्याप्त्याद्यप्रतिसंधाना-
दनुमानेन तात्पर्यनिर्वाहस्तदात्र लक्षणाभ्युपगमे ऽपि न क्ष-
तिरित्याहुः । अत एवाह । (७२) यत्र हीति । (७३) क्रि-
ययेति । क्रियाकारकान्वयसामान्याक्षेपकत्वादित्यर्थः । नन्वेव-
मपि विशेषज्ञानं विना कथं विशेषजिज्ञासेति चेन्न । अन्वयरू-
पधर्मिज्ञाने सति तत्र स्मृत्युपनीतविशेषजिज्ञासासंभवात्, अत
एवानुरूपं दृष्टान्तमाह । (७४) दृष्ट इति । रूपविशेषेणाक्षि-
प्ते रससामान्ये स्मृत्युपनीतं मधुरत्वविशेषजिज्ञासावदित्यर्थः ।
(७५) पदमिति । एतच्च संप्रदायमते । (७६) आकाङ्क्षादी-
ति । स्वरूपसद्धेतुत्वपक्षे इदम् । अन्यथा तज्ज्ञाने तात्पर्यम् ।
भाट्टमतमाशङ्क्य निराकरोति । (७७) न वेति । (७८) आवश्यक-
त्वादिति । तथा च पदानामर्थस्मरणएवोपक्षयादन्यथासिद्धत्व-
मिति भावः । व्यभिचारमप्याह । (७९) अत एवेति । फलवैजात्यं
नास्तीत्यभिमानः । (८०) स्मरणस्येति । तथा चानन्यगत्या
पदानामेव कारणत्वं न तु स्मरणे तदुपक्षय इति भावः । न चास-
त्तिज्ञानरूपतज्ज्ञानव्यापारोस्त्विति वाच्यम् । तद्धेतुत्वस्य प्राге-
व निराकृतत्वात् । ननु क्रियया अयोगव्यवच्छेदेन संबन्धित्वं
कारणत्वमिति निर्व्यापारमपि कारणमस्तु, स्मरणव्यापारकं मन
एव वा करणमस्तु, तद्धेतुत्वस्यावश्यकत्वात् । यथा चैवं न मान-
सत्वापत्तिस्तथोक्तमनुमानप्रकाशे । तथा च स्मरणएव पदोपक्षय
इत्यतो हेत्वन्तरमाह । (८१) अनन्यथेति । अत एव पदा-
दमुमर्थं प्रत्येमीत्यनुभवोपीति भावः । (८२) विशेष इति ।
शब्दप्रयोज्यजातिमतीत्यर्थः । तथा च नोक्तव्यभिचारोपीत्यर्थः ।
न च वैजात्यमसिद्धम्, अनुभवसिद्धत्वात् । पदहेतुत्वे माना-
न्तरमाह । (८३) गौरिति । तदुक्तसकलहेतुसत्त्वेप्यन्वयबोधा-
नुत्पादः पदविशेषहेतुत्वमाक्षिपतीत्यर्थः । अवच्छेदकत्वेना-
न्यथासिद्धिमाशङ्क्य निराचष्टे । (८४) पदविशेषेति । यद्यप्येवं
तन्मतेपि काव्यस्थले व्यभिचारस्तथाप्यन्वयबोधविशेषेपि स्म-
रणविशेषस्यैव हेतुत्वं न तु पदस्येति भावः । (८५) हेतुत्वा-
दिति । व्यापारावच्छेदकतया व्यापारिणोप्यन्यथासिद्धौ चक्षुरा-
देरपि तथात्वापत्तेः, उक्तयुक्तेश्चेति भावः । (८६) व्यभिचा-
रीति । ननु तत्तदुत्प्रेक्षातः कदा चित्प्रमोत्पत्तेस्तत्त द्विशेषहे-
तुत्वमावश्यकमिति तथैव प्रमाणत्वमस्तु, पदार्थज्ञानं वा त-
थास्तु, यथा चक्षुरादौ व्यभिचारिव्यावृत्तं निर्दोषत्वादिकमव-
च्छेदकं तथा प्रकृतेप्यस्तु, यदि च निर्व्यापारतया न तथात्वं,-
तदा पदार्थोपस्थापकचिन्तादेस्तथात्वमस्तु,न चाननुगमः । उ-
पाधिविशेषस्य तथात्वापत्तेः । यदि च तस्य स्मरणएवोपक्षयः,
तदा पदेपि तुल्यम् । किं चानुमितेः परामर्शव्यापारकमनःक-
रणत्वपक्षे यथा परामर्शस्य प्रमाणान्तरत्वं तथा प्रकृतेप्यस्त्विति
चे,न्नैवम् । फलबलेन परामर्शस्य विजातीयप्रमाजनकत्वं, प्रकृते

पृथक् प्रमाणम् । (८७) अथ पदमन्तरेणापि योग्यताज्ञाने ऽन्वयबोधो भवति, अतः पदार्थस्मरणएव पदानामुपक्षयः । तदुक्तम् ।

पश्यतः श्वेत(८८)मारूपं हेषाशब्दं च शृण्वतः ।
खुरविक्षेपशब्दं च श्वेतो ऽश्वो धावतीति धीः ॥

इति चेत्, सत्यम् । (८९) प्रयोजकवाक्योच्चारणानन्तरं प्रयोज्यव्यापारदर्शनाद् अन्वितज्ञानोपपत्त्यर्थं पदस्यैव शक्तिः कल्प्यते । (९०) प्रथमतस्तस्यैव कारणत्वावधारणात् । पदार्थे (९१) शक्त्यन्तरकल्पने गौरवात् । तदाहुः ।

प्राथम्यादभिधातृत्वात्तात्पर्योपगमादपि ।
पदानामेव सा शक्तिर्वरमभ्युपगम्यताम् ॥

इति । श्वेतो ऽश्वो धावतीति धीश्च (९२) लिङ्गजा, पदस्य क्लृप्तकारणस्याभावादिति ॥

च न तथेति प्रमित्यन्तरासाधारणकारणासहकृतमनोजन्यत्वेनास्य मानसत्त्वेन तत्करणस्यातथात्वाद् । अधिकमनुमानप्रकाशे प्रपञ्चितम् । अन्वयविरोधिपदार्थोपस्थितिर्हेतुरित्याशयेन शङ्कते । (८७) अथेति । (८८) आरूपमिति । आ ईषत् श्वेतं रूपं पश्यतइत्यर्थ इत्येके । आपश्यतइति व्यवहितोपसर्ग इत्यन्ये । आरूपशब्दो ऽस्पष्टार्थक इत्यप्याहुः । तथा हेतुत्वे गौरवमित्याशयेनाह । (८९) प्रयोजकेति । (९०) प्रथमत इति । ननूपायस्यान्वयादेः साधारणतया प्रयोजकत्वमात्रमवधारयति न तु कारणत्वं, गृहीतमपि कारणद्वयकल्पनागौरवादग्रे त्याज्यं, कार्यान्वितशक्तिवत् । न चैवं पदे शक्तिरपि न स्यात्, ततः पदार्थस्मरणं न स्यादिति वाच्यम् । प्रयोजकत्वगर्भाया एवेश्वरेच्छायाः शक्तित्वाभ्युपगमादिति चे,न्न । अनन्यथासिद्धान्वयादेस्तद्ग्राहकत्वं व्यापारेण च नान्यथासिद्धिरित्यादि प्रागुक्ते तात्पर्यात् । (९१) शक्त्यन्तरेति । ननु कारणता यदि शक्तिः स्यात्साऽस्त्येव, पदवत्, अत एव विषयाबाधादीश्वरेच्छापि । न चास्माच्छब्दादिति शब्दगर्भा सा । तर्हि तत्र वाक्ये न गौरवं पदार्थान्तररूपा पदेष्वनभ्युपगतेति चे,न्न । तद्विषयतया तदिच्छाया ज्ञानहेतुत्वे गौरवादित्यत्र तात्पर्यात् । अभिधातृत्वादिति भाट्टमते लिङादिपदाभिप्रायेणाभिधायास्तत्र वृत्तेरित्याहुः । (९२) लिङ्गजेति । अयं श्वेतो धावदश्वः, हेषाशब्दकारित्वे सति खुरविक्षेपशब्दविशेषकारित्वादिति लिङ्गमित्यर्थः ॥

॥ अथ वेदान्तसूत्रसंबन्धिशैवभाष्यचतुर्थाध्यायस्य ॥

॥ चतुर्थपादारम्भः ॥

॥ संपद्याविर्भावः स्वेन शब्दात् ॥ १ ॥

पूर्वत्रार्चिरादिना मार्गेण विद्यावतां[1] हिरण्यगर्भनारायणपदातीतं परब्रह्मणः शिवस्य परमसुखरूपतया स्वर्गशब्दवा[2]च्यं पदं प्राप्यमिति निरूपितम् । इहातः प्राप्तानां स्वरूपाविर्भावादिप्रकारो निरूप्यते । "अस्माच्छरीरात् समुत्थाय परं ज्योतिरुपसंपद्य स्वेन रूपेणाभिनिष्पद्यत" इति परं ज्योतीरूपं महाप्रकाशं परब्रह्म प्राप्तस्य स्वरूपाविर्भाव उच्यते । तत् स्वरूपं तस्य योगिनस्तात्कालिकमुतपूर्वसिद्धं वेति संशयः । न[3] पूर्वं सिद्धम् । किंत्वभिनिष्पत्तिश्रवणात् स्वर्गवदागन्तुकमेव । तस्य पूर्वसिद्धत्वे च कुतोऽस्य संसारः । अतस्तदुपासनाजन्यं मुक्तिफलं तद्रूपमागन्तुकम् । इति प्राप्तेऽभिधीयते । ब्रह्म प्राप्तस्य जीवस्य मलतिरोहितं ब्रह्मसदृशगुणं स्वरूपं पूर्वं सदैव मलावरणापगमादाविर्भवति । स्वेन रूपेणेति शब्दात् तथा[4]वगम्यते । अन्यथा ह्यागन्तुकस्यापि रूपस्य स्वासाधारणत्वात् स्वेनेति विशेषणमनर्थकं स्यात् । तत्र[5] सर्वानुग्राहकस्य शिवस्य परब्रह्मणः प्रसादेन स्वावरणे मले विगलिते तत्सदृशगुणमात्मस्वरूपं प्रादुर्भवति । न कर्मफलवदुत्पद्यते । मलस्यानादित्वात् सं[6]सारोपपत्तिः । अतः स्वाभाविकमेव मुक्तस्य स्वरूपं चिदानन्दघनं सर्वज्ञत्वादिविशिष्टमाविर्भवति[7] ॥ १ ॥

॥ मुक्तः प्रतिज्ञानात् ॥ २ ॥

आत्मस्वरूपमात्रस्य प्रागेव सिद्धत्वेऽपि मलविनिर्मुक्तस्यापरिच्छिन्नानन्दाद्याविर्भाव उच्यते । "एतं त्वेव ते भूयोऽनुव्याख्यास्यामि" इति मलप्रयुक्तजागरिताद्यवस्थाविनिर्मुक्तस्यैव वक्तव्यतया प्रतिज्ञानात् ॥ २ ॥

किं च ॥

॥ आत्मा प्रकरणात् ॥ ३ ॥

तत्र "भूयोऽनुव्याख्यास्यामि"इति प्रकृतापहतपाप्मत्वादिगुणक आत्मा वक्तव्यः । प्रकरणादवगम्यते[8] । "य आत्मा-

---

१ विद्यावतां योगिनां इति पा० ।

२ स्वः पद–इति पा० ।

३–यः । किं प्राप्तम् । अस्माच्छरीरात् समुत्थायेति निर्मुक्तसंसारस्वभावस्य पुरुषस्य परं ज्योतीरूपं ब्रह्म संपद्याविर्भूतरूपं तत्सदृशगुणं न इति पा० ।

४–ति स्वशब्दात् तद–इति पा० ।

५ ते । अत्र इति पा० ।

६–त्वादस्य सं–इति पा० ।

७–विर्भूतं भवति इति पा० ।

८ प्रकृतोऽपहतपाप्मत्वादिगुणक आत्मा प्रकरणादवगम्यते इति पा० ।

पहतपाप्मा" इत्यादि प्रक्रत्यैव[१] भूयोऽनुव्याख्यास्यामि" इत्युक्तत्वात्[२] । अतः प्रादुर्भूतस्वाभाविकापहतपाप्मत्वादिको मुक्त आत्मा ब्रह्मसदृशगुणस्वरूप इति सिद्धम् ॥ ३ ॥

॥ अविभागेन दृष्टत्वात् ॥ ४ ॥

पूर्वाधिकरणे ब्रह्मगुणस्वरूपसदृशं मुक्तस्य गुणस्वरूपमिति प्रतिज्ञातम् । तत् सादृश्यं मुक्तस्योपपद्यते न वेति विचारः । किं प्राप्तम् ।

"एको रुद्रो न द्वितीया यतः स्युः"

इत्यादिषु ब्रह्मणः सदृशस्य द्वितीयस्य[३] निषेधात् कस्यचिदपि बद्धस्य मुक्तस्य वा तत्सादृश्यमनुपपन्नम् । इत्येवं प्राप्ते सिद्धान्त उच्यते[४] । मुक्तस्य ब्रह्मणा सादृश्यमस्ति । कुतः, "निरञ्जनः परमं साम्यमुपैति" "मुक्तः शिवसमो भवेत्" इति मुक्तस्य ब्रह्मगुणस्वरूपाविभागेन ब्रह्मसदृशतया दृष्टत्वात् । अतो "ब्रह्म वेद ब्रह्मैव भवति" इति ब्रह्मसादृश्यमेवोच्यते । मुक्त आत्मा सादृश्याद् ब्रह्मस्वरूपाविभागेन स्वस्वरूपमनुभवति । यदुक्तम् । "एक एव रुद्रो न द्वितीय" इत्यादिना सादृश्यनिषेधः क्रियत इति । तज्जगदीश्वरत्वादेव । जीवस्य जगद्व्यापाराद्यभावाद्, वक्ष्यति[५] "भोगमात्रसाम्यलिङ्गाच्च" इति ।

अतो ब्रह्मण इव सकलकामावाप्तिरस्य तत्साम्यमुच्यते । तथा श्रूयते । "सोऽश्नुते सर्वान् कामान् सह ब्रह्मणा विपश्चिता" इति । अतो मुक्तस्य ब्रह्मसादृश्यमुपपद्यते[६] ॥ ४ ॥

॥ ब्राह्मेण जैमिनिरुपन्यासादिभ्यः ॥ ५ ॥

पूर्वत्र स्वयंप्रकाशमपहतपाप्मत्वादिगुणविशिष्टं ब्रह्मसदृशं मुक्तस्य स्वरूपमाविर्भवतीत्युक्तम् । तदुभयरूपत्वं संभवति न वेति संशयः । एवं सति मतान्तरेण पूर्वपक्षः प्रवर्तते । तथा स्वेन रूपेणेति स्वरूपाविर्भावो ब्राह्मेणापहतपाप्मत्वादिकेन । ते हि ब्रह्मगुणाः प्रत्यगात्मनोऽपि स्वाभाविकाः । "य आत्मापहतपाप्मा" इत्याद्युपन्यासात् । "जक्षन् क्रीडन् रममाण" इत्यादिश्रवणाच्चावगम्यते[८] । अतो ब्रह्मणा गुणसाम्यमिति जैमिनिः ॥ ५ ॥

१–प्मा" इत्यारभ्य "सत्यसंकल्प" इति प्रक्रत्यैव इति पा० ।

२–मि" इति निरूपितम् इति पा० ।

३–यद्वितीयवस्तु–इति पा० ।

४–पि मुक्तस्य ब्रह्मसादृश्यं न संभवति । इति प्राप्ते ब्रूमः । इति पा० ।

५–षेध इति, तज्जगदीश्वरत्वादेव । जीवस्य जगद्व्यापारादिकं नास्तीति वक्ष्यति इति पा० ।

६–प्तिसादृश्यमवगम्यते । अतो ब्रह्मसादृश्यं युक्तमेव इति पा० ।

७ ब्रह्मणोऽ–इति पा० ।

८–प्मा" इत्यादिनावगम्यते इति पा० ।

॥ चिति तन्मात्रेण तदात्मकत्वा-
दित्यौडुलोमिः ॥ ६ ॥

"स यथा सैन्धवघनोऽनन्तरो बाह्यः कृत्स्नो रसघन एवं वारेऽयमात्मानन्तरो बाह्यः कृत्स्नः प्रज्ञानघन एव विज्ञानघन एव" इत्यवधारणाद् विज्ञानस्वरूपमात्रेण साम्यमित्यौडुलोमिः । एवमुभयदर्शनात् सविशेषनिर्विशेषत्वे सिद्धे युगपदुभयासंभवात् कालभेदादिना व्यवस्थेति ॥ ६ ॥

अथ सिद्धान्त उच्यते[१] ॥

॥ एवमप्युपन्यासात् पूर्वभावादवि-
रोधं बादरायणः ॥ ७ ॥

बादरायणस्तु परस्परविरोधाभावादुभयश्रुत्यवगतोभयस्वरूपमस्य प्रतिपादयति । तथाहि, "विज्ञानघन एव" इत्यादिना स्वप्रकाश इत्यवगतेऽपि "य आत्मापहतपाप्मा" इत्युपन्यासात्[२] पूर्वेषामपहतपाप्मत्वादीनामपि सद्भावोऽवगम्यते । अत उभयप्रमाणसिद्धं रूपद्वयं परस्पराविरोधि, इत्युभयरूपसमुच्चयः समुच्चितः । विरोधे हि कालभेदाद्यपेक्षा । अतो ज्ञानरूपत्वेन स्वयंप्रकाशमपहतपाप्मत्वादियोगात् कल्याणगुणविशिष्टं च ब्रह्मसदृशं मुक्तस्वरूपमिति युक्तम् ॥ ७ ॥

॥ संकल्पादेव तु तच्छ्रुतेः ॥ ८ ॥

पूर्वत्र मुक्तस्य स्वयंप्रकाशस्य सत्यसंकल्पत्वाद्युक्तम् । तदुपपन्नं[३] न वेति विचिकित्सा । किं प्राप्तम् । मुक्तस्य भोग्यवस्तुविषये न संकल्पमात्रं हेतुः । बाह्यहेतुनैरपेक्ष्येण तावता तदसंभवात् । इत्येवं प्राप्ते ब्रूमः । संकल्पमात्रेण सकलभोग्यवस्तुसिद्धिरस्ति, तथा हि श्रूयते । "स यदि पितृलोककामो भवति, संकल्पादेवास्य पितरः समुत्तिष्ठन्ति" इत्यादि । अतोऽस्य संकल्पमात्रमेव सकलभोग्यवस्तुसंपादने हेतुः । न बाह्यहेत्वपेक्षा ॥ ८ ॥

॥ अत एव चानन्याधिपतिः ॥ ९ ॥

यत एव ब्रह्मस्वरूपापन्नोऽयमपहतपाप्मत्वादिगुणकोऽत एवानन्याधिपतिः स्वतन्त्रः । कदाचिदपि न कर्माधीनः । कर्मणो विनष्टत्वात् । नास्य परमेश्वरो नियामकः । प्रवाहसिद्धतदाज्ञारूपविधिनिषेधशास्त्रपथातीतत्वात् । कुतः । पशुत्वव्यावृत्तेः । मलापगमेन हि शिवत्वमेवास्य सिद्धम् । शिवत्वं नाम निखिलमलसंपर्करहितनिरतिशयमङ्गलास्पदत्वरूपम् । शिव-

१–ज्ञानघन एवेत्यवधारणाद्विज्ञानस्वरूपमात्रेण साम्यमित्यौडुलोमिः । ॥ ६ ॥ "सत्यं ज्ञानमनन्तं ब्रह्म" इत्यादिषु तथा ह्युपन्यासः । एवमुभयदर्शनात् सविशेषनिर्विशेषत्वे सिद्धे युगपदुभयासंभवात् कालभेदाविना व्यवस्थितिरिति शङ्कायां सिद्धान्त उच्यते ॥ इत्येव पा० ।

२ इत्यादिना इति पा० ।

३–त्वादि यदुक्तं तदिहोपपन्नं इति पा० ।

सदृशस्वतन्त्रत्वसर्वज्ञतादिरिह शिवसदृशस्वभावः। अतोऽस्य मुक्तस्य शिवसदृशस्य सर्वज्ञत्वमनादिबोधरूपत्वं नित्यतृप्तत्वं स्वतन्त्रत्वं सर्वशक्तिमत्त्वमलुप्तशक्तिकत्वमनन्तशक्तित्वं चेति। आत्मज्ञानसंकोचरूपो हि संसारः। ततश्च कारणमलापगमेऽस्य सर्वज्ञत्वम्[1]। अत एवाज्ञानस्य संसारनिदानस्य समूलनिवृत्तेः परिच्छिन्नापरिच्छिन्नदेहाद्यभिमानरूपभ्रमनिवृत्तिः। यतो ह्यस्य जरामरणशोकराहित्यम्, अत एव कर्मवश्यत्वाभावात् स्वतन्त्रत्वं, निरतिशयस्वरूपानन्दवत्त्वं, स्वानुभवैकरससिद्धतया स्वात्मारामत्वेन नित्यतृप्तत्वम्। अत एवास्य जिघत्सापिपासादिराहित्यम्। अलुप्तसर्वशक्तिकत्वादस्य सत्यकामसत्यसंकल्पत्वादिसिद्धिः। तस्मादसौ परमेश्वरोऽपहतपाप्मत्वादिगुणाष्टकयुक्तः श्रूयते[2]। अतो मुक्तस्य शिवसदृशस्य स्वातन्त्र्यं युक्तमेव ॥ ९ ॥

॥ अभावं बादरिराह ह्येवम् ॥ १० ॥

पूर्वत्र मुक्तस्य स्वयंप्रकाशत्वं सत्यसंकल्पत्वादिवैशिष्ट्यं चोपपादितम्। इह तस्य सशरीरत्वमशरीरत्वमुभयं वेति विचारः[3] प्रवर्तते। बादरिस्तु मुक्तस्य देहेन्द्रियाद्युपकरणाभावं मेने। "निष्कलं निष्क्रियम्", इत्यादिकं ब्रह्मणस्तदभावमाह हि। तत्स्वरूपस्य मुक्तस्यापि तथात्वमिति ॥ १० ॥

॥ भावं जैमिनिर्विकल्पामननात् ॥ ११ ॥

जैमिनिस्तु "स एकधा भवति त्रिधा भवति" इत्यादौ देहेन्द्रियादिभिर्विविधत्वश्रुतेस्तद्भावमेव मेने। तदेवं सदेहत्वश्रुतेर्विदेहत्वश्रुतेश्च किमस्य तात्त्विकमिति संशये विदेहत्वमेव तात्त्विकम्। "मनसैतान् कामान् पश्यन् रमते, य एते ब्रह्मलोके" इति बाह्येन्द्रियाद्यभावो हि मुक्तस्य श्रूयते। ब्रह्म च बाह्येन्द्रियादिरहितं[4] श्रूयते। "सत्यात्म प्राणारामं मन आनन्दम्" इति। आत्मन्येवारामो न बाह्ये, मनस्येवानन्दो न बाह्ये करणे, इति हि तत्र निरुक्तिः। अतो मुक्तस्य विदेहत्वमेव। सदेहत्वस्य तु पुरुषभेदाद्व्यवस्था ॥ ११ ॥

इत्येवं प्राप्ते सिद्धान्त उच्यते ॥

॥ द्वादशाहवदुभयविधं बादरायणोऽतः ॥ १२ ॥

उभयश्रुतेः सशरीरत्वमशरीरत्वं च स्वेच्छया मुक्तस्येति भगवान् बादरायणो मन्यते। यथा द्वादशाहस्योभयश्रुतेः सत्रत्वमहीनत्वं च। तद्वदिति। अत्र पौराणिकी भणितिः।

"सर्वज्ञाः सर्वगाः शुद्धाः परिपूर्णाः स्वभावतः।
शिवतुल्यबलोपेताः परमैश्वर्यसंयुताः ॥
सदेहाश्च विदेहाश्च भवन्त्यात्मेच्छया पुनः"।

इत्यादिका शिवपदारूढविषये। अत उभयविधत्वं युज्यते ॥ १२ ॥

एकस्यैव कालभेदादुभयव्यवस्थामाह ॥

॥ तन्वभावे संध्यवदुपपत्तेः ॥ १३ ॥

मुक्तः स्वेच्छया कदाचिद् बहूनि शरीराणि सृष्ट्वा तदनुप्रवेशेन विहरति। कदाचिदुपसंहृतशरीरश्च वर्तते। स्वेच्छासंपादितशरीराद्यभावावस्थायां मुक्तः स्वप्ने परमेश्वरसृष्टं रथादिकं मनसा बद्धपुरुष इव परमेश्वरसृष्टमेव रसं भुङ्क्ते। किमुक्तं भवति। स्वप्ने पुरुषो यथा शरीरेन्द्रियादिनैरपेक्ष्येण केवलेन मनसैवेश्वरसंपादितान् विषयान् भुङ्क्ते। तथा मुक्तोऽपि स्वभूतेन मनसैव ब्रह्मस्वरूपरसमनुभुङ्क्त इति ॥ १३ ॥

॥ भावे जाग्रद्वत् ॥ १४ ॥

स्वेच्छासृष्टशरीराद्युपकरणभावे जाग्रत् पुरुष इव सर्वकामं भुङ्क्ते[1]।

ननु यदि मुक्तस्य प्राकृतवस्तुदर्शित्वरूपं भोक्तृत्वं, तर्ह्यपुरुषार्थप्रपञ्चदर्शिनो मुक्तस्य न संसारदुःखानुषङ्गाभावसिद्धिः। इति चेत्। न। मुक्तस्य पुरुषार्थरूपेण[2] प्रपञ्चदर्शनाभावात्। मुक्तेन ब्रह्माकारं हि दृश्यते विश्वमेतत्। तथा हि श्रूयते। "एतत् ततो भवति" "आकाशशरीरं ब्रह्म" "सत्यात्म प्राणारामं मनआनन्दं शान्तिसमृद्धममृतम्" इति। पूर्वत्र "आप्नोति स्वाराज्यम्, आप्नोति मनसस्पतिम्", इति स्वाराज्यसुखैकरसं शिवस्य परब्रह्मणः पदं मनसस्पतिं ज्ञानशक्त्यधिष्ठातृभूतमाप्नोति योगीत्युक्तम्। तदा स किंविशिष्ट इत्याकाङ्क्षायां "वाक्पतिश्चक्षुष्पतिः श्रोत्रपतिर्विज्ञानपतिः" इति वागादीनां स्वेच्छाधीनत्वेन तदाधिपत्यमुक्तम्। तदेवंविधस्य मुक्तस्य परमाकाशरूपशिवपदाधिरूढस्य स्वेच्छाधीनविशुद्धवागादिकरणस्य ततस्तत्पदप्राप्त्यनन्तरमेतद्विश्वजालं भवति। किं भवति। आकाशशरीरं ब्रह्मैव परमानन्दलक्षणपरमाकाशशरीरं ब्रह्मेति। परप्रकृतिरूपा परमसत्ता प्रकाशानन्दसमरसा परशक्तिर्हि ब्रह्मणः स्वरूपतया परमाकाश उच्यते। या मुक्तानां परमेश्वरस्य च साक्षादर्थक्रियाहेतुः। परंपरयान्येषाम्। तथाहि, "को ह्येवान्यात्" "कः प्राण्यात्" "यदेष आकाश आनन्दो न स्यात्" "एष ह्येवानन्दयाति" "रसो वै सः", "रसं ह्येवायं लब्ध्वा-

---

[1] संकोचकारणत्वं मलस्य इति पा०।

[2]—ष्मा विरजो विमृत्युर्विजिघत्सोऽपिपासः सत्यकामः सत्यसंकल्पः श्रूयते इति पा०।

[3] संशयः इति पा०।

[4] ते। तथा इति पा०।

---

[1]—ङ्क्ते। ततो न विरोधः। इति पा०।

[2] ननु प्राकृतवस्तुदर्शित्वं हि भोक्तृत्वं, न पुरुषस्य, संसारदुःखानुषङ्गाभावादिति चेन्न। मुक्तस्य पुरुषार्थरूपेण इति पा०।

नन्दीभवति'' इति सर्वानुभवविषयत्वमस्य श्रूयते । तथा च "अयं स एको मानुष आनन्द'' इत्यारभ्य "स एको ब्रह्मण आनन्द'' इति ब्रह्मपर्यन्तमुपाधितिरोधानाभावादानन्दाविर्भावस्तारतम्येन श्रूयते । निरुपाधिकतया ब्रह्मणि मुक्ते च परिपूर्णो वर्तते स आनन्दः "स एको ब्रह्मण आनन्दः श्रोत्रियस्य चाकामहतस्य'' इति श्रवणात् । ब्रह्मार्पणबुद्ध्या निष्कामानुष्ठिताग्निहोत्रादिकर्मा परविद्वानकामहतः श्रोत्रियः । तस्य जीवत एव मुक्तस्य ब्रह्मणश्च तुल्य एवानन्दः । तस्य योगातिशयेन तद्भूमिमधिरूढस्य पूर्वत्र पूर्वत्र भूमावभ्यासः स्वल्प इति तदनुसारेण तद्भूमौ तदीयानन्दाविर्भावस्य मानुषाद्यानन्दसाम्यक्लृप्तिरिति न विरोधः । अतोऽयमेव परमानन्दः परप्रकृतिः परमाकाशः, पराभेदात्, "आनन्दो[1] ब्रह्मेति व्यजानात्'' इति ब्रह्मत्वेन जगत्कारणत्वेन श्रूयते तस्याभिव्यक्तिः । "सैषा भार्गवी वारुणी विद्या परमे व्योमन् प्रतिष्ठिता'' इति । अतो मुक्तानां परमानन्दरूपपरमाकाशशरीरं ब्रह्म जगद्भवति, इति परमानन्दानुप्रविष्टानामेषां ब्रह्मण इव दुःखानुषङ्गाभाव एव ॥ १४ ॥

॥ प्रदीपवदावेशस्तथा हि दर्शयति ॥ १५ ॥

सूचितं हि पूर्वत्र मुक्तात्मनोऽपि स्वेच्छयानन्तशरीरपरिग्रहणसामर्थ्येन विभुत्वम् । तदिह युज्यते न वेति विचार्यते । "सर्वेषु लोकेषु कामचारो भवति, इमाल्लोकान् कामान् नीकामरूप्यनुसंचरन्'' इत्यादिषु मुक्तस्य परिच्छिन्नतया संचारावगमाच्च व्यापकत्वमनुचितम् । अतो बहुशरीरपरिग्रहणं क्रमेणैव, न युगपदिति पूर्वः पक्षः । सिद्धान्तस्तु घटादिपरिच्छिन्नस्य प्रदीपस्य परिच्छेदापाये स्वप्रभया यथा गृहादिव्याप्तिः । तथा मुक्तस्य स्वशक्तितिरोधायकमलापाये स्वशक्त्या विश्वव्याप्तिरावेशः । तथा हि दर्शयति श्रुतिः । "स नो बन्धुर्जनिता स विधाता धामानि वेद भुवनानि विश्वा'' "यत्र देवा अमृतमानशानास्तृतीये धामान्यभ्यैरयन्त,परिद्यावापृथिवी परियन्ति सद्यः, परि लोकान् परि दिशः परि स्वः, ऋतस्य तन्तुं विततं विवृत्य तदपश्यंस्तदभवन् प्रजासु'' इति । तत्र प्रकरणं तु एष हि देव इति जगत्कर्तुर्विश्वरूपस्य महादेवस्य हि, स महादेवो नोऽस्माकं बन्धुर्जनिता सकलश्रेयसां कर्ता धामानि तेजोरूपाण्यप्राकृतानि विश्वान्यपि जानाति । अत्र बन्धुत्वादियोग्यस्य धामवेत्तृत्वस्य च प्रयोजनमुच्यते । यत्र यस्मिन् महादेवेऽमृतं कैवल्यलक्ष्मीमानशानाः प्राप्यानुभवन्तो देवास्तद्भावाद्द्वनशीलास्तृतीये द्युसंज्ञके तत्पदे मायातीते धामानि तेजःप्रधानानि[2] स्वाभिमतानि स्थानान्यभ्यैरयन्त स्वीकृतवन्तः । किमुक्तं भवति । बन्धुवज्जनकवत् सकलहितकारिणा सर्वज्ञेन परब्रह्मणा महादेवेन प्रसन्नेन प्रदलितपाशबन्धा अमृतभावं गता महाप्रकाशा मुक्तास्तृतीये परमव्योमलक्षणे स्वपदे कल्पितानि धामानि प्रकाशमयानि पदानि प्राप्ता वर्तन्त इति । अतः परमेषां व्याप्तिरुच्यते । परि द्यावापृथिवी परियन्ति व्याप्नुवन्ति परि लोकान् हिरण्यगर्भादिलोकानपि व्याप्नुवन्ति,दिशश्च प्रदिशश्च स्वश्च परियन्ति व्याप्नुवन्ति, एवं सकलजगद्व्यापिनो वर्तन्ते । तथाहि, ते सर्वज्ञा ऋतस्य कर्मणो विस्तीर्णं भोगतन्तुं विवृत्य छित्त्वा पुण्यपापविनिर्मुक्ताः सन्तः सर्वप्राणिषु तदेव महादेवाख्यं वस्त्वपश्यन्, सर्वात्मतया तदभवन्, तत्स्वभावाश्चाभवन् यत्रेति संबन्धः । अतो मुक्तानां शिवैकरसानां व्यापकत्वमस्त्येव । एतेन महादेवसधर्माणो मुक्तस्वभावा जीवा देवशब्दवाच्या द्युप्रभृतिव्यापिनो देवव्रताख्ये सामनि मन्त्रे श्रूयन्ते । "ये देवा दिविषद'' इत्यादिना । पुराणे च ।

ते हि साक्षाद्दिविषदस्त्वन्तरिक्षसदस्तथा ।
पृथिवीषद इत्येतद्देवा देवव्रते स्थिताः ॥

इति । इह पृथिवीति ब्रह्माण्डरूपमन्तरिक्षमिति द्वितीयं मायापदं द्यौरिति तृतीयं परमाकाशपर्यायं शुद्धं शक्तिरूपं शिवपदमुच्यते । अतो मुक्तानां विभुत्वमिति ॥ १५ ॥

॥ स्वाप्ययसंपत्त्योरन्यतरापेक्षमाविष्कृतं हि ॥ १६ ॥

ननु ब्रह्म प्राप्तस्यान्तरबाह्यज्ञानलोपमाह श्रुतिः, "प्राज्ञेनात्मना संपरिष्वक्तो न बाह्यं किंचन वेद नान्तरम्'' इति कथं तस्य शक्तिरूपज्ञानव्याप्तिरुच्यत इति नाशङ्कनीयम् । इदं जीवस्य वेदनाभाववचनं सुषुप्तिमरणयोरन्यतरापेक्षमित्युक्तम् । "न खल्वयमेवं संप्रत्यात्मानं जानातीत्ययमस्मीति नो एवेमानि भूतानि जानाति, सुषुप्तावेतेभ्यो भूतेभ्यः समुत्थाय तान्येवानुविनश्यति न प्रेत्य संज्ञास्ति''इति । मरणे च श्रुत्या तथैवाविष्कृतं हि । तद्विलक्षणतया मुक्तेस्तत्र नाज्ञत्वादि, किंतु मलतिरोधानापायात् सर्वज्ञत्वं च सर्वशक्तिकत्वं चेति न मुक्तौ ज्ञानादिनिषेधसंभवः[1] ॥ १६ ॥

॥ जगद्व्यापारवर्जं प्रकरणादसंनिहितत्वाच्च ॥ १७ ॥

उक्तमीश्वरेण साम्यं मुक्तानां स्वप्रकाशत्वव्यापकत्वसर्वज्ञत्वादिभिः, तथा सति जगत्स्रष्टृत्वादावपि दुर्वारं साम्यमुपेतीति । निर्विशेषश्रवणात् । जगत्स्रष्टृत्वादिसाम्याभ्युपगमे च विश्वातीतत्वादीश्वरस्याद्वितीयत्वभङ्गप्रसङ्गः । अतः कीदृशं साम्यमीश्वरेण मुक्तानां विवक्षितम् । जगत्स्रष्टृत्वादियुक्तं तद्वर्जं वेति

१-ग्रः परात्मेति "आनन्दो इति पा० ।
२-जःप्रकाशमयानि इति पा० ।

१-कत्वं विभुत्वं च संपद्यत इति न निर्विषयमुक्तिसंभवः इति पा० ।

संशयः । किं प्राप्तम् । "स यदि पितृलोककामो भवति" इत्यादिषु संकल्पमात्रात् पितृलोकादिसृष्टिसामर्थ्यश्रवणात् । "इमाँल्लोकान् कामान्नीकामरूप्यनुसंचरन्" इति सर्वत्र व्यापारश्रवणात्, परमेश्वरसाम्ये संकोचायोगाच्च, मुक्तस्य जगत्सृष्ट्यादिव्यापृतिरप्यस्तीति प्राप्ते ब्रूमः । मुक्तस्य परमेश्वरसाम्येऽपि जगत्सृष्ट्यादिव्यापारवर्जमेव स्वातन्त्र्यं स्वभोग्यवस्तुषु । "यतो वा इमानि भूतानि जायन्ते," "द्यावापृथिवी जनयन् देव एक" इत्यादिषु श्रुतं जगत्सृष्ट्यादिकं परमेश्वरस्य प्रकरणादवगम्यते । सृष्ट्यादिप्रकरणेष्वसंनिहित एव जीवः । अतो न मुक्तस्य जगत्सृष्ट्यादिकर्मास्ति ॥ १७ ॥

॥ प्रत्यक्षोपदेशादिति चेन्नाधिकारिकमण्डलस्थोक्तेः ॥ १८ ॥

"इमाल्लोकान् कामान्नीकामरूप्यनुसंचरन्" इत्यादिषु मुमुक्तेर्जगद्व्यापारस्य प्रत्यक्षोपदेशात् तत्संबन्धोऽस्तीति चेत् । न । कामान्नीकामेति कामभोगसंबन्धादधिकारिणां ब्रह्मादीनां सदाशिवान्तानां मण्डलेषु स्थितभोगानुषङ्ग एवोच्यते ॥ १८ ॥

अतोऽस्य न जगद्व्यापारः । तथा सति तस्य भोगानुषङ्गाद्विकारत्वमित्यत आह ॥

॥ विकारावर्ति च तथाहि स्थितिमाह ॥ १९ ॥

तस्यानुभाव्यं सुखं विकारभावासंस्पृष्टं विशुद्धं परिपूर्णब्रह्मस्वरूपम् । तथाहि खल्वस्य स्थितिमाह श्रुतिः । "रसो वै सः" "रसं ह्येवायं लब्ध्वानन्दीभवति" इति । ब्रह्मस्वरूपं हि "सत्यं ज्ञानमनन्तं ब्रह्म" "आनन्दो ब्रह्म[1]" इत्यादिष्वविकृतमेव श्रूयते । अतो न विकारिपशुसुखवन्मोक्षसुखं भवति[2] । सदाशिवादीनामधिकारिणां ब्रह्मान्तानां मण्डलेषु स्वेच्छया संचरमाणः कामान् नीकामरूपी विगलितमनुष्यादिदेहाभिमानोऽसंकुचितशक्तित्रयव्यापारः प्रशान्तापवादपरमानन्दप्रकाशविभूतिमयशक्तिशिवसामरस्यपरब्रह्मस्वरूपैकरसप्रपञ्चावगाहिनं परिपूर्णमहंभावं प्रकटमनुभवति ।

तथाहि, "अहमन्नमहमन्नमहमन्नम्" अहमन्नादोऽहमन्नादोऽहमन्नाद" इत्यादिना भोज्यभोक्त्रादिसकलप्रपञ्चात्मभावपरिपूर्णाहंभावनास्यावगम्यते[3] । अत्राहंकारो न सांसारिकः । सकलप्रपञ्चावगाहित्वेन परिपूर्णत्वात् । किंतु मुक्ति[4]स्वभाव एव कल्पिताद्देवोऽहं मनुष्योऽहमिति देहमात्रावगाहितया परिच्छिन्नात् सांसारिकाहंकारादयं विलक्षण एव । अतोऽत्र न प्राकृताहंकारसंबन्धः ।

यद्वा, अहमिति शक्तिशिवाद्वयं[1] ब्रह्मोच्यते । तदेवान्नादिकं प्रपञ्चजालमिति भावना । तथाप्तवचनम् ।

"अनुत्तरविसर्गान्त[2]शिवशक्त्यद्वयात्मनः ।
परामर्शो निर्गुणत्वादहमित्युच्यते विभोः ॥
हृदयकारो द्वादशान्ते हकारस्तदिदं विदुः ।
अहमात्मकमद्वैतं यत्प्रकाशात्मविश्रमः" ॥

इति । अत्रानुत्तरब्रह्मानन्दपदानुप्रविष्टस्य मुक्तस्य सकलप्रपञ्चाकारशिवाभिधायकप्रसादाक्षरानुसंधानपूर्वकं[3] गानं कर्तव्यतया न विधीयते । किंत्वानन्दास्वादपरमोल्लास[4]द्योतनाय स्तुतिः । अतो मुक्तानां ब्रह्मानन्दानुभवव्यापारमन्तरेण सृष्ट्यादिव्यापारः स्वेच्छया न संभवति ॥ १९ ॥

॥ दर्शयतश्चैवं प्रत्यक्षानुमाने ॥ २० ॥

एवमुक्तमर्थं प्रत्यक्षानुमाने श्रुतिस्मृती दर्शयतः । "तस्माद्वा एतस्मादात्मन आकाशः संभूत" इत्यादिका श्रुतिः । "अप एव ससर्जादौ" इत्यादिका स्मृतिश्च । अतो ब्रह्मण एव जगत्कारणत्वादिकमिति ॥ २० ॥

तथा सति

"यदा पश्यः पश्यते रुक्मवर्णं
कर्तारमीशं पुरुषं ब्रह्मयोनिम् ।
तदा विद्वान् पुण्यपापे विधूय
निरञ्जनः परमं साम्यमुपैति" ॥

"मुक्तः शिवसमो भवेत्", इत्यादिषु मुक्तस्य च ब्रह्मणा शिवेन परमसादृश्यप्रतिपादनात् तस्य जगत्सृष्ट्यादिकं यदस्ति तत् सर्वमसंकुचितमस्यापि[5] स्यात् । अन्यथा परमसादृश्यहानिरिति, अत आह ॥

॥ भोगमात्रसाम्यलिङ्गाच्च ॥ २१ ॥

मुक्तस्य ब्रह्मणा साम्यं सकलकाम्यभोगमात्रादेव । न जगत्सृष्ट्यादिना । तथा सति बह्वीश्वरत्वप्रसङ्गादनवस्था स्यात् । तथा हि श्रूयते । "सोऽश्नुते सर्वान् कामान् सह ब्रह्मणा विपश्चिता" इति । विविधं पश्यन्त्या चिता ज्ञानशक्त्या युक्तं हि ब्रह्म विपश्चिदित्युच्यते । यथा स्वाभाविक्या हृदयभूतया परमसत्तास्फुरद्रूपया देशकालविशेषशून्ययास्य ब्रह्मणः शिवस्य सर्वज्ञत्वं सर्वकारणत्वं सर्वात्मत्वं सर्वशक्तिमत्त्वमलुप्तश-

१–न्तं ब्रह्म", "आकाशशरीरं ब्रह्म", "ऋतं सत्यं परं ब्रह्म", इति पा० ।
२ अतो न विकारास्पदं मोक्षसुखमिति इति पा० ।
३–ना ह्यवगम्यते इति पा० ।
४–मुक्त–इति प ।

१–यमयं इति पा० ।
२ अनन्तविधिसर्गात्म–इति पा० ।
३–भिबोधकप्रसादाक्षरारूढं मनुवर्णानुपूर्वं इति पा० ।
४–परमोत्सुक्य–इति पा० ।
५–तं इति पा० ।

त्तित्वं स्वतन्त्रत्वं नित्यतृप्तत्वं निरतिशयैश्वर्यवत्त्वं[1] सर्वानुग्राहकत्वं सर्वमुक्तभोग्यरसरूपत्वं च संभवति । तादृश्या युक्तं परं[2] ब्रह्मापि विपश्चिदिति तेन समरसात्मा मुक्तोऽपि सर्वान् कामानन्तःकरणेन स्वाभाविकेन मनसा ज्ञानविशेषेण समश्नुते । तथाहि, "मनसैतान् कामान् पश्यन् रमते" "मनोऽस्य दैवं चक्षुः", इति श्रूयते । "सत्यात्म प्राणारामं मनआनन्दम्" इति ब्रह्मणोऽपि मनस्यानन्दभोगः । न बाह्यकरणापेक्षा । ब्रह्मणो मुक्तस्य च शरीरेन्द्रियादिग्रहणमैच्छिकं विहारार्थमित्यदोषः । अतो यथा ब्रह्म सकलान् कामान् भुङ्क्ते तथा मुक्तोऽपीति भोगमात्रसाम्यं मुक्तस्य ब्रह्मणेति समीचीनम् । लोके कतिपयधर्मसंबन्धादपि सिंहो देवदत्त इत्यादिषु सादृश्यव्यवहारदर्शनान्नतत्सादृश्यवचनहानिः[3] ॥ २१ ॥

॥ अनावृत्तिः शब्दादनावृत्तिः शब्दात् ॥ २२ ॥

उक्तं ब्रह्मणा सादृश्यं सायुज्यं मुक्तानाम् । भोगादिसाधर्म्यात् । इह तेषां पुनरपि कदाचित् संसारापत्तिरस्ति न वेति संशयः[5] । कर्मविशेषेणेन्द्रादिपदारूढानामावृत्तिदर्शनं संशयकारणम् । किं तावत् प्राप्तम् । कामान् नीकामरूप्यनुसंचरन्नित्यादिषु बहुशरीरसंबन्धोऽवगम्यते । मुक्तानां तत्संबन्धे सति पुनरपि पुण्यपापकर्तृत्वं संभाव्यते । पूर्वकृतस्योपासनातिशयस्य बहुधा भोगेन क्षये तात्कालिककर्मवशात् पुनरपि हीनसुखसंसारप्राप्तिः । तथाहि, इन्द्रपदारूढानां पुण्यातिशयक्षये पुनरावृत्तिर्ब्राह्मणादिशरीरप्राप्तिश्च । अतश्च ब्रह्मपदं प्राप्तानां भोग्यद्रष्टृत्वादिसंबन्धेन भोगस्य पुण्यातिशयक्षयहेतुत्वेन च पुनरावृत्तिः संसार इति प्राप्ते ब्रूमः । साक्षात्कृतब्रह्मज्योतिषां तत्पदानुप्रविष्टानां मुक्तानां न पुनरावृत्तिः संसारे । कुतः । "स खल्वेवं वर्तयन् यावदायुषं ब्रह्मलोकमभिसंपद्यते, नच पुनरावर्तते नच पुनरावर्तते" इत्यादिशब्दाद् ब्रह्मविष्ण्वादिपदं मुक्त्वा तद्विलक्षणत्वेन[6] शिवस्य परब्रह्मणः पदविशेषं पुराणं चाभिव्यनक्ति ।

"दिनकृत्कोटिसंकाशं स्थानमाद्यमुमापतेः ।
सर्वकामसमायुक्तं विशुद्धं नित्यमक्षयम् ॥
संप्राप्य तत् पदं दिव्यं समस्तक्लेशवर्जिताः[7] ।
सर्वज्ञाः सर्वगाः शुद्धाः परिपूर्णा भवन्ति च ॥
विशुद्धकार्यकरणाः परमैश्वर्यसंयुताः ।
सदेहाश्च विदेहाश्च भवन्त्यात्मेच्छया पुनः ॥
ये संप्राप्ताः परं स्थानं ज्ञानयोगरता नराः ।
न तेषां पुनरावृत्तिर्घोरे संसारमण्डले" ॥

इत्यादिभिः । अस्य तात्पर्यमुच्यते । "परं ज्योतिरुपसंपद्य स्वेन रूपेणाभिनिष्पद्यते" इति परं ज्योतिःस्वरूपं हि मुक्तप्राप्यमुमासहितं परं ब्रह्म श्रूयते । अभिभूतसूर्यतेजोवृन्दस्य यस्य महाप्रकाशस्य भासा सर्वमेतद्विभाति । तथा च श्रुतिः ।

"न तत्र सूर्यो भाति न चन्द्रतारके
नेमा विद्युतो भान्ति कुतोऽयमग्निः ।
तमेव भान्तमनुभाति सर्वं
तस्य भासा सर्वमिदं विभाति" ॥

इति । तथा निरूपितमथर्वशिरसि, "परमेश्वरोऽहं पुष्करमहं पवित्रमहमग्रं च मध्यं च बहिश्च पुरस्तात्, ज्योतिरित्यहमेकः, सर्वे च मामेव च, मां यो वेद स सर्वान् देवान् वेद" इति । तथा स्मरन्ति च ।

"सर्वतः पाणिपादान्तं सर्वतोऽक्षिशिरोमुखम् ।
सर्वमावृत्य तिष्ठन्तं तेजोराशिं शिवं स्मरेत्" ॥

इति । ततः परं ज्योतीरूपमुमासहितं शिवाख्यं परं ब्रह्म, तदधिष्ठितं पदं दिनकृत्कोटिसंकाशमिति किमु वक्तव्यम्[1] । निरतिशयतेजोमात्रस्फुरत्तामयं, तदेव निरतिशयसुखास्पदतया स्वर्गाभिधम्[2] । "स्वर्गो लोको ज्योतिषा वृतः, देवा ह वै स्वर्गं लोकमगमंस्ते देवा रुद्रमपृच्छन्" इत्यादिश्रुतिष्ववगम्यते स्थानं यत् तुरीयातीतम् । तथोत्तरगीता, "तुरीयं च तुरीयातीतं च शिवस्थानमनामयम्" इति । आद्यं, सर्वलोकातीतत्वात्, कारणत्वाच्च ।

"शिवलोकाद्बहिर्ज्ञेयान्यण्डस्यावरणानि च", इत्यादिषु यस्य बहिरधस्ताद् ब्रह्माण्डस्य सप्तावरणानि ।

"परात् परतरो ब्रह्मा तत्परात् परतो हरिः ।
तत्परात् परतोरीशः,

इति ब्रह्मादिविश्वाधिकस्य ब्रह्मणः पदं विश्वोत्तीर्णमिति । आद्यमुमापतेः परब्रह्मणः शिवस्य "उमासहायं परमेश्वरं प्रभुम्" इत्यादौ तस्य ह्युमासहितस्य नीलकण्ठस्य त्रिलोचनस्य शिवस्य ध्येयत्वमुपासकस्य, तमसः प्रकृतेः[3] प-

१–र्यवैराग्यवत्त्वं इति पा० ।
२–क्तं स्याच्चिच्छक्त्या परं इति पा० ।
३ अतो भोगमात्रसाम्यं मुक्तस्य ब्रह्मणेति इत्येव पा० ।
४–र्त्ति–इति पा० ।
५–ति विचार्यते । इति पा० ।
६ तदतीतत्वेन इति पा० ।
७–व्यमन्तः क्लेशविवर्जिताः इति पा० ।

१–ति । तत् किमुच्यते । इति पा० ।
२–र्गास्पदं प्रकाशरूपतया परमाकाशमुच्यते इति पा० ।
३ प्रकृतिपदात् इति पा० ।

रत्वेन प्राप्यत्वं चावगम्यते। किंच "सर्वो वै रुद्र" इत्यारभ्य सर्वात्मत्वं शिवस्याभिधाय तत्तत्स्वरूपोपसंहारे हिरण्यबाहवे हिरण्यपतयेऽम्बिकापतय उमापतय इति स्थितम्। प्रणवपर्यायेणोमाशब्देन वा परप्रकृतिरूपा परा शक्तिरुच्यते। कृष्णपिङ्गलं ब्रह्मेति च तत्सामरस्यं ब्रह्मणः समाम्नातम्। तस्मादुमापतेः परब्रह्मणः पदम्। तत् पुनः कीदृशम्। सर्वकामसमायुक्तम्। सदा सकलकामसमन्वितम्। अतः खलु "सोऽश्नुते सर्वान् कामान् सह ब्रह्मणा विपश्चिता" इति मुक्तस्य सकलकामावाप्तिर्ब्रह्मणा सह निरूपिता। विशुद्धं विकारासंस्पृष्टं, "समस्तसाक्षि तमसः परस्तात्" "आदित्यवर्णं तमसः परस्तात्," इत्यादिषु प्रकृतिविकारातीतत्वावगमात्। प्रकृतिविकारवद्रागद्वेषलोभादीनामनुत्पादकत्वाद् विशुद्धं हि तत् पदं शिवमयमिति। अनेनास्य परतत्त्वप्रकाशमयमहानन्दमेदुरपरमाकाशरूपत्वमुक्तं भवति। प्राकृतानामेव विकाराणां सृष्ट्यादिश्रवणात्। तदतीतत्वादस्य नित्यत्वम्। भूताकाशादिदेहप्रपञ्चस्यैव सृष्ट्यादिकं, परमाकाशरूपस्यास्य न तदस्ति।

"यदा तमस्तन्न दिवा न रात्रि-
र्न सन्न चासंछिव एव केवलः"।

इति श्रवणाच्छिवव्यतिरिक्तस्य सर्वस्य प्रलयो गम्यते। कथमस्य नित्यत्वं मुक्तानामपीति चेत्। न। मुक्तानामस्य पदस्य च शिवत्वेऽन्तर्भावात्। विशुद्धिभाजनतया शिवत्वमेषां[२] समानमेव। सृष्ट्यादिचक्रपतितपशुपाशविलक्षणत्वं हि शिवत्वम्। अतः पशुपाशविलक्षणस्य शिवपदस्य नानित्यत्वप्रसङ्गः। अक्षयं क्षयवृद्धिरहितं, क्षयातिशययुक्तकर्मफलस्वर्गादिविलक्षणं तादृशं हि।

"सोऽध्वनः पारमाप्नोति तद्विष्णोः परमं पदम्"।

इति श्रूयते। विष्णोः परमं स्वरूपं हि परमाकाशाख्यं शिवस्थानं षड्विधस्याध्वनः पारं तदतीतमुच्यते। ब्रह्मलोकमभिसंपद्यते। "न स पुनरावर्तते न स पुनरावर्तते" इत्यत्रानावृत्तिलक्षणं ब्रह्मलोकशब्दवाच्यमिदमेव स्थानम्।

"संप्राप्य तत् पदं दिव्यं समस्तक्लेशवर्जिताः"।

इत्यादिना तदारूढानां मुक्तानां ब्रह्मसदृशानां लक्षणमुच्यते। महतो देवस्य स्वभूतं दिव्यमवाङ्मनसगोचरं स्वभावं पदं संप्राप्य तत्संबन्धिना ज्ञानयोगेनाधिगम्य मुक्तात्मान एव भवन्ति समस्तक्लेशवर्जिताः। अस्तं विनाशः, क्लेशा अविद्यादयः, सम्यक् तद्वर्जिता भवन्ति। अनेन मुक्तात्मनां हेयगुणराहित्यमुक्तम्। अतः कल्याणगुणसाहित्यमुच्यते। शिवत्वं हि ते संपन्नाः सर्वज्ञाः, ज्ञानावरणस्य मलस्य विनाशात् सर्वगतज्ञानशक्तयश्च ते सर्वज्ञा भवन्ति, सर्वगाश्च ते, अनन्तशक्तियोगात्। उक्तं हि "प्रदीपवदावेश" इति। शुद्धाश्च ते मलापायेन प्रादुर्भूतशिवभावाः शुद्धाः, प्रकाशरूपाः प्रज्ञानघना इति। उक्तं हि, "पूर्ववद्भावादविरोधं बादरायणः" इति। स्वयंप्रकाशत्वं सत्यसंकल्पत्वादिवैशिष्ट्यं च। परिपूर्णा भवन्ति, नित्यतृप्ताश्च ते भवन्ति। निरतिशयानन्दस्वरूपत्वात्, अवाप्तसकलकामत्वाच्च। निर्विकारनिरतिशयानन्दानुभवितृत्वं हि तेषां स्वभावः। उक्तं हि, "विकारावर्ति" इति। अतस्ते परिपूर्णा विशुद्धकार्यकरणा विकारास्पृष्टशरीरेन्द्रियाः। "एकधा भवति त्रिधा[१] भवति" इति मुक्तस्य स्वेच्छया बहुशरीरग्रहणमुक्तम्। अतो मुक्तानामैच्छिकं शरीरादिकं विशुद्धमेव। महामायानिष्पन्नत्वात्। विशुद्धत्वं नामाश्चर्यविकाराहेतुत्वम्। "इन्द्रो मायाभिः पुरुरूप ईयत" इतीश्वरस्यापि महामायाशक्तिभिर्नीलकण्ठत्वादिलक्षणबहुशरीरपरिग्रहणं श्रूयते।

"स्थिरेभिरङ्गैः पुरुरूप उग्र"

इति। परमेश्वरपरिगृहीतानां शरीराणामप्राकृतानां विशुद्धविद्यामयानां स्थिरत्वमाह मन्त्रभागः। यथा परमेश्वरो विशुद्धबहुशरीरपरिग्रहस्तथा मुक्तोऽपीति न विरोधः। परमैश्वर्यसंयुक्ताः परमविभूतिसंयुक्ताः स्वाधीनप्रवृत्तयः परप्रैष्यताकार्पण्यरहिताः। उक्तं हि। "अत एवानन्याधिपतिः", इति। मुक्तस्य कर्माद्यवश्यतया परमस्वातन्त्र्यम्। अतः स्वतन्त्राः परमैश्वर्यसंयुक्ता इति। "सदेहाश्च विदेहाश्च भवन्त्यात्मेच्छया पुनः"। ते हि शिवपदाधिरूढा ईश्वरसंकल्पं विना कदाचित् परिगृहीतविशुद्धशरीरेन्द्रियोपभोगा भवन्ति, कदाचिद्विगतदेहेन्द्रियादयः केवलेन स्वाभाविकेन विभुना मनसानुभूयमानसकलकामा भवन्ति। तथा हि निरूपितम्। "स एकधा भवति त्रिधा भवति मनसैतान् कामान् पश्यन् रमत" इत्यादिश्रुत्यनुसारेण द्वादशाहवदुभयविधमिति। अतस्ते सदेहा विदेहाश्च भवन्ति। श्रूयते च। "विरूपेभ्यो विश्वरूपेभ्यश्च वो नमो नम" इति। ईश्वरसाधर्म्यभाजां नित्यसिद्धानां विरूपत्वं बहुरूपत्वं च। तद्बहुरूपत्वाद्विश्वरूपशरीरपरिग्रहेण यादृशानीश्वरस्य शरीराणि नीलकण्ठत्वादिलक्षणानि तादृशानि तत्सादृश्यभाजामिति। केचिन्नीलग्रीवाः शितिकण्ठा" इत्यादिश्रवणादिति। एवं ज्ञाने वेदान्तजन्ये योगे यमादिरूपे परमेश्वरविषये ये निरता निष्णातास्तादृशं पदं परमं शिवस्य प्राप्तास्तेषां पूर्वोक्तगुणानां शिवसदृशानां घोरे निरतिशयतापरूपत्वाद्दुःसहे संसारमण्डले न पुनरावृत्तिः, न पुनः संसारध-

१ अतश्च इति पा०।
२—तथा तदवशेषत्वमेषां इति पा०।

१ द्विधा इति सर्वत्र पा०।

र्मोऽन्वय इति। तस्माद् "ब्रह्मलोकमभिसपद्यतेन स पुनरावर्तत" इति श्रुतेः सर्वज्ञस्य सर्वशक्तेः सर्वैश्वर्यसंपन्नस्य सर्वानुग्राहकस्य सर्वकर्मसमाराध्यस्य निरस्तसमस्तदोषकलङ्कस्य निरतिशयमङ्गलगुणरत्नाकरस्य विरूपाक्षस्य परब्रह्मण उमापतेर्लोकं पदं निरवधिकानन्दप्रकाशं नित्यमक्षयमभिसंपन्नाः सर्वज्ञत्वादियोगिनोऽनावृत्तितया वर्तन्ते तत्रेति । एतदुक्तं भवति । "यत्र देवा अमृतमानशानास्तृतीये धामान्यभ्यैरयन्त" इत्यादिषु श्रुतानि निरतिशयानन्दप्रकाशघने ब्रह्मणि शिवे सामरस्यमुपगता मुक्ताः प्रकाशवपुषः सर्वज्ञाः सर्वगताः शान्ता नित्यपरमैश्वर्याधारा निःशेषविगलितमलावरणाः सर्वत्र तद्दर्शिनस्तदात्मानस्तदीये परमाकाशलक्षणे धामानि स्वाभिमतानि प्राप्य स्वेच्छोपगतसकलकामास्तेन सह सदा विद्योतन्ते सर्वत्रेति सर्वं समञ्जसमेव ॥ २२ ॥

श्वेताचार्यपदद्वन्द्वशुश्रूषाद्योतिताध्वना ।
कृतमेतन्मया भाष्यं केवलं भक्तिभावतः ॥

इति श्रीकण्ठशिवाचार्यविरचिते ब्रह्म[1]मीमांसाभाष्ये चतुर्थस्याध्यायस्य चतुर्थः पादः ॥ ४ ॥ समाप्तश्चतुर्थोऽध्यायः ॥ समाप्तं चेदं ब्रह्ममीमांसाशास्त्रम् ॥ शिवार्पणमस्तु ॥ : : : ॥

१ श्रीमद्ब्रह्म—इति सर्वत्र पा० ।

॥ अथ शैवभाष्यस्योपसंहारवर्णनम् ॥

यन्नामस्मरणान्नरस्य निखिलं कृत्यं क्रियातश्च्युतं
पूर्णं याति स एव देवनिवहैराराध्यमानः प्रभुः ।
लीलाकल्पितकायकोऽतिकरुणोऽस्माकं शरण्योऽस्तु यं
कर्तारं जगतामुशन्ति विपदां हर्तारमीशं हरिम् ॥ १ ॥

तदेवमेतत् परमेश्वरस्य
कृपावशादद्य समाप्तिमाप्तम् ।
वेदान्तसूत्रोपरि शैवभाष्यं
श्रीकण्ठशैवोदितमङ्कनेन ॥ २ ॥

द्वौ पुस्तकावहमवापममुष्य जीर्णौ
यौ दक्षिणोत्तरगतौ सकले स्थलेऽपि ।
वैमत्यमित्थमवलोक्य मयावशेन
पाठान्तराणि सुबहूनि समर्पितानि ॥ ३ ॥

ह्रासप्रतितमपण्डित-
पत्रादारभ्य चतुरशीतितमम् ।
पण्डितपत्रं यावद्
भाष्यस्यास्य स्थितिर्ज्ञेया ॥ ४ ॥

निम्बार्करामानुजवल्लभेन्द्रा
मध्वाह्वयो वैष्णवसंप्रदायाः ।
तथेतरे शंकरभास्करौ च
श्रीकण्ठविज्ञानपदादिभिक्षू ॥ ५ ॥

वेदान्तसूत्रोपरि भाष्यकारा
अष्टावमी सन्ति महानुभावाः ।
श्रीकण्ठशैवस्य तदेतदासीद्
भाष्यं दुरापं यदमुद्रि यत्नात् ॥ ६ ॥

विज्ञानभिक्षोरपि भास्करस्य
निम्बार्कनाम्नश्च दुरापमस्ति ।
भाष्यं तदाप्स्यामि यदा तदैव
विमुद्रयिष्यामि विदन्तु विज्ञाः ॥ ७ ॥

बुधा विगतमत्सराः शृणुत मत्कृतं प्रार्थनं
कृपां कुरुत पश्यतातिविरलप्रचारं मुदा ।
जहीत यदि दूषणं गुणगणं च गृह्णीत भोः
प्रचारयत भाष्यमित्यतिशयेन सज्जोऽञ्जलिः ॥ ८ ॥

यायादिदं प्रतिदिशं प्रथितिं जगत्यां
भायान्मनःसु विदुषां, सफलोऽस्तु यत्नः ।
इत्थं पुनः पुनरहं प्रणिपत्य मूर्ध्ना
याचे परेश्वरमलं बहुलेखनेन ॥ ९ ॥

॥ सांख्यशास्त्रप्रधानाध्यापकः
पं· वेचनरामशर्मा ॥

THE VIDVAN-MANO-RANJINI OR REJOICER OF THE MIND OF THE LEARNED,

A COMMENTARY ON SAD-ÁNANDA'S VEDÁNTA-SÁRA, BY RÁMA-TÍRTHA.

(Continued from page 252.)

But another [*teaches that the principal vital air is the soul.*] Other than the nutrimentitious soul,—such is the construction; and this other soul is within the other, the nutrimentitious. In the absence of the vital air, when the vital air is attenuated by lack of food &c. the conditions of its own conservation, the sense organs,

अपर इति । अन्योऽन्नमयादात्मनइति योजना सचान्नमयादन्तरादभ्यन्तरइत्यर्थः । प्राणाभावे प्राणस्य स्वस्थितिनिबन्धनान्नाद्यलाभेन कार्श्ये भावे सतीन्द्रियाणां विद्यमानानामपि स्वविषये प्रवृत्त्यदर्शनात् सच तस्मिन् पुष्टे तद्दर्शनात् प्राण एवात्मा न प्राणाधीनस्थितिकानीन्द्रियाणीति। इन्द्रियाणां चैतन्यान्वयव्यतिरेकः करणत्वेनाप्युपपद्यतएव तेषामेव कर्तृत्वे करणाभावप्रसङ्गः किञ्चैकस्मिंश्छरीरे इन्द्रियाणां सम्भूयभोक्तृत्वं प्रत्येकं वा द्वितीयेऽपि युगपत्क्रमेण वा नाद्यः रूपादौ चक्षुरादिभो-

though they exist, are not observed to energise upon their objects; but the sense organs are observed to energise when the vital air is nourished. The vital air is therefore the soul, and the sense organs dependent for their conservation upon the vital air, are not the soul. Besides, it is proved that the sense organs, as being instruments, are accompanied or not accompanied by pure intelligence; for were these organs themselves the agents in perception, they could not be instruments. Again, in any single body the sense organs must have either a conjoint or an individual fruition, and in the second case, that is if they have an individual fruition, they have it either in simultaneity or in succession. The first alternative, that of their conjoint fruition, must be disallowed, for we observe in the tongue no fruition of colour and the like the object of sight. The sense organs do not discharge one function in mutual subservience, for it is proved by concomitance and non-concomitance that they have a diversity of objects peculiar and allotted to each. The second alterna tive that of separate fruition, is denied, for their simultaneity is impossible as has been stated above. But on the third hypothesis, that the sense organs enjoy a several and successive fruition, it would follow that the organism would be distracted, as being presided over by them, and as they being severally independent would sometimes want unanimity, and energise in contrary directions. Were they not independent, it would follow that that on which they depended was the soul, for the body being one admits not of the relation of lord and servant. It is therefore an incontrovertible position that it is the vital air that is the dominant repository of all the sense organs. It is, then, this kind of soul, *viz.* the vital air, that is determined as to its nature by the sleeping and waking states.

Were the several sense organs the soul, it would be impossible for one of them to remember what was experienced by another. There is, however, observed the recognition that I who formerly saw colour with the eye now smell odour; and it follows that the sense organs are not souls.

Again it is notorious that hunger and thirst are conditions of the vital air, the suspension of vital air or life being observed to ensue upon the want of solid and liquid nourishment. Vital air thus conditioned is the object of self-consciousness, and thus there is the sense that the vital air is the self or soul.

The author proceeds to set up the doctrine of those who hold that the internal organ or common sensory is the soul.

But another [*Chârvâka says that the internal organ is the soul, according to such texts as, The other, the inner soul, consists of the internal organ; also, because when the internal organ is asleep, the vital airs &c. are absent; also, because we have the consciousness that it is I who am assured, I that am in doubt.*] The inner soul is other, that is to say, than that which consists of vital air, because when the internal organ is asleep or absorbed, there is no vital air &c., for the inhalation and exhalation are in such a case erroneously surmised by the sight of the spectator, as if surmised in a pair of bellows. Since, also, dreams and reminiscence are possible in the internal organ in sence of the sense organs, it is the internal organ that is the soul.

Or the words *The vital airs are absent* may be explained as employed by a metaphorical use of the word absent, used of the state of dreamless slumber and the like, where the operation of the vital air is suspended. The meaning will then be that when the sense organs have suspended their activities and the vital air has suspended its functions, the consciousness present in dreaming and similar states, is by means of the internal organ alone; and that consequently the internal organ is the soul.

Every one knows that assurance and doubt are conditions of the internal organ, and the citation of the consciousness is therefore clearly intelligible.

The author next sets up the doctrine of the Yogâchâras. *But the Bauddha* [*says that the understanding is the soul, because of the texts: The other, the internal soul, consists of knowledge; also, because without an agent there is no power in an instrument; also, because there are such deliverances of consciousness as I am an agent, I am an experiencer.*] The inner or internal soul is other than that which consists of the internal organ, and consists of ideas or phantasmata.

न्ये जिह्वादीनां भोक्तृत्वादर्शनात्। नहि संभूयेन्द्रियाण्येकं कार्य्यं निर्व्वर्त्तयन्ति तेषां प्रतिनियतासाधारणविषयभेदस्यान्वयव्यतिरेकसिद्धत्वात्। न द्वितीयः उक्तेन प्रकारेणयौगपद्यासम्भवात्। प्रत्येकं क्रमेण भोक्तृणीन्द्रियाणीति तृतीयेऽपि पक्षे तेषां प्रत्येकं स्वातन्त्र्ये कदाचिदनैकमत्ये सति विरुद्धदिक्क्रियैस्तैर्धिष्ठितं शरीरं विदीर्य्येत। अस्वातन्त्र्ये यदधीनत्वं तेषां तस्यैवात्मत्वं युक्तं स्वामिभृत्यन्यायस्य शरीरैक्येऽनुपपत्तेः प्राण एव तु मुख्यः सर्व्वेषामिन्द्रियाणां आश्रयइति युक्तं अतः स एवात्मा स्वापप्रबोधयोर्रविच्छिन्नस्वभावः प्रत्येकमिन्द्रियाणामात्मत्वेऽन्यदृष्टेऽन्यस्य स्मरणानुपपत्तेः। इह चयश्चक्षुषारूपमद्राक्षं स इदानीं गन्धं जिघ्रामीति प्रत्यभिज्ञा दृश्यते तस्मान्नेन्द्रियाण्यात्मान इति भावः। अशनायापिपासयोश्चप्राणधर्म्मत्वप्रसिद्धमन्नपानयोरलाभे प्राणविच्छेददर्शनात्। तादृग्धर्म्मश्च प्राणोऽहंप्रत्ययविषयइति प्राणश्चात्मत्यनुभवइत्यर्थः। मन आत्मवादिमतमुत्थापयति॥

अन्यस्त्विति। प्राणमयादन्योऽन्तरात्मेति यावत् मनसि सुप्ते विलीने प्राणादेरभावाद् भस्त्रावच्छ्वासोच्छ्वासदर्शनस्य द्रष्टृदृष्ट्यध्यारोपितत्वादिन्द्रियाभावेऽपि स्वप्नस्मृत्योर्म्मनसि संप्रतिपत्तेर्म्मनएवात्मेत्यर्थः। यद्वा प्राणादेरभावादिति तद्व्यापारो परमे सुषुप्त्यादौ तस्याभावमुपचर्य्येदमुच्यते तथा चेन्द्रियेषूपसंहृतव्यापारेषु प्राणे चोपसंहृतप्राणापानेतरवृत्तौ मनसैव केवलेन स्वप्नादेरुपलम्भान्मनएव आत्मेत्यर्थः। मनसश्च सङ्कल्पादिधर्म्मवत्त्वं प्रसिद्धमित्यनुभवोक्तिः स्पष्टार्था। योगाचारमतमुत्थापयति॥

The view of the Buddhists is that the soul consists of momentary ideas. The understanding, the momentarily fleeting idea, is the soul. The author cites the testimony of consciousness to this effect, *I am an agent &c.* He anticipates the objection: Let the internal organ be the agent, what need of ideation? and preferring to regard the internal organ as an instrument, adduces the following argument to prove that it cannot be implicated in the consciousness of agency.

Absence of an agent &c. Were the internal organ an active principle, there would follow, since all the organs are simultaneously related to their respective objects, a simultaneous plurality of cognitions; and the internal organ as agent, being presided over by all the sense organs, would be simultaneously juxta-posed to a plurality of percepts, for there is no other prerequisite to such juxta-position. This is contradicted by experience. The agent is therefore other than the internal organ; and the internal organ is a common instrument, the cause of the succession of ideas. Thus by citation of doctrines exterior to the Veda it has been evinced that the self-conscious principle of the soul is limited to the sensational or ideational sheath.

Now we reply that the nature of soul cannot be attributed to momentarily fleeting ideation, inasmuch as cognition, desire, volition, retention, and reminiscence, must be assigned to one substratum or repository; and inasmuch as these states being successive, they cannot have a fluxional ideation for their substratum. But had not cognition and the rest a single substratum, it would follow that in regard to an object experienced there could be no activity, such activity being determined by an inference as to its utility as a means to a desired end, and this inference again being based on the homogeneity of the present to past objects as its middle term. For what one being experiences, another cannot remember. It has, therefore, been said in the Nyáya-kusumáñjali: That which has been experienced by one, and is isolated by his departure, is not remembered by another; for mental retenta do not travel from mind to mind, nor is there any other mode in which this could take place.

On the hypothesis of fluxional ideation bondage and emancipation would reside in different substrata. For this and many other reasons the view that the soul is a momentarily fleeting ideation cannot be accepted. Our author, therefore, adopting the side of the Vedântins and desirous of proving that the soul is other than ideation, first under this head states a doctrine of certain speculators of gross views.

The Prâbhâkaras &c. The construction is: The Prâbhâkaras and the dialecticians maintain that ignorance is the soul. Ignorance is other than momentary ideation; and the spiritual principle, they hold, is a substance and the repository of this ignorance. The author cites a text which declares that the soul is other than that which consists of ideation. [*The inner soul consists of bliss.*] The internal soul is other; the soul composed of bliss is other, that is to say, than that which is composed of ideation. Nor is it to be maintained that the soul composed of bliss is the supreme spirit, and that it is therefore improper to cite in explanation of the term Thou; inasmuch as this view contravenes the text in which the affix *mayaṭ* (or *composed of*) is usually read in construction with modifications consisting of food and so forth.

This is settled by the author of the Bhâshya in the text Made of food through exercise. It is therefore to be considered that the counter explanation, viz. that the words *composed of bliss* apply to the word Thou, is legitimate. The author next cites the argument by which it is attempted to prove that the soul is not cognition, because cognition, pleasure, pain, desire and the like are observed to be retracted or re-absorbed into unconsciousness, that is into the soul which is other than knowledge, and because they are observed to remain therein non-existent.

Because the understanding and the rest [*resolve into unconsciousness.*] The meaning of this argument is that since in dreamless slumber there ensues an absence of all cognition, and the soul is recognised to be identical in the dreaming and in the waking state, the soul is not knowledge but other than consciousness.

The author cites an appeal to consciousness.

बौद्धास्त्विति। मनोमयादन्योऽन्तरोऽभ्यन्तरश्रात्माविज्ञानमयः। चणिकविज्ञानमयइति बौद्धाभिप्रायः। बुद्धिः चणिक विज्ञानमात्मेत्यत्रानुभवमाह॥

अहङ्कर्त्तेति। मनसएव कर्तृत्वं स्यात् किं विज्ञानेनेत्याशङ्क्य मनसः करणपक्षपातित्वान्न कर्त्रनुभवगोचरत्वमित्यभिप्रेत्य युक्तिमाह॥

कर्त्रभावइति। मनसः कर्तृत्वे सर्व्वेन्द्रियाणां स्वस्वविषयैर्युगपत्सम्बन्धे युगपत् ज्ञानोदयप्रसङ्गः। कर्त्तुर्म्मनसः सर्व्वेन्द्रियैरधिष्ठितत्वेन युगपत्सन्निहितत्वादपेक्षणीयान्तरानभ्युपगमाच्च नचैवं दृश्यते तस्मात् मनसोऽन्यः कर्त्ता मनस्तुविज्ञानक्रमहेतुः साधारणं करणमेवेत्यर्थः। एवं वेदबाह्यवादानुपन्यस्य विज्ञानमयकोशपर्य्यन्तमात्मनः प्रत्यक्त्वमवगमितं। नच क्षणिकविज्ञानस्यैवात्मत्वमध्यवसितुं शक्यं ज्ञानेच्छाप्रयत्नसंस्कारस्मृतीनामेकाश्रयत्वनियमात्तेषाञ्च क्रमिकत्वात् क्षणिकविज्ञानाश्रयत्वानुपपत्तेः। ज्ञानादीनामेकाश्रयत्वाभावे तु वस्तुनि दृष्टे पूर्व्वदृष्टसजातीयत्वादिलिङ्गवशादिष्टसाधनताद्यनुमानपूर्व्वकप्रवृत्त्याद्यभावः प्रसज्येत। अन्यदृष्टे अन्यस्मरणानुपपत्तेः उक्तञ्च न्यायकुसुमाञ्जलौ। अन्यदृष्टंस्मरत्यन्योनैकभूतमपक्रमात्। वासनासंक्रमोनास्ति न च गत्यन्तरं स्थिरइति। क्षणिकपक्षे बन्धमोक्षयोरपि वैयधिकरण्यमित्यादिबहुदुष्टत्वादनादरणीयः क्षणिकविज्ञानात्मपक्षइत्यभिप्रेत्य वेदवादिपक्षमाश्रित्य विज्ञानादप्यन्तरमात्मनं निर्दिधारयिषुस्तावत्तत्रापि स्थूलदर्शिमतभेदमाह॥

[*Also because of such deliverances of consciousness as*] *I am ignorant,* [*I am cognisant.*] The sense of this appeal is that the deliverances of consciousness I am ignorant, that is, void of cognition, and I am cognisant, that is, possessed of cognition, confirm the distinction between cognition and soul to be the distinction of attribute and subject.

The author cites another doctrine.

But the Bhâṭṭa [*maintains that intelligence associated with unconsciousness is the soul.*] Association with unconsciousness means implication with ignorance, the being composed of consciousness and unconsciousness; and this is equivalent to consisting of the apprehension of bases of qualities and actions. To this effect is adduced a text of the Mâṇḍavya.

[*The soul*] *consists of knowledge alone,* [*with much happiness.*] Consists of knowledge alone, has the one simple nature of knowledge. The word *alone* excludes connection with other natures. With much happiness, abounding in bliss. By the affix *mayaṭ*, signifying abundance, there to be understood in relation to soul, as part of its substance, that which has bliss for its essence.

Because in profound sleep [*both light and want of light are present.*] Dreamless slumber has no power of contemplating dreamless slumber, the want of light; consequently there can be no reflection on the part of one arisen from such sleep that he reposed easily. During that state there is no operation of the senses and the internal organ, that any reflection should take place by means of the cognition produced by such operation. Nor is illusion luminant, for illusion is unsentient; and it is only as a residue that the soul is a principle of knowledge. The word illuminant establishes the presence of light. In consequence of the reflection I knew not anything, it is assumed that in dreamless sleep there is a total absence of consciousness in the soul, and therefore a want of light is therein a part of its substance. It might be objected that it is in dreamless sleep alone, and not in any other state, that the soul consists of consciousness and unconsciousness. This objection is repudiated by means of an appeal to consciousness.

[*Because every one has the consciousness*] *Myself I do not know.* It is intended that though the notion I appears to relate to the soul as an agent, in the deliverance of consciousness Myself I do not know, the undifferenced I is the object of the action, and thus appears in this positive cognition, and that accordingly in this other state of waking conciousness the soul has the two natures of consciousness and unconsciousness. Though consciousness is a condition of the soul, it is not absolutely distinct from the soul, being allowed to be identical with it, and the relation of the soul to its conditions as of a substance to its accidents is unproven, as admitting of an uncertainty as to its connection or non-connection therewith.

The author next sets up the doctrine of the Mádhyandinas. *Another Bauddha* [*teaches that the void is the soul, because the Veda declares This universe previously was simply non-existent.*] The meaning of this text according to the Bauddha's view is: This universe consisting of names and forms was previously, in time before the creation, simply non-existent, merely a void. An argument to the same effect follows.

[*Because*] *in dreamless sleep* [*everything ceases to exist.*] This argumentation is enforced by an appeal to individual consciousness.

[*Because every one, on arising from a dreamless slumber, has a conviction which has for its object a recollection of his own non-existence—*] *During that deep sleep* [*I was not.*] Hence soul, the void, identical with the non-existence of all things, is not identical with the apprehension of substance.

The author now proceeds to refute the doctrines thus adduced, by means of a particular dogma, viz. that there is a substratum which possesses the nature of self-conscious being.

[*It is now declared that*] *these* [*beginning with the son and ending with the void, are not the soul.*] Of these opinions each antecedent opinion is vitiated by its respective successor. Thus these controversialists

---

प्राभाकरेत्यादिना । प्राभाकरतार्किकाविज्ञानमात्मेतिवदतइत्यन्वयः । अज्ञानं क्षणिकविज्ञानादन्यत्तदधिकरणं द्रव्यरूपमात्मतत्त्वमिति वदतइत्यर्थः । विज्ञानमयादप्यन्तरे आत्मनि श्रुतिं प्रमाणयति अन्योऽन्तरआत्मेति विज्ञानमयादानन्दमयोऽन्यइतियावत् । नचानन्दमयः परमात्मेति त्वंपदार्थमध्ये न तस्योदाहरणं युक्तमिति वाच्यं अन्नमयादिविकारप्रायपठितमन्नमयादि श्रुतिविरोधात् । प्रियशिरस्त्वादिवचनविरोधाच्च । एतच्च भाष्यकारैः आनन्दमयोऽभ्यासादित्यस्मिन्नधिकरणे निर्णीतं । तस्माद्युक्तमेव त्वंपदार्थमध्ये आनन्दमयप्रत्युदाहरणमिति द्रष्टव्यं । सुषुप्तौ बुद्ध्यादीनां ज्ञानसुखदुःखेच्छादीनामज्ञाने ज्ञानभिन्ने आत्मनि लयदर्शनादभावदर्शनाच्च ज्ञानमात्मेति युक्तिमाह ॥

बुद्ध्यादीनामिति । सर्व्वज्ञानाभावस्य सुषुप्तौ संप्रतिपन्नत्वात् सुषुप्तिजागरितयोरप्यात्मैक्यप्रत्यभिज्ञानाचाज्ञानमात्मा किन्तु तदन्य एवेति भावः । अनुभवमाह ॥

अहमज्ञइति । अहमज्ञो ज्ञानहीनोऽहं ज्ञानी ज्ञानवानित्यनुभवोऽपि ज्ञानात्मनोर्धर्म्मधर्म्मिभावेन भेदं द्रढयतीत्यर्थः । मतान्तरमाह ॥

भाट्टइति । भाट्टस्त्वज्ञानोपहितचैतन्यमात्मेति वदतीत्यन्वयः । अज्ञानोपहितत्वमज्ञानसम्वलितत्वं ज्ञानाज्ञानरूपत्वं तदपि द्रव्यबोधरूपमिति यावत् तत्र माण्डव्यश्रुतिं प्रमाणयति ॥

प्रज्ञानघनइति । प्रज्ञानघनः प्रज्ञानैकरसः एवकारेण रसान्तरसम्बन्धं वारयति आनन्दमयइत्यानन्दप्रचुरेणआनन्दविकारः प्राचुर्य्यार्थमयडन्तनिर्देशाददोषः सदानन्दस्वभावतापि द्रव्यांशकृतात्मनि गम्यते इतिभावः । युक्तिमाह ॥

have themselves made it manifest that these things from the son upwards to the void inclusive are not the soul. The author therefore proceeeds to say.

[Since we observe in regard to these semblances of revelation, argumentation, and deliverances of consciousness, adduc d by] these *[the wholly uncultivated and following disputants, each such semblance is sublated by its succeeding semblance, it is evident that neither the son nor any of the subsequent things is the soul.]* It may be urged: How is it possible by a mere survey of the tenets of the controversialists, to determine that the son and the following things to the void inclusive are not the soul, for each brings forward texts, arguments, and deliverances of consciousness? We reply; True, they have adduced texts and so forth; but all these are mere semblances, from the son upwards to the void, inasmuch as they are all contradictory to stringent texts, arguments and deliverances of consciousness, which enounce another principle, *viz.* self-conscious spirit, as the soul. The author, therefore, says.

Moreover [these doctrines are repugnant to such emphatic texts as Not the sensor , not an agent, intelligence, consciousness only, existent.] The argument here is that not only are a son and the rest not the soul, because these opinions are mutually conflictive, but also because all these texts, argumentations, and appeals to consciousness, are sublated by emphatic texts &c. Of these the text Son thou art self indeed, is sublated by the text about self-conscious spirit, viz. Self-conscious spirit is indeed the inside of all things.

The text This self-same soul is made of the juice of food, is sublated by the text declaring that the spirit is not gross or perceptible.

The doctrine that the soul is identical with the organs, which it was attempted to evince by the force of the text Those vital airs indeed resorted to Prajá-pati, is sublated by the text which declares that soul is not the eye &c.

The texts another inner soul consisting of vital air, and another inner soul consisting of the common sensory, are sublated by the texts Not vital air, not the sensory.

The text Another inner soul consists of ideation, is sublated by the expression Not an agent.

The text Another inner soul consisting of bliss, is sublated by the expression Intelligence.

The text The soul consisting of knowledge alone, with much bliss, is sublated by the expression Consciousness only.

The text This was merely non-existent, is sublated by the expression existent.

Such is the connection with each in detail. The literal meaning of the texts thus adduced is to be thus considered.

Such texts may be mentally supplied in support of our author's doctrine as: A certain sage beheld self-conscious spirit, neither great nor small, neither long nor short; Without eye or ear is that, without hand or foot; Without vital air, without mind, all fair; And infinite is spirit, consisting of all that is, no agent; There is none that knows me, I am consciousness, eternal; I am pure consciousness, for ever blessed; Existent merely, fair scholar mine, was this aforetime; That is truth, it is spirit. By the words *et cætera* we may understand such texts as: This thy soul interior to all; Bodiless in bodies, vital air of vital air, and eye of eye, and ear of ear, food of food, and mind of mind: By whom possessed doth life first proceed; From which words turn back, reaching it not, together with the mind; It acts not, receives no stain; Witness, conscious, alone, and void of qualities; Entire made of consciousness alone; Existent thence they knew him.

All this must here be held in view. But the text which calls a son one's self refers to the body as the self, and it is thus apparent that its words bear a secondary application. The text Those vital airs &c., is explanatory of another, and therefore does not convey a complete meaning by itself. The text beginning with Made of food and ending with composed of bliss, is not completely significant, being employed to designate the means of knowing the soul designated by the term Particle of infinite spirit within all. The words of the text cited by the Vedânta teachers, viz. *self-conscious* and the rest, denote the real nature of the soul, and their stringency cannot be impugned.

The author next adduces an argumentation, viz. that the son and the rest up to the void inclusive are not eternal, inasmuch as like a water-pot &c. they are unsentient; whereas the soul is eternal, for were it non-eternal it would follow that retribution unmerited ,and loss

---

सुषुप्ताविति। सुषुप्तौ प्रकाशाभावे सुषुप्तिरसाक्षिकेतिसुखमहमस्वाप्समित्युत्थितस्य परामर्शो न स्यात्। न तदेन्द्रिय मनसां व्यापारोऽस्ति येन तज्जन्यज्ञानेनापि तत्परामर्शः स्यात् नाप्यविद्याप्रकाशिका जडत्वात् परिशेषादात्मैव बोधांशः। प्रकाशकइति प्रकाशस्वभावसिद्धिः। न किञ्चिदवेदिषमिति परामर्शादात्मन्येव सुषुप्तावशेषविज्ञानाभावत्वमपि कल्प्यते अतस्तत्राप्रकाशोद्वयांशश्चास्तीति भावः। ननु सुषुप्तावेवात्मनो ज्ञानाज्ञानरूपत्वं नावस्थान्तरइत्याशङ्कामनुभवाभिनयेन प्रत्याचष्टे॥

मार्मित। अहमित्यात्मनि कर्त्तरि भासमानेपि म ं न जनामीत्यनुपसंहृतविशेषस्य तस्यैव कर्म्मत्वमपि तस्मिन्नेव ज्ञाने भासत इत्यवस्थान्तरेपि ज्ञात्मकआत्मेत्यभिप्रायः। ज्ञानस्यात्मधर्म्मत्वेपि न ततोऽत्यन्तभेदस्तादात्म्याङ्गीकारात्। समवायस्य च समवायिभ्यां सह सम्बद्धत्वासम्बद्धत्वविकल्पासहत्वेनाप्रामाणिकत्वादिति भावः। माध्यमिकमतमुत्थापयति॥

अपरो बौद्धइति। इदं नामरूपात्मकं जगत् अग्रे सृष्टेः प्राक्काले ऽसत् शून्यमेव आसीत् इति बौद्धाभिप्रायेण श्रुतेरर्थः। युक्तिमाह॥

of merits might ensue; and therefore the son and the rest are not the soul.

[*For*] *this* [*the unsentient, from the son to the void inclusive, is non-eternal.*] The author enforces the statement that this is unsentient or other than consciousness.

[*Because like a water-jar &c.*] *it is only through consciousness that it is manifested at all.* The soul itself is not manifested by means of consciousness also, for this would be repugnant to the relation of the agent and the object acted on. For in regard to an action the agency is a secondary condition, while passion is primary. And therefore if in one and the same action one and the same soul were at once the subject of contrary determinations, it would be self-conflictive. Nor can it be argued that the soul may be known as the subject of cognition, for that which is other than cognition can only be presented as the object of cognition. Nor can it be always inferred, for there would be no doubt antecedent to the inference [and without which no inference can take place]; for there is not observed in any man a doubt in regard to himself whether he be or not. It remains that the soul be considered as self-luminant, and therefore it has not the nature of being illumined by consciousness. To this effect are the texts which establish the soul's self-illumination, and contradict the inference that it is illumined by something else, viz. Thou canst not know the knower of the knowing act; Wherewith shouldst thou know the knower? Other than that which is known thereby, and therefore unknown; Here spirit itself is the luminary, the soul is the light thereof; Not reaching together with the mind; Which with the mind one knows not.

This soul, moreover, is not of atomic dimension, for were it so, we could not perceive as we do a consciousness which pervades the whole organism. Nor is it of middling size, for then it would be non-eternal, for that which of middling size is made up of parts and consequently non-eternal. This view is also rejected by the rule that the soul is a totality. Nor is it of supremely large dimension, for thus there would be a contradiction to the text declaratory of its ascending motion. If then it be asked of what dimension this self-concious soul is, we reply that it is of infinite extension, inasmuch as it is identical with the existent, impartite absolute, and according to the text This same vast being is the soul.

A. E. G. and G. D.

सुषुप्ताविति । तामेव स्वानुभवोपन्यासेन दृढ़यति ॥

अहमिति । अतः शून्यमात्मा सर्व्वाभावरूपो न द्रव्यबोधात्मकइति भावः । एवं प्रत्यगात्मत्वाधिष्ठानं मतभेदेनोपन्यस्तं दूषयितुमारभते ॥

एतेषामिति । तत्र तावत् पूर्व्वपूर्ववादिमतमुत्तरोत्तरवादिमतेन दूषितमिति पुत्रादिशून्यपर्य्यन्तस्यानात्मत्वं तैरेव वादिभिः स्फुटीकृतमित्याह ॥

एतैरिति । ननु कथं वावदुक्तविवाददर्शनमात्रेण पुत्रादीनां शून्यपर्य्यन्तानामनात्मत्वमवधारयितुं शक्यते श्रुतियुक्त्यनुभवानां प्रत्येकमुपन्यस्तत्वादित्याशङ्क्य सत्यमुपन्यस्तास्तैः श्रुत्यादयः किन्तु ते सर्व्वएवाभासाः पुत्रादिशून्यपर्य्यन्ताः अतिरिक्तत्यागात्मस्वरूपसमर्पकप्रवलश्रुतियुक्त्यनुभवविरोधादित्याह ॥

किञ्चेति । न केवलं परस्परं विगीतत्वादेवपुत्रादीनाममात्मत्वं किन्तु प्रवलश्रुत्यादिभिः सर्व्वेषां श्रुत्यादीनां वाधितत्वादपीति योजना । तत्रात्मा वै पुत्र नामासि इति श्रुतेः प्रत्यक् श्रुत्या वाधः । प्रत्यक्त्वं नाम सर्व्वान्तरत्वं । सवा एष पुरुषोऽन्नरसमयइति श्रुतेरस्थूलश्रुत्यावाधः तेह प्राणाः प्रजापतिमित्यादिश्रुतिसामर्थ्यसिद्धेन्द्रियात्मत्वस्याचक्षुरित्यादिनाबाधः । अन्योन्तरात्मा प्राणमयः अन्योन्तरात्मामनोमयः इत्यनयोरप्राणोऽमनाइत्याभ्यां वाधः । अन्योन्तरात्माविज्ञानमयइत्यस्याः श्रुतेरकर्त्तेत्यनेन बाधः अन्योन्तरात्मानन्दमयइत्यस्याश्चैतन्यमित्यनेन वाधः । प्रज्ञानघन एवानन्दमयइत्यस्याश्चिन्मात्रमित्यनेन बाधः । असदेवेदमित्यस्याः सदित्यनेन बाधः इति प्रत्येकं योजनीयं अत्रोदाहृतश्रुतीनामित्यमक्षरविन्यासाः क्रमेण द्रष्टव्याः । कश्चिद्धीरः प्रत्यगात्मानमैक्षत । अस्थूलमनणु अह्रस्वमदीर्घम् । अचक्षुरश्रोत्रं तदपाणिपादं । अप्राणोह्यमनाः शुभ्रः । अनन्तश्चात्माविश्वरूपोह्यकर्त्ता नचास्ति वेत्ता मम चित्सदाहं । चिन्मात्रोऽहं सदाशिवः मदेव सोम्येदमग्रआसीत्तत् सत्यं स आत्मेति । आदिशब्दात् एष त आत्मा सर्व्वान्तरः अशरीरं शरीरेषु प्राणस्य प्राणमुतचक्षुषश्चक्षुरुत श्रोत्रस्य श्रोत्रमन्नस्यान्नं मनसोवै मनोविदुः । केन प्राणः प्रथमःप्रैति युक्तः । यतोवाचोनिवर्त्तन्ते अप्राप्य मनसा सह । न करोति न लिप्यते । साक्षी चेता केवलो निर्गुणश्च । कृत्स्नःप्रज्ञानघनएव । सन्तमेनन्ततोविदुरित्याद्याः श्रुतयः संगृह्यन्ते । इदमत्रानुसन्धेयं । पुत्रात्माश्रुतिस्तु देहावलम्बिनीति तस्या गौणार्थत्वं स्पष्टमेव । तेहप्राणाइतिश्रुतिरर्थवादत्वान्न स्वार्थपरा । अन्नमयाद्यानन्दमयान्तश्रुतेर्मुञ्जादिषीकावत् सर्व्वान्तरखण्डपुच्छशब्दवाच्यात्मप्रतिपत्त्युपायार्थत्वेनोपन्यस्तत्वाच्च तस्याः स्वार्थपरत्वं प्रत्यगादीनां सिद्धान्तोपन्यस्तश्रुतिवचनानां वक्ष्यमाणोपक्रमलिङ्गैरात्मयाथात्म्यपरत्वमिति युक्तं प्राबल्यमिति पुत्रादिशून्यपर्य्यन्तं न नित्यं जडत्वाद्घटादिवत् । नित्यश्चात्मा तदनित्यत्वेऽकृताभ्यागमकृतविनाशप्रसङ्गात् । अतो न पुत्रादीनामात्मत्वमिति युक्तिमाह ॥

अस्येति । जडत्वमुपपादयति ॥

चैतन्यभास्यत्वेनेति । नचात्मनोपि चैतन्यभास्यत्वं कर्म्मकर्तृभावविरोधात् कर्तृत्वं हि क्रियां प्रति गुणभावः कर्म्मत्वन्तु प्राधान्यं । तथाचैकस्यां क्रियायामेकस्यात्मनो युगपद्विरुद्धधर्म्माश्रयत्वे वैरूप्यप्रसङ्गः । नापि ज्ञानाश्रयत्वेनात्मनोभानं सम्भवति ज्ञानभिन्नस्य ज्ञानकर्म्मत्वेनेवापरोक्षत्वनियमात् नापिनित्यानुमेयोऽसन्दिग्धत्वात् नहि कदाचिदात्मन्यहमस्मिन्नास्मि वेति सन्देहः कस्यचिद्दृश्यते परिशेषात् स्वयंप्रकाशइति न तस्य चैतन्यभास्यता । श्रुतयश्च भवन्ति स्वप्रकाशसाधिकाः परप्रकाश्यतानुमानविरोधिन्यः । न विज्ञप्तेर्व्विज्ञातारं विजानीयाः विज्ञातारमरे केन विजानीयाः अन्यदेव तद्विदितादथोअविदितादधि अत्रायं पुरुषः स्वयं ज्योतिः आत्मैवास्य ज्योतिः । अप्राप्यमनसा सह यन्मनसा न मनुते इत्येवमाद्याः । न चायमात्माणुपरिमाणवान् अथासति सकलशरीरव्यापिचैतन्यानुपलम्भप्रसङ्गात् । नापि मध्यमपरिमाणः मध्यमपरिमाणवतः सावयवत्वेनानित्यत्वप्रसङ्गात् एवञ्चात्मा कार्त्स्न्यमिति न्यायनिरस्तत्वाच्च । नापि परममहत्परिमाणः उत्क्रान्तिगत्यागतिश्रुतिविरोधात् अतः किं परिमाणोऽयं प्रत्यगात्मेति । उच्यते सतस्तावदखण्डब्रह्मात्मभावत्वात् सवा एष महानजआत्मेत्यादिश्रुतेश्च परममहत्परिमाण एव ॥

FOR SALE AT THE
MEDICAL HALL PRESS, BENARES.

The VAISESHIKA APHORISMS OF KANÁDA, reprinted from the "Pandit" with corrections and emendations, by A. E. Gough, B.A. Anglo-Sanskrit Professor, Benares College. *Price Rs.* 4-0.

PRINTED AND PUBLISHED BY THE PROPRIETORS, E. J. LAZARUS AND CO. AT THE MEDICAL HALL PRESS, BENARES.

काशीविद्यासुधानिधिः

श्रीगणेशाय नमः

श्रीमद्विजयिनीदेवीपाठशालोदयोदितः । प्राच्यप्रतीच्यवाक्पूर्वापरपक्षद्वयान्वितः ॥ १ ॥
अङ्कुरश्मिः स्फुटयतु काशीविद्यासुधानिधिः । प्राचीनार्यजनप्रज्ञाविलासकुमुदोत्करान् ॥ २ ॥

THE PANDIT.

A Monthly Journal, of the Benares College, devoted to Sanskrit Literature.

No. 85. Benares, June 2nd, 1873. Vol. VIII.

॥ चिन्तामणेः शब्दखण्डम् ॥

एवं पदार्थमात्रे शक्तौ पदार्थो निरूप्यते ।

तत्र प्राभाकराः । यद्यप्यानयनादिव्यवहाराद्व्यक्तावेव शक्तिरुचिता, तथा(१)प्यानन्त्यव्यभिचाराभ्यां तत्र न शक्तिग्रहः । (२) समुच्चयेन शक्यत्वे गां दद्यादित्यादौ सर्वोपादानासामर्थ्यम्, (३) एकस्य शक्यत्वे ऽनध्यवसायः । न च गोव्यक्तिमात्रमर्थः, मात्रशब्दस्य सर्वार्थत्वे उक्तदोषात्, सामान्यार्थत्वे व्यक्ते(४)रप्रतीतेः । (५) नानार्थत्वे च सर्वासां (६) प्रत्येकं ज्ञातुमशक्यत्वम् । (७) शक्तौ च (८) शक्ये च गौरवम् । (९) अपूर्वायां गवि व्यवहाराभावश्च । नापि गोत्वेनोपलक्षिता व्यक्तिः शक्या, धेनुपदवत्, अतो न शक्यानन्त्यं, (१०) न व्यभिचारो, न सर्वासंग्रहो, न नानार्थत्वं, (११) गोत्वेन तासामैक्यादिति वाच्यम् । रूपान्तरेण विज्ञातमन्येन रूपेण हि उपलक्ष्यते । यथा काकेन गृहविशेषो, गोत्वेन धानकर्मविशेषः स्वतो विलक्षणः । ननु काकाद्याकारेणैव तत्प्रतीतिः । न च व्यक्तीनां जातिं विना रूपान्तरमेकमस्ति (१२) ज्ञायते वा । (१३) गोपदाद् गौरित्येव प्रतीतेः । (१४) गोत्वविशिष्टे च कार्यान्वयाद्गोत्वं विशे-

॥ शब्दचिन्तामणिव्याख्या रुचिदत्तीया ॥

(१) आनन्त्येति । सर्वासामनन्तव्यक्तीनामुपस्थापनमशक्यमिति कस्यां चिदेव शक्तिग्रहो वाच्यः, स च व्यभिचारी । व्यक्त्यन्तरस्याप्युपस्थितिदर्शनादित्यर्थः । के चित्तु एकव्यक्तेस्तदन्यसर्वव्यक्त्यव्याप्यत्वं व्यभिचारस्तद्व्याप्यत्वे चैकाधिकरणएव सर्वव्यक्तिसंभवे सर्वग्रहसंभवाच्छक्तिग्रहसंभवोऽपीति भावः । आनन्त्यदोषे सत्येव मिलितानां सर्वव्यक्तीनां शक्यत्वे दोषान्तरमाह । (२) समुच्चयेनेति । अन्यतमव्यक्तिः शक्येति नोक्तदोषद्वयमित्यत आह । (३) एकस्येति । इयं व्यक्तिः शक्या ऽन्यावेत्यनिर्द्धारणाद् गां दद्यादित्यादावप्रवृत्त्यापत्तेरित्यर्थः ।(४) अप्रतीतेरिति । अप्रतीत्यापत्तेरित्यर्थः । अत्र त्वन्मतएवेति शेषः । अस्मन्न्यायेन व्यक्तिलाभाभ्युपगमे वा मन्मतप्रवेश एवेति भावः । ननु तत्तद्रूपेण सर्वा व्यक्तिः शक्या, तथा च गोपदं नानार्थम् । अत एव नानध्यवसाय इत्यत आह । (५) नानार्थत्वइति । (६) प्रत्येकमिति । प्रत्येकरूपेणेत्यर्थः । (७) शक्तौ । नानाशक्तौ (८) शक्ये । नानाशक्यतावच्छेदकइत्यर्थः । (९) अपूर्वायां गवीति । तत्र तेन शक्तेरगृहीतत्वाद् व्यवहाराभावप्रसङ्ग इत्यर्थः । अपूर्वगवीति पाठे तत्त्व समासान्तविधिरनित्यइति साधु । (१०) न व्यभिचारइति । द्वितीयपक्षे दोषायेति शेषः । तन्मते नाह (११) गोत्वेनेति । ननु तत्रोक्तृणत्वादिकमिवात्रापि सास्नादिकमस्तीत्यत आह । (१२) ज्ञायते वेति । ननु ज्ञायते ऽपीत्यत आह । (१३) गोपदादिति । यदि गोत्वोपलक्षिततत्प्रकारावच्छेदेन शक्तिस्तदा तत्प्रकारिका धीः स्यादित्यर्थः । दोषान्तरमाह । (१४) गोत्वेति । गां पश्येदित्यादौ गोत्वविशिष्टे द

षयं, नोपलक्षणम् । तदन्येन कार्यान्वये उपलक्षणम् । (१५) यथा ऽयं वाससी देवदत्तशब्दवाच्य इत्यत्र वासः । (१६) न च गोत्वैकत्वेन व्यक्तीनामेकत्वं क्रियते । अशक्यत्वात् । न ज्ञाप्यते, असत्त्वात् । न च तदेकत्वमेव व्यक्तेरेकत्वम् । असंभवात् । नापि व्यक्तिः शक्या, गोत्वमवच्छेदकम्, कारणत्वे दण्डत्ववत् । (१७) एवं हि गोपदात् न गोत्वविशिष्टबुद्धिः स्यात् (१८) शक्तिग्रहाहितसंस्कारसचिवाद्गोपदादेव धेनुपदादिव गोत्वविशिष्टज्ञानं तदुद्बोधश्च, तद्वदेव परम्परासंबन्धादिति चेत् । न । (१९) तत्र हि धानकर्मविशेषस्यावश्यं शक्यत्वे ऽनुगमाय गोत्वमवच्छेदकमात्रं (२०) न तु वैपरीत्यम् । गोत्वस्य वृषभेपि सत्वात् । इह तु व्यक्तिरतिप्रसक्तेति जातिविशिष्टैव सा शक्या स्यात् । (२१) वस्तुतस्तु जातेः शक्योपलक्षणत्वे शक्यावच्छेदकत्वे वा ऽऽवश्यकत्वाद् (२२) लाघवाच्च जातिरेव शक्या स्यात् । न व्यक्तिः । धेनुपदे तु गोत्वं न तथा, (२३) ऽतिप्रसङ्गात् ।

र्शनाद्यन्वयादित्यर्थः । कार्यान्वयिविशेषणं तदनन्वय्युपलक्षणमिति लक्षणानुसारेणेदम् । उपलक्षणमुदाहरति । (१५) यथेति । वाससि तत्पदवाच्यत्वानन्वयेन तस्योपलक्षणत्वमित्यर्थः । के चित्तु गोत्वं यदि वासोवच्छक्योपलक्षणं तदा देवदत्तपदजन्यज्ञाने वासोवद्गोपदजन्यज्ञाने गोत्वमपि न स्फुरेदित्यत्र तात्पर्यमित्याहुः । गोत्वेन तासामैक्यादिति दूषयति (१६) न चेति । (१७) एवं हीति । अवच्छेदकत्वेपि यथा दण्डत्वे न कारणता तथा गोत्वेपि न शक्यत्वमिति तदुपस्थितिर्न स्यादित्यर्थः । अशक्यत्वेऽपि तदुपस्थितिः स्यादित्याह । (१८) शक्तीति । शक्यवृत्तित्वं परम्परासम्बन्धः । गुरुः स्वमतेन दूषयति । (१९) तत्र हीति । ननु लाघवाद्गोत्वमपि शक्यमस्त्वित्यत आह, (२०) न त्विति । ननु धानकर्मविशेषवदिहापि व्यक्तिविशेषाणां शक्यत्वमस्तु, न चाननुगमो, गोत्वेनैवानुगमात् । न हि धानकर्मविशेषेप्यन्यदनुगमकं, तथात्वे अनुगमार्थं गोत्वमवच्छेदकमित्यसंगतं स्यात् । न च तत्तद् धानकर्मत्वमपि शक्यमित्यनतिप्रसङ्ग, इह तु व्यक्तिरतिप्रसक्तेति वाच्यम् । तत्तत्प्रकारकप्रतीत्यापत्तेः । अन्यथा ऽत्रापि तत्तद्व्यक्तित्वं शक्यमिति सुवचं स्यादिति चिन्त्यम् । के चित्तु एतदस्वरसादाह । (२१) वस्तुतस्त्विति । शक्तौ नावश्यकत्वमित्यस्वरसादाह । (२२) लाघवाच्चेति । व्यक्तिधीश्च संस्कारादेवेति भावः । (२३) अतिप्रसङ्गादिति ।

(२४) अस्तु तर्हि जातिविशिष्टं शक्यं, स्वव्यवहारेण च स्वहेतुतया जातिविशिष्टज्ञानस्यानुमितत्वादिति चेत् । न । विशेष्यभेदाद्विशिष्टानामनन्तत्वेन व्यक्तिवाच्यत्वोक्तदोषप्रसात् । विशेषणस्यैक्येन विशिष्टानामैक्यस्योपलक्षणपक्षदूष्यत्वात् । तस्माद्व्यक्तेरपदार्थत्वे जातिरेव पदार्थः ॥ (२५) वस्तुतस्तु व्यक्तौ जातिरनुगमिका विशेषिका वा ऽवश्यवाच्या वेति नागृहीतविशेषणान्यायेन सैव वाच्या । अथ जातावपि व्यक्तिरेव (२६) विशेषो (२७) धर्मान्तराभावात्, (२८) गवेतरावृत्तित्वे सति सकलगोवृत्तित्वादेरुपाधेरपि व्यक्तिघटितत्वात्, नागृहीतविशेषणान्यायो व्यक्तावपि इ(२९)त्युभयमपि वाच्यमिति । न । जातेः स्वत एव व्यावृत्तत्वात् । अन्यथा जातिव्यक्त्योर्व्यावृत्तान्योन्यज्ञानादन्योन्यव्यावृत्तबुद्धावन्योन्याश्रयः । स्वतो व्यावृत्तत्वं च न स्वयमेव स्वव्यावर्तकत्वं (३०) स्वस्मिन् स्वावृत्तेः । नापि व्यावर्तकं विनैव व्यावृत्तत्व, मसंभवात् । किं तु स्वाश्रयवत् स्वात्मनि व्यावृत्तधीजनकस्वभावत्वं, परेषामन्त्यविशेषवत् । व्यावर्तकधर्मेपि धर्मान्तरादेव व्यावृत्तबुद्धौ अनवस्था स्यात् । अत एव किं चिद्धि वस्तु स्वत एव विलक्षणमित्याहुः ॥ अस्तु वा व्यक्त्या व्यावृत्ततया बोधिता जातिरेव पदार्थो, लाघवात् । न तु वैपरीत्य,मुभयं, वा । (३१) गौरवात् । कुतस्तर्हि व्यक्तिधीः, जातिशक्तादेव । कथमन्यशक्तादन्यधीः, स्वभावात् । तत्स्वभावत्वमेव व्यक्तिशक्तिं विना न निर्वहतीति चेन्, न । गोपदं हि नियमतो जातिव्यक्ती बोध-

---

वृषभइति शेषः । यद्यपि लाघवादित्युक्तं तथापि विशिष्टस्यैवोपस्थितत्वात्तत्र शक्तिरित्याह । (२४) अस्त्विति । नन्वेवमवच्छेदकैक्येन धानकर्मविशेषाणामपि नैक्यमिति तव धेनुपदेपि तुल्यं दण्डत्वादिविशिष्टकारणत्वे वा का गतिरित्यरुचेराह । (२५) वस्तुतस्त्विति । लाघवादिति भावः । (२६) विशेषइति । विशेषकइत्यर्थः । (२७) धर्मेति । विशेषकेत्यर्थः । (२८) गवेतरेति । गोपदमुभयत्र साखावत्परमिति नात्माश्रय इत्याहुः । (२९) उभयमपीति । विनिगमकाभावादिति भावः । (३०) स्वस्मिन्निति । व्यावृत्तिसमानाधिकरणस्यैव व्यावर्तकत्वादिति भावः । व्यावर्तकत्वं चात्र व्यावृत्त्यधिकरणतावच्छेदकत्वं न तु व्यावृत्तधीजनकत्वमतो नायमन्यविरोधः । (३१) गौरवादिति । व्यक्तीनानात्वादित्यर्थः ।

यति । तत्र(३२)स्य जातिशक्तिधीरेव सहकारिणी कल्प्यते, लाघवादावश्यकत्वाच्च । न तु व्यक्तिशक्तिधीरपि, गौरवात् । जातिशक्तिज्ञाने सति तां विना व्यक्तिबोधे विलम्बाभावात् । यथा तव पदार्थशक्त्यादेवान्वयधीः । (३३) यद्वा जातिशक्तमेव पदं व्यक्तिं बोधयति । अशक्यत्वेपि जात्याश्रयत्वं नियामकं, यथा शक्यमपि स्वार्थान्वयं बोधयति । तत्र प्रयोजकत्वेन क्लृप्ता शक्तिरेवास्तु जात्याश्रयस्य तथात्वकल्पने गौरवादिति चेत् । (३४) अन्यलभ्यस्यापदार्थत्वात् । अन्यथान्वयोपि शक्यः स्यात् । लक्षणाद्युच्छेदश्च । अथ वा जातिशक्तिज्ञानाज्जातिधीर्भवन्ती व्यक्तिमपि गोचरयति । व्यक्तिं विना जातेरभानात् । यो येन विना न भासते तद्धीहेतुस्तमवबोधयति । यथा ज्ञानधीहेतु(३६)स्तद्विषयं (३७) यथा वा तवाधिकरणसिद्धान्तो ज्ञानादिनित्यत्वम् । (३८) अन्यथा पदं जातिमपि न बोधयेत् । केवलाया अप्रतीतेः, तथा च जातिशक्तिकल्पनावैयर्थ्यं, तस्माज्जातिज्ञानार्थं क्लृप्ता शक्तिर्व्यक्तिमपि बोधयति । एकवित्तिवेद्यत्वनियमात् । एतेनैकवित्तिवेद्यतैव व्यक्तिशक्तिं विना न स्यात् । ज्ञापकाभावात् । नहि व्यक्तिज्ञानमहेतुकं, जातिहेतुकं, वा । (३९) सदातनत्वप्रसङ्गात् । नापि जातिधीहेतुकं, संविद्भेदापत्तेरिति निरस्तम् । जातिशक्तेरेव व्यक्तिज्ञापकत्वात् । ननु जातिं विना प्रत्यक्षादिना व्यक्तिज्ञाना(४०)दन्यैव व्यक्तिधीसामग्री जातिविशिष्टज्ञानं चोभयज्ञापकसामग्रीद्वयसमाजादार्थम् । अत एव व्यक्तिं विना जातेरस्मरणेन जातिस्मरणस्य व्यक्तिविषयत्वनियमाद् जातिज्ञापकमात्रमेव व्यक्तिज्ञापकं कल्प्यते । सामान्यकल्पनायां बाधकाभावादिति निरस्तम् । जातिं विनापि व्यक्तिस्मरणात् । तत्रान्यैव सामग्री । जातिविशिष्टस्मरणं चोभयांशस्मारकसमाजादिति ॥ अत्र ब्रूमः । जातिव्यक्तिप्रत्यक्षादिबोधे तथैव (४१) सामग्रीद्वयस्य पृथगन्वयव्यतिरेकग्रहात् । शाब्दे तु व्यक्तिबोधे जातिशक्तिज्ञानमेव हेतुर्लाघवात् । (४२) न सामग्र्यन्तरम् । तत्सत्त्वे तेन विना विलम्बाभावात् । एवं च जातिशक्तत्वेन ज्ञातं पदं जातिविशिष्टस्य स्मारकमनुभावकं च । ननु ज्ञाने शक्तिः शक्यत्वात् । तथा च यस्य ज्ञाने शक्तिः तच्छक्यं, जातिव्यक्तिज्ञाने च शक्तिरिति जातिवद्व्यक्तिरपि शक्येति चेत् । न । यद्विषयतया हि ज्ञाता ज्ञाने शक्तिरुपयुज्यते तच्छक्तिज्ञाने विषयतया शक्यतावच्छेदकं शक्यम् । (४३) जातिज्ञानं च शक्यमिति जातिरेव शक्या, न तु व्यक्तिज्ञानत्वमवच्छेदकं, गौरवात् । न च शक्यज्ञाने नियतविषयत्वमेव शक्यत्वं, व्यवहारानुमितशक्यानुभवविषयाणामन्वय(४४)तत्संबन्धि(४५)मितिमातॄणामपि शक्यत्वापत्तेः । एवं च जातिव्यक्तिज्ञानजनकत्वादुभयत्रापि शब्दशक्तिः । जात्यंशे सा ज्ञाता व्यक्त्यंशे स्वरूपसती हेतुः लाघवादिति कुब्जशक्तिवादः । एवं च सैव तदैव तेनैव ज्ञाता ऽज्ञाता च

---

(३२) अस्येति । पदस्येत्यर्थः । यथा पदार्थशक्त्यादन्वयबोधे आकाङ्क्षादिधीः सहकारिणी यथा वा अशक्यत्वविशेषेप्यन्यबोधे न सा सहकारिणीत्यत्र स्वभाव एव नियामक इति नातिप्रसङ्ग इति भावः । नियामकान्तरमाह । (३३) यद्वेति । (३४) अन्येति । तथा च प्रामाणिकं गौरवमिति भावः । एकवित्तिवेद्यत्वमेव वा नियामकमाह । (३५) अथ वेति । (३६) तद्विषयमिति । यद्यपि ज्ञानमस्तीत्यादौ व्यभिचारस्तथापि सविषयकमेव ज्ञानं तत्रापि भासतइति मतेनेदमित्येके । केचित्तु प्रत्यक्षाभिप्रायेणेदमित्याहुः । (३७) यथा वेति । अधिकरणसिद्धान्तः पक्षधर्मताबललभ्योर्थः । यथा ज्ञानादिनित्यत्वमादाय सिध्यतीत्यर्थः । स्वमतावष्टम्भेनाह । (३८) अन्यथेति । (३९) सदातनत्वेति । अहेतुकमित्यत्र तन्मते प्रागभावाभावान्न व्यभिचारः । भावत्वेन विशेषणादित्यन्ये । अनादिः स्यादित्यत्र तात्पर्यमित्यपरे । जातिहेतुकमित्यत्र यद्यपि जातिसाक्षात्कारे व्यभिचारः जातिमात्रहेतुकत्वं चासिद्धं तथा पि व्यक्तिज्ञानं यदि जातीतरानपेक्षं स्यादित्यत्र तात्पर्यम् । न च जातीतरेति व्यर्थम् । अखण्डाभावे तात्पर्यात् ।

(४०) अन्यैवेति । अन्यथेदं रजतमिति भ्रमस्थले व्यक्तिधीर्न स्याज् जातिधीसामग्र्यभावादिति भावः । (४१) सामग्रीद्वयस्येति । संयोगो व्यक्तेः, संयुक्तसमवायो जातेरिति सामग्रीभेदस्य तत्र प्रमाणसिद्धत्वादित्यर्थः । (४२) न सामग्र्यन्तरमिति । यद्यपि जातिव्यक्त्योरुपस्थित्यनन्तरमन्यतरत्र बाधावतारादन्यतरमात्रान्वयबोधसंभवादत्रापि सामग्रीभेदसंभवस्तथापि यत्रोभयत्र निराबाधा प्रतीतिस्तदभिप्रायेणेदमित्याहुः । एतन्मते चाकृतिभानं नेत्येके । व्यक्तिवदेव तद्भानमित्यन्ये । (४३) जातिज्ञानं चेति । जातिश्च तथेत्यत्र तात्पर्यम् । (४४) तत्संबन्धीति । अन्वयसंबन्धी पदार्थः । यद्यप्यत्रेष्टापत्तिस्तथापि मिलितानां शक्यत्वापादने तदभाव इति भावः । (४५) मितिमातॄणा-

वाचिका ऽवाचिका चेत्यत्र जातिव्यक्त्यवच्छेदभेदेनाविरोधः । त्वया (४६) ऽप्यन्वये कुब्जशक्तिस्वीकारात् । व्यक्तेः शक्यत्वेपि (४७) ज्ञातशक्तिशब्दजनितज्ञानविषयत्वलक्षणं वाच्यत्वं नास्ति । न चेयं परिभाषा । शब्दजन्यज्ञानविषयत्वेन वाच्यत्वे लाक्षणिकादेरपि वाच्यत्वापत्तेः । व्यक्तेः शक्यत्वेपि व्यक्तिशक्तिज्ञानं न कारणं, व्यक्तिशक्तिज्ञानत्वं (४८) नावच्छेदकमिति लाघवम् । यत्तु तच्छक्तत्वेन (४९) ज्ञातादेव तदर्थबोधः, शक्तिभ्रमादपि धीसंभवात् । (५०) तथा च योग्यताद्यन्वयानुपपत्ती विना पदादुपस्थितिः (५१) शक्तिसाध्येति व्यक्तिरपि शक्येति । तन्न । (५२) अन्यलभ्ये शक्तेरकल्पनात् । अन्यथा तवान्वयेपि शक्तिः, लक्षणाद्युच्छेदश्च । ननु न जातिरर्थः, व्यवहाराभावेन व्युत्पत्तेरसिद्धेः । कारकोपरक्तक्रिया हि व्यवहारगोचरः, जातिश्च (५३) न क्रिया । नित्यत्वात् । न कारकं कर्त्रादि । (५४) क्रियायास्तत्रासमवायात् (५५) परसमवेतक्रियाफलभागित्वाभावात् । कर्तृव्यापारानाश्रयत्वात् । अचेतनत्वात् । (५६) तया सह विभागाभावात् । क्रियानाधारत्वाच्चेति चेद्, न । (५७) व्यक्तिव्यवहारादेवोक्तन्यायेन जातौ शक्तिग्रहात् । जातिसविकल्पकाद् व्यावृत्ततया ज्ञातायां व्यक्तौ क्रियान्वयः । सविकल्पकं (५८) चालोचनद्वारा जातिजन्यमिति परम्परया जातेरपि कारकत्वेनान्वयः । (५९) यद्वा न केवलव्यक्तेः कारकत्वं, न हि गौर्गच्छतीत्यतो व्यक्तिमात्रं यातीति कस्य चित् प्रतीतिः । (६०) किं तु जातिविशिष्टायाः । तथा चोभयमपि कारकम् ॥

(६१) श्रीकरस्तु केवलजातिव्यक्त्योरकारकत्वात् क्रियान्वयो व्यक्तेराश्रयतया, जातेरवच्छेदकतया, (६२) आरुण्यादिवत् । एवं च जातिशक्तपदाज्जातेरनुभवः शाब्दो, व्यक्तेरौपादानिको ऽशक्यत्वादिति ॥

(६३) अन्ये तु जातिशक्तमेव पदं जातिव्यक्त्योः स्मारकमनुभावकं चेति व्यक्तेरपि (६४) शाब्दत्वम् । न च वृत्तिं विना ऽन्वयानुभवे ऽप्रवेशान्न व्यक्तेः शाब्दत्वम् । (६५) वृत्तिं बिना ऽप्येकवित्तिवेद्यत्वनियमेन जातिशक्तादेव व्यक्तेरनुभवात् । अन्यथा जात्यन्वयोपि न स्यात् । व्यक्तिं विना जातेरननुभवात् । अत एव जातिशक्तिरेव व्यक्तिं बोधयतीति गुरवः । (६६) किं च शक्त्योपस्थापितस्यान्वयानुभवं प्रति पदानां कारणत्वम् । अतो जातिवदुपस्थापिताया व्यक्तेरप्यनुभवः पदात् । न तु तत्तच्छक्त्योपस्थापितस्य, गौरवात् । न चैवमशक्यपरत्वे लक्षणा । यथा (६७) ह्यन्यत एव ज्ञानान्न शक्तिः । तथा लक्षणापि

मिति । स्वमतावष्टम्भेन । (४६) अन्वयेइति । न्यायमते परमनिष्टापादनं बोध्यम् । (४७) ज्ञातशक्तीति । तद्विषयत्वेनेति शेषः । अधिकोपपत्तिवचनाय पूर्वोक्तमेव विवृतमिति न पौनरुक्त्यं दोषः । (४८) नावच्छेदकमिति । न कारणतावच्छेदकमित्यर्थः । (४९) ज्ञातादेवेति । लक्षणादिकं विनेति शेषः । पक्षान्तरमाह । (५०) तथेति । अन्वयलाक्षणिकार्थमादाय व्यभिचार इति विनान्तम् । (५१) शक्तिसाध्येति । तद्विषयतया ज्ञातशक्तिसाध्येत्यर्थः । (५२) अन्येति । तथा चोक्तनियमे ऽनन्यलभ्यत्वस्योपाधित्वादप्रयोजकत्वमिति भावः । (५३) न क्रियेति । अनित्यैव क्रियेत्यभिप्रायेणेदमित्येके । आनयनादिक्रियेत्यर्थ इत्यपरे । प्रत्येकभेदे साध्ये क्रमेण हेतुमाह । (५४) क्रियाया इत्यादि । कृतेरित्यर्थः । तेन पचतीत्यादौ पाकादेः कर्त्तर्यसमवायाच्च व्यभिचारः । न चैवं साध्याविशिष्टं, कर्तृपदवाच्यभेदस्य साध्यत्वेनोपाधिभेदात्, अन्योन्यात्यन्ताभावभेदाद्वेद इत्यप्याहुः । (५५) क्रियाफलेति । जातेर्जन्यधर्मानाश्रयत्वादित्यर्थः । (५६) तयेति । जात्येत्यर्थः । (५७) व्यक्तौति । जातिव्यक्तिभावस्यैव नियामकत्वादिति भावः । (५८) आलोचनेति । यद्यपि तन्मते तत्र न निर्विकल्पकजन्यत्वं तथापि परमतेनेदम् । अनुगतत्वबुद्धौ तद्धेतुरिति कृत्वा तथोक्तमित्यन्ये । ननु तथापि प्रकृतं शाब्दज्ञानं नालोचनजन्यं किं चैवमपि जातेः सविकल्पके परम्परया कारकत्वे ऽपि प्रकृतक्रियान्वये कारकत्वं नोपपादितमित्यरुचेराह । (५९) यद्वेति । (६०) किं त्विति । विशेषणे गोत्वेऽपि गमनक्रियान्वयात्तदपि कारकमित्यर्थः ॥

ननु बाधात्तत्र न तदन्वय इत्यरुचेराह । (६१) श्रीकरस्त्विति । (६२) आरुण्येति । अरुणयैकहायन्येत्यत्र गोः कारणत्वेनारुण्यस्य चावच्छेदकत्वेन क्रियान्वयवदित्यर्थः ॥

नन्वेवं गोत्वप्रकारकशाब्दज्ञानानुपपत्तिरित्यरुचेराह । (६३) अन्ये त्विति । यद्यपि प्रागेव तदुक्तं तथापि श्रीकरमते तात्पर्यदोषप्रदर्शनाय पुनरभिधानमिति मन्तव्यम् । अत्र मते व्यक्त्यंशे स्वरूपसत्यपि न शक्तिरिति मतान्तरत्वाभिधानम् । (६४) शाब्दत्वमिति । शाब्दबोधविषयत्वमित्यर्थः । (६५) वृत्तिं विनेति । स्ववृत्तिं विनेत्यर्थः । प्रत्युत स्वांशप्रवेशे गौरवमित्याह । (६६) किं चेति । (६७) अन्यतइति । तुल्य-

न । तत्किमशक्ये ऽपि मुख्यः प्रयोगः । सत्यम् । शक्त्या साक्षादुपस्थित एव तस्य मुख्यत्वात् । स्वशक्त्येति त्वधिकम् । (६८) वस्तुतस्तु जातिशक्तादेव व्यक्तिधीसंभवात्, न व्यक्तौ शक्तिः । यदि च ततो न तद्धीः, तदा तत्र शक्तिरेव स्यात् । (६९) अन्यथा तद्धीर्न स्यादेव । (७०) ननु पदजातिभ्यामप्येको जातिव्यक्त्यनुभवः क्रियते । तत्र जात्यंशे पदस्य व्यक्त्यंशे (७१) जातेरनुभावकत्वमयमेवोपादानार्थ इति चेत्, तर्हि जातेः कारणत्वापेक्षया शक्तिज्ञाने ऽनुपस्थितव्यक्तेरवच्छेदकल्पनैव लघीयसी, जातेः प्रमाणान्तरत्वापातश्च । (७२) अत एव व्रीहीनवहन्तीत्यादौ व्यक्तौ न लक्षणा । तत्साध्योपस्थितेर्जातिशक्तित एव सिद्धेः । (७३) अस्तुवा गवावच्छेदकत्वेनारुण्यादिवद् व्रीहित्वे ऽप्यवघातान्वय इति ॥

अत्रोच्यते । (७४) गोत्वज्ञाने गोज्ञाने वा शक्तं पद-

वित्तिवेद्यत्वनियमादित्यर्थः । ननु जातिशक्तमिति ज्ञाने जातिविशेष्यकज्ञानात्कथं व्यक्तिविशेष्यकशाब्दधीरिति चेत् । शब्दशक्तिवैचित्र्यात्तदुपपत्तेरित्येके । गोपदेन गोत्वस्य विशेषणतयैवोपनयात्तद्विशेष्यकस्मरणासिद्धिरित्यन्ये । (६८) वस्तुतस्त्विति । नन्वत्र पौनरुक्त्यं, कुत्र वा पूर्वपक्ष एतदुत्थानमिति चेत्, न । न चेत्यादिपूर्वपक्षे तृतीयसमाधिपरत्वात् । न च तत्रापि प्रथमसमाधिना पौनरुक्त्यम्, एकवित्तिवेद्यत्वेन व्यक्तिलाभाभिप्रायेण तस्योक्तत्वात्, अस्य चान्यथा तल्लाभाभिप्रायकत्वादित्याहुः ॥ केचित्तु तत्किमशक्येपीति शक्तिसाधकपूर्वपक्षे समाध्यन्तरमित्याहुः । (६९) अन्यथेति । शक्त्यकल्पनइत्यर्थः । तथा च तत एव तद्धीरिति भावः । औकरमतान्तरं शङ्कते । (७०) नन्विति । (७१) जातेरिति । ननु प्रमाणसहकारितया ऽस्या जनकत्वे कथं प्रमाणान्तरत्वमन्यथा योग्यताज्ञानादेरपि तथात्वापत्तेः । यदि च निर्व्यापारतया न तस्य तथात्वं तदात्रापि तुल्यमिति चेत् । तदंशे स्वातन्त्र्येणैव तद्धेतुत्वं निर्व्यापारस्य च करणत्वमित्यभ्युपगन्तारं प्रति तदापादनात् ॥ वस्तुतो जातिशक्त्यैव तथाधीसंभवे जातेः करणत्वकल्पने गौरवादित्यत्र तात्पर्यम् । (७२) अत एवेति । यत एव जातिशक्तादेव व्यक्तान्वयबोध इत्यर्थः । औकरमते व्रीहित्वाश्रये ऽवघातस्य शब्दात्प्रतीतेर्लक्षणा स्यादिति भावः । ननु तथापि व्यक्तिमात्रान्वये तन्मात्रोपस्थित्यर्थं लक्षणैव स्यादित्यत आह । (७३) अस्तु वेति ।

ज्ञानशक्तिपक्षमाश्रित्याह । (७४) गोत्वज्ञानइति । मत-

मित्याकारः शक्तिग्रहः (७५) तथा च शक्तिज्ञाने विषयतया जातेरवच्छेदकत्वं व्यक्तिमादायैव प्रतीयते, न केवलायाः, व्यक्तिं विना जातेरप्रतीतेः । तथा च जातेरवच्छेदकत्वे (७६) नागृहीतविशेषणान्यायेन व्यक्तेरवच्छेदकत्वं वज्रलेप इति शक्तिज्ञाने विषयतयावच्छेदकत्वात् जातिवत्सापि शक्या । तस्मात् परिहरैकवित्तिवेद्यत्वनियमं, स्वीकुरु वा व्यक्तेर्वाच्यत्वम् । (७७) अपि च यद्धर्मवत्तया ज्ञातएव यत्र यस्य ज्ञानं स तत्रावच्छेदकः, व्यक्तिज्ञानत्वेन ज्ञातएव तत्र ज्ञाने शक्तिधीरिति व्यक्तिरपि शक्या । नन्वाद्यव्युत्पत्तौ मितिमातृविषयत्वेन ज्ञातएव ज्ञाने प्रवर्तकत्वं ज्ञातं, न च तयोर्ज्ञानं प्रवर्त्तक,मतो व्यभिचारः । अन्यथा प्रवर्तकत्वेन मितिमातृज्ञानमपि प्रयोज्यस्यानुमाय बालस्तत्रापि शक्तिं गृह्णीयात् । एवं तवापि कार्यान्वितज्ञानएव शक्तिः स्यात् । तत्त्वेन ज्ञातएव ज्ञाने शक्तिग्रहादिति चेत् । (७८) मितिमातृज्ञानत्वं कार्यान्वितज्ञानत्वं च विनापि प्रवर्तकज्ञाने घटज्ञानत्वादिकं ज्ञातुं शक्यमिति न तयोरवच्छेदकत्वं, किं तु घटज्ञानत्वादिकमेव, लाघवात् । (७९) तयोरपि तत

भेदेनोभयोपन्यासः । उभयमतेपि व्यक्तेरवच्छेदकत्वमित्याह । (७५) तथा चेति । (७६) नागृहीतेति । ननु यत्र प्रथमोपस्थितत्वं तत्र तन्न्यायावतारो न चात्र तथेति चेत् । न । तद्ग्रहं विना यत्र विशेष्यस्य ग्रहो न संभवति तत्रैव तन्न्यायप्रवृत्तेः । व्यक्त्या व्यावृत्ता जातिस्तथात्वेन ग्राह्या तत्र प्रथमं व्यक्तिज्ञानमावश्यकमित्यप्याहुः । ननु जातिव्यक्त्योरवच्छेदकत्वप्रतीतावपि व्यक्त्यंशे तज्ज्ञानं भ्रमः, लाघवेन जातेरेवावच्छेदकत्वादित्यत आह । (७७) अपि चेति । तथा च विषयाबाधात्तत्प्रमैवेति भावः । (७८) मितिमातृज्ञानत्वमिति । तथा च नियमेनोपस्थित्यभावादेव कारणघटितोक्तरूपाभावान्न व्यभिचार इति भावः । (७९) तयोरपीति । मितिमातृज्ञानलाभ इति तु परीत्योक्तम् । ननु यद्धर्मवत्तयेत्यत्र लघुत्वं धर्मविशेषणमतो न व्यक्तेरवच्छेदकत्वं तस्या नानात्वेन गुरुत्वात् । न च तत्प्रवेशे गौरवम् । एवं हि एवकारस्याप्यप्रवेशे मितिमातृज्ञानत्वादावतिप्रसङ्गः । किं चैवं धूमत्वादिकमवच्छेदकं न स्यात्, इदंत्वादिनोपस्थितेपि व्याप्तिज्ञानसंभवात् । यदि चानियतोपस्थितत्वेप्यनुगतत्वाल्लाघवाच्च तस्यैवावच्छेदकत्वं तदा नियतोपस्थितिकत्वेपि तत एव जातिरेव तथा । अपि च शक्तिग्रहविषयीभूतशाब्दज्ञाने उभयत्रिविषयत्वनियमेपि व्यक्ति-

एव प्राप्तेश्च । (८०) किं च पदस्य व्यक्तिज्ञानार्थं शक्ये ज्ञाने विषयतया व्यक्तेरवच्छेदकत्वमात्रं कल्पयति, लाघवात् । जातिविषयत्ववद्व्यक्तिविषयत्वस्य (८१) ज्ञानवित्तिवेद्यत्वेनावश्यं शीघ्रोपस्थितत्वात् । न तु जातिशक्तितद्बोध(८२)कारणान्तरं वा तदवच्छेदकं, गौरवात् । (८३) शक्तिग्रहकाले कल्पनीयोपस्थितिकत्वाच्च ॥

ज्ञानत्वं विनापि जातिज्ञानत्वमनुमानेन शक्यग्रहमिति कार्यत्ववच्च व्यक्तिः शक्या । न च व्यवहारानुमिततज्ज्ञाने शक्तिग्रहः व्यवहारश्च शक्तिविषय इति तद्विषयत्वेनावश्यं तदुपस्थितिरिति वाच्यम् । लिङ्गाभासादिना जातिमात्रविषयत्वेनानुमिते तत्र शक्तिग्रहे बाधकाभावात् । लिङ्गान्तरेणापि तत्संभवाच्च । उत्सर्गतो भानं कार्यविषयत्वेनापीत्यरुचेराह । (८०) किं चेति । तथा चोभयविषयकशाब्दज्ञानत्वावच्छिन्ने पदस्य कारणतया तदवच्छेदकत्वेनोभयत्रैव शक्तिरिति भावः । न चान्वयविषयतानियमेपि तद्विषयत्वं यथानावच्छेदकं तथा व्यक्तिविषयत्वमपीतिवाच्यम् । तस्यावश्यकाकाङ्क्षादिलभ्यत्वात् । व्यक्तेश्चानन्यलभ्यत्वात् । तल्लाभार्थमनावश्यककारणान्तरकल्पने गौरवादित्यनुपदमेव स्फुटम् । (८१) ज्ञानवित्तीति । यद्यपि प्रत्यक्षे तथात्वेप्यनुमाने तथात्वानियमस्तथाप्युत्सर्गतस्तथात्वं बोध्यम् । (८२) कारणान्तरम् । जात्याश्रयत्वादि । (८३) शक्तिग्रहेति । यद्यप्युत्तरकालं तद्ग्रहेपि न दोषस्तथापि गौरवमेव मूलम् । नन्वव्युत्पन्नस्य शाब्दानुभवाभावाच्छक्तिबोधो ऽवश्यं हेतुः । न च पदार्थस्मरणएव तदुपक्षयस्तथापि प्रयोजकत्वसंभवात् । एवं च जातिशक्तिधीरवश्यं प्रयोजिकेति तत एव व्यक्तिधीः । किं च जातिवद्व्यक्तिरपि शक्यज्ञानमवच्छिनत्तु, तथापि न व्यक्तिर्वाच्या, शक्तिज्ञानं यद्विषयत्वेनाङ्गं तदेव शक्यं, जातिश्च तथा लाघवादिति शक्या । अत एवान्वयो न शक्यः, व्यक्तिविषयत्वेन च तस्य ज्ञानं सामग्रीबलात्संपातायातं, न तु तथात्वे तदङ्गं गौरवात् । व्यक्तिधीश्च तुल्यवित्तिवेद्यत्वादिति चेन्नैवम् । शक्तिबोधस्य प्रयोजकत्वे पि व्यक्तिशाब्दबोधहेतुत्वकल्पनायां गौरवतादवस्थ्यात् । जातिशाब्दानुभवे पदं व्यक्तिशाब्दानुभवे च जातिशक्तिबोधो हेतुरिति सामग्रीद्वयकल्पने गौरवाच्च । तथा चानन्यलभ्यत्वाद्व्यक्तिरपि शक्या । एवं च लाघवाद्व्यक्तेरेव शक्यतावच्छेदकत्वकल्पनमेव । एवं च विशिष्टशक्तिकल्पनमङ्गं, गौरवं च प्रामाणिकम् । न च तुल्यवित्तिवेद्यत्वाद्व्यक्तिलाभः । शक्तिं विना ज्ञापकत्वाभावे तथात्वासिद्धेः । जातिशक्तिग्रहात्तथात्वस्यापास्तत्वात् । किं चैवं वैशिष्ट्यलाभो न स्यात् । न च तदपि तुल्यवित्तिवेद्यम् । आलोचने तद्भानेपि

(८४) अन्ये तु प्रथमं व्यवहारानुमितव्यक्तिज्ञाने शब्दानुविधानात् पदं शक्तमित्यवधारयति । न तु जातिज्ञाने, व्यवहाराजनकतया, तदा तस्यानुपस्थितेः । पश्चाद्व्यक्तेर्व्यावृत्त्यर्थमनुगमार्थं च जातिरपि तद्विषये इति मानान्तरेण ज्ञात्वा जातिज्ञानेपि तत्पदस्य कारणतां प्रत्येति । तथा च व्यक्तिशक्तिज्ञानमपि कारणं, न तु जातिशक्तिज्ञानेनान्यथा सिद्धिः । व्यक्तिज्ञानकारणतामुपजीव्य जातिज्ञानकारणताग्रह इति उपजीव्यविरोधात् । एतेन जातिरेव शक्या । लाघवात् । शक्तिग्रहजन्यसंस्कारस्य व्यक्तिविषयत्वनियमेन पदाज्जातिस्मरणमुत्पद्यमानमवश्यं व्यक्तिविषयम् । संस्कारस्यानियतोद्बोधकत्वेपि जात्यंशोद्बोधकादेव व्यक्त्यंशोद्बोधनियमकल्पना । यथा पदेनोद्बुद्धसंस्कारादेव नियता शक्तिस्मृतिः, पदं विनापि च सर्वा जातिस्मृतिर्व्यक्तिविषया । अन्यथा केवलजातिमात्रस्मरणापत्तेः । संस्कारसहितात्पदादेव जातिविशिष्टानुभवेपि । इन्द्रियादिव प्रत्यभिज्ञा । अत एव भाष्यम् । "संस्कारशब्दशक्तिभ्यां विशिष्टानुभव" इत्युन्नीतमतमपास्तम् । उक्तन्यायैर्जातिवद्व्यक्तेरपि शक्यत्वात् । विशिष्टानामानन्त्येप्येकत्र विशिष्टे तत्वं विहाय गोत्वमादाय गोत्वविशिष्टं शक्यमिति शक्तिग्रहः । यथा च क्वचिदेव धूमे धूमो वह्निव्याप्यइति बुद्धिर्यथा वा तवैव कार्याणामानन्त्येपि क्वचित्कार्ये (८५) तत्त्वं तटस्थीकृत्य कृतिमादाय धर्मिणि कार्यं शक्यमिति लिङादेरपूर्वे शक्तिग्रहः । अवच्छेदकैक्याच्छक्तेरेकत्वं तद्वदेव । (८६) यथा वा व्यक्तिवा-

---

तदभानात् । शाब्दे तथात्वस्य निर्बीजत्वात् । न च गोपदं स्वभावादेव गोत्वविशिष्टज्ञापकं, तत्र च जातिशक्तितया ज्ञातत्वमेव प्रयोजकं लाघवादिति वाच्यम् । वैशिष्ट्यशक्ततया ज्ञातस्यैव तथात्वापत्तेः । तस्यापि समवायरूपस्यैकत्वप्रसाधनात् । विशिष्टलाभ एवं सति न स्यादिति तुल्यम् । स्वभावाद्विशिष्टबोधकत्वमित्यपि तुल्यमिति दिक् ॥

(८४) अन्ये त्विति । उपजीव्यता न नियमः किं तु लाघवादिना प्रकारान्तरेणापि । तथा चान्यलभ्यत्वे प्रथमक्लृप्तापि व्यक्तिशक्तिस्त्याज्या, अनन्यलभ्यत्वे किमनया कुसृष्ट्येति । (८५) तत्त्वमिति । तद्व्यक्तित्वादिकमित्यर्थः । तथा चैकव्यक्ताविव शक्तिग्रहः समानप्रकारकत्वं नियामकमिति तन्मतमालम्ब्योक्तम् । ८६) यथा वेति । जातिसांकर्येण शरीरत्वादिव

चकपश्वादिपदानाम् । (८७) अथ वा गोत्वेन सामान्यलक्षणया ज्ञाते सर्वत्र गवि गोत्वमादाय शक्तिग्रहः । प्रमेयत्वेन च सर्वज्ञाने सर्वज्ञत्वमिष्यत एव । नेष्यते तु घटत्वादिसर्वप्रकारकज्ञानवत्त्वेन । सर्वैकोदासीनत्वेन गोः शक्यत्वाद्यत्किंचिदेकोपादानेपि गोरुपादानाद् नोपादानाशक्यत्व,मेकोपादाने ऽनध्यवसायो वा । अन्यथा तवाप्येकवित्तिवेद्यतया सर्वैकपरत्वे उक्तदोषे का गतिः । का वा गतिर्व्यक्तिवाचकपश्वादिपदानाम् । भट्टमते तु जातिरेव शक्या । (८८) लाघवाद् व्यक्तिस्त्वाक्षेपलभ्या । (८९) ननु नाक्षेप, एकवित्तिवेद्यत्वात्तयोः, समानानां हि भावः सामान्यं तच्च सामान्यं व्यक्तिं विना (९०) न भासतइति चेत्, न । स्वरूपेण शक्या जातिः, न च सामान्यत्वं तस्याः स्वरूपं तद्धर्मत्वात् । अन्यथा ऽऽलोचनेपि सा न भासेत । (९१) कथं सामान्यत्वेनाप्रतीता जातिर्व्यक्तितो भिन्नतया शब्देनाभिधातव्येति चेत् । न । शब्देन व्यक्तितो भिन्नंतया जातेरबोधनात् । ननु व्यावृत्ता जातिर्वाच्या व्यावृत्तबुद्धिं विना व्यक्तिविशेषानाक्षेपात् । व्यावर्तिका च तत्र व्यक्तिरेव, अनुगतत्वमप्य(९२)नुगम्यमानं विना न भासत इति जातिवित्तिवेद्यैव व्यक्तिरिति चेत् । न । स्वतोव्यावृत्तजातिस्वरूपस्य वाच्यत्वात् । व्यक्तेर्धर्मान्तरस्य वा व्यावर्त्तकत्वे ऽन्योन्याश्रयः । अनवस्था वा । ननु गौरितिपदाज्जातिव्यक्त्योर्युगपत् प्रतीतिः, न च सूक्ष्मकालभेदाग्रहात् (९३) सा भ्रान्ता, बाधकाभावात् । तथा च गोपदाद्गोत्वधीस्ततः क्रमेण व्याप्तिपक्षधर्मताज्ञानं ततो व्यक्त्यनुमितिरिति ज्ञानपरम्पराकल्पनादूरं जातिवित्तिवेद्यत्वं व्यक्तेरिति चेत्, न । (९४) व्युत्पत्त्यधीनं हि शब्दस्य बोधकत्वम् । अतो व्युत्पत्तिपर्यालोचनया युगपद् ज्ञानमसिद्धम् । अत एव ज्ञानपरम्पराकल्पनमपि युक्तम् । अन्यथा कर्तुरप्याक्षेपो न स्यात् । शब्दात्सकर्तृकाया एव क्रियाया (९५) अवगमात् । न च जातिज्ञानत्वेन व्यक्तिविषयतानियमः प्रत्यक्षादौ तस्य व्यक्तिधीहेतुसमाजाधीनत्वात् । अत एव न जातिधीहेतौ व्यक्तिधीहेतुसहकारितानियमः । समाजस्यार्थसिद्धत्वात् । गो(९६)त्वं गवाविषयप्रतीतिविषयः । (९७) जातित्वात् । (९८) गोभिन्नभावत्वाद्वेति जातिमात्रधीसिद्धेश्च । अथ यद्यत्परतन्त्रं तत्तेनैकवित्तिवेद्यं, यथार्थपरतन्त्रं ज्ञानमर्थे न, जातिश्च व्यक्तिपरतन्त्रेति व्यक्तौ भासमानायामेव भासत इति चेद्, न । परतन्त्रत्वं हि न परसमवेतत्वं, गन्धादिना व्यभिचारात् । न तद्धीनिरूप्यत्वम् । असिद्धेः । नापि तस्मिन् भासमान एव भास-

दुच्चैःश्रवसवृत्तित्वात्पशुत्वादिजातेरभावाल्लोमवल्लाङ्गूलवत्त्वादिलक्षणोपाधिमादाय व्यक्तिष्वेव पशुपदशक्तिग्रह इत्यर्थः । न चैवं छिन्नलाङ्गूलानां पशुत्वेन व्यवहारो न स्यादिति वाच्यम् । तादृशलाङ्गूलवद्वृत्त्यन्त्यावयविमात्रवृत्तिजातिमत्त्वे सतीत्यर्थादित्येके । अदृष्टविशेषोपगृहीतभूतभेदारब्धत्वं तदित्यन्ये । यत्त्वनुगतव्यञ्जकाभावान्न पशुत्वं जातिरिति । तन्न । उक्तोपाधेरेव तथात्वोपपत्तेः । अन्यथा किमवच्छेदेन व्यक्तावपि शक्तिः स्यात् । अस्मन्मते पशुत्वस्य जातित्वेपि पराभ्युपगमेन तथोक्तमित्यप्याहुः । स्वमतमाह (८७) अथ वेति । (८८) लाघवादिति । आवश्यकत्वाच्चागृहीतविशेषणान्यायाच्चेत्यपि बोध्यम् । तदुक्तम् ।

“विशेष्यं नाभिधां गच्छेत् क्षीणशक्तिर्विशेषणे” इति ॥

सामान्यत्वपुरस्कारेण सामान्यं शक्यं तच्च व्यक्तिं विना न भासतइति भ्रान्तः शङ्कते । (८९) नन्विति । (९०) न भासतइति । सामान्यत्वेनेति शेषः । भ्रान्त एव शङ्कते । (९१) कथमिति । अनुगतत्वस्य व्यावर्त्तकत्वे व्यक्तिविशेषानाक्षेपदोषे सत्येवाह । (९२) अनुगम्यमानमिति । (९३) सेति । यौगपद्यधीरित्यर्थः (९४) व्युत्पत्त्यधीनमिति । लाघवेनजातिमात्रस्यैव शक्यतया पदादुपस्थितेरित्यर्थः । (९५) अवगमात् । अवगमाभ्युपगमप्रसङ्गादित्यर्थः । यदि च यौगपद्यधीस्तत्र भ्रमस्तदा प्रकृतेपि तुल्यमिति भावः । (९६) गोत्वमिति । न च नित्यपदादिना गवाविषयप्रतीतिविषयत्वात्सिद्धसाधनमिति वाच्यम् । जातिज्ञानस्य व्यक्तिविषयतानियमाभ्युपगन्तारं प्रत्येवैतदनुमानावतारेणापाततस्तदसिद्धेः । अत एव सामान्यत एव तत्सिद्धिं वक्ष्यति । जातिमात्रधीसिद्धेश्चेति । (९७) जातित्वादिति । जातित्वाविवेचने यावदेव व्याप्ये तावदेव विवक्षितम् । (९८) गोभिन्नेति । ननु भावपदं व्यर्थं, निषेधपदादिना ऽभावमात्रस्यैव गवाविषयप्रतीतिविषयतया तत्र व्यभिचाराभावात् । अन्यथा गोसादृश्यादौ व्यभिचारतादवस्थ्यापत्तेः । न च प्रतीतिपदं प्रत्यक्षपरं भावपदं चेतरानिरूपणानिरूप्यपरमिति वाच्यम् । बाधापत्तेः । किं च गोघटितोपाधेरपि नियमतो गोविषयकप्रतीतिविषयतया तत्र व्यभिचार इति । मैवम् । भावपदस्याखण्डभावपरत्वेनोक्तदोषनि-

मानत्वं, साध्याविशेषात् । (९९) नापि विशेषणत्वेनैव ज्ञानम् । (१००) गौरित्येव प्रतीतेः, (१) गवि गोत्वमिति कश्चित्प्रत्येतीति चेत्; (२) आलोचने विशेषणत्वं विनापि स्वरूपतः प्रतीतेः, (३) जातिमात्रशक्तात् पदात् जातेः स्मरणमालोचनमेव । जातिविशिष्टगोचरसंस्कारादेव पदेन जात्यंशोद्बोधे सति जातिमात्रस्मरणात् । (४) अत एव ततो जातिं विनापि कदाचिद्व्यक्तिस्मृतिः । अस्तु वा (५) गुरोरिवालोचनमपि संस्कारजनकम् । (६) शब्दव्युत्पत्तिबलेन जातिमात्रस्मरणसिद्धेः । न च स्मरणस्य विशिष्टज्ञानत्वमेव । अनुभवस्यापि तथात्वे निर्विकल्पकासिद्धिप्रसङ्गात् । (७) एकवित्तिवेद्यत्वेपि प्रथमदर्शनवत् शब्दाद्गोत्वस्मरणमालोचनमेव । गोत्वे गोव्यक्तिवृत्तित्ववैशिष्ट्यस्याशक्यत्वेन तदविषयत्वात् । न चालोचनस्येन्द्रियजन्यत्वान्न स्मृतित्वं, (८) ज्ञानत्व(९)साक्षाद्व्याप्यधर्मत्वेन स्मृतित्वस्यालोचनवृत्तित्वात् । नन्वाक्षेपाद् व्यक्तिधीर्न व्यक्तित्वेन, न वा रूपान्तरेण, गौरित्येवप्रतीतेः, नापि गोत्वेन, गोत्वस्य (१०) गोत्वविशिष्टाभेदेनाक्षेपाभावादिति चेत् । न । (११) विशेषणविशेष्ययोर्भेदेनानुमानाविरोधात् । (१२) अत एव गोत्वं व्यक्त्याश्रितं जातित्वादिति पक्षधर्मताबलाद्गोत्वाश्रयव्यक्तिसिद्धिः । अर्थापत्तेर्वा तत्सिद्धिः । ननु व्यक्त्या विना किमनुपपन्नं, व्यक्तिं विनापि गोत्वस्य तद्बुद्धेश्च सिद्धेः । कथमर्थापत्तिरिति चेत् । न । व्यापकं विना व्याप्यस्यासिद्धेः ॥

रासात् । (९९) नापि विशेषणत्वेनैवेति । व्यक्तिविशेषणत्वेनैव जातेर्भानं तस्या व्यक्तिपारतन्त्र्यमित्यर्थः । (१००) गौरित्येवेति । गोपदादिना गौरित्याकारिकायाः प्रतीतेर्दर्शनात्तस्याश्च व्यक्त्याक्षेपवादिना मया जातिमात्रविषयत्वेनाप्युपपाद्यत्वादिति भावः । (१) गवीति । गवि गोत्वमिति प्रतीतौ गवीत्यंशे गोत्वान्वयार्थं व्यक्तिभानस्यावश्यवाच्यत्वात्तत्र च गोत्वस्य विशेषणत्वेनैव भानस्वीकार इति गौरित्याकारकप्रतीतावपि तथैव तद्भानस्वीकारः, विभक्त्यर्थभेदेपि प्रकृत्यर्थोल्लेखे विशेषाभावादिति भावः । एवकारगर्भो हेतुस्तथाप्यसिद्ध एवेत्याह । (२) आलोचन इति । निर्विकल्पक इत्यर्थः । नन्वेवं पदान्निर्विकल्पकापत्तिरित्यत्रेष्टापत्तिमाह । (३) जातिमात्रेति । (४) अत एवेति । संस्कारोद्बोधकप्रतिनियमादेवेत्यर्थः । (५) गुरोरिवेति । यद्यपि तन्मते तदनभ्युपगमस्तथापि बहुविशेषानवगाहि ज्ञानं तस्य निर्विकल्पकत्वेन बोध्यम् । तदेकदेशिमतेनेदमित्यन्ये । (६) शब्दव्युत्पत्तीति । जातिमात्रशक्तपदात्तन्मात्रविषयकसंस्कारोद्बोधात्तन्मात्रस्मरणसिद्धेरित्यर्थः । अभ्युपेत्याह । (७) एकेति । (८) ज्ञानत्वेति । अनुमितित्वादौ व्यभिचारादाह । (९) साक्षादिति । यदि चानुमितिविशिष्टस्मरणान्यान्यत्वादिकमपि साक्षाद्व्याप्यं तदा धर्मपदं जातिपरं बोध्यम् । (१०) गोत्वविशिष्टाभेदेनेति । आक्षेप्यगोत्वविशिष्टान्तर्गतत्वेनेत्यर्थः । तथा च न गोत्वांशाक्षेपकत्वमभेदादिति भावः । गोत्वांशस्यानाक्षेप्यत्वमित्याह । (११) विशेषणेति । तर्हि कथं गोत्वाश्रयव्यक्तिसिद्धिरित्यत आह । (१२) एवेति । अभेदेनाक्षेप्यत्वविरोधादेव । पक्षधर्मताबलात् तत्सिद्धिरिति भावः ॥

॥ अथाद्वैतमकरन्दोपक्रमः ॥

भाण्डान्तः करकमलं प्रवेश्य योऽश्नन्
साशङ्कं नवनवनीतमीक्षितो द्राक् ।
धावित्वा दधि बुभुजेऽथ तक्रमित्थं
स्वामम्बां शिशुरिव वञ्चयन्नजोऽव्यात् ॥ १ ॥

एतदद्वैतमकरन्दाख्यं प्रकरणं, निखिलवेदान्तशास्त्रार्थसूचनात् । तत्र भवता श्रीमता लक्ष्मीधराभिधेन विद्वद्वरेण च विनिर्मितम् । अत्र प्रकरणे नित्याद्यनुष्ठानेन विशुद्धान्तःकरणतया संजातविवेकवैराग्यादीन् श्रुतवेदान्ततत्त्वानप्यसंभावनया न परितुष्यतः कांश्चित् पुरुषधौरेयानुपलभ्य संजातकरुणो ग्रन्थकारस्तान् करतलामलकवद् वेदान्तप्रतिपाद्यं सच्चिदानन्दलक्षणं ब्रह्म प्रत्यगभिन्नतया बोधयितुं तर्कान् प्रदर्शयामास ।

एतद् व्याख्यानं श्रीमता परमहंसपरिव्राजकाचार्यकैवल्यानन्दस्य शिष्येण स्वयंप्रकाशाख्ययतिना नैकवेदान्तसंदर्भव्याख्याकृता विरचितम् ।

अनयोर्मूलकारटीकाकारयोः स्थितिकालविषयेऽद्यावधि विशेषप्रतिपत्त्यभावेऽपि सप्तमकारिकादिव्याख्याने "तदुक्तं विद्यारण्यगुरुभिः" इत्युक्त्या टीकाकारस्य विद्यारण्यशिष्यत्वस्याप्यवगमात् तयोः समकालिकत्वं मूलकारस्य च ततः प्राचीनत्वं सामान्येनावसीयते ।

सोऽयं वेदान्तकैरवाद्वैतमकरन्दः काशीविद्यासुधानिधिसंपर्केणातिसुलभतामवाप्य विद्वन्मनोभृङ्गाणां रसव्यासञ्जनाय भवतुतमामिति जगदीशमर्थय इति शिवम् ॥

सांख्यशास्त्रप्रधानाध्यापकः
पं॰ वेचनरामशर्मा कान्यकुब्जः ॥

॥ अथाद्वैतमकरन्दः ॥

॥ स्वयंप्रकाशकृतटीकासहितः ॥

नित्यं निरन्तरानन्दं चिद्घनं ब्रह्म निर्भयम् ।
श्रुत्या तर्कानुभूतिभ्यामहमस्म्यद्वयं सदा ॥ १ ॥

अम्बागृहीतवामार्धं वन्दे चन्द्रकलाधरम् ।
लावण्यमधुराकारं कारुण्यरसवारिधिम् ॥ २ ॥

कैवल्यानन्दयोगीन्द्रपादकञ्जरजोरविः ।
राजते मे हृदाकाशे मोहध्वान्तनिवर्तकः ॥ ३ ॥

शुद्धानन्दपदाम्भोजद्वन्द्वं सेवे यदुद्भवम् ।
निर्वाणरसमास्वाद्य[1] हृष्टाः शिष्यालिपङ्क्तयः ॥ ४ ॥

सच्चिदानन्दयोगीन्द्रा जयन्ति भुवि केचन ।
यत्कृपालवतः[2] स्तीर्णो मया संसारवारिधिः ॥ ५ ॥

इह खलु लक्ष्मीधरो नाम कश्चित् कवीन्द्रो[*] निरन्तरनित्याद्यनुष्ठानशुद्धस्वान्ततया संजातविवेकवैराग्यशमादिमुमुक्षावत आत्मविविदिषया संत्यक्तलोकवेदधर्मान् गुरुवरचरणोपसर्पणपुरःसरं सम्यक्[3]श्रुतवेदान्ततत्त्वेऽप्यसंभावनया प्रतिबन्ध[4]ज्ञानतयापरितुष्यतः कांश्चित् पुरुषधौरेयानुपलभ्य संजातकरुणस्तेषां करतलबिल्वफलवत्[5] स्फुटं वेदान्तप्रतिपाद्यं ब्रह्म सच्चिदानन्दलक्षणं सर्वज्ञं सर्वोपादानं नित्यं सर्वगमद्वयं देहेन्द्रियप्राणमनोबुद्ध्यहंकारसाक्षि प्रत्यगभिन्नतया तर्कैः संभावयितुं किंचित् प्रकरणमद्वैतमकरन्दाख्यमारभमाणश्चिकीर्षितस्याविघ्नेन[6] परिसमाप्तये स्वेष्टदेवताप्रमाणरूपं मङ्गलं स्वयमनुष्ठाय शिष्यशिक्षायै ग्रन्थतो निबध्नाति ॥

॥ कटाक्षकिरणाचान्तनमन्मोहाब्धये नमः ।
अनन्तानन्दकृष्णाय जगन्मङ्गलमूर्तये ॥ १ ॥

कटाक्षो भक्तेषु तिर्यक्पातिता[7] कृपादृष्टिः, तस्याः किरणेन प्रभया, आचान्तः शोषितो नमतां नमस्कर्तॄणां मोहोऽज्ञानं स एवाब्धिः समुद्रो येन सः, तथा तस्मै, श्रीगुरुपरमेश्वरप्रसादरहितानां दुस्तरत्वाद् भ्रान्तिपरंपरातरङ्गयुक्तत्वाद्रागादिमहाग्राहादियोगाच्च युक्तमज्ञानस्य समुद्रत्वम्, अनन्तान-

१–मासाद्य इति पा० ।
२–वलत–इति पा० ।
* पण्डितेन्द्र इत्यर्थः ।
३ विधितः इति पा० ।
४–नादिप्रतिबद्धज्ञा–इति पा० ।
५–विल्ववत् इति पा० ।
६–तस्य तस्या–इति पा० ।
७–क्निपातिता इति पा० ।

न्दकृष्णाय, अनन्तो देशकालवस्तुपरिच्छेदशून्य आनन्दः स्वरूपं यस्य सः, अनन्तानन्दः, स चासौ कृष्णश्च, अनन्तानन्दकृष्णः, वसुदेवकुमारः, तस्मै, जगन्मङ्गलमूर्तये जगतां लोकानां मङ्गलभूता सुखाभिवृद्धिकरी मूर्तिर्विग्रहो यस्य स जगन्मङ्गलमूर्तिस्तस्मै,[1] नमोऽस्तु[2] । जगन्मङ्गलमूर्तय इत्यनेन स्मृतिमात्रेण तस्यैहिकामुष्मिकपुरुषार्थपरिपन्थिविघ्ननिरासस्सामर्थ्यमुक्तम्, मङ्गलस्य तादृशत्वात् ॥ १ ॥

एवमनुष्ठितस्वेष्टदेवतानमस्कारलक्षणमङ्गलनिर्बर्हितसकलान्तरायः प्रथमं[3] तत्त्वमस्यादिवाक्यैस्तात्पर्ययुक्तैर्बोधितं प्रत्यगात्मनो ब्रह्मत्वं युक्त्या संभावयन्नाह । अहमस्मीति ॥

॥ अहमस्मि सदा भामि कदाचिन्नाहमप्रियः ।
ब्रह्मैवाहमतः सिद्धं सच्चिदानन्दलक्षणम् ॥ २ ॥

अहमहंकारादिसाक्ष्यस्मि, सद्रूपो भवामि, आत्मन्यध्यस्ताहंकारादेः सत्ताप्रदत्वात्; सदावस्थात्रयेऽपि भामि; जाग्रति देहेन्द्रियादिसाक्षितया, स्वप्नेऽन्तःकरणवासनाप्रपञ्चसाक्षितया, सुषुप्तावज्ञानसाक्षितया च प्रकाशे, कदाचित्, कदाचिदपि, दुःखाद्यनुभवकालेऽपि, अहं नाप्रियो भवामि, नानिष्टो भवामि, किंतु सदा प्रिय एव भवामि; दुःखादौ द्वेषस्यात्मस्नेहनिमित्तत्वाच्छत्रुदुःखादौ द्वेषस्यादर्शनात्; तथा च परमप्रीतिविषयत्वादानन्दरूपः, यस्मात् कालत्रयेऽप्यबाध्यमानत्वात् सद्रूपः, प्रकाश[4]मानत्वाच्चिद्रूपः, परमप्रीतिविषयत्वादानन्दरूपश्च, तस्मादहं सच्चिदानन्दलक्षणं, सच्चिदानन्दरूपं ब्रह्मेति सिद्धम्[5] । अत्रेदमनुमानं विवक्षितम् । प्रत्यगात्मा ब्रह्मणो न भिद्यते, सच्चिदानन्दरूपत्वाद्, ब्रह्मवदिति; न च हेतुरसिद्धः, अहमस्मीत्यादिना तस्य साधितत्वात् ।

नन्वनुमानस्य नाहमीश्वर इति प्रत्यक्षविरोध इति चेत्, न तावदात्मनो ब्रह्मत्वे बाह्यप्रत्यक्षविरोधः, आत्मनि रूपा-

१ स तथा तस्मै इति पा० ।
२–स्तु । यद्वा कटाक्षः प्रतिभाक्षममन्तःकरणं तस्य किरणो वाक्यजन्यतद्वृत्तिप्रतिफलितं चैतन्यं, तेनाचान्तो भक्षितो नमतां स्वात्मप्रवणानामन्तर्मुखाणां श्रवणादिपराणां मोहोऽज्ञानमेवाब्धिरसंख्याध्यासपरंपराकल्लोलोदयहेतुत्वादनेकानर्थदुष्टग्राहादियोगाच्च येन तस्मै, यद्वा कटाक्षोऽन्तिमप्रमाणं वाक्यजन्यवृत्तिरेव तदनन्तरं सर्वबाधेन प्रमाणादिव्यवहाराप्रवृत्तेः, यत्र त्वस्येत्यादिश्रुतेः, अन्यत् पूर्ववत्, यद्वा कटाक्षवत् प्रसृतमपरोक्षं स्वरूपचैतन्यमेव "दिवीव चक्षुराततं", "यत् साक्षादपरोक्षाद् ब्रह्म" इत्यादिश्रुतेः तस्य किरणेन शेषं पूर्ववत्, अत्र पक्षे कृषिर्भूवाचकः शब्दो णश्च निर्वृत्तिवाचकः । इति कृष्णशब्दार्थो द्रष्टव्यः, जगतां मङ्गलकरी मूर्तिर्यस्य, "एतस्यैवानन्दस्यान्यानि भूतानि मात्रामुपजीवन्ति" "एष ह्येवानन्दयाति" इत्यादिश्रुतेः । इति पा० ।
३–मङ्गलं सकलान्तरायशमनं विधाय प्रथमं इति पा० ।
४ अवस्थात्रये भास–इति पा० ।
५ ब्रह्मैव भवामि इति पा० ।

द्यभावेन बाह्यस्य तत्राप्रवृत्तेः, नापि मानसप्रत्यक्षविरोधः, मनसो मनःसाक्षिण्यात्मनि प्रवृत्तेरसंभवात् ।

ननु जीवेश्वरौ भिन्नौ, किंचिज्ज्ञत्वसर्वज्ञत्वादिविरुद्धधर्माधारत्वाद्, दहनतुहिनवत्, इत्याद्यनुमानविरोध इति चेत्, न, विरुद्धधर्मवतोर्बिम्बप्रतिबिम्बयोरुच्चमन्दशब्दाधार आकाशे च व्यभिचारात् ।

ननु "द्वा सुपर्णे"त्यादिश्रुतिविरोध इति चेत्, न, तस्या अतत्परत्वेन तत्त्वमस्यादिश्रुत्या बाध्यमानत्वात्[1] ।

तस्माच्चाहमीश्वर इति बुद्धिर्देहाद्युपाधिनिमित्ता भ्रान्तिः । न तु जीव[2]स्वरूपविषया । तदुक्तम्,

"त्वयि मयि च गण्यमाने मशकान्मशकोऽहमेव देहदृशा ।
विश्वाधिकेश ते मे सद्बोधानन्दपूर्णता तुल्या" ॥

इति । अतोऽहं ब्रह्मैवेति भावः ॥ २ ॥

ननु "यः सर्वज्ञः सर्ववि"दित्यादिश्रुत्या हि ब्रह्म सर्वज्ञतयावगम्यते यतो वेत्यादिश्रुत्या च सर्वजगत्कारणतया च, प्रत्यगात्मा तु स्वशरीरादिकमपि साकल्येन न जानाति, स्वातन्त्र्येण किंचित् कर्तुमपि न शक्नोति, तत् कथमस्य सर्वज्ञेन सर्वकारणेन च ब्रह्मणाभेद इत्याशङ्क्य प्रत्यगात्मनोऽपि तद्द्वयमुपपादयति । मय्येवेति ॥

॥ मय्येवोदेति चिद्व्योम्नि जगद्गन्धर्वपत्तनम् ।
अतोऽहं न कथं ब्रह्म सर्वज्ञं सर्वकारणम् ॥ ३ ॥

चिद्व्योम्नि चिदाकाशे मयि प्रत्यगात्मन्येव, जगद्गन्धर्वपत्तनं जगदेव गन्धर्वपत्तनम्, ऐन्द्रजालिकविक्षुब्धमाययावरणावस्थायां च मेघेषु प्रतीयमानं नगरं गन्धर्वपत्तनं नाम, तादृशमिदं जगदुदेति, उत्पद्यत इत्यर्थः । अयं भावः । मिथ्यापदार्थस्य हि द्रष्टैवोपादानम्, यथा स्वप्नप्रपञ्चस्य तत्साक्षी, तथा जाग्रत्प्रपञ्चस्यापि सर्वस्य दृश्यत्वेन मिथ्यात्वात् तद्द्रष्टा प्रत्यगात्मैवोपादानं वक्तव्यम् । तदुक्तम्,

"यथा स्वप्नप्रपञ्चोऽयं मयि मायाविजृम्भितः ।
एवं जाग्रत्प्रपञ्चश्च मयि मायाविजृम्भितः" ॥

इति । एवं च प्रत्यगात्मनस्तद्द्रष्टृत्वलक्षणं सर्वज्ञत्वं तदधिष्ठानत्वलक्षणं सर्वकारणत्वं च सिध्यति ।

ननु बहुदूरव्यवहितमेर्वादीनामदृश्यमानानां कथं प्रत्यगात्मा द्रष्टा, कथं वा तदुपादानमिति चेत्, शृणु तर्हि रहस्यम्, एतावन्तं कालं मेर्वादिकमहं नाज्ञासिषमिति ह्यज्ञानविशेषणतया मेर्वादिकं स्मर्यते, तच्च स्मरणं मेर्वाद्यनुभवं विनानुपपद्यमानं सन्मेर्वाद्यनुभवं कल्पयति, तत्र चेन्द्रियादीनामप्रवृत्तेः प्रत्यगात्मचैतन्येऽध्यस्ततयैव मेर्वाद्यनुभवो वक्तव्यः । अध्यस्तस्य चाधिष्ठानमेवोपादानं, तद्भानादेव भानं च भवति, तथा च प्रत्यगात्मा स्वाध्यस्तमेर्वादेरप्यज्ञाततया साक्षी, तदुपादानं च भवति, तदुक्तं ब्रह्मगीतायाम्,

"ज्ञातरूपेण चाज्ञातस्वरूपेण च साक्षिणः ।
सर्वं भाति तदाभाति ततस्तद् व्यापि सर्वदा" ॥

इति ।

तथा च प्रत्यगात्मा सर्वज्ञः सर्वकारणं चेति । यत उक्तप्रकारेण सर्वकारणं चाहमतः कथं तद्रूपं ब्रह्म न भवामि, भवाम्येवेत्यर्थः ॥ ३ ॥

ननु

"नित्यं विभुं सर्वगतं सुसूक्ष्मम्"

इत्याद्युपनिषत्सु नित्यं ब्रह्म श्रूयते, आत्मा च मरणादिधर्मकत्वादनित्य एवानुभूयते, ततश्च न तयोरैक्यमित्याशङ्क्य किमात्मनो बौद्धपक्ष इव स्वत एव नाशं ब्रवीषि, उत दण्डसंयोगाद्घटस्येवान्यसंबन्धादात्मनो नाशं ब्रवीषि, अथवा पटनाशात् पटगतरूपादिवदाश्रयनाशान्नाशं ब्रवीषि, इति विकल्प्याद्यं प्रत्याह । न स्वत इति ॥

॥ न स्वतः प्रत्यभिज्ञानान्निरंशत्वान्न चान्यतः ।
न चाश्रयविनाशान्मे विनाशः स्यादनाश्रयात् ॥ ४ ॥

मे प्रत्यगात्मनो मम न स्वतो नाशो भवति । तत्र हेतुः । प्रत्यभिज्ञानादात्मनः प्रत्यभिज्ञायमानत्वात् । प्रत्यभिज्ञानं नाम पूर्वमनुभूतस्य कालान्तरे प्रमाणेन तत्तोल्लेखपूर्वकं ज्ञानम् । आत्मा हि योऽहं बाल्ये पितरावन्वभूवं स एवेदानीं स्थविरे प्रणप्तॄननुभवामि, योऽहं सुप्तः स्वप्नमद्राक्षं स एवेदानीं जागर्मीति च बाल्याद्यवस्थासु जाग्रदाद्यवस्थासु च प्रत्यभिज्ञायते । तच्च प्रत्यभिज्ञानमात्मनो निर्नैमित्तनाशे नोपपद्यते । तथाहि, आत्मनो हि स्वतो नाशे प्रतिक्षणमन्योऽन्य आत्मेति वक्तव्यम् । तत्र कथं वान्योऽन्येन सोऽहमिति प्रत्यभिज्ञायेत, आत्मा च सोऽहमित्यात्मानं प्रत्यभिजानाति । तस्माच्च तस्य स्वतो नाश इत्यर्थः ।

न द्वितीय इत्याह । निरंशत्वान्न चान्यत इति । निरंशत्वादंशरहितत्वान्निरवयवत्वात्, अन्यतो हेतुसंयोगादप्यात्मनो न नाश इत्यर्थः । आत्मा हि चिद्रूपत्वान्निरवयवः । यदि निरवयवस्यात्मनः[1] सावयवत्वमुच्येत, तर्हि वक्तव्यम्, आत्मावयवाश्चेतना अचेतना वा ।

नाद्यः, आत्मावयवानां हि प्रत्येकं चेतनत्वे विरुद्धाभिप्रायतया शरीरमुन्मथ्येत ।

---

१ बाधात् इति पा० ।
२ शुद्धजीव–इति पा० ।

१ चिद्रूपस्यात्मनः इति पा० ।

न द्वितीयः, अचेतनैरवयवैरारब्धस्याप्यात्मनोऽप्यचेतनत्वप्रसङ्गात्, न ह्यचेतनैस्तन्तुभिरारब्धः पटश्चेतनो दृश्यते, ततो निरवयव एवात्मा, न निरवयवे चात्मनि हेतुसंयोगः संभवति, तस्यैकदेशवृत्तित्वात्, अतोऽन्यतोऽप्यात्मनो न नाश इति भावः ।

नापि तृतीय इत्याह । न चाश्रयेत्यादिना । आश्रयविनाशादाधारविनाशादपि मे मम विनाशो न स्यात्, कुतः, अनाश्रयात्, आश्रयस्याधारस्याभावात् । आत्मा हि गुणक्रियाजात्याद्यन्यतमत्वाभावादनाश्रयः, निरवयवत्वाच्च नापि घटवदाश्रयः । अत आश्रयनाशादप्यात्मनो न नाशः । आत्मनो मरणादिप्रतीतिस्तु देहाद्युपाधिकृता । तदुक्तं सूत्रकृता । "चराचरव्यपाश्रयस्तु स्यात् तद्व्यपदेशो भाक्तस्तद्भावभावित्वा"दिति । अस्य चार्थो विद्यारण्यगुरुभिरधिकरणरत्नमालायां दर्शितः ।

"जीवस्य जन्ममरणे वपुषो वात्मनो हि ते ।
जातो मे पुत्र इत्युक्तेर्जातकर्मादिभिस्तथा[1]" ॥

इति पूर्वपक्षे प्राप्ते सिद्धान्तमाह ।

"मुख्ये ते वपुषो भाक्ते जीवस्यैते अपेक्ष्य हि ।
जातकर्म च लोकोक्तिर्जीवापेतेति शास्त्रतः" ॥

इति । ततस्त्रिविधनाशाभावान्नित्य एवात्मेति तस्य ब्रह्मणोऽभेदः[2] सम्यग्घटत इति भावः ॥ ४ ॥

हेतुसंयोगादात्मनो न नाश इति द्वितीयं पक्षं प्रपञ्चयति । न शोषेति ॥

॥ न शोषप्लोषविक्लेदच्छेदाश्चिन्नभसो मम ।
सत्यैरप्यनिलाग्न्यम्भःशस्त्रैः किमुत कल्पितैः ॥५॥

चिन्नभसश्चिदाकाशस्य ममात्मनोऽनिलेन वायुना न शोषः शोषणं पत्रफलादेरिव भवति, नाप्यग्निना प्लोषो दाहः पटादेरिव भवति, नाप्यम्भसा जलेन शस्यादेरिव विक्लेदः क्लेदनं भवति, नापि शस्त्रेणायुधेनेक्षुदण्डादेरिव च्छेदो द्वैधीभाव आत्मनो भवति, आकाशस्येवात्मनो निरवयवत्वेन वाय्वादिभिः संबन्धाभावादित्यर्थः । व्यावहारिकसत्यस्य भूताकाशस्यैव हि निरवयवत्वेनासङ्गत्वादाकाशतुल्यसत्यैरप्यनिलादिभिः शोषादयो न भवन्ति, आत्मनि मायाकल्पितत्वेन मिथ्याभूतैर्वाय्वादिभिर्वस्तुतोऽद्वितीयस्यासङ्गस्यात्मनः[3] शोषादयो न संभवन्तीति किमु वक्तव्यमित्यर्थः । तदुक्तं भगवता । "अच्छेद्योऽय"मित्यादिना[1] ॥ ५ ॥

१–दितस्तथा इति पा० ।
२–णाभेदः इति पा० ।
३–सत्यस्यापि नभसो निरवयवत्वेन परमतेऽसङ्गत्वात्,आकाशतुल्यैः सत्यैरप्यनिलादिभिः शोषादयो न भवन्ति, परमार्थसत्यत्वात् पुनः स्वस्मिन् कल्पितैर्वाय्वादिभिः इति पा० ।

ननु प्रत्यगात्मा परिच्छिन्न एवानुभूयते, अहमिहास्मीति प्रतीतेः । ब्रह्म च सर्वगतं, "नित्यं विभुम्[2]", इत्यादिश्रुतेः । अतो नायं ब्रह्मेत्याशङ्क्यात्मनः सर्वगतत्वं युक्त्या संभावयन्नाह । आभारूपस्येति ॥

॥ आभारूपस्य विश्वस्य भानं भासंनिधेर्विना ।
कदाचिन्नावकल्पेत भा चाहं तेन सर्वगः ॥ ६ ॥

आभारूपस्याचिद्रूपस्य, जडस्येत्यर्थः, विश्वस्य जगतो भानं प्रकाशो भासंनिधेर्विना भासंनिधिं विना,चैतन्यसंबन्धं विनेत्यर्थः, कदाचित् कदाचिदपि नावकल्पेत न संभवेत्, भाचैतन्यरूपश्चाहं प्रत्यगात्मा, तेन जडसर्वप्रपञ्चभासकत्वेन प्रत्यगात्मा सर्वगः, सर्वगतो भवामीत्यर्थः, बहुयोजनदूरवर्तिचन्द्रसूर्यमण्डलम्, ततोऽप्यतिदूरवर्ति ध्रुवादि नक्षत्राणि च प्रत्यगात्मनो भासन्ते, तच्च भानं जडानां तेषां स्वतो न संभवति, किंतु स्वप्रकाशरूपात्मचैतन्यसंबन्धबलेनैव तद् वक्तव्यम्, स्वतोऽप्रकाशस्य घटादेः स्वप्रकाशदीपादिसंबन्धबलेनैव प्रकाशदर्शनात् ।

अथ[3] प्रत्यगात्मात्रैव तिष्ठेत् कथं ध्रुवादिना संबध्येत, ततो ध्रुवादिभासकत्वात् प्रत्यगात्मा सर्वगतः, परिच्छिन्नताप्रतीतिश्चात्मनोऽभिव्यञ्जकोपाधिपरिच्छेदाद्भ्रान्त्योपपद्यते, तदुक्तं ब्रह्मगीतायाम्,

"स्वयं भातुमशक्तं हि जडात्मकमिदं जगत् ।
चित्संबन्धबलेनैव खलु भाति न चान्यथा ॥
स्वाभिव्यञ्जकसंकोचात् संकोचप्रतिभात्मनः ।
न स्वरूपेण चिद्रूपः सर्वव्यापी सदा खलु" ॥

इति । ततो जीवात्मा ब्रह्मैवेति भावः ॥ ६ ॥

ननु जीवस्य ब्रह्माभेदोऽसंगतः, ब्रह्मण[4] एवासिद्धेः । देशकालवस्तुपरिच्छेदशून्यं वस्तु हि ब्रह्मेत्युच्यते । न च तत् संभवति, कालाकाशादेर्द्वितीयस्य विद्यमानत्वेन वस्तुपरिच्छेदाभावस्यासिद्धेः, न चाकाशादेर्ब्रह्मण्यारोपितत्वेन मिथ्यात्वात् तेन तस्य न द्वितीयत्वमिति वाच्यम्, आकाशादेरध्यस्तत्वे मानाभावात्, नच "आत्मन आकाशः संभूत" इति श्रुतिस्तत्र मानमिति वाच्यम्, तत्राकाशादेर्ब्रह्मकार्यता-

१–क्तं गीतायाम्, अच्छेद्योऽयमदाह्योऽयमक्लेद्योऽशोष्य एव च । नित्यः सर्वगतः स्थाणुरचलोऽयं सनातनः ॥ इति । इति पा० ।
२ "विभुं सर्वगतं नित्यम्", इति पा० ।
३ यदि इति पा० ।
४ वस्तुतो ब्रह्मण इति पा० ।

मात्रप्रतीतेः, इत्याशङ्क्य ब्रह्मणोऽद्वितीयत्वसिद्धय आकाशादेरध्यस्तत्वं साधयति । नहीति ॥

॥ न हि भानादृते सत्त्वं नर्ते भानं चितोऽचितः ।
चित्संभेदोऽपि नाध्यासादृते तेनाहमद्वयः ॥ ७ ॥

भानादृते प्रकाशं विना पदार्थस्य सत्त्वं सद्भावो नास्ति, अप्रकाशमानशशविषाणादेः सत्त्वादर्शनादित्यर्थः । ततः किं तत्राह, नर्ते इत्यादिना, अचितो जडस्य चित ऋते चैतन्यस्य संबन्धं विना भानं प्रकाशो नास्ति, स्वतो भानवत्त्वे जडत्वाभावप्रसङ्गादित्यर्थः । ततोऽपि किं तत्राह, चित्संभेद इत्यादिना, चित्संभेदोऽपि चैतन्यसंबन्धोऽप्यध्यासादृते चित्यारोपितत्वं विना जडस्य न संभवतीत्यर्थः । अयं भावः । चिज्जडयोराध्यासिकसंबन्धातिरिक्तं संबन्धं वदन् वादी प्रष्टव्यः, किं तयोः संबन्धः, संयोगः, उत समवायः, अथ तादात्म्यम्, अथवा विषयविषयिभाव इति ।

नाद्यः, चितोऽद्रव्यत्वेन संयोगानुपपत्तेः, गुणाश्रयस्यैव द्रव्यत्वात्, चितो निर्गुणत्वात्,

नापि समवायः, चिज्जडयोर्गुणगुण्यादिष्वन्यतमत्वाभावात्;

ननु चिज्जडयोः कार्यकारणभावात् तन्तुपटयोरिव समवायोऽस्त्विति चेत्, न, तन्तुपटयोः समवायेऽवयवावयविताया एव प्रयोजकत्वेन कार्यकारणभावस्याप्रयोजकत्वात्, अन्यथा तुरीपटयोरपि समवायप्रसङ्गात्, अवयवावयवितायाश्च दृग्दृश्ययोरभावात् ।

नापि तादात्म्यम्, परस्परविलक्षणयोस्तयोस्तादात्म्यासंभवात् ।

नापि विषयविषयिभावः, तस्य मूलसंबन्धपूर्वकत्वात्, तदसंभवस्य चोक्तत्वात्, अन्यथातिप्रसङ्गात्, तदुक्तं सर्वज्ञात्ममुनिभिः,

“न संकरो नापि च संयुतिस्तयो-
र्न चास्ति तद्वत् समवायसंभवः ।
अतो न चिच्चैत्यसमन्वयं प्रति
प्रतीयते काचन मूलसंगतिः” ॥

इति । ततस्तयोराध्यासिक एव संबन्ध इति वाच्यम्, तथा च जडपदार्थभानान्यथानुपपत्तिरेवाकाशादेरध्यस्तत्वे प्रमाणम्, तदपि तैरेवोक्तम्,

“ततो वियन्मुख्यमदो जगज्जडं
चिदात्मनोऽस्यैव विवर्त इष्यताम् ।
अनाद्यविद्यापटसंवृतात्मन-
स्तदोपलभ्यत्वममुष्य कल्प्यते” ॥

इति, तेनाकाशादेरध्यस्तत्वेनाहं प्रत्यगभिन्नः परमात्माद्वयः, अद्वितीय इत्यर्थः । ततश्च ब्रह्मणो वस्तुपरिच्छेदाभावेन त्रिविधपरिच्छेदशून्यत्वं सिद्धमित्यर्थः । तदुक्तं विद्यारण्यगुरुभिः पञ्चकोशविवेके,

“देशकालान्यवस्तूनां कल्पितत्वाच्च मायया ।
न देशादिकृतोऽन्तोऽस्ति ब्रह्मानन्त्यं स्फुटं ततः” ॥

इति ॥ ७ ॥

ननु स्थूलोऽहं कृशोऽहं, काणोऽहं, बधिरोऽहं, मूकोऽहं, बुभुक्षितोऽहं, पिपासितोऽहं, मन्ताहं, निश्चितोऽहम्, इति देहादिरूपेणानुभूयमानस्य प्रतीचः कथं चिदेकरसब्रह्मता, इत्याशङ्क्य देहादीनामनात्मत्वं प्रत्येकं साधयति । न देह इति ॥

॥ न देहो नेन्द्रियं चाहं न प्राणो न मनो न धीः ।
ममतापरिरब्धत्वादाक्रीडत्वादिदं धियः ॥ ८ ॥

देहः सशिरस्कः पिण्डः, इन्द्रियं द्विविधम्, ज्ञानसाधनं चक्षुरादि,कर्मसाधनं पाण्यादि च, प्राणः पञ्चवृत्तिः, मनः संशयात्मकम्, धीर्बुद्धिर्निश्चयात्मिका, अहंशब्दस्य देहादिभिः प्रत्येकं संबन्धः, एते देहादयो बुद्धिपर्यन्ताः पञ्चापि पदार्था अनात्मान इत्यर्थः । कुत इत्यत आह, ममतेत्यादिना, ममतापरिरब्धत्वादिदं धियः, आक्रीडत्वाच्च, ममतया ममेतिबुद्ध्या परिरब्धत्वादालिङ्गितत्वाद् विषयीकृतत्वादिति यावत्, इदं धिय इदं बुद्धेः, आक्रीडत्वाल्लीलास्थानत्वादिदंबुद्धिविषयत्वादित्यर्थः । अत्रेदमनुमानं विवक्षितम्, देहादयः प्रत्येकमनात्मानः, ममताबुद्धिविषयत्वादिदंबुद्धिविषयत्वाच्च, घटादिवदिति । देहोऽनात्मा, रूपादिमत्त्वात्, घटवत्; इन्द्रियाण्यनात्मानः, करणत्वात्, कुठारवत्; प्राणोऽनात्मा, वायुत्वात्, बाह्यवायुवत्; देहोऽहमित्यादिप्रतीत्यभावाच्चानात्मत्वं पञ्चानाम्; कृशोऽहमित्यादिप्रतीतिस्तु रक्तः स्फटिक इत्यादिप्रतीतिवदात्मनि देहादिधर्माध्यासादप्युपपद्यते; नापि तत्संघातस्याप्यात्मत्वम्; अनात्मसमुदायस्तत्संघातोऽपि नात्मा, अनात्मत्वात्, गृहादिवदिति भावः ॥ ८ ॥

नन्वहंकारस्यात्मत्वमस्तु, तस्य ममेदंबुद्धिविषयत्वाभावात्, इत्याशङ्क्य सुषुप्त्यादावात्मनि विद्यमानेऽप्यहंकारस्याभावाच्च तयोरैक्यमित्यभिप्रेत्य प्रकारान्तरेण तयोर्भेदं साधयति । साक्षीति ॥

॥ साक्षी सर्वान्वितः प्रेयानहं नाहं कदाचन ।
परिणामपरिच्छेदपरितापैरुपप्लवात् ॥ ९ ॥

साक्षी चिद्रूपोऽन्तःकरणपरिणामरागद्वेषादिद्रष्टा; सर्वान्वितः सर्वत्र घटपटादिष्वन्वितः, घटः स्फुरति, पटः स्फुर-

ति, इति स्फुरणस्य सर्वत्रानुगतत्वेनानुभवात्, प्रेयान् प्रियतम आनन्दरूपः, तस्यैव प्रेयस्त्वात्, अनुभूयते ह्यात्मनः प्रियतमत्वम्, अहं सर्वदा भूयासं न कदाचिन्नाभूवमित्यात्मनि सर्वेषां प्रार्थनादर्शनादित्यर्थः । एवंभूतोऽहं प्रत्यगात्मा कदाचन कदाचिदपि नाहं, नाहंकारो भवामीत्यर्थः । तत्र हेतुमाह, परिणामेत्यादिना, अहंकारस्य परिणामपरिच्छेदपरितापैः, परिणामो रागद्वेषादिपरिणामः, परिच्छेदः परिमितत्वम्, परितापो दुःखादिः, एतैस्त्रिभिरुपप्लवः संबन्धः, तस्मादित्यर्थः । द्रष्टृदृश्यभावेन सर्वगतत्वपरिच्छिन्नत्वाद्याकारेणानन्दरूपित्वदुःखित्वाकारेण चानुभूयमानत्वादहंकारात्मनोर्भेदः स्फुट इत्यर्थः । किमिति तर्हि तयोर्भेदः सर्वैर्नानुभूयत इति चेत्, अहंकारात्मनोस्तप्तायःपिण्डवदविवेकेन दृढमेकतयाध्यसनान्नानुभूयत इति गृहाणेत्यभिप्रायः ॥ ९ ॥

नन्वेवमपि संसारिण आत्मनः कथं नित्यमुक्तब्रह्मता, न च संसारोऽहंकारस्यैव नात्मन इति वाच्यम्,. आत्माहंकारोभयसंनिधाने प्रतीयमानस्य संसारस्याहंकारैकसंबन्धित्वे मानाभावात्, इत्याशङ्क्यान्वयव्यतिरेकावेव तत्र मानमित्याह । सुप्तेऽहमिति ॥

॥ सुप्तेऽहमि न दृश्यन्ते दुःखदोषप्रवृत्तयः ।
अतस्तस्यैव संसारो न मे संसर्तृसाक्षिणः ॥ १० ॥

अहम्यहंकारे सुप्त उपरते सति सुषुप्तिमूर्च्छादौ[१] दुःखदोषप्रवृत्तयः, दुःखं च, दोषा रागादयश्च, तत्कार्यभूता प्रवृत्तिश्च, दुःखदोषप्रवृत्तयः, ता न दृश्यन्ते यतोऽतस्तस्यैवाहंकारस्य संसारः, संसर्तृसाक्षिणः संसर्तुरहंकारस्य साक्षिणो मे मम प्रत्यगात्मनो न संसार इत्यर्थः । अहंकारे सति जाग्रत्स्वप्नयोः संसारदर्शनात्, तदभावे च सुषुप्त्यादौ केवल आत्मनि संसारादर्शनात्, अहंकारसंबन्ध्येव संसार आत्मन्यपि तदविवेकात् प्रतीयते, यथा दाहकत्वमग्निसंबन्ध्येव सत् तदविवेकादयस्यपि प्रतीयते, यथा वा रक्तिमा जपाकुसुमसंबन्ध्येव सन्नविवेकात् स्फटिके प्रतीयते, तद्वदात्मन्यप्यहंकारोपाधिवशादेव संसारः प्रतीयते न स्वतः, सुषुप्त्यादावदर्शनात्; तदुक्तं सर्वज्ञात्ममुनिभिः,

"कर्त्रादिसंनिधिबलेन तवापि कर्तृ-
भोक्तृप्रमातृवपुरापतति भ्रमेण ।
तद्बुद्धिसंश्रयमनात्मगतं प्रतीचि
शुद्धेऽपि पश्यति तमःपटलावृताक्षः" ॥

इति । अत आत्मा नित्यमुक्तं ब्रह्मैवेत्यभिप्रायः ॥ १० ॥

१–र्छयोर्दुः–इति पा० ।

नन्वेवमप्यात्मनो जाग्रदाद्यवस्थावत्त्वं वक्तव्यम्, अहंकारस्य सुषुप्तावभावेन सुषुप्त्यवस्थावत्त्वानुपपत्तौ जाग्रत्स्वप्नावस्थाद्वयसंबन्धित्वस्याप्यनुपपत्तेस्तासां तिसृणामप्येकाश्रयत्वनियमादित्याशङ्क्याहंकारस्य सुषुप्तौ संस्काररूपेण वर्तमानत्वात् तस्यैव सुषुप्तिर्नात्मनः, तस्य सुषुप्तिसाक्षित्वात् । ततो जाग्रत्स्वप्नावप्यहंकारस्यैवेत्यभिप्रेत्याह । सुप्त इति ॥

॥ सुप्तः सुप्तिं न जानाति नासुप्ते स्वप्नजागरौ ।
जाग्रत्स्वप्नसुषुप्तीनां साक्ष्यतोऽहमतद्दृशः ॥ ११ ॥

यः सुप्तः सुप्तिं न जानाति न वेत्ति सोऽहंकार एव सुप्तः सुषुप्त्यवस्थावान् नैवात्मा, कुतः, सुषुप्तितात्कालिकाज्ञानसाक्षितया जागरूकत्वादित्यर्थः । ततश्चासुप्ते सुषुप्त्यवस्थारहिते प्रत्यगात्मनि स्वप्नजागरौ न भवतः, तयोः सुषुप्त्यवस्थासमानाश्रयत्वादित्यर्थः । हेत्वन्तरमप्याह, जाग्रदित्यादिना, यतो जाग्रत्स्वप्नसुषुप्तीनां साक्षी द्रष्टा, अतोऽहमात्मा,अतद्दृशः, ता जाग्रदाद्या दशा अवस्था यस्य स तद्दृशः, तद्दृशो न भवतीत्यतद्दृशः, जाग्रदाद्यवस्थारहित इत्यर्थः । अत्रेदमनुमानं विवक्षितम्, आत्मा जाग्रदाद्यवस्थावान् न भवति, जाग्रदाद्यवस्थासाक्षित्वात्, यो यत्साक्षी न स तद्धर्मवान्, यथा घटसाक्षी न घटधर्मवानिति । तदुक्तमन्वर्थनामसर्वज्ञात्ममुनिभिः,

"तिस्रोऽपि चिद्घनतनोस्तव दृश्यभूता
दूरे चकासति मतेर्बहिरेव तावत् ।
आविस्तिरोभवनधर्मतया ह्यवस्थाः
कः संकरो विमलचिद्वपुषस्तवाभिः" ॥

इति ॥ ११ ॥

जाग्रदाद्यवस्थालक्षणपर्यालोचनयापि नात्मनोऽवस्थासंबन्ध इत्याह । विज्ञानेति ॥

॥ विज्ञानविरतिः सुप्तिस्तज्जन्म स्वप्नजागरौ ।
तत्साक्षिणः कथं मे स्युर्नित्यज्ञानस्य ते त्रयः ॥ १२ ॥

विज्ञानविरतिर्विज्ञानस्य विशेषज्ञानस्य विरतिरुपरतिः सुप्तिरित्युच्यते, तज्जन्म तस्य विशेषज्ञानस्य जन्मोत्पत्तिः स्वप्नजागरावित्युच्येते, तत्रापि वासनामयप्रपञ्चविज्ञानं स्वप्नः, स्थूलप्रपञ्चविज्ञानं जाग्रदिति विभाग इत्यर्थः । ततः किं तत्राह, तत्साक्षिण इत्यादिना, नित्यज्ञानस्यालुप्तचिद्रूपस्य तत्साक्षिण उक्तलक्षणसुषुप्त्यादिसाक्षिणो मे ममात्मनस्ते त्रयः सुषुप्तिस्वप्नजागराः कथं स्युः, न कथंचिदित्यर्थः । अयं भावः । सुषुप्त्यवस्थायां तावत् सुषुप्तितात्कालिकाज्ञानाभावभासकं किंचिच्चैतन्यमङ्गीकार्यं सर्वैरपि, अन्यथा, उत्थितस्य पुरुषस्य सुख-

महमस्वाप्सं न किंचिदवेदिषमिति सुषुप्तितात्कालिकाज्ञानपरामर्शानुपपत्तेस्तच्चैतन्यं न जन्यम्,मनश्चक्षुरादेः सुप्तन्तःपातित्वादनन्तं च, तदजन्यभावस्य नित्यत्वनियमात्, तच्चैतन्यमस्माभिरात्मेत्युच्यते, तथा च कथमनादिनित्यज्ञानस्वरूपस्यात्मनो ज्ञानोपरमरूपा सुषुप्तिः, ज्ञानोत्पत्तिरूपौ स्वप्नजागरौ च स्युः, अहंकारस्य तु जन्यवृत्तिरूपज्ञानाश्रयत्वात् तत्त्रयमुपपद्यते । ततश्चात्मा जयदाद्यवस्थारहित इति ॥ १२ ॥

इदानीमात्मनो निर्विकारब्रह्माभेदाय षड्भावविकाररराहित्यं साधयति । षड्भावविकारेति ॥

॥ षड्विकारवतां वेत्ता निर्विकारोऽहमन्यथा ।
तद्विकारानुसंधानं सर्वथा नावकल्पते ॥ १३ ॥

षड्विकारवतां षड्भावविकारवतां, षट् च ते भावविकाराश्च षड्भावविकाराः, जायते, अस्ति, वर्धते, विपरिणमते, अपक्षीयते, विनश्यति, इत्युक्ताः, ते येषां सन्ति ते षड्भावविकारवन्तस्तेषां बाह्यघटादीनाम्, आन्तरबुद्ध्यादीनां च, वेत्ता ज्ञाताहमात्मा निर्विकारो विकाररहितो भवामि, आत्मा हि बाह्यान्तरवस्तूनामुत्पत्त्यादिविकारान् जानाति, अतो निर्विकारो भवितुमर्हति, यो यज्जानाति न स तद्धर्मवानिति व्याप्तेर्लोकसिद्धत्वादित्यर्थः । तदुक्तं वार्तिककृता,

"नर्ते स्याद्विक्रियां दुःखी साक्षिता का विकारिणः ।
धीविक्रियासहस्राणां साक्ष्यतोऽहमविक्रियः" ॥

इति । विपक्षे दोषमाह, अन्यथेत्यादिना, अन्यथा विकारसाक्षिणोऽपि विकारित्वे तद्विकारानुसंधानं, तेषां विकारिवस्तूनां ये विकारास्तेषामनुसंधानं सर्वथा सर्वप्रकारेणापि नावकल्पते, न संभवतीत्यर्थः । अयमभिसंधिः । आत्मनोऽपि विकारित्वे किमात्मन इतरेषां च विकारा आत्मना ज्ञायन्ते, उतेतरैः, नोभयथापि, विकारिवस्तुनो मृदादिवज्जडत्वनियमादिति ॥ १३ ॥

किंच विकारिवस्तुनो विकाराणां च किं भेद उताभेदः, नाद्यः, भिन्नयोर्गवाश्वयोरिव विकारविकारिभावानुपपत्तेः, इत्यभिप्रेत्य द्वितीयपक्षे दूषणमाह । तेनेति ॥

॥ तेन तेन हि रूपेण जायते लीयते मुहुः ।
विकारि वस्तु तस्यैषामनुसंधातृता कुतः ॥ १४ ॥

तेन तेन रूपेणोत्पत्त्यादिविकाररूपेण तदभिन्नं विकारि वस्त्वपि जायत उत्पद्यते, मुहुः शश्वल्लीयते, नश्यति च, तयोरभेदादित्यर्थः । हि यस्मादेवं तस्मात् तस्य विकारिवस्तुन एषां विकाराणामनुसंधातृता कुतः, अनुसंधानं कुतः, न कुतोऽपि भवेदित्यर्थः । तत्तद्विकाररूपेण तदा तदा नश्यतो विकारिवस्तुनः कथं कालान्तरीयं विकारानुसंधानं घटते, न कथंचिदित्यर्थः ॥ १४ ॥

नन्वात्मा स्वयं विकारी सन्नप्यात्मन इतरेषां च विकारान् विजानातु, न च तस्य विकारित्वाविशेषे कथं स्वेतरपरिज्ञानमिति वाच्यम् । शिलात्वाविशेषेऽपि रत्नस्य स्वभावविशेषेण स्वेतरावभासकत्ववदात्मनोऽपि स्वभावविशेषेण स्वेतरविकारानुसंधानोपपत्तेः । न च तेन तेन विकारेण साकं नष्टस्य कथं सर्वविकारानुसंधानमिति वाच्यम्, तस्य विकारिण आत्मनो विकारैरत्यन्ताभेदस्यानङ्गीकारात्, किंत्वीषद्भेदघटिताभेदस्य तादात्म्यस्यैव तन्तुपटयोरिवाङ्गीकारात्, इत्याशङ्क्य, एवमप्यात्मन आद्यन्तविकारद्वयानुसंधानं न संभवतीत्याह । न चेति ॥

॥ न च स्वजन्म नाशं वा द्रष्टुमर्हति कश्चन ।
तौ हि प्रागुत्तराभावचरमप्रथमक्षणौ ॥ १५ ॥

कश्चन कश्चिन्निपुणोऽपि स्वजन्म स्वोत्पत्तिं नाशं ध्वंसं वा द्रष्टुं ज्ञातुं नार्हति, न शक्नोतीत्यर्थः । तत्र हेतुमाह । तौ हीत्यादिना, हि यस्मात् तौ जन्मनाशौ प्रागुत्तराभावचरमप्रथमक्षणौ, प्रागुत्तरौ यावभावौ प्रागभावप्रध्वंसाभावौ तयोर्यौ चरमप्रथमक्षणौ तौ प्रागुत्तराभावचरमप्रथमक्षणौ, प्रागभावचरमक्षण उत्पत्तिर्वस्तुनः प्रध्वंसाभावप्रथमक्षणो नाश इत्यर्थः[1] । यस्माज्जन्मनाशौ प्रागुत्तराभावचरमप्रथमक्षणौ तस्मात् स्वजन्म नाशं वा द्रष्टुं नार्हतीति संबन्धः । इदमत्राकूतम्, आत्मा हि स्वसमानकालिकवस्त्वेव जानातीति वक्तव्यम्, दीप इव स्वसमानकालिकपदार्थावभासकः, तथा चावस्थानसमयेऽविद्यमानयोः प्रागभावप्रध्वंसाभावयोः परिज्ञानाभावे कथं प्रागभावचरमक्षणरूपं स्वजन्म[2], प्रध्वंसाभावप्रथमक्षणरूपं नाशं च, जानीयात्; न कथंचिदपीत्यर्थः । तयोश्चासिद्धौ मध्यमवर्तिविकाराणामप्यसिद्धिरेव । तेषामपि विकाराणामुत्पत्तिनाशसमानाश्रयत्वनियमात् । तदुक्तं वाक्यवृत्तौ भाष्यकारैः,

"देहेन्द्रियमनःप्राणाहंकृतिभ्यो विलक्षणः ।
प्रोज्झिताशेषषड्भावविकारस्त्वंपदाभिधः" ॥

इति । ततश्चात्मा निर्विकारत्वाद् ब्रह्मैवेत्यर्थः ॥ १५ ॥

ननु पूर्वोक्तं सर्वं वृथा, आत्मन उक्तस्वरूपब्रह्मत्वज्ञाने प्रयोजनाभावात् । न च संसारनिवृत्तिरात्मनो ब्रह्मत्वज्ञाने प्रयोजनमिति वाच्यम्, तन्निवृत्तेरसंभवात् । संसारो ह्यात्मन्यहंकारोपाधिना प्रतीयमानः कर्तृत्वादिभिः[3], स च न ज्ञानेन निवर्तयितुं शक्यः, तस्यात्मनि सोपाधिकभ्रमत्वात्, सोपाधि-

१—अथावीदृशौ तस्मात् इति पा० ।
२ जन्म इति पा० ।
३—त्वादिः इति पा० ।

कभ्रमस्य च यादुपाध्यवस्थानम्, तत्त्वज्ञानेऽप्यवस्थानात्, लोके सोपाधिकभ्रमस्य प्रतिबिम्बचलनादेर्यावदुपाधिचलनं प्रतीतेः, न चोपाधेरहंकारस्य ब्रह्मज्ञानेन निवृत्तौ तत्प्रयुक्तस्यात्मनि प्रतीयमानस्य कर्तृत्वादेरपि निवृत्तिरिति वाच्यम्,तस्य मूलाज्ञाने सति निवृत्तेरसंभवात्, न च मूलाज्ञानस्याप्यात्मनि विद्यमानस्य ब्रह्मज्ञानान्निवृत्तिरिति वाच्यम्,तस्य कल्पकाभावेनाकल्पिततया ज्ञानेन निवर्तयितुमशक्यत्वात्, अन्यथाज्ञानस्यानवस्थानप्रसङ्गात्, इत्याशङ्क्याज्ञानस्य ज्ञाननिवर्त्यत्वसिद्धये कल्पितत्वं वक्तुं तस्यात्मनि वस्तुतोऽसंभवमाह । न प्रकाशेति ॥

॥ न प्रकाशेऽहमित्युक्तिर्यत्प्रकाशैकबन्धना ।
स्वप्रकाशं तमात्मानमप्रकाशः कथं स्पृशेत् ॥ १६ ॥

अहं न प्रकाशेन भामीत्युक्तिर्वचनं यत्प्रकाशैकबन्धना, यस्य प्रकाशो यत्प्रकाशः स्वरूपप्रकाश एक एव निबन्धनं निमित्तं यस्याः सा तथोक्ता, न प्रकाश इति व्यवहारस्य प्रकाशैकनिबन्धनत्वात्, स्वप्रकाशानुभवनिमित्तत्वादित्यर्थः। तं स्वप्रकाशं स्वयमेव भासमानमात्मानमप्रकाशोऽज्ञानं कथं स्पृशेदावृणुयात्, न कथंचिदित्यर्थः ।

अयं भावः। आत्मा सर्वदा स्वयंभासमानः सर्वं भासयति, स कथमज्ञानेन प्रकाशविरोधिना स्पृश्येत, न हि खरतरकिरणशाली दिनकरस्तमसा स्पृश्यमानो दृश्यते, तत् कस्य हेतोः, प्रकाशाप्रकाशयोर्विरोधात्, तथा चाज्ञानस्यात्मनि युक्त्यसहत्वान्न परमार्थतः संभव इति ॥ १६ ॥

ननु कथं तर्हि न प्रकाश इत्यात्मन्यज्ञानानुभव इत्याशङ्क्य सूर्ये पेचकादीनामन्धकारप्रतीतिवद्भीत्या[४]प्युपपद्यत इत्याह । तथापीति ॥

॥ तथाप्याभाति कोऽप्येष विचाराभावजीवनः ।
अवश्यायश्चिदाकाशे विचारार्कोदयावधिः ॥ १७ ॥

यद्यपि वस्तुत आत्मन्यज्ञानं न संभवति, तथाप्येषोऽप्रकाश अवश्यायो नीहारः, अवश्यायवदवश्यायः, आवरकत्वात्, चिदाकाशे चित्प्रकाश आत्मन्याभातीति संबन्धः[५] ।

नन्वज्ञानस्य वस्तुतोऽसत्त्वे कथं प्रत्यक्षप्रतीतिः, न ह्यसतः शशविषाणादेः प्रत्यक्षप्रतीतिरस्ति,तत्राह कोऽपीति, कोऽपि सत्त्वासत्त्वाभ्यामनिर्वचनीयोऽप्रकाशस्यासत्सद्विलक्षणत्वाङ्गीकारान्न प्रत्यक्षप्रतीत्यनुपपत्तिरित्यर्थः ।

नन्वेवमप्यप्रकाशस्यात्मन्यनुभवो नोपपद्यते, विरोधादिति चेत्, न, तथाहि किं जडवस्त्वप्रकाशविरोधि, उत स्वप्रकाशरूप आत्मा,

नाद्यः, जडाप्रकाशयोः परस्परविरोधासंभवात्;

नापि द्वितीयः, तस्य विरोधिनि स्वप्रकाश आत्मन्यवस्थानानुपपत्तेः, न चाहं न प्रकाश इत्यज्ञानसाधकस्य तस्य नाज्ञानविरोधित्वमिति वाच्यम्, आत्मस्वरूपस्य प्रकाशस्याविरोधित्वेऽन्यस्यापि विरोधिनोऽभावात् कदापि निवृत्तिर्न स्यात्, तत्राह विचारार्कोदयावधिरिति, विचारो विचारजन्यं ज्ञानमेवार्कः सूर्यः, तमोनिवर्तकत्वात्, तस्योदय उत्पत्तिः, सावधिः स्थितिर्मर्यादा यस्याप्रकाशस्य सः, विचारार्कोदयावधिरित्यर्थः । केवलात्मनोऽविरोधित्वेऽप्यखण्डाकारवृत्त्यारूढात्मचैतन्यस्य तन्निवर्तकत्वोपपत्तेः, केवलसूर्यकिरणस्यादग्धृत्वेन तृणादिभासकत्वेऽपि सूर्यकान्तसंयुक्तस्य तस्य दग्धृत्वदर्शनादिति भावः । किमिति तर्हि वाक्यजन्याखण्डाकारवृत्तौ सत्यामपि सर्वेषामात्माज्ञानं न निवर्तत इत्याशङ्क्याह । विचाराभावजीवन इति, विचाराभाव एव श्रवणमननरूपयोर्वेदान्तप्रमाणतत्प्रमेयब्रह्मविषययोर्विचारयोरभाव एव, जीवनमवस्थितिहेतुर्यस्याप्रकाशस्य सः, विचाराभावजीवन इत्यर्थः। वाक्यजन्याप्यखण्डाकारवृत्तिरसंभावनादिभिः प्रतिबद्धा सती नाज्ञानं निवर्तयति, यथा मणिमन्त्रादिभिः प्रतिबद्धोऽग्निः संयुक्तमपि तृणादिकं न दहति तद्वत्, तदुक्तं सर्वज्ञात्ममुनिभिः,

"पुरुषापराधमलिना धिषणा
निरवद्यचक्षुरुदयापि यथा ।
न फलाय भृष्टविषया भवति
श्रुतिसंभवापि तु तथात्मनि धीः" ॥

इति । यदा तु सम्यग्विचारेणासंभावनादयो निवर्तन्ते, तदा, अप्रतिबद्धा सत्यज्ञानं निवर्तयति, यथा मण्यादिप्रतिबन्धनिवृत्तावग्निस्तृणादिकं दहति तद्वत्, एतदपि तैरेवोक्तम्,

"पुरुषापराधविगमे तु पुनः
प्रतिबन्धकव्युदसनात् सफला ।
मणिमन्त्रयोरपगमे तु यथा
सति पावकाद्भवति धूमलता" ॥

इति । तथा चाज्ञानस्यानिर्वचनीयस्य कल्पितत्वेन ज्ञानान्निवृत्त्युपपत्तिः । न च तस्य कल्पकाभावोऽज्ञानस्य, लोके दीपवत्, भाट्टपक्षे स्फुरणवत्, गुरुमते संवेदनवत्, गुरुबौद्धव्यतिरिक्तमते भेदवच्च, स्वपरनिर्वाहकत्वाच्चाप्यनवस्था, अज्ञानान्तरस्यानङ्गीकारात्, तथा चाज्ञानस्य ज्ञाननिवृत्तौ मूलोच्छेदेनाहंकारस्य निवृत्तिसंभवादात्मनि प्रतीयमानस्याहंकारोपाधिप्रयुक्तस्य कर्तृत्वादिरूपसंसारस्यापि निवृत्तिर्भवतीति प्रत्यगात्मनो ब्रह्मत्वज्ञानं सफलमिति भावः ॥ १७ ॥

ननु ब्रह्मव्यतिरिक्तस्य सर्वस्याज्ञानकल्पिततया परमार्थतोऽसत्त्वे कर्मकाण्डाप्रामाण्यं स्यात्, स हि स्वर्गकामादेर्यागा-

४—भ्रान्त्या—इति पा० ।
५ योजना इति पा० ।

दिकर्तव्यतां बोधयति, तच्च नियोगस्यापूर्वस्य नियोज्यस्य पुरुषस्य नियोगविषयस्य यागस्य नियोगफलस्य स्वर्गस्य च परमार्थतोऽसत्त्वेऽनुपपन्नं[1] स्यात्, ब्रह्मव्यतिरिक्तस्य सर्वस्य परमार्थतोऽसत्त्व उपनिषदप्रामाण्यं च, स्यात्, तत्रापि हि मोक्षकामस्य "आत्मा वा अरे द्रष्टव्यः" इत्यादिना श्रवणादिकर्तव्यता बोध्यते, तस्याप्यप्रामाण्यमयुक्तम्, कर्मकाण्डोपनिषदेकदेशयोरपि ब्रह्मवाक्येन सह संप्रदायस्य तुल्यत्वात्, इत्याशङ्क्य किं तत्त्वज्ञानोत्तरकाले कर्मकाण्डाद्यप्रामाण्यमापाद्यते, किं वा ततः पूर्वकाले, नाद्यः, तदुत्तरकालं तदप्रामाण्यस्य गार्हस्थ्ये ब्रह्मचारिधर्मावेदकश्रुतेरिव संन्यासाश्रमकालेऽग्निहोत्रादिश्रुतेरिवेष्टत्वादित्यभिप्रेत्य द्वितीयं प्रत्याह । आत्मेति ॥

॥ आत्माज्ञानमहानिद्राजृम्भितेऽस्मिन् जगन्मये ।
दीर्घस्वप्ने स्फुरन्त्येते स्वर्गमोक्षादिविभ्रमाः ॥ १८ ॥

आत्माज्ञानमहानिद्राजृम्भिते, आत्माज्ञानं प्रत्यगात्माश्रयविषयमज्ञानं तदेव महती निद्रा, अनादिकालमारभ्य प्रवृत्तत्वात्, स्वरूपावरणपूर्वकविपरीतहेतुत्वाच्च, ततो जृम्भित उत्पन्ने जगन्मये जगद्रूपेऽस्मिन्ननुभूयमाने दीर्घस्वप्ने तत्त्वज्ञानपर्यन्तमनुवर्तमाने, एते स्वर्गमोक्षादिविभ्रमाः स्वर्गमोक्षावादौ येषां विभ्रमाणां ते तथा, स्वर्गशब्दस्तत्कामनियोज्यनियोगतद्विषययागादेरप्युपलक्षणम्, मोक्षशब्दश्च तत्साधनज्ञानश्रवणादिनियोगादेरप्युपलक्षणम्, आदिशब्दो लौकिकव्यवहारानुकूलपुत्रमित्रादिसंग्रहार्थः, मोक्षस्य बन्धसापेक्षत्वाद्बन्धस्य च मिथ्यात्वाद्बन्धसापेक्षमोक्षस्यापि विभ्रमत्वं द्रष्टव्यम्, स्फुरन्ति, स्फुरन्त्येव, ननु स्फुरन्तीत्यर्थः । अयं[2] भावः । तत्त्वज्ञानात् पूर्वकाले व्यावहारिकसत्यस्य सर्वस्य जगतो नियोज्यनियोगादेः सत्त्वेन प्रबोधात् पूर्वं स्वप्नादाविव सर्वव्यवहारोपपत्तेर्न कर्मकाण्डाद्यप्रामाण्यम्, तस्य व्यावहारिकप्रामाण्यस्य सत्त्वात्, तावता च तस्य चरितार्थत्वेऽतत्पराणामगतिकानां ब्रह्मवाक्यानां परमार्थसत्यविषयाणां नाकस्माद्बाधो युक्तः । तदर्थस्य व्यवहारातीतत्वेन व्यावहारिकप्रामाण्यानुपपत्तौ ब्रह्मवाक्यानां तात्त्विकप्रामाण्यस्याप्यनङ्गीकारे किंचिदपि प्रामाण्यं न स्यात्, प्रकारभेदेनोभयप्रामाण्योपपत्तौ च सर्वात्मना तदप्रामाण्यं न युक्तम् । तदुक्तं सकलवेदार्थज्ञेन ब्रह्मणापि,

"सत्यार्थौ हि द्विधा प्रोक्तौ मया हे स्वर्गवासिनः ।
एकः स्वभावतः साक्षात् परमार्थः सदैव तु ॥
स शिवः सत्यचैतन्यः सुखानन्त्य[3]स्वलक्षणः ।
अपरः कल्पितः साक्षाद्ब्रह्मण्यध्यस्तमायया ॥
व्यावहारिकसत्यार्थे साक्षात् सत्यार्थचिद्घनम् ।
उभयं वक्ति वेदस्तु मार्गा नैवं वदन्ति हि" ॥

अतोऽद्वितीयब्रह्मण एव परमार्थसत्यत्वेऽपि व्यावहारिकसत्यार्थत्वेनार्थवत्त्वान्न कर्मकाण्डाद्यप्रामाण्यमिति ॥ १८ ॥

नन्वेवमपि जीवस्य भोक्तुस्तद्भोग्यजातस्य च ब्रह्ममात्रत्वेऽनुभूयमानभोक्तृभोग्यविभागो न स्यात्, सर्वस्य ब्रह्मण्यध्यस्तत्वाविशेषात्, इत्याशङ्क्य मायावशादेव विभागोऽयमुपपद्यत इत्याह । जडेति ॥

॥ जडाजडविभागोऽयमजडे मयि कल्पितः ।
भित्तिभागे समे चित्रचराचरविभागवत् ॥ १९ ॥

जडाजडविभागो, जडमिदं भोग्यमजडोऽयं भोक्तेति विभागः । अयं प्रतीयमानोऽजडेऽलुप्तचैतन्यस्वभावे मयि प्रत्यगभिन्ने ब्रह्मणि कल्पितः । माययारोपित इत्यर्थः । स्वप्रकाशेऽप्येकस्मिन् ब्रह्मण्युपाधिप्राधान्याद् भोग्यजडकल्पना, उपाधेयप्राधान्यादजडभोक्तृकल्पनाप्युपपद्यते । तदुक्तं वार्तिककारैः,

"तमःप्रधानक्षेत्राणां चित्प्रधानश्चिदात्मनाम् ।
परः कारणतामेति भावनाज्ञानकर्मभिः" ॥

इति । अजडे ब्रह्मणि सदृशविसदृशोभयकल्पने दृष्टान्तमाह, भित्तिरित्यादिना; भित्तिभागे कुड्यप्रदेशे समे निर्विकारे, अचल इत्यर्थः । चराचरविभागवत् चरस्य गजादेरचरस्य[1] पर्वतादेश्च विभागो यथा, तथेत्यर्थः ॥ १९ ॥

नन्वेवमात्मनो ब्रह्मत्वं न संभवति, तस्य संसारसाक्षितारूपविकल्पयुक्तत्वाद्ब्रह्मणश्च "अस्थूलमनणु" "नेति नेति" इत्यादिश्रुत्या निर्विकल्पकतया सिद्धेरित्याशङ्क्याह । चेत्येति ॥

॥ चेत्योपरागरूपा मे साक्षितापि न तात्त्विकी ।
उपलक्षणमेवेयं निस्तरङ्गचिदम्बुधेः ॥ २० ॥

चेत्योपरागरूपा, चेत्यं कर्तृत्वादिप्रपञ्चः, तेनोपरागः संबन्धः, तद्रूपसाक्षितापि साक्षित्वमपि मे मम प्रत्यगात्मनो न तात्त्विकी न परमार्थभूता, चेत्यस्यापरमार्थत्वेन तत्संबन्धिसाक्षितायाः अपि परमार्थस्वरूपत्वायोगात्, किंत्वियं साक्षिता निस्तरङ्गचिदम्बुधेर्निस्तरङ्गः परमार्थतो निरस्तस्तरङ्गः कर्तृत्वादिप्रपञ्चरूपो यस्याः सा, चिदेवाम्बुधिः समुद्रो निस्तरङ्गचिदम्बुधिः, तस्य मे मम प्रत्यगात्मन उपलक्षणमेव, तटस्था सती ज्ञापिकैव, जगत्कारणत्वमिव ब्रह्मणः, तथा चात्मनो वस्तुतो निर्विकल्पत्वान्न ब्रह्मत्वानुपपत्तिरिति भावः ॥ २० ॥

एवमुक्तेन प्रकारेण ब्रह्मणि जगत आत्मनि चाहंकारादेः कल्पितत्वेन वस्तुतोऽभावात् पदद्वयलक्ष्ये ब्रह्मणि न कश्चिदपि विकार इत्याह । अमृतेति ॥

१ बोधनमनुपपन्नं इति पा० ।
२ स्फुरन्त्येते इत्यस्यायं इति पा० ।
३—नन्दः इति पा० ।

१—स्य जंगमादेरचरस्य इति पा० ।

॥ अमृताब्धेर्न मे जीर्णिर्मृषा डिण्डीरजन्मभिः ।
स्फटिकाद्रेर्न मे रागः स्वाप्नसंध्याभ्रविभ्रमैः ॥ २१ ॥

अमृतो मोक्षरूपः स्वयंप्रकाशाद्वयानन्द एवाब्धिः, तस्य, तत्पदलक्ष्यस्येत्यर्थः । मे मम प्रत्यगभिन्नब्रह्मणो मृषाडिण्डीरजन्मभिर्मृषारूपा मिथ्यारूपा वियदादय एव डिण्डीराः फेनास्तेषां यानि जन्मानि तैर्जन्मभिः, जन्मपदं नाशस्याप्युपलक्षणम्, न जीर्णिर्न हानिर्वृद्धिर्वा, जीर्णिपदं वृद्धेरप्युपलक्षणं, मिथ्यावस्तुनोऽधिष्ठानादूषकत्वादित्यर्थः । ब्रह्मणि मायया वियदाद्युत्पत्त्या तदधिष्ठानब्रह्मणो न हानिर्न वृद्धिः, इत्येतद्भारतीर्थैरपि कूटस्थदीपे भणितम्,

"माया मेघो जगन्नीरं वर्षत्वेष यथा तथा ।
चिदाकाशस्य नो हानिर्न वा लाभ इति स्थितिः" ॥

इति । त्वंपदलक्ष्यमपि शुद्धमित्याह, स्फटिकाद्रेरित्यादिना, स्फटिकाद्रेः स्फटिकाद्रिवत् स्वच्छस्य मे मम प्रत्यगात्मनस्त्वंपदलक्ष्यस्य, स्वाप्नसंध्याभ्रविभ्रमैः, स्वाप्नोऽविद्याकल्पितोऽहंकारादिः स एव संध्याभ्रं संध्याकालिकमेघः स्वसंनिहिते स्वच्छे स्वधर्मासञ्जकत्वसाम्यात् तत्कृतैर्विभ्रमैः कर्तृत्वादिभ्रान्तिभिः, मेघविषये विभ्रमा अनवस्थाननिःसंचाराः, तै रागः संबन्धो मेघविषय आरुण्यम्, स्फटिकपर्वतस्यारुण्यवत्, आत्मनश्चिद्रूपस्य परमार्थतः कर्तृत्वभोक्तृत्वरागद्वेषादिसंबन्धो नास्तीत्यर्थः । अहंकारादिधर्मैरात्मनोऽसंबन्धोऽपि श्रीभारतीतीर्थैरेवाभाणि चित्रदीपे,

"अहंकारगतेच्छाद्यैर्देहव्याध्यादिभिस्तथा ।
वृक्षादिजन्मनाशैर्वा चिद्रूपात्मनि किं भवेत्" ॥

इति । अतः पदद्वयलक्ष्यमपि चैतन्यमतिशुद्धमिति भावः ॥ २१ ॥

नन्वेवमपि पदद्वयलक्ष्ये ब्रह्मण्यस्त्येव विकारः, तस्य परमार्थतः सत्त्वाश्रयत्वस्य वक्तव्यत्वात्, अन्यथा शशविषाणवदसत्त्वप्रसङ्गात्, इत्याशङ्क्याह । स्वरूपमिति ॥

॥ स्वरूपमेव मे सत्त्वं न तु धर्मो नभस्त्ववत् ।
मदन्यस्य सतोऽभावान्न हि सा जातिरिष्यते ॥ २२ ॥

मे मम पदद्वयलक्ष्यस्य सत्त्वं स्वरूपमेव, न तु मदाश्रितो धर्मः । यथा सत्त्वस्य सत्त्वान्तराश्रयत्वाभावान्नासत्त्वं, तद्वदित्यर्थः ।

ननु घटे घटत्ववत् सद्रूप आत्मन्यपि धर्मरूपं सत्त्वं किं न स्यादित्याशङ्क्य घटेष्वनेकेषु घटोऽयं घटोऽयमित्यनुगतव्यवहारसिद्धये घटत्वजातिरिव सद्व्यक्तिभेदाभावेनात्मनि सत्त्वरूपा जातिर्नाङ्गीकार्येत्याह, मदन्यस्येत्यादिना, मदन्यस्य पदद्वयलक्ष्यरूपात्मभिन्नस्य सतः सद्व्यक्त्यन्तरस्याभावात् सा सत्त्वरूपा जातिर्नेष्यते, एकव्यक्तौ जात्यनङ्गीकारे दृष्टान्तमाह, नभस्त्ववदिति, घटादिष्वनुगतव्यवहारार्थं घटत्ववज्जातिरङ्गीक्रियते, अत्र तु[1] वियदादेः सर्वस्य मिथ्यात्वेन सदन्तरस्याभावान्नानुगतव्यवहारार्थं घटत्ववज्जातिरूपं सत्त्वमङ्गीक्रियते, किंतु स्वरूपमेव नभस्त्ववत् ।

ननु घटः सन् पटः सन् कुड्यं सदित्यादिप्रतीत्यनुरोधेन घटपटाद्युपाधिभिन्नेषु सत्स्वनुगतव्यवहाराय सत्त्वं जातिरङ्गीक्रियताम्, इति चेत्, न, उपहितेषु सर्वेष्वनुगतब्रह्मरूपसन्मात्रेणैव घटाद्युपाधिभिन्नेष्वाकाशेष्वनुगतमहाकाशेनेवानुगतव्यवहारोपपत्तेः, तस्मान्न सत्त्वं जातिः । अत एव नोपाधिरपि, अनुगतव्यवहारायैव तस्यापि कल्पितत्वात्, सत्त्वस्य सन्मात्रब्रह्मरूपत्वं वसिष्ठेनाप्युक्तम्,

"विशेषं संपरित्यज्य सन्मात्रं यदलेपकम् ।
एकरूपं महारूपं सत्तायास्तत् परं विदुः" ॥

इति । तथा च सत्त्वस्य स्वरूपत्वेन धर्मत्वाभावादत्यन्तं शुद्धमेव पदद्वयलक्ष्यमिति भावः ॥ २२ ॥

नन्वेवमप्यात्मनो ज्ञानाश्रयत्वमङ्गीकर्तव्यम्, अन्यथा घटादिवदनात्मत्वप्रसङ्गात्, ज्ञानाश्रयस्यैवात्मत्वात्, अहं जानामीत्यात्मनो ज्ञानाश्रयत्वप्रतीतेश्च; तथा च न "साक्षी चेता केवलो निर्गुणश्च" इत्यादिश्रुत्या निर्गुणब्रह्मत्वमात्मन इत्यत आह । स्वरूपमेवेति ॥

॥ स्वरूपमेव मे ज्ञानं न गुणः स गुणो यदि ।
अनात्मत्वमसत्त्वं वा ज्ञेयाज्ञेयत्वयोः पतेत् ॥ २३ ॥

मे मम ज्ञानं चैतन्यं स्वरूपमेव न तु मदाश्रितो गुणः, कुत इत्यत आह, स गुणो यदीत्यादिना, स चैतन्यं, विधेयापेक्षया पुंलिङ्गनिर्देशः, चैतन्यं गुण इति वदन् वादी प्रष्टव्यः, किं तेन चैतन्येनात्मा विषयीक्रियते न वा, उभयथापि दूषणमाह, अनात्मत्वमिति, ज्ञेयाज्ञेयत्वयोरात्मनो वेद्यत्वेऽनात्मत्वम्, घटादिवदवेद्यत्वे चासत्त्वं वा शशविषाणवदापतेत्, भवेदित्यर्थः । यद्यात्मनः स्वसमवेतज्ञानाविषयत्वमुच्यते, तदाज्ञायमानत्वेनात्मनोऽसत्त्वं स्यात्, न हि प्रमाणतो ज्ञायमानं शशविषाणमस्तीति केनचित् प्रतिपद्यते, यद्येतद्दोषपरिजिहीर्षया तस्य ज्ञायमानत्वमुच्येत, तदा घटादिवदनात्मत्वमात्मनः स्यात्, ज्ञानविषयस्यानात्मत्वनियमात् ।

नन्वात्माश्रितज्ञानेनात्माश्रयत्वेन भासते, न विषयत्वेन, येन घटादिवदनात्मत्वं स्यादिति चेत्, न, ज्ञानव्यतिरिक्तस्य ज्ञानाधीनप्रकाशस्य ज्ञानविषयत्वनियमेनात्मनोऽपि ज्ञाना-

[1] ननु इति पा० ।

धीनप्रकाशस्य विषयताया आवश्यकत्वेनानात्मत्वदोषतादवस्थ्यात्;

न च ज्ञानाश्रयत्वमात्मत्वे प्रयोजकम्, लाघवात्, ज्ञानत्वस्यैव तत्प्रयोजकत्वात्, अहं जानामीति प्रतीतेश्चाहंकाराश्रयवृत्तिविषयत्वात्;

न च ज्ञानं नष्टं ज्ञानमुत्पन्नमिति प्रतीत्या तस्य जन्मादिमत आत्मत्वमनुपपन्नमिति वाच्यम्, तस्यापि वृत्तिविषयत्वात्;

तस्मादात्मनो न ज्ञानं गुणः, किंतु स्वरूपमेव; बादरायणोऽपि "ज्ञोऽत एव" इत्यात्मनो ज्ञानरूपत्वं सूत्रयांबभूव, सूत्रस्यार्थो विद्यारण्यगुरुभिरधिकरणरत्नमालायां दर्शितः,

"अचिद्रूपोऽथ चिद्रूपो जीवोऽचिद्रूप इष्यते ।
चिदभावात् सुषुप्त्यादौ जाग्रच्चिन्मनसा कृता" ॥

इति पूर्वपक्षे प्राप्त सिद्धान्तमाह,

"ब्रह्मत्वादेव चिद्रूपश्चित् सुषुप्तौ न लुप्यते ।
द्वैता दृष्टिर्द्वैतलोपान्न हि द्रष्टुरिति श्रुतेः" ॥

इति ।

ननु ज्ञानरूप आत्मा स्वात्मानं जानाति न वा, जानाति चेद्युगपत् कर्मकर्तृत्वप्रसङ्गः । नचेज्जानाति, तस्यासत्त्वप्रसङ्गः, इति चेन्न, तस्य स्वप्रकाशत्वेन ज्ञानान्तरमनपेक्ष्यैव भासमानत्वात्, नापि तस्य कर्मकर्तृत्वम्, स्वविषयत्वानङ्गीकारात्, तदुक्तं विद्यारण्यगुरुभिः पञ्चकोशविवेके,

"स्वयमेवानुभूतित्वाद्विद्यते नानुभाव्यते ।
ज्ञातृज्ञानान्तराभावादज्ञेयो न त्वसत्तया" ॥

इति । यत् प्रसादाद्धि सर्वं जगद्भासते स कथं नास्ति, न प्रकाशते वा, आत्मनः सर्वावभासकत्वं स्वस्यान्यानपेक्षया भासमानत्वं चात्मयोगविंशे[1]ऽप्युक्तम्,

"अज्ञानतत्कार्यतदीयभेदा-
नध्यक्षयन्ती निजसत्तयैव ।
स्मर्तुं च विस्मर्तुमहो न शक्या
सुप्त्यादिषु स्वप्रभयास्मि सा चित्" ॥

इति । तस्मादात्मा ज्ञानरूपो न ज्ञानगुणक इति स निर्गुणं ब्रह्म भवेदिति भावः ॥ २३ ॥

एवमात्मन आनन्दोऽपि न गुणः किंतु स्वरूपमेवेति साधयति । अहमिति ॥

॥ अहमेव सुखं नान्यदन्यच्चेन्नैव तत् सुखम् ।
अमदर्थं न हि प्रेयो मदर्थं न स्वतः प्रियम् ॥ २४ ॥

अहमात्मा सुखमेव सुखस्वरूप एव न तु सुखगुणकः, यदि सुखमात्मनोऽन्यद्गुणः स्यात्, तत् सुखत्वेनाभिमतं नैव सुखं स्यात्, कुत इति चेत्, किं तदनात्मभूतसुखमनात्मशेषः, उत तच्छेषो वा,

नाद्य इत्याह, अमदर्थमिति, अमदर्थं, चेदित्यनुषङ्गः, आत्मशेषो न चेत् तर्हि न तत् प्रियः, प्रीतिविषयो न भवेत्, आत्मशेषसर्पादौ प्रीतिविषयत्वादर्शनात्;

न द्वितीय इत्याह, मदर्थमिति, अत्रापि चेदित्यनुषज्यते, मदर्थमात्मशेषश्चेत् स्वतः प्रियं न स्यात्, आत्मशेषस्य पुत्रभार्यादेः स्वतः प्रीतिविषयत्वादर्शनादित्यर्थः; सुखं हि सर्वेषां प्रियं भवति, तच्च स्वत एव प्रियं, न परोपाधिना, अत आत्मैव भवितुमर्हति;

कथमिति चेत्, शृणु, जगति सर्वेषां पदार्थानां चतुर्धावस्थितिः, आत्मा प्रियोऽप्रिय उपेक्ष्यश्चेति, सुखं तावन्न व्याघ्रादिवदप्रियम्, तस्य सर्वैः प्रार्थ्यमानत्वात्, अत एव न लोष्टादिवदुपेक्ष्यम्, नापि प्रियमात्रम्, तच्छेषे पुत्रभार्यादावपि तद्दर्शनात्, अतः परिशेषादात्मैव;

नन्वात्मशेषत्वेन तस्य प्रीतिविषयत्वं किं न स्यात्, इति चेत्, तर्हि वक्तव्यम्, आत्मनि प्रीतिः किंनिमित्तेति, येन सुखमपि तच्छेषतया प्रियं जायते, सुखसाधनत्वादिति चेत्, तर्हि सुखसाधनेनात्मनोपकार्यः कश्चिद्वक्तव्यः, स्रक्चन्दनादिसुखसाधनेनान्यस्यैवोपकार्यत्वदर्शनात्, आत्मनि च कर्मकर्तृविरोधात्, स चोपकार्योऽन्यो न दृश्यते, तस्माच्च सुखसाधनतयात्मा प्रियः, किंतु सुखस्वरूपतया, तस्माच्चात्मशेषतया सुखस्यापि प्रियत्वं, किंत्वात्मतयैव[1]

ननु सुखमुत्पन्नं नष्टमिति प्रतीयमानस्य कथमात्मत्वमिति चेन्न, तस्य तद्व्यञ्जकवृत्तिविषयत्वात्, सर्वमेतदुक्तं ब्रह्मानन्दे,

"आत्मा शेष उपेक्ष्यं च द्वेष्यं चेति चतुर्ष्वपि ।
आत्मा प्रेयान् प्रियः शेषो द्वेष्योपेक्ष्ये तदन्ययोः ॥
इति व्यवस्थितो लोको याज्ञवल्क्यमतं च तत् ।
सुखसाधनतोपाधेरन्नपानादयः प्रियाः ॥
आत्मानुकूल्यादन्नादिसमश्चेदमुनात्र कः ।
अनुकूलयितव्यः स्यान्नैकस्मिन् कर्मकर्तृता" ॥

इत्यादि । आत्मनः सुखरूपत्वं सर्वज्ञात्ममुनिभिरप्युक्तम्,

"सर्वं यदर्थमिह वस्तु यदस्ति किंचित्
पारार्थ्यमुज्झति च यन्निजसत्तयैव ।
तद्वर्णयन्ति हि सुखं सुखलक्षणज्ञा-
स्तत् प्रत्यगात्मनि समं सुखितास्य तस्मात्" ॥

[1]—योगे चिदंशे—इति पा० ।

[1] किंतु सुखतयैव इति पा० ।

इति, ब्रह्मगीतासु च,

"प्रत्ययूपः शिवः साक्षात् परमानन्दलक्षणः ।
परप्रेमास्पदत्वेन प्रतीतत्वात् सुरर्षभाः" ॥
सर्वस्यैव तु कामाय न सर्वं भवति प्रियम् ।
किंत्वात्मनस्तु कामाय ततः प्रियतमः स्वयम् ॥
अतो देवाः प्रियतमो ह्यात्मा न सुखलक्षणः ।

इत्यादि । तस्माच्छ्रुत्या, विद्वदनुभूत्या, ब्रह्मविदां वचनैश्च, आत्मा सुखरूप इत्यत्र न कश्चिद्विवाद इति भावः ॥ २४ ॥

नन्वेवमपि ब्रह्मणः "एकधैवानुद्रष्टव्यम्" इति श्रुत्युक्तमखण्डैकरसत्वं न संभवति, उक्तप्रकारेण तस्य सच्चिदानन्दरूपत्रयात्मकत्वात्,न च सच्चिदानन्दानां तेषां त्रयाणामत्यन्ताभेद इति वाच्यम्, तथात्वे तद्वाचकानां सच्चिदानन्दशब्दानां त्रयाणामपि पर्यायतया सह प्रयोगानुपपत्तेः, न हि घटकुम्भकलशादिशब्दानामेकार्थवाचकानां सह प्रयोगोऽस्तीत्याशङ्क्य ब्रह्मणोऽखण्डैकरसत्वमुपपादयति । नहीत्यादिना ॥

॥ न हि नानास्वरूपं स्यादेकं वस्तु कदाचन ।
तस्मादखण्ड एवास्मि विजहज्जागतीं भिदाम् ॥ २५ ॥

एकमद्वितीयं सच्चिदानन्दात्मकं वस्तु ब्रह्म कदाचन कदाचिदप्युपाधिकाले तदभावकालेऽपि नानास्वरूपं नानारसं न स्यात्, न भवेदित्यर्थः । तत्र हेत्वभिप्रायेण वस्त्विति विशेषणम्, यतो वस्तु परमार्थभूतं, तत इत्यर्थः । वस्तुग्रहणं ज्ञानानन्दयोरप्युपलक्षणम् । अयमर्थः । ब्रह्मणि सत्यज्ञानानन्दानां परस्परभिन्नत्वे सत्यस्य सत्यत्वं ज्ञानस्य ज्ञानत्वमानन्दस्यानन्दत्वं च न सिध्येत्, कथमिति चेत्, सत्यं यदि ज्ञानाद्भिन्नं स्यात्, जडस्य तस्य शुक्तिकारूप्यादेरिव सत्यत्वं न स्यात्, एवं यदि ज्ञानमपि सत्याद्भिन्नं स्यात्,असत्यस्य तस्य ज्ञानस्य जडत्वनियमेन ज्ञानत्वं न स्यात्, ततः सत्यज्ञानयोः सत्यत्वज्ञानत्वसिद्ध्येऽत्यन्तं परस्पराभेदोऽङ्गीकर्तव्यः, तदुक्तं सर्वज्ञात्ममुनिभिः,

"सत्येऽप्यस्ति ज्ञानता ज्ञानतायां
सत्यत्वं च स्पष्टमस्त्येव तद्वत् ।
सत्यप्येवं नातिरेकावकाशः
पूर्णे तत्त्वे ज्ञानसत्योपपत्तेः" ॥

इति । एवं यदि ज्ञानादानन्दोऽपि भिन्नः स्यात्, ज्ञानभिन्नस्य तस्य घटादिवदनानन्दत्वमेव स्यात्, तथानन्दादपि यदि ज्ञानं भिन्नं स्यात्, आनन्दभिन्नस्य तस्य घटादिवज्जडत्वेन ज्ञानत्वमेव न स्यात्, ततो ज्ञानानन्दयोरपि ज्ञानत्वानन्दत्वसिद्ध्येऽत्यन्तमभेदोऽङ्गीकर्तव्यः; इदमपि तैरेवोक्तम्,

"आनन्दत्वे ज्ञानता ज्ञानताया-
मानन्दत्वं विद्यते निर्विशङ्कम् ।
सत्यप्येवं नातिरेकावकाशः
पूर्णे तत्त्वे ज्ञानसौख्योपपत्तेः" ॥

इति । एवं सत्यादानन्दोऽपि यदि भिन्नः स्यात्, असत्यस्य तस्य शुक्तिरूप्यादेरिवानन्दत्वं न स्यात्,एवं सत्यमपि यद्यानन्दाद्भिन्नं स्यात्, अनानन्दस्य तस्य शुक्तिरूप्यादेरिव सत्यत्वं न स्यात्,ततः सत्यानन्दयोरप्यत्यन्तमभेदो वक्तव्यः; इदमपि तैरेवोक्तम्,

"आनन्दत्वे सत्यता सत्यताया-
मानन्दत्वं निर्विवादं प्रसिद्धम् ।
सत्यप्येवं नातिरेकावकाशः
पूर्णे तत्त्वे सत्यसौख्योपपत्तेः" ॥

इति । नित्यमुक्तशुद्धत्वादिष्वप्येवमेवोह्यम्[1];

न च तेषामत्यन्ताभेदे तद्वाचकसत्यादिपदानां[2] पर्यायता वाच्या, अर्थानां भेदस्याङ्गीकारात्, सत्यपदं मुख्यामुख्यसत्यरूपब्रह्माकाशशबलरूपे सत्ये व्युत्पन्नम्, ज्ञानपदं च चैतन्यान्तःकरणवृत्तिरूपमुख्यामुख्यज्ञानद्वयशबलरूपे ज्ञाने व्युत्पन्नम्, आनन्दपदं च प्रत्यग्बुद्धिवृत्तिरूपमुख्यामुख्यानन्दे व्युत्पन्नम्, एवं नित्यशुद्धादीन्यपि पदानि मुख्यामुख्यतत्तद्द्वयशबलरूपे तस्मिंस्तस्मिन् व्युत्पन्नानीति द्रष्टव्यम् । एतत् सर्वं सर्वज्ञात्ममुनिभिरेवोक्तम्,

"आकाशादौ सत्यता तावदेका
प्रत्यग्भावे सत्यता काचिदन्या ।
तत्संपर्कात् सत्यता तत्र चान्या
व्युत्पन्नोऽयं सत्यशब्दस्तु तत्र ॥
बुद्धेर्वृत्तौ ज्ञानता तावदेका
प्रत्यग्बोधे ज्ञानता काचिदन्या ।
तत्संपर्काज्ज्ञानता तत्र चान्या
व्युत्पन्नोऽयं ज्ञानशब्दस्तु तत्र ॥
बुद्धेर्वृत्तौ तावदानन्दतैका
प्रत्यग्भावे काचिदानन्दतान्या ।
तत्संपर्कात् काचिदानन्दतान्या
व्युत्पन्नोऽयं तत्र चानन्दशब्दः" ॥

इत्यादिना । ततो वाच्यार्थभेदस्याङ्गीकाराच्च पदानां पर्यायतापीति भावः ।

१—मेव बोध्यम् इति पा० ।
२ सच्चिदानन्दादि—इति पा० ।

ननु कथं तर्हि वाच्यार्थभेदे सत्यादीनामत्यन्ताभेद उक्त इत्याशङ्क्य वाच्यार्थभेदेऽपि तल्लक्ष्यार्थानामभेदादित्याह, तस्मादित्यादिना; यस्मात् सत्यादीनां परस्पराभेदेन सत्यादिरूपत्वं, यस्माच्च न पर्यायता, तस्माज्जागर्तीं भिदां जगदाकाशाद्युपाधिः, तत्प्रयुक्तां भिदां भेदं विजहति, अतोऽहमखण्ड एवास्मि, एकरस एवास्मि, न तु नानारसः; सत्यादिपदैर्भागलक्षणया बोधितसत्याद्यात्मकाखण्डैकरसोऽस्मीत्यर्थः। अत "एकधैवानुद्रष्टव्यम्" इति श्रुत्युक्तमेकरसत्वमुपपन्नमिति भावः ॥ २५ ॥

इदानीमुक्तप्रकारेण जीवस्य ब्रह्मत्वोपपादकैस्तर्कैरनुगृहीतं सत् तत्त्वमस्यादिवाक्यं जीवब्रह्मणोरत्यन्ताभेदं भागत्यागलक्षणया बोधयति, इत्याह । परोक्षतेति ॥

॥ परोक्षतापरिच्छेदशाबल्यापोहनिर्मलम् ।
तदसीति गिरा लक्ष्यमहमेकरसं महः ॥ २६ ॥

परोक्षतापरिच्छेदश्च तत्प्रयोजकं शाबल्यं च तानि तथोक्तानि, तेषामपोहेन निर्मलं परोक्षतापरिच्छेदशाबल्यापोहनिर्मलम्[1], परोक्षता परोक्षत्वमीश्वरस्य, परिच्छेदः परिच्छिन्नत्वं जीवस्य,एतद्द्वयं च जीवेश्वरोभयगतविरुद्धधर्माणां सर्वेषामप्युपलक्षणम्, शाबल्यं जीवेश्वरोभयगतपरोक्षत्वपरिच्छिन्नत्वादिप्रयोजकमायान्तःकरणरूपोपाधिनिमित्तसमस्तै[2]संबन्धः, तेषामपोहेन त्यागेन निर्मलं शुद्धम्, ऐक्याविरोधीत्यर्थः। तदसीति गिरा तत्त्वमस्यादिमहावाक्येन लक्ष्यं जहदजहल्लक्षणया बोध्यं, लक्ष्यस्वरूपमेवाह, एकरसमिति, महः सत्यानन्दचैतन्यरूपमहं प्रत्यगात्मास्मीत्यर्थः । अत्राप्यनुग्राहकयुक्तिः पूर्ववद्द्रष्टव्या, यद्यात्मा ब्रह्मभिन्नः स्यादात्मनः सर्वान्तरत्वलक्षणमात्मत्वं न स्यात्, एवं ब्रह्मापि यद्यात्मभिन्नं स्यान्निरतिशयमहत्त्वलक्षणं ब्रह्मत्वं ब्रह्मणो न स्यात्; इदमपि तैरेवोक्तम्,

"अद्वैतेऽर्थे प्रत्यगर्थोऽस्ति तद्वत्
प्रत्यक्तत्त्वे चाद्वयस्यापि भावः ।
यद्यप्येवं नातिरेकावकाशः
पूर्णे तत्त्वे तत्त्वमर्थोपपत्तेः" ॥

इति। वाच्यार्थभेदादेवोभयोस्तत्त्वंपदयोरपर्यायतापि, इदमपि तैरेवोक्तम्,

"आदेयांशेनाणुमात्रोऽपि भेदो
यद्यप्येवं भिन्नमादाय शब्दौ ।
वर्तेते त्वय्यद्वयात्मप्रकाशे
बाह्यं हातुं जामिता[3] नास्ति तस्मात्" ॥

१–हेन निर्मलं तथोक्तम्, इति पा० ।
२–धिद्वय–इति पा० ।
३–द्यादेवं हेतुता इति पा० ।

इति । वाक्यार्थश्च सकलवेदार्थाभिन्नेन ब्रह्मणा ब्रह्मगीतायां स्फुटो दर्शितः,

"त्वमहंशब्दवाच्यार्थस्यैव देहादिवस्तुनः ।
न तच्छब्दार्थतां वक्ति श्रुतिस्तत्त्वमसीति सा[1] ॥
तदर्थैक्यविरुद्धांशं त्यक्त्वा वाच्यगतं श्रुतिः ।
अविरुद्धं चिदाकारं लक्षयित्वा ब्रवीति हि ॥
तदर्थे च त्वमर्थैक्यं विरुद्धांशं विनैव च ।
कारणत्वादि वाच्यस्थं लक्षयित्वा तु केवलम् ॥
चिदाकारं पुनस्तस्य त्वमर्थैक्यं ब्रवीति च ।
तत्त्वंशब्दार्थभूतस्य चिन्मात्रस्य परात्मनः ॥
एकत्वं यत् स्वतः सिद्धं स हि वाक्यार्थ आस्तिकाः"।

इति। तस्माच्छ्रुत्या युक्त्या बहुज्ञानां वचनाच्च[2] जीवस्य सच्चिदानन्दनित्यशुद्धबुद्धमुक्तस्वरूपता सिद्धेति भावः ॥ २६ ॥

इदानीमुक्तस्वरूपं ब्रह्मात्मत्वेन साक्षात्कुर्वतः पुरुषस्य स्वप्रकाशापरिमितानन्दब्रह्मात्मतावस्थानलक्षणा विदेहमुक्तिः प्रारब्धकर्मक्षयपर्यन्तं देहेन्द्रियादिप्रतिभाससहिता तादृग्ब्रह्मात्मनावस्थानलक्षणा जीवन्मुक्तिश्च फलमित्यभिप्रेत्य प्रकरणमुपसंहरति । उपशान्तेति ॥

॥ उपशान्तजगज्जीवशिष्याचार्येश्वरभ्रमम् ।
स्वतः सिद्धमनाद्यन्तं परिपूर्णमहं महः ॥ २७ ॥

उपशान्तो जीवन्मुक्त्यवस्थायां बाधितो विदेहमुक्त्यवस्थायां सर्वात्मना निवृत्तो जगज्जीवशिष्याचार्येश्वरलक्षणो भ्रमो यस्मिंस्तत्, तादृशम्, मुक्तिद्वयस्य ज्ञानफलत्वं सर्वज्ञात्ममुनिभिरप्युक्तम्,

"जीवन्मुक्तिस्तावदस्ति प्रतीते-
र्द्वैतच्छाया तत्र चास्ति प्रतीतेः ।
द्वैतच्छायारक्षणायास्ति लेश-
स्तस्मिन्नर्थे स्वानुभूतिः प्रमाणम् ॥
तस्माज्जीवन्मुक्तिरूपेण विद्वा-
नारब्धानां कर्मणां भोगसिद्धै ।
स्थित्वा भोगं ध्वान्तगन्धं प्रसूतं
भुक्त्वात्यन्तं याति कैवल्यमन्ते" ॥

इति । स्वतः सिद्धं स्वप्रकाशम्, अनाद्यन्तम्, आद्यन्तरहितम्, परिपूर्णं सर्वात्मकम्, त्रिविधपरिच्छेदशून्यमित्यर्थः; महस्तेजोऽहमस्मीत्यर्थः ॥ २७ ॥

१ या इति पा० ।
२–त्या बहुवचनाच्च इति पा० ।

इदानीमुपनिषदर्थसारसंग्रहात्मके स्वरचिते प्रकरणे विदुषां प्रवृत्तिं प्रार्थयते ॥

॥ लक्ष्मीधर[1]कवेः सूक्तिशरदम्भोजसंभृतः ।
अद्वैतमकरन्दोऽयं विद्वद्भृङ्गैर्निपीयताम् ॥ २८ ॥

लक्ष्मीधर इति ग्रन्थकर्तुर्नाम, स चासौ कविः सर्वज्ञः क्रान्तदर्शी, तस्य सूक्तय एव शरदम्भोजानि, तानि, तैः[2] संभृतः संपन्नोऽयं सर्वैरनुभूयमानोऽद्वैतमकरन्दोऽद्वैतं ब्रह्मैव मकरन्दो रसः,

"एतमेव रसं साक्षाल्लब्ध्वा देही सनातनम् ।
सुखी भवति सर्वत्र नान्यथा कुरुपुंगवाः" ॥

इति ब्रह्मगीतावचनात्, विद्वद्भृङ्गैर्विद्वांस एव भृङ्गा ब्रह्मरसज्ञास्तैर्निपीयतां नितरामज्ञानै[3]र्निवृत्तिपर्यन्तं पुनः पुनः सेव्यताम्;

"विचार्याप्यपरोक्षेण ब्रह्मात्मानं न वेत्ति चेत् ।
अपरोक्षावसानत्वाद्भूयो भूयो विचारयेत्" ॥

इति श्रीभारतीतीर्थवचनात्;

यद्यप्यत्र प्रतिश्लोकं बहु वक्तव्यमस्ति, तथापि मन्दबुधीनामलसानां व्युत्पादनार्थं प्रवृत्तेन मया ग्रन्थकाठिन्यगौरवभयादुपरतमिति ॥ २८ ॥

अद्वैतमकरन्दस्य रसाभिव्यञ्जिका कृता ।
स्वयंप्रकाशयतिना पुरुषोत्तमशासनात् ॥ १ ॥

ब्रह्मानन्दरसास्वादमिच्छद्भिर्विबुधोत्तमैः ।
रसाभिव्यञ्जिका ह्येषा परिशील्या सदादरात्[4] ॥ २ ॥

तापत्रयार्कसंतप्ता मोक्षकामा मुदा सह ।
रसाभिव्यञ्जिकागङ्गामग्ना भवत सत्तमाः * ॥ ३ ॥

व्याख्या प्रणीतच्छलमत्र बुद्धे-
र्ममापराधं विबुधाः क्षमन्ताम् ।
अम्बार्धदेहो भगवानतःस्या-
द्बालापराधात् पितृवत् प्रसन्नः ॥ ४ ॥

श्रीकैवल्यानन्दयोगीन्द्रपाद-
पद्मद्वन्द्वे निःस्रवन्मोक्षसारे ।
शुद्धैर्हंसैः सेविते सुप्रसन्ने
मच्चेतोऽर्थी भृङ्गलीलां विधत्ताम् ॥ ५ ॥

चिदम्भोधिसंमग्नचित्तं गुणानां
सतामालयं शुद्धसत्त्वप्रधानम् ।
नृणां बोधयन्तं परब्रह्म तत्त्वं
शिवानन्दयोगीन्द्रमीडे सदाहम् ॥ ६ ॥

सर्वज्ञचूडामणिमीश्वराणा-
मीशानमिन्दीवरकोमलाङ्गम् ।
कारुण्यलावण्यसुधासमुद्रं
श्रीजानकीजानिमहं भजामि ॥ ७ ॥

मन्दस्मितानन्दितभक्तजालं
सौन्दर्यसंतर्पितवामभागम् ।
स्वानन्दसंतृप्तममन्दहासं
साम्बं भजे चन्द्रकलावतंसम् ॥ ८ ॥

इति श्रीमत्[1]परमहंसपरिव्राजकाचार्यश्रीकैवल्यानन्दयोगीन्द्रपादकमलभृङ्गायमाणस्वयंप्रकाशाख्ययतिविरचिता रसाभिव्यञ्जिकाख्याद्वैतमकरन्दव्याख्या समाप्ता ॥ :: :: ॥

१—मिति ॥ २८ ॥ ब्रह्मानन्दरसास्वादमिच्छद्भिर्विबुधोत्तमैः । रसाभिव्यञ्जिका ह्येषा परिशील्या सदादरात् ॥ इति श्री—इति पा० ।

॥ अथाद्वैतमकरन्दस्योपसंहारः ॥

तन्महः किमपि नौमि मुनीनां
मानसे स्फुरति यद् बहुयत्नैः ।
नन्दगोपगृहिणीसुतभावा-
द्धूलिधूसरितभं घननीलम् ॥ १ ॥

अथेदमद्वैतमकरन्दाख्यं प्रकरणं सव्याख्यं प्रायः किंचिदधिकपञ्चशतीमितश्लोकसंख्याकं भवति । मूलं त्वष्टाविंशतिसंख्याकानुष्टुप्श्लोकपरिमितमेव, लक्ष्मीधरकवीन्द्रकृतम्, वंशीधर इति तत्रैव नामान्तरम्, तथा पाठस्य क्वचिदुपलभ्यमानत्वात्, जनकाचार्यकृतकल्पनाभेदेन लालनप्रतिष्ठार्थत्वभेदेनाश्रमभेदेन नामसंकरभयप्रयुक्तकल्पनया चैकस्यापि नामद्वयसंभवाच्च ।

इदं च प्रकरणं स्वल्पमपि महाप्रामाणिकम्, परिमलादिबहुवेदान्तसंदर्भव्याख्याविधातृस्वयंप्रकाशाख्ययतिनास्य व्याख्याकरणात्, स्वल्पत्वेऽपि परिनिष्ठितमतिकलेवरतया तत्कारिकार्थस्य बह्वर्थबोधकत्वाच्च ।

एष स्वयंप्रकाशाख्ययतिरुपदेष्टृत्वविद्यादातृत्वादिभेदेन कैवल्यानन्दशुद्धानन्दसच्चिदानन्दशिवानन्दविद्यारण्ययती-

१ वंशीधर इति क्वाचित्कः पाठः ।
२ तेषु इति पा० ।
३—रामात्माज्ञान—इति पा० ।
४—दा बुधैः इति पा० ।
* इदं श्लोकत्रयं सच्चिदानन्दानाम् ।

न्द्रान् गुरून् मन्यते, तथा स्वकृतव्याख्यायामस्यामभिहितत्वात्; पुरुषोत्तमनामधेयाज्ञापरवशोऽकृतेमां च व्याख्यामिति ।

अथामुमेव प्रोक्तचरनामधेयं लक्ष्मीधरं काशिकराजकीयपाठालयस्थवेदान्तशास्त्राध्यापकस्वर्वासिमहानुभावश्रीमदुमारावशर्मपण्डितः सिद्धान्तकौमुदीमनोरमाशब्दकौस्तुभादिप्रसिद्धव्याकरणग्रन्थनिर्मातुः कालनिर्णयादिधर्मशास्त्रग्रन्थकर्तुः प्रायश्चतुर्विंशतिस्मृतिव्याख्यातुर्भट्टोजिदीक्षितस्य पितरं वक्ति स्म ।

श्रुतं च मया काव्यसाहित्याध्यापकपण्डितशीतलप्रसादशर्मणान्यैश्च विद्वद्भिस्तन्महानुभावसविधे वेदान्तशास्त्राध्ययनसमये तन्मुखारविन्दादेवैतत्,

तथाप्यत्र कस्यापि प्रमाणस्यानुपलभ्यमानत्वादननुमतत्वम्, तदुक्तं "विद्यारण्यगुरुभि"रिति वाक्यस्य स्वयंप्रकाशकृतव्याख्यायामस्यां दर्शनात् स्वयंप्रकाशस्य पञ्चदशीकारविद्यारण्यसमयवर्त्तिताया मूलकारस्य लक्ष्मीधरस्य विद्यारण्यपूर्ववर्त्तितायास्तत्समकालिकताया वावसायाद् भट्टोजिदीक्षितवर्तमानकालाद् बुक्कभूपालकालिकविद्यारण्यसमयस्य दूरान्तरत्वेन लक्ष्मीधरसमयस्य महद्दूरमन्तरं संभावनीयमिति लक्ष्मीधरभट्टोजिदीक्षितयोरसमानकालिकत्वेन जन्यजनकभावानुपपत्तेः, भट्टोजिवंश्यानां भट्टदीक्षितोपनाम्नोरन्यतरस्योपाधेर्नामान्ते कोण्डभट्ट इति भट्टोजिदीक्षित इति यथा, तथा लक्ष्मीधरनामान्ते प्रतिपादितचरोपाध्योरन्यतरस्यानुपलभ्यमानत्वाच्च ।

भट्टोजिदीक्षितेन यद्यपि स्वग्रन्थे लक्ष्मीधरसूनोरिति स्वकण्ठरवत एवाभाणि, तथापि स एवायं लक्ष्मीधर इति दाक्षिणात्यैर्नाङ्गीक्रियते, बहुभिरन्यैर्विद्वद्भिरुरीक्रियते च ।

तर्हि विद्यारण्यस्य गुरुत्वप्रतिपादनं स्वयंप्रकाशेन निरूप्यमाणं कथमुपपद्यत इति चेत्, आदरार्थं तत् स्यान्न तात्कालिकताबोधनार्थं, परमगुरुत्वेन वेति कैश्चिदुच्यत इति ।

अथामुष्य वादद्वयस्य साम्प्रतं विद्यमानत्वेऽपि सनिर्णयोऽहं त्वतो विचाराद्विरमामि ।

ग्रन्थश्चायं परमेश्वरप्रसादाद् वेदान्तविद्यावतां मुदमातनुतादित्यलं बहुलेखनेनेति शिवम् ॥

साङ्ख्यशास्त्रप्रधानाध्यापकः ॥
पं· बेचनरामशर्मा कान्यकुब्जः ॥

THE VIDVAN-MANO-RANJINI

OR

REJOICER OF THE MIND OF THE LEARNED,

A COMMENTARY ON SAD-ÁNANDA'S VEDÁNTA-SÁRA, BY RÁMA-TÍRTHA.

(Continued from page 272.)

That the soul is essentially the supreme spirit appears from the texts declaratory of entrance, viz. Having created that, he entered that only; He having severed this boundary came in by this door; This self-same being entered here as far as the extremities of the nails; With this individuated spirit having entered, pondering all forms, and making all names, when he was addressing it; One God who in sundry manners, has entered in. For as yonder sun, whose essence is light, being indivisible, by pervading many places by accidental determinations becomes a special deity, such is this spirit in many bodies. Also from such texts as: Next made he bipeds, thereafter made he quadrupeds, and next becoming winged, he next entered in as spirit; He became the counterpart of every form; Like a single fire pervading a mansion, he became the counterpart of each several form. Also from such scriptural passages [Smṛiti] as: Know me to be him that knoweth bodies; I am spirit, Guḍâkeśa, residing in all repositories of being; A portion of me is become individuated spirit in the world of individuated souls, eternal.

The limitary extent of this spirit is caused by its accidental determinations in this transmigratory state alone; and this limitary extent is indefinite being conformable to various concomitants. So also the sacred text declares: Of the size merely of a thumb, equal in size to the sun, no longer than the point of a shoemaker's awl, when seen in this lowest state; and The por-

---

ब्रह्मस्वभावत्वञ्चास्य प्रवेशश्रुतिभ्यः तत्सृष्ट्वा तदेवानुप्राविशत् । स एतमेव सीमानं विदार्य्यैतद्द्वारा प्रापद्यत । स एष इह प्रविष्ट आनखाग्रेभ्यः । अनेन जीवेनात्मनाऽनुप्रविश्य सर्व्वाणि रूपाणि विचिन्त्य धीरोनामानि कृत्याभिवदन् यदास्ते । एकोदेवो बहुधा सन्निविष्टः । यथा ह्ययं ज्योतिरात्मा विवस्वान् योऽभिन्नो बहुधकोनुगच्छन् उपाधिना क्रियते भेदरूपोदेवः क्षेत्रेष्वेवमजोयमात्मा । पुरश्चक्रे द्विपदः पुरश्चक्रे चतुष्पदः । पुनः सपक्षीभूत्वा पुनः पुरुषआविशत् रूपं रूपं प्रतिरूपो बभूव । अग्निर्यथैकोभुवनं प्रविष्टोरूपं रूपं प्रतिरूपो बभूवेत्येवमादिभ्यः श्रुतिभ्यः क्षेत्रज्ञञ्चापि मां विद्धि । अहमात्मा गुडाकेश सर्व्वभूताशयस्थितः । ममैवांशो जीवलोके जीवभूतः सनातनइत्यादिस्मृतिभ्यः संसारित्वावस्थायामेव तस्योपाधिनिबन्धनं परिछिन्नपरिमाणं तच्च यथोपाध्यनुरूपत्वादनियतं तथाच दर्शयति श्रुतिः अङ्गुष्ठमात्रो रवितुल्यरूप आराग्रमात्रोह्यवरोपि दृष्टः । वालाग्रशतभागस्य शतधाकल्पितस्य च भागोजीवः स विज्ञेयः स चानन्त्याय कल्पते । नैवस्त्री न पुमानेष नैवचायं नपुंसकः । यद्यच्छरीरमादत्ते तेन तेन स त्यज्यतइत्यादिवचनैः स च प्रतिशरीरमभिन्न एव स एको बहुधा निविष्टः । एकं सद्विप्रा बहुधा वदन्ति । एकं सन्तं बहुधाकल्पयन्ति त्वमेकोसि बहुतनुं प्रविष्टः । इन्द्रस्यात्मानं शतधाचरन्तं एकः सन् बहुधा विचचार इत्यादि श्रुतिशतेभ्यस्तस्माद्देहेन्द्रियप्राणमनोबुद्ध्यव्याकृतविलक्षणः । सत्साक्षी चिद्धातुः सद्रूपः प्रत्यगात्मेति निश्चितोऽर्थः । अनुभवप्राबल्यं दर्शयति ॥

tion of the portion of the hundredth of a hair's breadth is to be known this individuated spirit; and It is competent for infinity. So also sucn sentences as: Neither male nor female is this, nor neuter, whatever body it assumes by that frame it is resigned. So also hundreds of texts such as: Undivided in individual bodies, this one has entered multifariously; Brâhmans declare in many ways the One Existent; In many ways they imagine the one existent soul; Thou art one, entered into many frames: One existent soul moved variously about the soul of Indra as it moved a hundred ways.

The sense, therefore, of the text has been ascertained to be that the soul is unlike the body, the sense-organs, the vital air, the internal sensory, the understanding, and the indiscrete principle, and is an existent witness, having intelligence for its essence, consisting of existence, self-conscious. The author next exhibits the cogency of a deliverance of consciousness.

And because the consciousness of the wise man] *I* [*am Brahma, is cogent.*] With reference to this men consider the text begining nwith the words He, not wholiy, breathing, becomes the vital air, which censures the identification of spirit with vital air &c. as vitiated by its not applying to the entire soul, and ending with the words Let him reflect Thou art soul alone. The text Therein all these become one, is to be explained as meaning that we are to understand the nature of the entire soul. Its literal sense is that this it is that is spirit. The text, therefore, which indicates the totality of the knowable other than that, signifies the wisdom of one who has knowledge thereof. Thus elsewhere it has been stated; All men to come are wise by the knowledge of supreme spirit, how much more does Brahmâ know it; reflecting thus one should then have recourse to soul alone, thinking I am Brahma, therefrom that whole universe arose. The author thus evinces that knowledge of the supreme spirit is a mode of the consciousness of the wise. In all former stages the conceiving oneself to be self-conscious spirit is an illusion. He next recapitulates the doctrine of the illusory surmisal of objects in self-conscious spirit.

[*It is*] *therefore* [*the conviction of those who know the latter part of the Veda that the eternal, pure, intelligent, free, self-existent, essentially true, self-consciousness alone is the spiritual principle*]. By the limiting clause *Of those who know the latter part of the Veda,* the author indicates the laxity of original testimony of consciousness to the other doctrines. He next concludes the section of the work which treats of illusory surmisal or erroneous imputation.

So much [*for the erroneous imputation to the soul of characters which do not belong to it.*] The author having thus described erroneous imputation in all its details, and intending next to describe the rescission or repudiation of erroneous imputation, proceeds to lay down a definition thereof.

Repudiation [*is the reduction to mere reality of the unreal universe, composed of ignorance &c., which unreal universe is the illusory product of reality, like the recognition that a serpent, the illusory product of a rope, is merely a rope.*] It is stated that rescission or repudiation is the attribution to the effect of the existence of its cause only, or the determination of the non-existence of the effect otherwise than as identical with its cause. The author next in anticipation of the question in what order renunciation thus defined takes place, and in reliance on the aphorism Order is produced by inversion, describes rescission, repudiation, or renunciation, in the inverse order to the order of production.

That is to say [*—this scene of fruition, consisting of the four kinds of gross bodies, viviparous, oviparous, equivocally generated, and germinant; and the food and drink and other things in the shape of what is adapted to their fruition and the fourteen worlds, earth and the rest, the repository thereof; and the receptacle of all these, Brahma's egg—all this is merely the gross elements which are the material cause thereof. These, together with sound an l the other objects of sense educed from the quintuplicated elements, and whatever is produced by the subtile body—all this is nothing else than the unquintuplicated elements which are the material cause thereof. These unquintuplicated elements, together with purity and the other qualities in the inverse order of their origination, are nothing else than intelligence illusorily*

अहमिति। तत्र पश्यन्त्यकृत्स्नो हि स प्राणन्नेव प्राणोनाम भवतीत्युपक्रम्य प्राणाद्यात्मविज्ञानमकृत्स्नविषयतादोषेण निन्दित्वान्ते त्वात्मेत्येवोपासीत तत्रह्येते सर्व्वे एकं भवन्तीति कृत्स्नात्मस्वभावं वेदितव्यं निर्दिश्य तदेतत् पदनीयमस्य यदयमात्मेति तदतिरिक्तस्य ज्ञातव्यस्यानवशेषं दर्शयन्ती श्रुतिस्तद्विज्ञानवत एवविद्वत्तां सूचयति तथोत्तरत्रापि तदाहुर्यद्ब्रह्मविद्या सर्व्वं भविष्यन्तो मनुष्या मन्यन्ते किमु वतत्ब्रह्मा वेदित्याक्षिप्य तदात्मानमेवावेदहं ब्रह्मास्मीति तस्मात्तत्सर्व्वमभवदिति च विद्वदनुभवत्वं ब्रह्मात्मज्ञानस्य दर्शयति अतइतोऽर्व्वाक्तु देशेषु प्रत्यगात्माभिमानो भ्रान्तिरितिभावः। प्रत्यगात्मविषयाध्यारोपमुपसंहरति॥

अतइति। वेदान्तविद्वदनुभवइति विशेषणेन मतान्तरेऽनुभवस्य मूल प्रमाणशैथिल्यं सूचयति। अध्यारोपप्रकरणमुपसंहरति॥

एवमिति। एवमध्यारोपं सप्रपञ्चं निरूप्यापवादमिदानीं निरूपयिष्यंस्तल्लक्षणमाह॥

अपवादोनामेति। कार्य्यस्य कारणमात्रसत्तावशेषणं कारणस्वरूपव्यतिरेकेण कार्य्यस्यासत्तावधारणं वाऽपवादइत्युक्तं भवति एवंलक्षणोऽपवादः केन क्रमेणेत्यपेक्षायां विपर्य्ययेण तु क्रम उपपद्यते चेति न्यायमाश्रित्योत्पत्तिक्रमवैपरीत्येनापवादं क्रमेण दर्शयति॥

accompanied with illusion the material cause thereof. This ignorance or illusion, and intelligence illusorily accompanied with illusion, i. e. the Lord &c., is nothing else than the Fourth, the absolute spirit unaccompanied, the substance or substratum thereof.] The expression This scene of fruition indicates as it were with the finger the last result or ultimate educt, the aggregate of the four elements, established by perception. The second *thereof* denotes food &c., the words *and other things* is meant to include drink and the like. The sense of the third *thereof* relates to the fourteen worlds, earth and the rest. The word *this* in the combination *and all this* is intended to comprehend the totality of what has been already mentioned. The same is the meaning of the expression *of these.* The meaning of the words *In the inverse order of production,* is as follows. Earth consists of the subtile rudiment of smell, water of the subtile rudiment of taste, wherewith it is identical, light of the subtile rudiment of colour, wherewith it is identical, air of the subtile rudiment of touch, wherewith it is identical, ether of the subtile rudiment of sound, wherewith it is identical. This ether is nothing else than intelligence associated with illusion, which is its substantial cause. The word *thing* in the expression *the substance thereof,* relates to illusion and to intelligence illusorily associated with illusion. The expression *substance thereof* is a determinative compound in relation to the terms *absolute spirit &c.* Conformably to this the texts revealed and scriptural: The earth, the support of the cosmos, is retracted into water, water is retracted into light, light is retracted into air, air is retracted into ether, and that again into the unevolved, the unevolved is retracted into spirit, into the undifferenced absolute, O divine seer; There is naught else than spirit, This is the ultimate resort.

The author now states the general result of his description of illusory surmisal, and of the renunciation thereof.

By these two [*that is, by illusory surmisal and renunciation, the elucidation of the sense of the text That art thou, is effected.*] The expression *elucidation of the text* is employed to suggest that the elucidation of the text is a subordinate end of the description of illusory surmisal, the chief end being the description of intelligence identical with the absolute, as being self-conscious and without a second. The terms *that* and *thou* have each two significates, one denoted and the other implicated. The author therefore proceeds to enumerate and expound them.

To explain [*—by the term that are denoted three things, viz. the collective aggregate of illusion &c. intelligence illusorily accompanied thereby and characterised by omniscience and so forth, and intelligence unaccompanied thereby, these three things appearing to be one, as in the case of an ignited iron ball, in which the iron and the heat appear reduced to unity.*] The collective aggregate of illusion, God accompanied thereby, and the substance of both illusion and God, viz. pure intelligence unaccompanied, established by its own majesty, designated by the syllable Om,—these three like an ignited iron ball are inseparable, and are the designate of the term *that.* By the words *and so forth* are to be understood the epithets Embryo of Light and Various Ruler. Herein are comprehended the distributive totality of illusion, and the subtile body. Unaccompanied thereby is the self-conscious spirit. The rest may be explained as in former passages. In both that which is unevolved in each case, the aggregate, differs through the states of sleep, waking, and dreamless slumber. The witness thereof, whose essence is intelligence, is designated by the term *thou.* The author, therefore, proceeds to say.

[*The implicated meaning of the word That is unaccompanied intelligence which underlies intelligence*] *accompanied by the illusory determination thereby.* [*The distributive totality of illusion, intelligence accompanied thereby and characterised by deficient knowledge &c., and intelligence unaccompanied thereby,—these three, like an ignited iron ball, appearing one, are the object denoted (or directly expressed) by the term Thou. Unaccompanied intelligence, self-conscious bliss, the Fourth, which underlies intelligence accompanied or illusorily determined by these, is the object implicated (or indirectly expressed) by the term Thou.*] The understanding of the purport of a proposition supposes an antecedent knowledge of the sense of its terms. The author, therefore, having in the first instance by means of the doctrines of erroneous imputation and renunciation, afforded a provisory explication of the text, now begins an exposition of the meaning of the grand text That art thou.

तथाहीत्यादिना । एतद्भोगायतनमिति प्रत्यक्षसिद्धं चतुर्व्विधभूतग्रामं चरमकार्य्यमङ्गुल्या निर्दिशति द्वितीयएतच्छब्दोऽन्नादिविषयः आदिशब्दः पानादिसंग्रहार्थः भूरादिचतुर्दशभुवनानि तृतीयैतच्छब्दार्थः एतत्सर्व्वमित्यत्रैतच्छब्दउक्तसमस्तसंग्रहार्थः एतेषामित्यस्यापि स एवार्थः उत्पत्तिव्युत्क्रमेणेत्ययमर्थः पृथिवीगन्धतन्मात्रात्मिकारसतन्मात्रात्मकाम्मात्रं भवति आपश्चतारूपतन्मात्रात्मकतेजोमात्रं भवन्ति तच्च तेजः स्पर्शतन्मात्रात्मकवायुमात्रं भवति स च वायुः शब्दतन्मात्राकाशमात्रं भवति सचाकाशः स्वकारणभूताज्ञानोपहितचैतन्यमात्रं भवतीति एतदाधारेत्यत्रैतच्चशब्दोऽज्ञानतदुपहितचैतन्यविषयः एतदाधारेत्यादिब्रह्मान्तानां पदानां कर्म्मधारयः तथाच श्रुतिस्मृती भवतः जगत्प्रतिष्ठादेवर्षे पृथिव्यप्सु प्रलीयते ज्योतिष्वापः प्रलीयन्तेज्योतिर्वायौ प्रलीयते वायुश्च लीयते व्योम्नि तच्चाव्यक्ते प्रलीयते अव्यक्तं पुरुषेब्रह्मन्निष्कले संप्रलीयतइति पुरुषान्नपरं किञ्चित् सा परागतिरिति च अध्यारोपापवादनिरूपणे कलितमाह

Now [the sense of the grand text is to be explained. This grand text That art thou, declares to us through three relations what is meant by the Indivisible.] By the word *this* the author in the first place suggests by means of the text itself the order in which its terms are to be apprehended. He next enumerates the aforesaid three relations.

The three relations [are (1) the reference of the two terms to the same object; (2) the relation of determining and determined between the designates of the two terms; and (3) the relation of implicate and implicator subsisting between self-conscious spirit and the designates of the two terms.] The author next cites a statement in confirmation of the enumeration thus given.

Therefore it has been said: [The relation between the designates of the terms and self-conscious spirit is (1) that of reference to the same object; (2) that of determined and determining; and (3) that of implicate and implicator.] Reference to the same object is a designatory relation of terms used on different occasions, to one and the same object. Keeping this definition in view the author proceeds to give an example analogous to that of the terms That and Thou.

The relation of reference to the same object [is as follows. As in the sentence That is this same Devadatta, there is the relation between the word That expressive of the Devadatta of the former time and the word This expressive of the Devadatta of the present time, the relation of reference to the same object; so in the text That art thou there is between the word That expressive of intelligence characterised by unperceivedness &c., and the term Thou expressive of intelligence characterised by perceivedness &c., the relation of designation of one and the same] intelligence.]

The term *et cætera* after unperceivedness implies additionally superintendence &c., and after perceivedness the being superintendent &c., and after perceivedness the being superintended. A determination is that which excludes from dissimilars, the determined is that which is so excluded, and their relation is that of determined and determining. This relation is such, since the two related or connected terms must be so described. Keeping this in view the author proceeds to state and to exemplify the relation or connection of determined and determining.

[The relation of] determined [and determining is as follows. As in this sentence there exists the relation of determined and determining or of subject and predicate between the Devadatta of a former time designated by the word That and the Devadatta of the present time designated by the word This, inasmuch as they exclude their reciprocal difference; so in the text That art thou there exists the relation of subject and predicate between the intelligence characterised by unperceivedness &c. and designated by the term That, and intelligence characterised by perceivedness &c. and designated by the term Thou, inasmuch as they exclude their reciprocal difference.] In anticipation of the question which of these two objects is subject and which predicate and what is the purport of the predication, and regarding the purport of the predication as relative to a relation of subject and predicate due to illusion which points to a difference, the author states that it is made by reason of the exclusion of their reciprocal difference.

Implication or indication is a function of terms inseparable from their denotation. It is of three kinds, viz. implication which abandons the designates, implication which does not abandon the designates, and implication which both does and does not abandon the designates. That function which altogether abandons the matter directly expressible for another matter connected therewith, is implication which abandons. The function which without abandoning the matter directly expressible applies to something connected therewith, is implication which does not abandon. The function which partly abandons, and partly applies to, the mat-

---

आभ्यामिति। ब्रह्मात्मचैतन्यस्याद्वितीयप्रत्यग्रूपत्वनिरूपणार्थत्वादध्यारोपादिपरनिश्चनस्य पदार्थशुद्धिरवान्तरफलमिति सूचयितुं पदार्थशोधनमपीत्युक्तं तत्त्वं पदयोः प्रत्येकं द्विविधोऽर्थोवाच्यो लक्ष्यश्चेति तदुभयं विभज्य दर्शयति ॥

तथाहीत्यादिना । समष्ट्यज्ञानं तदुपहित ईश्वरस्तदुभयाश्रयमनुपहितस्वमहिमप्रतिष्ठितमक्षरशब्दवाच्यं चिन्मात्रमित्येतत्त्रयं तप्तायःपिण्डवदविविक्तं तत्पदवाच्यार्थइत्यर्थः आदिपदात् समष्टिहिरण्यगर्भविराजौ गृह्येते तत्राज्ञानादिव्यष्टिरित्यादिपदात्सूक्ष्मशरीरञ्च गृह्यते एतदनुपहितं प्रत्यक्चितिमात्रं चेयं पूर्व्ववत् उभयत्रापि यथायोगमव्याकृतं समष्टिः स्वप्नजाग्रत्स्वप्नसुषुप्त्यवस्थाभ्यो विलक्षणस्तत्साक्षी चिद्धातुस्त्वत्पदलक्ष्योऽर्थ इत्याह ॥

एतदुपाध्युपहितेति। पदार्थप्रतिपत्तिपूर्व्वकत्वाद्वाक्यार्थप्रतिपत्तेरादावध्यारोपापवादाभ्यां अवान्तरवाक्यावष्टम्भेन पदार्थौ परिशोध्येदानीं महावाक्यार्थं निरूपयितुमुपक्रमते ॥

अथेति । वाक्याद्वाक्यार्थप्रतिपत्तिक्रममादौ संगृह्णाति ॥

इदमिति । उक्तमेवविभजते सम्बन्धत्रयं नामेति उक्तेविभागे नैष्कर्म्यसिद्धिवचनं संवादयति॥.

तदुक्तमिति । भिन्नप्रवृत्तिनिमित्तानां शब्दानामेकस्मिन्नर्थे तात्पर्य्यसम्बन्धः सामानाधिकरण्यमिति सामानाधिकरण्यलक्षणमित्यभिप्रेत्य तस्योदाहरणं तत्त्वंपदयोरनुवर्त्तयति ॥

सामानाधिकरण्यन्तावदिति । तत्कालोऽतीतकालः एतत्कालो वर्त्तमानकालः परोक्षत्वादित्यादिशब्दान्नियन्तृत्वादिग्रहः अपरोक्षत्वादीत्यादिपदान्नियम्यत्वादिग्रहः व्यवच्छेदकं विशेषणं व्यवच्छेद्यं विशेष्यं तयोर्भावो विशेषणविशेष्यभावः एवं सम्बन्धवदुभयनिरूपणीयत्वादित्यभिप्रेत्य विशेषणविशेष्यभावसम्बन्धं सदृष्टान्तमाह ॥

ter directly expressible, is implication which both does and does not abandon the designates. Our author proceeds to explain and to exemplify the relation of implicate and implicant in the text under consideration.

The relation of implicate and implicant [*is as follows. As in the same sentence there exists a relation of implicate and implicant between the words This and That or their designates, as regards Devadatta simply, by reason of the omission of the distinction of the contradictory times past and present; so in the text That art thou there exists between the terms That and Thou or their designates the relation of implicate and implicant in regard to simple intelligence, by reason of the omission of the distinction between the contradictories perceivedness and unperceivedness and the like. This implication is called the implication of a portion.*] The matters designated by the terms being contradictory to one another, no relation of determined and determining arises between them. Accordingly it cannot be maintained that there is one single matter in the text, appearing in consequence of the reference to the same object by the two terms which express these contradictory characters. It resulting, therefore, that there is an implication, and implication which abandons and implication which does not abandon being inapplicable in the present case in a manner to be explained hereafter, we must understand by the sentence an affirmation of the indivisible, by means of an implication of the undifferenced portion expressed by omission of the differenced portion expressed by the terms, which implication will account for the reference of both terms to their object, which reference really exists.

In the words *This implication is called the implication of a portion*, the author records the technical name for the implication of one part of the matter expressible, by the omission of the other part. This name denotes implication which does and does not abandon the designates. To explain this:—It is taught that the terms That and Thou have reference to the same object. This would be impossible if the terms conveyed a contrary sense to each other, no such reference to one and the same object being observed in the terms Post and Water-jar. Nor is their reference to the same object to be accounted for by their denoting one and the same object, like that of the terms *Vaiśvadevî* (a kind of oblation) and *âmikshâ* (a mixture of boiled and coagulated milk), because we observe no term in this case declaratory of a unity of meaning as in that. It remains, therefore, that the reference of That and Thou to one single object be explained by their implication or indication of the same meaning.

It may be urged by an objector that the unity of meaning in the terms That and Thou may be accounted for by implication alone, without reference to one and the same object, as in the example The lotus is blue. The author proceeds to meet this possible objection.

A. E. G.

विशेषणेति । सोऽयं पदार्थयोर्मध्ये कस्य वा विशेषणता कस्य वा विशेष्यता किं तत्र विशेषणकृत्यमित्यपेक्षायां द्वयोरपि पदार्थयोः परस्परापेक्षया विशेषणविशेष्यभावो भेदभ्रमायोहश्च विशेषणकृत्यमभिप्रेत्याह ॥

अन्योन्यभेदव्यावर्तकतयेति । अभिधेयाविनाभूतप्रवृत्तिर्लक्षणा सा त्रिविधा जहल्लक्षणा अजहल्लक्षणा जहदजहल्लक्षणा चेति वाच्यार्थमशेषतः परित्यज्य तत्सम्बन्धिनि अर्थान्तरे वृत्तिर्जहल्लक्षणा वाच्यार्था परित्यागेन तत्सम्बन्धिनिर्वृत्तिरजहल्लक्षणा वाच्यार्थैकदेशपरित्यागेनैकदेशवृत्तिर्जहदजहल्लक्षणा तत्र प्रकृतवाक्ये लक्ष्यलक्षणसम्बन्धं सोदाहरणमाह ॥

लक्ष्यलक्षणसम्बन्धइति । पदवाच्यार्थयोः परस्परविरुद्धत्वान्नान्योन्यं विशेषणविशेष्यभावउत्पद्यते तथा च तत्समर्पकयोरपि पदयोः सामानाधिकरण्यवशात् प्रतीयमानस्यैकस्य वाक्यार्थस्याऽनुपपत्तिरिति लक्षणायां प्रसक्तायां वक्ष्यमाणप्रकारेण जहदजहल्लक्षणयोः प्रकृतासङ्गतौ पदवाच्यगतविरुद्धांशप्रहाणेनाविरुद्धांशलक्षणया सामानाधिकरण्ये सति वाक्यादखण्डार्थप्रतिपत्तिरितिभावः अंशान्तरपरित्यागेन अंशान्तरलक्षणायाः शास्त्रप्रसिद्धां संज्ञां सङ्गिरते ॥

इयमेवेति । जहदजहल्लक्षणेदंशब्दार्थः अयं भावः तत्त्वं पदयोः सामानाधिकरण्यं तावत् श्रूयते न तत्तयोर्भिन्नार्थत्वे सम्भवति स्तम्भकुम्भपदयोस्तददर्शनात् वाप्येकार्थाभिधायकत्वेन वैश्वदेव्यामिक्षावत्तद्वत्तादेवैकार्थसमर्पकस्य कारस्येहादर्शनात् तथाचाहुः आमिक्षां देवतायुक्तां वदत्येवैषतद्धितः आमिक्षापदसान्निध्यात्तस्यैव विषयार्पणमितिपरिशेषादेकार्थ्यंलक्ष्यकत्वेनैवेति । ननु तत्त्वं पदयोः सामानाधिकरण्यं विनापि लक्षणयैकार्थ्यमुपपत्स्यते नीलमुत्पलमिति वदित्याशङ्क्याह ॥

अस्मिन्निति । अखण्डार्थत्वस्य विवक्षितत्वादित्यभिसन्धिः । ननु नीलोत्पलवाक्येऽपि स्यादखण्डार्थता नेत्याह ॥

FOR SALE AT THE
MEDICAL HALL PRESS, BENARES.

The VAISESHIKA APHORISMS OF KAṆÁDA, reprinted from the "Pandit" with corrections and emendations, by A. E. GOUGH, B.A. Anglo-Sanskrit Professor, Benares College. *Price Rs.* 4-0.

PRINTED AND PUBLISHED BY THE PROPRIETORS, E. J. LAZARUS AND CO. AT THE MEDICAL HALL PRESS, BENARES.

काशीविद्यासुधानिधिः

श्रीगणेशाय नमः

श्रीमद्विजयिनीदेवीपाठशालोदयोदितः । प्राच्यप्रतीच्यवाक्पूर्वापरपक्षद्वयान्वितः ॥ १ ॥

अङ्कुरश्मिः स्फुटयतु काशीविद्यासुधानिधिः । प्राचीनार्यजनप्रज्ञाविलासकुमुदोत्करान् ॥ २ ॥

THE PANDIT.

A Monthly Journal, of the Benares College, devoted to Sanskrit Literature.

No. 86. Benares, July 1st, 1873. Vol. VIII.

॥ चिन्तामणेः शब्दखण्डम् ॥

उच्यते । गामानयेत्यतो गोत्वविशिष्टस्य क्रियान्वयबोधाद् गौरित्याकारा गोविशेष्या बुद्धिः कारणं, सा च न शब्दं विना, आक्षेपाद्यत्स्याश्रितं गोत्वमिति धी,र्न तु गौरिति । न चैवं व्यक्तेः क्रियान्वयेऽपि । गोत्वाश्रिततया निराकाङ्क्षत्वात्, राजपुरुषमानयेत्यत्रेव राज्ञः । अन्वये वा व्यक्तिमानयेति धीः स्यात्, (१) न तु गामिति । किं च गोत्वं न व्यक्तिव्याप्यं, (२) नहि यत्र यदा वा गोत्वं तत्र तदा व्यक्तिर्यत्सामान्यं सा व्यक्तिरिति वा नियमो व्यभिचारात् । नापि गोत्वं गवाश्रितं, (३) गोत्वादित्यनुमितिः । (४) व्याप्तिग्रहशरीरत्वात् । न च जातित्वं व्यक्त्याश्रितत्वे लिङ्गं, (५) जातित्वस्य पदादनुपस्थिते, (६) स्तथात्वे वा जातिवित्तिवेद्यैव व्यक्तिः । (७) अपि च लिङ्गं व्याप्यमनुपपन्नं स्वाश्रये व्यापकमुपपादकं च बोधयति । न चेह गोत्वाश्रये व्यक्तिबुद्धिः ॥

वयं तु ब्रूमः । व्यक्तेरपदार्थत्वे विभक्त्यर्थे संख्याकर्मत्वादेर्व्यक्तावनन्वयः स्यात् । सुब्विभक्तीनां प्रकृत्यर्थान्वितस्वार्थबोधकत्वस्य व्युत्पत्तिसिद्धत्वात् । प्रकृतितात्पर्यविषये तदन्वयव्युत्पत्तौ लक्षणोच्छेदो (८) गौरवं च । (९) आख्यातार्थसंख्याऽपि नानुमितेनान्वेति, किं तु भावनान्वयिना शुद्धेन प्रथमान्तादुपस्थितेन । पदान्तानुभवसिद्धा न स्यात्, प्रकारान्तरेण तदुपस्थितेरनावश्यकत्वाद्उपस्थितिरेव तत्राक्षेपार्थः । (१०) अत एव न व्यक्ते-

॥ शब्दचिन्तामणिव्याख्या रुचिदत्तीया ॥

(१) न तु गामिति । अनुमितेर्व्यापकतावच्छेदकप्रकारकत्वनियमादिति भावः । (२) नहीति । यद्यपि तन्मते प्रलयाभावाद्यदा गोत्वं तदा गौरिति व्याप्तिरस्त्येव, तथापि स्वमतावष्टम्भेनेदमुक्तम् । (३) गोत्वादिति । गोत्वत्वादित्यर्थः । गोत्वत्वस्य गोपदादनुपस्थितेरिति दोषे सत्येव दोषान्तरमाह । (४) व्याप्तीति । हेतोरेव पक्षतावच्छेदकतया व्याप्तिग्रहकालएवोद्देश्यसाध्यसिद्धौ सिद्धसाधनमित्यर्थः । (५) जातित्वस्येति । तथा च गोपदश्रवणानन्तरं नियमतो व्यक्तिधीरद्रिति भावः । (६) तथात्वे वेति । जातित्वस्य व्यक्तिघटितत्वादिति भावः । ननु गोत्वमेव लिङ्गं तच्च पदादुपस्थितमेवेत्यत आह । (७) अपि चेति । व्यधिकरणयोर्न गम्यगमकभाव इत्यर्थः ॥

प्रकृत्यर्थत्वं, प्रकृतिप्रतिपाद्यत्वम् । नन्वेतावतापि न लक्षणोच्छेद,स्तात्पर्यनिर्वाहार्थमेव तत्कल्पनादित्यरुचेराह । (८) गौरवं चेति । तत्प्रतीतीच्छयोच्चरितत्वस्येच्छागर्भत्वेन गुरुत्वादित्यर्थः । नन्वाक्षिप्ते कर्त्तर्याख्यातार्थसंख्यान्वयवद्व्यक्तावाक्षिप्तायामन्वयोस्तु सुब्विभक्तीनामित्यादिव्युत्पत्तिश्चासिद्धैवेत्यत आह । (९) आख्यातेति । शाब्दी ह्याकाङ्क्षा शब्देनैव पूर्यतइति न्यायाद,त एव श्रुतार्थापत्तिरिति भावः । (१०)

राक्षेपः, किं तु लक्षणया गोपदाद्गौरिति व्यक्तिधीरिति मण्डनः । यदाह ।

ज्ञाता (११) वस्तित्वनास्तित्वे नहि कश्चिद्विवक्षति ।
नित्यत्वाल्लक्ष्यमाणाया व्यक्तेस्ते हि विशेषणे ॥

इति । उच्यते ॥

स्वार्थादन्येन रूपेण ज्ञाते भवति लक्षणा ।

तीरत्वेन ज्ञाते गङ्गापदस्येव । न चेह गोत्वादन्येन रूपेण व्यक्तेरुपस्थितिः, किं तु गोत्वेनैव । व्यक्तित्वेन सास्नादिमत्त्वेन चोपलक्ष्यत्वे गोपदाद्व्यक्तित्वादिरूपेण धीः स्यात् । (१२) नापि गोत्वसंबन्धिनि गोत्वविशिष्टे लक्षणा । गोत्वे हि न साक्षादानयनाद्यन्वय इति व्यक्त्यवच्छेदकतया तस्यान्वये ऽमुख्यत्वम् । लक्षणयापि गोत्वावच्छिन्नैव व्यक्तिः क्रियार्थान्वयिनी प्रतीयते न केवला व्यक्तिरिति गोत्वविशिष्टस्य (१३) लक्ष्यत्वे युगपद्वृत्तिद्वयविरोधः । (१४) गोत्वेपि वा लक्षणा । (१५) अपि च । जातिमात्रे न शक्ति,र्न वा व्यक्तौ लक्षणा । जातौ मुख्यप्रयोगाभावात् । (१६) तयोस्तन्मूलकत्वात् । प्रयोगो हि व्यवहारहेतुज्ञानार्थः । न च जातिमात्रनिर्विकल्पकाद्व्यक्तिमनादाय केवलजातौ व्यवहारः, तस्य विशिष्टज्ञानसाध्यत्वात् । (१७) गां पश्य गौरस्तीत्यादावपि गोत्वविशिष्टस्यैव ज्ञानं व्यवहारश्च । (१८) तस्मादेकवित्तिवेद्यत्वनियमाज्जातिविशिष्टं शक्यम् । (१९) यदि च तृतीयायाः करणत्वैकत्वे इव गोगोत्वे शक्ये, तदा गोत्वं गोव्यक्तिश्चेति धीः स्याद् न तु गौरिति । वैशिष्ट्यं च संबन्धो वा ज्ञातो घट इत्यत्रेव विशेषणताविशेषो ऽर्थान्तरं वेत्यन्यदेतत् ॥

(२०) जातिविशेषवदवयवसंयोगरूपा ऽऽकृतिरपि पदशक्या । गोपदाज्जात्याकृतिविशिष्टस्यैवानुभवात् । पि-

अत एवेति । विभक्त्यर्थानन्वयादेवेत्यर्थः । (११) अस्तित्वनास्तित्वे, उत्पादविनाशौ, तथा च गौरुत्पन्ना गौर्नष्टेत्यादौ जातौ तदन्वयानुपपत्त्या व्यक्तौ लक्षणेत्यर्थः । ननु स्वार्थादन्येनेत्यमानकं, तथा च गोत्वेनैव व्यक्तेरुपलक्ष्यत्वमस्त्वित्यत आह । (१२) नापीति । गोत्वसंबन्धिनीति शक्यसंबन्धो दर्शितः । (१३) लक्ष्यत्वे, उपस्थाप्यत्वे । ननु लक्षणयैव विशिष्टोपस्थितौ नोक्तविरोध इत्यत आह । (१४) गोत्वेपि वेति । सा च न संभवति, अभेदे शक्यसंबन्धाभावादिति भावः । ननु विशिष्टस्य केवलादन्यत्वाद्गोत्वविशिष्टे लक्षणास्तु, अत एव गुणवाचकस्य नीलादिपदस्य नीलादिविशिष्टे लक्षणेति सिद्धान्तः । तथा च स्वार्थादन्येनेत्ययुक्तम् । न च तत्र नीलादिसंबन्धित्वेनोपलक्ष्यत्वात्संबद्धलक्षणयैव च यद्वि येनेत्यादिन्यायेन नीलादिभानमिति वाच्यम् । प्रकृतेपि गोत्वसंबन्धित्वेन तथात्वापत्तेः । गोपदेन गोत्वमात्रप्रकारकानुभवान्न तथेति यदि तदा नीलादिपदेनापि नीलादिमात्रप्रकारकानुभवात्तुल्यम् । यदि च केवलवाचकस्य विशिष्टे न लक्षणा तदा प्रकृष्टजये लक्षणेति वक्ष्यमाणविरोधश्चेत्यरुचेराह । (१५) अपि चेति । (१६) तयोरिति । शक्तिलक्षणयोः प्रयोगमूलकत्वादित्यर्थः । मुख्यप्रयोगाच्छक्तिर्मुख्या, ऽर्थान्वयानुपपत्त्या ऽन्यत्र प्रयोगाल्लक्षणेति भावः । ननु गां पश्येत्यादावेव जातौ मुख्यप्रयोगो ऽस्तीत्यत आह । (१७) गामिति । अत्र जातेरन्वययोग्यत्वादन्वयानुपपत्त्यभावे लक्षणाविरहात्तद्विशिष्टलाभो ऽनुभूयमानो न स्यात् । न च तात्पर्यानुपपत्त्यैव यष्टीः प्रवेशयेतिवल्लक्षणा ऽस्त्विति वाच्यम् । उभयसाधारणतात्पर्यग्रहे ऽपि विशिष्टलाभानुभवात् तदिदमुपसंहरन्नेव स्पष्टयति । (१८) तस्मादिति । एवं च गौर्नित्य इत्यादौ जात्यादिपरत्वएव लक्षणेत्यवधेयम् । अनुभवबलादेवानन्यलभ्यवैशिष्ट्यमपि शक्यमित्याह । (१९) यद्वि चेति । न चान्वयवदन्यलभ्यत्वमिति वाच्यम् । अन्वयो हि स्मर्यमाणपदार्थयोर्योग्यतादिबललभ्यः, न च प्रकृतेपि तथा, निर्विकल्पकोपस्थितयोर्जातिव्यक्त्योर्योग्यतादिप्रतिसंधानाभावात्तदप्रतिसंधाने ऽपि विशिष्टोपस्थितेः । अत एव पदाद्विशिष्टस्यैव स्मरणमपि न तु निर्विकल्पकम् । न चैवमाकृतिवैशिष्ट्यमपि शक्य,मिष्टत्वात् ॥

(२०) जातिविशेषवदिति । जातिविशेषवान्यो ऽवयवसंयोगः संस्थानविशेषस्तद्रूपेत्यर्थः । तथा च जातिविशेषस्यैवानुगमकतया व्यक्तिवदननुगतानां कथं शक्यत्वमिति निरस्तमिति वदन्ति । तच्चिन्त्यम् । अन्यतरकर्मजत्वादिना संकरेण तादृशजात्यसिद्धेः । के चित्तु जातिविशेषवद्गोत्वादिवदिति दृष्टान्त इति । तदपि न । तथाप्यननुगतानां कथं शक्यत्वमिति दोषस्यापरिहारात् । न च जातिपदं धर्ममात्रपरं, तथा चोपाधिविशेष एवानुगमक इति वाच्यम् । तादृशोपाधेरनिरुक्तेः । न च जातिविशेषत्त्वमवयवविशेषणं, तथा च कपालसंयोगत्वादिकमपि तथेति वाच्यम् । गवादिपदे साक्षादवयवस्याननुगतत्वेन दोषतादवस्थ्यादिति ॥ अत्र वदन्ति ॥ जातिविशेषवतो गवादेरवयवसंयोगरूपेत्यर्थः । विशेषपदोपादानेन पृथिवीपदादौ नाकृतिः शक्येति सूचितं, तथा च गवावयवसंयोगत्वादिकमेवानुगमकं, नचैवं तत्प्रकारिका धीः स्या-

ष्टकमय्यो गाव इत्यादौ गवाकृति(२१)सदृशाकृतौ लक्षणा, पिष्टकसंयोगविशेषस्याशक्यत्वात् । जात्याकृतिव्यक्तीनां प्रत्येकमात्रपरत्वे लक्षणैव, प्रत्येकस्य (२२) जात्याकृतिविशिष्टादन्यत्वात् । यथा गुरूणां कार्यशक्तायां लिङो लोके कार्यत्वपरत्वे । (२३) अत एव "व्यक्त्याकृतिजातयः पदार्थः" इति पारमर्षं सूत्रम् । एकयैव शक्त्यैकवित्तिवेद्यत्वसूचनाय पदार्थ इत्येकवचनम् ॥

(२४) एवं पद्मं पङ्कजपदशक्यं, (२५) ततो नियमतः पङ्कजनिकर्तृ पद्ममिति प्रतीतेः । (२६) अवयवानां तत्रासामर्थ्यात्, (२७) रूढिं विना योगमात्रात् कुमुदे प्रयोगधीप्रसङ्गाच्च । ननु रूढावपि योगात् कुमुदे तौ कुतो न स्यातां, (२८) रूढ्या प्रतिबन्धादिति प्राञ्चः ॥

दिति वाच्यम् । इष्टापत्तेः । अत एव तथा सति साक्षादवयवस्यापि शक्यता स्यादित्यपास्तम् । गवादावाकृतिवैशिष्ट्यस्य परम्परासंबन्धात्मकत्वे तद्घटकतया तथात्वस्यावश्यकत्वाच्च । अन्यथा गोत्वविशिष्टमात्रमेवानुभूयते न त्वाकृतिरित्यस्यापि वाचाटवचसो ऽवकाशापत्तेरिति दिक् ॥ (२१) सदृशेति । तथा च सादृश्यमेव शक्यसंबन्ध इति भावः । (२२) जातीति । यद्यपि गौरुत्पन्न इत्यादौ व्यक्तिमात्रपरत्वेन न लक्षणा, व्यक्तेः स्वातन्त्र्येणैवोपस्थितेः गोत्वस्य चावच्छेदकतयाप्यन्वयात् । तथापि तत्र व्यक्तिमात्रपरत्वमेव नास्ति, जातेरप्यन्वयात् । तथा च व्यक्तित्वादिना तदुपस्थितौ यत्र तात्पर्यं तत्र लक्षणा, मात्रपदव्यवच्छेद्यं च गोत्वादिकमतो व्यक्तित्वादिकमादायात्रापि न व्यक्तिमात्रपरत्वमित्यपास्तम् । (२३) अत एवेति । प्रत्येकवाच्यत्वे पदार्था इति स्यादित्यर्थः । प्रसङ्गाद्योगरूढिं साधयति । (२४) एवमिति । तत्र पङ्कजसमुदायः पद्मशक्तो न वेति विप्रतिपत्तिः । (२५) तत इति । प्रामाणिकानामिति शेषः । तेन शक्तिभ्रमादन्यादृशप्रतीत्या न व्यभिचारः । यद्यपि पद्ममित्येव वक्तुमर्हति, प्रकृतसाध्यव्याप्यत्वात्, तथापि योगरूढित्वप्रतिपादनाय विशिष्टमुपात्तम् । अन्यथोद्भिदादिवद्यौगिकरूढिकत्वशङ्का स्यादिति । (२६) अवयवानामिति । पङ्कादिपदानां पद्मत्वे शक्त्यभावादित्यर्थः । (२७) रूढिं विनेति । गृहीतपद्मप्रयोगस्यापीति शेषः । (२८) रूढ्येति । ज्ञातयेत्यर्थः । ननु रूढिज्ञानं ग्राह्याभावानवगाहितया जनकज्ञानाविघटकतया च न प्रतिबन्धकं, ज्ञानस्य मणिमन्त्रादिवत्प्रतिबन्धकत्वानभ्युपगमात् । वक्ष्यमाणयुक्त्या सामग्रीविरहादेव कुमुदे प्रत्ययादिविरहोपपत्तौ तत्र तथात्वे

(२९) वयं तु नियमतो रूढ्या स्मृतं पद्ममेव (३०) व्यक्तिवाचकडप्रत्ययेन पङ्कजनिकर्तृतया ऽनुभाव्यते । बाधकं विना (३१) व्यक्तिवचनानां सन्निहितविशेषपरत्वनियमात् । यथा (३२) ऽऽग्नेयीति ढगन्तपदेन प्रकरणादिना संनिहिता ढगभिहिता ऋग्व्यक्तिर्बोध्यते । एवं च सर्वत्र पद्मानुभवसामग्र्येवेति न कुमुदे धीर्न वा तदर्थे

मानाभावश्चेत्यरुचेराह । (२९) वयं त्विति (३०) व्यक्तिवाचकेति । कर्तृरूपव्यक्तिवाचकेत्यर्थः । (३१) व्यक्तिवचनानामिति । किंचिद्व्यक्तितात्पर्यकाणामित्यर्थः । सन्निहितत्वं बोद्धुं बोद्धव्यम् । घटेन जलमाहरेत्यत्र सच्छिद्रस्य प्रथमोपस्थितत्वेपि नान्वय इति व्यभिचारवारणाय बाधकं विनेत्युक्तम् । यद्यप्येवं पङ्कजं प्रमेयमित्यादौ व्यक्तिवचनत्वाभावे कुमुदसाधारणबोधः स्यादेव तथापि व्यक्तिवचनानामिति क्वाचित्काभिप्रायं, बाधकं विना पदानां पदोपस्थापिताकाङ्क्षादिविशिष्टान्वयबोधकत्वनियमादित्यत्र तात्पर्यम् । तथा च पङ्कजं प्रमेयमित्यादावपि पद्मान्वयात्तत्रैव प्रमेयत्वान्वयो न कुमुदेपीति । वस्तुतो ऽस्यापि व्यक्तिवचनत्ववत्कर्तृविशेषीभूतपङ्कजन्मकर्तृपरत्वादिति । (३२) आग्नेयीति, वैदिको, घटादिरिति, लौकिको, दृष्टान्तः । "आग्नेय्या ऽऽग्नीध्रमुपतिष्ठत"-इत्यत्र प्रकरणसन्निहितैवाग्निप्रकाशिका ऋगाग्नेयीतिपदेनोपस्थाप्यते, घटेन जलमाहरेत्यादावपि प्रकरणादिसन्निहितैव घटादिव्यक्तिर्बोध्यत इत्यर्थः । अत्रेदं चिन्त्यम् । यदि रूढिर्न प्रतिबन्धिका तदा पङ्कजपदस्य यत्र पद्मे तात्पर्याभावः कुमुदे च तात्पर्यं गृह्यते तत्र लक्षणां विनैव कुमुदबोधः स्यात् । तथा च वक्ष्यमाणविरोधः । नहि तत्रापि पद्मानुभवसामग्री, पद्मे तात्पर्याभावनिश्चयस्यैव बाधकत्वात् । बाधकं विनैव व्यक्तिवचनानां सन्निहितपरत्वाभ्युपगमात्, कुमुदं पङ्कजमित्यत्र कुमुदएव प्रथमसन्निहितत्वाच्च । न च तत्र कुमुदं भिन्नपदोपस्थाप्यमिति वाच्यम् । प्रथमोपस्थितिमात्रस्यैव तन्त्रत्वात् । अवयवापेक्षया समुदायस्यापि भिन्नत्वाच्च । ननु तादृशस्थले शक्त्यैव कुमुदान्वयबोधो ऽस्तु, पङ्कजपदस्य कुमुदे लक्षणेति सिद्धान्तस्य क्वाचित्काभिप्रायेणाप्युपपत्तेः । संप्रदायमते सर्वत्र लक्षणाभ्युपगमेपि सामग्रीबलात्पद्मान्वयेन कुमुदानन्वयमभ्युपगच्छतो मणिकृतस्तादृशाशयोन्नयनात् । एवं च सर्वत्र पद्मानुभवसामग्र्येवेत्यपि तदभिप्रायकमेवेति चेत् । मैवम् । तथा सति क्वचिदपि लक्षणानापत्तेः । न च यत्र पद्मान्वयानन्तरं कुमुदतात्पर्यधीस्तत्र स्वतन्त्रोपस्थितये लक्षणा स्यादिति वाच्यम् । तत्रापि पङ्कजन्मकर्तृत्वस्य कुमुदान्वयतात्पर्यग्रहकाले

प्रयोगः । नन्वेवं रूढिरेवास्तु, तत एवो(३३)भयलाभात्, किं योगरूढ्या । न । अवयवशक्तेः कॢप्तत्वात् । यौगिकार्थानुभवाच्च । (३४) यदि च रूढ्यर्थ एव योगार्थ एव वा ऽनुभूयेत, तदा विवाद एव न स्यात् । अनुभवेनैव तद्विच्छेदात् ॥

अत्र मीमांसकाः । न तावत्स्मृत्यर्थं शक्तिः, पङ्कजपदप्रयोगविषये नियतपद्मानुभवजनितसंस्कारात् स्मृतेरेवोपपत्तेः, स्मृतेस्तज्जन्यत्वनियमात् । नाप्यनुभवार्थं, नियमतः स्मृतं पद्ममादाय व्यक्तिवचनन्यायेनावयवैः पङ्कजनिकर्तृ पद्ममित्यनुभवसंभवात् । स्मृतिश्च रूढ्या ऽन्यथा वेति न विशेषः । शक्तिं विना नियमतः प्रयोग एव कुत इति चेत् । न । पूर्वप्रयोगमपेक्ष्यावयवानामुक्तन्यायेन पद्मानुभवजनकत्वनियमात् । पूर्वप्रयोगेऽपि तत्पूर्वप्रयोगमपेक्ष्येत्यनादितैव । अथानियतोद्बोधस्य संस्कारस्य शक्तिं विना नियतोद्बोधे हेत्वभावान्नियता स्मृतिरेव न स्यादिति चेत् । न । (३५) कदाचिच्छक्तितोऽप्युद्बोधाभावेन शक्यास्मरणात्, (३६) शक्तिं विनापि नियमतः शक्तिस्मरणाच्च । (३७) उद्बोधकं च न नियतं, सदृशपदशक्तिसंबन्धिज्ञानानां प्रत्येकं व्यभिचारात्, किं तु यत्र स्मृतिः तत्र तत्कालोत्पन्नमनियतमेव तदुद्बोधकं कल्प्यते फलबलात् । कार्योन्नेयधर्म्माणां यथाकार्यमुन्नयनात् । न च पद्मत्ववत् (३८) तद्व्यापकादेरपि स्मृतिप्रसङ्गः । (३९) स्मृतिबलेनोद्बोधकल्पनमिति तत्र स्मृत्यभावेन तदुद्बोधाभावात् । तस्माच्छक्तिं विना शक्तेरिव पद्मत्वस्य नियता स्मृतिः । न चैवं गवादिपदेऽपि न शक्तिः स्याद्, व्यवहारकालीनसंस्कारादेव गवादिस्मृतिसंभवादिति वाच्यम् । नहि तत्र स्मृत्यर्थं शक्तिः (४०) किं त्वनुभवार्थं, पदादन्यतो गवादेरनुभवासंभवात् । (४१) अव्युत्पन्नस्य ततो ऽनुभवासंभवाच्च । पद्मानुभवश्च (४२) योगादेवेति न समुदायो हेतु,रन्यथासिद्धत्वात् । अतो ना(४३)नुभवबलात्समुदाये शक्तिकल्पनम् । नन्वेवं गवादिपदानां प्रमेयत्वे शक्तिरस्तु गवादिस्मृतिः संस्कारादिति चेत् । न । गोव्यवहारेण हि स्वोपपादके (४४) गोज्ञाने पदस्य शक्तिकल्पनं, न त्वनुपपादके प्रमेयत्वेन गोज्ञाने । (४५) गोपदात्प्रमेयो गौरित्यननुभवाच्च । अथैवं संस्कारादेव तीरादिस्मृतिसं-

---

पुनः स्मृतेन पङ्कजपदेन शक्त्यैव तदुपस्थापनसंभवात् । नहि तदापि तस्य पद्मएवान्वयः, तत्र तात्पर्याभावनिश्चयात् । कुमुदे तात्पर्यनिश्चयाच्च । अन्यथा लक्षणाया अप्यसंभवाच्च । ननु तथापि लाघवाय लक्षणास्तु, लक्षणया पङ्कजन्मकर्तृत्वस्य पदार्थविधया लघूपस्थितिकत्वात्, अवयवशक्त्या योग्यतादिबलेन वाक्यार्थविधया गुरूपस्थितिकत्वादिति चेत्,न । पङ्कजन्मकर्त्तारमानयेत्यादिवाक्यमात्रएव लक्षणापत्तेः । यदि च प्रत्येकशक्त्यैवावश्यकयोग्यतादिबलात्तल्लाभात्तथा, तदा प्रकृतेऽपि तुल्यम् । तस्माद् रूढिज्ञानप्रतिबन्धकत्वपक्षएव लक्षणा युज्यते । न च विरोध्यविषयतया तत्र प्रतिबन्धकम् । अनुमितौ साध्यज्ञानवत्तथात्वसंभवादिति । तदिदं नव्यमते वक्ष्यति । स्मृतपद्मस्यान्वयानुपपत्त्यनन्तरमेव कुमुदधीरिति तत्र लक्षणाव्यवहारो वस्तुतो मुख्यतैवेतीत्याहुः । (३३) उभयलाभादिति । पद्मानुभवस्य कुमुदधीप्रतिबन्धस्य च लाभादित्यर्थः । (३४) यदि चेति । योगार्थानुभवानभ्युपगमे पद्मानुभावार्थमेव परेण रूढिस्वीकारप्रसङ्गाद् इति भावः । कुत इत्याक्षेपे, तथा च शक्तिं विना नियमतोऽप्रयोग एव न स्यादित्यर्थः । प्रश्नार्थत्वे शक्तिं विनेत्यस्यासंगतत्वापातादिति ॥

शक्तेरन्वयव्यभिचारमाह । (३५) कदा चिदिति । व्यतिरेकव्यभिचारमाह । (३६) शक्तिं विनेति । न चैवमपि नियतसंस्कारोद्बोधानुपपत्तिस्तदवस्थैवेत्यत आह । (३७) उद्बोधकं चेति । फले च वैजात्यमिति भावः । (३८) तद्व्यापकादेरिति । पङ्कजपदप्रयोगविषये कुसुमत्त्वपुण्डरीकत्वादेरवश्यंभावादित्यर्थः । (३९) स्मृतिबलेनेति । कदा चित्सामग्रीबलात्तत्स्मृतौ तात्पर्याभावान्न तत्प्रकारिका धीः, तद्भ्रमे चेष्टापत्तेः । अन्यथा तवापि लक्षणा न स्यादिति भावः । (४०) किं त्विति । शक्तस्यैवानुभावकत्वादिति भावः । नन्वेवमपि गवादिपदे ऽनुभवजनकतावच्छेदकत्वेन शक्तिरस्तु । तज्ज्ञानस्य च प्रयोजकत्वे मानाभावः । उक्तन्यायेन गवादिस्मृतिसंभवादित्यरुचेराह । (४१) अव्युत्पन्नस्येति । अगृहीतशक्तेरित्यर्थः । तथा चान्वयव्यतिरेकाभ्यां तद्धेतुत्वमिति भावः । अनुभवजनकतावच्छेदकमपि शक्तिमत्तया ज्ञातत्वमेव । अन्यथा ऽपभ्रंशानुभावकत्वानुपपत्तेः । न च साधुशब्दस्मरणं, तद्विरहिणामप्यनुभवादित्यपि द्रष्टव्यम् । (४२) योगादिति । अवयवादेवेत्यर्थः । अर्थाध्याहारवत्तदन्वयबोध इति भावः । (४३) अनुभवबलादिति । अनुभवार्थमित्यर्थः । (४४) गोज्ञानइति । गोत्वप्रकारकज्ञानइत्यर्थः । तथा सति प्रमेयत्वप्रकारिकापि धीः स्यादित्याह । (४५) गोपदादिति ।

भवे (४६) गौणलाक्षणिकोच्छेदः । (४७) तीराद्यनुभवार्थं हि न तत्कल्पनं तदनुभवस्येतरपदादेव सिद्धेस्तयोरननुभावकत्वात् । तस्मान्नियता स्मृतिर्वृत्तिसाध्येति तयोः कल्पना । तथा च नियतपद्मस्मृत्यर्थं पङ्कजपदेऽपि वृत्तित्वेन शक्तिकल्पनमावश्यकं, लक्षणाद्यभावादिति चेत् । न । गङ्गायामित्यादौ वृत्तिं विना तीरादेरपदार्थत्वे विभक्त्यर्थान्वयस्तत्र न स्यात् (४८) विभक्तीनां प्रकृत्यर्थगतस्वार्थबोधकत्वव्युत्पत्तेः । पद्मस्य तु (४६) पङ्कजवाक्यप्रतिपाद्यत्वेन पाचकादेरिव विभक्त्यर्थान्वयोपपत्तेः । यत्तु शब्दोपस्थितएव शाब्दान्वयबोधः, अन्यथा प्रत्यक्षोपस्थिते कलाये पचतीत्यन्वयबोधः स्यादिति । तन्न । पदस्य तत्र तात्पर्याग्रहात् तद्ग्रहे भवत्येव । किं पचतीत्युक्ते वधूपदर्शितकलायादौ । (५०) अन्यथा दैवाच्छ्रुतस्मृतकलायपदात्कुतो नान्वयबोधः । द्वारमित्यादावपि न पिधेहिपदाध्याहारः, किं तु तदर्थस्यैव, लाघवात् । न च पद्ममानयेत्यादौ शाब्दानुभवे पद्मोपस्थापकपदजन्यत्वादन्यत्रापि तथेति वाच्यम् । शाब्दपद्मानुभवे हि तदन्वयबोधतात्पर्यकपदत्वेन कारणता, न तु पद्मोपस्थापकपदत्वेनापि (५१) गौरवात् । (५२) अथैवं जनिकालएव प्रयोगः स्याद्, न तदत्ययेऽपि । नह्यसति हि दण्डे दण्डीति व्यपदिश्यतइति चेत् । न । पाचकादिपदवत् (५३) प्रत्ययस्य (५४) योग्यताशक्तत्वाल्लक्षकत्वाद्वा । उपसरजादौ तथा निर्णयात् । (५५) अन्यथा योगरूढादावपि जनिकालएव प्रयोगः स्यात् । योगत्यागे केवलरूढिवादे (५६) विवादाभावश्च, तथापि कुमुदे लक्षणा न स्याद् योगार्थस्याबाधादिति चेत्, न । वक्ष्यते हि तत्र तस्यासाधुत्वम् । नव्यास्तु नियमतः स्मृतपद्मस्यान्वयानुपपत्त्यनन्तरमेव कुमुदे धीरिति तत्र लक्षणाव्यवहारो वस्तुतो मुख्यतैव । (५७) तत्रापि पद्मस्यायोग्यतयाऽनन्वये योगादेव कुमुदे धीर्न लक्षणयेति ॥

उच्यते । अस्ति (५८) व्युत्पन्नस्य पदज्ञानानन्तरं नियमतोऽन्वयप्रतियोगिस्मृतिरतस्तद्धेतुसंस्कारोद्बोधकं (५६) प्रतिबन्धकं विना (६०) पदज्ञानमेव । (६१) दृष्टानुविधानत्वादनुगतत्वाद् (६२) लघुत्वाच्च, न तु प्रतिपदार्थस्मृति तत्कालोत्पन्नमनन्तमदृष्टचरमनिर्वचनीयं, गौरवात् । अतः पद्मस्मृतावपि गृहीतसंबन्धं पङ्कजपदमपि तथेति संबन्धत्वेन शक्तिसिद्धिः । (६३) एवं रथकारशब्देऽपि (६४) जातिविशेषे रूढिर्न स्यात्, संस्कारादेव तदुपस्थितिसंभवात् । (६५) तथा च वर्षासु रथकारोऽग्नीनादधीतेत्यत्र रूढ्यर्थस्य बलवत्त्वेन शीघ्रमुपस्थितत्वा-

(४६) गौणेति । गौणताया लक्षणायाश्च वृत्तेरुच्छेद इत्यर्थः । तर्हि तदनुभवार्थं तत्कल्पनमस्त्वित्यत आह । (४७) तीरादीति । (४८) विभक्तीनामिति । प्रकृत्यर्थान्वितेत्यर्थः । तत्र तिङामपि तथात्वान्न व्यभिचारः । सुपामिति शेष इत्यन्ये । (४९) पङ्कजवाक्ये इति । पङ्कजरूपवाक्ये इत्यर्थः । (५०) अन्यथेति । तात्पर्यग्रहमनपेक्ष्यैव शब्दोपस्थितमात्रादर इत्यर्थः । (५१) गौरवादिति । लक्षणया कुमुदादिपदस्यापि पद्मादिपदस्येव पद्मानुभावकत्वापत्त्या पद्मान्वयबोधतात्पर्यकत्वस्यावश्यकत्वादिति भावः । न चैतच्छुकवाक्ये व्यभिचारि, तन्मते तात्पर्याभावादिति वाच्यम् । तद्भिन्नस्थले तद्धेतुत्वस्य विवक्षितत्वात् । वस्तुतो लाघवादर्थाध्याहारसिद्धौ पद्मोपस्थापकपदत्वं व्यभिचारीति भावः । योगमात्राभ्युपगमपक्षे परमयं दोषो न तु योगरूढिपक्षइति भ्रमवान् शङ्कते । (५२) अथैवमिति । कर्तृत्वशक्तस्य डप्रत्ययस्य कृतिविरहदशायां न प्रयोग इत्यर्थः । (५३) प्रत्ययस्य, डप्रत्ययस्य । (५४) योग्यतेति । कृतेर्योग्यताविशिष्टशक्तत्वादित्यर्थः । शङ्कितुर्भ्रान्तिं खण्डयति । (५५) अन्यथेति । (५६) विवादाभाव इति । तदा पद्मानुभवार्थमेव परेण रूढेः स्वीकार्यत्वादित्यर्थः । (५७) तत्रापीति । व्यक्तिवचनान्यायात्पद्मान्वयेन कुमुदान्वयस्वीकर्तुरित्यर्थः ॥

(५८) व्युत्पन्नस्य, गृहीतशक्तिकस्येत्यर्थः । (५९) प्रतिबन्धकं विनेति । बाधकं विनेत्यर्थः । (६०) पदज्ञानमिति । गृहीतशक्तिकपदज्ञानमित्यर्थः । (६१) दृष्टेति । गवादिपदे दृष्टान्वयव्यतिरेकत्वादित्यर्थः । (६२) लघुत्वाच्चेति । दृष्टेनैवोपपत्तावदृष्टस्य तथात्वकल्पने गौरवमित्यर्थः । ननूक्तरीत्या पद्मानुभवोपपत्तौ पद्मेन समं पङ्कजपदस्य गृहीतसंबन्धत्वमेवासिद्धम् । अन्यथा गृहीतसंबन्धस्य तस्य स्मारकत्वे शक्तिसिद्धिः, तत्सिद्धौ च गृहीतसंबन्धस्य स्मारकत्वमित्यन्योन्याश्रयापत्तिरित्यरुचेराह । (६३) एवमिति । (६४) जातिविशेषे, संकरजातिविशेषे, तदुक्तम् ॥

शूद्रायां करणो वैश्याद् माहिष्यो विट्स्त्रियां नृपात् ।
रथकारस्तु माहिष्यात्करण्यां यस्य संभवः ॥

इति । (६५) तथा चेति । अत एव तत्र विद्याप्रयुक्तिकल्पनमपि, अन्यथा योगेन त्रैवर्णिकपरत्वे तदपि न स्यादिति भावः । ननूक्तजातिविशेषसंस्कारोपस्थितावपि तद-

ज्जातिविशेषवत एवाधानं विधीयतइति राद्धान्तव्याघातः । (६६) यथा च शाब्दः संनिधिरन्वयबोधाङ्गं तथोक्तमासत्तिप्रस्तावे ॥

(६७) स्यादेतत् । पद्मे नियतप्रयोगरूपसंबन्धेन पङ्कजपदादेव पद्मस्मृतिरस्तु । एवं च पद्मे विभक्त्यर्थान्वयः शाब्दानुभवप्रवेशश्चोपपद्यते । पङ्कजपदप्रतिपाद्यत्वात् । न च प्रतिपाद्यता वृत्त्यैवैतदुपयोगिनी । पाचकमानयेत्यादौ वाक्योपस्थाप्ये तदभावात् । न च पदा(६८)द्वृत्त्यैव स्मृतिः, किं तु संबन्धिज्ञानाद्वृत्तेरपि संबन्धत्वेन स्मृत्युपयोगात् । अन्यथा पदाच्छक्तेः स्मृतिर्न स्यात् । गवादिपदे त्वेवं स्मृतिसंभवेप्यन्वयानुभवार्थं शक्तिरित्युक्तम् । एतेन पङ्कजपदान्नियमतः पद्मज्ञानं न वृत्तिं विना, अतो लक्षणाद्यभावे शक्तिरित्यपास्तम् । ज्ञानं हि स्मृतिरनुभवश्च शक्तिं विनाप्युपपन्नं न तां कल्पयति, अनन्यलभ्यस्यैव शब्दार्थत्वात् । अन्यथा शक्तिं विना पदा (६९) न्नोपस्थितिरित्यन्वयेपि शक्तिलक्षणोच्छेदश्च । "पङ्कजं पद्ममुच्यते" इति प्रसिद्धार्थपदसामानाधिकरण्यात्पद्मस्य ज्ञापकं तत्सिध्यति, न तु तच्छक्तम् (७०) अत एव पङ्कजपदं पद्मशक्तं नियमतस्तत्स्मारकत्वात् पद्मपदवदिति निरस्तम् । (७१) शक्तौ व्यभिचारात् । (७२) अनन्यलभ्यत्वस्य (७३) पद्मानुभावकत्वस्य चोपाधित्वाच्चेति ॥

उच्यते । नियतपद्मस्मृतेरुक्तसंबन्धेन पङ्कजपदसाध्यत्वे (७४) पद्मवत् तद्व्याप्यव्यापकयोरपि नियतस्मृतिप्रसङ्गः । अथ पद्मे प्रयोग एव पद्मएव प्रयोग इति नियतसंबन्धेन पद्मेतरव्यावृत्तेन पद्मस्यैव पदात्स्मृतिः । न चैवं नियतप्रयोगादेव शक्तिसिद्धिः, अनन्यलभ्यस्यैव पदार्थत्वादिति चेत्, तर्हि ज्ञातस्या(७५)स्य हेतुत्वे सकलप्रयोगादर्शिनो बहुधा पद्मएव गृहीतप्रयोगस्य समव्याप्तिज्ञानाभावान्न नियता पद्मस्मृतिः स्यात् । स्वरूपसतस्तथात्वे वा गृहीतपद्मप्रयोगस्यापि ततो नियतपद्मस्मृतिप्रसङ्गः । अथ यादृशप्रयोगस्त्वया शक्तिग्राहकत्वेनाभिमतः स एव पद्मस्मारकोस्तु । न च पद्मत्वस्यैव प्रयोगसमव्याप्तत्वेन गृहीतस्य (७६) सौरभादेरुपाधेस्ततः स्मृतिप्रसङ्गः । तवापि शक्तिग्रहप्रसङ्गात् । (७७) तयोस्तुल्यत्वेपि शक्तिग्राहकप्रमाणे लाघवादितर्कावतारान्नोपाधौ शक्तिरिति यदि, (७८) तदा तर्कसहकृत एव शक्ति-

---

नुभवार्थमेव रूढिरस्तु, नहि तस्यापि पद्मत्ववदवयवैरेवानुभवः । अवयवार्थानुपहितस्यैव जातिविशेषस्य नित्यमवगतेः । न च पङ्कजवत्तत्रापि रूढियोगयोरविरोधेन योगार्थोपहितरूढ्यर्थप्रतीतौ बाधकाभावाद् रथकारणयोग्यजातिविशेषवत एवाधानसिद्धिरिति वाच्यम् । परस्यैवमनभ्युपगमात् । अत एव रूढ्यर्थस्य शीघ्रोपस्थितत्वादित्युक्तम् । अन्यथा योगार्थसाहित्येनैवोपस्थितौ तदनुपपत्तेः । अन्यथा पङ्कजपदवद् अत्रापि योगरूढिरेवेति क्वचित्परस्य तदभ्युपगमात् क्वचिन्नित्यसंभवदुक्तिक्रमापद्येतेत्यनुशयानः शब्दाध्याहारयुक्तिमेव स्मारयति (६६) यथा चेति । शब्दाश्रयत्वे शक्तिरित्येव मतं सम्यगिति भावः ।

अस्तु गृहीतसंबन्धं पङ्कजपदं पद्मस्मारकं तथापि न शक्तिसिद्धिरित्याह । (६७) स्यादेतदिति । तथा च न शब्दसन्निधिभङ्गोपीति भावः । (६८) वृत्त्यैवेति । यद्यपि शाब्दबोधहेतुपदार्थोपस्थित्यनुकूलपदपदार्थसंबन्धत्वं वृत्तित्वमत्रापि, तथापि वृत्तिपदमत्र शक्तिलक्षणान्यतरपरं, साक्षादिति शेषः । अन्यथा पाचकत्वस्यापि परम्परया वृत्त्युपस्थापितत्वेनायिमदोषस्यासंगतत्वापत्तिः । (६९) नोपस्थितिरिति । नानुभव इत्यर्थः । पदादन्वयस्मृतेरभावात् । (७०) अत एवेति । नियमतस्तत्स्मारकत्वस्य हेतोरन्यथासिद्धत्वादित्यर्थः । लाक्षणिके व्यभिचारवारणाय नियमत इत्युक्तम् । दोषान्तरमाह । (७१) शक्ताविति । सामान्यव्याप्ताविति शेषः । विशेषव्याप्तावाह । (७२) अनन्यलभ्यत्वस्येति । अनन्यलभ्यार्थकत्वस्येत्यर्थः । (७३) पद्मेति । पङ्कजशब्दे ऽवयवानामेवानुभावकत्वमतः पङ्कजसमुदायपक्षे न साधनव्यापकत्वशङ्केति भावः । यद्यपि शक्तिवत्तदनुभावकत्वमपि संदिग्धं, तथापि संदिग्धोपाधिः स्यादिति भावः ।

(७४) पद्मवदिति । पद्मत्ववदित्यर्थः । पङ्कजपदप्रयोगविषयवृत्तित्वेन संबन्धेन यदि स्मारकता तदैव दूषणं, यदि च पद्मत्वादिविशिष्टे नियतप्रयोगरूपसंबन्धस्तथा तदा तत्प्रकारकप्रतीत्यापत्त्या कुमुदत्वादिविशिष्टे तत्प्रयोगाभावाच्च नियतस्मृतिप्रसङ्गः । एवं च तत्र वक्ष्यमाणदोषो बोध्यः । (७५) अस्येति । समनियतस्येत्यर्थः । (७६) सौरभादेरिति । सौरभविशेषवत्त्वादेरित्यर्थः । तथा च सकलपद्मवृत्तित्वपद्मेतरव्यावृत्तत्वमर्थसिद्धमिति भावः । (७७) तयोरिति । पद्मसौरभविशेषवत्त्वयोरित्यर्थः । (७८) तदेति । यद्यपि स्मारकसंबन्धे सति गुरोरपि स्मरणाच्च तर्कस्य तत्प्रतिबन्धकत्त्वं तयात्वादर्शनात्, शक्तिग्रहस्तु पद्मत्वे लघुनि युज्यते, तथापि लघुत्वे सति नियतप्रयोगविषयवृत्तित्वमेव संबन्धः स्मारकः,

ग्राहकत्वाभिमतः संबन्धः पद्मस्मृतिहेतुरस्तु । तर्काद्यनवतारेपि बहुधा गृहीतप्रयोगस्य पद्मस्मृतिदर्शनान्न तथेति चेत्, तर्हि तथापि तर्कं विना शक्तिग्राहकाभावात्कथं पद्मस्मृतिरिति तुल्यम् । न चैवं (७९) तत एव शक्तिग्रहोपि स्याद्, अनन्यलभ्यस्यैव शब्दार्थत्वादिति । मैवम् । एवं गवादिपदेपि शक्तिग्राहकत्वाभिमतादेवंविधप्रयोगादेव ज्ञानाद्गवादौ (८०) स्मृत्यनुभवौ स्यातां, किं शक्त्या । (८१) तस्मात् पदार्थाना नियता स्मृतिः (८२) शक्तिसाध्या वा नियतसंबन्धसाध्या वा वृत्तिसाध्या वा । तत्र (८३) परिशेषादिह शक्तिसाध्यैव । न च शक्तिस्मृतौ व्यभिचारः । शक्तिस्मारकत्वाभिमतात्पदात्पदार्थस्यैवाहत्य स्मरणं न शक्तेः, (८४) हेत्वभावात् (८५) कल्पनागौरवाच्च । (८६) संबन्धिनं विना संबन्धस्यास्मरणेन प्रथमं पदार्थस्मरणस्यावश्यकत्वाच्च । पदार्थस्मृतेश्च शक्तिविषयत्वे मानाभावात् । (८७) उद्बुद्धसंस्कारविषयत्वाद्यदि शक्तिरपि तद्विषयः, (८८) तथापि पदार्थशक्तत्वेनैव ज्ञातस्य पदस्य शक्तिस्मारकता, (८९) न तु शक्तिसंबन्धित्वेना(९०)न्यथासिद्धत्वात् । (९१) यद्वा पदान्नियमतः स्मृतिर्नियत(९२)संबन्धसाध्या । शक्त्यापि समं पदस्य शक्त्याश्रयत्वमेव नियतः संबन्धः । अपि च कुमुदे ऽवयवशक्तिप्रतिबन्धार्थं रूढिः । न च नियतपद्मस्मृतिरेव प्रतिबन्धिका, (९३) रूढिं विना नियतस्मृतेरभावात् । (९४) अत एव न व्यक्तिवचनन्यायेपि, न चैकं पदमेकदैकेनैव रूपेण प्रवर्तते, अतो न पद्मत्वपङ्कजत्वयोर्धीरिति वाच्यम् । अवयवसमुदाययोर्भेदात् । (९५) लम्बकर्णादिपदे व्यभि-

---

स च न सौरभविशेषइति तात्पर्यम् । (७९) तत एवेति । तादृशप्रयोगादेवेत्यर्थः । (८०) स्मृत्यनुभवाविति । शक्तिवत्तस्याप्यनतिप्रसक्तत्वादिति भावः । ननु शक्तिग्राहकाभिमतप्रयोगात्त्र शक्तेरन्यथासिद्धिः । नहि शक्तिः प्रयोगादेव ज्ञायते । तथा च व्यवहारादिना शक्तिग्रहे ऽन्वयबोधो न स्यात् । स्याच्च सादिदेवदत्तादिपदादन्वयबोधः । नियतप्रयोगाभावादिति चेत् । न । प्रकृतेपि तुल्यत्वात् । किं चैवं गवादिपदे पदार्थानियतस्मृतित्वावच्छेदेन शक्तेः प्रयोजकत्वेन कल्पनात्तदत्रापि तथा, तदिदमाह । (८१) तस्मादिति । (८२) शक्तिसाध्येति । शक्तिप्रयोज्येत्यर्थः । तेन लाक्षणिकार्थस्मृतौ न व्यभिचारः । शक्योपस्थितिद्वारा शक्तेस्तत्रापि प्रयोजकत्वात् । यद्वा नियमगर्भहेतोरेव तत्राभावान्न व्यभिचारः । न च समवायेन पदादाकाशस्मृतौ व्यभिचारः । पदाधीनत्वेन शाब्दबोधानुकूलत्वस्य विवक्षितत्वात् । एवं च वचनेत्यादिशङ्का यथाश्रुत इति बोध्यम् । अग्रिमसाध्यद्वये सामान्येनापि रूपेण शक्तेरेव सिद्ध्यतीत्याह । (८३) परिशेषादिति । नियतप्रयोगादिसंबन्धस्य दूषितत्वाल्लक्षणादेश्चाभावादिति भावः । (८४) हेत्वभावादिति । शक्तिस्मरणानुकूलशक्त्यभावादित्यर्थः । तत्कल्पने गौरवमित्याह । (८५) कल्पनेति । (८६) संबन्धिनमिति । यद्यपि संयोगादिपदजन्यस्मृतौ व्यभिचारस्तथापि संबन्धिघटितरूपेण संबन्धिस्मरणे तथा नियमः । शक्तित्वस्य संबन्धिघटितत्वादिति भावः । नन्वेवं विस्मृतशक्तेरपि पदार्थस्मृतिः स्यात् । तथा च शक्त्यंशेपि संस्कारोद्बोध आवश्यक इति सामग्रीबलादेव विशिष्टस्मरणम् । न च प्रथमं पदार्थास्मरणे विशेषणज्ञानाभावान्न विशिष्टस्मरणं, गवादिपदादपि विशिष्टस्मरणाभावापत्तेः । यदि च स्मरणे तत्र हेतुः, पूर्वानुभवरूपमेव वा हेतुः, तदा प्रकृतेपि तुल्यमिति शक्तिस्मृतौ व्यभिचारतादवस्थ्यमित्याह । (८७) उद्बुद्धेति । निराकरोति । (८८) तथापीति । तथा चानन्यगत्या पदार्थशक्तत्वेनैव ज्ञातं पदं शक्तेरपि स्मारकं कल्प्यतइति शक्तिस्मृतिरपि शक्तिसाध्येति न व्यभिचारः, नहि स्वशक्तिसाध्येति साध्यमिति भावः । (८९) न त्विति । येन शक्तिनिरूपितसंबन्धस्य शक्तिभिन्नत्वेन व्यभिचारशङ्का स्यादिति भावः । (९०) अन्यथेति । पदार्थशक्त्यैवान्यथासिद्धत्वादिति भावः । ननु पदस्यापि संबन्धित्वेन स्मारकता, न तु पदत्वेन, मानाभावाद्गौरवाच्च । न च शक्तिसंबन्धित्वेन पदज्ञानमतो न तत्स्मारकमित्यरुचेराह । (९१) यद्वेति । उक्तबाधकानियतप्रयोगरूपसंबन्धे नार्थान्तरम् । (९२) संबन्धसाध्या । तज्ज्ञानसाध्येत्यर्थः । तेन शक्तिभ्रमजन्यस्मृत्यादौ न व्यभिचारः । यद्यपि शक्तेः संबन्धत्वाच्छक्तिग्रहकाले तत्संबन्धस्यापि भाने मानाभावः । तथापि शक्तेः स्वरूपतो ज्ञानं नान्वयबोधप्रयोजकं, किं त्वनुभवजनकतावच्छेदकत्वेनेति पदस्य तद्धत्वेन भाने शक्तेरपि संबन्धो बोध्यतइति भावः । न चैवं पदविशेष्यकमेव स्मरणं स्यान्न पदार्थविशेष्यकमिति वाच्यम् । हस्त्यादिना हस्तिपकादिस्मृतेर्हस्त्यादिगोचरत्वादर्शनेन तदंशएव संस्कारोद्बोधकल्पना, पदार्थविशेष्यकं संस्कारान्तरमेव पदमुद्बोधयतीत्यपि कश्चित् । (९३) रूढिं विनेति । उक्तयुक्तेरिति भावः । (९४) अत एवेति । रूढिं विना नियतस्मृतेरभावादेवेत्यर्थः । (९५) लम्बकर्णेति । समासशक्तिवादिनः परस्य मते तद्गुणसंविज्ञानबहुव्रीहौ योगरूढिभ्यां लम्बकर्णवत्पुरुषप्रतीतेरित्यर्थः । के चित्तु लम्बकर्णपदं कर्णाटे रूढं

चाराच्च, तर्हि (९६) तद्वदेव रूढ्या नावयवशक्तिप्रतिबन्ध इति चेत् । न । (९७) तत्रावयवार्थे क्रियान्वयेनाप्रतिबन्धात् । नानार्थे च नानार्थानुभवान्नैकशक्त्या ऽन्यशक्तिप्रतिबन्धः ॥

लम्बकर्णवति यौगिकमिति लम्बकर्णत्वेन कर्णाटत्वेन च युगपदेव प्रवर्त्ततइत्याहुः । लम्बकर्णपदं वास्तु शाकभेदे शक्त ये।गेन कर्णतुल्यदलस्य लम्बताप्रतीतिर्व्यभिचार इत्याहुः । (९६) तद्वदेवेति । लम्बकर्णादिपदवदेवेत्यर्थः । (९७) तत्रेति । फलबलेन क्वचिदेव प्रतिबन्धो न सर्वत्रेति भावः । अत्रापि प्रतिबन्धः कुमुदमभिप्रेत्य पद्मे ऽवयवार्थस्य भानादिति ध्येयम् ॥

॥ अथ वेदान्तकौस्तुभप्रभायाः ॥

॥ प्रस्तावः ॥

यदीयभजनस्पृहा भवति भाग्यभाजां नृणां
स्मृतः किल करोति यः सकलविघ्ननिर्मूलनम् ।
तनोत्यखिलमङ्गलं निजजनानुकम्पाकरः
सुरासुरनमस्कृतस्तमनिशं प्रभुं भावये ॥ १ ॥

अथापूर्वं कमपि निबन्धमहमिह वाराणस्यामनुसरन् विविधविद्यानिधेः श्रीमतो हरिश्चन्द्रश्रेष्ठिनः परमोदारसरस्वतीसदने वेदान्तकौस्तुभप्रभाख्यां ब्रह्मसूत्रव्याख्यामवलोक्य सनकसंप्रदायप्रवर्तकतैलङ्गभूसुरनिम्बार्काचार्यप्रचारितद्वैताद्वैतमतानुयायिमुकुन्दभट्टान्तेवासिना सुन्दरभट्टादिप्रशिष्येण तैत्तिरीयप्रकाशादिबहुग्रन्थकर्त्रा काश्मीरिकेशवभट्टेन विरचितां प्रायोऽष्टसहस्रश्लोकसंख्यामितां सुप्राचीनां ब्रह्मसूत्राणां भक्तिज्ञानपरतोन्नयनेन मनीषिजनमनोविनोदक्षमामवधार्य समस्तगीर्वाणगीःसारविचारपरायणस्य न्याय्यपथैकावलम्बिनः श्रीयुमतः प्रभुवरस्य ग्रिफिथमहाशयस्यानुमत्या काशीविद्यासुधानिधियोगेन बुधमण्डललोचनगोचरीभावाय मुद्रणविधया प्रचिकाशयिषुः साम्प्रतमस्मीति ।

पूर्वं सुदर्शनावतारेण तत्र भवता निम्बार्काचार्येण भगवत्कृष्णावतारव्यासप्रणीतानां ब्रह्मसूत्राणां वाक्यार्थरूपेण वेदान्तपारिजातसौरभाख्यः संदर्भः प्रणीतः ।

यः किल निम्बार्काचार्यो ऽद्वैतवादस्थापनार्थं प्रातरारभ्य शास्त्रार्थं कुर्वाणाय संध्यासमये परास्ताय संध्यां लङ्घयित्वा पुनः पुनः प्रार्थ्यमानत्वेऽपि दिवाकरानवलोकनाद् भोजनमकुर्वते कस्मैचिन्मायावादियतये स्वसदनवर्तिनिम्बद्रुमे स्वप्रकाशं निधाय तमेवार्करूपेण प्रदर्श्य भुज्यतां सविश्रम्भं यतिवर दिनमिदमिति यतिमतिमुद्भाव्य तं कृतभोजनं सुप्रसन्नं विसर्जयांचकार, ततः प्रभृति निम्बार्क इत्यन्वर्थसंज्ञामवाप ।

अथामुष्योक्तचरस्य वेदान्तपारिजातसौरभस्य शङ्खावतारेण ध्रुवसार्वज्ञतासंपादयित्रा श्रीनिवासाचार्येण वेदान्तकौस्तुभसंज्ञं भाष्यरूपेण विशदितमप्यतिदुरूहार्थतया विदुषामपि दुष्प्रवेशमाकलय्य तत्र सौकर्येण प्रवेशाय प्रोक्तचरनामधेयः काश्मीरिसूरिः परिमिताक्षरां वेदान्तकौस्तुभप्रभानाम्नीं सुलभामिमां वृत्तिं मुकुन्दभट्टनियोगेन रचयांचकार ।

सा खल्वियमतितमां मतिमतामवलोकनार्हेति विज्ञापयत्ययं जनः ।

सकलमनोरथपूरयिता च परमेश्वरः संपादयेदिदं मनीषितं मम प्रणम्य प्रार्थयमानस्येत्यलं पल्लवितेनेति शिवम् ॥

सांख्यशास्त्रप्रधानाध्यापकः ॥
त्रिपाठ्युपाह्ववेचनरामशर्मा कान्यकुब्जः ॥

॥ अथ ब्रह्मसूत्रवृत्तिरूपा ॥

॥ वेदान्तकौस्तुभप्रभा ॥

॥ तत्र प्रथमाध्यायस्य ॥

॥ प्रथमपादारम्भः ॥

जिज्ञास्यं च जगद्धेतुं शास्त्रयोनिं तदन्वितम् ।
श्रीकृष्णं नियमानन्दं वन्दे बुद्धिप्रदं गुरुम् ॥ १ ॥
नित्यं निवसतु हृदये श्रीनिम्बार्को मुनीन्द्रो नः ।
बुद्धिसरोजं स्वकरैरुद्दीपयन्नबोधतमो निघ्नन् ॥ २ ॥
श्रीश्रीनिवासमाचार्यं भाष्यकारं नमाम्यहम् ।
यस्य स्पर्शनमात्रेण ध्रुवः सर्वज्ञतां गतः ॥ ३ ॥
श्रीनिवासपदाम्भोजध्यानविध्वस्तकिल्बिषान् ।
श्रीमत्सुन्दरभट्टादीन् वन्देऽहं परमान् गुरून् ॥ ४ ॥
श्रीमुकुन्दं गुरुं नत्वा पूर्वाचार्योक्तवर्त्मना ।
ब्रह्मसूत्राणि संक्षेपाद् विव्रियन्ते स्वतुष्टये ॥ ५ ॥

इह खलु भगवान् वासुदेवः पुरुषोत्तमः श्रीकृष्णः कणभक्षाक्षपादसांख्यजैमिन्यादिभिः शास्त्रकृद्भिर्हैरण्यगर्भपाशुपतसौरगाणपत्यमतवादिभिश्च प्रणीतैः परतत्त्वापह्नवपरैरन्यविषयैः शास्त्रैर्भ्रान्तान् स्वभक्तिज्ञानहीनान् संकीर्णमतीन् जीवान् वीक्ष्य तेषु स्वज्ञानभक्ती द्रढयितुं कृष्णद्वैपायनरूपेण परतत्त्वप्रकाशकं समन्वयाविरोधसाधनफलाख्याध्यायचतुष्टयात्मकं शारीरकमीमांसाख्यं वेदान्तशास्त्रं सूत्रयामास ।

तस्य च व्याख्यानं सुदर्शनावतारः श्रीनिम्बार्काचार्यो वाक्यार्थरूपेण वेदान्तपारिजातसौरभाख्यं संगृहीतवान्।

तदपि शङ्खावतारः श्रीश्रीनिवासाचार्यो वेदान्तकौस्तुभाख्यभाष्यरूपेण विशदयामास।

तत्र सौकर्येण प्रवेशाय मिताक्षरा वेदान्तकौस्तुभप्रभाख्या सूत्रवृत्तिर्मया संगृह्यते॥

॥ अथातो ब्रह्मजिज्ञासा ॥ १ ॥

अत्रानन्तर्यार्थक एवाथशब्दः। नार्थान्तरपरः। उपक्रमवाक्यत्वात्। पूर्वनिर्वचनाद्। व्याख्यान्तरकथनमर्थान्तरम्। यथा माया रमाया धवः स्वामी माधवः।

अथवा मधुवंशे भवो माधव इति। स चात्र न संभवति। पूर्वनिर्वचनाभावात्।

नापि मङ्गलार्थकः। वेदान्तानां भगवत्स्वरूपगुणादिप्रतिपादनपरतया सर्वेषामपि वाक्यपदवर्णमात्राणां मङ्गलरूपत्वेन मङ्गलान्तरनिरपेक्षत्वात्।

नाप्यधिकारपरः। शब्दादिवद् ब्रह्मणोऽधिकार्यत्वाभावात्।

नाप्यारम्भपरः। वेदान्तानामनादित्वाभ्युपगमात्। अन्यथौपचारिकत्वापत्त्याप्राधान्यप्रसङ्गात्।

अतः परिशेषादानन्तर्यार्थक एवेति। श्रीसुन्दरभट्टपादैरेवमेवोक्तेः।

आनन्तर्यमपि केवलानन्तर्यमेव ग्राह्यम्। न तु हेतुभूतानन्तर्यम्। अतःशब्दोपादानात्।

एवं च सति धर्मजिज्ञासाया यथा वेदाध्ययनं पूर्ववृत्तं नियमविधिनापेक्षितं, तथा ब्रह्मजिज्ञासाया अपि नियमविधिना पूर्ववृत्तमपेक्षितम्। तत्र "मुमुक्षुर्भूत्वात्मन्येवात्मानं पश्ये"दिति श्रुतेर्मुमुक्षेति विज्ञेयम्। मुमुक्षासिद्धये च श्रद्धोपपत्तिपूर्वकगुरूपसत्तिवस्तुयाथात्म्यविवेकविरागवत्प्रपत्तितदनुग्रहप्रार्थनादिसाधनानीति। "श्रद्धाचित्तो भव"। "आचार्यदेहो भव"। "स गुरुमेवाभिगच्छेत्"। "यस्य देवे परा भक्तिर्यथा देवे तथा गुरौ"। "यो वै भूमा तदमृतं ततोऽन्यदार्तम्"। "नास्त्यकृतः कृतेन"। प्लवा ह्येते अदृढा यज्ञरूपाः"। "तद्यथेह कर्मचितो लोकः क्षीयते", एवमेवामुत्र पुण्यचितो लोकः क्षीयते"। "परीक्ष्य लोकान् कर्मजितान् ब्राह्मणो निर्वेदमायात्"। "मुमुक्षुर्वै शरणमहं प्रपद्ये।

श्रीकृष्ण रुक्मिणीकान्त गोपीजनमनोहर।
संसारसागरे मग्नं मामुद्धर जगद्गुरो॥

इत्यादिश्रुतिभ्यः। वेदाध्ययनधर्मजिज्ञासानित्यनैमित्तिकादीनां विवेकादिसंपत्त्यर्थकत्वाच्च स्वातन्त्र्येण पूर्ववृत्तत्वम्।

"तमेतमात्मानं वेदानुवचनेन ब्राह्मणा विविदिषन्ति यज्ञेन दानेन तपसानाशकेने"त्यादिश्रुतेः।

यस्य विवेकादयो न सन्ति तस्य तदर्थं धर्मजिज्ञासाद्यपेक्षा। अन्यथा धर्मस्वरूपज्ञानाभावे धर्मानुष्ठानानुपपत्तिः। धर्मानुष्ठानादिकं विना च बुद्धिशुद्ध्यभावेन विवेकादीनां दुर्घटत्वात्।

यस्य तु विवेकादयो जातास्तस्य न तदपेक्षा। फलप्राप्तौ सत्यां साधनानामप्रयोजकत्वात्। तत्र प्रवृत्त्यनुपपत्तेश्च।

विवेकादिना तु जन्मान्तरीयधर्माचरणस्येदानीमपि संस्कारात्मना सत्त्वमनुमीयते। अन्यथा विवेकादयो न स्युः। कारणाभावे कार्याभावनियमात्।

एवं च धर्मजिज्ञासाविषयभूतधर्मस्वरूपतत्साधनतदनुष्ठानप्रकारतत्फलविषयकज्ञानानन्तरमित्यादिपूर्वाचार्योक्तौ कर्मणां तज्ज्ञानादेश्च परंपरयैव साधनत्वाभ्युपगमादत्रापि तेषां विवेकादिकारणत्वमेवोक्तम्। न तु कर्मविवेकादिसमुच्चयः। अतो नाचार्योक्तिविरोध इति भावः।

अतः शब्दो हेत्वर्थः, अत उक्तश्रुतेः,

"आब्रह्मभुवनाल्लोकाः पुनरावर्तिनोऽर्जुन",

इति स्मृतेश्च कर्मफलस्य सान्तत्वसातिशयत्वनिश्चयात्। ब्रह्मज्ञानस्य च "तमेव विदित्वातिमृत्युमेती"त्यादिश्रुतेर्निरतिशयानन्तफलकत्वनिश्चयाद्धेतोर्मुमुक्षानन्तरं ब्रह्मजिज्ञासा कर्तव्येत्यध्याहृतविध्यर्थकपदेनान्वयः। ब्रह्मजिज्ञासेति कर्मषष्ठ्या समासः। कृद्योगा षष्ठी समस्यत इत्युक्तेः। न शेषषष्ठ्या। सन्प्रत्ययवाच्याया इच्छाया ज्ञानकर्मकत्वात्, ज्ञानस्य च ब्रह्मकर्मकत्वात्। तत्र सकर्मकक्रियायाः कर्मज्ञानं विना ज्ञातुमशक्यत्वात् प्रथमापेक्षितं कर्मैव षष्ठ्या वाच्यं, न शेषः। अत एव न चतुर्थ्यापि। जिज्ञासापदे इच्छाया मुख्यार्थत्वात्, तस्याश्च प्रथमं कर्मापेक्षितं, पश्चात् फलम्। ततश्चादौ कर्मज्ञानार्थं षष्ठीसमासो युक्तः।

ब्रह्मशब्देन च,

"स्वभावतोऽपास्तसमस्तदोषमशेषकल्याणगुणैकराशिम्।
व्यूहाङ्गिनं ब्रह्म परं वरेण्यं ध्यायेम कृष्णं कमलेक्षणं हरिम्"॥

इत्युक्तः श्रीकृष्ण एवात्राभिधीयते। तस्य,

"भगवानिति शब्दोऽयं तथा पुरुष इत्यपि।
निरुपाधौ च वर्तेते वासुदेवे सनातने॥

इति भगवच्छब्दवद्वासुदेवे सर्वेश्वर एव मुख्यवृत्तित्वात्। तद्विषयकमेव ज्ञानं, तथाभूतेष्यमाणज्ञानविषयके वेच्छेत्यर्थः। "आत्मा वा अरे द्रष्टव्यः श्रोतव्यो मन्तव्यो निदिध्यासितव्यः,"

"सोऽन्वेष्टव्यः स विजिज्ञासितव्यः," "भूमा त्वेव विजिज्ञासितव्य" इत्यादिश्रुतेः ।

परमते तु जिज्ञास्यो दुरुपपादः । विकल्पासहत्वात् । तथाहि, शुद्धो वा मायोपहितो वाऽज्ञानाध्यस्तेश्वरो वा जिज्ञासाविषयत्वेनाभिप्रेतः ।

नाद्यः, तस्याविषयत्वाभ्युपगमात् । अन्यथा मिथ्यात्वप्रसङ्गात् । शुद्धं ब्रह्म मिथ्या, जिज्ञासाविषयत्वात्, तव मते घटादिवत् । अपसिद्धान्तापत्तेः । अविषयत्वाभ्युपगमसिद्धान्तभङ्गाच्च ।

न द्वितीयः, जिज्ञासया श्रवणाद्यभ्यासजन्योपहितसाक्षात्कारेण तद्विषयकाज्ञाननाशेऽपि शुद्धविषयकाज्ञानस्य तादवस्थ्येनानिर्मोक्षप्रसङ्गात् । अप्रयोजकत्वाच्च ।

किंच,उपहितज्ञानं मोक्षहेतुर्न वा । नाद्यः । तस्यैव मुक्तोपसृप्यत्वप्रसक्त्या शुद्धाभ्युपगमस्य प्रयोजकत्वेन वैयर्थ्यात् । न द्वितीयः । जिज्ञासावैयर्थ्यापत्तेः । तदर्थकभाष्यादिशास्त्रप्रणयनस्य जलताडनसाम्यापत्तेश्च ।

नाप्यध्यस्तजिज्ञास्याङ्गीकारस्तृतीयः । अध्यासस्य सपरिकरस्य निरस्यमानत्वात् ।

तस्मात् स्वरूपगुणशक्त्यादिभिर्निरतिशयबृहत्तमो ब्रह्मशब्दवाच्यो भगवान् वासुदेवः श्रीकृष्ण एव जिज्ञास्य इत्युक्तम् ।

बृहति बृंहयति तस्मादुच्यते परं ब्रह्म । बृंहन्तो गुणा अस्मिन्निति ब्रह्म ।

"एष प्रकृतिरव्यक्तः कर्ता चैव सनातनः ।
परं च सर्वभूतेभ्यस्तस्माद्वृद्धतमोऽच्युतः" ॥

इत्यादिश्रुतिस्मृतिभ्यः । श्रुत्यर्थनिर्णायकस्यास्य सूत्रस्योपोद्घातरूपत्वाच्छास्त्रारम्भहेत्वनुबन्धा अप्यनेन निरूपिताः । ते त्वधिकारिविषयसंबन्धप्रयोजनाख्याः । तत्र श्रेयस्कामो मुमुक्षुरत्राधिकारी । विषयश्चास्य ब्रह्मशब्दाभिधेयः सर्वज्ञः स्वाभाविकाचिन्त्यानन्तयावदात्मवृत्तिशक्तिगुणाद्याश्रयो ब्रह्मरुद्रेन्द्रप्रकृतिपरमाणुकालकर्मस्वभावादिनियन्ता दोषास्पृष्टसीमा चिदचित्स्वाभाविकभिन्नाभिन्नत्वाश्रयो भगवान् वासुदेवः श्रीपुरुषोत्तमः ।

परमते तु विषयस्य दुर्निरूपत्वेन शास्त्रारम्भोऽसंभव एव । विकल्पासहत्वात् । तथाहि, तन्मते जीवब्रह्मैक्यं विषयः । तच्चैक्यमध्यस्तमनध्यस्तं वा । नाद्यः । अध्यस्तस्यावश्यं बाध्यत्वेन भेदस्य तात्त्विकत्वापत्तेः । द्वितीये,ऐक्यस्य ब्रह्माभिन्नत्वेन भेदस्तदवस्थ एव ।

नन्वैक्यस्य ब्रह्मभेदो नाभ्युपगम्यत इति चेन्न । ऐक्यस्य निर्विशेषब्रह्माभिन्नत्वे तत्त्वंपदार्थपराणां "सत्यं ज्ञानमनन्तं", "विज्ञानमानन्द"मित्यादीनामैक्यपरमहावाक्यैक्यस्वभाववैयर्थ्यापत्तेः । नचैक्यस्य स्वप्रकाशब्रह्माभिन्नत्वेन स्थितिप्रवृत्त्यादौ निरपेक्षत्वेऽपि लक्षितार्थभेदभ्रमनिवर्तकवृत्तिजनने पदार्थसापेक्षत्वेन स्वरूपपरवाक्यानामेकवाक्यतायाः सत्त्वाद् भेदरूपप्रतियोगिसापेक्षत्वेन तत्र सापेक्षत्वव्यवहार इति वाच्यम् । निर्विशेषब्रह्माभिन्नैक्यस्य कुत्रापि सापेक्षत्वासंभवात् । अभावसादृश्यादेः सप्रतियोगिकत्ववदैक्यस्य सापेक्षतायाः स्वाभाविकत्वात् ।

एतेन मन्मतेऽविनिवृत्ताद्वैतयोः सापेक्षयोरपि ब्रह्मैक्यमस्तु । तत्राभावत्वसापेक्षत्वादेर्मायिकत्वेन विरोधाभावात् । तव तु सापेक्षत्वनिरपेक्षत्वयोस्तात्त्विकत्वेन विरोधस्य दुष्परिहरत्वादिति निरस्तम् । त्वदभिमताद्वैतश्रुतिबोधस्याभावत्वादेः कल्पितत्वायोगात् । अन्यथा श्रुतेरप्रामाण्यापत्त्या द्वैतनिवृत्त्यादेरसिद्ध्यापत्तेः । ज्ञानस्य ज्ञानत्वेन दण्डादेः कारणत्वेनाभावसादृश्येच्छादेस्तत्त्वेन सापेक्षत्वेऽपि प्रमेयत्वदण्डत्वादिना निरपेक्षत्ववद्भेदत्वेन सापेक्षत्वेऽपि घटत्वादिना निरपेक्षत्वोपपत्तेः । न ह्यस्माकमेकरूपेण सापेक्षत्वनिरपेक्षत्वाङ्गीकार इति संक्षेपः । विस्तरस्त्वाकरे द्रष्टव्यः ।

प्रतिपाद्यप्रतिपादकभावलक्षणः संबन्धः । परमते तु विषयाभावे संबन्धानुपपत्तिरेव । श्रीभगवद्भावापत्तिलक्षणो मोक्षोऽत्र प्रयोजनम् ।

मद्भक्त एतद्विज्ञाय मद्भावायोपपद्यते ।
बहवो ज्ञानतपसा पूता मद्भावमागताः ॥

इति श्रीमुखोक्तेः । भावपदं च स्वयमेव व्याख्यातं श्रीमुखेन ।

इदं ज्ञानमुपाश्रित्य मम साधर्म्यमागताः ।

इति श्लोकेन । स एव साम्यसायुज्यब्रह्मामृतमहिमादिशब्दैरभिधीयते "निरञ्जनः परमं साम्यमुपैति", "नारायणे सायुज्यमाप्नोति", "ब्रह्म वेद ब्रह्मैव भवति", "जुष्टस्ततस्तेनामृतत्वमेति", "तन्महिमानमेति वीतशोक", इत्यादिश्रुतिभ्यः ।

परमते प्रयोजनं दुर्निरूपम् । असंभवात् । तथाहि, यस्य ब्रह्मभावापत्तिलक्षणो मोक्षः प्रयोजनत्वेनाभ्युपगम्यते तस्य चेतनस्यैकत्वमनेकत्वं वा । नाद्यः । चैत्रमैत्रादीनां सुखादिभोगसांकर्यप्रसङ्गात् । न चौपाधिकभेदस्य तन्नियामकत्वान्नोक्तदोषावकाश इति वाच्यम् । हस्तपादाद्युपाधिभेदेऽप्यनुसंधानदर्शनात् । न चान्तःकरणभेदोऽविद्याभेदो वा तन्नियामक इति वाच्यम् । चैतन्यैक्ये चक्षुरादिभेदवदन्तःकरणभेदस्याप्यप्रयोजकत्वात् ।

नन्वन्तःकरणभेदस्याप्रयोजकत्वेऽपि तदैक्याध्यासापन्नान्तःकरणभेदस्याननुसंधाने प्रयोजकताङ्गीकारान्नोक्तदोषप्रयोग इति चेन्न । निर्विशेषस्वप्रकाशे ज्ञाताज्ञातविभागहीने चेतनेऽन्तःकरणादेस्तादात्म्यारोपासंभवात् । उपरिष्टादध्यासस्य निराकरिष्ये ।

किंच, अनेकाविद्यासंबन्धस्य दुःखाद्यनुसंधानरूपस्यानर्थस्य च विशिष्टवृत्तित्वं शुद्धगतत्वं वा । नाद्यः । बन्धमोक्षयोर्वैयधिकरण्यात् । अन्त्ये च यच्छुद्धं चैत्रीयदुःखानुसंधातृ तदेव मैत्रीयदुःखानुसंधात्रिति सांकर्यं तदवस्थम् ।

नन्वविद्यानिवृत्तिरूपबन्धनिवृत्त्यात्मकमोक्षस्य शुद्धगतत्वेऽपि दुःखाद्यनुसंधातृत्वस्योपहितगतत्वान्न शुद्धे तदापादकत्वमिति चेन्न । दुःखाद्यनुसंधानरूपानर्थस्योपहितनिष्ठत्वेन बन्धमोक्षवैयधिकरण्यस्य तादवस्थ्यात् । बद्धस्य निवृत्तिरेव न तु मोक्ष इत्यापत्तेश्च ।

ननूपाधेः कल्पितत्वान्निवृत्तावप्युपधेयस्याकल्पितत्वेन निवृत्त्ययोगान्मोक्षान्वयित्वमिति चेन्न । शुद्धभिन्नतया भवदभिमतस्य विशिष्टस्य मृषात्वेन तत्र मोक्षान्वयासंभवात् ।

ननु दुःखाद्यनुसंधानमुपहितगतमप्यविद्यारूपबन्धस्य शुद्धवृत्तित्वात् तत्रैव मोक्ष इति तयोर्वैयधिकरण्याभाव इति चेन्न । दुःखाद्यनुभवद्वारेणैवाविद्याया अनर्थत्वात् । यत्र दुःखाद्यनुसंधानं स एव बद्धः । तस्यैव मोक्षौचित्यात् । नाप्यविद्यावच्छिन्नद्वारावस्थात्रयातीते शुद्धेऽप्यनुसंधानमिष्टमिति वाच्यम् । दुःखानुसंधातुरवस्थात्रयातीतत्वासंभवात् ।

अथ चोपहितस्योपाधिकृतत्वेनोपाधेः शुद्धगतत्वमेव वक्तव्यम् । तथात्वे च किमेकैकोपाध्यपगमे मोक्ष उत सर्वोपाध्यपगमे । आद्ये, सदा मुक्तिरेव न तु बन्ध इत्यापातात् । द्वितीये, अधुना बन्ध एव, न कस्यापि मुक्तिरित्यङ्गीकृतं स्यात् ।

न च जीवानामनेकत्वाद् येनोपाधिना यस्य परिच्छिन्नत्वं तस्मिंश्चेतने तदुपाध्यपगमेन मोक्ष इति वाच्यम् । विकल्पासहत्वात् । तथाहि, जीवनानात्ववादे चेतनभेदो वास्तव औपाधिको वा । आद्ये, अद्वैतवादो दत्ततिलाञ्जलिः स्यात् । तवानङ्गीकाराच्च । अस्मत्पक्षप्रवेशाच्च । द्वितीये, एकोपाधिविनिर्मुक्तस्यापि शुद्धस्योपाध्यन्तरावच्छिन्नत्वेन कदापि मुक्तेरसंभवात् । भग्नोपाधेश्चेतनस्योपाध्यन्तरोपहितेभ्यो भिन्नत्वाभावात् ।

ननु मा भूदनेकजीववादे मुक्तेः सामञ्जस्यम् । एकजीववादे तु सर्वोपाध्यपगमान्मोक्ष इति चेन्न । शुकादिमोक्षविधायकशास्त्रस्य बाधापत्त्या तन्मतस्यैवाप्रामाणिकत्वात् । दुःखाद्यनुसंधानस्याव्यवस्थापत्तेश्च ।

किंच, उपाधिरेकदेशेन संबद्धः कृत्स्नेन वा । आद्ये, त्वन्मते स्वाभाविकांशाभावेनौपाधिकत्वमेव वाच्यं, तथात्वे चानवस्थाप्रसङ्गः । अन्त्ये न भेदकता । कृत्स्नस्यैकोपाधिनैव ग्रस्तत्वात् ।

न च सर्वविकल्पासहत्वेन मिथ्याभूतस्यैवोपाधेर्मिथ्याभेदप्रयोजकत्वमिति वाच्यम् । उत्तरास्फूर्तौ प्रधानविकल्पे विकल्पाद्यसहत्वमिति सांख्यबौद्धाभ्यामपि वक्तव्यत्वेन तन्निरासासंभवात् । मृषाभूतस्यापि व्यावहारिकस्य त्वया व्यवस्थाङ्गीकारात् । अन्यथा जीवजडयोर्विश्वकर्तृत्वान्तर्यामित्वादिकं निरस्येश्वरे तत् समर्थयतः समन्वयाध्यायस्योच्छेदापत्तेः । तव मते परमेश्वरकर्तृत्वस्यापि व्यावहारिकत्वात् ।

तस्माद्बद्धमुक्तदुःखाद्यनुसंधानानुपपत्त्या चितो वास्तवो भेदोऽवश्यमभ्युपगन्तव्य इति सिद्धं भेदस्यापि पारमार्थिकत्वम् ।

ननु बन्धमोक्षादिव्यवस्थायाः स्वप्नवद्यावदविद्यमुपपद्यमानत्वमेवेति चेन्न । तस्मिन्नेकस्मिन्नपि सुप्ते सर्वजगदप्रतीत्यापत्तेः ।

ननु समष्ट्यभिमानिनोऽस्वापान्नोक्तदोष इति चेच । सृष्टिमारभ्याप्रलयमप्रसुप्तत्वस्य जीवेऽसंभवात् । जीवैक्याङ्गीकारेऽहं त्वमयमिति प्रत्यक्त्वपराक्त्वप्रत्ययानामुच्छेदापत्तेश्च । नहि देवदत्तस्य त्वमिति धीविषयस्याहमिति धीविषयत्वं युक्तमित्यर्थः ।

ननु नायं दोषः, भिन्नान्तःकरणभेदाध्यासेन तत्तदन्तःकरणमादायाहंत्वमादिप्रत्ययानां सविषयत्वव्यवस्थोपपत्तेरिति चेन्न । योगिनः कायव्यूहे नानान्तःकरणतादात्म्यारोपेऽप्यहमित्येव प्रतीतेः । न च तत्रान्तःकरणस्यैकत्वमेवेति वाच्यम् । बाह्यकरणानामप्यैक्यापत्त्या कायव्यूहस्यैवासंभवात् ।

किंच, त्वन्मत एकस्या एव चितः सर्वान्तःकरणैरभेदाध्यासेन चैत्रस्य शुक्तिसाक्षात्कारेण रूप्यभ्रमनिवृत्तावन्येषामपि तन्निवृत्त्यापत्तिः । अन्तःकरणस्य भोगाद्यव्यवस्थापकत्वात् । अन्यथा योगिकायव्यूहे देहेऽपि भोगाद् भेदकः स्यात् ।

अथ चैक एव जीवः सर्वकल्पकः । तेनैव सर्वमिदं कल्पितमिति चेन्न । जीवस्य कारणतां निषिध्य परमेश्वरकारणत्वबोधकानां श्रुतीनां बाधापत्तेः । सार्वज्ञ्यबोधकश्रुतीनां निर्विषयत्वापत्तेश्च । जीवभिन्नेशाभावाज्जीवे सार्वज्ञ्यस्यानुभवविरोधाच्च ।

न च समष्ट्यभिमानिनो जीवस्यैव सार्वज्ञ्यादियोगोऽभ्युपगम्यत इति वाच्यम् । लोके जीवत्वेन प्रसिद्धेषु सार्वज्ञ्यादेः प्रत्यक्षादिना बाधितत्वात् । प्रसिद्धभिन्नस्य सार्वज्ञ्यस्वीकारे तस्यैवेश्वरत्वेनेष्टापत्तेरिति संक्षेपः ।

द्वितीये, चेतनानेकत्वपक्षे तद्भेदस्यौपाधिकत्व उक्तदोषाणां योगः ।

किंच, औपाधिकभेदाङ्गीकार उपाधिगमनकाले तदवच्छिन्नस्य कौटस्थ्याद् गत्यभावेन पदे पदे बन्धमोक्षौ स्याताम् । अनादिबद्धस्याकस्मात् साधनं विनैव मोक्षः कूटस्थनित्यशुद्धबुद्धमुक्तस्वभावस्याकस्मान्निःकारणमेव बन्ध इत्यर्थः । कृतनाशाकृताभ्यागमप्रसङ्गश्च । स्वाभाविकत्वे चास्मत्पक्षप्रवेशोऽद्वैतभङ्गश्च ।

ननु मा भूदुपाध्यवच्छिन्नस्योक्तदोषकदम्बाज्जीवत्वं, किंतु चेतनप्रतिबिम्ब एव जीवः, तस्याविद्याया अन्तःकरणस्य वोपाधेः कल्पितत्वेन तन्नाशे जीवब्रह्मैक्यसिद्धिरिति चेन्न । प्रतिबिम्बभाव उपाधेर्बिम्बस्य च सावयवत्वरूपवत्त्वप्रमाणविषयत्वादीनां तत्कारणानामभावात् ।

तथाहि, बिम्बरूपो रूपी प्रत्यक्षविषयोऽवयववान् वा,नीरूपःप्रमाणाविषयो निरवयवो वा । नाद्यः । अनङ्गीकारात् । अन्यथा निर्विशेषाद्वितीयवादभङ्गापत्तेः । न द्वितीयः । असंभवात् । नीरूपस्य च रूपस्य प्रत्यक्षगोचरस्वाश्रयद्रव्यविशिष्टस्यैव सावयवे प्रत्यक्षगोचर एव द्रव्ये प्रतिबिम्बभावापत्तिदर्शनान्न केवलस्य । अतो न तत्र व्यभिचारः शङ्कनीयः ।

न चाकाशस्य निरवयवनीरूपस्यापि प्रतिबिम्बदर्शनाद्व्यभिचार इति वाच्यम् । पञ्चीकृतस्याकाशस्य सावयवत्वरूपित्वचाक्षुषत्वादीनां सत्त्वेन प्रतिबिम्बनस्याविरुद्धत्वात् । अपञ्चीकृतस्य केवलस्य तु प्रत्यक्षगोचरत्वाभावेन प्रतिबिम्बकल्पनाया अप्रामाण्यात् । अन्यथा कालधर्मादीनां शब्दस्पर्शादौ वायुपिशाचादीनां चाक्षुषाणां कालादौ प्रतिबिम्बनापत्तेः । तच्च दृष्टिश्रुत्यगोचरत्वादनुपपन्नम् ।

किंच, सूर्यचन्द्रादिप्रभामण्डलयुक्तस्यैवाकाशस्य प्रतिबिम्बभावापत्तिः, न केवलस्य । अन्यथान्धकारेऽपि तद्दर्शनापत्तिः । अतो न तत्र व्यभिचारावकाशः ।

किंच, उपाधिसंबन्धो जीवे स्वाभाविक औपाधिको वा । नाद्यः । त्वन्मतेऽनिर्मोक्षप्रसङ्गात् । न द्वितीयः । अनवस्थानात् । अन्योन्याश्रयाच्च ।

न चोपाधिरेव स्वसंबन्धहेतुरिति वाच्यम् । आत्माश्रयात् । वस्तुतस्तु बिम्बसमसत्ताक एवोपाधौ लोके प्रतिबिम्बदर्शनात् प्रकृतेऽविद्याद्युपाधीनां ब्रह्मसमसत्ताकत्वाभावान्नेष्टसिद्धिः । अन्यथा मृगमरीचिकाजलेऽपि सूर्यादिप्रतिबिम्बदर्शनापत्तिः ।

न च दर्पणस्थनेत्रप्रतिफलितमुखादिदर्शने व्यभिचारः । सोपाधिकारोपे दृष्टस्य स्वबाध्यौपाधिकत्वस्य तत्रासत्त्वेन नेत्रदेशावच्छेदेन तन्मुखप्रतिफलनमित्यङ्गीकारात् । तत्राप्युभयोः प्रतिबिम्बयोः प्रतिबिम्बभावेन स्थितत्वेऽपि बिम्बसमसत्ताकोपाध्युपहितत्वस्य नियामकत्वाच्च व्यभिचार इत्यर्थः ।

किंच, उपाधेर्बिम्बान्यदेशावस्थान एव प्रतिबिम्बभावो न त्वेकत्रैव । प्रकृते तदभावादिष्टासिद्धिः ।

अयं भावः । उपाधिर्ब्रह्मैकदेशवृत्तिर्व्याप्यवृत्तिर्वा । नाद्यः । ब्रह्मणः सदेशत्वापत्तेर्निर्विशेषत्वहानिः । द्वितीये, सर्वस्याप्युपाधिमत्त्वे प्रतिबिम्बनासिद्धिः । सुतरां शुद्धहानिश्च । इतरथा जलनिमग्नानामपि जलौकसां प्रतिबिम्बो दृश्येत । न तु तदस्ति, तथा प्रकृतेऽपि बोध्यम् ।

तस्माद्बिम्बप्रतिबिम्बवज्जीवब्रह्मैक्यं वक्तुमेवाशक्यत्वात् सर्वथाप्यनुपपन्नमिति सिद्धम् ।

किंच, "आचार्यवान् पुरुषो वेद" इति श्रुतेरेकजीववादे ह्युपदेष्टृव्यादन्यस्य चेतनस्याभावादुपदेष्टुरभावे तत्त्वज्ञानासंभवः । तस्मिंश्च मोक्षासंभवः । न च कल्पितस्योपदेष्टृत्वम् । शास्त्रोक्तलक्षणलक्षितस्यैव तथात्वश्रवणात् । "स गुरुमेवाभिगच्छेत् समित्पाणिः श्रोत्रियं ब्रह्मनिष्ठ"मिति श्रुतेः ।

न च स्वाप्नस्य गुरोरिवोपदेष्टृत्वेऽपि क्षत्यभावेन तथात्वोपपत्तिरिति वाच्यम् । स्वाप्नस्य गुरोरज्ञाननिवर्तकत्वादर्शनात् । अन्यथा "यदेव भगवान् वेद तदेव मे ब्रूही"ति श्रुतेः, "उपदेक्ष्यन्ति ते ज्ञानं ज्ञानिनस्तत्त्वदर्शिन" इति स्मृतेश्च व्याकोपात् । किंच, उपदेष्टुर्गुरोर्निश्चिताद्वैतवस्त्वं न वा । नाद्यः । अद्वैतज्ञानवतः पुंसो द्वैतदर्शनात्मकशास्त्रप्रणयनासंभवात् । द्वितीये, प्रतारकत्वापत्तेः । अन्धपरंपरान्यायापत्तेश्च ।

किंच, अनादिसंसारे कस्यचित् तत्त्वज्ञानं मुक्तिश्चाभून्न वा । आद्ये, जीवस्यैकत्वेनेदानीं संसारानुपलब्धिप्रसङ्गः । द्वितीये, शुकादीनां यदि मुक्तिर्नासीत् तर्हि ममापि न भविष्यतीति शङ्कया वेदान्तश्रवणादौ प्रवृत्त्यनुपपत्तिः ।

न च शास्त्रप्रामाण्यदार्ढ्यात् प्रवृत्त्युपपत्तिरिति वाच्यम् । एवं चेच्छ्रुतिप्रामाण्यदार्ढ्यादेव सदा सिद्धो जीवभेदः, श्रुतिप्रमितः केषां चिन्मोक्षश्च, कुतो नाङ्गीक्रियते । "यो यो देवानां प्रत्यबुध्यत स एव तदभवत्, तथर्षीणां, तथा मनुष्याणाम्" । "अजो ह्येको जुषमाणोऽनुशेते जहात्येनां भुक्तभोगामजोऽन्यः", "नित्यो नित्याना"मित्यादिश्रुतिभ्यः ।

अतीतानागताश्चैव यावन्तः सहिताः क्षणाः ।
ततोऽप्यनन्तगुणिता जीवानां राशयः पृथक् ॥

इत्यादिस्मृतिभ्यश्च ।

तस्मात् तन्मते मोक्षस्य स्वरूपत्वेन सदैव स्वत एव प्राप्तत्वाद्बन्धस्य चाविद्यकत्वेन मृगतृष्णाकल्पितोदकेनेव तेन स्पर्शासंभवात् तन्निवृत्तये शास्त्रप्रणयनस्य श्लेष्मविलोडनमात्रत्वेन सुतरां वैयर्थ्यम् । शुद्धस्य नित्यमुक्तत्वाद् बद्धस्य च तुच्छत्वात् कस्य मुक्तये प्रयासविशेषः । मुमुक्षोरेवासिद्धेः । तस्मात् प्रयोजनासिद्धेः शास्त्रारम्भो व्यर्थ एव ।

न च स्वरूपस्य नित्यप्राप्तत्वेऽपि कण्ठस्थस्य नित्यप्राप्तस्य विस्मृतस्य मणेरुपदेशवदुपदेशः सार्थक इति वाच्यम्। मण्युपदेशस्य सुखं दुःखाद्यभावश्च फलम्। न च त्वन्मते स्वरूपभिन्नं प्राप्यं किंचिदस्ति। स्वप्रकाशात्मकस्य नित्यप्राप्तत्वात्।

किंच, मणेर्देहादिभिन्नत्वेनाहन्तानास्पदत्वाद्विस्मरणविषयत्वं वक्तुं शक्यम्। ब्रह्मणस्तु स्वरूपत्वेन विस्मरणासंभवान्नोक्तदृष्टान्तसिद्धिः।

किंच, मणेः स्वल्पपदार्थस्य देहैकदेशवृत्तित्वेन विस्मृत्यर्हत्वं भवेत्। आत्मनस्तु सर्वगतत्वेन स्वरूपत्वेन च तत्तासंभवाद् दृष्टान्तस्यात्यन्तवैषम्यमेवेति संक्षेपः।

एतेनाधिकार्युपपत्तिरपि निरस्ता। प्रयोजनाभावेऽर्थित्वाभावः। तदभावे च सामर्थ्यविद्वत्त्वयोरकिंचित्करत्वादप्रयोजकत्वमिति।

ननु मन्मते सर्वस्याप्यधिकार्यादिकथनस्याज्ञानप्रयुक्ताध्यासपूर्वकप्रमाणप्रमेयादिव्यवहारान्तर्गतत्वान्नोक्तदोषावकाशः, अध्यासमाहात्म्येन निखिलविरोधस्य परिहरणीयत्वादिति चेन्न। अधिष्ठानारोप्यलक्षणप्रमाणसामग्र्याद्यभावेनाध्यासासंभवस्य पूर्वाचार्यैर्विस्तृतत्वात्।

तथाहि, साधकबाधकोभयविधसामान्यविशेषधर्मवत्त्वस्यैवाधिष्ठानत्वे प्रयोजकत्वम्। सामान्यतो ज्ञातं विशेषेणाज्ञातमेवाधिष्ठानं लोके प्रसिद्धम्। यथेदं रजतमित्यत्रेदन्ता सामान्यधर्मो रजतस्य साधकः शुक्तौ वर्तते, शुचित्वं च विशेषधर्मस्तस्य बाधकः। त्वन्मते तु निर्विशेषाद्वितीयचिन्मात्रस्य वस्तुतोऽधिष्ठानत्वासंभवः। उभयविधधर्मवत्त्वाभावात्। अन्यथा सिद्धान्तभङ्गः।

तस्मादधिष्ठानासिद्ध्या तत्प्रयोज्याध्यासासिद्धिरेवेति संक्षेपः।

अथारोप्यासिद्ध्याप्यध्यासासिद्धिः। यद्यदारोपितं तत् तत् सप्रधानं, शुक्तिरूप्यादिवत्, यन्नैवं तन्नैवं,शशशृङ्गादिवत्। इत्यन्वयव्यतिरेकव्याप्तेः सर्वसंमतत्वात्।

ननु प्रधानं सजातीयमस्त्येव। पूर्वप्रपञ्चसजातीयस्योत्तरप्रपञ्चस्याध्यासाङ्गीकारात्। अध्यासो हि स्वकारणतया संस्कारमपेक्षते। न तु संस्कारविषयस्य सत्यत्वम्। अनुपयोगात्। नहि प्रमाणजन्यस्यैव संस्कारस्याध्यासहेतुत्वमिति नियम इति चेन्न। अनाद्यविद्यादेरध्यस्तत्वासंभवेन तात्त्विकत्वप्रसङ्गात्।

न चाविद्याद्यध्यासस्य प्रधानादि विनैवाङ्गीकारान्नोक्तदोष इति वाच्यम्। ब्रह्मणोऽपि प्रवाहानाद्यारोपापत्तेरित्याद्याकरे विस्तृतं पूर्वैः।

अपिच, असत आरोपासंभवादेकत्र सत एवान्यत्रारोपनियमः। नहि स्वरूपेणासतः शशशृङ्गादेरारोपः संभवति। अदृष्टश्रुतत्वात्।

न चारोपे तद्विषयकप्रतीतिमात्रमेवापेक्षितं, न तु तद्विषयस्य सत्यत्वमपीति वाच्यम्। असतः प्रतीतेरेवासंभवात्।

न च रज्जौ सर्पप्रतीतेरिव प्रपञ्चप्रतीतेरपि दोषमात्रमेव कारणमपेक्षितं, न तु विषयतत्त्वमपीति वाच्यम्। दोषात्मककारणस्याप्यसत्त्वसाम्येन तव पक्षे प्रतीतिलक्षणकार्योत्पत्तेरेवासंभवात्। कार्यस्य कारणसत्तापेक्षत्वनियमात्। कुत्राप्यसतः कारणत्वासंभवाच्च। सर्पादिभ्रमस्थलेऽपि कल्पितसर्पादिविषयकज्ञानस्यैव भयकम्पादिहेतुत्वं, न विषयस्य। सर्पज्ञानाभाववतो बालस्य सत्सर्पदर्शनेऽपि भयाद्यभावात्। प्रत्युत तद्ग्रहणे प्रवृत्तिदर्शनाच्च। अन्यथा कारणमात्रस्यासत्त्वाङ्गीकारे कार्योत्पत्तिकथाया एवानवसरात्।

नन्वसतो रज्जुसर्पादेस्तज्ज्ञानकारणत्वोपपत्तिवद्भयादिकारणत्वोपपत्तिरपि सुकरा,भिन्नकारणाङ्गीकारे गौरवादिति चेन्न। तत्रापि दोषस्यैवासद्विषयकज्ञानकारणत्वेनासतो विषयस्य कारणत्वासंभवात्।

तस्मादारोप्यासिद्ध्याध्यासासंभवस्यावश्यकत्वमेवेति संक्षेपः।

अथ लक्षणासिद्ध्यापि तदसिद्धिः। किमध्यासलक्षणमित्यपेक्षायां स्मृतिरूपः परत्र पूर्वदृष्टावभासोऽध्यास इत्याहुः। तत्र परत्रावभास इत्येव लक्षणम्। शिष्टं पदद्वयं तु तदुपपादकम्।

तथाहि, अवभासत इत्यवभासो रजताद्यर्थः, तस्यायोग्यमधिकरणं परत्र पदार्थः, तत्त्वं चारोप्यात्यन्ताभाववत्त्वम्। तथा चैकावच्छेदेन स्वसंसृज्यमाने स्वात्यन्ताभाववत्यवभास्यत्वमध्यस्तत्वमित्यर्थः। इदं च साद्यनाद्यध्यासस्य साधारणं लक्षणम्। संयोगेऽतिव्याप्तिवारणायैकावच्छेदेनेति। संयोगस्य स्वसंसृज्यमाने वृक्षे मूलावच्छेदेन स्वात्यन्ताभाववत्यवभासमानत्वेऽपि स्वस्वात्यन्ताभावयोर्मूलाद्यवच्छेदकभेदान्नातिव्याप्तिः। पूर्वं स्वाभाववति भूतले पश्चादानीतो घटो भातीति घटेऽतिव्याप्तिवारणाय स्वसंसृज्यमान इति पदम्। तेन स्वाभावकाले प्रतियोगिसंसर्गस्य वर्तमानत्वमुच्यत इति नातिव्याप्तिः। मूलावच्छेदेनावभास्यमाने गन्धेऽतिव्याप्तिवारणाय स्वात्यन्ताभाववतीति पदम्। शुक्त्याविदन्तावच्छेदेन रजतसंसर्गकालेऽत्यन्ताभावोऽस्तीति नाव्याप्तिः।

ननु शुक्तौ रजतस्य सामग्र्यभावेन संसर्गासत्त्वादस्य लक्षणस्यासंभवः।

न च स्मर्यमाणस्य सत्यरजतस्यैव तत्रावभास इति वाच्यम्। अन्यथाख्यातिप्रसङ्गात्। इत्याशङ्क्याह,स्मृतिरूप इति। स्मर्यत इति स्मृतिः सत्यरजतादिः। तस्य रूपमिव रूपम-

स्येति स्मृतिरूपः । स्मर्यमाणसदृश इत्यर्थः । सादृश्यपदेन स्मर्यमाणादारोप्यस्य भेदाचान्यथाख्यातिरित्यर्थः ।

सादृश्यमुपपादयति, पूर्वदृष्टेति । दृष्टं दर्शनं, संस्कारद्वारा पूर्वदर्शनादवभासत इति पूर्वदृष्टावभासः । तेन संस्कारजन्यज्ञानविषयत्व स्मर्यमाणारोप्ययोः सादृश्यं बोध्यते । प्रमाणाजन्यत्वाच्च ।

तर्ह्यारोपस्य स्मृतित्वमेव विवक्षितमिति चेन्न । दोषसंप्रयोगजन्यत्वस्यापि विवक्षितत्वेन तन्मात्रजन्यत्वाभावात् ।

संप्रयोगो नामाधिष्ठानसामान्यज्ञानम् । अहंकाराध्यास इन्द्रियसंप्रयोगालाभात् ।

एवं च दोषसंप्रयोगसंस्कारबलाच्छुक्तौ रजतमुत्पन्नमस्तीति परत्रावभासस्य लक्षणत्वमुपपन्नमिति स्मृतिरूपपूर्वदृष्टपदाभ्यामुपपादितम् । तत्रार्थाध्यासे स्मर्यमाणसदृशः परत्र पूर्वदर्शनादवभासत इति योजना । ज्ञानाध्यासे तु स्मृतिसदृशः परत्र पूर्वदर्शनादवभास इति वाक्यं योजनीयमिति ।

तन्नेति ब्रूमः । मूलाविद्याध्यासे तदसंभवस्य दुर्वारत्वात्, एकत्र सतोऽन्यत्रारोपत्वं भ्रमत्वम् । अत्यन्तासतोऽध्यासायोगादित्युक्तं पूर्वमेव । इदं रजतमिति प्रतीतिवदियमविद्येति कस्यचित् कदाचिदपि प्रतीत्यभावात् । संस्कारसादृश्यसंप्रयोगसामग्रीविरहाच्च ।

न च संस्कारजन्यज्ञानविषयत्वं सादृश्यमिति वाच्यम् । संस्कारस्यानुभवपूर्वकत्वेन तदभावे संस्कारासिद्धेः, तदसिद्धौ तज्जन्यज्ञानाभावः, तदभावे च कथं तद्विषयत्वरूपं सादृश्यमिति ।

किंच, अविद्यासादृश्यं कस्मिन् वर्तत इति वक्तव्यम् । न शुद्धे । तस्य निर्विशेषत्वात् । अन्यथा शुद्धत्वहानिः । नापि जीवे । तस्याध्यस्तत्वेनोत्तरभावित्वात् ।

किंच, अविद्यायां चितोऽध्यासेऽपि चित्सादृश्यस्य कथं वृत्तिरिति वक्तव्यम् । सूर्यसादृश्यस्य तमस्यसंभववन्महाविरोधात् ।

यच्चोक्तं स्मर्यमाणसदृश इत्यध्यासविशेषणं, तदविचारितम् । प्रथमाध्यासे स्मर्यमाणस्यैव शशशृङ्गायमाणत्वात् कुतस्तत्सादृश्यसंभावनापीति ।

यदप्युक्तं संप्रयोगो नामाधिष्ठानसामान्यज्ञानमित्यादि । तदसम्यक् । निर्विशेषे सामान्यविशेषत्वाभावात् । कल्पितसामान्यादिधर्मस्याध्यासजन्यत्वेन तस्य तदानीमभावाच्च ।

किंच, तवाभिमताधिष्ठानसामान्यज्ञानस्याश्रयाभावेन कुत्राप्यवृत्तित्वात् । ज्ञातुरभावाज्ज्ञानासिद्धेः ।

किंच, सामग्रीविरहादप्यध्यासासंभवात् । कारणाभावे कार्याभावनियमात् ।

तथाहि, अध्यासमात्रस्य दोषसादृश्यसंस्कारप्रयोगसामग्रीजन्यत्वनियमस्तावन्निर्विवादः । तत्रेदं रजतमिति प्रतीतौ दोषसादृश्यज्ञानसंस्काराणां भ्रान्तिमत्पुरुषनिष्ठत्वात् । रजतसादृश्यस्य च शुक्तिवृत्तित्वात् । संप्रयोगस्य च संबन्धरूपत्वेनोभयनिष्ठत्वात् । तत्संघातरूपे सामग्र्याध्याससिद्धिः ।

प्रकृते तु सामग्रीतदाश्रययोरभावात्, जीवदोषादीनामध्यासकार्यत्वेनोत्तरभावित्वाच्च, कथमविद्याध्यास इति ।

नन्वध्यासो द्विविधः सादिरनादिश्च । तत्र सादावेवोक्तसामग्र्यपेक्षा, नत्वनादौ । तथा चाविद्याध्यासस्यानादित्वान्नोक्तणावकाशः ।

एवमयमनादिरनन्तो नैसर्गिकोऽध्यासो मिथ्याप्रत्ययरूप इति भाष्यकृदुक्तेरिति चेन्न । अध्यासमात्रस्य सादित्वदर्शनात् । अनादेः सतोऽपि वस्त्वध्यस्तत्वाङ्गीकारे ब्रह्मणोऽपि तथात्वं वक्तुं शक्यते । तस्याप्यनादित्वसाम्यात् ।

नन्वत्रानादित्वं नामानाद्यविद्याकार्यत्वं, नैसर्गिकत्वं चाध्यासात् संस्कारस्ततोऽध्यास इति प्रवाहरूपेण, अनन्तत्वं च ज्ञानं विना ध्वंसायोग्यत्वं विवक्षितम् । तस्मान्नोक्तदोषावकाश इति चेन्न । असदुत्तरत्वात् । तथाहि, न तावदुक्तलक्षणानादित्वं वक्तुं शक्यम् । अनादित्वकार्यत्वयोरितरेतरव्याघातात् । प्रत्युत कार्यत्वस्य सादित्वेनैव व्याप्तिदर्शनात् । नापि नैसर्गिकत्वं वक्तुमर्हम् । अन्योन्याश्रयत्वप्रसङ्गात् । नाप्युक्तलक्षणानन्तत्वम् । ज्ञानेन तत्संबन्धस्यैव ध्वंसात् । न स्वरूपस्य । गौरनाद्यन्तवती, "अजामेका"मिति श्रुतेरनाद्यन्तरूपस्य निवृत्तिरेव श्रूयते, न तु स्वरूपनाशः । अन्यथा मुक्तानां बाहुल्यादिदानीमनुपलब्धिप्रसङ्गात् । "भूयश्चान्ते विश्वमायानिवृत्तिः", "मामेव ये प्रपद्यन्ते मायामेतां तरन्ति ते" इति श्रुतिस्मृतिभ्याम् ।

ननु सर्ववादिसंमतत्वात् कथमध्यासो निरस्यत इति चेन्न । साद्यध्यासस्य संमतत्वेऽप्यनाद्यध्यासस्य केषामप्यसंमतत्वादिति संक्षेपः । अथ प्रमाणाभावादप्यध्यासानुपपत्तिः ।

ननु द्रष्टानुमाता श्रोताहमित्यादिप्रत्यक्षस्य देवदत्तादिकर्तृकः सर्वोऽपि व्यवहारस्तदीयदेहादिष्वहंममाध्यासमूलकः, तदन्वयव्यतिरेकानुसारित्वात्, यदेवं तदेवम्, मृन्मूलघटवत्, इत्यनुमानस्य, यद्यध्यस्तः प्रमाता न स्यात्, तर्हि प्रमाणादिव्यवहारो न स्यात्, सर्वस्यापि व्यवहारजातस्याविद्यावद्विषयकत्वादित्यर्थापत्तेश्चात्र मानत्वात् । तथा चाह भाष्यकारः । "तमेतमविद्याख्यमात्मानात्मनोरितरेतराध्यासं पुरस्कृत्य सर्वे प्रमाणप्रमेयव्यवहारा लौकिका वैदिकाश्च प्रवृत्ताः, सर्वाणि च शास्त्राणि विधिप्रतिषेधमोक्षपराणि" इत्युक्त्वा कथं पुनरविद्यावद्विषयाणि प्रत्यक्षादिप्रमाणानि शास्त्राणि चेति,

उच्यते, देहेन्द्रियादिष्वहं ममेत्यभिमानहीनस्य प्रमातृत्वानुपपत्तौ प्रमाणप्रवृत्त्यनुपपत्ते"रित्यादिना, इति कथं प्रमाणाभाव इति चेन्न । उक्तप्रत्यक्षानुमानादेराभासमात्रत्वात् । तथाहि, उक्तप्रत्यक्षादीनां शरीरेन्द्रियादियुक्तात्मपरत्वेनाध्यस्तविषयकत्वाभावात्, "आत्मेन्द्रियमनोयुक्तं भोक्तेत्याहुर्मनीषिण" इति श्रुतेः, अन्यथा युक्तस्यानेऽध्यस्तमिति प्रयोगः श्रुतौ स्यात् । श्रुतिगृहीतत्वादुक्तार्थस्यैव सम्यक्त्वेनोक्तमानस्याध्यासपरत्वाभावात् ।

किंच, अध्यासस्यासिद्धाप्यसिद्ध्या तदनुमाने साध्यासिद्धिः । अध्यासप्रयुक्तव्यवहारस्तत्प्रयुक्तश्चाध्यास इत्यन्योन्याश्रयश्च । अध्यासासिद्ध्या हेतुरपि स्वरूपासिद्धः । घटादीनां मृत्परिणतत्वेन दृष्टान्तवैषम्यं च । तथैव व्यवहारस्य देहादियुक्तात्मकर्तृत्वेनान्यथासिद्धत्वादर्थापत्तेरपि निर्मूलत्वादाभासमात्रत्वम् ।

ननु मास्तु प्रत्यक्षादीनामत्र प्रामाण्यम्, "ब्राह्मणो यजेत", "न ह वै स्नात्वा भिक्षेत", "अष्टवर्षं ब्राह्मणमुपनयीत", "कृष्णकेशोऽग्नीनादधीत" इत्यादिश्रुतीनां वर्णाश्रमवयोऽवस्थाद्यध्यासवन्तमेवाधिकृत्य प्रवृत्तिर्दृश्यते । तथोक्तं भाष्यकारेण, "ब्राह्मणो यजेते"त्यादीनि शास्त्राण्यात्मनि वर्णाश्रमवयोऽवस्थादिविशेषाध्यासमाश्रित्य प्रवर्तन्ते" इति ।

तस्माच्छ्रुतिप्रमाणकत्वादध्यासोऽवश्यं माननीय इति चेन्न । उक्तश्रुतीनामपि वर्णाश्रमवयोऽवस्थादिमच्छरीरसंयुक्ताधिकारिविषयकत्वाविशेषात् । आसामपि तथैकवाक्यत्वाच्च । तन्निष्ठानां मनीषित्वयोगं श्रावयन्ती श्रुतिस्तद्विपरीतवादिनां कुमनीषित्वं सूचयति ।

तस्माद्येषां मतेऽध्यासो वेदादिप्रमाणविरुद्धोऽपि कुलधर्मत्वेन ग्राह्यस्तैरेव माननीय इति मनीषिपदस्वारस्यार्थः ।

किंच, तव मते जीवन्मुक्तानामपि याज्ञवल्क्यादीनां तादृशव्यवहारस्य तादवस्थ्यदर्शनेन तेषामप्यध्यासवत्त्वं स्वीकार्यम् । अन्यथा व्यतिरेकनियमभङ्गः स्यात् । तथात्वे च तेषामज्ञत्वाविशेषेण तदुपदेशस्यान्धपरंपरान्यायापत्तेरनाद्यत्वयोगो दुर्वारः । तदुपदेशमूलकेदानींतनानां पौरुषेयशास्त्रव्याख्यातवाक्यजन्योपदेशानां सुतरामनाद्यत्वप्रसङ्गेनोपदेशसंततेः सुतमां वञ्चकत्वयोगादनिर्मोक्षप्रसङ्ग इति संक्षेपः ।

नन्वध्यासासंभवः किमयुक्तत्वाद्वा, मानाभावाद्वा, कारणाभावाद्वेति । आद्ये, इष्टापत्तिः । अध्यासस्यासङ्गे स्वप्रकाशात्मन्ययुक्तत्वस्यास्माकमलंकारत्वात् । न द्वितीयः । अज्ञः कर्ता मनुष्योऽहमिति प्रत्यक्षानुभवात् । न तृतीयः । मिथ्याज्ञानस्य तत्कारणस्य भावात् । तथाह भाष्यकारः, "मिथ्याज्ञाननिमित्त" इति । मिथ्या च तदज्ञानं च तन्मिथ्याज्ञानं, तदेव निमित्तमुपादानं यस्य स तथेत्यर्थ इति चेन्न । आपातरमणीयत्वात् ।

तथाहि, यदुक्तमात्मन्यध्यासायुक्तत्वमस्माकमलंकार इति । तद्दुरुक्तम् । तत्र युत्त्यापत्त्या तस्य जलताडनवद्वैयर्थ्यप्रसङ्गात् ।

यदप्युक्तमज्ञः कर्तेत्यादि । तदप्यसम्यक् । उक्तप्रत्यक्षस्य देहादियुक्तात्मविषयकत्वेन भ्रमत्वस्य पूर्वमेवोक्तत्वात् ।

ननु तथाप्यपौरुषेयतया निर्दोषेणोपक्रमादिलिङ्गावधृततात्पर्येण तत्त्वमस्यादिवाक्येनाकर्तृब्रह्मबोधनादुक्तप्रत्यक्षस्य भ्रमत्वमेवेति चेन्न । तत्त्वमस्यादिवाक्येन प्रतिपाद्यमानस्य "तदैक्षत बहु स्यां प्रजायेये"तीक्षणबहुभवनसंकल्पवतो ब्रह्मणः "सदेव सोम्येदमग्र आसी"दिति सच्छब्दवाच्यस्य, "एकमेवाद्वितीय"मित्यतिशयसाम्यशून्यस्य, "ऐतदात्म्यमिदं सर्वं"मिति तादात्म्योपदेशोऽस्मदिष्टतम एव, न तत्राकर्तृब्रह्मोपदेशः केनापि पदेन लभ्यते । प्रत्युतेक्षणबहुभवनसंकल्पपूर्वकं "तत् तेजोऽसृजते"ति तेजःप्रभृतिजगत्कर्तृत्वं श्रूयते । अतो नोक्तप्रत्यक्षस्य भ्रमत्वम् ।

ननु सच्छब्दवाच्यस्य सार्वज्ञ्यादियोगात् कर्तृत्वादिसत्त्वेऽपि लक्षणया निर्विशेषाकर्तृब्रह्मबोधनपरत्वस्वीकारान्नोक्तार्थसिद्धिरिति चेन्न । लक्षणासंभवात् । तथाहि, यथा गङ्गायां घोष इत्यत्र गङ्गापदस्य शक्यः प्रवाहः, तल्लक्ष्यश्च तीरादिपदवाच्यः, तथा सच्छब्दवाच्यः सर्वज्ञः पुरुषोत्तम ईक्षणादिकर्तृत्वाश्रयस्तेजःप्रभृतिजगदभिन्ननिमित्तोपादानकारणरूपः, तस्य यो लक्ष्यः स पदान्तरवाच्यो न वेति ।

नाद्यः । वाच्यत्वस्यापरिहार्यत्वात् । वाच्यत्वे च तव मते मिथ्यात्वापत्तिरप्यवश्यं भाविनी । वाच्यमात्रस्य मिथ्यात्वाभ्युपगमात् । सच्छब्दलक्ष्यो मिथ्या, पदान्तरवाच्यत्वात्, तव मते तीरादिवदिति प्रयोगात् ।

न द्वितीयः । पदमात्रावाच्यस्यावस्तुनो वस्तुत्वापत्तेः । सच्छब्दलक्ष्यं तुच्छं, पदमात्रावाच्यत्वात्, खपुष्पादिवदित्यनुमानात् ।

ननु विषमोऽयं दृष्टान्तः । जहल्लक्षणात्वात् । प्रकृते तु जहदजहत्स्वार्थलक्षणास्वीकारः । तत्र शक्यैकदेशस्य विशेषणमात्रस्यैव त्यागेन विशेष्यभागस्यात्यागान्नोक्तदोषावकाश इति चेन्न । शब्दैकदेशवाच्यत्वस्याकामेनापि त्वयाङ्गीकरणीयतया मिथ्यात्वयोगस्य दुष्परिहरत्वात् ।

तथा चात्र प्रयोगः । भागत्यागलक्षणालक्ष्यं मिथ्या, शक्यैकदेशत्वात्, तव मते घटत्वादिवदिति ।

एतेन यदुक्तं कैश्चित्, मास्तु लक्षणा, किंतु यथा नित्यो घट इत्यत्र घटव्यक्तिनित्यत्वयोरभेदस्य प्रत्यक्षबाधितत्वेऽपि घटत्वनित्यत्वयोः सामानाधिकरण्यस्याविरोधेन शक्यत्वमेव,

तथा प्रकृतेऽपि शक्यत्वमविरुद्धम् । लक्षणाङ्गीकारस्य सांप्रदायिकानामाग्रहमात्रत्वात् । तस्माच्छक्य एव शास्त्रार्थ इति तदपि निरस्तम् । वाच्यैकदेशसाम्येन मिथ्यात्वस्यावश्यंभावात् । त्यक्तद्वितीयभाववदिति संक्षेपः । तत् सिद्धं पूर्वोक्तप्रत्यक्षस्य प्रमात्वमिति ।

नापि मिथ्याऽज्ञानस्याध्यासकारणत्वं संभवति । अज्ञानलक्षणतत्प्रमाणतदाश्रयविषयप्रयोजननिवर्तकाद्यसिद्धेः ।

तथाहि, तत्र किं तावदज्ञानस्य लक्षणम् । अनादिभावरूपत्वे सति ज्ञाननिवर्त्यत्वं वा, भ्रमोपादानत्वं वा, मिथ्यात्वे सति साक्षाज्ज्ञाननिवर्त्यत्वं वा, अनाद्युपादानत्वे सति मिथ्यात्वं वाऽज्ञानत्वमिति ।

नाद्यः । सादिशुक्त्याद्यवच्छिन्नचैतन्यावरकाज्ञानेष्वव्याप्तेः, तेषामनादित्वायोगात् । आरोपितसर्पाद्यभावोपादानाज्ञाने घटादिविषयकज्ञानप्रागभावे च भावत्वाभावादव्याप्तेश्च ।

न च तस्य भावोपादानकत्वमिति वाच्यम् । असत्यस्य सत्योपादानकत्वापातात् । तस्याज्ञानोपादानकत्वाभावाङ्गीकारे ज्ञाननिवर्त्यत्वाभावप्रसङ्गाच्च ।

किंच, शुद्धं ब्रह्म वृत्तिव्याप्यमपि नेति मते तदज्ञाने चरमसाक्षात्कारानन्तरभाविजीवन्मुक्त्यनुवृत्तेऽज्ञाने रक्तः स्फटिक इति सोपाधिकभ्रमोपादानाज्ञाने चाव्याप्तिश्च । तेषां ज्ञाननिवर्त्यत्वाभावात् । सोपाधिकाज्ञानस्योपाधिनिवृत्तिनाश्यत्वनियमात् । जीवन्मुक्त्यनुवृत्ताज्ञानस्य प्रारब्धभोगनाश्यत्वनियमात् । चैतन्याविद्यासंबन्धेऽतिव्याप्तिश्च । कल्पितत्वेन दोषजन्यधीमात्रशरीरस्याज्ञानस्यानादित्वायोगात् । ज्ञाननिवर्त्यस्याभावविलक्षणस्य रूप्यवदनादित्वायोगाच्चासंभवश्च ।

किंच, अनादेरभावविलक्षणस्यात्मवदनिवर्त्यत्वप्रसङ्गात् । अज्ञानं न ज्ञाननिवर्त्यम्, अनादिभावरूपत्वात्, आत्मवत्, इत्यनुमानात् ।

न द्वितीयः । ज्ञानाभावेऽव्याप्तेः । अभावस्य निरुपादानकत्वात् । सोपादानकत्वेऽपि भावरूपाज्ञानोपादानकत्वायोगात् । अन्यथा स्वरूपहानिः । रज्ज्वाः सूत्रद्वयमिव मायाब्रह्मणी जगदुपादाने इति पक्षेऽतिव्याप्तेश्च । तयोर्भ्रमोपादानत्वात् । मायावच्छिन्नं ब्रह्मोपादानमिति पक्षेऽसंभवः । किंच, अर्थाज्ञानरूपस्य भ्रमस्य भावविलक्षणत्वेन निरुपादानत्वादसंभवश्च ।

न तृतीयः । जीवन्मुक्त्यनुवृत्ताज्ञानादावव्याप्त्यादेरत्रापि तुल्यत्वात् ।

न चतुर्थः । द्वितीयलक्षणोक्तदोषस्याभावत्वादावव्याप्त्यादेरत्राप्यविशेषात् । इति संक्षेपः । तत्प्रमाणतदाश्रयाद्यसिद्धिश्च पूर्वाचार्यैराकरे विस्तृता । तत्रैव जिज्ञासुभिर्द्रष्टव्यात्र विस्तरभियोपरम्यते ।

विषयवाक्यार्थस्तु, अरे मूढे, हे मैत्रेयि, आत्मा द्रष्टव्य इति तव्यप्रत्ययोऽर्हार्थक एव, अर्हे कृत्यतृचश्चेति सूत्रात् । ब्रह्मसाक्षात्कारस्य "तस्मिन् दृष्टे परावरे", "निरञ्जनः परमं साम्यमुपैति", "तन्महिमानमेति वीतशोकः", "ततो मां तत्त्वतो ज्ञात्वा विशते तदनन्तर"मित्यादिवाक्यैर्मोक्षान्तरङ्गोपायतया सिद्धत्वेन विधेयत्वाभावात् ।

तथा च वाक्यान्तप्राप्तं ब्रह्मसाक्षात्कारलक्षणं मोक्षासाधारणोपायं दर्शनमुद्दिश्य तदन्तरङ्गोपायभूतं निदिध्यासनमत्र विधीयते । तदेव ध्यानज्ञानपरभक्तिध्रुवस्मृत्यपरपर्यायभूतं ज्ञानशब्देन सूत्रयामास भगवान् बादरायणः । सूत्रविषयवाक्ययोरेकार्थत्वनियमात् । तत्रापि विषयवाक्यस्य मूलरूपत्वेन स्वतः प्रामाण्याद्बलीयस्त्वम् । तदनुसारेणैव सूत्रार्थो नेयः । अन्यथा तयोर्विषयविषयिभावानुपपत्तेः । श्रवणमननयोर्निदिध्यासनोपायत्वेन विनियोगः । तयोरपि परंपरया मोक्षसाधनत्वात् ।

तत्र वेदान्तवाक्यानां भगवत्स्वरूपगुणादिप्रतिपादनपरत्वं निश्चित्य तत्प्रतिपाद्यं ध्येयस्वरूपादिकं साक्षात् पश्यत आचार्यस्य मुखात् तदनुभूतवाक्यार्थस्य ग्रहणं श्रवणम् ।

श्रुतस्य चोपदिष्टार्थस्य स्वानुभवविषयीकरणाय शास्त्रानुकूलयुक्तिभिर्विचारविशेषो मननम् ।

मननविषयस्यार्थस्य साक्षात्कारासाधारणसाधनमनवरतध्यानं निदिध्यासनम् ।

तथा चोक्तलक्षणश्रवणादिसाध्यनिदिध्यासनस्यात्यन्ताप्राप्तत्वादपूर्वविधिरेवायमिति बोध्यम् ।

द्वितीयवाक्यार्थस्तु तच्छब्दौ पूर्वोक्तवाच्यस्यात्मपरामर्शपरौ । विजिज्ञासितव्य इत्यत्रोक्तस्य ध्यानात्मकज्ञानस्य मोक्षान्तरङ्गोपायत्वाद्विधेयत्वम् । अन्वेषणस्य श्रवणाद्यात्मकस्य तत्साधनतया विनियोग इति । भूमेत्यस्य व्याख्यानं भूमेति सूत्रविवरणावसरे वक्ष्यामः ।

एवं निर्वचनमुखेन जिज्ञास्यं व्युत्पादितम् । तस्य किं लक्षणमित्यपेक्षायामाह ।

॥ जन्माद्यस्य यतः ॥ २ ॥

अस्येति शब्दः कार्यपरः, यत इति कारणपरः, जन्म आदि यस्य, एतदिदं जन्मादिसृष्टिस्थितिलयमोक्षम्, तद्गुणसंविज्ञानो बहुव्रीहिः, लम्बकर्णमानयेतिवत्, यतो यस्मात् सर्वेश्वरात् सर्वज्ञात् सर्वशक्तेः परमकारणात् सर्वनियन्तुर्भगवतः श्रीपुरुषोत्तमादस्य जगतो नामरूपाभ्यां व्याकृतस्य विविधवि-

भक्तभोक्तृसंयुक्तस्य नियतदेशकालफलोपभोगाश्रयभूतस्य तर्कागोचररचनस्य जन्मस्थितिलयमोक्षाः प्रवर्तन्ते, तदेव ब्रह्म जिज्ञास्यमिति वाक्यार्थः । यत्तदोर्नित्यसंबन्धात् । "भृगुर्वै वारुणिर्वरुणं पितरमुपससार, अधीहि भगवो ब्रह्मे"त्युपक्रम्य, "यतो वा इमानि भूतानि जायन्ते, येन जातानि जीवन्ति, यत् प्रयन्त्यभिसंविशन्ति, तद्विजिज्ञासस्व, तद् ब्रह्म" "सत्यं ज्ञानमनन्तं ब्रह्मे"त्यादिश्रुतेर्जगदभिन्ननिमित्तोपादानत्वे सति सत्यत्वादिमत्त्वं ब्रह्मलक्षणम् ।

न चोपादानाभिन्ननिमित्तस्य कारणत्वं कुत्रापि न दृश्यत इति वाच्यम् । घटेशसंयोगजीवगतज्ञानादावीशजीवयोस्तथा दर्शनात् । ब्रह्म जगदभिन्ननिमित्तोपादानं भवितुमर्हति, तादृशशक्तिमत्त्वात्, जीवगतज्ञानादिकार्ये जीववद्, घटेश्वरसंयोगादिकार्ये ईश्वरवत्, इत्यनुमानात् ।

परमते तु लक्षणमसंभवि । पूर्ववद्विकल्पासहत्वात् ।

ननु लक्षणं द्विविधम् । स्वरूपतटस्थभेदात् । तत्र स्वरूपाभिन्नं लक्षणं प्रथमं, यथा, "सत्यं ज्ञान"मित्यादिकम् । यावल्लक्ष्यमनवस्थितत्वे सति व्यावर्तकं तटस्थलक्षणं, यथा, "यतो वा इमानी"त्यादि । श्रुत्युक्तकारणत्वस्य प्रलयेऽननुगतत्वे सतीतरव्यावर्तकत्वाल्लक्षणसमन्वय इति चेत् । नैवम् । असंभवात् ।

तथाहि, न तावत् स्वरूपलक्षणोक्तिरुपपत्तिमती । असाधारणधर्मस्यैव सर्वसंमतलक्षणत्वान्न स्वरूपमात्रस्य । अन्यथा स्वरूपस्यैव व्यावर्तकत्वे लक्षणत्वेनोक्तेरेव वैयर्थ्यात् । स्वरूपस्य व्यावर्तकत्वादर्शनाच्च ।

ननु स्वरूपस्यैव धर्मधर्मिभावकल्पनया लक्षणत्वाङ्गीकारे नोक्तदोषः । "आनन्दो विषयानुभवो नित्यत्वं चेति सन्ति धर्मा अपृथक्त्वेऽपि चैतन्यापृथगिवावभासन्ते", इत्यभियुक्तोक्तेरिति चेन्न । कल्पितस्य व्यावर्तकत्वासंभवात्, अन्यथा यूपे कल्पितादित्यत्वस्याप्यन्यसूर्याद्व्यावर्तकत्वापत्तिः ।

किंच,सत्यादिशब्दा यौगिका रूढा वा । आद्ये यौगिकस्य प्रकृतिप्रत्ययार्थयोगपरत्वेन निर्विशेषत्वहानिः । द्वितीये रूढानां गुणजात्याद्यनेकधर्मवद्वस्तुपरत्वनियमेन निर्विशेषपरत्वायोगः ।

ननु सत्यादिशब्दानां सविशेषपरत्वेऽपि लक्षणया निर्विशेषपरत्वान्नोक्तदोषावकाश इति चेन्न । लक्षणासंभवात् ।

तथाहि, जहत्स्वार्थापक्षे यथा गङ्गायां घोष इत्यत्र प्रवाहरूपशक्यत्यागेन गङ्गारूपस्तीरादिर्वाक्यार्थः, तथा प्रकृतेऽपि सत्यादिपदार्थत्यागेनासत्यजडपरिच्छिन्नरूपो वाक्यार्थः स्यात् ।

अजहत्स्वार्थापक्षे शोणो धावतीत्यादिशक्यवद्विशिष्टार्थत्वापत्तिः ।

भागत्यागलक्षणापक्षे विशेष्यमात्राङ्गीकारे सत्यादीनां को वार्थ इत्यद्याप्यनिश्चयात् । सत्यत्वादिधर्मत्यागेऽपि सच्चिदपरिच्छिन्नं ब्रह्मेति त्रैविध्यस्यावश्यंभावान्निर्विशेषाद्वितीयत्वभङ्गः । सर्वेषामेकार्थत्वाङ्गीकारे पर्यायत्वापत्तिः । तथात्वाभ्युपगमे चैकपदेनैवार्थसिद्धौ पदान्तरवैयर्थ्यं च ।

किंच,शब्दैकांशार्थाङ्गीकारे सर्वांशवाचकतासंबन्धाभावेऽपि तदंशवाचकतासंबन्धस्याकामेनापि त्वया स्वीकार्यत्वान्निर्विशेषत्वहानिः । तथात्वे मिथ्यात्वापत्तिः । निर्विशेषं वस्तु मिथ्या, शक्यैकदेशत्वात्, तव मते घटत्वादिवदिति प्रयोगात् ।

ननु सत्यत्वादिविशिष्टवाचिपदानां शुद्धे लक्षणाङ्गीकारान्न पर्यायत्वापत्त्यादिदोषावकाश इति चेन्न । अनृतास्वप्रकाशपरिच्छिन्नरूपे सविशेषे सत्यत्वादेरयोगात् । योगे वा तस्यैवानृतादिव्यावृत्तत्वं स्यान्न शुद्धस्य ।

तस्मात् सत्यत्वादीनां शुद्धादीनां शुद्धादन्यत्रासंभवाद्वाक्यस्य लक्षणयाखण्डार्थत्वे च शुद्धे तदसिद्धेः पर्यायत्वप्रसङ्गः । पदान्तरवैयर्थ्यस्य तादवस्थ्यमेव ।

किंच,सत्यादिपदलक्ष्यं वस्तु पदान्तरवाच्यं न वा । आद्ये सविशेषत्वस्यावश्यंभावः । द्वितीये लक्ष्यत्वासिद्धिः । लक्ष्यत्ववाच्यत्वयोः सामानाधिकरण्यनियमात् । यत्र वाच्यत्वं तत्र लक्ष्यत्वं, यथा गङ्गापदलक्ष्यस्य तीरशब्दवाच्यत्वं, यन्नैवं तन्नैवं, खपुष्पादिवत्, इत्यन्वयव्यतिरेकाभ्यां लक्ष्यत्वासिद्धिः ।

ननु सत्यादयः शब्दा असत्यादिव्यावृत्तिद्वारा लक्ष्ये ब्रह्मणि पर्यवस्यन्तीति चेन्न । ब्रह्मस्वरूपमात्रस्य श्रुतिं विनापि प्रागेवाविद्याधिष्ठानतया ज्ञातस्य पुनरपि "ब्रह्मविदाप्नोति पर"मित्यादिवाक्येन च सत्यादिशब्दैः सत्यत्वादिविशिष्टतया व्यावृत्तिविशिष्टतया च ज्ञातत्वेन विपरीतत्वापाताच्च । ज्ञातत्वेन तज्ज्ञानस्य व्यावृत्तिज्ञानसाध्यत्वायोगात् । व्यावृत्तिज्ञानस्यैव धर्मिज्ञानसाध्यत्वेन विपरीतत्वापाताच्च ।

किंच व्यावृत्तयः सत्या मिथ्या वा ।

आद्ये, व्यावर्तकानामपि सत्यत्वापत्तिः । व्यावहारिकैर्व्यावर्तकैः पारमार्थिकव्यावृत्त्यसिद्धेः । किंच, व्यावृत्तिविशिष्टत्वापत्त्याद्वैतभङ्गः । सविशेषत्वापत्तिश्च ।

द्वितीये, असतस्तुच्छस्य शशशृङ्गादेरिव व्यावृत्तित्वासंभवः । तुच्छस्य यदि स्वयं किंचित्पदार्थत्वं स्यात्, तर्हि भेदकत्वमपि स्यात्, तत् तु नास्त्येव ।

न च व्यावृत्तिः स्वरूपमेवेति वाच्यम् । स्वरूपस्य व्यावर्तकत्वाभावात् । व्यावर्तकत्वे च व्यावृत्त्यङ्गीकारस्य वैयर्थ्यम् । तथात्वे सविशेषत्वापत्तिर्दुर्वारा । अभेदे सति भेदनिर्वाहकत्वं व्यावर्तकत्वमिति लक्षणस्य समन्वयात् ।

किंच, व्यावर्त्यमसदादिशब्दवाच्यं सद्विलक्षणमसद्विलक्षणं वा। आद्ये,असद्विलक्षणस्य वस्तुत्वेऽद्वैतभङ्गः। अवस्तुत्वे व्यावृत्तिवैयर्थ्यम्। द्वितीये, ब्रह्मण्यतिव्याप्तिः। व्यावृत्तव्यावर्त्ययोरैक्यापत्तिश्च।

किंच, व्यावृत्तयो ब्रह्मणो भिन्ना अभिन्ना वा। आद्ये द्वैतापत्तिः। द्वितीये व्यावृत्तिर्ब्रह्मेति सामानाधिकरण्यापत्तिः।

किंच, व्यावृत्तिर्ब्रह्मणि कल्पिता यथार्था वा। नाद्यः। कल्पिते व्यावर्तकत्वासंभवस्योक्तत्वात्। द्वितीयेऽद्वैतसिद्धान्तभङ्ग इत्यलं विस्तरेण।

किंच, सत्यादेर्विशेष्यमात्रपरत्वे वाक्यस्योद्देश्यविधेयविभागाभावेन यत् किंचिदित्येव बोधनाद्बुभुत्सानुपरमापत्तिः। सामान्यस्य पूर्वमेव ज्ञातत्वात्। विशेषस्यानङ्गीकाराच्च।

एवं च सत्यादिवाक्यानामखण्डार्थनिष्ठत्वोक्तिर्भ्रान्तिविजृम्भितैव। तस्मात् स्वरूपलक्षणं सर्वथाप्यसिद्धमेव।

नापि द्वितीयं लक्षणं वक्तुं शक्यम्। तस्यापि सविशेष एव वस्तुनि समन्वेतुमर्हत्वात्। तैश्च ब्रह्मणो निर्विशेषत्वाङ्गीकारात्। तस्य लक्ष्यत्वयोगे सुतरां सविशेषत्वापत्तिरिति संक्षेपः।

किंच, कीदृग्ब्रह्म श्रीमद्भिर्जगत्कारणत्वेनाभिप्रेयते, शुद्धं चिन्मात्रं वा, अविद्योपहितं वा, तदध्यासाश्रयं वा।

आद्ये किं शुद्धशब्देन शुद्धे महाविभूत्याख्ये परे ब्रह्मणि वर्तत इत्युक्तो भगवान् महाविभूतिर्विवक्षितः, सर्वविशेषहीनोऽखिलप्रमाणशून्यो निर्विशेषो वा।

नाद्यः। अनङ्गीकारात्। अन्यथापसिद्धान्तापत्तेः। अस्मत्पक्षप्रवेशाच्च।

न द्वितीयः। सर्वविशेषशून्यस्य श्रुत्युक्तेक्षणबहुसंकल्पाद्यनुपपत्तेः। सर्वप्रमाणशून्यस्यावस्तुत्वात्।

नाप्युपहितं ब्रह्म कारणम्। असंभवात्।

तथाहि, उपहितं बिम्बरूपं, प्रतिबिम्बरूपं वा कारणत्वेनाभिप्रेतम्।

आद्ये, ग्रीवास्यमुखस्य दर्पणप्रदेश इव बिम्बरूपचेतनस्य परमेश्वरस्य जीवप्रदेशे व्याप्त्यभावात् सर्वान्तर्यामित्वानुपपत्तिः।

द्वितीये,अविद्याकृतदोषा जीव इव जगत्कारणे परमेश्वरेऽपि स्युः। उपाधेः प्रतिबिम्बपक्षपातित्वनियमात्। इति संक्षेपः।

नापि चरमः। निर्विशेषस्वप्रकाशात्मके ज्ञानस्वरूपे ब्रह्मण्यविद्याध्यासस्य सूर्ये तमस इवात्यन्तविरुद्धत्वादध्यासासिद्धेः पूर्वमेवोक्तत्वात्। तदसिद्धावध्यस्तस्य सुतरामसिद्धिः।

किंच, को वा परमेश्वरः। मायावच्छिन्नश्चेतन इति चेन्न। भ्रान्तिमत्त्वप्रसङ्गात्। "यः सर्वज्ञः सर्ववित् सत्यकामः सत्यसंकल्प" इत्यादिश्रुतिव्याकोपात्।

न च मायावच्छिन्नविषयकैव सार्वज्ञ्यादिश्रुतिः,शुद्धे धर्मित्वायोगादिति वाच्यम्। बालभाषितत्वात्। मायावच्छिन्नस्य भ्रान्तस्य सार्वज्ञ्यादियोगमनुन्मत्तः को ब्रूयात्।

न च "मायां तु प्रकृतिं विद्यान्मायिनं त्वि"ति श्रुतिरेव मायित्वं वदतीति वाच्यम्। मायित्वं मायानियन्तृत्वमिति श्रुतेर्विवक्षितत्वात्। तच्च सार्वज्ञ्याद्यचिन्त्यानन्तस्वाभाविकशक्त्याश्रयस्य महाविभूत्याख्यस्य शुद्धस्यैवासाधारणधर्मो नान्यस्य पारिभाषिकशुद्धस्य, मायावच्छिन्नस्य वा। निर्विशेषस्येक्षणबहुभवनसंकल्पाद्यसंभवात्। मायावच्छिन्नस्य भ्रान्तियोगादिति संक्षेपः।

तस्मादचिन्त्यानन्तस्वाभाविकासंख्येयसद्गुणसागरो भगवांश्छ्रीपुरुषोत्तम एव जगतोऽभिन्ननिमित्तोपादानकारणम्। तत्रैव लक्षणस्य समन्वय इति राद्धान्तः। प्रथमविषयवाक्यार्थः सूत्रार्थेनैवोक्तः।

तत्र पित्रादिष्वतिप्रसक्ते"रभिसंविशन्ती"ति पदसंनिवेशः। मृदादावतिव्याप्ते"र्येन जातानि जीवन्ति यत् प्रयन्ती"ति पदसंनिवेशः। प्रकर्षेण कर्मबन्धध्वंसेन यन्ति प्राप्नुवन्तीति मुक्तप्राप्यत्वम्। अभिसंविशन्तीति प्रलयकालिकप्रवेशो विवक्षितः।

द्वितीयवाक्यार्थस्तु सत्यत्वज्ञानत्वानन्तत्वावच्छिन्नं ब्रह्मेति, तत्र सत्यपदमसत्यस्य, ज्ञानपदमचिद्वर्गस्य, अनन्तपदं जीववर्गस्य, व्यावृत्तिपरम्।

अनन्तत्वं चात्र स्वरूपगुणशक्तिभिर्विवक्षितम्, अन्यथा जीवज्ञानेऽतिप्रसङ्गः।

न च सत्यादीनामेव गुणत्वान्न सत्यत्वादिपर्यन्तधावनं युक्तं, गौरवादिति वाच्यम्। सत्यादीनां स्वरूपवाचकत्वाभावेऽसत्यजडपरिच्छिन्नमेव लक्ष्यं ब्रह्मरूपं सत्यादिगुणकं त्वन्मतेऽभ्युपगतं स्यात्।

अयं भावः। त्वन्मते सत्यादिपदं स्वरूपपरं गुणपरं वा। आद्ये स्वरूपस्य त्रैविध्यापत्त्याद्वैतभङ्गः। सत्यादेरेकार्थत्वे पर्यायतापत्तिः। अन्त्ये तूक्तदोषस्तदवस्थ एव।

किंच, सत्यादेः स्वरूपवाचकत्वे ब्रह्मणो वाक्यगोचरत्वापत्तिः। तथात्वे निर्विषयत्वसिद्धान्तभङ्गः। वाक्यागोचरत्वाङ्गीकारेऽप्यनिर्वचनीयत्वापत्तौ मिथ्यात्वापत्तिर्दुर्वारा। तथा च प्रयोगाः। ब्रह्म मिथ्या, अनिर्वचनीयत्वात्, यदेवं तदेवम्, तव मते मायादिवत्। ब्रह्म मिथ्या, असत्यस्वरूपत्वात्,

तव मते रज्जुसर्पवत्, जडत्वात्, परिच्छिन्नत्वाच्च । तवाभिप्रेतघटादिवत्, इत्यादयः ।

तस्मात् सत्यत्वादिगुणकं सत्यादिस्वरूपं ब्रह्मेत्युक्तार्थ एव वरीयान् ।

कैश्चित् त्वेतद्वाक्यमेवं व्याख्यायते, सत्यपदं निरुपाधिकसत्तायोगि ब्रह्माह । तेन विकारास्पदमचेतनं तत्संसृष्टश्चेतनश्च व्यावृत्तः । नामान्तरभजनार्हावस्थान्तरयोगेन तयोर्निरुपाधिकसत्तायोगरहितत्वात् । ज्ञानपदं नित्यासंकुचितज्ञानैकाकारमाह । तेन कदाचित् संकुचितज्ञानत्वेन मुक्ता व्यावृत्ताः । अनन्तपदं देशादिपरिच्छेदशून्यस्वरूपमाह । सगुणत्वात् स्वरूपस्य । स्वरूपेण गुणैश्चानन्त्यम्, । तेन पूर्वपदद्वयव्यावृत्तकोटिद्वयविलक्षणाः सातिशयस्वरूपगुणा नित्या व्यावृत्ता इति ।

तन्न समीचीनमिति प्रतिभाति । तत्पदैस्तादृगर्थस्यालाभात् । संभवति मुख्यार्थे लक्षणाङ्गीकारस्य गौरवावहत्वात् । चिदचितोः सत्यत्वमङ्गीकृत्य पुनः सत्यपदेन तयोर्व्यावृत्त्यसंभवाच्च । अन्यथापसिद्धान्तापत्तिः ।

किंच, चिदचितोः सोपाधिकसत्यत्वाङ्गीकार उपाधिनिवृत्तौ तयोरसत्यत्वापत्तिः । तथात्वे च ‘‘सत्यं ह्येवेदं विश्वमसौ सृजते, सत्यस्य सत्यं प्राणा वै सत्यं, तेषामेष सत्य’’-मित्यादिश्रुतिव्याकोपः ।

ज्ञानपदेन मुक्तव्यावृत्तिरपि न संभवति । तेषामपि ज्ञानस्वरूपत्वाभ्युपगमात्, । अन्यथापसिद्धान्तापत्तिः ।

अनन्तपदेन नित्या व्यावृत्ता इत्यपि रिक्तं वचः । अनन्तपदेन नित्यमुक्तबद्धानां त्रयाणामपि व्यावृत्तिसंभवात् । तेषां स्वरूपेणानन्तत्वाभावादिति संक्षेपः । विस्तरस्त्वस्मत्कृततैत्तिरीयप्रकाशिकायां द्रष्टव्यः ॥ २ ॥

जगत्कारणं ब्रह्मेत्युक्तं तत्र प्रमाणमाह ॥

॥ शास्त्रयोनित्वात् ॥ ३ ॥

शास्त्रं योनिः कारणं प्रमाणं ज्ञापकं यस्मिंस्तच्छास्त्रयोनि, तस्य भावः शास्त्रयोनित्वं, तस्मात् । ‘‘सर्वे वेदा यत् पदमामनन्ति’’, ‘‘सर्वे वेदा यत्रैकीभवन्ति’’,‘‘तं त्वौपनिषदं पुरुषं पृच्छामः’’,‘‘नावेदविन्मनुते तं बृहन्त’’मित्याद्यन्वयव्यतिरेकश्रुतिभ्यः,

‘‘वेदैश्च सर्वैरहमेव वेद्यः’’,

‘‘वेदे रामायणे चैव पुराणे भारते तथा ।
आदावन्ते च मध्ये च हरिः सर्वत्र गीयते’’ ॥

‘‘नमाम सर्ववचसां प्रतिष्ठा यत्र शाश्वती’’,

इत्यादिस्मृतिभ्यश्च, शास्त्रैकप्रमाणगोचरत्वादिति यावत् ।

ननु शास्त्रैकप्रमाणगोचरत्वं ब्रह्मणो न संभवति । तस्य प्रत्यक्षादिप्रमाणवेद्यत्वात्, अप्राप्ते तु शास्त्रमर्थवदिति चेन्न । प्रत्यक्षस्येन्द्रियार्थसंनिकर्षजन्यत्वात् । तस्य चातीन्द्रियत्वात् । ब्रह्म न प्रत्यक्षप्रमाणविषयः, अतीन्द्रियत्वात्, जात्यादिलौकिकविशेषविरहाद्वा, यन्नैवं तन्नैवम्, गवादिवत् ।

न च,

‘‘अन्तर्बहिश्च तत् सर्वं व्याप्य नारायणः स्थितः’’ ।

इति श्रुतेस्तस्य सर्वत्र व्यापकत्वेनेन्द्रियेष्वपि सत्त्वाविशेषात् कथं तत्संनिकर्षानर्हत्वमिति वाच्यम् । तस्य व्यापकतया सर्वत्र सत्त्वेऽपि करणानां तत्प्रकाश्यत्वेन तत्प्रकाशकत्वायोगात् । नहि प्रमाणविषयीभावे पदार्थसद्भावमात्रं प्रयोजकम्, किंतु प्रमाणनिष्ठा तद्ग्रहणार्हा तच्छक्तिरेव, अन्यथा क्षीरादिपाने रसनेन्द्रियेण तन्माधुर्ये गृह्यमाणे तत्समानाधिकरणस्य रूपादेरपि ग्रहणापत्तेः । तस्य तत्र सद्भावसाम्यात् । तथा प्रकृतेऽपि ।

नाप्यनुमेयं ब्रह्म । अनुमानस्य हेतुदृष्टान्तसत्त्व एव सद्भावात् । तस्य च तद्विरहात् । ‘‘नेन्द्रियाणि नानुमानं नैषा मतिस्तर्केणापनेये’’ति श्रुतेः ।

‘‘अचिन्त्याः खलु ये भावा न तांस्तर्केण योजयेत्’’ ।

इति मनुवचनात् ।

ननु क्षित्यादीनि महाभूतानि सकर्तृकाणि, कार्यत्वात्, घटादिवत्, व्यतिरेके कालादिवत्, परपक्षे प्रधानादिवच्च, इति प्रयोगाद् भूतादिकर्तृतया ब्रह्म सिध्यत्येव । तत्कार्यस्य भूतादेर्लिङ्गस्य घटादेर्दृष्टान्तस्य च सत्त्वेनानुमातुं शक्यत्वादुक्तहेतोः स्वरूपासिद्धत्वम् ।

किंच, ‘‘मन्तव्य’’इति श्रुत्या ‘‘यस्तर्केणानुसंधत्ते’’, इति स्मृत्या चानुमानस्यादरणात् कथमनुमानागोचरत्वं तस्येति चेन्न । उक्तानुमानेन सामान्यतः कर्तृमात्रे सिद्धेऽपि यत्र कर्तृत्वं तत्र दोषवत्त्वं, कुलालादिवत्, इति प्रत्यक्षादिगृहीतया सामान्यव्याप्त्या गुणदोषवतो जीवस्यैव कर्तृत्वेन सिद्धिर्नोक्तलक्षणस्य परब्रह्मणः । तत्र व्याप्तेः पक्षधर्मतायाश्च शास्त्रमन्तरेण ग्रहीतुमशक्यत्वात् । तस्य च स्वरूपगुणशक्त्यादीनामलौकिकत्वात् ।

न च शास्त्रादेव तत्स्वरूपादिकं निश्चित्य तद्गतो जगत्कारणत्वमनुमेयमिति वाच्यम् । शास्त्रमूलकानुमानस्येष्टत्वात् । एवं च तर्कादिनिषेधशास्त्रस्य शास्त्रनिर्मूलस्वतन्त्रानुमानपरत्वेन तद्विधायकशास्त्रस्य च श्रुत्यनुकूलतन्मूलकानुमानविषयत्वेन नैराकाङ्क्ष्यात् । सर्वथाप्यविरुद्धम् ।

किंच, कार्यत्वादित्यस्य हेतोराकाशभागेऽव्यापनात् स्वरूपासिद्धत्वमपि । तन्मते गगनस्याकार्यत्वात् । न च तस्य पक्षबाह्यत्वाच्च दोष इति वाच्यम् । भूतत्वावच्छिन्नस्य पक्षत्वात् । विरुद्धत्वमपि । क्षित्यादिवायुपर्यन्तानि कार्याणि न भवन्ति, महाभूतशब्दवाच्यत्वात्, आकाशवत्, इति प्रत्यनुमानात् । अतो नानुमानविषयत्वं ब्रह्मण इति ।

नाप्युपमानविषयत्वम् । ब्रह्मसदृशपदार्थान्तराभावेन तत्सादृश्यज्ञानासिद्धेः । "न सदृशे तिष्ठति रूपमस्ये"ति श्रुतेः ।

ननु "निरञ्जनः परमं साम्यमुपैति", "इदं ज्ञानमुपाश्रित्य मनसा धर्म्ममागता" इति श्रुतिस्मृतिभ्यां सिद्धत्वात् तत्सदृशस्य तद्भिन्नत्वे सति तद्गतभूयोधर्मवत्त्वस्यैव सादृश्यसाम्यसाधर्म्यपदवाच्यत्वात् कथं सदृशाभाव इति चेत् । सत्यम् । तस्य सत्त्वेऽपि शास्त्रैकगम्यत्वेन प्रमाणागोचरत्वादविषयत्वं तदवस्थमेव ।

श्रौतोपमानं तु शास्त्रान्तःपातित्वादिष्टमेव ।

ननु मास्तु सादृश्यज्ञानजन्योऽयमिति विषयत्वं ब्रह्मणः, तत्सादृश्याभावात्, तथापि वैसादृश्यज्ञानजन्योऽयमिति विषयत्वं स्यादेव ब्रह्मणः, विसदृशानां चेतनादीनां सत्त्वात्, यथा गोविसदृशोऽश्व इति चेन्न । असंभवात् । तथाहि, कीदृशोऽश्व इत्यादिना तदविदुषा पृष्टे तज्ज्ञापकस्याश्वादिज्ञानाभावे गोविसदृशो द्विशफस्वल्पपुच्छविशिष्टव्यक्तिमद्भिन्नोऽश्वः, अतिदीर्घग्रीवाविशिष्टव्यक्तिमद्भिन्नो हस्ती, विषयिसदृशं हननासाधारणीभूतौषध्यादिभिन्नममृतम्, इति ज्ञापनात्मकवचनप्रयोक्तृत्वानुपपत्तेः । तथा च ज्ञापकब्रह्मज्ञानाभावेन ज्ञापकत्वासिद्धेः । ज्ञातृत्वपूर्वकत्वाज्ज्ञापकत्वस्येति भावः ।

किंच, वैसादृश्यज्ञानसत्त्वेऽपि नोक्तलक्षणब्रह्मसिद्धिः । तथाहि, यथा गोविसदृशोऽश्व इति ज्ञानाद्गोभिन्नपदार्थमात्रस्य सामान्यज्ञाने जातेऽप्यश्वत्वावच्छिन्नैकशफवद्व्यक्तिज्ञानस्यासिद्धिरेव, तथा ब्रह्मविसदृशचिदचिद्वस्तुज्ञानात् तद्विसदृशं ब्रह्मेति ज्ञानोत्पत्तावपि सर्वज्ञत्वाद्यसाधारणधर्मावच्छिन्नब्रह्मज्ञानाभावेन जगत्कारणत्वज्ञानासिद्धत्वान्नोपमेयं ब्रह्मेति राद्धान्तः ।

नाप्यर्थापत्तिप्रमाणवेद्यं ब्रह्म । तस्य पीनत्वादिज्ञानवदुपपाद्यज्ञानासिद्धेः । किंच, तस्यास्तर्करूपतया तद्विषयत्वस्यानुमाननिराकरणेनैव निरासो ज्ञेयः ।

नाप्यनुपलब्धिगोचरत्वं ब्रह्मणः संभावनार्हम् । तस्या अभावकरणकत्वात् । ब्रह्मणस्तु केवलान्वयित्वेनाभावत्वावच्छिन्नाप्रतियोगित्वात् । प्रतियोगिज्ञानसापेक्षत्वादभावस्य । तथा चाभावज्ञानेऽनुपलब्धिप्रवृत्तिः, तदभावे प्रवृत्तेरेवासंभवात् कुतस्तद्विषयताप्रत्याशेति भावः ।

तत सिद्धं परिशेषाच्छास्त्रैकवेद्यं ब्रह्मेति ।

ननु ब्रह्मणः शास्त्रज्ञाप्यत्वे परप्रकाश्यत्वप्रसक्त्या स्वप्रकाशत्वहानिः, तत्प्रतिपादकशास्त्रव्याकोपश्च, इति चेन्न । शास्त्रगतबोधकशक्तीनां तच्छक्त्यभिन्नत्वात् । ब्रह्मशक्तीनां च तत्परतन्त्रसत्ताकत्वेन तदपृथक्त्वसिद्धत्वात् । तद्गतप्रकाशकत्वं च स्वप्रकाशकत्वमेव । तस्मान्नोक्तदोषावकाशः ।

नन्वेवं ब्रह्मशक्तीनामपरिच्छिन्नत्वेन चेतनज्ञकरणेष्वपि सद्भावात् तद्विषयत्वेऽप्युक्तन्यायेन क्षत्यभावात् स्वप्रकाशकत्वमेवाङ्गीकार्यं, तथात्वे चान्यप्रमाणाविषयत्वोक्तिभङ्ग इति चेत्, सत्यम् । पारमेश्वरीयशक्तीनां चेतनज्ञकरणेषु व्याप्तिसाम्येऽपि तत्तद्बुद्धिव्यवधानेन दोषवत्त्वसंभवात् तद्विषयस्य न स्वप्रकाशत्वयोगः । वेदे तु तद्व्यवधानाभावेन साक्षाद्विषयतया महद्वैषम्यमिति भावः ।

ननु "यतो वाचो निवर्तन्ते" इत्यादिश्रुत्या शब्दाविषयताया अपि डिण्डिमायमानत्वात् कथं शास्त्रैकवेद्यं ब्रह्मेति चेन्न । श्रुतेः कार्त्स्न्येन वागोचरत्वनिषेधपरत्वादिति "प्रकृतैतावत्त्वं हि"ति सूत्रे वक्ष्यते ॥ ३ ॥

न"न्वाम्नायस्य क्रियार्थत्वादानर्थक्यमतदर्थानां विधिना त्वेकवाक्यत्वात् स्तुत्यर्थेन विधीनां स्यु"रित्यादिभिर्भगवता जैमिनिना सर्वस्यापि वेदस्य क्रियापरत्वेन सूचितत्वात् तदन्तःपातिवेदान्तभागस्यापि कर्मण्येव समन्वयो युक्तः । तथात्वे च कथं शास्त्रैकप्रमाणगम्यं ब्रह्मैवेत्युक्तसिद्धान्तसंभवः । शास्त्रस्य तद्विषयकत्वाभावात् ।

एतदुक्तं भवति । पञ्चप्रकारवाक्यसमुदायस्तावत् समस्तो वेदः, वाक्यानि च विधिनिषेधार्थवादमन्त्रनामधेयाख्यानि, तत्र "ज्योतिष्टोमेन यजेत स्वर्गकाम" इत्यादि विधिवाक्यं, "ब्राह्मणो न हन्तव्य" इत्यादि निषेधवाक्यं, "वायुर्वै क्षेपिष्ठा देवते"त्यादयोऽर्थवादाः, "इषे त्वा" "अग्निर्मूर्द्धा दिव" इत्यादयो मन्त्राः, ज्योतिष्टोमाश्वमेधादीनि नामधेयानीति, तेषां विवेकः, तथा चोपक्रमे "अथातो धर्मजिज्ञासे"ति सूत्रे वेदस्याध्ययनविधिकरणकभावनाविधिभाव्यफलवदर्थपरत्वमुक्तं, "चोदनालक्षणोऽर्थो धर्म" इति द्वितीये लक्षणसूत्रे धर्मे चोदना प्रमाणमिति कार्यपरत्वव्याप्यं वेदप्रामाण्यं, यत्र प्रामाण्यं तत्र कार्यपरत्वमिति व्याप्त्या निर्णीतं, तत्र 'वायुर्वै क्षेपिष्ठा देवते,त्याद्यर्थवादानां धर्मे प्रामाण्यमस्ति न वेति संशये पूर्वपक्षमाह, 'आम्नायस्ये'ति वेदस्य, क्रिया एवार्थो विषयप्रतिपाद्यो यस्य स क्रियार्थः, तस्य भावस्तत्त्वं, तस्माद्धेतोरर्थवादानां प्रामाण्यं नास्ति, किं तर्हि, इत्याशङ्क्याह, 'अतदर्थानामानर्थक्यमिति' न सा क्रियार्थो येषां तेऽतदर्था अर्थवादादयः, तेषामानर्थक्यमर्थशून्यत्वमेवास्तु, तथैव वेदा-

त्तानामपि, न हि "स्वाध्यायोऽध्येतव्य" इत्यध्ययनविध्युपात्तानां निष्फलब्रह्मपरत्वे प्रामाण्यं युक्तमिति प्राप्ते सिद्धान्तमाह, 'विधिना त्वेकवाक्यत्वादिति, अर्थवादानां विधिवाक्यैरेकवाक्यत्वात् तद्विधेयार्थानां स्तुत्यर्थेन स्तुत्यर्थरूपेण द्वारेणार्थवादाः प्रमाणं स्युरिति । एवं च विधिनिषेधविधुराणां वेदान्तानां सिद्धार्थवस्तुबोधकानामपि मन्त्रार्थवादादिष्वेवान्तर्भावेनाध्ययनविध्युपात्तत्वात् सर्वथानर्थक्यनिरासाय परंपरया साध्ये कर्मण्येवान्वयो युक्तः, स्वातन्त्र्याभ्युपगमे निष्फलत्वापत्तेस्तेषां क्रत्वङ्गकर्तृप्रतिपादनेन नैराकाङ्क्ष्यं बोध्यं, तत्र तत्त्वंपदार्थपराणां वाक्यानां कर्मकर्तृदेवतास्तावकत्वं, तज्ज्ञानस्य च परविद्याख्यस्य फलस्तावकत्वं, वेदान्तवाक्यानि न ब्रह्मपराणि, क्रत्वङ्गकर्तृप्राशस्त्यप्रकाशनपरत्वात्, अर्थवादवाक्यवत्, इति प्राप्त उच्यते ॥

॥ तत् तु समन्वयात् ॥ ४ ॥

तुशब्दः पूर्वपक्षनिषेधार्थः । पूर्वोक्तरीत्या 'शास्त्रैकवेद्यं तदुक्तलक्षणं ब्रह्मैव । कुतः । समन्वयात् । सर्वशास्त्रस्य तत्रैव मुमुक्षुजिज्ञास्ये जगदभिन्ननिमित्तोपादानकारणे शास्त्रयोनौ जीवप्रधानकालकर्मादिनियन्तरि ब्रह्मरुद्रेन्द्रादिकिरीटेडितपादपीठे निखिलदोषगन्धाघ्रातमाहात्म्ये सार्वज्ञ्याद्यनन्तगुणनिलये मुक्तोपसृप्ये ब्रह्मणि सम्यग् वाचकतयान्वयात् । समन्वितश्च स विजिज्ञासितव्यः । "यतो वा इमानि भूतानि जायन्ते", एतस्माज्जायते प्राणो मनः सर्वेन्द्रियाणि च । "सर्वे वेदा यत्पदमामनन्ति", "अन्तः प्रविष्टः शास्ता जनानाम्", "यं सर्वे देवा नमन्ति", "य आत्मा अपहतपाप्मा", "विजरो विमृत्युर्विशोको विजिघत्सोऽपिपासः" । "यः सर्वज्ञः सर्ववित्", "ब्रह्म विदाप्नोति पर"मित्यादिवाक्यकदम्बैस्तत्रैव यदुक्तं सर्वस्यापि वेदस्य क्रियापरत्वं, तत् तुच्छं ब्रह्म । तस्कराणां कपोलकल्पनामात्रत्वात् । प्रत्युत समस्तधर्मजातस्य ब्रह्मविविदिषयैव मोक्षासाधारणोपायभूतयोपक्षीणत्वात् । कर्मणो मोक्षोपायभूतविद्योत्पादकत्वेन परंपरया ब्रह्मण्येव समन्वयाच्च विविदिषाश्रुतेः ।

एतेनैव यदुक्तं क्रत्वङ्गकर्तृप्रतिपादनेन वेदान्तानां नैराकाङ्क्ष्यमिति तत् तु निरस्तम् । प्रत्युत कर्मण एव जिज्ञासोर्विशेषणत्वेन तदधिकारित्वसंपादनेनैव नैराकाङ्क्ष्यात् । 'अर्थी समर्थो विद्वानधिकारी'ति सूत्रे क्रियाविद एवाधिकारित्वनिरूपणाच्छास्त्रं न कर्मपरम् । तस्य जिज्ञासोत्पादनेनोपक्षीणत्वात् । रूपादिज्ञानोत्पादनेन चक्षुरादेरिवेत्यनुमानात् ।

ननु सर्वेषां कारकाणां कर्मसाधनत्वात् कर्तुरपि कारकत्वाविशेषेण क्रियाङ्गत्वोपपत्तिः । न च ब्रह्मण आप्तकामतया तद्भिन्नत्वेन कर्मकर्तृत्वाभावादिष्टसिद्धिरिति वाच्यम् । ब्रह्मणस्तथात्वेऽपि जीवभिन्नत्वाभावात् । तत्त्वमस्यादिवाक्यैः क्रत्वङ्गकर्तुः क्षेत्रज्ञस्य ब्रह्मत्वविधानेन सूयमानत्वान्न तद्भिन्नं किमपि ब्रह्मशब्दाभिधेयमस्तीति चेन्न । मन्दानामन्धपरंपरोपदेशमात्रत्वात् । नहि कर्मकर्त्रादिसर्वकारककलापनियन्तुः स्वतन्त्रस्य विश्वात्मनः परब्रह्मणः पराङ्गत्वं जीवात् पृथगसत्त्वं चानुन्मत्तैः कैश्चिदपि वक्तुं शक्यम् ।

नापि "प्लवा ह्येते अदृढा यज्ञरूपा" इत्यादिश्रुतिनिन्दिते कर्मणि वेदान्तानां समन्वयो युक्तः, अनाप्तत्वापत्तेः । न हि स्वमुखेनैव निन्दां कृत्वा पुनस्तस्मिन्नेव निन्दाविषये स्वयं समन्वीयात् सर्वज्ञो वेदः । तथात्वे चोन्मत्तप्रलापवत् तस्याप्यप्रामाण्यप्रसङ्गात् ।

नापि वेदान्तानां विध्यङ्गत्वमर्थवादादिवद् वक्तुं शक्यम् । भिन्नप्रकरणपठितत्वाद्विधिसांनिध्याभावाच्च ।

नापि प्रवृत्तिनिवृत्त्यभावरूपभूतार्थबोधकतया वेदान्तानां निष्फलत्वं वक्तुं शक्यम् । वेदान्तवेद्यब्रह्मज्ञानस्य मोक्षरूपपरमश्रेयःफलवत्त्वात् । "तमेव विदित्वातिमृत्युमेति, नान्यः पन्था विद्यतेऽयनाय",

"यदा चर्मवदाकाशं वेष्टयिष्यन्ति मानवाः ।
तदा देवमविज्ञाय दुःखस्यान्तो भविष्यति" ॥

इत्याद्यन्वयव्यतिरेकसावधारणश्रुतिभ्यः ।

ननु "अक्षय्यं हवै चातुर्मास्ययाजिन" इत्यादिना कर्मणोऽपि ब्रह्मवत् स्तुतिश्रवणात् तत्र समन्वयो न दोषावह इति चेन्न । वेदविषयः स एव, यः सर्वत्र सूयत एव, न तु क्वापि निन्द्यते । कर्मणस्तु स्तुतिनिन्दयोरुभयोर्विषयत्वदर्शनान्नाशास्त्रसमन्वितत्वमित्यर्थः । "तद्यथेह कर्मजितो लोकः क्षीयते, नास्त्यकृतः कृतेने"त्यादिना निन्दापूर्वकश्रेयःप्रतिबन्धकत्वश्रवणात् । कर्मस्तुतिस्तु बालानां प्रवर्तनायैव ।

ननु स्यादेतदुपनिषद्भागस्य कथं चिद्ब्रह्मपरत्वम् । तत्र तथात्वदर्शनात् । पूर्वभागस्य तु "यावज्जीवमग्निहोत्रं जुहोति", ज्योतिष्टोमेन यजेत स्वर्गकाम", इत्यादिना नित्यकाम्यादिकर्मविधायकत्वेन नैराकाङ्क्ष्यत्वश्रवणात् कथं ब्रह्मपरत्वमिति चेन्न । कृत्स्नस्यापि वेदस्य ब्रह्मपरत्वमेव, कर्मादौ तस्य केनचिद् भागेन कथंचिदन्वयदर्शनेऽपि समन्वयस्तु ब्रह्मण्येव । तत्रोपनिषद्भागस्य साक्षात् तत्स्वरूपगुणादिप्रतिपादनपरत्वात् साक्षादन्वयः । नित्यनैमित्तिककर्मपराणां चाधिकारिसत्त्वशुद्धिसंपादनद्वारा ब्रह्मविषयकज्ञानाद्युपपादनेन काम्यानामपि संयोगपृथक्त्वन्यायेन तत्रैव परंपरया समन्वय इति विवेकः । "एकस्योभयत्वे संयोगपृथक्त्व"मिति जैमिन्युक्तेः । एकस्य कर्मण उभयत्वेऽनेकफलसंबन्धे संयोगो वा

क्यस्योभयसंबन्धबोधकता, तस्य पृथक्त्वं वेदः, यथा "खादिरैर्जुहोति", "खादिरैर्जुहुयाद्वीर्यकाम" इत्येकस्यैव खादिरकरणकस्य कर्मण उभयपरत्वम्। तथा प्रकृतेऽपि ज्योतिष्टोमादिकर्मणा स्वर्गादिफलकत्वे श्रूयमाणेऽपि विविदिषाश्रुतेर्ज्ञानार्थत्वमित्यवगमादित्यर्थः।

तस्मात् कृत्स्नस्यापि वेदस्य साक्षात् परंपरया वा ब्रह्मण्येव समन्वय इति सिद्धम्। विस्तरस्त्वाकरे द्रष्टव्यः।

एवंभूतस्य शास्त्रसमन्वितस्य ब्रह्मणः "सोऽन्वेष्टव्यः", "स विजिज्ञासितव्यः", निदिध्यासितव्य" इत्यादिश्रुतिप्रमितेन ध्यानेन "यमेवैष वृणुते तेन लभ्य" इत्यादिवाक्योक्ततदनुग्रहकृतेन "भिद्यते हृदयग्रन्थि"रित्यादिमन्त्रप्रतिपादितात् तत्साक्षात्कारान्मोक्ष इत्यग्रे स्फुटीभविष्यति ॥ ४ ॥

॥ शिष्टमग्रे ॥

THE VIDVAN-MANO-RANJINI'

OR

REJOICER OF THE MIND OF THE LEARNED,

A COMMENTARY ON SAD-ÁNANDA'S VEDÁNTA-SÁRA, BY RÁMA-TÍRTHA.

(Continued from page 26.)

In this text [That art thou, the literal sense of the words is not coherent, as it is in the proposition The lotus is blue. In this proposition, since blue the quality expressed by the term blue, and lotus the substance expressed by the term lotus, exclude such qualities as white and such substances as cloth, but do not exclude each other, the literal sense of the proposition is coherent, because no other evidence is repugnant to the affirmation that the two are united as subject and predicate, or that either one to which the other is attributed is identical with it.] The drift of this passage is that the great text is intended to convey the meaning of the indivisibility of all existence. In anticipation of the remark that indivisibility may be intended in the proposition The lotus is blue, the author proceeds to say *In this proposition &c.* No indivisibility, he means, can be intended, since there is nothing repugnant to the relation of subject and attribute between the substance lotus which excludes cloth and the like, and the quality blue which excludes white and the like; also since the proposition signifies a unity resultant from such determination, or the identity of either with the other whereby it is characterised, whereas no absolute and independent unity is intended. The author now proceeds to state the difference between the text under consideration and the proposition The Lotus is blue.

But in this text [That art thou, since intelligence invisible &c. denoted by the word That and intelligence visible denoted by the word Thou, reciprocally exclude each other, the sense of the text is not coherent, because perception and other evidences are repugnant to the admission that the two are united as subject and predicate, or that either one of which the other is predicated is identical with it.] Though the objects denoted by the terms That and Thou are not in their proper nature capable of being perceived, the object of the term That being the secondless absolute, and the object of the term Thou being that which as the seer cannot itself be seen, and accordingly their numerical difference cannot be perceived, yet when we hear coherence ascribed to the unperceived object of the terms That and Thou there arises an assurance of repugnance to spirit the sense of the term undeveloped, and in reference to which the words *perception and other evidences* are employed. The meaning is that the reference of the terms That and Thou to the same object already expressed is impossible, if the terms be taken as denotative of their total objects, because expressing different matters they could not exist in unity. It has thus been said: The relation of subject and attribute cannot exist between the objects Lotus and Blue, inasmuch as both objects are substances; nor can the relation of cause and effect subsist between them, as between a pair of earrings and the gold of which they are made, inasmuch as the relation of That and Thou is eternal and inseparable; nor can the relation between them be that of whole and part, as that between the earth and a barren soil, inasmuch as they contain no parts; nor can it be that of action and agent, as in a stone thrown with the hand, inasmuch as they are inactive; nor can it be that of species and individual, as that between the class cow and individual cows, inasmuch as they are both substances. Hence, neither is their relation that of

तत्रेति। शौक्ल्यादिव्यावर्तकनीलगुणस्य पटादिव्यावर्तकोत्पलद्रव्यस्य च गुणगुणिभावेन विरोधाभावात् तत्संसर्गैक्यस्य वा तदन्यतरनिष्टस्यान्यतरस्य वा वाक्यार्थत्वाचाखण्डार्थत्वं मुख्यैक्यस्य तत्राविवक्षितत्वादित्यर्थः प्रकृतवाक्ये नीलोत्पलवाक्याद्वैषम्यमाह॥

अत्रत्विति। यद्यपि तत्त्वंपदार्थयोः स्वरूपतो न प्रत्यक्षत्वं तत्पदार्थस्याद्वितीयत्वात् त्वंपदार्थस्य च द्रष्टत्वाद्द्रष्टुर्दृष्टत्वानुपपत्तेः तथा च तद्भेदस्याप्यप्रत्यक्षता तथापि तत् त्वंपदयोः परोक्षार्थाधिगतसङ्गत्योः श्रवणसमये अपरिशोधितपदार्थस्य पुंसो भवति विरोधस्फूर्त्तिरिति तदपेक्षया प्रत्यक्षादिप्रमाणविरोधादित्युक्तं तथा च तत्त्वं पदयोः सकलांशे व्युत्पन्नयोर्विरुद्धार्थविषयत्वेनैकनिष्ठत्वाभावाच्च विवक्षितं सामानाधिकरण्यमुपपद्यते इति भावः एतदुक्तं भवति न तावत्त्वमर्थयोर्नीलोत्पलवद्गुणगुणिभावः उभयोरपिद्रव्यत्वात् नापि कुण्डलसुवर्णवत् कार्य्यकारणभावो नित्यत्वादविकृतत्वाच्च नापि भूम्यूषरादिवदंशांशिभावो निरवयवत्वात् नापि क्रिया तद्वावउपलादिवन्निष्क्रियत्वात् नापि गोत्वशाबलेयादिवज्जातिव्यक्तिभावोद्रव्यत्वादेव अतएव न विशेषविशेषिभावोऽपि वस्तुतस्तु विज्ञानघनमात्रत्वावधारणान्नेतिनेतीत्यशेषविशेषप्रत्याख्यानेन निर्द्धर्मकत्वावधारणाच्च न केनापि प्रकारेण तत्त्वमादिवाक्यानां संसृष्टार्थनिष्टत्वशङ्कावकाशं लभते॥

subject and attribute, and the supposition of the objectionist that the terms That and Thou are literally coherent cannot find occasion, because there is a restriction to pure consciousness, and because all differences without exception may be denied and the object be restricted to the unconditioned.

Nor is this text, like the text Thou art Indra, eulogistic, for were it so its reiteration nine times would be useless; for eulogy is no where reiterated again and again in hortatory strain. It is not explanatory, not being merely supplementary to another text, for there is not in this department of science any other principal text to which it should be residuary. Nor is it of secondary or tropical application, as the words This is the king when applied to an officer of the king, for unity cannot be tropically predicated of two objects whereof the duality is not fully recognised. Nor is there any possibility in this grand text of error or doubtfulness, inasmuch as revelation is absolutely authoritative. The text, therefore, That art thou, refers to an undivided object-matter, inasmuch as it is a text relative to causal uneduced substance only, and relating to one subject only, like the text This is the same Deva-datta. It has thus, then, been shown that implication is not compatible, inasmuch as the two terms relating to an indivisible object are repugnant to part of the denoted sense viz. the unity of subject.

In order to show by the residuary method that implication of a portion is the only compatible function of the terms, the author proceeds to repudiate another form of implication.

But again [in the text That art thou coherence is not arrived at by our supposing the terms to be implicative by abandonment of the designated, as is the case in the sentence The cattle-station is settled on the Ganges.] A cattle-station is a settlement of herdsmen. If it be asked how this latter sentence is explained, it may be replied that there is possible in the term Ganges a function implicative and abandoning its designate, inasmuch as the denotable matter (viz. the river itself) is altogether abandoned as being unconnected with the other words of the sentence. It is therefore stated in the text:

In this [latter sentence, implication by abandonment of the designates is compatible, inasmuch as the denotable matter of the sentence, viz. the relation of containing and contained as obtaining between the Ganges and the cattle-station, being absurd, the implication of the river-bank connected with the river by the abandonment of the total denotable matter, is appropriate.] The author next states that in the text under consideration implication by abandonment of the denotable matter is not compatible, since there can be no such relinquishment of the entire matter directly expressible.

In this [text, on the other hand, implication by abandonment of the denotation, is not compatible, inasmuch as only a portion of the denotation, viz. the unity of intelligence whether characterised by invisibility or by visibility and the like, is incompatible, and the implication of an entirely different object would be impossible, without the abandonment of the other portion of the denotation.] The author next anticipates the objection that implication by abandonment of the designates may belong to the terms That and thou, as it belongs to the term Ganges, inasmuch as if portion of the determination be omitted, there must result an omission of the thing determined, according to the maxim Absence of the determination supposes absence of the thing determined. This objection he repudiates, the instances not being parallel.

Nor [can it be urged: Why is not implication abandoning the designates compatible, if we allow that the term that or the term thou expresses the term thou or the term that by the abandonment by each of its proper denotation, just as the term Ganges by dropping its denotation implicates the object of the term river-bank? The cases are disparate; for whereas in the one case the term bank being unmentioned

नचेदं वाक्यं त्वमिन्द्रोऽसीतिवत् स्तुतिपरं नवकृत्वोभ्यासवैयर्थ्यप्रसङ्गात् नहि स्तुतिः पुनः पुनः परिचोदनापूर्व्वकं क्वचिदभ्यस्यते अतएव नार्थवादः अनन्यशेषत्वाच्च। नह्यस्मिन् प्रकरणेऽन्यत्किञ्चित्प्रधानवाक्यमुपलभ्यते यच्छेषत्वेनेदमर्थवादरूपं भवेत् नापि राजपुरुषे राजायमितिवदौपचारिकमप्रमितभेदयोरैक्यस्यौपचारिकत्वानुपपत्तेः नापि विपर्य्ययः संशयो वात्र सम्भवति श्रुतेः स्वतः प्रामाण्यात् तस्मात्तत्त्वमस्यादिवाक्यं अखण्डार्थनिष्ठं अकार्य्यकारणद्रव्यमात्रनिष्ठत्वे सति सामानाधिकरण्यवाक्यत्वात् सोऽयं देवदत्तइतिवाक्यवदिति तदेवं पदयोरखण्डार्थनिष्ठत्वेन सामानाधिकरण्यवाच्यार्थांशे विरोधाद्विना लक्षणां न सङ्गच्छतइत्युक्तं तत्र भागलक्षणामेव परिशेषयितुं लक्षणान्तरं व्युदस्यति अत्रेत्यादिना घोषश्चाभीरनिवासः कुत इत्यपेक्षायां गङ्गापदे जहल्लक्षणा सम्भवति वाच्यार्थस्य तत्राशेषस्यानन्वयेन परित्याज्यत्वादित्याह।

तत्र गङ्गाघोषयोरिति। प्रकृतवाक्यार्थस्याशेषपरित्यागायोगात् न जहल्लक्षणा सङ्गच्छत इत्याह।

अत्रत्विति। विशेषणांशत्यागेऽपि विशेषणाभावे विशिष्याभाववन्न्यायेन विशिष्टस्वार्थपरित्यागाज्जहल्लक्षणैत्र तत्त्वंपदयोरपि गङ्गापदवत् स्यादित्याशङ्क्य वैषम्येण प्रत्याचष्टे।

नचेति। यथापदादेव वाक्यार्थान्वयिपदार्थप्रतीतौ लक्षणावैयर्थ्यं तथा त्वं पदार्थातिरिक्तस्य तत्सम्बन्धिनो वाक्यार्थान्वयिनोऽर्थस्याप्रसिद्धेरिति भावः अजहत्स्वार्थामप्यत्र व्युदस्यति अत्र शोण इति शोणपदे स्ववाच्यशोणगुणापरित्यागेन तदाधारलक्षणावत् तत्पदे त्वंपदे च स्ववाच्यापरित्यागेन तत्सम्बन्धिनो यस्य कस्य चिदनिर्दिष्टविशेषस्यार्थान्तरस्य प्रतीत्यालक्षणाङ्गीकरणेऽपि वाच्यार्थयोर्विरोधस्यापरिहाराज्जहल्लक्षणाप्यच युज्यत इत्यर्थः प्रकारान्तरेणाजहल्लक्षणामुद्दङ्क्य निराचष्टे।

and its object consequently unexpressed, it might be apprehended by implication, in the other case there could be no room for the apprehension of the reciprocally interchanged designates when both the terms that and thou having been mentioned their objects had been expressed.] The meaning of this is that as implication is unnecessary to the apprehension of the object of a term connected with the sense of the whole sentence by means of the very term itself, so there could be understood no object connected with the subject of the text, connected with the word that, other than the object of the word thou.

The author now proceeds to refuse the applicability to this grand text, of implication which does not abandon the denotable matter.

To this [*grand text implication which does not abandon the denotable matter does not apply, as it does to the sentence The chestnut gallops. In this sentence the primarily expressible matter, viz. motion of the quality chesnut colour being absurd, and the escape from this absurdity resting upon the implication of a horse as the subject of that quality, implication which does not abandon the denotation is competent. But in the great text That art thou, the primary sense of the text, viz. the unity of intelligence whether characterised by perceivedness or unperceivedness, being absurd, the absurdity cannot be avoided by the implication of any other matter connected therewith, without abandonment of the primarily expressible matter.*] Though we admitted that implication takes place by the apprehension of another matter indeterminate and connected with the denoted matter, in the term that and in the term thou, just as in the term chestnut there is an implication of the substratum of the chestnut colour without relinquishment of the chestnut colour which is primarily expressible by the word chestnut; yet implication retentive or inclusive of the denotation is not possible in the grand text, since it could not escape the contradiction inherent in the matters directly expressible (viz. pure intelligence and intelligence illusorily appropriated to an individual sensorium.) The author proceeds in another manner to consider and repudiate the applicability of implication without relinquishment of the denotation.

Nor [*can it be urged: Let the word that or the word thou by relinquishing the repugnant portion of its primary sense, implicate (by reciprocal interchange) the meaning of the word thou and of the word that together with the residuary portion,—and why then postulate another form of implicative verbal function viz. implication of a portion? For one term cannot implicate both part of its own denotation and a distinct denotable matter; and again there is no need for a second apprehension by implication of a matter which has been already conveyel by another term.*] The meaning is that both the terms (that and thou) cannot simultaneously implicate the sense of one of the terms (viz. that) already heard. The author extends to this supposition an objection formerly urged, in the words *there is no need &c.* It remains therefore, that it cannot be explained otherwise than by the assumption of partial implication, that the object matter of the grand text is the impartite absolute. It is by that form of implication alone, then, that the terms that and thou, by terminating in one denotation, refer to a common subject. This explanation the author proceeds to recapitulate.

Therefore [*as the sentence That is this same Devadatta, or the denotation thereof, in consequence of the*

नचेति। सकृत् श्रुतस्यैवैकस्य पदस्य युगपदुभयलक्षकत्वासम्भवादित्यर्थः अत्रापि पूर्व्वोक्तं दूषणं प्रसञ्जयति पदान्तरेणेति परिशेषाद्भागलक्षणामन्तरेणाखण्डवाक्यार्थसिद्धिरतस्तयैव लक्षणयैकार्थपर्य्यवसायित्वेन पदयोः सामानाधिकरण्यमित्युपसंहरति।

तस्मादिति। सोऽयमिति पदद्वयं वाक्यशब्दार्थः देवदत्तपदस्य सामानाधिकरण्यात् सिद्धैक्यस्पष्टीकरणार्थत्वाल्लक्षणाविचारानुपयोगात् यद्यपि पदधर्मो लक्षणा तथापि अभिहितान्वयमतवत् पदार्थस्यापि लक्षकत्वमभ्युपगम्य पदार्थो वेत्युक्तं अन्यत्समानं। अत्र केचिदाहुः पदद्वये लक्षणानुपपन्ना सोऽयं देवदत्तइत्युक्ते सशब्देनातीतदेशकालपरित्यागेन लक्षितेदेवदत्तस्वरूपेवर्त्तमानदेशकालविशिष्टमयं पदेन प्रतिपाद्यते तथाच पूर्व्वोत्तरदेवदत्तस्वरूपाभेदसिद्धिरिति तदयुक्तं विशिष्टस्य केवलाभिन्नत्वात् यथा केवलो विशिष्टाद्भिन्नस्तथाविशिष्टोऽपि केवलाद्भिन्न एव तथाच विशिष्टविषयस्यायं शब्दस्यापि विनालक्षणां तत्स्वरूपनिष्ठत्वं न सम्भवति तदभावे च सोऽयं पदयोः सामानाधिकरण्येन देवदत्तैक्यप्रतिपादकतेत्यास्तां तावत् अपरे पुनराहुः न पदवाच्यार्थयोः परस्परविरोधाल्लक्षणा श्रीयते किन्तु वाक्यार्थैक्ये तात्पर्य्याभावादिति तन्न तात्पर्य्याभावावगमस्यापि विरोधस्फूर्त्त्यधीनत्वात् अन्यथावेदवाक्यप्रतिपादितेऽर्थे सम्वादिविसम्वादिप्रमाणान्तराविषये तात्पर्य्यानवगमायोगात् तस्मात् सुष्ठूक्तं वाक्यार्थस्यांशे विरोधादिति तदेवमात्मेति तूपगच्छन्ति ग्राहयन्ति चेति न्यायेन जीवस्य नित्यशुद्धबुद्धमुक्तसत्यज्ञानानन्तानन्दे परिपूर्णे ब्रह्मण्यात्मत्वोपदेशवाक्यार्थं सप्रपञ्चं निरूप्येदानीं अवगतस्वरूपस्यानुभवावभासिवाक्यार्थं वर्णयितुमुपक्रमते।

अयेत्यादिना। उपदेशवाक्यार्थनिरूपणानन्तर्य्ये प्रथमशब्दार्थः अधिकारिणोविधिवदधीतवेदेत्याद्युक्तलक्षणस्यासम्भावनाविपरीतभावनाख्यचित्तदोषरहितस्याध्यारोपापादन्यायेनाचार्य्योपदेशानन्तरमेव नित्यशुद्धत्वादिविशेषणं ब्रह्माहमस्मित्यखण्डाकारान्तःकरणवृत्तिरुदेति साक्षात्काररूपा न पुनः परोक्षार्थाकारितेत्यर्थः नच शब्दस्य परोक्षज्ञानजनकत्वस्वाभाव्यान्न तेनापरोक्षाचित्तवृतिरुदेतीति वाच्यं यत्साक्षादपरोक्षाद्ब्रह्म यआत्मा सर्व्वान्तर इति श्रुतेर्नित्यापरोक्षं ब्रह्मात्मस्वरूपं तस्मिन् परोक्षज्ञानं जनयतःशब्दस्याप्रामाण्यापत्तेः किञ्च ज्ञानस्य परोक्षत्वापरोक्षत्वेन करणनिबन्धने किन्त्वर्थ निबन्धने एकस्यैव मनसः सुखादिविषयापरोक्षज्ञानहेतुत्वस्यातीतार्थस्मृतिहेतुत्त्वस्य च दर्शनात् तत्र सहकारिभेदात्तथाभाव इति चेत् तर्हिहाप्यस्ति सहकारिभेदः शब्दप्रतिपत्तुः शब्दार्थनैकट्यलक्षणः निरूढं ह्यन्यतममात्मनः स्वरूपं ब्रह्मणः स्वरूपमुपाध्यन्तराधिष्ठमिन्द्रवरुणादिरूपं तस्माद्दशमस्त्वमसीत्यादिवाक्यवत्तत्त्वमस्यादिवाक्यानामपरोक्षज्ञानजनकत्वं युक्तमिति भावः एवमुत्पन्नाखण्डाकाराचित्तवृत्तिः किंकरोतीति तदाह।

partial repugnance in the directly expressible matter of the sentence viz. that between the Devadatta of time past and of time present, by relinquishment of the portion consisting of the contrary times past and present, implicates only the uncontradictory portion of Devadatta; so the text That art thou, or its denotation, since there is a partial contradiction in the sense of the words, viz. in the unity of intelligence whether characterised by perceivedness or by unperceivedness, implicates, by relinquishment of the portion consisting of the contradictories perceivedness and unperceivedness, the uncontradictory, impartite intelligence only.] That and this are two terms, the objects of the words of the sentence employed in order to illustrate a unity established by reference to a common subject, and for the consideration of the implication. Though implication be a property of terms, the author adds the words *or the denotation thereof*, in order to sanction the view that implication may attach to the denotation of the terms, according to the doctrine that syntactical construction is denoted or primarily expressed by the words of a sentence. The rest of the sentenee is analogous to the foregoing part.

Some have held that implication cannot reside in both the terms; that in the sentence That is this same Devadatta, the term this affirms the determination by present time and place to belong to the essential nature of Devadatta, such essential nature being implicated by the term that by relinquishment of past time and place; and that the non-division of the essential nature of the former and latter Devadatta is thus accounted for. This cannot be allowed: for that which is determined differs from that which undetermined just as much as the undetermined differs from the determined, and accordingly the term this which denotes an object modified by concomitants cannot without implication refer to the unmodified essence; and without this the terms that and this are, by reference to the same object, expressive of the unity of Deva-datta. So far, so good. Others again have maintained that an implication or subaudition does not arise from the reciprocal incompossibility of the term and its denotation, but from the fact that the directly expressible sense when taken as a unity affords no evidence of the speaker's intention. This view is erroneous: for the recognition of the absence of such intention depends on the appearance of such incompossibility; since otherwise there could be no recognition of such intention in the case of the matter set forth by a Vedic text, when such matter is not susceptible of other evidence than that of mutually opposing controversialists. Therefore the words *in consequence of a partial repugnance in the directly expressible matter of the sentence* are very properly subjoined.

The author having thus according to the maxim They learn and teach that that is soul, explained in detail the sense of the text which teaches that the individuated spirit is identical with the absolute supreme spirit eternal, pure, intelligent, free, truth, knowledge, boundless bliss, proceeds to expound the sense of the text which declares our consciousness of the essence thus unfolded.

Now [*we shall explain the import of the enunciation of consciousness: I am the supreme spirit.*] In these words the word *now* expresses subsequence to the explication of the expository text. There arises then, in the authorised inquirer, who has been defined as one who has legitimately studied the Vedas &c., and, who is free from the intellectual defect styled vitiation of ideas by improbability, after instruction by the sacred teacher respecting illusory imputation &c., a modification of the internal organ in the form of the undivided, viz., I am the supreme spirit with eternity, purity, &c. as determinants. This modification is presentative, not representative. Nor can it be urged that it being the nature of speech to produce cognition of absent objects, there cannot arise by the means of speech (that is, by instruction) such a presentative modification of the intellect. For according to the text The soul which is interior to all is the supreme, present and not absent, the essence of the eternal absolute spirit is presentative, and nothing can prove that speech produces only a representative cognition thereof. Moreover the immediacy or mediacy of cognition is not determined by the organ but by the object, inasmuch as we observe that the same common sensory is the cause of the immediate cognition of pleasure and other objects, and the cause of the recollection of past objects. If you object that this difference depends on the difference of coefficients or con-causes, we reply that in the case in question also there is such a difference of accessories, viz. the difference of the objects designated to the person who understands the designatory terms; and we may therefore affirm that speech produces an immediate cognition in such texts as That art thou. What does the modification of intelligence thus arising in the form of the undivided bring to pass? To this the author replies.

सात्विति । वृत्तेर्ज्जडत्वादज्ञानबाधनासम्भवमाशङ्क्यतां विशिनष्टि चित्प्रतिबिम्बसहिता सतीति प्रत्यक् चितिव्याप्तेति यावत् ब्रह्मणो विषयीकरणं नाम वृत्तेस्तदाभिमुख्यं ब्रह्मशब्दस्य कार्य्यब्रह्मविषयत्वं व्यावर्त्तयति ।

परमिति । तस्य प्रमेयत्वमाह ।

ज्ञातमिति । तस्य ताटस्थ्यंवारयति ।

प्रत्यगभिन्नमिति । अज्ञानमेव बाधतइत्येवकारेण ब्रह्मणः प्रकाश्यत्वं व्यावर्त्तते एवंविधया चित्तवृत्त्या संसारमूलाज्ञाने बाधिते सति वृत्तेर्बाधकाभावान्मोक्षोऽपि स प्रपञ्चः स्यादित्यत आह ।

But this [*modification, being accompanied by the reflection of pure intelligence, taking for its object the self-conscious undivided, supreme spirit, heretofore unrecognised, sublates the illusion only relative thereto. Then as when the threads the substantial cause of a piece of cloth are burnt, the cloth itself is burnt, so when illusion the substantial cause of all generated being is sublated, all its products being sublated, the modification of intellect moulded in the form of the undivided, as included among these products, is itself sublated.*] The author raising thedoubt whether the modification as being unconscious, can be sublated by cognition, proceeds to characterise it. Being accompanied by the reflection of pure intelligence means pervaded by the self-conscious intelligence. The procedure of the modification is assumption of supreme spirit as an object. The word supreme excludes the denotation by the term spirit of generated spirit. By the word known the author indicates the demonstrability thereof; by the word self-conscious he excludes contemplation of external things. By the particle *only* the illuminated state of spirit is excluded (from such sublation.) It might be supposed that when illusion the root of metempsychosis has been sublated by an intellectual modification of this kind, there being nothing tollent of the modification itself, emancipation itself would possess accompaniments or conditions. The author therefore adds the words *when &c.* The modification, though there is nothing to sublate it, ceases of itself, like a fire which has consumed its fuel; and thus emancipation is not a conditioned state. What becomes then of the reflected self-conscious intelligence? This the author proceeds to state.

[*As the light of a lamp, unable to illuminate the light of the sun, is overpowered by the solar light; so too the intelligence reflected*] *in that* [*modification, by its inability to illuminate self-luminous, self-conscious, undivided, supreme spirit, being overpowerd by that supreme spirit, becomes merely self-conscious, undivided, supreme spirit, because its concomitant the modification which is a portion of illusion has been sublated, just as the reflection of a countenance leaves nothing but the countenance behind when the reflecting mirror is removed.*] The connected sense of the above is that the intelligence itself which is reflected in that modification, becomes self-conscious, undivided, supreme spirit only, because the undivided modification of the understanding is sublated. The removal of the mirror is an illustration of the fact that when a concomitant is suppressed the object accompanied by such concomitant remains in its purely essential form. In the words *As the light of a lamp &c.* the author gives an illustration of the inability of that to which an accessory attaches to illuminate that to which no accessory is adjoined. Or the illustration may show that it is impossible for a limited light to illuminate an unlimited luminary.

After laying down the distinction that the modification of the understanding identical in form with absolute spirit, produced by speech, sublates the illusion relative thereto, but does not illuminate the absolute spirit, in the words *As the light of a lamp &c.* the author proceeds to state the result of this.

And this being the case [*there is no inconsistency between the two sacred texts: By the inner sensory it is to be perceived, and Which by the inner sensory he cogitates not: for while we confess that it is made the object of a modification, we set forth a denial that is concretely objectified.*] The word *established* may be supplied after *inconsistency*. The reason of the statement made in the text is next stated, in the words *While we confess &c.* The difference between being made the object of a modification and being objectively presented is that to be made the object of a modification is to be revealed by an impression of the intellect in the form of such and such an object in consequence of determinate verbal communication and other instruments of science, and to be objectively presented is to depend on a manifestation effected by a portion of pure intelligence appropriated to a modification of the understanding when the understanding has sallied forth and moulded itself to the form of an object presented to the external sense-organs. The author next cites the consentient testimony of the ancients to the matter in question.

A. E. G.

तदेति । वृत्तेर्बाधकाभावेपि दग्धेन्धनानलवत् स्वयमेव विनश्यति- ततो न स प्रपञ्चो मोच इत्यर्थः तर्हि प्रतिविम्बितस्य प्रत्यक्चैतन्यस्य कागतिरितिनामाह ।

तत्रेति । तत्र प्रतिविम्बितं चैतन्यमपि अखण्डचित्तवृत्तेर्बाधितत्वात् प्रत्यगभिन्नपरब्रह्ममात्रं भवतीत्यन्वयः स्वोपाधिविलये उपहितस्य स्वस्वरूपमात्रावस्थाने दृष्टान्तो दर्पणाभाव इति उपाध्युपगामिनो निरुपाधिप्रकाशनासामर्थ्ये दृष्टान्तमाह ।

यथा दीपप्रभेति । यद्वा परिच्छिन्नप्रकाशस्यापरिच्छिन्नावभासने दृष्टान्तः यथा दीपेति वाक्यजनितब्रह्मात्माकारा चित्तवृत्तिस्तद्गताज्ञानमेव बाधते न तु तत्प्रकाशयतीति विशेषंनिरूप्य फलितमाह ।

एवञ्चेति । अविरोधः सिद्धः इति शेषः तत्रेदं शब्दसूचितमर्थं हेतुमाह ।

FOR SALE AT THE
MEDICAL HALL PRESS, BENARES.

The VAISESHIKA APHORISMS OF KANADA, reprinted from the "Pandit" with corrections and emendations, by A. E. GOUGH, B.A. Anglo-Sanskrit Professor, Benares College. *Price Rs.* 4-0.

PRINTED AND PUBLISHED BY THE PROPRIETORS, E. J. LAZARUS AND CO. AT THE MEDICAL HALL PRESS, BENARES.

काशीविद्यासुधानिधिः

श्रीगणेशाय नमः

श्रीमद्विजयिनीदेवीपाठशालोदयोदितः । प्राच्यप्रतीच्यवाक्पूर्वापरपक्षद्वयान्वितः ॥ १ ॥
अङ्करश्मिः स्फुटयतु काशीविद्यासुधानिधिः । प्राचीनार्यजनप्रज्ञाविलासकुमुदोत्करान् ॥ २ ॥

THE PANDIT.

A Monthly Journal, of the Benares College, devoted to Sanskrit Literature.

No. 87. Benares, August 1st, 1873. Vol. VIII.

॥ चिन्तामणेः शब्दखण्डम् ॥

यत्त्ववयवशक्तिस्मृतिकाले समुदायशक्तिस्मृतिनियमे हेत्वभावान्न तया प्रतिबन्ध इति । तन्न । समुदायस्य तावदवयवरूपत्वेन सर्वावयवादेवोभयशक्तिस्मृतिसंभवात् । (१) मण्डपपदे तथा दर्शनात् । (२) अथ पङ्कोत्तरजपदं प्रतिबन्धकं, (३) गोबलीवर्दवत् पङ्कजनिसहप्रयोगे डप्रत्ययस्य कर्तृविशेषपद्मपरत्वं वा, जनेः पद्मजनिविशेषपरत्वं वा, स्वभावादेव कुमुदबोधाजनकत्वं वा, चक्षुष इव रसे कुमुदेऽवयवशक्तिकुण्ठनं वा कल्प्यतां, (४) न तेन कुमुदधीरिति चेत् । तर्ह्यज्ञातपद्मप्रयोगस्य कुमुदसाधारणबोधो न स्यात् । न भवत्येवेति चेत् । किमवयवव्युत्पन्नस्य ततोऽर्थप्रत्यय एव न भवति, यद्वा पङ्कजत्वेन पद्ममेवानुभूयते । आद्ये मन्दुरजादिपदादिव सामग्रीसत्त्वे कथं नानुभवः, द्वितीये कुमुदमप्यनुभूयेताविशेषात् । (५) न चैवं पङ्कजशब्दस्य सामान्यशब्दत्वात्तात्पर्यवशेन विशेषतः पद्मकुमुदधीसंभवान्न रूढिर्न वा लक्षणा स्यादिति वाच्यम् । (६) नहि प्रयोजनक्षतिभयेन सामग्री नानुभावयति । (७) यदि च पद्मकुमुदयोस्तुल्यता तदा गृहीतपद्मप्रयोगस्य पद्मान्वयानुपपत्तिपुरस्सरैव कुमुदधीर्न स्यात् । स्याच्च कदाचिद्वैपरीत्यमतः पद्मे रूढिरेव । कुमुदे यथा लक्षणा तथा वक्ष्यामः । (८) कुण्ठनं च शक्तिवृत्ति (९) धर्मान्तरं वा, शक्तेरनुद्भवो वा, ऽभिभवो वा, तच्च (१०) कारणान्तरं वाऽदृष्टचरं कल्प्यम् । रूढेर्योगप्रतिबन्धकत्वं मण्डपादौ दृष्टमेव । अत एव पङ्काद्यवयवैः पद्ममेवानुभाव्यतइति अवयवनियमकल्पनान्न कुमुदे धीप्रयोगौ । अन्यथा रूढावपि योगान्न कुतस्तौ कुमुदे । यथोद्भित्पदस्य योगात् खनित्रे रूढ्या कर्मविशेषे प्रयोग इति निरस्तम् । अगृहीतनिय-

॥ शब्दचिन्तामणिव्याख्या रुचिदत्तीया ॥

(१) मण्डपेति । अन्यथा मण्डपानकर्त्तरि रूढिपूर्विका लक्षणा न स्यादिति भावः । (२) अथेति । तथा च न प्रतिबन्धार्थं रूढिः, अन्यथासिद्धेरिति भावः । (३) गोबलीवर्द्दवदिति । बलीवर्द्दपदं समभिव्याहृतस्य गोपदस्य स्त्रीगवीमात्रपरत्वादित्यर्थः । (४) न तेनेति । धर्मिकल्पनात् इति न्यायादित्यर्थः । (५) न चैवमिति । एवं कुमुदसाधारण्येन बोधकत्वे पाचकशब्दवदिति भावः । (६) नहीति । तथा चावयवव्युत्पन्नस्य कुमुदसाधारणबोधः स्यादेव, सामग्र्याः सत्त्वादित्यर्थः । कुतस्तर्हि पद्मे शक्तिः कुमुदे वा लक्षणा, सामान्यशब्दत्वेनैवोभयबोधोपपत्तेरित्यत आह । (७) यदि चेति । कुण्ठने दूषणान्तरमाह । (८) कुण्ठनं चेति । (९) धर्मान्तरमिति । पदार्थान्तरमित्यर्थः । (१०) कारणान्तरम्, अभिभवादिकारणान्तरम् । पदार्थान्तरं चादृष्टचरमित्यर्थः

तपद्मप्रयोगस्य कुमुदसाधारणबोधदर्शनात् । रूढिवादे तु सैव प्रतिबन्धिका मण्डपपदवत् । ज्ञातस्य चा(११)वयवनियमस्य प्रयोजकत्वे पद्मे शक्तिरेव (१२) पद्मज्ञानजनकत्वज्ञानस्य (१३) शक्तिनिर्वाह्यत्वात् । उद्भित्पदे त्ववयवार्थः कर्मण्य(१४)योग्यत्वादेव नान्वीयते, न तु रूढ्या प्रतिबन्धात् । अवयवार्थान्वययोग्ये च खनित्रे ऽपि न प्रतिबन्धः । (१५) योगेन खनित्रेपि प्रयोगात् । एवं च रूढियोगाभ्यामुद्भित्पदस्य नानार्थे (१६) तुल्यतैव । (१७) उभाभ्यामेकार्थानवगमात् । ननु गृहीतपद्मप्रयोगस्यावयवैः सह प्रयोगे पद्ममेवानुभाव्यतइति स्वभावकल्पनमस्तु । (१८) न चैवं व्युत्पत्त्यन्तरं, (१९) स्वरूपसत एव प्रयोगग्रहस्य शक्तिग्रहस्येवो(२०)पसंदानत्वात् । (२१) उपसर्गस्येव धातोः प्रकर्षादिबोधकत्वे (२२) उपसंदानं विना कुमुदबोधो भवत्येव । यत्तु (२३) पदानां स्वार्थान्वयबोधसामर्थ्यमुपजीव्य कुमुदाबोधार्थं नान्विताभिधाने ऽवयवनियमः कल्प्यते, उपजीव्यविरोधात्, (२४) किं तु समुदायस्य कुमुदे स्वार्थत्वाभाव एवेति । तन्न । (२५) एवं स्वार्थत्वाभावेन समुदायात्कुमुदधीर्न स्याद् अवयवेभ्यस्तु स्यादेवेति । मैवम् । नहि पदानां स्वभावाधीनं बोधकत्वं, किं तु शक्तिज्ञानाधीनम्, अज्ञातशक्तेरबोधकत्वात् । शक्तिभ्रमेण बोधकत्वाच्च । तथा च बोधकशक्त्यभावादेवाबोधकत्वम् । कार्याभावे हेत्वभावस्यैव । तन्त्रत्वात् । (२६) धातोश्चोपसर्गोपसंदानात्प्रकर्षादौ शक्तिरेव ॥

स्यादेतत् । यथा सर्वनामत्वमहंपदेषु बुद्धिस्थत्वसंबोध्यत्वोच्चारयितृत्वानि प्रयोगोपाधयस्तेन बुद्धिस्थादिकमेव तद्बोधयति, तत्रैव प्रयुज्यते च, न तु बुद्धिस्थत्वादिकं शक्यं तेन रूपेण ज्ञानाभावात्, तथा पद्मत्वमपि प्रयोगोपाधिरिति चेत्, न । तेन हि नावयवशक्तिर्विच्छिद्यते, (२७) पद्मे तत्सत्त्वात् । नापि कुमुदे तात्पर्यमपोद्यते । बाधकं विना तस्यौत्सर्गिकत्वात् । नाप्यवयवाधीनं ज्ञानं प्रतिबध्यते, शक्त्याकाङ्क्षादितात्पर्याणां सत्त्वे ऽन्वयज्ञानस्यावश्यकत्वात्, । (२८) उपाधेरन्वयबोधाप्रतिबन्धकत्वात्, नापि प्रयोगो वार्यते, दृष्टकुमुदधीहेतु-

(११) अवयवनियमस्येति । पद्मानुभवजनकस्येत्यर्थः । नियमगर्भस्य प्रयोजकत्वे मानाभावाद्गौरवाच्च । अत एवाह । (१२) पद्मज्ञानजनकत्वज्ञानस्येति । (१३) शक्तीति । जनकतावच्छेदकशक्तिं विना जनकत्वस्यासंभवादित्यर्थः । तथा च सैव प्रतिबन्धिकेति भावः । उद्भित्पदे तु न रूढेः प्रतिबन्धकत्वं, तद्धि योगरूढ्यर्थयोर्विशिष्टप्रतीतिविरहेण वा योगेनान्यत्र प्रयोगाभावेन वा कल्प्यं,तथा चाद्ये ऽन्यथासिद्धिमाह । (१४) अयोग्यत्वादिति । अन्त्ये ऽसिद्धिमाह । (१५) योगेनेति । शक्यतावच्छेदकैकरूपाभावाद्वस्तुतो नानार्थत्वमिति विभावयन्नाह । (१६) तुल्यतैवेति । (१७) उभाभ्यामिति । यद्यप्येवमुद्भित्पदतुल्ययोगत्वेमतया मण्डपपदे लक्षणा न स्यात्, तथापि तत्र रूढ्यर्थान्वयानुपपत्तिपुरःसरमेव योगार्थभानमिति विशेष इति वदन्ति । उद्भित्पदे तु कथं न तथेति चिन्त्यम् । नन्ववयवैः सह गृहीतपद्मप्रयोगस्य पद्ममेव समुदायेनानुभाव्यतइति स्वभावकल्पने समुदायशक्तिरेव स्यादित्यत आह । (१८) न चैवमिति । व्युत्पत्त्यन्तर, मवयवशक्तिग्रहापेक्षया शक्तिग्रहान्तरमित्यर्थः । (१९) स्वरूपसत एवेति । व्युत्पत्तेश्च ज्ञाताया एव प्रयोजकत्वादिति भावः । (२०) उपसंदानत्वात्, सहकारित्वादित्यर्थः । उपसंदानं सांनिध्यमिति कश्चित् । न चैतदद्दृष्टचरमित्याह । (२१) उपसर्गस्येवेति । (२२) उपसंदानं विनेति । पद्मे प्रयोगग्रहं विनेत्यर्थः । पूर्वं प्रयोगग्रहस्योपसंदानत्वं नाशङ्कितमित्यपौनरुक्त्यम् । (२३)पदानामिति । अन्यथा कुमुदबोधस्याप्रसक्ततया तदबोधार्थं नावयवनियमः कल्प्यतेत्यर्थः । एवं सति कुमुदाबोधमुपपादयति । (२४) किं त्विति । कल्प्यतइत्यनुषज्यते । (२५) एवमिति । तथा च कुमुदाबोधार्थमवयवनियम एव कल्प्यते न रूढि,गौरवादिति भावः । अबोधकत्वं, कुमुदस्येति शेषः । बोधकशक्तिमत्त्वाच्च पद्मबोधकत्वमपि बोध्यम् । न चोक्तप्रयोगग्रहादेवोभयोपपत्तिरिति वाच्यम् । गवादिपदे ऽपि शक्तिविलयापत्तेः, पद्मत्वस्य पदादनुपस्थितौ तेन रूपेणानुभवानुपपत्तेश्चेति भावः । तर्हि पदानुपस्थितप्रकर्षस्य कथमनुभव इत्यत आह । (२६) धातोश्चेति । उच्चारयितृत्वम् । स्वतन्त्रोच्चारयितृत्वम् । यद्यपि पद्मत्वं शाब्दानुभवगोचरत्वेन धेनुपदे गोत्ववच्छक्त्युपाधिः, तथाप्यहमादिपदेषूच्चारयितृत्वादिवदतिप्रसङ्गभञ्जकत्वेन प्रयोगोपाधित्वं, न तु शक्युपाधित्वं शक्यानुगमार्थं गोत्ववत् तदकल्पनात् । अनुगमस्य पङ्कजनिकर्तृत्वेनैव भावात् । कुमुदधीप्रयोगप्रतिबन्धस्य तावतैव सिद्धौ पद्मत्वस्यानुभवगोचरत्वमनङ्गीकृत्यैवास्योक्तत्वात् । (२७) पद्मइति । पङ्कजनिकर्तृत्वेनैव तदनुभवादिति भावः । (२८) उपाधेरिति । उच्चारयितृत्वादिवत् स्वरूपसत एव तथात्वे ऽवयवव्युत्पन्नस्यापि कुमुदसाधारणबोधो न स्यात् । तदिदं वक्ष्यति । पद्मत्वं तु न तथेत्यादि ।

तया दृष्टसाधनताज्ञानस्य तल्लिङ्गककार्यताज्ञानस्य वा प्रयोगहेतोः सत्त्वे ऽप्रयोगस्याहेतुकत्वात् । (२९) अहमादिपदे त्वात्ममात्रशक्ते शक्तिग्रहसहकारितया स्वरूपसदेवोच्चारयितृत्वादि धीनियामकं, स्वभावान्नियमतस्तस्यैव बोधनादिति (३०) स्वरूपसत एवोपाधित्वम् । पद्मत्वं तु न तथा, कुमुदासाधारणबोधदर्शनात् । न तु कुमुदे पूर्वेषामप्रयोगादाधुनिकानामप्रयोगः । न च प्रयोगमात्रे को हेतुरिति वाच्यम् । प्रयोगाणां हि न मेलके कार्यता, किं तु प्रत्येकं, तत्रोत्तरस्य पूर्वो हेतुर्यथा पूर्वगोरुत्तरस्य । अन्यथा गोमात्रे को हेतुरित्यत्र किमुत्तरं तवेति चेत् । न । (३१) प्रयोगहेतोः सत्त्वात् । (३२) पूर्वप्रयोगस्य चाहेतुत्वात् । (३३) पूर्वप्रयोगमज्ञात्वा ऽप्यवयवव्युत्पन्नेन पाचकादिपदानां नवकाव्यानां गौणलाक्षणिकदेवदत्तादिपदानां च प्रयोगात् ॥

स्यादेतत् । ग्रामगामादिपदेन्वयबोधाभावा(३४)त्साधुत्वज्ञानमपि हेतुः । न चैवं तदेव हेतुरस्तु, किं शक्त्या, गौणलाक्षणिकविवेकश्च (३५) सोपाधित्वानुपाधित्वाभ्यामेवास्त्विति वाच्यम् । (३६) प्रथमं व्यवहारेण शब्दस्य ज्ञानकारणतावगमात्तत्र शक्तिकल्पनं, ततो ग्रामगामादौ (३७) व्यभिचारादाकाङ्क्षादेरिव साधुत्वज्ञानस्य हेतुत्वकल्पनात् । साधुत्वं च न पूर्वप्रयोगप्रवाहाविच्छेदः । नवकाव्यादौ तदभावात् । (३८) किं तु भ्रमादिजन्यत्वाभावः कुमुदे च तत्प्रयोगो बोधकत्वभ्रमात् । न चैवं भ्रमजन्यत्वादबोधकत्वमबोधकत्वे च बोधकत्वभ्रमजन्यत्वमित्यन्योन्याश्रयः । पूर्वभ्रमजन्यत्वेनोत्तरं प्रति बोधकत्वभ्रमादुत्तरस्य प्रयोगो भ्रमजन्यः । एवं पूर्वस्यापीति तत्र भ्रमपरम्परैव मूलम् । एवं ग्रामगामादेरपि । कथमिदं ज्ञातव्यमिति चेत् । ग्रामगमनकर्त्तरि ग्रामगामपदस्यैव प्रामाणिकानां कुमुदे तस्य (३९) निरुपाधिप्रयोगाभावात् । (४०) अत एव साधुत्वभ्रमात्कुमुदसाधारणबोधोपि । (४१) कुमुदे ह्यसाधुत्वात्समुदायेन तत्र पङ्कजन्मकर्तृत्वं लक्ष्यते । न चासाधुत्वे ग्रामगामपदवल्लक्षणापि न स्यात् पद्मे तस्य साधुत्वात् । उच्यते । पङ्कजन्मकर्त्तरि तत्प्रयोगस्य भ्रमाद्यजन्यत्वेन (४२) साधुत्वं कुमुदे न तथेति चेत् । न । पुण्डरीकवन्नवपद्मवच्च तस्य व्यक्तिस्थानीयत्वात् । प्रतिवाक्यार्थं च साधुत्वज्ञानस्य हेतुत्वे ऽभिनवव्यक्तौ भ्रमाद्यजन्यत्वस्य ग्रहीतुमशक्यतया पाचकादिपदप्रयोगो न स्यात् । पाककर्तृजातीये भ्रमाद्यजन्यत्वस्य सुग्रहत्ववत्पङ्कजन्मकर्तृजातीयेपि सुग्रहत्वात् । येन रूपेणान्वयबोधस्तस्य कुमुदवृत्तित्वात् । (४३) अथ पङ्कज-

---

(२९) अहमादीति । सर्वनामादिपदेभ्यो बुद्धिस्थत्वादिना नोपस्थितिः, किं तु देवदत्तत्वादिनेत्यनुभवसिद्धं, तत्र देवदत्तत्वादीनामननुगमाद्बुद्धिस्थप्रकारत्वाद्यनुगतीकृततत्तद्देवदत्तत्वाद्युपाधिविशिष्टे ऽनन्यगत्या शक्तिग्रहः । न चैवं बुद्धिस्थत्वादिनैवोपस्थितिः स्यात्तेनैव रूपेण शक्तिग्रहादिति वाच्यम् । नहि येन रूपेण शक्तिर्गृह्यते तेनैव धीः, ज्ञाने पदानां शक्तिग्रहे ज्ञानत्वस्यापि धीप्रसङ्गात् । किं तु यत्प्रकारकज्ञानजनकत्वं यस्य गृहीतं ततस्तादृशानुभव इति भावः । (३०) स्वरूपसत इति । न तु गोत्वादिवच्छक्यतयापीत्यर्थः । (३१) प्रयोगहेतोरिति । पूर्वोक्तस्येत्यर्थः । (३२) पूर्वेति । मानाभावादिति भावः । व्यभिचारमाह । (३३) पूर्वेति । (३४) साधुत्वज्ञानमपीति । तदभावाच्च न प्रकृते कुमुदधीरिति भावः । (३५) सोपाधित्वेति । इतरान्वयानुपपत्तिप्रतिसंधानानन्तरमेव यतोन्वयधीः स गौणादितया व्यवहर्त्तव्य इत्यर्थः । अगृहीतशक्तेः साधुत्वभानेप्यन्वयबोधाभावात्तदावश्यकत्वमभिप्रेत्याह । (३६) प्रथममिति । (३७) व्यभिचारादिति । इतरकारणे सत्यपि साधुत्वज्ञानं विना तदन्वयाबोधापत्तेरित्यर्थः । (३८) किं त्विति । न च शुकोक्तग्रामगामादिपदे ऽतिप्रसङ्गः । भ्रमादिजन्यजातीयत्वाभावस्य विवक्षितत्वात् । (३९) निरुपाधीति । लक्षणां विनेत्यर्थः । एवं च लक्षणां विना ऽपि यदि तत्र धीस्तदा साधुत्वभ्रमादित्याह । (४०) अत एवेति । यद्यपि कुमुदबोधकत्वे विपर्ययाबाधाद्बोधकत्वभ्रमासंभवस्तथापि बोधजननस्वरूपयोग्यता विवक्षिता, सा च प्रामाणिकानां निरुपाधिप्रयोग एवेति तद्भ्रमात्साधुत्वभ्रम इति भावः । समुदायशक्त्या बोधकत्वभ्रमात्साधुत्वभ्रम इत्यन्ये । साधुत्वभ्रमविरहदशायां लक्षणयैव तद्धीरित्याह । (४१) कुमुदइति । यद्यपि समुदाये शक्त्यनभ्युपगमात्तत एव न लक्षणा तथापि वाक्यलक्षणावादिमतेनेदम् । (४२) साधुत्वमिति । साधुत्वाश्रयत्वमित्यर्थः । अतो न साध्याविशेषः । अन्यथा पङ्कजनिकर्तृतया पद्ममपि नानुभावयेदिति भावः । ननु साधुत्वनिश्चयत्वेन न हेतुता, किं तु तज्ज्ञानत्वेन, लाघवात् । तथा च तत्संदेहमादायाभिनवव्यक्तौ नान्वयप्रतिबन्धः । कुमुदे ऽसाधुत्वनिश्चयाच्च तथेत्याह । (४३) अथेति । बाधवारणाय साध्ये इत्यन्तरं वि-

पदं कुमुदे वृत्त्यन्तरेण विना न साधु, वृत्त्यन्तरं विना वृद्धैस्तत्राप्रयुज्यमानत्वात् । (४४) यः शब्दो यत्र वृत्त्यन्तरं विना वृद्धैर्न प्रयुज्यते स तत्र वृत्त्यन्तरं विना न साधुः, यथा गङ्गापदं तीरे, (४५) यथा वा ग्रामगामपदं ग्रामगमनकर्तरि । न प्रयुज्यते च वृत्त्यन्तरं विना पङ्कजपदं कुमुदे । तस्माद्वृत्त्यन्तरं विना न तत्र साध्विति चेत् । न । (४६) व्यर्थविशेषणत्वात् । (४७) तत्राप्रयुज्यमानत्वस्यैव व्याप्यत्वात् । (४८) आकाङ्क्षादिमद्वाक्यासाधुत्वे (४९) ऽवयवार्थान्वयाबोधकत्वस्य (५०) व्याकरणस्मृत्यनुपगृहीतत्वस्य (५१) पक्षधर्मावच्छिन्नसाध्यव्यापकस्योपाधित्वाच्च । पक्षे (५२) उभयाभावेन साधनाव्यापकत्वात् । पङ्कजशब्दः (५३) कुमुदे साधुः, साधुत्वे सति कुमुदबोधप्रयोजका(५४)काङ्क्षादिमद्वाक्यत्वात्, साधुत्वे सति यद्वाक्यं यद्बोधप्रयोजकाकाङ्क्षादिमद्भवति, तत्तत्र साधु । यथा तरुप्रसूनशब्दः कुसुमे, यथा वा पाचकशब्दः पाककर्त्तरि । तथा पङ्कजपदं कुमुदे, तस्मात्तथेति, सत्प्रतिपक्षत्वाच्च ॥ (५५) वस्तुतः साधुत्वज्ञानं न हेतुः, (५६) अवयवादिव्युत्पन्नेन (५७) भ्रमाद्यजन्यं पूर्वप्रयोगमज्ञात्वापि नवकाव्यादिप्रयोगात् । कुतस्तर्हि ग्रामगामादौ नान्वयबोधः । (५८) असाधुत्वनिश्चयादिति ब्रूमः । साधोरप्यसाधुत्वनिश्चयेनाबोधकत्वात् । अभिनवकाव्यादौ नासाधुत्वनिश्चयः ; संशयश्च न प्रतिबन्धकः । (५९) अन्यथा

नेति । असिद्धिवारकतया सार्थकत्वमभ्युपेत्य हेतौ तदुक्तम् । विशेषव्याप्तिसत्त्वेपि दृष्टान्तसैाकार्याय सामान्यव्याप्तिमाह । (४४) य इति । विशेषणाभावेन विशिष्टाभावाद्दृष्टान्तमुक्त्वा विशेष्याभावाद्विशिष्टाभावेन तमाह । (४५) यथा वेति । असिद्धिवारकं न सार्थकमित्यभिप्रेत्याह । (४६) व्यर्थेति । (४७) तत्रेति । तच्च स्वरूपासिद्धमेवेति भावः । असाधुपदेवयवाप्रसिद्धेः साध्याव्यापकत्वादाकाङ्क्षादिमद्वाक्यत्वं पक्षधर्मसाध्यावच्छेदकमाह । (४८) आकाङ्क्षादीति । यद्यपि वाक्यत्वमात्रेणैव तन्निरासस्तथापि साधुत्वभ्रमेणान्वयबोधकतया ग्रामगामवाक्ये साध्याव्यापकत्वादाकाङ्क्षादीत्युक्तम् । तत्र च नाकाङ्क्षेतिमतेनेदम् । तदिदं वक्ष्यति । तत्राकाङ्क्षा नास्तीति । एवं च वाक्यत्वं स्वरूपनिर्वचनम् । न चैवमाकाङ्क्षादिमद्वाक्यासाधुत्वमसिद्धम् । पाचकादेरपि घटादौ वृत्त्यन्तरं विना ऽसाधुत्वात्तत्रावयवार्थान्वयाबोधकत्वाच्च ॥ केचित्तु गङ्गायां घोष इत्यत्र वृत्त्यन्तरं विना न साधुत्वं तीरे सप्तम्यर्थरूपावयवार्थान्वयबोधकत्वं चेति साध्याव्यापकत्वादाकाङ्क्षादीत्युक्तम् । गौणलाक्षणिकयोरननुभावकत्वपक्षे न तत्राकाङ्क्षेत्याहुः । आकाङ्क्षादिमत्त्वं वाक्यत्वं च पक्षधर्मद्वयमित्यन्ये । (४९) अवयवेति । स्वावयवेत्यर्थः । (५०) व्याकरणेति । बाधति ग्रामगाम इत्यादौ चानभिधानेन निषेधाच्च व्याकरणस्मृत्युपग्रह इति भावः । ननु गङ्गायामित्यत्र साध्याव्याप्तिः सामीप्यविवक्षादिना लाक्षणिकस्यापि व्याकरणस्मृत्युपगृहीतत्वादित्युक्तं स्मारयति । (५१) पक्षधर्मेति । आकाङ्क्षादिमत्त्वेत्यर्थः । (५२) उभयेति । यद्यपि वृत्त्यन्तरं विना कुमुदे ऽप्रयुज्यमानत्वं पङ्कजशब्दस्य कुमुदे ऽवयवार्थान्वयबोधकत्वं च संदिग्धं, तथापि दिग्धोपाधित्वं स्यादिति भावः । (५३) कुमुद इति । वृत्त्यन्तरं विनेति शेषः । तेन न सिद्धसाधनं, अत एव पूर्वसाध्यविपरीतत्वाभावान्न सत्प्रतिपक्षतेत्यपास्तम् । अत्र वाक्यत्वं शब्दत्वमिति कुमुदबोधकापभ्रंशे व्यभिचारवारणाय साधुत्वे सतीति । यत्तु ग्रामगामपदे ऽप्याकाङ्क्षेति मते सामान्यव्याप्तौ तत्र व्यभिचारात्तदुपादानमिति, तन्न । ग्रामगामपदस्यापि कया चिद्व्युत्पत्त्या क्वाप्यर्थे साधुत्वे दोषतादवस्थ्यात् । तदर्थसाधुत्वविवक्षायां च व्यर्थविशेष्यत्वात् । कुमुदलाक्षणिकपद्मपदे व्यभिचारादाह । (५४) आकाङ्क्षेति । आकाङ्क्षादिमत्त्वं नैकस्य पदस्येति कदम्बपदग्रहणम् । नन्वस्तु सत्प्रतिपक्षस्तथापि संदेह एव न तु साधुत्वनिश्चय इत्यरुचेराह । (५५) वस्तुत इति । साधुत्वेन निश्चयत्वेन न हेतुत्वमित्यर्थः । संशयसाधारणं तु तज्ज्ञानं हेतुरेव । अन्यथा ऽसाधुत्वनिश्चयस्यैव प्रतिबन्धकत्वानुपपत्तेः । जनकज्ञानं विघटयत एव ज्ञानस्य प्रतिबन्धकत्वात् । अत एव तत्संशयेऽप्यन्वयबोधं वक्ष्यति संशयश्चेति । तदभावकारणत्वापेक्षया साधुत्वज्ञानहेतुत्वे लाघवात् । अन्यथा योग्यताज्ञानस्यापि हेतुत्वं न स्यात् । न च साधुशब्दमजानतां पामराणामन्वयबोधाद्व्यभिचारः । उक्तयुक्त्या तद्धेतुत्वसिद्धौ साधुत्वभ्रमसंशयान्यतरकल्पनात् । अन्यथा योग्यताज्ञानेपि तुल्यत्वात् । व्युत्पन्नस्य चापभ्रंशस्थले साधुशब्दस्मरणमेव । एतदपि वक्ष्यमाणव्याकरणोपगृहीतत्वरूपसाधुत्वमभिप्रेत्य । उक्तभ्रमादिजन्यत्वाभावज्ञानं न तद्धेतुरेवेत्याह । (५६) अवयवादीति । (५७) भ्रमादीति । प्रयोगभ्रमादिजन्यत्वाभावमज्ञात्वापीत्यर्थः । (५८) असाधुत्वेति । व्याकरणानुपगृहीतत्वनिश्चयादित्यर्थः । केचित्त्वनुमितौ साध्याभावज्ञानवदस्यापि साक्षाद्विरोधित्वं साक्षादविरोधिन एव जनकज्ञानविघटकतया प्रतिबन्धकत्वम् । एवं च साधुत्वज्ञानं न हेतुरित्याहुः ॥ अनाहार्यत्वावच्छिन्नप्रतिबन्धकतायां तथा नियम इत्यन्ये । (५९) अन्यथेति । यद्यपि योगरूढि-

योगरूढिसंशये सत्यभिनवव्यक्तौ पाचकादिपदप्रयोगो न स्यात् । अन्ये तु (६०) ततो ऽन्वयबोधो भवत्येव । अपभ्रंशादिव, यथा तव (६१) साधुत्वभ्रमात् । साधुत्वं तस्य नास्ति तद्वदेव ॥ अपरे त्वत्राकाङ्क्षैव नास्ति, घटः कर्मत्वमानयनमित्यत्रेव । (६२) यत्तु गम्याद्यनुत्तराणत्वेन गमादिपूर्वेतराणत्वेन वा शक्तिः, (६३) काशपूर्वेतरकुशत्वेनेवेति । तन्न । कर्मोपपदधातूत्तराणत्वेनैव शक्तेः । न तु तत्तद्धात्वनुत्तराणत्वेन, गौरवात् । तत्तद्धातूनां विशिष्याज्ञाने शक्तिग्रहानुपपत्तेः । 'कर्मण्यणि'तिसूत्रार्थमजानतः कुम्भकारादिपदप्रयोगानुपपत्तेश्च शक्तिसंदेहात् । (६४) असाधुत्वं च न भ्रमादिजन्यत्वम्, अनाप्तोक्ते ऽसाधुत्वापत्तेः । शुकाद्युदीरिते ग्रामगामादौ भ्रमाद्यजन्यत्वाच्च । किं तु महाजनपरिगृहीतव्याकरणस्मृतिनिषिद्धत्वं (६५) तदपरिगृहीतत्वं वेति वक्ष्यते । पदस्य साधुत्वं (६६) वृत्तिरेव । (६७) वृत्तिश्च शाब्दबोधहेतुपदार्थोपस्थित्यनुकूलः पदपदार्थयोः संबन्धः । (६८) वाक्यसाधुत्वं चाकाङ्क्षादिमत्स्वार्थान्वयबोधकत्वे सति व्याकरणस्मृत्यनिषिद्धत्वं, तस्मात् कुमुदे पङ्कजशब्दस्य साधुत्वे सति प्रयोगप्रतिबन्धकत्वेन समुदायशक्तिसिद्धिरिति । न चैवं लाघवाज्जशब्दएव शक्तिरस्तु न समुदाये, मन्दुरजादौ पद्मधीप्रसङ्गात् । पङ्कोत्तरजपदत्वेन शक्तिरिति चेत् । तर्हि सर्वत्र तत्तद्वर्णानन्तरान्त्यशब्द एव शक्तिरिति समुदायशक्त्युच्छेदः । न चैवं, (६९) विनिगमकाभावादिति संप्रदायः ॥

अत्र ब्रूमः ॥ ज्ञाता हि या शक्यमनुभावयति सा शक्तिः । न च समुदायः पद्मानुभवे हेतुः । अवयवादेव तदुपपत्तेः । एवं च प्रतिबन्धकमात्रे शक्तिपदं (७०) पारिभाषिकम् । शक्तत्वादनुभावकत्वसाधने ऽन्योन्याश्रयः । (७१) प्रतिबन्धकत्वेनावगते शक्तित्वासिद्धिश्च । (७२)

संशयो न साधुत्वसंशयस्तथापि तत्प्रयोजक इति कृत्वोक्तम् । (६०) तत इति । ग्रामगामादेरित्यर्थः । (६१) साधुत्वभ्रमाद् । व्याकरणोपगृहीतत्वभ्रमात् । तत्संशयाद्वेत्यपि बोध्यम् । तथा च तज्ज्ञानं हेतुरेवेति भावः । (६२) यत्त्विति । तथा च शक्तिविरहादेव ततो न ग्रामगमनकर्तुरुपस्थितिरित्यर्थः । (६३) काशपूर्वेतरेति । काश इति पूर्वं यस्य तदितरकुशत्वेन तेन, द्वन्द्वसमासशक्तिपक्षे तु कुशकाशमित्यत्र शक्तिः । न तु काशकुशमित्यत्र 'लघ्वक्षरं पूर्व'मितिसूत्रात् । क्वचित्तु कुशपूर्वेतरेति पाठः तत्र कुशस्य पूर्वो यः काशस्तदितरकुशत्वेनेत्यर्थ इति फलतो न कश्चिद्विशेषः । एतच्चाभ्युपेत्य समाहितम् । वस्तुतस्त्वदुक्तं नासाधुत्वमित्याह । (६४) असाधुत्वं चेति । वाक्यस्येति शेषः । ननु व्याकरणस्मृतिर्न निषेधिकेत्यरुचेराह । (६५) तदिति । तथा च महाजनपरिगृहीतव्याकरणस्मृतिपरिगृहीतत्वं साधुत्वमिति भावः । व्याकरणत्वं च प्रकृतिप्रत्ययविभागपरिकल्पनया शब्दान्वाख्यायकत्वम् । एवं च कल्पितव्याकरणव्युत्पाद्ये ऽतिव्याप्तिवारणाय महाजनपरिगृहीतत्वं विशेषणम् । (६६) वृत्तिरेवेति । न तु पूर्वोक्तमतः पदविशेषे तस्याव्याप्तिर्न दोष इति भावः । (६७) वृत्तिश्चेति । आकाशपदे आकाशरूपपदार्थोपस्थित्यनुकूलः समवायोपीत्यतिव्याप्तेराह हेत्वन्तं पदार्थोपस्थितिविशेषणम् । न च वृत्तिजन्योपस्थितित्वेनैव शाब्दबोधहेतुत्वं ग्राह्यमित्यन्योन्याश्रयः । शक्तिजन्योपस्थितित्वादिना शाब्दबोधज्ञापकत्वग्रहानन्तरं तद्ग्रहसंभवात्, तृणादीनां वह्निजनकत्ववत् । (६८) वाक्येति । घटः कर्मत्वमित्यादिवाक्ये ऽतिव्याप्तेराह सत्यन्तम् । यद्यपि तस्य साधुत्वमेव तथाप्याकाङ्क्षादिमद्वाक्यस्य साधुत्वमिदमुक्तमित्याहुः । ग्रामगामादावप्याकाङ्क्षेति मते तत्रातिव्याप्तेराह । विशेष्यमिति । केचित्तु घटः कर्मत्वमित्यादि साध्वेवेति ग्रामगामव्यावर्तनायैवाकाङ्क्षादीत्युक्तम् । तत्र च नाकाङ्क्षेति मताभ्युपगमात् । एवं च लक्षणद्वये तात्पर्यमित्याहुः । (६९) विनिगमकेति । यद्यपि शक्तिरीश्वरेच्छा ऽव्यासज्यवृत्तिरित्येकवर्णवृत्तितया मन्दुरजादावतिप्रसङ्गस्तदवस्थ एव, तथाप्यपेक्षाबुद्धिवदीश्वरेच्छापि व्यासज्यवृत्तिरिति भावः । (७०) पारिभाषिकमिति । शक्तिभिन्नस्यापि प्रतिबन्धकत्वसंभवादित्यर्थः । (७१) प्रतिबन्धकत्वेनेति । शक्तेरनुभवप्रयोजकतया प्रतिबन्धकत्वविरोधादित्यर्थः । (७२) मण्डपादौ त्विति । गृहविशेषे ऽवयवार्थान्वयाननुभवादित्यर्थः । नन्वत्र प्रतिबन्धार्थं कल्पितापि समुदायशक्तिरवयवशक्तिवदनुभावयिष्यत्यविशेषात् । अन्यथा स्मृत्यर्थं कल्पिताया अननुभावकत्वेन सिद्धान्तेप्यगतेः । न च शक्तिभिन्नस्यापि प्रतिबन्धकत्वसंभवाच्छक्तित्वेन तत्कल्पनमेव न स्यादिति वाच्यम् । अगृहीतसमुदायशक्तेः कुमुदसाधारणधीदर्शनात् । अत एव नान्योन्याश्रयः । अवयवशक्तिप्रतिबन्धकतया शक्तित्वेनैव तत्कल्पनात् । प्रतिबन्धकत्वप्रयोजकत्वयोश्चावच्छेदकभेदेनाविरोधात् । अन्यथा मण्डपादावपि रूढेर्योगप्रतिबन्धकत्वानापत्तेः । किं च स्मृत्यर्थमेव कल्पिताया रूढेः कुमुदे प्रयोगप्रतिबन्धकत्वमित्यत्र नैकमपि दोषाभिधानमित्यरुचेरा-

मण्डपादौ त्वनुभावकत्वेनैव शक्तिसिद्धिः । (७३) किं च रूढियोगयोर्विरोध एव परं रूढ्या योगप्रतिबन्धः । मण्डपादौ तथा निर्णयात् । अन्यथा लम्बकर्णादावपि योगप्रतिबन्धः स्यात् । न चेह विरोधः, पद्मे समावेशात् । योगादर्थधीश्चोभयत्र तुल्या ॥ यत्तु पङ्कजमानयेत्यादौ रूढ्या शीघ्रोपस्थितं पद्ममेव क्रियया ऽन्वीयते । न पङ्कजन्मकर्तृ, तस्य वाक्यार्थत्वेन विलम्बप्रतीतिकत्वात् । एवं चा(७४)विरोधेपि रूढेर्योगापहारितेति । तन्न । क्रियापदतदन्वययोग्यतादिज्ञानाधीनत्वेन क्रियान्वयबोधस्य (७५) विलम्बितत्वात् । रूढ्यवयवार्थयोरन्वयबोधस्य सामग्रीसत्त्वेन प्राथमिकत्वात् । तस्मान्न प्रतिबन्धकत्वेन रूढिसिद्धिः, न वा तया योगप्रतिबन्ध इति ॥ अत्रोच्यते । नियमतः (७६) पद्मस्मृत्यर्थमेव रूढिः, रूढ्या च नियमतः स्मृतं पद्ममेवावयवैः पङ्कजनिकर्तृत्वेनानुभाव्यते । बाधकं विना व्यक्तिवचनानां संनिहितविशेषपरत्वनियमात् । अतस्सर्वत्र पद्मानुभवसामग्र्येवेति न कुमुदे धीप्रयोगौ । न चैवमनुभवाजनकत्वेन न सा शक्तिः, (७७) या ज्ञाता नियमतः शक्यं ज्ञापयति सैव हि शक्तिः । ज्ञप्तिश्च स्मृतिरनुभूतिश्चेति नियतस्मारिकापि शक्तिः । वस्तुतस्तु स्वार्थस्मृतिद्वारा ऽवयवानामिव समुदायस्य स्वार्थान्वयानुभावकत्वमविशेषादिति पश्चादनुभाविकापि रूढिः । पङ्कजमानयेत्यादावानयनादिना स्वार्थान्वयानुभवे (७८) समुदायावयवयोर्हेतुत्वाच्च । तस्मान्नियतः स्मृतिहेतुत्वेनैव रूढिसिद्धिर्न प्रतिबन्धकत्वेन । यदि च नियता स्मृतिः प्रकारान्तरेण भवति, तदा योग एव, न योगरूढः । रूढिन्यायेनैव कुमुदे धीप्रयोगयोरभावादिति । (७९) गोपदस्य गवि वेदे ऽहीनपदस्य (८०) कर्मविशेषे रूढिरेव, लाघवात् । न तु 'गमेर्डो' 'रहूः खः क्रतौ' वित्यनुशासनाद् योगेपि, डोखप्रत्यययोर्लोके कर्त्तरि कर्मविशेषे च शक्तिर्न क्लृप्ता, अतः प्रत्यये शक्तिर्नियामकं च ग-

ह । (७३) किं चेति । यद्यप्येवमपि यदवच्छेदेन विरोधस्तदवच्छेदेन प्रतिबन्धकत्वं स्यात् । कुमुदे समावेशाभावाद्रूढ्या योगप्रतिबन्धः स्यादेव तथापि व्यक्तिवचनान्यायेन पद्मान्वयात्कुमुदानन्वयापत्तौ रूढिप्रतिबन्धकत्वे मानाभाव इति निगर्वः । अत्र विरोध एवेत्यभिमानादविरोधे प्रतिबन्धाभाव इत्यत्र तात्पर्यं न तु विरोधे प्रतिबन्ध एवेति उद्भिदादौ व्यभिचारात् । योगेनापि प्रयोगेन फलकल्प्यप्रतिबन्धकत्वस्य तत्रानभ्युपगमात् । (७४) अविरोधेपीति । पद्मे ऽपि रूढेर्योगापहारितेत्यर्थः । (७५) विलम्बितत्वादिति । यद्यपि रूढ्या ऽवयवार्थान्वयबोधे योग्यतादिज्ञानापेक्षास्त्येव तथापि योगापहारितानियमखण्डने तात्पर्यम् । अवयवसमुदाययोरैक्यैवोपस्थितिः क्रियापदस्य चोपस्थित्यनन्तरमिति विलम्ब इत्यन्ये । (७६) पद्मस्मृत्यर्थमेवेति । यद्यपि शक्तिकल्पनसमये व्यवहारहेतुतया पद्मोपस्थितिर्नोपस्थिता किं तु तदनुभव इति अनुभवार्थमेव रूढिरुचिता तथापि प्रकारान्तरेणोपस्थितस्याप्यवयवैरनुभव इति परम्पराभ्युपगमादाहत्य न तदर्थं तत्कल्पना किं तु पदान्नियतोपस्थितिः शक्तिसाध्येति व्यवस्थापनात् प्रकारान्तरेणोपस्थितिरतन्त्रमिति नियतस्मृत्यर्थं क्लृप्ता समुदायशक्तिरवयवशक्तिवदविशेषादनुभाविकापीति समुदायार्थः । अत एव वक्ष्यति । यदि नियता स्मृतिः प्रकारान्तरेणेत्यादि । (७७) या ज्ञातेति । सामान्ये बाधके सत्येव विशेषनिष्ठत्वकल्पनादिति भावः । (७८) समुदायावयवयोरिति । विनिगमनाविरहादिति भावः । नन्वेवं लक्षणैवास्तु, न रूढिरन्यलभ्यत्वात् । न च शक्त्यभावे लक्षणापि न स्यादिति वाच्यम् । पङ्कजाद्यवयवेषु तदभ्युपगमात् । न चैवं युगपद्वृत्तिद्वयविरोधः शक्यलक्ष्यसाधारणैकरूपाभावाच्च नाजहत्स्वार्थेति वाच्यम् । मणिकृन्मते तद्विरोधाभावात् । न च शक्यसंबन्धग्रहं विनापि तदुपस्थितिदर्शनाद्रूढिरिति वाच्यम् । शक्तिभ्रमादपि तदुपपत्तेः । अन्यथा गङ्गापदमपि तीरशक्तं स्यात् । न चैवं लम्बकर्णादिपदेपि रूढिर्न स्यादिति वाच्यम् । इष्टत्वात् । अत एव समासे ऽपि शक्तिं नाङ्गीकुरुषे । न चैकपदेन वृत्तिद्वयोपस्थापितयोः परस्परमनाकाङ्क्षेति वाच्यम् । रथो गच्छतीत्यादौ वर्त्तमानत्वव्यापारयोर्व्यभिचारादिति । मैवम् । श्रुतान्वये बाधकाभावेन लक्षणोपनीतानपेक्षणे कुमुदसाधारणबोधापत्तेः । तदाह "श्रुतान्वयादनाकाङ्क्ष"मित्यादि । न च तात्पर्यानुपपत्त्या यष्टीः प्रवेशयेतिवल्लक्षणास्तु । कुमुदेपि कदा चिल्लक्षणया पद्मकुमुदयोस्तुल्यत्वापत्तेः । अत एव प्रागुक्तं "यदि पद्मकुमुदयोस्तुल्यता तदा गृहीतपद्मप्रयोगस्य पद्मान्वयानुपपत्तिपुरःसरैव कुमुदधीर्न स्यात् । स्याच्च कदा चिद्वैपरीत्य"मिति । अत एव शक्तिभ्रमोप्यपास्तः । कुमुदे ऽपि कस्य चिद् भ्रमसंभवेन तुल्यत्वापत्तेः । किं चैवं तमःपदादेरालोकाभावत्वादौ विशिष्टे शक्तिर्न स्यात् । तदिदं वक्ष्यति । "औपाधिककारणादिपदानां विशिष्टे शक्तिर्न स्याद्" इति । विशेष्यशक्तस्य लक्षणया शक्तिभ्रमेण वा तदुपस्थापनसंभवात् । अत एव धेनुपदे गोत्वं शक्यमित्यनुपदमेव स्फुटमिति दिक् । नन्वेवं गवादिपदमपि योगरूढमस्त्वित्यत आह । (७९) गोपदस्येति । (८०) कर्मवि-

वाहःपदोत्तरत्वं च कल्प्यं, तथा चै (८१) गौरवम्, एवं धेनुपदे ऽप्ये(८२)कैकस्यातिप्रसक्तत्वाद्गोत्वविशिष्ट- धानकर्मणि रूढिरेव, नियमतो गोत्वविशिष्टोपस्थितेः । न तु योगोपि, दानुभानुकृशान्वादौ (८३) भिन्ना- र्थत्वेन नुप्रत्ययशक्तेरकल्पनात् । 'गमेर्डो' 'रहूः खः क्रतौ' 'दाभाभ्यां नु' 'धेट इच्चे'ति स्मृतिश्चा(८४)लवड्डा- दिवत्कथं चिद्व्युत्पादनपरा । अत एव भगवान्पाणिनिर- र्थाननुगमात्समुदायशक्त्यपेक्षया गौरवाच्चोणादिप्रत्ययेषु न शक्तिरिति पञ्चपादिकाविहितानुणादिप्रत्यया'नुणादयो ब- हुल'मित्येकेनैव सूत्रेण विहितवान् । यत्र तु प्रत्यये श- क्तिस्तत्र प्रत्येकमेवासूत्रयत् । (८५) यत्तु धेनुपदे गोत्वं न शक्यं किं तु शक्योपलक्षणतया शक्त्युपाधिः, यत्र गोत्वं तद्धानकर्मशक्यं शक्यास्तूपलक्ष्या महिष्यादिव्यावृत्ता धा- नकर्मव्यक्तिविशेषा एव । अनुगमस्तूपलक्षणैक्यात् । न चैवं लाघवाद्गोत्वं शक्यं (८६) धानकर्मत्वमुपाधिः । उपलक्ष्यस्य गोत्वस्यातिप्रसक्तत्वात् । गोत्वविशिष्टधानक- र्मस्मृतिरेकैव शब्दसंस्काराभ्यां जन्यते, न तूभयस्मृत्यन- न्तरं परस्परमन्वयबोधः, (८७) अवयवशक्तेरभावादिति । तन्न । शक्तिं विना नियतगोत्वोपस्थित्यभावात् । उपल- क्षणैक्येनोपलक्ष्यैक्याभावाच्च । (८८) अन्यथा महिष्या- दिव्यावृत्तधानकर्मत्वेपि न शक्तिः धानगोत्वे शक्त्युपाधौ । अग्रे च संस्कारादुपस्थितयोस्तयोः कर्मणि धेनुपदादन्वयो भासतइति धानमपि न शक्यम् । यदि चानुगतं विशे- षणं शक्त्युपाधिर्विशेष्ये च शक्तिरननुगमातिप्रसङ्गाभावश्चो- पाधिनैव तदौपाधिककारणादिपदानां विशिष्टे शक्तिर्न स्यात् । (८९) नन्ववयवात्पङ्कजनिकर्तृत्वानुभवः समु- दायाच्च पद्मस्मरणं स्यान्न तु पङ्कजनिकर्तृपद्ममित्यनुभव इति चेद्, अवयवसमुदायस्मारितपङ्कजनिकर्तृपद्मानां पङ्कजनिकर्तृपद्ममित्यनुभवो ऽवयवसमुदायाभ्यां संभूय जन्यते । समुदायोपस्थितपद्मेन समं स्वार्थान्वयो (९०) ऽवयवैर्वा ऽवयवजनितानुभवोपस्थितपङ्कजनिकर्तृत्वेन समं स्वार्थान्वयः समुदायेन वानुभाव्यते (९१) आकाङ्क्षाद्युपे- तशब्दानां तात्पर्यविषये स्वोपस्थापितस्वार्थान्वयबोधकत्व- नियमात् । न च वाक्यान्तरे तथात्वादर्शनेन नैवं व्युत्प- त्तिरिति वाच्यम् । वाक्यान्तरे हि समुदायशक्त्यभावेन तथा । अत्र तु समुदायशक्तिबलात् पदविधया वाक्यविधया वैक- स्मादेकदोपस्थितयोः पङ्कजनिकर्तृपद्मयोरन्वयो बोध्यते, समुदायेन (९२) पदैकवाक्यतावत्, पङ्कजं कुमुदमित्यत्र समुदायेनैव पङ्कजन्मकर्तृत्वमशक्यं स्वार्थपद्मसंबन्धि ल- क्ष्यते । कुमुदे साधुत्वात्कथं तत्र लक्षणेति चेत् । न । समुदायस्य तत्रासाधुत्वात् । यत्तु तत्र पद्मत्वमयोग्यतया नान्वेति, (९३) योगादेव मुख्यया वृत्त्या (९४) कुमुदे

शेषे, क्रतुविशेषे । (८१) गौरवमिति । अत एव गमनकर्तृ- त्वादिना ततो नोपस्थितिरिति भावः । (८२) एकैकस्येति । गोत्वस्य वृषभे, धानकर्मत्वस्य महिष्यादावित्यर्थः । (८३) भिन्नार्थत्वेनेति । नानार्थत्वापत्तेरिति भावः । दानुरित्यादौ कर्तृत्वं धेनुरित्यादौ कर्मत्वं तत्तदुत्तरत्वं च नियामकमिति गौर- वमिति भावः । (८४) आलवड्डादिवदिति । आलवड्डादेः क्वचिदर्थे कथंचिद् व्युत्पादनसंभवेप्यवयवानपेक्षस्यैव यथा काष्ठविशेषप्रतिमाकारवाचित्वं तथैवोणादिकप्रत्ययस्यापि के- चित् । आडवडादिवदितिपाठे यथा आट् अव् अड् इ- त्यादेरशक्तस्यैव शब्दसाधुत्वार्थमनुशासनं तथा प्रकृतेपीत्यर्थः । गुरुमतमाह । (८५) यत्त्विति । (८६) धानकर्मत्वमिति । तत्तद्धानकर्मत्वमित्यर्थः । अन्यथा गोत्वपदस्यापि महिष्या- दावतिप्रसक्ततया ऽग्रिमग्रन्थासंगतेः । अस्यैवानुगततया ऽन- नुगमशङ्काविरहे पूर्वग्रन्थस्यासंगतेश्च । अत एव महिष्यादिव्या- वृत्तधानकर्मत्वेपि न शक्तिरिति सिद्धान्ते वक्ष्यति । यद्वा तत्त- द्धानकर्मविशेषइत्यर्थः । तथा च ये तत्तद्धानकर्मविशेषास्त- द्वृत्ति गोत्वं शक्यमिति तेषामेव शक्योपलक्षणत्वमिति वैप- रीत्यमेवास्त्विति शङ्कार्थः । न चैवं गोपदवद्धेनुपदादपि गोत्व- मात्रप्रकारकप्रत्ययापत्तिः । धानस्याशक्यस्यापि प्रकारत्वादि- ति । (८७) अवयवशक्तेरिति । यद्यपि तदभावेपि समुदायशक्त्युप- स्थितमेव धानकर्मादाय च स्मृत्यन्तरोपस्थितेपि शक्त्युपस्था- पितगोत्वेनान्वयबोधः संभवत्येव तथापि योग्यतादिप्रतिसं- धानं विनैव विशिष्टोपस्थितेर्न तथात्वमिति । अन्यथा तवा- पि वैशिष्ट्यमशक्यं स्यादिति भावः । नन्वाकाशपदाच्छब्दा- श्रयत्ववदस्यापि नियतोपस्थितिः स्यात्, उपलक्षणैक्यं च नो- पलक्ष्यैक्यप्रयोजकमिति ब्रूमः, किं त्वननुगमनिवारकमित्यरुचे- राह । (८८) अन्यथेति । शब्दाश्रयत्वं च शक्यमेवेति भावः । तटस्थः शङ्कते । (८९) नन्विति । (९०) अवयवै- र्वेति । अत्र वाशब्दो ऽनास्थायां सर्वथेष्टसिद्धिरिति भावः । सर्वत्र हेतुमाह । (९१) आकाङ्क्षेति । (९२) पदैकवा- क्यतावदिति । भिन्नश्रुतपदवाक्यैकवाक्यतावदित्यर्थः । (९३) योगादेवेति । तत्र तस्य साधुत्वादिति भावः । प्राचीन- मतेन समाधत्ते । (९४) कुमुदइति । मणिकृन्मते लक्षणा-

पङ्कजन्मकर्तृत्वमनुभूयतइति । तन्न । कुमुदे ऽवयवशक्तेः समुदायशक्त्या ज्ञातया प्रतिबन्धात् । तथैव तदवगमात् । (९५) ननु यदा व्यक्तिवचनन्यायान्न कुमुदे धीर्न त्ववयवशक्तिप्रतिबन्धात् तदा पङ्कजशब्दादुपस्थिते पङ्कजं पद्ममिति वाक्यार्थे ऽयोग्यतया पद्ममपहाय पदवाक्यैकवाक्यतया पङ्कजनिकर्तृ कुमुदमित्यनुभव इति चेत् । (९६) तर्हि पद्मान्वितत्वेनोपस्थितस्य पङ्कजनिकर्तृत्वस्याश्रयाकाङ्क्षा नास्तीति स्वतन्त्रोपस्थित्यर्थमवश्यं लक्षणा । यथा पुरोडाशकपालपदे अधिष्ठानलक्षणा । ननु प्रथममेवावयवकुमुदपदैरन्वययोग्यतया स्मृतं पद्मं त्यक्त्वा स्वार्थान्वयानुभव इति चेत् । कुमुदपदतदर्थयोग्यतादिज्ञानात् पूर्वमेव पङ्कजशब्दात्पङ्कजं पद्ममित्यनुभवात्, विलम्बे हेत्वभावात् । (९७) स्थलपङ्कजं तु विजातीयमेव (९८) साजात्येपि तत्र लक्षणा । (९९) यत्त्वयोग्यतया योगार्थो नान्वेति किं तु योग्यतया रूढ्युपस्थितं पद्मत्वमेवान्वीयतइति । तन्न । पद्मत्वस्य योगार्थगतत्वेनोपस्थित्या निराकाङ्क्षत्वात् । (१००) स्वतन्त्रोपस्थितये लक्षणाया अवश्यं वाच्यत्वात् ॥

नुपपत्तिमाशङ्कते । (९५) नन्विति । तन्मतेनैव समाधत्ते । (९६) तर्हीति । (९७) स्थलेति । तथा च तत्र पद्मत्वजातेरभावात्सर्वेषामेव पद्मवाचिपङ्कजादिपदानां पद्माकृतिसदृशाकृतौ स्थलपद्मत्वविशिष्टे वा लक्षणेत्यर्थः । यदि चानुगतप्रतीतिबलात्तत्रापि सा जातिस्तथापि स्वतन्त्रोपस्थितये लक्षणैवेत्याह । (९८) साजात्येपीति । अत्रैव शङ्कते । (९९) यत्त्विति । (१००) स्वतन्त्रेति । यद्यपि शक्ये पद्मे समुदायस्य लक्षणा न युक्ता स्वार्थादन्येनेति न्यायात्, न चान्येनैव रूपेण तदुपस्थितिः, स्वतन्त्रोपस्थितद्रूत्यनेनैव विरोधात्, तदाप्युपस्थित्यर्थमेव लक्षणा स्यात्, तथापि कर्तृवाचकडपदएव लक्षणेत्यप्याहुः । ननु मणिकृन्मते कुमुदे लक्षणा न स्यादिति प्रागेव विपञ्चितं तन्न्यायेन वात्रापि सा न युक्ता स्थलपद्मपदसमभिव्याहारेण पङ्कजनिकर्तृत्वस्य पद्मान्वयतात्पर्याभावग्रहे तदनन्वितपद्मस्य साकाङ्क्षत्वात् । यत्रापि प्रथमं तदन्वयस्तत्रापि स्थलीयपद्मतात्पर्यग्रहानन्तरं पुनः स्मृतेन तत्पदेन लक्षणया स्वतन्त्रोपस्थितिर्वाच्या, एवं च तदा शक्त्यैव तदुपस्थितिरस्तु, अयोग्यतया योगार्थस्यानन्वयात् । किं च श्येनेनाभिचरन् यजेतेत्यत्र यथा विशेषणस्यायोग्यतयान्वयेपि विशेष्येन्वयस्तथा प्रकृतेपि । न च योगार्थस्यैव विशेष्यत्वम् । तथा सति पङ्कजं कुमुदमित्यत्र तस्य साकाङ्क्षतया लक्षणानुपपत्तेरिति चिन्त्यम् ॥

॥ अथ वेदान्तकौस्तुभप्रभायाः ॥

॥ प्रथमाध्यायस्य ॥

॥ प्रथमः पादः ॥

एवं चतुःसूत्र्या सर्वज्ञं सर्वशक्ति ब्रह्मैव सर्ववेदान्तवाक्यप्रतिपाद्यमित्युक्तम् । इदानीं सांख्यादिभिर्ब्रह्मणः प्रमाणान्तरगम्यत्वं मन्यमानैः प्रधानादिपरतया योजितानां वेदान्तवाक्यानां परब्रह्मण्येव समन्वयप्रकारं प्रपञ्चयति भगवान् सूत्रकार ईक्षतेर्नाशब्दमित्यादिभिः । तत्र "सदेव सोम्येदमग्र आसीत्", "एकमेवाद्वितीय"मित्यादिवाक्यस्यजगत्कारणवाचिसच्छब्दवाच्यं प्रधानं वा ब्रह्म वेति संशये प्रधानमेवेति सांख्या आहुः । इदंशब्दवाच्यस्य वियदादिकार्यस्य तत्परिणामभूतत्वात् । कार्यकारणयोश्चानन्यत्वेन प्रतिज्ञादृष्टान्तयोरपि तत्र संभवात् । ज्ञानकारणस्य सत्त्वस्य तत्र भावात् । सर्वज्ञत्वस्य रजोगुणस्य भावात् । क्रियाशक्तिमत्त्वस्य च प्रधाने संभवात् । "तदैक्षत बहुस्या"मिति च गौणमीक्षणं भवितुमर्हति । "तत् तेज ऐक्षते"त्यादिगौणेक्षणसाहचर्यात् । न हि चेतनस्य कारणता वाच्या । चिन्मात्रस्य निर्धर्मकस्य कूटस्थत्वात् । इति प्राप्त आह ॥

॥ ईक्षतेर्नाशब्दम् ॥ ५ ॥

न शब्दः श्रुतिः प्रमाणं यस्मिंस्तदशब्दमानुमानिकं प्रधानं जगत्कारणवादिवाक्यप्रतिपाद्यं न भवति । कुतः । ईक्षतेरीक्षितृत्वश्रवणात् कारणस्य । "तदैक्षत बहु स्यां प्रजायेय", "स ऐक्षत लोकानुसृजा" इति, "स इमांल्लोकानसृजत", "स ईक्षांचक्रे", "स प्राणमसृजते"त्यादिश्रुतेः, ईक्षणं नाम पर्यालोचनम् । अध्यवसाय इति यावत् । तस्य च चेतनासाधारणधर्मत्वेनाचेतने प्रधानेऽसंभवात् ।

नापि प्रतिज्ञादृष्टान्तौ तत्र संभवतः । चेतनस्य तत्कार्यत्वाभावेन "एकविज्ञानेन सर्वविज्ञानप्रतिज्ञायास्तत्रासंभवात्" । इति वक्ष्यति ।

नापि सत्त्वादिमत्त्वेन ज्ञानक्रियाशक्तिमत्त्वं घटते । साम्यावस्थायां तस्य गुणवत्त्वाभावात् । गुणसाम्यं प्रधानमिति निर्णीयमानत्वाच्च ।

नापि निर्धर्मकं ब्रह्म । तस्य ज्ञानक्रियादीनां स्वाभाविकशक्तीनां शास्त्रसिद्धत्वात् । "परास्य शक्तिर्विविधैव श्रूयते, स्वाभाविकी ज्ञानबलक्रिया च" इत्यादिश्रुतेः । अत ईक्षणादमश्चेतनविशेषः सर्वज्ञः सर्वशक्तिः पुरुषोत्तम एव सच्छब्दवाच्यः ॥ ५ ॥

नन्वुक्तं गौणमीक्षणं भवितुमर्हतीति । प्रपतनासन्नं कूलमालक्ष्य कूलं पिपतिषतीति, शुष्कपङ्कां क्षितिमालक्ष्य क्षितिर्वृ-

र्थं प्रतीक्षत इति च, लोकप्रसिद्धवदचेतने प्रधानेऽपि चेतनवदीक्षणमौपचारिकमेवास्तु । कुतो मुख्येक्षितृत्वं विहायौपचारिकं कल्प्यत इति चेत् । "तत् तेज ऐक्षत","ता आप ऐक्षन्ते"ति चाचेतनयोरप्यप्तेजसोश्चेतनवदुपचारदर्शनात् । तस्मात् सत्कर्तृकमीक्षणमौपचारिकमिति गम्यते । उपचारप्राये वचनात्, इति प्राप्त आह ॥

॥ गौणश्चेन्नात्मशब्दात् ॥ ६ ॥

सच्छब्दवाच्यं प्रधानमीक्षणं तत्र गौणमिति चेन्न । कुतः । आत्मशब्दादिति । "सदेव सोम्येदमग्र आसी"दित्युपक्रम्य, "ऐतदात्म्यमिदं सर्वं" "तत् सत्यम्" स आत्मे"ति सच्छब्दवाच्यस्यात्मशब्देन परामर्शदर्शनात् । न हि चेतनं श्वेतकेतुं प्रत्यचेतनप्रधानस्यात्मत्वोपदेशः संभवति । कूलं पिपतिषतीत्यादौ तु संशयस्थलत्वाद्युक्तं गौणत्वम् । "विशये प्रायदर्शना"दिति जैमिनिसूत्रात् । प्रकृते तु गौणमुख्ययोर्गौणस्य जघन्यत्वेन संशयाभावात् तेजःप्रभृतीनामपि तदात्मकत्वावगमात् तेजःप्रभृतीक्षणमपि मुख्यमेवेत्यभिप्रायः ॥ ६ ॥

नन्वात्मशब्दोऽपि चेतनाचेतनसाधारणो दृश्यते । तत् कुत आत्मशब्दादगौणमीक्षणमिति चेत्, तत्राह ॥

॥ तन्निष्ठस्य मोक्षोपदेशात् ॥ ७ ॥

तस्मिन् कारणे निष्ठा यस्य तस्य, "तत्त्वमसी"ति तदात्मकत्वानुसंधानमुपदिश्य, "तस्य तावदेव चिरं यावन्न विमोक्ष्ये, अथ संपत्स्ये" इति शरीरपातविलम्बो ब्रह्मभावापत्तिलक्षणमोक्ष उपदिश्यते । यदि चेतनं मुमुक्षुं श्वेतकेतुं प्रत्यचेतनं कारणमुपदिश्येत । तदा तदात्मकतया प्रत्यगात्मानुसंधानस्य मोक्षसाधनोपदेशो नोपपद्येत । अन्यथाऽचेतनत्वापत्तिरेव मोक्षः स्यात् । सा च प्रधानकारणवादिमतेऽपि नाङ्गीक्रियते । अतः सदात्मशब्दवाच्यं परं ब्रह्मैव ॥ ७ ॥

॥ हेयत्वावचनाच्च ॥ ८ ॥

यद्यचेतनं प्रधानमेवात्र सच्छब्दवाच्यतयोपदिष्टं स्यात्, तर्हि तन्निष्ठावारणाय मुमुक्षुं श्वेतकेतुं प्रति तस्य हेयत्वमेव श्रुत्योच्येत । न च तथोच्यते । प्रत्युत, "तत् त्वमसि", "तस्य तावदेव चिर"मित्युपादेयत्वेनोपदिश्यते । अतः परं ब्रह्मैव ॥ ८ ॥

॥ प्रतिज्ञाविरोधात् ॥ ९ ॥

प्रधानकारणवादे"उत तमादेशमप्राक्ष्यो येनाश्रुतं श्रुतं भवती"त्यादिकारणविज्ञानेन चिदचिन्मिश्रकृत्स्नकार्यविज्ञानप्रतिज्ञा च विरुध्येत । चेतनस्य प्रधानकार्यत्वाभावेन तज्ज्ञानेन तज्ज्ञानासंभवात् ॥ ९ ॥

॥ स्वाप्ययात् ॥ १० ॥

"स्वमपीतो भवति", "सता सोम्य तदा संपन्नो भवती"ति सुषुप्तस्य जीवस्य स्वकारणे लयः श्रूयते । प्रधानस्य कारणत्वे लयश्रुतिर्विरुध्येत । प्रधानस्य जीवकारणत्वाभावात् ॥ १० ॥

॥ गतिसामान्यात् ॥ ११ ॥

सर्वासूपनिषत्सु चेतनैककारणत्वस्य गतेरवगतेः समानत्वाच्चेतनं ब्रह्मैव कारणम् । न हि तार्किकाणामिव वेदान्तशास्त्रस्य भिन्ना कारणावगतिः । यया प्रधानस्यापि क्वचित् कारणत्वं वक्तुं शक्येत ॥ ११ ॥

॥ श्रुतत्वाच्च ॥ १२ ॥

अस्यामेवोपनिषदि सच्छब्दवाच्यपरमेश्वरस्यैव, "आत्मन एवेदं सर्व"मित्यात्मत्वेन सर्वकारणत्वस्य श्रुतत्वात् । चशब्दादुपनिषदन्तरेऽपि"स कारणं करणाधिपाधिपः", "न चास्य कश्चिज्जनिता न चाधिप" इत्यादिना ।

अतः सर्वज्ञः सर्वशक्तिर्दिव्यगुणनिधिः सर्वेश्वरः पुरुषोत्तम एव सर्वजगत्कारणमिति सिद्धम् ।

एतेन जिज्ञास्यस्य ब्रह्मणश्चैतन्यगुणयोगित्वपारमार्थिकमुख्येक्षितृत्वादिगुणयोगित्वादेः श्रुतिमुखेन प्रतिपादितत्वात् प्रधानवाद इव निर्विशेषचिन्मात्रब्रह्मवादोऽपि सूत्रकारेण निरस्तः ॥ १२ ॥

एवं चेतनभोग्यभूतप्रधानशब्दोदितजडवर्गाज्जिज्ञास्यं ब्रह्म व्यतिरिक्तमित्युक्तम् । इदानीं चेतनवर्गादपि निरतिशयानन्दवत्त्वेन तस्य व्यावृत्तिः प्रतिपाद्यते ॥

॥ आनन्दमयोऽभ्यासात् ॥ १३ ॥

तैत्तिरीयके, अन्नमयादिचतुष्पुरुषाननुक्रम्याम्नायते । "तस्माद्वा एतस्माद्विज्ञानमयादन्योऽन्तर आत्मा आनन्दमयस्तेनैष पूर्ण" इति । तत्र किमयमानन्दमयशब्दवाच्यः प्रत्यगात्मा, उत परमात्मेति संशये, प्रत्यगात्मेति पूर्वः पक्षः । कुतः । "तस्यैष एव शारीर आत्मे"त्यानन्दमयस्य शरीरसंबन्धित्वश्रवणात् । तच्च प्रत्यगात्मन एव युक्तम् । अन्नमयादिगौणार्थप्रवाहपतितत्वाच्च ।

किंच, "अन्नमयप्राणमयमनोमयविज्ञानमयानन्दमया मे शुध्यन्ता"मिति श्रुत्यन्तरे आनन्दमयस्य शोध्यत्वश्रवणात् । नित्यशुद्धस्य परमात्मनः शोध्यत्वासंभवात् । इति प्राप्ते राद्धान्तः । आनन्दमयः परमात्मा । कुतः । अभ्यासात् । तत्रैवानन्दशब्दस्य बहुकृत्वोऽभ्यस्यमानत्वात् । "यदेष आकाश आनन्दो न स्यात्", "एष ह्येवानन्दयाति", "आनन्दो ब्रह्मेति व्यजाना"दित्यादिना ।

अपिच, "सैषानन्दस्य मीमांसा भवती"त्यारभ्य, "आनन्दं ब्रह्मणो विद्वान्न बिभेति कुतश्चने"त्यन्तस्य वाक्यस्य ब्रह्मानन्द एव निरतिशयापरिमितत्वप्रतिपादनेन समाप्तिदर्शनात्।

किंच, श्रुत्यैव विज्ञानमयशब्दवाच्याज्जीवादन्यत्वेनोत्कृष्टत्वेनान्तरत्वेनान्तर्यामित्वेन च प्रतिपादितत्वात् । न हि जीवस्य स्वस्मात् स्वस्योत्कृष्टत्वं स्वान्तर्यामित्वं च घटते ।

न च विज्ञानमयशब्दो बुद्धिपरः । मयटो वैयर्थ्यापत्तेः ।

न च प्राणमय इव स्वार्थे मयडिति वाच्यम् । प्राणमये ह्यगत्या तथाङ्गीकारात् । अत्र तु तद्वतो जीवस्य सत्त्वात् । "विज्ञानं यज्ञं तनुत" इत्युत्तरश्लोकस्य विज्ञानशब्देऽपि "कृत्यल्युटो बहुल"मिति सूत्रा"न्नन्द्यादित्वा"द्वा कर्तरि ल्युट् ।

यत् तूक्तं "शारीरत्वश्रवणान्न परमात्मे"ति । नैष दोषः । तस्य सर्वेष्वप्यन्नमयादिषु तन्नियन्तृत्वेन वर्तमानत्वात् । आनन्दमये तु "तस्यैष एव शारीर आत्मा यः पूर्वस्ये"ति निर्देशस्तस्यानन्यात्मत्वं दर्शयति । आत्मान्तरानिर्देशात् ।

नाप्यन्नमयादिगौणार्थप्रवाहपतितत्वात् तस्यापि गौणत्वं निर्णेतुं शक्यम् । तस्य सर्वान्तरत्वेन सर्वपरत्वेन च प्रतिपादितत्वात् । शुध्यन्तामित्यस्य च प्रसाध्यन्तामित्यर्थः ।

अत आनन्दमयशब्दनिर्दिष्ट आकाशादिजगत्कारणभूत आत्मा ब्रह्मैवेति सिद्धम् ॥ १३ ॥

॥ विकारशब्दान्नेति चेन्न प्राचुर्यात् ॥ १४ ॥

ननु नायमानन्दमयः परमात्मा । विकारशब्दात् । विकारार्थमयटः श्रवणात् । "मयड्वैतयोर्भाषायामभक्ष्याच्छादनयो"रिति प्रकृत्य "नित्यं वृद्धशरादिभ्य" इति विकारार्थमयट् स्मर्यते । "अन्नमय" इत्युपक्रमे तस्यैव दर्शनात् । इति चेत् । तत्राह । नेति । कुतः । प्राचुर्यात् । प्रचुरतायामपि "तत् प्रकृतवचने मय"डिति मयटः स्मरणात् । आनन्दप्रचुरत्वं च मनुष्यानन्दमारभ्योत्तरोत्तरशतगुणितानन्दमुक्त्वा ब्रह्मानन्दस्य निरतिशयापरिमितत्वाभिधानात् ।

किंच, "मयड्वैतयो"रिति पूर्वसूत्रा"न्नित्यं वृद्धशरादिभ्य" इत्यत्र भाषायामित्यनुवृत्तेर्विकारावयवयोर्मयटो भाषाविषयत्वेन छन्दसि विकारार्थे मयण्न संभवति । "पर्णमयी जुहू"रित्यादौ तु "द्व्यचश्छन्दसी"ति विधानबलादुपपद्यते ।

प्रकृते त्वानन्दशब्दस्य "द्व्यच्त्वाभावाज्जीवेऽपि "न जायते म्रियते वा विपश्चि"दिति विकारप्रतिषेधः । किमुत परमात्मनि विकारशङ्का ।

न च प्रचुरानन्दवत्त्वेऽप्यल्पदुःखवत्त्वमवर्जनीयमिति वाच्यम् । प्रकाशमयः सूर्य इति सूर्यस्य प्रकाशप्रचुरत्वे कथिते तद्विरोधितमोऽल्पत्वस्य तत्राप्रतीतेः । न हि तत्र स्वगततमोऽल्पत्वापेतं प्रकाशप्रचुरत्वं, किंतु व्यधिकरणचन्द्रादिगतप्रकाशाल्पत्वापेतम् । एवं व्यधिकरणजीवगतानन्दाल्पत्वापेतमेव ब्रह्मण्यानन्दप्रचुरत्वम् । तस्मात् प्राचुर्यार्थे मयट् ॥ १४ ॥

तत्र हेतुः ॥

॥ तद्धेतुव्यपदेशाच्च ॥ १५ ॥

यतस्तस्य जीवानन्दस्य हेतुरयमेवेति व्यपदिशति श्रुतिः । "एष ह्येवानन्दयाती"ति, यो ह्यन्यानानन्दयति स प्रचुरानन्दः । यथा लोके योऽन्येभ्यो विद्यां प्रयच्छति स प्रचुरविद्य इति ।

तस्मादानन्दयितव्यानां जीवानामानन्दयितानन्दमयशब्दवाच्यः परमात्मैव ॥ १५ ॥

तत्र हेतुमाह ॥

॥ मान्त्रवर्णिकमेव च गीयते ॥ १६ ॥

मन्त्रवर्णेनोक्तं यत् तन्मान्त्रवर्णिकं ब्रह्मैवानन्दमय इति गीयते । तथाहि, "ब्रह्मविदाप्नोति पर"मिति ब्राह्मणेन यद्ब्रह्म जीवप्राप्यतयोपक्रान्तं "सत्यं ज्ञानमनन्तं ब्रह्मे"ति मन्त्रेण च सत्यत्वादिधर्मविशिष्टं यन्निश्चितं, मध्ये च "तस्माद्वा एतस्मादात्मन आकाशः संभूत" इत्यादिभिर्यद्विशदीकृतं, तदेव ब्रह्मेह "अन्योऽन्तर आत्मा आनन्दमय" इत्युच्यते । मन्त्रब्राह्मणयोश्चैकविषयत्वात् । अत आनन्दमयः परमात्मैव ॥ १६ ॥

अत्र केचिदाहुः । न हि परमेश्वरादन्यः कश्चित् प्रत्यगात्मा । "नान्योऽतोऽस्ति द्रष्टे"त्यादिश्रुतेः । उपहितेश्वरस्यैव जीवस्य सतो मुक्तावस्थं निर्विशेषचिन्मात्रैकरसं परिशुद्धस्वरूपम् । मान्त्रवर्णिकप्राप्यप्राप्तृत्वव्यपदेशस्तु घटाकाशादिवदुपाधिकृतभेदाङ्गीकारेण । अतस्तदनतिरिक्त आनन्दमय इति प्राप्त आह ॥

॥ नेतरोऽनुपपत्तेर्विद्वत्प्राप्यत्वात् ॥ १७ ॥

ब्रह्मण इतरो भिन्नो जीवात्मा मुक्तावस्थोऽपि मान्त्रवर्णिको न भवति । कुतः । अनुपपत्तेः । विद्वत्प्राप्यत्वनिरुपाधिकविपश्चित्त्वजगत्कारणत्वाद्यसाधारणगुणानां परमात्मेतरस्मिन्ननुपपत्तेः ॥ १७ ॥

॥ भेदव्यपदेशाच्च ॥ १८ ॥

"विज्ञानमयादन्योऽन्तरः", "रसो वै सः", "रसं ह्येवायं लब्ध्वानन्दीभवति", "आनन्दं ब्रह्मणो विद्वान्", "अस्ति ब्रह्मेति चेद्वेद", इत्यादिभिः स्वाभाविकजीवेश्वरभेदस्य व्यपदेशाच्च न मान्त्रवर्णिको विज्ञानात्मा । "नान्योऽतोऽस्ती"ति वाक्यस्य तु प्रत्यगात्मस्वातन्त्र्यद्रष्टृत्वश्रोतृत्वादिनिषेधपरत्वात् । अन्यथा न हि द्रष्टुर्दृष्टेर्विपरिलोपो विद्यतेऽविनाशित्वादिस्वाभाविकद्रष्टृत्वादिप्रतिपादकाभ्याससहकृतशास्त्रव्याकोपात् ।

यत् तूक्तं घटाकाशवदुपहित ईश्वर एव जीव इति । तन्न । तस्य निष्क्रियत्वे गत्याद्यनुपपत्तेः । सक्रियत्वे चेश्वराभिन्नत्वेन विभुत्वात् सुतरां गत्याद्यनुपपत्तेः ।

न च स्वरूपतो निष्क्रियत्वेऽप्युपाधेः परिच्छिन्नत्वात् तत्क्रियाश्चेतनेऽध्यस्य घटगतीस्तदवच्छिन्नाकाशेऽध्यस्य घटाकाशश्चलतीतिवद् देवदत्तश्चलतीति व्यावहारिकगत्याद्युपपत्तिरिति वाच्यम् । तथात्वे क्षणे क्षणे बन्धमोक्षापत्तिरित्यादिदोषाणां पूर्वमेवोक्तत्वात् ॥ १८ ॥

॥ कामाच्च नानुमानापेक्षा ॥ १६ ॥

जीवस्य जगत्कारणत्वेऽविद्यापरवशतयानुमानस्य प्रधानस्य कारणादिरूपस्यापेक्षास्ति । आनन्दमयस्य तु न । कुतः । कामात् संकल्पादेव "सोऽकामयत बहु स्यां प्रजायेये"त्यादिना सृष्टिकर्तृत्वश्रवणात् । जीवादन्यः परमात्मैवानन्दमयः ॥ १९ ॥

॥ अस्मिन्नस्य च तद्योगं शास्ति ॥ २० ॥

यतोऽस्मिन्नानन्दमये मान्त्रवर्णिके परमात्मन्यस्य जीवस्य ज्ञानिनस्तद्योगं तेन परमात्मना योगं संबन्धं तद्भावापत्तिलक्षणं मुक्तिं शास्ति शास्त्रं, "यदा ह्येवैष एतस्मिन्नदृश्येऽनात्म्येऽनिरुक्तेऽनिलयनेऽभयं प्रतिष्ठां विन्दतेऽथ सोऽभयं गतो भवति" । यदा ह्येवैष एतस्मिन् निर्हेतुककृपाकटाक्षसमय एषोऽनन्यशरणो विद्वान्, एतस्मिन् भगवति, अभयं यथा स्यात् तथा, प्रतिष्ठामव्यभिचरितनिष्ठां, तत्कृपयैव विन्दते लभते, अथानन्तरमेवाभयं गतो भवति, भयकारणान्यनिष्ठाभावात् । किंभूते, दृश्यो जडवर्गस्तद्भिलक्षणे, आत्मनां समूह आत्म्यं, तद्भिन्ने, क्षराक्षरविजातीये, अनिरुक्ते इयत्तावच्छिन्नविषयकशब्दानुदिते, अनिलयनेऽनाधारे, अनन्ताचिन्त्यशक्तिमतीत्यर्थः ।

यदा वा ज्ञानकाले एष विद्वान्, उदरमीषदपि, साधनं संबन्धप्रयोजनैकतममन्तरमन्यनिष्ठां, कुरुतेऽथ तस्य भयं भवतीत्यर्थः ।

यद्वा तद्योगमानन्दयोगं शास्ति भगवती श्रुतिः । "रसो वै सः", "रसं ह्येवायं लब्ध्वानन्दीभवती"ति जीवस्य यल्लाभादानन्दयोगः स तस्मादन्यः परमात्मैवेत्यानन्दमयः परं ब्रह्मेति सिद्धम् ।

अत्र केचित्, नानन्दमयस्य ब्रह्मत्वम् । "स वा एष पुरुषोऽन्नरसमय" इत्यारभ्य विज्ञानमयान्ते विकारार्थे मयट्प्रवाहे सत्यानन्दमय एवाकस्मादर्धजरतीयन्यायेन कथमिव मयटः प्राचुर्यार्थत्वं ब्रह्मविषयत्वं चाश्रीयत इति । मान्त्रवर्णिकब्रह्माधिकारादिति चेत् । अन्नमयादीनामपि तर्हि ब्रह्मत्वप्रसङ्गः ।

यद्यप्यन्नमयादिषु तस्मात् तस्मादान्तरस्यान्तरस्यान्यस्यान्यस्यात्मन उच्यमानत्वाद्युक्तं तेषामब्रह्मत्वम् । आनन्दमयात् तु न कश्चिदन्योऽन्तर आत्मेति श्रूयते । तथापि तस्य प्रियशिरस्त्वाद्यवयवयोगविधानादानन्दमयपदार्थोऽपि विकृत एव । अपिच, आनन्दमयस्यैव ब्रह्मत्वे तदेव ब्रह्मानन्दमय आत्मावयवी, तदेव च ब्रह्म पुच्छं प्रतिष्ठावयव इत्यसामञ्जस्यं स्यात् । अन्यतरपरिग्रहे तु युक्तो ब्रह्मपुच्छं प्रतिष्ठेत्यत्रैव ब्रह्मशब्दनिर्देश आश्रयितुं, ब्रह्मशब्दसंयोगात् । नानन्दमयवाक्ये, ब्रह्मशब्दसंयोगाभावादिति ।

किंच, असन्नेव स भवति । "असद्ब्रह्मेति वेद चे"दित्युत्तरश्लोकेऽप्यननुकृष्यानन्दमयं ब्रह्मण एव भावाभाववेदनयोर्गुणदोषाभिधानाद्गम्यते । ब्रह्म पुच्छं प्रतिष्ठेत्यत्र ब्रह्मण एव सप्रधानत्वमिति ।

न चानन्दमयस्यात्मनो भावाभावशङ्का युक्ता । प्रियमोदादिविशेषस्यानन्दमयस्य सर्वलोकप्रसिद्धत्वात् । कथं पुनः सप्रधानं सद्ब्रह्म, आनन्दमयस्य पुच्छत्वेन निर्दिश्यते, ब्रह्म पुच्छं प्रतिष्ठेति ।

नैष दोषः । पुच्छवत् पुच्छं, प्रतिष्ठा परायणम्, एकनीडलौकिकस्यानन्दजातस्य ब्रह्मानन्दत्वं तदनेन विवक्ष्यते । नावयवत्वम् । "एतस्यैवानन्दस्यान्यानि भूतानि मात्रामुपजीवन्ती"ति श्रुत्यन्तरात् ।

अपिच, आनन्दस्य ब्रह्मत्वेऽपि प्रियाद्यवयवत्वेन सविशेषं ब्रह्माभ्युपगन्तव्यम् । निर्विशेषं तु ब्रह्म वाक्यशेषे श्रूयते । वाङ्मनसयोरगोचरत्वाभिधाना"द्यतो वाचो निवर्तन्ते अप्राप्य मनसा सहे"ति ।

अपिच, आनन्दप्रचुर इत्युक्ते दुःखाल्पत्वमपि गम्यते । प्राचुर्यस्य लोके प्रतियोग्यल्पत्वापेक्षत्वात् । तथा च सति "यत्र नान्यत् पश्यति नान्यच्छृणोति नान्यद्विजानाति स भूमे"ति भूम्नि ब्रह्मणि तद्व्यतिरिक्ताभावश्रुतिरुपरुध्येत । प्रतिशरीरं च प्रियादिभेदादानन्दमयस्य भिन्नत्वम् । ब्रह्म तु न प्रतिशरीरं भिद्यते । सत्यं "ज्ञानमनन्तं ब्रह्मे"त्यानन्त्यश्रुतेः । "एको देव" इति च श्रुत्यन्तरात् ।

न चानन्दमयाभ्यासः श्रूयते । प्रातिपदिकमात्रस्यैवानन्दस्याभ्यासात् । यदि चानन्दमयशब्दस्य ब्रह्मत्वं निश्चितं भवेत् । तत उत्तरेष्वानन्दमात्रप्रयोगेष्वप्यानन्दमयाभ्यासः कल्प्येत । न त्वानन्दमयस्य ब्रह्मत्वमस्ति प्रियशिरस्त्वादिभिर्हेतुभिरित्यवोचाम । तस्माच्छ्रुत्यन्तरे "विज्ञानमानन्दं ब्रह्मे"त्यानन्दप्रातिपदिकस्य ब्रह्मणि प्रयोगदर्शनाद् "यदेष आकाश आनन्दो न स्या" दित्यादिर्ब्रह्मविषयः प्रयोगो न त्वानन्दमयाभ्यास इत्यवगन्तव्यम् ।

यस्त्वयं मयडन्तस्यैवानन्दशब्दस्याभ्यासः, एतमानन्दमयमात्मानमुपसंक्रम्येत्यादिः, स न ब्रह्मगोचरानन्दशब्दस्य । उपसंक्रमितव्यानां प्रवाहे पठितत्वात् ।

नन्वानन्दमयस्योपसंक्रमितव्यस्यान्नमयादिवदब्रह्मत्वे सति नैव विदुषो ब्रह्मप्राप्तिफलं निर्दिष्टं भवेत् ।

नैष दोषः । आनन्दमयोपसंक्रमनिर्देशेनैव पुच्छप्रतिष्ठाभूतब्रह्मप्राप्तेः फलस्य निर्दिष्टत्वात् ।

या त्वानन्दमयसंनिधाने "सोऽकामयत बहु स्यां प्रजायेये"तीयं श्रुतिरुदाहृता, सा ब्रह्म पुच्छं प्रतिष्ठेत्यनेन संनिहिततरेण ब्रह्मणा संबध्यमानानन्दमयस्य ब्रह्मतां प्रतिबोधयति । तदपेक्षत्वाच्चोत्तरग्रन्थस्य "रसो वै स"इत्यादेर्नानन्दमयविषयता ।

ननु सोऽकामयते"ति ब्रह्मणि पुंलिङ्गनिर्देशो नोपपद्यते । नायं दोषः । "तस्माद्वा एतस्मादात्मन आकाशः संभूत" इत्यत्र पुंलिङ्गेनाप्यात्मशब्देन ब्रह्मणः प्रकृतत्वात् ।

तस्मदंशमात्रमपि विशेषमनाश्रित्य न स्वत एव प्रियशिरस्त्वादि ब्रह्मण उपपद्यते । न चेह सविशेषं ब्रह्म प्रतिपिपादयिषितम् । वाङ्मनसागोचरातिक्रमश्रुतेः ।

तस्मादन्नमयादिष्विवानन्दमयेऽपि विकारार्थ एव मयड्विज्ञेयो न प्राचुर्यार्थः ।

सूत्राणि त्वेवं व्याख्येयानि । "ब्रह्म पुच्छं प्रतिष्ठे"त्यत्र किमानन्दमयस्यावयवत्वेन ब्रह्म विवक्ष्यते, उत सप्रधानत्वेनेति । पुच्छशब्दादवयवत्वेनेति प्राप्त उच्यते । "आनन्दमयोऽभ्यासात्", "आनन्दमय आत्मे"त्यत्र "ब्रह्म पुच्छं प्रतिष्ठे"ति सप्रधानमेव ब्रह्मोपदिश्यते । कुतः । अभ्यासात् । "असन्नेव स भवती"त्यस्मिन् निगमनश्लोके ब्रह्मण एव केवलस्याभ्यस्यमानत्वात् । "विकारशब्दान्नेति चेन्न प्राचुर्यात्" विकारशब्दोऽवयवशब्दोऽभिप्रेतः । पुच्छमित्यवयवशब्दान्न सप्रधानत्वं ब्रह्मण इति यदुक्तम् । तस्य परिहारो वक्तव्यः ।

अत्रोच्यते नायं दोषः । प्राचुर्यादप्यवयवशब्दोपपत्तेः । प्राचुर्यं प्रायापत्तिः । अवयवप्राये वचनमित्यर्थोऽन्नमयादीनां हि शिरआदिषु पुच्छान्तेष्ववयवेषूक्तेष्वस्यानन्दमयस्यापि शिरआदीन्यवयवान्तराण्युक्त्वावयवप्रायापत्त्या ब्रह्म पुच्छं प्रतिष्ठेत्याह । नावयवविवक्षया । यत्कारणमभ्यासादिति सप्रधानत्वं ब्रह्मणः समर्पितम् । तद्धेतुव्यपदेशाच्च । सर्वस्य च विकारजातस्य सानन्दमयस्य कारणत्वेन ब्रह्म व्यपदिश्यते । "इदं सर्वमसृजत यदिदं किंचे"ति ।

न च कारणं सद्ब्रह्म स्वविकारजातस्य सानन्दमयस्य मुख्यया वृत्त्यावयव उपपद्यते ।

पराण्यपि सूत्राणि यथासंभवं पुच्छवाक्यनिर्दिष्टस्यैव ब्रह्मोपपादकानि द्रष्टव्यानीत्येव वदन्ति । तत् तुच्छम् । अन्नादिमय एव प्रकरणस्य पर्यवसानात् ।

तथाहि, तत्र तावदुक्तं विकारार्थे मयटः प्रवाहे सतीत्यादि तदसम्यक् । अन्नमये मयटो विकारार्थत्वेऽपि प्राणमयादिषु विकारार्थस्यासंभवेन नैतत्प्रवाहपातित्वमानन्दमयस्य । पञ्चवृत्तेः प्राणस्यैकत्वेन प्रकृतिविकारासंभवात् । ततः स्वार्थे मयट् । वृत्तिप्रचुरत्वविवक्षया वा ज्ञानेन्द्रियैर्युक्तं मन एव मनोमय इत्युच्यते । विज्ञानमयेऽपि जीवात्मनश्चेतनस्यान्यविकारत्वासंभवात्, अन्यथा स्वरूपहानेः । "न जायते म्रियते वे"त्यादिशास्त्रबाधाच्च प्राचुर्य एव मयट् । तद्विज्ञानधर्मस्य बद्धावस्थायां संकुचितत्वेऽपि "न हि विज्ञातुर्विज्ञातेर्विपरिलोपो विद्यतेऽविनाशित्वा"दित्यादिशास्त्रेण स्वाभाविकत्वविवक्षया । संसारिणोऽपि जीवस्य विज्ञानप्रचुरत्वसंभवात् ।

तस्माद्विकारार्थप्रवाह एव नास्ति, कुतस्तत्पातशङ्का, कुतस्तरामर्धजरतीयन्यायापातप्रसङ्गश्च, प्रत्युत प्राचुर्यार्थविज्ञानमयपदसांनिध्यात् सुतरां प्राचुर्यार्थत्वावगमः । न चैकत्राभ्यासेन द्वित्रिःकृत्वः पठितस्य संनिहितशब्दस्यैकार्थपरत्वनियमो वक्तुं शक्यः । "पौर्णमास्यां पौर्णमास्या यजेते"त्यत्र पाठस्य साम्यस्य संनिधानत्वस्य च नियमेऽपि सप्तम्यन्तस्य कालवाचित्वेन तृतीयान्तस्य कालयुक्तकर्मवाचित्वेन च भिन्नार्थत्वस्य पूर्वकाण्डे निर्णयदर्शनात् ।

यदप्युक्तं, तस्य प्रियशिरस्त्वाद्यवयवयोगविधानात् सोऽपि विकृत एवेति, तदपि न सम्यक् । प्रियमोदादिशब्दवाच्यानामपीष्टवस्तुदर्शनजादिसुखानां तद्विभूतिलक्षणतदंशत्वादवयवत्वोक्तिर्युक्तैव । सर्वस्यापि प्राणिसुखजातस्य तदानन्दांशत्वात् । "एतस्यैवानन्दस्यान्यानि भूतानि मात्रामुपजीवन्ती"त्यादिश्रुतेः परार्थत्वान्नावयवविधानं विरुद्धम् ।

यदुक्तमानन्दमयस्यैव ब्रह्मत्वे तस्यैवावयवावयविभावापत्तावसामञ्जस्यं स्यादिति, तदप्यसम्यक् । तयोरेकार्थपरत्वस्यैवेष्टत्वात् ।

कथं तर्ह्यात्मत्वेन पुच्छत्वेन च निरूपणमिति चेत् । एकस्यैव ब्रह्मणो ब्रह्मत्ववेषेण पुच्छत्ववेषेणात्मत्वमित्युपपत्तेः । अंशांशिनोर्विभूतिविभूतिमतोश्चाभेदस्याविरुद्धत्वात् ।

यच्चोक्तं ब्रह्म पुच्छमित्यानन्दमय इत्यनयोर्वाक्ययोर्ब्रह्मशब्दसंयोगासंयोगाभ्यामपि नानन्दमयशब्दवाच्यं ब्रह्मेति । तत् तुच्छम् । यथानन्दमयवाक्ये ब्रह्मशब्दासंयोगस्तथा ब्रह्म पुच्छमिति वाक्य आनन्दशब्दासंयोगस्य तुल्यत्वात् । अनयोर्मध्ये सूचितत्वेनाभ्यस्तत्वेन चानन्दपदस्यैव सूत्रकृदभिमतत्वाद्बलीयस्त्वम् । तद्विरोधश्च तव पक्ष एव महादोषमावहति ।

यदि ब्रह्माभ्यास एव सूत्रकृदभिप्रेतः स्यात्, तर्हि ब्रह्म पुच्छं प्रतिष्ठाभ्यासादिति सूचितं स्यात्, न तु तथा दृश्यते ।

किंत्वानन्दमयं प्रतिज्ञायाभ्यासश्च हेतुतयोक्तः, तथात्वे च प्रतिज्ञाहेत्वोः सूत्रितयोर्हानिरसूत्रितस्य च कल्पना स्यात् ।

किंच, भृगुवल्ल्यामपि प्राणाद्युपासन उत्तरोत्तरजिज्ञासायास्तदवस्यत्वादानन्दस्य ज्ञानानन्तरमुपदेशसमाप्तेश्चानन्दस्य बलिष्ठत्वम् ।

कथं तर्ह्यानन्दरूपस्य ब्रह्मण आनन्दमयत्वम् । आनन्दस्यानन्दप्रचुरत्वाभावादिति चेन्न । आनन्दस्वरूपस्यैव ब्रह्मणः प्रियमोदप्रमोदशब्दवाच्यशिरःपक्षादिधर्मभूतानन्दमयत्वस्याप्युपपत्तेः ।

यच्चोक्तं “समस्तेषु स भवती”ति श्लोकेऽननुकृष्यानन्दमयब्रह्मण एव भावाभाववेदनयोर्गुणदोषाभिधानादित्यादि । तदपि न सम्यक् । गुणिमात्रनिर्देशेऽपि गुणप्रतिपत्तिः सुकरा । सर्वज्ञस्यानन्दाद्यनन्तगुणवत एव प्रस्तुतत्वात् ।

यदप्युक्तमानन्दमयस्य ब्रह्मत्वे प्रियाद्यवयवत्वेन सविशेषं ब्रह्माभ्युपगन्तव्यम् । निर्विशेषं तु वाक्यशेषे श्रूयत इत्यादि । तदतितुच्छम् । “सैषानन्दस्य मीमांसे”ति गुणभूतानन्दस्योत्तरोत्तरवाक्यैराधिक्यं निर्धार्य “आनन्दं ब्रह्मणो विद्वा”निति गुणगुणिनोः पृथक् पाठ एव कण्ठरवेण ब्रह्मणः सविशेषत्वं ज्ञापयति । “यतो वाचो निवर्तन्त” इति वाक्यस्य तु न निर्विशेषपरत्वं, किंतु ब्रह्मानन्दस्यान्यानन्दवत् परिच्छेदवारणपरत्वम् । रागादिदोषदूषितवाङ्मनसागोचरत्वविधानपरत्वं वा । अन्यथा तत्रैवोत्तरार्धे ब्रह्मण इति षष्ठीनिर्देशो वेदनक्रियाविषयत्वनिर्देशश्च विरुध्येत । न हि त्वन्मते धर्मधर्मिभावाङ्गीकारः ।

यच्चोक्तमानन्दप्रचुरत्वे दुःखाल्पत्वमपि गम्यत इत्यादि, तदपि तुच्छतरम् । प्राचुर्यस्य प्रतियोग्यल्पत्वसापेक्षत्वेऽपि स्वात्मन्येव प्रतियोगिसत्त्वनियमस्याभावात् । व्यधिकरणचन्द्रादिगतप्रतियोगिसत्तामपेक्ष्यापि प्रचुरप्रकाशः सूर्य इत्यादेः पूर्वमुक्तत्वात् । तद्वदिहापि प्रियमोदादीनि वैषयिकसुखान्यपेक्ष्य तथा प्रयोगप्रवृत्तिरविरुद्धा । इतरथा स्वात्मन्येवोभयकल्पनायां तमःप्रकाशयोरिव महाविरोधाद्वाक्यमूकताप्रसङ्गः ।

किंच, तत्प्रचुरत्वं नाम तत्प्रभूतत्वम् । तच्चेतरस्य सत्तां नावगमयति । अपि त्वल्पत्वं निवर्तयति । इतरसद्भावाभावौ च प्रमाणान्तरावसेयौ । इह चा“पहतपाप्मे”त्यादिश्रुतेस्तदभावोऽवगम्यते । श्रुत्यर्थस्तु, यत्र यस्मिन् वस्तुन्यनुभूयमाने सत्यन्यत् तद्व्यतिरिक्तं किंचिन्न पश्यति सर्वस्य तदात्मकत्वात् तदपृथक्सिद्धत्वात् स भूमेति । एवमग्रेऽपि ज्ञेयम् ।

यच्चोक्तं, प्रतिशरीरं प्रियादिभेदादानन्दमयस्य भिन्नत्वं, ब्रह्म तु न भिद्यते । आनन्त्यश्रुतेरिति । तदपि न । ब्रह्मण एवानन्दमयशब्दवाच्यत्वेनानन्दमयस्यैवानन्त्यश्रवणात् ।

यच्चोक्तं, नानन्दमयाभ्यासः श्रूयते । प्रातिपदिकमात्रस्यैवानन्दस्याभ्यासादित्यादि । तदप्यसाधु । “वसन्ते ज्योतिषा यजेते”त्यत्र यथा ज्योतिःशब्दस्य ज्योतिष्टोमपरत्वं पूर्वकाण्डे निर्णीतं, तद्वदिहापि प्रातिपदिकस्यानन्दपदस्यानन्दमयपरत्वं युक्तमेव । गुणिनं विना गुणस्य स्थित्यनुपलब्धेः ।

यच्चोक्तं ‘एतमानन्दमयमात्मानमुपसंक्रामती”त्यभ्यासस्य न ब्रह्मविषयत्वं, विकारप्रवाहे पठितत्वादिति । तदपि तुच्छतरम् । विकारप्रवाहाभावस्य पूर्वमुक्तत्वात् । तत्रोपसंक्रामतीत्यस्यानुभवतीत्यर्थः ।

किंच, मयटो विकारार्थत्वे को वानन्दमयपदार्थ इति विवेचनीयम् । चेतनोऽचेतनो वेति । नाद्यः । तस्य निर्विकारत्वादेकरसत्वाच्च । नान्त्यः । जडत्वात् । इतरथा घटादीनामप्यानन्दाश्रयत्वापत्तेः । तेषामपि जडत्वसाम्यात् ।

तस्मात् प्राचुर्यार्थ एव मयट् । आनन्दमयश्च परमात्मा परब्रह्म पुरुषोत्तमः श्रीकृष्ण एवेति सिद्धम् । अलमतिविस्तरेण ॥ २० ॥

एवमधिकरणद्वयेन सामान्यतः क्षेत्रक्षेत्रज्ञयोः कारणत्वं निरस्येदानीं विशेषतः प्राप्तैश्वर्याणामिन्द्रादित्यादिचेतनानां प्रकृतिकार्याकाशाद्यचेतनानां चेतनत्वं निराकरोत्या पादपरिसमाप्तेः ॥

॥ अन्तस्तद्धर्मोपदेशात् ॥ २१ ॥

छन्दोगैरिदमाम्नायते, “अथ य एषोऽन्तरादित्ये हिरण्मयः पुरुषो दृश्यते हिरण्यश्मश्रुर्हिरण्यकेश आ प्रणखात् सर्व एव सुवर्णस्तस्य यथा कप्यासं पुण्डरीकमेवमक्षिणी तस्योदिति नाम स एष वै सर्वेभ्यः पाप्मभ्य उदित, उदेति ह वै सर्वेभ्यः पाप्मभ्यो, य एवं वेद; तस्य ऋक् च साम च गेष्णावित्यधिदैवतमथाध्यात्ममथ य एषोऽन्तरक्षिणि पुरुषो दृश्यते” इत्यादि । तत्र संशयः । आदित्यमण्डलाक्ष्णोरन्तःस्थत्वेन श्रूयमाणः पुरुषः किं जीवविशेष उत परमपुरुष इति । “हिरण्यश्मश्रुर्हिरण्यकेशोऽन्तरादित्येऽन्तरक्षिणि ये चामुष्मात् पराञ्चो लोका ये चैतस्मादर्वाञ्चो लोका” इत्यादिना रूपवत्त्वपराश्रितत्वपरिच्छिन्नैश्वर्यवत्त्वश्रवणात् । परस्य तु, “अशब्दमस्पर्शमरूपं स भगवः कस्मिन् प्रतिष्ठितः, स्वे महिम्नि एष सर्वेश्वर एष भूताधिपति”रित्यादिना तद्विपरीतश्रवणात् । अतः पुण्यवद्व्याप्तैश्वर्यः कश्चित् क्षेत्रज्ञविशेष इति पूर्वपक्षः । परमपुरुष एवेति राद्धान्तः । कुतः । तद्धर्मोपदेशात् । तस्य परमेश्वरस्यैव धर्माणां सर्वपापगन्धसंबन्धास्पर्शत्वस्योपासकसर्वपापमोचयितृत्वस्यैव ऋक् तत् सामेत्यादिसर्वात्मकत्वादीनामस्मिन् वाक्य उपदेशात् । “यदा पश्यः पश्यते रुक्मवर्णं आदित्यवर्णं तमसः परस्तात्” ।

"समस्ताः शक्तयश्चैता नृप यत्र प्रतिष्ठिताः ।
तद्धि स्वरूपवैरूप्यं रूपमन्यद्धरेर्महत्" ॥

इत्यादिशास्त्रात् सत्यत्वादिस्वाभाविकधर्मवत् तत्र रूपवत्त्वस्याप्यविरुद्धत्वात् । अशब्दमित्यादिवाक्यस्य च प्राकृतशब्दादिनिषेधपरत्वात् ।

न च पराश्रितत्वं तस्य वाच्यम् । सर्वाश्रयत्ववत् सर्वान्तरत्वस्यापि "अन्तः प्रविष्टः शास्ता", "सर्वभूतान्तरात्मा", "यः पृथिव्यां तिष्ठ"न्नित्यादिशास्त्रसिद्धत्वात् ।

नापि तस्य परिच्छिन्नैश्वर्यवत्त्वमत्र विधीयते । अधिदैवादिव्यवस्थापरत्वात् । परिच्छेदवाक्यस्यैकदेशकथनेन परिच्छिन्नवत् प्रतीयते । यथानन्तब्रह्माण्डनायकोऽपि श्रीकृष्णो वैकुण्ठनाथो गोकुलनाथो व्रजराजो द्वारकाधिपतिरिति ।

न च रूपवत्त्वे शरीरसंबन्धोऽप्यवश्यं भावी, स च कर्मवश्यानां जीवानामेव कर्मानुगुणप्रियाप्रियभोगायैवेति वाच्यम् । सत्यसंकल्पस्य भगवतः स्वेच्छयैव स्वानुरूपाप्राकृतशरीरसंबन्धस्य संभवेन कर्मवश्यत्वाभावात् । "अजायमानो बहुधा व्यजायते"ति" श्रुतेः ।

"अजोऽपि सन्नव्ययात्मा भूतानामीश्वरोऽपि सन् ।
प्रकृतिं स्वामधिष्ठाय संभवत्यात्ममायया ॥
परित्राणाय साधूनां विनाशाय च दुष्कृताम् ।
न भूतसंघसंस्थानो देहोऽस्य परमात्मनः ॥

इत्यादिस्मृतेश्च । तत्र प्रकृतिः स्वभावः, स्वमेव भावमास्थाय स्वस्वरूपे स्थित्वेत्यर्थः । आत्ममाययेति स्वप्रकल्पमात्ररूपेण ज्ञानेनेत्यर्थः । साधुशब्देन भगवदुपासकाः । तत्परित्राणस्यैवोद्देश्यत्वात् । दुष्कृद्विनाशस्त्वानुषङ्गिकः ॥ २१ ॥

॥ भेदव्यपदेशाच्चान्यः ॥ २२ ॥

इतश्चादित्याद्यन्तःस्थः परमेश्वर एव । कुतः । "य आदित्ये तिष्ठन्नादित्यादन्तर" इत्यादिश्रुत्यादित्यादिजीववर्गात् परमात्मनोऽभेदेन व्यपदेशात् ॥ २२ ॥

॥ आकाशस्तल्लिङ्गात् ॥ २३ ॥

छान्दोग्ये शालावत्यजैवलिसंवाद इदं श्रूयते । "अस्य लोकस्य का गतिरित्याकाश इति होवाच सर्वाणि ह वा इमानि भूतान्याकाशादेव समुत्पद्यन्ते, आकाशं प्रत्यस्तं यन्ति, आकाशो ह्येवैभ्यो ज्यायानाकाशः परायण"मित्यत्राकाशशब्दनिर्दिष्टः किं प्रसिद्धाकाश उत परमात्मेति संशयः । भूताकाश इति पूर्वपक्षो युक्तः । प्रसिद्धतरप्रयोगे तस्यैव झटिति बुद्धावारोहणात् । ब्रह्मणि तु गौण आकाशशब्दः । विभुत्वादिधर्मैर्ब्रह्मण आकाशसादृश्यात् । "यत्सदादिशब्दानामपि साधारणत्वेनाकाशादेव समुत्पद्यन्ते" इति वाक्यशेषे विशेषपर्यवसानात् । ईक्षणादयस्तु तत्र गौणा वर्णनीयाः । "आकाशाद्वायुर्वायोरग्नि"रित्यादिश्रुत्या ज्यायस्त्वपरायणे अपि भूतान्तरापेक्षया तत्रोपपद्येते ।

तस्मादाकाशशब्देन भूताकाश एवेति प्राप्तौ राद्धान्तः ।

आकाशोऽत्र परात्मैव । कुतः । तल्लिङ्गात् । लीनं स्वावच्छिन्नं धर्मविशेषं गमयति परिच्छिन्नत्तीति व्युत्पत्त्या तस्य परमात्मन एव सर्वकारणत्वज्यायस्त्वपरायणत्वादेर्लिङ्गादव्यभिचारिधर्मात् । न ह्येतेषां भूताकाशे संभवः । तस्य वाय्वादीनां कारणत्वादिसंभवेऽप्याकाशादेवेत्येवकारस्य सर्वाणीति सर्वपदस्य च पाठान्न सर्वकारणत्वादिलिङ्गानां तत्र संभवः । "तस्माद्वा एतस्मादात्मन आकाशः संभूत" इत्यात्मकार्यत्वश्रवणाच्च । स्वस्य स्वकारणत्व आत्माश्रयतापत्तेः । आ समन्तात् काशत इति योगवृत्त्या "यदेष आकाश आनन्दो न स्यात्", "आकाशो ह वै नामरूपयोर्निर्वहिते"त्यादिश्रुतौ रूढिवृत्त्या च ब्रह्मण्येवाकाशशब्दो मुख्यः ।

ननु श्रुतिलिङ्गवाक्यप्रकरणस्थानसमाख्यानां समवाये पारदौर्बल्यमर्थविप्रकर्षा"दिति न्यायेन "आकाश"इति श्रुतेर्लिङ्गापेक्षया बलीयस्त्वाद्बलीयः प्रमाणं न दुर्बलेन बाधितुमर्हमिति चेन्न । श्रुतिप्रमाणस्य बलीयस्त्वेऽपि प्रमेयलिङ्गोपपत्तावेव तस्य प्रवृत्तिरनुपपत्तौ चाप्रवृत्तिरिति न्यायादत्र परस्य ब्रह्मणोऽसाधारलिङ्गानां भूताकाशे सर्वथानुपपन्नत्वादनुपपत्तिसहकृतलिङ्गस्य प्राबल्यात् तेन श्रुतेर्बाधो घटत एव । यथा केनचिदेकेन पुरुषेण बलीयांसो जना बाधितुमनर्हा अपि राजसहायेन तेनैव सर्वेऽपि बाध्यन्ते, तथा केवललिङ्गेन निर्बलत्वाद्बलीयसी श्रुतिर्बाधितुमनर्हापि बलवदनुपपत्तिप्रमाणसहकृतेन तेनैव बाध्यते सापीति न विरोध इति ।

तस्मादाकाशशब्दवाच्यः परमात्मैवेति सिद्धम् ॥ २३ ॥

॥ अत एव प्राणः ॥ २४ ॥

तत्रैवोद्गीथे "प्रस्तोतर्या देवता प्रस्तावमन्वायत्ते"ति प्रस्तुत्य कतमा सा देवतेति प्राण इति होवाच सर्वाणि ह वा इमानि भूतानि प्राणमेवाभिसंविशन्ति प्राणमुज्जिहते सैषा देवता प्रस्तावमन्वायत्ता" इत्यत्र सर्वजगत्कारणतया प्राणशब्देनिर्दिष्टः किं प्रसिद्धः प्राण उत परं ब्रह्मेति संशयः । सर्वस्य जगतः प्राणाधीनस्थितिदर्शनाद् वायुवृत्तिप्राण एवेति प्राप्तेऽतिदेशमुखेनाह, अत एव संवेशनोद्गमनरूपपरमात्मलिङ्गादेव प्राणशब्दवाच्यः परमात्मैव । विशेषशङ्का तु "यदा वै पुरुषः स्वपिति प्राणं तर्हि वागप्येति प्राणं चक्षुः प्राणं मनः प्राणं श्रोत्रं स यदा प्रबुध्यते प्राणादेवाधि पुनर्जायते" इत्यादिश्रुत्या प्राणे कार्यप्रवेशोद्गमदर्शनात् स एवात्रोपास्यतया विधीयत इति चेत् । तत्रेन्द्रियमात्रसंवेशादिसंभवेऽपि महाभूतानां चेतनानां च संवेशादेस्तत्राश्रवणात् परमात्मैव प्राणयति सर्वं जगद्यस्मिन्निति व्युत्पत्त्या वायुप्राणशब्देनाभिधीयते ॥ २४ ॥

॥ ज्योतिश्चरणाभिधानात् ॥ २५ ॥

छान्दोग्ये गायत्रीविद्यायामिदमाम्नायते। "अथ यदुत परो दिवो ज्योतिर्दीप्यते विश्वतः पृष्ठेषु सर्वतः पृष्ठेष्वनुत्तमेषूत्तमेषु लोकेषु इदं वाव तद्यदिदमस्मिन्नन्तः पुरुषे ज्योति"रित्यत्र किं ज्योतिःशब्देन प्रसिद्धादित्यादिज्योतिरभिधीयते, उत परं ब्रह्मेति संशये प्रसिद्धज्योतिरिति पूर्वपक्षः। तस्य तमोनिवारकत्वप्रसिद्धेर्द्युमर्यादत्वश्रवणाच्च। ब्रह्मणः सर्वगतस्य तदसंभवात्।

ननु भौतिकज्योतिष्यपि द्युमर्यादत्वानुपपत्तिः, अर्वागपि दिवो दर्शनादिति चेत्। तस्योपासनार्थं द्युमर्यादत्वविधानमविरुद्धम्। ब्रह्मणस्तु विभुत्वेन निष्प्रदेशत्वान्न तद्युक्तम्। "चक्षुष्यः श्रुतो भवति य एवं वेदे"त्यस्य फलश्रवणाच्च।

किंच, "इदं वाव तद्यदिदमन्तःपुरुषे ज्योति"रिति कौक्षेयज्योतिषैक्यावगमात् स्ववाक्ये तदतिरिक्तब्रह्मासाधारणलिङ्गादर्शनाच्चेति प्राप्ते राद्धान्तः। ज्योतिःशब्दनिर्दिष्टं निरतिशयदीप्तिमत्तरं ब्रह्मैव। कुतः। यतोऽस्य ज्योतिषः पूर्वस्मिन् वाक्ये "पादोऽस्य सर्वा भूतानि त्रिपादस्यामृतं दिवि" इत्यत्र सर्वभूतचरणत्वाभिधानात्। सर्वभूतपादत्वं च परब्रह्मण एवोपपद्यते। यच्छब्दस्य सर्वनामत्वेन प्रसिद्धपरामर्शित्वात्। पूर्ववाक्ये द्युसंबन्धितया प्रसिद्धं ब्रह्म, अत्रापि द्युसंबन्धाविशेषात् तदेव यच्छब्देन प्रत्यभिज्ञायते।

न च द्युमर्यादाश्रवणविरोधः। परशब्दस्योत्कृष्टतापरत्वेनाव्यापकत्वस्याविवक्षितत्वात्। "तद्देव ज्योतिषां ज्योतिरायुर्होपासत" इत्यादौ ज्योतिःशब्दस्य ब्रह्मपरत्वेन श्रवणान्न फलश्रवणविरोधोऽपि। ब्रह्मणः सर्वफलदातृत्वेन तदुपासनेऽल्पाधिकफलनियमाभावात्। श्रूयते च वाजसनेयिनामग्निरहस्ये, "तं यथा यथोपासते तदेव भवती"ति। अत्र च कौक्षेयज्योतिषा तादात्म्योपासने तात्पर्यम्।

अहं वैश्वानरो भूत्वा प्राणिनां देहमाश्रितः।

इति भगवदुक्तेरिति भावः ॥ २५ ॥

॥ छन्दोऽभिधानान्नेति चेन्न तथा चेतोऽर्पणनिगमात् तथाहि दर्शनम् ॥ २६ ॥

पूर्ववाक्ये "गायत्री वा इदं सर्व" मिति गायत्र्याख्यछन्दस एव प्रकरणात् सर्वभूतपादत्वेन तस्या एवाभिधानान्न ब्रह्मेति चेन्न। तथा चेतोऽर्पणनिगमात्, वर्णसंनिवेशमात्रायास्तस्याः सर्वात्मकत्वासंभवात्। तद्द्वारेण ब्रह्मणि चेतोऽर्पणं चित्तसमाधानं निगम्यते। गायत्रीसादृश्यानुसंधानं वा फलार्थमत्रोपदिश्यते। तत्र दृष्टान्तः। तथाहि दर्शनम्। यथा गायत्री षडक्षरैः पादैश्चतुष्पदा, तथा ब्रह्मापि चतुष्पादिति चतुष्पादत्वयोगात् सादृश्यम्। दृश्यते चान्यत्रापि छन्दोऽभिधायिशब्दस्य सादृश्यात् प्रयोगः। "ते वा एते पञ्चान्ये पञ्चान्ये दश सन्तस्तत्कृत"मित्युपक्रम्याह, "सैषा विराडन्ना"दिति संवर्गविद्यायाम् ॥ २६ ॥

॥ भूतादिपादव्यपदेशोपपत्तेश्चैवम् ॥ २७ ॥

इतश्च गायत्रीशब्दोदितं ब्रह्मैवाभ्युपगन्तव्यम्। चकारोऽवधारणे। यतो ब्रह्मण एव गायत्रीशब्दार्थत्वाभ्युपगतावेव भूतपृथिवीशरीरहृदयानां पादत्वव्यपदेशोपपत्तेर्न केवलस्य छन्दसो भूतादयः पादा भवितुमर्हन्ति ॥ २७ ॥

॥ उपदेशभेदान्नेति चेन्नोभयस्मिन्नप्यविरोधात् ॥ २८ ॥

पूर्ववाक्ये दिवीत्याधारत्वेन द्यौर्निर्दिश्यते, इह च दिव इति पञ्चम्या मर्यादात्वेन द्यौर्निर्दिश्यत इत्युपदेशभेदाज्ज्योतिर्वाक्येन ब्रह्म प्रत्यभिज्ञायत इति चेन्न। उभयस्मिन्नप्युपदेशे तात्पर्यैक्येनाविरोधात्। यथा वृक्षाग्रे वृक्षाग्रात् परतो वा श्येन इति।

तस्माज्ज्योतिःशब्दाभिधेयं निरतिशयदीप्तिमत्तरं ब्रह्मैवेति सिद्धम् ॥ २८ ॥

कौषीतकीब्राह्मणे प्रतर्दनविद्याम्नायते, "प्रतर्दनो ह वै दैवोदासिरिन्द्रस्य प्रियं धामोपजगाम, युद्धेन च पौरुषेणे"त्यारभ्य तत्र वरं ते ददामीतीन्द्रेणोक्ते प्रतर्दनस्त्वं प्रतीष्टमेव मे वरं वृणीष्व यं त्वं मनुष्याय हिततमं मन्यस इति तं वरं त्वमेवालोच्य मे मह्यं वृणीष्व देहीत्यर्थः। एवं, प्रतर्दनोक्त इन्द्र इदमाह, "प्राणोऽस्मि प्रज्ञात्मा, तं मामायुरमृतमित्युपास्वे"ति, उत्तरत्रापि, "अथ खलु प्राण एव प्रज्ञात्मा इदं शरीरं परिगृह्योत्थापयती"ति, न वाचं विजिज्ञासीत वक्तारं विद्या"दिति च, उपसंहारे च, "स एव प्राण एव प्रज्ञात्मा आनन्दोऽजरोऽमृत" इति श्रूयते। तत्रेन्द्रप्राणशब्दवाच्यः किं जीव उत परं ब्रह्मेति संशये जीव इति पूर्वपक्षः। इन्द्रशब्दस्य तत्रैव प्रसिद्धेरिन्द्रशब्दसहचरितप्राणशब्दस्यापि स एवार्थ इति, "तं मामायुरमृतमित्युपास्वे"ति तस्यैवोपास्यत्वोपदेशात्।

इति प्राप्त आह ॥

॥ प्राणस्तथानुगमात् ॥ २९ ॥

प्राणोऽस्मीत्यादीन्द्रप्राणशब्दनिर्दिष्टः परमात्मैव। कुतः। हिततमत्वप्रज्ञात्मत्वानन्दत्वाजरत्वादीनां हि तथानुगमात्। तथा परमात्मपरिग्रहे सत्येवानुगन्तुं शक्यत्वात् ॥ २९ ॥

॥ न वक्तुरात्मोपदेशादिति चेदध्यात्मसंबन्धभूमा ह्यस्मिन् ॥ ३० ॥

यदुक्तमिन्द्रप्राणशब्दनिर्दिष्टः परमात्मेति, तन्नोपपद्यते। "मामेव विजानीहि, मामुपास्वे"ति वक्तुरिन्द्रस्य "त्रिशीर्षाणं

त्वाष्ट्रमहन् मरुन्मुख्यान् यतीन् शालावृकेभ्यः प्रायच्छ"मित्येवमादिभिः प्रज्ञातजीवभावस्यैव स्वात्मन उपास्यत्वोपदेशात्, उपक्रमे जीवभावे विनिश्चिते सत्या"नन्दोऽजरोऽमृत" इत्युपसंहारस्यापि तदनुगुणतया नेतव्यत्वादिति चेत्। तत्र समाधत्ते। अध्यात्मसंबन्धभूमा ह्यस्मिन्, आत्मनि संबन्धोऽध्यात्मसंबन्धः, तस्य भूमा बहुत्वम्, आत्मन्याधेयतया संबध्यमानानां तदसाधारणधर्माणां तथाचिदचितोश्च बहुत्वेन संबन्धबहुत्वस्य वक्तुः परमात्मत्वे सत्येव संभवात्। तथाहि, "यं त्वं मनुष्याय हिततमं मन्यस" इत्युपक्रमे हिततमोपासनं परमात्मोपासनमेव। तस्यैव हिततमत्वात्, "तमेव विदित्वातिमृत्युमेती"त्यादिश्रुत्यन्तरात्। तथा "एष एव साधु कर्म कारयती" त्यादि साध्वसाधुकर्मकारयितृत्वं परमात्मन एव धर्मः। तद्यथा, "रथस्यारेषु नेमिरर्पिता नाभावरा अर्पिता एवमेता भूतमात्राः प्रज्ञामात्रास्वर्पिताः प्रज्ञामात्राः प्राणेऽर्पिताः", इति भूतमात्रप्रज्ञामात्रशब्दोदितचेतनाचेतनात्मककृत्स्नवस्त्वाधारत्वम्। "स एष प्राण एव प्रज्ञात्मा", "आनन्दोऽजरोऽमृत"इत्यानन्दादयश्च हि यस्मात् परमात्मन एव धर्माः, अतोऽस्मिन् प्रकरण इन्द्रप्राणशब्दनिर्दिष्टः परमात्मैवोपास्य इत्यर्थः ॥ ३० ॥

एवं चेत् तर्हि कथमिन्द्रो मामुपास्वेत्युपदिष्टवानित्यत आह ॥

॥ शास्त्रदृष्ट्या तूपदेशो वामदेववत् ॥ ३१ ॥

"ऐतदात्म्यमिदं सर्वं," "स तथ्यं", "स आत्मा", "तत् त्वमसि", "अयमात्मा ब्रह्म", "सर्वं खल्विदं ब्रह्म,तज्जलानिति" "अभयं वै जनक प्राप्नोति, यदात्मानं वेदाहं ब्रह्मास्मी"ति, "अन्तः प्रविष्टः शास्ता जनानां" "सर्वात्मा स त आत्मान्तर्याम्यमृतः" "एष सर्वभूतान्तरात्मा", "एष त आत्मान्तर्याम्यमृत" इत्यादिशास्त्रदृष्ट्या स्वान्तर्यामिणः परब्रह्मणः सर्वान्तर्यामित्वेन सर्वात्मकत्वमवगम्य "मामेव विजानीहि, मामुपास्वे" तीन्द्रस्य जीवस्यैव स्वात्मत्वेन परमात्मोपदेशोऽयम्। यथा वामदेवः शास्त्रदृष्ट्या स्वान्तर्यामिणं परमात्मानं पश्यन् "अहं मनुरभवं सूर्यश्च कक्षीवानृषिरस्मि विप्र" इति तमेवावोचत् ॥ ३१ ॥

॥ जीवमुख्यप्राणलिङ्गान्नेति चेन्नोपासात्रैविध्यादाश्रितत्वादिह तद्योगात् ॥ ३२ ॥

"न वाचं विजिज्ञासीत वक्तारं विद्यात् त्रिशीर्षाणं त्वाष्ट्रमहन् मरुन्मुख्यान् यतीन् शालावृकेभ्यः प्रायच्छ"मित्यादिजीवलिङ्गात्।

"अथ खलु प्राण एव प्रज्ञात्मेदं शरीरं परिगृह्योत्थापयति यावदस्मिन् शरीरे प्राणो वसति तावदायु"रिति मुख्यप्राणलिङ्गाच्च नेदं वाक्यं ब्रह्मपरमिति चेन्न। उपासनायास्त्रैविध्यात्। उपासनायास्त्रिविधत्वमुपदेष्टुं ब्रह्मण एव तत्तच्छब्देनाभिधानम्। यथान्यत्र त्रिविधोपासनं ब्रह्मण आश्रीयते। तत्र "सत्यं ज्ञानमनन्तं ब्रह्म", "आनन्दो ब्रह्मे"ति स्वरूपेण ब्रह्मण उपास्यत्वम्। "तत् सृष्ट्वा तदेवानुप्राविशत्", "तदनुप्रविश्य सच्च त्यच्चाभव"दित्यादिषु जीववर्गान्तर्यामितया प्राणाद्यन्तर्यामितया च तस्योपास्यत्वम्। एवमिह प्रतर्दनविद्यायामपि तद्योगात् तस्य त्रैविध्यस्य योगात् संभवात्।

अतः परब्रह्मपरमेवेदं वाक्यजातमितीन्द्रप्राणशब्दनिर्दिष्टः परमात्मैवेति सिद्धम् ॥ ३२ ॥

इति श्रीसनकसंप्रदायप्रवर्तकाद्याचार्यश्रीनिम्बार्कमतानुयायिश्रीमन्मुकुन्दचरणपद्ममकरन्दभृङ्गेण श्रीकेशवकाश्मीरिभट्टेन संगृहीतायां वेदान्तकौस्तुभप्रभाख्यायां ब्रह्मसूत्रवृत्तौ प्रथमाध्यायप्रथमपादविवरणं समाप्तिमगात् ॥ १ ॥ :: :: ॥

॥ अथ ज्ञानसिद्धान्तचन्द्रिका ॥

बर्क्लेसंज्ञकमहापण्डितविरचितज्ञानसिद्धान्तमालायाः ।

अवतारिता

॥ तत्रोपोद्घातप्रकरणम् ॥

१–अध्यात्मशास्त्रस्य विज्ञानफलकत्वादिदं तावत्सयुक्तिकमाशास्यते यदेतच्चिराभ्यासिनो जना जनान्तरमपेक्ष्याधिकमात्मसुखमनुभवेयुः। तेषां मनश्च सर्वदा शान्तं सन्देहाद्यदूषितं च स्यात्। सुनिर्मलयथार्थज्ञानोदयेनापगतसन्देहाः प्रसन्नचेतसश्चले न कस्मिन्नपि विषये ऽनुपपत्तिशङ्काभ्यां बाध्येरन्। अनधीताध्यात्मशास्त्रकास्तु पुनः स्वापरिष्कृतानुभवमेव बहुमन्यमाना निजनैसर्गिकबुद्धिवशंगताः सर्वत्र निःशङ्का विचारशून्या यथाश्रुतग्राहिणश्च भवन्ति। न कस्मिन्नपि परिचिते ऽपरिचिते वा विषये तेषां कारणजिज्ञासोदेति न किमप्यवर्णनीयकारणकं दुर्घटं च तेषां प्रतिभाति। स्वेन्द्रियापर्याप्तप्रामाण्यकृते न कदापि ते परिदेवन्ते न कस्मिन्नपि विषये सन्दिहानाश्च भवन्तीति।

परन्तु यदैव जनास्स्वप्रत्यक्षाणि नैसर्गिकबुद्धिं चाद्वितीयप्रमाणत्वेनाऽनाश्रित्य वस्तुतत्त्वनिर्णयार्थं विवेकचन्द्रिकामनुसरन्ति तदैव तेषां मनस्सु पूर्वं सुपरिचितेष्वपि विषयेषु परःशताः संदेहा उत्पद्यन्ते। तेषां स्वेन्द्रियोपनीतप्रत्यक्षाणि च भ्रान्तानि प्रतीयन्ते। यथा २ ते तानि प्रत्यक्षज्ञानानि विवेकव्यापारेण निर्णेतुं प्रयतन्ते तथा २ नानाविधतर्कवितर्कैर्बाध्यन्ते। अन्ततश्च चक्रव्यूह इव संदेहव्यूहे पतिता विचारपरिश्रान्ता जिज्ञास्ये विषये अज्ञातनिश्चया एवावसीदन्ति।

२–अस्य बीजं तु सांसारिकविषयाणां स्वाभाविकदुर्ज्ञेयता मानवीयज्ञानशक्तीनां नैसर्गिकाकुशलता वाऽस्ति । यतो हि ताः शक्तयः प्रकृत्याऽपर्याप्ता एव सृज्यन्ते, उद्दिश्यन्ते च केवलं मनुष्यजीवननिर्वाहायैव न पुनर्वस्तुतत्वपरीक्षणाय । एवंच परिच्छिन्ना मनुष्यबुद्धिरपरिमितधर्मवतां विषयाणां विवेचनाय प्रवर्तमाना सती व्याहता मुग्धा वा स्यात् । अपरिमितधर्मवतां वस्तूनां परिमितशक्तिकया धिया आकलनस्यासंभवादिति केचिदाहुः ।

३–तन्नशोभनम् । ज्ञानशक्तीनां स्वाभाविकापूर्णत्वस्य कल्पने प्रमाणाभावात् । यथार्थव्याप्तिग्रहसिद्धानामेवानुमानानां स्वीकार्यत्वात् । नाप्येतत्परमकारुणिकस्येश्वरस्य जगत्पालनरीत्यां संभाव्यते यत्समनुजाप्राप्यान् विषयविशेषान्त्स्रष्ट्वा तद्विषयिणीमुत्कटामिच्छां तेषु जनयेत् । तेनतु यायास्तृष्णा मनुष्येषु स्थाप्यन्ते तत्तत्तृप्त्युपायाश्चोपकल्प्यन्ते । तेष्वौचित्येनानुष्ठितेष्ववश्यमेवैतास्तृप्येरन् । एवंच प्रायशः सर्वाणि काठिण्यानि तत्वज्ञानप्रतिबन्धकीभूतानि यान्यद्य यावत्तत्त्वज्ञानेप्सुभिरनुभूयन्ते तानि स्वविचारदोषकृतान्येव नतु ज्ञानशक्तिवैकल्यकृतानीति तैरेव निराकर्तव्यानि अन्यथा स्वयमेव धूलिमुद्धूय पश्चान्नदृश्यतइति परिदेवमानाइव तेपि परैरुपहस्येरन् ।

४–अतस्तथाविधाः सिद्धान्ताः परीक्ष्यन्ते यद्वशादध्यात्मशास्त्रे विविधाः संदिग्धा बाधिताश्चार्थाः प्रादुर्बभूवुः । येन च बुद्धिमत्तमा अपि जनाः स्वाज्ञानं बुद्धेर्नैसर्गिकजाड्यपारिमित्याभ्यां कृतं मत्वा तदप्रतीकार्यं मेनिरे । युज्यते चादौ मनुष्यज्ञानविषयकाद्यसिद्धान्तानां सम्यक् परीक्षणम् । येन तत्वज्ञानप्रतिबन्धकीभूताभ्रमाः संदेहाश्च विषयाणामनिर्वचनीयत्वात्स्वाभाविकबुद्धिवैकल्पाद्वा नोद्यन्ति अपितु साग्रहं स्वीकृतेभ्योमिथ्याज्ञानसिद्धान्तेभ्यएवेतिपरमसिद्धान्तस्य बाधका हेत्वाभासा निरस्येरन् ।

५–यद्यप्येतमुद्देशमुद्दिश्य कृतभूरिपरिश्रमान् भूयिष्ठान् बहुदर्शिनो बुधवरान् अद्ययावन्मोघप्रयत्नानन्वीक्ष्य ममाप्यसौ प्रयत्नः कामं दुर्घटो विषादकरश्च प्रतीयते तथापि बहुदर्शिनोजनाः सदा सूक्ष्मदर्शिनो न भवन्ति । बहुदर्शित्वसूक्ष्मदर्शित्वयोः सामानाधिकरण्यनियमस्यादर्शनात् । लघुदृष्टिरपि जनो दिदृक्षितं वस्तु स्वाक्षिनिकटमानीय गाढावलोकनेनातिक्रान्तोत्तमदृष्टीनपि तद्गतविशेषांल्लक्षयेदित्यादिविचारणेन नास्मि स्वकार्यसिद्धौ सर्वथा निराशः ।

६–अथैतद्ग्रन्थाध्येतृणां वक्ष्यमाणविषयेष्वनायासेन प्रवेशायोपोद्घातक्रमेण प्राचीनविदुषां शब्ददुष्प्रयोगमधिकृत्य किंचिदुच्यते तत्प्रसंगतश्च प्रायेण सर्वत्र तत्वार्थविचारे नानाविधभ्रममूलं नितान्तभ्रममूलकं च प्राचीनमतं यथातथं विचार्यते । तच्चाऽऽत्मनोवस्त्वभेद्यभेदज्ञातृत्वं नाम । आत्मा घटपटादिविषयेभ्योऽभेद्यान्त्समवायसंबन्धेन संबद्धान् रूपरसादीन् भेदेन कैवल्येन जानातीति तदर्थः : अस्ति चैतत्सर्वत्र तर्कशास्त्राऽध्यात्मशास्त्रादिषु मुख्यविषयत्वेन प्रपञ्चितम् ॥

७–तदित्थम् । यद्यपि पदार्थनिष्ठागुणाः प्रत्येकं गुणान्तरासाहचर्येण न तिष्ठन्ति परस्परं विजातीया अप्येकत्र मिश्रिताइव प्रतीयन्ते तथाप्यात्मा तान् प्रत्येकं विचारयंस्तद्द्वारा तदभेद्यभेदज्ञानवान्भवति यथा कस्मिंश्चिद्रूपपरिमाणगत्यादिविशिष्टे पिण्डे दृष्टे तद्गतानां समुदितानां रूपादीनां मिश्रितप्रत्यक्षे जाते तेषामेकैकस्येतरव्यावृत्त्या चिन्तनेन रूपस्याकारादिव्यतिरेकेण गतेश्च रूपादिव्यतिरेकेणाभेद्यभेदज्ञानं संपद्यते ।

८–एवमनेकव्यक्तिगतसाधारणाकारादीनामपि ज्ञानं जायते । तद्यथा घटपटमठादिविषयगतान् नानाविधरूपपरिमाणादीनन्वीक्ष्याऽऽत्मा अभेद्यभेदनानुकूलया स्वशक्त्या शुक्लनीलादीन्रूपविशेषानणुमहदादीन्परिमाणविशेषांश्च परित्यज्य साधारणरूपपरिमाणादीनेव विचारयंस्तेषां साधारणं ज्ञानं प्रतिपद्यते । एतज्ज्ञानविषयीभूतं रूपादिकं शुक्लनीलादिभ्यो विलक्षणमप्यविशेषेण यावद्वर्णात्मकं बोध्यम् । तथैव गतिमत्पदार्थगतानां गतीनां वक्रसरलाद्यशेषविशेषांस्तदाश्रयीभूतद्रव्याणि चाविचार्य केवलशुद्धगतेश्चिन्तनेन साधारणगतिज्ञानं संपद्यते । इयं गतिश्च सर्वगतिविशेषविहीनाप्यविशेषेण सर्वविधगत्यात्मिका बोध्या ।

९–एवं साधारणगुणज्ञानानीवात्मनि परापरजातिज्ञानान्यपि सुलभानीत्युच्यते । यथा चैत्रमैत्रविष्णुमित्रादिनिष्ठानामाकारावयवसंस्थित्यादीनां तत्तद्व्यक्तिमात्राश्रितान् विशेषानविचारयन्त्सर्वसाधारणाकारादीनेवानुसंदधदात्मा तादृशगुणगणस्य मनुष्यत्वापरपर्यायस्य ज्ञानमनुविन्दति । अस्य सर्वमनुष्यव्यक्तिगतस्य तत्तद्व्यक्तिगतकालदिगवस्थादिविशेषोपाधिरहितस्य नानाविधसाधारणगुणघटितस्य मनुष्यत्वाख्यधर्मस्य ज्ञानेऽन्तर्गतत्वेन तद्विषयघटकीभूतानां साधारणरूपाकारादीनां ज्ञानमवश्य मन्तव्यम् । अवयवज्ञानमन्तराऽवयविनो ज्ञानस्यासंभवात् । नहि मनुष्यत्वं सर्वमनुष्यगतरूपपरिमाणादिघटितत्वादतिरिच्यते । तादृशं रूपं च न तावन्नीलपीतकपिशादिवर्णविशेषात्मकमपितु सर्वसाधारणवर्णात्मकम् । वर्णविशेषस्य सर्वत्राननुगतत्वात् । एवं तत्परिमाणादिकमपि दीर्घह्रस्वाद्यतिरिक्तं किंचित्सर्वमनुष्यानुस्यूतपरिमाणादिकं बोध्यम् । एवमेव मनुष्यपशुपक्ष्यादितत्तज्जात्याश्रितधर्मविशेषपरित्यागपूर्वकं मनुष्यामनुष्यसर्वसाधारणस्य शरीरवत्वादेः पर्यालोचनया तादृशानेकगुणघटितायाः

प्राणित्वरूपायाः परजातेरपि ज्ञानं संपद्यते । एतज्ज्ञानघटकीभूतानि प्राणगात्रेन्द्रियस्वैरगत्यादिविषयकज्ञानानि बोध्यानि । गात्रपदेनात्र ह्रस्वदीर्घादिसर्वविधविशेषपरिमाणरहितं शरीरमभिप्रेयते । परिमाणविशेषविशेषितस्य तस्य सर्वज्ञानानुगतत्वात् । नापि तत्केशपक्षकवचाद्यन्यतमावृतं नग्नं वाभ्युपेयम् । केशादीनां प्राणिविशेषजात्याश्रितत्वात् । एवं स्वैरगतिपदेन न वक्रा सरलोपरितनाऽधस्तनावा गतिर्विवक्ष्यते किंतु निखिलगतिप्रकारातिरिक्ता सर्वसाधारणी काचनानिर्वाच्या गतिरितिसिद्धमात्मनोऽभेद्यभेदज्ञातृत्वमितिदिक् ॥

१०—तदिदं प्राचीनमतमनुभवनिकषेण परीक्षितं चेत्सिकताकूपवत्स्वयमेव विशीर्येत । एतादृश्या विलक्षणाया आत्मनोऽभेद्यभेदज्ञानशक्तेरनुभवागम्यत्वात् । आत्मना तावद्विषयावयवानां विलक्षणाः संयोगा विभागा वा कल्पयितुं शक्यन्ते यथा मनुष्यस्य द्विशिरस्कत्वं हयग्रीवत्वं वा । किंच नासानेत्रकर्णाकरं वा प्रत्येकमितराशेषावयवमोषेणापि चिन्तयितुं शक्यते । परंतु नैतेषां चक्षुरादीनां रूपपरिमाणादिराहित्येन ज्ञानविषयता । यत्किमपि चक्षुः श्रोत्रं वा परिचिन्त्यतां तदवश्यं रूपपरिमाणादिविशेषविशेषितमेव भासेत (नाप्याकारादिराहित्येन चक्षुरादिरूपस्य रूपादिराहित्येन तदाकारस्य वा भानं संभवति) एवं मनुष्यविषयकज्ञानमपि रूपपरिमाणादिविशेषविषयकमेवोत्पत्तुं शक्यते नतूक्तविधसर्वमनुष्यसाधारणाकारादिघटिताभेद्यभेदज्ञानात्मकं ज्ञानमपि । तथैव शीघ्रमन्दसरलवक्रत्वाद्यविशेषितायाः गतिमद्द्रव्यपृथग्भूतायाश्च साधारणगतेर्ज्ञानमपि न संभाव्यते । एवमादिसर्वेषां पदार्थानामभेद्यभेदज्ञानवादिसंमतं ज्ञानं कथमप्यात्मनि कल्पयितुं न शक्यते । अयमेव सुधियां प्राकृतजनानां चानुभवः । एतेन तादृशज्ञानस्यातिकाठिन्येन परमसूक्ष्मधीसाध्यत्वाद्विपश्चितामेव तत्साध्यं नत्वपरिष्कृतधियामपीतिवदन्तः परास्ताः ॥

११—यत्त्वभेद्यभेदज्ञानवत्त्वकृतमेव मनुष्यपशुबुद्ध्योरन्तरं वदता लोकाख्यपण्डितेन मानवचित्परीक्षानामके स्वपुस्तके, मनुष्यबुद्धेरभेद्यभेदज्ञानवत्त्वादेवपशुबुद्धितोवैजात्यम् । अन्यथोभयबुद्ध्योः साम्यापत्तेः । पशौतु तादृशं ज्ञानं न संभवति । तदभिव्यञ्जकानां शब्दानां चिह्नान्तराणां वातत्राऽदर्शनात् । यद्यपि गजादिकतिपयपशुजातयो न केवलं यान्त्रिकसंस्थितिसन्निभेन्द्रियसंस्थित्यैवान्विताः किंतु समयान्तरे विवेकभासा भासिता अपि भासन्ते तथापि नायं विवेकः पूर्वोक्तसाधारणज्ञानात्मकोऽपितु तेषां प्रत्यक्षज्ञानानीव विशेषज्ञानरूप एव । एवं च मनुष्या एव तादृशसाधारणज्ञानभाजो नतु परमसंकुचितज्ञानवन्तो जन्तवोपीत्युच्यते । तत्रेयं चिन्ता । पशवोऽभेद्यभेदज्ञानवन्तो न सन्तीति पण्डितलोकाख्योक्तं तु सर्वसंमतम् । परंतु यन्मनुष्याणां पशुव्यावर्तकं लक्षणं तादृशविलक्षणज्ञानवत्त्वमुक्तं तदसत् । तथासति भूयिष्ठा जना मनुष्यत्वेन व्यवहृता अपि पशुत्वेन परिगण्येरन् । यच्च पश्वादिषु साधारणज्ञानबोधकशब्दानां तदभिव्यञ्जकचिह्नान्तराणां वाऽदर्शनात्तत्र तादृशज्ञानाभावइत्युक्तं तत्साधारणशब्दानां तादृशसाधारणज्ञानार्थकत्वनियमं प्रकल्प्यैव । अतएव साधारणशब्दप्रयोक्तृत्वान्मनुष्याणामेव तादृशसाधारणज्ञानकल्पनार्हत्वमुच्यते तेन । अयमेव हि तस्याशयस्तस्मिन्नेव ग्रन्थे स्थलान्तरे सर्वेषां वस्तूनां व्यक्तिरूपत्वात्तन्नामानि साधारणानि कथं भवन्तीत्याशङ्क्य साधारणज्ञानचिह्नत्वेन प्रयुक्ताः शब्दाः साधारणनामानि भवन्तीति समाधानात्स्पष्टं प्रतीयते । परंत्वेतत्सर्वं कपोलकल्पनामात्रम् । शब्दानामेकजातीयाशेषज्ञानविशेषचिह्नत्वेन प्रयोगादेव तत्साधारण्यसिद्धेः । तथा प्रयुक्तानामेव शब्दानां साधारणशब्दत्वेन व्यवहारात् । यथा वेगसंचारणतारतम्यानुसारेण गतितारतम्यं भवति यद्यत्परिमाणशालि तत्तद्विभाज्यमित्यनयोर्वाक्ययोर्गतिपरिमाणे साधारण्येन विवक्ष्येते । नैतावतात्र गतिपदेन तत्समवेतपिण्डराहित्येन तत्प्रदर्शितसरलाद्याकारातिरिक्तत्वेन च गतिर्नवा परिमाणपदेनाणु महद्दीर्घाद्यतिरिक्तं किंचित्परिमाणमुपस्थाप्यते किंतु सर्वपिण्डविशेषाश्रितास्सर्वे गतिविशेषाः परिमाणविशेषाश्चैव । आद्यवाक्येन तु या कापि गतिर्भवतु शीघ्रा मन्दा सरला वक्रा वा यस्य कस्यापि पिण्डस्याश्रितास्तु तस्यास्सर्वविधाया अपि गतेस्तारतम्यस्य वेगसंचारणतारतम्यानुसारित्वं समानम् द्वितीये न च पदार्थानां यत्किमपि परिमाणं भवतु अणु महद्दीर्घंह्रस्वं वा तेषां सर्वेषां विभाज्यत्वं समानमित्यभिप्रेयते । तदेवं साधारणशब्दप्रयोक्तृत्वान्मनुष्याणां तादृशसाधारणज्ञानवत्त्वं कल्पयितुं न शक्यते ।

१२—साधारणज्ञानसंपादनरीतिं विज्ञाय साधारणशब्दोत्पत्तिप्रकारः समीचीनतया निर्णेतुं शक्यते । न तावदस्माभिस्साधारणज्ञानसामान्याभावोपितु अभेद्यभेदज्ञानात्मकसाधारणज्ञानाभाव एव उच्यते । लोकाख्यपण्डितानुमतानि साधारणज्ञानानि तूक्ताष्टमनवमपरिच्छेदनिर्दिष्टाभेद्यभेदनरीत्या निर्मितानि विवक्ष्यन्त इति तान्यनुभवविरोधात्खण्डितानि । अस्मद्विवक्षितसाधारणज्ञानमित्यस्य साधारणं च तज्ज्ञानमित्यर्थः । तत्साधारण्यं चोपलक्षणविधया नतु वास्तवम् । साधारणज्ञानस्य स्वतोविशेषात्मकत्वेपि तस्य स्वसजातीयाशेषविशेषव्यक्त्युपलक्षकत्वेन विवक्षणात् । यथा कश्चन गाणितिकः सरलरेखासमविभजनप्रकारं प्रदर्शयन्नेकामङ्गुलिमितां रेखां लिखति । नतावत्तादृशविभागसाधनविषयत्वेन सैव रेखाव्यक्ति-

ऽभिप्रेयते किंतु तदुपलक्षितास्तत्सजातीयाशेषरेखाव्यक्तयोऽपि । यद्वेव तस्या रेखाया विषये विधीयते निषिध्यते वा तत्सर्वं तदुपलक्षिताखिलरेखाविषयेऽपि । यथैवेयं रेखा स्वसजातीयाखिलरेखोपलक्षकत्वेन साधारणी भवति तथैव रेखेतिपदं स्वतो विशेषरूपमपि सकलरेखाबोधकचिह्नत्वेन प्रयुक्तं सत्साधारणं भवति । यथैव च रेखायाः साधारण्यं स्वसजातीयाशेषविशेषरेखोपलक्षकत्वाश्रितं न पुनर्लोकाभिधाभिमतसाधारणरेखाज्ञानात्मकं तथैव रेखापदस्य साधारण्यं तत्संकेतिताशेषविशेषरेखाबोधकचिह्नत्वेन स्वप्रयोगस्याश्रितं बोध्यम् । ननु रेखायाः साधारण्येन तत्साधारणज्ञानं कथं सिद्ध्यतीति न शङ्कनीयम् । ज्ञानार्थयोरैक्यस्यानुपदमेव वक्ष्यमाणत्वात् ।

१३–अथाभेद्यभेदज्ञानस्यात्यन्तासंभवप्रदर्शनायादौ तदभिमानिलोकाख्यविदुषोक्ताभिधे ग्रन्थेऽभिहितानि तदावश्यकत्वफलानीहाऽनूद्यन्ते वक्ष्यमाणग्रन्थेन । तथा हि । अभेद्यभेदज्ञानानि बालानामशिक्षितजनानां च विशेषज्ञानानीव सुलभानि न सन्ति । सुवृद्धेषु पुरुषेषु बाहुल्येन प्रतीयमानान्यपि तानि नाऽनायाससिद्धान्यपितु दैनंदिनाभ्यासप्रयोगाभ्यामुपलभ्यानीति बोध्यम् । यतस्तेषु ज्ञानेषु गाढं विचारि तेषु न तानि ज्ञानान्तराणीव स्वत उपस्थितान्यपितु विचारक्लेशसहिष्णुमनस्कजनसाध्यानि प्रतीयन्ते । यथा कामं सुगमतरमपि त्रिकोणक्षेत्रस्याभेद्यभेदज्ञानं नाल्पायाससाध्यम् । तादृशज्ञानविषयीभूतत्रिकोणस्य वक्रकोणसरलकोणसरलभुजासरलभुजादिसर्वविधविरुद्धधर्मकत्रिकोणविशेषेभ्योऽतिरिक्तत्वात्तदात्मकत्वाच्च । यद्यपि वक्रत्वसरलत्वादिनानाविधविरुद्धधर्मावगाह्येकं ज्ञानं न कुत्रापि प्रसिध्यति तथापि स्वीयं सिद्धान्तमन्येभ्यो बोधयितुं तमनुगतीकर्तुं च निसर्गतः प्रवण आत्मा तदर्थं तादृशापूर्वज्ञानानि नितान्तमाकाङ्क्षमाणः सहसैव तान्यात्मनि परिकल्पयति । तादृशज्ञानाभावे तत्परिचायकसाधारणशब्दानामप्यनुत्पत्त्या लोकानां परस्परं संभाषणस्यानुपपत्तेः । यदि कश्चनापातदर्शी तादृशज्ञानपरिकल्पने आत्मनोप्यसामर्थ्यं कल्पयेत्तर्हि तं प्रत्येतावतैव कथनेनालं यदिमान्यभेद्यभेदज्ञानानि न प्राथमिकज्ञानभूतानि नाप्यनायाससाध्यानि नवाऽपरिपक्वज्ञानगम्यानीति । अत्रोच्यते । यदि कश्चनैतादृग्विलक्षणज्ञानवान्स्यात्तर्हि सएव प्रष्टव्यः । तस्य तदेकपक्षपातित्वात्तेन सह विप्रतिपत्तेर्वैयर्थ्यात् । वयंत्वपक्षपातिविदुषः प्रति प्रार्थयामहे यत्ते स्वल्पामेवान्तर्दृष्टिं विधायेदृशंज्ञानमस्ति नवेति विविच्यपश्येयुः न कमप्येतद्दुष्करं प्रतीयेत यदुक्तविधं वक्रकोणसरलकोणत्वाद्यखिलविशेषधर्माविशेषितस्य सर्वविधत्रिकोणात्मकस्य च साधारणत्रिकोणस्यात्मनि ज्ञानमस्तिनवेत्यालोचनम् ।

१४–यच्चोक्तं तादृशविलक्षणं ज्ञानं भाषणादावत्यावश्यकमिति तदपि न । तस्यानल्पाभ्यासपरिश्रमादिफलीभूतत्वस्य तत्रैव वर्णनाद्भाषणस्य चानायाससाध्यत्वात् । अस्तिचाशेषविशेषव्यक्त्यविषयकसाधारणज्ञानसंपत्तौ महत्काठिण्यम् । परन्त्विदं तावत्सस्पृहं जिज्ञास्यते यत्कोसौ समयविशेषो यस्मिन् जनास्तादृशं महत्काठिण्यं पारयित्वा संभाषणेऽत्यन्तावश्यकानि ज्ञानान्यधिगच्छन्तीति । न तावत्प्रौढे वयसि वक्तुं शक्यते । तत्रस्थानां जनानां तद्धेतुकस्य भूतपूर्वपरिश्रमस्याननुभवात् । नापि बाल्ये । तदवस्थास्थितानां कोमलानां बालानां तथाविधज्ञानानुकूलनितांतपरिश्रमाभ्यासादिपारुष्यसहनेऽक्षमत्वात् । नाप्येवं कल्पयितुमपि शक्यते यद्बाला अनेकविरुद्धधर्मवत्सजातीयविजातीयानन्तव्यक्तिदर्शनपूर्वकविविधाभेद्यभेदज्ञानोत्पत्तेस्तेषां ज्ञानानां तत्परिचायकशब्दानां च वाच्यवाचकभावस्य ज्ञानाच्च प्राङ् नानाविधक्रीडनकानां खाद्यवस्तूनां च विषये न भाषन्ते नवातानि याचन्त इति ॥

१५–यदप्युच्यतेऽभेद्यभेदज्ञानानङ्गीकारे शास्त्रीयनियमानां स्वयावद्विषयानुगतत्वस्य सिद्धयेऽत्यावश्यकस्य तद्विषयानुगतरूपवतो ज्ञानस्याऽसिद्धिः । तथा च त्रिकोणविषयकनियमानां त्रिकोणानुगतरूपवदानुगुण्यस्यासिद्ध्या तेषां यावत्त्रिकोणानुगतत्वस्य निर्णयो न स्यात् प्रातिस्विकरूपेणाखिलत्रिकोणव्यक्तीनां तदानुगुण्येन दर्शनस्य कर्तुमशक्यत्वादिति । तदप्ययुक्तम् । तद्विषयानुगतरूपवत्त्वस्य चैकस्याविषयव्यक्तेः स्वसजातीयव्यक्त्यन्तरनिष्ठोयः सादृश्यादिसंबन्धस्तदात्मकत्वेन व्यक्तिनिरपेक्षजातिज्ञानानाश्रितत्वात् । तथा च सर्वासामपि त्रिकोणव्यक्तीनां तादृशसंबन्धवत्वेन त्रिकोणानुगतरूपवत्वादन्यतमत्रिकोणव्यक्तेरपि त्रिकोणविषयकनियमानुगुण्यस्यदर्शनेन तादृशनियमस्य सर्वत्रिकोणानुगतत्वं सिद्धम् । एवं सर्वेषां वस्तूनां नाम्नां ज्ञानानां वा स्वतो विशेषरूपाणामपि तादृशधर्मवत्वादनुगतरूपवत्त्वं सिध्यति । इत्थं च त्रिकोणादिनियमोद्दिष्टान्यनुगतरूपवन्ति त्रिकोणादीनि न तावत्तदभेद्यभेदज्ञानात्मकान्यपितु तदाद्यन्यतमव्यक्तिरूपाण्येव बोध्यानि । तेषां स्वसजातीययावद्व्यक्तिसदृशत्वादिति सर्वमवदातम् ॥

केशवशास्त्री

THE VIDVAN-MANO-RANJINI'

OR

REJOICER OF THE MIND OF THE LEARNED.

A COMMENTARY ON SAD-ÁNANDA'S VEDÁNTA-SÁRA, BY RÁMA-TÍRTHA.

(Continued from page 52.)

Moreover it has been declared: [*Objective presenta-*

वृत्तिव्याप्यत्वेति । विशिष्टशब्दादिप्रमाणवलात्तत्तद्विषयाकारधीसमुन्मेषाभिव्यक्तत्वं वृत्तिव्याप्यत्वं बाह्येन्द्रियसन्निकृष्टार्थाकारबाह्यधीपरिणा-

tion of the absolute spirit has been repudiated by the founder of the system, but subjection of the absolute spirit to a modification of the understanding is necessary for the destruction of illusion relative to that spirit.] The author next by another consentient authority establishes the fact that the absolute spirit is not externally presented.

Again, it being self-illuminated [*no light is instrumentarily employed.*] It may be argued: Absolute spirit is objectively presentable, inasmuch as it is revealed by an illuminated modification of the internal organ, or in other words, is perceived in the same way as a water-pot and the like sensible particulars;—or again it may be argued: The modification in the form of supreme spirit must have an object whereon it operates, being a presentative modification, like an immediate perception. The author proceeds to reply that for the legitimacy of the former argument unsentiency is an indispenable condition, but wanting; and for that of the latter argument the nature of an unsentient object is an indispensable condition, but wanting.

[*There is a differenee between the modification which mirrors absolute spirit, and modifications of the understanding when moulded into the form of*] *an unsentient object.* [*The intellectual modification This is a jar, moulded in the form of a jar, taking for its object a hitherto unrecognised jar, and dispelling the ignorance relative to the jar, illuminates with the light of pure intelligence appropriated to itself, the jar unsentient though it be; just as the light of a lamp irradiating a water-pot or the like hitherto in the dark, after expelling the darkness which envelops it, illumines it with its own light.*] In these words the author explains his statement, and exemplifies it. The particle *iti,* with which this passage concludes, indicates the completion of the explication of the deliverance of consciousness.

The author now proceeds to treat of hearing and the rest of the instruments to be employed till the firm establishment of a mode of consciousness consisting of the presentation above described.

[*Until the presentation*] *in this way* [*of pure intelligence in its proper essence, performance of hearing, pondering, contemplation, and meditation, being required, these also must be described.*] Thus the Vedic text After acquiring erudition, let him become as a child and after acquiring erudition and childlike nature, let him become an ascetic,—prescribes under the terms erudition, childlike nature, ascetic, the practices respectively of hearing, pondering, and contemplation. So likewise the text of the Svetâśvatara Through contemplation thereof is union, and through this repeatedly existing, finally arises cessation of the cosmical illusion,—indicates that meditation is to be performed. The author proceeds to give the definition of hearing &c. *Hearing* [*is the ascertainment of the purport of all the latter portions of the Veda relative to the real, by means of six argumenta.*] Anticipating the question what these argumenta are the author proceeds to enumerate them. *The argumenta* [*are (1) commencement and teamination; (2) inculcation; (3) novelty; (4) promised fruit; (5) eulogy of the subject; (6) illustration from analogy. Of these enunciation of the matter to be expounded in any section both at the beginning and the end thereof is called commencement and termination.* After defining the first argumentum, which is styled commencement and termination, he illustrates it by an example.

As in the Chândogya Upanishad [*Section VI. Reality one without a second the matter to be set forth in that section, is declared in the outset in the terms One only without a second, and at the end in the terms All this consists of that*

The fruit is the motive revealed in this or that text either for the knowledge or for the practice relative to spirit to be set out in such and such section. For ex-

---

मावच्छिन्नचिदंशकृतप्राकट्याश्रयत्वं फलव्याप्यत्वमिति भेदः उक्तेर्थेवृद्ध-सम्मतिमाह ।

उक्तञ्चेति । फलव्याप्यत्वाभावं सन्मत्यन्तरेण साधयति ।

स्वयंप्रकाशेति । ननु ब्रह्म फलव्याप्यं साभासान्तःकरणवृत्तिव्यङ्ग्यत्वात् प्रत्यक्षत्वाद्वा घटादिवत् यद्वा ब्रह्माकारावृत्तिः सकर्म्मिका अपरोक्षवृत्तित्वात् अपरोक्षवृतिवदित्याशङ्क्यपूर्व्वस्मिन्ननुमाने जडत्वमुपाधिरपरस्मिंस्तु जडविषयत्वमुपाधिरित्यभिप्रेत्याह ।

जडपदार्थेति । प्रतिज्ञातमर्थं सदृष्टान्तमुपपादयति ।

तथाहीत्यादिना । इतिशब्दोऽनुभववाक्यार्थनिरूपणसमाप्त्यर्थः इदानीमावृत्तिरसकृदुपदेशादिति न्यायमाश्रित्यैवंविधसाक्षात्काररूपानुभवदार्ढ्यपर्य्यन्तमनुष्ठेयं श्रवणादिसाधनजातंनिरूपयितुमारभते एवमित्यादिना तथाच श्रुतिः तस्माद् ब्राह्मणः पाण्डित्यं निर्व्विद्यबाल्येन तिष्ठासेद्बाल्यञ्च पाण्डित्यञ्च निर्विद्याथमुनिरिति पाण्डित्यबाल्यमुनिशब्दाः क्रमेण श्रवणमनननिदिध्यासनानि विदधते तथा तथा तस्याभिध्यानाद्योजना तत्त्वभावाद्भूयश्चान्ते विश्वमायानिवृत्तिरिति श्वेताश्वतरीयोमन्त्रः समाधिमप्यनुष्ठेयं सूचयति सहकार्य्यन्तरविधिपक्षेण तृतीयं तत्वतो विदध्यादिति न्यायेनायमर्थो निर्णीतः श्रवणादीनां लक्षणमाह ।

श्रवणं नामेत्यादिना । गतिसामान्यादिति न्यायमाश्रित्याशेषवेदान्तानामित्युक्तं न स्थानतोपि परस्योभयलिङ्गं सर्बत्रहीति न्यायमाश्रित्याद्वितीये वस्तुनीत्युक्तं लिङ्गानि कानीत्यपेक्षायां तानि विभजते ।

लिङ्गानित्विति । उपक्रमोपसंहाराख्यमाद्यं लिङ्गं लक्षयित्वोदाहरति ।

यथा छान्दोग्ये । इति पुनः पुनरित्यस्य भावः पौनःपुण्ये तत्रैव छान्दोग्ये षष्ठेमानान्तराविषयीकरणं आचार्य्यवान्पुरुषो वेदेति सूचितमिति शेषः ।

तदनुष्ठानस्य चेति सगुणविद्याभिप्रायेणोक्तं आचार्य्यवान् पुरुषोवेदेति साहचर्य्यादिहोदाहृतं न पुनः फलवचनन्तत्तस्य तावदिति फलवचनोदाहरणमिति द्रष्टव्यं उदाहरणान्तरं स्पष्टार्थं तथा च न्यायोवाचारम्भणश्रुतेरुपपत्तिपरत्वनिर्णयपरस्तदन्यत्वमारम्भणशब्दादिभ्य इति एवं शाखान्तरेष्वप्युपक्रमोपसंहारादिनिरूपणीयं तथाहि बृहदारण्यके तावत् आत्मेत्येवोपासीत् अत्रैह्येते सर्व्वे एकं भवन्ति इत्युपक्रमः पूर्णमद इत्युपसंहारः स एषनेति नेत्यात्मेत्यभ्यासः तन्त्वौपनिषदं पुरुषं पृच्छामीत्यपूर्व्वत्वं सूचितं अभयं वै जनक प्राप्तोऽसि ब्रह्मैवसन्ब्रह्माप्येतीत्यादि फलं तद्योयोदेवानामित्य

ample in the text The man who has a teacher knows, He must abide till he attains emancipation, there is revealed the motive for the knowledge of secondless reality, viz., the attainment of such reality.] The words *Or for practice* are employed with reference to knowledge of conditioned being. The text The man who has a teacher knows, is introduced accessorily, not as an example of a motive text; and the text, He must abide &c., is given as an illustration of a text stating a motive. Other examples may be given in illustration of the six evidences Thus in the Vṛihad-áraṇyaka Upanishad we have commencement in the words He should reflect that these are spirit only, all these become one, and termination in the words Fulness of bliss. The text It is not this, nor this is the soul, exemplifies inculcation. Novelty is indicated in the text I ask that spirit of whom the Upanishads speak. Fruit or result is given in such texts as Thou has attained to safety Janaka, and Being absolute spirit thou art become absolute spirit. The text That whosoever of the gods &c exemplifies eulogy. Illustration from analogy is instanced in the text He is as in the case of a kettle-drum. So in the Taittiríyaka we have commencement in the words He that knows absolute being attains to absolute being, and termination in the words Let him know that absolute being is bliss. He whoever he be, exemplifies inculcation. We have the indication of novelty in the text Whoso knoweth that which is hidden in a cave. He finds safety and honour, and thereupon attains to both, is a text declaratory of result. He desired &c. is a eulogy. Such texts as For who could breathe, who could live, if this heaven were not bliss, contain illustration from analogy. So again in the Muṇḍaka commencement is exemplified in the words Beyond there the path whereby that imperishable is attained, and termination in the words Absolute spirit is this immortal before us. Inculcation is found in such texts as Whereby he knows the undecaying spirit, that is truth, This imperishable, know this to be absolute spirit, and this alone, the soul. Indication of novelty is found in the passage beginning Nor with the eye is it grasped nor with the speech, and ending Determined fully by a knowledge of the latter part of the Veda. The unstained attains the highest sameness knows absolute spirit, becomes absolute spirit only, is a text indicatory of result. Like sparks from a well-kindled fire &c. is a eulogy. The passage What known, O Lord, is all this known? which asserts by cognition of one the cognition of all, is an illustration from analogy. Examples of evidences, commencement and the rest, may also obviously enough be found in the Aitareya and other branches.

Cogitation [*is thinking unintermittently upon the revealed secondless substance by means of argumentations appropriate to the Vedânta.*] The qualification By means of argumentations appropriate to the Vedânta is added in order to exclude unprofitable dialectic resultant from the speculation of merely human intelligence. So the traditional text: He who by argumentation not repugnant to the Veda and religious institutes speculates about instruction in righteousness knows righteousness, and no other knows it. Here the term *righteousness* conveys by implication also absolute spirit. The word *unintermittently* indicates the necessity of cogitation. The author proceeds to define contemplation.

[*Contemplation is*] *the homogeneous* [*flow of the understanding mirroring its object, when this object is the real besides which there is nought else, to the exclusion of the notion of body or any other thing heterogenous.*] Meditation is an enduring modification of the understanding by spirit objectified. Its distribution and definition are next given.

Meditation [*is of two kinds, discriminative and non-discriminative.*] We should remember the traditional appellation of discriminative meditation, viz. meditation fully and accurately cognised, and that of non-discriminative meditation, viz. meditation not fully and accurately cognised.

Of these [*discriminative meditation is the continuance of the modification of the understanding mould-*

द्यर्थवादः सयथा दुन्दुभेरित्याद्युपपत्तिः तथा तैत्तिरीयके ब्रह्मविदाप्नोति परमित्युपक्रमः आनन्दोब्रह्मेति व्यजानादित्युपसंहारः स यश्चायमित्यभ्यासः यो वेदनिहितं गुहायामित्यपूर्व्वतासूचनं अभयं प्रतिष्ठां विन्दते अथ सोभयङ्गतो भवतीति निफलश्रुतिः सोऽकामयतेत्याद्यर्थवादः असन्नेव स भवति. असदब्रह्मेति वेदचेत् अस्ति ब्रह्मेति चेद्वेदसन्तमेनं ततो विदुरिति कोह्येवान्यात्कः प्राण्यात् यद्येष आकाशआनन्दोनस्य दित्याद्युपपत्तिः तथा मुण्डकेच अथपरायया तदक्षरमधिगम्यते इत्याद्युपक्रमः ब्रह्मैवेदममृतं परस्मादित्युपसंहारः येनाक्षरं पुरुषं वेदसत्यं तदेतदक्षरं ब्रह्मतमेवैकं विजानीथ आत्मानमित्याद्यभ्यासः नःचक्षुषागृह्यते नापि वाचेत्यारभ्य वेदान्तविज्ञानसुनिश्चितार्था इत्यन्तेन अपूर्व्वतासूचनं निरञ्जनः परमं साम्यमुपैति.ब्रह्मवेदब्रह्मैवभवतीतिफलश्रुतिः यथा सुदीप्तात्पावकाद्विस्फुलिङ्गा इत्याद्यर्थवादः कस्मिन्नुभगवन्विज्ञाते सर्व्वमिदं विज्ञातंभवतीति एकविज्ञानेन सर्वं विज्ञानप्रतिज्ञारूपाद्युपपत्तिः ऐतरेयादिष्वपि शाखान्तरेषूपक्रमाद्यूहनीयं मननं लक्षयति ॥

मननन्त्विति । केवलं पुरुषबुद्ध्युत्प्रेक्षितशुष्कतर्कव्यावृत्त्यर्थं वेदान्तानुगुणेति विशेषणं आर्षं धर्म्मोपदेशश्च वेदशास्त्राविरोधिना यस्तर्केणानुसंधत्ते सधर्म्मं वेदनेतरइति स्मृतेः तेत्र धर्म्मशब्दो ब्रह्मणोऽप्युपलक्षणार्थः अवतरतपदं मनुस्यावश्याकत्वद्योतनार्थं निविध्यास लक्षणमाह विजातीयेति चित्तस्य ज्ञेयात्मना निश्चलावस्थानं समाधिस्तं विभज्य लक्षयति ॥

समाधिरित्यादिना । सविकल्पकः संप्रज्ञातसमाधिः निर्व्विकल्पकोऽसंप्राज्ञातसमाधिरिति सांप्रदायिकी संज्ञाद्रष्टव्या तत्रेत्युद्दिष्टसमाधिद्वयं सप्तम्यर्थः ज्ञाता ज्ञानं ज्ञेयञ्चेतियोविकल्पविभागोल्लेखस्तस्य योऽभावस्तदनपेक्षया ज्ञात्रादि विकल्पोल्लेखपूर्व्वकमिति यावत् अद्वितीयेति छेदः सविकल्पकसमाधिलक्षणार्थमुदाहरणेन प्रत्याययतिः ॥

ed into the form of the indivisible real, without merging the distinction between cogniser and cognition &c.] This means that the modification is accompanied with a regard to distinctions such as that of cogniser &c., without reference to the absence of a regard to the distinction and division of knowing subject, knowledge and object knowable. The sense of this definition of discriminative meditation is next elucidated by an example

Then [*the secondless real shines forth, though there is an appearance of duality, just as there is a recognition of the clay in an elephant formed of clay.*] As in regard to an elephant modelled in clay by a potter or other artist, the truth, that is the mere clay, shines forth, even where there is a regard to the elephantine shape in that modification of the understanding which affirms that it is an elephant, inasmuch as we are assured of the falsity of the elephantine shape; so in the modification which takes the form of absolute spirit, though the form of subject, cognition, and object be referred to, yet the truth shines forth, viz. the absolute spirit, not the distinction of subject and so forth. Anticipating the question how the absolute spirit shines forth, the author states its essential form in an example of the consentiency of the ancient teachers.

Therefore it has been said [*by competent authority: That which has vision for its essence, like ether all-pervading, supreme manifested once for all, but ungenerated, one, imperishable, unsoiled, omnipresent, without a second, that and that alone am I, for ever free; I am pure vision, consisting of no emanation, of me there is no bondage and no emancipation.*] That which has vision for its essence is that which consists of consciousness, according to the Vedic text Made of knowledge alone. Like ether, omnipresent like the soniferous element, according to the text And omnipresent. Supreme, transcending the cosmical illusion, according to the text Supreme, beyond the undecaying. Manifested once for all, wholly revealed once and once alone, according to the text manifested to him it becomes once for all. The word *but* is a metrical expletive. Ungenerated, void of birth and other modes of emanation, according to the text The all-wise is neither born, nor does it die. One, having no homogenous and heterogenous co-existing individuals, according to the text One God, in divers manners they conceive the One Existent. Imperishable, absolutely constant, according to the text Whereby he knows undecaying spirit, the true. Unsoiled, irreproachable, according to the text Without a stain. Omnipresent, pure being threading all phænomena, according to the text In which sky and earth and welkin are strung together. Which is indivisible or without duality, free from all partition within itself, according to the text Soundless, colourless, touchless &c. That and that alone am I, in conformity with revelation. Hence I am for ever free, never bound, according to the text Free he becomes free. Such is the sense of the verse above-cited.

The author proceeds to define Non-discriminative meditation,

Non-discriminative [*meditation is the continuance in absolute unity of the modification of the understanding moulded into the form of the non-dual real, with advertence to the merging of such distinctions as knowing subject and knowledge.*] He gives an illustration of continuance in absolute unity.

Then [*the non-dual real shines forth alone, without any forth-shining of the intellectual modification moulded into the form of the secondless real, just as there shines forth pure water only, when salt dissolved into the form of water no longer shines forth.*] He proceeds to evince the applicability of the illustration to the matter illustrated.

It might be objected that the definition of non-discriminative meditation is too wide, inasmuch as it will apply to the state of dreamless slumber, in which also

---

तदाम्ङ्विदिति । यथा मृद्विकारे गजे कुम्भकारादिनिर्म्मिते गजोऽयमित्यस्यां बुद्धौ गजाकारोल्लेखेऽपि मन्मात्रमेवसत्यं भासते गजाकारस्य मिथ्यात्वनिश्चयात् एवं ब्रह्माकारायांवृत्तौ ज्ञात्राद्याकारे उल्लिख्यमानेऽपि ब्रह्मैव सत्यं भासते न ज्ञात्रापि त्रिकल्प इत्यर्थः कथं तत्र ब्रह्मभासतइत्यपेक्षायां पूर्वाचार्य्य सम्मत्युदाहारणेन तत्स्वरूपमाह तदुक्तमभिनयेति अभिनयमङ्गचेष्टाविशेषं कृत्वेत्यर्थः दृशिस्वरूपं चैतन्यगतं विज्ञानघन एवेत्यादिश्रुतेः गगनोपमं सर्व्वगतं आकाशवत् सर्व्वगतश्चेति श्रुतेः परंमायातीतं अक्षरात् परतः परइत्यादिश्रुतेः सकृद्विभातं एकदैवकृत्स्नमभिव्यक्तं सकृद्विभातंवास्मैभवतीत्यादि श्रुतेः तुशब्दःपादपूरणार्थः अजं जन्मादिविकारशून्यं न जायते म्रियते वा विपश्चिदित्यादिश्रुतेः एकं सजातीयविजातीयभेदशून्यं एकोदेवः एकं सन्तं बहुधा कल्पयन्तीत्यादिश्रुतेः अक्षरं कूटस्थनित्यं येनाक्षरं पुरुषं वेद सत्यमितिश्रुतेः अलेपकं निरवद्यं निरञ्जनमिति श्रुतेः सर्व्वगतं सर्व्वानुस्यूतं सन्मात्रं यस्मिन्द्यौः पृथिवी चान्तरीक्षमोतमित्यादिश्रुतेः यदद्वयं स्वगतभेदशून्यं अशब्दमस्पर्शमरूपमित्यादिश्रुतेः तदेवचाहमस्मीति श्रुतेः अतोऽहं सततं सदैव विमुक्तो न कदाचिदपिबद्धः विमुक्तश्च विमुच्यतइति श्रुतेः इतिश्लोकार्थः निर्व्विकल्पकसमाधि लक्षयति ॥

निर्व्विकल्पकस्त्विति । अत्राप्यद्वितीयइति छेदः अतितरामेकीभावेनावस्थाने दृष्टान्तः तदा जलेति दृष्टान्ते दर्शितमर्थं दार्ष्टान्तिके योजयति ॥

अद्वितीयेति ननु सुषुप्तावपि ज्ञातृज्ञेयज्ञानभागानां लयसम्भवात्तत्र निर्विकल्पकसमाधिलक्षणमतिव्याप्नोतित्यत आह ॥

ततश्चेति । तत्र हेतुमाह ॥

उभयत्रेपि । सुषुप्तौ बुद्धेरेकत्वं नास्तिबुद्धेः करणात्मनावस्थानस्य तल्लक्षणत्वात् इह तु बुद्धिवृत्तेरद्वितीयवस्त्वाप्रकाशकारितया अवस्थानाङ्गीकारात् सुषुप्तेर्भेदोपपत्तेरित्यर्थः नापि मुक्तावतिव्याप्तिः तत्राविद्यातत्कार्य्यसंस्काराणामुत्पन्नमुच्छेदादिहपुनर्व्यूत्थानादिव्यवहारदर्शनेन तेषामनुवृत्तेरिष्टत्वात् नापिजीवन्मुक्तौप्रसङ्गः तस्यव्युत्थानदशायामपि बाधितानुवृत्तिमात्रप्रपञ्चावभासेऽपि स्वस्वरूपएवावभासाभावादिति द्रष्टव्यं उक्तनिर्विकल्पकसमाधिस्वरूपोपकारकाण्यङ्गान्याह ॥

अस्येति । तत्र यमानाह ॥

the submersion of such distinctions as that of subject object, and cognition is possible. The author therefore proceeds to say.

[There does not arise] herefrom [a suspicion that there is no difference between this non-discriminative meditation and dreamless slumber, for though there be in both these states an equal non-manifestation of the modification, yet these two states admit of distinction by the existence in the one and the non-existence in the other of such modification.] In the words *In both these states* and in what follows, the reason is assigned. In dreamless sleep the understanding is altogether absent, inasmuch as dreamless slumber is defined to be a continuance of the understanding in identity with the cause out of which it at other times emanates. In non-discriminative meditation on the other hand there is admitted to be a continuance of the modification of the understanding moulded into the form of the secondless real, and this suffices to discriminate it from dreamless slumber. Nor does this definition of dreamless slumber apply by super-extensiveness to emancipation, inasmuch as in such final liberation there is a final eradication of the cosmical illusion and of the impressions emanant therefrom; whereas they are declared in the case of non-discriminative meditation to return again, inasmuch as we observe the practical fact of resuscitation from such slumber. Nor will it apply to emancipation of spirit still embodied (*jîvan-mukti*), because in the state of re-awakening therein, while there is a shining forth of the whole universe returning after its sublation, there is at the same time a manifestation of the proper essence of spirit.

The author proceeds to enumerate the subsidiaries to non-discriminative meditation described as above.

[The subsidiaries] hereof [are (1) forbearance, (2) religious observance, (3) postures, (4) suppression of the breath, (5) restraint, (6) attention, (7) contemplation, and (8) meditation.] Of these the modes of forbearance are now enumerated.

Of these [the modes of forbearance are (1) harmlessness, (2) truthfulness, (3) honesty, (4) continence, (5) non-acceptance of gifts.] Harmlessness is the avoidance of hurt to another by speech, thought, and deed. Truthfulness is speaking in conformity to fact. Honesty or abstinence from theft is freedom from the appropriation of another property by way of taking what is not given. Continence is avoidance of impurity in its eight forms. Thus it has been said: The wise declare that impurity in its eight forms consists of recollection, mention, witnessing amorous dalliance, speaking of what should be concealed, desire, resolution, and actual commission; the opposite of this is continence, and this also admits of eight characters. Non-acceptance of gifts is the refusal of all things not subservient to the practice of meditation.

The forms of religious observance are next recounted.

[Acts of religious observance are] (1) purification (2) contentment, (3) penance, (4) study, and (5) pondering on the Lord.] Purificationis either external or internal. Therefore it has been said: Purification is proclaimed to be of two kinds, external and internal: external purification is traditionally declared to be by means of earth and water, internal purification to be the purging of the affections. Contentment is acquiescence in the failure to obtain all that we desire, and freedom from depression in such failure. Penance is non-fruition of appetites, according to the Vedic text Penance is nought else than non-fruition. By non-fruition is meant non-fruition of the appetites only. Some teach that the penance here intended is that which is defined as the highest penance, viz. concentration of the common sensory and the external senses; but we should reflect that the Châندrâyaṇa and the like penances cannot possibly be designed by the term penance, those being repugnant to meditation. Study is the muttering of the sacred monosyllable, and application to the Upanishads, according to the texts Om— thus shall ye meditate; Let him apply himself to the Upanishads. Pondering on the Lord, is adoration of

तत्रेति । वाङ्मनःकायैः परपीडावर्ज्जनमहिंसा सत्यं यथार्थभाषणं अस्तेयं अदत्तादानरूपपरस्वहरणराहित्यं ब्रह्मचर्यं अष्टाङ्गमैथुनवर्ज्जनं तथाचोक्तं स्मरणं कीर्त्तनं केलिःप्रेक्षणं गुह्यभाषणं सङ्कल्पोऽध्यवसायश्च क्रियानिर्वृत्तिरेव च एतन्मैथुनमष्टाङ्गं प्रवदन्ति मनीषिणः विपरीतं ब्रह्मचर्य्यमेतदेवाष्टलक्षणमिति अपरिग्रहः समाध्यनुष्ठानानुपयुक्तस्य वस्तुमात्रस्यासंग्रहः नियमानाह ॥

शौचेति । शौचं वाह्याभ्यन्तरलक्षणं तदुक्तं शौचन्तु द्विविधं प्रोक्तं वाह्यमाभ्यन्तरं तथा मृज्जलाभ्यां स्मृतं वाह्यं भावशुद्धिस्तथान्तरमिति सन्तोषो यदृच्छालाभे सन्तुष्टिः अलाभे चाविषादः तपः कामानशनं तयोर्नानशनात्परमिति श्रुतेः अनशनं च कामानशनमेव कश्चित्तु मनसश्चेन्द्रियाणामैकाग्र्यं परमं तप इत्याद्युक्तलक्षणं तप इत्याहुः सर्व्वथा तु नात्र चान्द्रायणादिः तपःशब्दार्थः तस्य समाधिविरोधादिति द्रष्टव्यं स्वाध्यायः प्रणवजपः उस्वापनिषदन्यावृत्तिश्च ओमित्येवं ध्यायथ आत्मानं उपनिषदमावर्त्तयेदिति श्रुतेः ईश्वरप्रणिधानं तस्य मानसैरुपचारैरभ्यर्च्चनं तं ह देवमात्मबुद्धिप्रकाशं मुमुक्षुर्वै शरणमहं प्रपद्य इति मन्त्रलिङ्गात् स्वस्तिकादीनीत्यादि पद्माभद्रवीरासनादिग्रहः रेचकः प्राणवायोः शनैर्वामनासापुटाद्दक्षिणनासापुटात् सव्यापसव्यन्यायेन वहिर्निःसरणं पूरकस्तस्य तथैवान्तः प्रवेशनं कुम्भकस्तु पूरितस्य वायोरन्तरेव निरोध इति भेदः समाधेर्ध्यानस्य भेदं द्योतयितुं विच्छिद्य विच्छिद्येत्युक्तं सुगममन्यत् एवंसाङ्गसमाधिमनुतिष्ठतो यदा-

तिवृष्ट्यनावृष्टिराष्ट्रविप्लवव्याघ्रचौरज्वराद्युपद्रवविघ्नसम्भावना भवन्ति तदा तन्निवृत्तिर्लोकावगतसाधनालम्बनेन कार्य्या यदा तु मनस्येव विघ्न प्रादुर्भवति तदा तन्निवारणोपायमुपदेष्टुकामस्तत्रात्यान् विघ्नान्निर्दिशति अस्येतिलयादीनविभज्य लक्षयति लयस्तावदिति उक्तलयादिविघ्नचतुष्टयाभावेन चित्तस्य ज्ञेये वस्तुनि यन्निश्चलत्वं तद्दृष्टान्तेन निर्विकल्पकसमाधिलक्षणमित्याह ॥

तदिति । विघ्ननिवृत्त्युपायं सम्प्रतिप्रदर्शनेनाह ॥

the Lord by mental oblations, according to the indication of the sacred verse To him indeed, the God who is the light of soul and understanding, I fly for refuge, desiring emancipation. The words *et cœtera* are meant to comprise benedictory salutations, the *Vîrâsana* posture, purgation, and the like. We should include the practice called *pûraka,* which consists in closing the right nostril and breathing out air through the left which differs from that called *kumbhaka* which consists in the internal retention of the air inhaled. [*Contemplation consists in the stream of modifications of the internal sensory being intermittently conversant about the secondless real.*] The word intermittently is inserted with the purpose of indicating the difference between contemplation and meditation.

One who practices meditation with its five subsidiaries thus described is liable to impediments arising from excessive rains, drought, disorders in the state, tigers, thieves, fever, and other oppressions, but these may be obviated by recourse to means which everybody knows. The author wishing to teach the appliances for the prevention of such impediments as arise in the internal sensory itself, points out the impediments existing there.

Of this [*non-discriminative meditation with its subsidiaries there are possible four obstacles, viz.* (1) *listlessness,* (2) *distraction,* (3) *passion,* (4) *gustation.*] After the enumeration of listlessness and the rest, their definitions are assigned.

Listlessness [*is the drowsiness of the understanding while not mirroring the indivisible real. Distraction is the understanding's mirroring anything else instead of mirroring the indivisible real.*

Passion consists in the understanding's not mirroring the indivisible reality, even in the absence of li-tlessness and distraction, through its being blinded by emotional impulses.

Gustation of bliss is the understanding's gustation of bliss discriminately, while not mirroring the indivisible reality; or else it is the enjoyment of felicity discriminately at the beginning of meditation.]

The author proceeds to state that the fixture of the understanding on the object to be known, by the absence of the four impediments, is the definition of non-discriminative meditation.

तदुक्तमित्यादिना । लयेसति संबोधयेदुत्तम्भयेत् सोत्साहं मनःकुर्य्यादिति यावत् विक्षिप्तं चित्तं धैर्य्यावलम्बनेन पुनः शमयेत् पुनर्द्वितीयवस्तुनिष्ठं कुर्य्यादित्येतत् सकषायंचित्तं विजानीयात् कलुषितं मे चित्तमिति विज्ञाय च शमयेदद्वितीयचैतन्यात्मनि निवेशयेत् पुनः शमप्राप्तं तत्र न चालयेत्तत्रैव प्रयत्नपूर्व्वकं स्थिरीकुर्य्यादित्यर्थः रसंसविकल्पकानन्दं नास्वादयेत्तदानन्दमात्रेण कृतार्थतां नमन्वीत किन्तुप्रज्ञयाविवेकख्यातिः सङ्गः सविकल्पानन्देष्वनासक्तो भवेदित्यर्थः एवं विघ्नपरिहारे सति यन्निर्विकल्पसमाध्यवस्थानं चित्तस्य तद्भगवद्वाक्योदाहरणेन दर्शयति ॥

When the understanding, free from these [*four impediments*] *immovable like the flame of a lamp where there is no wind stirring, abides as indivisible, pure consciousness, then there is said to be non-discriminative meditation.*]

The author next by the citation of consentient testimony states the method for the removal of these impediments.

Therefore it has been said : [*In listlessness he should arouse the understanding; when it is distracted he should quiet it again; when agitated by passion he should bring it to knowledge; when it has attained to quietude he should not divert it; he should not let it taste felicity; by wisdom he should become detached from the unreal.*] He should arouse, that is elevate or animate the internal sensory. When the understanding is distracted he should quiet it again by acquiring steadiness, that is, he should apply it again to the indivisible reality. When it is agitated by passion he should cause it to know, that is, he should recognise that his understanding is emotionally biassed, and again apply it to the indivisible reality. When it has attained to quietude he should not divert it, that is, he should carefully settle it on the indivisible reality. He should not let it taste felicity, means he should not suffer it to taste bliss with discrimination of subject, object, &c.; that is, he should not suppose that by such felicity alone he has overtaken his end, but he should become detached from, that is, unattached to, discriminative bliss, by wisdom, that is by the discriminative understanding. The permanent state of non-discriminative meditation which arises in the understanding, when the impediments are thus avoided, is exemplified by a sentence uttered by the Lord.

A. E. G.

यथा दीपो निवातस्थइति । एवंविधसमाध्यन्तसाधनानुष्ठानपरिपाके सति पूर्व्वोक्तप्रकारेण ब्रह्मात्मैक्यसाक्षात्कारे दृष्टीभूतेऽविद्यातत्कार्य्यात्मसर्व्वसंसारनिवृत्तौ जायमानायां काकतालीयन्यायेन यदि प्रारब्धकर्म्मक्षयात् तस्मिन् कालएव विदुषः शरीरपातस्तदा सद्य एव मुक्तिः स्यात् यदा तु ज्ञानोत्पत्तिसमये प्रारब्धकर्म्म नक्षीयते तदा तत्क्षयपर्य्यन्तं शरीरस्यावस्थानात् जीवन्नपिमुक्तसंसारो भवति तस्य लक्षणं वक्तुं प्रतिजानीते ।

अथेति । अथशब्दः साधननिरूपणानन्तर्य्यार्थः लक्षणमाह ।

जीवन्मुक्तोनामेति ब्रह्मनिष्ठत्वं वेदान्तवेद्यब्रह्मात्मनावस्थितत्वं ।

FOR SALE AT THE
MEDICAL HALL PRESS, BENARES.

The VAISESHIKA APHORISMS OF KAṆÁDA, reprinted from the "Pandit" with corrections and emendations, by A. E. GOUGH, B.A. Anglo-Sanskrit Professor, Benares College. *Price Rs.* 4-0.

PRINTED AND PUBLISHED BY THE PROPRIETORS, E. J. LAZARUS AND CO. AT THE MEDICAL HALL PRESS, BENARES

काशीविद्यासुधानिधिः

श्रीगणेशाय नमः

श्रीमद्विजयिनीदेवीपाठशालोदयोदितः । प्राच्यप्रतीच्यवाक्पूर्वापरपक्षद्वयान्वितः ॥ १ ॥
अङ्करश्मिः स्फुटयतु काशीविद्यासुधानिधिः । प्राचीनार्यजनप्रज्ञाविलासकुमुदोत्करान् ॥ २ ॥

THE PANDIT.

A Monthly Journal, of the Benares College, devoted to Sanskrit Literature.

No. 88. Benares, September 1st, 1873. Vol. VIII.

॥ चिन्तामणेः शब्दखण्डम् ॥

नन्वे(१)वं पङ्कजपदस्येवापभ्रंशानामपि शक्तिः । ततो नियमेनार्थप्रतीतेः । व्यवहाराधीनव्युत्पत्तेरविशेषात् । अन्यथा ऽसति वृत्त्यन्तरे तेभ्यो ऽर्थधीर्न स्यात् । न च लक्षणा । मुख्यार्थाबाधात् । न चापभ्रंशेन स्मारितसाधुशब्दादन्वयबोधः । साधुशब्दमजानतामपि पामराणां ततोऽर्थप्रतीतेः । तदर्थकसंस्कृतेनार्थप्रतीतेश्च । शक्त्यारोपात्ततोऽर्थप्रत्यय इति चेत् । न । मानाभावात् । व्यवहारादिना वृत्तशक्तिग्रहे बाधकाभावाच्च । न च शक्तिसाध्यं शक्त्यारोपाद्भवितुमर्हति । आरोपितादपि दहनाद्दाहापत्तेः । अथ ज्ञायमानकरणे प्रयोजकरूपवत्तया ज्ञायमानादेव फलं, बाष्पे धूमारोपाद्वह्न्यनुमितिवदिति चेत् । तर्हि (२) तद्वदेव फलस्यायथार्थत्वापत्तेः । (३) अन्यथा ऽपभ्रंशएव शक्तिः साधुशब्दएव तथेति किं न स्यात् । न च सादित्वाद्देवदत्तादिशब्दवदाधुनिका एव तत्र सङ्केता, गवादिपदे त्वनादित्वात् शक्तिरिति वाच्यम् । सजातीयप्रयोगजन्यप्रयोगत्वस्य भ्रमाद्यजन्यत्वस्य वा ऽनादित्वस्यापभ्रंशेपि सत्त्वात् । तत्तद्देशीयापभ्रंशेपि (४) संकेतयितॄणामस्मरणाच्च । न चापभ्रंशानां देशभेदेनैकार्थे बहुत्वात् संस्कृतस्यैकत्वाल्लाघवेन तत्रैव शक्तिः । (५) प्रमाणवतो गौरवस्यापीष्टत्वात् । अन्यथा नानार्थोच्छेदः, प्रतीत्यन्यथानुपपत्तिस्तुल्यैव । (६) ननूभयोः शक्तत्वे साध्वसाधुविभागाभावात् तद्व्यवहारविरोधः, "साधुभिर्भाषितव्यं, नापभ्रंशितवै न म्लेच्छितवै" इत्यादिवैदिकविधिनिषेधानुपपत्तिश्चेति चेत् । तर्हि शक्तत्वाविशेषेपि तदभियुक्तेन्द्रपाणिन्यादिप्रणीतव्याकरणोपगृहीतानामेव संस्कृतानां साधुत्वमस्तु, नह्यपभ्रंशे तैः साधुत्वं स्मर्यते । तद्विषया एव साधुभिर्भाषितव्यमित्यादिविधयः, तेषामेव धर्मोपयोगित्वं स्वभावादिव बीजस्याङ्कुरे, तस्मादपभ्रंशो ऽप्यर्थप्रत्यायकत्वाच्छक्त इति । उच्यते । (७) एकत्र शक्त्या ऽप्यन्यत्र तदारोपात्तदर्थप्रतीत्युपपत्तावेकत्रैव शक्तिर्लाघवात् । अनन्यलभ्यस्यैव शब्दार्थत्वात् । अन्यथा वृत्त्यन्तरोच्छेदः । तदाह भगवान् जैमिनिः । "अन्यायश्चा-

॥ शब्दचिन्तामणिव्याख्या रुचिदत्तीया ॥

(१) एवं, पदान्नियतोपस्थितेः शक्तिसाध्यत्वे । (२) तद्वदेवेति । निर्वह्निस्थलाभिप्रायेण । लिङ्गोपहितलैङ्गिकभानमतेन वेदम् । ननु विषयाबाधादत्र याथार्थ्यं स्यादित्यरुचेराह । (३) अन्यथेति । तथा च न शक्त्यारोप इत्यर्थः ।

(४) संकेतयितॄणामिति । स्मरणे वा देवदत्तादिशब्दवच्छक्तत्वेप्यविरोध इत्यपि बोध्यम् । (५) प्रमाणेति । शक्तिग्राहकमानस्याविशेषादिति भावः । वृत्तितद्विरहनिबन्धनएव साध्वसाधुव्यवहार इति मन्वानः शङ्कते । (६) नन्विति । (७) एकत्रे-

नेकशब्दत्व"मिति । (८) सा च शक्तिः संस्कृतएव, सर्वदेशे तस्यैकत्वात् । नापभ्रंशेषु, तेषां प्रतिदेशमेकचार्थे भिन्नभिन्नरूपाणां तावच्छक्तिकल्पने गौरवात् । पर्यायबहुतरत्वं चोभयत्रापि । (९) न च देशभेदेपि प्राकृतस्यैकरूपत्वात्तत्रैव शक्तिः । संस्कृतप्रभवतत्समदेशिभेदेन तस्याप्यनेकत्वात् । एवमेकत्र शक्त्यारोपादर्थप्रत्ययोपपत्तौ नापभ्रंशे शक्तिः । (१०) ननु म्लेच्छादीनां संस्कृतमजानतां कथं तच्छक्त्यारोपः । उच्यते । केन चिद्गौरिति शब्दे प्रयोक्तव्ये प्रमादाद् गावीशब्दे प्रयुक्ते व्युत्पन्नस्तेन गोशब्दमुन्नीय ततो गां प्रतीत्य व्यवहृतवान् । यथाहुः ।

अम्बाम्बेति यदा बालः शिक्ष्यमाणः प्रभाषते ।
अव्यक्तं तद्विदां तेन व्यक्ते भवति निर्णयः ॥

इति । पार्श्वस्थो व्युत्पित्सुर्गावीशब्दादेवायं प्रतीतवानित्यवगत्य गावीशब्दमेव (११) गोशक्तत्वेन प्रतीत्यान्येषां व्युत्पादको बभूवेति ततः प्रभृत्यपभ्रंशे शक्तत्वभ्रमः । एवं च प्रथमव्युत्पन्नस्यापभ्रंशेन स्मारितसाधुशब्देनार्थप्रत्ययः तन्मूलकश्चाननुसंहितसाधुशब्दानामपि । (१२) शक्तिमत्तया ज्ञायमानस्यैव शाब्दज्ञानहेतुत्वात् । यत्तु जनकज्ञानस्य भ्रमत्वे शाब्दज्ञानायथार्थत्वं लिङ्गभ्रमजन्यानुमितिवदिति वदन्ति । तन्न । नहि शक्तिज्ञानयथार्थत्वं शाब्दप्रमायां प्रयोजकं, (१३) मनाप्तोक्ते व्यभिचारात् । नापि जनकज्ञानभ्रमत्वेनायथार्थत्वम् । (१४) भ्रमानुव्यवसाये व्यभिचारात् । प्रमाजनकत्वं चापभ्रंशस्यावश्यकम्, शाब्दप्रमाप्रयोजकाद्योग्यतादेर्यथार्थतद्बोधाद्वा । ननु शक्तिज्ञानयथार्थत्वमपि तन्त्रं, गौरवात् । (१५) अबाधितसंसर्गज्ञानजनकपदार्थोपस्थापकत्वादित्य(१६)

ति । न चैवं नानार्थोच्छेदः । तत्र विनिगमकाभावादिति भावः । अत्र विनिगमकमस्तीत्याह । (८) सा चेति । (९) न चेति । न चोभयत्रारोपः, तस्य प्रमापूर्वकत्वात् । एतदेवाभिप्रेत्य शङ्कते । (१०) नन्विति । (११) गोशक्तत्वेनेति । ननु व्युत्पित्सोर्बालस्य गोशक्तत्वप्रमाविरहे कथं तत्त्वेन भ्रमः । कथं वा सोन्येषां पामराणां व्युत्पादकः तेषामप्युक्तन्यायेन शक्तत्वभ्रमासंभवादिति चेत् । नैवम् । नहि शक्तित्वेन शक्तिज्ञानं प्रयोजकम् । अन्यथा मीमांसकस्यातिरिक्तशक्तिज्ञानादन्यस्येश्वरसंकेतज्ञानादर्थप्रत्यय इति व्यभिचारापत्तेः । किं तु तद्धीजनकतावच्छेदकत्वेन, तच्च कस्य चिच्छक्तिः कस्य चित्संकेत इत्यन्यदेतत् । तथा च गावीशब्दस्य गोज्ञानजनकत्वज्ञानानन्तरं तदवच्छेदकरूपवानयमिति भ्रमः संभवत्येव, तस्य गोप्रत्यक्षजनकगवादावेव प्रसिद्धत्वात् । यद्वा तद्धीजनकत्वज्ञानानन्तरं ज्ञानजनकता ज्ञाप्यसंबन्धाधीनेति प्रत्यक्षादौ दर्शनात्तत्संबन्धत्वेन शक्तिज्ञानं प्रयोजकं, प्रकृते च गोज्ञानजनकताप्रयोजकसंबन्धवानयमित्यारोपः संभवत्येव । अस्यापि गव्येव प्रसिद्धेः । तदिदं वक्ष्यति । तवापि ज्ञानजनकत्वज्ञानेनैव प्रत्यक्षादिवदत्रापि संबन्धत्वेन शक्तिकल्पनादिति । ननु तथापि कथमपभ्रंशे शक्तिभ्रमः, ततोर्थप्रत्यये ऽस्मादयमर्थो बोध्य इतीश्वरेच्छाया विषयाबाधेन सत्त्वात् । तत्सत्त्वे च विषयाबाधेन शक्तिग्रहस्यापि प्रमात्वादिति चेत् । अत्र वदन्ति । तादिच्छया ईश्वरोच्चरितत्वं शक्तिः, न चापभ्रंशे तदिति तद्भ्रमः, तच्चिन्त्यम् । तदुच्चरितत्वं न तज्जन्यत्वं, अपभ्रंशेपि गतत्वात् । नापि कत्कण्ठतात्वाद्युदीरितत्वम् । आधुनिकपदाव्यापनात् । न च द्वादशेहनि पिता नाम कुर्यादिति नामत्वेन तदुच्चरितत्वमस्त्येवेति वाच्यम् । "नापभ्रंशितवै" इत्यादिनापभ्रंशत्वेन तदुच्चारणमादाय तत्रातिव्याप्तेः । हेलयो हेलय इत्यपभ्रंशे ऽलिशब्दे गतत्वाच्च । वयं तु ब्रूमः । तादृशेश्वरेच्छारूपपदपदार्थसंबन्धत्वं शक्तित्वम् । अत एव पदपदार्थयोः संबन्धो वृत्तिरिति प्रागुक्तम् । संबन्धत्वेन शक्तिकल्पनादिति वक्ष्यति च । अपभ्रंशे च तादृशेच्छासत्त्वेपि तस्याः संबन्धत्वे मानाभावः । उक्तरीत्यैव ततोर्थप्रत्ययोपपत्तेः । तथा च संबन्धत्वाभावेन शक्तिविरहात्तद्भ्रमः । यथा घटवति भूतलाभावस्वरूपयोः संबन्धत्वाभावादेव घटाभावभ्रमः । सादिमैत्रादिपदे चान्यथानुपपत्त्या संबन्धत्वं कल्प्यते । अन्यथा ऽपभ्रंशवन्निरर्थकात्तस्मात्प्रातिपदिकाधिकारीया विभक्तिर्न स्यात् । न स्याच्च यज्ञदानादौ तत्प्रयोगः । एवं लाक्षणिकेपि तस्याः संबन्धत्वाभावादेव शक्तिविरहः । वक्ष्यमाणरीत्या तत्राप्यर्थप्रत्ययोपपत्तौ तत्संबन्धत्वाकल्पनात् । न च लाक्षणिकस्याननुभावकत्वे तादृशेच्छैव तत्र नेति वाच्यम् । अन्योन्याश्रयापत्तेः । अननुभावकत्वे तादृशेच्छारूपशक्तिविरहः, ततश्चाननुभावकत्वमिति । न च शक्तिसाध्यमित्यादि दूषयति । (१२) शक्तिमत्तयेति । (१३) अनाप्तोक्तइति । वह्निना सिञ्चतीत्यादावन्वयव्यभिचारादित्यर्थः । (१४) भ्रमेति । शक्तिज्ञानस्य तज्जनकत्वमपि नेत्यपि बोध्यम् । (१५) अबाधितेति । जनकान्तं पदार्थोपस्थितिविशेषणम् । प्रमाजनकत्वमेव प्रमाजनकतावच्छेदकप्रविष्टं पर्यवस्यतीत्यनुशयमाविष्करोति । (१६) अ-

न्ये। संसर्गबाधकप्रमाविरहादित्य(१७)परे । (१८) ननु साधुत्वं न प्रतिपादकत्वम् । (१९) अपभ्रंशे ऽतिव्याप्तेः । नापि यस्य यत्रानादिप्रयोगः स तत्र साधुः, "हेलयो हेलय इति वदन्तो ऽसुराः पराबभूवु"रिति वेदे श्रवणादलिशब्दे ऽपभ्रंशे गतत्वात् । संज्ञाशब्दाव्यापनात् । लौकिकगौणला-क्षणिकयोरसाधुत्वापत्तेश्च । (२०) तथाभ्युपगमे (२१) वेदेपि तयोः साधुत्वं न स्यात् । अनादित्वं सजातीयप्रयोगपूर्वकत्वमपभ्रंशेपि नियमतस्तथात्वं च सर्गादौ स्वतन्त्रपुरुषप्रयोगे (२२) ऽव्यापकम् । भ्रमाद्यजन्यत्वमपभ्रंशेपि । ननु साधुत्वं जातिर्गत्वादिव्यापिका । न चानुपलब्धिबाधः । व्याकरणसंस्कृतश्रोत्रग्राह्यत्वात् । न च (२३) संज्ञाशब्दानामसाधुत्वापत्तिः । तत्रापि प्रकृतिप्रत्यययोरहसंभवात् । गव्यादिशब्देपि तत्संभवात्साधुत्वं स्यादिति चेत् । (२४) यत्रार्थे तथा संभवस्तत्र तथैव, गवादौ तु न तथेति तत्रासाधुत्वमिति चेत्, न । जातिरूपत्वे सप्रतियोगिकत्वानुपपत्तौ सर्वस्य सर्वत्र साधुत्वापत्तेः । ननु गोशब्दो ऽश्वे प्रयुक्तः साधुरेव, ज्ञापकस्तु न भवति, तच्छक्तत्वेनाज्ञानादिति चेत् । एवं गावीशब्दोपि कया चिद्व्युत्पत्त्या क्वचित्साधुत्वजातियो(२५)गाद्गव्यपि साधुः स्यात् । (२६) प्रतिशब्दं च भिन्नतद्विषयजातिस्वीकारे ऽननुगमः । (२७) तारत्वादेस्तु जातित्वेप्युत्कर्षरूपतया ऽवधिनिरूप्यत्वम् । नापि यज्ञप्रयोगार्हत्वं साधुत्वम्, एकमवच्छेदकं विना प्रतिशब्दमर्हत्वस्य दुर्निरूप्यत्वात् । (२८) साधुत्वेनैव यज्ञे विधानात् । चाण्डालाद्युच्चार्यमाणस्यापि साधुत्वात् । यज्ञाग्रहणेपि साधुत्वव्यवहाराच्च, नापि धर्मजनकशब्दत्वम्, (२९) अपभ्रंशे ऽपि गतत्वात् । (३०) पतितोच्चार्यमाणस्यापि साधुत्वाच्च । नापि (३१) वेदस्थशब्दत्वम्, अपभ्रंशे ऽलिशब्दे ऽपि गतत्वात् । संज्ञाशब्दे तदभावात् । (३२) 'भाषायां सदवसश्रुव' इत्यादिसाधुत्वानुशासनविरोधात् । सर्वेषां वेदस्थानां साधुत्वेन सप्रतियोगिकत्वानुपपत्तेश्च । नहि क्व चिद्विषये तद्वेदस्थं क्व चिन्नेति युज्यते, विरोधात् । नापि व्याकरणव्युत्पाद्यशब्दत्वं, (३३) संज्ञाशब्दे तदभावात् । साधुत्वेन सिद्धे व्याकरणप्रवृत्तेः साधुत्वान्वाख्यायकस्य व्याकरणशब्दवाच्यत्वात् । उच्यते । (३४) यः शब्दो यत्रेश्वरेण संकेतितः स तत्र शक्तः साधुरित्युच्यते । परेषां शब्दार्थयोः स्वाभाविकसंबन्धवदस्माकमीश्वरसंकेतस्य नियामकत्वात् । यथा या का चिदोषधी नकुलदंष्ट्रास्पृष्टा सा

न्यदति । प्रमेयं वाच्यमित्यादावव्याप्तेरनुशयादाह । (१७) अपरइति । साधुभिर्भाषितव्यमित्यत्र किं साधुत्वमित्याक्षिपति । (१८) नन्विति । पूर्वं च पङ्कजपदस्य कुमुदे साधुत्वप्रसङ्गेन तच्चिन्तेति न पौनरुक्त्यमिति ध्येयम् । नन्वलिशब्दस्य साधुत्वमेवेत्यत आह । (१९) अपभ्रंशेति । अरौ अलिशब्दस्यासाधुत्वमेवेत्यर्थः । (२०) तथेति । असाधुत्वाभ्युपगमइत्यर्थः । (२१) वेदेपीति । यजमानः प्रस्तर इत्यादौ । (२२) अव्यापकमिति । न च संसर्गान्तरप्रयोगमादायादोषः । तस्य सजातीयत्वे मानाभावात् । अन्यथा ऽपभ्रंशेपि तुल्यत्वादिति भावः । गत्वादिव्यापिकेति बहुव्रीहिः । अपभ्रंशेपि गत्वसत्त्वेपि तदभावेन तद्व्यापकत्वाभावात् । आदिपदाच्च गत्वघत्वादिव्याप्यं नानैवेति सूचितम् । अन्यथा ककारादौ तदभावप्रसङ्गात् । व्याकरणसंस्कृतश्रोत्रग्राह्यजातीयत्वेनानुगमादनुगतसाधुत्वव्यवहार इति भावः । अर्थविशेषेपभ्रंशस्यापि साधुत्वमेवेत्यये स्फुटमिति यथाश्रुतेप्यदोष इत्यन्ये । (२३) संज्ञेति । तत्र व्याकरणसंस्काराभावादिति भावः । (२४) यत्रार्थे इति । गमयतीत्यादिव्युत्पत्त्येत्यर्थः । (२५) गव्यपीति । तच्च व्यवहारविरुद्धमिति भावः । (२६) प्रतिशब्दमिति । गोप्रतिपादकशब्देषु गोसाधुत्वं जातिरित्यादिक्रमेणेत्यर्थः । न चोक्तरूपेणानुगमः तदप्रतिसंधानेप्यनुगतव्यवहारादिति भावः । ननु जातिर्यदि सप्रतियोगिका न, तदा तारत्वादिकं कथं जातिरत आह । (२७) तारत्वादेरेवेति । एतच्चाभ्युपेत्योक्तम् । वस्तुतस्तदपि नावधिनिरूप्यं किं तु सजातीयसाक्षात्कारप्रतिबन्धकतावच्छेदकजातित्वं तस्योत्कर्षत्वं तदेव तन्निरूप्यमिति ध्येयम् । (२८) साधुत्वेनैवेति । साधुभिर्भाषितव्यमित्यादिनेति शेषः । तथा चात्माश्रय इति भावः । (२९) अपभ्रंश इति । आर्त्तत्राणाद्यर्थमुच्चारित इति शेषः । अव्याप्तिमाह । (३०) पतितेति । न च जनकत्वं स्वरूपयोग्यत्वं तत्रापीति वाच्यम् । तदवच्छेदकग्रहाभावादिति भावः । (३१) वेदस्थेति । वेदस्थशब्दजातीयत्वमित्यर्थः । (३२) भाषायामिति । तथा च भाषामात्रप्रयुक्तसाधुशब्दाव्याप्तिरिति भावः । (३३) संज्ञेति । प्रकृत्याद्यूहकल्पने मानाभावादिति भावः । (३४) य इति । सप्रतियोगित्वार्थं यत्र तत्रेत्युक्तम् । ईश्वरपदं चास्मदादिसंकेतितापभ्रंशवारणार्थमेकादशे द्वादशे वाह्नि पिता नाम कुर्यादित्या-

विषं हन्ति तथा प्रतिपादकत्वाविशेषेपीश्वरसंकेतिता एव शब्दा धर्मोपयोगिनः स्वभावात्, तद्विषया एव साधुभिर्भाषितव्यमित्यादिविधयः। (३५)ईश्वरसंकेतज्ञानं च व्यवहारादुपमानात् प्रसिद्धार्थपदसामानाधिकरण्यादाप्तोपदेशाद्यववराहेन्द्रादिशब्देषु वाक्यशेषात्कोशात्तदभियुक्तेन्द्रपाणिन्यादिप्रणीतशब्दानुशासनाच्च तेषां साध्वसाधुविभाग एवाधिकारात्। तदुक्तं, तत्र तत्त्वमभियोगात् स्यादिति।

अभियुक्ताश्च ये यत्र यन्निबद्धप्रयोजनाः।
तत्रत्यगुणदोषाणां ज्ञाने त्वाधिकृता मताः॥

इति। न च साधुत्वे सिद्धे शब्दानुशासनं तस्मिंश्च सति तद्धीरित्यन्योन्याश्रयः। पूर्वपूर्वशब्दान्वाख्यानेन साधुत्वमवगम्योत्तरानुशासनप्रवृत्तेः। सर्गादौ भगवत एव तत्प्रणीतव्याकरणाद्वा साधुत्वनिश्चयेनोत्तरव्याकरणप्रवृत्तेः। विश्रामविश्रमशब्दयोश्च साधुत्वे पाणिनिचन्द्रगोमिव्याकरणविरोधे वैश्रमेर्विकल्प इष्यतइति महाभाष्यकारवचनादुभयमपि साधु। ननु मैत्रादिशब्दानामीश्वरसंकेतस्याभावादसाधुत्वे यज्ञादौ न प्रयोगः स्यादिति चेत्। न। द्वादशे ऽहनि पिता नाम कुर्यादित्यनेन सामान्यतस्तेषामीश्वरसंकेतविषयत्वात्। ननु वासुदेवशब्दस्य वसुदेवापत्ये व्याकरणेन व्युत्पादनात्तत्रैव साधुत्वं, न चाधुनिकसंकेतविषये। अथ तत्र प्रकृतिप्रत्ययविभागपरिकल्पना कर्तव्या, तर्हि गाव्यादिशब्देपि संभवतीति तस्यापि साधुत्वं स्यादिति चेत्, न। द्वादशे ऽहनि पिता नाम कुर्यादिति सामान्यतस्तस्येश्वरसंकेतितत्वेन तस्य साधुत्वनिश्चया(३६)द्व्याकरणस्य तद्विशेषविषयत्वमस्तु, न तु गावीशब्दे तथा। अथ (३७) शास्त्रकारसंकेतितशब्दादश्वादिषु संकेतितगवादिशब्दाद्वा कथमर्थप्रत्ययः, शक्ति(३८)तदारोपवृत्त्यन्तराणामभावादिति चेत्, येन शब्देनोपस्थितेर्थे गवादिशब्दसंकेतग्रहस्तस्मादेव गवादिपदेन स्मारितादर्थप्रत्ययाच्चेष्टास्मारितपदादिवेति संप्रदायः॥

अत्र वदन्ति। ने(३९)श्वरसंकेतितत्वं साधुत्वं, तस्य निष्प्रतियोगिकत्वेन सर्वस्य सर्वत्र साधुत्वापत्तेः। नापि यः शब्दो यत्रेश्वरेण संकेतितः स तत्र साधुः। गौणलाक्षणिकयोरसाधुत्वापत्तेः। केवलयोः प्रकृतिप्रत्यययोः बाधतिग्रामगाम इत्यादेश्च साधुत्वापत्तेः। बाधतीत्यादौ समुदायस्यासंकेतितत्वादसाधुत्वे बाधतइत्यपि साधुर्न स्यात्, प्रकृतिप्रत्यययोः प्रत्येकं संकेतात्। अन्वयस्य प्रत्येकशक्तिलभ्यत्वात्। प्रत्युत प्रकृतिप्रत्ययसमुदायो न साधुः स्यात्, समुदायस्यासंकेतितत्वात्। ईश्वरसंकेतमज्ञात्वापि व्याकरणव्युत्पाद्यत्वमवधार्य साधुत्वव्यवहाराच्च। (४०) शक्तत्वं साधुत्वमित्यपि न, (४१) ईश्वरसंकेतोक्तदोषग्रासात्॥

अत्रोच्यते। (४२) व्याकरणव्युत्पाद्यत्वं साधुत्वं, यः शब्दो यस्मिन्नर्थे व्याकरणव्युत्पादितः स तत्र साधुः। अत एव गावीशब्दो व्याकरणोक्तव्युत्पत्त्या यमर्थं प्रतिपाद-

---

दिना सामान्यतः संकेतान्न चैत्रादिशब्दाव्याप्तिरित्ययं स्फुटम्। यत्र च नामद्वयमधिकं कृतं तत्र प्राथमिकएव तत्संकेतः। नाम कुर्यादित्येकवचनस्वरसात्। न च हविरुभयत्ववदत्राप्येकत्वमविवक्षितमिति वाच्यम्। हविर्विधायकवाक्यानुसारेण तत्र द्वित्वस्याविवक्षणात्। विनिगमकाभावात्सर्वत्रैवेश्वरसंकेत इत्यप्याहुः। (३५) ईश्वरेति। तदुक्तं,

"शक्तिग्रहं व्याकरणोपमान-
कोशाप्तवाक्याद्व्यवहारतश्च।
वाक्यस्य शेषाद्विवृतेर्वदन्ति
सान्निध्यतः सिद्धपदस्य वृद्धाः"

इति कोशादेराप्तोपदेशत्वेपि गोवृषन्यायात् पृथगुपन्यासः। (३६) व्याकरणस्येति। वासुदेवशब्दस्य सार्थकतया प्रातिपदिकाधिकारीयविभक्तिविधानादिति भावः। (३७) शास्त्रकारेति। नदीवृद्ध्यादिशब्दादीत्यर्थः। (३८) तदारोपेति। विशेषदर्शनादिति भावः। ननु पदसाधुत्वमिदं तथा च बाधतइत्यादावव्याप्तावपि न दोषः। न च बाधतीत्यादावतिव्याप्तिः। प्रकृत्यादेः प्रत्येकं साधुत्वात्समुदाये शक्त्यभावादिति यदि ब्रूयात्तदाह। (३९) ईश्वरेति। प्रकृत्यादेः प्रत्येकं साधुत्वाभ्युपगमे यज्ञादौ प्रयोगापत्तिरित्यपि बोध्यम्। मीमांसकमतमाह। (४०) शक्तत्वमिति। न च सर्वापभ्रंशस्य नामत्वेन शक्तत्वसंभवात्साधुभिर्भाषितव्यमित्यादौ व्यावर्त्याप्रसिद्धिरिति वाच्यम्। यस्य यत्र शक्तिस्तत्र तत्साध्वित्यत्र तात्पर्यात्। (४१) ईश्वरेति। गौणाद्यव्याप्तेरित्यर्थः। न च वृत्तिमत्त्वं तत्त्वम्। साधुत्वसामान्यस्यैव लक्षणत्वेन वाक्याव्याप्तेरिति। अत एव वाक्यसाधारणमेव सिद्धान्तलक्षणमाह। (४२) व्याकरणेति। घटः कर्मत्वमित्यादौ साधुत्वमिष्टमेव। आकाङ्क्षादिगर्भं च पूर्वोक्तलक्षणं मतान्त-

यति तत्र साधुरसाधुरन्यत्र । (४३) नाम्नामप्युणादयो बहुलमिति व्युत्पादनात् । (४४) केवलप्रकृतिप्रत्यययोबोधति ग्रामगाम इत्यादेश्च न व्युत्पाद्यत्वं, तत्प्रयोगस्यानभिधानाद् निषेधाच्च । (४५) गौणलाक्षणिकयोश्च यथा प्रतिपादकत्वं तद्व्युत्पादनमपि तत्र तथेति तयोरपि साधुत्वं, तस्माच्छक्तत्वमीश्वरसंकेतितत्वं वा ऽज्ञात्वापि साधुत्वव्यवहाराज् ज्ञात्वा ऽप्यव्यवहाराच्च न तत्साधुत्वं, किं तु व्याकरणपरिगृहीतत्वतदभावाभ्यामेव प्रामाणिकानां साध्वसाधुव्यवहारात्तावेव ते । न च साधु(४६)शब्दव्युत्पादकत्वमेव व्याकरणत्वमित्यात्माश्रयः । शब्दगुणदोषविद्भिरभियुक्तैः प्रकृतिप्रत्ययादिकल्पनया शब्दान्वाख्यायकवाक्यस्य व्याकरणत्वात् । न च साधुत्वे सिद्धे व्याकरणव्युत्पाद्यत्वं तद्व्युत्पाद्यत्वे साधुत्वमित्यन्योन्याश्रयः । पूर्वपूर्वव्याकरणतः साधुत्वमवगम्योत्तरोत्तरव्याकरणेन व्युत्पादनमित्युक्तत्वात् । (४७) ननु तद्धीजनकतावच्छेदिकायाः (४८) शक्तेस्तद्धीजनकताविषयकेश्वरसंकेतस्य वा ज्ञानादर्थप्रत्यय इत्यावश्यकत्वात् लाघवात्तद्धीजनकत्वज्ञानमेवार्थप्रतीतौ हेतुरस्तु, किं शक्तेरीश्वरसंकेतस्य वा ज्ञानेन । (४९) अन्यथा मीमांसकस्य शक्तिज्ञानादर्थप्रत्ययो नैयायिकस्येश्वरसंकेतज्ञानादिति व्यभिचारेणैकस्यापि कारणता न स्यादिति । (५०) अत एव लौकिकानां शक्तीश्वरसंकेताज्ञानेपि वृद्धव्यवहारादर्थज्ञाने शब्दस्य जनकत्वमवधार्याग्रे शब्दादर्थप्रत्ययः । न चैवं लक्षणोच्छेदे गङ्गापदाद्विलम्बितार्थधीर्न स्यादिति वाच्यम् । (५१) लाक्षणिकस्याननुभावकत्वात् । (५२) तथात्वेपि तीरज्ञानजनकत्वेन ज्ञातस्य न तीरज्ञापकत्वं, किं तु प्रवाहज्ञानजनकत्वेन, लाघवात् । अथ ज्ञानजनकता ज्ञाप्यसंबन्धाधीना, प्रत्यक्षादौ तथा दर्शनादिति संबन्धत्वेन शक्तिसंकेतयोरन्यतरसिद्धिरिति चेत् । न । तद्धीजनकत्वेन (५३) ज्ञातत्वस्यैव संबन्धत्वात् । न च तद्धीजनकत्वमेव न गृह्यते संबन्धज्ञानं विनेति वाच्यम् । तत्रापि ज्ञानजनकत्वज्ञानेनैव प्रत्यक्षादिवदत्रापि संबन्धत्वेन शक्तिकल्पनात् । अन्यथा ऽन्योन्याश्रयः, संबन्धज्ञाने सति ज्ञानजनकत्वज्ञानं तस्मिन्सति संबन्धज्ञानात् । अथाऽर्थतद्धीजनकत्वज्ञानं यत्र भवति तत्र तत्पूर्वं संबन्धोस्त्येवेति चेत् । अस्त्येव । पूर्वपूर्वेषां तद्धीजनकत्वेन ज्ञातत्वस्य पूर्वमपि सत्त्वात् । (५४) एतावता शक्तिः संकेतो वा संबन्धोस्तु, तथात्वेपि तद्बोधस्य नार्थप्रत्यायकत्वं, गौरवात् । किं तु तद्विषयधीजनकत्वज्ञानस्यैव । (५५) एवं च तद्धीजनकत्वेन ज्ञातं यत्पदं यदनुभवं जनयति तस्यैव तत्र शक्तत्वं, न तु शक्तिरीश्वरसंकेतो वेति । उच्यते । (५६) देवदत्तादिपदादर्थबुद्धौ संकेतज्ञानस्य कारणत्वावधारणादन्यत्रापि तत्कल्प-

---

रेण बोध्यम् । मैत्रादिपदाव्याप्तिमाशङ्क्याह । (४३) नाम्नामपीति । एवं च विभक्तिशून्यस्यापि यत्रादौ प्रयोगमाशङ्क्याह । (४४) केवलेति । एवं च यद्यपि वाक्यसाधुत्वमात्रमेव पर्यवस्यति तथापि सुबन्तादिमात्रस्य पदत्वाभ्युपगमादुभयसाधारण्यमुक्तं बोध्यम् । (४५) गौणेति । यद्यपि गङ्गायामित्यादिपदं न तीरे व्याकरणेन व्युत्पादितं तथाप्यर्थवतः सुपो विधानादर्थवत्त्वेन सामान्यतस्तत्रापि तात्पर्यम् । कल्पितव्याकरणातिव्याप्तेराह । (४६) शब्देति । न च व्याकरणैकदेशेतिव्याप्तिः । तस्यापि व्याकरणत्वात् । सिंहावलोकनन्यायेन तटस्थः शङ्कते । (४७) नन्विति । (४८) शक्तेरिति । स्वाभाविकसंबन्धरूपाया इत्यर्थः । (४९) अन्यथेति । नन्वेवमिष्टसाधनताज्ञानमपि प्रवर्त्तकं न स्यादिति चेत् भ्रान्तोसि । नहि मीमांसकस्य तत्सामग्रीवैकल्यमेव, किं तु तत्प्रवर्त्तकतायामनभ्युपगममात्रम् । अत्र च शक्तिसंकेतयोरन्योन्यस्य बाधात्तज्ज्ञानासंभवेन व्यभिचारादिति । एतदपि शक्तित्वादिना तज्ज्ञानहेतुत्वमभ्युपेत्य । संबन्धत्वादिना तज्ज्ञानहेतुत्वपक्षे दोषाभावादिति । एतदभिप्रायेणैवाह । (५०) अत एवेति । (५१) लाक्षणिकस्येति । तथा च न तद्धीजनकत्वं तस्येति न सामग्रीतौल्यमिति विलम्ब इत्यर्थः । ननु शक्तत्वेनानुभावकत्वाभ्युपगमे तदेवासिद्धमित्यत आह । (५२) तथात्वेपीति । शक्तिस्थानीयतद्धीजनकत्वज्ञानात्पुरोपस्थितौ ज्ञाप्यसंबन्धेन तीरधोरन्यथासिद्धेति तुल्यो विलम्ब इत्यर्थः । (५३) ज्ञातत्वस्येति । ननु ज्ञातत्वं ज्ञानं तच्चास्माकमसंभवात्सर्गादावीश्वरस्यैव वाच्यमिति ईश्वरेच्छातौल्यमिति चेत् । न, तद्धीजनकत्वज्ञानस्योपस्थितत्वेन तत्रैव संबन्धत्वकल्पनात् । यद्वा, एतदस्वरसादेवाह । (५४) एतावतापीति । (५५) एवं चेति । न चैवमपभ्रंशे शक्त्यापत्तिः, इष्टत्वादिति भावः । (५६) देवदत्तादिपदादिति । ननु गवादिपदे संकेतकल्पनस्य मानान्तरस्याभावाद्देवदत्तादिपदे संकेतज्ञानस्य हेतुत्वं यावन्नावधार्यते

नात्। नह्यस्माच्छब्दादयमर्थो बोद्धव्य इति यस्तत्र संकेतस्तद्बोधं विना ततस्तदर्थप्रत्ययः, संकेतज्ञानात्पूर्वं तद्धीजनकत्वस्य (५७) तद्ग्रहस्य वा ऽसंभवात्। सादिपदे तथा। अनादिपदे त्वर्थप्रत्ययस्यान्यथापि भावान्न तत्कल्पनेति चेत्। न। पदत्वस्यैव प्रयोजकत्वे संभवति तत्र विशेषणे गौरवात्। "संकेत एव मुख्या वृत्तिः, (५८) तात्पर्यनिर्वाहकत्वादन्वयप्रतियोग्युपस्थापकत्वाच्च। (५९) लक्षणा च वृत्त्यन्तरं, (६०) यत्र वाच्यार्थान्वयानुपपत्त्या वाच्यसंबन्धोपस्थिते वाक्यार्थान्वयः। यथा गङ्गायां घोष इत्यत्र गङ्गापदस्य तीरे। तदुच्यते॥

तावत्तद्धीजनकत्वज्ञानादेव गवादिपदादर्थधीरिति व्यभिचारेण संकेतज्ञानं न हेतुः। किं तु तद्धीजनकत्वज्ञानमेव। न च देवदत्तादिपदे तस्यापि व्यभिचार इति वाच्यम्। अस्मादयमर्थो बोद्धव्य इति संकेतज्ञाने तत्पदे तद्धीजनकत्ववैशिष्ट्यस्यावश्यं भानात्। न चैतदर्थज्ञानमेव तच्छब्दजन्यत्वेनेच्छाविषय इति ज्ञाने कथं तज्ज्ञानमिति वाच्यम्। तृतीयार्थप्रकारत्वभाने तद्वैशिष्ट्यभानस्यावश्यकत्वात्। स्वातन्त्र्येण तु तद्वैशिष्ट्यं न भातमित्यन्यदेतद् इति चेत्। अत्र ब्रूमः। स्वातन्त्र्येण तद्धीजनकत्ववैशिष्ट्यावगाहिज्ञानस्यैव परेण हेतुतया स्वीकारात्। अन्यथा इदं तद्धीजनकमिति विशेषदर्शनेपि अस्मादयमर्थो बुद्ध एतदर्थज्ञानमेतच्छब्दजन्यत्वेन ज्ञानविषय इति ज्ञानेपि कथं चिद्वैशिष्ट्यज्ञानात्ततस्तद्बुद्ध्यापत्तिः। यदि च न तद्भानं पारतन्त्र्येण वा तद्भानं तदा प्रकृतेपि तुल्यम्। तस्मादिदं तद्धीजनकमित्याकारं ज्ञानं तद्धेतुरित्येव वाच्यम्। तच्च देवदत्तादिपदे व्यभिचार्येव। तदिदमाह। (५७) तद्ग्रहस्य वा संभवादिति। न च संकेतग्रहस्यापि व्यभिचारः। संकेतत्वेन तज्ज्ञानहेतुत्वस्यानभ्युपगमात्तेन रूपेण व्यभिचारेप्यदोषात्। तद्धीजनकतावच्छेदकत्वादिना च तज्ज्ञानस्य पूर्वमपि संभवेन तेन रूपेण व्यभिचाराभावात्। अन्यथा लाघवावतारपूर्वंभेदाग्रहादेव प्रवृत्तिर्जातेति व्यभिचाराद्विशिष्टज्ञानं तद्धेतुर्न स्यात्। यदि च लाघवात्तद्धेतुत्वे निश्चिते पूर्वमपितत्प्रवृत्तिरभूदिति कल्पनाच्च व्यभिचारावकाशस्तदा देवदत्तादिपदे तद्धेतुत्वनिर्णयात्पूर्वमपि तद्धीजनकतावच्छेदकत्वादिना संकेतज्ञानादेव तद्धीरभूदिति कल्पनाच्च तथेति तुल्यम्। तदिदमाहान्यत्रापि तत्कल्पनादिति। इदं तु चिन्त्यम्। देवदत्तादिपदे यथा न तद्धीजनकत्वज्ञानं तथा तद्धीजनकत्वावच्छेदकत्वादिप्रकारकज्ञानमपीत्यनुभवसिद्धं तज्ज्ञानेनैव तदवच्छेदकतया तन्निर्वाहकसंबन्धत्वेन वा तत्कल्पनात्। किं तु विशेषप्रकारकसंकेतज्ञानादेव ततोर्थप्रत्ययः। तदिदमाह। नह्यस्माच्छब्दादयमर्थो बोध्यतइति यस्तत्र संकेतस्तद्बोधं विना ततस्तदर्थप्रत्यय इति, तथा च तादृशसंकेतज्ञानस्य व्यभिचारो दुरुद्धार एव। गवादिपदे व्यवहारकाले तज्ज्ञानासंभवात्। तदिदमुक्तम्। लौकिकानां शक्तीश्वरसंकेतज्ञानेपि वृद्धव्यवहारादर्थज्ञाने शब्दजनकत्वमवधार्योंपि शब्दादर्थप्रत्यय इति। किं चैवमीश्वरेच्छारूपसङ्केतज्ञानादेव शाब्दबोध इति सिद्धान्तो व्याहन्येत। न च सङ्केतज्ञानत्वेन तद्धेतुत्वं, तच्चाधुनिकसङ्केतसाधारणमिति वाच्यम्। गवादावाधुनिकाश्वादिपदसङ्केतस्यापि शक्तित्वापत्तेः। न चेष्टापत्तिः, कथमन्यथा शास्त्रकारसङ्केतितनदीवृद्ध्यादिपदानां प्रातिपदिकसंज्ञा स्यादिति वाच्यम्। गवादौ गाव्यादिपदस्याधुनिकसङ्केतसंभवेन शक्ततया साधुत्वापत्तेः। तथा च साध्वसाधुव्यवहारोच्छेदः। अत एव चेष्टास्मारितपदादिव ततो ऽर्थप्रत्यय इत्युक्तम्। एवं च प्रातिपदिकसंज्ञाविरहे ऽपि न क्षतिः। लक्षणया वा तथात्वम्। न च सादिपदेपीश्वरेच्छैव सङ्केत,स्तज्ज्ञानादेव वार्थप्रत्यय इति वाच्यम्। आधुनिकसङ्केताज्ञाने ततो ऽर्थप्रत्ययानुदयात्तज्ज्ञाने चेश्वरेच्छाज्ञानं विनापि तदुदयाच्च। किं च तज्ज्ञानात्ततोर्थप्रत्यये नियतपदविषया भगवदिच्छा न निर्वहति, तत्पूर्वं तस्याः साधारणत्वात्। न चाधुनिकसङ्केतज्ञानादये यतो यदर्थधीस्तद्विषया प्रागपि तदिच्छा, तस्याश्चानागतविषयत्वादिति वाच्यम्। तर्हि तादृशतदिच्छायामाधुनिकसङ्केतज्ञानमुपजीव्यमिति तद्धेतुत्वधाव्यात्। तस्मात्सादिपदे श्रोतुराधुनिकसङ्केतज्ञानमनादिपदे च तद्धीजनकत्वज्ञानं विशेषसामग्री, सामान्यसामग्री च योग्यताज्ञानमित्येवास्तु। न च गौरवं, प्रामाणिकत्वात्। न च तद्धीजनकत्वावच्छेदकत्वादिना ईश्वरसङ्केतज्ञानमेव तत्र विशेषसामग्र्यस्त्विति वाच्यम्। गौरवात्। न च सादिपदक्लृप्तत्वात्तथेति वाच्यम्। तेन रूपेणाकल्पनादिति। ननु तद्धीजनकत्वं न फलोपधानं, प्रथमं दुर्निरूपत्वात्, किं तु स्वरूपयोग्यतावच्छेदकं सङ्केतएव सादिपदे क्लृप्तत्वादिति वाच्यम्। तथापि ज्ञानहेतुत्वे मानाभावाद् गौरवाच्च। न चावच्छेदकाग्रहे तदेव दुर्ग्रहम्। अवच्छेदकग्रहस्य तृणारणिमणिवद्भावात्। तद्विषयत्वेन तथाप्यहेतुत्वादिति। पूर्वमित्युपलक्षणं, सङ्केतज्ञानेपि तद्विषयत्वासंभवादित्यपि बोध्यम्। (५८) तात्पर्येति। साक्षादितिशेषः। ननु मुख्येति व्यर्थ,मव्यावर्तकत्वादित्यत आह। (५९) लक्षणा चेति। लक्षणास्वरूपमाह। (६०) यत्रेति। गौणी तु सादृश्याद्यात्मकशक्यसंबन्धरूपतया लक्षणा विशेष एवेति न तत्रातिप्रसङ्गः, एवं चाये तद्व्यावृत्तं लक्षणं मतान्तरेण बोध्यम्। एवं च लक्षितलक्षणापि लक्षणैव,

(६१) वाच्यस्यार्थस्य वाक्यार्थे संबन्धानुपपत्तितः।
तत्संबन्धवशप्राप्तस्यान्वयाल्लक्षणोच्यते ॥

इति। (६२) अथ तीरे शक्तिरेव शक्तिग्राहकव्यवहारस्य मुख्यलक्ष्यसाधारणत्वात्। (६३) पदानां संभूयवाच्यार्थान्वयबोधकत्वव्युत्पत्तेः (६४) पदजन्योपस्थितेः शक्तिसाध्यत्वात्। अन्यथा न तत्र शाब्दत्वं तात्पर्यं वा। तयोः शक्यनियतत्वात्। किं च तीरे यदि तात्पर्यमवधृतं तदा तन्निर्वाहकत्वेन शक्तिरेव कल्प्या, क्लृप्तत्वादक्षादिपदवन्नानार्थतैव युक्ता, न त्वक्लृप्तवृत्त्यन्तरं कल्प्यतइति। उच्यते। गङ्गादिपदस्य लक्षणीयतीरादिसहस्रेषु प्रत्येकं शक्तिकल्पनं तद्ग्रहार्थं लक्षणीयेषु प्रत्येकं वृद्धव्यवहारान्तरापेक्षा स्यात् तथा च गौरवमननुभवश्च। (६५) लक्षणा तु शक्यसंबन्धरूपा एका लक्षणीयविषयवृद्धव्यवहारान्तरापेक्षा चेति लाघवात्सैव युक्ता। (६६) न च गौरवमपि न्याय्यं, प्रामाणिकत्वात्। (६७) लक्ष्यत्वाभिमतान्वयबोधस्य शक्तिं तद्ग्रहं वा विना ऽनुपपत्तेः। लक्षणायाः क्वापि कारणत्वाग्रहादिति वाच्यम्। शक्तिं विनापि तीरान्वयबोधोपपत्तेः। तथाहि, व्युत्पन्नो निरूपिताप्रभावस्य गङ्गायां घोषः प्रतिवसतीति वाक्यं श्रुत्वा विमृशति, (६८) इदं प्रमाणमाप्तोक्तत्वात् संभवति चेदं तथा, यथा वस्त्रेण पिधेहीत्यत्र कर्मतापन्ने द्वारे (६९) ऽध्याहृते योग्ये इतरपदैः स्वार्थान्वयो बोध्यते, (७०) तथा शक्त्या गङ्गापदस्मारितमुख्यार्थस्मारिते तीरे योग्याकाङ्क्षित इतरपदैः स्वार्थान्वयबोधो ऽपि संभवति, (७१) ततो मुख्यार्थस्मारिते तीरे घोषादिपदैः स्वार्थान्वयबुद्धिस्तस्यो-

---

लक्ष्यभ्रमरपदघटितपरम्परासंबन्धेन द्विरेफपदस्य मधुपार्थोपस्थापकत्वात्। शक्यसंबन्धमात्रस्यैव लक्षणात्वात्। न च लक्ष्यपदादेव तदुपस्थितिः, द्विरेफपदसमभिव्याहृतविभक्त्यर्थस्य तत्रानन्वयप्रसङ्गात्। (६१) वाच्यस्येति। वाक्यार्थे संबन्धानुपपत्तिर्विधेयार्थे ऽन्वयानुपपत्तिरित्याहुः। तच्चिन्त्यम्। लिङादिलक्षणायां तदभावात्। न च न विधौ परः शब्दार्थः। सुब्विभक्तिवदत्रापि लक्षणायां बाधकाभावेन तत्प्रवादस्याप्रामाणिकत्वात्। तथा च वाक्यार्थपदं तात्पर्यविषयपरं बोध्यम्। तटस्थः शङ्कते। (६२) अथेति। हेत्वन्तरमाह। (६३) पदानामिति। लाक्षणिकत्वेनाननुभावकतया तद्भङ्ग इति भावः। हेत्वन्तरमाह। (६४) पदेति। शाब्दबोधानुकूलपदजन्योपस्थितेरित्यर्थः। अत्र चकारः पूरणीय इत्याहुः। (६५) लक्षणा त्विति। ननु शक्तिरपीश्वरेच्छारूपतया क्लृप्तैका च। न च तीरादिसंबन्धिभेदात्तद्भेदः। लक्षणायामपि तुल्यत्वात्। पूरप्रतियोगिकतीरादिसंबन्धस्य स्वरूपतोऽपि नानात्वाच्च। शक्यसंबन्धत्वेनानुगमे शक्तित्वेनानुगमस्यापि तुल्यत्वात्। एतेन शक्यसंबन्धस्तस्य संबन्धिस्मारकत्वं च न कल्प्यं, क्लृप्तत्वात् तज्जन्यस्मृतेः शाब्दबोधानुकूलत्वं धर्ममात्रं कल्प्यते, तत्तु शक्तिरूपधर्मिकल्पनमिति निरस्तम्। ईश्वरेच्छाया अपि क्लृप्तत्वात्। न चास्मादयमर्थो बोद्धव्य इत्याकारा सा शक्तिः, तादृशी चाक्लृप्तैवेति वाच्यम्। गङ्गापदात्तीरान्वयबोधे सर्वविषयतया तस्यास्तादृशत्वध्रौव्यात्। न च लाक्षणिकस्याननुभावकतया न तथात्वमिति वाच्यम्। अन्योन्याश्रयात्। अननुभावकत्वे शक्त्यभावस्तस्मिंश्चाननुभावकत्वमिति। अत्र ब्रूमः। अपभ्रंशे शक्तिभ्रमानुरोधेन तादृशेच्छामात्रं न शक्तिः किं तु संबन्धत्वगर्भा प्रागुक्ता, तथा च तस्यास्तत्तदनन्तरं तीरादिना संबन्धत्वकल्पनं, तज्जन्यस्मृतेः शाब्दबोधानुकूलत्वकल्पनं चेति गौरवम्। प्रकृते च क्लृप्तसंबन्धस्य तदनुकूलत्वमात्रकल्पनमिति। किं च वक्ष्यमाणरीत्या ऽध्याहृतवदितरपदैस्तादृशानुभवोपपत्तौ तस्यां तादृशाकारत्वमक्लृप्तमेव कल्प्यमित्यपि गौरवम्। यदि च नान्यथा तदुपपत्तिस्तदा प्रामाणिकतया गौरवं परिभूय शक्तिः स्यादेव। अत एव तदेवाशङ्क्य निराकरोति। (६६) न चेति। प्रामाणिकत्वमेवाह। (६७) लक्ष्यत्वेति। (६८) इदं प्रमाणमिति। ततश्च संभूय विशिष्टे कार्य्यानुभावकत्वमित्यपि बोध्यम्। (६९) अध्याहृतमिति। एतच्चार्थाध्याहारमतमाश्रित्योक्तम्। वस्तुतः शब्दाध्याहारेऽपि तदुपपादके शब्दत्वेनाक्षेपात्। तत्त्वं च शक्तलाक्षणिकसाधारणमिति शक्तत्वेनानिश्चयात्तस्याननुभावकतयेतरपदैरेवान्वयानुभव इति भावः। (७०) तथेति। शक्तिप्रयोज्यपदार्थोपस्थितित्वेनैव प्रयोजकं न तु शक्तिजन्यत्वेन, अनन्यथासिद्धत्वांशप्रवेशे गौरवादिति भावः। अर्थस्मारकत्वपक्षे चान्वयप्रतियोग्यस्मारकतया निर्व्यापारत्वेन लाक्षणिकपदं नानुभवकारणमिति सूचितम्। (७१) तत इति। पूर्वोक्तविमर्शानन्तरमित्यर्थः। ननु विमर्शस्य कथमपेक्षा, संबन्धिदर्शनजन्यायाः स्मृतेस्तदनपेक्षत्वात्। स्मृतपदार्थान्वयानुभवस्यापि योग्यताज्ञानसहकारेणोपपत्तौ तदनपेक्षत्वात्। न चार्थजन्यस्मृतेरन्वयबोधानुकूलत्वकल्पनायां तदपेक्षा। तद्बोधस्यान्वयबोधानङ्गत्वात्। न च योग्यतादिप्रतिसंधानएव तदपेक्षा। तस्य प्रागेव जातत्वात्। तदिदमाह। योग्याकाङ्क्षितेति। न च तात्पर्यज्ञाने तदुपयोगः। तदनङ्गत्वाभ्युपगमस्याग्रे स्फुटत्वात्। तथा च स्मृतित्यादिप्रसंधानात्मकविमर्शस्य कथमुपयोग इति

त्पद्यते । एवं च तीरान्वितवाक्यार्थबुद्धि(१२)स्तीरप्रतिबद्धवृद्धव्यवहारादिदर्शनं विनैव जायते । पदानां स्मृतयोग्यान्वितस्वार्थप्रतिपादने ऽस्य प्रागेव व्युत्पन्नत्वात् । एवं च तीरस्मृत्यनुभवयोः शक्यसंबन्धज्ञानादेवोपपत्तेर्न शक्तिः । (१३) स्वार्थसंबन्ध एव च लक्षणा । पश्चात्परम्परया गङ्गासंबन्धितीरप्रतिपत्तये ऽनेनाप्तेन गङ्गापदं प्रयुक्तमिति तात्पर्यधीर्जायते । गङ्गास्मारिततीरान्वयबोधश्च न तात्पर्यज्ञानमपेक्षते । (१४) न्यायत एव प्रथमं तीरस्य वाक्यार्थान्वयबोधोत्पत्तेः । (१५) अथवा निश्चिते स्वार्थसंबन्धिनो ऽन्वये तद्विशेषज्ञानार्थं तदपेक्षा ऽस्तु, (१६) न च तदर्थमपि, योग्यतादेरेव तद्विशेषलाभात् । (१७) अन्यथानुपस्थिते विशेषे तात्पर्यस्यापि ज्ञातुमशक्यत्वात् । शक्तिस्मारितशक्यसंबन्धो वा तज्जन्या शक्यसंबन्धस्मृतिर्वा लक्षणा । उभयथा ऽपि लक्षकपदस्य लक्ष्ये तात्पर्यज्ञानं लक्षणायामनुपयुक्तमेव । उक्तन्यायेन शब्दात्परम्परया ऽशक्यस्मृतेस्तात्पर्यग्रहात् पूर्वमेव क्लृप्तकारणादुपपत्तेः । (१८) शक्योपस्थापितार्थे शब्दतात्पर्याल्लक्षणेति तात्पर्याद्धि वृत्तिरिति च लक्षणास्थले लक्ष्ये वस्तुतस्तात्पर्यमस्तीत्येवंपरम् । नन्वेवं तात्पर्यानपेक्षणे यत्र नीरं तीरं वा ऽन्वययोग्यं तत्र कदा चित्तीरान्वयो ऽपि बोध्येतेति चेत् । न । शक्त्युपस्थितेन योग्याकाङ्क्षितेनैवान्विताभिधानमिति व्युत्पत्तेः । शाब्दत्वं तु तीरस्याध्याहृतस्येव । इतरपदैस्तीरान्वितस्वार्थान्वयाभिधानात् । तदेवं वृद्धव्यवहारादिदर्शनं विनैव तीरादौ लक्षणेति स्थितम् ॥

चिन्त्यम् । (१२) तीरप्रतिबद्धेति । शक्तिग्रहे तद्ग्रहार्थं तदपेक्षायां गौरवमिति भावः । (१३) स्वार्थसंबन्धएवेति । व्यञ्जनादिकमपि लक्षणैवेति भावः (१४) न्यायतएवेति । तात्पर्यग्राहकप्रकरणादित एवेत्यर्थः । (१५) अथ वेति । शक्यसंबन्धिनो योग्यस्यान्वय इति सामान्यतो निश्चये तद्विशेषतीरादिज्ञानार्थं तदपेक्षेत्यर्थः । अस्त्वित्यरुचौ, तामेवोद्भावयति । (१६) न चेति । प्रकरणादित एव तल्लाभादिति भावः । (१७) अन्यथेति । तथा चान्योन्याश्रयः स्यादिति भावः । (१८) शक्येति । तदन्वयस्यौत्सर्गिकत्वादिति भावः ।

॥ अथ वेदान्तकौस्तुभप्रभायाः ॥

॥ प्रथमाध्यायस्य ॥

॥ द्वितीयपादारम्भः ॥

एवं प्रथमे पादे श्रद्धोपपत्तिपूर्वकगुरूपसत्त्यादिना जातसंसारमोक्षेच्छावत्तया ब्रह्मजिज्ञासायां प्रवृत्तं प्रति लक्षणप्रमाणे निरूप्य प्रधानपुरुषावेव जगत्कारणतया वेदान्तप्रतिपाद्यावित्याशङ्क्य सर्वज्ञसत्यसंकल्पस्वभावतोऽपास्तसमस्तदोषदिव्यानन्तकल्याणगुणाकरस्य परब्रह्मणः श्रीकृष्णस्यैव जगत्कारणतया वेदान्तप्रतिपाद्यत्वमुक्तम् । अथ कानिचिदस्पष्टजीवलिङ्गकानि कानिचित् स्पष्टजीवलिङ्गकानि च यानि वाक्यानि, तान्यपि ब्रह्मपराण्येवेति निर्णेतुं द्वितीयतृतीयपादावारभ्येते ॥

॥ सर्वत्र प्रसिद्धोपदेशात् ॥ १ ॥

इदमाम्नायते छन्दोगैः; "सर्वं खल्विदं ब्रह्म तज्जलानिति शान्त उपासीताथ खलु क्रतुमयोऽयं पुरुषो यथा क्रतुरस्मिँल्लोके पुरुषो भवति तथेतः प्रेत्य भवति स क्रतुं कुर्वीत मनोमयः प्राणशरीरो भारूप" इत्यादि । अत्र मनोमयत्वादिगुणकः क्षेत्रज्ञ उपास्यत्वेनोपदिश्यते, उत परं ब्रह्मेति संशयः । किं तावत् प्राप्तं, क्षेत्रज्ञ इति । कुतः । तस्यैव मनःप्राणोपकरणकत्वात् । न ब्रह्मणः । "अप्राणो ह्यमनाः शुभ्र" इत्यादिश्रुतेः ।

ननु "सर्वं खल्विदं ब्रह्मे"ति पूर्वत्र श्रवणात्, श्रुतिश्च लिङ्गाद्बलीयसीति पूर्वोक्तं ब्रह्मैवात्रोपास्यतया संबन्ध्यतामिति चेन्न । तद्वाक्यस्य "शान्त उपासीते"ति शान्तिसिद्ध्युपायभूतब्रह्मात्मकत्वोपदेशायोपात्तत्वात् । अतो न ब्रह्मोपासनविधिपरत्वम् ।

किञ्च, "एष म आत्मान्तर्हृदयेऽणीयान् व्रीहेर्वा यवाद्वे"ति हृदयायतनत्वाणीयस्त्वयोः परिच्छिन्ने जीव एव संभवादिति प्राप्ते कृतान्तः । मनोमयत्वादिगुणकः परमात्मैवात्रोपास्यः । कुतः । सर्वत्र वेदान्तेषु परब्रह्मणि प्रसिद्धानां मनोमयत्वादीनामुपदेशात् । "मनोमयः प्राणशरीरनेता स एषोऽन्तर्हृदय आकाशस्तस्मिन्नयं पुरुषो मनोमय" इत्यादिषु । तत्र मनोमयत्वं विशुद्धमनोग्राह्यत्वं, प्राणशरीरत्वं प्राणस्याप्याधारत्वं, नियन्तृत्वं च, अप्राणः प्राणानधीनस्थितिः, अमना मनोऽनधीनज्ञान इत्यर्थः । अथवा, "सर्वं खल्विदं ब्रह्म तज्जलानिति शान्त उपासीते"ति सर्वात्मकं ब्रह्म शान्तः सन्नुपासीतेत्युपासनं विधीयते "स क्रतुं कुर्वीते"ति पूर्वस्यैव मनोमयत्वादिगुणोपादानायानुवादः, सर्वात्मकं ब्रह्म मनोमयत्वादिगुणकमुपासीतेति वाक्यार्थः । तत्र सर्वात्मत्वेन निर्दिष्टं ब्रह्म, क्षेत्रज्ञ, उत परमात्मेति । किं तावद्युक्तम् । क्षेत्रज्ञ इति । कुतः । तस्यैवानाद्यविद्यामूलकर्मनिमित्तकब्रह्मादिसर्व-

भावोपपत्तेः। परब्रह्मणस्तु सर्वज्ञत्वसर्वशक्तित्वापहतपाप्मत्वस्वभावतोऽपास्तसमस्तदोषत्वादियोगात्र हेयाकारसर्वतादात्म्यमुपपद्यते। ब्रह्मशब्दोऽपि बृहत्त्वगुणयोगेन तत्रैव वर्तते। जगज्जन्मादेश्च कर्मनिमित्तत्वात् तद्धेतुत्वनिर्देशोऽपि तत्रोपपद्यते। इति प्राप्ते तत्राह। सर्वत्र प्रसिद्धोपदेशात्। सर्वात्मत्वेन जगज्जन्मादिहेतुत्वेन च निर्दिष्टब्रह्मशब्दवाच्यः परमात्मैव। तस्मादेव सर्वत्र वेदान्तेषु जगज्जन्मादीनां प्रसिद्धतयोपदेशात्। “सोऽकामयत बहु स्यां प्रजायेये”ति,“इदं सर्वमसृजते”त्यादिषु सर्वान्तर्यामितया सर्वात्मत्वमपि परब्रह्मण एवोपपद्यते। न प्रतिशरीरं भिन्नानां जीवानाम्। जगज्जन्मादेर्जीवकर्मनिमित्तत्वात्। स एव हेतुरित्यपि न। परमेश्वरस्यैव जगद्धेतुत्वप्रसिद्धेः। अतः परमात्मैवात्र ब्रह्मशब्दवाच्यः ॥ १ ॥

॥ विवक्षितगुणोपपत्तेश्च ॥ २ ॥

“मनोमयः प्राणशरीरो भारूपः सत्यसंकल्प आकाशात्मा सर्वकर्मा सर्वकामः सर्वगन्धः सर्वरसः सर्वमिदमभ्यात्तोऽवाक्यनादर”इत्यादिश्रुत्या वक्तुमिष्टानां मनोमयत्वादिगुणानां परमात्मन्येवोपपत्तेश्च। श्रुत्यर्थस्तु, मनोमयः शमदमादिसाधनसहकृतपरमात्मोपासननिर्मलीकृतेन मनसा ग्राह्यः, प्राणशरीरः सर्वप्राणधारकः, प्राणो यस्य शरीरमाधेयं नियम्यभूतं च सः, भारूपो भास्वररूपो दिव्याप्राकृतकल्याणरूपवत्तया निरतिशयौज्ज्वल्ययुक्तः, सत्यसंकल्पोऽप्रतिहतसंकल्पः, आकाशात्मा, आकाशवत् स्वच्छस्वरूपः, सर्वप्रकाशको वा, सर्वं विश्वं कर्म यस्य, सर्वा क्रिया वा यस्य, स सर्वकर्मा, सर्वे कामा भोग्यादयः सर्वविधा यस्य सन्ति स सर्वकामः, दिव्याप्राकृतस्वभोग्यभूतसर्वविधगन्धरसयुक्तः, सर्वमिदं रसपर्यन्तमङ्गीकृतवानित्यभ्यात्तः, भुक्ता ब्राह्मणा इतिवत् कर्तरि क्तः, यतोऽनादरः, प्राप्तसमस्तकामत्वेनादरणीयाभावादादररहितः, अतोऽवाक्युक्तिर्यस्य नास्तीत्यवाकी, परिपूर्णैश्वर्यवत्त्वात् सर्वं तुच्छीकृत्य तूष्णीमासीन इत्यर्थः ॥ २ ॥

॥ अनुपपत्तेस्तु न शारीरः ॥ ३ ॥

पूर्वोक्तमनोमयत्वादीनां शारीरे शरीरसंबन्धिनि जीवेऽनुपपत्तेश्च परमेव ब्रह्म तद्गुणकमुपास्यम् ॥ ३ ॥

॥ कर्मकर्तृव्यपदेशाच्च ॥ ४ ॥

इतश्च मनोमयत्वादिगुणकः परमात्मैव, न शारीरः। यतः। “एतमितः प्रेत्याभिसंभवितास्मी”त्यादिश्रुतौ एतमित्युपास्यस्य परमात्मनः प्राप्यतया कर्मत्वेनाभिसंभवितास्मीत्युपासकस्य जीवस्य प्राप्तृतया कर्तृत्वेन च व्यपदेशात् ॥ ३ ॥

॥ शब्दविशेषात् ॥ ५ ॥

इतश्च मनोमयत्वादिगुणकः शारीरादन्यः। “एष म आत्मान्तर्हृदये” इति जीवपरयोः षष्ठीप्रथमान्तरूपशब्दविशेषात् ॥ ५ ॥

॥ स्मृतेश्च ॥ ६ ॥

“सर्वस्य चाहं हृदि संनिविष्टः”,

“ईश्वरः सर्वभूतानां हृद्देशेऽर्जुन तिष्ठति”।

“तमेव शरणं गच्छ”,

इत्यादिस्मृतिश्चोपास्योपासकयोर्भेदं दर्शयति।

अत्र केचित् पर एव त्वात्मा देहेन्द्रियमनोबुद्ध्युपाधिभिः परिच्छिद्यमानो बालैः शारीर इत्युपचर्यते, यथा घटकरकाद्युपाधिवशादपरिच्छिन्नमपि नभः परिच्छिन्नवदवभासते, तद्वत्, तदपेक्षया च कर्मकर्तृत्वादिभेदव्यवहारो न विरुध्यते। प्राक् “तत् त्वमसी”त्यात्मैकत्वोपदेशग्रहणात्। गृहीते त्वात्मैकत्वे बन्धमोक्षादिसर्वव्यवहारपरिसमाप्तिरेव स्यादिति वदन्ति।

तदयुक्तम्। सर्वज्ञस्य सर्वशक्तेः स्वतन्त्रस्य परब्रह्मणो निरतिशयानन्दवत्त्वेन स्वभावसिद्धविद्यारूपत्वेन चाविद्यायोगासंभवात्, तत्कल्पितोपाधियोगस्य सुतरामसंभवः।

अयं भावः। सर्वगताद्वितीयात्मवाद उपाधीनां विभुत्वं वा, अणुत्वं वा, मध्यमपरिमाणत्वं वेति।

नाद्यः, सर्वस्याप्यावृतत्वेन जगदान्ध्यप्रसङ्गः, प्रकाशकाभावात्। गत्याद्यनुपपत्तेश्च। मुक्तोपसृप्याभावप्रसङ्गाच्च।

न द्वितीयः, उपाधिगमने तदवच्छिन्नाद्वितीयचिन्मात्रस्य सर्वगतत्वाद् घटगमने तदवच्छिन्नाकाशस्य गत्यनुपपत्तिवदुपाधिना सह गमनानुपपत्तेः पदे पदे बन्धमोक्षौ स्याताम्। अनाद्युपाध्यवच्छिन्नस्याकस्माच्छास्त्रोक्तसाधनकदम्बं विनैव मुक्तिप्रसङ्गात्। नित्यमुक्तस्य शुद्धबुद्धाद्वितीयनिर्विशेषचिन्मात्रस्याकस्माद्बन्धप्रसङ्गाच्च। तद्विषयकजिज्ञासाशास्त्रारम्भवैयर्थ्याच्च। मुक्तस्यापि पुनर्बन्धावश्यंभावाच्च। पादादिवेदनादेः शिरसि गतसुखस्य च युगपदनुभवानुपपत्तेः।

नापि तृतीयः, उपाध्यणुत्वनिरूपितजीवाणुत्वसिद्धान्तविरोधात्। चाक्षपत्वापत्तेश्च।

किंच, परिच्छेदकस्योपाधेः सत्यत्वं वा मिथ्यात्वं वेति।

नाद्यः, द्वैतापत्त्या सिद्धान्तभङ्गप्रसङ्गात्। सत्यस्य ज्ञाननाश्यत्वाभावेनानिर्मोक्षप्रसङ्गाच्च। परमतप्रवेशापत्तेश्च।

न द्वितीयः, अनुपपन्नत्वात्। अन्यथा स्वात्मनिगडेन जाग्रदवस्थायां बन्धनापत्तिर्दुर्वारा। तस्याद्दृष्टश्रुतागोचरत्वात् प्रमाशून्यत्वात्। श्रुतियुक्तिविरुद्धत्वाच्च। इति संक्षेपः।

विस्तरस्तत्त्वाकरे द्रष्टव्यः।

तस्मात् तच्छक्तिभूतस्य जीवस्यैवाविद्याकामकर्मादियोगा द्वन्यमोत्तभात्त्वं, न परस्येति ॥ ६ ॥

॥ अर्भकौकस्त्वात् तद्व्यपदेशाच्च नेति चे-
न्न निचाय्यत्वादेवं व्योमवच्च ॥ ७ ॥

अर्भकमल्पमोको नीडमायतनं यस्य तस्य भावस्तत्त्वं, तस्मात्,“ एष म आत्मान्तर्हृदय” इत्यल्पायतनत्वात् । “अणीयान् व्रीहेर्वा यवाद्वेति स्वरूपेणाल्पत्वव्यपदेशाच्चाणुपरिमाणको जीव एवात्रोपास्यतयोपदिश्यते, न परमात्मेति चेत्, नैतत् । निचाय्यत्वादेवम्” एवं द्रष्टव्यत्वादुपास्यत्वात् । परिच्छिन्नायतनत्वाणीयस्त्वव्यपदेशो न स्वरूपाल्पत्वेन, “ज्यायान् पृथिव्या ज्यायानन्तरिक्षा”दित्यादिना स्वाभाविकमहत्त्वस्यापि व्यपदेशात् । व्योमवच्च, चशब्दो नियोगे, यथा महतोऽपि व्योम्नः सूच्यादावल्पत्वानुसंधानं, तद्वदेवेत्यर्थः ॥ ७ ॥

॥ संभोगप्राप्तिरिति चेन्न वैशेष्यात् ॥ ८ ॥

जीवेन सहैकस्थानस्थितस्य परमात्मनोऽपि जीववत् सुखदुःखादिसंभोगप्राप्तिरिति चेन्न । वैशेष्यात् । हेतोरिति शेषः । न ह्येकत्र स्थितिरेव सुखाद्युपभोगहेतुः । अपितु पुण्यादिकर्मपरवशत्वम् । तस्य त्वपहतपाप्मत्वादिगुणवति परमात्मन्यसंभवात् । अन्यथाग्निदेशस्थितदिगाकाशयोरपि दाहप्रसङ्गः ॥ ८ ॥

॥ अत्ता चराचरग्रहणात् ॥ ९ ॥

“यस्य ब्रह्म च क्षत्रं च उभे भवत ओदनः, मृत्युर्यस्योपसेचनं, क इत्था वेद यत्र स” इति कठवल्ल्याम्नातस्यौदनोपसेचनशब्दसूचितस्यादनीयस्यात्ता किं चेत्रज्ञः परमात्मा वेति संशयः । तत्र भोक्तृत्वस्य कर्मनिमित्तत्वेन “तयोरन्यः पिप्पलं स्वाद्वत्ती”ति श्रुत्या जीवस्यैव संभव इति प्राप्ते ब्रूमः । अत्तात्र परमात्मैव । कुतः । चराचरग्रहणात् । मृत्यूपसेचनौदनस्य ब्रह्मक्षत्रोपलक्षितचराचरात्मकस्य जगतो ग्रहणात् । विश्वसृष्टिस्थितिलयलीलस्य परमात्मनो जगदुपसंहारित्वरूपभोक्तृत्वस्य कर्मनिमित्तत्वाभावात् । जीवस्य सर्वजगदुपसंहारित्वासंभवात् । अनश्नन्निति श्रुतिश्च कर्मफलोपभोगनिषेधविषया ॥ ९ ॥

॥ प्रकरणाच्च ॥ १० ॥

इतश्च पर एवात्ता, “महान्तं विभुमात्मानं मत्वा यमेवैष वृणुते तेन लभ्य” इत्यादिना तस्यैव पूर्वं प्रकृतत्वात् ॥ १० ॥

तत्रैवानन्तरम्,

ऋतं पिबन्तौ सुकृतस्य लोके
गुहां प्रविष्टौ परमे परार्धे ।
छायातपौ ब्रह्मविदो वदन्ति
पञ्चाग्नयो ये च त्रिणाचिकेताः ॥

इति मन्त्रेर्ऋतफलकर्तृतया निर्दिष्टौ जीवपरमात्मानौ बुद्धिजीवौ वेति संशये द्वयोः कर्मफलभोक्तृत्वश्रवणात् परस्य च तदसंभवात् सुकृतसाध्यलोकवर्तित्वगुहावच्छिन्नत्वयोः सर्वगते परब्रह्मण्यसंभवाच्छायातपनिर्दिष्टतमःप्रकाशत्वयोरपि जीवपरमात्मपरत्वेऽसंभवाच्च बुद्धिजीवावेवात्र मन्त्रे प्रतिपाद्येते, न जीवपरमात्मानौ, बुद्धेर्भोक्तृजीवोपकरणतया यथाकथंचित् पानेऽन्वयसंभवादिति प्राप्त आह ॥

॥ गुहां प्रविष्टावात्मानौ हि तद्दर्शनात् ॥ ११ ॥

हृदयगुहां प्रविष्टौ जीवपरावेव । हि यतः, तयोश्चेतनत्वेनैकस्वभावत्वात् । संख्याश्रवणे सत्येकस्मिन् संप्रतिपन्ने द्वितीयाकाङ्क्षायां प्रतिपन्नजातिमुपजीव्य व्यक्तिविशेषपरिग्रहे बुद्धिलाघवाद् विजातीयपरिग्रहे जातिव्यक्तिबुद्धिद्वयापेक्षागौरवात् प्रतिपन्नजातीयपरिग्रहो युक्तः । अस्य गोर्द्वितीयोऽन्वेष्टव्य इत्युक्ते गौरेवान्विष्यते नाश्वो न गर्दभ इति महाभाष्यकारोक्तेः । तथा च ऋतपानलिङ्गावगतजीवस्य द्वितीयश्चेतनत्वेन तत्सजातीयः परमात्मैव ग्राह्यः । तस्य प्रयोजककर्तृतया छत्रिन्यायेन वा,पिबन्ताविति निर्देशस्यापि संभवात् । बुद्धौ स्वतन्त्रकर्तृत्वस्यासंभवात् । गुहां प्रविष्टाविति गुहाप्रवेशस्यापि “गुहाहितं गह्वरेष्ठं यो वेद निहितं गुहायां परमे व्योमन्” “आत्मानमन्विच्छ गुहां प्रविष्ट”मित्यादिश्रुतिस्मृतिषु प्रदर्शनानुपपत्तेः । छायातपशब्दाभ्यां च किंचिज्ज्ञसर्वज्ञयोः प्रतिपादनसंभवात्, सुकृतसाध्यलोकवर्तित्वस्यापि छत्रित्ववत् संभवाज्जीवद्वितीयः परमात्मेति । कथं प्राप्यते, तद्दर्शनात् तयोरेवास्मिन् प्रकरणे गुहाप्रवेशव्यपदेशदर्शनात् । ‘तं दुर्दर्शं गूढमनुप्रविष्टं गुहाहित”मिति “परस्य या प्राणेन संभवत्यदितिर्देवतामयी गुहां प्रविश्य तिष्ठति सा भूतेभिर्व्यजायते”ति जीवस्य तत्र कर्मफलान्यत्तीत्यदितिः प्राणेन सह वर्तते देवानामपीन्द्रियाधीनभोगा भूतेभिर्भूतैः पृथिव्यादिभिः सहिता देवादिरूपेण विविधा जायन्त इत्यर्थः ॥ ११ ॥

॥ विशेषणाच्च ॥ १२ ॥

अत्र प्रकरणे जीवपरयोरेव “ब्रह्म यज्ञं देवमथ्यं विदित्वा निचाय्येमां शान्तिमत्यन्तमेति यः सेतुरीजानानामात्मानं रथिनं विद्धि विज्ञानसारथिर्यस्तु” इत्यादिषूपास्यत्वोपासकत्वप्राप्यप्राप्तृत्वगन्तव्यत्वगन्तृत्वादेर्निर्विशिष्टेन प्रतिपादनात् ॥ १२ ॥

॥ अन्तर उपपत्तेः ॥ १३ ॥

छान्दोग्य इदं श्रूयते, “य एषोऽक्षिणि पुरुषो दृश्यते एष आत्मेति होवाच तदमृतमभयमेतद्ब्रह्मे”ति, अत्र संदिह्यते, क्षिमयमक्ष्यन्तरः पुरुषः प्रतिबिम्बात्मा, उत जीव, उतेन्द्रिया-

धिष्ठाता देवविशेष, अथ परमात्मेति । किं तावत् प्राप्तम् । प्रतिबिम्बात्मेति । कुतः । दृश्यत इत्यपरोक्षतया प्रसिद्धवन्निर्देशात् । जीवो वा । तस्यापि चक्षुषि रूपद्रष्टृतया संनिहितत्वादात्मशब्दवाच्यत्वाच्च । "आदित्यो वा चक्षुरनुग्राहको रश्मिभिरेकोऽस्मिन् प्रतिष्ठित" इति श्रुतेः । एवं प्राप्ते ब्रूमः । अक्ष्याधारः पुरुषः परमात्मैव । कुतः । उपपत्तेः । आत्मत्वामृतत्वाभयत्वाहतपापत्वसंपद्वामत्वादिगुणजातस्य तत्रैवोपपत्तेः ॥ १३ ॥

॥ स्थानादिव्यपदेशाच्च ॥ १४ ॥

चक्षुरवस्थितिनियमनादीनां "यश्चक्षुषि तिष्ठ"न्नित्यादिश्रुत्या परमात्मन्येव व्यपदेशात् स एवाक्ष्याधारो दृश्यत इत्यपरोक्षव्यपदेशो योगिदृष्ट्योपपद्यते ॥ १४ ॥

॥ सुखविशिष्टाभिधानादेव च ॥ १५ ॥

इतश्चाक्ष्यन्तरः पुरुषः परमात्मा । "प्राणो ब्रह्म, कं ब्रह्म, खं ब्रह्मे"ति सुखविशिष्टस्य प्रकृतस्यैव ब्रह्मणोऽत्राक्ष्याधारतया संपद्वामत्वादिगुणवत्तया चोपास्यत्वाभिधानात् । एवकारो हेतुनैरपेक्ष्यद्योतकः । "नन्वथ हैनं गार्हपत्योऽनुशशासे" त्यादिना मध्येऽग्निविद्योपदेशात् कथमक्षिस्थानकं प्रकृतं ब्रह्मेति । फलवैलक्षण्योपदेशाच्चेति चेदुच्यते । "तस्मै होचुः प्राणो ब्रह्म, कं ब्रह्म,खं ब्रह्मे"ति "य एषोऽक्षिणि पुरुषो दृश्यत एष आत्मेति होवाचैदतमृतमभयमेतद् ब्रह्मे"त्युपक्रमोपसंहारयोः श्रूयमाणो ब्रह्मशब्दो मध्योपदिष्टाग्निविद्याया ब्रह्मविद्याङ्गत्वमवगमयति । एवं चा"पहतपापकृत्यां लोकीभवति सर्वमायुरेति योऽग्नीनवति नास्यावरपुरुषाः क्षीयन्त उप वयं तं भुञ्जामोऽस्मिंश्च लोकेऽमुष्मिंश्च" इति फलान्तराभिधानस्य मोक्षविरोधित्वादर्थवादत्वमेवेति । तत्र पापशब्दो ब्रह्मविद्योत्पत्तिप्रतिबन्धकपापपरः । लोकशब्दो ब्रह्मलोकप्राप्तिमार्गभूताग्निलोकपरः । सर्वं ब्रह्मोपासनसमाप्त्यन्तं, रोगाद्यादिरहितो यावद् ब्रह्मप्राप्ति । अवरपुरुषाः पुत्रपौत्रादयः, शिष्यप्रशिष्यादयश्च । वयमग्नयः । तमेवमुपभुञ्जामो यावद्ब्रह्मप्राप्ति विघ्नेभ्यो रक्षाम इत्यर्थः । आचार्यस्तु ते गतिं वक्तेति वदतामग्नीनां त्वयमभिप्रायः । हे उपकोशल ब्रह्मविद्यामनुपदिश्य प्रोषिते गुरौ तदलाभादनाश्वासं त्वामुज्जीवयितुं ब्रह्मस्वरूपमात्रं तदङ्गभूतामग्निविद्यां चोपदिशामः, "आचार्याद्धैव विदित्वा विद्या साधिष्ठं प्राप" दिति श्रुतेः । आचार्य एव ते तुभ्यं संपद्वामत्वादिगुणकं ब्रह्माक्षिरूपं तदुपासनस्थानमर्चिरादिकां गतिं वक्ता वक्ष्यतीति आचार्योऽप्यये तथैवोपदिदेशेत्यतः कं ब्रह्म खं ब्रह्मेति सुखविशिष्टस्य प्रकृतस्यैव ब्रह्मणोऽत्राभिधानादक्ष्यन्तरः परमपुरुष एवेति ॥ १५ ॥

ननु नाम ब्रह्म मनो ब्रह्मेत्यादिवत् कखशब्दयोरपि लौकिकसुखभूताकाशयोः प्रसिद्धेः प्रतीकोपासनमेवेदमिति चेत् तत्राह ॥

॥ *अत एव च तद्ब्रह्म ॥ १६ ॥

यतस्तत्र तद्वाव कं तदेव खं यदेव खं तदेव कमिति सुखविशिष्टाकाशस्यापरिच्छिन्नसुखस्य चाभिधानम्,अतः खशब्दवाच्यं तदाकाशं परं ब्रह्मेति ॥ १६ ॥

॥ श्रुतोपनिषत्कगत्यभिधानाच्च ॥ १७ ॥

उपनिषीदति, उपास्योपासकस्वरूपविषयकसंदेहं संसारग्रन्थिं वा सादयति नाशयतीति, उप समीपस्थं निश्चितं परमात्मानं प्रापयति वा उपनिषद् विद्या,तत्समर्पकत्वाद्ग्रन्थोऽपि, श्रुता उपनिषदो यैस्तैरधिगतब्रह्मयाथात्म्यैः, परमात्मप्राप्तये या गतिरर्चिरादिकाधिगन्तव्यतयावगता, श्रुत्यन्तरे तस्या एवेह"तेऽर्चिषमेवाभिसंभवन्ति"इत्यारभ्य "एतेन प्रतिपद्यमाना इमं मानवमावर्त्तं नावर्तन्त" इत्यन्तेनाक्षिपुरुषं श्रुतवत उपकोशलस्याधिगन्तव्यतयाभिधानादक्ष्यन्तरः पुरुषः परमात्मैव ॥ १७ ॥

॥ अनवस्थितेरसंभवाच्च नेतरः ॥ १८ ॥

यच्चोक्तं, प्रतिबिम्बात्मा जीवो वेन्द्रियाधिष्ठातृदेवो वाक्ष्यन्तरः,तत्रोच्यते, इतरः प्रतिबिम्बादिर्नेह गृह्यते । तस्य चक्षुषि नियमेनानवस्थितेरमृतत्वसंपद्वामत्वादीनां चासंभवात् । तत्र प्रतिबिम्बात्मनः पुरुषान्तरसंनिधानत्वाज्जीवस्य च कृत्स्नेन्द्रियसंबन्धवत्त्वान्न नियमेन चक्षुष्यवस्थितिसंभवः । देवतायाश्च रश्मिद्वारेणावस्थितिवचनाद्देशान्तरावस्थितस्यापीन्द्रियाधिष्ठानोपपत्तेर्न चक्षुषि नियमेनावस्थानमिति भावः ।

तस्मादक्ष्यन्तरः पुरुषः परमात्मेति सिद्धम् ॥ १८ ॥

॥ अन्तर्याम्यधिदैवादिषु तद्धर्मव्यपदेशात् ॥ १९ ॥

बृहदारण्यके, "यः पृथिव्यां तिष्ठन् पृथिव्या अन्तर" इत्यारभ्य "एष ते आत्मान्तर्याम्यमृत" इत्यादिना पृथिव्यग्न्यन्तरिक्षाकाशवाय्वादित्यादिष्वधिदैवादिसर्वपर्यायेषूच्यमानोऽन्तर्यामी किं देवताविशेष, उत जीव, उत परमात्मेति संशयः । देवतात्मनो नियमयितृत्वस्य युक्तत्वादेष इति जीवो, वाक्यशेषे द्रष्टृत्वादिश्रवणात् । द्रष्ट्रन्तरनिषेधाच्च । इति प्राप्त इदमुच्यते, अन्तर्यामी परमात्मैव । कुतः । तद्धर्मव्यपदेशात् । सर्वदेवलोकवेदयज्ञभूतादिनियमनस्यात्मत्वामृतत्वादेश्च परमात्मधर्मस्यैवात्र व्यपदेशात् । देवतापरिग्रहे "यं पृथिवी न

---

* शंकरमते नेदं सूत्रमुपन्यस्तम्

वेदेति" पृथिवीदेवतयाऽविज्ञेयत्वोक्त्यनुपपत्तेः । जीवपरिग्रहे "ते" इति पञ्चम्यनुपपत्तेः । "पश्यत्यचक्षुः स शृणोत्यकर्ण" इत्यादिश्रुतेर्द्रष्टृत्वादेरपि तत्र संभवात् । द्रष्ट्रन्तरनिषेधस्तु पूर्ववाक्योक्तद्रष्टुर्नियन्तृद्रष्ट्रन्तरनिषेधपरः । जीवेनादृष्टान्तर्यामिद्रष्टृवत् । अन्तर्यामिणाप्यदृष्टस्य द्रष्टुरभावात् । पृथिव्याद्यात्मपर्यन्तैस्तैर्नियम्यभूतैरदृश्यमानस्यैव नियमयतीत्यादिपूर्वोक्तस्य नियन्तुरेवा"दृष्टो द्रष्टाऽश्रुतः श्रोते"त्यादिना सूचितत्वाच्च ॥ १९ ॥

अदृष्टत्वादिधर्मस्य प्रधानेऽपि संभवात् "ईक्षतेर्ने"- इति निरस्तमपि पुनराशङ्क्य निषिध्यते ॥

॥ न च स्मार्तमतद्धर्माभिलापात् ॥ २० ॥

स्मार्तं स्मृतिप्रतिपन्नं प्रधानं च नान्तर्यामिशब्दवाच्यम् । कुतः । अतद्धर्माणां स्वभावत एव सर्वात्मत्वसर्वनियन्तृत्वसर्वद्रष्टृत्वामृतत्वादीनामचेतनेऽसंभावितानामत्राभिलापात् कथनात् ॥ २० ॥

॥ शारीरश्चोभयेऽपि हि भेदेनैनमधीयते ॥ २१ ॥

जीवस्य चेतनत्वात् स एवास्त्विति चेत् तत्राह शारीरश्चेति। चकारः समुच्चयार्थः । शारीरो जीवोऽपि नान्तर्यामी । सर्वात्मत्वसर्वनियन्तृत्वसर्वज्ञत्वादीनामतद्धर्मत्वात् । हि यत उभयेऽपि काण्वा माध्यंदिनाश्च एनं शारीरं जीवमन्तर्यामिणो ऽभेदेन पृथिव्यादिवदधिष्ठानत्वेन नियम्यत्वेन चाधीयते । "यो विज्ञाने तिष्ठन्" इति काण्वाः । विज्ञाने प्रत्यगात्मनि । "य आत्मनि तिष्ठन्नात्मनोऽन्तरो यमात्मा न वेद यस्यात्मा शरीरं य आत्मानमन्तरो यमयति स त आत्मान्तर्याम्यमृत" इति माध्यंदिनाः ।

तस्मात् पृथिव्यादिवन्नियम्यत्वमेव जीवस्य, न नियन्तृत्वम् ।

अतोऽधिदैवादिष्वन्तर्यामी परमात्मैवेति सिद्धम् ॥ २१ ॥

॥ अदृश्यत्वादिगुणको धर्मोक्तेः ॥ २२ ॥

इदमाथर्वणिकैराम्नायते, "अथ परा यया तदक्षरमधिगम्यते, "यत् तदद्रेश्यमग्राह्यमगोत्रमवर्णमचक्षुःश्रोत्रं तदपाणिपादं नित्यं विभुं सर्वगतं सुसूक्ष्मं तदव्ययं यद्भूतयोनिं परिपश्यन्ति धीराः" "अप्राणो ह्यमनाः शुभ्रो ह्यक्षरात् परतः पर"इत्यादि, तत्र संशय्यते । किमिहादृश्यत्वादिगुणकं भूतयोन्यक्षरम्, अक्षरात् परतः परश्च प्रधानं, पुरुष, उतोभयत्र परमेश्वर इति । किं तावत् प्राप्तम् । प्रकृतिपुरुषाविति । कुतः । अस्य भूतयोन्यक्षरस्य द्रष्टृत्वादिचेतनधर्माणामश्रूयमाणत्वात् । पृथिव्याद्यचेतनगतदृश्यत्वादिनिषेधस्य तत्सजातीयेऽचेतन एव युक्तत्वात् ।

किंच, अदृश्यत्वादिविशिष्टस्याक्षरस्य परमात्मत्वे "अक्षरात् परतः पर" इति परतोऽपि परस्य पुरुषस्य श्रवणं नोपपद्यते । अतः पुरुषगतपरत्वावधितयाऽक्षरादिति निर्दिष्टस्य भूतयोन्यक्षरस्य परमात्मत्वासंभवात् । अक्षरशब्दस्य प्रधाने प्रसिद्धेश्च । अद्रेश्यत्वादिगुणकं भूतयोन्यक्षरं प्रधानमेव तत्त्वरतया निर्दिश्यमानं, पुरुषोऽपि पञ्चविंशक एव, न तु परमात्मा, तस्याक्षरपरभूताज्जीवादपि परत्वेनाव्यवहितपरत्वाभावात् ।

न चा"क्षरात् परत" इति द्वयोर्वैयधिकरण्याश्रयणेन परमात्मनः परत्वमेवाक्षरादपि परभूताज्जीवात् प्रतिपाद्यत इति वाच्यम् । स्वकर्मकार्यवर्गापेक्षया परभूतेऽक्षरे सामानाधिकरण्येन वृत्तिसंभवे तयोर्वैयधिकरण्ये प्रमाणाभावादिति प्राप्तेऽभिधीयते । अदृश्यत्वादिगुणकः परमात्मैव । "यः सर्वज्ञः सर्ववि"दित्यादिवाक्येनात्र प्रकरणेन धर्माणामेव सार्वज्ञादीनामुक्तत्वात् । प्रधानजीवयोरचेतनाल्पज्ञत्वेन सर्वज्ञत्वाद्यसंभवात् ।

न चाक्षरात् परस्य पुरुषस्य परमात्मत्वे भूतयोन्यक्षरस्य परमात्मत्वं कथं सिध्येदिति वाच्यम् । "अक्षरात् परत" इति निर्दिष्टस्याक्षरस्य "अथ परा यया तदक्षरमधिगम्यते," "तथाक्षरात् संभवतीह विश्वं तथाक्षराद् विविधाः सोम्य भावाः" । "येनाक्षरं पुरुषं वेद सत्य"मित्यादिवाक्यनिर्दिष्टभूतयोन्यक्षरापेक्षया भिन्नत्वात् । न क्षरति न च्यवत इत्यक्षरं भूतयोनिः, अश्नुते वाद्मो विश्वविकारजातमित्यक्षरं भूतसूक्ष्मरूपाचेतनं प्रधानमिति व्युत्पत्तेः ॥ २२ ॥

॥ विशेषणभेदव्यपदेशाभ्यां च नेतरौ ॥ २३ ॥

इतश्चेतरौ प्रधानं जीवश्च न भूतयोन्यक्षरनिर्दिष्टौ, किंतु परमात्मैव । कुतः । विशेषणभेदव्यपदेशाभ्याम् । विशिनष्टि व्यावर्तयति हि प्रकरणं प्रधानपुरुषाभ्यां भूतयोन्यक्षरम्, एकविज्ञानेन सर्वविज्ञानोपपादनादिना तथा"क्षरात् परतः पर" इत्यादिना भूतयोन्यक्षरस्य ताभ्यां भेदश्च व्यपदिश्यते ॥ २३ ॥

॥ रूपोपन्यासाच्च ॥ २४ ॥

अक्षरात् परतः परस्यैव भूतयोन्यक्षरस्यान्तर्यामितया सर्वचिदचिदात्मकप्रपञ्चो रूपत्वेनोपन्यस्यते । "अग्निर्मूर्धा चक्षुषी चन्द्रसूर्यौ दिशः श्रोत्रे वाग्विवृताश्च वेदाः । वायुः प्राणो हृदयं विश्वमस्य पद्भ्यां पृथिवी ह्येष सर्वभूतान्तरात्मे"त्यादिना प्रधानस्य जीवस्य च सर्वभूतान्तरात्मत्वासंभवान्नैवंरूपोपन्यासः संभवति । अतोऽदृश्यत्वादिगुणकः परमात्मैवेति सिद्धम् ॥ २४ ॥

॥ वैश्वानरः साधारणशब्दविशेषात् ॥ २५ ॥

इदमाम्नायते छन्दोगैः, "को न आत्मा किं ब्रह्मे"-ति । "आत्मानमेवेमं वैश्वानरं संप्रत्यध्येषि तमेव नो ब्रूहि" इति च प्रक्रम्य "यस्त्वेतमेवं प्रादेशमात्रमभिविमानमात्मानं वैश्वानरमुपास्ते" इत्यादि । तत्र संशयः । किमिह वैश्वानरशब्दितो जाठराग्निरुत भूताग्निरुत देवताविशेषोऽथ परमात्मेति । तत्र तावज्जाठराग्निरिति प्राप्तम् । "अयमग्निर्वैश्वानरो योऽयमन्तःपुरुषे येनेदमन्नं पच्यते यदिदमद्यत" इति तत्र वैश्वानरशब्दप्रसिद्धेः । भूताग्निर्वा । "विश्वस्मा अग्निं भुवनाय देवाः, वैश्वानरं केतुमह्नामकृण्व"न्निति तत्रापि प्रयोगदर्शनात् । देवतायां च, "वैश्वानरस्य सुमतौ स्याम राजा हि कं भुवनानामभिश्री"रिति परात्मनि च तदात्मन्येव हृदयगे वैश्वानरे प्राप्स्यत्, "स एष वैश्वानरो विश्वरूपः प्राणोऽग्नि"रिति । एवं वैश्वानरशब्दस्य सर्वत्र वैदिकप्रयोगदर्शनात्, अत्र च प्रकरणे सर्वेषां लिङ्गोपलब्धेर्वैश्वानरशब्दवाच्यः परमात्मैवेति न निर्णेतुं शक्य इति प्राप्त उच्यते,वैश्वानरः परमात्मा, कुतः, साधारणशब्दविशेषात् । वैश्वानरशब्दस्य नानार्थसाधारणत्वेऽप्यत्र प्रकरणे परमात्मासाधारणैः सर्वात्मत्वादिविशेषणैः, विशिष्यत इति विशेषस्तस्माद्विशिष्यमाणत्वादित्यर्थः । उपक्रमे "को न आत्मा किं ब्रह्मे"ति सर्वजीवात्मभूतब्रह्मजिज्ञासायां प्रवर्तमानैरौपमन्यवादिमहर्षिभिर्वैश्वानरात्मत्वमश्वपतिं कैकयं प्राप्य पृच्छ्यमानो वैश्वानरात्मा परमात्मेति निश्चीयते । "किं ब्रह्मे"ति प्रक्रान्तस्य ब्रह्मशब्दस्यैव स्थान उत्तरत्र सर्वत्र वैश्वानरशब्दप्रयोगात् सोऽपि ब्रह्मैवाभिदधातीति । "स सर्वेषु लोकेषु" इत्यारभ्य "एवं हास्य सर्वे पाप्मानः प्रदूयन्त" इत्यादिश्रूयमाणस्य वैश्वानरात्मविज्ञानफलस्य च वैश्वानरशब्दस्य परमात्मपरत्व एव संभवादिति ॥ २५ ॥

॥ स्मर्यमाणमनुमानं स्यादिति ॥ २६ ॥

इतश्च वैश्वानरः परमात्मैव, यतः, अग्निर्मूर्धेत्यादिश्रुतिषु ।

"यस्याग्निरास्यं द्यौर्मूर्धा खं नाभिश्चरणौ क्षितिः ।
सूर्यश्चक्षुर्दिशः श्रोत्रं तस्मै लोकात्मने नमः" ॥

"द्यां मूर्धानं यस्य विप्रा वदन्ति
खं वै नाभिश्चन्द्रसूर्यौ च नेत्रे ।
दिशः श्रोत्रे विद्धि पादौ महीं च
सोऽचिन्त्यात्मा सर्वभूतप्रणेता" ॥

इत्यादिस्मृतिषु च परमात्मरूपतया प्रसिद्धमेवेह तदेवेदमिति स्मर्यमाणं प्रत्यभिज्ञायमानं वैश्वानरस्य परमात्मत्वेऽनुमानं लिङ्गं स्यात् । इतिशब्दः प्रकारे। एवंभूतं द्युमूर्धत्वादिविशिष्टं परमात्मन एव रूपमिति वैश्वानरस्य परमात्मत्वे लिङ्गं स्यादित्यर्थः ॥ २६ ॥

॥ शब्दादिभ्योऽन्तः प्रतिष्ठानान्नेति चेन्न तथा दृष्ट्युपदेशादसंभवात् पुरुषमपि चैनमधीयते ॥ २७ ॥

वैश्वानरः परमात्मा, कुतः, शब्दादिभ्योऽन्तः प्रतिष्ठानात् । शब्दस्तावदग्निशब्दो वाजिनां वैश्वानरविद्याप्रकरणे "स एषोऽग्निर्वैश्वानर" इति, अत्र प्रकरणे च "हृदयं गार्हपत्य" इत्यादौ हृदयादिस्थितस्य वैश्वानरस्याग्नित्रयकल्पनं, "तद्यद्भक्तं प्रथममागच्छेत् तद्धोमीय"मित्यादौ प्राणाहुत्याधारत्वसंकीर्तनं च. तथा "स यो हैतमेनमग्निं वैश्वानरं पुरुषविधं पुरुषेऽन्तःप्रतिष्ठितं वेदे"ति, वाजिनामेव प्रकरणेऽन्तः प्रतिष्ठितत्वम्, एभ्यो हेतुभ्योऽग्निशब्दसामानाधिकरण्यादिभ्यो वैश्वानरो जाठराग्निर्न परमात्मेति चेन्न, तथा दृष्ट्युपदेशात् । पूर्वोक्तस्य परब्रह्मणो वैश्वानरस्य सर्वात्मतया जाठराग्न्यादिषु तादात्म्यत्वेनोपासनोपदेशात्, असंभवात्, केवलजाठराग्नेस्त्रैलोक्यात्मत्वाद्यसंभवात्, पुरुषमपि चैनमधीयते वाजिनः । "स एषोऽग्निर्वैश्वानरो यत् पुरुष" इति । चशब्दः प्रसिद्धिपरः । प्रसिद्धं च सर्वात्मत्वात् परमात्मन एव पुरुषत्वम्, पुरुषेऽन्तः प्रतिष्ठितत्वं च "सहस्रशीर्षा पुरुषः," "पुरुष एवेदं" "पुरुषान्न परं किंचि"दित्यादौ ॥ २७ ॥

॥ अत एव न देवता भूतं च ॥ २८ ॥

उक्तहेतुभ्य एव देवता महाभूताग्निश्च न वैश्वानरशब्दवाच्यः ॥ २८ ॥

॥ साक्षादप्यविरोधं जैमिनिः ॥ २९ ॥

वैश्वानरस्य परमात्मन उपासनार्थमग्न्यन्तर्यामितयाग्निशब्दसामानाधिकरण्यनिर्देश उक्तः ।

"नरतीति नरः प्रोक्तः परमात्मा सनातनः ।

तस्य च सर्वात्मतया सर्वाभेदव्यपदेशार्हत्वात् । विश्वस्यासौ नरश्च सर्वकारणत्वेन, विश्वेषां नरो नेता, सर्वनियन्तृत्वात् । विश्वे वा नरा नियम्या यस्यासौ विश्वानरः, "नरे संज्ञाया"मिति दीर्घः, स एव वैश्वानरः, स्वार्थे तद्धितः, जैमिनिराचार्यो हि वैश्वानरशब्दो यथा साधारणोऽपि परमात्मासाधारणगुणयोगेन साक्षात् परमात्मनि वर्तते, तथाग्निशब्दस्याप्ययनेतृत्वादियोगेन साक्षात् परमात्मनि वृत्तावविरोधं मन्यते ॥ २९ ॥

"यस्त्वेतमेवं प्रादेशमात्रमभिविमानमात्मानं वैश्वानरमुपास्त" इति द्युसूर्यादिपृथिव्यन्तप्रदेशसंबन्धिमात्रतया परिच्छिन्नत्वमपरिच्छिन्नस्य ब्रह्मणः कथमिति चेदत्राह ॥

॥ अभिव्यक्तेरित्याश्मरथ्यः ॥ ३० ॥

उपासकानुग्रहार्थमभितो विगतयानतयाऽपरिच्छिन्नस्यैव सर्वेश्वरस्य द्युसूर्यादिप्रदेशसंबन्धिमात्रतया परिच्छिन्नत्वमभिव्यक्तिनिमित्तं स्यादित्याश्मरथ्य आचार्यो मन्यते ॥ ३० ॥

उपासकानुग्रहायाभिव्यक्तस्यापि द्युसूर्यादीनां मूर्धाद्यवयवकल्पने किं प्रयोजनमिति चेत् तत्राह ॥

॥ अनुस्मृतेर्बादरिः ॥ ३१ ॥

मूर्धादिपादान्तदेहपरिकल्पनं परमात्मप्राप्तयेऽनुस्मृतेरनुस्मरणार्थतयोपासनार्थमिति बादरिराचार्यो मन्यते ॥ ३१ ॥

एवं त्रैलोक्यशरीरस्य परमेश्वरस्य वैश्वानरशब्दवाच्यत्वे "उर एव वेदिर्लोमानि बर्हि"रित्यादिनोपासकोरआदीनां वेद्यादित्वकल्पने किं प्रयोजनमिति तत्राह ॥

॥ संपत्तेरिति जैमिनिस्तथा हि दर्शयति ॥ ३२ ॥

वैश्वानरोपासकैः क्रियमाणाया वैश्वानरविद्याङ्गभूतप्राणाहुतेरग्निहोत्रत्वसंपत्त्यर्थं तेषां वेद्यादित्वकल्पनमिति जैमिनिराचार्यो मन्यते । तथा हि दर्शयतीयं श्रुतिः, प्राणाहुत्याग्निहोत्रसंपत्तिमेव । "अथ य एतदेवं विद्वानग्निहोत्रं जुहोति तस्य सर्वेषु लोकेषु सर्वेषु भूतेषु सर्वेष्वात्मसु हुतं भवती"ति ॥ ३२ ॥

॥ आमनन्ति चैनमस्मिन् ॥ ३३ ॥

एतं परमात्मानं द्युमूर्धत्वादिमन्तं वैश्वानरमस्मिन्नुपासकदेहे प्राणाहुत्यधिकरणाच्चार्यमामनन्ति च, "तस्य ह वा एतस्यात्मनो वैश्वानरस्य मूर्धैव सुतेजा" इत्यादिना, एतस्यात्मन उपासकस्यात्मनो मूर्धैव यः पूर्वमुपास्यतयोपदिष्टो वैश्वानरस्तस्य "मूर्धा त्वेष आत्मन" इति वैश्वानरात्ममूर्धत्वेन निर्दिष्टः सुतेजा इत्यर्थः । एवमग्रेऽपि श्रुत्यर्थो ज्ञेयः । तथा च, उपासकः स्वमूर्धादीनेव वैश्वानरस्य भगवतो द्युप्रभृतीन् मूर्धान्तान् प्राणाग्निहोत्रसमयेऽनुसंदधतस्तस्योरःप्रभृतीनेव प्राणाहुत्यधिकरणस्य भगवतो वैश्वानरस्य वेद्यादीनग्निहोत्रोपकरणभूतान् परिकल्प्य प्राणाहुतेश्चाग्निहोत्रत्वं परिकल्प्य तेन तमाराधयेदित्युपदिशति, उर एव वेदिरित्यादिनेति भावः ॥३३॥

इति श्रीसनकसंप्रदायप्रवर्तकाद्याचार्यश्रीनिम्बार्कमतानुयायिश्रीमन्मुकुन्दचरणपद्ममकरन्दभृङ्गेण श्रीकेशवकाश्मीरिभट्टेन संगृहीतायां वेदान्तकौस्तुभप्रभाख्यायां ब्रह्मसूत्रवृत्तौ प्रथमाध्यायस्य द्वितीयपादविवरणं समाप्तिमगात् ॥ २ ॥ :: ॥

॥ अथ वेदान्तकौस्तुभप्रभायाः ॥

॥ प्रथमाध्यायस्य ॥

॥ तृतीयपादारम्भः ॥

॥ द्युभ्वाद्यायतनं स्वशब्दात् ॥ १ ॥

"यस्मिन् द्यौः पृथिवी चान्तरिक्षमोतं मनः सह प्राणैश्च सर्वैस्तमेवैकं जानथात्मानमन्या वाचो विमुञ्चथामृतस्यैष सेतु"रिति मुण्डकवाक्ये यस्मिन्निति द्युभ्वाद्याधारत्वेन श्रूयमाणः किं प्रधानं वा जीवो वोत परं ब्रह्मेति संदेहे प्रधानमिति पूर्वः पक्षः । तस्य पूर्वविकारजातहेतुत्वेनायतनत्वोपपत्तेः । सेतुरिति सावधित्वश्रवणात् । आत्मशब्दस्तु प्रधानस्य सत्त्वद्वारा पुरुषप्रीतिहेतुत्वात् तत्रोपचरितः । जीवो वा । मनआदीन्द्रियाधिकरणत्वश्रवणात् । "आरा इव रथनाभौ संहिता यत्र नाड्यः, स एषोऽन्तश्चरते बहुधा जायमान" इतिपरत्र नाडीसंबन्धात्, जायमानत्वश्रवणाच्च । भोक्तृत्वेन भोग्यप्रपञ्चायतनत्वोपपत्तेः । इति प्राप्ते ब्रूमः । द्युभुवावादी यस्य प्राणान्तस्य तस्यायतनमाश्रयः परमात्मैव । कुतः । स्वशब्दात्, स्वस्य परमात्मनोऽसाधारणयोरात्मामृतसेतुशब्दयोः श्रवणात् । आप्नोतीत्यात्मा । सर्वनियन्तृत्वेन तस्य सर्वव्यापकत्वात् । मोक्षप्रापकतया सेतुश्च । स एव सेतुरिव वा । नद्यादिसेतोः कूलोपलम्भकत्ववदस्य संसारपारभूतमोक्षोपलम्भकत्वात् । नाडीसंबन्धस्य परमात्मन्यपि संभवात् । "संततं च शिराभिस्तु लम्बत्याकाशसंनिभ"मित्यादिश्रुतेः । "अजायमानो बहुधा व्यजायत", "अजोऽपि सन्नव्ययात्मे"ति श्रुतिस्मृतिभ्यां, बहुधा जायमानत्वमपि स्वस्वभावमजहत एव भक्तानुग्रहाय तस्य संभवति । तस्य सर्वाधारत्वान्मनआदिजीवोपकरणाधारत्वस्यापि तत्रैवोपपत्तेः ॥ १ ॥

इतश्च ॥

॥ मुक्तोपसृप्यव्यपदेशाच्च ॥ २ ॥

"निरञ्जनः परमं साम्यमुपैति, परात् परं पुरुषमुपैती"ति संसारबन्धान्मुक्तानां प्राप्यत्वेन व्यपदेशाच्च परमात्मैव तत् ॥२॥

तदेव विशदयति ॥

॥ नानुमानमतच्छब्दात् ॥ ३ ॥

अनुमीयत इत्यनुमानं प्रधानमिह द्युभ्वाद्यायतनतया न ग्राह्यम् । कुतः । अतच्छब्दात् । प्रधानप्रतिपादकशब्दाभावात् । अर्थाभावेऽव्ययीभावः ॥ ३ ॥

॥ प्राणभृच्च ॥ ४ ॥

नेति, अतच्छब्दादिति चानुवर्तते । प्राणभृज्जीवोऽपि न द्युभ्वाद्यायतनम् । जीवप्रतिपादकशब्दाभावात् । आत्मशब्दस्तु सर्वव्यापके परमात्मन्येव मुख्यत्वात् ॥ ४ ॥

॥ भेदव्यपदेशात्[1] ॥ ५ ॥

परमात्मनः सकाशाज्जीवस्य भेदोक्तेश्चापि न तदभिन्नम् ॥५॥

॥ प्रकरणात् ॥ ६ ॥

"अथ परा यया तदक्षरमधिगम्यत" इत्यादिना परस्यैव प्रकृतत्वात् ॥ ६ ॥

॥ स्थित्यदनाभ्यां च ॥ ७ ॥

"तयोरन्यः पिप्पलं स्वाद्वत्त्यनश्नन्नन्योऽभिचाकशीती"त्यत्रैकस्य सुपर्णस्य कर्मफलमनश्नत एव देहोपमानतया देहरूपवृत्ते स्थितेरितरस्य कर्माधीनतया कर्मफलादानाच्च ताभ्यां जीवपरमात्मनोर्भेदावगमात् स्वतन्त्रः सर्वज्ञः परमात्मैवामृतसेतुर्द्युभ्वाद्यायतनं भवितुमर्हो न जीव इति । अदृश्यत्वादिगुणको धर्मोक्तेरित्यनेन सिद्धेऽपि परमात्मत्वे मध्यवाक्ये प्रधानादिशङ्कानिराकरणार्थमिदमधिकरणम् ॥ ७ ॥

॥ भूमा संप्रसादादध्युपदेशात् ॥ ८ ॥

इदमाम्नायते छन्दोगैः 'भूमा त्वेव विजिज्ञासितव्य" इति भूमानं भगवो विजिज्ञास" इति । "यत्र नान्यत् पश्यति नान्यच्छृणोति नान्यद्विजानाति स भूमे"ति । तत्र भूमशब्दो हि बहुत्ववाची, बहुशब्दात् पृथ्वादित्वादिमनिचि 'बहोर्लोपो भू च बहो"रिति सूत्रेण प्रकृतिप्रत्यययोर्विकारे भूमेति निष्पन्नः । बहुत्वं चात्र वैपुल्यं, न संख्याविशेषः । बहुशब्दस्य 'बहुषु बहुवचन"मित्यादौ संख्यायामिवाल्पं वा बहु वा यस्य श्रुतस्योपकरोति य इत्यत्राल्पत्वप्रतियोगिवैपुल्येऽपि प्रयोगदर्शनादिहापि नाल्पं सुखमस्तीत्यल्पत्वप्रतिद्वन्द्वितयैव भूमशब्दप्रयोगाच्च विपुलत्वमेवार्थः । विपुलत्वं च गुणोत्कर्षरूपं, न तु परिमाणरूपम् । सुखशब्दसामानाधिकरण्यात् । न हि सुख उत्कृष्टपरिमाणं प्रसिद्धमस्ति । अत्र पुनर्न वैपुल्यरूपधर्मपरो भूमशब्दः । सुखस्य वैपुल्यरूपत्वाभावात् । अल्पप्रतियोगितया निर्देशाच्च । न ह्यत्र वोत्तरत्र वाल्पत्वं भूमप्रतियोगितया निर्दिश्यते । अपि त्वल्पमेव । अतोऽल्पशब्दप्रतियोगितया प्रयुज्यमानो भूमशब्दो वैपुल्याश्रयधर्मिपर एवेति । तत्र संशयः । किमिह भूमशब्दनिर्दिष्टो निरतिशयवैपुल्यविशिष्टसुखरूपः प्राणः, उत परमात्मेति । किं तावत् प्राप्तम् । प्राण इति पूर्वपक्षः । "प्राणो वा आशाया भूया"निति तस्यैव समीपस्थत्वात् । पुनः प्रश्नोत्तराभावाच्च । प्राणशब्देन च प्राणसहचरितो जीवात्मा, न वायुविशेषमात्रम् । 'प्राणो ह पिता, प्राणो माता" इत्यादिना चेतनत्वावगमात् । "तरति शोकमात्मवित्", "आत्मन एवेदं सर्वम्", इत्युपक्रमोपसंहारयोरात्मशब्दप्रयोगात् । "यत्र नान्यत् पश्यती"त्यादिकमपि सुषुप्तौ प्राण इन्द्रियलयात् तत्र दर्शनादिनिवृत्ते जीवे संगच्छेत । "यो वै भूमा तत् सुख"मित्यपि, "सुखमहमस्वाप्स"मिति सुखश्रवणात् तत्रैव संगच्छेत । "प्राणो वा अमृत"मिति श्रुतेरमृतशब्दोऽपि तत्रैव । एवं भूमगुणविशिष्टस्य प्रत्यगात्मत्वे निश्चिते वाक्यशेषोऽपि तदनुगुणतया नेय इत्येवं प्राप्त इदमाहुः । भूमेति भूमशब्दनिर्दिष्टः परमात्मैव । न तु प्राणसहचरितो जीवः । कुतः । संप्रसादादध्युपदेशादिति । सम्यक् प्रसादो यस्मिन् स संप्रसादो जीवात्मा "एष संप्रसादोऽस्माच्छरीरात् समुत्थाय परं ज्योतिरुपसंपद्य स्वेन रूपेणाभिनिष्पद्यते" इत्यादिश्रुतिप्रसिद्धस्तस्मात्, "एष तु वा अतिवदति, यः सत्येनातिवदति" इति । तु शब्देन प्राणोपासकात् सत्योपासकस्याधिकतयोपदेशाद् भूमगुणविशिष्टः सत्यशब्दाभिधेयः परमात्मैव । अयं भावः । श्रीनारदपृष्टेन श्रीसनत्कुमारेण नामादिप्राणावधिकपञ्चदशपदार्थेषु पूर्वपूर्वत उत्तरोत्तरस्याधिक्याभिधानवत् प्राणशब्दनिर्दिष्टाज्जीवादधिकतया निर्दिष्टः सत्यशब्दाभिधेय एव भूमेति ।

कथमधिकतया सत्यस्योपदेशोऽवगम्यत इति चेत् "स एष वा एवं पश्यन्नेवं मन्वान एवं विजानन्नतिवादी भवती"ति प्राणवेदिनोऽतिवादित्वमुक्त्वा "एष तु वा अतिवदति, यः सत्येनातिवदती"ति तुशब्द एव प्राणोपासकात् सत्योपासकं व्यावर्त्य पूर्वातिवादित्वनिमित्तात् प्राणादस्यातिवादित्वनिमित्तं सत्यमधिकतयोपदिशति । सत्येनेतीत्थंभूतलक्षणे तृतीया । सत्येन परब्रह्मणोपास्येनोपलक्षितो योऽतिवदतीत्यर्थः । सत्यशब्दश्च ब्रह्मणि प्रसिद्धः 'तस्य ह वा एतस्य ब्रह्मणो नाम सत्यम्", "सत्यं ज्ञानमनन्तं ब्रह्मे"त्यादिष्वतिवादित्वं च स्वोपास्याधिक्यवादित्वम् । तच्चोपास्यदेवतातिशये पर्यवस्यति । एवं पश्यन्नित्यादौ "लक्षणहेत्वोः क्रियाया" इति हेत्वर्थे शतृप्रत्ययः । ततश्च स्वोपास्यदेवतासाक्षात्कारोऽतिवादित्वहेतुरित्यर्थः । साक्षात्कारप्रीतस्वोपास्यदेवतानुग्रहादीदृशमतिवादित्वं भवतीति भावः ।

किंच, "सोऽहं भगवः सत्येनातिवदानी"ति प्राणातिवादित्वपरित्यागेन सत्यवदनानुज्ञैव प्राणप्रकरणविच्छेदं बोधयतीति ॥ ८ ॥

॥ धर्मोपपत्तेश्च ॥ ९ ॥

अत्र भूम्नि ये धर्माः श्रूयन्ते, ते परमात्मन्येवोपपद्यन्ते । 'यो वै भूमा तदमृतं, स भगवः कस्मिन् प्रतिष्ठितः, स्वे महिम्नि, स एवाधस्ता"दित्यादौ, "आत्मनः प्राण" इत्यादौ च, श्रुतानां स्वाभाविकामृतत्वस्वमहिमप्रतिष्ठत्वसर्वात्मत्वसर्वोत्पादकत्वादीनां परस्मिन्नेवोपपत्तेः । 'अहमेवाधस्तादहमुपरिष्टा"दित्यादिना सर्वात्मत्वोपदेशस्तु भूमगुणाश्रयस्य

[1] १–ग्राच्च, इति पाठान्तरम् ।

परमात्मनः "अथातोऽहंकारादेश" इत्यहंग्रहेणोपदेशोपक्रमादहंग्रहेणोपासनार्थः ।

नन्वहंबुद्धिशब्दयोर्जीवात्मविषययोः कथं भूमपर्यन्तत्वम्। अनहमर्थे च परमात्मन्यहंग्रहोपासनस्याहंतार्थत्वमेवेति चेन्न। "एष त आत्मान्तर्यामी"ति श्रुत्यन्तरात् । भूम्नः सर्वान्तर्यामितया सर्वात्मत्वाज्जीवात्मानं प्रत्यप्यात्मत्वेन तद्विषयाहंबुद्धिशब्दानां परमात्मपर्यन्तत्वस्योपपन्नत्वात् । एतदेव "अथात आत्मादेश" इत्यादिना "त्मैवेदं सर्व"मित्यन्तेनोच्यते । अतोऽहमर्थस्य जीवात्मनोऽप्यात्मा परमात्मेति ज्ञानदार्ढ्यार्थमहंग्रहेण परमात्मोपासनं कर्तव्यमित्यतो भूमा परमात्मैवेति सिद्धम् ॥ ९ ॥

॥ अक्षरमम्बरान्तधृतेः ॥ १० ॥

वाजसनेयिभिर्गार्गीप्रश्न इदमाम्नायते । "कस्मिन् नु खल्वाकाश ओतश्च प्रोतश्चेति, स होवाच, एतद्वै तदक्षरं गार्गि ब्राह्मणा अभिवदन्ति, अस्थूलमनण्वह्रस्वमदीर्घमलोहितमस्नेहमच्छाय"मित्यादि । तत्र संशय्यते । किमेतदक्षरं, प्रधानं जीवो वोत परमात्मेति । तत्राक्षरशब्दस्य प्रधानजीवयोरेव प्रायः प्रयोगदर्शनात् प्रधानं, जीवो वा, न परमात्मेति पूर्वः पक्षः । प्रधानस्य सर्वविकारकारणतया तदास्पदत्वात् । रूपादिहीनत्वाभ्युपगमेन चास्थूलत्वादीनामपि तत्रोपपत्तेः । जीवस्य च स्वभोग्यभूतसर्वाचिद्वस्त्वाधारत्वात् ।

केचिदत्राक्षरशब्दस्य वर्णे प्रसिद्धत्वादक्षरं वर्णरूपमोङ्कार इति पूर्वपक्षयन्ति । तदेतदधिकरणे न संबद्ध"मलोहितमस्नेहमच्छाय"मित्यादिप्रतिषेधानुपपत्तेः ।

ननु "यया तदक्षरमधिगम्यते" इत्यादौ परमात्मन्यप्यक्षरशब्दो दृश्यत इति चेन्न । प्रमाणान्तरप्रसिद्धश्रुतिप्रसिद्धयोराद्यस्य प्रथमं प्रतीतेः । प्रतीतपरिग्रहे विरोधाभावात् । इति प्राप्ते ब्रूमः । अक्षरं परं ब्रह्मैव । कुतः । अम्बरस्य वायुमत आकाशस्यान्तः पारभूतं कारणमव्याकृतं प्रधानं, तस्य धृतस्याक्षरस्य तदाधारकत्वेनोपदेशात् ।

यत् तूक्तम्, श्रुतिप्रसिद्धात् प्रमाणान्तरप्रसिद्धस्य प्रथमं प्रतीतेरिति । तन्न । अक्षरशब्दस्यावयवशक्त्या स्वार्थप्रतिपादने प्रमाणान्तरं तत्प्रतिपादनदशायामपेक्षणीयम् । एतेन "यदूर्ध्वं"मित्यारभ्य लोकत्रयवर्त्ति कृत्स्नवस्त्वाधारतया निर्दिष्टस्याकाशशब्दवाच्यस्याव्याकृतभूतसूक्ष्मप्रधानादिनामधेयस्याधारतयोच्यमानमेतदक्षरं न प्रधानं किंतु परमात्मैवेत्युक्तम् ॥ १० ॥

तर्हि जीवोऽस्तु । तस्यापि प्रधानधृत्युपपत्तेरस्थूलत्वादिधर्मवत्त्वोपपत्तेरक्षरशब्दवाच्यत्वाच्चेत्याशङ्क्याह ॥

॥ सा च प्रशासनात् ॥ ११ ॥

सा चाम्बरान्तधृतिः परमात्मन एव कर्म । कुतः । "एतस्य वा अक्षरस्य प्रशासने गार्गि सूर्याचन्द्रमसौ विधृतौ तिष्ठत" इत्यादिश्रूयमाणात् प्रशासनात् । प्रशासनं प्रकृष्टं शासनमप्रतिहताज्ञा । न चेदृशं स्वप्रशासनायत्तं सर्वधारकत्वं जीवे संभवति ॥ ११ ॥

॥ अन्यभावव्यावृत्तेश्च ॥ १२ ॥

अन्यस्य प्रधानादेर्भावोऽन्यभावः । तस्य व्यावृत्तेर्हेतोः परमात्मैवाक्षरशब्दवाच्यः । "तद्द्वा एतदक्षरं गार्ग्यदृष्टं द्रष्टृ, अश्रुतं श्रोतृ अमतं मन्तृ अविज्ञातं विज्ञातृ नान्यदतोऽस्ति, द्रष्टृ नान्यदतोऽस्ति श्रोतृ, नान्यदतोऽस्ति मन्तृ, नान्यदतोऽस्ति विज्ञातृ, एतस्मिन् नु खल्वक्षरे गार्ग्याकाश ओतश्च प्रोतश्चे"ति वाक्यशेषोऽस्याक्षरस्य ब्रह्मणोऽन्यत्वं व्यावर्तयति । तत्र द्रष्टृत्वादिचेतनधर्मेण प्रधानभावः, सर्वैरदृष्टस्यैव सतः सर्वद्रष्टृत्वाद्युपदेशाच्च जीवभावो व्यावर्त्यते । यथैतदक्षरमन्यैरदृष्टं सदन्येषां द्रष्टृ च सत् स्वातिरिक्तस्य सर्वस्याधारभूतम्, एवमनेनादृष्टमेतस्य द्रष्टृ च सदेतस्याधारभूतमन्यन्नास्तीतिवन्नान्यदतोऽस्ति द्रष्टेत्यादिवाक्यशेषोऽन्यस्य सद्भावं व्यावर्तयन्नस्याक्षरस्य प्रधानभावजीवात्मभावौ प्रतिषेधति । तस्मादत्राक्षरशब्दवाच्यः परमात्मैवेति सिद्धम् ॥ १२ ॥

॥ ईक्षतिकर्मव्यपदेशात् सः ॥ १३ ॥

आथर्वणिकैः प्रश्नोपनिषद्येवं पठ्यते । "यः पुनरेतं त्रिमात्रेणोमित्येतेनैवाक्षरेण परं पुरुषमभिध्यायीत, स तेजसि सूर्ये संपन्नो, यथा पादोदरस्त्वचा विनिर्मुच्यते, एवं हैव स पाप्मनां विनिर्मुक्तः, स सामभिरुन्नीयते ब्रह्मलोकं, स एतस्माज्जीवघनात् परात् परं पुरि शयं पुरुषमीक्षत" इति ।

तत्र संशयः । ध्यायतीक्षतिविषयः किं समष्टिजीवश्चतुर्मुख उत परमात्मेति । अत्र परब्रह्मशब्दवाच्यश्चतुर्मुख एव तयोर्विषय इति पूर्वः पक्षः । पूर्वस्मिन्नेकमात्रद्विमात्रप्रणवोपासकस्य मनुष्यलोकान्तरिक्षलोकाप्तिफलमुक्त्वा त्रिमात्रोपासकस्य फलत्वेन कथ्यमानोऽन्तरिक्षात् परः समष्टिजीवस्य हिरण्यगर्भस्य लोकः प्रत्येतव्यस्तल्लोकगतपुरुषेक्षणविषयः स लोकाधिपतिः स एवेति देहेन्द्रियादिभ्यः परः । अतश्चतुर्मुख इति प्राप्ते ब्रूमः । परमात्मैवेक्षतिकर्म । कुतः । व्यपदेशात् । "तमोङ्कारेण वायतनेनान्वेति विद्वान् यत् तच्छान्तमजरममृतमभयं परं परायणं चे"ति परमात्मधर्माणामत्र व्यपदेशात् । यस्य हि कर्मकृतदेहासंयोगः स जीवघनः । स च "यो ब्रह्माणं विदधाति पूर्वं"मित्यादिषु चतुर्मुखस्यापि श्रूयते । तर्ह्यन्तरिक्षात् परश्चतुर्मुखलोकः, स्वर्गादीनां मध्ये सत्त्वात् । एवं च

ब्रह्मैव लोक इति ब्रह्मलोकशब्दोऽपि निषादस्थपतिन्यायेन परमात्मलोकवाचकः ॥ १३ ॥

॥ दहर उत्तरेभ्यः ॥ १४ ॥

इदमाम्नायते छन्दोगैः । "अथ यदिदमस्मिन् ब्रह्मपुरे दहरं पुण्डरीकं वेश्म, दहरोऽस्मिन्नन्तराकाशस्तस्मिन् यदन्तस्तदन्वेष्टव्यं, तद्वाव विजिज्ञासितव्य"मिति । तत्र संशय्यते । किमिह दहरे हृत्पुण्डरीके श्रूयमाणो दहराकाशो भूताकाश उत जीवोऽथ परमात्मेति । किं तावत् प्राप्तम् । भूताकाश इति । आकाशशब्दस्य तत्रैव प्रसिद्धेः । "एकस्यैव यावान् वायमाकाशस्तावानेषोऽन्तर्हृदय आकाश" इत्युपमानोपमेयभावस्तु बाह्याभ्यन्तरकल्पितभेदकृतः । जीवो वा । "अथ य एष संप्रसादोऽस्माच्छरीरात् समुत्थाये"ति, तस्याप्यत्र प्रतीतेः । पुरां स्वामित्वाल्पित्वप्रत्ययाच्च, प्रजापतिवाक्येऽपहतपाप्मत्वादिगुणकत्वावगतेश्च । इति प्राप्ते प्रचक्ष्महे । दहराकाशः परमात्मा । कुतः । उत्तरेभ्य आत्मत्वापहतपाप्मत्वादिसत्यकामत्वसत्यसंकल्पत्वादिहेतुभ्यः । दहराकाशज्ञस्य सत्यसंकल्पत्वादिप्राप्तिश्रवणाच्च । दहराकाशस्य भूताकाशत्वे हृदयावच्छेदनिबन्धनोऽपि नोपमानोपमेयभावः संभवति । हृदयावच्छिन्नस्य द्यावापृथिव्यादिसर्वाश्रयत्वानुपपत्तेः ।

न च दहराकाशस्य परमात्मत्वेऽपि बाह्याकाशोपमेयत्वासंभवः, तस्य सर्वस्माज्ज्यायस्त्वश्रवणादिति वाच्यम् । बाह्याकाशोपमानस्य सर्वज्यायस्त्वप्रतिपादकवाक्यस्य च हृत्पुण्डरीकमध्यवर्तित्वप्राप्ताल्पत्वनिवृत्तिपरत्वात् । इषुवद्गच्छति सूर्य इतिवाक्यस्य गतिमान्द्यनिवृत्तिपरत्ववत् ।

ननु च दहरोऽस्मिन्नन्तराकाशः । "तस्मिन् यदन्तस्तदन्वेष्टव्य"मिति दहराकाशान्तर्वर्तिनस्तदन्यस्यान्वेष्टव्यतया प्रक्रान्तत्वाद्दहराकाशोऽपहतपाप्मेत्यादिना वक्तुं शक्य इति चेत् । श्रुत्यैव तदन्वेष्टव्यमिति तच्छब्देन दहराकाशं तदन्तर्वर्तिगुणगणं च परामृश्य तदुभयस्यान्वेष्टव्यत्वेनोपदिश्यमानत्वात् । तथाहि, उपास्यतया समीपस्य ब्रह्मणः पुरत्वेनोपासकशरीरं, तन्मध्ये तदवयवभूतं पुण्डरीकाकारमण्डपरिमाणं हृदयं च, ब्रह्मणो वेश्मत्वेन निर्दिश्य, तत्स्थं परमात्मानं सूक्ष्मतया ध्येयं दहराकाशशब्देनोक्त्वा, तदन्तर्वर्ति चापहतपाप्मत्वादिकल्याणगुणगणं ध्येयतयोपदिशति श्रुतिः । कथमेतदवगम्यत इति चेत् । "यावान् वायमाकाशस्तावानेषोऽन्तर्हृदय आकाश" इति दहराकाशस्य वियदुपमत्वमुक्त्वा "उभे अस्मिन् द्यावापृथिवी अन्तरेव समाहिते" इत्यादिना सर्वजगदाधारतया निर्दिष्टस्य तस्यैव "यच्चास्येहास्ति यच्च नास्ति, सर्वं तदस्मिन् समाहित"मित्यस्मिन्नित्यनेन परामर्शात् । तस्यैव "नास्य जरयैव जीर्यती"त्यादिना देहधर्मैरलिप्तत्वम्, "एतत् सत्यं ब्रह्मपुर"मित्यनेन निखिलविश्वाधारत्वम्, "अस्मिन् कामाः समाहिता" इति कामशब्दितकल्याणगुणाधारत्वं चाभिधाय, "एष आत्मापहतपाप्म" त्यादिना दहराकाशस्यैवात्मत्वं काम्यभूतकल्याणगुणवत्त्वादि स्फुटीकृत्य तं तद्गुणांश्चाविदुषामन्तवत्फलप्राप्तिमसत्यसंकल्पत्वं चोक्त्वा "अथ इहात्मानमनुविद्य व्रजन्त्येतांश्च सत्यान् कामा"निति वाक्यशेषस्तमेव दहराकाशशब्दनिर्दिष्टमात्मानं तद्गुणांश्च विदुषां तत्प्रसादात् सर्वकामप्राप्तिं सत्यसंकल्पतां च दर्शयतीति ॥ १४ ॥

इतश्च दहराकाशः परमात्मा ॥

॥ गतिशब्दाभ्यां तथाहि दृष्टं लिङ्गं च ॥ १५ ॥

"तद्यथा हिरण्यनिधिं निहितं क्षेत्रज्ञा उपर्युपरि संचरन्तो न विन्देयुरेवमेवेमाः सर्वाः प्रजा अहरहर्गच्छन्त्य एतं ब्रह्मलोकं न विन्दन्त्यनृतेन हि प्रत्यूढा" इत्यत्रैतमिति प्रकृतं निर्दिश्य तत्राहरहः सर्वक्षेत्रज्ञानां गत्या गन्तव्यस्य दहराकाशस्य ब्रह्मलोकशब्दनिर्देशेन दहराकाशस्य ब्रह्मलोकशब्दपरं ब्रह्मैवेत्यवगम्यते । तथाहि दृष्टं, तथैवान्यत्र "एवमेव खलु सोम्येमाः सर्वाः प्रजाः सति संपद्य न विदुः सति संपद्यामह इति सत आगम्य न विदुः सत आगच्छाम" इति परमात्मन्येव सर्वप्राणिनामहरहः सुषुप्तिकाले गमनं दृष्टं, तथैव "एष ब्रह्मलोकः सम्राडिति होवाचे"ति ब्रह्मलोकशब्दोऽपि परमात्मनि दृष्टः । एतदेव च तत्र सर्वप्रजानामहरहर्गमनं ब्रह्मैव लोक इति समासेन दहरसमानाधिकरणतया निर्दिष्टो ब्रह्मलोकशब्दस्य दहराकाशस्य परब्रह्मत्वे लिङ्गं गमकम् ॥ १५ ॥

॥ धृतेश्च महिम्नोऽस्यास्मिन्नुपलब्धेः ॥ १६ ॥

"अथ य आत्मा स सेतुर्विधृतिरेषां लोकानामसंभेदाये"ति प्रकृतस्य दहरस्यैव जगद्विधरणश्रवणाच्च । धृतिर्हि जगद्विधरणं, सा च परस्य महिमरूपा । अस्य धृत्याख्यस्य महिम्नोऽस्मिन् दहराकाशे "एतस्य वा अक्षरस्य प्रशासने गार्गि सूर्याचन्द्रमसौ विधृतौ तिष्ठतः, "एष सेतुर्विधरण एषां लोकानामसंभेदाये"त्यादिषु श्रुतिषूपलब्धेरयं दहराकाशः परमात्मा ॥ १६ ॥

॥ प्रसिद्धेश्च ॥ १७ ॥

"आकाशो ह वै नामरूपयोर्निर्वहिता, यद्येष आकाश आनन्दो न स्यात्, आकाशादेव समुत्पद्यन्ते" इत्यादौ परमात्मन्येवाकाशशब्दस्य प्रसिद्धेश्च परमेश्वरधर्मविशेषितेनाकाशशब्देनैव भूताकाशशङ्का निराकृता ॥ १७ ॥

॥ इतरपरामर्शात् स इति चेन्नासंभवात् ॥ १८ ॥

ननु यथा वाक्यशेषबलेन दहराकाशस्य परमात्मपरत्वमुक्तं, तथा "अथ य एष संप्रसादोऽस्माच्छरीरात् समुत्थाय परं ज्योतिरुपसंपद्य स्वेन रूपेणाभिनिष्पद्यते, एष आत्मेति होवाचैतदमृतमेतदभयमेतद्ब्रह्मे"ति दहरवाक्यमध्यगतस्य जीवस्यापि परामर्शात्, आकाशशब्दस्यापि प्रकाशादियोगेन जीवे वृत्तिसंभवाज्जीव एव दहरः स्यादिति चेन्न । असंभवात् । पूर्वोक्तापहतपाप्मत्वादिगुणानां जीवेऽसंभवात् ॥ १८ ॥

॥ उत्तराच्चेदाविर्भूतस्वरूपस्तु ॥ १९ ॥

दहरविद्यात उत्तरस्माज्जीवपरात् प्रजापतिवाक्याज्जीवेऽप्यपहतपाप्मत्वादिगुणाष्टकमवगम्यते । अतः स एव दहराकाश इति निश्चीयते, इति चेत् तत्राह । आविर्भूतस्वरूपस्त्विति । तुशब्दः शङ्कानिरासार्थः । नेत्यनुवर्तते । नोत्तरस्मादपि वाक्यादिह जीवाशङ्का कार्या । यतस्तत्र प्रजापतिवाक्येऽनादिकालप्रवृत्तपुण्यपापकर्ममूलजायदाद्यवस्थाभिस्तिरोहितगुणकस्य दहराकाशशब्दिततदुपसंपत्त्याविर्भूतस्वरूपस्य जीवस्यापहतपाप्मत्वादिगुणावत्तयोपदेशा इति ।

किंच, आविर्भूतस्वरूपस्यापि जीवस्य सेतुत्वसर्वजगद्विधरणत्वचेतनाचेतननियन्तृत्वासंभवादपि न दहराकाशो जीवः शङ्क्यः ॥ १९ ॥

यद्येवं तर्हि किमर्थं दहरवाक्ये जीवपरामर्श इति चेत् तत्राह ॥

॥ अन्यार्थश्च परामर्शः ॥ २० ॥

"परं ज्योतिरुपसंपद्य स्वेन रूपेणाभिनिष्पद्यत" इति श्रुतेः । पूर्वमविद्यातिरोहितापहतपाप्मत्वादिगुणस्वरूपस्य जीवस्य परज्योतिःशब्दितदहराकाशप्राप्त्या स्वस्वरूपाविर्भावो भवति । दहराकाशस्य जीवस्वरूपाविर्भावहेतुत्वप्रदर्शनार्थः प्रजापतिवाक्योक्तजीवपरामर्शः ॥ २० ॥

॥ अल्पश्रुतेरिति चेत् तदुक्तम् ॥ २१ ॥

दहरोऽस्मिन्नित्यल्पत्वश्रुतेरणुपरिमाणकजीव एव दहरवाक्य उक्त इति चेत्, तत्र यद्वक्तव्यं, तन्निचाय्यत्वादेवं व्योमवदित्यनेनैवोक्तम् ॥ २१ ॥

इतश्च जीवो न दहराकाश इत्याह ॥

॥ अनुकृतेस्तस्य च ॥ २२ ॥

चो नियोगे । अनुकृतिस्तदनुकरणं, तत्साम्यापत्तिरिति यावत् । तस्य दहराकाशस्य परमात्मनोऽनुकरणाज्जीवोऽपहतपाप्मत्वादिगुणकः । दहराकाशस्तु नित्याविर्भूततद्गुणाष्टकः । अतः प्रजापतिनिगदितोऽनुकर्ता जीवो न दहरशब्दोदितानुकार्यं ब्रह्म भवितुमर्हतीति ॥ २२ ॥

॥ अपि[*] स्मर्यते ॥ २३ ॥

जीवस्य मुक्तदशायां परमात्मसाम्यापत्तिः स्मर्यते । "मम साधर्म्यमागता" इति । केचित् तु "तमेव भान्तमनुभाति सर्वं, तस्य भासा सर्वमिदं विभाती"ति वाक्ये यं भान्तमनुभाति सर्वं यस्य च भासा सर्वमिदं विभाति, स किं तेजो धातुः कश्चिदुत परमेश्वर इति संदिह्य तेजःस्वभावानामेव सूर्यादीनां भानप्रतिषेधात् तत्सजातीयः कश्चित् तेजो धातुरिति पूर्वपक्षयित्वा "प्राज्ञमात्मानं भान्तं सर्वेषां सूर्यादीनामनुभानात् प्राज्ञ एव स इति सिद्धम् । तेन सूत्रद्वयमिदमधिकरणान्तरप्रवृत्तमिति, तत् तु "ज्योतिश्चरणाभिधाना"दित्यादिष्वेव परमात्मनो भारूपत्वावगतेः, "अदृश्यत्वादिगुणको धर्मोक्तेः," "द्युभ्वाद्यायतन"मित्यधिकरणद्वयेन तत्प्रकरणस्य परमात्मपरत्वप्रतिपादनाच्च पूर्वपक्षानुत्थानात् सूत्रान्तरवैरूप्याच्चायुक्तमित्यन्ये वदन्ति ॥ २३ ॥

॥ शब्दादेव प्रमितः ॥ २४ ॥

"अङ्गुष्ठमात्रः पुरुषो मध्य आत्मनि तिष्ठति," "अङ्गुष्ठमात्रः पुरुषो ज्योतिरिवाधूमकः," "अङ्गुष्ठमात्रः पुरुषोऽन्तरात्मा सदा जनानां हृदये संनिविष्ट" इति कठवल्लीपाठे, अङ्गुष्ठप्रमितो जीव उत परमात्मेति संदेहे "प्राणाधिपः संचरति स्वकर्मभिः, अङ्गुष्ठमात्रो रवितुल्यरूप" इति श्वेताश्वतरश्रवणात्, "अङ्गुष्ठमात्रं पुरुषं निश्चकर्ष यमो बला" दिति वनपर्वश्रवणाच्च, जीवस्यैवाङ्गुष्ठमात्रत्वसंभवात् स एवेति प्राप्ते, राद्धान्तः । अङ्गुष्ठप्रमितः परमात्मैव । कुतः । शब्दादेव । "ईशानो भूतभव्यस्ये"ति तद्वाचिशब्दादेव । न चेदृशमैश्वर्यं कर्मतन्त्रे जीवे संभवति ॥ २४ ॥

कथं तर्ह्यनवच्छिन्ने परमात्मनि प्रमितत्वश्रुतिरित्याह ॥

॥ हृद्यपेक्षया तु मनुष्याधिकारत्वात् ॥ २५ ॥

तुर्नियोगे । अपरिच्छिन्नस्योपासनार्थमुपासकहृदि गतस्य तद्धृदयापेक्षयैवेदमङ्गुष्ठपरिमाणत्वम् ।

ननु प्राणिभेदेन हृदयमानभेदात् तदपेक्षयापि कथमङ्गुष्ठमात्रत्वमिति चेत्, तत्राह । मनुष्येति । समान्यतः प्रवृत्तमपि शास्त्रं मनुष्याणामेवोपासकत्वार्थित्वादिसंभवात् तानेवाधिकरोति । मितहृदयापेक्षयेदमुक्तम् । तेन गजादिहृदयानामनङ्गुष्ठमात्रत्वेऽप्यविरोधः । जीवस्याप्यङ्गुष्ठमात्रत्वं तावद्धृदयान्तर्वर्तित्वात् तदपेक्षमेव, न स्वरूपेण । तस्याणुत्वश्रवणादिति स्थितम् ॥ २५ ॥

॥ तदुपर्य्यपि बादरायणः संभवात् ॥ २६ ॥

शास्त्रस्य मनुष्याधिकारिकत्वात् तेषां ब्रह्मोपासनसंभवेन

* अपि चेति शंकरभाष्यसंवलितमुद्रितपुस्तकपाठः ।

तद्धृदयापेक्षयाङ्गुष्ठमात्रश्रुतिर्ब्रह्मणि संगतार्थेत्युक्तम्। तत्प्रसङ्गेन देवानामपि ब्रह्मोपासनेऽधिकारोऽस्ति न वेति संशये तत्रेन्द्रादीनां मन्त्रमूर्तिमत्त्वेन देहादिमत्त्वाभावे सामर्थ्याद्यभावाच्च देवादिषु देवोपासनं संभवति। इति प्राप्ते "तद् ब्रह्मोपासनं मनुष्योपरिवर्तमानेषु देवादिष्वपि संभवतीति भगवान् बादरायणो मन्यते। कुतः। संभवात्। स्वर्गादिभोगानामनित्यत्वसातिशयत्वादिपर्यालोचनया मोक्षस्य च निरतिशयत्वपरमानन्दत्वशाश्वतत्वश्रवणेन तेष्वर्थित्वसंभवात्। तद् यथेह कर्मचितो लोकः क्षीयते," "तन्महिमानमेति वीतशोकः," "नारायणे सायुज्यमाप्नोती"त्यादिश्रुतेः।

"न केवलं द्विजश्रेष्ठ नरके दुःखपद्धतिः।
स्वर्गेऽपि पातभीतस्य क्षयिष्णोर्नास्ति निर्वृतिः।

इति स्मृतेः।

किंच, नामरूपव्याकरणश्रुतेर्मन्त्रार्थवादेतिहासपुराणादिभ्यश्च तेषां विग्रहादिमत्त्वसंभवः। अन्तर्धानादिशक्तिमत्त्वाच्च न तत्प्रत्यक्षम्।

न च मन्त्रादिजन्यज्ञानस्य मिथ्यात्वं वक्तुं शक्यम्। बाधकप्रत्यक्षादिप्रमाणान्तराभावात्।

किंच, "विश्वानि देवं च पुनाति विद्वा"नित्यादिभिर्मन्त्रैस्तेषु विद्वत्त्वसंभवः। प्रजापतिविद्यायामिन्द्रविरोचनयोर्जिज्ञासुत्वश्रवणादपि "तद्यो यो देवानां प्रत्यबुध्यत स एव तदभवत्, तथर्षीणां तद्देव ज्योतिषां ज्योतिरायुर्होपासतेऽमृत"मित्याद्यधिकारविधायकप्रमाणसद्भावाच्च। तत्राप्याङ्गुष्ठमात्रस्य श्रवणं स्वाङ्गुष्ठापेक्षया न विरुद्धमिति॥ २६॥

॥ विरोधः कर्मणीति चेन्नानेकप्रतिपत्तेर्दर्शनात्॥ २७॥

देवादीनां विग्रहवत्त्वे कर्मणि यागादावेकस्य युगपदनेकयागेषु संनिधानानुपपत्तेर्विरोधः स्यादिति चेन्न। कुतः। अनेकप्रतिपत्तेर्दर्शनात्। शक्तिमत्सु सौभर्यादिषु युगपदनेकशरीरप्रतिपत्तिदर्शनात्। योगशास्त्रे च।

"आत्मनो वै शरीराणि बहूनि भरतर्षभ।
योगी कुर्याद्बलं प्राप्य तैश्च सर्वैर्महीं चरेत्॥
प्राप्नुयाद्विषयान् कैश्चित् कैश्चिदुग्रं तपश्चरेत्।
संक्षिपेच्च पुनस्तानि सूर्यो रश्मिगणानिव"॥

इति॥ २७॥

॥ शब्द इतिचेन्नातः प्रभवात् प्रत्यक्षानुमानाभ्याम्॥ २८॥

विरोध इत्यनुवर्तते। देवादीनां विग्रहवत्त्वेऽप्युक्तहेतोर्न कर्मणि विरोधः। वैदिकशब्दे तु स स्यादेव। विग्रहयोगे हि सावयवत्वेनास्मदादीनामिव तेषामपि जननमरणयोगादनित्यत्वं दुर्वारम्। ततश्चेन्द्राद्यर्थोपपत्तेः पूर्वत्र तद्विनाशात् परत्र चेन्द्रादिवाचकवैदिकशब्दानामर्थशून्यत्वमनित्यत्वं वा स्यात्। तथात्वे च "नित्यः शब्दो नित्येनार्थेन नित्यसंबन्धवत्तया प्रतीयत" इति वैदिके शब्दे यन्नित्यत्वं पूर्वतन्त्र उक्तं, तद्विरुद्धं स्यादिति चेन्न। कुतः। अतः प्रभवात्। अतो वैदिकादेव नित्यतदाकृतिवाचकादिन्द्रादिशब्दादिन्द्राद्यर्थस्य प्रभवात्। प्रजापतिर्हि पूर्वपूर्वदेवादिव्यक्तौ विनष्टायां वैदिकाद् देवाद्याकृतिविशेषवाचकाच्छब्दाद् देवाद्याकृतिविशेषं मनसिकृत्य तत्तदाकारमपरं देवादिकं कुलालादिरिव घटादिकं सृजतीति वैदिकशब्दस्य न कश्चिद्विरोधः। न हि चैत्रदेवदत्तडित्थादिशब्दवत् केवलव्यक्तिवचना अर्थानन्तरभाविनः साङ्केतिका देवादिशब्दाः प्रवृत्ताः, अपितु गवादिशब्दवद् व्यक्तिप्रभवहेतुत्वेन प्रागेव विद्यमानाः स्थूलसूक्ष्मभावेनानुस्यूतव्यक्त्यविनाभूताकृतिवाचकाः। जातिमतां हि व्यक्तीय उत्पद्यन्ते, न जातयः। जातिभिश्च शब्दानां संबन्धो न व्यक्तिभिः। व्यक्तीनामानन्त्यात् संबन्धग्रहणानुपपत्तेः। एवं च देवादिव्यक्तिषूत्पद्यमानास्वपि गवादिशब्देष्विवाकृतीनां नित्यत्वान्नित्य एव तेषां वाच्यवाचकभावः। इन्द्रादिव्यक्तेरेकत्वेऽप्यतीतानागतव्यक्तिभेदेन जात्युपपत्तेः। वैदिकात् तत्तच्छब्दात् तत्तदर्थविशेषं स्मृत्वा सृजतीति कुतोऽवगम्यते। प्रत्यक्षानुमानाभ्याम्। प्रत्यक्षं श्रुतिर्निरपेक्षत्वात्, अनुमीयमानश्रुतिसापेक्षत्वादनुमानं स्मृतिः। श्रुतिस्तावत्, "वेदेन नामरूपे व्याकरोत् सतासती प्रजापतिः," तथा "स भूरिति व्याहरन् स भूमिमसृजत," "स भुव इति व्याहरन् सोऽन्तरिक्षमसृजते"त्यादिः। स्मृतिरपि,

"अनादिनिधना नित्या वागुत्सृष्टा स्वयंभुवा।
आदौ वेदमयी दिव्या यतः सर्वाः प्रवृत्तयः॥

नाम रूपं च भूतानां कर्मणां च प्रवर्तनम्।
वेदशब्देभ्य एवादौ निर्ममे स महेश्वरः॥

सर्वेषां च स नामानि कर्माणि च पृथक् पृथक्।
वेदशब्देभ्य एवादौ पृथक्संस्थाश्च निर्ममे॥

इत्यादिका वाचकशब्दपूर्विकां सृष्टिं दर्शयति॥ २८॥

॥ अत एव च नित्यत्वम्॥ २९॥

अत; एव प्रजापतिसृष्टेः शब्दपूर्वकत्वादेव, शब्दमयस्य वेदस्य नित्यत्वम्। विश्वामित्रेण प्रोक्तं वैश्वामित्रं सूक्तं, कठेन प्रोक्तं काठकमित्यादिनिर्वचनं तु तत्तदुच्चरितमात्रविषयम्। "प्रजापतिर्हि प्रत्ययानन्तरं मन्त्रकृतो वृणीते विश्वामित्रस्य सूक्तं भवती"त्यादिवेदस्थविश्वामित्रादिशब्दैस्तत्तदा-

कृतिशक्त्यादिकं विचिन्त्य तत्तदाकारांस्तत्तच्छक्तियुक्तांस्तान् निर्माय तत्तन्मन्त्रादिप्रकाशने विनियुङ्क्ते। तेऽपि तदाहितशक्तयस्तत्तदनुगुणं तपस्तप्त्वा नित्यसिद्धान् पूर्वपूर्वविश्वामित्रादिप्रकाशितान् वेदैकदेशभूतमन्त्रादीनधीत्यैव स्वरतो वर्णतश्चास्खलितान् पठन्तीति तेषां मन्त्रादिकृत्त्वेऽपि वेदनित्यत्वमुपपन्नम् ॥ २९ ॥

स्यादेवं नैमित्तिकप्रलये। प्राकृतप्रलये तु प्रजापत्याद्यव्याकृतान्तसर्वतत्त्वस्याव्याकृतपरिणामरूपशब्दमयवेदस्य च विनाशोक्तेरव्याकृतसृष्ट्यावृत्तौ कथं वेदस्य नित्यत्वमिति चेत् तत्राह ॥

॥ समाननामरूपत्वाच्चावृत्तावप्यविरोधो दर्शनात् स्मृतेश्च ॥ ३० ॥

चशब्दः शङ्कानिरासार्थः। आवृत्तावपि, महाप्रलयावसाने प्रथमसृष्टावपि, न विरोधः। कुतः समाननामरूपत्वात्। कल्पादौ सृज्यमानपदार्थानां कल्पान्तरातीतैः पदार्थैस्तुल्याद्यासंस्थानादिमत्त्वात्।

अयं भावः। प्राकृतप्रलये भगवान् श्रीपुरुषोत्तमो भोक्तृभोग्यजातं सर्वं विश्वं संहृत्य सूक्ष्मतया स्वस्मिन् संस्थाप्य सशक्तिकस्तूष्णीं भूत्वास्ते स्म। तदा वेदास्तद्वाच्यास्तत्तदाकृतयश्च नित्याः स्वस्मिन्नेकीभूय तिष्ठन्ति। प्रलयावसाने च सर्वज्ञो भगवान् पूर्वसंस्थानं विश्वं विचिन्तयन् बहु स्यामिति संकल्पपूर्वकं स्वस्मिन् सूक्ष्मशक्त्यात्मना प्रलीनं भोक्तृभोग्यजातं विभज्य महदादिचतुर्मुखपर्यन्तमखण्डं पूर्ववत् सृष्ट्वा वेदांश्च पूर्वानुपूर्वीविशेषसंस्थायुक्तान् प्रकटीकृत्य ब्रह्मणे तान् मनसोपदिश्य पूर्ववद्बहुधाकारविश्वसृष्टौ तं नियुज्य स्वयं च तदन्तरात्मतयावतिष्ठते। ब्रह्मापि तदनुग्रहलब्धवीर्यस्तैर्वेदशब्दैस्तत्तदाकृतीर्विमृश्य कुलालः पूर्वतुल्यान् घटादीनिव देवादीन् सृजतीति।

एतदेव हि वेदस्यापौरुषेयत्वं नित्यत्वं च। यत् पूर्वपूर्वोच्चारणक्रमजनितसंस्कारेण तमेव क्रमविशेषं स्मृत्वा तेनैव क्रमेणोच्चार्यमाणत्वमिति। कुत इदमवगम्यत इति चेत्, तत्राह। दर्शनात् स्मृतेश्च।

दर्शनं श्रुतिस्तावत्, "यो ब्रह्माणं विदधाति पूर्वं, यो वै वेदांश्च प्रहिणोति तस्मै," "सूर्याचन्द्रमसौ धाता यथापूर्वमकल्पय"दित्यादिका। स्मृतिरपि।

तत्र सुप्तस्य देवस्य नाभौ पद्ममजायत।
तस्मिन् पद्मे महाभाग वेदवेदाङ्गपारगः॥
ब्रह्मोत्पन्नः स तेनोक्तः प्रजाः सृज महामते।
यथर्तावृतुलिङ्गानि नामरूपाणि पर्यये॥
दृश्यन्ते तानि तान्येव तथा भावा युगादिषु।
ऋषीणां नामधेयानि याश्च वेदेषु दृष्टयः॥
शर्वर्यन्ते प्रसूतानां नामान्येभ्यो ददात्यजः।
तथाभिमानिनो जीवास्तुल्यास्तेषां मतैरिह॥
देवा देवैरतीतैर्हि रूपैर्नामभिरेव वा।

इत्येवमादिका।

अतो देवादीनामर्थ्यार्थित्वादिसंभवाद् ब्रह्मविद्याधिकारे न कश्चिद्विरोधः॥ ३०॥

॥ मध्वादिष्वसंभवादनधिकारं जैमिनिः॥ ३१॥

देवादीनामपि ब्रह्मविद्यायामधिकारः प्रसाधितः। इदानीं यासु, "असौ वा आदित्यो देवमध्वि"त्यादिना छान्दोग्योक्तमध्वादिषु विद्यासु देवा एवोपास्यास्तासु, तेषामधिकारोऽस्ति न वेति संशये जैमिनिराचार्यस्त्वनधिकारं मन्यते। कुतः। असंभवात्। आदित्यवस्वादीनामुपास्यान्तर्गतानामुपासकत्वासंभवात्। प्राप्तृत्वादेव वसुत्वादेः, प्राप्यत्वासंभवात्। न हि वस्वादिभिरुपास्या आदित्यवस्वादयोऽन्ये संभवन्ति। प्राप्तत्वादेव वसुत्वादित्यत्वादेः, सिद्धत्वेनार्थित्वासंभवाच्च॥ ३१॥

॥ ज्योतिषि भावाच्च॥ ३२॥

"तद्देवा ज्योतिषां ज्योतिरायुर्होपासतेऽमृत"मिति श्रुतेर्ज्योतिषि परस्मिन् ब्रह्मणि देवानामुपासकत्वेन भावाच्च न मधुविद्यास्वधिकारः। ब्रह्मोपासनस्य देवमनुष्योभयसाधारणत्वेऽपि ज्योतिषां ज्योतिः परब्रह्म देवा उपासत इति विशिष्य कथनं वस्वादिदेवानां ब्रह्मेतरोपासननिवृत्तिं द्योतयति॥ ३२॥

एवं प्राप्ते॥

॥ भावं तु बादरायणोऽस्ति हि॥ ३३॥

तुः पूर्वपक्षव्यावर्तकः। मध्वाद्युपासनास्वपि वस्वादीनां भावमधिकारसद्भावं भगवान् बादरायणो मन्यते। हि यतश्चादित्यवस्वादीनामपि सतामिह स्वान्तर्यामिब्रह्मोपासनेन कल्पान्तरेष्वादित्यवसुत्वादिप्राप्तिपूर्वकब्रह्मलिप्सासंभवोऽस्ति। तथा चात्र कार्यकारणोभयावस्थब्रह्मोपासनस्य विधीयमानत्वाद्वस्वादित्यादिशब्दानां स्वान्तर्यामिब्रह्मपर्यन्तत्वेन वस्वादीनामेवोपास्यत्वं प्राप्यत्वं च संभवतीति। "य एतां ब्रह्मोपनिषदं वेदे"त्युपसंहारस्य वस्वादिशब्दानां ब्रह्मपर्यन्तत्वे मानत्वात्। एवं च मध्वाद्युपासनास्वपि ब्रह्मण एवोपास्यत्वात् "तदेव ज्योतिषां ज्योति"रिति श्रुतिरपि संगता।

न च मधुविद्याफलस्य वसुत्वादिप्राप्तेः सिद्धत्वेनार्थित्वासंभवः । लोके धनिनामेव सतां जन्मान्तरे धनादिप्रेप्सादर्शनात् ॥ ३३ ॥

॥ शुगस्य तदनादरश्रवणात् तदाद्रवणात् सूच्यते हि ॥ ३४ ॥

श्रुतौ देवशब्दोक्त्या देवानामप्यधिकारो यथोक्तस्तथा "अह हारे त्वा शूद्र", "आजहारेमाः शूद्र" इत्यादौ शूद्रशब्दोक्त्या शूद्रस्याप्यधिकारः संभाव्यते । अर्थित्वसामर्थ्ययोः संभवात् । तस्य ब्रह्मस्वरूपं तदुपासनप्रकारज्ञानं चेतिहासपुराणादितः स्यात्" ।

श्रावयेच्चतुरो वर्णान् कृत्वा ब्राह्मणमग्रतः ।

इति तस्यापि तच्छ्रवणानुज्ञानात् । अनग्नित्वं तु तस्याग्निसाध्ययज्ञादिकर्मानधिकारमात्रे हेतुर्न विद्याधिकारनिषेधपरं, विदुरादिषु ब्रह्मविद्यादर्शनाच्चेति प्राप्त उच्यते ।

न शूद्रस्तस्यामधिक्रियते । ब्रह्मस्वरूपतदुपासनोपायज्ञानाभावेनासमर्थत्वात् । ब्रह्मोपासनस्य मनोवृत्तिमात्रनिर्वर्त्यत्वेऽपि ब्रह्मस्वरूपादिज्ञानस्योपनयनपूर्वकवेदाध्ययनजन्यत्वात् । शूद्रस्योपनयनविध्यविषयत्वात् । सामर्थ्याभावेऽर्थित्वस्याकिंचित्करत्वात् । कर्मविधेरिवोपासनविधीनामपि त्रैवर्णिकविषयत्वात् कर्मस्विव विद्यास्वपि निषेधस्य तुल्यत्वम् । इतिहासादीनामपि स्वाध्यायसिद्धज्ञानोपबृंहकत्वान्न ततोऽप्यस्य ज्ञानलाभः । श्रवणानुज्ञानं तु पापनाशादिफलार्थं, नोपासनार्थं, विदुरादीनां तु जन्मान्तरप्राप्तज्ञानप्रभावाज्ज्ञानवत्त्वं, प्रारब्धवशाच्चेदृशं जन्मेति ।

यत् तु संवर्गविद्यायां शूद्रशब्दोक्त्या शूद्राधिकारः संभाव्यत इति । तन्नेत्याह । शुगिति । हि यतोऽस्य जानश्रुतेः पौत्रायणस्याब्रह्मज्ञतया "कं वर एनमेतत् सन्तं सयुग्वानमिव रैक्कमात्थे"ति हंसोक्त्यानादरवाक्यश्रवणात् तदैव ब्रह्मज्ञं रैक्कं प्रत्याद्रवणात् शुगस्य संजातेति सूच्यते । अतोऽशूद्रेऽपि शूद्रेति संबोधनं स्वस्य सर्वज्ञत्वज्ञापनार्थं, न चतुर्थवर्णत्वेन । शोचतीति शूद्रः । "शुचेदश्चे"ति रक्प्रत्यये धातोश्च दीर्घे चकारस्य दकार इति, विद्योपदेशयोग्यत्वाख्यापनार्थं शोक एवास्य रैक्केण सूचितो न जातियोग इत्यर्थः ॥ ३४ ॥

॥ क्षत्रियत्वावगतेश्चोत्तरत्र चैत्ररथेन लिङ्गात् ॥ ३५ ॥

इतश्च जानश्रुतौ न शूद्रत्वजातियोगः । उपक्रमे 'बहुपाक्य" इत्यादिना दानपतित्वबहुतरपक्वान्नदायित्वप्रतीतेः । "क्षत्तारमुवाचे"ति क्षत्तृप्रेषणाद् रैक्काय गोरथकन्यादिदानाच्चास्य क्षत्रियत्वावगमात्वत उत्तरत्र च संवर्गविद्यावाक्यशेषे चैत्ररथेनाभिप्रतारिनाम्ना क्षत्रियेण सह समुच्चारणाल्लिङ्गादस्य क्षत्रियत्वमवगम्यते । "अथ ह शौनकं च कापेयमभिप्रतारिणं च काक्षसेनिं सूदेन परिविष्यमाणौ ब्रह्मचारी बिभिक्ष" इति हि वाक्यशेषः । कापेयसहचारिणश्चैत्ररथत्वं क्षत्रियत्वं च गम्यते । "एतेन चैत्ररथं कापेया अयाजय"न्निति । "तस्माच्चैत्ररथिर्नामैकः क्षत्रपतिरजायत" इत्यन्यत्र श्रवणात् । एवं चास्यां ब्रह्मविद्यायां ब्राह्मणक्षत्रिययोरेवान्वयदर्शनाद्रैक्कादन्यो जानश्रुतिरपि क्षत्रिय एव न चतुर्थवर्ण इति । ब्राह्मणसाहचर्येण जानश्रुतेः क्षत्रियत्वावगतेः ॥ ३५ ॥

न शूद्राधिकार इति युक्त्या साधितम् । श्रुत्यादिभिरनुगृह्य दर्शयति ॥

॥ संस्कारपरामर्शात् तदभावाभिलापाच्च ॥ ३६ ॥

विद्योपदेशप्रदेशेषु "अष्टवर्षं ब्राह्मणमुपनयीत, एकादशे क्षत्रियं, द्वादशे वैश्य"मिति, "उप त्वा नेष्ये तं होपनिन्ये" इत्यादिषूपनयनसंस्कारपरामर्शात् । शूद्रस्य च "न शूद्रे पातकं किंचिन्न च संस्कारमर्हति" । "शूद्रश्चतुर्थो वर्ण एकजातिर्न च संस्कारमर्हति" इत्यादिषु तदभावाभिलापाच्च न शूद्रस्याधिकारः ॥ ३६ ॥

॥ तदभावनिर्धारणे च प्रवृत्तेः ॥ ३७ ॥

"नाहमेतद्वेद भो यद्गोत्रोऽहमस्मी"त्यादिना जाबालेनोक्ते सति "नैतदब्राह्मणो विवक्तुमर्हती"ति जाबाले शूद्रत्वाभावस्य निर्धारणे निर्णये सति तमुपनेतुमनुशासितुं च गौतमस्य प्रवृत्तेश्च नाधिकारः शूद्रस्य ॥ ३७ ॥

॥ श्रवणाध्ययनार्थप्रतिषेधात् ॥ ३८ ॥

"यद्यु ह वा एतत् श्मशानं यच्छूद्रः, तस्माच्छूद्रसमीपे नाध्येतव्यं, तस्माच्छूद्रो बहुपशुरयज्ञीय" इत्यादिना शूद्रस्य श्रवणादिप्रतिषेधान्नास्याधिकारः । अनुपशृण्वतोऽध्ययनतदर्थज्ञानतदर्थानुष्ठानानामसंभवात् । तान्यपि प्रतिषिद्धान्येव ॥ ३८ ॥

॥ स्मृतेश्च * ॥ ३९ ॥

"न चास्योपदिशेद्धर्मं न चास्य व्रतमादिशेत्" ।

"न शूद्राय मतिं दद्यादिति च" । "अथास्य वेदमुपशृण्वतस्त्रपुजतुभ्यां श्रोत्रपरिपूरणमुच्चारणे जिह्वाच्छेदो धारणे शरीरभेद" इति च शूद्रस्य श्रवणादिनिषेधस्मरणाच्च ॥ ३९ ॥

एवं प्रासङ्गिकं परिसमाप्य प्रकृतं समापयति ॥

॥ कम्पनात् ॥ ४० ॥

"यदिदं किंच जगत् सर्वं प्राण एजति निःसृतं महद्भयं वज्रमुद्यतं य एतद्विदुरमृतास्ते भवन्ति" इति कठवल्ल्यामङ्गुष्ठमात्रप्रकरणे स्वस्मान्निःसृतस्य कृत्स्नस्य जगतो महाभयानको-

* शंकरमते स्मृतेश्चेति न पृथक् सूत्रं किंतु पूर्वसूत्रावयवः ।

ध्वतवज्ववत् कम्पनात् कम्पनकर्तृत्वाद्धेतोः प्राणशब्दितोऽङ्गुष्ठमात्रः परमात्मैवेति निश्चीयते। पूर्वोत्तरवाक्ययोस्तस्यैव निर्दिश्यमानत्वात्। तज्ज्ञानेन मोक्षश्रवणाच्च ॥ ४० ॥

॥ ज्योतिर्दर्शनात् ॥ ४१ ॥

तत्रैवाङ्गुष्ठप्रमितप्रकरण एतद्वाक्यात् प्राक् "न तत्र सूर्यो भाती"त्यादिवाक्ये भाशब्दवाच्यस्य परमात्मासाधारणस्य ज्योतिषो दर्शनादप्यङ्गुष्ठप्रमितः परमात्मैवेति सिद्धम् ॥ ४१ ॥

॥ आकाशोऽर्थान्तरत्वादिव्यपदेशात् ॥ ४२ ॥

"आकाशो ह वै नामरूपयोर्निर्वहिता,ते यदन्तरा तद्ब्रह्म तदमृतं, स आत्मे"ति छन्दोगैः पठ्यते। तत्र संदेहः। किमिहाकाशशब्देन संसारवद्धर्मविनिर्मुक्तो जीव उत परमात्मेति। "अश्व इव रोमाणि विधूये" त्यादिना मुक्तस्यैव पूर्वं प्रकृतत्वान्मुक्तो जीव इति पूर्वः पक्षः। "ते यदन्तरे"ति च नामरूपविमुक्तस्योक्तेर्नामरूपनिर्वोढृत्वस्य च तत्र भूतपूर्वगत्या संभवात्। मुक्तात्मनोऽसंकुचितज्ञानप्रकाशवत्तयाकाशशुद्धस्यापि तत्रोपपन्नत्वात् "तद्ब्रह्म तदमृत"मिति मुक्तावस्योच्यते। इति प्राप्त उच्यते। आकाशशब्दितः परमात्मा। कुतः। "ते यदन्तरे"ति नामरूपास्पृष्टस्यैव नामरूपनिर्वोढृतोक्तेर्बद्धमुक्तजीवादर्थान्तरमन्यमाकाशशब्दवाच्यं परमात्मानं व्यपदिशति। बद्धस्य कर्माधीनतया नामरूपे भजतः स्वयं तन्निर्वोढुं व्याकर्तुमशक्यत्वात्। मुक्तस्य जगद्व्यापारासंभवस्य वक्ष्यमाणत्वात् सुतरां न तन्निर्वोढृत्वम्। परमात्मनस्तु निखिलविश्वनिर्मितिप्रवीणस्य "अनेन जीवेनात्मनानुप्रविश्य नामरूपे व्याकरणवाणि,"तस्मादेतन्नाम रूपमन्नं च जायते,

"सर्वाणि रूपाणि विचिन्त्य धीरो
नामानि कृत्वाभिवदन् यदास्ते"।

इत्यादिश्रुत्यैव तन्निर्वोढृत्वं सुप्रतिपन्नम्। आदिना निरुपाधिकबृहत्त्वामृतत्वात्मत्वादिव्यपदेशो गृह्यते। नापि पूर्वं मुक्तः प्रकृतः। ब्रह्मलोकमभिसंभवामीति ब्रह्मलोकशब्दितपरमात्मन एव पूर्वं प्रकृतत्वात्। आकाशशब्दस्यापि व्यापकत्वेन च परमात्मन्येव प्रसिद्धत्वात्। अत आकाशः परमात्मैवेति ॥ ४२ ॥

ननु स्यादेतत्। प्रत्यगात्मनोऽर्थान्तरभूतः परमात्मैव नास्ति। "अयमात्मा ब्रह्म", "ब्रह्मैव सन् ब्रह्माप्येति","तत त्वमसी"त्यादिनैक्योपदेशात्। "नेह नानास्ति किंचन","मृत्योः स मृत्युमाप्नोति य इह नानेव पश्यती"ति द्वैतप्रतिषेधाच्च। अतः प्रकृतान्मुक्तादपि जीवादभिसंभवितुरभिसंभाव्यो ब्रह्मलोकाद्यार्थान्तरभूतः। भेदव्यपदेशस्तु घटाकाशादिवदुपाधिकृत इति चेत्, तत्राह ॥

॥ सुषुप्त्युत्क्रान्त्योर्भेदेन ॥ ४३ ॥

व्यपदेशादित्यनुवर्तते। "प्राज्ञेनात्मना संपरिष्वक्तो न बाह्यं किंचन वेद, नान्तर"मिति सुषुप्तौ "प्राज्ञेनात्मनान्वारूढ उत्सर्जन् याती"त्युत्क्रान्तौ चाज्ञाज्जीवाद् भेदेन सर्वज्ञतया परमात्मनो व्यपदेशात्। अन्वारूढोऽधिष्ठितः। उत्सर्जन् घोरान् शब्दान्। हिक्कशब्दं वा कुर्वन्। न हि स्वपत उत्क्रामतो वाऽज्ञस्य तदैव प्राज्ञेन स्वेनैव सता परिष्वङ्गान्वारोहौ संभवतः। न च जीवान्तरेण, तस्यापि सार्वज्ञासंभवात् ॥ ४३ ॥

इतश्च जीवादन्यः परमात्मेत्याह ॥

॥ पत्यादिशब्देभ्यः ॥ ४४ ॥

"सर्वस्याधिपतिः सर्वस्य वशी सर्वस्येशानः सर्वमिदं प्रशास्ति यदिदं किंच, स न साधुना कर्मणा भूयान् नो एवासाधुना कनीयानेष सर्वेश्वर एष भूताधिपतिरेष भूतपाल एष सेतुर्विधरण एषां लोकानामसंभेदाये"त्यादिनोत्तरत्रापि पत्यादिशब्दाः परिष्वक्तं परमात्मानमेव व्यपदिशन्ति। तैश्च मुक्तजीवादप्यन्यः परमात्मेति निश्चीयते। न हि सर्वाधिपतित्वसर्ववशित्वसर्वप्रशास्तृत्वसर्वेश्वरत्वजगद्विधरणादिकं मुक्तावस्थेऽपि जीवे वक्तुं शक्यते। तस्य जगद्व्यापारप्रतिषेधात्। औपाधिकभेदस्तु पूर्वं प्रत्युक्तः। एकत्वोपदेशस्तु परमात्मनः सर्वव्यापकत्वसर्वनियन्तृत्वसर्वाधारत्वसर्वकारणत्वादिमत्तया, चिदचिदात्मकस्य सर्वस्य जगतस्तु तद्व्याप्यत्वतन्नियम्यत्वतदाधेयत्वतत्कार्यत्वादिमत्तया सर्वदा सर्वत्र तदपृथक्स्वरूपस्थितिप्रवृत्तिमत्तया संगच्छत इत्युपरिष्टाद्वक्ष्याम इति ॥ ४४ ॥

इति श्रीसनकसंप्रदायप्रवर्तकाद्याचार्यश्रीनिम्बार्कमतानुयायिमुकुन्दचरणपद्ममकरन्दभृङ्गेण श्रीकेशवकाश्मीरिभट्टेन संगृहीतायां वेदान्तकौस्तुभप्रभाख्यायां ब्रह्मसूत्रवृत्तौ प्रथमाध्यायतृतीयपादविवरणं समाप्तिमगात् ॥ ३ ॥ :: :: ॥

॥ अथ ज्ञानसिद्धान्तचन्द्रिका ॥

बर्कलेसंज्ञकमहापण्डितविरचितज्ञानसिद्धान्तमालायाः

अवतारिता।

॥ तत्रोपोद्घातप्रकरणे षोडशादिपरिच्छेदाः ॥

१६—ननु त्रिभुजस्य कोणत्रयं समकोणद्वयसमं भवतीत्यादीनां नियमानामादौ सर्वत्रिभुजाद्यनुगतजातिविषये याथार्थ्यस्य दर्शनमन्तरा तेषां त्रिभुजादियावद्व्यक्तिविषये याथार्थ्यं दुर्ज्ञेयम्। नचैकस्यां त्रिभुजादिव्यक्तौ तद्याथार्थ्यस्य दर्शनेन

सर्वत्र तदनुमातुं शक्यम् । एकत्र सिद्धस्य धर्मविशेषस्यापरत्र तत्सिद्धेरनियमात्त्रिभुजविशेषस्यस्य कोणत्रयस्य समकोणद्वयसाम्येन तदितराखिलत्रिभुजव्यक्तीनां समकोणद्वयसम्मितकोणत्रयवत्वस्य निगमयितुमशक्यत्वात् । नहि कश्चित्त्रिभुजविशेषस्य समद्विबाहुकत्वं निश्चित्य सर्वेषां त्रिभुजानां तत्वमभ्युपैति । तथाचोक्तनियमादीनां सार्वत्रिकयाथार्थ्यस्य सिद्धये तेषां त्रिभुजाद्यभेद्यभेदज्ञानवादिसंमतजातिविषयकत्वमवश्याभ्युपेयम् । तादृश जातेः सर्वत्रिभुजाद्यात्मकत्वादितिचेन्न । एकस्यास्त्रिभुजव्यक्तेरखिलत्रिभुजोपलक्षकत्वे बाधकाभावेनैकत्र समकोणद्वयसाम्यसिद्धौ तदुपलक्षितयावत्त्रिभुजव्यक्तिषु तत्सिद्धेः सुवचतयोक्तनियमयाथार्थ्यस्य सर्वत्रोपपत्तेः । नचैवमुपलक्षकस्य त्रिभुजस्य समद्विबाहुकत्वे तदुपलक्षितानां सर्वेषां त्रिभुजानां समकोणद्वयसाम्यमिव समद्विबाहुकत्वमप्यापद्येतेतिशङ्क्यम् । त्रिभुजमात्रस्य समद्विबाहुकत्वप्रयोजकत्वेनाविवक्षणात् । नापि समकोणद्वयसाम्यवत्कोणत्रयवत्वेन निश्चितस्य त्रिभुजस्यासरलरेखोत्पन्नत्वे साजात्यादसरलरेखोत्पन्नत्रिभुजमात्रोपलक्षकत्वमेव तस्येतिवाच्यम् । त्रिभुजमात्रस्यैवोक्तनियमोद्देश्यघटकत्वेन विवक्षणात्तदुदाहरणत्वेनोपात्तानां त्रिभुजानां नानाविधविशेषधर्मवत्वेपि त्रिभुजमात्रत्वेनैव चिन्तनात् । प्रत्यक्षीभूतानां पदार्थानां स्वगताशेषविशेषधर्मपुरस्कारेणैव ज्ञानविषयतेत्यस्यानियमात् । यथा देवदत्तोमनुष्यत्वेनैव यज्ञदत्तोजन्तुत्वेनैव वा विभावयितुं शक्यते । नैतावतेमानि ज्ञानानि निरुक्तविलक्षणाभेद्यभेदज्ञानसिद्धानीति भ्रमितव्यम् । एषां तत्तद्व्यक्तिमात्रविषयकत्वात् । एवमेवान्येषामपि नियमानां स्वनियम्ययावद्व्यक्त्यभेद्यभेदज्ञानं विनैव सर्वत्र याथार्थ्यमुपपादनीयमिति ।

१७–अथास्याभेद्यभेदज्ञानसिद्धान्तस्याभिमानिनां बाह्यसाधारणसत्तावादिनां च पक्षमाश्रितानां भ्रमाणां दोषाणां चानन्त्यात्तेषां निःशेषमन्वेषणं दुष्करं निष्फलं च । तादृशसिद्धान्तविषयानधिकृत्य कृता विवादा अक्षिषु धूलिप्रक्षेपाइव विपक्षपक्षेषु दोषाक्षेपास्तज्जन्यानि मनुष्योत्तमहितानि च सांप्रतं प्रायः सर्वैर्जनैर्ज्ञायन्तएवेति न तेषामत्र वर्णनस्योपयोगः । यद्येतत्सर्वं प्राचीनविदुषामकाण्डताण्डवं तदभिमानिनामेव हानिकरम् अभविष्यत्तर्हि भद्रतरमभविष्यत् । परन्तु हन्त शास्त्रीयतत्वार्थानां शोधनाय स्पष्टीकरणाय चाद्ययावत्प्राचुर्येण प्रयुक्तेष्वपि दीर्घप्रयत्नकल्पनादिषु स्वल्पीयएव शास्त्रखण्डं तात्विकार्थप्रकाशकम् अवशिष्टं तु सर्वं कुत्रचिच्चिरवधिविवादग्रस्तं कुत्रचित्संदेहतमिस्रावृतं कुत्रचिच्च प्रामाणिकत्वेन प्रसिद्धमपि लोकविरुद्धार्थघटितमिति बुद्धिविनोदनैकफलकं दृष्ट्वा प्रायेण सर्वेजनाः शास्त्राभ्यासोऽपार्थकश्रममावहद्ति मन्येरन् । इदं तु बोध्यम् । शास्त्रस्य सर्वांशेन यथार्थतत्वार्थप्रकाशकत्वं लोकस्वीकृतमिथ्यासिद्धान्तानां सम्यक्परीक्षणपूर्वकपरिहारेणैव प्रत्येष्यते । प्रतीयते चैषां सिद्धान्तानामभेद्यभेदज्ञानसिद्धान्तस्यैवात्यन्तमनीषिमनोभ्रामकत्वम् इति ।

१८–अथैतस्य लोकप्रचलितमतस्य मूलं भाषाप्रयोगएव प्रतीयते । नचात्र कारणविरहः शक्यते वक्तुम् । हेतुमन्तरास्य मतस्य सर्वजनीनताया अनुपपत्तेः । तयोर्हेतुहेतुमद्भावश्च सत्स्वपि कारणान्तरेषु तादृशविलक्षणमताभिमानिनां विदुषां साधारणनाम्नःसार्थकतासिद्ध्यर्थमभेद्यभेदज्ञानानि प्रकल्प्यन्त इत्याकारकवचनाज्ज्ञायते । भाषाप्रयोगस्साधारणनामानि वा जगति चेन्नाभविष्यंस्तर्ह्यभेद्यभेदज्ञानवार्तापि नाभविष्यत् । नचैवं संभवति । प्राचुर्येणतत्प्रयोगदर्शनादित्यनुमीयते अभेद्यभेदज्ञानानि सन्तीति । तथाहि । प्रत्येकं नाम्नः सुनिश्चितैकार्थवाचकत्वस्य नियमादभेद्यभेदज्ञानार्थकत्वं साधारणशब्दानामुच्यते । तेषामेव तन्नियतार्थभूतत्वात् । तादृशज्ञानानङ्गीकारेतु साधारणशब्दानां नियतार्थाभावएव प्रसज्येत । सचायुक्तः । अर्थसत्तायाएव शब्दसत्तानियामकत्वादिति साधारणशब्दनियतार्थकतानुपपत्तिप्रतिसंधानायाभेद्यभेदज्ञानान्यवश्यमङ्गीकर्तव्यानि । तादृशज्ञानबोधनद्वारैव साधारणशब्दानां विशेषार्थबोधकतापि सिध्यति । स्पष्टं चेदं लोकाख्यविरचिते मानवचित्परीक्षाभिधपुस्तके त्रितीयाध्याये । वस्तुतस्तु साधारणशब्दानां सुनिश्चितैकार्थबोधकत्वं नानुभवसिद्धं किंत्वविशेषेणानेकव्यक्तिबोधकत्वमेव तेषामिति नानाविधयुक्त्यनुभवप्रदर्शनपुरस्सरं पूर्वमेव प्रपञ्चितम् । ननु तिसृभीरेखाभिःपरिच्छिन्नं क्षेत्रं त्रिकोणं भवतीत्यादिलक्षणैस्त्रिकोणादिपदानीतरार्थव्यावृत्यैकार्थव्यक्तिपराणि क्रियन्ते साचार्थव्यक्तिः किंचिन्निश्चितज्ञानरूपैवेति कथं साधारणपदानामविशेषेणानेकव्यक्तिबोधकत्वमेवेतिचेदुच्यते । नहि त्रिकोणलक्षणे रेखापदेन सरला वक्रा दीर्घा ह्रस्वा वा रेखा विवक्ष्यन्ते नापि क्षेत्रपदेन शुक्लं कृष्णं लघु बृहद्वा तदुद्दिश्यते येनैकमेव ज्ञानमुक्तलक्षणेन लक्षितं स्यात् । लक्षणेन तु लक्षकधर्माणां लक्ष्याव्यभिचारित्वं प्रतिपाद्यते नतु साधारणनाम्न एकमात्रज्ञानव्यक्त्यभिधायित्वं क्रियते । तादृशज्ञानस्यासंभवादनुपयोगाच्चेति ॥

१९–ननु लोके नामानि ज्ञानाभिव्यञ्जकचिह्नत्वेन भाषा च परस्परान्वितानेकज्ञानबोधनैकप्रयोजनकत्वेन विवक्ष्यन्ते भाषणादौ तु कतिपये सार्थकशब्दाअपि नियमेन स्वबोध्यार्थविशेषोपस्थापका न प्रतीयन्त इति विरोधाच्छब्दानां तादृशविलक्षणसाधारणज्ञानबोधकत्वमेवाऽनुमीयतामिति चेन्न । भाषणादौ शब्दानां स्वबोध्यार्थविशेषानुपस्थापकतादशायाम

तादृशविलक्षणज्ञानोपस्थापकत्वस्याप्रतीतेः । नचैवं नियमोस्ति यत्सर्वैः सार्थकशब्दैः सर्वत्रैवार्थबोधकैर्भाव्यमिति । अस्यायं भावः । यथा बीजगणितस्थाः कचटतपादयो वर्णाः परिमाणविशेषबोधकत्वेनोद्दिष्टा अपि संकलनव्यवकलनादौ न प्रतिपदं तादृशार्थबोधकत्वेनानुसंधीयन्ते तथा सन्त्येवंभूताः कतिपयशब्दा ये पठनसंभाषणादौ तदर्थमननुसंधायैव पठ्यन्ते प्रयुज्यन्ते श्रूयन्तेचेति ॥

२०—एवं भाषायाः स्वघटकशब्दबोध्यज्ञानान्वयबोधनैकप्रयोजनकत्वमपि न शक्यते वक्तुम् । तस्या नानाविधमनोविकारमनःप्रवृत्तिनिवृत्त्याद्यनेकान्यविधफलजनकत्वात् । कुत्रचिन्मानसविकारादीनां जनने भाषाज्ञाप्यज्ञानस्य सहकारित्वं कुत्रचिच्च तस्य सर्वथाऽनुपस्थितिरेव । विमृश्य पश्येयुश्चैतत्सुधियो यत्पुस्तकान्तरपठनेऽत्यभ्यस्तसंल्लापादौ च शब्दविशेषाणां दर्शनेन श्रवणेन वा भयस्नेहहर्षविषादद्वेषश्लाघादयो विकाराः प्रयुक्तशब्दबोध्यज्ञानमाध्यस्थ्येन विनैवोद्यन्ति नवेति । यद्यपि शब्दानामभिनवप्रयोगे तद्बोध्यज्ञानद्वारैव तादृशो विकारा जन्यन्ते तथापि तेषां प्रचुरप्रयोगेण शब्दार्थानां वाच्यवाचकभावस्य सुपरिचये संपन्ने तादृशशब्दश्रवणस्य तद्रचकाक्षरविन्यासदर्शनस्य वाऽव्यवहितोत्तरमेव ते भावा उद्भवन्ति । यथा किंचिदुत्तमपारितोषिके कस्मैचिद्दातुं प्रतिज्ञाते स तादृशशब्दमात्रश्रवणेन पारितोषिकस्वरूपमज्ञात्वैव हृष्यति । कस्मिंश्चित्परुषवाक्यैर्निर्भर्त्सिते च स तादृशवाक्यैर्भयावहामापदमनभिज्ञायैव बिभेति । नचात्र पारितोषिकादीनामभेदाभेदज्ञानविधया साधारणज्ञानं तस्य भवतीति वाच्यम् । तदसंभवस्य पूर्वमेव प्रदर्शितत्वात् । यदि कश्चनैतमस्मदुक्तमर्थं सूक्ष्मपर्यालोचनया पश्येत्तर्हि तं प्रतीदं स्पष्टं प्रतीयेत यद्वक्ता साधारणशब्दैर्यावन्तमर्थं परं प्रति बुबोधयिषति न तावन्तं तं स्वयमनुसंधत्त इति । स्वसुपरिचितस्यैवार्थस्य परं प्रति बुबोधयिषितत्वात् । किंबहुना व्यक्तिविशेषनामान्यपि न सर्वदा तदर्थभूतज्ञानव्यक्तिबुबोधयिषयैव प्रयुज्यन्ते । यथैवं किंचिन्मतविशेषमुद्दिश्योच्यते यदिदमेव वरं भगवता पतञ्जलिनोक्तत्वात् । अत्र वक्ता पतञ्जलिनामगौरवेण स्वमतमात्रं श्रोतारं स्वीकारयति न पुनर्बोधनकर्मत्वेन तन्नामबोध्यज्ञानव्यक्तिमप्युद्दिशति । पतञ्जल्यनुयायी श्रोतापि तमृषिमविभाव्यैव तन्मतं स्वीकरोतीति कृतं सर्वानुभवसिद्धविषयस्य सविशेषव्याख्यानेन ॥

२१—तदेतावता प्रबन्धेनाभेदाभेदज्ञानानामनुभवविरुद्धत्वं तदभिमानिप्रदर्शिततदुपपत्तीनां निर्युक्तिकत्वं तत्कारणकत्वेन निर्दिष्टानां फलाभासानामन्यथोपपन्नत्वं तन्मूलत्वेन प्रतीयमानानां साधारणपदानामतदनुमापकत्वं च यथावत्प्रपञ्चितम् । अथ यस्य कस्यापि पुरुषस्य शब्दद्वारैव प्राचीनार्वाचीनाखिलविद्वदाविष्कृतसकलशास्त्रभेदानधिगन्तुं शक्यत्वात्तेषां परमोत्कृष्टप्रयोजनकत्वेपि भूयिष्ठानां शास्त्रभागानां विसंकुलीभावस्य संदिग्धत्वस्य च शब्ददुष्प्रयोगैकमुलकत्वेन शब्दानामेव बुद्धिव्यामोहकत्वाच्छब्देषु चिरंतनाचारवशाद्वाच्यवाचकभावसंबन्धेन ज्ञानसंबद्धेष्वप्यस्मिन् ग्रन्थे चिकीर्षितस्य सर्वथाशब्दसंबन्धपरित्यागपूर्वकज्ञानमात्रविचारस्य फलानि प्रदर्श्यन्ते वक्ष्यमाणपरिच्छेदेन ।

२२—तत्र सर्वशास्त्रकण्टकीभूतानां यथार्थतत्वज्ञानप्रतिबन्धकानां शब्दमात्राश्रिताखिलविवादानामुच्छेदनमित्येकं फलम् । अधिकाधिकसूक्ष्मबुद्धिमतां जनानामधिकाधिकंबन्धकादभेदाभेदज्ञानपाशात्परित्राणम् इति द्वितीयम् । शब्दासंबद्धज्ञानविचारे भ्रमशङ्काराहित्यम् । सर्वथाशब्दसंबन्धापेक्षणेन शब्दमर्यादया भ्रान्तज्ञानकल्पनस्याप्रसक्त्या स्वानुभवनिकषपरीक्षितस्यैव ज्ञानस्य विचारविषयत्वेनोपादानात् । स्वानुभूतज्ञानान्येव विचारयतां जनानां स्वाननुभूतज्ञानविचारणे तदन्योन्यसादृश्यासादृश्यविवेचनादौ वाऽप्रवृत्तेः । आत्मप्रत्यक्षीभूतानां विषयाणां परस्परमानुकूल्यानुकूल्ययोर्मिश्रितत्वामिश्रितत्वयोर्वा विचारणे एव तेषां निष्कम्पं प्रवृत्तेरिति तृतीयम् ।

२३—सर्वथाशब्दसंबन्धापेक्षणासिद्धान्युक्तफलानि ममापि दुष्प्रापाणि प्रतीयन्ते । चिरंतनलोकव्यवहारसिद्धस्य शब्दार्थयोः साहचर्यस्यानायासेन वियोक्तुमशक्यत्वात् । परंत्वत्र यत्परमकाठिण्यं तत्सर्वमभेदाभेदज्ञानसिद्धान्तकृतमेव बोध्यम् । तादृशज्ञानानां साधारणशब्दबोध्यत्वं वदतां जनानां साधारणशब्दापेक्षणेऽनीशत्वात् । शब्दप्रयोगमन्तरा स्वतो किंचिद्रूपस्य तादृशज्ञानस्यानुसंधातुम् अशक्यत्वात् । अतएव यथार्थवस्तुतत्वनिर्णयाय स्वविचारेषु सर्वथाशब्दानुसंधानं वर्जितुं परानुपदिशन्तोपि ते स्वयमेव तथाऽनुष्ठातुं न शेकुः । साम्प्रतमपि भूयिष्ठा जनाः सर्वान् निरर्थकवादान् बाधितसिद्धान्तांश्च शब्ददुष्प्रयोगमात्रप्ररूढान् दृष्ट्वा तान् परिहर्तुं शब्दसंबन्ध विहाय शुद्धज्ञानान्येवानुसंधेयानि शब्दास्तु हेयाएवेति सर्वानुपदिशन्ति । परंतु यावत्ते शब्दानां ज्ञानबोधनैकप्रयोजनकत्वं साधारणशब्दानां च नियतसाधारणैकज्ञानार्थकत्वं मन्येरंस्तावत्तेषां स्वोपदेशानुसरणाक्षमत्वात्परोपदेशएव पाण्डित्यं प्रतीयेत ।

२४—ये पुनः साधारणनाम्नां नियतसाधारणैकज्ञानार्थकत्वमित्यादेरयाथार्थ्यं विज्ञायात्मनोज्ञानविशेषमात्रवत्वमवगच्छेयुस्ते सर्वथाशब्ददुष्प्रयोगैरवञ्चिताः सन्तो न कदापि साधारणनामसु तदनुगुणविलक्षणसाधारणज्ञानान्वेषणेन वृथैवात्मानं व्यामोहयेयुः । नापि ते सार्थकशब्दानां सर्वत्र ज्ञान-

बोधकत्वमेवेत्यस्यानियममुपलभ्य स्थलविशेषे तेषां ज्ञानानुपस्थापकत्वे तद्बोध्यज्ञानानुसंधानेन व्यर्थं परिश्राम्येयुः । अत इदमेव युक्तं सर्वेषां यत्ते विचारान्तरायभूतमात्मव्यामोहकं शब्दाडम्बरं निःशेषमुत्सार्य ज्ञानमात्रविचारणे एव सुनिर्भरं प्रयतेरन् । तदिदं प्रथमोपस्थितं मनुष्याशेषकार्यशेखरीभूतमात्मज्ञानविवेचनं हित्वा कोर्थः खगोलस्य भूगोलस्य वा परीक्षणेन । व्यर्थमेव ग्रन्थस्थाः प्राचीनजनर्निर्दिष्टाः संदेहतमिस्रावृतास्तत्त्वज्ञानप्राप्त्युपाया विविच्यन्ते । यतोह्यपसारितायामेव शब्दजवनिकायामात्मारामे कल्पद्रुमइव परमोत्तमफलप्रदो ज्ञानद्रुमः साक्षात्प्रत्येष्यते । 'तत्प्राप्तिरेव च परमः पुरुषार्थः' ।

२५–यदि कोप्येतमुपदेशमनादृत्य तत्त्वज्ञानप्रतिपत्तये प्राचीनविदुषां व्यामोहकारिणः पारिभाषिकशब्दानेवाश्रयेत्तर्हि स तद्विषयेऽपारां तर्कपरंपरामूहमानोऽकृतार्थएव भृशं परिश्राम्येन्नानाविधसंदेहसंदोहे निमज्जेदुह्यमाणग्रन्थतात्पर्यं च नावगच्छेत् । अत एतद्ग्रन्थाध्येतॄन्प्रतीदमेव प्रार्थये यत्ते सर्वात्मना शब्दसंबंधमुज्झित्वात्र यदेवमयोच्यते तत्सर्वं स्वानुभवनिकषेणैव परीक्षेरन् । सर्वस्य मदुक्तार्थस्याऽनुभवैकगम्यत्वात् । येनानुभवसिद्धं विषयं स्वीकुर्वन्तोऽनुभवविरुद्धं च तं परित्यजन्तस्तेऽतिव्यामोहकैरपि प्राचीनविपश्चिच्छब्दैः कथमपि वंचिता न स्युः । अनुभवसिद्धस्य विषयस्य वचनशतेनाप्यपलापस्य कर्तुमशक्यत्वादित्यलम् ॥

॥ समाप्तं चेदमुपोद्घातप्रकरणम् ॥

केशवशास्त्री

THE VIDVAN-MANO-RANJINI'

OR

REJOICER OF THE MIND OF THE LEARNED,

A COMMENTARY ON SAD-ÁNANDA'S VEDÁNTA-SÁRA, BY RÁMA-TÍRTHA,

(Concluded from page 76.)

As a lamp standing where there is no wind, &c. When the employment of the appliances for meditation of this kind has come to its maturity, and the intuition of the identity of the absolute and the soul has been realised, and when cessation of the cosmical illusion and of metempsychosis which is the emanative effect thereof has emerged, then if at that time by a coincidence not to be anticipated, the body of the wise man should fall away in consequence of the exhaustion of the fructescent merits, there takes place immediate emancipation. But when at the time of the realisation of plenary knowledge fructescent merit is not exhausted, then the wise man even during life, is liberated from further transmigration, because the body must endure until the exhaustion of his fructescent merits. The author proceeds to promise a definition of this latter condition.

Now [we shall define &c.] The word *now* indicates subsequence to description of the means for avoiding the impediments. He next states the definition.

He who is liberated while yet living [is he who being intent on the absolute, is free from bondage through the sublation of the cosmical illusion and the complement of its emanative effects such as merits doubts, and errors, when the absolute spirit is presented, indivisible, in its proper essence, through the sublation of illusion in regard to it, through the knowledge of absolute spirit in its proper essence, pure.], Intentness on the absolute spirit means the remaining permanently in identity with the absolute spirit, which is the object-matter of the latter portion of the Veda.

When it is said that one who while living is emancipated is immersed in absolute spirit, it is asserted that real mersion in absolute spirit pertains to the unemancipated also. A further qualification is therefore given, viz. that he is freed from all bonds. In order to distinguish the emancipated while living from the finally emancipated, another qualification must be supplied viz. that his fructescent merits alone remain. The words In consequence of the sublation of illusion and its products, aggregate merits, doubts, and errors, are added in anticipation of the question how he is emancipated. Illusion has already been characterised as that which is inexplicable by entity and by non-entity, and so forth. Its products are the two worlds, the gross and the subtile. The accumulated merits are those generated before the generation of knowledge, and which have begun to bear fruit. The doubts are uncertainty as to whether the soul be or be not distinct from the bodily organism &c., and essentially identical with the absolute; or again whether emancipation result or not from knowledge of absolute spirit. Error is defined as the conceit that body or the like is soul; by the words *et cœtera*, we may understand the supposition of the reality of the external universe. When these, then, are sublated, the soul is released. Anticipating the question

---

ब्रह्मनिष्ठत्वं वेदान्तवेद्यब्रह्मात्मनावस्थितत्त्वं ब्रह्मनिष्ठोजीवन्मुक्तइत्युक्ते परमार्थतो ब्रह्मनिष्टत्वममुक्तस्याप्यस्तीत्यतो विशिनष्टि ।

अखिलबन्धरहितइति । परममुक्तवैधर्म्यंवसिद्धये प्रारब्धकर्म्ममात्रशेषइति विशेषनान्तरमध्याहर्त्तव्यं कथमसौ मुक्तइत्यपेक्षायामाह ।

अज्ञानतत्कार्य्येति । अज्ञानं सदसद्भ्यामनिर्वचनीयमित्याद्युक्तलक्षणं तत्कार्य्यं स्थूलसूक्ष्मप्रपञ्चद्वयं सञ्चितं कर्म्मज्ञानोत्पत्तेः प्रागुत्पन्नमनारब्धफलं संशयो देहाद्व्यतिरिक्तब्रह्मस्वरूप आत्मा भवति नवेति अथवा ब्रह्मात्मविज्ञानान्मोक्षो भवेन्नवेत्यादिर्विचिकित्साविपर्य्ययोदेहादिष्वात्माभिमानादिलक्षणः आदिशब्दाद्बाह्यप्रपञ्चे सत्यत्वबुद्धिः एतेषांबाधितत्वान्मुक्तइत्यर्थः एतत् कदास्यादित्यपेक्षायामाह ।

स्वस्वरूपाखण्डब्रह्मणि साक्षात्कृते सतीति । साक्षात्कारे साधनमाह

when this may be, the author adds, When the indivisible absolute spirit has been presented in its own essence. The means of this presentation is stated in the words By cognising the pure absolute spirit in its own essence The author proceeds to state evidence that after presentation of the truth the soul becomes liberated. [*According to such texts as: When that first and last has been seen, the knot of the heart*] *is severed* [*all doubts are solved, and one's works are annihilated.*] The knot of the heart is the sense of personality, which is like a knot because it supposes the identity of the conscious and the unconscious. All doubts are uncertainties about objects visible and invisible. Works or merits of this soul are destroyed, with the exception in the case of the emancipated while living, of those already fructescent. According the aphorism: On attainment thereof the former and latter portions (of the soul's merits) are dissevered and destroyed in consequence thereof. In the case of final emancipation the accumulated fructescent works also are destroyed. When this absolute spirit disengaged from the object universe is seen, that is, presentatively cognised, in what form is it cognised? It is cognised as first and last, as all that is. Here the phrase all that is, denotes the absence of aught ulterior. All that was surmised as ulterior is declared to be identical therewith, as in the sublation of illusion expressed in the words The thief (as I supposed yonder indistinct object to be) is a post. Another explanation might be that the first is Hiraṇyagarbha, and the last that which is less than he. Such is the sense of the Atharvaṇîya text.

The words *such as* imply the two texts Who is all things In whom are all things, in the Ís'a Upanishad, and the, text It is utterly consumed. The particle *and* implies additionally such traditional texts as Like as a kindled fire burns up its fuel; Which knowing one no more becomes infatuated; One who is become absolute spirit is unperturbed in soul, and neither grieves nor longs for aught.

Nor can it be urged that there is no evidence of emancipation of the living. It is to be considered as evidenced by such texts as The body abides until I be liberated, then shall I be consummated; and by such traditional texts as When he lays aside desires and light and activity.

It may be argued: One emancipated while living either energises with body and organs, or does not so energise. On the former alternative his state differs in no wise from bondage; on the latter, not employing his body he would at once fall to the ground. The reply to this dilemma is furnished.

But such a one [*with his body, which is a vessel of flesh, blood, solid and liquid secreta, &c., with his organs, vessels of blindness, torpor, and confusion, and with, his internal organ, a vessel of hunger, thirst, grief, bewilderment, &c, though seeing the actions in course of performance by this or that antecedent foregoing idea and being enjoyed, while not repugnant to his knowledge, and already fructescent, in reality sees them not, they having been sublated; just as one who sees a juggler's trick. in reality does not see it, knowing it to be a mere juggling illusion.*] Though from another's point of view such a one appears to see, as a witness, the actions already fructescent, yielding fruition, and effected by antecedent representations, though he be void of all sense of personality, whether as agent or as sentient; yet in reality, from his own standpoint he does not see them, since the illusion which is the root of conceiting oneself an agent and sentient has been sublated by knowledge. He is therefore, it is said, different from one in bondage. It must be seen that until the complete exhaustion of the merits already fructescent his body will not fall away, for there is nothing to prevent this exhaustion; just as a missile or a stone flung by a strong thrower will not fall till its impetus is exhausted. In the words *Just as one who sees a juggler's trick &c.* the author illustrates what he has said by an example. It is implied here that the knowledge that the unreal has been sublated still abides.

The author next cites a text in evidence that the emancipated during life while appearing to energise with his organism, does not in reality do so.

[*According to the text*] *Seeing, yet unseeing,* [*hearing yet not hearing &c.*] While possessing eyes and other organs, as not seeing the colours and other qualities of the object world, he is as it were eyeless. By the

---

स्वस्वरूपाखण्डब्रह्मज्ञानेनेति । तत्त्वसाक्षात्कारानन्तरं मुक्तएवभवतीत्यत्र प्रमाणमाह ।

भिद्यतइति । हृदयग्रन्थिरहङ्कारश्चिज्जडात्मकत्वाद्ग्रन्थिरिवग्रन्थिः । सर्वेसंशयाः दृष्टादृष्टार्थविषयाविचिकित्साः अस्यात्मनः कर्म्माणि जीवन्मुक्तपक्षे प्रारब्धातिरिक्तानि क्रियमाणानिच तथाचन्यायः तदधिगमउत्तरपूर्व्वाघयोरश्लेषविनाशौ तद्व्यपदेशादिति परममुक्तिपक्षे प्रारब्धसहितान्यपि क्षीयन्ते तदा तस्मिन्निष्प्रपञ्चेब्रह्मात्मनि दृष्टे सति साक्षात्कृते सति कथम्भूते परावरे सर्व्वात्मके अत्र सर्व्वात्मकवचनं तद्व्यतिरिक्तस्याभावपरं चौरः स्थाणुरिति वद्बाधायां सामानाधिकरण्यस्य विवक्षितत्वात् यद्वा परो हिरण्यगर्भः सोऽवरोन्यूनो यस्मात्तस्मिन्परावरइत्याथर्व्वणीयश्रुत्यर्थः आदिपदात् यस्तु सर्व्वाणि भूतानिः यस्मिन् सर्व्वाणि भूतानीति च मन्त्रद्वयमीशावास्यगतं परिगृह्यते ।

श्रुतेश्चेति । चकाराद्यथैधांसि समिद्धोऽग्निः यज्ज्ञात्वा न पुनर्म्मोहं ब्रह्मभूतः प्रसन्नात्मा न शोचति न काङ्क्षतीत्यादिस्मृतयः समुच्चीयन्ते न च जीवन्मुक्तौ प्रमाणाभावः तद्यथाहिनिर्व्वयणीवल्मीकेनावृता प्रत्यस्ताशयीतैवमेवेदं शरीरं शेते तस्य तावदेव चिरं यावन्न विमोक्ष्येऽथ सम्पत्स्यइत्यादिश्रुतेः प्रजहाति यदाकामान् प्रकाशञ्च प्रवृत्तिञ्चेत्यादिस्मृतेश्च प्रमाणत्वादिति द्रष्टव्यं ननु जीवन्मुक्तौ देहेन्द्रियादिभिर्व्यवहरतिनवाआद्ये तस्य बद्धादविलक्षणता द्वितीये देहस्यानुपयोगात् सद्यः पातप्रसङ्ग इत्यतआह ।

words *et cætera* are comprised such other texts as, That shines, that shines not. The author quotes the consentient testimony of former teachers to the matter aforesaid.

And it has been declared: [*He and no other, knows soul, who while waking sees not*] *as if in dreamless slumber;* [*who while seeing a dual order, sees it as not dual, who while acting acts not—this is certain.*] He who in the waking state, though seeing a dual order, sees it not in its twofold difference, as if he were in a dreamless sleep,—such a one knows soul. The reason of the non-apprehension of the twofold difference is the unity of the real. Duality has been sublated. So acting he acts not, because he is inactive—such is the connection. Accordingly it is currently said: Vasishṭha who as if in dreamless sleep, goes about, is already emancipated.

Here some one may ask: By what shall others know one who is emancipated while yet living? To this the reply is furnished.

As he before possessing knowledge [*followed the ordinary appetites and amusements; so he now acts only upon good ideas; or else is indifferent to good and bad alike.*] Good ideas, alone it is meant, are followed out, because the bad ideas have been sublated in the state of establishing the knowledge. Here it might be objected that one who follows only the good as it is prescribed in sacred institutes differs in no wise from one still engaged in setting up the emancipatory knowledge. Unsatisfied therefore with what he has already stated, the author adds *Or else he is indifferent to good and bad alike.* Indifference is disregard of benefits and injuries. Thus the deliverance of Gautama: They hold him to be without benediction, without initiatory effort, without salutation, without compliments, undestroyed, his works destroyed, and not a Bráhman. So that of Vyása: Having thoroughly acquired non-silence and silence. Likewise the text of the Vṛihad-âranyaka: Not a Brâhman. Indifference therefore consists in propriety, but does not imply an activity dependent on sacred precepts or an overstepping of prohibitions.

The author suggests the doubt that precepts and prohibitions and dependency on another cannot pertain to the emancipated, and that consequently he acquires a right to act as he chooses, and proceeds to repudiate such a surmise by a quotation confirmatory of his freedom from works.

[*Therefore it has been said: If*] *one who understands the principle of duality* [*may act as he chooses, what difference is there between dogs and those who know the truth, in respect of eating things impure? The difference is that the one knows the truth, and he that is liberated knows the truth, and no one else.*]

This right of acting as he chooses is not possessed by one seeking liberation, how much less by the sage emancipated? This position is untenable; for one who is unattached to any object does not act relation to it, and why should a man desirous of liberation, and therefore free from attachment to the three worlds, feel any desire? A man, pained by hunger though he be, is not willing to eat poison. Though he know it to be mixed with dainty food, he wishes not to eat it. Desire is a mark of unwisdom in regard to the objects of exercise of the understanding. Why? Because the greenness of that tree in the hollow of which there is fire is unattractive.

As to the doubt that acting as one wishes being an educt of illusion, and therefore ceasing on the cessation of illusion, freedom from self-conceit and freedom from malice being equally educts of illusion cannot outlast cessation; the author shows that even if they do not outlast it, they cannot cease with it, inasmuch as this supposion is repugnant to the science which treats of the cessation of the cosmical illusion.

Then [*when one is emancipated while yet alive freedom from self-conceit and other media of knowledge, and freedom from malice and the like good qualities, will supervene, like ornaments. Therefore it has been said: In him who has attained to a knowledge of the soul, there arise without effort freedom from malice*

अयन्त्विति । आरब्धफलानि भुज्यमानानि पूर्व्ववासनाक्रियमाणानि च कर्म्माणिसाक्षितया कर्तृत्वभुक्तृत्वाभिमानहीनोऽन्यदृष्ट्या पश्यन्निव भासमानोऽपिपरमार्थतः स्वदृष्ट्या न पश्यति ज्ञानेन कर्तृत्वाद्यभिमानमूलाज्ञानस्य बाधितत्वाद्धन्यात् विलक्षणएवायमित्यर्थः बलवत्प्रयुक्तवाणपाषाणादिवत् प्रवृत्तफलस्य कर्म्मणोयावद्वेगक्षयं निवारकाभावात्तदधीनस्य देहस्य न सद्यः पातप्रसङ्ग इति द्रष्टव्यं उक्तमर्थं दृष्टान्तेन स्पष्टयति ।

यथेन्द्रजालमिति । बाधितत्वबुद्धेरनुवृत्तेरित्यर्थः जीवन्मुक्तो देहादिभिर्व्यवहरन्निव दृश्यमानोऽपि न परमार्थतो व्यवहरतीत्यत्र श्रुतिं प्रमाणयति ।

सचक्षुरचक्षुरिति । चक्षुरादिमानपि प्रपञ्चरूपाद्यदर्शनाच्चक्षुरादिहीन इव भवतीत्यर्थः आदिपदात्तदेजतितन्नैजतिइत्यादिश्रुत्यन्तरग्रहः उक्तेऽर्थेपूर्व्वाचार्य्यसम्मतिमाह ।

उक्तञ्च सुप्तवदिति । जाग्रति जाग्रदवस्थायां द्वयं पश्यन्नपि यः सुषुप्तिंगलवद्विशेषतो न पश्यति स आत्मवित विशेषादर्शने हेतुरद्वयतत्त्वइति द्वयस्य बाधितत्वादित्यर्थः तथा कुर्व्वन्नपि न करोति यतो निष्क्रियइति योजना तथाच विशिष्टः सुषुप्तवत् यश्चरति समुक्तइति कथ्यते इति नन्वसौ जीवन्मुक्त इति कथमन्यैर्ज्ञायत इति तदाह ।

अस्य ज्ञानात्पूर्व्वमिति । अशुभवासनानां साधकावस्थायामेव निवर्त्तितत्वाच्छुभवासनानामेवानुवृत्तिर्भवतीत्यर्थः ननु शास्त्रविहितं शुभमेवानुचरतो न साधकाद्भेदइत्यपरितुष्यन्निवाह ।

शुभाशुभयोरौदासीन्यम्वेति । औदासीन्यमुपेक्षाहिंसानुग्रहयोरनारम्भोति गौतमस्मरणात् निराशिषमनारम्भं निर्नमस्कारमस्तुतिं अक्षीणं क्षीणकर्म्माणं तदेवाब्राह्मणं विदुरिति व्यासवचनात् अमौनं मौनञ्च निर्व्विद्याथ विब्राह्मणइतिबृहदारण्यकश्रुतेश्च तथा चौदासीन्यमेवमुक्तिलक्षणं न विधिपरतन्त्रप्रवृत्तिमत्वं न वा निषेधातिक्रमइति भावविधिनिषेधशास्त्रपरवशत्वञ्चमुक्तस्य न भवेत्तर्हि यथेष्टाचरणं प्राप्नोतीत्याशङ्क्य नैष्कर्म्यसिद्धवाक्ये न प्रत्याचष्टे ।

and other good, qualities, but not as media or instruments.] In the words. *Therefore it has been said &c.*, the author exemplifies the statement that the emancipated while living is exempted from all action. Having thus fully explained this state, he proceeds to exhibit real emancipation.

What more need be said? [*This one, emancipated while living, experiencing fructescent retributions consisting of pleasures and pains afforded by desire, aversion, and the desire of others, merely for the sustentation of his body; and being the illuminator of the appearances of the understanding; on the termination of this (of such fruition and illumination), his life being merged in absolute spirit, in the self-conscious beatitude, he abides as the undivided absolute, the supreme isolation, the unmingled bliss, free from every semblance of difference, in consequence of the destruction of illusion and of the ideas emanating therefrom.*] Sustentation of the body is the continued existence of the organism. His experience is for the sake of this alone, not for the gratification of the senses. Consisting of pleasures and pains, means the efficient causes of pleasures and pains. While experiencing, enjoying without attachment to them, fructescent retributions, the objects of fruition, how can he be said to enjoy them? The answer to this is given in the words *Being the illuminator of the appearances*, as witness of modifications of other objects. On the termination *of this*, when the fruition of fructescent retributions has come to a close, and the life for want of a support or receptacle is merged in absolute spirit; then in consequence of the destruction of illusion by the knowledge, previously acquired, and of the ideas which are its emanative effects, and in consequence of the burning of his accumulated works in the fire of knowledge, and of his disjunction from current works and because there is no cause for his further embodiment, the philosopher remains essentially identical with absolute spirit described under the terms supreme isolation and so forth. His life or vital air no longer transmigrates when he has the intuition of the absolute, but is merged in the self-conscious real.

The author cites testimony to this effect.

[*According to such texts as: His* [*vital spirit does not transmigrate but is absorbed, and already free he obtains freedom.*] The author next adduces a text of the Kâṭhakas in evidence that emancipation is not a generable result (but an ever-permanent reality), in the words *And already free he obtains freedom.* Being previously free or emancipated, he acquires a freedom relative to the dissolution of the merely apparent universe constituted by names and forms, the accidents and differences presented by illusion, in consequence of the presentative cognition whereby he recognises himself to be spirit, ever pure, wise, and free, the truth, the full beatitude, the self-conscious absolute.

The real truth, is that there is no such thing either as bondage or as liberation. Thus the sacred text: Nor cessation is there, nor generation, nor bondage, nor generator of results, nor seeker of liberation, nor spirit liberated,—this is the real truth.

(The commentator's benediction to his reader.)

May thy soul, like Râma, his face agitated by separation from the Sîtâ of knowledge; and overwhelmed with sorrow and bewilderment, with consciousness for a companion like Lakshmana, crossing the deeps of worldly being, befriended by sacred institutes as by Sugrîva, and finally slaying his dejection like Bâli, build the bridge of fortitude across the ocean of love, and killing his ignorance, at last destroyed like the lord of the Râkshasas, recover that Jânakî pure intelligence.

The ascetic Râma-tîrtha, the bee that hovered at the lotus-feet of the revered Krishna-tîrtha, made this gloss on the Vedânta-sâra.

A. E. G.

FINIS.

PRINTED AND PUBLISHED BY THE PROPRIETORS, E. J. LAZARUS AND CO. AT THE MEDICAL HALL PRESS, BENARES.

तदुक्तं बुध्येति। सतत्त्वं याथात्म्यं मुमुक्षोरपिनास्ति यथेष्टचेष्टाविदुषो मुक्तस्य कुतएव सा तदयुक्तं योहि यत्र विरक्तः स्यान्नासौ तस्मिन् प्रवर्त्तते लोकत्रयाद्विरक्तत्वान्मुमुक्षुः किमितीहते क्षुधयार्प्यमानोऽपि न विषं हातुमिच्छति मिष्टान्नध्वस्ततन्तत्तुजानन्नामूढस्तज्जिघत्सति रागोलिङ्गमबोधस्य चित्तव्यायामभूमिषु कुतः शाद्वलतातस्य यस्याग्निः कोटरेतरोरित्यादि नन्वविद्याकार्य्यत्वाद्यथेष्टचेष्टायाः अविद्यानिवृत्यातन्निवृत्तिवदमानित्वाद्वेष्टृत्वादीनामप्यविद्याकार्य्यत्वाविशेषान्निवृत्तिरेव स्यान्नानुवृत्तिरित्याशङ्कानियोगदर्शनादनुवृत्त्याभावेऽपि निवृत्तिशास्त्रविरुद्धभास्ववत्वान्ननिवर्त्तरन्निति दर्शयति ।

तदानीमिति । तत्रापि नैष्कर्म्यसिद्धिमुदाहरति ।

तदुक्तमुत्पन्नेति । इदानीमुक्तं जीवनमुक्तमनूद्य तस्य परममुक्तिं दर्शयति ।

किंबहुनेति । देहयात्रा देहस्थितिः तन्मात्रार्थं नत्विन्द्रियप्रीत्यर्थः सुखदुःखलक्षणानि सुखदुःखसाधनानि आरब्धफलानि भोग्यान्यनुभवन्नासङ्गतया भुञ्जानः कथंभुञ्जानइत्युच्यते ।

अन्तःकरणाभासादीनां विषयान्तरवृत्तीनां सा ही तयावभासकः सन्निति यावत् । तदवसानेप्रारब्धफलभोगावसानेजाते आश्रयाभावात् प्राणे ब्रह्मणि लीने सति पूर्व्वसिद्धज्ञानेनैव प्रारब्धकर्म्माक्षिप्तज्ञाने तत्कार्यतत्संस्काराणामपि विनाशात् सञ्चितकर्मणां ज्ञानेन दाहात् क्रियमाणैश्चासंश्लेषात् पुनर्देहान्तरहेत्वभावात् परमकैवल्येत्यादिनोक्तब्रह्मस्वरूपएवावतिष्ठते विद्वानित्यर्थः ॥ निर्गुणब्रह्मसाक्षात्कारवतः प्राणानोत्क्रामन्ति किन्तु प्रत्यग्ब्रह्मण्येवते प्रायः पिण्डाम्बुवदयन्ते इत्यस्य प्रमाणमाह ।

नतस्येति । मुक्तेरसाध्यत्वे काठकश्रुतिं प्रमाणयति । विमुक्तश्च विमुच्यत इति पूर्वं विमुक्तएवसन्नविद्याप्रत्युपस्थापितनामरूपोपाध्यविवेकनिबन्धनस्यसंसाराभासस्य नित्यशुद्धबुद्धमुक्तसत्यपरमानन्दाद्वयप्रत्यग्ब्रह्मरूपोहमस्मि इत्यपरोक्षज्ञानाद्विलयापेक्षया विमुच्यतइत्यर्थः । वस्तुतस्तु न बन्धो न वा मोक्षः । तथा च श्रुतिः ॥ न निरोधो नचोत्पत्तिर्नबन्धो नच साधकः ॥ न मुमुक्षुर्नवैमुक्तइत्येषापरमार्थतेत्याद्या ॥ विद्यासीतावियोगक्षुभितनिजमुखः शोकमोहाभिपन्नश्चेतासौमित्रिमित्रोभवगहनगतः शास्त्रसुग्रीवसख्यः । हत्वान्ते दैन्यवालिं मदनजलनिधौ धैर्यसेतुं च बध्वा ध्वस्तावोधरक्षःपतिरधिगतचिज्ज्ञानक्ष्यस्वात्मरामः ॥ १ ॥ वेदान्तसारविवृतिं रामतीर्थाभिधोयतिः ॥ चक्रे श्रीकृष्णतीर्थस्य पदपङ्कजषट्पदः ॥ २ ॥

॥ इतिश्रीरामतीर्थयतिविरचितावेदान्तसार-
टीका समाप्ता ॥ शुभम् भूयात् ॥

काशीविद्यासुधानिधिः

श्रीगणेशाय नमः

श्रीमद्विजयिनीदेवीपाठशालोदयोदितः । प्राच्यप्रतीच्यवाक्पूर्वापरपक्षद्वयान्वितः ॥ १ ॥

अङ्करश्मिः स्फुटयतु काशीविद्यासुधानिधिः । प्राचीनार्यजनप्रज्ञाविलासकुमुदोत्करान् ॥ २ ॥

THE PANDIT.

A Monthly Journal, of the Benares College, devoted to Sanskrit Literature.

No. 89. Benares, October 1st, 1873. Vol. VIII.

॥ चिन्तामणेः शब्दखण्डम् ॥

(१) अथवा यथा गङ्गायां घोषः प्रतिवसति, तमानयेतिवाक्यानन्तरं प्रयोज्यस्य तीरोषितघोषानयने प्रवृत्तिमुपलभ्य किं तीरेऽपि गङ्गापदस्य शक्तिरुत स्वार्थेन संबन्धात् स्मारिते तीरे तात्पर्यमात्रं, तीरान्विताभिधानं तु पदान्तरैरेवमप्ययोग्यार्थपरत्वाभावेन प्रामाण्यादाप्तोक्तत्वोपपत्तेरिति विचिकित्सन्बालस्तीरादौ न शक्ति, स्तथा सत्येकार्थसंबन्धिषु बहुष्वेकपदस्य बह्वी शक्तिरेवं पदान्तरेषु तेषु च शक्तिग्रहार्थं वृद्धव्यवहारापेक्षा च, तथा च गौरवमतः स्वार्थसंबन्धिनि तीरादौ तात्पर्यमात्रं लाघवादिति तत्र तत्र (२) लक्षणामेव कल्पयति । यस्य चैवं विमर्शः प्रथमं लाक्षणिकपदश्रवणेन जायते तस्य तत्र शक्तिबुद्धावपि यदा लक्षणाख्यवृत्त्यन्तरज्ञानं पूर्वोक्तन्यायेन जायते तदा प्रथमावगतशक्तिज्ञानं (३) मम भ्रम इति कल्पयति, लाघवात् । अन्यत्र तु यत् प्रथमावगतस्य सत्यत्वकल्पनं तदुपपादककल्पनं च तल्लाघवात् । अत्र तु न तथा । अन्यथा संबन्धिसहस्रेषु शक्तिकल्पनाप्रसङ्गात् । (४) एवं च लक्षणास्थले यस्य प्रयोज्यव्यवहारादाद्यव्युत्पत्तिस्तीरादौ (५) स यदा तीरनीरयोरन्वयबोधयोग्ये प्रयोगे नीरे व्यवहारं पश्यति तदा तत्रैव शक्तिः, तीरधीस्तु प्रयोज्यस्य लक्षणावशात्, मम तदनाकलनात्तत्र शक्तिज्ञानं भ्रम इति कल्पयति । (६) यदा तूभयानुगतमेकमेवावच्छेदकमस्ति उभयत्र प्रयोगश्च, तत्रोभयत्र शक्तिरेव न लक्षणा, तुल्यवद्व्युत्पत्तेरेकत्र मुख्यत्वोपमर्दे हेत्वभावात् ।

॥ शब्दचिन्तामणिव्याख्या रुचिदत्तीया ॥

नन्वेवमुभयोरप्यन्वययोग्यत्वे यत्र तीरएव तात्पर्यं ज्ञातं तत्र न तीरान्वयबोधः स्यात् । किं च प्रकरणादीनामननुगततया तैस्तदन्यथासिद्ध्यभावात्तात्पर्यज्ञानं हेतुरिति प्रागेव निर्णीतमित्यरुचेस्तद्धेतुत्वमभ्युपगम्याह । (१) अथ वेति । (२) लक्षणामेवेति । लक्षणात एव प्रयोज्यस्य तीरधीर्न तु तत्र शक्तिरिति कल्पयतीत्यर्थः । (३) मम भ्रम इति । अपभ्रंशवत् संबन्धांशे भ्रमो बोध्यः । (४) एवं च लक्षणास्थलइति । गवादिपदवद्विचिकित्सां विनैवेति शेषः । तेन न पौनरुक्त्यम् । (५) स यदेति । ननु नीरतात्पर्यादेव नीरव्यवहारोऽन्यथासिद्धो न तत्र शक्तिकल्पको, ऽन्यथा तीरव्युत्पन्नस्य तीरनीरयोरन्वययोग्यप्रयोगे तात्पर्यवशेन तीरव्यवहारात्तत्रैव शक्तिकल्पने नीरशक्तिधीरेव भ्रम इति वैपरीत्यकल्पनापत्तेः । यदि च लक्षणयापि तात्पर्यनिर्वाहाच्च तीरे शक्तिस्तदा नीरेऽपि तुल्यम् । तस्मात्सर्वस्य न प्रथमं तीरेऽपि व्युत्पत्तिः, केषांचित्तीरेऽपीति विनिगमकाभावादन्यतरशक्तिग्रहः, भ्रमत्वकल्पकाभावादक्षादिपदवन्नानार्थतैव युक्तेति चेत् । न । एतदनुशयेनैव किं चेत्याद्यग्रिमग्रन्थावतारात् । नन्वेवं नीलपीतघटयोरपि द्वयोर्न शक्तिः स्यादित्यत आह । (६) यदा त्विति ।

(७) यत्र तु न तथा, तत्रानेकार्थत्वमेवाक्षादिपदे । तावदन्यतरत्वं तत्राप्यनुगतमस्तीति चेत् । न । तावदन्योन्याभाववदन्यत्वं हि तत् । न च तावदन्योन्याभाववदन्यत्वेन रूपेण तावतामक्षपदादवगतिः, (८) किं तु पाशकत्वादिनैव । किं च यदि तीरेऽपि शक्तिस्तदा न तीरमात्रे, किं तु गङ्गातीरे, तथा च विशिष्टशक्तौ विशेषणे शक्ति(९)रावश्यकी, नागृहीतविशेषणान्यायात् । अथ लक्षणापक्षे यथा प्रवाहेणोपलक्षणेन व्यावृत्ततीरविशेषस्यान्वयो न तु तीरान्तरस्य तथा प्रवाहोपलक्षिते तीरे शक्तिरस्तु न तु तीरे प्रवाहेऽपीति चेत् । गङ्गापदशक्तौ प्रवाहस्य शक्यत्वेन विशेषणत्वे संभवति नोपलक्षणत्वं, विशेषणत्वासंभवे सत्येवोपलक्षणत्वात्, अतः प्रवाहएव शक्तिः । (१०) किं च तीरशक्तावुपलक्षणत्वं प्रवाहस्य न शक्यतावच्छेदकत्वं, शक्यावृत्तित्वात्, नापि धेनुपदे गोत्वस्येव शक्त्युपाधित्वं, गौरवात् ॥ अन्ये तु तीरे नीरे च व्यवहार एव विलक्षणः नीरे ऽनुपपत्तिं विनैव व्यवहारो निरुपाधिकत्वाद् शक्त्युपपाद्यः, तीरे त्वनुपपत्त्या ह्यौपाधिक एव व्यवहारः, स च शक्त्यभावोपपाद्य इति । तन्न । लक्षणायामव्युत्पन्नो बालः प्रयोज्यस्य तीरान्वितानयनादिरूपं व्यवहारं पश्यन्नन्यत्र दृष्टां शक्तिं (११) कथं न कल्पयेत् । अथ लक्षणया तीरत्वेनोपस्थितौ तीरान्तरान्वयोऽपि स्यात् । गङ्गातीरत्वेनैवोपस्थितौ युगपद्वृत्तिद्वयविरोधः, गङ्गोपस्थितेः शक्तिसाध्यत्वादिति चेत् । लक्षणाधीनतीरस्मृतेर्न गङ्गासंबन्धित्वेन तीरं विषयः, (१२) किं तु यद्वस्तुगत्या गङ्गासंबन्धि

(७) यत्र तु न तथेति । तुल्यवत्प्रयोगो नैकमवच्छेदकमित्यर्थः । विनिगमकाभावादिति भावः । (८) किं त्विति । ननु बुद्धिस्थप्रकारकज्ञानजनकत्ववत्तावदन्यान्यप्रकारकज्ञानजनकत्वग्रहात्पदे बुद्धिस्थत्ववदन्यान्यत्वस्य स्वरूपसत एव शक्यतावच्छेदकतया कथमक्षादिपदं नानार्थम् । न च तावदन्यान्यत्वं सर्वनानार्थव्यापक,मर्थशब्दस्य धनप्रमेयवाचकस्य तावदन्याप्रसिद्ध्या तदभावेन नानार्थत्वस्येर्यादिति वाच्यम् । तस्य प्रकारानुगमकतया धनत्वप्रमेयत्वप्रकारान्यप्रसिद्ध्या तत्संभवात् । अक्षादिपदे तथापि नानार्थत्वानुपपत्तेश्च । एकार्थत्वसंभवे नानार्थत्वकल्पनस्यान्याय्यत्वादिति चिन्त्यम् । (९) आवश्यकीति । तथा च तच्छक्त्यैवोक्तक्रमेण तीरधीसंभवे तत्रापि न शक्तिरिति भावः । अत एव वेलादिपदवदुभयत्र शक्तिरित्यपास्तम् । तस्य स्वातन्त्र्येण तीरनीरशक्ततया विशिष्टशक्त्यभावेन तन्न्यायानवतारात् । नन्वेवं मत्सरशब्दादावपि धर्मिणि शक्तिर्न स्यात् । अत एव गुणशक्तनीलादिपदस्य न गुणिशक्तत्वम् । यदि चोक्तन्यायेन लाघवाद् विशेषणमात्रे शक्तिस्तदा मत्सरशब्देऽपि तुल्यम् । एतेन प्रयोगप्राचुर्यं शक्तिनियामकं, मत्सरशब्दस्य च धर्मिणि तुल्यवत्प्रयोगात्तत्रापि शक्तिरित्यपास्तम् । नीलादिपदस्य गुणिनि प्रयोगप्राचुर्ये ऽप्यशक्तत्वात् । समासस्य तथात्वेऽप्यशक्तत्वाच्च । लक्षणयैवोपपत्तौ न शक्तिरिति तुल्यमिति चिन्त्यम् । ननु तीरे शक्त्यन्तरं तत्र विशिष्टशक्यत्वे गौरवादुपलक्षणत्वं स्यादित्यत आह । (१०) किं चेति । शक्यतावच्छेदकत्वे गोत्वादिवच्छक्तौ विशेषणत्वमेव स्यात् । अन्यथा शब्दात्तदुपस्थितिर्न स्यात् । तथा च पूर्वोक्तगौरवाद्विशेषणमात्रे शक्तिरेवास्त्वित्यर्थः । शक्त्युपाधावपि गौरवेण शक्तेरस्वीकारे धेनुपदाद्गोत्वप्रकारिका धीर्न स्यात् । अन्यथा धानमपि शक्यं न स्यात् । धानोपस्थित्यर्थं निमित्तान्तरकल्पनागौरवं च गोत्वे ऽपि तुल्यमिति भावः । (११) कथं न कल्पयेत् । यदि नोक्तगौरवबाधकं प्रतिसंदध्यादिति शेषः । प्रथमं तीरव्युत्पत्तस्य व्यवहारव्युत्पत्तिवैपरीत्यमेवेति बोध्यम् । (१२) किं त्विति । एतच्च यत्र तीरत्वेन पूर्वं तज्ज्ञानं तदभिप्रेत्य, यदा तु गङ्गासंबन्धितीरत्वेन तज्ज्ञानं तदा तेनापि प्रकारेण तज्ज्ञानसंभवात् । संबन्धिदर्शनं हि येन प्रकारेण संबन्धी ज्ञातस्तत्प्रकारकं संस्कारमुद्बोध्य तत्प्रकारिकामेव स्मृतिं जनयति । न च गङ्गासंबन्धित्वावच्छेदेन कथं गङ्गासंबन्धानुभवः स्यादिति वाच्यम् । घटेन घटवद् भूतलमितिवद्गङ्गासंबन्धि तीरं गङ्गासंबन्धीति बुद्धिसंभवात् । न च वृत्तिद्वयविरोधः । गङ्गाया अप्युक्तक्रमेण लक्षणयैवोपस्थितेः । शक्यसंबन्धो हि तीरे वर्त्तमानः तत् स्मारयंस्तीरत्ववद् उक्तक्रमेण गङ्गासंबन्धित्वमुपस्थापयतीति किमनुपपन्नम् । नहि तीरत्वोपस्थितयेऽप्युक्तकल्पनादन्यः प्रकारो ऽस्ति, शक्यतावच्छेदके शक्तिवल्लक्ष्यतावच्छेदके ऽपि लक्षणाया अभावादिति वदन्ति । अत्र ब्रूमः । एवं हि गोत्वादावपि शक्तिर्न कल्प्येत, उक्तलीलयैव तत्प्रकारकस्मृतिसंभवात् । यदि च वृत्त्योपस्थापितस्यैवार्थस्यान्वय इति शक्तिस्तदा तीरत्वेऽपि तुल्यम् । तस्मात्तीरत्वे ऽपि परम्परासंबन्धात्मिका लक्षणैव । न चैवं गङ्गासंबन्धित्वेऽपि तथैवास्त्विति वाच्यम् । तत्र तत्संबन्धाभावात् । तदिदं वक्ष्यति । तत्संबन्धे तत्संबन्धाभावादिति । न च संयोगे समवायवत् तत्संबन्धेऽपि तत्संबन्धान्तर,मन्यथा गङ्गायाः संबन्ध इत्यत्र षष्ठ्यर्थानुपपत्तिरिति वाच्यम् । गङ्गांशे तथापि तदनुपपत्तेरिति । इदं तु स्यात्, नीलो घट इत्यादावित्र

तदेव तीरत्वेन परिचीयते, संबन्धिदर्शनजस्मृते(१३)स्तत्संबन्ध्यविषयत्वात् । यथा पदहस्तिदर्शनात्पदार्थहस्तिस्मृते(१४)र्न पदहस्तिविषयत्वम् । अत एव तीरापक्षस्मृते... अत एव तीरान्वितवाक्यार्थबोधे ऽपि न गङ्गासंबन्धित्वेन (१५) तीरं विषयः । (१६) अपि च गङ्गायामित्यादिपदानामाप्तोक्तत्वेन प्रामाण्यात्संभूयपदप्रतिपाद्यान्वयबोधकत्वरूपमेकवाक्यत्वमवगतं मुख्यार्थश्चायोग्य इति योग्यश्चाकाङ्क्षितश्चामुख्यार्थो ऽपि प्रतिपाद्यः कल्प्यन्ते । (१७) अन्यथा एकवाक्यत्वभङ्गप्रसङ्गात् । न चापदार्थेनैव योग्यतादिमतान्वयबोधकत्वमस्त्विति वाच्यम् । गङ्गापदवैयर्थ्यप्रसङ्गात् । प्रतिपाद्यता च लक्षणीयस्य क्लृप्तेनैव स्वार्थसंबन्धेन, न तु शक्त्या, गौरवात् । तदन्वयबोधश्चेतरपदेनैव । (१८) शक्त्या पदोपस्थापितस्य पदेनान्वयो बोध्यते । अन्यत्र तु तथा दर्शनादिति चेत् । न । (१९) लाघवेन पदोपस्थापितत्वस्यैव तन्त्रत्वात् । यद्यपि लाक्षणिकस्य पदान्तरेण न संभूयप्रतिपादकत्वम्, अननुभावकत्वात् । लक्ष्यस्मृतौ च न संभूयकारित्वम् । अत एव नैकवाक्यत्वमपि । तथापि घोषादिपदानां समभिव्याहृतपदप्रतिपाद्यान्वयबोधकत्वमवगतं, तच्च न लक्षणां विनेति तां कल्पयति । यत्तु सामान्यतो (२०) गङ्गादिपदार्थान्वयो ज्ञात इति तद्रक्षार्थं परम्परया गङ्गादिपदार्थस्मारिते तीरे लक्षणा कल्प्यतइति । तन्न । (२१) प्रथमं गङ्गापदार्थान्वयबोधकाभावात् । अन्वयबोधे ऽपि लक्षणया गङ्गापरिचिततीरस्य घोषान्वयबोधेपि (२२) गङ्गाया अन्वयबोधाविषयत्वेन तदन्वयस्यारक्षणात् । यत्तु गङ्गायां घोष इत्यादेरेकवाक्यत्वं पदस्मारितार्थान्वयबोधकत्वरूपमवगतं, तच्च यद्यपि गङ्गापदार्थस्य साक्षाद् घोषाधारत्वायोग्यत्वान्न संभवति, तथापि गङ्गासंबन्धितीरे योग्ये घोषान्वयात्तीरावच्छेदकतया गङ्गापदार्थस्य घोषान्वयादेकवाक्यत्वं संभवति । अत एवैकवाक्यत्वस्य सामान्यतो ऽवगतपदार्थान्वयस्य च रक्षार्थं गङ्गापदस्मारितस्वार्थस्मारिते तीरे वृत्त्यन्तरं लक्षणा कल्प्यते तयोरन्यथा भङ्गप्रसङ्गादिति । तन्न । तीरार्थस्य घोषान्वयबोधेपि गङ्गापदार्थस्य तदन्वयबोधाविषयत्वात् । अथ गङ्गातीरत्वेनोपस्थिते घोषान्वयबोधाद्भवति गङ्गायास्तीरावच्छेदकतया ऽन्वयबोधविषयत्वमिति चेत् । न । गङ्गापदाद्गङ्गातीरयोर्युगपदुपस्थितौ वृत्तिद्वयविरोधात् । नह्युभयोः शक्त्या लक्षणया वोपस्थितिः संभवति । अथ लक्षणास्वाभाव्याल्लक्षकपदेन स्वार्थसंबन्धित्वेनैव लक्षणीयतीरादेरुपस्थितिः । अन्यथा तीरमात्रान्वयप्रसङ्गात् । तथा च लक्षणयैव गङ्गोपस्थितिरिति चेत्, न । गङ्गासंबन्धा(२३)त्तीरस्य स्मृतिः संभवति, न तु गङ्गासंबन्धस्य, (२४) तत्संबन्धाभावात् । अत एव एकसंबन्धिज्ञानादपरसंबन्धिस्मृतेरपर-

---

विशिष्टएव लक्षणास्तु, अन्यथा तत्रापि वृत्तिद्वयविरोधस्य वज्रलेपत्वापत्तेः । केवलाद्विशिष्टस्यान्यत्वात् । प्रजयतीत्यत्राग्रे तस्य स्फुटत्वात् । एवं च यथा व्यक्तौ शक्तिस्तथैव क्रम् । यद्वा तत्संबन्धे तत्संबन्धान्तरसंभवाल्लक्षणैव, यद्वि येनेत्यादिन्यायेन गङ्गालाभो ऽप्यस्तु । अत एव राजपुरुष इत्यत्रापि राजसंबन्धित्वेनैव पुरुषानुभवः । तस्मादनेन रूपेण पूर्वं तीरभानं तेनैवाये तदनुभव इति सत्यं, किं तु तल्लाभ उक्तप्रकारेण लक्षणयैवेति । केचित्तु मणिकृन्मते वृत्तिद्वयविरोधस्यादोषत्वे उपस्थितनीरतीरयोरन्वये गङ्गातीरत्वेनाप्यनुभव इत्यप्याहुः । (१३) तत्संबन्ध्यविषयत्वा,त्तत्संबन्धविषयत्वानियतत्वादित्यर्थः । (१४) न पदहस्तिविषयत्वम् । नियतमिति शेषः । (१५) तीरं विषयः, नियमेनेति शेषः । ननु नीलो घट इत्यादावपूर्वनीलव्यक्त्यनुभवो न स्यात्तत्र नीलसंबन्धाग्रहेण तदनुपस्थितेरिति चेत्, न । नीलसंबन्धित्वेन सामान्यतस्तत्संबन्धिमात्रोपस्थितौ योग्यतावशेन विशेषलाभात् । ननु गङ्गायां जलं तीरे घोष इत्यध्याहृतपदाभ्यामेवोक्तवाक्यप्रामाण्योपपत्तौ किं लक्षणाकल्पनेनेत्यरुचेरुक्तन्यायानुग्राहकं सिंहावलोकितन्यायेनाह । (१६) अपि चेति । (१७) अन्यथेति । अध्याहारादिकल्पनइत्यर्थः । न चेष्टापत्तिः । तस्यैासार्गिकत्वात् । अध्याहारेपि शब्दार्थोभयकल्पनमिति गौरवमपि बोध्यम् । गङ्गापदेत्यापाततः । शब्दानुपस्थाप्यस्य शाब्दबोधबहिर्भावापत्तेरित्यपि बोध्यम् । (१८) शक्त्येति । स्वशक्त्येत्यर्थः । दूरशक्त्या गङ्गापदस्यापि तीरोपस्थापकत्वात् स्वांशप्रवेशे गौरवमित्याह । (१९) लाघवेनेति । लक्ष्येति प्रकृताभिप्रायकम् । स्मृतिमात्रएव संभूयाजनकत्वात् । (२०) गङ्गापदार्थेति । प्रवाहेत्यर्थः । (२१) प्रथममिति । अयोग्यत्वादिति भावः । (२२) गङ्गाया इति । तीरत्वेन पूर्वं तज्ज्ञानपक्षइदं, तदभिप्रायेणैवाह । (२३) तीरस्येति । (२४) तत्संबन्धेति । आत्माश्रयादिति भावः । एतच्च लक्ष्यसंबन्धस्यैव लक्षणात्वे । अन्यथा संबन्धसंबन्धस्य भिन्नत्वेन तदभावात् । अत एव वक्ष्यति । राजनि-

संबन्धिसंबन्धाविषयत्वनियमः । यथा पदहस्तिज्ञानात्पदार्थहस्तिपकयोः स्मृतौ न पदहस्तिनोर्विषयत्वं, पदे पदस्य हस्तिनि हस्तिनः संबन्धाभावात् । (२५) सामान्यतो गङ्गापदार्थान्वयो नावगम्यते, बोधकाभावात् । (२६) लक्षणा च (२७) शब्दा(२८)त्परम्परया (२९) ऽशक्यासदृशस्यान्वयपरोपस्थितिरूपा(३०)शक्यसंबन्धादशक्यासदृशान्वयपरोपस्थितिरूपा वा । (३१) अशक्यासदृशान्वयप्रतियोग्युपस्थितिहेतुः स्वशक्यसंबन्धो लक्षणेति परमार्थः । उपस्थितिहेतुर्हि वृत्तिः, शक्तिवत् । (३२) अत एव क्लृप्तेन स्वार्थसंबन्धेन लक्ष्योपस्थितिसंभवान्न तदर्थे शक्तिः । न चै(३३)वं राजपुरुषादौ षष्ठ्यर्थलक्षणाद्यव्याप्तिः, राजसंबन्धे राजसंबन्धाभावादिति वाच्यम् । (३४) शक्येन राज्ञा स्वसंबन्धं विना संबन्धस्य लक्षयितुमशक्यत्वा,दन्यथाऽतिप्रसङ्गात् । न चात्माश्रयः । राजनिरूपितपुरुषसंबन्धस्य संबन्धसंबन्धस्य च भिन्नत्वात् ।

(३५) अथैवं मुख्यपरत्वेपि लक्षणा स्यात्,शक्यसंबन्धस्य तीरादौ सत्त्वादिति चेत्,न । (३६) लक्षणायां तात्पर्याभावेन शक्तेरिव मुख्यपरत्वेऽपि लक्षणाया मूकत्वात् । वृत्तेस्तात्पर्यानुरोधित्वात् । तदुक्तं, तात्पर्याद्धि वृत्तिर्न तु वृत्तेस्तात्पर्यमिति, (३७) गोपदादेश्च स्वपरत्वे लक्षणैव न शक्तिः । स्वार्थसंबन्धेनैव स्वोपस्थितिसंभवात् । अन्ये तु पदानामौत्सर्गिकमर्थपरत्वं तदभावे स्वपरत्वं (३८) गामुच्चारयेत्यादौ वाच्याविवक्षया पदेन स्वान्विताभिधानादिति, । तन्न । वृत्तिं विना स्वपरत्वस्यानिर्वाहात् । अन्यथा वृत्त्यन्तरोच्छेदः, तत्परादेव (३९) तदन्विताभिधानसंभवात् । ननु पदगोचरश्रोत्रजनितप्रत्यक्षोपस्थितस्वपरत्वमेव पदानां तदन्वितस्वार्थाभिधानं तु पदान्तरेण । न च वृत्त्युपस्थितेनैव स्वार्थान्वयः पदेनाभिधीयतइति व्युत्पत्तिः किं तूपस्थितिमात्रेण, लाघवात् । (४०) अध्याहारे तथैव स्वीकारात् । लक्षणादीनां चोपस्थितिरूपतया (४१) तद्द्वारा वाऽन्विताभिधानोपयुक्तत्वात् । (४२) लक्षणा त्वाद्यसाधारणरूपेण तदुपयोगे परस्परव्यभिचारादिति चेत् । न । वर्णानामयौगपद्येन पदगोचरप्रत्यक्षस्याभावात् । (४३) भावे वा योग्यतादिविमर्शापेक्षया प्रत्यक्षस्यातीतत्वात् । (४४) किं चैवं गामुच्चारयेत्यादौ

रूपितपुरुषसंबन्धस्येत्यादि । सामान्यतोवगतेत्याद्युक्तं दूषयति । (२५) सामान्यत इति । प्राचीनमतमाह । (२६) लक्षणा चेति । शब्दाजन्यापि तीरोपस्थितिर्लक्षणा स्यादतउक्तं, (२७) शब्दादिति । घटपदशक्तिभ्रमात्पटोपस्थितौ अतिव्याप्तेराह । (२८) परम्परयेति । अन्वयपरत्व,मन्वयानुकूलत्वं, कारणाकारणसाधारणं,तेन शक्तिस्मृतिरपि तथाभूतलक्षणा स्यादित्यतउक्तं तदित्यन्ये । शक्तिस्मृतिजन्यत्वमते शक्तिस्मृतावतिप्रसक्तेराह । (२९) अशक्येति । गौणोपस्थितिवारणायासदृशपदं सादृश्यान्यसंबन्धेन तदुपस्थितिरूपेत्यर्थः । एतेन प्रमेयत्वादिना सर्वत्र सादृश्यादसदृशाप्रसिद्धिरित्यपास्तम् । नन्वन्वयपरत्वमन्वयानुकूलत्वं,तत्तात्पर्यकत्वं वा । नाद्यः । शब्द पदवैयर्थ्यात् । नान्त्यः । घटपदादिनां समवायघटितपरम्परासंबन्धेनाकाशधर्मोपस्थितावतिप्रसक्तेराहत्य पदार्थस्यैव स्मरणमिति प्रागुक्तेरशक्यपदवैयर्थ्याच्चेत्यरुचेराह । (३०) शक्यसंबन्धादिति । शक्तिरपि शक्यसंबन्ध एवेति नाशक्यपदवैयर्थ्यतादवस्थ्यम् । तथा च शक्तिसादृश्यान्यशक्यसंबन्धेनान्वयानुकूलोपस्थितिरूपा वेत्यत्र तात्पर्यम् । (३१) अशक्येति । शक्तिसादृश्यान्यान्वयानुकूलोपस्थितिहेतुशक्यसंबन्धइत्यर्थः । (३२) अत एवेति । शक्त्यन्यथासिद्धिप्रयोजकतया कल्प्यमाना लक्षणा तत्कार्यकारितया शक्यसंबन्धरूपैव न तूपस्थितिरूपेत्यर्थः । (३३) एवम् । संबन्धस्य लक्षणात्वइत्यर्थः । (३४) शक्येनेति । उपस्थितिलक्षणापक्षेपि तद्धेतुतया ऽवश्यमभ्युपगमा-

दिति भावः । (३५) अथैवमिति । उपस्थितिश्च मन्मते नास्तीति दोषाभाव इति भावः । (३६) लक्षणायामिति । तात्पर्याभावेन लक्षणास्थले शक्तेरिव मुख्यपरत्वे लक्षणाया मूकत्वादिति भावः । ननु यदि शक्तिसादृश्यान्यशक्यसंबन्धो लक्षणा तदा पदस्य स्वपरत्वेपि लक्षणैव स्यादित्यत्रेष्टापत्तिमाह । (३७) गोपदेति । तदभावे । अनुपपत्त्यादिनैवार्थपरत्वाभावे । तदेव दर्शयति । (३८) गामिति । वाच्यार्थे उच्चारणानुपपत्तेरित्यर्थः । तथा च किं लक्षणयेति भावः । नन्वेवमन्वयप्रतियोग्यनुपस्थापकतया तदनुभावकं न स्यादित्यत आह । (३९) तदन्वितेति । (४०) अध्याहारे । अर्थाध्याहारे । शक्यसंबन्धो लक्षणेति मतमाश्रित्याह । (४१) तद्द्वारा वेति । उपस्थितिद्वारा वेत्यर्थः । सा चोपस्थितिः प्रत्यक्षेणैव यदि सिद्धा तदा किं लक्षणयेति भावः । (४२) लक्षणात्वेति । तथा चोपस्थितित्वेनैव हेतुत्वमिति भावः । (४३) भावे वेति । उपनयवशादिति भावः । ननु प्रत्यक्षमूलिका स्मृतिः स्यादित्यरुचेराह । (४४) किं चेति । ननु वि[illegible]तस्य प्रत्यक्षोपस्थितस्यापि कर्मत्वेनानुपस्थितेर्नोच्चारणान्वयः

विकृतं गोपदमेवोच्चारणकर्म स्यात् । तस्यैव श्रोत्रप्रत्यक्षत्वात् । न त्वविकृतं गोपदम् । एक(४५)मुच्चारयेत्युक्तौ च न प्रकृतपदान्तरमुच्चारणकर्म स्यात् । किं त्वेकमुच्चारयेति पदमेव, सत्यन्वययोग्ये समभिव्याहृते प्रकरणादेरनुपयुक्तत्वात् । (४६) अपि चाध्याहारेऽवृत्त्युपस्थितेनान्विताभिधानमस्तु । तस्यापदार्थत्वेपीतरपदैरन्वयबोधात्, अत्र स्वरूपस्य पदार्थत्वमवश्यं वाच्यं, तच्च वृत्त्यन्तर्भावादेव । अन्यथा गामुच्चारयेत्यादौ द्वितीया, (४७) ऽच्छावाकीयं सामेत्यादौ च छप्रत्ययो न स्यात् । अर्थशून्यत्वेनाप्रातिपदिकत्वात् तस्माद् छप्रत्ययाननुशासनात् । किं च गौरस्तीत्यादावुभयपरत्वसंभवे स्वपरत्वमेव स्यात् स्वस्य प्रत्यक्षेण शीघ्रमुपस्थितत्वात् । (४८) प्रत्यक्षमूलकस्मृतपदार्थस्यान्वयो भवतीति चेत् । न । (४९) उक्तदोषात् । (५०) पदार्थस्मरणस्यान्वयपरत्वानियमाच्च । तत्परसन्निधानस्यान्विताभिधानोपयोगात् । किं च विभक्त्युपनीतान्वयप्रकारकर्मत्वादिनानुपस्थितस्याकाङ्क्षाविरहेण क्रियान्वयो न स्यात् । स्मृतपदे द्वितीयार्थकर्मत्वान्वय इति चेत् । न । विभक्तेः (५१) प्रकृत्यर्थान्वितस्वार्थावबोधकत्वस्य व्युत्पत्तिसिद्धत्वात् । अत एव गङ्गायामित्यत्र सप्तम्यर्थान्वयार्थं तीरे लक्षणा । अन्यथा स्मृत्युपनीततीरस्यान्वयबोधसंभवे लक्षणोच्छेदः । नन्वेवं जबगडदशमाहेत्यादौ निरर्थके न लक्षणा, स्वार्थसंबन्धाभावात् । प्रत्यक्षोपस्थिते स्मृते वा स्वरूपे क्रियान्वय इति दूषितमेवेति चेत् । न । नहि जबगडदशमाहेत्यत्र समुदाये क्रियान्वयः, समुदायस्यो(५२)च्चारणासंभवात् । किं तु योग्यत्वाद् द्वन्द्वानन्तरं श्रुतक्रियापदेन प्रत्येकवर्णे स्वार्थान्वयबोधनम् । प्रत्येकवर्णस्य च शक्तत्वेन स्वार्थसंबन्धादेव स्वस्मिन् लक्षणा, स्तोभेप्येवम् । स्वार्थसंबन्धाग्रहे च स्वरूपोपस्थितिः, शक्तिभ्रमात् । निरर्थकस्य स्वरूपे शक्तिरेव वृत्त्यन्तरं विनोपस्थितेः शक्तिसाध्यत्वादित्यप्या(५३)हुः । (५४) अन्ये तु पदस्य स्वबोधकत्वं वृत्तिं विनैव, स्वभावात् । अन्येन ह्यन्यबोधनेऽतिप्रसङ्गाच्छक्तिकल्पनं स्वबोधकत्वे च न तथा । यथा घटस्य स्वबोधकत्वं स्वसंबन्धं विनैव । एवं च स्वबोधिते स्वस्मिन् विभक्त्यर्थान्वयोपि । न च पदस्य स्वभावात् स्वबोधकत्वे सर्वत्र स्वबोधप्रसङ्ग इति वाच्यम् । इत्यादिपदस्य स्वार्थान्वयानुपपत्त्यादेः सहकारित्वात् । यथा घटस्य स्वबोधकत्वे इन्द्रियसंबन्धाद्यपेक्षेति । यत्तु स्वार्थसंबन्धिनि तात्पर्यं लक्षणा, तत्तात्पर्यं च तत्प्रतीतिमुद्दिश्योच्चरितत्वमिति । तन्न । लक्ष्यस्मृतये लक्षणा, सा च स्वार्थसंबन्धज्ञानादेवे(५५)त्यधिकस्य व्यर्थत्वात् । संबन्धधीः स्मृतिहेतुः कॢप्ता न तु तात्पर्यधीरपि । तस्या लक्ष्यस्मृतिजन्यत्वेनान्योन्याश्रयप्रसङ्गात् । (५६) तात्पर्यज्ञानं च (५७) लक्षणाबीजानुपपत्तिज्ञानेऽन्वयानुभवे चोपयुक्त,मतोऽशक्योपस्थितिस्तद्धेतुः शक्यसंबन्धो वा लक्षणेति तत्स्वरूपे तात्पर्यमनुपयुक्तमेव । (५८) लक्ष्ये तात्पर्याल्लक्षणा । तात्पर्याद्धि वृत्तिरिति च लक्ष-

---

किं त्वविकृतस्य तत एव द्वितीयाश्रुतेरित्यरुचेराह । (४५) उच्चारयेत्युक्तौ चेति । ननु प्रकरणस्य तात्पर्यग्राहकत्वेन बलवत्त्वमित्यरुचेरर्थाध्याहारमभ्युपेत्याह । (४६) अपि चेति । (४७) अच्छावाकीयमिति । अच्छावाकस्य यदि लक्षणया न स्वपरत्वं तदा निरर्थकात्तस्माच्छप्रत्ययो न स्यादिति तदीयत्वेन सामान्वयो न स्यादित्यर्थः । स्मृतत्वे हेतुमाह । (४८) प्रत्यक्षेति । प्रत्यक्षमूलकस्मृतिविषयपदार्थस्येत्यर्थः । शक्तिग्रहकाले गोः प्रत्यक्षत्वादिति भावः । (४९) उक्तदोषादिति । तादृशस्मृत्यपेक्षयापि प्रत्यक्षोपस्थितेः शीघ्रत्वादित्यर्थः । ननु तात्पर्यग्रहाद्विलम्बितापि सा बलवतीत्यत आह । (५०) पदार्थेति । प्रथमं शीघ्रोपस्थितस्वपरत्वस्यैव निश्चयात्तस्यैवान्वयः स्यादित्यर्थः । (५१) प्रकृत्यर्थेति । तच्च वृत्तिं विना नेति स्वपरत्वे लक्षणैवेत्यर्थः । (५२) उच्चारणासंभवादिति । असंभवप्राचुर्यादुक्तम् । वस्तुतो जबगडदशाः प्रमेया इत्यत्रापि प्रत्येकमेवान्वयस्तावतैव स्वार्थसंबन्धेनान्वये मिलिते स्वस्मिन् शक्तेरकल्पनादिति । न च ते पडित्यत्र पट्त्वान्वयो न प्रत्येकं, व्यासज्यवृत्तित्वादिति वाच्यम् । तत्रापि प्रत्येकलक्षणाभिरुपस्थापितेषु पट्त्वान्वयसंभवात् । घटपटौ द्वावितिवत् । उक्तलक्षणयैवोपपत्तौ शक्तिकल्पने मानाभावादित्यनुशयमाविष्करोति । (५३) आहुरिति । (५४) अन्ये त्विति । एवमपि स्वस्य प्रकृत्यर्थत्वाभावेन विभक्त्यर्थानन्वय इत्यस्वरसोऽत्र बोध्यः । (५५) अधिकस्य, तात्पर्यस्य । अन्योन्येति । लक्ष्यानुपस्थितौ तात्पर्यस्यापि परिग्रहीतुमशक्यत्वादित्यर्थः । नन्वेवं लक्षणास्थले तात्पर्याद्यनुविधानं न स्यादित्यत आह । (५६) तात्पर्यज्ञानं चेति । (५७) लक्षणाबीजेति । लक्षणाकल्पनबीजेत्यर्थः । पूर्वेषां ग्रन्थविरोधं परिहरति । (५८) लक्ष्ये इति । पञ्चम्यनन्वयोपि स्यादिति भावः ।

णास्थले वस्तुतो लक्ष्य तात्पर्यमस्तीत्येवंपरम् । किं चैवं मुख्येपि तत्तात्पर्यकत्वमेव वृत्तिरस्तु किंशक्त्या,तात्पर्यमेव वृत्तिं विना न निर्वहतीत्युच्यतइति चेत्,तर्हि लक्षणापि तन्निर्वाहिकैव न तु तदेव । अपि च तात्पर्यानुपपत्तिर्लक्षणाबीजं न तु तदनुपपत्तिरेव तद्बीजं, विरोधात् (५९) अत एवाशक्ये तात्पर्ये न लक्षणा । वृत्तेस्तात्पर्यनिर्वाहकत्वात् । निर्वाहकसंबन्धमपश्यत आप्तस्य तात्पर्याभावात् । शक्त्या शक्यसंबन्धेन वा पदादमुमर्थं जानात्वित्यभिप्रायेण पदप्रयोगो न तु तात्पर्यादेवायममुमर्थं ज्ञास्यतीति बुद्ध्या तात्पर्यमात्रस्य वृत्तित्वे (६०) सर्वस्य सर्वत्र प्रयोगो (६१) नानार्थोच्छेदश्च । स्वार्थसंबन्धेनेदं पदमर्थं बोधयिष्यतीति वक्तुरभिप्रायो लक्षणा तदभिप्रायज्ञानं विना श्रोतुर्लक्ष्यानुपस्थितेरित्यन्ये । तन्न । अयं ह्यभिप्रायः प्रयोगनिमित्तं, यथा शक्त्या ऽयमर्थं बोधयिष्यतीत्यभिप्रायः । न तु स एव लक्षणा (६२) गौरवात् । किं तु स्वार्थसंबन्ध एव लक्षणा, तत एव लक्ष्योपस्थितिसंभवात् । वृत्तेस्तत्रैवोपयोगात् । (६३) तस्य चाबोधकत्वे स्वार्थसंबन्धेनायं बोधयिष्यतीत्यभिप्रायवान् वक्ता नाप्तः स्यात् । तात्पर्यधीस्त्वन्वयबोधे हेतुरित्युक्तम् । शक्यसंबन्धश्चा(६४)विनाभाव एव, यष्टीः प्रवेशय मञ्चाः क्रोशन्तीत्यत्रापि प्रवेशनक्रोशनसमये यष्टिधरमञ्चस्थपुरुषयोर्यष्टिमञ्चाविनाभाव एव । एवं च छत्रिणो यान्ति काकेभ्यो दधि रक्ष्यतामित्यत्राजहत्स्वार्थलक्षणायामपि छत्रिणस्तत्समूहान्तर्गतत्वेना(६५)च्छत्रिणो ऽविनाभाव एव काककुक्कुरादीनां दध्युपघातकत्वेन युगपदुपस्थितिसमये काकस्य कुक्कुराद्यविनाभावः । यत्र तूपघातकत्वेन काकमात्रमुपस्थितं न कुक्कुरादिस्तत्र काकपदेप्युपघातकत्वेन लक्षणापि नास्ति । दध्युपघातकत्वेनातर्कितात् रक्षणोपदेशानर्हत्वादिति संप्रदायः । वस्तुतः शक्यसंबन्ध एव लक्षणा, (६६) अतिप्रसङ्गश्च संबन्धस्याविनाभावस्वरूपत्वेपि । तात्पर्यादन्वयनियमः शक्यसंबन्धमात्रलक्षणापक्षेपि, लक्षणाबीजं तात्पर्यानुपपत्तिः, पदस्य वृत्तिं विना लक्ष्ये तात्पर्यानिर्वाहात् । न तु शक्यान्वयायोग्यत्वं बीजम् । यष्टीः प्रवेशयेत्यत्राजहत्स्वार्थायां च शक्यस्यान्वययोग्यत्वेपि लक्षणासत्त्वात्तात्पर्यानुपपत्तिस्तत्रापि, लक्ष्ये तात्पर्यं विना लक्षणानुदयादिति संप्रदायः । वस्तुतोऽन्वयपरप्रमाणशब्दस्य मुख्येऽन्वयायोग्यत्वमेव लक्षणाबीजम् । गङ्गायां घोष इत्यादौ पूर्वोक्तन्यायेन लक्ष्ये (६७) तात्पर्यग्रहात्पूर्वमेव मुख्यस्यान्वयायोग्यत्वज्ञानेन लक्षणोपपादनात् । (६८) अस्तु वा तत्रापि लक्ष्ये (६९) तात्पर्यग्रहः, तथापि मुख्ये ऽन्वयानुपपत्तिरेव लक्षणा बीजं, प्रथमोपस्थितत्वात् तात्पर्यानुपपत्तिं विनैव लक्षणाबीजत्वसंभवाच्च । यष्टीः प्रवेशयेत्यत्राजहत्स्वार्थायां च मुख्यस्यान्वयानुपपत्तिरेव । तथाहि । (७०) प्रकरणादिना प्रवेशयेत्यस्य भोक्तृप्रवेशनपरत्वं, यान्तीत्यस्य छत्रितदितरघटितसमूहगमनकर्तृपरत्वं च ज्ञातम् । तादृशप्रवेशनगमनयोरन्वयायोग्यावेव यष्टिच्छ-

---

(५९) अत एवाशक्यइति । अत्र पूर्वोक्तवैयर्थ्यं नावतरतीति विशेषः । (६०) सर्वस्येति । शक्यसंबन्धग्रहं विनापीति शेषः । (६१) नानार्थेति । उक्तलक्षणयैव शक्तेरन्यथा सिद्धेरिति भावः । ननु प्रयोगनिमित्तत्वेपि तत्त्वाविरोध इत्यत आह । (६२) गौरवादिति । तस्य च तदुपस्थापकत्वं त्वयापि मन्तव्यमेवेत्याह । (६३) तस्य चेति । (६४) अविनाभाव एवेति । अन्यथातिप्रसङ्गादिति भावः । (६५) अच्छत्रिणेति । गमनसमयइति शेषः । ननु छत्रिशब्दे न लक्षणा । वाक्यत्वात् । नापि छत्रपदे, तदर्थस्य त्यागादजहत्स्वार्थत्वानुपपत्तेः । किं चैकसार्थगन्तृत्वं न लक्ष्यतावच्छेदकम् । गन्तृत्वेनोपस्थितस्य गमनाकाङ्क्षाविरहेण यान्तीत्यनेनानन्वयापत्तेः । अत्राहुः । छत्रपदएव लक्षणा, एकसार्थवत्त्वमेव लक्ष्यं, तथा च एकसार्थवन्तो यान्तीत्येतद्वाक्यार्थः । अजहत्स्वार्थतोक्तिस्तु छत्रिवाक्यलक्षणाभिप्रायेणार्थपदस्य प्रतिपाद्यपरत्वाभिप्रायेण वेति । एकसार्थकत्वेन छत्रस्याप्यन्वयात्तथात्व, मत एव शक्यलक्ष्यसाधारण्यमप्युपपद्यते इत्यन्ये । केचित्तु न प्रकृतौ लक्षणा, किं तु प्रत्ययएवेत्याहुः । (६६) अतिप्रसङ्ग इति । पूरस्य तीरवन्मत्स्यादावप्यविनाभावादिति भावः । (६७) तात्पर्यग्रहात्पूर्वमेवेति । मुख्यार्थान्वय औत्सर्गिक इति तदन्वयानुपपत्तिज्ञानानन्तरमेव लक्ष्ये तात्पर्यधीरिति भावः । तात्पर्यग्रहस्य सामान्यत एव शाब्दबोधहेतुत्वं प्रागुक्तमभिप्रेत्याह । (६८) अस्तु वेति । (६९) तात्पर्येति । तात्पर्यग्रहेपि न तदनुपपत्तिज्ञानं, भिन्नग्रहसामग्रीकत्वादिति भावः । (७०) प्रकरणादिनेति । लक्षकपदवदितरपदेपि तात्पर्यग्रहो वाच्यो ऽन्यथा घोषपदस्यव जलपरत्वे गङ्गापदे लक्षणा न स्यादिति भावः । ननु तुल्यन्यायेन लक्षकपदस्यापि लक्ष्ये तात्पर्यग्रहा

न्वियौ । (७१) अथ प्रकरणादिनैवेतरपदवद्यष्टिच्छत्रिपदयोरपि लक्ष्ये तात्पर्यमवगतमतस्तदनुपपत्तिरेव तद्बीजमिति चेत्, न । लक्षणातः पूर्वमवश्यं लक्ष्योपस्थितौ तत्र तात्पर्यग्रहे वा मानाभावात् । लक्षणाया (७२) अन्यथापि संभवात् । भावे वा ऽस्तु तत्रोभयानुपपत्तिस्तथाप्यन्वयानुपपत्तिरेव लक्षणा बीजं, गङ्गायां घोष इत्यादौ पूर्वोक्तन्यायेन लक्ष्ये तात्पर्यग्रहात्पूर्वमेव मुख्यार्थानुपपत्तेः क्लृप्तत्वात् । (७३) ननु पदार्थविशेषस्मृतौ तदन्वयबोधे वा प्रकरणादेः सहकारिता न तु तात्पर्यग्रहइति चेत् । न । शाब्दसहकारित्वे ऽननुगमात् । तात्पर्यग्रहे तु तद्व्याप्यत्वेनानुगमः । तात्पर्यव्याप्यत्वग्रहे तात्पर्यग्रहः संभवत्येव । बहुव्रीहौ चित्रगोपदार्थस्यान्वययोग्यत्वादन्यपदार्थे तात्पर्यानुपपत्तिरेव लक्षणाबीजमिति चेत् । न । तत्रापि चित्रगोस्वाम्यानयनपरानयनपदार्थान्वयानुपपत्तेः । यद्यपि लक्षणायामन्वयायोग्यत्ववन्निराकाङ्क्षत्वमप्यस्ति । तथाहि । गङ्गायां घोष इत्यत्र घोषस्य निबिडाधाराकाङ्क्षितत्वेन न प्रवाहाकाङ्क्षा । एवं समूहगमनस्य छत्रिषु नाकाङ्क्षा,तेषु अपरिसमाप्तेः । (७४) तथापि नोभयं निमित्तम्, अन्यतरज्ञानेपि लक्षणासंभवात् । नैकैकमेव निमित्तम्, अननुगमात् । अन्वयानुपपत्तिव्याप्यत्वेन वानुगमे (७५) ऽन्वयानुपपत्तिरेव लक्षणाबीजं, (७६) तस्या उभयत्र सत्त्वात् । लक्षणास्थले च स्मृतशक्यान्वयानुपपत्तिज्ञानानन्तरं (७७) गङ्गापदात्पुनः शक्यस्मृतिः स्मृतशक्यात्स्वसंबन्धेन तीरस्मृतिः शक्तेः शक्यस्मृतौ प्रवाहस्य स्वसंबन्धेन तीरस्मृतौ सामर्थ्यावधारणात् । अतः शक्यस्मारिततीरस्येतरपदादेवान्वयबोधः । अत एव लाक्षणिकं पदं नानुभावकम् अन्वयप्रतियोगिनस्तीरस्य ततोनुपस्थितेः, अन्वयप्रतियोग्युपस्थापकत्वेन पदानामन्वयानुभावकत्वात् । न च गङ्गापदात्स्वशक्यसंबन्धेन प्रथमं तीरस्मृतिरेव पुनः शक्यस्मरणे (७८) गौरवादिति वाच्यम् । गङ्गापदस्य स्वशक्यसंबन्धेनान्वयप्रतियोगिस्मारकत्वाकल्पनात् । न चेहैव तत्कल्पनं, क्लृप्तकारणताकस्मृतिद्वयादेव तीरोपस्थितिसंभवादिति प्राञ्चः । तन्न । गङ्गापदात्तीरस्यानुपस्थितौ तत्र सप्तम्यर्थान्वयानुपपत्तेः । विभक्तेः प्रकृत्युपनीतस्वार्थान्वयबोधकत्वव्युत्पत्तेः प्रकृत्यर्थोपस्थाप्यस्य विभक्त्यर्थान्वये ऽतिप्रसङ्गो ऽननुगमश्च । न च प्रकृतितात्पर्यविषयस्वार्थान्वयबोधकत्वं विभक्तीनां, गौर-

---

त्तदनुपपत्तिरेव तद्बीजमित्याह । (७१) अथेति । (७२) तथापीति । ननु यत्र दैवाद्यष्टिपदस्यैव यष्टिधरे तात्पर्यज्ञानं न तु प्रवेशयेत्यस्य भोक्तृप्रवेशनपरत्वज्ञानं तत्रान्वयानुपपत्तिज्ञानं विनैव तात्पर्यानुपपत्तिरेव तद्बीजमिति, क्लृप्तत्वं तुल्यमेव, तस्मात्कल्पकस्याननुगमो न दोष इत्युभयोर्लक्षणावृत्तित्वकल्पकत्वाविरोधः । नह्यन्वयानुपपत्तेरपि तत्कल्पकत्वादन्यत्तद्बीजं नाम । न च स्वतन्त्रान्वयानुविधायितया ऽनुपपत्तिज्ञानं लक्ष्यान्वयबोधे हेतुरित्येव तद्बीजत्वमिति वाच्यम् । लक्ष्ये तात्पर्यग्रहएव तस्योपक्षीणत्वात् । अत एव शब्दादिना तं विनैव यत्र लक्ष्ये तात्पर्यग्रहस्तत्रापि तदन्वयबोधो ऽनुभवसिद्धः । तथा च व्यभिचारोपि । न चतदनुपपत्तेस्तत्राहेतुत्वे यत्रोभयोर्योग्यत्वं तत्र कदा चिल्लक्ष्यान्वयोपि स्यादिति वाच्यम् । लक्ष्यतात्पर्याग्रहा,त्तद्ग्रहे च युगपच्छक्यलक्ष्ययोरन्वयबोधस्येष्टत्वात् । तस्मान्मुख्यार्थान्वयानुपपत्तेर्मुख्यार्थान्वयबोधप्रतिबन्धकत्वं न लक्ष्यान्वयबोधकत्व,मेवं च पूर्वोक्तविमर्शस्यापि लक्ष्यतात्पर्यग्रहएवोपयोगः । न च पूर्वोक्ताप्तोक्तत्वैकवाक्यत्वादिज्ञानं तर्हि लक्षणावृत्तित्वकल्पनएवोपयुक्तम् । तच्च नान्वयबोधाङ्गमिति कथं तदपेक्षा । तदनपेक्षायां चानाप्तवाक्येपि लक्षणा स्यात् । तस्यापि तात्पर्यग्रहोपक्षीणत्वाभ्युपगमे यत्रानाप्तवाक्येपि तद्ग्रहस्तत्रापि सा स्या,दिष्टापत्तौ सिद्धान्तविरोध इति वाच्यम् । अन्वयव्यतिरेकाभ्यां तस्यापि लाक्षणिकार्थानुभवहेतुत्वात् । तदवच्छेदकत्वाद्वेति विद्वद्भिः परिचिन्तनीयमिति । तटस्थः शङ्कते । (७३) नन्विति । यद्यप्यननुभावकत्वरूपाकाङ्क्षा तत्रापि, अन्यथा वह्निना सिञ्चतीत्यत्रापि सेकस्य द्रवद्रव्याकाङ्क्षत्वेन निराकाङ्क्षतयैवातन्वये योग्यताया अनङ्गत्वापत्तेः । तथाप्यभ्युपेत्याह । (७४) तथापीति । (७५) अन्वयानुपपत्तिरेवेति । यद्यपि यथा तात्पर्यानुपपत्त्युपजीव्यतया ऽन्वयानुपपत्तिर्बीजं तथा तदुपजीव्यतया तदयोग्यत्वमेव बीजमस्तु । तथापि यत्र योग्यताग्रहेपि तात्पर्याभावान्मुख्यार्थानन्वयस्तत्साधारण्यादेतदुक्तम् । तदिदमाह । (७६) तस्या इति । यद्यपिसंबन्धिदर्शनस्य तत्तत्संबन्धित्वेन स्मारकत्व न कल्प्यते, गौरवादननुगमाच्च । किं तुसामान्यत,स्तथा च शक्यसंबन्धेनापि स्मारकत्वं क्लृप्तमेव । तथापि समाधिसौकर्यादाह । (७७) गङ्गापदादिति । (७८) गौरवादिति । प्रकृतिप्रतिपाद्यत्वापेक्षया तत्प्रतिपादनेच्छयोच्चरितत्वस्य गुरुत्वादित्यर्थः । यद्यपि अतिप्रसङ्गभिया वृत्त्या तत्प्रतिपाद्यत्वं बोध्यं,तथा च वृत्तित्वविवेचने गौरवं तुल्यं, तथापि वह्नितात्पर्यके धूमोस्तीति वाक्ये धूमपदोत्तर-

वात् । एवं च प्रकृत्यर्थे विभक्त्यर्थान्वयनियमाच्छक्यसंबन्ध एव क्लृप्तस्तीरस्मारकत्वेन कल्प्यते । न चैवं गङ्गापदात् साक्षात् तीरोपस्थितौ शक्तिः, तां विनापि तदुपस्थितिसंभवात् । नन्वेवमन्वयप्रतियोग्युपस्थापकतया इतरपदवल्लाक्षणिकमप्यनुभावकं स्यादिति चेत् । न । (७९) इतरपदार्थैः सह स्वशक्यान्वयानुभावकत्वेनैव क्लृप्तादितरपदादेव तीरानुभवसंभवेन लाक्षणिकस्याननुभावकत्वात् । स्वशक्यान्वयानुभवे पदानां कारणत्वावधारणाच्च । अथ यदि गङ्गापदं नान्वयबोधकं तदा गङ्गापदान्तर्भावेन संभूयान्वयबोधकत्वलक्षणं नैकवाक्यत्वं न वा प्रमाणत्वं तथा च तदुभयरक्षार्थं न लक्षणाकल्पनम् । न च परम्परया साक्षाद्वा ऽन्वयप्रतियोगिस्मृतिहेतुत्वेन प्रमाणत्वम् । स्मृतेरप्रमाणत्वात् । न चैकवाक्यत्वं, वाक्यभेदेऽपि पदार्थस्मृतिसत्त्वादिति चेत् । न । आप्तोक्तत्वाद्गङ्गापदान्तर्भावेनान्वयप्रमाप्रयोजकत्वं संभूयान्वयबोधप्रयोजकत्वं च गृहीतं तदुभयमपि तीरोपस्थितिद्वारा निर्वहति ।

(८०) नव्यास्तु लाक्षणिकमप्यनुभावकम् । न चैवं ज्ञाने शक्तिः शक्यत्वादिति लक्ष्यमपि शक्यं स्यात् । प्रवाहशक्तत्वेन ज्ञातादेव गङ्गापदाच्छक्तिं विनापि तीरानुभवसंभवात् । यथा परेषां जातिशक्तत्वेन ज्ञातादेव व्यक्त्यनुभवसंभवः, यथा वा ऽस्माकं पदार्थशक्तत्वेन ज्ञातादेवान्वयानुभवसंभवान्न व्यक्त्यन्वययोः शक्तिरिति ॥

विभक्त्यर्थस्य वह्नावनन्वयापत्तिरिति दूषणं बोध्यम् । (७९) इतरपदार्थैरिति । न च स्वशक्त्यानुभावकत्वापेक्षया स्वोपस्थाप्यानुभावकत्वमेव सामान्यतो लघु, अत एव स्वशक्यान्वयानुभव इत्यादिहेत्वन्तरमपि हेयमिति वाच्यम् । तथा सत्यतिप्रसङ्गात् । न च वृत्त्योपस्थाप्यत्वं तत् । सा हि शाब्दबोधानुकूलपदार्थोपस्थितिगर्भा तदनुकूलत्वं च यदि वृत्तिनिबन्धनं तदा ऽन्योन्याश्रय इति शक्तिगर्भं वाच्यम् । तथा च प्रथमोपस्थितत्वादुपजीव्यत्वाच्च स्वशक्यान्वयानुभावकत्वमेव पदानां क्लृप्तम् । किं च शक्तेरीश्वराभिप्रायस्य पदार्थान्तरस्य वा तत्त्वेन ज्ञानं नानुभवे प्रयोजकं व्यभिचारात् । किं तु अनुभवजनकतावच्छेदकत्वेन ज्ञानं, तथा च शक्तिं विनानुभावकत्वमवच्छेदकं विना जनकत्वमिति पर्यवसितम् । तथा च व्याघात इति वदन्ति । तत्र ब्रूमः । शक्तित्वलक्षणात्वाभ्यां शाब्दबोधविशेषजनकत्वग्रहानन्तरं तयोः शाब्दबोधानुकूलत्वग्रहे ऽन्योन्याश्रयानवकाशात् तृणत्वादिना वह्निविशेषानुकूलत्वग्रहानन्तरं तृणादीनां वह्न्यनुकूलत्वग्रहवत् । यदि च शक्तिगर्भमेव शाब्दबोधानुकूलत्वं तदा तद्गर्भं वृत्तिलक्षणं लक्षणायामव्याप्तमेव स्यात् । अत एव किं चेत्याद्यप्ययुक्तं, शक्तेः शब्दानुभवविशेषजनकतावच्छेदकत्वेऽपि शक्तिं विना तदतिरिक्तानुभवविशेषजनकत्वे व्याघातविरहात् । वस्तुतो ऽनुभवजनकतावच्छेदकत्वं न शक्तेरन्यथा ऽशक्तस्यापि शक्तिभ्रमेणान्वयबोधकत्वे उक्तव्याघातापत्तेः । किं तु शक्तिमत्तया ज्ञातत्व तथा । एवं च वृत्तिमत्तया ज्ञातत्वमेव तथास्तु, सामान्यत्वेन लाघवात् । अत एव तैरप्युक्तं सामान्यतो लघ्विति ।

एतदनुशयादेव स्वमतमाह । (८०) नव्यास्त्विति । एतेन लाक्षणिकाननुभावकत्वप्रवादो ऽन्वयप्रतियोग्यनुपस्थापकतया प्राचीनमतेनेति सूचितम् । यदि च नैवं तदा नीलं घटं करोतीत्यादौ नीलघटशब्दयोर्लाक्षणिकत्वेन तदुपस्थाप्ययोरभेदानुभवो न स्यात् । तस्य स्वशक्यान्वयाभावेन विभक्त्यापि तदनुपपत्तेः । गच्छतीत्यादौ प्रकृतिप्रत्यययोरपि लाक्षणिकत्वसंभवाच्च । तथा चार्थस्मारकतया प्राचीनमते विभक्त्यर्थान्वयानुपपत्तिवद् लक्ष्ययोरन्वयानुपपत्तिरपि दोषो द्रष्टव्य इति युक्तमुत्पश्यामः ।

॥ अथ वेदान्तकौस्तुभप्रभायाः ॥

॥ प्रथमाध्यायस्य ॥

॥ चतुर्थपादारम्भः ॥

एवं तावत् प्रथमे पादे मुमुक्षुभिर्मुक्त्युपायतया जिज्ञास्यस्य परस्य ब्रह्मणः श्रीपुरुषोत्तमस्य जगज्जन्मादिकारणत्वमुक्त्वा तत् प्रधानपुरुषयोरपि वेदान्तवाक्यैः प्रतिपाद्यत इत्याशङ्क्य, तानि सर्वज्ञं सर्वशक्तिं स्वभावतोऽपास्तसमस्तदोषमशेषकल्याणगुणैकराशिं तमेव प्रतिपादयन्तीत्युक्तम् ।

द्वितीये तृतीये च कानिचित् स्पष्टजीवादिलिङ्गकानि कानिचिदस्पष्टलिङ्गकानि च यानि वाक्यानि तान्यपि सत्यसंकल्पसर्वान्तरात्मभूतपरब्रह्मपराणीत्युक्तम् ।

इदानीं चतुर्थे तु पादे कापिलतन्त्रसिद्धाब्रह्मात्मकप्रधानपुरुषादिप्रतिपादनच्छायानुसारिणां कासुचिच्छाखासु श्रूयमाणानां वाक्यानां परब्रह्मण्येव समन्वयः स्मर्यते । कठवल्लीष्विदं श्रूयते, ।

"महतः परमव्यक्तमव्यक्तात् पुरुषः परः ।
पुरुषान्न परं किंचित् सा काष्ठा सा परा गतिः" ॥

इति । तत्राव्यक्तशब्देन कापिलोक्तमब्रह्मात्मकं प्रधानमभिहाभिप्रेतं शरीरं वेति विचिकित्सायां प्रधानमेवेति पूर्वः पक्षः ।

महदादिपुरुषान्तस्य स्मृतिक्रमप्रसिद्धस्यैवेह प्रत्यभिज्ञानात् पञ्चविंशकपुरुषातिरिक्ततत्त्वप्रतिषेधाच्च शब्दादिहीनत्वेन न व्यक्तमव्यक्तमिति व्युत्पत्तेश्चेति प्राप्त आह ॥

॥ आनुमानिकमप्येकेषामिति चेन्न शरीररूपकविन्यस्तगृहीतेर्दर्शयति च ॥ १ ॥

एकेषां कठानां शाखायामानुमानिकमनुमाने भवं प्रधानमपि जगत्कारणत्वेन श्रूयत, इति चेत् । नेति । कुतः । शरीरेति । अव्यक्तशब्देनात्र शरीरस्यैव रूपकेण रथसादृश्येन विन्यस्तस्य गृहीतेर्ग्रहणात् । केनचित् सादृश्येन वस्त्वन्तरकल्पनं हि रूपकम् । अयं भावः । पूर्वं“मात्मनं रथिनं विद्धी”त्यारभ्य “तद्विष्णोः परमं पद”मित्यन्तग्रन्थेन संसारमार्गस्य पारभूतं विष्णुपदं प्राप्तुमिच्छुमुपासकं रथित्वेन तच्छरीरादिकं रथरथाङ्गत्वेन रूपयित्वा “यस्यैते रथादयोऽवस्थाः सन्ति स एवाध्वनः पारं विष्णुपदं प्राप्नोती”त्युक्त्वा, अनन्तरं रथादिरूपितशरीरादिषु येभ्यो येषां वशीकार्यतायां प्राधान्यं,तान्युच्यन्ते। “इन्द्रियेभ्यः परा” इत्यादिना । अत्रेन्द्रियादयः पूर्वं रथरूपककल्पनायां हयादिभावेन रूपिताः स्वस्वशब्दैरेव गृह्यन्ते, रथरूपितं शरीरं तु परिशेषादव्यक्तशब्देनोच्यते । तत्र हेयत्वेन रूपितेभ्य इन्द्रियेभ्यो गोचरत्वेन रूपिता विषया वशीकार्यत्वे परा उत्कृष्टाः । वश्येन्द्रियस्यापि विषयसंनिधान इन्द्रियाणां दुर्निग्रहत्वात् । तेभ्योऽपि प्रग्रहरूपितं मनः परम् । मनसि विषयाप्रवणे विषयसंनिधानस्याप्यकिंचित्करत्वात् । तस्मादपि सारथित्वरूपिता बुद्धिः परा । अध्यवसायाभावे मनसोऽप्यकिंचित्करत्वात् । तस्या अपि रथित्वरूपित आत्मा कर्तृत्वेन प्राधान्यात् परः । सर्वस्यास्यात्मेच्छायत्तत्वात्। स एव महानिति च विशस्यते । ततोऽपि रथरूपितं शरीरं परम् । जीवस्य सर्वसाधनप्रवृत्तीनां शरीरायत्तत्वात् । ततोऽपि सर्वान्तरात्मभूतः संसाराध्वनः पारभूतः सर्वान्तर्यामितयोपासनसिद्ध्युपायभूतः प्राप्यश्च परमात्मा परः । सर्वस्य पूर्वोक्तात्मपर्यन्तस्य तत्संकल्पाधीनप्रवृत्तित्वात् । न तु पञ्चविंशकः । तदिदमुच्यते,

“पुरुषान्न परं किंचित् सा काष्ठा सा परा गतिः” ।

इति । “दैवं चैवात्र पञ्चम”मिति भगवद्वानात् । दैवमत्र पुरुषोत्तम एव ।

“सर्वस्य चाहं हृदि संनिविष्टो
मत्तः स्मृतिर्ज्ञानमपोहनं च” ।

इति वचनात् । तस्य च वशीकरणं तच्छरणागतिरेवेति । अतोऽत्र न कापिलतन्त्रसिद्धप्रधानप्रसङ्गः ।

न च तत्तन्त्रसिद्धप्रक्रियाप्रत्यभिज्ञा। इन्द्रियेभ्योऽर्थानामर्थेभ्यो मनसश्च परत्वकीर्तनस्य तद्धेतुतया सांख्यैरस्वीकारात् । बुद्धिशब्देन च महत्तत्त्वाभिधानं तैरभ्युपगम्यते । तथात्वे महतो महत्परत्वासंभवात् । महत आत्मशब्दविशेषणासंगतेश्च ।

अतो रूपकविन्यस्ता एव गृह्यन्ते । दर्शयति च रूपकपरिकल्पितग्रहणमेव वाक्यशेष इन्द्रियादीनां वशीकरणप्रकारं प्रतिपादयन्,

“यच्छेद्वाङ्मनसी प्राज्ञस्तद्यच्छेज्ज्ञान आत्मनि” ।
ज्ञानमात्मनि महति नियच्छेत् तद्यच्छेच्छान्त आत्मनि॥

इति ॥ १ ॥

ननु व्यक्तशब्दार्हं शरीरं कथमव्यक्तशब्दवाच्यं भवतीत्याशङ्क्याह ॥

सूक्ष्मं तु तदर्हत्वात् ॥ २ ॥

तुरवधारणे । सूक्ष्मं भूतसूक्ष्ममव्यक्तमेवावस्थान्तरापन्नं शरीरं भवति । कुतः । तदर्हत्वात् । तदवस्थस्यैवाव्याकृतस्य कार्यतार्हत्वात् । कारणात्मशरीरमव्यक्तशब्दवाच्यम् । कार्यकारणयोरभेदादित्यर्थः ॥ २ ॥

ननु यदभूतसूक्ष्ममव्याकृतमभ्युपगम्यते, तदेव भूतकारणं सांख्यैः प्रधानमित्युच्यते । एवं च तन्मतात् को विशेष इत्यत्राह ॥

॥ तदधीनत्वादर्थवत् ॥ ३ ॥

परमकारणभूतपरमात्माधीनत्वात् प्रधानमर्थवत् । स्वकार्योत्पत्तिफलवत् । अयं भावः । न वयं प्रधानं तत्कार्याणि च स्वरूपेणाङ्गीकुर्मः। अपितु परब्रह्मणः सर्वात्मत्वेन तदात्मकतयैव प्रधानं स्वकार्ये प्रवर्तते । तदिहाव्यक्तशब्देन गृह्यते । नाब्रह्मात्मकं स्वतन्त्रतन्त्रसिद्धमिति । श्रुतिस्मृतिषु सर्वस्य चिदचिद्वस्तुनः परब्रह्मात्मकतादर्शनात् ।

यद्वा । यदि “इन्द्रियेभ्यः परा” इत्यादिना रूपकविन्यस्तस्यात्मादेर्वशीकार्यत्वे परत्वमुच्यते, तर्हि “अव्यक्तात् पुरुषः परः पुरुषान्न पर”मिति पुरुषः किमर्थं गृह्यत इति । तत्राह । तदधीनत्वादर्थवत् । रथित्वादिरूपितमात्मादिकं सर्वं परमात्माधीनत्वादर्थवत्। प्रयोजनवत् । अतः स एवेह वशीकार्यत्वेन “पुरुषान्न परं किंचि”दित्युच्यते । तदर्थमिह रूपकविन्यस्तेषु गृह्यमाणेषु परत्वेन तस्यापि ग्रहणम् ॥ ३ ॥

॥ ज्ञेयत्वावचनाच्च ॥ ४ ॥

सांख्यैर्हि गुणपुरुषविवेकज्ञानान्मुक्तिं वदद्भिः प्रधानं ज्ञेयत्वेन स्मर्यते । इह च न तथा । अतो न तन्त्रसिद्धप्रधानस्याव्यक्तशब्देन ग्रहणम् ॥ ४ ॥

॥ वदतीति चेन्न प्राज्ञो हि प्रकरणात् ॥ ५ ॥

"अशब्दमस्पर्शमरूपमव्ययं
तथाऽरसं नित्यमगन्धवच्च यत् ।
अनाद्यनन्तं महतः परं ध्रुवं
निचाय्य तं मृत्युमुखात् प्रमुच्यते" ॥

इत्युक्तस्त्राव्यक्तशब्दोदितस्य प्रधानस्य ज्ञेयत्वं वदतीयं श्रुतिरिति चेदत्राह । नेति । प्राज्ञः परमात्मैवात्र निचाय्यत्वेन निर्दिश्यते । न प्रधानम् । कुतः । प्रकरणात् । "तद्विष्णोः परमं पदम्" ।

"एष सर्वेषु भूतेषु गूढात्मा न प्रकाशते ।
दृश्यते त्वग्र्यया बुद्ध्या सूक्ष्मया सूक्ष्मदर्शिभिः" ॥

इत्यादि परमात्मन एव हि प्रकरणम् । तस्य चाशब्दत्वादिधर्मवत्त्वं "यत् तदद्रेश्यमग्राह्य"मित्यादिश्रुतिसिद्धम् । "महतः पर"मिति च "बुद्धेरात्मा महान् पर" इति पूर्वमन्त्रनिर्दिष्टाज्जीवात् परत्वमेवोच्यते ॥ ५ ॥

॥ त्रयाणामेव चैवमुपन्यासः प्रश्नश्च ॥ ६ ॥

इतश्च नाव्यक्तशब्दवाच्यं प्रधानम् । यतोऽत्र प्रकरणे त्रयाणामेव परमात्मतदुपासनोपासकानामेवोपन्यासो वक्तव्यतया, प्रश्नश्च ज्ञेयतया कटवल्लीषु दृश्यते न तु सांख्यतन्त्रसिद्धस्य प्रधानादेरपि । तथाहि, नचिकेतसे मृत्युना वरत्रये प्रत्ते, प्रथमेन स स्वस्मिन् पितुः सौमनस्यं प्रतिलभ्य द्वितीयेन मोक्षोपायभूतां नाचिकेताग्निविद्यां वृतवान्, "स त्वमग्निं स्वर्ग्यमध्येषी"त्यादिना । स्वर्गशब्दोऽत्र मोक्षसाधारणः । तस्यां हि "रसमयः कोशः स्वर्गो लोको ज्योतिरावृतः", "ब्रह्म यन्ति ब्रह्मविदः स्वर्गं लोक"मिति, "अपहत्य पाप्मानमनन्ते स्वर्गे लोकेऽज्ञये प्रतितिष्ठती"ति, तैत्तिरीयबृहदारण्यतलवकारादिषु मोक्षशास्त्रेषु तथा दर्शनात् । "अमृतत्वं भजन्त" इति तत्रस्थानां जन्ममृत्य्वभावश्रवणाच्च । तत्रैवोत्तरत्र क्षयंफलकर्मनिन्दादर्शनाच्च ।

"ध्रुवसूर्यान्तरं यत् तु नियुतानि चतुर्दश ।
स्वर्गलोकः स कथितो लोकसंस्थानचिन्तकैः" ॥

इति सूर्यध्रुवान्तर्वर्तिलोकविशेषे पौराणिकपरिकल्पितस्वर्गशब्दरूढिस्तु सांख्यपरिकल्पिताव्यक्तशब्दरूढिवदिहानादरणीया । तृतीयवरेण च परमपुरुषार्थरूपपरमात्मप्राप्तिलक्षणमोक्षयाथात्म्यस्वरूपप्रश्नमुखेन प्राप्यस्वरूपं प्राप्तृस्वरूपमुपायभूतोपासनस्वरूपं च पृष्टम् । "येयं प्रेते विचिकित्सा मनुष्येऽस्तीत्येके, नायमस्तीति चैके, एतद्विद्यामनुशिष्टस्त्वयाहं वराणामेष वरस्तृतीय"इति । एवं मोक्षस्वरूपे पृष्टे, तदुपदेशयोग्यतापरीक्षपूर्वकं प्रतिवचनमपि, ।

"तं दुर्दर्शं गूढमनुप्रविष्टं
गुहाहितं गह्वरेष्ठं पुराणम् ।
अध्यात्मयोगाधिगमेन देवं
मत्वा धीरो हर्षशोकौ जहाति" ॥

इति ।

तदेवं सामान्यत उपदिष्टे "देव"मिति निर्दिष्टस्य प्राप्यस्य स्वरूपं "मत्वे"ति प्रतिपन्नस्य ज्ञानरूपोपायस्य स्वरूपं "धीर" इति प्रतिपन्नस्य प्राप्तुश्च स्वरूपं शोधयितुं पुनरपि "अन्यत्र धर्मादन्यत्राधर्मा"दित्यनेन पुण्यापुण्यरूपसाधनविलक्षणस्योपासनस्य "अन्यत्रास्मात् कृताकृतात्, अन्यत्र भूताच्च भव्याच्च य"दित्यनेन कालापरिच्छिन्नस्योपेयस्य च प्रश्ने कृते प्राप्तुरपि चेतनस्य नित्यत्वात् प्राप्यान्तर्गतत्वाच्च तत एव तस्यापि तन्त्रेण प्रश्नः कृतः ।

अथवोपेयप्रश्नपरमेवेदं वाक्यम् । "अन्यत्र धर्मादन्यत्राधर्मा"दिति प्रक्रमस्यान्यत्रशब्दद्वयसामानाधिकरण्यवत्, "अन्यत्रास्मात् कृताकृतादन्यत्र भूता"दित्युपरितनान्यत्रशब्दद्वयस्यापि, सामानाधिकरण्यप्रतीतेः ।

एवमप्युपेयप्रश्न उपेतुरन्तर्भावादुपायस्याप्यन्तर्भूतत्वात् त्रयमेव पृष्टम् । ततो ब्रह्मप्रतिपादकतया प्रणवं प्रशस्य तद्वाच्यं प्राप्यप्राप्तृस्वरूपं वाचकरूपमुपायं च कथयन् प्रणवमुपदिश्य "न जायत" इत्यादिना प्राप्तृस्वरूपम्, "अणोरणीया"नित्यारभ्य "क इत्था वेद"त्यन्तेन प्राप्यस्वरूपं, "नायमात्मा प्रवचनेन लभ्य" इत्यादिना मध्य उपासनस्य भक्तिरूपतां चोपदिष्टवान् । तत उपास्योपासकयोरेकगुहाप्रवेशेन परमात्मनः सूपास्यत्वम्, "आत्मानं रथिन"मित्यादि "तत् कवयो वदन्ती"त्यन्तेनोपासनप्रकारमुपासकस्य विष्णुपदप्राप्तिं चोक्त्वा "अशब्द"मित्यादिनोपसंहृतवान् । इति त्रयाणामेवात्र ज्ञेयतयोपन्यासः प्रश्नश्च । न तन्त्रसिद्धप्रधानस्येह ग्रहणम् ॥ ६ ॥

॥ महद्वच्च ॥ ७ ॥

यथा च सांख्यैर्महच्छब्दो बुद्धौ प्रयुक्तोऽपि "वेदाहमेतं पुरुषं महान्तम्," "बुद्धेरात्मा महान् परः," "महान्तं विभुमात्मान"मित्यादिवैदिकप्रयोगेषु पुरुषात्मशब्दसामानाधिकरण्यात्र महत्तत्त्वमभिधत्ते । तथाव्यक्तशब्दोऽपि वैदिकप्रयोगे न तान्त्रिकं प्रधानमभिधातुं योग्यम् ॥ ७ ॥

॥ चमसवदविशेषात् ॥ ८ ॥

"अजामेकां लोहितशुक्लकृष्णां
बह्वीः प्रजाः सृजमानां सरूपाः ।
अजो ह्येको जुषमाणोऽनुशेते
जहात्येनां भुक्तभोगामजोऽन्यः" ॥

इति श्वेताश्वतरोपनिषन्मन्त्रेऽजाशब्देन किं स्मृतिसिद्धा प्रकृतिः प्रत्यभिज्ञायते, उत वैदिकी ब्रह्मात्मिकेति संशयः। स्मृतिसिद्धेति पूर्वः पक्षः । "अजा"मित्यकार्यत्वश्रवणात्, "सृजमाना"मिति कर्त्रर्थशानचा स्वातन्त्र्येण स्वसमानप्रजास्रष्टृत्वश्रवणाच्च । इत्येवं प्राप्त आह । नानेन मन्त्रेण सांख्यतन्त्रसिद्धा प्रकृतिर्निर्दिश्यते । कुतः । अविशेषात् । ब्रह्मात्मकाजाप्रतिपादनेऽप्यजात्वाविशेषात् । चमसवत् । यथा "अर्वाग्बिलश्चमस ऊर्ध्वबुध्न" इति बृहदारण्यकमन्त्रे चम्यतेऽनेनेति व्युत्पत्तेर्भक्षणसाधनत्वमात्रप्रतीतेर्न स्वातन्त्र्येणायं नामासौ चमसोऽभिप्रेत इति विशेषो निर्णेतुं शक्यते । अर्थप्रकरणादिभिर्विशेषव्यवस्थापकैर्विना यौगिकशब्देष्वर्थविशेषानिश्चयात् । न चात्र सांख्यतन्त्रसिद्धाजायाहका अर्थप्रकरणादयो दृश्यन्ते । नाप्यस्याः स्वातन्त्र्येण स्रष्टृत्वमात्रं प्रतीयते। ब्रह्मात्मिकाया अपि साऽविरुद्धा । परनियुक्तेऽपि तक्षादौ तक्षति काष्ठमिति कर्त्रर्थप्रत्ययदर्शनात् । तावन्मात्रेण स्वतन्त्रप्रकृतित्वनिश्चयासंभवात् ।

अतो नास्मिन् मन्त्रेऽजाशब्देन सांख्यतन्त्रसिद्धप्रधानगन्धोऽपि । श्रुत्यर्थस्त्वस्मत्कृतश्वेताश्वतरप्रकाशिकायां द्रष्टव्यः । यथा च चमसमन्त्रस्य वाक्यशेषे "यथेदं तच्छिर एष ह्यर्वाग्बिलश्चमस" इति शिरोरूपश्चमसविशेषो निश्चितस्तथा न तन्त्रसिद्धप्रधानग्रहणे विशेषोऽस्ति ॥ ८ ॥

अस्ति तु ब्रह्मात्मिकाया अजाया ग्रहणे विशेष इत्याह ॥

॥ ज्योतिरुपक्रमा तु तथा ह्यधीयत एके । ९ ॥

तुर्निश्चये । "तदेव ज्योतिषां ज्योतिः", "अथ यदतः परो दिवो ज्योति"रित्यादिश्रुतिप्रसिद्धं ज्योतिर्ब्रह्म उपक्रमः कारणं यस्याः, सा ज्योतिरुपक्रमा ब्रह्मकारणा । अस्यामेवोपनिषदि,

"ते ध्यानयोगानुगता अपश्यन्
देवात्मशक्तिं स्वगुणैर्निगूढाम्" ।

इत्युपक्रमवाक्यात् । उत्तरत्रापि,

"अस्मान्मायी सृजते विश्वमेतत्
तस्मिंश्चान्यो मायया संनिरुद्धः" ।

"मायां तु प्रकृतिं विद्यान्मायिनं तु महेश्वरम्" ।

"यो योनिं योनिमधितिष्ठत्येक" इत्यादिना ब्रह्मात्मिकाया एव प्रतिपादितत्वात्। "तथा ह्यधीयत एके" हि यस्मात् तथा ब्रह्मकारणकत्वमस्या अजाया एके शाखिन आथर्वणिका मण्डूकोपनिषदि,अधीयते । "तस्मादेतद् ब्रह्म नाम रूपमन्नं च जायत" इति ब्रह्मशब्दोदितं त्रिगुणात्मकं प्रधानमिहाभिप्रेतम्। "मम योनिर्महद्ब्रह्मे"ति भगवद्वचनाच्च । तैत्तिरीयके च, "अणोरणीयानि"त्यादिना ब्रह्म प्रस्तुत्य "सप्त प्राणाः प्रभवन्ति तस्मा"दित्यादिना प्राणोपलक्षितसकलप्रपञ्चोत्पत्तिं ततोऽभिधाय तदनन्तरं पठितस्य ।

"अजामेकां लोहितशुक्लकृष्णां
बह्वीं प्रजां जनयन्तीं सरूपाम् ।
अजो ह्येको जुषमाणोऽनुशेते
जहात्येनां भुक्तभोगामजोऽन्यः" ॥

इति मन्त्रस्य ब्रह्मात्मकप्रकृतिपरतया वक्तव्यत्वादिहापि तथात्वस्यावश्यंभावाच्च ब्रह्मात्मिकैव प्रकृतिरजा मन्त्रप्रतिपाद्या ॥ ९ ॥

नन्वाकाशादीनां ब्रह्मोपादानकत्वेन ब्रह्मात्मकत्ववत् प्रकृतेरपि ब्रह्मोपादानकत्वेनैव ब्रह्मात्मकत्वस्य वक्तव्यतयानुत्पन्नायाश्च तस्या ब्रह्मोपादानकत्वासंभवेन ब्रह्मात्मकत्वासंभव इत्याशङ्क्याह ॥

॥ कल्पनोपदेशाच्च मध्वादिवदविरोधः ॥ १० ॥

चः शङ्कानिरासार्थः। अस्याः प्रकृतेर्ब्रह्मोपादानकत्वमजात्वं च द्वयं संभवति । कुतः । कल्पनोपदेशात् । कल्पनायाः क्लृप्तेर्विश्वसृष्टेरुपदेशात् । "सूर्याचन्द्रमसौ धाता यथापूर्वमकल्पय"दिति प्रयोगदर्शनात् । उपदिश्यते हि सूक्ष्मशक्तिकाद्ब्रह्मणो विश्वसृष्टिरिवापि,"अस्मान्मायी सृजते विश्वमेत"दिति ।

अयं भावः । यदा प्रलयसमयेऽतिसूक्ष्मतया नामरूपविभागानर्हा कारणावस्थान्वयिनी परब्रह्माश्रिता तच्छक्त्यात्मनावतिष्ठते, तदैषाजेत्युच्यते । यदा तु सृष्टिसमय उद्भूतसत्त्वादिगुणत्वेन विभक्तनामरूपा व्यक्तादिशब्दिता तेजोऽबन्नादिरूपेण च परिणता लोहितशुक्लाद्याकारावतिष्ठते, तदा ब्रह्मोत्पन्नेत्युच्यत इति न विरोधः। मध्वादिवत् । यथा मधुविद्यायाम् "असौ वा आदित्यो देवमध्वि"त्युपक्रमो"ऽथ तत ऊर्ध्व उदेत्यनैवोदेता नास्तमेति यत एव मध्ये स्थादि"त्येतन्मन्त्रआदित्यस्यैकस्यैव कारणावस्थायां मधुत्वव्यपदेशानर्हसूक्ष्मात्मना स्थितस्य कार्यावस्थायां वस्वादिदेवभोग्यमधुत्वेनोदयास्तमयत्वेन च कल्पनमविरुद्धं तद्वत् ॥ १० ॥

अथ,

"यस्मिन् पञ्चजनाः पञ्च आकाशश्च प्रतिष्ठितः ।
तमेव मन्य आत्मानं विद्वान् ब्रह्माऽमृतोऽमृतम् ॥

इति बृहदारण्यकश्रुतौ सांख्याभिमतानि पञ्चविंशतितत्त्वानि प्रतिपाद्यन्त उत नेति विषये तान्येव प्रतिपाद्यन्त इति पूर्वः पक्षः ।

एवं च श्रुतिनिर्णीततत्त्वविशदीकरणपराया

"मूलप्रकृतिरविकृतिर्महदाद्याः प्रकृतिविकृतयः सप्त ।
षोडशकस्तु विकारो न प्रकृतिर्न विकृतिः पुरुषः" ॥

इति स्मृतेः श्रुतिमूलकत्वेन तत्संगृहीतानां तत्त्वानामपि श्रौतत्वात् पञ्चविंशतिसंख्याकानि सांख्याङ्गीकृततत्त्वानि श्रुतिसिद्धान्येवेति । "पञ्च पञ्चजना" इति पञ्चकृत्व आवृताः पञ्च पञ्चपञ्चाः । पञ्चविंशतिरित्यर्थः । "संख्ययाव्ययासन्ने"ति समासः । "बहुव्रीहौ संख्येये ड"जिति डच् । पञ्चपञ्चाश्च ते जनास्तत्त्वानि चेति कर्मधारयः ।

यद्वा, पञ्चजना इति समाहारे समासः । लिङ्गव्यत्ययश्छान्दसः । ते कतीत्यपेक्षायां मोक्षाधिकारान्मुमुक्षुज्ञेयाः स्मृतिप्रसिद्धाः प्रकृत्यादय एवेति । एवं सति "तमेव मन्य आत्मानं विद्वा"नित्यस्य पञ्चविंशकमात्मानं ब्रह्मभूतं विद्वानमृतो भवतीत्यर्थः । इति प्राप्त आह ॥

॥ न संख्योपसंग्रहादपि नानाभावादतिरेकाच्च ॥ ११ ॥

अपिः संभावनायाम् । पञ्चपञ्चजना इत्यत्र पञ्चविंशतिसंख्योपसंग्रहणादपि न तन्त्रसिद्धप्रधानादयोऽत्र प्रतीयन्ते । कुतः । नानाभावात् । श्रुतिस्थपञ्चजनशब्दं विना यस्मिन्निति निर्दिष्टब्रह्माधारतया ब्रह्मात्मकत्वप्रतीत्या तान्त्रिकेभ्यः पृथक्त्वात्, अतिरेकाच्च, यस्मिन्निति पञ्चपञ्चजनस्याकाशस्य चाधारतया निर्दिष्टस्य परमात्मन आकाशस्य चातिरेकात् पञ्चपञ्चजना इत्यत्र पञ्चविंशतिसंख्याप्रतीतेरेवासंभवः । अतो न बहुव्रीहिगर्भितकर्मधारयः । न वा समाहारः । किंतु पञ्चजना इति संख्याशब्दः संज्ञापरः । यथा सप्तर्षयः सप्तेत्यत्रैकैकोऽपि सप्तर्षिपदवाच्यस्तथा पञ्चजनशब्दोऽपि बोध्यः । "दिक्संख्ये संज्ञाया"मिति स्मरणात् । "पुमांसः पञ्चजना" इत्यमरकोशाच्च । तथा चावयवार्थमनपेक्ष्य पुरुषाभिधानपरोऽयं पञ्चजनशब्द इति सिद्धम् ॥ ११ ॥

पुरुषस्यात्रानुपपत्त्या के पुनस्ते पञ्चजना नामेत्यपेक्षायां लक्षणया पुरुषसंबन्धिनः प्राणादयः पञ्चजनशब्दवाच्या इत्याह ॥

॥ प्राणादयो वाक्यशेषात् ॥ १२ ॥

"प्राणस्य प्राणमुत चक्षुषश्चक्षुः श्रोत्रस्य श्रोत्रमन्नस्यान्नं मनसो ये मनो विदु"रिति वाक्यशेषात् प्राणादयः पञ्चजनाः । ते कतीत्यपेक्षायां पञ्चेति 'पञ्चत्वसंख्यान्वयात् पञ्च प्राणादय एव पञ्चजनशब्दवाच्याः श्रुतावभिप्रेता न स्मृत्युक्तप्रकृत्यादय इति सिद्धम् ॥ १२ ॥

ननु काण्वमाध्यंदिनशाखयो"र्यस्मिन् पञ्च पञ्चजना" इति मन्त्रस्य समानत्वेऽपि काण्ववाक्यशेषस्यान्नशब्दहीनत्वात् कथं पञ्चत्वपूर्तिरित्याशङ्क्याह ॥

॥ ज्योतिषैकेषामसत्यन्ने ॥ १३ ॥

एकेषां काण्वानां पाठे, अन्नेऽसति "तद्देवा ज्योतिषां ज्योति"रिति पूर्वमन्त्रपठितज्योतिषा पञ्चत्वसंख्या पूर्यते ।

ननु ज्योतिःशब्द उभयपाठे समानः । कथमेकेषामेव तद्ग्रहो नान्येषामिति वैषम्यम् । नियामकाभावात् । इति चेन्न । अपेक्षाभेदस्यैवात्र नियामकत्वात् । माध्यंदिनानां समानमन्त्रपठितप्राणादिपञ्चकस्य लाभादन्यमन्त्रपठितज्योतिःशब्दापेक्षाभावः । काण्वानां तु पञ्चमस्यालाभाद् भवत्यन्यस्यापेक्षेति भावः । यथा समानेऽप्यतिरात्रे वचनभेदात् षोडशिनो ग्रहणाग्रहणे, तद्वत् ॥ १३ ॥

ननु यदुक्तं ब्रह्मैकहेतुकं विश्वमिति । तन्न शक्यते वक्तुम् । वेदान्तवाक्येषु सृष्टेरनेककारणकत्वदर्शनात् । तथाहि, क्वचित् "सदेव सोम्येदमग्र आसी"दिति सद्धेतुका सृष्टिराम्नायते । क्वचित् तु "तस्माद्वा एतस्मादात्मन आकाशः संभूत" इत्यात्महेतुका । क्वचिद् "असद्वा इदमग्र आसीत् ततो वै सदजायत" तथा "असदेवेदमग्र आसीत्", "तत् सदासी"दित्यहेतुका । क्वचिच्च "अस्य लोकस्य का गतिरित्याकाश इति होवाच" इत्याकाशहेतुका । "आत्मैवेदमग्र आसीत्", "सर्वाणि ह वा ब्रह्म वा इदमग्र आसी"दित्यादिना बृहदारण्यके आत्मब्रह्महेतुका च सृष्टिः प्रोच्यते । अतोऽनेकहेतुकत्वाज्जगतो ब्रह्मैव कारणमिति न निश्चेतुं शक्यते । किंतु प्रधानैककारणकं तदिति निश्चीयते । "तद्धेदं तर्ह्यव्याकृतमासीत्", "तन्नामरूपाभ्यां व्याक्रियत" इति श्रवणात् । अस्य च परिणामितया नित्यतया चासत्सच्छब्दयोः स्वोत्पन्नतत्त्वपूरकतया प्राणशब्दस्याकाशब्रह्मात्मशब्दानां विभुत्वेन तत्रैव संभवात् । एवं निश्चिते, ईक्षणादयस्तत्र गौणा भवितुमर्हन्ति । अतः स्मृतिन्यायप्रसिद्धत्वात् प्रधानमेव जगद्धेतुतया वेदान्तवाक्यैः प्रतिपाद्यत इत्याशङ्क्याह ॥

॥ कारणत्वेन चाकाशादिषु यथाव्यपदिष्टोक्तेः ॥ १४ ॥

चशब्दः शङ्कानिरासे तुशब्दार्थे वा । यथाशब्दः प्रकारवचने । सर्वज्ञः सर्वेश्वरः परात्मैव जगदेकहेतुरिति निश्चेतुं शक्यते । कुतः । आकाशादिपदचिह्नितेषु सर्वेषु सृष्टिवाक्येषु यथाव्यपदिष्टस्योक्तेः । लक्षणसूत्रादिषु सार्वज्ञ्यादियुक्ततयास्माभिर्यथा व्यपदिष्टं प्रतिपादितं ब्रह्म, तस्यैकस्यैवाकाशादिकारणत्वेन सर्ववेदान्तैः प्रतिपाद्यमानत्वात् ।

तथाहि, "सत्यं ज्ञानमनन्तं ब्रह्मे"ति पूर्वप्रकृतमेव ब्रह्म, "तस्माद्वा एतस्मा"दित्यादिना कारणत्वेन व्यपदिश्यते । तथा "सदेव सोम्येद"मित्यादिषु "तदैक्षत बहु स्या"मिति निर्दिष्टमेव ब्रह्म, "तत् तेजोऽसृजते"त्यादिना व्यपदिश्यते ।

एवमन्योपनिषद्वाक्येष्वपीयमेव रीतिर्द्रष्टव्या । सृष्टिवैचित्र्यं च न कर्तृभेदमापादयति । यथा कुलालो मृण्मयपात्रजातं निर्मिमाणः कदाचिद् घटपूर्विकां सृष्टिं, कदाचिच्छरावपूर्विकां च करोति, स्वयं तु न भिद्यते । तथा परमात्मापि कदाचिदाकाशादिकां, कदाचित् तेजआदिकां सृष्टिं कुर्वन् स्वयं न भिद्यते ॥ १४ ॥

॥ समाकर्षात् ॥ १५ ॥

“सोऽकामयते”ति प्रकृतस्यैव बहुभवनसंकल्पपूर्वकं विश्वं सृजतः सर्वज्ञस्य ब्रह्मणः “असद्वा” इदमित्यत्र समाकर्षात् सृष्टेः पूर्वं नामरूपाविभागात् संबन्धितयास्तित्वाभावेन ब्रह्मैवासच्छब्देनोक्तम् । एव“मादित्यो ब्रह्मे”ति पूर्वप्रकृतस्य ब्रह्मण एवा“सदेवेद”मित्यत्र समाकर्षो बोध्यः । “तद्धेदं तर्ह्यव्याकृत”मित्यत्राप्यव्याकृतशब्देन तदन्तरात्मा परमात्मैवोच्यते । “स एष इह प्रविष्ट आ नखाग्रेभ्यः पश्यन् शृण्वन् श्रोत्रं मन्वानो मन आत्मेत्युपासीते”त्युत्तरवाक्ये “स”इति सर्वनाम्नाऽव्याकृतशब्दोदितस्य ब्रह्मण एव समाकर्षात् । प्रधानपरत्वे तु तस्याचेतनस्यान्तः प्रविश्य प्रशासितृत्वाद्यसंभवात् । “अनेन जीवेनात्मनानुप्रविश्य नामरूपे व्याकरवाणि”, “अन्तः प्रविष्टः शास्ता जनाना”मित्यादौ ब्रह्मण एव तत्प्रसिद्धेः । व्याक्रियत इति कर्मकर्तरि लकारः । अतो ब्रह्मैवैकं जगद्धेतुरिति स्थितम् ॥ १५ ॥

पुनरपि सांख्यो निरस्यते । तथाहि, कौषीतकिब्राह्मणे बालाक्यजातशत्रुसंवादे बालाकिना “ब्रह्म ते ब्रवाणी”ति प्रतिज्ञाय, “य एष आदित्ये पुरुषश्चन्द्रमसि पुरुष”इत्यादिना ब्रह्मत्वेन निर्दिष्टान् पुरुषान् निरस्याजातशत्रुणा “यो वै बालाक एतेषां पुरुषाणां कर्ता यस्य चैतत् कर्म स वै वेदितव्य”इति तस्मा उपदिश्यते । किमत्र वेदितव्यतया निर्दिष्टः सांख्यतन्त्रसिद्धः प्रकृत्यध्यक्षो भोक्ता पुरुष उत परमात्मेति संशये तन्त्रसिद्धः प्रकृतिवियुक्तः पुरुष एवेति । “यस्य चैतत् कर्म”ति कर्मसंबन्धोक्तेः । कर्मणश्च पुण्यापुण्यरूपस्य क्षेत्रज्ञ एव तत्परवशे संभवात् । परमात्मनि तत्संबन्धानभ्युपगमात् । जगदुत्पत्तेश्च तत्तद्भोक्तृकर्मनिमित्तत्वात् । उत्तरत्रापि “तौ ह सुप्तं पुरुषमाजग्मतु”रित्यादिना भोक्ता जीव एवाजातशत्रुणा बालाकिं प्रति प्रतिपादितः । तथा परस्तादपि, तद्यथा, “श्रेष्ठी स्वैर्भुङ्क्ते यथा वा स्वाः श्रेष्ठिनं भुञ्जन्त्येवमेवैष प्रज्ञात्मा एतैरात्मभिर्भुङ्क्ते, एवमेवैत आत्मान एतमात्मानं भुञ्जन्ती”ति भोक्तुर्जीवस्यैव लिङ्गं दृश्यते । “अथास्मिन् प्राण एवैकधा भवती”ति प्राणशब्दोऽपि जीवस्यैव प्राणभृत्त्वात् तत्रैवोपपद्यते ।

यद्वा, अस्मिन्नात्मनि वर्ण्यमाने प्राण इति व्यधिकरणे सप्तम्यौ । प्राणशब्दस्य मुख्यप्राणपरत्वेऽपि स्वतस्तस्य जीवोपकरणत्वाज्जीव एवात्र प्रतिपाद्यः । ततश्चायमर्थः । य एतेषामादित्यमण्डलादिस्थानां जीवभोगोपकरणभूतानां पुरुषाणां कर्ता कारणभूतः, यस्य चैतत् कारणत्वहेतुभूतं पुण्यापुण्यलक्षणं कर्म, स प्रकृतिवियुक्ततया ज्ञातव्य इति । ततश्च “ब्रह्म ते ब्रवाणी” ति वक्तव्यत्वेनोपक्रान्तं ब्रह्म, स एव । तदतिरिक्तेश्वरासिद्धेः । ईक्षादीनां च कारणगतानां चेतनधर्मत्वात् तत्रैवोपपत्तेः । अतो भोक्तृपुरुषाधिष्ठिता प्रकृतिरेव जगद्धेतुरिति प्राप्त आह ॥

॥ जगद्वाचित्वात् ॥ १६ ॥

परमात्मैवात्र वेदितव्यतयोपदिश्यते, न तन्त्रोक्तः कर्मपरवशः क्षेत्रज्ञः । कुतः । “यस्य चैतत् कर्मे”ति एतच्छब्दान्वितस्य कर्मशब्दस्य क्रियत इति व्युत्पत्त्या चेतनाचेतनात्मकजगद्वाचित्वात् ।

न च कर्मशब्देनात्र पुण्यापुण्यलक्षणं कर्मैव वाच्यम् । “ब्रह्म ते ब्रवाणी”ति प्रतिज्ञाय बालाकिना ब्रह्मत्वेन निर्दिष्टषोडशपुरुषाणामब्रह्मतयाजातशत्रुस्तमब्रह्मवादिनं “मृषा वै खलु मा संवदिष्ठा” इत्यपोद्य तदविदितं तन्निर्दिष्टपुरुषकर्तृपरमात्मानं वेद्यत्वेन “यो वै बालाक” इत्यादिनोपदिष्टवान् । अन्यथा पुण्यपापकर्मसंबन्धिपुरुषाणां बालाकिनैव ज्ञातत्वेन वेदितव्यतया तदुपदेशस्य नैष्फल्यात् ।

अतश्चिदचिदात्मकप्रपञ्चकार्यत्ववाच्येव कर्मशब्दो न पुण्यापुण्यमात्रवाची क्रियामात्रवाची वा ।

एवं सत्येतच्छब्दोऽपि सार्थकः । तस्य प्रत्यक्षादिप्रमाणोपस्थापितनिखिलचिदचिन्मिश्रजगद्विषयकत्वेन पुरुषमात्रकर्तृत्वशङ्कानिवृत्त्यर्थत्वात् ।

तथा चैष वाक्यार्थः । हे बालाके ये त्वया ब्रह्मत्वेन पुरुषा उक्तास्तेषां यः कर्ता, ते यत्कार्यभूताः, यस्य एतच्चिदचिदात्मकं कृत्स्नं जगच्च कर्म, कार्यभूतं, स सर्वेश्वरः परमात्मा वेदितव्य इति ॥ १६ ॥

॥ जीवमुख्यप्राणलिङ्गान्नेति चेत् तद्व्याख्यातम् ॥ १७ ॥

“एवमेवैष प्रज्ञात्मैतैरात्मभिर्भुङ्क्ते” इत्यादिभोक्तृत्वरूपजीवलिङ्गात् । “अथास्मिन् प्राण एवैकधा भवती”ति मुख्यप्राणलिङ्गाच्च तदन्यतरो ग्राह्यो न परमात्मेति चेत् । तस्य परिहारः प्रतर्दनविद्यायां “प्राणस्तथानुगमा”दित्यधिकरणेन व्याख्यातः । तत्र खलूपक्रमोपसंहाराभ्यां वाक्यस्य ब्रह्मविषयत्वे निश्चितेऽन्यलिङ्गान्यपि तत्परत्वेन नेतव्यानीति वर्णितम् । इहाप्युपक्रमे “ब्रह्म ते ब्रवाणी”ति विषयत्वेन ब्रह्मो-

क्तम् । मध्येऽपि "यस्य चैतत् कर्मे"ति निखिलजगदात्मककर्मकर्तृत्वेन ब्रह्मैवोक्तम् । उपसंहारश्च "सर्वान् पाप्मनोऽपहत्य सर्वेषां च भूतानां श्रैष्ठ्यं स्वाराज्यमाधिपत्यं पर्येति य एवं वेदे"ति तदुपासकस्य निरतिशयफलश्रवणाद्ब्रह्मपर एवेति । एवमस्य वाक्यस्य ब्रह्मपरत्वे निश्चिते जीवादिलिङ्गान्यपि तत्परत्वेन नेयानीति ।

न च प्रतर्दनवाक्यनिर्णयेनैवेदमपि वाक्यं निर्णीतार्थमिति वाच्यम् । "यस्य चैतत् कर्मे"ति कर्मपदस्य तत्राविचारात् ॥ १७ ॥

नन्वस्तु तावत् प्राणशब्दस्य ब्रह्मणि प्रसिद्धत्वात् तल्लिङ्गानां ब्रह्मपरत्वम् । कथं पुनर्जीवलिङ्गानां ब्रह्मपरत्वम् । "तौ ह सुप्तं पुरुषमाजग्मतु"रित्यादिना प्रबुद्धप्राणस्य सुप्तस्य यष्टिघातूत्थापनादिना शरीरेन्द्रियप्राणातिरिक्तजीवात्मसद्भावप्रतिपादनपरत्वमिति प्रतीयत इत्याशङ्कायामाह ॥

॥ अन्यार्थं तु जैमिनिः प्रश्नव्याख्यानाभ्यामपि चैवमेके ॥ १८ ॥

तुशब्दः शङ्कानिरासार्थः । अत्र प्रकरणे जीवग्रहणमन्यार्थं, जीवव्यतिरिक्तब्रह्मबोधनार्थमिति जैमिनिराचार्यो मेने । कुतः । प्रश्नेति । प्रश्नस्तावत् । "क्वैष एतद् बालाके पुरुषोऽशयिष्ट,क्व वा एतदभूत्,कुत एतदागा"दिति जीवप्रतिबोधानन्तरं परमात्मविषयो दृश्यते । व्याख्यानं प्रतिवचनमपि "यदा सुप्तः स्वप्नं न कंचन पश्यति अथास्मिन् प्राण एवैकधा भवति", "एतस्मादात्मनः सर्वे प्राणा यथायतनं विप्रतिष्ठन्ते, प्राणेभ्यो देवा देवेभ्यो लोका" इति जीवव्यतिरिक्तं परमात्मानमेव गमयति । सुषुप्तिसमयेऽयं जीवो मनसेन्द्रियग्रामं संगृह्य परमात्मानमनुप्रविश्य संप्रसन्नः स्वस्थतामेति पुनस्तस्मादेव भोगाय निष्क्रामति । सोऽयं सुषुप्त्याद्याधारतया प्रसिद्धः प्राणशब्दवाच्यः परमात्मैवात्र वेद्य इति । जैमिनिग्रहणमुक्तार्थस्य पूज्यत्वद्योतनार्थम् । अपि चैवमेके शाखिनो वाजसनेयिनोऽस्मिन्नेव बालाक्यजातशत्रुसंवादे विज्ञानमयशब्देन जीवव्यतिरिक्तं परमात्मानं स्पष्टमामनन्ति । "य एष विज्ञानमयः पुरुषः, क्वैष तदाभूत् कुत एतदागा"दिति प्रश्नः । "य एषोऽन्तर्हृदय आकाशस्तस्मिन् शेते" इति प्रतिवचनम् । एवमेवाकाशः परमात्मा "दहरोऽस्मिन्नन्तराकाश" इत्यत्र प्रोक्तः ।

तस्मात् परमात्मैवात्र वेदितव्यतयोपदिश्यते । स एव समस्तविश्वकारणम् । न तन्त्रसिद्धः पुरुषस्तदधिष्ठितं प्रधानं वेति स्थितम् ॥ १८ ॥

"न वा अरे पत्युः कामाय पतिः प्रियो भवति, आत्मनस्तु कामाय पतिः प्रियो भवती"त्युपक्रम्य "आत्मा वा अरे द्रष्टव्यः श्रोतव्यो मन्तव्यो निदिध्यासितव्य" इत्यादिना बृहदारण्यके मैत्रेयीं प्रति याज्ञवल्क्येन द्रष्टव्यतयोपदिष्ट आत्मा किं तन्त्रसिद्धः पञ्चविंशक उत परमात्मेति संशये, तत्रोपक्रमे पतिजायापुत्रवित्तमित्रपश्वादिप्रियत्वसंबन्धस्य, मध्ये च "एतेभ्यो भूतेभ्यः समुत्थाय तान्येवानुविनश्यति, न प्रेत्य संज्ञास्ति" इत्युत्पत्तिविनाशसंबन्धितया सांसारिकस्वभावप्रतीतेश्च । अन्ते च "विज्ञातारमरे केन विजानीया"दिति विज्ञातृत्ववचनस्य तन्त्रसिद्धे पुरुष एव संभवात् स एवेति ।

न चा"मृतत्वस्य तु नाशास्ति वित्तेने"त्यादिनामृतत्वप्राप्त्यपायोपदेशाच्चैतद्वाक्यं जीवपरमिति वाच्यम् । मोक्षस्य प्रकृतिवियुक्तात्मस्वरूपयाथात्म्यज्ञानेनैव संभवात् । सर्वात्मनां प्रकृतिवियुक्तस्वरूपस्य ज्ञानैकाकारत्वेन सर्वत्रैकरूपत्वात् । तज्ज्ञानेन चात्मविज्ञानमैकात्म्योपदेशश्चोपपद्यते । "सर्वं तं परादा"दित्यादिना तदन्यत्वनिषेधश्च देवाद्याकाराणामनात्माकारत्वादुपपद्यते, "अस्य महतो भूतस्य निःश्वसितमेतदृग्वेद" इत्यादिना कारणत्वं च तस्यैव प्रतिपाद्यते । जगदुत्पत्तेः प्रकृत्यधिष्ठातृपुरुषनिमित्तत्वात् । "यत्र हि द्वैतमिव भवती"ति चैकरूपे स्वात्मनि देवादिप्रकृतिपरिणामभेदेन नानात्वं वदत् तन्निषेधति ।

तस्मात् तन्त्रसिद्धः पुरुष उपदिश्यते । तदधिष्ठिता प्रकृतिरेव जगत्कारणमिति प्राप्त आह ॥

॥ वाक्यान्वयात् ॥ १९ ॥

परमात्मैवात्र द्रष्टव्यत्वादिना निर्दिश्यते । कुतः । वाक्यान्वयात् । वाक्यं नामैकार्थप्रतिपादनपरत्वे सत्याकाङ्क्षादिमत्पदसमुदायः । तस्य सर्वस्य पूर्वापरपर्यालोचने तत्रैवान्वयात् ।

तथाहि,"अमृतत्वस्य तु नाशास्ति वित्तेने"ति याज्ञवल्क्याद्धनादेर्मोक्षानुपायत्वं श्रुत्वा "तदेव मे ब्रूही"त्यमृतत्वमाशासानया मैत्रेय्या प्रार्थितेन याज्ञवल्क्येन द्रष्टव्यत्वादिनोपदिष्टः परमात्मैव । "तमेव विदित्वातिमृत्युमेति," "तमेवं विद्वानमृत इह भवति, नान्यः पन्था विद्यतेऽयनाय,"

"यदा चर्मवदाकाशं वेष्टयिष्यन्ति मानवाः ।
तदा देवमविज्ञाय दुःखस्यान्तो भविष्यति" ॥

इत्याद्यन्वयव्यतिरेकवाक्यैर्मोक्षस्य तदेकज्ञानोपायकत्वमवगम्यते । प्रकृतिवियुक्तात्मस्वरूपज्ञानं तु न स्वातन्त्र्येण मोक्षोपायः । किंतु परमात्मज्ञानोपयोगित्वेनैव । एकविज्ञानेन सर्वविज्ञानप्रतिज्ञापि परमात्मन्येव संभवति । तस्य सर्वात्मकत्वात् । अन्यथा सर्वत्र ज्ञानस्वरूपतया सर्वात्मविज्ञाने जातेऽप्यचिद्वर्गज्ञानप्रतिज्ञाभङ्गापत्तेः । "इदं सर्वं यदयमात्मे"त्यैका-

त्योपदेशोऽपि तत्रैवोपपद्यते। इदंशब्देन चिदचिन्मिश्रप्रपञ्चनिर्देशात्। अत एव परमात्मनोऽत्यन्तभिन्नतया सर्वविदो निन्दोच्यते। सर्वं तं परादा"दिति सर्वविश्वकारणत्वमपि कर्मपरवशानां जीवानां न संभवति। मुक्तानां तु जगद्व्यापाररहित्यं वक्ष्यते।

यत् तूपक्रम"आत्मनस्तु कामाय पतिः प्रियो भवति"इत्यादिना पत्यादिप्रियसंबन्धितया मध्ये चोत्पत्तिविनाशसंबन्धितया सांसारिकस्वभावप्रतीतेर्जीवात्मनोऽन्वेष्टव्यत्वमाशङ्कितम्। तन्न युक्तम्। जीवात्मशब्देन परमात्मन एवाभिधानात्। तस्य सर्वकारणतया सर्वात्मतया च सर्वशब्दवाच्यत्वात् ॥ १९ ॥

तदेव मुन्यन्तरसंमत्या द्रढयति ॥

॥ प्रतिज्ञासिद्धेर्लिङ्गमाश्मरथ्यः ॥ २० ॥

आत्मविज्ञानेन सर्वविज्ञानप्रतिज्ञासिद्धेरिदं लिङ्गं गमकम्। यज्जीवस्य परमात्मकार्यतया परमात्मानन्यत्वाज्जीवात्मशब्देन परमात्मात्मनोऽभिधानमित्याश्मरथ्य आचार्यो मन्यते स्म ॥ २० ॥

॥ उत्क्रमिष्यत एवं भावादित्यौडुलोमिः ॥ २१ ॥

"एष संप्रसादोऽस्माच्छरीरात् समुत्थाय परं ज्योतिरुपसंपद्य स्वेन रूपेणाभिनिष्पद्यते"।

"यथा नद्यः स्यन्दमानाः समुद्रे
ऽस्तं गच्छन्ति नामरूपे विहाय।
तथा विद्वान्नामरूपाद्विमुक्तः
परात् परं पुरुषमुपैति दिव्यम्" ॥

इति शरीरादुत्क्रमिष्यतो जीवस्य, एवं भावात्, परमात्मना सह तादात्म्यभावात्, जीवशब्देन परमात्माभिधीयते। न तु परमात्मकार्यतया, "न जायते म्रियते वापि कश्चित्," "ज्ञाज्ञौ द्वावजौ," "अजो नित्यः शाश्वतोऽय"मित्यादिश्रुतिस्मृतिभिस्तस्योत्पत्तिप्रतिषेधादित्यौडुलोमिराचार्यो मन्यते स्म ॥ २१ ॥

॥ अवस्थितेरिति काशकृत्स्नः ॥ २२ ॥

"य आत्मनि तिष्ठन्नात्मनोऽन्तरः", "य आत्मानं वेद," "यस्यात्मा शरीरम्," "य आत्मानमन्तरो यमयति, स त आत्मान्तर्याम्यमृतः," "अन्तः प्रविष्टः शास्ता जनानां सर्वात्मे"त्यादिश्रुतेः स्वनियम्यभूते जीवात्मन्यात्मतया परमात्मनोऽवस्थितेर्हेतोर्जीवशब्देन परमात्माभिधीयत इति काशकृत्स्न आचार्यो मन्यते स्म।

ततश्चायं मैत्रेयीब्राह्मणनिष्कर्षार्थः। वित्तादिकमनादृत्य मोक्षोपायं पृच्छन्त्या स्वपत्न्या मैत्रेय्या "यदेव भगवन् वेत्थ तदेव मे ब्रूहि" इति प्रार्थितेन याज्ञवल्क्येन "न वा अरे पत्युः कामाय पतिः प्रियो भवत्यात्मनस्तु कामाये"त्यारभ्य, "आत्मा वा अरे द्रष्टव्यः श्रोतव्यो मन्तव्यो निदिध्यासितव्य" इत्यन्तेन परमात्मोपासनं मोक्षोपायत्वेन कथितम्। "आत्मनस्तु कामाये"त्यत्रात्मशब्दस्य जीवात्मपरत्व "आत्मा वा" इति परवाक्येनानन्वयापत्तिः। तस्यां च सत्यां वाक्यभेदः। तस्मिंश्च सति पूर्ववाक्यस्य न किंचित् प्रयोजनं दृश्यते। "आत्मा वा अरे द्रष्टव्य" इत्यात्मनो द्रष्टव्यत्वौपयिकत्वेन तदुपदेशात्। उभयस्य जीवात्मपरत्वे तु परमात्मैकान्तधर्मश्रुतिर्व्याकुप्येत। अतोऽरे हे मैत्रेयि पत्यादेः कामाय, कामोऽभिलाषः, मत्प्रयोजनायाहमस्य प्रियः स्यामित्येवंरूपः, तन्निर्वृतये पत्यादयः प्रिया न भवन्ति। अपित्वात्मनः परमात्मनः कामाय, स्वाराधकप्रियप्रतिलम्भनरूपाभिलापसिद्ध्य इत्यर्थः। परमात्मा हि कर्मभिराराधितः स्वाराधकानां सर्ववस्तुगतं प्रियत्वमापादयति। "एष ह्येवानन्दयाती"ति श्रुतेः। "योगक्षेमं वहाम्यह" मिति स्मृतेश्च।

ततश्चात्मनि खल्वरे दृष्ट इत्यादिनोपास्यलक्षणं ब्रह्म, "तं परादा"दित्यादिना च ब्रह्मणोऽत्यन्तभिन्नचिदचित्सर्वार्थज्ञातृनिन्दापूर्वकं, सर्वस्य ब्रह्मात्मकत्वेन तदभिन्नत्वात्, "इदं सर्वं यदयमात्मेति"चिदचिद्वस्तुनोर्ब्रह्मणाऽभेदमुपदिश्य, दुन्दुभ्यादिदृष्टान्तैश्चोपासनोपकरणभूतकरणनियमनं च सामान्यतोऽभिधाय, "स यथार्द्रैन्धनाग्ने" इत्यादिना "स यथा सर्वासामपा"मित्यादिना च पुनरुपास्यलक्षणं सर्वविश्वकारणत्वरूपं करणनिवर्हनियमनं च विस्तरत उक्त्वा, "स यथा सैन्धवखिल्य उदके प्रास्त" इत्यादिना मोक्षोपायप्रवृत्तिप्रोत्साहनाय स्वनियम्यभूतजीवात्मतयावस्थितस्य परमात्मनो व्यापकत्वम्। उत्तरमैत्रेयीब्राह्मणे च "स यथा सैन्धवघन" इत्यादिना जीवात्मतया तदभेदेनावस्थितस्य परमात्मनोऽपरिच्छिन्नज्ञानैकस्वरूपत्वमुपपाद्य, "एतेभ्यो भूतेभ्यः समुत्थाय तान्येवानु विनश्यती"त्यनेन च तमनुपासीनस्य जीवस्य संसारं, "न प्रेत्य संज्ञास्ती"त्यनेन च तमुपासीनस्य मोक्षं चाभिधाय, पुनरपि "यत्र हि द्वैतमिव भवती"त्यादिना च विनष्टसर्वाज्ञानस्य ध्रुवस्मृतिमतो निखिलविश्वस्य ब्रह्मात्मकतया ब्रह्माभिन्नं सर्वं वस्तु पश्यतो ब्रह्मभिन्नवस्त्वन्तराभावेन भेददर्शनं निराकृत्य, "येनेदं सर्वं विजानाति तं केन विजानीया"दित्यनेन च जीवो येन स्वस्मिन्नात्मतयावस्थितेन परमात्मना बोधितः सन्निदं सर्वं विजानाति तं केन विजानीयान्न केनापीति तस्य दुर्ज्ञेयतामापाद्य, "विज्ञातारमरे केन विजानीया"दिति सर्वविज्ञातारं सर्वजगदेककारणभूतं पुरुषोत्तममुपक्रमोक्तात् तदुपासनादृते केन विजानीयान्न केना-

पीति तदुपासनमेवामृतत्वोपायः परमात्मप्राप्तिरेवामृतत्वमित्युपसंहृतम् । अतः परमात्मैवात्र प्रकरणे निर्दिश्यते । स एव निखिलविश्वकारणं, न तन्त्रसिद्धः पुरुषस्तदधिष्ठिता प्रकृतिर्वेति स्थितम् ॥ २२ ॥

इत्थं निरीश्वरसांख्यमतं निराकृत्य सेश्वरं तन्निराकुर्वता जगत्कारणत्वप्रतिपादकवाक्यजातं सर्वज्ञे परब्रह्मणि श्रीपुरुषोत्तमे समन्वे तु कामेनेदमारभ्यते ।

ननु ब्रह्मैव जगत्कारणं, प्रधानमित्युक्तेऽपि तत् किं जगतो निमित्तकारणमात्रमुतोपादानकारणमपीति संशये निमित्तमात्रमेवेति । कुतः । "स ईक्षांचक्रे", "तदैक्षत", "स ऐक्षते"त्यादिश्रुत्युक्तेक्षापूर्वककर्तृत्वस्य लोके निमित्तकारणेषु कुलालसुवर्णकारादिष्विव निमित्तमात्र एव संभवात् । कार्यकारणयोश्च सारूप्यदर्शनाद् ब्रह्मणोऽपरिणामितया तदधिष्ठितेनाचेतनेन कार्यसधर्मेण परिणामिना प्रधानोपादानेन भाव्यम् ।

"निष्कलं निष्क्रियं शान्तं निरवद्यं निरञ्जनम् ।
विकारजननीमज्ञामष्टरूपामजां ध्रुवाम् ॥
ध्यायतेऽध्यासिता तेन तन्यते प्रेरिता पुनः ।
सूयते पुरुषार्थं च तेनैवाधिष्ठिता जगत्" ॥
"गौरनाद्यन्तवती सा जनित्री भूतभाविनी"त्यादिश्रुतेः ।
"अस्मान्मायी सृजते विश्वमेतत्",
"मायां तु प्रकृतिं विद्यान्मायिनं तु महेश्वरम्" ।
इति ।
"मयाध्यक्षेण प्रकृतिः सूयते सचराचरम् ।
निमित्तमात्रमेवासौ सृष्टानां सर्गकर्मणि ॥
प्रधानकारणीभूता यतो वै सृज्यशक्तयः" ।

इत्यादिश्रुतिस्मृतिभिर्निमित्तोपादानयोर्मृत्कुलालादिवद्भेदप्रतिपादनाच्च । कार्यसिद्धेश्च लोकेऽनेककारकसापेक्षत्वदर्शनाच्च । अतो निमित्तमात्रमेव ब्रह्म, तदधिष्ठितं प्रधानमेवोपादानमिति प्राप्ते राद्धान्तः ॥

॥ प्रकृतिश्च प्रतिज्ञादृष्टान्तानुपरोधात् ॥ २३ ॥

चकारो निमित्तसमुच्चयार्थः । प्रकृतिरुपादानं निमित्तं च ब्रह्मैव । कुतः । 'प्रतिज्ञे'ति । प्रतिज्ञा च दृष्टान्तश्च तयोरनुपरोधात् सामञ्जस्यात् । प्रतिज्ञा च "उत तमादेशमप्राक्षो येनाश्रुतं श्रुतं भवत्यमतं मतमविज्ञातं विज्ञात"मित्युपादानकारणविज्ञानेन सर्वकार्यविज्ञानविषया । कार्यस्य तदनतिरिक्तत्वात् । दृष्टान्तोऽपि "यथा सौम्यैकेन मृत्पिण्डेन सर्वं मृण्मयं विज्ञातं स्या"दित्यादिरूप उपादानकारणविज्ञानेन सर्वकार्यविज्ञानगोचर एव । ब्रह्मणो निमित्तमात्रत्वे तु कुलालादिज्ञानेन मृण्मयाज्ञानेन, च तज्ज्ञानेन सर्वकार्यविज्ञानं न स्यादेवेति तयोर्बाध एव स्यात् ।

यत् पुनरुक्तमीक्षापूर्वकर्तृत्वस्य लोके कुलालादाविव निमित्तमात्र एव संभवादिति । तत्रोच्यते । न लोकवदिहापि भाव्यम् । "सदेव सोम्येदमग्र आसी"त् "एकमेवे"ति सृष्टेः प्रागेकत्वावधारणादद्वितीयपदेनाधिष्ठात्रन्तराभावज्ञापनाच्च । "उत तमादेशमप्राक्ष्" इत्यत्रापि निमित्तोपादानयोरैक्यस्य प्रतीयमानत्वाच्च ।

तथाहि, आदिशतीत्यादेशः । बाहुलकात् कर्तरि घञ् । यद्वा, भावार्थघञन्तादादेशशब्दादर्शआद्यच् । उभयत्रापि प्रशासितृत्वाधिकरणत्वमेवादेशशब्दस्य युक्तम् । तथा च "अन्तः प्रविष्टः शास्ता जनानाम्", "एतस्य वा अक्षरस्य प्रशासने गार्गि," "प्रशासितारं सर्वेषा"मित्यादिश्रुतिस्मृतिभ्यास्, आदेशशब्देन प्रशासनरूपव्यापाराश्रयः कर्ता विवक्षितः । तमादेशमादेष्टारमधिष्ठातारमप्राक्षः, येनादेष्ट्राऽधिष्ठात्रा श्रुतेनाश्रुतं सर्वं श्रुतं भवतीति ।

किंच, ब्रह्मणो जगदुपादानत्वे "यतो वा इमानि भूतानि जायन्ते", "जन्माद्यस्य यतः", "यतः सर्वाणि भूतानि भवन्ती"त्यादिश्रुतिस्मृतिसूत्रेषु 'जनिकर्तुः प्रकृति'रिति सूत्रेण प्रकृत्यर्थविहितपञ्चम्याः प्रामाण्यात् ।

ननु च वृत्तौ "पुत्रात् प्रमोदो जायत" इत्यनुपादानेऽपि पञ्चमीग्रहण उपादानस्यैवापादानसंज्ञा स्यात् । प्रत्यासन्नत्वात् । नेतरस्य । प्रकृतिग्रहणात् कारणमात्रस्य भवतीति प्रकृतिपदादनुपादानेऽस्यापादानसंज्ञासिद्ध्यर्थमित्युक्तत्वात् । महाभाष्यकृद्भिरपि, "अयमपि प्रयोगः शक्यो वक्तुं गोलोमभ्यो दूर्वा जायन्ते, अद्यात्रामन्त्रिताभ्य" इत्यादिना दूर्वादीन् प्रत्यवधित्वात् । कैयटेऽपि, अपक्रमणावधित्व लोमादिषु कार्यप्रतीतिर्न संभवतीत्याशङ्क्य बिलानि क्रामतो दीर्घभोगस्य भोगिनोऽवच्छिन्नतया तत्रोपलब्धिवत् कार्यस्यापि दूर्वादेस्तत्रोपलब्धिरित्यवधित्वस्यैव तत्रोपपादितत्वात् ।

अत उपादान एव "जनिकर्तु"रित्यनेन पञ्चमीति न नियमोऽन्यत्रापि संभवादिति चेन्न । कारणमात्रार्थकत्वेऽप्युपादानपरत्वाभ्युपगमात् । छागपशुन्यायेन यथा "पशुना यजे"दित्यत्र पशुपदस्य पशुमात्रवाचकत्वेऽपि छागस्य वपाया इति शेषात् पशुविशेषपरत्वम् । तद्वत् प्रकृतेऽप्यनुसंधेयम् ।

न चोक्तन्यायविरोधोऽत्र । निश्चयौपयिकवाक्यशेषाभावात् । इति शङ्क्यम् । "आत्मन आकाशः संभूत" इत्यादावुपादाने पञ्चम्यां "सच्च त्यच्चाभव"दिति वाक्यशेषेण "सोऽकामयत बहु स्या"मित्यतत्प्रकरणान्तरस्थवाक्येन प्रतीतसामानाधिकरण्यस्य नियामकत्वात् ।

अपिच, ब्रह्मण उपादानत्वाभावे कार्ये व्याप्यभावात् तस्य परिच्छिन्नत्वापत्तिरप्यावश्यकी ।

एतदुक्तं भवति । कारणत्वं नाम कार्योत्पत्तिप्राक्कालिकमियत्तासंबन्धाश्रयत्वम् ।

तद् द्विविधम् । निमित्तोपादानभेदात् ।

तत्र निमित्तत्वं नाम कार्योत्पत्त्यनुकूलज्ञानचिकीर्षाकृतिमत्त्वे सति तद्व्यापाराश्रयत्वम् ।

व्यापाराश्रयत्वं च स्वस्वानादिकर्मसंस्कारवशीभूतात्यन्तसंकुचितभोगानर्हज्ञानशक्तिधर्मकाणां चेतनानां फलभोगार्हज्ञानप्रकाशनतत्तत्कर्मानन्ततत्तत्कर्मफलतत्तद्भोगकरणैः सह संयोजयितृत्वम् ।

परमते तु तत्त्वं दुर्घटम् । कार्यस्य कल्पितत्वाङ्गीकारेण कुलालवदुपादानगोचरप्रयत्नचिकीर्षादिमत्त्वासंभवात् ।

न हि कल्पितशुक्तिरूप्यादिकं प्रति भ्रान्तस्यान्यस्य वा कर्तृत्वं प्रामाणिकम् ।

न च रूप्यादौ साक्ष्येव कर्ता, न ह्यदर्शनमात्रेण कर्त्रपलापो वक्तुं शक्यः, त्वन्मते सर्वज्ञस्य कर्तुरपलापापत्तेरिति वाच्यम् । इदमर्थावच्छिन्नस्येदमाकारवृत्त्यवच्छिन्नस्येव त्वदभिमतस्य साक्षिण इच्छाद्यभावे कर्तृत्वासंभवात् । सर्वज्ञे कर्तरि श्रुत्यादेरिव शुक्तिरूप्यादिकर्तरि प्रमाणस्याभावात् । न हि "नामरूपे व्याकरवाणी"ति श्रुत्युक्तेश्वरस्येव शुक्तिरूप्यं करवाणीति कस्याप्यनुभवो दृश्यते ।

न च भ्रान्तवदध्यासद्रष्टृत्वम् । भ्रान्तस्य प्रेक्षापूर्वकमारोपितकर्तृत्वाभावात् ।

न च मायाविवद् व्यामोहकत्वम् । व्यामोहनीयानामपि कल्पितत्वेन तद्दर्शने परेशस्य भ्रान्तत्वापत्तेः । न ह्यैन्द्रजालिकः कल्पितान् मोहयति । किंच, जन्मादिसूत्रेऽर्थलब्धसार्वज्ञ्यस्फोरणार्थं, शास्त्रयोनिसूत्रमिति त्वन्मतस्य भङ्गापत्तेः । अध्यस्तदृष्टव्यामोहकस्य सार्वज्ञ्यासंभवात् ।

न च करवाणीति संकल्पपूर्वकं कर्तृत्वं मायिन्यप्यस्तीति वाच्यम् । कल्पितपदार्थकर्तृत्वाभावेऽपि प्रतारकस्य मायिनः करवाणि करोमीत्युक्तिसंभवेऽपि परमाप्तस्य परमेश्वरस्य वास्तवकर्तृत्वं विना तथोक्त्यसंभवादित्यलं कुतर्कोच्छेदैः ।

अथ किमुपादानस्य लक्षणमित्यपेक्षायामाहुरेके । भ्रमाधिष्ठानत्वं तत्त्वम् । इति चेन्न । उपादाने मृदादौ भ्रमाधिष्ठानत्वस्य भ्रमाधिष्ठाने च शुक्त्यादावुपादानस्य च व्यवहारादर्शनात् । मृद्ज्ञानेन घटादिबाधादर्शनात् । पारिभाषिकोपादानत्वस्य चानुपादानत्वे पर्यवसानात् ।

नन्वसत्यरूपान्तरापत्तिर्विवर्तः, सत्यरूपान्तरापत्तिस्तु परिणामः, रूपान्तरापत्तिमात्रमुपादानत्वम् । तच्च ब्रह्मणो विवर्तरूपविशेषेणापि सूपपन्नम् । निर्विकारश्रुतिस्तु तात्त्विकविकाराभावाभिप्रायिका । ब्रह्म चाज्ञानप्रपञ्चरूपेण विवर्त इत्यज्ञानमपि परिणामितयोपादानान्तर्गतरूप्यमपि शुक्तिविवर्तत्वादज्ञानपरिणामत्वाच्चोभयोपादानकमिति चेन्न । त्वयापि मिथ्याभूतस्य मिथ्याभूतमेवोपादानमन्वेषणीयम् । सत्यत्वे कार्यस्यापि कारणस्वभावतया सत्यत्वप्रसङ्ग इति वदता सत्यस्यासत्यरूपतापत्तेर्निषेधात् । स्वभावत्यागप्रसङ्गाच्च ।

किंच, सत्यस्यासत्यरूपतापत्तौ तदापत्तियोग्यतारूपधर्मोऽप्यवश्यं स्वीकार्यः । सर्वसामर्थ्यशून्यस्य तत्त्वत्वासंभवात् । अतिप्रसङ्गाच्च । तथात्वे च निर्विशेषप्रतिज्ञाभङ्गात् ।

नापि रूपान्तराभेदधीविषयत्वमुपादानत्वमिति लक्षणं संभाव्यम् । तत्त्वंपदार्थयोः क्षीरनीरयोः खण्डगोत्वयोश्चोपादानोपादेयभावप्रसङ्गात् ।

न च कार्याभेदधीविषयत्वमुपादानत्वमिति वक्तुं योग्यम् । सदृशे वस्तुनि संनिहिते निमित्तेऽपि कार्याभेदभ्रमसंभवेनातिव्याप्तेः ।

ननु मायोपादानमीश्वरो निमित्तं, शुद्धं ब्रह्माधिष्ठानमिति चेन्न । अभिन्ननिमित्तोपादानासिद्ध्या त्वन्मते तदर्थस्यैतदधिकरणस्यैव बाधापत्तेरिति ।

किंच, त्वन्मते ब्रह्मण उपादानत्वप्रतिपादनं प्रामादिकमेव । भ्रमाधिष्ठाने शुक्त्यादावभवदिति प्रयोगाभावात् । तत्प्रयोगविषयबहुभवनरूपोपादानतया ब्रह्मणस्तैरनभ्युपगमात् । न च शुक्तौ रूप्यस्यानुपादानत्वाच्छुक्तौ रूप्यमभवदिति व्यवहाराभावो युक्त इति वाच्यम् । इदं रूप्यमित्यत्र रूप्याभिन्नतया प्रतीतस्येदमर्थस्य रूप्योपादानतया त्वदभिमतस्येदं रूप्यमभवदिति व्यवहाराविषयत्वात् ।

किंच,सृष्टेः प्रागहमर्थाभावेनोत्तमपुरुषप्रयोगानुपपत्तेः ।

न चाविद्यापरिणामविशिष्टेऽहमिति प्रयोगसंभवेनोत्तमपुरुषोपपत्तिः सूपपन्नेति वाच्यम् । उक्तसंकल्पात् प्रागविद्यापरिणामाभावात् ।

अयं भावः । संकल्पात् प्रागविद्यापरिणामोऽस्ति न वेति वक्तव्यम् ।

नाद्यः । "एकमेवाद्वितीय"मिति श्रुतिविरोधात् ।

नान्त्यः । उक्तोत्तमपुरुषप्रयोगासंभवात् ।

किंच, "तदात्मानं स्वयमकुरुते"ति श्रुतिविरोधात् । अन्यथा "अकुरुते"ति वाक्योक्त्ययोगात् । विवर्ताधिष्ठान इदमर्थ आत्मानं रूप्यात्मनाकुरुतेति व्यवहारादर्शनात् ।

किंच, "तद्भूतयोनि"मिति श्रुतिविरोधः । इदमर्थे रूप्याद्यधिष्ठाने योनिशब्दाप्रयोगात् । "सर्वं खल्विदं ब्रह्म तज्जलानिति"सहेतुकसामानाधिकरण्यश्रुतिबाधश्च ।

न च स्थाणुरेव चोर इतिवद्बाधितसमानाधिकरणत्वाङ्गीकाराच्च बाध इति वाच्यम् । स्थाणुपुरुषयोरुपादानोपादेयत्वाभावेन दृष्टान्तासंभवादिति संक्षेपः ।

केचित् तु चिदचिद्विशिष्टं ब्रह्मोपादानम् । तथा चोपादानश्रुतीनां स्वार्थे प्रामाण्यान्न कोऽपि दोषः ।

न च विशिष्टस्योपादानत्वे परिणामोऽवश्यं भावी, तथात्वे च निर्विकारश्रुतिव्याकोपादसामञ्जस्यमिति वाच्यम् । विकारस्य विशेषणगतत्वात् । निर्विकारश्रुतीनां विशेष्यपरत्वाच्चोक्तदोषलेशसंबन्धावकाश इत्याहुस्तन्न संभवति ।

तथाहि, विशिष्टस्य ब्रह्मत्वं भवतामभिप्रेतं न वेति ।

आद्ये, भवता "अंशो नाने"ति वक्ष्यमाणसूत्रभाष्ये विशेषणस्यांशत्वाङ्गीकारेणांशतः परिणामापत्तेर्दुर्वारत्वात्, निर्विकारश्रुतिबाधस्य तादवस्थ्याच्चासंभवः ।

द्वितीये, ब्रह्मोपादानत्वप्रतिज्ञाभङ्गात् । शुद्धविशिष्टयोर्भेदापत्त्या परमतप्रवेशाच्च, विशिष्टाभ्युपगमबाधाच्चासंभव एव ।

किंच, विशिष्टब्रह्मणो मुक्तगम्यत्वं भवतामभिप्रेतं न वा ।

नाद्यः । विकारिणो मुक्तोपसृप्यत्वे मुक्तावपि सविकारत्वापत्तेर्महाननिष्टः ।

द्वितीये, किंच मुक्तगम्यं ब्रह्मेति वक्तव्यम् । न तावद्विशेषशून्यम् । मायावादमतप्रवेशात् । अनभ्युपगमाच्च । गत्यन्तराभावाच्चासंभव एव ।

तस्माद्विशिष्टब्रह्मोपादानवादो महादोषवत्त्वादसंभव एवेति संक्षेपः ।

अन्ये च ब्रह्म जगतो निमित्तकारणमेव, नोपादानकारणमित्याहुः । तत् सूत्रकारेणैव खण्डितम् । श्रुतिस्मृतिविरोधात् । इत्युपरम्यते ।

वस्तुतस्तु कार्याकारभजनार्हशक्तिमत्त्वे सति तदवस्थापत्तियोग्यत्वमुपादानत्वमिति । चेत्रचेत्रज्ञक्षराक्षरादिपदार्थभूतस्वस्वाभाविकसूक्ष्मावस्थापन्नानां नानाशक्तीनां तत्तद्गतसूक्ष्मसद्रूपकार्याणां च स्वाभाविकानां स्वान्वितानां स्थूलतया प्रकाशकत्वमित्यर्थः ।

प्रकृतमनुसरामः । एवं ब्रह्मण एव जगतो निमित्तोपादानत्वे निश्चिते "विकारजननीं" "गौरनाद्यन्तवती"त्यादिश्रुतिभिः सूक्ष्मचिच्छक्तिकं ब्रह्मैव तत्तच्छब्दैरभिधीयते । ब्रह्मणः सर्वात्मतया सर्वशब्दवाच्यत्वात् । स्थूलसूक्ष्मावस्थस्य सर्वस्य चिदचिद्वस्तुनश्च तदात्मकत्वेन तदभिन्नत्वात् । "सर्वं खल्विदं ब्रह्म", "ऐतदात्म्यमिदं सर्व"मित्यादिश्रुतेः ।

यत् तूक्तम् । "लोके कार्यस्यानेककारकसाध्यत्वदर्शनादिति" । तदपि न । सर्वाचिन्त्यानन्तशक्तेर्ब्रह्मणो जगन्निर्माणे कारकान्तरनिरपेक्षत्वात् ।

इतश्च ब्रह्मैव निमित्तमुपादानं च ॥ २३ ॥

॥ अभिध्योपदेशात् ॥ २४ ॥

अभिध्या संकल्पः । "सोऽकामयत", "बहु स्यां प्रजायेय", "तदैक्षत बहु स्या"मिति विश्वस्रष्टुर्ब्रह्मणः स्वस्यैवाभिव्यक्तनामरूपजगदात्मना बहुभवनसंकल्पोपदेशात् "तदैक्षते"ति स्रष्टृत्वं, "बहु स्या"मित्युपादानत्वमिति विवेकः ॥ २४ ॥

॥ साक्षाच्चोभयाम्नानात् ॥ २५ ॥

चशब्दोऽवधारणे । "किंस्विद्वनं क उ स वृक्ष आसीद्यतो द्यावापृथिवी निष्टतक्षुर्मनीषिणो मनसा पृच्छतेदु तद्यदध्यतिष्ठद् भुवनानि धारय"न्निति जगदुपादाननिमित्तताप्रश्ने "ब्रह्म वनं ब्रह्म स वृक्ष आसीद्यतो द्यावापृथिवी निष्टतक्षुर्मनीषिणो मनसा विब्रवीमि वो ब्रह्माध्यतिष्ठद्भुवनानि धारय"न्निति साक्षादुभयं निमित्तत्वमुपादानत्वं च ब्रह्मण आम्नायते । अतस्तदेवोभयरूपम् ॥ २५ ॥

इतश्चोभयरूपं ब्रह्म ॥

॥ आत्मकृतेः परिणामात् ॥ २६ ॥

लोके हि कृतिमान् कर्ता । कृतिविषयो मृदादिरुपादानमिति व्यवस्था ।

प्रकृते चात्मनः कृतिमत्त्वं कृतिविषयत्वं चोभयं श्रूयते । "तदात्मानं स्वयमकुरुते"ति । 'आत्मान'मिति द्वितीयया कृतिविषयत्वं स्वयमिति कृतिमत्त्वम् ।

एवं च ब्रह्मैव निमित्तमुपादानं च । कुतः । आत्मकृतेः । आत्मसंबन्धिनी कृतिरात्मकृतिः । संबन्धो विषयविषयिभावः । कृतिः करणम् । तस्मादित्यर्थः । तत्राव्याकृतरूपेण कर्तृत्वम् । व्यक्तनामरूपत्वेन च कर्मत्वम् । कार्यकारणयोस्तादात्म्यात् ।

नन्वात्मनः कर्तृत्वेन पूर्वसिद्धस्य कथं पुनः कृतिकर्मत्वमत आह, परिणामादिति ।

परिणामो द्विविधः । स्वरूपपरिणामः, शक्तिविक्षेपलक्षणपरिणामश्च ।

तत्राद्यो ब्रह्मानधिष्ठितस्वतन्त्रप्रकृतिस्वरूपपरिणामवादोऽयं सांख्यानां सिद्धान्तः ।

द्वितीयश्चौपनिषदानाम् ।

तथा च सर्वज्ञत्वसर्वाचिन्त्यानन्तशक्त्यादिनिलयः परब्रह्मभूतः श्रीपुरुषोत्तमः स्वात्मकस्वाधिष्ठितनिजशक्तिविक्षेपेण जगदाकारं स्वात्मानं परिणमयति । यथाऽप्रच्युतस्वरूपादिभ्य एवाकाशोर्णनाभ्यादिभ्यः शब्दवाय्वोस्तत्त्वादेश्च जन्मादिकम्, च्युतस्वरूपान्मनसः कामक्रोधलोभमोहादीनां परस्परवि-

लवणानां समुद्राद्रूर्मीणां चोद्भवनं प्रत्यक्षागमादिमानसिद्धम्, तेषां तादृशापरिमितशक्तियोगादेव । एवमचिन्त्यानन्तस्वाभाविकशक्तियोगाद्ब्रह्मणोऽपि निर्विकारादप्रच्युतस्वरूपाज्जगज्जन्मादिकं बोध्यम् ।

"परास्य शक्तिर्विविधैव श्रूयते
स्वाभाविकी ज्ञानबलक्रिया च ।
विचित्रशक्तिः पुरुषः पुराणो
न चान्येषां शक्तयस्तादृशाः स्युः" ॥

इत्यादिश्रुतेः ।

"शक्तयः सर्वभावानामचिन्त्यज्ञानगोचराः ।
शक्तयो ब्रह्मणस्तास्तु सर्गाद्या भावशक्तयः ।
भवन्ति तपतां श्रेष्ठ पावकस्य यथोष्णता" ॥

इत्यादिस्मृतेः ।

न च शक्तिविक्षेपोपसंहारवादे किं प्रमाणमिति वाच्यम् । 'यथोर्णनाभि'रित्याद्युपपत्तिमहक्तश्रुतेः ।

"प्रधानं पुरुषं चापि प्रविश्यात्मेच्छया हरिः ।
क्षोभयामास",

इति विक्षेपपर्यायक्षोभशब्दप्रयोगस्मृतेश्च मानत्वात् ।

किंच,

"प्रसार्य च यथाङ्गानि कूर्मः संहरते पुनः ।
तद्वद्भूतानि भूतात्मा सृष्टानि ग्रसते पुनः" ॥

इति भारते दृष्टान्तोपपत्तिपूर्वकभीमवाक्याच्च ।

शक्तिविक्षेपरूपपरिणामानङ्गीकारे ब्रह्मणः सर्वज्ञत्वनिरतिशयानन्दत्वादिकं विरुध्येत । अज्ञत्वासुखित्वकर्मवश्यत्वादिकं च प्रसज्येत ।

विवर्तवादे च प्रतिज्ञादृष्टान्तयोरसंभव एव । सर्वस्य कार्यस्य भ्रान्तिमात्रत्वाङ्गीकारात् कस्य ज्ञानं स्यात् ।

किंच, भ्रान्तिविषयकं ज्ञानं भ्रान्तिरूपमेव स्यात् । तथा च भ्रान्तजल्पितमेव श्रुतिवाक्यं स्यात् । बौद्धमताविशेषापत्तेश्च ।

अपिच, यथा परिणामदृष्टान्तानां मृद्विज्ञानेन घटशरावादिकार्याणां, सुवर्णज्ञानेन कटककुण्डलादीनां श्रुत्युपात्तत्वशुक्तिज्ञानेन रजतजातस्य रज्जुज्ञानात् सर्पज्ञानसंभवः । न तथा विवर्तदृष्टान्तानां शुक्तिरजतरज्जुसर्पादीनां श्रुत्युपात्तत्वम् । शुक्तिज्ञानेन रजतजातस्य रज्जुज्ञानेन सर्पजातस्य वा ज्ञानं च दृष्टं श्रुतमुपपन्नं वा । कार्यस्य सत्यत्वाङ्गीकारे चाद्वैतसिद्धान्तो दत्ततिलाञ्जलिः स्यात् ।

तस्माद्विवर्तवादो हि श्रुतिप्रतिज्ञादृष्टान्तविरुद्धत्वादुपेक्षणीयो विवेकिभिः ॥ २६ ॥

॥ योनिश्च हि गीयते ॥ २७ ॥

इतश्चोपादानमपि ब्रह्म । हिर्हेतौ । यस्मात् सर्वस्य कार्यस्य परमात्मा योनित्वेन गीयते । "यद्भूतयोनिं परिपश्यन्ति धीरा" इति । "कर्तारमीशं पुरुषं ब्रह्मयोनि"मिति च । "एष योनिः सर्वस्ये"ति च । योनिशब्दस्य चोपादाने शक्तिः सुप्रसिद्धा पृथिवीयोनिरोषधिवनस्पतीनामित्यादौ ॥ २७ ॥

॥ एतेन सर्वे व्याख्याता व्याख्याताः ॥ २८ ॥

एतेन समन्वयाध्यायोक्ताधिकरणसमुदायेन सर्वेऽप्युक्तानुक्तकारणप्रतिपादनपरा वेदान्ता व्याख्याताः । भवन्तीति शेषः । व्याख्याता इति पदाभ्यासोऽध्यायसमाप्तिं द्योतयति ।

तस्मात् सर्वज्ञानशक्तिबलैश्वर्याद्यनन्तगुणादिनिलये निःशेषदोषगन्धाघ्रातसीम्नि परब्रह्मणि श्रीपुरुषोत्तमे वेदान्तानां समन्वय इति सिद्धम् ।

यदि सर्वज्ञानशतयाद्याश्रयः परब्रह्मभूतो मुकुन्दाख्यो जगद्धेतुर्न स्यात्, तर्हि प्रतिनियतदेशकालादिक्रिया, तत्फलादिसिद्धिर्न स्यात् । प्रतिनियतकालं कोकिलाद्युत्पत्तिः, प्रतिनियतकालमम्बुदादिगर्जनादिः, प्रतिनियतब्राह्मणादिवर्णाश्रमक्रियादिः, प्रतिनियतस्वर्गादिसुखं, नरकादिदुःखं च न स्यात् ।

किंच, मनसाप्यतर्करचनस्य जगतस्तदल्पैकदेशवृत्तिविविधनाडीजालादिसंनिवेशविशिष्टशरीरस्य चोत्पत्तिर्न स्यात् । इत्यादिकाः शास्त्रैकमूलानुकूलतर्काश्चात्रानुसंधेयाः ॥ २८ ॥

गुणैकनिलयो देवः सर्ववेदसमन्वितः ।
पायाच्छ्रीमन्मुकुन्दो नः श्रीनिम्बार्कपदाश्रितान् ॥

इति श्रीसनकसंप्रदायप्रवर्तकाद्याचार्यश्रीनिम्बार्कमतानुयायिश्रीमन्मुकुन्दचरणारुणपद्ममकरन्दभृङ्गेण श्रीकेशवकाश्मीरिभट्टेन संगृहीतायां वेदान्तकौस्तुभप्रभाख्यायां ब्रह्मसूत्रवृत्तौ प्रथमाध्यायस्य चतुर्थपादविवृतिः समाप्ता ॥

समाप्तश्चात्र प्रथमाध्यायः ॥ :: :: ॥

॥ अथ ज्ञानसिद्धान्तचन्द्रिका ॥

बर्कलेसंज्ञकमहापण्डितविरचितसिद्धान्तमालायाः अवतारिता ।

१—अथ कृतायां मानवज्ञानविषयपर्यालोचनायां तेषां मनोवृत्त्यात्मकत्वमेव प्रतीयते । ताश्च बाह्याभ्यन्तरप्रत्यक्षस्मृतिकल्पनभेदाच्चतुर्विधाः । आद्ययेन्द्रियोपनीतप्रत्यक्षाणि द्वितीयया हर्षविषादाद्यनुभवास्तृतीययोक्तवृत्तिसंस्कारजन्यज्ञानानि चतुर्थ्या तेषां ज्ञानानां यथेच्छमुपस्थापनं संयोगविभागाश्च विवक्ष्यन्ते । तत्र नेत्ररसनानासिकात्वक्श्रोत्रजन्यानां

यथासंभवं सहचरितानां रूपरसगन्धस्पर्शशब्दादिबाह्यप्रत्यक्षाणां समुदायविशेषाएव वस्तूनीति व्यपदिश्यन्ते घटपटमठाद्यभिधाश्च लभन्ते। यथा रूपरसगन्धस्पर्शपरिमाणविशेषाणां नियमेन सहचराणां प्रत्यक्षाणां समूहोघटइत्यभिधीयते एवमेवान्यविधाः प्रत्यक्षसमुदाया गृहकाष्ठपाषाणादिसंज्ञाभिर्व्यवह्रियन्ते। त एव चात्मरुच्यरुच्यनुसारेण रागद्वेषहर्षविषादाद्यात्मकानि मानसप्रत्यक्षाणि जनयन्तीति बोध्यम्।

२–यश्चैषामनन्तानां वृत्तिविशेषाणामेषिता द्रष्टा स्मर्ता कल्पयिता चान्तर्यामित्वेन प्रतिभासते स मनश्चितमात्मा जीवश्चोच्यते। नायं वृत्तिविशेषरूपोपितु तदधिकरणीभूतः सर्वथा तदतिरिक्तो बोध्यः। वृत्तीनां दृश्यत्वादात्मनश्च द्रष्टृत्वात्।

३–तथाच विचाराणां मानसभावानां कल्पनानां च सर्वानुभवसिद्धमात्मैकनिष्ठत्वमिव बाह्यप्रत्यक्षविषयाणामपि तदेकनिष्ठत्वमेव प्रतीयते। तेषां प्रत्यक्षानतिरिक्तत्वात्प्रत्यक्षाणां च तदेकनिष्ठत्वात्। नन्वेषां परितोवर्तमानानां वस्तूनामात्मबहिर्भूतत्वेन प्रतीयमानानामपि कथं प्रत्यक्षात्मकतामभ्युपेत्यात्मनिष्ठत्वमुच्यत इति चेदादौ परितोवर्तमानानामित्यत्र वर्त्तमानत्वं तावन्निरुच्यताम्। तस्य च सत्तापरपर्यायत्वात्प्रत्यक्षीभूतत्वमेव तत्वं वक्तुं युज्यते। यथा चोच्यते घटोऽस्तीति। अत्र वक्त्राऽस्तिना घटसन्निधाने मया दृश्यते स्पृश्यत इति तदसन्निधानेतु जनान्तरेण दृश्यते स्पृश्यतइतिवाऽभिप्रैति। एवं रूपरसगन्धस्पर्शशब्दाः सन्तीत्यस्य यथाक्रमं नेत्ररसनाघ्राणत्वक्श्रोत्रद्वारा मया जनान्तरेण वाऽनुभूयन्त इत्यर्थः। येतु पदार्थसत्ता प्रत्यक्षीभूतत्त्वातिरिक्तेत्याहुस्तदसत्। तादृशसत्ताया अनुभवविरुद्धत्वात्। नाप्येतत्संभावयितुं शक्यते यद्बाह्यबाह्यवस्तूनां सत्ता तस्य सर्वद्रष्टुरात्मनोबहिस्तिष्ठेदिति।

४–यद्यपि गृहनदीनगमहीरुहादीन्द्रियग्राह्यविषयाणां सत्ता लोके स्वतन्त्रा स्वतःसिद्धेव वा मन्यते नतु प्रत्यक्षीभूतत्वात्मिका तथाप्येतन्मतं यदि कश्चन सुनिपुणं विचारयेत्तर्हि तं प्रत्येतस्य बाधितत्वं व्यक्तं प्रतीयेत। गृहनद्यादीनामिन्द्रियग्राह्यत्वादिन्द्रियग्राह्यविषयाणां च ज्ञानानतिरिक्तत्वाज्ज्ञानस्य चाप्रत्यक्षीभूतत्वेनावस्थातुमशक्यत्वात्।

५–किंचैतल्लौकिकं मतं समीचीनतया विचारितं चेद्दन्ततोऽभेद्यभेदज्ञानएव पर्यवस्यति। विषयसत्तायास्तत्प्रत्यक्षीभूतत्वातिरिक्तत्वेन ज्ञानस्याभेद्यभेदज्ञानशेखरीभूतत्वात्। तथाहि नीलशुक्ले शीतोष्णे आकारपरिमाणे इत्यादीनीन्द्रियग्राह्यसर्ववस्तूनि प्रत्यक्षज्ञानात्मकान्येवेति कथं तेभ्यस्तद्विषया विभक्तुं शक्येरन्। न किमपि स्वस्माद्विद्यते तथा चिन्तयितुं वा शक्यते। यद्यपि अवयविनः सकाशात्कतिपयेऽवयवाः क्वापि तत्पृथक्त्वेनादृष्टा अपि तथाचिंतयितुं शक्यन्ते। एवं पुष्पाण्यननुसन्धायैव जलादिगतस्तद्गन्धोपि। तथापि न कदापि कल्पनाव्यापारः संभवनीयवस्तुस्थितिमतिशेते। यावदेव लोके प्रसिध्यति बुद्धौ संभाव्यते वा तावत्पर्य्यन्तमेव कल्पनाव्यापारः प्रसरति न ततोधिकमपि। यतश्च सर्वस्यापि वस्तुनस्तत्प्रत्यक्षमन्तरा दर्शनस्पर्शनादीनामसंभवोतस्तानि स्वप्रत्यक्षातिरिक्तत्वेन न कथमपि कल्पयितुं शक्यन्ते इति।

६–सन्ति च कतिपयानि तत्त्वान्यतिस्वल्पविचारगम्यानि यान्यात्मनि स्वयमुपस्थितानीव प्रतीयन्ते। तथाहि। व्योममण्डलगतानां तारकादीनां भूमण्डलगतानां च गृहवृक्षादीनामशेषाणां सांसारिकवस्तूनामात्मैकाधिकरणकत्वम्। तत्सत्तानां च तत्प्रत्यक्षीभूतत्वात्मकत्वम्। वस्तुविशेषस्यैकपुंव्यक्त्यज्ञातत्त्वे पुरुषान्तरात्मनिष्ठत्वं सर्वपुरुषाज्ञातत्त्वे तु तस्य सर्वथाऽसत्त्वं परमात्मनिष्ठत्त्वं वा आत्मनिरपेक्षपदार्थसत्ताया बाधितत्वाद्बुध्यगम्यत्वाद्वस्तुप्रत्यक्षी भूतस्त्वतोभेत्तुमशक्यत्वाच्च। तदेतेषां तत्त्वानां याथार्थ्यस्य दर्शनायेषत्स्वान्तावलोकनमेवालम्।

७–एवंच बाह्यप्रत्यक्षविषयाधिकरणत्वमपि सर्वद्रष्टुरात्मनोतिरिक्तस्य न कस्यापि संभवति। तादृशविषयाणां रूपरसगन्धादिगुणगणात्मकत्वाद्रूपादीनां च प्रत्यक्षानतिरिक्तत्वात्प्रत्यक्षादिवृत्तीनां चात्मातिरिक्ते कस्मिंश्चिज्जडेऽधिकरणेऽवस्थातुमशक्यत्वात्। अस्ति च ज्ञानानामद्रष्ट्रधिकरणकत्वं सर्वथा बाधितम्। ज्ञानवत्त्वस्य ज्ञातृत्वात्मकत्वात्। इत्थंच रूपरसादिद्रष्टुरेव तदधिकरणत्वेन योगाद्रूपादीनामधिकरणमात्मैव नतु तदतिरिक्तं किंचिज्जडात्मकमिति।

८–यत्तु कैश्चिदुच्यते यद्यानि वृत्तिज्ञानान्यात्मैकाधिकरणकानीत्युच्यन्ते तानि किंचिज्जडद्रव्यनिष्ठानां धर्माणां प्रतिबिम्बानि प्रतिमाभूतानि वा बोध्यानीति तदयुक्तम्। सधर्माणामेव पदार्थानां मूर्तिप्रतिमूर्तिभावस्य बिम्बप्रतिबिम्बभावादेर्वा संभवात्। नहि ज्ञानमज्ञानेन रूपमरूपेण वा सदृशं संभवति किंतु ज्ञानं ज्ञानान्तरेणैव रूपं रूपान्तरेणैव। विचारदृष्ट्या दृष्टे तु प्रतिमानप्रतिमेयभावोज्ञानेष्वेव प्रतीयते। किंचात्र जडद्रव्यवादिनःप्रतीदं तावत्पृच्छामोयत्तान्यस्मदनुभूतज्ञानप्रतिमानत्वेन कल्पितानि बाह्यद्रव्यनिष्ठानि वस्तूनि प्रत्यक्षयोग्यान्युत नेति। यदि योग्यानि तर्हि ज्ञानात्मकत्वमेव तेषामित्यस्मदिष्टापत्तिः। यद्रि नेत्युच्येत तर्हि लौकिकाननास्तावत्प्रष्टव्या यद्रूपस्य तदतिरिक्तेन किंचिददृश्येन कठिनमसृणादिस्पर्शस्य च केनचिदस्पर्शनीयेन वस्तुना सादृश्यं संभावयितुं शक्यते नवेति।

९–यच्च लोकपण्डितेन, गुणाः सांसिद्धिकनैमित्तिकभेदेन द्विविधाः। आद्यास्तु परिमाणाकारगतिस्थितिघनत्वसंख्या-

द्वयः । द्वितीयास्तु रूपरसगन्धस्पर्शादयः तत्र नैमित्तिकगुणानामात्माश्रितज्ञानविशेषात्मकत्वमेव नतु आत्मेतरवस्तुविशेषाश्रितगुणप्रतिमाभूतत्वम् । सांसिद्धिकगुणानां तु किंचिदनात्मभूतजडद्रव्यनिष्ठगुणप्रतिमात्मकत्वमित्युच्यते । तदप्यसत् । यतोहि ज्ञानस्य स्वसजातीयज्ञानान्तरेणैव सादृश्यस्य संभवात्प्रत्यक्षीभूतानां परिमाणाकारगत्यादीनां च प्रत्यक्षज्ञानात्मकतायाः पूर्वमेव प्रदर्शितत्वात्तेषां तत्प्रतिमानत्त्वेन कल्पितानां गुणान्तराणां चात्मैकाधिकरणकत्वमेव युज्यते नतु तदतिरिक्ताधिकरणकत्वमपीति जडद्रव्यरूपाधिकरणान्तरकल्पनं सर्वथा बाधितमेव ।

१०—किंचैवमपि रूपस्पर्शादिनैमित्तिकगुणानामेवात्मनिष्ठत्वं परिमाणाकारादिसांसिद्धिकगुणानां तु जडद्रव्यपरमाण्वाश्रितत्त्वं नैमित्तिकगुणप्रत्यक्षसहकारित्वं चैवेति वदतोपि लोकपण्डितस्य सांसिद्धिकगुणानामात्मैकनिष्ठत्त्वमेव गले पतति । तथाहि केवलानां मूलभूतसांसिद्धिकगुणानां नैमित्तिकगुणराहित्येन क्वाप्यनुपलम्भात्तत्साहचर्येणैव सर्वत्रोपलम्भात्तेषां नैमित्तिकगुणनित्यसंकद्धतया तेभ्योवियोक्तुं तथा चिन्तयितुं वाऽशक्यत्वात्तेषां तत्समानाधिकरणकत्त्वमेव सिद्ध्यति । नहि परिमाणगत्यादिशाली पिण्डविशेषो रूपस्पर्शादिनैमित्तिकगुणरहितः क्वापि संभवति तथा संभावयितुं वा शक्यते । सांसिद्धिकगुणमात्रविशिष्टस्य वस्तुनोबुद्ध्यगम्यत्वात् । परंतु नैमित्तिकगुणानामधिकरणमात्मैवेति नैसर्गिकगुणानामपि तदधिकरणकत्त्वमेव युक्तम् । एवंचोभयोरपि गुणभेदयोरात्मैकाधिकरणकत्त्वमेव प्रर्यवसीयते ।

११—एवमणुमहदादिपरिमाणभेदानां शीघ्रमन्दादिगतिभेदानां च सर्वत्रान्यसापेक्षकत्वादिन्द्रियशक्तिस्थितितारतम्यसिद्धत्वेन प्रतीयमानत्वाच्च गतिपरिमाणयोरात्मैकनिष्ठत्वमेव । नच जडद्रव्यनिष्ठेगतिपरिमाणे शीघ्रमन्दाद्यणुमहदादिसर्वविधविशेषशून्यएव स्यातामिति वाच्यम् । अणुमहदाद्यतिरिक्तस्य परिमाणस्य शीघ्रमन्दाद्यतिरिक्तायागतेश्चैवासंभवात् । यदि ते गतिपरिमाणे साधारणे एव स्तइत्युच्येतचेत्कथमिदमर्वाचीनविदुषां जडाधिकरणमतं सर्वात्मना शशविषाणोपमेयमभेद्यभेदज्ञानसिद्धान्तमेवाश्रयतीतिद्रष्टव्यम् । एवमेव प्राचीनाचार्यस्य आरिस्तुतिलस्य तदनुयायिनां च ग्रन्थेषु नितरामुपहास्यमनागतधर्माणामनागतमधिकरणं नाम शशविषाणान्तरमुपलभ्यते । एवंच परिमाणस्यात्माधिकरणकत्वमेव युज्यते । तुल्यरीत्या घनत्वस्याप्यात्मानतिरिक्ताधिकरणकत्वमेवबोध्यम् । अस्य परिमाणमन्तराऽवस्थातुमशक्यत्वाच्चित्यसंबद्धपदार्थानां वैयधिकरण्यस्य कल्पयितुमशक्यत्वात् ।

१२—एकैव व्यक्तिर्भिन्नभिन्ननिरूपकदृष्ट्या भिन्नभिन्नसंख्यावाचकपदाभिधेयाभवतीतिविचारयतस्सर्वेषां गुणान्तराणां कदाचिज्जडाधिकरणकत्वस्य संभवेऽपि संख्यायाः सर्वथामनोविलसितत्वादात्मनिष्ठत्वमेप स्फुटं प्रतीयते । तथाह्येकमेव परिमाणं हस्तवितस्त्यङ्गुलादिनिरूपकदृष्ट्या एक इति द्वे इति चतुर्विंशतिरिति चाभिधीयते । संख्या हि तथा परदृष्टि कृता परबुद्ध्यायत्ता वाऽस्ति यथा तद्विषये जडद्रव्याधिकरणवादोऽद्भुतमिव भासेत । यथाचोच्यते एकं पुस्तकमेकं पत्रमेका पङ्क्तिरिति । अत्रानेकपत्रपङ्क्तिवर्णादिरूपाण्यपि पुस्तकादीन्येकत्वेनैव प्रतीयन्ते । बुध्या यथेच्छपरिकल्पितपत्रादिज्ञानसमुदायगतैकत्वेनैव तेषां ग्रहणात् ।

१३—केचित्तु सर्वज्ञानानुगतममिश्रितमेकत्त्वस्य ज्ञानं मन्वते तदप्यपरे न क्षमन्ते । तथाहि । यद्येकत्त्वानुगुणं शुद्धं ज्ञानमात्मनि समभविष्यत्तर्हि तद्दुर्ज्ञेयं नाभविष्यत् । प्रत्युतास्य सर्वज्ञानान्तरानुगतत्वेन प्रतिपादनात्सुपरिचितानि मानसबाह्यप्रत्यक्षान्तराणीवानायासेनैवाज्ञास्यत । मया तु गाढविचारेणापि तन्नोपलभ्यते सोयं ज्ञानाभासोऽभेद्यभेदज्ञानविषयैव परिकल्पितइति सुधीभिः सर्वथोपेक्ष्य एव ।

१४—अपरं चात्रावधेयम् । अर्वाचीना विद्वांसोयपारीत्यारूपस्पर्शादिकतिपयधर्माणामात्मानतिरिक्ताधिकरणकत्वंसाधयन्ति तयैव परिमाणाद्यखिलधर्माणामपि तत्वं साधयितुं शक्यते । तथाहि । यदि तप्तैकहस्तः शीतापरहस्तश्च कश्चनोभावपि करौ युगपदेवानुष्णाशीतजले निमज्जयेत्तर्हि शैत्याक्रान्तहस्तेनोष्णतामौष्ण्याक्रान्तहस्तेन शीततां तज्जलस्यावगच्छेदितिपरस्परविरुद्धधर्माविशिष्टेपि जले तयोर्युगपत्प्रतीतेर्यथा शीतोष्णतयोरात्मैकाधिकरणकत्त्वं तैः स्वाक्रियते तथा परिमाणाकारगत्यादीनामपि बिम्बप्रतिबिम्बानात्मकात्मैकाधिकरणकज्ञानात्मकत्वमेव वक्तुं युक्तम् । तथाहिएकस्यैव वस्तुनः स्थानपरिवर्तने तेनैवात्मना सत्यसति वा तस्मिन्भिन्नभिन्नेनात्मना भिन्नभिन्नपरिमाणाकारकत्त्वेन ग्रहणात्तद्गतपरिमाणाकारयोर्द्रव्यान्तरनिष्ठनियतपरिमाणाकारविशेषप्रतिमात्मकत्वं वक्तुं न शक्यते । एवं रसोपि न कस्यापि जडद्रव्यस्य धर्मोभवितुमर्हति । मधुरत्वेन प्रतीयमानेऽपि खाद्यखण्डे समयान्तरे सर्वेषां ज्वरादिविकृतरसनवतश्च सर्वदा तत्कटुत्वस्यैवानुभवात् । तुल्यरीत्या गतिरप्यात्मनिष्ठैव । एकरूपायामपि गतावात्मगतज्ञानान्तरश्रेणिपरिवर्तने वेगवति तस्या माद्यं मन्यरेतु तस्याः शैघ्र्यमनुभूयते । 'यथा कौचित्पथिकौ भृशं संल्लायासक्तौ महान्तमध्वानमतिक्रम्याऽपि न तथा स्वगतिमनुभवतो यथा स्वगमने एव कृतावधानौ' ।

१५—किंबहुना यदि कोपि रूपरसयोरेवात्माधिकरणत्वस्य साधकत्वेन प्रसिद्धान्सर्वस्वीकृतांश्च हेतुवादान्सुनिपुणं विचारयेत्तर्हि तैरेव हेतुभिराकारपरिमाणगतीनामप्यात्मैकाधिकरणकत्वं साधितं पश्येत् । यद्यप्युक्तसाधनकलापेन रूपपरिमाणादीनां जडद्रव्यनिष्ठत्वस्याऽतीन्द्रियत्वमेव नत्वसत्वं स्पष्टं प्रतिपाद्यते तथापि रूपादीनामखिलेन्द्रियग्राह्यधर्माणामात्मेतरद्रव्यात्मकाधिकरणस्य बाह्यजडद्रव्यस्य वाऽसंभवस्य प्रतिपादनात्तेषां सर्वथा जडद्रव्याधिकरणकत्वाभावएव पर्यस्यति ।

१६—अथ लोकप्रसिद्धमनात्मरूपमधिकरणं तावत्परीक्ष्यते। यत्र परिमाणादयो जडद्रव्यनिष्ठागुणा धर्मा वा येच तेन द्रव्येण धार्यन्त इत्युच्यते । तत्रेदं जिज्ञासामोयज्जडद्रव्यस्य परिमाणधारणमित्यनेन किमभिप्रेयते। ननु तादृशद्रव्यस्य प्रत्यक्षरूपेण ज्ञानविरहात्तद्व्याख्यानं कर्तुमशक्यमितिचेन्नैवम् । जडद्रव्यपदस्य सार्थकत्वे येन केनापि प्रकारेण साक्षात्परंपरया वा तदर्थज्ञानस्यापि संभवात् । तद्वस्तुस्वरूपज्ञानाभावे परिमाणादीनां कस्तेन संबन्धः कथं च तत्स्वपरिमाणादिधर्मान्धारयतीत्यादिकं तावज्जडद्रव्यवादिनाऽवश्यं ज्ञेयम् । नात्र द्रव्यस्य गृहस्तम्भादीनां गृहधारणमित्यादिवद्गुणधारणं विवक्ष्यत इति तु स्पष्टमेव। किं तर्हि जडद्रव्यस्य धर्मधारणं किंवाऽनात्माधिकरणमित्यनेनाभिप्रेयते इति पूर्वःपक्षः ।

१७—अत्र यथार्थशब्दार्थव्याचक्षाणा अपि शास्त्रिणोऽनात्माधिकरणपदार्थे रूपपरिमाणादिधर्माणामाश्रयीभूता साधारणसत्तेत्येतावतैव लक्षयन्ति तत्र साधारणसत्ता तु परमोत्कृष्टाभेद्यभेदज्ञानात्मकत्वात्सर्वथाऽचिन्त्यैव । धर्मधारणपदेनापि न स्तम्भकृतगृहधारणमिव धर्माणां धारणमितिलौकिकार्थो विवक्ष्यत इति पूर्वमेवाभिहितम् । तथा च तादृशपदार्थः कोप्यपरोवक्तव्यस्सचानात्माधिकरणवादिनामप्यविदित इत्यनात्माधिकरणलक्षणघटके उभेअपि विशेषणे अनिर्वाच्ये वरमर्थशून्ये एव भासेते इति निरर्थकलक्षणलक्षितं लक्ष्यमप्यलीकमेव । आ किमिति वयमस्याधिकरणस्य खण्डने सुनिर्भरं प्रयतेमहि । तस्य सत्तात्मकत्वेन स्वीकारात्तस्याश्चात्मबहिस्थत्वस्य स्वत एव व्याहतत्त्वात् । (ज्ञानरूपायाः सत्ताया अनात्मनिष्ठत्वं सूर्ये न तेज इति वद्बाधितमिति भावः) ।

१८—किंवास्मदनुभूतघटपटादिज्ञानप्रतिमानभूतानां गत्याकारपरिमाणादिमदनात्मभूताधिकरणानां क्वचित्संभवेपि कथं नाम तानि ज्ञायेरन् । ज्ञानं तूभयथैव संभवति । ऐन्द्रियकमानुमानिकं वा । न तावदत्राद्यं संभवति । इन्द्रियाणां तु साक्षात्स्वसन्निकर्षवतां वस्तूनां वृत्तीनां प्रत्यक्षाणामेव वा ज्ञापकत्वात्त्वनुभूतज्ञानसमानगुणान्तरानात्मभूताधिकरणविशेषाणामपि। इदंचानात्माधिकरणाभिमानिनामप्यनुमतम्। नाप्यन्त्यम् । दृश्यज्ञानानामज्ञातसत्तानुमापकहेतुताया असंभवात् । ज्ञानाज्ञातसत्तयोर्नियतसंबन्धस्य तादृशसत्तावादिभिरप्यनुक्तत्वात् । वयं त्वेवं ब्रूमः । स्वप्नोन्मादवाय्वादावन्यदाऽनुभूतानामखिलानां ज्ञानानां स्वसदृशगुणसमवाय्यधिकरणान्तरासमवधाने एवात्मनि संभवस्य सर्वसंमतत्वाच्च ज्ञानोत्पत्तये आत्मबाह्यपिण्डान्तरसद्भावावश्यकता वक्तुं शक्यते । समयविशेषे बाह्यपिण्डं विनैव ज्ञानोदयस्य सर्वानुमतत्वात्समयान्तरेपि तथैव तदुदयस्य कल्पयितुं युक्तत्वात् (संदिग्धस्य विवादाक्रान्तस्य वा स्थलस्यासंदिग्धनिर्विवादस्थलेनैव निर्णये सामञ्जस्यात्)

१९—ननु बाह्यपिण्डसत्तामन्तरैव स्वप्नावत्प्रत्यक्षज्ञानसंभवेऽप्यन्यविधया तदुदयवर्णनमपेक्ष्य ज्ञानबिम्बभूतबाह्यपिण्डसद्भावकल्पनया तद्वर्णनं सुकरं स्यादित्येतदर्थमेव प्रत्यक्षप्रयोजकाः पिण्डाः संभाव्यन्तामितिचेत्तदपि न शक्यते वक्तुम् । अनुमतेष्वपि बाह्यपिण्डेषु तदभिमानिनामपि ज्ञानोत्पत्तिप्रकारवर्णने तथैवाक्षमत्वात् । यथात्मनि बाह्यपिण्डानां प्रत्यक्षज्ञानोपस्थापकता तथा नास्माभिर्ज्ञातुं वर्णयितुं वा शक्यत इति स्वाऽसामर्थ्यस्य तैः स्वयमेव स्वीकृतत्वात् । एवंच बाह्यपिण्डस्वीकारे तदस्वीकारे च ज्ञानोत्पत्तिप्रकारानिर्वचनीयतातादवस्थ्यात्प्रत्यक्षज्ञानसत्तयाऽनात्माधिकरणसत्ताकथमप्यनुमातुं न शक्यते । एवं स्थितेऽपि यदि शपथैकवेद्यानां तादृशाधिकरणानां संभवः स्यात्तथापि निष्कारणं तत्राभिनिवेशो न कस्यापि युक्तः । अन्यथा तस्य स्वैरवृत्तित्त्वं व्यक्तं प्रतीयेत । जगत्स्रष्टरीश्वरे सर्वथानिरूपयुक्तानन्तानन्तवस्तुस्रष्टृत्त्वं च विधेयं स्यात् ।

२०—बाह्यपिण्डानां ज्ञानं तु सुतरामसंभाव्यमेव किंबहुना तेषां संभवेऽपि न केनापि प्रकारेण प्रतिपादयितुं शक्यते । तत्साधकत्वेन चिन्तितानां हेतूनां स्वसाध्यबाधाबाधयोः सममेव संभवात्स्वसाध्यव्यभिचारित्वात् । तथाहि । स्वप्नादौ बाह्यपिण्डानामसत्व एव तथैव व्यक्तानि क्रमिकाणि च प्रत्यक्षाणि जातु जन्यन्ते यथा येन च क्रमेणाऽन्यदासंभवन्तीति तु सर्वानुभवसिद्धम्। तत्रेदं द्रष्टव्यं यज्जाग्रदवस्थायां यैर्हेतुभिः प्रत्यक्षप्रयोजकानां बाह्यपिण्डानां सत्ता साध्यते ते स्वाप्निकप्रत्यक्षकालेप्युपलभ्यन्त एवेति साध्याभाववत्यप्यधिकरणे हेतूनां संभवात्तद्व्यभिचारित्वं स्पष्टमेवेति सर्वस्यापि बाह्यपिण्डसद्भावप्रतिपादकहेतुवादस्य वैकल्पमेव बोध्यमिति दिक् ।

केशवशास्त्री मराठेपाह्वः

ADVAITA-MAKARANDA.[1]

A SUMMARY OF THE VEDÁNTA SYSTEM, BY LAKSHMÍ-DHARA,

WITH THE COMMENTARY OF SVAYAM-PRAKÁŚA.

The Commentator's proëm.

According to revelation, argumentation, and the testimony of consciousness, I am the eternal absolute spirit, unintermitted beatitude, made of intelligence, void of fear, without duality.

I adore Śiva who wears the lunar digit, whose side is clasped by Ambâ; the ocean of the waters of tenderness, whose form is sweet with beauty.

The sun-like pollen of the lotus-feet of Kaivalyânanda, prince of mystics, shines in the sky of my heart, dispelling the gloom of illusion.

I resort to the twin lotus-feet of Suddhânanda, from which springs the juice of extinction which his disciples like swarms of bees delight in tasting.

Certain princes of mystics, existence, intelligence, beatitude, prevail in the world, through a measure of whose kindness, I have crossed the ocean of transmigratory being.

Commentary.

I. A certain great thinker, Lakshmîdhara by name observed certain excellent persons desirous of emancipation in consequence of the discriminative knowledge, dispassion, and self-subjugation generated by the purification of their intellect by their unremitted observance of constant and occasional duties, who for desire to know the soul had renounced the customs of society and of the Veda, and who, though they had duly heard the principles of the Vedânta by resorting to the feet of good instructors, yet were dissatisfied, because recognising an obstruction they did not see the possibility of emancipation. His compassion excited he begins to compose a sectional treatise entitled the Nectar of Monism, with the purpose of enforcing by arguments clearly, as if he were contemplating a vilva-fruit held in the hand, that the supreme spirit set forth in the Vedânta, the spirit which is existent, intelligence, beatitude, omniscient, the material cause of all things, eternal, omnipresent, without duality, the witness of the body, sense organs, vital airs, common sensory, understanding, sense of personality, is naught else than the self-conscious soul. In order to complete the work in hand without hindrance, while himself practising the auspicious initiative which consists in the citation of his chosen tutelary divinity, he composes one in the text for the edification of his disciples, as follows :—

Text.

(1) Glory to the infinite beatitude Kṛishṇa, whose embodiment is auspicious to the worlds, who with the rays of his glance evaporates the ocean of illusion in his worshippers.

Commentary.

Glory to him by whom the ocean of illusion or false persuasion in his worshippers is evaporated or dried up, with the ray or splendour of his glance or look of kindness thrown obliquely on those devoted to him. Illusion is aptly compared to an ocean, as being impassable to those who have not the grace of the Lord the great teacher, as having successive illusions for its billows, and as being infested by passions and the like huge leviathans. Glory be to the infinite beatitude Kṛishṇa; infinite, as free from limitation by time, space, and things; and beatitude, as having bliss for his essence, to the infinite beatitude Kṛishṇa; to him who is at once infinite beatitude and Kṛishṇa, to the son of Vasudeva. Glory be to him whose embodiment is auspicious to the worlds, to him whose body causes increase of joy to the three spheres. By the phrase *Whose embodiment is auspicious to the worlds* it is declared that he is able to cast out the hindrances which militate against the highest end of man in this life and the next, for such is the character of the auspicious.

II. The author, after having by an auspicious proëm thus performed, and consisting of a doxology to his tutelary divinity, destroyed all obstacles, proceeds to enforce the truth that the self-conscious spirit is the absolute, as is indicated in *That art thou* and other significant texts.

Text.

(2) I am, I appear at all times, I am not ever unbeloved: hence it is evinced that I am the absolute spirit which is existent, intelligence, and bliss.

Commentary.

I, the witness of the sense of personality and so forth, am, that is, am existent; inasmuch as I bestow a kind of being upon the sense of personality and other such unreal modifications illusorily attributed to soul. I appear at all times, that is I appear in the three states of being. In waking I am manifested, or shine forth, as the witness of the body, the sensitive and active organs and so forth; in sleep, as the witness of the world of ideas in the internal organ; in dreamless slumber, as the witness of illusion. Not ever, not even at any time, not even in the time of suffering, am I unloved,

[1] *Advaita-makaranda* can hardly be translated. The Flowery Sweets of the Undifferenced, or the Nectar of the Absolute, would appear absurd in English.

For the original text of this very simple exposition of Indian acosmism, the reader is referred to the edition of Pandit Bechana-râma Śarmâ, published in the 'Paṇḍit' of June 2, 1873, pp. 9. sqq.

am I undesired; but am always loved, and only loved. For as regards pain we have no aversion from the pain of an enemy, only because enmity is caused by love of self. As an object of love in its highest intensity, I am made of bliss. As not undergoing sublation in trinal time, I am made up of being. As illuminating objects, I am intelligence. I am therefore the absolute spirit characterised by being, thought, and joy, composed of the existent, of intelligence, and beatitude. There is here implied the inference: The self-presented self is nought else than absolute spirit, because it consists of the existent, intelligence, and beatitude, like the absolute spirit. The middle term of this inference cannot be said to want confirmation, inasmuch as it is established by the fact that I am, &c.

If any one object that this inference is contradicted by the presentative datum that I am not God; we reply, that the fact that the soul is absolute spirit cannot in the first place be contradicted by external perception, for the soul being void of colour and other sensible qualities, external perception cannot operate about it; nor, in the second place, can it be contradicted by internal perception, for the internal sensory cannot operate about the soul or self which is the witness of the internal sensory.

Again, if any one urge that the argument that individual soul and the divine spirit are different, as supporting the diverse attributes of parviscience and omniscience, as fire and frost are different, and similar inferences are opposed to the inference above; we reply that the rule that differently determined things are different would apply be excessive extensiveness to an image and its reflection, and to the ether which (though acknowledged to be one) is the of sounds loud and soft.

Again, if any one object to us that our inference is contradicted by the such texts as Two birds &c. This we deny, for such cannot be the purport of the text, such a sense being sublated by That art thou, and other texts.

The thought, therefore, that I am not God is an illusion caused by the body and the like accompaniments (of the soul); and does not regard the nature of the individual soul. It has accordingly been said: When thou and I are considered, to one who looks upon my outside frame I am more insignificant than a gnat; but, lord of the universe, thy fulness of being, thought, and joy, and mine, are the same.

I, therefore, am absolute spirit only.

III. The author starts a doubt: The absolute spirit according to such texts as All-knowing, all-wise, is understood to be omniscient; and according to such texts as Or from which, is understood to be the material cause of the whole universe: whereas the individual spirit does not entirely know its own organism, and cannot of itself do anything; how then can the individual spirit be naught else than absolute spirit, omniscient, and the material cause of all things. He proceeds to show how both these attributes, omniscience and universal causality, may belong to the individuated soul.

Text.

(3). In me, in the sky of intelligence, arise the world's fairy castles:[2] how then am I not absolute spirit, all-knowing, cause of all?

Commentary.

In the sky of intelligence, in the heavens of consciousness, in me, in the self-presented self, arises the world's fairy castle, the universe itself a castle in the air. A fairy castle, or city of the Gandharvas is a city made to appear in the clouds by the illusions projected by a magician, in the enveloping state of illusion. The meaning is as follows. Of an unreal object the spectator alone is the material cause; as the material cause of the world of a dreamer is the dreamer who witnesses it, so the whole waking world being unreal, as being seen, that which sees it, the self-presented self, is to be declared its material cause. Therefore it has been said: As this world of dreams in me is projected by illusion, so the waking world in me is projected by illusion. It results that omniscience, consisting in the vision of the universe, and universal causality, consisting in being the substance underlying that universe, pertain to the self-presented self.

You may say: How is the self-presented self the seer of mount Meru and other objects separated by a long distance and invisible to us? We reply: Hearken then to a mystery. Meru and other objects are recollected as determinants of that state of ignorance which is expressed in the form All this while I have not known Meru and the rest. Now this recollection, as being impossible unless we have had actual knowledge of Meru, supposes an actual knowledge of Meru and the rest. As the sense organs &c. could not have operated in this case, we must affirm an actual knowledge of Meru and the other objects as illusorily superposed upon the consciousness of self-presented self. That which underlies the illusorily superposed is a substantial cause; and thus the self-presented soul, though not actually cognising Meru and the like objects, is yet their witness, and their substantial cause. Conformably it has been said in the Brahma-gîtâ: In a form cognised, or in a form not cognised by the witness, all appears; then it shines forth thence pervading it at all times.

[2] Literally cities of the Gandharvas.

The self-presented self then knows all and is the cause of all; for which reason in the aforesaid manner I am also the cause of all things; why should I not be absolute spirit which is that cause? I am.

IV. The author next starts the following difficulty The absolute spirit is revealed in such texts of the Upanishads as, Everlasting, pervading, omnipresent, most subtile, to be eternal; while the soul or self, as subject to death and other conditions, is known to be non-eternal: they cannot therefore be identical. He then proposes three alternatives: (1) Do you conformably to the Buddhist view affirm that the soul of itself ceases to be; or (2) do you affirm its cessation as consequent upon conjunction with something else, as a water-jar is destroyed by the concussion of the potter's staff; or (3) do you affirm its cessation as resultant from the destruction of its substratum, as the colour and other characters of a piece of cloth cease upon the cessation of the cloth? To the first alternative he replies in the words *not of itself*.

Text.

(4.) Destruction of me cannot be of itself, because of recognition; nor from anything else, because I am without parts; nor from destruction of substratum, because I do not inhere in anything.

Commentary.

There is no destruction of me, that is, of the self-conscious self. The reason of this is—because of recognition, that is, because soul undergoes recognition. Recognition is cognition at a subsequent time of the formerly experienced, through suggestion of such former experience, accompanied with assurance. For example in such thoughts as I who in childhood knew my parents now in old age know my great-grandchildren, I who while asleep had a dream am now waking, the same self is recognised in childhood and old age, and in the sleeping and waking states. Now this recognition cannot be accounted for, if we suppose the soul to cease without any determinant. So again if the soul be said to perish of itself, we must assert that there is at each moment another self; and how could one recognise another as its own self. But the soul does recognise that it is itself, and therefore it cannot cease of itself.

The author redargues the second alternative, in the words *Nor from any thing else, because I am without parts.* The soul is not destroyed in consequence of conjunction with any foreign cause, because it is without parts, a simple entity; for the self, as consisting of intelligence, is simple. If you affirm that the soul, consisting of intelligence is composite, we ask: Are the portions of the soul intelligent or unintelligent? The former alternative cannot be true: for if the portions of the soul were severally intelligent, they would entertain contrary purposes, and the organism would be torn to pieces. The latter alternative must equally be rejected: for if the soul were composed of unintelligent portions, it would follow that the soul itself would be unintelligent. A piece of cloth, for instance, which is composed of unconscious threads, is not seen to be conscious. The self therefore is simple. The self if, simple, does not admit of conjunction with an exterior determinant, for this would have to connect itself with some portion. The soul therefore is not destructible from without.

The author redargues the third alternative in the words *Nor from destruction of substratum*. Destruction of the ego cannot result from destruction of its support or substratum. Why? Because it has no support or substratum. For the soul being neither quality, nor action, nor universal, nor any like thing inheres in nothing. Nor, as simple, does it require a support (or principle of unification) such as that of a water-pot (of which the whole is regarded as the support of the parts.) Neither, therefore, from destruction of substratum, can there be any destruction of soul. The supposition that the self dies is an illusion occasioned by its concomitant the body. The author of the Vedânta aphorisms has accordingly said: The movable and immovable do not apply thereto, the attribution of them thereto is tropical, because it is that which exists under these modes. The sense of this aphorism is exhibited by the sacred teacher Vidyâraṇya or Mâdhavâchârya in the Adhikaraṇa-ratna-mâlâ, as follows:—He first states the *primâ facie* question: The birth and death of the individual belong either to the body or to the soul, for there are the saying There is born to me a son, and the ceremonial at birth. He next lays down the established tenet: Birth and death pertain primarily to the body, and by a metaphor only to the soul: and the rites at birth and the common saying do not pertain to the individuated soul, according to our system.

The soul being eternal, as being exempt from the three kinds of destruction, it is quite competent to hold that it is naught else than absolute spirit.

V. The author proceeds to treat in detail the second proposition, *viz.*, that the soul is not liable to destruction from any cause external to itself.

Text.

(5.) The sky of my consciousness cannot be dried up, burnt, washed away, or cut asunder, by real, how much less by imaginary, wind, fire, water, or weapons.

Commentary.

The sky of my consciousness, the heaven of my intelligence, cannot be dried up, as leaves and fruits are

dried up, by wind. Nor can it be burnt, as a piece of cloth is consumed, by fire. Nor is it washed away by water or rain like the crops in a field. Nor is it cut asunder, cleft in twain by a weapon, as a sugar cane with a knife. For the soul, being like ether a simple principle, is insusceptible of conjunction with wind &c. Sky or the ethereal element which is practically existent, as simple and therefore not admitting of contact, is not susceptible of being dried up or otherwise affected by wind and the other agents as above, though they are equally actual with ether; how much more must we affirm that exsiccation by means of air and the other agents which as imagined by illusion are unreal, cannot affect the soul which is really exempt from duality and from contact with aught beyond itself? Conformably the Lord has said: Not to be cut is this, nor to be burnt, not to be wetted nor to be dried; eternal, omnipresent, stable, immovable, everlasting (Bhagavad-gîtâ II. 24.)

VI. Here the author anticipates the objection: The self-presented self is cognised as limited, from such assurances as that I am here; whereas absolute spirit, according to such texts as Eternal, all-pervading, is omnipresent; self therefore is not absolute spirit. He therefore proceeds to enforce the omnipresence of soul by argumentation.

Text.

(6.) Cognition of the universe which is a reflection would never be competent, but for the proximity of a light: and I am that light, and consequently, omnipresent.

Commentary.

Cognition of the universe or manifestation of the world, which is a reflection, that is, unconscious, unsentient, would not be competent at any time, but for the proximity of a light, that is, without some connection with intelligence. I, the self-presented self, am a light, consist of consciousness. The self-presented self, therefore, as illuminating the whole unsentient world, is ubiquitous; in other words, I am omnipresent. The solar and lunar orbs distant innumerable leagues, the pole-star and other stellar bodies yet more remote, derive their light from the self-presented self. This irradiation of those unsentient objects cannot arise from themselves, but must be ascribed to the force of their connection with the intelligence of the soul which is self-illumined; as we see a water-jar and the like objects, which are of themselves void of light, illumined by force of connection with a self-illumined lamp or other luminary.

Now if the self-presented soul remained on this spot, how could it be connected with the pole-star and the rest? The self-presented self, then as illumining the pole-star and the rest, is omnipresent; and the supposition of its limitary nature is accounted for as an illusion arising from the accessories which bring the soul into manifestation. It is therefore said in the Brahma-gîtâ: This world which consists of the unconscious cannot of itself shine forth; it is only by its connection with intelligence that it shines, and in no other wise. The limitary appearance of soul arises only from the limitation of its manifestants, not essentially; in truth, it consists of intelligence, and is all-pervading.

The individuated soul is, therefore, naught else than absolute spirit.

VII. Here some one may say: The identity of the the individuated soul with absolute spirit is absurd, inasmuch as there is no evidence of the existence of absolute spirit. For absolute spirit is defined to be a thing free from limitation by space, time, and things; and this is an impossibility, for there is nothing to evince such absence of limitation by things, since time, ether, &c. exist, ulterior to spirit. Nor, such a one would continue, should you assert that ether and the like, as illusorily superposed upon absolute spirit, are unreal, and therefore not ulterior thereto; for there is no proof that ether and the rest are thus illusorily superposed. Nor, he would furthermore say, should you allege that the text From spirit ether sprang, is proof of this; for from this text it appears only that ether and the rest are emanations from absolute spirit.

In anticipation of this objection, and to prove that there is naught ulterior to absolute spirit, the author proves that ether and the rest are illusorily superposed.

Text.

(7.) For not without illumination is there existence, nor without consciousness is there any illumination of the unconscious; nor without illusory superposition is there any connection with consciousness: therefore I am exempt from duality.

Commentary.

Without illumination or irradiation there is no existence of an object; as we do not see any existence to belong to the horns of a hare and the like chimerical things which are unillumined. What follows from this? The author replies Nor without consciousness, that is, without connection with intelligence, is there any illumination of the unconscious or unintelligent; for were it possessed of illumination in itself, it would not be unconscious. What further follows? To this he replies, the connection of the unconscious with the conscious is not possible without illusory surmisal, that is, in the absence of illusory superposition upon consciousness.

A. E. G.

PRINTED AND PUBLISHED BY THE PROPRIETORS, E. J. LAZARUS AND CO. AT THE MEDICAL HALL PRESS, BENARES.

काशीविद्यासुधानिधिः

श्रीगणेशाय नमः

श्रीमद्विजयिनीदेवीपाठशालोदयोदितः । प्राच्यप्रतीच्यवाक्पूर्वापरपक्षद्वयान्वितः ॥ १ ॥
अङ्कुरश्मिः स्फुटयतु काशीविद्यासुधानिधिः । प्राचीनार्यजनप्रज्ञाविलासकुमुदोत्करान् ॥ २ ॥

THE PANDIT.

A Monthly Journal, of the Benares College, devoted to Sanskrit Literature.

No. 90. Benares, November 1st, 1873. Vol. VIII.

॥ चिन्तामणेः शब्दखण्डम् ॥

क्वचि(१)द्योगार्थान्वयसंभवेपि रूढिपूर्विका लक्षणा । यथा मण्डपं भोजयेत्यत्र रूढ्यर्थगृहविशेषस्यान्वयायोग्यत्वाद्रूढ्यर्थगृहसंबन्धिजनज्ञानं लक्षणया मण्डपपदेन क्रियते, न तु योगान्मण्डपानकर्तुरिति मीमांसकाः । (२) ननु रूढिपूर्विका लक्षणा न युक्ता । श्रौतार्थपरत्व संभवति लक्षणाया अन्याय्यत्वात् । रूढ्या योगापहारान्न मुख्यतेति चेन्न । अपहारो हि न यौगिकार्थास्मृतिः, स्मारकसंबन्धस्य शक्तेरूढ्यर्थइव यौगिकेपि सत्त्वात् । नापि योगार्थस्य प्रथममस्मृतिः, यदैव हि समुदायेन स्वार्थस्मरणं तदावयवैरपि स्मारकसमुदायज्ञाने ऽवयवज्ञानामपि विषयत्वात् । प्रत्युतावयवैरेव शीघ्रं स्वार्थस्मरणम्, (३) अवयवज्ञानपूर्वकत्वात् समुदायज्ञानस्य, विलम्बेपि यदा रूढ्यर्थेन लक्षणया स्वार्थसंबन्धिस्मरणं तदा यौगिकार्थस्मरणं वाच्यं, तथा चौत्सर्गिकान्वयाभिधायकत्वानुरोधाद्यौगिकार्थान्वयावबोधो ऽस्तु । नापि स्मृतस्याप्यवयवार्थस्यान्वयबोधबहिर्भूतत्वमपहारः । योग्यतादिबलादवयवार्थस्यान्वयबोधः स्यादेव । न तु रूढ्यर्थस्य,योग्यत्वात् । नापि लक्षणया स्मारितस्यार्थस्य, (४) लाक्षणिकस्यानभिधायकत्वात् । (५) अथ मण्डपशब्दस्य गृहविशेषे प्रयोगदर्शनादवयवशक्त्या च तदनिर्वाहात्तत्र समुदाये शक्तिकल्पना । तथा च मण्डपानकर्तरि सत्यपि योगे प्रयोगादर्शनात्तत्रावयवशक्तिकुण्ठनमपि कल्प्यं, कार्यानुरोधित्वात्कल्पनायाः । अन्यथा ऽनेकार्थरूढाक्षादिपदादिव क्व चिन्मण्डपानकर्तुरप्यवगमः स्यात् । बहुव्रीहौ समुदायशक्तावपि नावयवशक्तीनां कुण्ठनम्, । अवयवार्थे लम्बकर्णादौ प्रयोगप्राचुर्यात् कुण्ठनस्य प्रयोगाभावकल्प्यत्वात् । एवं च मण्डपादिपदे ऽवयवशक्तेः कुण्ठितत्वात् रूढ्यर्थस्योपस्थितस्य परम्परयापि वाक्यार्थप्रतीत्यन्वयाय तत्पूर्विका लक्षणेति चेत् । न । (६)तप्ते पयसि दध्यानयति सा वैश्वदेव्यामिक्षा वाजिभ्यो वाजिनमित्यत्रामिक्षाया (७) उत्पत्तिशिष्टत्वेन विश्वदेवदेवताकत्वं, वाजमन्नमामिक्षारूपं तद्येषामस्ति ते विश्वे-

॥ शब्दचिन्तामणिव्याख्या रुचिदत्तीया ॥

(१) योगार्थान्वयसंभवेपीति । तथा चान्वयानुपपत्तिरेव लक्षणाबीजमित्यभिसन्धिः । प्रसङ्गादिदमुक्तमित्यन्ये । नैयायिकः शङ्कते । (२) नन्विति । (३) अवयवज्ञानपूर्वकत्वादिति । यद्यपि समूहालम्बनस्मृतौ न तत्पूर्वकत्वं तथापि पूर्ववर्णानामुत्तरवर्णानुभवविषयत्वमभ्युपेत्येदमुक्तम् । (४) लाक्षणिकस्येति । तथा चौत्सर्गिकं पदानामन्विताभिधायकत्वं भज्येतेति भावः । मीमांसकः शङ्कते । (५) अथेति । प्रयोगस्यादर्शनादिति, पराभिमानः । अवयवमात्रव्युत्पन्नस्य तत्प्रयोगे बाधकाभावात् । प्रयोगप्राचुर्याभावमभ्युपेत्येदमित्यन्ये । आमिक्षाधिकरणविरोधमाह । (६) तप्तइति । (७) उत्पत्तीति । आमिक्षायागोत्पत्तिवाक्यप्रतिपादितत्वेन । द्रव्यदेवतासंबन्धप्रतिपा-

देवा एवेति (८) चतुर्थ्यन्तवाजिपदाद्योगेनामिक्षारूपान्नयोगिनां विश्वदेवानामुपस्थिते (९) र्वाजिनस्यापि विश्वदेवदेवताकत्वमेव। ननु वाजिपदाद् रूढ्योपस्थितानामश्वानां वाजिनदेवतात्वमिति सिद्धान्तः स न स्यात्, रूढ्यायोगापहारादश्वानामेव तत्र देवतात्वापत्तेः। नह्यत्र लम्बकर्णादिवद्वाजिपदस्य विश्वदेवेषु प्रयोगप्राचुर्यमस्ति। अथान्वयप्रकारो विभक्त्योपनीयते। सा च यतः समभिव्याहृता तस्यान्वयं बोधयति। विभक्तिश्च समुदायात्। अतः समुदायोपनीतस्य (१०) रूढ्यर्थस्यैवान्वयबोधो नावयवोपनीतस्येति चेत्। न। पङ्कजनिकर्तुरिव मण्डपानकर्तुरप्यन्वयबोधसंभवात्। नन्ववयवार्थानां परस्परमन्वयो योग्यतादिसापेक्षतया विलम्बितः रूढ्यर्थधीस्तु न तथेति चेत्। अस्तु तावदवयवार्थस्यान्वयधीर्विलम्बिता न तु स्मृतिरूपापि सा तथा, सा चान्वयबोधोपयोगिनी। एवं च यथा पङ्कजमानयेत्यत्र प्रथमं डार्थवाक्यार्थान्वयधीः, ततस्तदन्वितजन्म धीः, तदनु च परम्परया तथाभूतजन्मनि पङ्कपदार्थान्वयधीः, कार्यान्वितव्युत्पत्त्यनुसाराद्, न तु सिद्धपङ्कजन्मकर्तृत्वानां प्रथममन्वयधीः तथा मण्डपादिपदे ऽप्यस्ति। यदि च सिद्धार्थेप्यन्वयधीर्योग्यतादिवशात्तदा रूढ्यर्थावयवार्थानां स्मृतावयवार्थान्वयबोधसंभवात्। रूढ्यर्थान्वितबोधस्येतरपदात्तदर्थस्मरणाकाङ्क्षायोग्यतादिज्ञानसापेक्षतया विलम्बितत्वात्। अथ यावत्सु वर्णेष्वेका शक्तिस्तावतां वर्णानां स्मृतिरप्येकैव कार्यबलात्कल्प्यते। अत एकदा स्मृतसमुदायनिष्ठशक्तिस्मृतिः शीघ्रा, अवयवशक्तीनां तु स्मृतिविच्छेदेयकतिचिद्वर्णस्मृताविति विलम्ब इति चेत्। न। यथा हि मण्डपसमुदायगोचरैका स्मृतिस्तथा मण्डादिपदविषयापीति न कश्चिद्विशेषः, अतः कथं योगाद् रूढेर्बलवत्त्वमिति। (११) उच्यते। यदा मण्डपपदाद्गृहविशेषस्मृतिस्तदैव मण्डार्थोपस्थितिः। (१२) तदुत्तरं पिबत्यर्थस्य तदनन्तरं प्रत्ययार्थस्य ततो मण्डपानकर्तृत्वेन (१३) ज्ञातस्य स्मृतिः, तदेवं रूढियौगिकयोर्बलाबलं शीघ्रविलम्बितधीकृतमेव। तथा च रूढ्यर्थस्य शीघ्रोपस्थितत्वाद्बलवत्त्वमौत्सर्गिकम्। (१४) यत्र तु प्रकरणादिना यौगिकार्थस्य शीघ्रं धीविषयता तत्र रूढेर्योग एव बलवान्। यथा ऽग्निर्वसुभिः सोमो रुद्रैरिन्द्रो मरुद्भिर्वरुण आदित्यैर्बृहस्पतिर्विश्वैर्देवैरित्यत्र विश्वदेवपदाद्योगेन सकलदेवप्रतिपादकात्प्रकरणवशेन (१५) सन्निहितवसुरुद्रमरुदादित्यरूपसकलदेवतानां शीघ्रं बुद्धिस्थता, प्रकरणादवयवार्थे संस्कारोद्बोधात्। न तु पुरूरवोमाद्रवः प्रभृतिषु गणेषु रूढादपि विश्वदेवपदात्तेषां धीः। एवं सा वैश्वदेव्यामिक्षा वाजिभ्यो वाजिनमित्यामिक्षारूपार्थस्योत्पत्तिशिष्टविश्वदेवदेवताकत्वं ज्ञातं वाजिभ्य इति चतुर्थ्यन्तपदादश्वे रूढादपि वाजमन्नं तदस्यास्तीति व्युत्पत्त्या वाजनामकामिक्षारूपकान्नयोगिनां विश्वदेवानां च प्रकरणात् शीघ्रमुपस्थितिर्न च रूढ्याश्वानां, तेन वाजिनस्यापि विश्वदेवदेवताकत्वं प्रतीयते। ननु रूढेर्बलवत्त्वादत्रापि रूढ्यर्थधीरेव स्यादिति

दकवाक्यस्यैवोत्पत्तिवाक्यत्वादिति भावः। (८) चतुर्थ्यन्तेति। तद्धिते चतुर्थ्यां वा देवतानुशिष्टप्रत्ययत्वस्य तुल्यत्वादिति भावः। (९) वाजिनस्यापीति। क्षीरसारपानीयस्यापीत्यर्थः। अन्योद्देशप्रवृत्तकृतिसाध्यतया क्व नाश्यतां क्व दूष्यतामित्याकाङ्क्षायां देवतान्तरकल्पने गौरवादुपस्थितानामेव विश्वदेवानां योगेन वाजिपदादुपस्थितानां देवतात्वं कल्प्यतइति सिद्धान्तो, ऽत एव वाजिनापचारे न पुनस्तदुत्पादनप्रयत्नस्तस्याशास्त्रार्थत्वात्। आमिक्षोत्पादनस्य विनियुक्तत्वात्। यदि च तत्र देवतान्तरं कल्प्येत तदा वाजिनापचारे तद्धोमाभावात् पुनर्वाजिनावश्यकतापत्तौ शिष्टाचारविरोधः। न च विश्वदेवदेवताकत्वेपि स दोषः। तदामिक्षयैव तत्प्रीतिसंभवे ऽन्यथासिद्धोत्पत्तिकस्य वाजिनस्यापचारेपि न पुनस्तदाचरणम्। सेयं तव सिद्धान्तस्त्वदुक्तयुक्त्या भज्येतेति भावः। अश्वदेवतात्वाङ्गीकर्तृमिश्रमतं तु न सिद्धान्त, उक्तयुक्तेरिति निगर्वः। (१०) रूढ्यर्थस्यैवेति। परम्परयापीति शेषः।

(११) उच्यतइति। मीमांसकैरिति शेषः। (१२) तदुत्तरमिति। यद्यप्येतत्पराभिमानमात्रम्। मण्डपसमुदायगोचरस्मृतेर्मण्डादिगोचरतया तदैव तावद्गोचरसमूहालम्बनस्मृतिसंभवात्, तदिदं वक्ष्यति, प्रथमं रूढ्यर्थस्मृतिकाले वा स्मृतमण्डाद्यवयवार्थस्येति। तथापि वाक्यार्थोपस्थित्यपेक्षया पदार्थोपस्थितिः शीघ्रा इत्यत्र तात्पर्यम्। (१३) ज्ञातस्येति। यद्यपि ज्ञातमित्येव वक्तुमर्हं, तथापि महावाक्यार्थानुभवकाले ऽवान्तरवाक्यार्थज्ञानस्यातीतत्वात्स्मृतिपर्यन्तमुक्तम्। एवं च सिद्धान्तविरोधं परिहरति। (१४) यत्र त्विति। अत एवोत्सर्गो ऽन्यथा नियम एव स्यादिति भावः। ननु सकलवाचिविश्वपदार्थानन्वयात्र यौगिकार्थान्वय इत्यत आह। (१५) सन्निहितेति। यथा सर्वेण घटेन जलमाहर, सर्वब्राह्मणान्भोजयेत्यादौ प्रकरणाद्युपस्थितानामेवान्वयस्तथात्रापीति भावः।

चेन्न । द्वयो(१६)रुपस्थितयोरनुपस्थितयोर्वा रूढिर्बलीयसी। अत्र तु प्रकरणरूपहेत्वन्तरादुद्बुद्धसंस्कारेण (१७) योगार्थ एव ज्ञाने संभृतसामग्रीकः। ननु शाब्दानुभवे शब्दकारिता स्मृतिरुपयोगिनी न तु प्रकरणादिकारितापि, उच्छृङ्खलज्ञानकारितायास्तस्या अन्विताभिधानानुपयोगाद् इति चेत्। न। प्रकरणादुद्बुद्धसंस्कारस्यैव शब्दादप्युद्बोध इति प्रकरणसहकृतशब्दादवयवार्थसंस्कारोद्बोधादवयवार्थस्मृतिः शब्दकारिता शीघ्रा च। न तु रूढ्यर्थस्मृतिः। (१८) तत्र च संस्कारोद्बोधकाभावात्। न चैवं लोकेपि मण्डपादौ योगस्य बलवत्त्वान्न लक्षणेति वाच्यम्। प्रकरणाद्यभावे हि शीघ्ररूढ्यर्थप्रतीतौ रूढिपूर्विका लक्षणा। प्रकरणादिसत्त्वे तु मण्डपादिपदेपि योगार्थ एव बलीयानिति न लक्षणा। (१९) अत एव रूढिच्युतके प्रकरणादिसत्त्वेन रूढ्यर्थास्मरणान्न लक्षणा, किं तु योग एव। तस्मात्प्रकरणाद्यभावे रूढ्यर्थस्य शीघ्रमुपस्थितत्वाद्रूढिपूर्विका रूढ्यर्थसंबन्धिनि लक्षणा (२०) प्रकरणादिसद्भावे तु रूढ्यर्थस्य न स्मृतिरिति योग एवेति तत्त्वम्। न (२१) चैवं प्रोद्गातॄणामित्यत्रोद्गीथाख्यसामभागयोगिनां त्रयाणां प्रकृतत्वाद् योगस्यैव बलवत्त्वं स्याद् न तु रूढिपूर्विकानुवाके लक्षणेति वाच्यम्। तत्र हि रूढौ योगे च प्रकरणस्य तुल्यत्वाद्रूढ्यर्थस्य शीघ्रोपस्थितत्वेन बलवत्त्वाद्रूढिपूर्विका लक्षणैव। (२२) अत्र वदन्ति। भवतु रूढ्यर्थस्य शीघ्रमुपस्थितिस्तथापि तस्यायोग्यत्वादनन्वयेन शक्त्योपस्थापितावयवार्थस्यैव योग्यतादिमत्त्वादन्वयबोधो भवेत्। प्रतिबन्धकस्य रूढ्यर्थान्वयबोधस्याभावात्। (२३) लाक्षणिकार्थस्य विलम्बितोपस्थितिकत्वात्। नन्वेवं मण्डपं भोजयेत्यत्रावयवार्थपरत्वे ऽवयवार्थानां प्रथममेकमन्विताभिधानं तदनन्तरं तस्य वाक्यार्थे परमन्विताभिधानमिति तात्पर्ये गौरवं, रूढिपूर्वलक्षणायामेकत्रान्विताभिधाने तात्पर्यमिति लाघवमिति चेत्। न। सामग्रीसत्त्वेनावयवार्थान्वयबोधस्य गौरवेणापहस्तितुमशक्यत्वात्। (२४) लक्षणीये तात्पर्यग्राहकस्याभावात्। (२५) भावे वा न्यायाभिधानव्यर्थत्वात्। ननु रूढ्यर्थस्य प्रथमं स्मृतत्वात्तस्य च लक्षणया परम्परया ऽपि प्रयोजकसंभवे तत्त्यागायोगाद्वरं लक्षितस्यान्वयबोध इति चेत्, तर्हि प्रथमं रूढ्यर्थस्मरणसमकालं वा स्मृतस्य मण्डात्रद्यवयवार्थस्य बाधकं विना ऽन्वयरक्षार्थं तत्त्यागोपि नोचितः। तत्त्यागहेतोरूढ्यर्थान्वयबोधस्याभावात्। (२६) अथ रूढ्यर्थस्योपस्थितिरेव योगार्थान्वयबोधप्रतिबन्धिका, न तु रूढ्यर्थान्वयबोधो, गौरवात्। यत्र च प्रकरणादिना योगार्थान्वयबोधस्तत्र रूढ्यर्थस्य स्मृतिरेव नास्ति, संस्कारोद्बोधाभावात्। किं तु प्रकरणशब्दाभ्यामवयवार्थस्य संस्कारोद्बोधनादवयवार्थस्यैव स्मृतिरिति चेत्, न। अवयवार्थस्य स्मृतावन्वयबोधे वा रूढ्यर्थस्य स्मृतेः (२७) प्रतिबन्धकत्वे मानाभावात्। मण्डपपदस्य गृहपरत्वे रूढ्यर्थस्यान्वयबोधो योग्यत्वात्। स्मृतस्याप्यवयवार्थस्य नान्वयबोधः कॢप्तकारणयोग्यताविरहान्न तु रूढ्यर्थस्मृत्या प्रतिबन्धात्।

(१६) उपस्थितयोरिति। उपस्थापकप्रकरणादिमतोरतद्वतोर्वेत्यर्थः। (१७) योगार्थ एवेति। तत्रैव प्रकरणसाचिव्यादुभयत्र न तथात्वं न वा तदभाव इति रूढेर्बलवत्त्वमित्यर्थः। (१८) तत्रेति। संस्कारोद्बोधकप्रकरणाद्यभावादित्यर्थः। यद्यपि पदज्ञानमेव तदुद्बोधकमत एव प्रकरणादिकं विनापि पदार्थस्मृतिरनुभवसिद्धा, तथापि तत्प्रकरणस्यैव प्रतिबन्धकत्वमिति पराभिसंधिः। (१९) अत एवेति। एवं तत्र रूढिच्युतकदूषणमपि नेति भावः। (२०) प्रकरणादिसद्भाव इति। योगार्थसंस्कारोद्बोधकप्रकरणादिसत्त्वे तेनैव प्रतिबन्धान्न रूढ्यर्थस्मृतिरित्यर्थः। (२१) न चैवमिति। प्रोद्गातॄणां प्रथमभक्ष्यश्चमस इत्यत्रोद्गीथाख्यसामभागयोगिनामुद्गातृप्रस्तोतृप्रतिहर्तॄणां त्रयाणां प्रकृष्टोद्गानयोगित्वेन योगार्थानामेव सतां चमसरूपभक्ष्यान्वयः स्यात्। तेषां प्रकृतत्वेन योगस्य च बलवत्त्वात्, न त्वेकस्मिन्नेवोद्गातरि रूढ्यर्थे, बहुत्वान्वयानुपपत्त्या एकानुवाकगायकत्वेनोक्तेषु त्रिषु लक्षणा स्यादित्यर्थः। अनुवाक इति क्वचित्पाठस्तदापि प्रस्तोत्रादावित्यर्थः। (२२) अत्र वदन्तीति। नैयायिका इति शेषः। (२३) लाक्षणिकार्थस्येति। मुख्यार्थान्वयानुपपत्तिप्रतिसंधानाद्यपेक्षया विलम्बादित्यर्थः। ननु लक्षणीये तात्पर्यग्रहादवयवार्थे च तदभावात्सामग्रीवैकल्यमित्यत आह। (२४) लक्षणीय इति। (२५) भावे वेति। न तर्हि न्यायलभ्या लक्षणा, किं तु तात्पर्यानुपपत्त्यैव, तत्र चेष्टापत्तिरित्यर्थः। ननु रूढ्यर्थस्मृतिरेव प्रतिबन्धिका, सामान्यतस्तथात्वे लाघवादित्याह। (२६) अथेति। (२७) प्रतिबन्धकत्वे मानाभावादिति। साक्षादविरोधिनो जनकज्ञानविघटकस्यैव प्रतिबन्धकत्वाद्, तदन्वयबोधे च जनितान्वयबोधत्वेन निराकाङ्क्षतया तथात्वमिति भावः। अनुमितौ च सिद्धेः फलबलेन प्रतिबन्धकत्वम्। रूढेर्योगापहारितेति

इह तु रूढ्यर्थस्यायोग्यत्वान्नान्वयबोधः । अवयवार्थस्य योग्यतादिसत्त्वादन्वयबोधो भवत्येव । यदि च रूढ्यर्थस्मृत्या प्रतिबन्धान्नावयवार्थस्मृतिरन्वयबोधो वा, तदा त्वन्मते लम्बकर्णमानयेत्यत्र तद्गुणसंविज्ञाने बहुव्रीहाववयवार्थान्वयबोधो न भवेत्, किं तु रूढ्यर्थान्यपदार्थस्यैव । (२८) तस्माद्रूढेर्योगापहारिता रूढियोगयोर्विरोधे मण्डपादौ । न तु लम्बकर्णादौ । अपहारोऽप्ययमेव यदयोग्यतया रूढ्यर्थस्यान्वयबोधो भवति नावयवार्थस्यायोग्यत्वात् । न तु योग्यतादिमतोऽप्यवयवार्थस्यान्वयबोधो न भवति । अनन्वितरूढ्यर्थस्मृत्या प्रतिबन्धात् । (२९) तस्मान्न न्यायलभ्या रूढिपूर्विका लक्षणा, किं तु यत्र रूढ्यर्थसंबन्धिनि तात्पर्यं मानान्तरादवधार्यते तत्र रूढिपूर्विका लक्षणा रूढ्यर्थसंबन्धिविशेषज्ञापनार्थं विशेषे तात्पर्यग्रहस्यावश्यकत्वात् । यत्र तु प्रकरणाद्यभावान्न योगबलवत्त्वं तत्र रूढ्यर्थस्य शीघ्रोपस्थितत्वात्तेनैवेतरपदार्थान्वय इति रूढेर्योगापहारः । उपपदधातुप्रत्ययार्थानां स्मृतिस्ततस्तेषां योग्यतादिज्ञानं ततोऽवयवार्थान्वयबोध इति यौगिकार्थस्य विलम्बितोपस्थितिकत्वात् । यथा वर्षासु रथकार आदधीतेत्यत्र रथकारशब्दाद् रूढ्या जातिविशेषवत्प्रतीतेः शीघ्रत्वात्तस्यैवाधानं प्रतीयते तदर्थानुकूलविद्याप्रयुक्तिरपि तस्याक्षिप्यते । (३०) न तु रथकारशब्दस्य योगोपस्थितरथकरणयोग्यान्यतो लब्धविद्यत्रैवर्णिकपरत्वं त्रिविद्याप्रयुक्तिकल्पनातो रथकारशब्दे योगसंकोचमात्रस्य लघुत्वादिति युक्तम् । शब्दार्थानुरोधेन हि कल्पना, न तु कल्पनाभयेन शब्दार्थत्यागः, प्रमाणशब्दमूलत्वेन (३१) फलमुखगौरवस्यादोषत्वात् । अत एव च (३२) क्रतुविशेषे हिरण्मयौ प्राकाशावध्वर्यवे दक्षिणां ददातीति श्रूयते तत्राध्वर्युशब्दाद् रूढ्या ऋत्विग्विशेषस्य शीघ्रमुपस्थितेस्तस्यैव प्रकाशस्य स्वत्वलक्षणःसम्बन्धो विधीयते ददातीत्यनुवादः । तेन क्रतुदक्षिणायामध्वर्युभागमात्रबाधः । अन्येषामृत्विजां प्राकाशस्वत्वाभावात् क्रतुदक्षिणायामन्वयः ।

प्रवादं संगमयन्नाह । (२८) तस्मादिति । प्रकारान्तरेण रूढिपूर्विकां लक्षणामुपपादयन्नुपसंहरति । (२९) तस्मादिति । रूढ्यर्थग्रहसंबन्धिपुरुषज्ञानं च पूर्वगृहीतसंबन्धितावच्छेदकप्रकारकमित्यवधेयम् । प्रोद्गातॄणामित्यत्रापि रूढ्यर्थसंबन्धिनी तात्पर्यग्रहादेव लक्षणेति बोध्यम् । (३०) न त्विति । अन्यथा कृष्णेनाप्यन्त्यजन्मन इति श्रुतेरन्त्यजन्मपदं विद्याप्रयुक्तिभयेन लक्षणादिनाऽन्यपरं भवेदिति भावः । श्राद्धादौ शूद्रादीनां न विद्याप्रयुक्तिकल्पनम्, अमन्त्रस्य तु शूद्रस्येति विशेषश्रुतेरिति ध्येयम् । (३१) फलमुखेति । विद्याप्रयुक्तिकल्पना हि रथकारस्याधानप्राप्तिफलं, तथा च तत्फलमाश्रित्य यद्गौरवज्ञानं तन्नामेव न व्याहन्ति, उपजीव्यविरोधादित्यर्थः । न च निषेधविरोधः । न हिंस्यादितिवत्तस्य विशेषपरत्वात् । (३२) क्रतुविशेषे । ज्योतिष्टोमविकृतिभूतेऽभिषेचनीये । प्रकृतौ ज्योतिष्टोमे तं शतेन दीक्षयतीति शतं गावो दक्षिणात्वेन श्रुतास्तत्र षोडश ऋत्विजः किं समुदायेन संप्रदानमेकदेशेन वेति संशये परिषद्दि दत्तमिति समुदायदानं निषिद्धम् । दानं हि यमुद्दिश्य स्वत्वत्यागस्तत्स्वीकारेण निर्वहति । नहि चैत्रमुद्दिश्य त्यक्ते मैत्रस्वीकारेण दाननिर्वाहः । स्वीकारश्च ज्ञानविशेषो न च समुदायमुद्दिश्य त्यक्ते समुदायस्य स्वीकारः संभवति । ज्ञानस्य प्रत्येकनिष्ठत्वेन समुदाये वृत्त्यभावात् । तथा चैकदेशस्य संप्रदानता वाच्या, सा च समं स्यादश्रुतत्वादिति समांशकल्पनया प्रसक्ता । समांशता चा संभाविनी । षोडशसु षट्षट्कृत्वा भागकल्पनया गोचतुष्टयस्योद्धृतत्वात् ।

सर्वेषामर्द्धिनो मुख्या द्वितीयास्तु तदर्द्धिनः ।
तृतीयेन तृतीयास्तु चतुर्थाश्चैव पादिनः ॥

इत्यादेर्मुख्यानामध्वर्युप्रभृतीनां चतुर्णामर्द्धभागानुरोधादष्टाचत्वारिंशद्भागेषु स्वाम्ये तथा द्वितीयानां प्रस्तोत्रादीनां चतुर्णां तदर्धस्वाम्ये तथा तृतीयानां नेष्ट्रादीनां चतुर्णां दक्षिणार्द्धस्य तृतीयांशे स्वाम्ये तथा चतुर्थान मुन्नेत्रादीनां चतुर्णां दक्षिणार्धस्य चतुर्थांशे स्वाम्ये च निर्णीते विकृतावप्यतिदेशेन तथैव दक्षिणाप्राप्तौ हिरण्मयौ प्राकाशावध्वर्यवे दक्षिणां ददातीत्यादिनाध्वर्योः प्राकाशयोश्च नैरन्तर्येणोपस्थितयोः संबन्धयोग्ययोरन्वयाकाङ्क्षिणोः स्वस्वामिभावेनान्वयो विधीयते । तथा च प्राकाशावध्वर्योः स्वौ कार्यावित्यर्थः पर्यवस्यति । न च तस्मै तावदत्तौ स्वौ कर्त्तुं प्रभवतीत्यर्थत एव तस्मै तयोर्दानेऽप्यवगते पश्चादर्थापत्तिप्रतीतार्थसमर्पणाय ददातिरयमर्थवादविधया प्रवर्त्ततइत्यनुवाद इत्युच्यते । एवं चाध्वर्योः प्राकाशस्वत्वविधौ ब्राह्मणेभ्यो दधि दीयतां तक्रं कौण्डिन्यायेतिवत्सामान्यविशेषन्यायेन सामान्यदक्षिणायामध्वर्युभागमात्रबाध इत्याखण्डलकार्थः । केचित्तु सामान्यतो यज्ञाङ्गवस्तूनामृत्विग्भ्यो दानस्य विधानादत्र दानं न विधेयं, किं तु स्वत्वलक्षणः संबन्ध एवेति ददातीत्यर्थानुवाद इत्याहुः । एवं चाभिषेचनीयेऽध्वर्युभागन्यूनैव दक्षिणा तद्भागो मुख्यैरेव वा त्रिभि-

(३३) यदि चाध्वरं युनक्तीति योगोपस्थितऋत्विङ्मात्रे प्राकाशविधिसंबन्धःस्यात्तदा सर्वेषामेव ऋत्विजां क्रतुदक्षिणाबाधो नाध्वर्युभागमात्रस्य । नन्वेवं स्वर्गकामो-यजेतेत्यत्र स्वर्गकामशब्दात्स्वर्गकामत्वेन(३४)स्त्रीशूद्रयोरप्युपस्थितेरधिकारो बोध्येत । शब्दार्थानुरोधाद्विद्याप्रयुक्तिरपि तयोराक्षिप्येतेति चेत् । न । स्त्रीशूद्रयोर्विद्यानिषेधात्स्वर्गकामपदस्य स्त्रीशूद्रेतरपरत्वं,तेन स्वर्गकामपदार्थे संकोचमात्रं न बाधः, संकोचे च न शब्दार्थहानं, स्वर्गकाम वर्णिकस्याधिकारबोधनात् । रथकारशब्दे च पदार्थमात्रस्यैव बाधः स्यात् । यद्यपि संकोचोप्येकदेशबाध एवेति सोऽपि न युक्तः, तदंशे शब्दार्थहानप्रसङ्गात्तथापि सामान्यबाधादेकदेशबाध एव लघुरिति ।

लक्षणा च (३५) पदवृत्तिर्वृतित्वात्,शक्तिवत् । ननु गभीरायां नद्यां घोष इत्यत्र नैकपदे लक्षणा (३६) तीरस्यानदीत्वा(३७)दगभीरत्वाच्च मुख्यलक्ष्ययोरनन्वयापत्तेः । नापि पदद्वये, प्रत्येकं शक्यासंम्बन्धिनो गभीरनदीतीरस्याप्राप्तिप्रसङ्गात् । तस्माद्गभीरनद्योरन्वयबोधानन्तरं वाक्येन स्वज्ञाप्यगभीरनद्यास्तीरं लक्ष्यते । (३८) वाक्यार्थगभीरनदीसंबन्धिनस्तीरत्वेन प्रतीतिः । न च वाक्ये शक्त्यभावात्तत्संबन्धं विना न लक्षणेति वाच्यम् । (३९) स्वज्ञाप्यसंबन्ध एव हि लक्ष्यस्मृतौ तन्त्रं (४०) न तु संबन्धविशेषः शक्ति,गौरवात् । ज्ञाप्यश्च स्वशक्यवद्वाक्यार्थोपि घोषनद्योरन्वयबोधाद्गभीरनद्योरन्वयबोध एव नेति चेत् । न । प्रथमोपस्थितत्वेन गभीरनद्योरन्वयबोधस्य शीघ्रत्वात् । घोषतदनुपपत्तिज्ञानाधीनतया तीरस्मृतिविलम्बेन नदीघोषयोरन्वयबोधे विलम्बात् । न चैवं वाक्यभेदः, कर्त्तव्यान्विताभिधानान्तरानुकूलत्वेन (४१) वाक्यैकवाक्यतावदेकवाक्यत्वादिति । अत्र नव्याः । वाक्यस्य ज्ञाप्याभावेन ज्ञाप्यसंबन्धाभावान्न लक्षणा । अथान्वयबोधकं वाक्यं, पदानि हि संभूयार्थान्वयं बोधयन्ति न प्रत्येकमात्रमिति चेत् । न । पदं हि स्वार्थान्वयं बोधयति, न तु समूहः, समूहे स्वार्थाभावात् । न च पदेषु व्यासज्यवृत्तिर्बोधकता । न

र्याह्य इति विद्वद्भिर्विवेचनीयम् । (३३) यदि चेति । यदि च परिषदि न दानं तदा यस्मै कस्मै चिद् ऋत्विजे प्राकाशदाने तद्भागबाधापत्तेस्तत्रापि भागकल्पनापत्तेर्वेति भावः । (३४) स्त्रीशूद्रयोरिति । न च विद्यापदमेव यज्ञाङ्गभूतविद्यातिरिक्तविद्यापरं कल्प्यतां, स्त्रीशूद्रपदं वा स्वर्गकामेतरस्त्रीशूद्रपरं, रथकारादिविद्याप्रयुक्तिकल्पनानुरोधेन स्त्रीशूद्रपदसंकोचस्यावश्यकत्वादिति वाच्यम् । प्रसक्तं हि प्रतिषिध्यते, न च स्त्रीशूद्रयोः स्वर्गकामत्वेन सामान्यतो विधिं विनान्यत्प्रसञ्जकमस्ति, विद्यायास्तदध्यापनस्योपनयनाभावेन निषेधादध्ययनाप्रसक्तेस्तथा च स्वर्गकामत्वेन सामान्यतः प्रसङ्गे स्त्रीशूद्रयोस्तन्निषेधो न वैपरीत्यं कल्पयतीत्युपजीव्यविरोधादिति वदन्ति । तच्चिन्त्यम् । रागादिप्राप्तप्रतिषेधकत्वकल्पनयैव सामञ्जस्यात्, तथा चैकदेशबाधोप्युक्तयुक्तेरसङ्गतस्तथापि विद्यानिषेधादेवैकदेशबाध इत्यत्रैव तात्पर्यम् । न च विद्यानिषेधेऽपि श्राद्धवदमन्त्र एव यागस्तयोरस्त्विति वाच्यम् । अमन्त्रश्राद्धप्रापकशब्दवदमन्त्रयागप्रापकाभावादिति भावः ।

(३५) पदवृत्तिः । शक्ततावच्छेदकावच्छिन्नवृत्तिमतीत्यर्थः । तेन वाक्यवृत्तित्वेपि पदवृत्तित्वान्न सिद्धसाधनम् । पदस्यैव वृत्तिरित्यर्थ इत्यन्ये । गभीरपदलक्षणायां तीरस्य लक्ष्यत्वे नदीपदं प्रकृतमेव, तथा च तयोरन्योन्यान्वये दोषमाह । (३६) तीरस्येति । नदीपदलक्षणायां दोषमाह । (३७) अगभीरत्वाच्चेति । (३८) वाक्यार्थेति । वाक्यार्थौ गभीरनदी तत्संबन्धिन इत्यर्थः । (३९) स्वज्ञाप्येति । नन्वेवमपभ्रंशेपि लक्षणा स्यात् । न चेष्टापत्तिः । तथा सति वृत्तिमत्त्वेन तस्यापि साधुत्वापत्तौ यज्ञप्रयोगापत्तेः । वृत्तेरेव पदसाधुत्वात्मकत्वादिति चेन्न । सिद्धान्ते ऽस्यापि दोषस्य बोध्यत्वात् । न चोक्तदोषभिया सिद्धान्तेपि स्वज्ञाप्यसंबन्ध एव तथा वाच्यः । तथा च दोषतैाल्यम् । अत एव स्वज्ञाप्यगभीरनद्यास्तीरं लक्षयतीति वक्ष्यतीति वाच्यम् । स्वशक्तिज्ञाप्यत्वस्य तदर्थत्वात् । न च गैारवम्, उक्तदोषापत्त्या प्रामाणिकत्वादिति । के चित्तु स्वशक्यसंबन्ध एव तदर्थः । नद्या इव गभीरनद्या अपि शक्यत्वात् । तात्पर्यवशेन चान्वयनियमात् । अन्यथा तीरान्तरान्वयोपि स्यात् । तात्पर्यग्राहकं च गभीरपदमित्याहुः । तदर्थत्वमेवाशङ्क्यापातत उक्तमेव गैारवमाह । (४०) न त्विति । न तु शक्तिगर्भसंबन्धिविशेष इत्यर्थः । यथाश्रुतस्यालग्नकत्वात् । प्रथमोपस्थितत्वेनेत्यापाततः । वस्तुतो गभीरनद्योरन्वयबोधाभावे विशिष्टनदीसंबन्धितीराप्राप्तिप्रसङ्गादित्युक्तमेव दूषणमन्यथा घोषो नद्यां गभीरायामित्यत्र का गतिरित्यवधेयम् । (४१) वाक्यैकवाक्यतावदिति । तत्रावान्तरवाक्यार्थो विशेषणतया भासते इह तु नेति तद्वदित्युक्तम् । साम्यं तु महावाक्यार्थबोधानुकूलत्वमात्रेणेति ध्येयम् । ननु फलोपधानरूपबोधकत्वमितरपदावच्छिन्नएवे-

चेतरपदावच्छिन्नइतरपदे, गौरवात्। (४२) किं च गभीरायां नद्यामित्यत्र विभक्तिं विना ऽन्वयबोधाभावाद्विभक्त्यन्तर्भावेन वाक्यत्वं, तथा च लक्ष्ये विभक्त्यर्थान्वयो न स्यात्। (४३) लक्षकार्थस्य लक्ष्ये ऽनन्वयनियमात्। नापि गभीरायां नदीतिविभक्तिशून्ये लक्षणा, ऽन्वयस्य तदज्ञाप्यत्वाद्। (४४) विभक्तिश्च (४५) प्रकृतिनदीगतं स्वार्थमभिदध्याद् न गंभीरनदीगतं, तस्या (४६) अप्रकृतित्वात्। (४७) वस्तुतः पदलक्षणयैवोपपत्तौ न वाक्य लक्षणा। तथाहि। गभीरनद्योरन्वयबोधोत्तरं नदीपदं गभीरपदं वा (४८) स्वज्ञाप्यगभीरनद्यास्तीरं लक्षयति न वाक्यम्। न च विनिगमकाभावात्पदयोर्लक्षणाद्वयं वाक्ये चापरा लक्षणेति युक्तम्। (४९) पदे क्लृप्तत्वाद् वाक्यापेक्षया लघुत्वाच्च पदएव लक्षणा। अन्यथा विनिगमकाभावाल्लक्षणाद्वयं पदे वाक्ये चापरा लक्षणेति (५०) गौरवं स्यात्। अन्वयबोधपूर्विका प्रत्येकं पदद्वये लक्षणैव वाक्ये लक्षणेति च परिभाषापदवाक्ययोर्भिन्नत्वात्। (५१) वस्तुतस्तु गभीरपदात्स्वार्थपरम्परया संबन्धेन लक्ष्योपस्थितौ विलम्बान्नदीपदात्स्वार्थसाक्षात्संबन्धेन शीघ्रं तीरोपस्थितिसंभवात्तत्रैव लक्षणा। (५२) अथ पदपांशुना यूपमनक्ति सप्तमं पदं गृह्णातीत्यत्र (५३) पदस्य ग्रहणकर्मानर्हत्वेन ग्रहणकर्मार्हव्यञ्जनसाधनत्वेन (५४) निरूढेषु सोमक्रयार्थानीयमानैकहायन्युपलक्षितसप्तमपदपांशुषु सप्तमार्थान्वितपदपदार्थान्वयबोधके सप्तमं पदमिति वाक्ये लक्षणेति चेत्। न। (५५) अत्रापि हि सप्तमपदयोरन्वयबोधानन्तरं सप्तमपदार्थान्वितस्वार्थबोधके पदे लक्षणा न तु वाक्ये। अत एव पुरोडाशकपालेन तुषानुपवपतीत्यत्रावघातजनितव्रीहितुषाणां पुरोडाशकपालेनोपवापो विधीयते पुरोडाशश्रपणप्रयोजनत्वेनोपस्थिते च कपालेनोपवापप्रयोजनाकाङ्क्षा। (५६) नह्येकप्रयोजनस्य किं प्रयोजनमित्याकाङ्क्षा भवति। अन्यत्र विनियुक्तत्वेन शब्दादन्यत्राकाङ्क्षाविरहेण विनियोगाप्रतीतेरेव हि विनियुक्तविनियोगविरोधः। अत आकाङ्क्षोत्थापनार्थं पुरोडाशकपालवाक्यस्य पुरोडाशार्थाधिष्ठाने आश्रयस्वरूपे लक्षणेति निरस्तम्। अत्रापि हि पुरोडाशपदेन पुरोडाशश्रपणप्रयोजनकाधिष्ठान (५७) माश्रयस्वरूपं लक्ष्यते। कपालपदं च तत्र कपालत्वविशिष्टबोधकमिति पुरोडाशपदे लक्षणा न पुरोडाशकपालवाक्ये। ननु बहुव्रीहौ चित्रगुमानयेत्यत्र

त्यरुचेराह। (४२) किं चेति। (४३) लक्षकार्थस्य। लक्षकपदशक्यस्य। ननु अभेदान्वये विभक्तिरपि न बोधिकेत्यरुचेराह। (४४) विभक्तिश्चेति। (४५) प्रकृतिनदीगतमिति। प्रकृत्यर्थनदीगतमित्यर्थः। (४६) अप्रकृतित्वात्। अप्रकृत्यर्थत्वादित्यर्थः। नन्वेवं नीलं घटमानयेत्यत्रापि विशिष्टकर्मताप्रतीतिर्न स्यादिति नव्यमते सिद्धान्तसारमाह। (४७) वस्तुत इति। (४८) स्वज्ञाप्येति। ननु नीलं द्विरेफमानयेत्यादौ लाक्षणिकपदद्वयवदितरविशिष्टसंबन्धिलक्षकत्वे स्वज्ञाप्याप्रसिद्धिः। लाक्षणिकस्याननुभावकत्वात्। न च स्वशक्तिज्ञाप्यत्वं विवक्षितमिति वाच्यम्। शक्तेरपि तत्सहकारेणैव ज्ञप्तिप्रयोजकत्वात्। तथा च तुल्यमिति चेन्न। अत एव तदनुभावकत्वमित्युक्तत्वादिति। (४९) पदे क्लृप्तत्वादिति। लक्षणाया इति शेषः। (५०) गौरवं स्यादिति। तवापीति शेषः। ननु तथाप्येकलक्षणातो नानालक्षणाकल्पने गौरवमित्यत आह। (५१) वस्तुतस्त्विति। एतच्च गभीरपदस्य नीलादिपदवद्गुणमात्रवाचकत्वमभ्युपेत्योक्तम्। वस्तुतस्तु तस्य गाम्भीर्यगुणविशिष्टवाचकत्वमेव गुणमात्रे नीलादिपदवदप्रयोगात्। अन्यथा धीरोदारपदस्य पदमात्रस्यैव वा धर्मिवाचकत्वं न स्यात्। तथा चात्रापि तीरे स्वार्थसाक्षात्संबन्ध एव। तस्माद्विशेषणविभक्तिः साधुत्वार्थमित्यभ्युपगमान्नदीपदलक्षणायामेव विभक्त्यर्थान्वय इति विशेष्यवाचिपदएव लक्षणा। न च प्राथम्याद्गम्भीरपदएव लक्षणास्तु, तथा चान्यत्र तथात्वेप्यत्रविशेषणविभक्तेरेव शब्दसाधुत्वं कल्प्यमिति वाच्यम्। विशेषणविभक्तित्वेन सामान्यत एव तथात्वकल्पनात्। किं च शुक्लायां नद्यामित्यादावुक्तयुक्त्या विशेष्यपदएव लक्षणाकल्पनादन्यत्रापि तथा। न च शुक्लपदस्य लाक्षणिकत्वेनानुभावकत्वाभावेन स्वज्ञाप्याभावान्न लक्षणेति वाच्यम्। सुतरां तर्हि विशेष्यपदएव लक्षणाकल्पनम्। वस्तुतस्तु तदनुभावकमेवेत्युक्तमित्यत्र तात्पर्यम्। उदाहरणभेदेनाशङ्कते। (५२) अथेति। मुख्यान्वयानुपपत्तिमाह। (५३) पदस्येति। (५४) निरूढेषु,निश्चितेषु। पूर्वमुक्तं परिहरति। (५५) अत्रापि हीति। (५६) नहीति। पुरोडाशाय कपालमिति तादर्थ्यचतुर्थ्या तत्प्रत्ययोपस्थितं कपालं न प्रयोजनान्तरमाकाङ्क्षति। अन्यतरमात्राकाङ्क्षायां च नान्वयधीरिति भावः। एवं च घटार्थेन दण्डेन गामभ्याजेत्यादौ यथा नाकाङ्क्षानुपपत्तिस्तथोक्तम्। उक्तदोषभयादाह। (५७) आश्रयस्वरूपमिति। अधिष्ठानत्वादिनैव तस्यतस्य लक्ष्यत्वान्नोक्तदोष इत्यर्थः। एवं चात्र कर्मधारयो न पुनश्चतु-

वाक्यार्थचित्रगोस्वामिनः संबन्धितया ऽन्यपदार्थस्य प्रतीतेर्वाक्यएवान्यपदार्थे लक्षणा । अथ चित्रा गौर्यस्येति विग्रहवाक्यस्थं लुप्तं यत्पदं स्मृतमन्यपदार्थं बोधयति । तथा दधि पश्येत्यादौ लुप्ता द्वितीया स्मृता कर्मत्व,मन्यथा तत्र कर्मत्वलक्षणापत्तेः । अज्ञातविग्रहस्य बहुव्रीहौ शक्तिभ्रमादन्यपदार्थधीरिति चेत्, न । स्मृतयस्यपदात् संबन्धितयोपस्थितस्यान्यपदार्थस्य कर्मत्वेनोपस्थितिं विनानयनान्वयानुपपत्तेः । (५८) राज्ञः पुरुषमानयेत्यत्र राज्ञइव विशेषणत्वेनोपस्थिते क्रियानन्वयाच्च । विभक्तिशून्ययत्पदादुपस्थिते च चित्रगुपदेन क्रियया चान्वयो न स्यात् । अन्वयंप्रकारकबोधकविभक्त्यभावात् । न च चित्राया गौर्य इति विग्रहे स्मृत(५९)प्रथमान्तयइतिपदादुपस्थितिः । प्रथमान्तेनानयनान्वयात् । प्रथमान्तविग्रहे तदभियुक्तैर्बहुव्रीहेः साधुत्वनिषेधाच्च । न च चित्रा गौर्यस्येति तमानयेति तत्पदार्थस्य क्रियान्वय इति वाच्यम् । (६०) तथा ऽननुभवात् । (६१) चित्रगोसंबन्धिनमानयेति हि वाक्यार्थधीः, विग्रहे तत्पदस्याप्रयोगेण स्मृत्यभावाच्च । यत्तदोर्नित्याभिसंबन्धात्तत्पदस्मरणमिति चेत्, न । (६२) अध्याहारापत्तेः । (६३) तथापि चित्रगुमानयेत्यत्र विभक्तिस्तत्पदार्थगतं न स्वार्थमुपनयेत्, किं तु गोगतमेव, विभक्तेः प्रकृत्यर्थगतस्वार्थबोधजनकत्वव्युत्पत्तेः । अत एवान्यपदार्थोपस्थापकेन समासेनो(६४)क्तार्थत्वाद् यत्पदाप्रयोगः । अन्यथा यत्पदप्रयोगोपि स्यात् । न च यत्पदाप्रयोगः साधुत्वार्थएव स्त्रीप्रत्ययस्येवेति वाच्यम्, । गोस्त्रियोरुपसर्जनस्येत्यनुशासनबलाद्धि तत्तथैव साधु, यत्पदे तूक्तार्थत्वं विना ऽसाधुत्वाय न निमित्तान्तरमस्ति, (६५)बहुव्रीहेर्नित्यसमासत्वेन विग्रहाभावाच्च । चित्रा गौर्यस्येति वाक्यं तु बहुव्रीहेरन्यपदार्थत्वकथनाय, अन्यथा चित्रगुमानयेत्यत्र (६६)प्रक्रान्तप्रक्रम्यमाणयोरभावे यत्पदार्थव्यवहारो न स्यात् । (६७) न च चित्रापदं चित्रगोस्वामिलक्षकं, तत्र गोपदार्थानन्वयात् । नापि गोपदं लक्षकं, गोस्वामिनि चित्रापदार्थानन्वयापत्तेः । तस्माद्वाक्यार्थचित्रगोसंबन्धितया पुरुषस्य प्रतीतेर्बहुव्रीहौ वाक्यएव लक्षणेति । वार्त्तमेतत्, वाक्ये निरर्थकतया स्वार्थसंबन्धाभावेन लक्षणानिषेधात् । अत्रापि पदलक्षणयैवोपपत्तेश्च । तथाहि । चित्रागोपदयोरन्वयबोधानन्तरं गोपदं चित्रगोस्वामिलक्षकं, स्वज्ञाप्यचित्रगोसंबन्धेन तत्स्वामिस्मारकत्वात् । चित्रापदं गवान्वितस्वार्थबोधकतया मुख्यार्थमेव (६८) कर्त्तव्यान्वयबोधानुकूलत्वेन न वाक्यभेदोपि । न चैवमेकस्यैव गोपदस्यान्यपदार्थे वृत्तौ समासो न स्यात्, अनेकस्यान्यपदार्थे वर्तमानस्य समासानुशासनादिति वाच्यम् । चित्रापदस्य परम्परया ऽन्यपदार्थबोधकत्वात् । अस्तु वा चित्रापदेपि लक्षणा, चित्रापदार्थस्य (६९) परम्परया चित्रगोस्वामिसंबन्धात् । (७०) न चैवमेकपदलक्षणायामितरपदवैयर्थ्यम्, इतरपदमहिम्नैव विशेषस्य लक्षणीय-

---

र्थीतत्पुरुष इत्यवधेयम् । (५८) राज्ञ इति । पूर्वमन्वयबोधानुकूलोपस्थित्यभावादनाकाङ्क्षत्वमत्रेतरान्वितत्वेनेति विशेषः । यद्यप्यरुणयेत्यादौ लम्बकर्णमानयेत्यादौ च विशेषणेपि क्रियान्वयस्तथापि पूर्वदोषएव तात्पर्यम् । (५९) प्रथमान्तेति । यद्यपि पुत्रेण सहागतः पिता सपुत्र इत्यादौ प्रथमान्तविग्रहेपि बहुव्रीहिरिति व्यभिचारस्तथापि तदतिरिक्ते नियमो बोध्य इत्याहुः । (६०) तथाननुभवादिति । वाक्यार्थद्वयाननुभवादित्यर्थः । नन्वेतदेव कुत इत्यत आह । (६१) चित्रेति । (६२) अध्याहारेति । पदकल्पनापेक्षया च लक्षणया पदार्थमात्रकल्पनस्य लघुत्वादन्यथा लक्षणोच्छेदापत्तेरिति भावः । ननु यत्र पदं कल्प्यं तत्र तथास्तु प्रकृते च तत्पदाध्याहारस्यावश्यकत्वान्नैवमित्यरुचेराह । (६३) तथापीति । (६४) उक्तार्थत्वादिति । उक्तार्थानामप्रयोग इत्यभिधानादिति भावः ।

(६५) बहुव्रीहेरिति । चित्रा गौर्यस्येत्यादि तु न विग्रहः । समस्यमानपदेनैवार्थकथनस्य विग्रहत्वादत्रत्वसमस्यमानपदेनाप्यर्थकथनादिति भावः । वस्तुतो विग्रहसत्त्वेपि तस्य नियमतः प्रागुपस्थितौ मानाभावादन्यपदार्थे लक्षणैव, अन्यथा षष्ठीतत्पुरुषेपि सा न स्यादिति ध्येयम् । एतेन विग्रहप्रतिरूपकतद्वाक्यस्थमेव यत्पदमादायान्वयोस्त्विति निरस्तम् । विग्रहवत्तस्यापि नियमतोनुपस्थितेः । (६६)प्रक्रान्तेति । यद्यप्येवं चित्रा गौर्यस्येत्यर्थकथनवाक्यएव कथं यत्पदार्थान्वयस्तथापि तत्र तमानयेत्याद्यध्याहारात्तथा, प्रकृते च तस्य दूषितत्वादिति भावः । पदलक्षणां दूषयन्नेव वाक्यलक्षणां व्यवस्थापयति । (६७) न चेति । (६८)कर्त्तव्येति । संबन्ध्युपस्थितिहेतुचित्रगवोपस्थित्यनुकूलत्वादित्यर्थः । चित्रपदस्य गुणवाचित्वमाश्रित्याह । (६९) परम्परया चित्रेति । अयं चाभ्युपगमवादो, ऽस्तु वेत्युपक्रमात् । वस्तुतः साक्षात्संबन्धेनोपस्थापकत्वाद्गोपदएव लक्षणा । अत एव तत्रैवं दूषणमाशङ्क्य परिहरति । (७०) न चैवमिति । एवं सर्वना-

त्वात् । न चैवं वाक्यार्थबोधकपदलक्षणाद्वयमेव वाक्यलक्षणा । पदवाक्ययोर्भिन्नत्वात् । यत्तु चित्रापदेन (७१) गोपदसंनिधानात् स्वार्थसंबन्धिनी गौर्लक्ष्यते, (७२) चित्रगवा च स्वामी लक्ष्यतइति लक्षितलक्षणया ऽन्यपदार्थधीरिति । तन्न । (७३) एकपदलक्षणातो लक्षितलक्षणाया जघन्यत्वात् । (७४) भूवादयो धातवः, चैत्रादीन् भोजय, लम्बकर्णमानये,त्यादितद्गुणसंविज्ञानबहुव्रीहौ भूवादेर्विशेषणस्यापि कार्यान्वयात् (७५) क्रियावाचित्वनिमन्त्रितत्वादिरूपेणाजहत्स्वार्थलक्षणेति संप्रदायः ॥

मपदद्वयेन बहुव्रीहावपि लक्षणैव । न च सर्वनाम्नि न लक्षणा । निरूढलक्षणातिरिक्तलक्षणायामेव तथा नियमात् । अत एव तत्पुत्र इत्यादौ षष्ठीतत्पुरुषेपि लक्षणेति वदन्ति । (७१) गोपदेति । तथा च तात्पर्यग्राहकतया न गोपदवैयर्थ्यमिति भावः । (७२) चित्रगवेति । लक्षितार्थस्य लक्षकतया लक्षितलक्षणेति भावः । वस्तुतो लक्ष्यचित्रगोघटितपरम्परासंबन्धेन चित्रादिपदस्यैव तल्लक्षकत्वं, लक्षणायाः पदधर्मत्वात् । (७३) एकेति । गौरवादिति भावः । न च परम्परासंबन्धेन तदुपस्थापकत्वसंभवादेकैव लक्षणास्त्विति वाच्यम् । साक्षात्संबन्धेन गोपदस्य तदुपस्थापकत्वे लाघवादित्युक्तत्वात् । अन्यपदार्थस्य च संबन्धितावच्छेदकतया पूर्वं भातेन स्वामित्वचैत्रत्वादिनैव चित्रगोसंबन्धित्वेनैव वा गङ्गातीरत्ववदिति ध्येयम् । नन्वेवं चित्रगुमानयेत्यत्रेव लक्षकपदार्थे भूवादय इत्यादावपि कार्यान्वयो न स्यादित्यत आह । (७४) भूवादय इति । जहत्स्वार्थायामेव तथेति भावः । (७५) क्रियावाचित्वेनेति । अत्र च लक्षकसंबन्धस्यैव लक्ष्यतावच्छेदकतया क्रियावाचित्वादिकमेव शक्यसंबन्धः । आदिपदाच्च लम्बकर्णावयविनोर्यः संबन्धस्तदवच्छिन्नत्वादिपरिग्रहः । संप्रदाय इत्यस्वरसोद्भावनं,तद्बीजं तु लम्बकर्णमानयेत्यादौ यद्यजहत्स्वार्था तदोभयसाधारणेनोक्तरूपेण लम्बकर्णस्याप्यन्वये तस्यापि विशेष्यत्वेनैवान्वयः स्यात्, विशेषणचैत्रवत् । न चेष्टापत्तिः । अनुभवविरोधात् । तथा चोभयत्रापि जहत्स्वार्थैव । विशेष्यत्वेन विधेयान्वये स्वार्थत्यागाद् विशेषणत्वेनापि स्वार्थस्य विधेयान्वय इति तद्गुणसंविज्ञानोक्तिः । लम्बकर्णसंबन्धित्ववत् चित्रगोसंबन्धित्वेनोपस्थितावपि स्वार्थस्योपलक्षणतया विधेयानन्वयेनातद्गुणसंविज्ञानोक्तिस्तत्रेति वदन्ति । के चित्तु विशेष्यतया विशेषणतया वा स्वार्थान्वयादेवाजहत्स्वार्थेत्याहुः ॥

॥ अथ वेदान्तकौस्तुभप्रभायाः ॥

॥ द्वितीयाध्यायस्य ॥

॥ प्रथमपादारम्भः ॥

एवं प्रथमाध्याये वेदानां निखिलदोषास्पृष्टमाहात्म्यसीमन्यचिन्त्यानन्तयावदात्मवृत्तिस्वाभाविकासंख्येयसार्वज्ञ्यादिसद्गुणार्णवेऽनन्ताचिन्त्यशक्तौ जगत्कारणे परब्रह्मणि श्रीवासुदेवे भगवति समन्वय उक्तः । इदानीमुक्तसमन्वयस्य सांख्यादिस्मृतियुक्तिभिर्विरोधपरिहाराय प्रधानादिवादानां युक्त्याभासत्वदर्शनाय प्रतिवेदान्तं सृष्ट्यादिप्रक्रियाया एकविधत्वदर्शनाय च द्वितीयोऽध्याय आरभ्यते । तत्र प्रथमं तावत् स्मृत्यविरोधो निरूप्यते भगवता सूत्रकारेण ॥

॥ स्मृत्यनवकाशदोषप्रसङ्ग इति चेन्नान्यस्मृत्यनवकाशदोषप्रसङ्गात् ॥ १ ॥

पूर्वत्र ब्रह्मणोऽन्यप्रमाणागोचरतया वेदैकवेद्यत्वं निर्णीतम् । "अतीन्द्रियत्वाचेन्द्रियाणि नानुमान"मिति श्रुतेः ।

एवं श्रुत्यर्थस्याप्तप्रणीततदुपबृंहणोपयिकस्मृतिं विना दुर्ज्ञेयत्वादल्पश्रुतानां मन्दमतीनां तन्निश्चयानुपपत्तेश्च स्मृतयोऽप्यवश्यमपेक्षिताः । तत्र च श्रुत्युपबृंहणाय सांख्यादिस्मृतिर्ग्राह्या, मन्वादिस्मृतिर्वेति विशये पूर्वपक्षमाह । स्मृत्यनवकाशदोषप्रसङ्ग इति चेदिति । मन्वादिस्मृतीनां स्वर्गाद्यभ्युदयफलकाग्निहोत्रज्योतिष्टोमादिनित्यनैमित्तिकादिधर्मप्रतिपादने सावकाशतया कृतार्थत्वात्, "ऋषिं प्रसूतं कपिलं यस्तमग्रे ज्ञानैर्बिभर्ति, जायमानं च पश्ये"दिति शास्त्रसंस्तुत्यमहर्षिप्रणीताया, "अथ त्रिविधदुःखात्यन्तनिवृत्तिरत्यन्तपुरुषार्थः," "न दृष्टात् तत्सिद्धिर्निवृत्तेऽप्यनुवृत्तिदर्शनात्," "विमुक्तमोक्षार्थं स्वार्थं वा प्रधानस्य," "अचेतनत्वेऽपि क्षीरवच्चेष्टितं प्रधानस्य" इत्यादिसांख्यस्मृतेः केवलपरतत्त्वप्रतिपादनपरत्वात् तदनुसारेणैव वेदान्तशास्त्रमपि व्याख्येयम् । अन्यथा तस्या अन्यत्र निरवकाशतया बाधरूपदोषापत्तेः । "सावकाशनिरवकाशयोर्निरवकाशं बलीय" इति न्यायात् ।

इत्येवं प्राप्ते राद्धान्तः । "नान्यस्मृत्यनकाशदोषप्रसङ्गा"दिति । नेति पूर्वपक्षनिषेधपरः । पूर्वपक्षोक्तिर्न युक्ता । कुतः । अन्यासां मन्वादिस्मृतीनां ब्रह्मैककारणत्वप्रतिपादिकानां श्रुतिमूलकानामनवकाशत्वरूपदोषापत्तेर्बाधप्रसङ्गात् । तथा चाह भगवान् मनुः ।

"महाभूतादिवृत्तौजाः प्रादुरासीत् तमोनुदः ।
सोऽभिध्याय शरीरात् स्वात् सिसृक्षुर्विविधाः प्रजाः ॥

अप एव ससर्जादौ तासु वीर्यमपासृजत् ।

इति । आपस्तम्बश्च ।

"पूः प्राणिनः सर्वे एव गुहाशयस्य
अहन्यमानस्य विकल्मषस्य ।
तस्मात् कायाः प्रभवन्ति सर्वे
स मूलं शाश्वतिकः स नित्यः" ॥

इत्यादि । भारते च ।

"नारायणो जगन्मूर्तिरनन्तात्मा सनातनः ।
तस्मादव्यक्तमुत्पन्नं त्रिगुणं द्विजसत्तम" ॥

तत्रैव राजधर्मे युधिष्ठिरः ।

"योनिस्त्वमस्य प्रलयश्च कृष्ण त्वमेवेदं सृजसि विश्वमग्रे ।
विश्वं चेदं त्वद्वशे विश्वयोने नमोऽस्तु ते शार्ङ्गचक्रासिपाणे" ॥

इत्यादि । भगवद्गीतायां च ।

"अहं सर्वस्य प्रभवो मत्तः सर्वं प्रवर्तते ।
अहं कृत्स्नस्य जगतः प्रभवः प्रलयस्तथा" ॥

पराशरश्च ।

"विष्णोः सकाशादुद्भूतं जगत् तत्रैव संस्थितम् ।
स्थितिसंयमकर्तासौ जगतोऽस्य जगच्च सः" ॥

इति । एतासां बाधः स्यादित्यर्थः ।

ननु तासां धर्मप्रतिपादनेन नैराकाङ्क्ष्यमिति चेन्न । शास्त्रप्रतिपाद्यश्रीपुरुषोत्तमज्ञानसाधनीभूतधर्ममात्रप्रतिपादनेऽपि धर्मसाध्यज्ञानविषयब्रह्मप्रतिपादनभागे बाध्यमाने दोषतादवस्थ्यात् ।

न च कपिलस्मृतिबाधोऽप्ययोग्यः, स्मृतित्वाविशेषात्, इति वाच्यम् । श्रुतिविरुद्धायास्तस्या अप्रामाण्यस्येष्टत्वात् ।

तथा सूचितं भगवता जैमिनिना । "विरोधे त्वनपेक्षं स्यादसति ह्यनुमान"मिति । अस्यार्थः । श्रुतिस्मृतीनां परस्परविरोधे कस्या बाध इति निर्णयार्थमिदमधिकरणम् । तत्र "औदुम्बरीं स्पृष्ट्वोद्गाये"दिति श्रुतिः । "औदुम्बरीं संवेष्टयित्वे"ति स्मृतिः । यदि स्पर्शाङ्गीकारस्तदा स्मृतिबाधः । यदि सर्ववेष्टनं तदा श्रुतिबाधः । इति प्राप्ते राद्धान्तः । "विरोध"इत्यादि । स्मृतीनां श्रुतिविरोधे सति श्रुतीनामनपेक्षं निरपेक्षतया प्रामाण्यं स्यात् । स्मृतिविरोधोऽत्र न विचारणीय इत्यर्थः । श्रुत्यविरोधे त्वनुमीयते श्रुत्यर्थो येन तदनुमानं स्मृतिरपि प्रमाणम् । न तु श्रुतिविरोधे । श्रुतीनां निरपेक्षया स्वार्थे प्रामाण्यं स्वत एव । रवेरिव रूपविषये । स्मृतीनां तु तन्मूलत्वाच्छ्रुतिसापेक्षत्वात् तदविरोधे सत्येवेत्यर्थः ।

किंच, "यद्वै किंचन मनुरवदत् तद्भेषज"मिति श्लाघ्यस्य भगवतो मनोरपि निर्णयरूपं वचनम् ।

"या वेदबाह्याः स्मृतयो याश्च काश्च कुदृष्टयः ।
ताः सर्वा निष्फलाः प्रेत्य तमोनिष्ठा हि ताः स्मृताः" ॥

इति ।

तस्माद्वेदविरुद्धानां सांख्यादिस्मृतीनां बाधो न दोषावह औपनिषदानाम् । श्रुतिस्थकपिलशब्देन च हिरण्यगर्भो ग्राह्यः । कनककपिलवर्णत्वात् । "यो ब्रह्माणं विदधाति पूर्वं यो वा वेदांश्च प्रहिणोति तस्मै", "हिरण्यगर्भं पश्यति जायमान"मित्येतेन समानार्थकत्वाच्च । श्रुतिविरुद्धस्मृतिप्रवर्तकस्त्वग्निवंशजो जीवविशेष एव न कर्दमात्मजः ।

"कपिलो वासुदेवाख्यः सांख्यं तत्त्वं जगाद ह ।
ब्रह्मादिभ्यश्च देवेभ्यो भृग्वादिभ्यस्तथैव च
तथैवासुरये सर्ववेदार्थैरुपबृंहितम् ।
सर्ववेदविरुद्धं च कपिलोऽन्यो जगाद ह ॥
"सांख्यमासुरयेऽन्यस्मै कुतर्कपरिबृंहितम्" ।

इति पाद्मात् ।

"कपिलं परमर्षिं च यं प्राहुर्यतयः सदा ।
अग्निः स कपिलो नाम सांख्ययोगप्रवर्तकः" ॥

इति वनपर्वण्यग्निवंशवर्णनपरमार्कण्डेयवाक्याच्च ॥ १ ॥

वेदविरुद्धसांख्यादिस्मृतिबाधो न दोषावह इत्यत्र हेतुमाह ॥

॥ इतरेषां चानुपलब्धेः ॥ २ ॥

इतरेषां मन्वादीनां वेदविदग्रेसराणां स्वयोगमहिम्नातीन्द्रियार्थसाक्षात्कारसमर्थानां वेदस्य प्रधानपरत्वानुपलब्धेश्च सांख्यस्मृतिर्नादर्तव्या ॥ २ ॥

एतेनैव योगस्मृतिरपि प्रत्युक्तेत्याह ॥

॥ एतेन योगः प्रत्युक्तः ॥ ३ ॥

अतिदेशरूपमिदं सूत्रम् । तत्त्वं नाम, असादृश्यशङ्कायां सादृश्यप्रतिपादनम् । केयमसादृश्यशङ्केति ।

"त्रिरुन्नतं स्थाप्य समं शरीरं
हृदीन्द्रियाणि मनसा संनिवेश्य" ।

इति श्वेताश्वतरोपनिषदि,

"तां योगमिति मन्यन्ते स्थिरामिन्द्रियधारणाम्" ।

इति काठके च, योगः परमं श्रेयोऽसाधारणहेतुर्ज्ञानस्य साधनतया शिष्टैर्गृहीतः, तत्परमिदं योगशास्त्रम् । तत्र ध्येयोऽपि श्रीपुरुषोत्तम इति सांख्यस्मृतेरसादृश्याद्वेदान्तोपयोगित्वात् तेन वेदान्तोपबृंहणं युक्तमिति मन्दानां शङ्का मा भू-

दिति सांख्यस्मृतेः सादृश्यं दर्शयन् समाधत्ते। एतेनेति। एतेन सांख्यस्मृतिनिरासेन योगस्मृतिरपि निरस्ता बोध्या। समानं सांख्यानामिवात्रापि। परमेश्वरानधिष्ठितस्य प्रधानस्य स्वातन्त्र्येणोपादानत्वप्रतिपादनात्। परमेश्वरस्य निमित्तमात्रत्वाङ्गीकाराच्च। ध्यातुश्चेतनस्याचेतनवर्गस्य च ब्रह्मतादात्म्यानभ्युपगमाच्च। "अथ योगानुशासन"मित्यादियोगस्मृतेरपि वेदान्तविरोधस्तुल्य एव। अतो नानया वेदान्तोपबृंहणं युक्तम्। किंतु तत्रस्यविरुद्धांशस्य निराश एव श्रेयानिति। एवं च सति "त्रिरुन्नत"मित्यादौ योगाङ्गत्वेन यदासनाद्यभिधीयते यच्च "तत्कारणं सांख्ययोगाधिगम्य"मिति श्रुतौ सांख्ययोगशब्दाभ्यां ज्ञानं निष्कामकर्म च तत् खलु। तदन्यद्वैदिकमेव।

तस्मादुक्तलक्षणं ब्रह्मैव जगत्कारणमिति ॥ ३ ॥

ननु ब्रह्मकारणवादेऽप्यसंभवस्तुल्य एव। विप्रतिपत्तिबाहुल्यात्। तथाहि, उपादेयभूतस्य विकारस्योपादानगतधर्मानुविधायित्वनियमो निर्विवादः। दृष्टश्चायं सुवर्णादिविकृतौ कुण्डलादौ। प्रकृते तु कारणस्य ब्रह्मणश्चेतनत्वशुद्धत्वसर्वज्ञत्वादिधर्मस्याचेतनत्वादिधर्मस्याचेतनत्वाशुद्धत्वाद्यवच्छिन्ने कार्येऽनुवृत्त्यदर्शनात्। अन्यथा कार्यस्यापि चैतन्यसाम्येन भोक्तृत्वभोग्यत्वविभागासिद्धेः। आकाशादि कार्यं न चेतनोपादेयम्। अत्यन्तवैलक्षण्यात्। अग्निजलवत्। गोऽश्ववच्च। इति प्रयोगात्।

किंच, न केवलं प्रत्यक्षादिभिरेव वैलक्षण्यं जगत उपलभ्यते। अपितु शब्दादपि तथात्वं विलक्षणत्वमवगम्यते। "विज्ञानं चाविज्ञानं च समाने वृक्षे पुरुषो निमग्नोऽनीशया शोचति मुह्यमानः", "अनीशश्चात्मा बध्यते भोक्तृभावा"दित्यादेरित्याह ॥

॥ न विलक्षणत्वादस्य तथात्वं च शब्दात् ॥ ४ ॥

अस्य कार्यस्य जगतो ब्रह्मविलक्षणत्वान्नेदं जगद्ब्रह्मकार्यं भवितुमर्हति। अपितु तत्सदृशस्याचेतनस्य प्रधानस्यैव कार्यं भवितुमर्हति। शेषं तूक्तार्थम् ॥ ४ ॥

नन्वचेतनत्वाभिमतानामपि भूतेन्द्रियाणां क्वचिच्चेतनत्वं श्रूयते। यथा "तं पृथिव्यब्रवीत्", "मृदब्रवीत्", "आपो वा अकामयन्त" "आपोऽब्रुवन्", "तत् तेज ऐक्षत", "ता आप ऐक्षन्त", इति। "ते हेमे प्राणा अहं श्रेयसे विवदमाना ब्रह्म जग्मुः", "ते ह वाचमूचुस्त्वं न उद्गाये"तीति चेत् तत्राह ॥

॥ अभिमानिव्यपदेशस्तु विशेषानुगतिभ्याम् ॥ ५ ॥

तुशब्दः शङ्कानिरासार्थः। श्रुत्या पृथिव्यादिशब्दैस्तदभिमानिन्यश्चेतना देवतास्तत्र तत्र व्यपदिश्यन्ते। कुतः। विशेषानुगतिभ्याम्। "हन्ताहमिमास्तिस्रो देवता" इति पृथिव्यादेर्दैवताशब्देन विशेषणात्। "एता ह वै देवता अहं श्रेयसे विवदमाना" इति, "ता वा एता देवताः प्राणे निःश्रेयसे विदित्वे"ति च कौषीतकिभिरिन्द्रियाणां देवताशब्देन विशिष्याभिधानाच्च। तथा "अग्निर्वाग्भूत्वा मुखं प्राविशत्", "आदित्यश्चक्षुर्भूत्वाक्षिणी", इत्यादिषु वागाद्यभिमानित्वेनाग्न्यादीनामनुप्रवेशश्रवणाच्च।

अतो नाचेतनस्य विश्वस्य चेतनं विलक्षणं ब्रह्म कारणम्। अपितु जगन्न ब्रह्मोपादानकम्। तद्विलक्षणत्वात्। यद्यद्विलक्षणं तन्न तदुपादानकम्। यथा मृद्विलक्षणरुचकादयः।

जगत् प्रधानोपादानकम्। अचेतनत्वादिधर्मवत्त्वेन तत्सादृश्यात्। यदेवं तदेवम्। मृद्विकारघटादिवत् ॥ ५ ॥

जगद्यदि प्रधानोपादेयं न स्यात् तर्ह्यचेतनत्वादिधर्मवदपि न स्यादित्यादितर्कसहकृतस्मृत्यनुरोधेन जगतः प्रधानोपादानकत्वं वेदान्ताः प्रतिपादयन्तीत्येवं प्राप्ते राद्धान्तः ॥

॥ दृश्यते तु ॥ ६ ॥

तुशब्दः पूर्वपक्षव्यावृत्त्यर्थः। यदुक्तं जगन्न चेतनोपादेयमत्यन्तवैलक्षण्यादित्यादि, तदयुक्तम्। आभासमात्रत्वात्। तथाहि, यत्र यत्रोपादानोपादेयभावस्तत्र सादृश्यमिति व्याप्तिर्न ताविन्नियता। यतस्तथात्वं स्यात्। दृश्यते हि विलक्षणयोरपि कार्यकारणभावः। यथा भुक्तादन्नात् केशनखादिरूपस्य विलक्षणस्य, गोमयाच्च वृश्चिकस्य, मक्षिकादिभ्यः कृम्यादेः, द्रव्याद्गुणादेः, शृङ्गाच्छरस्य, दावाग्निदग्धकदलीकाण्डाद्वेत्राङ्कुरस्य, खमस्तकोप्तगोधूमयावनालादेः पलाण्डुलशुनाङ्कुरस्य कार्यस्योत्पत्त्युपलम्भात्।

किंच, कार्यकारणभावे सर्वथा सादृश्यं विवक्षितं, किंचित् सादृश्यं वा।

नाद्यः। कार्यकारणभावस्यैवासिद्धेः। अन्यथा केशनखादावन्नादेर्वृश्चिकादौ च गोमयस्य सादृश्यप्रत्ययापत्तेः।

द्वितीये त्विष्टापत्तिः। सत्तादेर्ब्रह्मधर्मस्याकाशादावपि सत्त्वादाकाशोऽस्तीति प्रत्यक्षप्रतीतेः। आकाशादिप्रपञ्चजातं ब्रह्मोपादेयम्। सत्तादिधर्मवत्त्वात्। यन्नैवं तन्नैवम्। अग्निसेचनमिव। इत्यनुमानात् सत्प्रतिपक्षत्वं च बोध्यम्। "आत्मन आकाशः संभूत" इत्यादिश्रुतेश्च ॥ ६ ॥

ननु यदि विलक्षणयोरपि कार्यकारणभावस्तर्हि द्रव्यान्तरत्वेनोपादाने ब्रह्मण्युत्पत्तेः पूर्वमुपादेयं जगदसदिति प्रसज्येत। असत एवोत्पत्तिः स्यादित्यसत्कार्यवादस्त्वयाङ्गीकृतः स्यादिति चेत् तत्राह ॥

॥ असदिति चेन्न प्रतिषेधमात्रत्वात् ॥ ७ ॥

कारणात् कार्यस्य विलक्षणत्व उत्पत्तेः पूर्वमेकत्वावधार-

णात् कारणे कार्यं न विद्यते। इति चेत्। नैष दोषः। कुतः प्रतीतकार्यकारणयोः सर्वथा सादृश्यनियमस्य प्रतिषेधमात्रत्वात्। पूर्वसूत्रे हि कार्यकारणयोः सर्वथा सादृश्यनियमाभावो विहितः। न तु कारणात् कार्यस्य द्रव्यान्तरत्वमपि। कारणद्रव्यमेव स्वविलक्षणकार्याकारेण परिणमत इत्यङ्गीकृतत्वात्। कार्यं यथा सत्, तथा "तदनन्यत्व"मिति सूत्रव्याख्याने वक्ष्यामः॥ ७॥

ननु स्यादेतत्। मृद्घटयोरिव सुवर्णकुण्डलयोरिव च कार्यकारणयोर्द्रव्यैक्यम्। तथापि कार्यस्य जगत उपादाने ब्रह्मणि प्रलयवेलायां सत्त्वात् कार्यगताः सर्वेऽपि धर्मा अचेतनत्वपरिच्छिन्नत्वाशुद्धत्वाज्ञत्वकर्मवश्यत्वादयो ब्रह्मण्येव प्रसज्येरन्। तदा तेन तस्याभेदात्। तथा सति "सत्यं ज्ञानमनन्तं ब्रह्म", "अपहतपाप्मा विजरो विमृत्युः", "यः सर्वज्ञः सर्ववित्", इत्याद्युपनिषद्वाक्यानामसामञ्जस्यं स्यादिति पुनराक्षिपति॥

॥ अपीतौ तद्वत् प्रसङ्गादसमञ्जसम्॥ ८॥

जगतो ब्रह्मोपादानकत्वे, अपीतौ प्रलये, तद्वत् कार्यस्येव, ब्रह्मणोऽप्यचेतनत्वादिप्राप्तेः प्रसङ्गादसमञ्जसं वेदान्तवाक्यम्। अपीताविति सृष्ट्यादिप्रदर्शनार्थः। तत्पूर्वकत्वात् सृष्ट्यादेः॥ ८॥

उत्पत्तावपि ब्रह्मणस्तद्धर्मापत्तिरित्यत्रोत्तरमाह॥

॥ न तु दृष्टान्तभावात्॥ ९॥

तुशब्दः प्रसक्तस्यासंभाव्यत्वद्योतकः। नैव तद्वत् प्रसङ्गः। कुतः। एकस्यैव कार्यकारणावस्थाद्वयान्वयेऽपि कारणस्य शुद्धतयावस्थितौ दृष्टान्तस्य भावाद्विद्यमानत्वात्। यथा, एक एव सुवर्णपिण्डः कार्यावस्थायां स्वपरिणामभूतकटककुण्डलाद्यात्मनावस्थितः। पुनस्तेषां शक्त्यात्मना स्वस्मिन्नप्यये च न तद्धर्मैः स्वयं संस्पृश्यते। शक्तिधर्माणां शक्तिगतत्वनियमात्। यथा वा, मृत्पिण्डः स्वपरिणतघटादिधर्मैः, यथा च पृथ्वी स्वविकारचतुर्विधभूतग्रामधर्मैर्न संस्पृश्यते। एवं ब्रह्मापि कार्यावस्थायां व्यक्तनामरूपचिदचिदात्मकजगदाकारेण स्थितमपि न तद्धर्मैः संस्पृश्यते। अचिन्त्यानन्तशक्तिमत्तया निरतिशयानन्दैकस्वभावतया च तद्विलक्षणत्वात्। पुनस्तस्मिंस्तस्याप्यये च ब्रह्मशक्तिधर्माः परिच्छिन्नत्वाज्ञत्वकर्मवश्यत्वादयो ब्रह्मशक्तिभूतचिदचिद्वस्तुगता एव स्युरिति नासङ्गे शुद्धे ब्रह्मणि तेषां प्रसङ्ग इत्यतो न किंचिदसमञ्जसम्॥ ९॥

किंच, त्वत्संभावितदोषास्त्वदभिमते प्रधानकारणवादेऽपि समाना इत्याह॥

॥ स्वपक्षे दोषाच्च॥ १०॥

तथाहि, त्रिगुणमचेतनं निरवयवं प्रधानं तत्कार्याकारेण परिणमत इति भवतो राद्धान्तः। तत्र निरवयवान्नीरूपात् प्रधानात् सावयवस्य रूपादिमतः कार्यस्योत्पत्तेरसंभवे विशेषाभावात्।

"यश्चोभयोः समो दोषः परिहारोऽपि वा समः।
नैकः पर्यनुयोक्तव्यस्तादृगर्थविचारणे"॥

इति न्यायात्। इतरथा सर्वस्यापि कार्यमात्रस्य निरवयवत्वं नीरूपत्वं च स्यात्। तथात्वे च कार्यप्रत्यक्षं न स्यात्। नामरूपादिना विभक्तं कार्यं च नोपलभ्येतेति संक्षेपः॥ १०॥

यच्चोक्तं 'तर्कसहकृतस्मृत्यनुरोधेन जगतः प्रधानोपादानकत्वं वेदान्ताः प्रतिपादयन्ती'ति तत् प्रत्याह॥

॥ तर्काप्रतिष्ठानादप्यन्यथानुमेयमिति चेदेवमप्यनिर्मोक्षप्रसङ्गः॥ ११॥

अपिशब्दश्चार्थे। तर्कस्याप्रतिष्ठानादनवस्थानाच्च शास्त्रमूलको ब्रह्मकारणवाद एव स्वीकार्यः। न तर्कमूलः प्रधानकारणवादः।

"नारायणाज्जायते प्राणो मनः सर्वेन्द्रियाणि च।
खं वायुर्ज्योतिरापः पृथिवी विश्वस्य धारिणी"॥

इत्यादिश्रुतेः।

"अतश्च संक्षेपमिदं शृणुध्वं नारायणः सर्वमिदं पुराणः।
स सर्गकाले च करोति सर्गं संहारकाले च तदत्ति भूयः"॥

इत्यादिस्मृतेश्च। शाक्योलूक्याक्षपादकपिलपतञ्जलितर्काणां परस्परतर्कप्रतिहततयाऽप्रतिष्ठितत्वान्न तर्कमूलस्य कापिलपक्षस्य संभव इति भावः।

किंच, "नैषा तर्केण मतिरपनेया, प्रोक्तान्येनैव सुज्ञानाय प्रेष्ठे" ति।

"अचिन्त्याः खलु ये भावा न तांस्तर्केण योजयेत्।

इत्यादिश्रुतिस्मृतिभिरपि तर्काणां निषेध्यत्वान्नोक्तानुमानस्यापि प्रामाण्यम्।

ननु विलक्षणत्वादितर्काणामप्रतिष्ठितत्वेऽप्यन्यथा शाक्यादितर्काप्रतिहतेन व्याप्तिपक्षधर्मतासंपन्नेन केनचित् प्रतिष्ठितेनानागतेन तर्केण प्रधानमनुमेयम्।

नच प्रतिष्ठितस्तर्क एव नास्तीति वक्तव्यम्। तर्काप्रतिष्ठानादित्यस्यैव तर्कस्य प्रतिष्ठितत्वात्। तर्कमात्रस्याप्रतिष्ठितत्वे च लोकव्यवहारोच्छेदप्रसङ्गात्। भूतभवन्मार्गसाम्येनानागतेऽपि मार्गे सुखदुःखप्राप्तिपरिहाराय लोकप्रवृत्तिदर्शनात्।

"प्रत्यक्षमनुमानं च शास्त्रं च विविधागमम् ।
त्रयं सुविदितं कार्यं धर्मशुद्धिमभीप्सता ॥
आर्षं धर्मोपदेशं च वेदशास्त्राविरोधिना ।
यस्तर्केणानुसंधत्ते स धर्मं वेद नेतरः" ॥

इति वदता मनुना च तर्कस्य निर्णयहेतुत्वप्रतिपादनादिति चेत् । एवमपि तथापि तर्काप्रतिष्ठानदोषादनिर्मोक्षो दुर्वारः । त्वत्तोऽप्यधिकतमकुतर्ककुशलपुरुषसद्भावनासंभवात् ।

अतः प्रत्यक्षादिप्रमाणागोचरे परब्रह्मणि तर्काप्रवेशाच्छ्रुतिरेव प्रमाणम् । तन्मूलकतर्कश्च तदुपबृंहणायोपादेयः । "मन्तव्य" इति श्रुतेः । न तु तद्विरुद्धः ।

"शुष्कतर्कं परित्यज्य आश्रयस्व श्रुतिस्मृती" ।

इति भारतात् ।

तर्को नाम प्रमाणानुग्राहक ऊहोऽज्ञातनिश्चये वस्तुनि क्रियमाणस्तत्त्वज्ञानैकप्रयोजनः । "यथाग्नेर्विस्फुलिङ्गा" इति श्रुत्या प्रत्यगात्मनो जन्म प्रतीयते । "न जायते म्रियते वे" ति श्रुत्या च तदभावः । तत्रात्मनित्यानित्यत्वसंशये, आत्मा नित्य एव । यदि नित्यो न स्यात्, तर्हि कृतनाशाकृताभ्यागमप्रसङ्गः स्यादित्यादिरूपः, "अविनाशी वा अरे आत्मानुच्छित्तिधर्मे"त्यादिशास्त्रमूलकत्वात् प्रमाणसहायत्वेन गृह्यते । यदि प्रपञ्चो मिथ्या न स्यात्, तर्ह्यनिर्मोक्षप्रसङ्गः स्यात् । यदि सेश्वरं सवेदं जगन्मिथ्या न स्यात्, तर्हि निर्विशेषाद्वैतसिद्धान्तसिद्धिर्न स्यादित्यादिरूपश्च शास्त्रनिर्मूलत्वान्निषिध्यते ।

"आगमस्याविरोधेन ऊहनं तर्क उच्यते" ।

इति वचनात् । "अविज्ञाततत्त्वेऽर्थे कारणोपपत्तितस्तत्त्वज्ञानार्थं ऊहस्तर्क"इति न्यायसूत्राच्च ।

एवं तर्कग्राहकश्रुत्यादेः श्रुतिमूलकतर्कविषयत्वं, तर्कनिषेधकश्रुत्यादेश्च शास्त्रनिर्मूलतर्कनिषेधविषयत्वमिति विवेक उक्तः ।

तस्मादचिन्त्यानन्ताघटघटनापटीयःशक्तिमत्तया निःशेषदोषगन्धाघ्रातमाहात्म्यं सार्वज्ञ्याद्यनन्तसद्गुणाश्रयं परं ब्रह्मैव जगत्कारणं न प्रधानमिति ॥ ११ ॥

॥ एतेन शिष्टापरिग्रहा अपि व्याख्याताः ॥ १२ ॥

अतिदेशसूत्रमिदम् । परिगृह्यन्त इति परिग्रहाः, न परिग्रहा अपरिग्रहाः, शिष्टानामपरिग्रहाः शिष्टापरिग्रहाः । शिष्टैर्मन्वादिव्यासादिभिः केनचिदप्यंशेनापरिगृहीता इत्यर्थः ।

यद्वा, शिष्टाः कपिलपतञ्जलिभ्यामन्ये । न विद्यते वेदस्य परिग्रहो येष्वित्यपरिग्रहाः शिष्टाश्च तेऽपरिग्रहाश्च शिष्टापरिग्रहाः । वेदमगृह्णन्तः केवलतर्कपराः कणभक्षाक्षपादक्षपणकभिक्षुप्रभृतिपरमाण्वादिकारणवादा अप्येतेन वेदविरोधिप्रधानकारणवादनिरासेन निरस्ता वेदितव्याः । तेषामपि तर्कमूलत्वाविशेषात् ॥ १२ ॥

पुनरप्याशङ्क्य समाधत्ते ॥

॥ भोक्त्रापत्तेरविभागश्चेत् स्याल्लोकवत् ॥ १३ ॥

ननु ब्रह्मैव जगदुपादानमिति यत् तद् युक्तं न वेति संशये न युक्तमिति पूर्वः पक्षः, तथा सति कार्यकारणयोरभेदनियमेन ब्रह्मण एव कार्यकारणरूपत्वाज्जीवब्रह्मणोः स्वभावविभागः, "अजो ह्येको जुषमाणोऽनुशेते", "तयोरन्यः पिप्पलं स्वाद्वत्ति", "अनीशश्चात्मा बध्यते, भोक्तृभावा"दित्यादिश्रुत्युक्तो न संभवति । अविभागे च सति ब्रह्मणोऽपि जीववत् सुखदुःखे अपरिहृते इति वाच्यम् । तत्रोपास्यतयोपासकहृत्स्यस्यैकशरीरान्तर्वर्तितामात्रेण संभोगाद्यसङ्गो न भवतीत्युक्तम् । अत्र तु जीवब्रह्मणोरनन्यत्वाङ्गीकारेण तद्वत् तस्यापि तत्प्रसङ्गस्य दुर्वारत्वात् कार्यगतसर्वदोषाश्रयत्वप्रसङ्गाच्च, प्रधानकारणवाद एव श्रेष्ठ इति चेत् । तत्रोत्तरं 'स्याल्लोकवदिति' । लोके यथा मृत्पिण्डजन्यस्य मृण्मयस्य घटाद्यवस्थापन्नस्य मृदमन्तरेण पृथक्स्थितिप्रवृत्त्यनर्हतया मृदभिन्नत्वेऽपि स्वरूपस्वभावनामरूपासंख्यव्यवहारादिभेदः सुप्रसिद्धः । तद्वद्ब्रह्मोपादानकस्य जगतोऽपि ब्रह्मव्यतिरेकेण पृथक्स्थितिप्रवृत्त्यनर्हतया ब्रह्माभिन्नत्वेऽपि स्वरूपस्वभावादिभेदस्य श्रुतिस्मृतिसूत्रगीतस्य स्वाभाविकत्वात् ।

अयं भावः । न वयं ब्रह्मण उपादानत्वेऽपि तस्य चेतनाचेतनयोश्च स्वरूपैक्यमङ्गीकुर्मः । येनोक्तदोषः स्यात् । अपितु "अस्थूलमनण्वह्रस्वमदीर्घमपाणिपादः", "अणोरणीयान् महतो महीयान्", "अणुर्ह्येष आत्मा", 'अनीशश्चात्मा बध्यते भोक्तृत्वात्', "गौरनाद्यन्तवती सा जनित्री भूतभावनी""सितासिता च रक्ता चे"त्यादिश्रुत्युक्तं स्वरूपस्वभावादिवैलक्षण्यं स्वाभाविकं ब्रूमः । अनन्यत्वं च कारणं विना कार्यस्यात्मानं विनात्मीयस्य व्यापकं विना व्याप्यस्य चाधारं विनाधेयस्य पृथक्स्थितिप्रवृत्त्यनर्हत्वेनेति । सुखदुःखभोक्तृत्वस्य च पुण्यापुण्यकर्मप्रयुक्तत्वाच्च परब्रह्मणि तत्प्रसङ्गः । परब्रह्मणस्त्वपहतपाप्मत्वादिधर्मवत्तया कर्मसंबन्धलेशासंभवात् ॥ १३ ॥

अथ यदुक्तं कार्यस्य कारणादनन्यत्वं तदिदानीं स्पष्टमाह ॥

॥ तदनन्यत्वमारम्भणशब्दादिभ्यः ॥ १४ ॥

तत्र कार्यं मिथ्या, अनिर्वचनीयं वा, सद्रूपं वा, वासद्रूपं वेति संशय आहुरेके । असच्चेन्न प्रतीयेत । सच्चेन्न बाध्येत ।

प्रतीयते । बाध्यते च । अतः सदसद्विलक्षणमनिर्वचनीयमेवाभ्युपगन्तव्यम् । अनिर्वचनीयत्वादेव मिथ्यात्वमिति । प्रपञ्चो यदि मिथ्या न स्यात्, तर्हि ज्ञाननिवर्त्योऽपि न स्यात् । दृश्यते हि लोके मिथ्यापदार्थस्य शुक्तिरजतादेरधिष्ठानज्ञानान्निवृत्तिः । अतोऽध्यस्तोऽयं प्रपञ्चः । ज्ञाननिवर्त्यत्वादिति । ज्ञाननिवर्त्यत्वान्यथानुपपत्तिर्जगन्मिथ्यात्वे मानमिति । तत्र मिथ्यात्वानिर्वचनीयत्वादेर्लक्षणप्रमाणानुपपत्त्या पूर्वैर्विस्तरतो निरस्तत्वादत्रोपरम्यते ।

किंच, न हि ज्ञानमज्ञानस्यैव मिथ्याभूतस्य निवर्तकमिति नियमः । ज्ञानसमानविषयकाज्ञानानुपादानकस्य सत्यस्य तज्ज्ञानप्रागभावस्य घटादिज्ञानेन पटादिज्ञानस्याप्रत्यभिज्ञादिना संस्कारस्य, यथा दोषदर्शनेन रागादेः सेत्वादिदर्शनेन ब्रह्महत्यादेश्च सत्यस्यैव निवृत्तिदर्शनात् ।

ननु सेत्वादिदर्शनमज्ञाननिवृत्तिद्वारेणादृष्टद्वारेण वा निवर्तकं, साक्षान्निवर्तकत्वेऽपि न ज्ञानत्वेन, किंतु विहितक्रियात्वेनेति चेन्न । प्रकृतेऽपि साम्यात् । श्रुतदर्शनत्यागेन तत्प्राप्तिस्तज्जन्यादृष्टं वा निवर्तकं कल्प्यते चेदिहापि श्रवणज्ञानोत्तरब्रह्मध्यानं तज्जन्यादृष्टं वा निवर्तकमिति वक्तुं शक्यत्वात् "तस्याभिध्याना"दिति श्रुतेः ।

ननु सेतुदर्शनमात्रं न निवर्तकं, किंतु दूरगमनादिविशिष्टमिति चेन्न । अत्रापि ज्ञानमात्रं न निवर्तकं, किंतु नियमाधीतवेदान्तश्रवणादिनियमविशिष्टम् । अन्यथा भाषाप्रबन्धादिश्रवणेऽप्यसंभावनादियुक्तस्याज्ञाननिवृत्त्यापत्तेः ।

किंच, शूद्रादीनामपि स्वेच्छया भाषानिरूपितवेदान्तार्थश्रवणादिनापि मोक्षप्रसङ्गात् ।

न च नियमाध्ययनादीनामधिकारसंपादनेनैवोपक्षीणत्वान्न ज्ञानसहकारित्वमिति वाच्यम् । प्रकृतेऽपि दूरगमनादीनामधिकारसंपादनेनैव नैराकाङ्क्ष्यसाम्यात् ।

न च "दृष्ट्वैव तं मुच्यत" इति, दर्शनमात्रस्य निवर्तकत्वश्रवणादिति वाच्यम् । प्रकृतेऽपि "सेतुं दृष्ट्वा ब्रह्महत्यां व्यपोहति" इति सेतोश्चाक्षुषज्ञानस्यैव निवर्तकत्वश्रवणात् ।

किंच, लोकेऽदृष्टत्वे विपक्षे बाधकाभावाच्छ्रुतिबलात् सत्यस्यापि बन्धस्य किं न स्यात् । अन्यथा लोकेऽधिष्ठानतत्त्वे साक्षात्कृते कर्मवशादपि निरुपाधिकभ्रमानुवृत्तेर्जीवन्मुक्तिदशायां कर्मवशादनुवृत्तस्य जगतः सत्यत्वमेव स्यात् ।

किंच, तव मतेऽपि लोकेऽत्यन्ताप्रसिद्धस्यापि व्याप्तिशून्यस्याश्रौतस्यानाद्यध्यासस्य प्रतिपादनेनाद्यन्तताप्रसिद्धङ्गीकारसाम्यात् । नह्यनाद्यध्यासे श्रुतिर्मानम् । नापि लोकप्रसिद्धा व्याप्तिः, यत्राध्यासस्य प्रतीतिस्तत्रानादित्वमिति । प्रत्युत सादिव्याप्तिः शुक्तिरूप्यादौ प्रसिद्धा । किंतु युक्तिमात्रम् । तथापि कुलधर्मतया तवाङ्गीकारः ।

अस्माकं तु श्रुतिबलात् सत्यस्यैव श्रौतब्रह्मज्ञानान्निवृत्त्यङ्गीकारे को वा दोष इति मनीषिभिर्विवेचनीयम् ।

ननु ज्ञानैकनिवर्त्यस्य किं नाम सत्यत्वम् । न तावदज्ञानाजन्यत्वम् । "मायां तु प्रकृति"मिति श्रुतिविरोधात् । मायाविद्ययोरैक्यात् । नापि स्वाधिष्ठाने स्वाभावशून्यत्वम् । अस्थूलादिश्रुतिविरोधात् । नापि व्यवहारकाले बाधशून्यत्वम् । तर्हि व्यावहारिकमेव सत्यत्वमागतमेवाध्यस्तत्वम् । तच्च श्रुत्यर्थयोग्यताज्ञानार्थं वर्णनीयमेवेति चेन्न । सर्वस्य जगतः "तत् तेजोऽसृजत" "तस्माद्वा एतस्मादात्मन आकाशः संभूतः" "नारायणाज्जायते प्राणः", "अहं सर्वस्य प्रभव", इत्यादिश्रुतिप्रमाणेन ब्रह्मजन्यतयाऽज्ञानजन्यत्वाभावात् सत्यत्वमेव ।

नापि "मायां" त्विति श्रुतिविरोधः । तस्याः प्रकृतिपदवाच्यश्रीपुरुषोत्तमाधीनाचित्प्रकृतिप्रतिपादनेनैव नैराकाङ्क्ष्यान्नाज्ञानपरत्वम् । मायाशब्दस्याज्ञाने शक्त्यभावात् ।

यदुक्तं स्वाधिष्ठान इत्यादि, तत् तुच्छम् । "गौरनाद्यनन्तवती"ति श्रुतिबलात् तद्गतपरतन्त्रसत्ताया अनाद्यनन्तत्वाभ्युपगमस्यादोषात् । श्रुतेश्च सर्वविलक्षणब्रह्मप्रतिपादनपरतया प्रपञ्चनिषेधपरत्वाभावात् ।

यच्चोक्तं व्यवहारकाले बाधशून्यत्वमित्यादि । तदपि तुच्छम् । अनाद्यनन्तत्वविधायकश्रुत्यैवैतद्विकल्पस्य निरासात् ।

किंच, संस्कारसापेक्षगरुडभ्रमरादिध्यानज्ञाननिवर्त्यविषकीटत्वादौ सत्यत्वदर्शनेन श्रवणादिजनितसंस्कारसापेक्षज्ञाननिवर्त्यस्य प्रपञ्चस्य सत्यत्वमेव स्यात् ।

किंच, लोके निवृत्तिनिवर्त्ययोः समानसत्ताकत्वनियमादज्ञाननिवृत्तिवदज्ञानमपि तात्त्विकं स्यात् । ज्ञानज्ञेययोर्दोषाधिष्ठानयोश्च समानसत्ताकत्वनियमाद् ब्रह्मवदज्ञानमपि सत्यं स्यात् ।

किंच, यथानादिभावरूपस्याज्ञानस्यान्यत्रादृष्टापि निवृत्तिः श्रुतिबलादङ्गीकृता, तथा प्रकृतेऽपि किं न स्यात् ।

किंच, शङ्खस्य श्वेतत्वानुमित्यादिना तदीयस्य श्वेतत्वविषयकाज्ञानस्यारोपितपीतत्वस्य वा निवृत्तिवत् त्वन्मते बिम्बप्रतिबिम्बयोरैक्यसाक्षात्कारेणैक्याज्ञानस्यारोपितभेदस्य वा निवृत्तिश्चेत् । श्वेतत्वानुमित्यादिना तदज्ञाननिवृत्तावज्ञानकार्यस्यारोपितपीतत्वादेरननुवृत्तिवत् तदनुवृत्तिर्न स्यात् ।

न च तस्य सोपाधिकत्वेन यावदुपाधिस्थायित्वनियमान्नोक्तदोष इति वाच्यम् । उपादाननिवृत्तौ कार्यानुवृत्त्ययोगा-

त्। ज्ञानस्य स्वप्रागभावनिवर्तन इवाज्ञाननिवर्तनेऽप्यन्यानपेक्षणात्।

अपिच,चरमसाक्षात्कारेण जीवन्मुक्तिदशानुवृत्तस्याज्ञानत्वस्य वाज्ञानसंस्कारस्य वा प्रारब्धकर्मादेर्वा निवृत्तिः किं न स्यात्।

तस्मात् त्वयाप्यज्ञानस्यारोपितभेदस्य वा ज्ञानविरोधिन एव ज्ञानेन निवृत्तिर्विरोधश्च कार्यनिरूप्य इत्येव वक्तव्यम्। एतन्ममापि समानम्।

ज्ञाननिवर्त्यत्वेन तावत् सत्त्वं मिथ्यात्वं वा नियामकम्, अपितु ज्ञानविरोधित्वमेवेति सिद्धमित्यलं विस्तरेण।

वस्तुतस्तु भगवत्प्रसादादेव बन्धनिवृत्तिर्न प्रकारान्तरेण। "शृण्वन्तोऽपि बहवो यं न विद्युः"। "यमेवैष वृणुते तेन लभ्यः", "यस्य प्रसादात् परमार्तिरूपादस्मात् संसारान्मुच्यते नापरेणे"त्यन्वयव्यतिरेकश्रुतेः। "मत्प्रसादात् तरिष्यती"ति स्मृतेश्च।

नचैवं ज्ञानस्य वैयर्थ्यापत्त्या तत्प्रतिपादकशास्त्रव्याकोपप्रसङ्ग इति वाच्यम्। तस्य तत्प्रसादहेतुत्वात्। तथाह श्रीब्रह्मानन्दः।

"एवं ज्ञाने स भगवाननादिः पुरुषोत्तमः।
प्रसीदत्यच्युते तस्मिन् प्रसन्ने क्लेशसंचयः" ॥
"तस्मिन् प्रसन्ने किमिहास्त्यलभ्यम्",

इत्यादिना।

अतो ज्ञानस्य कारणत्वं, भगवत्प्रसादस्यावान्तरव्यापारत्वमित्युभयशास्त्रस्याविरोधादित्यलं प्रासङ्गिकेन। अस्य पराहतं च सत्तकैरेतदन्यथानुपपत्तिरूपं प्रमाणम्। तर्कश्च, प्रपञ्चो यदि सत्यो न स्यात्, तर्हि श्रीपुरुषोत्तमस्य परब्रह्मणः परिपाल्यो न स्यात्। तत्परिपाल्यत्वं च श्रुतिस्मृतिसूत्रैरुद्घुष्यमाणम्। तस्मात् सदेवेति।

तथाहि, अध्यस्ते प्रवृत्तिरधिष्ठानसाक्षात्काराभाववत एव पुरुषस्य दृश्यते, घटते च। न तु शुक्तिं शुक्तित्वेन साक्षादनुभवितुः शुक्तिरूप्यादाने प्रवृत्तिः। स्वाप्निकपुत्रादिगजतुरगादिपालनार्था प्रवृत्तिश्च जायतोऽनुन्मत्तस्य कस्यचिद्दृष्टा युक्ता वा। तथा सर्वस्याधिष्ठानतत्त्वं सर्वदा पश्यतः परमेश्वरस्य प्रपञ्चमिथ्यात्वे कथं तस्य पालने प्रवृत्तिरिति पण्डितंमन्यैर्वैदिकत्वाभिमानिभिरेकाग्रमनसा विचारणीयम्। परमेश्वरस्याज्ञत्वकल्पनायां परमेश्वरत्वमेव न स्यात्। सर्वज्ञत्वे च मिथ्यावस्तुपरिपालने प्रवृत्त्यसंभव एव। अन्यथा परमेश्वरस्य भ्रान्तत्वप्रसक्त्या तत्प्रतिपादकवेदो दत्ततिलाञ्जलिः स्यात्।

नन्वैन्द्रजालिकवत् तस्य मिथ्यापालनं भवत्विति चेन्न। दृष्टान्तवैषम्यात्। ऐन्द्रजालिको मन्त्रौषधादिबलादतीतानागतान् देशान्तरस्थितांश्च सत एव पदार्थान् प्रदर्शयत्येव। न त्वपरोक्षतया स्वयं पश्यति, पालयति वा। प्रकृते तु "यः सर्वज्ञः सर्ववित्", "स्वाभाविकी ज्ञानबलक्रिया च","नामरूपे व्याकरवाणि", "आकाशो ह वै नामरूपयोर्निर्वहिता",

"नामानि कृत्वाभिवदन् यदास्ते सर्वाणि रूपाणि
विचिन्त्य धीरो," "एकं बीजं बहुधा यः करोति,"

इत्यादिश्रुतिभ्य ईक्षणबहुभवनसंकल्पपूर्वकसृष्ट्यादिकर्तृत्वं "स्वयमात्मानमकुरुत" "सच्च त्यच्चाभव"दित्यादिना बहुभवितृत्वेनोपादानत्वं चोपलभ्यत, इति। विपरीतत्वाद्दृष्टान्तस्येत्यर्थः।

नन्वैन्द्रजालिकस्य स्वमाययामोहितस्य विषयापरोक्षत्वाभावे पश्यन्त्विदमाम्रफलमिति प्रतिज्ञावचनं, तथैव प्रदर्शयितृत्वं चानुपपन्नम्। एतदन्यथानुपपत्त्या तस्य विषयापरोक्षमस्तीत्यवश्यमङ्गीकार्यमिति चेन्न। तस्यान्यथोपपन्नत्वात्।

तथाहि, यथा वैद्यो गुरूपदेशादिना ज्ञातौषधिप्रभावो भविष्यद्रोगनाशादिविषयकापरोक्षाभावेऽपीदमौषधमिमं रोगं सद्यो नाशयति, पश्यन्त्वस्य प्रभावमिति वदति च, तथैन्द्रजालिकोऽप्यस्मान्मन्त्रादेरेते भ्राम्यन्तीति ज्ञातमन्त्रादिप्रभावः पश्यन्त्विदमित्यादि वदति, दर्शयति चेति भावः।

नन्वैन्द्रजालिकस्याप्यैन्द्रजालिकान्तरात् स्वसृष्टानां रक्षणदर्शनात्, तथात्वे च नोक्तवैषम्यमिति चेन्न। भ्रमजनकस्वमन्त्रौषधादिगतसामर्थ्यस्यैव रक्षणान्न विषयस्येति।

ननु मम पक्षे परमेश्वरस्यापि व्यावहारिकत्वेन तद्गुणशक्त्यादीनां सार्वज्ञ्यादीनामपि तथात्वेन पारमार्थिकत्वाभावात्। तथा चाह भाष्यकारः। "ईश्वरस्यात्मभूते इवाविद्याकल्पिते नामरूपे तत्त्वान्यत्वाभ्यामनिर्वचनीये संसारप्रपञ्चबीजभूते सर्वज्ञेश्वरस्य माया शक्तिः प्रकृतिरिति श्रुतिस्मृत्योरभिलप्येते। 'ताभ्यामन्यः सर्वज्ञ ईश्वरः, "आकाशो ह वै नाम-", "नामरूपे", "सर्वाणि रूपाणि", "एकं बीज"मित्यादिश्रुतिभ्यः।

एवमविद्याकृतनामरूपोपाध्यनुरोधीश्वरो भवति। व्योमेव घटकरकाद्युपाध्यनुरोधि, स च स्वात्मभूतानेव घटाकाशस्थानीयानविद्यात्मकोपाधिप्रत्युपस्थापितनामरूपकृतकार्यकरणसंघातानुरोधिनो जीवाख्यान् विज्ञानात्मनः प्रतीष्टे व्यवहारविषये।

तदेवमविद्यात्मकोपाधिपरिच्छेदापेक्षमेवेश्वरस्य सर्वज्ञत्वं, सर्वशक्तित्वं,न परमार्थतो विद्ययापास्तसर्वोपाधिस्वरूप आ-

त्मनीशितृत्वसर्वज्ञत्वादिव्यवहार उपपद्यते", इत्यादिनेति चेन्न। अश्रौतत्वेन कल्पनामात्रत्वात्।

तथाहि, परमेश्वरस्य मिथ्यात्वे किं मानमिति वक्तव्यम्। न चा"काशो ह वै" इत्यादिश्रुतय इति पूर्वमेवोक्ता इति वाच्यम्। तासु मिथ्याव्यावहारिकादिप्रतिपादकपदानामेकतमस्याप्यदर्शनात्। प्रत्युत नामरूपादिहेतुत्वप्रतिपादनपराणां पदानामेवोपलभ्यमानत्वात्।

अत एव न नामरूपयोरपि मिथ्यात्वम्। "यस्य नाम महद्यशः", "अथ नामधेयम्, "सत्यस्य सत्यं प्राणा वै सत्यं, तेषामेष सत्य" मित्यादिना सत्यत्वश्रवणात्।

नापि तस्य ज्ञानशक्त्यादीनां व्यावहारिकत्वं वक्तुं शक्यम्।

"परास्य शक्तिर्विविधैव श्रूयते
स्वाभाविकी ज्ञानबलक्रिया च"।

इति कण्ठरवेण स्वाभाविकत्वश्रवणात्।

न च तासां व्यावहारिकसत्त्वपरत्वम्, तत्त्वं च ज्ञानबाध्यत्वम्। भेदवाक्यानां प्रत्यक्षादिप्रमाणगम्यभेदविषयकत्वेनानुवादपरत्वाभ्युपगमादिति वाच्यम्। अपीतोक्तेः।

तथाहि, जीवब्रह्मभेदे प्रत्यक्षादीनामप्रसरादिति विवरणाचार्यवचनात् प्रत्यक्षादिशक्त्यभावेन भेदवाक्यानां स्वार्थ एव प्रामाण्यम्। अन्यथा स्वरूपस्यापि बाधोऽभ्युपगन्तव्यः। स्वाभाविकत्वसाम्यात्।

किंच, घटोऽस्तीति प्रत्यक्षेण निर्विशेषाधिष्ठानवस्तुनो गम्यत्वादभेदवाक्यानामेव तदनुवादपरत्वेन स्वार्थेऽप्रामाण्यम्। प्रत्यक्षगृहीतग्राहित्वात्। तथा च तथैव सिद्धान्तविरोधः। अन्यथा विवरणवाक्यभङ्गः।

किंच, ईश्वरस्यात्मभूत इवेत्यस्य को वार्थो विवक्षितः। स्वरूपात्यन्ताभिन्नत्वं वा। शुक्तिरजतवदसत्त्वस्य प्रतीयमानत्वं वा। स्वरूपापृथक्सिद्धत्वमात्रं वा।

नाद्यः। श्रुतिप्रमितत्वात्। अन्यथा नामैव ब्रह्मरूपमेव ब्रह्मेतीति प्रतीत्यापत्तेः।

नापि द्वितीयः। प्रतीयमानत्वे प्रमाणाभावात्। प्रत्युत "अथ नामधेयं सत्यस्य सत्य" मिति सत्यत्वश्रवणात्। "व्याकरवाणी" ति व्यक्तीकरणश्रुतेश्च। अन्यथा प्रत्यापयामीति श्रवणं स्यात्। चरमश्चेदिष्टापत्तिः। तदात्मकत्वेन स्वरूपापृथक्सिद्धत्वस्य सिद्धान्तेऽप्यङ्गीकारात्। "ऐतदात्म्यमिदं सर्व" मिति श्रुतेः।

नाप्यनिर्वचनीयत्वम्। अनिर्वचनीयख्यातिनिरासे तस्य पूर्वाचार्यैर्विस्तरेण निरस्तत्वात्।

तस्मात् सदेव।

किंच, ईश्वरस्यातात्त्विकत्वे निरीश्वरसांख्यादिभ्योऽवैदिकेभ्यस्तव सिद्धान्तस्य परवञ्चनं विना को वा विशेषः। सर्वस्य वेदस्य सार्वज्ञ्यसर्वसत्त्वादिनिलयपरब्रह्मपरत्वेन भवतां पारिभाषिकतर्कमात्रं विना प्रमाणान्तरं नास्तीत्यलं कुतर्कनिरासैः।

किंच, यदि प्रपञ्चमिथ्यावादः श्रौतः स्यात्, तर्हि शुक्तिरजतादिदृष्टान्ता वेद उपन्यस्ताः स्युः। यद्यनिर्वचनीयवादः सूत्रकाराभिप्रेतः स्यात्, तर्हि सूत्रितोऽपि स्यात्। न तु तथा दृश्यते।

तस्मात् कार्यं सदेवेत्यादितर्को अत्रानुसंधेयाः।

ननु ब्रह्मज्ञानेतराबाध्यत्वे सद्विविक्तत्वे च सति चिदन्यत्, मिथ्यादृश्यत्वाज्जडत्वात् परिच्छिन्नत्वाच्च, शुक्तिरूप्यवत्, इत्यनुमानमत्र प्रमाणमिति चेन्न। तस्य पक्षसाध्यहेतुदृष्टान्तानामसंभवेनाभासमात्रत्वात्।

तथाहि, चिदन्यद्रूपः पक्षः प्रमितो न वा। नाद्यः। प्रमितस्य निषेद्धुमशक्यत्वात्।

ननु प्रपञ्चस्य प्रत्यक्षगोचरत्वेऽपि सत्त्वानधिकरणत्वादिना मिथ्यात्वं वक्तुं शक्यमेवेति चेन्न। तव मते निर्विशेषस्य शुद्धस्य ब्रह्मणोऽपि सत्त्वानधिकरणत्वाभ्युपगमात् तत्रातिव्याप्तिः। शुद्धं ब्रह्म मिथ्या, सत्त्वानधिकरणत्वात्, तवाभिप्रेतप्रपञ्चवत्, इत्यनुमानात्।

न द्वितीयः। शशशृङ्गं तीक्ष्णाग्रं, शृङ्गत्वात्, हरिणशृङ्गवत्, खपुष्पं गन्धवत्, पुष्पत्वात्, प्रसिद्धपुष्पवत्, इति प्रयोगस्यैवाश्रयासिद्धत्वाच्च।

अथास्य साध्योऽपि दुर्निरूपः। तथाहि, साध्यमत्र मिथ्यात्वम्। तच्च सत्यं वा, तुच्छं वा।

आद्ये मिथ्यात्वस्य सत्यत्वेऽद्वैतभङ्गः।

द्वितीये मिथ्यात्वस्य मिथ्यात्वे प्रपञ्चस्य सत्यत्वापत्तिः। घटाभावाभावस्य घटरूपत्ववज्जगन्मिथ्यात्वस्य सद्रूपत्वात्। सिद्धसाधनतापत्तिश्च। यथा केन चिल्लौकिकेनोक्तं, देवदत्तो मृतः, परेण चाप्तैर्न निर्णीयोक्तस्तदभावः। एवं चाप्तवाक्याद्देवदत्तमरणस्य मृषात्वे तस्य जीवनं सिद्धम्। तद्वत्। मिथ्यात्वस्याबाध्यत्वेऽद्वैतहानिः। बाध्यत्वे जगतः सत्यत्वमित्युभयतः पाशा रज्जुरित्यर्थः।

किंच, किं तावन्मिथ्यात्वम्। न च सदसत्त्वानधिकरणत्वम्, तत्त्वं तु सत्त्वविशिष्टासत्त्वाभावरूपमिति वाच्यम्। सदेकस्वभावे जगति विशिष्टभावस्येष्टत्वात्।

न च सत्त्वात्यन्ताभावासत्त्वात्यन्ताभावरूपं द्वयमिति वाच्यम्। सत्त्वासत्त्वयोरेकतराभावेऽपरस्य सत्त्वावश्यकत्वेन व्या-

घातात् । निर्धर्मकब्रह्मवत् सत्त्वराहित्येऽपि सद्रूपत्वोपपत्त्या मिथ्यात्वासिद्धेः ।

एतेन सत्त्वात्यन्ताभावविशिष्टासत्त्वात्यन्ताभावरूपं विशिष्टं तत्त्वमित्यपि निरस्तम् । दोषसाम्यात् ।

ननु क्वचिदुपाधौ सत्त्वेनाप्रतीयमानत्वमसत्त्वं, त्रिकालाबाध्यत्वं सत्त्वं, तयोरभावः साध्य इति चेन्न । असल्लक्षणस्यासङ्गे ब्रह्मण्यतिव्याप्तेः । तस्याप्युक्तासत्त्वाङ्गीकारे सद्भिन्नेति विशेषणस्य वैयर्थ्यापत्तेः । शब्दाभासेन तुच्छस्यापि क्वचिदुपाधौ सत्त्वेन धीसंभवाच्च । उक्तासत्त्वाभावस्य शून्यवादिभिः प्रपञ्चे स्वीकाराच्च । लाघवात् सत्त्वासत्त्वयोः परस्पराभावस्यैवौचित्याच्च ।

नन्वेकेनैव सर्वानुगतेन ब्रह्मसत्त्वेन सर्वत्र सदिति ज्ञानोपपत्तौ प्रत्येकं सद्रूपत्वकल्पनमयुक्तम् । अन्यथानुगतव्यवहारानुपपत्तेरिति चेन्न । सत्तात्रैविध्यस्य त्वयापि स्वीकारात् । लाघवेन "यदासीत्, तदधीनमासी"दिति श्रुतेः प्रामाणिकपरतन्त्रसत्तयाप्यनुगतधीदर्शनाच्च ।

एतेन तत्प्रतियोगिकसत्प्रतियोगिकभेदद्वयं साध्यमिति निरस्तम् । निर्धर्मके ब्रह्मण्यतिव्याप्तेश्च ।

न च सद्रूपं ब्रह्म तदभावाधिकरणमिति वाच्यम् । प्रपञ्चेऽपि साम्यात् ।

न च ब्रह्मणो निर्धर्मकत्वात् सत्त्वासत्त्ववत् तत्तदधिकरणत्वमपि नास्तीति वाच्यम् । निर्धर्मकत्वहेतुसत्त्वासत्त्वाभ्यां व्याघातात् । सत्त्वासत्त्वाद्यनधिकरणत्वनिषेधे सदसत्त्वाधिकरणत्वापत्तेरिति साध्यासंभवः ।

एवं हेतूनामप्याभासत्वमेव । तत्र दृश्यत्वं नाम किम् । वृत्तिव्याप्यत्वं वा फलव्याप्यत्वं वोभयव्याप्यत्वं वा ।

नाद्यः । ब्रह्मण्यतिव्याप्तेः । तस्यापि वेदान्तजन्यवृत्तिविषयत्वात् । अन्यथा वेदान्तस्य वैयर्थ्यापत्तेः ।

न च "यत् तदद्रेश्य"मिति श्रुतेः शुद्धं न दृश्यम् । किंतूपहितमेव । तस्य मिथ्यात्वं चेष्टापत्तम् । न हि वृत्तिदशायामनुपहितं तद्भवतीति वाच्यम् । उपहितभान उपधेयभानावश्यकत्वात् । प्रसिद्धार्थकयत्तच्छब्दयोरयोगाच्च । विशिष्टभाने विशिष्टाभानं ह्यावश्यकम् । न हि दण्डीति ज्ञाने पुरुषस्य विषयता नास्ति ।

न च विशेष्यतापन्नं मिथ्यैवेति वाच्यम् । अधिष्ठानस्याधिकसत्ताकत्वनियमेन विशेष्यतापन्नस्य मृषात्वेऽधिष्ठानत्वासंभवात् । नहि विशेष्यतापन्नं सर्वथा ज्ञानाविषयं ह्यधिष्ठानं भवति । जगतोऽपि विशेष्यतापन्नत्वादिना मिथ्यात्वं स्वरूपेण तु सत्यत्वमित्यापत्त्याऽद्वैतहानिः स्यात् ।

किंच, शुद्धस्याविषयत्वे मोक्षाभावप्रसङ्गः । उपहितज्ञानेनैव मोक्षसिद्ध्यापसिद्धान्तापत्तेश्च ।

किंच, सत्यस्य शुद्धस्यैव व्यावहारिकघटाद्यधिष्ठानस्य घटादिगोचरचाक्षुषादिवृत्तिविषयतायाः सत्त्वात् । न ह्यधिष्ठानमविषयीकृत्याध्यस्तं वृत्तिर्विषयीकरोति । "मनसैवानुद्रष्टव्यं, दृश्यते त्वग्र्यया बुद्ध्ये"ति श्रुतेः ।

न चोपहितविषयिकैवेयं श्रुतिरिति वाच्यम् । त्वन्मते भाष्यविरोधात् । तथाहि, "तदव्यक्तमाह ही"ति सूत्रभाष्ये, अव्यक्तं परं ब्रह्मेन्द्रियायाह्यं निरूप्य, "अपिच संराधने प्रत्यक्षानुमानाभ्या"मिति सूत्रभाष्ये च 'अपिचैनमात्मानं निरस्तसमस्तप्रपञ्चमव्यक्तं संराधनकाले पश्यन्ती'त्यादिना परस्यैव पश्यतेः क्रियायाः कर्मत्वस्वीकारेण तद्बाधात् । तत्रोदाहृतश्रुतिस्मृतीनां "ततस्तु तं पश्यति निष्कलं ध्यायमान"इति,

"ज्योतिः पश्यन्ति युञ्जानाः",

योगिनस्तं प्रपश्यन्ति भगवन्त सनातनम्" ।

इत्यादीनां बाधाच्च ।

किंच, उक्तश्रुत्यादीनां यदि शुद्धविषयकत्वं नाङ्गीक्रियते, तर्हि शुद्धस्य ज्ञानाभावे तादवस्थ्य तदाच्छादकमूलाज्ञानस्याप्यनिवृत्त्यानिर्मोक्षप्रसङ्गः । शबलज्ञानस्य मोक्षासाधकत्वाभ्युपगमात् । "परात् परं पुरिशयं पुरुषमीक्षत" इत्यादिना परात् परस्यैव ब्रह्मणो दर्शनक्रियाकर्मत्वश्रवणाच्च । तद्बाधोऽपि दुष्परिहरः ।

नापि फलव्याप्यत्वम् । अतीन्द्रियेष्वपञ्चीकृतभूतेषु चोदनैकवेद्यधर्मादौ तव मते साक्ष्येकवेद्येषु सुखादौ तदभावेनाव्याप्तिप्रसङ्गात् तेषां सत्यत्वापत्तेः । सुखादयो धर्मादयश्च सत्याः, फलव्याप्यत्वराहित्यात्, ब्रह्मवत् । इति प्रयोगात् ।

नाप्युभयव्याप्यत्वं तत्त्वम् । विशेषस्य सामान्यानतिरेकेण वृत्तिव्याप्यत्वाभ्युपगमादेव दृश्यत्वसिद्धा ब्रह्मण्यतिव्याप्तिप्रसङ्गस्य दुर्वारत्वादिति संक्षेपः ।

नापि जडत्वं हेतुः । तत्त्वं न तावदज्ञानत्वम् । वृत्तिज्ञाने भागासिद्धेः । आत्मनि व्यभिचाराच्च ।

तथाहि, आत्मरूपं ज्ञानं सविषयं न वा । आद्ये स्वविषयं, परविषयं वा । नाद्यः । त्वयानभ्युपगमात् । न द्वितीयः । मोक्षे परस्याभावात् । त्वन्मते वर्तमानस्यैव विषयत्वात् ।

न चार्थोपलक्षितप्रकाशस्यैव ज्ञानत्वात् तस्य मोक्षेऽप्यनपाय इति वाच्यम् । यदा कदाचिद्विषयसंबन्धान्मोक्षे ज्ञानित्ववद्यदाकदाचिद्दुःखादिसंबन्धाद्दुःखित्वाद्यापत्तेः । अभावादिषु सप्रतियोगित्वादेरिव ज्ञानसविषयत्वस्यापि स्वाभाविकस्य धर्मसमसत्ताकस्य दर्शनात् ।

न च सविषयत्वं ज्ञानस्य विषयेण सहाध्यासिकः संबन्धः ।

स च न स्वाभाविकः । एतद्धेत्वधीनमिथ्यात्वसिद्धेः प्रागाध्यासिकसंबन्धासिद्धेः । मोक्ष आध्यासिकसंबन्धाभावाच्च । अज्ञानेच्छादेरिव ज्ञानस्यापि सविषयतायाः स्वाभाविकत्वात् । भोक्तृभोग्यं विना भुजेरिव ज्ञातृज्ञेयं विना ज्ञानस्यासंभवात् ।

न चानादौ तदनपेक्षा । अनादेः प्रागभावस्य प्रतियोग्यपेक्षाया जात्यादेर्व्यक्त्यपेक्षाया अज्ञानस्य विषयाश्रयापेक्षाया दर्शनात् ।

ज्ञानस्य ज्ञानत्वं हि ज्ञेयोल्लेखितम् । तच्चातीतादिज्ञानस्याप्यक्षतम् । तच्च तवानिष्टम् । उल्लेखस्य तव संसारत्वेन मोक्षे तदुल्लेखे तद्विप्लवप्रसङ्गात् ।

नापि ज्ञानस्य निर्विषयत्वं संभवति । ज्ञानत्वहानेः । अर्थप्रकाशत्वरूपज्ञानस्वभावाभावे घटादेरपि ज्ञानत्वापातात् । ज्ञातुरर्थप्रकाशस्य ज्ञानत्वादिति विवरणोक्तिबाधाच्च ।

किंच, आत्मरूपं ज्ञानं प्रमा, भ्रमो वा । नाद्यः । तद्विद्यस्याविद्यादेः सत्यत्वापत्तेः । नान्त्यः । भ्रमस्य दोषजन्यत्वनियमेनात्मनस्तदभावात् । उभयभिन्नत्वे ज्ञानमेव न स्यात् ।

न च तार्किकाभिमतेश्वरज्ञानवद् घटादिनिर्विकल्पकज्ञानस्य चोभयवैलक्षण्येऽपि ज्ञानत्वोपपत्तेरीश्वरज्ञानस्य प्रमात्वे गुणजन्यत्वस्य भ्रमत्वे दोषजन्यत्वस्य चापत्तेः, निर्विकल्पकस्य तद्वति तत्प्रकारकत्वाभावादिति वाच्यम् । अबाधितार्थकस्वरूपयाथार्थ्यप्रामाण्यस्येश्वरीयज्ञानादावपेक्षितत्वे विशेष्यावृत्त्यप्रकारकत्वरूपप्रामाण्यस्येश्वरज्ञाननिर्विकल्पकयोरक्षतत्वाच्च । प्रमासामान्ये च न गुणजन्यत्वं नियामकम् । किंतु तद्विशेष एव । "प्रमामात्रे च नानुमतो गुण" इति मणिकृतोक्तेः । किंतु दोषाजन्यत्वमेव हि तन्नियामकम् ।

नापि ज्ञानपदजन्यप्रतीतिविशेष्यभिन्नत्वं जडत्वम् । वृत्त्यात्मकज्ञाने भागासिद्धेः । लाक्षणिकज्ञानपदजन्यधीविशेष्यत्वस्य देहेन्द्रियादावपि सत्त्वेनासिद्धेर्नाप्यनात्मत्वं जडत्वम् ।

तथाहि, आत्मत्वं न जातिः । तस्यैकत्वात् । विशिष्टानां भेदेऽपि पक्षान्तःपातित्वात् । प्रतियोग्यसिद्ध्या तदभावासिद्धेः । न चानानन्दत्वं जडत्वम् । वैषयिकानन्दे भागासिद्धेः ।

न च सोऽपि ब्रह्मानन्द इति वाच्यम् । क्षीरनीरपानजन्यानन्दानां तारतम्योपलब्ध्या ब्रह्मत्वासंभवात् ।

न च दुःखनिष्ठोत्कर्षापकर्षयोरानन्द उपचारः । दुःखलेशाप्रतीतावप्यानन्दतारतम्यस्य प्रतीतेः ।

नाप्यज्ञातृत्वं जडत्वम् । तव मतेऽन्तःकरणस्य ज्ञातृत्वेन तत्राव्याप्तेः । शुद्धे ब्रह्मण्यतिव्याप्तेश्च । शुद्धं ब्रह्म मिथ्या, अज्ञातृत्वात्, आकाशादिवत्, इत्याभाससाम्यात् ।

न च कल्पितज्ञातृत्वं शुद्धेऽपि स्वीक्रियत इति वाच्यम् । कल्पितेन हेत्वभावेनातिव्याप्त्यनुद्धारात् । शुद्धत्वभङ्गाच्च । शुद्धाशुद्धविभागासिद्धेश्चेति संक्षेपः ।

नापि परिच्छिन्नत्वस्य हेतुत्वम् । आभाससाम्यात् ।

तथाहि,तत्त्वं नाम देशकालवस्तुपरिच्छेदवत्त्वम् । तत्रात्यन्ताभावप्रतियोगित्वं देशपरिच्छिन्नत्वम् । ध्वंसाभावप्रतियोगित्वं कालपरिच्छिन्नत्वम् । अन्योन्याभावप्रतियोगित्वं वस्तुपरिच्छिन्नत्वम् । इति विवेकः ।

तत्र नाद्यद्वितीयौ । आकाशरूपदेशस्य कालस्य चापरिच्छिन्नत्वेन तत्राव्याप्तेः । "आकाशवत् सर्वगतश्च नित्यः", "सदेव सौम्येदमग्र आसीत्", "अथ मर्त्योऽमृतो भवति", "यत्र त्वस्य सर्वमात्मैवाभूत्", "अथ संपत्स्ये", इत्यादिश्रुतिभिः सदा सर्वत्र कार्यदर्शनात्, इत्यादियुक्त्या धर्मिग्राहिणा साक्षिणा च तथात्वावगमात् ।

नच "आत्मन आकाशः संभूत" इत्याकाशस्य कालपरिच्छेदश्रवणादुक्तविरोध इति वाच्यम् । भूताकाशस्योत्पत्तिनाशादिसंभवेऽप्यव्याकृताकाशस्य तदयोगात् । नहि पूर्तिं विनावकाशनाशः संभवति ।

एतेन विमतं, मिथ्या, विभक्तत्वात्, सन् घटः सन् पट इति घटादिकमननुगतमनुगतसद्रूपे विभज्यत इति निरस्तम् । नीलो घटः, नीलः पटः, घटश्चलति, पटश्चलति, असन्नृशृङ्गम्, असत् खपुष्पम्, इत्यादौ नीलादिषु घटादीनामसन्नृशृङ्गादीनामध्यासापत्तेः । अयं सर्पोऽयं सर्प इति रज्जुमूलादिष्वनुगतस्य सर्पस्यारोपवदननुगतेषु घटादिष्वनुगतसद्रूपस्यारोपापत्तेश्च । खण्डो गौर्मुण्डो गौरित्यादावनुगतगोत्वादौ व्यक्तेरारोपापत्तेश्च ।

न च सद्रूपब्रह्मभिन्नगोत्वादेरनभ्युपगमान्नोक्तदोष इति वाच्यम् । अगवादिव्यावृत्तस्य गवादिवैलक्षण्यव्यवहारस्यानुपपत्तेः । सद्रूपस्य सर्वानुगतत्वेन व्यावृत्तेरसंभवात् ।

न च तत्तद्व्यक्तिविशिष्टं सत् सामान्यमेव तत्तद्व्यवहारजनकमिति वाच्यम् । तत्तद्व्यक्तिविशिष्टस्य मिथ्याभूतस्य व्यक्त्यनधिष्ठानत्वेन तन्नत्यव्यक्तेरध्यासायोगात् । तत्सामान्यव्यक्तेराध्यासिकसंबन्धातिरिक्तसंबन्धस्य त्वयानङ्गीकारात् ।

एतेन घटादिकं सद्रूपं कल्पितम्, प्रत्येकं तदनुविद्धत्वेन प्रतीयमानत्वात्, प्रत्येकं चन्द्रानुविद्धजलतरङ्गचन्द्रवत् । इति निरस्तम् । रूपादिहीनस्य ब्रह्मणश्चाक्षुषत्वायोगात् । चक्षुरादिगृहीतस्य दृश्यस्य मिथ्यात्वेन घटाद्यनधिष्ठानत्वात् ।

किंच, ब्रह्मणः सर्वेन्द्रियग्राह्यत्वे घटादिवन्मिथ्यात्वस्यावश्यंभावात् । अधिष्ठानरूपं निर्विशेषं वस्तु मिथ्या, इन्द्रियगोचरत्वात्, तव मते घटादिवत्, इत्यनुमानात् ।

किंच, ब्रह्मण इन्द्रियग्राह्यत्वाङ्गीकारे महावाक्योपदेशस्यानुवादकत्वापत्तेः। महावाक्योपदेशो न स्वार्थपरः, इन्द्रियगृहीततया हकत्वेनानुवादरूपत्वात्, अग्निर्हिमस्य भेषजमिति वाक्यवत्, इत्यनुमानात्।

एतेन द्रव्यग्रहे रूपाद्यपेक्षा। ब्रह्मणस्तु द्रव्यत्वाभावेन तदनपेक्षत्वान्नोक्तदोषावकाशः। "अस्थूलमनण्व"ति परिमाणनिषेधादिति निरस्तम्। उक्तश्रुतेराकृतिपरिमाणनिषेधेन नैराकाङ्क्ष्यात्। अन्यथा "अणोरणीयान् महतो महीया" नित्यादिश्रुतिव्याकोपात्।

नापि तृतीयोऽन्योन्याभावप्रतियोगित्वरूपो वस्तुपरिच्छेदरूपो हेतुः। अनृतादौ ब्रह्मात्यन्ताभावान्योन्याभावयोः सत्त्वात् तत्रातिव्याप्तेः। ब्रह्म मिथ्या, अनृताद्यन्योन्याभावप्रतियोगित्वात्, तव मते घटपटादिवत्, इत्यनुमानात्।

नन्वनृतादौ ब्रह्मात्यन्ताभावान्योन्याभावयोर्मिथ्यात्वात् तत्र ब्रह्मसंसर्गस्य चाभिन्नत्वान्नोक्तदोष इति चेन्न। तथात्वे मिथ्यात्वाभिन्नत्वसंसर्गयोस्तात्त्विकत्वापत्त्या तद्व्यापारमार्थिकस्यैवाभावस्याकामेनापि त्वयाङ्गीकार्यत्वात्। संदिग्धानैकान्त्यस्य दुर्वारत्वात्। अप्रयोजकत्वाच्च।

किंच, ब्रह्माभिन्नत्वस्य तात्त्विकप्रपञ्चेऽप्यभावाद् ब्रह्मण्यनृतव्यावृत्तिस्तात्त्विकी। त्वया तस्य न तथात्वमनुमातुं शक्यते। कल्पितस्य स्वात्मनि सत्त्वात् सिद्धं दृश्यत्वादिहेतूनामाभासत्वम्। सोपाधिकत्वात्। उपाधयश्च सप्रकारकधीबाधार्हत्वम्, अध्यस्ताधिकदोषप्रयुक्तभानत्वं प्रतिभासमात्रशरीरत्वं चेत्यादयः। देहात्मैकाध्यासस्यापि सप्रकारकभेदविषयकज्ञानबाधयोग्यत्वान्न तत्र साध्याव्याप्तिः।

न च सप्रकारकेति, अध्यस्ताधिकेति च, विशेषणवैयर्थ्यम्, तद्भिन्नैवोपाधेः साध्यव्यापकत्वादिति वाच्यम्। विशिष्टाभावस्यातिरिक्तत्वेन तद्विशिष्टस्यैव साध्यव्यापकतया वैयर्थ्याभावात्। तावन्मात्रस्य तु साधनव्यापकत्वान्नोपाधित्वमिति संक्षेपः।

किंच, अस्य प्रयोगस्य दृष्टान्तोऽपि दुर्निरूपः। शुक्त्यादेः पक्षान्तःपातित्वेन तत्प्रयोगस्याभासमात्रत्वात्।

न च मास्तु शुक्त्यादिदृष्टान्तः, व्यतिरेकदृष्टान्तस्य ब्रह्मणः सत्त्वान्नोक्तदोषावकाश इति वाच्यम्। विकल्पासहत्वात्।

तथाहि, शुद्धस्य दृष्टान्तत्वं विशिष्टस्य वा।

नाद्यः। सर्वप्रमाणागोचरस्य ब्रह्मणः शशशृङ्गकल्पत्वेन दृष्टान्तानर्हत्वात्। तव मते व्यतिरेकानुमानानङ्गीकाराच्च।

तस्मात् पक्षादीनामाभासत्वेनापातरमणीयत्वमुक्तानुमानस्येति सिद्धम्।

किंच, विश्वं यदि कल्पितं स्यात्, तर्हि साधिष्ठानं स्यात्। सामान्यतो ज्ञातत्वे सत्यज्ञातविशेषवत्त्वस्याधिष्ठानत्वप्रयोजकस्य निर्विशेषे निःसामान्ये ब्रह्मण्यसंभवात्। विश्वं यदि कल्पितं स्यात्, तर्हि प्रधानं स्यात्, न चैवमस्ति, तस्मान्न तथा। विश्वं यद्यध्यस्तं स्यात्, तर्हि ससंस्कारं स्यात्, न तु तदस्ति, तस्मान्न तथा।

न च स्वेनाध्यस्तः स्वारोपहेतुरिति वाच्यम्। भ्रमात् पूर्वं स्वस्य कार्यानुमेयसंस्काराध्यासकारणत्वासंभवात्। अन्यथा भ्रमहेतुसंस्कारस्याधिष्ठानसमसत्ताकत्वं दुर्वारम्।

न च संस्कारोऽज्ञातो व्यावहारिकः स्वेनारोपितः स्वाध्यासहेतुरस्त्येवेति वाच्यम्। अज्ञातस्याध्यस्तत्वे मानाभावेन पारमार्थिकत्वप्रसङ्गात्।

किंच, विश्वं यद्यध्यस्तं स्यात्, तर्हि ससादृश्यं स्यात्, न चैवमस्ति, तस्माच्च तथा।

न च पीतः शङ्ख इति सादृश्यं विनापि भ्रमो दृष्ट इति वाच्यम्। द्रव्यत्वादिना तत्रापि सादृश्यज्ञानवत्त्वस्यानुमेयत्वात्। स्वर्णमयशङ्खमूर्तौ तस्य प्रत्यक्षसिद्धत्वाच्च।

किंच, विश्वं यद्यध्यस्तं स्यात्, तर्ह्यनादिकर्मादिजन्यं न स्यात्। अध्यासानादित्वस्य क्वापि प्रसिद्ध्यभावात्। प्रत्युत सादित्वस्य शुक्तिरूप्यादौ दर्शनात्।

तस्माच्चाध्यस्तत्वमित्यादिप्रतिकूलतर्कैः प्रतिहतमिदमनुमानं न प्रामाण्यार्हमित्यलं विस्तरेण।

अप्रमाणत्वात्, सूत्रकारपक्षहीनत्वाच्चोपेक्षणीयोऽयमनिर्वचनीयवादो मुमुक्षुभिः।

असद्वादस्त्वग्रे निरस्यते।

तस्मात् सदेवेदं विश्वम्। "सदेव सौम्येदमग्र आसी"दिति श्रुतेः। "सत्त्वाच्चावरस्ये"ति वक्ष्यमाणसूत्राच्च।

तच्च कार्यं कारणात्मकत्वात् तदपृथक्सिद्धमित्याह भगवान् सूत्रकारः। "तदनन्यत्व"मिति। तस्य कार्यस्य ब्रह्मणः सकाशादनन्यत्वम्।

यद्वा, तस्मात् कारणाद् ब्रह्मणोऽनन्यत्वं सदात्मकत्वादिनाऽपृथक्सिद्धत्वं कार्यस्य जगतः। तत्र प्रमाणमाह। "आरम्भणशब्दादिभ्य" इति। आरम्भणशब्द आदिर्येषां, "विकारो नामधेयं मृत्तिकेत्येव सत्यम्", "सदेव सौम्येदमग्र आसीत्", "एकमेवाद्वितीयम्" "तदैक्षत बहु स्यां प्रजायेय", "तत् तेजोऽसृजत", "ऐतदात्म्यमिदं सर्वम्", "तत् सत्यं स आत्मा", "तत् त्वमसि", "सर्वं खल्विदं ब्रह्म", "तज्जलानिति", "तद्धेदं तर्ह्यव्याकृतमासीत्", "तन्नामरूपाभ्यां व्याक्रियते"त्यादीनां, तान्यारम्भणशब्दादीनि, तेभ्यो वाक्येभ्यः प्रमाणेभ्यः।

अत्रामनन्ति छन्दोगाः । "येनाश्रुतं श्रुतं भवती"त्यादिना ब्रह्मैकोपादानकारणविज्ञानेन सर्वकार्यविज्ञानं प्रतिज्ञाय तत्सिद्धये दृष्टान्तोपन्यासः । "यथा सोम्यैकेन मृत्पिण्डेन सर्वं मृण्मयं विज्ञातं स्यात्", "वाचारम्भणं विकारो नामधेयं मृत्तिकेत्येव सत्य"मिति, यथेति दृष्टान्ते मृत्पिण्डेन मृद्द्रव्यरूपतया विज्ञातेन सर्वं मृण्मयं मृद्विकारजातं घटशरावोदञ्चनादिकं मृदात्मकतया विज्ञातं भवति, तत्तदवस्थाविशेषमात्रत्वादुपादेयजातस्य । स्वोपादानापृथक्सिद्धत्वात्, इत्याह । "वाचारम्भण"मिति । कार्यजातं वाचा वागिन्द्रियेणारभ्यते, घटेन जलमाहरेत्यादिना, व्यवह्रियत इति वाचारम्भणम् । "कृत्यल्युटो बहुल"मिति कर्मणि ल्युट् ।

तद् द्विविधं, विकारो नामधेयं चेति । तत्र कम्बुग्रीवादिमद्व्यक्तिविशेषरूपो विकारशब्दवाच्यः । नामधेयं च घटादिशब्दवाच्यः शब्दविशेष एव ।

ननु सत्यकारणं मृत्तिका, स्वतन्त्रसत्ताश्रयत्वात् सत्या, तथा घटादीनां कार्याणामपि पृथक् स्वतन्त्रसत्त्वं भवतु, उपलभ्यमानत्वात्, इत्यत्राह "मृत्तिकेत्येव सत्य"मिति । एवकारोऽन्ययोगव्यवच्छेदार्थः । इतिशब्दः कारणपरामर्शपरः । मृत्तिकाकारणभूतैव स्वतन्त्रसत्ताश्रया । न तु तथा घटादि कार्यं स्वातन्त्र्येण सत्यम् । कारणव्यतिरेकेणानुपलभ्यमानत्वात् । तदन्वितस्य चोपलभ्यमानत्वाच्चेति दृष्टान्तः ।

एवमाकाशादिप्रपञ्चजातस्य ब्रह्मोपादेयतया तदात्मकतया च स्वतन्त्रसत्तानधिकरणत्वात् स्वोपादानकारणभूतब्रह्मापृथक्सत्त्वमेवेति सिद्धान्तः । "ऐतदात्म्यमिदं सर्व"मिति श्रुतेः ।

"वासुदेवात्मकान्याहुः क्षेत्रं क्षेत्रज्ञ एव च" ।

इत्यादिस्मृतेश्च ।

यत् तु कैश्चित् स्वकपोलकल्पितानश्रौतदृष्टान्तांश्शुक्तिरूप्यमृगतृष्णोदकादीनुपन्यस्याकाशादिकार्यस्य मृषात्वं प्रतिपादयद्भिरेतत् सूत्रं विवर्तपरत्वेन व्याख्यायते, तदसमीचीनम् । प्रतिज्ञादृष्टान्तासंभवात् ।

तथाहि, "येनाश्रुतं श्रुत"मित्यादिश्रौतप्रतिज्ञावाक्ये कारणविज्ञानेन कार्यविज्ञानं प्रतिज्ञातम् । तत्र तावत् कारणं शुद्धं, निर्विशेषं ब्रह्म वा, उपहितं, वा ।

नाद्यः । तस्य कारणत्वानभ्युपगमात् । तत्र प्रमाणाभावेन तद्विज्ञानस्यैवासंभवाच्च । "तमेव विदित्वातिमृत्युमेति",

"यदा चर्मवदाकाशं वेष्टयिष्यन्ति मानवाः" ।

इत्यन्वयव्यतिरेकश्रुतिव्याकोपाच्च । तज्ज्ञानाभावेऽनिर्मोक्षप्रसङ्गाच्च ।

न द्वितीयः । तद्विज्ञानस्य मोक्षहेतुत्वेनाप्रयोजकत्वात् । उपहितस्यैव ब्रह्मणो जगत्कारणत्वेन तज्ज्ञानेन तदुपादेयज्ञाने जातेऽपि तस्य मोक्षहेतुत्वेन मिथ्यात्वेन चानिर्मोक्षप्रसङ्गस्यावश्यंभावात् । अन्यथोपहितं ब्रह्मैव मुक्तोपसृप्यं स्यात् । शुद्धस्यासिद्धेश्चेत्यर्थः ।

किंच, शुक्तिरूप्यमृगतृष्णोदकादिदृष्टान्तानामप्यप्रामाण्यम् । अश्रौतत्वात् । श्रौततात्पर्यविरोधाच्च । मृत्तिकाद्युपादानपदार्थज्ञानाद्यथा घटादितत्कार्यजातस्य विज्ञानं तदुपादेयत्वात् सर्वप्राणिगोचरम् । न तथा शुक्तिज्ञानाद्रूप्यमात्रस्य, ऊषरज्ञानाद्वोदकमात्रस्य ज्ञानं कस्याप्यनुन्मत्तस्य जायते । तदुपादेयत्वाभावात् ।

तस्माद्दृष्टान्ताभासत्वमेव तेषामिति सिद्धम् । "लौकिकपरीक्षकाणां यत्र बुद्धिसाम्यं स दृष्टान्त" इति गौतमीयलक्षणसूत्रात् ।

ननु घटादीनामपि मृदादावध्यस्तत्वेन विवर्तपक्षेऽपि दृष्टान्तत्वसंभवान्नाभासत्वमिति चेन्न । मृदादिज्ञानेन घटादीनां बाधादर्शनात् । बाधं विना चारोपे मानान्तराभावात् । मृदादिज्ञानेऽपि घटादीनां पूर्ववद्विद्यमानानां प्रातीतिकत्वासंभवाच्च ।

किंच, व्यावहारिकविवक्षायां मृदादिवत् कारकव्यापारसाध्यानां जलाहरणादिकार्योपयुक्तानां चावस्थाविशेषाणां घटादीनामपि सत्त्वात्, तात्त्विकसत्त्वविवक्षायां च मृदादेरपि सत्यत्वाभावाच्च दृष्टान्ताभासत्वम् ।

ननु घटादयो न तावन्मृदादिमात्रेऽध्यस्ताः, किंतु मृदाद्यवच्छिन्नचेतन एव । तथात्वे च मृदाद्यवच्छिन्नतत्त्वज्ञानाभावात् तद्बाधो युक्त एवेति चेन्न । प्रमाणहीनत्वात् । श्रौतदृष्टान्तविरुद्धत्वाच्च । नहि श्रुतौ मृदाद्यवच्छिन्नचेतनविज्ञानेन सर्वं मृण्मयं विज्ञातं स्यादिति दृष्टान्त उपन्यस्तः । किंतु मृत्पिण्डमात्र एव ।

तस्मात् कपोलकल्पितपारिभाषिकमात्रत्वाद्दृष्टान्ताभासत्वमेव ।

ननु शुक्तौ ज्ञातायां रूप्यं तत्त्वतो ज्ञातं भवति, सा हि तस्य तत्त्वम् । एवं ब्रह्मज्ञानात् सर्वं तत्त्वतो ज्ञातं भवतीति श्रीवाचस्पतिमिश्रैर्भामतीप्रबन्धे प्रतिपादनात् । किंच, यथा घटकरकाद्याकाशानां महाकाशादनन्यत्वं, यथा च मृगतृष्णिकोदकादीनामूषरादिभ्योऽनन्यत्वं दृष्टम्, नष्टस्वरूपत्वात् स्वरूपेणानुपाख्यत्वात् । एवमस्य भोग्यभोक्त्रादिप्रपञ्चस्य ब्रह्मव्यतिरेकेणाभाव इति द्रष्टव्यमित्यादिश्रीभगवत्पादैर्भाष्यकारैश्चोक्तत्वात् कथं प्रलपितमिति चेन्न । एवं तर्हि ब्रह्मज्ञानेन ब्र-

ह्मैव ज्ञातं भवतीत्यर्थ उक्तः स्यात् । तच्चायुक्तम् । सर्वमिति साधारणश्रवणात् । स्वस्य स्वहेतुत्वायोगात् । "येनाश्रुत"मिति श्रुतिगतादिपदवैयर्थ्याच्च ।

किंच, तत्त्वं नाम स्वासाधारणं स्वरूपम् । स्वासाधारणो धर्मो वा । नतु भ्रमाधिष्ठानम् । श्रौतदृष्टान्तानां मृत्पिण्डादीनां घटाद्यधिष्ठानत्वाभावात् । अन्यथा रजतादिवद् घटादीनामपि बाधप्रसक्तेः । बाधाभावान्यथानुपपत्तेरप्यत्र प्रामाण्यात् । एवं दार्ष्टान्तिकेऽपि ब्रह्मज्ञानात् प्रपञ्चाबाधदर्शनस्याप्यत्रध्यस्तत्वे मानत्वं बोध्यम् । अन्यथा शुक्तितत्त्वज्ञानाद्रूप्यनाशवद् ब्रह्मज्ञाने सर्वनाशापत्त्या सर्वविज्ञानासंभवादिति भावः ।

अपिच, वाचारम्भणशब्दस्य मिथ्यार्थकत्वे योगरूढेरभावात् । वाचारब्धकाव्यादेर्मिथ्यात्वादर्शनात् । वागालम्बनमात्रमिति व्याख्यानेऽश्रुतकल्पनात् । त्वया नामधेयमित्यस्यापि नाममात्रं ह्येतदिति व्याख्यातत्वेन पौनरुक्त्याच्च ।

ननु "को भवा"निति निर्देशो "वाचारम्भो ह्यनर्थक" इति श्रुतेर्वाचारम्भशब्दस्य मिथ्यापरत्वदर्शनात्, तथात्रापि बोध्यमिति चेन्न । स्मृतावपि पूर्वोक्तरूढ्याद्यभावेन त्वदिष्टपरत्वाभावात् ।

तथाहि, देहानां प्रकृत्युपादेयत्वेन प्राकृतत्वाविशेषात् को भवानिति निर्देशो देहविषयकप्रश्नोऽनर्थकः । अन्यथा शब्दमात्रस्यापि वागिन्द्रियारभ्यत्वसाम्याद् वाचेति वैयर्थ्यापत्तेः । अर्थासत्त्वेन वागादिप्रयोगस्य त्वय्यैवानुभूतत्वात् । न तु त्वदन्यैः कैश्चिदिति भावः ।

ननु वाचारम्भणनामधेयपदाभ्यां विचारासहत्वं विवक्षितम् । तथादिमविकारस्य घटादेः स्वरूपविचारे विकारो मिथ्याभूः । सत्यातत्स्वरूपविचारे च सापि मिथ्या । तद्धेतुभूतापञ्चीकृतभूतान्येव सत्यानि, तत्स्वरूपविचारे च तेषामपि मिथ्यात्वम् । किंतु तत्परमकारणं ब्रह्मैव सत्यमिति मृत्तिकेत्येव सत्यमिति सत्यमित्यत्र हेतुः । वाचारम्भणं विकारो नामधेयं, वाङ्मात्रं विचारासहम् ।

तस्मान्निर्विकारं ब्रह्मैव सत्यमिति चेन्न । विपरीतत्वात् । तथा च विकारस्य कारणात् पृथक्सत्त्वासिद्ध्या स्वतन्त्रसत्ताभावमेव बोधयति श्रुतिर्न तु स्वरूपेण मृषात्वम् । अन्यथा विचारासहत्वमात्रेण मिथ्यात्वकल्पनायां ब्रह्मणोऽपि "न सन्न चासदुच्यत" इति स्मृतेः सदसद्भ्यां विचारासहत्वेन मिथ्यात्वप्रसक्तेर्दुर्वारत्वात् । ब्रह्म मिथ्या, सदसद्भ्यां विचारासहत्वात्, तव मते पृथिव्यादिवत्, इति प्रयोगात् ।

किंच, विकारो नामधेयमित्यत्र साक्षात् कण्ठरवेण विकारशब्दपाठादपि विवर्तासिद्धेः । यदि श्रुतेर्विवर्तोऽभिप्रेतः स्यात्, तर्हि विकार इति मृत्पिण्डादिदृष्टान्तांश्च न श्रावयेत् । अपितु भ्रान्तिर्नामधेयमिति ब्रूयात् । शुक्तिरजतादिदृष्टान्तांश्चोपन्यस्येत् । नहि विवर्तकार्यं विकारः । अपितु भ्रममात्रम् । अन्यथा विवर्त एव न स्यात् ।

किंच, यदि नामरूपात्मकं कार्यमनन्तमेव, तर्हि वेदान्तशास्त्रस्य तद्विचारस्य चापि मृषात्वाविशेषेण तस्मात् सद्रूपब्रह्मभावापत्तिलक्षणमोक्षस्यापि कथमिव सिद्धिरिति मनीषिभिर्वैदिकंमन्यैर्विचारणीयमेकाग्रमनसा । "कथमसतः सज्जायेते"ति श्रुतेः ।

"साधनं चेदवश्यं च परमार्थास्तिता भवेत् ।
सिद्धिर्नापरमार्थेन परमार्थस्य युज्यते" ॥

इति भट्टपादैरुक्तत्वाच्च ॥ १४ ॥

॥ शेषमपराङ्के ॥

॥ अथ ज्ञानसिद्धान्तचन्द्रिका ॥

बर्कलेसंज्ञकमहापण्डितविरचितज्ञानसिद्धान्तमालायाः

अवतारिता ।

॥ तत्रैकविंशतितमादि परिच्छेदाः ॥

२१–एतावता ग्रन्थेन जडद्रव्यसत्तासिद्धान्ते कामं खण्डितेऽपि तृप्तिर्न चेत्तादृशसिद्धान्तप्रसूता धर्मोच्छेदप्रसङ्गातिरिक्ता एव विविधा दोषा भ्रमा अध्यात्मशास्त्रधर्मशास्त्रयोराविर्भूता अनन्ता विवादाश्च प्रदर्शयितुं शक्यन्ते । परंतु न ते संप्रति सविशेषं व्याख्यायन्ते । तेषां यथावसरमुपरिष्टाद्व्याख्यास्यमानत्वात् । अस्मदुक्तार्थानां पूर्वसिद्धैरेव प्रत्ययैर्यथेष्टमुपपादितानामभिनवानुभवान्तरैर्दृढीकरणस्यानावश्यकत्वाच्च ।

२२–मन्ये जना मामवश्यमत्र चिरक्रियं कथयेयुर्यदहं द्वित्रपङ्क्तिभिरेव पर्याप्तोपपादनं विषयं महताप्रबन्धेनाऽपार्थमेव पल्लवितमकरवम् । अनुभवैकनिर्णायकानां विषयाणां सविशेषव्याख्यविस्तरनिरपेक्षत्वात् । यदि कोपि विचारशाली जनः स्वल्पमेव हृदि विचारयेत्तर्हि स्पर्शशब्दादिगुणानामनात्मनिष्ठत्वस्य सर्वथाऽज्ञातत्वस्य वा सर्वात्मना बाधितत्वं स्पष्टमवगच्छेत् । तवाभिप्रेतं परिमाणादीनां जडमधिकरणमथवाऽऽत्मनोन्यत्र क्वापि वर्तमानानि प्रसिद्धज्ञानसदृशानि ज्ञानान्तराणि वस्त्वन्तराणि वा वस्तुतोऽनुभवसिद्धानि चेत्सहसैवाहं स्वपक्षं परित्यज्य सर्वेषां त्वदभिमतबाह्यपिण्डानां तत्सद्भावप्रतिपादकहेतोस्तदुपयोगस्य चात्यन्ताभावेऽपि सत्तामनुमन्येय । अनुभवसिद्धवस्तूनां स्वयमेव प्रमाणभूतत्वात् ।

२३–ननु वनोद्देशे पादपाः पठनागारेच विविधानि पुस्त-

कानि तत्प्रेक्षकराहित्येपि कल्पयितुं शक्यन्त इति बाह्यपिण्डानामनात्मनिष्ठत्वस्य सर्वमनुष्याज्ञातत्वस्य वा कल्पने कोनाम प्रयास इति चेत्तदप्यापातदर्शिविलसितमेव । तथाहि । प्रेक्षकराहित्येऽपि वृक्षपुस्तकादिचिन्तनं तु वृक्षाणां पुस्तकानां वा तत्प्रेक्षकस्य कल्पनामकृत्वाऽऽत्मनि कल्पनमेवेति तच्चिन्तयितुस्त्वात्मनि तत्कल्पनादशायां तेषां विद्यमानत्वेऽपि कथंनाम वृक्षादीनां बाधितमनात्मनिष्ठत्वं ब्रूषे । बुद्धिगोचरीकरणस्यैव हि चिन्तनपदार्थत्वात् । स्वचिन्तनविषयाकारवृत्तिवञ्चितोभवान्त्सर्वसाक्षिणि प्रत्यगात्मन्यदत्तदृष्टिरात्मानं वृत्त्यात्मकमेवपश्यन्विषयाणामनात्मनिष्ठत्वं वदतीति नकिंचिदेतत् ।

२४—साहजिक विमर्शनैवेन्द्रियग्राह्यविषयाणां स्वाश्रितसत्ताकत्वमनात्मनिष्ठत्वं वेतिवचनस्यायुक्तत्वमाविष्कृतं स्यात् । ममत्विदं वचनं बाधितार्थक मर्थशून्यं वागारम्भणमात्रं वा प्रतीयते । तद्बाधितत्वनिर्णयाय चायमेवाद्वितीयोपायोयद् अवधानपुरस्सरमीषद्विचारदृष्ट्या तदर्थस्यालोचनम् । अयं चोपायस्तदयुक्तत्वापादकाखिलप्रमाणान्तराण्यतिशेते । अत इदमेव भूयोभूय एतद्ग्रन्थपाठकान् प्रति सप्रश्रयं प्रार्थये यत्तेस्वाश्रितसत्ताकजडद्रव्यविवादस्य निर्णयाय स्वविमर्शमेव समाश्रयेयुरिति ।

२५—अथ वृत्त्याद्यपरपर्यायाणां प्रत्यक्षाणां कः कर्तेतिजिज्ञासायां तेषामन्योन्यकर्तृकत्वं न संभवतीति तावदुच्यते । तथाहि शुद्धानां वृत्तीनामालोचने तासामात्मनिष्ठत्वमेव प्रतीयते नतु यत्किंचिच्छक्तिमत्त्वं शक्तिमद्वृत्त्यन्तरप्रतिमाभूतत्वं वा । निरूपितं चेदमष्टमपरिच्छेदे स्पष्टमेवेति जडानां रूपस्पर्शपरिमाणादिवृत्तीनां प्रत्यक्षकर्तृत्वं दुर्घटम् । एतेन परमाणुनिष्ठरूपस्पर्शादिकृतान्येवतत्प्रत्यक्षाणीति वदन्तः परास्ताः ।

२६—'नन्वेतानि वृत्तिज्ञानानि स्वभावसिद्धान्येवास्तामिति चेन्नैवम् । लोके कारणमन्तरा कार्यस्य क्वाप्यनुपलम्भादीदृशाभिनवकल्पनाया अन्याय्यत्वात्' । प्रकृते च वृत्तीनां निरन्तरक्रमस्याऽऽविर्भावतिरोभावयोश्च संपादकं विनाऽनुपपत्त्याऽस्ति कोप्यासां नियन्तेत्यनुमीयत एव । सच न वृत्त्यन्तररूपस्तत्समुदायरूपो जडद्रव्यात्मको वेति तु पूर्वमेव प्रदर्शितम् । एवं चाऽखिलवृत्त्याधारभूत आत्मैव तत्प्रयोजक इति पर्यवसीयते ।

२७—आत्मा च विशुद्धो निरवयवः शक्तिमान्त्सद्रूपश्च बोध्यः । अयं वृत्तिज्ञानसाक्षित्वाच्चिच्छक्तिरिति यथेच्छं वृत्तिप्रवर्तकनिवर्तकत्वात्कृतिरितिचाऽभिधीयते । सर्वासां वृत्तीनां जडात्मकत्वात्ताभिरात्मविषयिणी वृत्तिस्तत्प्रतिमारूपेण प्रकारान्तरेण वा कल्पयितुं न शक्यते । असंभाव्यं चैतत् यत्तस्य ज्ञानाविर्भावतिरोभावादिप्रयोजकशक्तिरूपस्यात्मनोवृत्त्यात्मकं ज्ञानं कदाचित् कल्प्येत । स्वकार्यानुमेयत्वेसति तत्साक्षित्वमेव चात्मन आत्मत्वं नतु वृत्तीनामिवात्मनोद्रष्टृत्वम् । यदि कोप्यत्र संदिह्यात्तर्हि स स्वयमेव तादृशप्रयोजकशक्तेः प्रतिबिम्बभूतं वृत्तिज्ञानं कल्पयितुं शक्यं नवेति हृदि विचार्य पश्येत् । अत्र केचित् । कृतिचिच्छक्तीत्वात्मधर्मौ तदाधारभूतसत्तैव चात्मा । तत्र कृतेश्चिच्छक्तेस्तदाधाररूपेणात्मनश्च वृत्त्यात्मकं ज्ञानं जन्यत इत्याहुः । वस्तुतस्तु । कृतिरात्मा चिच्छक्तिरित्यादयो न भिन्नभिन्नवृत्तिविशेषस्य वृत्तिसामान्यस्य वा वाचका अपितु सर्वात्मना वृत्त्यतिरिक्तस्य सत्ताविशेषस्यैव । अस्य वृत्तिप्रयोजकत्वाद्वृत्तिसादृश्यस्य तत्प्रतिनिधिकत्वस्य चायोगात् । नैतावता जीवात्मनः प्रयत्नेच्छाद्वेषेर्ष्यादितद्व्यापाराणां च ज्ञानसामान्याभावमभिप्रेम इति भ्रमितव्यम् अपितु वृत्त्यात्मकज्ञानाभावमेव । अन्यथा अहं प्रयते इच्छामि द्विष्यामीत्त्यादिप्रतीतीनामेवाऽनुपपत्तेः । 'साक्षादिन्द्रियजन्यानांस्मृत्यात्मकानां वा ज्ञानानामेव वृत्तिपदाभिधेयत्वेनेष्टेरात्मनस्तद्व्यापाराणां च ज्ञानस्याऽ तथाभूतत्वान्नतद्वृत्तिपदाभिधेयं ज्ञानं किंतु वृत्तिभिन्नमतएव स्वरूपज्ञानमित्येवाभिधीयत इति' ।

२८—नन्वात्मनः कर्तृत्त्वे किं मानमिति चेत्तथा प्रतीतिरेवेति ब्रूमः । यतोहि कृत्यैव विविधानि ज्ञानानि कल्प्यन्ते तिरोभाव्यन्ते स्वैरं तेषां संयोगविभागाश्च क्रियन्ते इति ज्ञानाविर्भावतिरोभावादीनामात्मकृतत्वादात्मनः कर्तृत्वं सुस्पष्टमेव । यच्चात्मातिरिक्तस्य कर्तृत्वं कृतिमन्तरैव ज्ञानोत्पत्तिरित्याद्युच्यते तदुपचारादेवेति बोध्यम् ।

२९—परंत्विदमत्रावधेयम् । आत्मनि कामं शक्तिशालिन्यपि काल्पनिकज्ञानानीवैन्द्रियकज्ञानानि न तदधीनानि सन्ति । यतोहि महति प्रकाशे नेत्रे उद्घाटितेऽपि नैतदस्मत्कृतिसाध्यं यद्वयं पश्येमैव नैव वा पश्येम दृष्टिगोचरीभूतान् विषयांस्तथैव स्थिरीकुर्यामेति वा । एवं श्रोत्ररसनानासिकाविषया अपि नास्मत्कृतिनियता इत्यात्मानायत्तानामैन्द्रियकज्ञानानां कोप्यात्मातिरिक्तः कर्तास्तीत्यनुमीयते । यदिच्छैव च सर्वमिदं विश्वं नियमयतीति ।

३०—ऐन्द्रियकज्ञानानि (विरोधिज्ञानाबाध्यत्वेन) दृढतरत्वाद् (अशेषविशेषावगाहित्वेन) उत्कटप्रभत्वाच्च काल्पनिकज्ञानेभ्यो भिद्यन्ते । तेषां सुस्थिरत्वात्क्रमिकत्वात्स्वैरमुत्पादितमानवकृतिसाध्यकाल्पनिकज्ञानेभ्योऽन्येनैव नियतेन श्लाघ्येन च क्रमेणोत्पन्नत्वात्तत्स्रष्टुर्नितान्तं दयालुत्वं बुद्धिमत्त्वं चानुमीयते । लोके यानि नियतपौर्वापर्यविशिष्टानि ज्ञानानि सुव्यवस्थितज्ञानव्यवस्था वोपलभ्यन्ते यद्वशाच्चाऽऽत्माऽस्मास्वै-

न्द्रियकाणि ज्ञानान्तराण्युद्भावयति तानि प्रकृतिनियमा इत्यभिधीयन्ते। ते च प्रकृतिप्रवाहेऽमुकान्यमुकानि ज्ञानानि नियमेनाऽमुकैरमुकैर्ज्ञानैरनुगम्यन्त इत्यनुभवाद्व्याप्तेर्वाऽवगम्यन्ते ।

३१—प्राकृतैरेव नियमैर्जना भाविदर्शिनो भूत्वा स्वस्वजीवनहितानुरोधेन स्वस्वकार्याणि प्रयुञ्जते । अन्यथा किं कार्यं किं चाऽकार्यं कथं स्वेष्टं सिद्ध्येत्किं वाऽनिष्टमपाकुर्यादित्यादौ सर्वे उन्मुग्धा एव भवेयुः । यतश्चाऽन्नं पोषयति स्वापः श्रममपनयति वह्निरुष्णायते यथाकालं बीजारोपणं सस्यलवनकाले सस्यसंपत्तिहेतुरमुकानां कार्याणाममुकान्येव कारणानीत्यादिकं न स्वसांकल्पिकज्ञानानामन्योन्यसंबन्धस्य दर्शनाज्ज्ञातुं शक्यते किंतु सुव्यवस्थितनियतिनियमावलोकनादेव । तादृशनियमनिरपेक्षः सुवृद्धोऽपि जनः सद्योजातबाल इव लौकिकव्यवहारनिर्वहणाय सर्वथाऽक्षम एव स्यात् ।

३२—अहो चित्रं यत् तस्य नियतिनियमनियामकप्रकृतेः सर्वनियन्तुः परेशितुर्दयाघनत्वविज्ञानमयत्वादिगुणगणान् प्रस्फुटं प्रकाशयन्नप्ययमद्भुतः सर्वत्रानुगुणैकरूपः प्रकृतिप्रवाहोऽमनुष्यबुद्धिं तमादिकारणं परात्मानं न प्रापयति प्रत्युतेहैव क्षुद्रकारणान्यन्वेष्टुं प्रवर्तयति । तथाहि । लोकाः कानिचिदैन्द्रियकज्ञानानि नियमेन ज्ञानान्तरानुगतानि दृष्ट्वा तेषां स्वकृत्यसाध्यत्वं च निश्चित्य तत्रैकस्मिन् कर्तृत्वमन्यस्मिंस्तत्कार्यत्वं चाऽऽरोपयन्ति । यथा कस्यचिद्भास्वरवर्तुलपिण्डस्य प्रत्यक्षमौष्ण्यप्रत्यक्षेणानुगतं विलोक्यौष्ण्यस्य सूर्यः कर्तेति निगमयन्ति । एवम् अनेककठिनपिण्डसंघर्षणगती शब्दानुगते दृष्ट्वा चरममाद्ययोः कार्यं मन्वते । परंत्वेतत्सर्वं पूर्वोक्तविधया बाधितं दुर्बोधं च ।

३३—अथ प्रकृत्यधिष्ठात्रेश्वरेण मर्त्येष्विन्द्रियद्वारोपनीतानि ज्ञानानि वास्तविकवस्तूनीत्युच्यन्ते । काल्पनिकज्ञानानां त्वेतदपेक्षया न्यूनोत्कटत्वस्थैर्यवत्वादनियतक्रमविशिष्टत्वाच्च तानि वस्त्वाभासा वस्तुप्रतिकृतयो वाऽभिधीयन्ते । परंतु वास्तविकवस्तूनामुत्कटतरत्वे व्यक्ततरत्वेऽपि काल्पनिकवस्त्वाभासादिवाऽऽत्ममात्रनिष्ठत्वं प्रत्यक्षीभूतत्वात्मकत्वमेव वा न तु वास्तविकवस्तूनीत्युक्त्याऽऽत्मेतराधिकरणकवस्तुविशेषात्मकत्वं बोध्यम् । तेष्वेतावानेव विशेषो यत्तानि काल्पनिकज्ञानानीवात्मपरतन्त्राणि न भवन्त्यपितु तत्र सर्वशक्तिमतः परमेश्वरस्येच्छयैवोपस्थाप्यन्ते इति तात्त्विकविषयाणां वस्त्वाभासानां चाऽऽत्मैकनिष्ठत्वं समानमिति दिक् ।

३४—अत्र कतिपये दोषाभासा उद्भाव्यन्ते लोकैरिति लक्षणमवशिष्टं व्याख्यानं विहाय तएव चादौ यथावन्निराक्रियन्ते । यद्यप्ययमारम्भ उत्कटप्रतिभाशालिनां विदुषामनावश्यक एव भासेत तथापि नहि सर्वे सर्वं जानन्तीत्यखिलजनमनःप्रविवेशयिषया चिकीर्षितोऽयं नैकान्तत उपेक्ष्यः स्यादित्याशासे । तत्रायमाद्य आक्षेपः । नन्वेतैः पूर्वोक्तसिद्धान्तैः सर्वाणि तात्त्विकानि भौतिकानि वस्तूनि संसाराद्विष्कास्यन्त एव तत्स्थाने च विज्ञानमयमृगतृष्णिकाकल्पानि ज्ञानानि स्थाप्यन्ते । यथा चोच्यते सर्वं सत्तावद्वस्तुजातं ज्ञानात्मकत्वादात्माश्रितमेवेति । तर्हि का दशाऽस्मदनन्तयोजनानां पारे वर्तमानस्याऽऽदित्यस्य चन्द्रमसो ग्रहताराणां च । किंवोच्येत गृहनदीनगनगरमहीरुहाणां किंबहुना स्वशरीराणां च विषये । किमेतानि सर्वाणि प्रातिभासिकान्येव न पुनस्तात्त्विकवस्तुरूपाणीति चेच्छृणु । निरुक्तैः सिद्धान्तैर्न कोऽपि विषयोऽपह्रियते न वा किमपि नवीनं विषयान्तरं तत्स्थानीक्रियते । नेत्ररसनानासिकाघ्राणत्वगादीनां सर्वेषां ज्ञानकरणानां यथास्थितमेव विषयाः स्थाप्यन्ते । व्यावहारिकाणां प्रातिभासिकानां च विषयाणाम् अन्तरं यथापूर्वमेव स्वीक्रियते । एकोनत्रिंशत्त्रिंशत्त्रयस्त्रिंशैः परिच्छेदैस्तात्त्विकवस्तूनां प्रातिभासिकवस्तुविरुद्धं तत्त्वं च पूर्वमेव प्रदर्शितम् । तत्रेयानेव विशेषः प्रतिपादितो यदुभयविधान्यपि वस्तूनि ज्ञानात्मकानीति तुल्यमेवात्मानमाश्रयन्तीति ।

३५—न कस्याप्यैन्द्रियकस्य काल्पनिकस्य वा विषयस्य सद्भावोऽपलप्यते । सर्वेषां नेत्रश्रोत्रादिगृहीतानां विषयाणां मयापि वस्तुतो वर्तमानत्वेनैव स्वीकृतत्वात् । यच्चाहं नितान्तं विद्वेष्मि निरस्यामि च तच्छास्त्रिणां जडमधिकरणं नाम । नचैतस्मिन्नपलपिते जनानां कापि क्षतिर्लक्ष्यते । केवलं नास्तिका एव तादृशनिरर्थकनामच्छलेन स्वनिरीश्वरवादं स्थापयितुं प्रयतन्ते । तदिदं निरुपयुक्तं नामच्छलं सर्वथोपेक्षितं चेच्छास्त्रविचारेषु विरलमेव विवादावसराः संभवेयुरिति विमत्सरा विद्वांसो विदांकुर्वन्तु ।

केशवशास्त्री मराठोपाह्वः

THE
ADVAITA-MAKARANDA.
AN EPITOME OF THE VEDÁNTA SYSTEM,
BY LAKSHMÍ-DHARA,
WITH THE COMMENTARY OF SVAYAM-PRAKÁŚA.

(Continued from page 130.)

Our author's meaning is as follows. A controversialist who asserts any other connection between the sentient and unsentient except the connection of illusory superposition should be asked what that connection may be: is it (1) that of conjunction, or (2) that of co-inherence, or (3) that of identity, (4) that of the relation of subject and object? It is not the first; for intelligence not being a basis of qualities and actions admits

of no conjunction; for such a basis is that which supports qualities, while intelligence has no qualities.

Nor is it co-inherence; for the intelligent and unintelligent are neither qualities nor things possessing qualities. If any one argue that the relation of co-inherence may exist between the intelligent and unintelligent, as between threads and cloth, in virtue of the relation of material cause and effect; we deny this, for it being the relation of whole and parts that determines the co-inherence between threads and cloth, the relation of material cause and effect is not the source of that co-inherence: else it would follow that the shuttle and the web would co-inhere; and moreover the relation of part and whole does not obtain between vision and the visible.

Nor is it identity; for the intelligent and non-intelligent as reciprocal contradictories cannot be identical.

Nor is it the relation of subject and object, for this supposes an original relation, and this has been stated to be impossible; since otherwise we should have to assert too much. Thus Sarvajñátma-muni says: Between these there is neither confusion nor combination, nor likewise is any co-inherence possible; hence in reference to the connection between intelligence and its object there appears no original concurrence.

We must therefore affirm that the relation between the intelligent and the unintelligent is that of illusory superposition. The inability to account otherwise for the illumination of unintelligent things is thus the evidence that space and the like are illusorily superposed (on absolute spirit). This also is stated by the same authority (Sarvajñátma-muni) in the words: Let the unintelligent universe therefore be declared an illusory emanation of intelligent spirit, the supreme bliss of heaven; this universe is supposed to be cognisable to spirit when enveloped in the folds of beginningless illusion.

Ether and the rest, then, being illusorily superposed, I am naught else than self-presented self, supreme spirit without duality. And so, as being void of limitation by things, absolute spirit is evinced to be void of the three-fold limitation (by space, time, and things). Thus Vidyáraṇya says in the Pañcha-kosha-viveka: space, time, and other things, being imagined by illusion, can constitute no limit; thence the infinity of absolute spirit is obvious.

VIII. The author next anticipates the question: How can self-presented self be absolute spirit, pure intelligence, when in such thoughts as I am stout, I am thin, I am one-eyed, I am deaf, I am dumb, I am hungry, I am thirsty, I am a thinker, I am resolved, it is cognised as corporeal or the like? He proves severally that body and other things are not the soul.

Text.

(8) I am not the body, nor an organ, nor vital air, nor common sensory, nor understanding; for these are embraced under the notion of what is mine and the objects of the notion this.

Commentry.

The body is the head and trunk. The organs are of two kinds; the instruments of cognition, the eye and the rest; and the instruments of action, the hands and so forth. The vital air has five functions. The common sensory is the doubting faculty. Understanding consists in resolution. The word mine may be applied to the body and the rest severally. These five things, body, organs, vital air, common sensory, and understanding, are not self. If one ask why, he replies: Because the notion of these is embraced or contained under the notion of what is mine; and because it is objectified, or made a place for the free play of the understanding

In this verse the following argument is implied: The body and the rest are severally not-self, because they are objects of the notion mine, and objects of the notion this, like water-pots and the like. Body is not self, because like a water-jar &c. it possesses colour and other sensible properties. The organs are not self, because, like hatchets &c., they are instruments. Vital air is not self, because it is air, like the surrounding atmosphere. Collectively speaking, the five are not soul, inasmuch as there is no such assurance as that I am body and so forth. Such assurances as that I am stout may be accounted for, as occasioned by an erroneous attribution of corporeal attributes to the soul, as in the assurance that a crystal is red (when it is only the colour of a rose seen through it which makes it appear so.) Nor can the collective aggregate of these be the soul, for a complement of things not self cannot constitute self, as that of houses &c.

IX. The author anticipates the remark: Let the sense of personality be the self, for that is not an object of the notion of what is mine. Holding that they cannot be identical, since in dreamless slumber and the like states the sense of personality does not exist, though the soul or self exists, he in another manner establishes their diversity.

Text.

(9) I am the witness, related to all things, most dear: I am never the sense of personality, since that is immersed in affections, limitations, and afflictions.

Commentary.

The witness, that is, consciousness the percipient of desire, aversion, and the like modifications of the internal organ. Related to all, connected with all objects, water-pots, pieces of cloth, and everything else. In such thoughts as The water-pot shines forth, The web

shines forth, illumination is cognised as connected with all things. Most dear, that is, consisting of beatitude, that being most desired. Self is known to be most dear, since we see all men praying for themselves, that they may exist for ever as they never were non-existent. Of such a nature I, the self-presented soul, am never the sense of personality. The reason of this is assigned, viz. that the sense of personality is immersed in or conjoined with affections such as desire and aversion, with limitations or restrictions, and with afflictions such as pain. The difference between self and the sense of personality, recognised in the relation of percipient and percept, the one omnipresent, the other limited, the one consisting of felicity, the other of dolour, is manifest. To any one who may ask why then they do not seem to all men to be different; the reply intended is that they are not discriminated, because there is a strong illusory surmisal of unity, as in the case of a red-hot iron ball (where the heat is erroneously identified with the ball).

X. The author anticipates the objection: How can the transmigrating self be absolute spirit ever free? we will not accept the answer that transmigration pertains to the sense of personality and not to self, there being no proof that transmigration which is manifested in juxtaposition both with the sense of personality and with self, pertains to the sense of peronality alone. He shows that such proof is afforded in a concomitance and non-concomitance (by the inductive laws of agreement and disagreement).

Text.

(10) When the sense of personality is asleep, the pain, conation, and activity, cease; of me, therefore, the witness of transmigrating personality there is no transmigration.

Commentary.

When the sense of personality ceases as in sleep, swoons, pain, conation, and activity, that is, pain, desire and aversion, and their resultant activity are no longer observed. Transmigration therefore attaches to that sense of personality alone; for me, the self-presented self, the witness of that transmigratory sense of personality, there is no metempsychosis. While the sense of personality lasts the transmigratory state is experienced, whether in waking or in dreaming; and when the sense of personality ceases, and the soul is insulated as in dreamless slumber, the transmigratory state is not experienced. The transmigration, therefore, which belongs to the sense of personality, only appears to attach to the soul in consequence of their not being discriminated, just as ignition which really belongs to fire appears from want of discernment, to attach to the iron in the red-hot ball; or as the redness which really belongs to a rose, appears o attach to the crystal of the vase in which the rose is kept. It is in this way that transmigration appears in consequence of the soul's concomitant the sense of personality, to attach to the soul; but does not belong to the soul in itself, not being experienced in dreamless slumber (when the soul is disengaged from the sense of personality). Accordingly Sarvajñâtma-muni says, Thy form of agent, enjoyer, knower, comes to thee by illusion, in virtue of thy proximity to the agent, enjoyer, knower; he whose eye is obscured by enveloping illusion beholds that form, which really belongs to the understanding and not to the soul, as if it belonged to his self-presented, pure spirit.

The soul, then, is absolute spirit ever free.

XI. The author next anticipates the objection: If this the case, you must affirm the states of waking, dreaming, and dreamless sleep, of the soul; for if the sense of personality is non-existent in dreamless sleep, and cannot therefore be susceptible of the condition of dreamless sleep, then it must be also unsusceptible of both the waking and dreaming states, inasmuch, as all the three states must belong to the same subject. Holding that dreamless sleep belongs to the sense of personality, since this exists as a mental retentum during dreamless sleep, and not to the soul, since this is the witness of dreamless sleep; and that consequently waking and dreaming also belong to the sense of personality and to that alone; the author proceeds to say:

Text.

(11) The sleeper knows not its sleeping, in that which sleeps not there is neither dreaming nor waking; I am the witness of dreaming, waking, and dreamless sleep, therefore I am not subject to those states.

Commentary.

That which when asleep knows not its sleeping, that is the sense of personality alone, under the condition of dreamless sleep, and not the soul. Why? Because the soul remains awake as witness of the illusion that there is during dreamless sleep. In that which sleeps not, that is, in the self-presented self, exempt from the state of dreamless sleep, dreaming and waking find no place, inasmuch as they attach to the same subject with dreamless sleep.

Another reason is assigned in the words: I am the witness of dreaming, waking, &c. As being the witness, the viewer, of waking, dreaming, and dreamless sleep, I, the soul, do not undergo those states; that is, the soul has not the waking and other conditions, is exempt from those conditions. There is implied in this verse the following argument: The soul undergoes not the states of waking, dreaming, and dreamless sleep, because it is witness of those states, and whatever is a witness of anything has not (quâ witness) that thing as a property; as for instance, the witness of a water-jar has

not that water-jar as a property. Sarvajñâtma-muni, therefore, who well deserves his name of All-knowing Sage, has said: The three states, visible in intelligence which shines apart, are external to the mind which consists of intelligence alone; for these states are caused by the fact of manifestation and retractation; how canst thou consisting as thou dost of pure intelligence, be confounded with these?

XII. The author next states that a consideration of the character of waking, dreaming, and dreamless states, shows that these states do not belong to the soul.

Text.

(12.) Dreamless sleep is a cessation of distinctive cognitions; dreaming and waking are the genesis of such cognitions; how can these three states belong to me, the witness thereof, whose knowledge is eternal?

Commentary.

The cessation of distinctive cognition is called dreamless sleep; the genesis of distinctive cognition is called dreaming and waking. Of these dreaming is knowledge of an ideal world, waking a knowledge of the actual world,—such is the division. What then? He replies How can these &c. How can these three states, waking, dreaming, dreamless slumber, belong to me, to my soul or self, which has an eternal knowledge consisting of unceasing consciousness, and which is, as before described, the witness of the waking and other states? They cannot belong to me at all.

To explain this. All must allow in reference to the state of dreamless sleep some intelligence to illuminate the absence of illusion during that state of dreamless slumber; otherwise there would be no accounting for the reflection on the part of a man who has just risen that he had slept comfortably and not been conscious of anything. This intelligence is not generable, and the common sensory, the eye, and the other organs being immersed in slumber, it is unlimited. According to the rule, then, that an ungenerable entity is eternal, this intelligence is declared by us to be the soul. How, then, could dreamless sleep, a total cessation of cognition, attach to the soul which consists of knowledge without beginning and without end? Dreaming and waking, again, are the generation of cognition. But the sense of personality, as being a repository of such knowledge as consists of generable modifications, admits of these three conditions.

The soul, then, is exempt from the states of waking, dreaming, and dreamless slumber.

XIII. The author now proceeds to prove that the soul is free from the six changes of being, in order to enforce its identity with unmodified absolute spirit.

Text.

(13.) I the knower of things which undergo the six changes am free from change; otherwise its cognisance of the changes of those things would be incompetent.

Commentary.

These six changes of being are said to be (1) that a thing arises, (2) that it continues to be, (3) that it grows (4) that it comes to maturity, (5) that it begins to wither, (6) that it undergoes dissolution. I, the soul, the knower of these changing things, viz. of external objects such as thoughts, am free from change, exempt from modification; for the soul cognises the genesis and other changes of things external and internal, and the general rule that what cognises anything is not (quâ cognisant) possessed of that thing as a property, being universally accepted, the soul must be free from change. Therefore the author of the Vârttika says: One cannot suffer pain without a change or modification, but how can that which undergoes change be a witness? as witnessing thousands of modifications of the understanding, I am exempt from change.

The author next cites an objection to the opposite view, in the words *Otherwise* &c. Otherwise its cognisance of changing things would be altogether incompetent, in every way impossible. The purport is this: If the soul undergoes changes, are those changes in the soul and in other things brought about by soul or by anything else? By neither, according to the rule that objects susceptible of change, such as earth and the like, are unsentient.

XIV. Again, let it be asked: Is the soul different from, or the same as, a changing thing and its changes? Our author, having in mind, that they are not different,—inasmuch as different objects, a cow and a horse for instance, do not admit of the relation of thing changing and its changes,—states an objection to the second alternative (viz. that of their identity).

Text.

(14.) The changing thing is again and again produced and destroyed in each several form; how then could it take cognisance of those things?

Commentary.

The changing thing in each several form, as identical with the forms of genesis, continuance, growth, maturescence, decay, dissolution, is again and again produced, and again and again destroyed. How then can the thing which undergoes these modifications take cognisance of the modifications? It can in no wise do so. How can the changing object, he means, which under its form of change, from time to time ceases to be, take cognisance at a subsequent time of that change? It can in no wise do so.

XV. The author starts the following doubt. Let

the soul though of itself changeful be cognisant of the changes of itself and of other things. Nor (the doubt proceeds) should any one ask how, if the soul participates in changefulness, it can be cognisant of things other than itself: for, as a gem though itself participant in the nature of a stone yet by its intrinsic difference illumines things other than itself, so the soul must be allowed to cognise things other than itself by its own intrinsic difference. Nor (it is added) should one ask how that which ceases to be at each successive change, can be cognisant of every change; for the doubter does not admit that the changing soul is altogether identical with its changes or modifications, but allows only an identity which involves some small difference, such as that of the cloth and the component threads. He replies that on this supposition the soul still could take no cognisance of its own first and last changes (that is of its own genesis, and dissolution.)

Text.

(15.) Nor can any one see his own genesis or dissolution; for these are the last and first moments of antecedent and subsequent non-existence.

Commentary.

No one however keen, can see his own genesis or dissolution, that is, can know his own birth or annihilation. He gives the reason. This is that they, that is the genesis and dissolution, are the last and first moment of its non-existenee *ab ante;* its dissolution is the first moment of its non-existence *à post.* The connection of the words in the text is: None can see his own genesis or dissolution, inasmuch as his genesis and dissolution are the first and the last moments of his antecedent and subsequent non-existences. The purport of the text is as follows. It must be granted that the soul cognises only an object which occupies the same time ss the soul itself; just as a lamp illumines only such things as are contemporaneous with itself. Since then, during the time which it lasts, non-existence *ab ante* and *à post* finds no room and cannot be cognised; how should it cognise its own genesis, which is the last moment of its non-existence *ab ante,* and its dissolution, which is the first moment of its non-existence *à post?* It can in no wise cognise them. And if these (the first and last modifications, see § XIII.) be unproven of the soul, the intermediate modifications must be equally unproven, in virtue of the rule that the intermediate modifications affect the same subject which is affected by genesis and dissolution. The author of the Bhâshya therefore says in the Vâkya-vṛitti: The designate of the term Thou is distinct from body, sense-organs, common sensory, vital airs, sense of personality, and wholly exempt from the six changes of being.

The self, therefore, as unchangeable, is absolute spirit only.

XVI. The author supposes another doubt. All that you have said already is useless, there being no mean of coming to know that self is the absolute spirit whereof the essence has been described. Nor (the objector continues) is cessation of transmigratory existence the occasion of our coming to know that the soul is absolute spirit, inasmuch as the cessation thereof is impossible. For this transmigratory existence is manifested in the soul by reason of its concomitant, the sense of personality, and in the form of agency and so forth; and cannot be brought to an end by knowledge, for knowledge labours under an illusion in regard to the soul caused by the soul's concomitant, the sense of personality. The illusion thus caused by the concomitant must last as long as the concomitant, since it does not survive upon the knowledge of the truth; as in everyday life we see an illusion accidentally determined to last as long as the concomitant which determines it, as in the case of reflected images &c. But you cannot (he continues) assert that a cessation of the agency &c. manifested in the soul and caused by its concomitant the sense of personality, results upon the cessation of this concomitant by means of a knowledge of absolute spirit; for while the radical illusion exists it cannot be brought to a close. Nor (he adds) can you assert that the radical illusion which exists in the soul is terminated by knowledge of absolute spirit; for this illusion not being merely imaginary cannot be brought to an end by the knowledge that it is merely imagined; for otherwise (that is, were the illusion only imaginary) it could have no permanence. The author then proceeds to state that illusion cannot really exist in the soul, with the purpose of showing that it is merely imagined, that he may prove it to be terminable by knowledge.

Text.

(16.) How should darkness touch that self-illumined soul, by whose light alone is caused the saying I shine not?

Commentary.

How should darkness, that is illusion, envelope the self-illumined soul, the spirit which shines of itself, whose light, or essential luminousness, is the sole cause of the saying I shine not; for the expression I shine not is caused by light alone, determined by consciousness of one's own irradiation. The meaning is as follows. The soul which shines of itself at all times, illuminates all things. How should it, being such, be touched by ignorance or illusion the opposite of light. The sun with its piercing rays is never seen to be touched by darkness, and why? because of the repugnance between light and darkness. And so illusion, being incompatible with the soul, cannot really exist therein A. E. G.

PRINTED AND PUBLISHED BY THE PROPRIETORS, E. J. LAZARUS AND CO., AT THE MEDICAL HALL PRESS, BENARES.

काशीविद्यासुधानिधिः

श्रीगणेशाय नमः

श्रीमद्विजयिनीदेवीपाठशालोदयोदितः । प्राच्यप्रतीच्यवाक्पूर्वापरपक्षद्वयान्वितः ॥ १ ॥
अङ्कुरश्मिः स्फुटयतु काशीविद्यासुधानिधिः । प्राचीनार्यजनप्रज्ञाविलासकुमुदोत्करान् ॥ २ ॥

THE PANDIT.

A Monthly Journal, of the Benares College, devoted to Sanskrit Literature.

No. 91. Benares, December 1st, 1873. Vol. VIII.

॥ चिन्तामणेः शब्दखण्डम् ॥

(१) अत्राहुः । (२) अनस्तमितपदपदार्थविभागस्य चित्रगुसमुदायस्यान्योन्यान्वितावयवार्थसंबन्धिन्यन्यपदार्थे शक्तिः कल्प्यते, (३) ऽतो नानेकार्थत्वं, न वा ऽवयवार्थत्यागो न वा (४) तद्गुणसंविज्ञाने लक्षणा । योगरूढिस्वीकारात् । अवयवार्थाज्ञाने तत्सम्बन्धिनो ऽज्ञानात् । मण्डपादौ त्व(५)वयवार्थनिरपेक्षैव गृहविशेषधीरित्यवयवार्थत्याग एव समुदाये रूढिः । (६)तथाह्यस्ति चित्रग्वादिपदस्यान्यपदार्थे तात्पर्यमेव, तत्रैव च तात्पर्यं, नियमतो ऽन्यपदार्थस्य प्रतीतेः । तदन्याप्रतीतेश्च । नियततात्पर्यं विनान्यपदार्थे बहुव्रीहौ नियमतो लक्षणापि न स्यात् । तस्मान्नियततात्पर्यनिर्वाहिका बहुव्रीहेरन्यपदार्थे शक्तिरेव । (७) लक्षकस्य लक्ष्ये तात्पर्यानियमात् । तात्पर्यानियमे च क्वचिद्बहुव्रीहेरन्यपदार्थपरत्वमपि न स्यात् । (८) अथ क्वचिद्बहुव्रीहे(९)रन्यपदार्थे तात्पर्यमपि न संभवति, यथा यजमानपञ्चमा ऋत्विजो लोहितोष्णीषा ऋत्विज इत्यत्र यजमानपञ्चमत्वलौहित्ययोर्विधेयत्वेन प्राधान्यात्तत्परतया ऽन्यपदार्थे तात्पर्याभावात् । एवं क्वचिल्लोकेपीति चेत्, (१०) तर्हि तत्रान्यपदार्थे तात्पर्याभावात् तदनुपपत्तिं विना लक्षणाविरहादन्यपदार्थे शक्तिरेव । अन्यथा तत्रान्यपदार्थबुद्ध्यनुदयापत्तिः । न च तत्रान्यपदार्थबुद्धि(११)राभिधानिक्येव न भवतीति युक्तम् । ऋत्विग्भिः सामानाधिकरण्यानुभवात् । तस्माद्बहुव्रीहेर्नियमतोन्यपदार्थबुद्ध्युद-

॥ शब्दचिन्तामणिव्याख्या रुचिदत्तीया ॥

(१) अत्राहुरिति । वैयाकरणा इति शेषः । योगार्थभानार्थमाह । (२) अनस्तमितेति । (३) अत इति । संबन्धित्वेन शक्तिर्न चैत्रत्वादिनेत्यर्थः । (४) तद्गुणेति । अन्यथा ऽन्यपदार्थस्यैव शक्यत्वे समुदायस्यावयवार्थे लक्षणा स्यादित्यर्थः । उभयसिद्धावयवार्थभानार्थं तद्गुणेत्युक्तम् । अन्यथा ऽन्यत्रातद्गुणाभ्युपगमादेव तदनापत्तिरित्यपि परो ब्रूयादिति । (५) अवयवार्थेति । न चैवं चित्रगुमानयेत्यादावप्यवयवार्थात्यागे तद्गुणातद्गुणविभागो न स्यादिति वाच्यम् । विधेयांशे विशेषणत्वोपलक्षणत्वाभ्यामेव तदुपपत्तेरिति भावः । नन्वन्यलभ्यतया न रूढिरित्यत आह । (६) तथाहीति ।

(७) लक्षकस्येति । यद्यपि शक्तस्यापि शक्ये तात्पर्यानियम एव लक्ष्येपि तात्पर्यात्, तथा चोक्तनियततात्पर्यस्य शक्तिनिर्वाह्यत्वं नोभयसिद्ध,मत्रैव तथात्वकल्पने निरूढलक्षणानिर्वाह्यत्वकल्पनेपि तुल्यं तथाप्यापातत इदम् । अत एवाग्रे तदेवाशङ्क्य युक्त्यन्तरं वक्ष्यति । इष्टापत्तिमाशङ्कते । (८) अथेति । (९) अन्यपदार्थेति । सोष्णीषा ऋत्विजः प्रचरन्तीत्यादिना ऽनुष्णीषस्यान्यपदार्थस्य प्राप्तत्वेन विधेयत्वाभावादिति भावः । तात्पर्यानुपपत्तिरेव लक्षणाबीजमिति मतमाश्रित्याह । (१०) तर्हीति । (११) आभिधानिकी । शाब्दी ।

यात्तत्र शक्तिरेव । यद्यपि शक्तस्य शक्ये न तात्पर्यनियमो लक्ष्येपि क्व चित्तात्पर्यात् । (१२) तथापि शक्ये तात्पर्यमौत्सर्गिकं, क्व चिदन्यत्र प्रयोगादपोद्यते । बहुव्रीहौ चान्यपदार्थादन्यत्राप्रयोगाच्छक्यार्थेपि तात्पर्यनियमो भवति । यत्तु (१३) केवललाक्षणिकस्याभावाद्बहुव्रीहौ शक्यनियमे परिशेषादन्यपदार्थ एव शक्य इति । तन्न । (१४) शक्तिं विनापि तात्पर्यनिर्वाहात् ॥

अत्र ब्रूमः । (१५) बहुव्रीहौ न वाक्ये लक्षणा, किं तु पदे, तस्य च नान्यपदार्थे तात्पर्यनियमः, क्व चिच्छक्येपि तात्पर्यात् ।

अथा(१६)स्ति बहुव्रीहिस्थपदद्वयस्यान्यपदार्थे तात्पर्यनियमः, ततोन्यत्राप्रयोगनियमात् । अतस्तन्निर्वाहिका पदद्वये शक्तिः सैव च वाक्ये वाक्यस्य पदद्वयात्मकत्वादिति चेत् । (१७) अस्तु तर्हि बहुव्रीहिस्थपदद्वये निरूढा लक्षणा, तयैवान्यपदार्थे तात्पर्यनियमोपपत्तौ समुदायशक्तौ मानाभावात् ।

नवीनास्तु बहुव्रीहावन्यपदार्थस्य लक्ष्यत्वे नियमतो लक्षणीयपदलिङ्गता न स्यात् । लक्षकपदस्य लक्षणीयपदलिङ्गाग्राहकत्वनियमात् । (१८) स्वलिङ्गापरित्यागाच्च । अतो ऽन्यपदार्थे शक्तिरेवेति ।

तत्र ब्रूमः । (१९) बहुव्रीहेर्लाक्षणिकत्वेन विशेषणपदत्वनियमान्नियमतो लक्षणीयविशेष्यपदलिङ्गग्राहकत्वं, (२०) समानाधिकरणस्य समानविभक्तिकस्य विशेषणपदस्य विशेष्यपदलिङ्गत्वनियमात् । (२१) भिन्नविभक्तिकयोरिव भिन्नलिङ्गयोरपि सामानाधिकरण्येन विशेषणविशेष्यभावाभावात् । (२२) अजहल्लिङ्गे तु लिङ्गविशेषनियमानुशासनान्न तथा । अन्यदन्यस्य लिङ्गं गृह्णातीत्यत्र (२३) विशेषणविशेष्यभावस्वभावत्वमेव नियामकम् । अथ नियमतो विशेष्यलिङ्गकतैव विशेषणपदस्य बहुव्रीहेः शक्तिं विना न निर्वहतीति चेत् । न । विशेषणपदत्वमेव हि विशेष्यलिङ्गकत्वे तन्त्रं, न तु शक्तत्वे सति, गौरवात् । दण्ड्यादिवाक्यस्याशक्तस्यापि पुरुषादिविशेष्यलिङ्गकत्वात्, (२४) गुणवाचिशुक्लादिपदानां शुक्लः पट इत्यादौ लक्षणया विशेषणानां विशेष्यलिङ्गत्वाच्च । (२५) ननु शुक्लादेर्गुणिपरत्वे लाक्षणिकत्वेन स्वलिङ्गाप्राप्तौ 'गुणे शुक्लादयः पुंसि गुणिलिङ्गास्तु तद्वती'त्यनुशासनाल्लाक्षणिकस्यापि विशेष्यलिङ्गकत्वम् । न च बहुव्रीहौ तथानुशासनमस्ती-

---

(१२) तथापीति । औत्सर्गिकमेव तात्पर्यं शक्तिनियतमिति भावः । यजमानपञ्चमा इत्यादावप्युक्तसामानाधिकरण्यानुपपत्त्या ऽन्यपदार्थान्वये तात्पर्यमस्त्येव, विधेयतया परं न तत्र तात्पर्यमित्यवधेयम् । (१३) केवलेति । अशक्त्येत्यर्थः । शक्यसंबन्धस्य लक्षणात्वादिति भावः । (१४) शक्तिमिति । समुदायशक्तिं विना ऽप्यवयवलक्षणयैव तात्पर्यनिर्वाहादित्यर्थः ।

(१५) बहुव्रीहाविति । तथा चावयवतात्पर्यनिर्वाहाय न समुदायशक्तिरिति भावः ।

अस्तु तर्हि समुदायतात्पर्यनिर्वाहाय शक्तिरिति शङ्कते । (१६) अथेति । अन्यलभ्यत्वान्न शक्तिरित्याह । (१७) अस्त्विति । नियततात्पर्यं न शक्तिनियतं, ज्ञानलाक्षणिके हेतुवाक्ये घटं करोतीत्यादाववयवलाक्षणिके च व्यभिचारादिति भावः । प्रामाणिकेन तदर्थमात्रपरतया लक्षणया प्रयुज्यमानत्वं निरूढलाक्षणिकत्वम् । अत एव निरूढलक्षणा शक्तितुल्येति वदन्ति । ननु मञ्चाः क्रोशन्तीत्यत्र लक्षणीयपुरुषपदलिङ्गग्राहकत्वाद् व्यभिचार इत्यरुचेराह । (१८) स्वलिङ्गेति ।

ननु छत्रिणो मञ्चा इत्यादौ व्यभिचार इत्यत आह । (१९) बहुव्रीहेरिति । तथा च बहुव्रीहावयं नियम इत्यर्थः । (२०) समानाधिकरणस्येति । एतच्च मैत्रस्य पत्न्याः स्वमित्यत्र व्यभिचारवारणाय, मैत्रः पचतीत्यत्र तद्वारणाय समानविभक्तिकस्येति, सुप्तिङोश्च न समानत्वमित्यर्थः । न च कर्तुरवाच्यतया तत्र सामानाधिकरण्यमेव नेति वाच्यम् । समानसंख्याभिधायकविभक्तिप्रकृतित्वस्य तत्त्वात्, तस्य च तत्रापि सत्त्वात् । ननु विशेषणविभक्तेः साधुत्वार्थत्वेनाभेदार्थत्वेन वा न तथात्वमिति चेत्, न । तदभिधानस्य विशेष्यविभक्त्यर्थातिरिक्तार्थनिषेधपरत्वात्, मतान्तरत्वाद्वा । अत एव वक्ष्यति 'एकसंख्यावाचकत्वमेव हि शाब्दसामानाधिकरण्य'मिति । अप्रयोजकत्वं निरस्यति । (२१) भिन्नेति । (२२) अजहदिति । तथा च लिङ्गनियमानुशासनाभावे सतीति पूर्वनियमे विशेषणमिति भावः । न च चित्रगुपदेपि गोपदमजहल्लिङ्गमेवेति वाच्यम् । विभक्त्यन्तत्वेन समुदायस्यैव तत्परत्वात् । (२३) विशेषणेति । तादृशविशेषणविशेष्यपदस्वस्वभावत्वमेवेत्यर्थः । परोक्तनियमे व्यभिचारमप्याह । (२४) गुणेति । विशेषणानामविशेषेणोपस्थापकानां विशेष्यपदलिङ्गकत्वादित्यर्थः । (२५) नन्विति । तथा च ममापि लिङ्गानुशासनाभावे सतीति वि-

ति चेत् । न । (२६) तस्य न्यायप्राप्तानुवादकत्वात् । (२७) अत एव शुक्लं रूपमिति शुक्लगुणवाचकत्वेऽपि लिङ्गानुशासनं परिभूय विशेषणपदत्वात् शुक्लपदं विशेष्यरूपपदस्यैव लिङ्गं गृह्णातीति । अन्यथा शुक्लो रूपमिति स्यात् । (२८) किं च बहुव्रीहेर्लिङ्गानुशासनाभावेन स्वलिङ्गाभावाद् विशेषणोपस्थापकवाक्यत्वाच्च विशेष्यपदलिङ्गतैव युक्ता, यथा दण्डी पुरुषइत्यादौ ।

वस्तुतो बहुव्रीहेरन्यपदार्थे शक्तावपि कथं नानालिङ्गकत्वं, तथा लिङ्गानुशासनाभावात् । अथ विशेषणपदत्वाद्विशेष्यपदलिङ्गता विशेष्यपदं नानालिङ्गमतो नानालिङ्गतेति चे(२९)तर्हि लाघवाल्लक्षणैवास्तु, उक्तन्यायेनैव लक्षणीयविशेष्यपदलिङ्गतोपपत्तिरिति । (३०) तत्पुरुषेऽपि (३१) राजपुरुष इत्यादौ पूर्वपदस्य (३२) षष्ठ्यर्थसंबन्धे निरूढलक्षणयैव राजसंबन्धिपुरुषबुद्ध्युपपत्तेर्न समासे शक्ति,-रनन्यलभ्यस्य शब्दार्थत्वात् । यत्तु समस्यमानपदातिरिक्तं न समासपदं, समस्यमानपदानां प्रत्यभिज्ञानादतो न समासे शक्तिरिति । तन्न । पदतत्समुदाययोर्भिन्नत्वात् ।

शेषणमिति भावः । (२६) तस्येति । उक्तन्यायसिद्धमनूद्यते कोशेन, न तु तस्य तदनुशासनसामर्थ्यमित्यर्थः । नन्वेतदेव कुत इत्यत आह । (२७) अत एवेति । उक्तकोशस्य स्वातन्त्र्येण तदनुशासनसामर्थ्याभावादेवेत्यर्थः । ननु गुणे शुक्लादय इत्यस्य गुणविशेष्यपदत्वइत्यर्थो ऽत्र च रूपमिति विशेष्यपदमित्यरुचेराह । (२८) किं चेति । (२९) तर्हीति । नन्वेवं चित्रगुधनमित्यादौ बहुव्रीहिलक्षणानन्तरं तत्पुरुषलक्षणायां लक्षितलक्षणा स्यात् । न च परम्परासंबन्धादेकैव लक्षणा, अन्यपदार्थसंबन्धिनि बहुव्रीहेरनुशासनाभावात् । तस्माद्बहुव्रीहौ शक्तिरेवेति चेत्, न । बहुव्रीहिलक्षणया चित्रगुपदस्यान्यपदार्थपरत्वे तत्संबन्धिनि परम्परासंबन्धेन तत्पुरुषलक्षणायां च लक्षणाद्वयादेव युगपदन्वयबोधोपपत्तेः । युगपद्वृत्तिद्वयविरोधस्य मणिकृन्मते ऽभावादिति ।

ननु तत्पुरुषस्थले समासत्वेनैव शक्तिकल्पनाद्बहुव्रीहावपि शक्तिरित्यत आह । (३०) तत्पुरुषइति । ननु कर्मधारयस्यापि तत्पुरुषतया तत्साधारण्येन लक्षणोपपादनमयुक्तमित्यतो विशिनष्टि । (३१) राजपुरुष इत्यादाविति । (३२) षष्ठ्यर्थसंबन्धइति । संबन्धिनीत्यर्थः, द्वयोः प्रातिपदिकयोरभेदान्वयबोधएव सामर्थ्यं,स्वभावादत एव नीलो घट इत्यत्राभेदोपचारो, ऽन्यथा समवायस्यैव गुणगुणिसंसर्गत्वसंभवादिति वदन्ति ।

नन्वनुपपत्तिं विना कथं षष्ठ्यर्थे लक्षणेति चेत् । (३३) यदि षष्ठ्यर्थो न लक्ष्येत तदा राजपुरुषादौ लाघवादिना द्राक् सामानाधिकरण्यावगमाद्राजत्वविशिष्टपुरुषस्यैव वैभक्तिको ऽन्वयः स्यात् । राजवाहनमानयेत्यादौ वाहनपदे वाहनवल्लक्षणा स्यात् । अथ राजत्वविशिष्टे ऽस्मदाद्यानयनान्वयो ऽयोग्य इति चेत्, तर्ह्यानयनानुपपत्त्या तात्पर्यानुपपत्त्या वा षष्ठ्यर्थे लक्षणा । (३४) विभक्त्यर्थापेक्षो हि सर्वत्र नामार्थान्वयो ऽतः श्रुतविभक्त्यर्थासंभवे

तच्चिन्त्यम् । घटो नेत्यत्र प्रातिपदिकार्थयोर्भेदेनाप्यन्वयदर्शनेन तथा ऽनियमात् । यदि च नञादिपदे भिन्नैव व्युत्पत्तिरिति तदितरत्र तथा नियम इति मन्यसे तदा समासे ऽपि भिन्नैव व्युत्पत्तिरिति तदितरत्र तथा नियम इति तुल्यम् । किं चैवं राजसंबन्धी पुरुष इति विग्रहवाक्यं स्यान्न तु राज्ञः पुरुष इति । समाससमानार्थकसमासारम्भकपदसमूहस्यैव विग्रहत्वात् । तथा सति च कर्मधारयत्वापत्तौ षष्ठीसमासोच्छेदापत्तेः । न च शक्त्या ऽभेदप्रतियोग्युपस्थापने कर्मधारय इति वाच्यम् । नीलोत्पलमित्यादौ तदभावापत्तेः । नीलपदस्यौपचारिकत्वात् । तस्मात्संबन्धएव लक्षणा, राजसंबन्धपुरुषयोश्च धर्मधर्मिभाव एवान्वय इति युक्तमुत्पश्यामः । न च षष्ठ्यर्थस्य लक्षणया नामार्थत्वे भेदेनाप्यन्वयो न स्यात्,विभक्त्यर्थापेक्षो ऽभेदेन नामार्थयोरन्वय इति वक्ष्यमाणव्युत्पत्तिविरोधादिति वाच्यम् । तस्य विभक्त्यर्थातिरिक्तनामार्थान्वयपरत्वात् । पूर्वोक्तरीत्या राजपदार्थस्यापि भानमतो विग्रहसमानार्थत्वं वृत्तिद्वयविरोधेन तवापि भग्नमिति दूषणमनवकाशं बोध्यम् । (३३) यदीति । यत्र च संबन्धिनि तात्पर्यग्रहस्तत्रैवषष्ठ्यर्थे लक्षणा, अन्यत्र तु कर्मधारयादभेदान्वयधीरिष्टैवेति भावः । (३४) विभक्त्यर्थेति । नामार्थयोर्भेदेनान्वयो विभक्त्यर्थद्वारैवेति·व्युत्पत्तेरिति भावः । न च भेदेनेति व्यर्थं, नीलो घट इत्यादौ व्यभिचारवारकत्वात्, विशेषणविभक्तेः साधुत्वार्थत्वात्, तस्या अभेदार्थकत्वस्यैकदेशिमतत्वात् । अन्यथा नीलघट इत्यादौ कर्मधारये विग्रहसमानार्थतया विभक्त्यर्थलक्षणापत्तौ निषादाधिकरणविरोधापत्तेः । एवं च कर्मधारयस्यापि व्यभिचारवारकं तदिति ध्येयम् । नन्वेवमपि भूतले घटो नास्तीत्यादौ व्यभिचारः । तत्र षष्ठ्यर्थलक्षणानभ्युपगमात् । न चाव्ययनिपातातिरिक्तस्थले उक्तव्युत्पत्तिरिति वाच्यम् । अघट इत्यादौ संबन्धलक्षणाभावप्रसङ्गादिति चेत्,न । घटो नास्ति घटौ न स्त इत्यादौ विभक्त्यर्थसंख्यान्वयस्यानुभविकत्वेन तद्द्वारैवोक्तव्युत्पत्तेरप्रत्यूहत्वात् । अत

विभक्त्यर्थलक्षणैवोचिता । अथ राजपुरुषादा(३५)वन्वयप्रकारतया षष्ठ्यर्थसंबन्धबुद्धिरतो न पूर्वपदे लक्षणा, न वा समासे शक्तिरिति । तन्न । नामार्थयोरन्विताभिधाने ऽन्वयप्रकारतया नियमतः षष्ठ्यर्थोपस्थितौ हेत्वभावात् । (३६) शब्दादनुपस्थितस्यान्वयप्रकारतया भाने मानाभावाच्च । चैत्रस्य नप्त्रेत्यादौ पुत्रस्य (३७) नप्तृपदाच्छक्यतावच्छेदकतयोपस्थितस्यान्वयप्रकारत्वेन ज्ञानम् । राज्ञः पुरुष इत्यादौ विग्रहे समासाभिधानाल्लुप्ता स्मृता षष्ठ्येव संबन्धस्मारिका ऽतो न लक्षणा न वा शक्तिरित्येके । तन्न । राजपुरुषमानयेत्युक्ते पूर्वं नियमेन (३८) विग्रहास्मरणात् । शाब्दिकानां तु विग्रहाभिधानं समासार्थ(३९)कथनपरं, विभाषाधिकारे च समासानुशासनं समासविग्रहयोः पर्यायत्वं साधुत्वं वा बोधयितुम् । विशेषस्तु विग्रहे सो ऽर्थो नामविभक्त्यादिभिः शक्त्या ऽभिधीयते समासे तु राजादिपदेन लक्षणया । बहुव्रीहेर्नित्यसमासत्वाभिधानं (४०) विग्रहस्यासाधुत्वख्यापनार्थम्, चित्रा गौर्यस्येति विग्रहाभिधानं बहुव्रीह्यर्थकथनार्थम् । स्यादेतत् । विभाषेति सूत्रेण वाक्यसमासयोस्तुल्यार्थता दर्शिता, वाक्ये च मुख्या वृत्तिरतः समासेपि सैव वृत्तिः । अन्यथाऽतुल्यार्थतापत्तेः (४१) वाचकस्यैवानुशासनाच्च, यथा लिङादेः । न च लाक्षणिकं वाचकम्, (४२) अन्यथा गाव्यादेरप्यनुशासनापत्तेः । अथ वाचकव्युत्पादनवल्लाक्षणिकव्युत्पादनमपि उभयोरपि ज्ञातयोः पदार्थोपस्थापकत्वादिति चेत् । न । वाचकत्वज्ञानं विना वाच्याज्ञानाद्युक्तं वाचकत्वानुशासनं, लाक्षणिकं च शक्यव्युत्पत्तौ परम्परया लक्ष्यस्मारक,मतो न तस्य व्युत्पत्त्यन्तरापेक्षा । न च प्रयोगानुशासनं व्याकरणं स च लक्षणयाप्यस्ति, अतस्तस्याप्यनुशासनं घोषसमभिव्याहारे गङ्गापदस्यैवेति वाच्यम् । (४३) गङ्गायामितिमात्रं ह्यनुशिष्टं तच्च ज्ञातिसमभिव्याहारे ऽप्युपपन्नं न तु तत्तद्वाक्यस्थत्वेन । (४४) किं च गङ्गायामिति नानुशिष्टं, किं तु विभक्तिः सा चोभयत्र वाचिकैवेति न (४५) प्रातिपदिकवृत्तेर्मुख्याया वा लक्षणाया वा ऽपेक्षा । अत एव विभक्तौ न लक्षणा, (४६) अवाचकस्याननुशासनादिति । उच्यते । साधुपदस्यानुशासनं व्याकरणं तस्य साधुत्वज्ञापकत्वेनैव प्रामाणिकप्रसिद्धिसिद्धत्वात् । (४७) अत एव न गाव्यादेरनुशासनं तस्यासाधुत्वात् । अस्ति च समा-

---

एव तत्र विभक्तिः प्रयोगसाधुत्वार्थैवेत्यपास्तम् । तथा च तत्रान्वयप्रकारतयैव संबन्धो भासते । घटस्य नेत्यादिर्न प्रयोगो ऽसाधुत्वात् । न चैवमपि तद्धनमित्यादौ व्यभिचारः, सर्वनाम्नि लक्षणा विरहादिति वाच्यम् । तत्रापि तस्या व्यवस्थापितत्वात् । न च संबन्धस्य तत्पदशक्यतया तत्र न लक्षणेति वाच्यम् । शक्यसंबन्धस्य तत्राप्यनपायादिति दिक् । (३५) अन्वयप्रकारतयेति । छिद्रेतरत्ववत्प्रकारान्तरोपस्थितस्यैवान्वयप्रतियोगितयेत्यर्थः । ननु तदनुपस्थितौ तत्र तात्पर्याग्रहे तत्र लक्षणापि न स्यादिति तदुपस्थितिरावश्यकी । किं च पटो नेत्यत्रेवान्वयरूपतयैव तद्भानमस्तीत्यत आह । (३६) शब्दादिति । न च तत्प्रकारकोनुभवो ऽसिद्ध एवेति वाच्यम् । विग्रहतुल्यप्रकारकज्ञानजनकत्वात्, विभक्त्यर्थोपस्थितिं विना भेदेनान्वये पूर्वव्युत्पत्तिविरोधाच्च । (३७) नप्तृपदादिति । पुत्रपुत्रत्वस्य शक्तत्वे पुत्रस्यावच्छेदकत्त्वमित्यर्थः । (३८) विग्रहाश्रवणादिति । न च दधि पश्येत्यादाविव लुप्तविभक्तेर्नियतोपस्थितिः स्यादिति वाच्यम् । तत्र क्रियाकर्मभावेनान्वयस्य विभक्तिं विनाकाङ्क्षाविरहेणानुपपत्तेः । घटः कर्मत्वमित्यत्रेव । समासे तु विभक्तिमन्तरेणाप्याकाङ्क्षादर्शनात् लाघवेन लक्षणाकल्पनात् । तदिदमुक्तम् । अग्निकरणकौदनकर्मकपाकविषयककृतिरिष्टसाधनमिति तु वाक्यमिति । यत्र च दैवाद्विभक्त्युपस्थितिस्तत्र समासशक्तिभ्रमवत्तद्वत् लक्षणाविरहेपि न क्षतिरित्यपि वदन्ति । (३९) कथनपरमिति । न च समानार्थकत्वे ऽन्यतरोपस्थितावपरोपस्थितिनियम इति भावः । अन्यथा ऽपभ्रंशे स्मृतसाधुशब्दवद्विग्रह एव बोधको न समास इत्यपि कल्प्येतेत्यपि बोध्यम् । (४०) विग्रहस्येति । समाससमानार्थकसमस्यमानपदमात्रस्येत्यर्थः । चित्रेत्युपलक्षणम् । चित्राया गोः संबन्धीत्यादिकमपि न विग्रह इत्यपि बोध्यम् । तथा च विग्रहसाधुत्वासाधुत्वकृत एवानित्यत्वनित्यत्वविभाग इति भावः । ननु तुल्यार्थत्वं न तुल्यप्रवृत्तिनिमित्तकत्वं, वाक्ये शक्त्यभावेन तदभावात्, किं तु तुल्यप्रतिपाद्यकत्वं तच्च लक्षणायामपि तुल्यमित्यरुचेराह । (४१) वाचकस्यैवेति । (४२) अन्यथेति । अवाचकस्याप्यनुशासन इत्यर्थः । (४३) गङ्गायामिति । पदस्यैवेत्यर्थः । ननु सामीप्ये तदनुशासनादर्थात्तद्वाक्यस्थत्वेनाप्यनुशासनमित्यरुचेराह । (४४) किं चेति । (५५) प्रातिपदिकेति । गङ्गापदवृत्तेरित्यर्थः । अत एवेत्यस्य पदार्थमर्पणीयमाह । (४६) अवाचकस्येति । टाब्ङीबादीनां गङ्गानद्यादिपदे, शूद्राब्राह्मण्यादौ तु स्त्रीत्ववाचकत्वमेव तयोरित्याहुः । (४७) अत एवेति । व्याकरणस्य वाचकमात्रानु-

स: साधुरतो युक्तं तस्य साधुत्वानुशासनम् । साधुता च लाक्षणिकत्वेनापि संभवति,पदवाचकता चानन्यलभ्यत्वादवगम्यते । न तु व्याकरणं वाचकत्वानुशासनम् । प्रयोगमात्रे साधूनां टाब्ङीषादीनां शप्श्नादिविकरणानामिट्नुमाद्यागमानां वर्णविकारषकारणकारादीनां निरर्थकानामपि साधुत्वार्थमनुशासनात् । अत एव द्व्येकयोरित्याद्यनुशासनस्यैकत्वस्यैकवचनप्रयोग: साधुरिति साधुत्वज्ञापनार्थत्वेन सार्थकता । (४८) अन्यथैकत्वस्यैकवचनस्य स्वादिसूत्रेण विहितत्वाद्वैयर्थ्यं स्यात् । द्वित्वादावशक्तत्वादेवैकवचनाप्रयोग इति चेत् । लक्षणया प्रसक्त: प्रयोगो ऽसाधुरिति ज्ञापकत्वेन सार्थकत्वम् । एवं च (४९) विभक्तौ न लक्षणा । लिङादेस्त्वपूर्वे क्वाप्यनुशासनं नास्तीति लोके क्रियाकार्यत्वेन लक्षणा । एवं च (५०) तृतीयाया अपि लक्षणया न कर्मत्वादौ प्रयोग: (५१) सामान्यत: साधु: । 'कर्तृकरणयोस्तृतीये'त्यनुशासनबलात् । व्यत्ययेपि च साधुत्वमनुशासनान्तरबलात् । तस्माद्यदि समासो नानुशिष्येत तदा तस्य लोके साधुत्वं न ज्ञायेत, प्रत्युत गाव्यादिशब्दवदपशब्दतैव स्यात् । यदि च विभाषेति सूत्रं न प्रणीयेत तदा तथाभूतेर्थे समासस्यैव साधुत्वं ज्ञायेत न वाक्यस्य तदभिधानशक्तस्यापि शैवाल इव पङ्कजादे: । विभाषाशब्द: समासविग्रहयो: साधुत्वज्ञापनार्थो न तु विकल्पेन समासस्य साधुत्वबोधक: । अवाचक: शब्द: समासो ऽतो ऽसाधुर्गाव्यादिपदवद् वाक्यमेव वाचकत्वात्साध्विति शङ्कां तुल्यार्थौ वाक्यसमासाविति बोधयद्विभाषापदमेव निराकरोति । न च साधुत्वादेव शक्तत्वम् । अन्यलभ्यत्वेन शक्तिनिरासात् । तिङन्तसुबन्तयोर्व्यभिचाराच्च । तत्र हि समुदाये साधुत्वं प्रत्येकं शक्तिरसाधुत्वं च । (५२) ननु नामार्थयो राजसंबन्धिपुरुषयोर्विभक्तिं विना ऽन्वयाभावाद्राजसंबन्धिपुरुषाप्रतीति: विभक्ते: प्रकृत्यर्थगतस्वार्थबोधकत्वव्युत्पत्तेश्च राजसंबन्धिपुरुषे समासस्य शक्तिरेव । एवं बहुव्रीहिकर्मधारयादावपि सार्थकत्वेपि प्रातिपदिकत्वविधानमर्थवदादिसूत्रस्य प्रपञ्च इति चेत् । उच्यते । (५३) नीलं घटमानयेत्यादौ नामार्थयोर्विशेषणविशेष्ययोरन्वयबोधे आकाङ्क्षादिकमेव हेतुर्न तु विशेषणविभक्तिरपि (५४) नीलस्य घटकर्मत्वाभावात् शब्दात्तथा ऽननुभवाच्च । नीलविशिष्टस्य कर्मत्वं विभक्त्यर्थबहिर्भावेनैव

शासकत्वाभावादेवेत्यर्थ: । (४८) अन्यथेति । यद्यपि स्वादिसूत्रेण स्वादिमात्रं विवक्षितं न त्वेकत्वादावेकवचनत्वादिकं, तथापि तान्येकवचनद्विवचनेत्यादिसूत्रेणान्वर्थसंज्ञाविवक्षया तल्लाभे तद्वैयर्थ्याशङ्केति ध्येयम् । (४९) विभक्तौ । सुब्विभक्तौ । तथा सत्यसाधुत्वापत्तेरिति भाव: । नन्वेकस्यां पाथ:कणिकायामप इति प्रयोगानुपपत्ति:, न चावयवमादाय तत्र बहुत्वान्वय इति वाच्यम् । एकस्मिन् पाथ:परमाणौ तथाप्यगते: । दारा इत्यत्रागतेश्च । न च तत्रापि तद्गतबहुरूपादिकमादाय बहुत्वान्वय: । तस्य प्रकृत्यर्थत्वाभावात् । न च प्रकृतिलक्षणयैव तदुपपत्ति: । तथा च जहत्स्वार्थतापत्त्योभयसाधारणरूपाभावादिति । मैवम् । तत्र बहुवचनस्य प्रयोगसाधुत्वार्थत्वात् । अत एव प्रमाणोपाये वर्धमानचरणास्तथैवाहुरिति । केचित्तु एवं सति रथो गच्छतीत्यादावपि प्रयोगसाधुत्वार्थत्वापत्तौ लक्षणा न स्यात् । तथा च विभक्तौ लक्षणा नेति न नियम:, किं तूत्सर्ग इत्याहु: । (५०) तृतीयाया अपीति । ननु रथेन गम्यतइत्यादौ व्यभिचार:, रथो गच्छतीत्यत्रैव कर्तृत्वशक्तायास्तृतीयाया व्यापारे लक्षणया प्रयोगादिति चेत् । न । प्रकृतिलक्षणयैवोपपत्तौ तत्रापि लक्षणाविरहादित्याहु: । वस्तुतो विभक्तौ न लक्षणेत्यनुशासनं विरुद्धार्थपरम् । प्रकृते च कर्तृकरणयोस्तृतीयेत्यादौ कर्तृपदस्य क्रियानुकूलव्यापारभागिपरतया नानुशासनविरोध: । न चैवमुभयसाधारणशक्तौ लक्षणैव न स्यादिति वाच्यम् । अनुशासनस्योभयत्र साधुत्वमात्रबोधकत्वात् । शक्तेश्च लाघवानन्यलभ्यत्वादिकल्प्यत्वेन कर्तृत्वएव कल्पनात् । एवं यत्रयत्र प्रयोगो दृश्यते विशिष्य च नानुशासनं तत्र व्यत्ययो बहुलमिति बहुलग्रहणेन समर्थनीयमिति । केचित्तु यत्रानुशासनान्नियमस्तत्र तथा, यथा योगबलादेकाद्यर्थत्वे द्व्येकयोरित्यादि, इह तु प्राप्तकर्त्रादिवाचकत्वमेव सूत्रार्थ इत्यत्र न लक्षणाबाध इत्याहु: । (५१) सामान्यत इति । अनुशासनविरोधो यत्रेत्यर्थ: । (५२) नन्विति । अन्यथा समास: साधुरसाधुश्चेति सूत्रार्थे विरोध: स्यादिति भाव: । राजसंबन्धिपुरुषयोरित्यत्र राजसंबन्धीत्यन्वयबललभ्यार्थोत्कीर्तनं राजसंबन्धपुरुषयोरित्यत्र तात्पर्यम् । विशेषणविभक्ति: साधुत्वार्थमिति मतमाश्रित्य नामार्थयोर्विभक्तिं विनान्वय इति दर्शयति । (५३) नीलमिति । यत्रापि विशेषणे विभक्तिस्तत्रान्वयो विशेषणविशेष्यपदाभ्यामेवानुभाव्यते, तस्या: साधुत्वार्थत्वात्, प्रकृते च विभक्तिं विनापि साधुत्वं समासानुशासनबलादन्वयानुभवस्तु व्यासवदुभाभ्यामेवास्त्वित्यर्थ: । (५४) नीलस्येति । तथा च न नीलमात्रस्य कर्मत्वेनान्वयो येनान्वयस्य विभक्तिनिर्वाह्यतानियम: स्यादि-

नीलघटयोरन्वयबोधे स्यान्न त्वन्यथा । न च विभक्तिं विना समस्यमानपदानां साधुत्वं नेति वाच्यम् । विभक्तिं विनापि समासस्य साधुत्वानुशासनात् । तस्मान्नामार्थयोरन्वयबोधे विशेषणविभक्तिः साधुत्वार्था नतु कर्मत्वोपनायिका । एवं च राजसंबन्धिपुरुषस्य विभक्तिं विनापि पुरुषपदा(५५)दुपस्थितिः । अत एव तादृशपुरुषपदार्थे विभक्त्यर्थान्वयः । (५६) यदि च विभक्तिबलात् क्रियान्वयो नीलमित्यस्यारुणान्यायादार्थः समाजस्तथापि (५७) राजसंबन्धिपुरुषयोः क्रियान्वयादार्थः समाजोस्तु । न च राजसंबन्धिनः कर्मत्वेनानुपस्थितेर्न क्रियान्वय इति वाच्यम् । समस्यमानपदार्थान्वयार्थं (५८) समासाद्विभक्त्यनुशासनमतो विशेषणेपि विभक्त्यर्थान्वयात् । अन्यलभ्ये शक्त्यभावनियमात् । समासान्निरर्थकाद् विभक्तिश्च समस्यमानपदार्थगतमेव स्वार्थमाह । तथैव व्युत्पत्त्यन्तरकल्पनात् । समासे ऽनन्तशक्तिकल्पनातो लघुत्वात् । (५९) यद्वा विभक्तेः संनिहितपदार्थगतस्वार्थबोधकत्वमतो बहुव्रीह्यादावन्वयबोधौपयिक्युत्तरपदे लक्षणा । षष्ठीतत्पुरुषे च विभक्तिसंनिहितोत्तरपदार्थगतस्वार्थबोधकत्वं विभक्तिसंनिहितपदस्यार्थश्च मुख्यया (६०)लक्षणाया वा । एवं नीलोत्पलमानयेत्यादौ कर्मधारये विभक्तिं विनैव नामार्थयोरन्वयबोधानन्तरं विशिष्टस्य कर्मत्वेन क्रियान्वयः । कर्मधारये तु (६१) न शक्तिर्न वा लक्षणा, ताभ्यां विनापि विवक्षितार्थान्वयबोधोपपत्तेः । ननु नीलघटयोः सामानाधिकरण्यप्रतीतिस्तत्र लक्षणैव । अन्वयप्रकारत्वादिना च तस्य भाने राजपुरुषादौ षष्ठ्यर्थोपस्थितेरपि तथास्तु । अत्र ब्रूमः । कर्मधारये सामानाधिकरण्यं नामार्थयोरभेदो वा (६२) गुणगुणिनोः समवायो वा ऽनुभूयते, स चान्वय एव न त्वन्वयप्रतियोगी, अतोन्वयप्रतियोगिनोरुपस्थितिर्नामपदात् शक्त्यैवेति न तदर्थे लक्षणा । राजपुरुष इत्यत्र तु (६३) राजसंबन्धिपुरुषयोरन्वयो ऽनुभूयते (६४) राजसंबन्धिनश्चान्वयप्रतियोगिन उपस्थितिर्न राजपदे षष्ठ्यर्थलक्षणां विना । (६५) राज्ञः पुरुषं राजसंबन्धिनं पुरुषं राजपुरुषमानयेत्यादौ (६६) पर्यायत्वात् । राजसंबन्धिनः पुरुषे ऽन्वयो ऽनुभूयते राजसंबन्ध्यन्वयप्रतियोगित्वेन । (६७) एवं च बहुव्रीहौ (६८) सर्वपदानां षष्ठीतत्पुरुषे पूर्वपदस्यान्यपरतया लाक्षणिकत्वात्ताभ्यां कर्मधारयो बलवान् । तत्र सर्वेषां पदानां स्वार्थपरतया मुख्यत्वात् । अत एवैतया निषादस्थपतिं याजयेदित्यत्र कर्मधारय एव । मुख्ये शब्दस्वारस्यात् । षष्ठीतत्पुरुषे च षष्ठ्यर्थलक्षणापत्तेः । एवं चेश्वरनिषादप्रतीतेस्तस्यैवाधिकारात्तदपूर्वेण स्वनिर्वाहकतयैवेश्वरनिषादस्यैव यागानुकूलविद्याप्रयुक्तिराक्षिप्यते । अन्यथा मुख्यार्थहानिप्रसङ्गात् । नन्वत्र षष्ठ्यर्थलक्षणया लब्धविद्यस्त्रैवर्णिक एव निषादानामीश्वरो ऽधिकारी बोध्यते न त्वीश्वरनिषादो, ऽक्लृप्तविद्याप्रयुक्तिकल्पनातः षष्ठ्यर्थलक्षणाया लघुत्वादिति चेत् ।

ति भावः । (५५) उपस्थिति,रनुभवः । लाक्षणिकस्याननुभावकतया शक्तस्य पुरुषपदस्यैव विशिष्टानुभावकत्वादिति भावः । परमतेनापि संगमयति । (५६) यदि चेति । (५७) राजसंबन्धीति । राजसंबन्धेत्यर्थः । न च संबन्धे आनयनाद्यन्वयविरोधः, नीलं घटमित्यादौ परम्परया नीले तदन्वयदुपपत्तेः । (५८) समासादिति । प्रकृत्यर्थान्वयव्युत्पत्तिस्तु समासातिरिक्तविषयेति भावः । नन्वनन्तशक्तिकल्पनवदनन्तव्युत्पत्त्यन्तरकल्पनं तुल्यं, यदि च समासत्वेन सामान्यत एव तत्कल्पनं तदा तत्रापि तुल्यमित्यरुचेराह । यद्वेति । (५९) न चोपकुम्भमर्द्धपिप्पलीत्यादौ पूर्वपदार्थप्राधान्ये व्यभिचारः । तत्रापि सन्निधानादानुशासनिकसंनिधेर्विवक्षितत्वात्, तथा च यत्पदानन्तरमनुशिष्टा या विभक्तिः सा तद्गतस्वार्थं बोधयतीत्यर्थः पर्यवस्यति । समासे च समस्यमानपदोत्तरमेवानुशासनमतस्तदर्थगतमेव स्वार्थं बोधयति । तत्र च पूर्वोत्तरपदयोर्योग्यतादिकमेव विनिगमकमिति भावः । बहुव्रीह्यनुरोधादाह । (६०) लक्षणया वेति । (६१) न शक्तिरिति । अभेदबोधनायेति शेषः । एवं च पुरुषव्याघ्र इत्यादौ सादृश्यलक्षणा निरूढेति ध्येयम् । परमतमभ्युपगमवादेनाह । (६२) गुणगुणिनोरिति । (६३) राजसंबन्धीति । राजसंबन्धेत्यर्थः । अनुभूयत इत्यनेनानुभव एवात्र नियामक इति सूचितम् । अन्यथा षष्ठ्यर्थोप्यन्वय एव न त्वन्वयप्रतियोगीति न लक्षणा स्यादिति ध्येयम् । (६४) राजसंबन्धिन इति । राजसंबन्धस्येत्यर्थः । अत एवाह । (६५) राज्ञः पुरुषमिति । (६६) पर्यायत्वादिति । एतच्च संबन्धप्रकारकतामात्रेण, न त्वन्यूनानतिरिक्तविषयतया, द्वितीये मतुपः संबन्धिवचनतया राजसंबन्धाश्रयाभेदः संसर्ग इत्यर्थातिरेकादिति भावः । (६७) एवं चेति । समासे शक्त्यभावव्यवस्थितावित्यर्थः । समासशक्तौ सर्वेषां तुल्यत्वाद् बलाबलानिरूपणादिति भावः । (६८) सर्वपदानामिति । अनेकमन्यपदार्थ इति सूत्रानुरोधेनेदं

मुख्यार्थान्वयाधीनकल्पनागौरवेण मुख्यार्थो न हीयते, किं तु बाधकं विना मुख्यार्थान्वयबोधस्य प्राथमिकत्वात्तदनुरोधेन तदुपपादकं कल्प्यते । (६९) फलमुखं च गौरवं न दोषाय । प्रमाणवतो गौरवस्य न्याय्यत्वात् । न चाक्लृप्तकल्पनाप्रसङ्गएव मुख्यार्थान्वये बाधकः, अक्लृप्तस्य प्रागनवगमात् । मुख्यार्थान्वयबलादेव तदवगमे उपजीव्यविरोधात् । अन्यथा प्रतीतानुपपत्तिबलात्कल्पना न स्यात् । अक्लृप्तकल्पनागौरवेण कल्पकस्य बाधितत्वात् । अथ शूद्रस्य वेदपाठे निषेधाद् ईश्वरनिषादोऽधिकारी बोधयितुं न शक्यतइति मुख्ये बाधकान्न कर्मधारयः । न चेश्वरनिषादे विधिबलाद्वेदपाठनिषेध एव बाध्यतइति युक्तम् । षष्ठ्यर्थलक्षणयाऽबाधे संभवति निषेधकवेदबाधकल्पनाया अन्याय्यत्वादिति चेत् । न । सामान्यनिषेधस्य तद्विशेषविधाने तदितरपरत्वात् । यथा “न हिंस्यात्सर्वा भूतानि” “श्वेतं छागमालभेते”त्यत्र । एवं निषादपदस्य मुख्यत्वे (७०) शूद्रपदे संकोचमात्रम् । शूद्रपदस्य निषादपरत्वे निषादपदस्य मुख्यत्वबाध एव । यद्यपि संकोचो ऽप्येकदेशबाध एव तथापि संकोचे द्वयोरपि मुख्यत्वरक्षणादबाधाच्च संकोच एव ज्यायान् ।

अन्येतु नात्र षष्ठ्यर्थो लक्ष्यते ऽनुपपत्त्यभावात् । अतः समासस्य षष्ठ्यर्थमन्तर्भाव्य शक्तिरेव । अन्यथा कर्मधारयेपि पदार्थसामानाधिकरण्यप्रतीतेः तत्रापि लक्षणेति (७१) तुल्यम् । अथान्वयप्रकारतया सामानाधिकरण्यप्रतीतेर्न लक्षणा । तर्हि षष्ठ्यर्थेपि न लक्षणा । (७२) न चान्वयप्रकारतया नियमतो विशेषोपस्थितौ प्रमाणम् । तस्मादुभयत्र समासस्यैव बोधकत्वम् । (७३) कर्मधारये तु बलवत्त्वमुत्सर्गतः सामानाधिकरण्यस्योचितत्वात् । निषादस्थपतौ तु स्थपतिपदार्थस्येश्वरस्य प्रतियोग्यपेक्षत्वात्तत्पूरणसमर्थः षष्ठीतत्पुरुष एव निष्प्रतियोगिके कर्मधारयः । नीलोत्पलमित्यादावुत्पलस्य निष्प्रतियोगिकत्वात् । (७४) तथापि च न निषादस्येश्वरस्य त्रैवर्णिकस्याधिकारः । (७५) ऐश्वर्यस्य सजातीयापेक्षत्वात् । नरपतिपदान्नरपतेर्नरस्येव निषादस्थपतिपदान्निषादस्येश्वरस्य प्रतीतेरिति । तन्न । राजवाहनादौ पूर्वपदे षष्ठ्यर्थलक्षणयैव राजसंबन्धिप्रतीतेः समासे शक्त्यभावाद् (७६) अनुपपत्तिरुक्तैव । (७७) उपकुम्भमित्याद्यव्ययीभावो ऽर्धपिप्पलीत्यादिश्च तत्पुरुषः पूर्वपदार्थप्रधान एव कुम्भस्य समीपे पिप्पल्या अर्धे तात्पर्याद् अतस्तत्रोत्तरपदे षष्ठ्यर्थे लक्षणा न तु समासे शक्तिः । नञ्समासे ऽब्राह्मणमानयेत्यत्र (७८) पर्युदासे पूर्वपदे नञि उत्तरपदार्थसदृशे क्षत्रिये लक्षणा । अघटः पट इत्यादौ च (७९) प्रसज्यप्रतिषेधार्थे नञि सामानाधिकरण्यादभावव-

---

द्रष्टव्यम् । वस्तुतस्तत्रान्त्यपदएव लक्षणेत्युक्तत्वात् । ननु गौरवमेव बाधकमस्त्वित्यत आह । (६९) फलमुखं चेति । (७०) शूद्रपदइति । ननु शूद्रपदे रथकारनिषादेतरपरतायां निषादस्य सर्ववेदपाठाधिकारापत्तिः, वेदपाठनिषेधकवाक्ये वेदपदस्यैव प्रकृतोपयोगिवेदेतरवेदपरतायां तद्वेदस्य सर्वशूद्रपाठ्यत्वापत्तिरिति चेन्न । वेदपदस्य विशेषतः प्राप्तेतरवेदपरत्वात्,तेन निषादादीनां विशेषतो यावत्प्राप्तिस्तावदन्यपाठनिषेधः शूद्रान्तरस्य यावत एव वेदराशेस्तदितरतया ऽर्थात्सर्वनिषेध इत्याहुः ।

(७१) तुल्यमिति । तथा च न कर्मधारयस्य बलवत्त्वमित्यर्थः । (७२) न वेति । यद्यपि तात्पर्यान्नियमः संभवत्येव तथाप्यापातत इदम् । एवं सति कर्मधारयस्य बलवत्त्वप्रवादं समर्थयति । (७३) कर्मधारये त्विति । नन्वेवं कथं निषादरूपेश्वरलाभ इत्यत आह । (७४) तथा चेति । निषादेश्वरस्यात्रैवर्णिकस्येत्यर्थः । (७५) ऐश्वर्यस्येति । उत्सर्गत इति शेषः । तेन गजपतिपदादौ न व्यभिचारः । अनुपपत्त्यभावादित्यत्राह । (७६) अनुपपत्तिरिति । यदि षष्ठ्यर्थो न लक्ष्यते इत्यादिना प्रागुक्तेनेति शेषः । ननूपकुम्भमित्यादौ समासे शक्तिकल्पनादन्यत्रापि तथेत्याशङ्क्याह । (७७) उपकुम्भमिति । यथा च पूर्वपदार्थे विभक्त्यर्थान्वयस्तथोक्तम् । अब्राह्मणो घट इत्यत्र न सदृशलक्षणेति विशेषयति । (७८) पर्युदासइति । पर्युदासविशेषइत्यर्थः । तदुक्तं, पर्युदासः सदृशग्राहीति । उत्तरपदेपि षष्ठ्यर्थलक्षणा नामार्थयोरित्यादिप्रागुक्तव्युत्पत्तेरिति । केचितु अव्ययनिपाताद्यतिरिक्तएव तथा व्युत्पत्तिरिति वाक्यार्थविधयैव तद्भानमित्याहुः । (७९) प्रसज्येति । संसर्गाभावशक्तिप्रतीत्यर्थः । अत एव इह घटो नेत्यत्र संसर्गाभावस्यैव प्रतीतिर्न त्वन्योन्याभावस्य, अन्यथा तत्र संसर्गाभावसंशयप्रसङ्गात्, तथा च केवलान्योन्याभावे ऽप्रयोगात्संसर्गाभावशक्तस्य सामानाधिकरण्यानुपपत्त्यादिना ऽन्योन्याभाववति लक्षणेति

लक्षणा, (८०) व्यासेऽपि न घटः पट इत्यादौ (८१) यथा शुक्लः पट इत्यत्र शुक्लवल्लक्षणा । (८२) न पचतीत्यादौ क्रियासंबन्धे भूतले न घट इत्यादौ प्रसज्यप्रतिषेधे नञो मुख्यार्थता । (८३) सुबन्तसंबन्धेऽपि न समासः विभाषाधिकाराद्विकल्पेन समासानुशासनात् । यजतिषु च ये यजामहं करोति नानुयाजेष्वित्यत्र पर्युदासे नञ् । तेनायमर्थः । (८४) यजतिषु यागेषु नानुयाजेषु, अनुयाजव्यतिरिक्तेषु ये यजामहइति (८५) मन्त्रं करोति । अथ नानुयाजेष्वित्यत्र न पर्युदासे नञ् तदा हि (८६) पदद्वयस्यान्यपरत्वं स्यात्समासापत्तिश्च तस्मादनुषङ्गात्करोतिना नञोऽन्वयात्प्रसज्यप्रतिषेधः तेनानुयाजेषु ये यजामहइति मन्त्रं न करोतीत्यर्थः । एवं च नानुयाजेष्विति पर्युदासे नञ् । न चैवं वाक्यवर्त्तिपदत्वान्नञो ऽन्यपरत्वाभावः । गौर्वाहीक इत्यादौ वाक्येऽपि गवादिपदस्यान्यपरत्वात् । यदि च प्रसज्यप्रतिषेधे नञ् तदा मन्त्रविधायकतन्निषेधयोर्विरुद्धार्थत्वेन वाक्यभेदापत्तिः । तस्मात्प्रथमप्रतीतैकवाक्यताबलादेकवाक्यत्वे संभवति वाक्यभेदस्यान्याय्यत्वाद् नञ्पदे लक्षणा कल्प्यते न तु नञ्पदे मुख्यत्वानुरोधादेकवाक्यतात्यागः । नहि पदार्थानुरोधेन वाक्यार्थकल्पनं, किं तु वाक्यार्थानुरोधेन पदार्थकल्पना । (८७) नपदं च केवलं नास्त्येव । नञ्पदादेव सर्वत्र समासानित्यत्वेन प्रयोगोपपत्तेः । अन्यथा प्रसज्यप्रतिषेधे नञ् न स्याद् नपदेनैव गतार्थत्वात् । (८८) अमानोना इत्यत्रा (८९) पदमेव निषेधवाचकं (९०) समासवाक्यभेदेन नञो द्वैविध्याद्वा तथाभिधानम् । इतरेतरद्वन्द्वे च धवखदिरौ छिन्धीत्यादौ विभक्त्युपनीतद्वित्वस्य धवखदिरयोः प्रत्येकं (९१) न योग्यत्वं न वा साकाङ्क्षत्वं द्वित्वमपि न प्रत्येकं योग्यं न वा साकाङ्क्षम् । एकत्र द्वित्वाभावात् । न च व्यासज्यवृत्तित्वेन द्वित्वमेकाश्रितमिति वाच्यम् । स हि द्वित्वमाकाङ्क्षति द्वित्वं च तं यत्र द्वित्वं परिसमाप्यते । एकस्य तथात्वे द्वौ बहव इत्येकत्रापि स्याद् अतो द्वन्द्वे पदशक्यस्य नान्वयबोधः । बोधे वा धवद्वयधीः खदिरद्वयधीश्च स्यात् । तस्मात्पदशक्ये द्वित्वान्वयानुपपत्त्या सहितावस्थमुभयं द्वित्वान्वययोग्यं तत्साकाङ्क्षं चेति खदिरसहितधवोपस्थितये (९२) धवपदे साहित्यलक्षणा ।

भावः । (८०) व्याप्तेपीति । सामानाधिकरण्यानुपपत्तेस्तुल्यत्वादिति भावः । न चान्योन्याभाववति लक्ष्ये ऽभावांशस्य शक्यत्वेन युगपद्वृत्तिद्वयविरोध इति वाच्यम् । विशिष्टलक्षणयैवोभयभानात्, मणिकृन्मते तद्विरोधाभावाद्वा । अत एव तदनुरूपं दृष्टान्तमाह । (८१) यथेति । ननु व्याससमासयोरुभयत्रापि लक्षणायां मुख्यप्रयोगाभावे कथं लक्षणापीत्यत आह । (८२) न पचतीति । न घटः पट इति व्यासमभिप्रेत्याह । (८३) सुबन्तेति । यद्वा न घट इत्यत्राघट इति स्यादित्यत आह । सुबन्तेति । प्रसङ्गादाह । (८४) यजतिष्विति । (८५) मन्त्रं करोति, प्रयुङ्क्त इत्यर्थः । (८६) पदद्वयस्यापीति । एतच्चानुयाजपदेऽपि प्रतियोगित्वलक्षणामभिप्रेत्योक्तं, वाक्यार्थविधयैव तद्भाने नञ एवान्यपरत्वं स्यादित्येवं बोध्यम् । एतदभिप्रायेण वक्ष्यति, "न वा नञो मुख्यार्थत्याग" इति । ननु नानुयाजेष्वित्यत्र न नञ् किं तु नपदमेवेत्यत आह । (८७) नपदं चेति । नन्वेवमब्राह्मण इत्यादावपि नञ्समासो न स्याद् अपदेनैव निषेधवाचिना गतार्थत्वाद्वित्यत आह । (८८) अमानोना इति । (८९) अपदमेवेति । नञ्प्रकृतिकमित्यर्थः । तथा चापदमपि भिन्नं नास्त्येवेति भावः । नन्वेवं कथं तस्य पृथगभिधानमित्यत आह । (९०) समासेति । अत एवाभवतीत्यादिप्रयोगः समासाभावादसाधुरिति भावः । एतदपि क्काचित्काभिप्रायं, यत्र च नञुत्तरपदं सर्वोत्तरं न भवति तत्र समासेऽपि नलोपो न भवति, गमिकर्मीकृतनैकनीवृतेत्यादौ । अत एव कथं नैकयशा नैककीर्त्तिरित्यादिरिति पूर्वपक्षयित्वा सर्वोत्तरपदं विवक्षितं यथा ऽब्राह्मण इत्यादौ तच्चेह नास्तीति समादधुर्भाषावृत्ताविति । (९१) न योग्यमिति । नद्वित्वान्वयप्रयोजकरूपावच्छिन्नमित्यर्थः । न चैवं द्वित्वाश्रयो धव इत्यपि योग्यं न स्यादिति वाच्यम् । तत्र द्वित्वसमवायस्यैवान्वयप्रतियोगित्वात्, तस्य चाव्यासज्यवृत्तित्वात् । (९२) धवपदइति । प्राथम्यादिति भावः । यद्यपि योग्यतावच्छेदकच्छिद्रेतरत्ववत् प्रकारान्तरोपस्थितमेव साहित्यमादायान्वयः संभवति, तथापि मतान्तरेणेदं, तथा चैतन्मते छिद्रेतरत्वेऽपि लक्षणैव, तदिदं वक्ष्यति "छिद्रेतरत्वविशिष्टे च घटपदस्य लक्षणैवे"ति । नन्वेवं धवखदिरपलाशमित्यादौ न लक्षणा स्यात् । अनुपपत्त्यभावात् । न च बहुत्वान्वयानुपपत्त्या सेति वाच्यम् । विभक्त्यर्थसंख्यायाः समासादप्रतीतेः । तदुक्तं, "संख्या तु व्यञ्जकाभावादनुक्ते"ति चेन्न । एकधर्मावच्छेदं विना स्वरूपत्रये स्वरूपान्वये धवं च खदिरं चेति तद्वाक्यभेदः स्यादिति परसिद्धान्तात् । समासारम्भकविग्रहे तथात्वात् समासेऽपि तथात्वमित्यन्ये । समासादपि विभक्त्यर्थसंख्याप्रतीतिरिति मतेनेदमित्यपरे ॥

॥ अथ वेदान्तकौस्तुभप्रभायाः ॥

॥ द्वितीयाध्यायस्य ॥

॥ प्रथमपादावशेषः ॥

नन्वसत्यमपि प्रतिबिम्बं बिम्बस्य, रेखारोपितो वर्णोऽर्थस्य, वर्णदैर्घ्यादिकं नगो नाग इत्यर्थभेदस्य, शङ्काविषं मरणस्य, सवितृशुषिरादिश्चारिष्टादेः, रज्जुसर्पो भयकम्पादेः, स्वाप्निकः स्त्रीसंगमः सुखस्य, स्वाप्नोऽर्थः शुभाशुभयोः, साधकं दृष्टम्। आह च भगवान् भाष्यकारः, "नैष दोषः शङ्काविषादिनिमित्तमरणादिकार्योपलब्धेः, स्वप्नदर्शनावस्थस्य च सर्पदंशनोदकस्नानादिकार्यदर्शनात्, तथा च श्रुतिः"

"यदा कर्मसु काम्येषु स्त्रियं स्वप्नेषु पश्यति ।
समृद्धिं तत्र जानीयात् तस्मिन् स्वप्ननिदर्शने" ॥

इत्यसत्यस्वप्ननिदर्शनेन सत्यसमृद्धेः प्रतिपत्तिं दर्शयति, तथा, प्रत्यक्षदर्शनेषु केषुचिदरिष्टेषु जातेषु न चिरमिव जीविष्यतीति विद्या" दित्युक्त्वा, "अथ स्वप्ने पुरुषं कृष्णं कृष्णदन्तं पश्यति स एनं हन्ति" इत्यादिना तेन तेनासत्येनैव स्वप्नदर्शनेन सत्यं मरणं सूच्यत इति दर्शयति, प्रसिद्धं चेदं लोकेऽन्वयव्यतिरेककुशलानाम्, ईदृशेन स्वप्नदर्शनेन साध्वागमः सूच्यते, ईदृशेनासाध्वागम इति, तथाकारादिप्रत्यक्षरप्रतिपत्तिर्दृष्टा रेखानृताक्षरप्रतिपत्ते"रित्यादिर्नेति चेत्, तत्राह भगवान् सूत्रकारः ॥

॥ भावे चोपलब्धेः ॥ १५ ॥

कारणस्य सद्भावे सत्येव कार्योपलब्धिर्दृष्टचरा। यथा मृदादिभाव एव घटादिकार्योपलम्भो नान्यथा देशान्तरे कालान्तरे वा। तस्मात् सदेवोपादनमुपादेयस्य तदनन्यत्वं च।

ननु चाग्निकार्ये धूमे गोमयादिकार्ये वृश्चिकादौ चानन्यत्वं न दृश्यते। तत्रोच्यते। अग्निर्हि निमित्तकारणं, पितेव पुत्रस्य। विनष्टेऽप्यग्नौ धूमस्थितिदर्शनात्। अग्निसंयुक्तार्द्रेन्धनाद्धि धूमो जायते। गन्धैक्याच्चार्द्रेन्धनकार्यमेव धूमः। वृश्चिकादौ चाद्यकारणपृथिवीद्रव्यत्वेनानन्यत्वोपलब्धेः।

नापि पूर्वोक्तव्यभिचारकल्पना युक्ता। सर्वत्र कारणस्य सत्त्वात्। तथाहि, बिम्बाभाववदवृत्तित्वरूपव्याप्तेः प्रतिबिम्बे सत्त्वात्, तज्ज्ञानस्यैव सतो बिम्बानुमितिजनकत्वाच्च न व्यभिचारः। रेखायाश्च वर्णे पदस्यार्थे इव संकेतितत्वेन रेखास्मारितवर्णस्यैव बोधकत्वाद् रेखाभेदज्ञानवतामपि तथा बोधाद्दीर्घत्वादिकं वर्णगतं सत्यमेव। तार्किकमते नाना दीर्घादयोऽनित्या वर्णाः।

सिद्धान्ते तु नित्या एव। त्वन्मते त्वनित्या एव। शास्त्रयोन्यधिकरणे वेदानित्यत्वस्य त्वयाङ्गीकारात्। दीर्घत्वादिज्ञानस्यैव हेतुत्वेन मतान्तरेऽप्यनुपपत्त्यभावात्। शङ्कानिमित्तभयजन्यधातुव्याकुलतैव मरणहेतुर्न विषम्। पुत्रमरणश्रवणवत्। भारतयुद्धादौ घटोत्कचादिभिः शक्तिविशेषात् सृष्टमर्थक्रियाकारि गजादिकं सत्यमेव। सवितृशुषिररज्जुसर्पज्ञानमेवारिष्टभयादिहेतुः। सत्यप्यर्थे तदज्ञाने भयाद्यभावात्। स्वाप्नस्त्रीज्ञानस्यैव सुखहेतुत्वं न तु तत्संगमस्य। तदज्ञाने तदभावात्। स्वाप्निकपदार्थानामपि परमात्मसृज्यत्वेन सत्कार्यजनकत्वान्नासतः क्वापि कार्यकारित्वमिति भावः।

किंच, एकत्र सत एवान्यत्रारोपो नियतः। स्वरूपेणासतः खपुष्पादेः क्वचिदप्यारोपादर्शनात्।

न चारोपे तद्विषयकप्रतीतिमात्रमेवापेक्षितं, न तु विषयसत्त्वमपीति वाच्यम्। असतः प्रतीतेरेवासंभवात्।

ननु शुक्तौ रजतप्रतीतिवद्रज्जौ सर्पप्रतीतिवच्च भेदप्रतीतेरपि दोषमात्रकारणमपेक्षितं, न विषयसद्भाव इति चेन्न। त्वन्मते दोषमात्रकारणस्यापि तुच्छत्वसाम्येन ततः प्रतीतिरूपकार्योत्पत्तेरसंभवात्। कार्यस्य कारणसत्तापेक्षत्वनियमात्।

न चासत्यस्याप्यारोपितसर्पस्य भयकम्पादिजनकत्वदर्शनादुक्तहेतोर्व्यभिचार इति वाच्यम्। स्वरूपेणासतः कार्योत्पत्त्यनुकूलशक्तिमत्त्वाभावात्। आरोपितसर्पस्थलेऽपि सर्पज्ञानस्यैव भयादिहेतुत्वं, नारोपितविषयस्येति पूर्वमेवोक्तम्। अन्यथा सर्पज्ञानाभाववतो बालस्य भ्रमो भयादिश्च भवेत्। न तु तदस्ति। प्रत्युत सत्यसर्पस्यापि बालैः स्वहस्तस्पर्शदर्शनात्।

न चासतोऽपि रज्जुसर्पादेः स्वज्ञानजनकतेव भयकम्पादिजनकतापि किं न स्यादिति वाच्यम्। तत्रापि दोषस्यैव ज्ञानजनकत्वान्नारोपितविषयस्य। अन्यथा सत्यपि तमोदोषे रज्जौ सर्पज्ञानोत्पत्तिः केन वार्यते। तवाभिप्रेतासतः कारणस्य विद्यमानत्वात्।

एवंच मृगतृष्णाजलेन मृगादीनां तृष्णानिवृत्तिः। गुञ्जारोपिताग्निना शीतनिवृत्तिः। विषारोपितामृतेन मरणाभावः। शूद्राद् ब्राह्मण्यां जातस्य चाण्डालस्य ब्राह्मणत्वेन ज्ञातस्य वेदाधिकारः। तत्कृतयज्ञस्य ज्योतिष्टोमादेः स्वर्गादिजनकत्वम्। आरोपितात्मत्वादेश्च देहादेः श्रवणादितो मुक्तिः। स्वार्जितयज्ञादेश्च स्वर्गादिप्राप्तिश्च स्यादिति भावः। तस्मात् सदेवोपादानमिति सिद्धम् ॥ १५ ॥

तथैव कार्यमपि सदेवोत्पद्यत इत्याह।

॥ सत्त्वाच्चावरस्य ॥ १६ ॥

अवरस्य कार्यस्य कारणे सत्त्वात्। यत्र यस्याभावो न

तत् तत उत्पद्यते । यथाग्नेर्व्रीह्यङ्कुरादिः, सिकताभ्यस्तैलमित्यर्थः । यथा च कारणं ब्रह्म त्रिषु कालेषु सत्त्वं न व्यभिचरति, तथा कार्यरूपं विश्वमपि त्रिषु कालेषु सत्त्वं न व्यभिचरतीति । परैरपि तथैवोक्तेः । अन्यथा "सदेव सौम्येदमग्र आसीत्", "आत्मा वा इदमग्र आसी"दित्यादाविदंशब्दगृहीतस्य कार्यस्य भूतकालिकसत्तायोगश्रवणस्य बाधात् । अत्यन्ताभावप्रतियोगिनोऽवस्तुत्वेन कालसंबन्धासंभवात् ।

ननु स्वाप्नरथादिसृष्टिदर्शने विषयस्य दुर्निरूपत्वेन मृषात्वं सुप्रसिद्धम् । तद्वज्जायत्प्रञ्चस्यापि मृषात्वमेव । तथा च विषयासिद्धा तज्ज्ञानमपि मृषैवेति चेन्न । विषयस्य तत्रापि सत्त्वात् । तथाहि, स्वाप्नपदार्थस्येश्वरसृज्यत्वेन याथात्म्यम् । तद्रूपत्वात् । आकाशादिवत् ।

एवंच तद्विषयकज्ञानयाथार्थ्यस्य विवादो निरवकाशः ।

ननु यदि स्वाप्नसृष्टिः परमेश्वरीया, तर्हि तात्कालिकबाधो न स्यात् । समीपवर्तिभिरन्यपुरुषैश्चानुभूयेत । न तु तदस्ति तस्माज्जीवसृष्टिरेव । अतस्तन्मिथ्यात्वस्य सुतरां सिद्धिरिति चेत् । न तावदीश्वरसृष्टेः सर्वस्या अप्याकाशादिवद्बहुकालावस्थायित्वनियमो वक्तुं शक्यः । तत्संकल्पानुसारित्वात् तत्कार्यस्य तत्र कस्यचिदाकाशादेर्महाप्रलयावसानावस्थितिः । इतरस्य देवदत्तपुत्रादेर्यत्किंचित्कालावस्थायित्वनियमः । कस्यचित् पदार्थस्य तात्कालिकोत्पत्तिविनाशयोगश्च प्रत्यक्षादिप्रमाणसिद्धः ।

तस्मात् स्थितिकालस्य तत्कर्तृपरमेश्वरसंकल्पाधीनत्वेन बह्वल्पकालावस्थानानियमान्नोक्तदोषावकाशः ।

नापि समीपवर्तिभिरनुभूयमानत्वं मिथ्यात्वे नियामकम् । देवदत्तादिमनोगतसुखदुःखादेरन्यैरननुभूयमानत्वेऽपि तस्य मिथ्यात्वाभावात् । तथा प्रकृतेऽपि बोध्यम् ।

न च मनोगतसुखादेर्जीवजन्यत्वमिति शङ्कनीयम् । ईश्वरसृज्यत्वस्य श्रीमुखगीतत्वात् । "सुखं दुःख" मित्यारभ्य "भवन्ति भावा भूतानामत एवे"ति वाक्येन ।

किंच, तत्तत्प्राणिपुण्यापुण्यानुरूपतत्तत्पुण्यानुरूपतावत्कालावस्थानानुकूलभगवत्संकल्पसृष्टा एव स्वाप्नपदार्थाः, न जीवसृष्टाः । तेषां बद्धावस्थायां सत्यसंकल्पत्वाभावात् । अन्यथा तेषां सुखमेव सर्वदा स्यान्न कदाचिदपि दुःखयोगः । जायत्समयेऽपि स्वसंकल्पानुसारेण सृष्टिं कुर्युः । न तु तथा दृश्यते । प्रमाणाभावादसंभवाच्च ।

किंच "एष सुप्तेषु जागर्ति कामं कामं पुरुषो निर्मिमाणस्तदेव शुक्रं तद्ब्रह्म तदेवामृतमुच्यते । तस्मिंल्लोकाः श्रिताः सर्वे तदु नात्येति कश्चने"ति स्वाप्नसृष्टिश्रुत्युक्तलिङ्गानि न कथमपि जीवात्मन्यन्वेतुं शक्यानि । परमेश्वरासाधारणधर्मत्वात् । विशेषार्थस्तु तृतीयाध्याये तत्प्रकरणे वक्ष्यते ।

तस्मात् परमेश्वरसृज्या एव स्वाप्नपदार्था इति सिद्धम् ।

किंच,तत्कार्यकारित्वान्यथानुपपत्तिरपि तत्सत्यत्वे मानत्वेनानुसंधेया ।

किंच,ब्रह्मणः सर्वकारणत्वान्यथानुपपत्तिश्चापि स्वाप्नपदार्थानां तत्सृज्यत्वे प्रमाणम् ।

ननु ब्रह्मणः सर्वोपादानत्वानुपपत्तिः । तथाहि,अचेतनस्य परिणामिसत्तायोगाद्भवतु तत्कारणत्वम् । ब्रह्मणश्चेतनस्य तु कूटस्थसत्ताश्रयत्वेन जन्माद्यसंभवात् कथं तत्कारणत्वम् । अन्यथाऽनित्यत्वापत्तेः । प्रत्यगात्मनोऽनित्याः । जन्मादिमत्त्वात् । घटादिवत् । इति प्रयोगात् । "न जायते म्रियते वा विपश्चि"दित्यादिशास्त्रव्याकोपात् । कृतनाशादिप्रसङ्गाच्चेति चेन्न । प्रामादिकोक्तेः । स्वानादिकर्मणां मध्ये फलं दातुमुन्मुखस्य प्रबलस्यैकतमस्य कर्मविशेषस्य फलानुभूतये तदनुकूलदेहादिसंयोगे सति तद्भोगार्हज्ञानशक्त्यादिविकाशस्य जीवजन्मपदार्थत्वात् । अत्यन्तविस्मृतिपूर्वकस्थूलदेहादिवियोगेन भोगाद्यनर्हतापत्तेश्च । मृत्युनाशादिपदार्थत्वान्नोक्तदोषावकाशः ।

वस्तुतस्तु, अस्याः शङ्काया उन्मत्तप्रलापत्वमेव । श्रुतेस्तावत् सर्वकार्यं प्रत्येव ब्रह्मणः कारणत्वप्रतिपादकत्वेन जीवे तत्संसर्गाभावात् । यदि प्रत्यगात्मा कार्यं स्याद्ब्रह्मणश्च तदुपादानत्वाभावे सर्वकारणन्यूनताप्रसक्तिः स्यात् । न तु तदस्ति । तस्यानाद्यन्तत्वश्रवणात् । तत्कारणस्य कूटस्थत्वश्रवणादिति भावः ।

नन्व"नादिनिधना नित्या"इति वेदस्याप्यनाद्यनन्तत्वश्रवणात् तत्कारणत्वं ब्रह्मणोऽनुपपन्नम् । तथात्वे च ब्रह्मणः समस्तकारणत्वेऽव्याप्तिरिति चेन्न । तस्यापि निःश्वसितन्यायेनाविर्भावकारणत्वस्य ब्रह्मगतत्वेनोक्तदोषानवकाशात् । "अस्य महतो भूतस्य निःश्वसितमेतद्यदृग्वेदो यजुर्वेदः सामवेद" इति श्रुतेरुक्तन्याये मानत्वात् । "तस्माद्यज्ञात् सर्वहुत ऋचः सामानि जज्ञिरे"इति श्रुतेश्च तदाविर्भावे मानत्वात् । वेदानां जन्मादयस्तु निर्विकारित्वेनैवाविर्भावतिरोभावमात्रत्वम् । न त्वानुपूर्व्यन्यथाभाव इति सिद्धान्तसेतुकायां श्रीसुन्दरभट्टपादोक्तेः । अचेतनप्राकृतवर्गस्याकाशादेस्तु परिणामिसत्ताकत्वेन स्थूलसूक्ष्मावस्थान्तरव्यक्ताव्यक्तनामरूपान्तरविभागेनावस्थितिरेवोत्पत्तिलयशब्दाभ्यां प्रतिपाद्यते । न तु तार्किकवदसतो जन्मनाशौ । शशशृङ्गादावतिप्रसङ्गात् । नाप्यन्येषामिवारोपापवादौ । श्रुतिप्रमाणशून्यत्वादिति संक्षेपः ।

एवं मिथ्यात्वे प्रमाणासिद्धा कार्यं सदेव । स्वोपादानब्रह्माप्रृथक्सिद्धं च । उपादानात्मकत्वादुपादेयमात्रस्येति सिद्ध-

म्। "सदेव सौम्येदमग्र आसीत्", "ऐतदात्म्य"मित्यादिश्रुतेरिति राद्धान्तः। सदसच्छब्दयोः पञ्चमहाभूतपरत्वस्य श्रुत्यैव कण्ठरवेण व्याख्यातत्वात्। "यदन्यद्वायोरन्तरिक्षाच्चैतत् सद्वायुरन्तरिक्षं चास"दिति श्रुतेः। अन्यथा "न सत् तन्नासदुच्यत"इति स्मृत्यात्मनोऽप्यनिर्वचनीयत्वप्रसङ्गादिति पूर्वमेवोक्तमलं विस्तरेण ॥ १६ ॥

ननु मास्तु कार्यस्याध्यस्तत्वासिद्ध्या मिथ्यात्वम्। अनिर्वचनीयत्वे प्रमाणाभावात्। किं त्वसत्त्वमेवास्तु प्रपञ्चस्य। तत्र श्रुतिप्रमाणस्य सत्त्वात्। इत्याक्षिप्योत्तिष्ठन्त्यसत्कार्यवादिनो वैशेषिकादयः ॥

॥ असद्व्यपदेशान्नेति चेन्न धर्मान्तरेण
वाक्यशेषाद्युक्तेः शब्दान्तराच्च ॥ १७ ॥

तथा चायं तेषामभिप्रायः। कार्यमसदेव। कारणवैलक्षण्यात्। तथाहि, नहि कार्यकारणविषयकज्ञानस्यैकरूपत्वनियमः। शब्दभेदात्। घटः पट इति शब्दात् कार्यप्रत्ययः। मृत् तन्तव इति शब्दात् कारणप्रत्ययः। जलाहरणादि देहाच्छादनादि च घटपटादेः कार्यस्य फलम्। कुड्यनिर्माणादि रज्जुनिर्माणादि च मृत्तन्त्वादिकारणस्य फलम्। नहि घटादिना कुड्यनिर्माणादिसंभवो, नापि मृदादिना जलाहरणादिसंभवश्चेत्यन्वयव्यतिरेकेण फलभेदाच्च। कालभेदादपि। प्राक्कालिकं कारणम्,उत्तरकालिकं च कार्यम्। आकृतिसंख्याभेदाच्च। पिण्डाकारमेकसंख्याकं च कारणम्। कम्बुग्रीवपृथुबुध्नोदराकारमनेकसंख्याकं च कार्यम्।

किंच, कार्यस्य सत्त्वे कारकव्यापारवैयर्थ्याच्चेत्यादिभ्यो हेतुभ्यः कार्यस्यासत्त्वमिति तात्पर्येण शङ्कते कणभक्षादिभिः।

नन्व "सदेवेदमग्र आसीत्," "असद्वा इदमग्र आसी"दित्यादिश्रुतिभिः कार्यस्योत्पत्तेः प्राक्कालेऽसत्त्वव्यपदेशात् कथं सत्त्वमिति चेत्। तत्रोत्तरमाह भगवान् सूत्रकारः। नेति। प्रागपि कार्यस्यासत्त्वं व्यपदिश्यत इति नाशासनीयम्। तत्र हेतुमाह। धर्मान्तरेणेति। अभिव्यक्तनामरूपात् सत्त्वधर्माद्धर्मान्तरमभिव्यक्तनामरूपमसत्त्वम्। तेन योगादियं श्रुतिरसत्त्वं व्यपदिशति, न तु स्वरूपासत्त्वम्। सत्त्वासत्त्वे हि द्रव्यधर्मौ। अनभिव्यक्तनामरूपकमिति सूक्ष्ममासीदित्यर्थः। तत्र हेतुः। वाक्यशेषादिति। उपक्रमे जाते संशये वाक्यशेषाद्विनिश्चीयते तात्पर्यमिति प्रेक्षावतां प्रक्रिया। यथाऽ"क्ताः शर्करा उपदध्या"दित्युपक्रमे केनाक्ता इति संदेहे "तेजो वै घृत"मिति वाक्यशेषाद् घृतेनेति निश्चयः। एवमत्राप्युपक्रमे "असदेवेदमग्र आसी"दित्यादिनाऽसदिति निर्दिष्टम्। तस्यैव पुन"स्तत् तदासी"दिति वाक्यशेषेण तच्छब्देन परामृश्य सत्त्वाभिधानादसत्त्वसंशयं वारयति। असतः कालत्रयसंबन्धायोगात्। तथात्वे चासीदिति प्रयोगानुपपत्तेः। सच्छब्देन परामर्शानुपपत्तेश्च।

अपिच, "असद्वा इद"मित्यत्रापि "तदात्मानं स्वयमकुरुते"ति वाक्यशेषे विशेषश्रवणाच्च स्वरूपासत्त्वम्। किं त्वव्यक्तनामरूपकत्वादिति सूक्ष्मं वस्त्वसच्छब्देनोच्यत इत्यर्थः।

तस्मात् कार्यं सत्। उपलभ्यमानत्वात्। न ह्यत्यन्तासतः खपुष्पादेः क्वाप्युपलब्धिर्दृष्टा चोपपन्ना वा। '

यदुक्तं"कारणवैलक्षण्या"दिति कार्यासत्त्वे हेतुः। सोऽपि स्वरूपासिद्धत्वेनाभासरूप एव। नहि कारणान्वयहीनं कार्यं क्वाप्युपलभ्यते।

नापि कालभेदात् तयोरत्यन्तभेदो वक्तुं शक्यः। तस्यावस्थाभेदविषयकत्वात्। न द्रव्यपरत्वम्। असंभवात्। कारणावस्थाभेदेनैवाकारसंख्याफलादिभेदस्याप्युपपद्यमानत्वेनोक्तदोषायोगात्। अन्यथा बालस्याप्यवस्थाभेदेन स्वरूपभेदोऽङ्गीक्रियतां तर्कनिपुणैः। तथात्वे च योऽहं पितुरुत्सङ्गेऽक्रीडं, सोऽहं वृद्धो बालाल्लालयामीति प्रत्यभिज्ञानुपपत्तेः। कृतनाशाकृताभ्यागमप्रसङ्गाच्च।

नापि तस्य भावे कारकव्यापारवैयर्थ्यम्। पूर्वानभिव्यक्तस्याभिव्यञ्जनेनैव तस्य सार्थकतोपपत्तेः। अन्यथाऽसतोऽभिव्यक्त्यङ्गीकारे, कारकादिव्यापारेणाग्नेर्यवादीनां, जलमन्थनाद्, घृतादेः, सिकताभ्यस्तैलस्याप्यभिव्यक्तिप्रसङ्गात्।

किंच, असत्कार्यवादिनामपि कारकव्यापारोऽनुपपन्न एव। प्रागुत्पत्तेः कार्यस्यासत्त्वेन कार्यादन्यत्रैव कारकव्यापारेण भवितव्यम्। तत्रान्यत्वाविशेषात्। तन्तुगतकारकव्यापारेण घटादीनामुत्पत्तिप्रसङ्गादित्यर्थः।

तस्मान्नासत्त्वं कार्यस्येति भावः।

किंच, युक्तेः शब्दान्तराच्चेति हेतुद्वयेन कार्यसत्त्वं निश्चीयत इत्यन्तरार्थः। तत्र युक्तिर्नामानुपपत्तिनिरासेनोपपत्तिसमर्थनेन वस्तुनिर्णायकवाग्विसर्गः। तथाहि, यद्यसदेव कार्यं, तर्हि दध्यर्थिभिः क्षीरस्यैव, घटार्थिभिर्मृद एव, च ग्रहो न स्यात्। प्रत्युत विपर्ययश्च स्यात्। दध्यर्थिभिर्मृदादिग्रहो घटार्थिभिश्च क्षीरादिग्रहः स्यात्। असत्त्वाविशेषात् सर्वत्र। नतु तदस्ति। तस्माच्च तथा। अतः कारणे व्यक्ताव्यक्तोभयावस्थायां कार्यस्य सद्भावः। स्थूलसूक्ष्मव्यवस्थायाः सदसत्पदाभ्यां श्रुत्या व्यपदिश्यत इत्यर्थः। अन्यथा सर्वत्र सर्वाभावाविशेषेणाग्न्यादेरप्यङ्कुराद्युत्पत्तिः कथं न जायते।

ननु साम्येऽप्यसत्त्वे क्षीर एव दधिघृतादेः कश्चिदतिशयो न मृदादौ, मृद्येव घटस्य कश्चिदतिशयो न क्षीरादौ। इति

चेन्न। अतिशयाङ्गीकारे प्रागवस्थायामसत्कार्यवादहानिः, सत्कार्यवादसिद्धिश्च तव श्रीमुखेनैव सिद्धेति ।

न च सत्कार्यवादे कारकव्यारवैयर्थ्यं शङ्क्यम्। तस्य पूर्वमेव निरस्तत्वात्। कारणस्य कार्याकारव्यवस्थापकत्वेनैव तस्य सार्थकत्वात् । कारणमेव हि कार्याकारं प्रतिपद्यमानं कार्यमित्युच्यते । कार्याकाराणां कारणात्मकत्वनियमात् । “ऐतदात्म्यमिदं सर्व”मिति श्रुतेः । “वासुदेवात्मकान्याहु”रिति स्मृतेश्च । इत्यादियुक्तेः कार्यस्य प्रागुत्पत्तेः सत्त्वनिश्चयात् ।

किंच, शब्दान्तराच्चेति सत्त्वनिश्चय इति योज्यम् । पूर्वोदाहृतादसत्प्रतिपादकादसच्छब्दादन्यस्तद्विपर्ययप्रतिपादनपरः सच्छब्दः शब्दान्तरः । “सदेव सोम्येद”मित्यादिः । तस्मादपीति यावत् ।

यद्वा, “तद्धैक आहुरसदेवेदमग्र आसी”दित्यसद्व्यपदेशपरः। ततो वैलक्षण्यपरः “कथमसतः सज्जाये”तेति शब्दान्तरः। तस्मादप्युत्पत्तेः प्राक् कार्यस्येदंशब्दाभिधेयस्य तत्त्वनिश्चयात् । अन्यथा तस्येदंशब्दव्यपदिष्टस्य कार्यस्य सच्छब्दवाच्येन कारणेन सह श्रूयमाणसामानाधिकरण्यस्यासंभवो दुर्वारः । सदसतोरितरेतरात्यन्तविरुद्धयोः सामानाधिकरण्यासंभवात् ।

एतेन स्थाणुरेव चोर इतिवत् सर्वं खल्विदं ब्रह्मेति जगत्कारणयोः सामानाधिकरण्यं सूपपन्नमित्युक्तिर्निरस्ता । श्रौतत्वात् । अन्यथाऽसत्कार्यवादप्रसङ्गात् । स्थाणुचोरयोरुपादानोपादेयत्वाभावेन दृष्टान्तासिद्धेश्च । “तज्जलानिति” इति वाक्यशेषात् ।

एतेन कार्यकारणयोरत्यन्तभेदपक्षोऽपि निरस्तः । अत्यन्तभिन्नयोर्गवाश्वयोरिव सामानाधिकरण्यासंभवात् । “गौरनाद्यन्तवती” “ऊर्ध्वमूलोऽर्वाक्शाख एषोऽश्वत्थः सनातनः”, “तत् सदासीत्” “अथ नामधेयं सत्यस्य सत्यम्”, “प्राणा वै सत्यम्” ‘अथैनमाहुः सत्यकर्मे”ति, ‘सत्यं ह्येवेदमसौ सृजते”, ‘अष्टरूपामजां ध्रुवा”मित्यादिश्रुतिभ्यः। “ऊर्ध्वमूलमधःशाख”मित्यादिस्मृतेश्च ।

ननूक्तश्रुत्यादीनां भेदपराणां व्यावहारिकसत्तापरत्वेन नैराकाङ्क्ष्यान्न पारमार्थिकत्वम्, अभेदपरश्रुत्यादीनां तु परमार्थसत्त्वपरत्वात् प्राबल्यमिति चेन्न। कपोलकल्पनां विना प्रमाणान्तराभावात् ।

न च सल्लिङ्गोपेतत्वेन प्राबल्यमिति वाच्यम् । भेदपरश्रुत्यादीनामपि तथात्वस्य पूर्वाचार्यैः प्रतिपादितत्वात् । विस्तरभिया चोपरम्यते ।

न चाभेदपराणां निरवकाशत्वेन प्राबल्यम् । भेदपराणामपि तथात्वात् ।

न च तद्विषयभेदस्य प्रत्यक्षप्राप्तत्वेन तासामनुवादपरत्वमिति वाच्यम् । निर्विशेषाधिष्ठानरूपसत्ताया अभेदशास्त्रविषयाया अपि घटोऽस्ति, घटाः स्युरिति प्रत्ययेऽस्तीति प्रत्यक्षप्राप्ततयाऽभेदश्रुतीनामपि तदनुवादपरत्वसाम्यात् ।

किंच, भेदश्रुतिगम्यं निर्विशेषाद्वितीयं ब्रह्म तासां विषयो न वेति ।

नाद्यः, तस्य पदार्थत्वेन भेदशास्त्रवदभेदश्रुतीनामपि व्यवहारसत्त्वं भवतां श्रीमुखेनैव सिद्धम् । निर्विशेषाद्वितीयं ब्रह्म व्यावहारिकम् । भेदश्रुतिविषयत्वात्। पदार्थत्वाच्च। तव मते व्योमादिवत् । इति प्रयोगात् ।

न द्वितीयः। इदमर्थत्वेन शब्दादिप्रमाणगोचरे भेदशास्त्रवदभेदशास्त्रस्यापि व्यवहारविषयत्वं सूपपन्नम् ।

किंच, सर्वप्रमाणाविषयस्य शशशृङ्गायमाणत्वेन द्वितीयपरशास्त्रस्यापि निर्विषयत्वेन बाधप्रसक्तेदुर्वारत्वात् । तव पक्षेऽभेदशास्त्रस्य निर्विषयत्वेन बाधप्रसक्तेर्दुर्वारत्वात् । तस्य सर्वज्ञसर्वशक्तेर्विश्वकारणस्यैक्यप्रतिपादनपरत्वेनैव नैराकाङ्क्ष्यान्नोक्तदोषयोग इत्यलं विस्तरेण ।

ननु यदि विवर्तपक्षानङ्गीकारः, तर्हि को वा पक्षोऽभिप्रेतः । संघातवादो वा, आरम्भवादो वा, परिणामवादो वेति ।

नाद्यः । बाह्यपक्षप्रवेशात् ।

न द्वितीयः । तार्किकपक्षावलम्बनप्रसङ्गात् ।

नापि चरमः । आनुमानिकसांख्यमतप्रवेशात् । पक्षान्तराभावाच्च । इति चेन्न । चरमपक्षस्यैवास्मदभिप्रेतत्वात् । सूत्रकाराभिमतत्वाच्च । “आत्मकृतेः परिणामात्’, “स्वयमात्मानमकुरुते”ति श्रुतिसूत्राभ्याम् ।

नन्वाकाशकल्पस्य विभोर्वस्तुतः परिणामोऽसंभव एव। तथा च ब्रह्म परिणामानर्हं भवितुमर्हम् । विभुपरिमाणकत्वात् । निरवयवत्वात्। आकाशवत्। इति चेन्न। परिणामस्वाभाव्यात् । क्षीरवत् । सर्वज्ञत्वात् सर्वशक्तिमत्वाच्च स्वेच्छया परिणामयेदात्मानमिति शक्यते वक्तुम् ।

ननु सावयवस्यैव क्षीरादेः परिणामदर्शनान्न निरवयवस्येति तादवस्थ्यमेवास्य दोषस्येति चेन्न। क्षीरपरमाण्वादौ तद्व्यभिचारात्। तथाहि,न सावयवत्वं वस्तुपरिणामे प्रयोजकम्, अपितु वस्तुगता तादृशी शक्तिरेव। अन्यथा जलस्यापि सावयवत्वाविशेषेण दधिभावेन परिणामापत्तेर्दुर्वारत्वात्। क्षीरावयवानां निरवयवत्वाच्च ।

अयं भावः। द्रव्यपरिणामेऽवयविगता शक्तिः कारणावयवगता वा ।

नाद्यः। नहि द्रवद्रव्यव्यतिरिक्तस्यावयवित्वं त्वयाभ्युपगम्यते।

द्वितीये तु क्षीरावयवाः सावयवा निरवयवा वेति। आद्येऽनवस्थापत्तिः। क्षीराब्धिः कुण्डे स्यादवयवानामानन्त्यात्।

तस्मान्निरवयवा एवेत्यकामेनापि त्वयाभ्युपगन्तव्याः।

एवं निरवयवस्य परिणामाभाववत्त्वनियमभङ्गाद् विरुद्धो हेतुर्निरवयवत्वादिति।

नापि विभोः परिणामाभावनियमः। आकाशस्यापि वाय्वात्मना शब्दात्मना च परिणामदर्शनात्। "आकाशाद्वायु"रिति श्रुतेः।

एतेन द्वितीयस्यापि हेतोः सत्प्रतिपक्षत्वं दृष्टान्तविकलत्वं चोक्तं भवति। तथा चात्मतत्त्वं परिणामयोग्यम्। विभुत्वात्। आकाशवत्। इति।

न च तस्यापि सावयवत्वं जन्यत्वादिनावगम्यत इति वाच्यम्। अपञ्चीकृतस्यात्र विवक्षितत्वात्। "आकाशवत् सर्वगतश्च नित्य" इति श्रुतेः।

ननु स्यादेतत्। निरवयवस्यापि विभोस्तादृशशक्तियोगादेव परिणामः। तथापि तत्र कृत्स्नस्य ब्रह्मणः परिणामोऽभिप्रेतस्तदेकदेशस्य वा।

आद्ये सर्वस्यापि परिणामत्वान्मुक्तोपसृप्यब्रह्माभावप्रसङ्गः। विकारित्वानित्यत्वप्रसक्तिश्च। तथात्वे 'नित्यं विभुं सर्वगत"मित्यादिश्रुतिव्याकोपश्च।

किंच, विकारापन्नस्य कृत्स्नस्य ब्रह्मणो जगदाकारतया प्रत्यक्षगोचरत्वे सर्वेषामपि प्राप्तत्वात् सर्वमोक्षप्रसङ्गः। साधनतत्प्रतिपादकशास्त्रतदुपदेष्टॄणामानर्थक्यं च।

न द्वितीयः। सदेशत्वापत्त्या सावयवत्वयोगेन "निष्कलं निष्क्रियं शान्त"मित्यादिनिरवयवत्वप्रतिपादकशास्त्रव्याकोपाच्चायोग्य एव परिणामपक्ष इति चेन्न। उदाहृतेष्वाकाशादिषु निरवयवत्वविभुत्वसाम्येऽपि निर्विकारित्वदर्शनेन दोषत्वात्।

तस्मान्निरवयवस्यापि विभोर्ब्रह्मणः परिणामेऽपि तादृशशक्तियोगादेवाविकारित्वमपीति ध्येयम्।

सोऽयं परिणामो न्यग्रोधधानादृष्टान्तेन षष्ठश्रुत्या वर्णितः।

वस्तुतस्तु शक्तिविशेषस्यैव परिणामशब्दवाच्यत्वाद्ब्रह्मस्वरूपपरिणामानभ्युपगम एवेति पूर्वमेवोक्तम्॥ १७॥

एवं च न कश्चन दोष इत्यादि तात्पर्यं बुद्धौ कृत्वा सूत्रयति भगवान् बादरायणः॥

॥ पटवच्च॥ १८॥

यथा संकुचितः पटः पटत्वेनागृह्यमाणोऽपि पट एव। प्रसारणे तु स्पष्टं प्रत्यक्षतया गृह्यते। तथा तिरोभावसमयेऽनभिव्यक्तं विश्वं नामरूपाभ्यामगृह्यमाणमपि सदेवाविर्भावसमये तु प्रत्यक्षागमादिना स्पष्टं नामरूपाभ्यां गृह्यत इति सूत्रार्थः। तथोक्तं वैष्णवे श्रीध्रुवेण।

"न्यग्रोधः स महानल्पे यथा बीजे व्यवस्थितः।
संयमे विश्वमखिलं बीजभूते तथा त्वयि॥
बीजादङ्कुरसंभूतो न्यग्रोधः स समुत्थितः।
विस्तारं च यथा याति त्वत्तः सृष्टौ तथा जगत्॥

इत्यादिना॥ १८॥

उक्तसिद्धान्तसिद्धये तदुपोद्बलनरूपं दृष्टान्तान्तरमाह भगवान् सूत्रकारः॥

॥ यथा च प्राणादिः॥ १९॥

यथा प्राणायामसंकुचितशक्तिः प्राणापानादिना विशेषरूपेणागृह्यमाणोऽपि सूक्ष्मसद्रूपप्राणापानादिविशेषवानेव। मुक्तायामस्तु तत्तद्विशेषरूपेणाकुञ्चनप्रसारणादिकार्यान्यथानुपपत्त्या स्पष्टं गृह्यते। तद्वत् सृष्टेः प्रागनभिव्यक्तनामरूपकं कार्यं तत्तन्नामरूपाभ्यामगृह्यमाणमपि स्वोपादाने सदेव। सृष्टिसमये तु व्याकृतनामरूपत्वात् स्पष्टं गृह्यत इत्यक्षरार्थः।

ननु कार्यस्य तत्त्वमनुपपन्नम्। तथाहि, "सदेव सोम्येदमग्र आसीत्", "एकमेवाद्वितीयं", "नेह नानास्ति किंचन", मृत्योः स मृत्युमाप्नोति य इह नानेव पश्य"तीत्यादिश्रुतिभिः सावधारणाभिरन्वयव्यतिरेकेण कारणैकत्वनिश्चायिकाभिः कारणेतरवस्तुमात्रस्य निषिध्यमानत्वान्मृषात्वमेव।

तस्माद्रज्जुज्ञानेन सर्पादिबाधवद् ब्रह्मात्मत्वज्ञानेन शारीरत्वस्य बाधे तत्कृतसर्वव्यवहारस्यापि बाधः। "यत्र त्वस्य सर्वमात्मैवाभूत् तत् केन कं पश्ये"दिति श्रुतेः। तथैवाह च भगवान् भाष्यकारः। "मृत्तिकेत्येव सत्य"मिति प्रकृतिमात्रस्य दृष्टान्ते सत्यत्वावधारणाद् वाचारम्भणशब्देन च विकारजातस्यानृतत्वाभिधानाद् दार्ष्टान्तिकेऽपि "ऐतदात्म्यमिदं सर्वं" "तत् सत्य"मिति च परमकारणस्यैकस्य सत्यत्वावधारणात्। "स आत्मा", "तत् त्वमसि श्वेतकेतो"इति च शारीरस्य ब्रह्मभावोपदेशात्। स्वयं प्रसिद्धं ह्येतच्छारीरस्य ब्रह्मात्मत्वमुपदिश्यते। न यत्नान्तरसाध्यम्। अतश्चेव शास्त्रीयं ब्रह्मात्मत्वमवगम्यमानं स्वाभाविकस्य शारीरत्वस्य बाधकं संपद्यते। रज्ज्वादिबुद्धय इव सर्पादिबुद्धीनाम्। बाधिते च शारीरात्मत्वे तदाश्रयः समस्तः स्वाभाविको व्यवहारो बाधितो भवती"त्यादिनेति चेन्न। एकत्वावधारणश्रुतीनां जगत्कारणसार्वज्ञ्यादिमत्परब्रह्मैकत्वपरत्वेन "नेह नाने"त्यादिश्रुतीनां च कारणगतस्वतन्त्रसत्तावच्छिन्नवस्तुमात्रनिषेधपरत्वेन चा-

स्मत्पत्ते स्वार्थे एव प्रामाण्यात् ।

न तावत् कारणैकत्वावधारणं निषेधश्चेतरस्य वस्तुसंजातस्यानृतत्वे नियामकम्, अपितु स्वविषयसमसत्ताकत्वनिषेधमात्र एव । यथा चोलराजैकोऽद्वितीयोऽभूदिति वाक्यं न तद्राजान्तरमात्रस्यैतत्सेनादीनां वा निषेधपरम्, किंतु तत्तुल्यनृपान्तरस्य निषेधमात्रपरमेव ।

एवं प्रकृतेऽपि समञ्जसम् ।

किंच, कार्यजातस्यानृतत्वेऽसत्कार्यवादापत्त्या वैदिकत्वं दत्ततिलाञ्जलि स्यात् ।

"असत्यमप्रतिष्ठं च जगदाहुरनीश्वरम्" ।

इत्यसुरपक्षाभ्युपगमश्च । "सदेव सोम्येदमग्र आसीत्", "सत्त्वाच्चावरस्ये"त्यादिशास्त्रव्याकोपश्च ।

नापि "यत्र त्वस्ये"ति श्रुतिः प्रपञ्चबाधपरा । किंतु कारकजातस्य स्वतन्त्रसत्तानिषेधेन तस्य ब्रह्मात्मकत्वविधानपरेति सर्वं समञ्जसम् । अन्यथा "सर्वं हि पश्यः पश्यति सर्वमाप्नोति सर्वश" इत्यादिश्रुतिविरोधात् ।

श्रुत्यर्थस्तु सदेवेत्यत्र स्वतन्त्रसत्ताश्रयः सत्पदार्थः । "आत्मा हि परमः स्वतन्त्रोऽधिगुण" इति श्रुतेः । एकपदं ब्रह्मणः चराचराभ्यामुत्कर्षरूपप्राधान्यं विधत्ते । "एके मुख्यान्यकेवला" इत्यमरोक्तेः । एकशब्दोऽयमन्यप्रधानासहायसंख्याप्रथमसमानवाचीति । "एको गोत्र" इति सूत्रे कैयटोक्तेश्च । सहायान्तरशून्यत्वोत्कर्षपरो वा । "ष्णान्ताः ष"डिति सूत्र एकशब्दोऽयं बह्वर्थः । "अस्ति संख्यार्थोऽस्त्यसहायवाची"ति । "अस्त्यन्यार्थ" इति महाभाष्यकारोक्तेश्च । तथा च चराचराभ्यामुत्कृष्टमन्यसहायहीनमेकसंख्याकमेकपदार्थः । "प्रधानः क्षेत्रज्ञपतिः", "अक्षरात् परतः पर"इत्यादिश्रुतेः । "यस्मात् क्षरमतीतोऽहं", "मत्तः परतरं नान्य"दिति श्रीमुखोक्तेश्च । अन्ययोगव्यवच्छेदार्थः प्रथम एव शब्दः । तदधिकोत्कृष्टव्यवच्छेदपरो द्वितीयः । स्वातिशयवस्तुशून्य इत्यर्थः । अद्वितीयशब्दश्च समानानिषेधपरः । "न तत्समश्चाभ्यधिकश्चे"ति श्रुतेः । "न त्वत्समोऽस्त्यभ्यधिकः कुतोऽन्य" इति स्मृतेश्च ।

यद्वा,एकशब्दः संख्यापरः।एवाद्वितीयशब्दयोश्चेतनाचेतननिषेधपरत्वम्। उभयोरपि ब्रह्मसमस्वतन्त्रसत्ताकत्वाभावात्।

किंच,स्वगतानन्तासंख्येयज्ञानादिकारुण्यादिकल्याणधर्माणामपि स्वल्पेतरस्वतन्त्रसत्तानिषेधोऽप्यविरुद्धः । "यदासीत् तदधीनमासी"दिति श्रुतेः । तथा च चेतनाचेतनानां स्वगतधर्माणां च तदात्मकत्वाद्यविशेषेण तदपृथक्सिद्धत्वात्, "ऐतदात्म्यमिदं सर्व"मित्यग्रिमवाक्यात्, "वासुदेवात्मकान्याहु"रिति स्मृतेश्च, स एव स्वतन्त्रसमाश्रयः सत्पदार्थ आत्मा यस्य स तदात्मा, तस्य भावस्तत्त्वमिति श्रुत्यर्थः । सदात्मकमिति यावत् ।

नन्वस्य वाक्यस्य सजातीयादिभेदशून्यपरत्वमेव । तत्र चेतनवृत्तिभेदः सजातीयभेदः । जडभेदो विजातीयभेदः । धर्मभेदः स्वगतभेदः । तथा च त्रिविधभेदस्य श्रुत्यैव निषिद्धत्वेन तद्विषयस्य कथं पारमार्थिकत्वमिति चेन्न । स्वप्राङ्गणेऽश्वधावनमात्रत्वात् । ब्रह्मेतरस्य त्रैकालिकनिषेधप्रतियोगित्वं वदन्तोऽत्र प्रष्टव्याः । श्रुत्याभिहितद्वितीयमात्राभावः कालत्रयेऽस्ति, न वा ।

नाद्यः । स्वोक्तव्याघातात् ।

अन्त्ये द्वितीयस्य सत्त्वापत्तेः ।

न च नाभावो द्वितीयोऽद्वैतविरोधीति वाच्यम् । अभावत्वाधेयत्वाधारत्वादिभावैरविनाभूतेनातिशयतोऽप्यद्वैतभङ्गात् । अभावत्वरूपप्रवृत्तिनिमित्तसंभवेन वेदान्तानां सखण्डार्थत्वापत्तेश्च ।

किंच, को वा सत्पदार्थः । शुद्धो वोपहितोऽव्याकृतो वा ।

नाद्यः । "तदैक्षत बहु स्या"मिति श्रुत्येक्षणबहुभवनसंकल्पयोगश्रवणात् । अन्यथा शुद्धत्वभङ्गात् । त्वया शुद्धस्य पदार्थत्वानङ्गीकाराच्च । अन्यथा मिथ्यात्वप्रसङ्गात् । शुद्धं ब्रह्म मिथ्या । पदार्थत्वात् । तव मते घटादिवत् । इत्यनुमानात् ।

द्वितीये ततो मायाभूतोपाधिभिन्नोऽभिन्नो वा ।

नाद्यः । द्वैतापत्तेः ।

नान्त्यः । उपाधिर्ब्रह्मेति सिद्धान्तापत्तेः । उपहितस्य पारमार्थिकसत्ताऽसंभवाच्च । अन्यथा तस्यैव मुक्तगम्यत्वेन शुद्धस्याप्रयोजकत्वापत्तेश्च ।

नाप्यव्याकृतः।सिद्धान्तभङ्गात्।अस्मृतत्वाच्च।अव्याकृतस्य जीवादिभेदेऽस्माकं हानिः । जीवादीनां तादात्म्यसंबन्धाभ्युपगमात् । ब्रह्मणः सविशेषत्वाङ्गीकाराच्च । अव्याकृतनामभूतसूक्ष्माणि कर्मसंस्कारसहिताश्च जीवास्तदन्तर्यामी परमेश्वरश्चाधिष्ठाता,एतेषां समुदायः । तस्य चानेकविशेषत्वात् सुतरां तव सिद्धान्तभङ्गः । अव्यक्तव्याख्याविरोधश्च । अन्यथा भूतसूक्ष्माभावेऽसत्कार्यवादापत्तिः । जीवानङ्गीकारे कृतनाशादिप्रसङ्गः । सृष्टिवैचित्र्यहेतुभूतकर्माभावे सृष्ट्यभावप्रसङ्गः । तस्याः साम्यप्रसङ्गश्च । ब्रह्मणि वैषम्यनैर्घृण्यप्रसक्तिश्च । परमेश्वरानङ्गीकारे स्रष्ट्रभावेन सृष्ट्यसंभवः । बाह्यपक्षाङ्गीकारप्रसङ्गाच्च ।

किंच, द्वितीयमात्रनिषेधे श्रुतावयपदवैयर्थ्यम् ।

किंच, को वाऽद्वितीयपदार्थः । न द्वितीयोऽद्वितीय इति नञ्समासः ।

नञर्थस्तु षड्विधः । तत्र न तावत् सादृश्यम् । द्वितीयसादृश्यमिति पदार्थापत्तेः । निर्विशेषसादृश्यधर्मासंभवाच्च ।

नाप्यभावः । "असदेव स भवति", । "असद्ब्रह्मेति वेद चे"दिति निन्दाश्रवणात् ।

नापि तदन्यत्वम् । द्वैतापत्तिप्रसङ्गात् ।

नापि तदल्पता । ईषद् द्वितीय इति पदार्थः स्यात् ।

नाप्यप्राशस्त्यम् । द्वितीय इत्यर्थः स्यात् ।

नापि विरोधः । अनङ्गीकारात् ।

किंच, द्वितीयपदस्य द्वितीयाभावमात्रसंकोचापेक्षया सकलकल्पनाऽविरोधाय स्वतन्त्रसत्तावच्छिन्नद्वितीयाभावपरत्वस्यैवौचित्यात् ।

न चावान्तरतात्पर्येण द्वितीयाभावसिद्धिः, महातात्पर्येण चाखण्डार्थसिद्धिरिति वाच्यम् । द्वितीयाभावस्य सत्त्वेऽद्वैतहानिः । मृषात्वे द्वैतस्य सत्यत्वापत्तिः । द्वितीयाभावविशिष्टतया ज्ञाते ब्रह्मणि विशेष्यमात्रसंदेहाद्यभावेन तात्पर्यकल्पनस्याप्रामाणिकत्वात् । अन्यथा शब्दमात्रस्य तात्पर्यद्वयं स्वीकृत्याखण्डार्थकत्वापत्तिरिति संक्षेपः ।

एतेना"त्मा वा इदमग्र आसीत्","नान्यत् किंचन मिषत्", "एको ह वै नारायण आसी"दित्यादिश्रुतयोऽपि व्याख्याताः । तुल्यार्थत्वात् । अथ "नेह नाने"ति, इह जगत्कारणे ब्रह्मणि नानात्वं नास्ति । तस्य सर्वास्वप्युपनिषत्स्वेकत्वावधारणात् । कारणनानात्वदर्शनस्य फलमाह, "मृत्योः स मृत्युमाप्नोती"ति । नित्यः संसारी भवति परमेश्वरे । नानात्वदर्शित्वात् । इवशब्दोऽल्पार्थः । "इवोपमायामल्पे चे"ति कोशात् । स च कैमुतिकन्यायपरः । कारणे ब्रह्मणि यद्यल्पनानात्वदर्शनस्येदृक् फलम् । किं पुनर्बहुत्वेनेत्यर्थः ।

एतेन "द्वितीयाद्वै भयं भवती"त्यपि श्रुतिर्व्याख्याता । तुल्यार्थत्वात् ।

ननु कारणे ब्रह्मणि भेदाप्रसक्तिः अप्रसक्तस्य च निषेधायोगादिति चेन्न । जगत्कारणेऽनेकत्वप्राप्तेः शास्त्रसिद्धत्वात् ।

"जीवाद्भवन्ति भूतानि जीवे तिष्ठन्त्यचञ्चलाः ।
जीवे प्रलयमृच्छन्ति न जीवात् कारणं परम्" ॥

इति, "ब्रह्मा देवानां प्रथमः संबभूव, विश्वस्य कर्ता भुवनस्य गोप्ता",

"न सन्न चासच्छिव एव केवलः ।
स्वभावमेके कवयो वदन्ति" ।
"कालं तथान्ये",

इत्यादिश्रुतिभिः कारणनानात्वस्य सुप्रसक्तत्वात् । इहेति विशेषणाच्चानानात्वमात्रनिषेधसंभवः । निषेधतदाधारब्रह्मणोर्निषेधनिषेध्ययोर्नानात्वतदभावयोश्च भेदावश्यकत्वादिति संक्षेपः ।

अथ नानाशब्दोऽत्र विनार्थकः । "विनञ्भ्यां नानाञौ न सहे"ति सूत्रे महाभाष्यकारैर्नानाविनाशब्दयोरेकार्थत्वोक्तेः । तथा चैवं योजना । इह जगति नानात्वोपादानं परमेश्वरं विना किंचनापि वस्तुजातं नास्ति । सर्वकार्यत्वावच्छिन्नस्य स्वोपादानाविनाभूतत्वात् ।

"यच्चापि सर्वभूतानां जीवं तदहमर्जुन ।
न तदस्ति विना यत् स्यान्मया भूतं चराचरम्" ॥

इति श्रीमुखोक्तेः । अन्यत् स्पष्टम् । "सर्वं तं परादाद्य आत्मनोऽन्यत् सर्वं वेदे"ति श्रुत्यन्तराच्च ।

एतेनैव ।

"नाना विष्णुं मोक्षदो नान्यदेवः" ।

इत्यपि श्रुतिर्व्याख्याता । विष्णुं विनान्यदेवो ब्रह्मादिर्मोक्षदो नास्तीत्यर्थः ।

"बन्धको भवपाशेन भवपाशाच्च मोचकः ।
कैवल्यदः परं ब्रह्म विष्णुरेव सनातनः ॥

इति स्मृतेः ।

"संसारबन्धस्थितिमोक्षहेतुः" ।

इति श्रुत्यन्तराच्चेति । अथ "यत्र त्वस्ये"ति यत्र यस्यां ध्रुवास्मृत्याख्यावस्थायाम्, अस्य विदुषः सर्वं कर्तृकरणकर्मादिकारकजातमात्मैवाभूदिति । आत्मशब्दोऽत्र विश्वात्मभूतपरब्रह्मपरः । ब्रह्मात्मकत्वेन तदपृथक्सिद्धत्वात् तत्ताविधानमविरुद्धम् । ब्रह्मैव ब्रह्मापृथक्सिद्धमेवाभूत्, तत् तर्हि केन स्वतन्त्रसत्तावच्छिन्नकरणेन कं वा स्वतन्त्रत्वेन पृथग् वस्तुजातं कर्मकारकरूपं को वा स्वतन्त्रभूतो द्रष्टा कर्तृरूपः पश्येदिति योजना । सर्वकारकजातस्य तत्प्रयोज्यतया केषुचिदपि कर्त्रादिषु स्वातन्त्र्याभावेन "स्वतन्त्रः कर्ते"ति सूत्रोक्तकर्त्रादिकारकलक्षणासमन्वेषणतत्ताभावात् । तदात्मकतत्प्रयोज्यतदाधेयतद्व्याप्यत्वाद्यवच्छिन्नैस्तत्कारकैस्तत्कर्मकारयिता श्रीपुरुषोत्तम एव । "एष एव साधु कर्म कारयति तं यमेभ्यो लोकेभ्य उन्निनीषते", "स कारयेत् पुण्यमथापि पाप"मित्यादिश्रुतेः ।

तस्मात् तदात्मकेन करणेन तदात्मकं वस्तुजातं तदात्मको द्रष्टेत्यर्थः । "ऐतदात्म्यमिदं सर्व"मिति श्रुतेरिति संक्षेपार्थः ।

तस्मात् कार्यं सदेव कारणादनन्यच्चेति सिद्धम् ॥ १९ ॥

अथाक्षिप्यते ॥

॥ इतरव्यपदेशाद्धिताकरणादिदोषप्रसक्तिः ॥ २० ॥

ननु ब्रह्मणो जगत्कारणत्वेऽभ्युपगम्यमान इतरस्य जीवस्य "तत् त्वमस्ययमात्मा ब्रह्मे"त्यादिवाक्यैर्ब्रह्मत्वोपदेशात्, इतरस्य ब्रह्मणो वा "अनेन जीवेनात्मनानुप्रविश्ये"त्यादिना शारीरत्वव्यपदेशात् । तथा च ब्रह्मणः सार्वज्ञ्यसर्वशक्त्याद्याश्रयस्यात्मनो हितरूपजगदकरणमहितरूपजगत्करणमित्यादिदोषप्रसक्तिः स्यात् । न ह्याध्यात्मिकादिविविधदुःखहेतुरूपे कार्ये स्वाधीनो बुद्धिमान् प्रवर्तते । जीवब्रह्मणोर्भेदवाहिन्यः श्रुतयो जगतो ब्रह्मणोऽनन्यत्वं वदद्भिर्भवद्भिरेव परित्यक्ताः । भेदे सत्यनन्यत्वासिद्धेः ॥ २० ॥

तस्माद् ब्रह्मणो जगत्कारणत्वमनुपपन्नमिति प्राप्ते समाधत्ते ॥

॥ अधिकं तु भेदनिर्देशात् ॥ २१ ॥

तुशब्दः पक्षव्यावृत्त्यर्थः । यत् सार्वज्ञ्याद्यनन्ताचिन्त्यासंख्येयकल्याणधर्माश्रयं जगदभिन्ननिमित्तोपादानकारणं न तस्माच्छारीराधिकमुत्कृष्टं तदत्यन्तविलक्षणं परं ब्रह्मेति नोक्तदोषावकाशः । कुतः । भेदनिर्देशात् । "आत्मा वारे द्रष्टव्यः श्रोतव्यो मन्तव्यो निदिध्यासितव्य" इति कर्तृकर्मादिभेदस्य "ब्रह्मविदाप्नोति पर"मिति प्राप्तप्राप्तव्यभेदस्य "य आत्मानमन्तरो यमय"तीति नियन्तृनियम्यभेदस्य च निर्देशात् ।

अयं भावः । यदि चेतनस्य शारीरस्य जगत्कारणत्वं सूत्रकृतोऽभिप्रेतं स्यात्, तर्हि तस्य सार्वज्ञ्यादिसर्वशक्त्ययोगेन हिताकरणादिदोषप्रसक्तिः स्यात्, न तु तदस्ति, प्रत्युत तदत्यन्तविलक्षणस्य सर्वज्ञानशक्तिबलैश्वर्यादिकल्याणधर्माश्रयस्य परब्रह्मणः समस्तदोषगन्धाघ्रातमाहात्म्यस्य श्रीपुरुषोत्तमस्य स्वतन्त्रसत्ताश्रयस्य कारणत्वनिर्देशान्नोक्तदोषयोगः ।

एतेन वक्ष्यमाणो भेदाभेदलक्षणसिद्धान्तोऽपि सूत्रकृता सूचितः । तादात्म्यादभेदोक्तेः । ब्रह्मणः स्वरूपेण भेदनिर्देशात् । तथा च परतन्त्रसत्तावच्छिन्नस्वरूपेण भिन्नत्वेऽपि तदात्मकत्वादिना तदपृथक्त्वाद्भिन्नाभिन्नत्वमिति भावः ॥ २१ ॥

॥ अश्मादिवच्च तदनुपपत्तिः ॥ २२ ॥

यथा लोके पृथिवीविकाराणामश्मनां वज्रवैदूर्यपद्मरागसूर्यकान्तादीनां प्रहीणपाषाणादीनां च पृथिव्यात्मकतया पृथिवीत्वाविशेषेऽपि न पृथिवीस्वरूपैक्यमुपपद्यते, आदिना लोष्टकाष्ठतृणादिग्रहः, तथा जीवस्य ब्रह्मात्मकत्वादिना ब्रह्मत्वाविशेषेऽपि न स्वरूपैक्यमिति परब्रह्मैव जीवकर्मानुगुणसुखदुःखहेतुजगत्सर्गकर्तृ, इति तदनुपपत्तिः परकल्पितदोषानुपपत्तिः ॥ २२ ॥

॥ उपसंहारदर्शनान्नेति चेन्न क्षीरवद्धि ॥ २३ ॥

ननु पुनरपि ब्रह्मणो जगत्कारणत्वं न संभवति । कुतः । उपसंहारदर्शनादिति । बाह्यकारकोपादानमुपसंहारः । लोके हि घटपटादिकार्यजननशक्तियुक्ता अपि कुलालतन्तुवायादयस्तदुपकरणमृद्दण्डचक्रसूत्रतन्तुतुरीवेमाद्यनेककारकाण्युपसंहृत्यैव तत् तत् कार्यं कुर्वाणा दृश्यन्ते । सृष्टेः प्राक् च बाह्यसाधनसामग्री नास्ति । "सदेव सौम्येदमग्र आसीत्", "एकमेवाद्वितीय"मित्यादिश्रुतेः । तत् कथमसहायं ब्रह्म जगत्सृष्टौ प्रवर्तेत, अतो न ब्रह्म जगत्कारणमिति चेत् । समाधत्ते । नेति । नहि कार्यजनिशक्तानां सर्वेषां बाह्यकारकोपादानसापेक्षत्वं दृश्यते । तथाहि, क्षीरं दधिभावाय नीरं हिमभावाय स्वयमेव परिणमते । तत्स्वाभाव्यात् । तथा ब्रह्मापि ।

न च क्षीरादावातञ्चनाद्यपेक्षत इति वाच्यम् । तत्रातञ्चनस्य दधिभावानुपयोगित्वात् । किंतु शैघ्र्याय रसविशेषाय च तदुपयुज्यते । पयसः स्वत एव परिणामशक्तिः । कुलालादीनां त्वनीश्वरत्वेन स्वतः सामर्थ्याभावादुपसंहारसापेक्षत्वं युक्तम् । ब्रह्म तु सर्वज्ञं सर्वशक्ति, "यः सर्वज्ञः सर्ववित्", "परास्य शक्तिर्विविधैव श्रूयते स्वाभाविकी"त्यादिश्रुतेः ॥ २३ ॥

॥ देवादिवदपि लोके ॥ २४ ॥

अपिशब्दश्चेतनसादृश्यं संभावयति । यथा देवाः पितर ऋषयः । स्वे लोके बाह्यसाधनमनपेक्ष्याभिध्यानमात्रेण स्वापेक्षितानि वस्तूनि सृजन्ति । तन्तुनाभश्च स्वयमेव प्रवर्तते । बलाका च रेतःसेकमन्तरेण गर्भं धत्ते । तथासौ पुरुषोत्तमः स्वसंकल्पमात्रेण सर्वं सृजतीति ॥ २४ ॥

पुनरप्याक्षिपति ॥

॥ कृत्स्नप्रसक्तिर्निरवयवत्वशब्दकोपो वा ॥ २५ ॥

ननु निरवयवं सावयवं वा ब्रह्म कार्याकारेण परिणमते । आद्ये । कृत्स्नस्य ब्रह्मणः क्षीरवत् कार्यरूपतापत्तौ कार्यातिरिक्तं ब्रह्म न स्यात् । कार्यस्य च सर्वप्रत्यक्षत्वात् सर्वमोक्षप्रसङ्गः ।

द्वितीये निरवयवत्ववाचकः शब्दः,

"निष्कलं निष्क्रियं शान्तं निरवद्यं निरञ्जनम्" ।

"दिव्यो ह्यमूर्तः पुरुषः सबाह्याभ्यान्तरो ह्यजः" ।

इत्यादिः कुप्येद्विरुध्येत ॥ २५ ॥

अतो ब्रह्मणः परिणामानुपपत्तेर्जगदुपादानत्वं न संभवति । किंतु प्रधानमेवेष्टव्यमित्याक्षेपे प्राप्ते समाधत्ते ॥

॥ श्रुतेस्तु शब्दमूलत्वात् ॥ २६ ॥

तुशब्द आक्षेपनिरासार्थः। ब्रह्मणो जगदुपादानत्वेऽपि न तावत् कृत्स्नप्रसक्तिः। कुतः। श्रुतेः। यथा जगदुपादानत्वं ब्रह्मणः श्रूयते, तथा कार्यवैलक्षण्येन सत्त्वं चापि श्रूयते। "सोऽकामयत बहु स्यां", "स्वयमात्मानमकुरुत", "सच्च त्यच्चाभव"दित्यादिना। "अस्थूलमनण्वह्रस्वमदीर्घ"मित्यादिना, "एतावानस्य महिमातो ज्यायांश्च पूरुष" इत्यादिना च।

नापि निरवयवत्वशब्दकोपः। ऊर्णनाभेरिव शक्तिविक्षेपलक्षणपरिणामाङ्गीकारस्य पूर्वमुक्तत्वात्। स्वरूपे परिणामानङ्गीकारात्। ब्रह्म ह्यनन्तशक्तिं भोक्तृशक्तिं विक्षिप्याकाशाद्यचेतनाख्यां देवादिरूपेण विक्षिप्य तदन्तर्यामितया तत्फलं भोजयति, उपसंहरति चेति। सूर्यो यथा स्वरश्मीन्।

ननूपमानमात्रेण कथं निर्दोषत्वसिद्धिरिति चेत्। तत्राह। शब्दमूलत्वादिति। उक्तवैदिकसिद्धान्तस्य शब्दमूलत्वान्निर्दोषत्वमित्यर्थः। तथा च श्रुतिः। "यथोर्णनाभिः सृजते गृह्णते च, यथा सतः पुरुषात् केशलोमानि, यथा पृथिव्या ओषधयः संभवन्ति, तथाक्षरात् संभवतीह विश्व"मिति। "प्रसार्य च यथाङ्गानि कूर्म" इति भीष्मोक्तेश्च।

एवं च यद्यचेतनानामेव परस्परं परिणामवैचित्र्यम्। पृथिव्या ओषध्यादिलक्षणः परिणामः, अन्नस्य केशनखदन्तपिशितादिलक्षणः चेतनोर्णनाभेश्चोर्णापरिणामोऽप्रच्युतस्वरूपतयैव प्राण्यन्तरेष्वत्यन्तासंभाव्यमानो दृश्यते। किमुत चेतनस्य सर्वज्ञस्य सर्वाचिन्त्यशक्तेः स्वतन्त्रस्य शास्त्रैकसमधिगम्यस्य जगत्कारणस्य ब्रह्मण इति भावः। तर्हि भावानां शक्तयः केनचित् प्राकृतबुद्धिना परिच्छेत्तुं न शक्यन्ते। तर्काणामप्रतिष्ठितत्वात् ॥ २६ ॥

॥ आत्मनि चैवं विचित्राश्च हि ॥ २७ ॥

न चैतदाश्चर्यम्। ब्रह्मणो विचित्रजगत्सृष्टत्वेऽपि स्वरूपाप्रच्युतित्वमिति। हि यत आत्मनि जीवात्मनि च देवादिशरीरेऽप्रच्युतस्वरूपतयैवैवं विचित्रा हस्त्यश्वादिसृष्टयो दृश्यन्ते। किमुत ब्रह्मण इति। द्वितीयश्चशब्दः कैमुत्यद्योतकः ॥ २७ ॥

॥ स्वपक्षदोषाच्च[1] ॥ २८ ॥

प्रधानकारणवादेऽपि त्रिगुणस्य प्रधानस्य निरवयवत्वाभ्युपगमात्महदाद्याकारेण परिणामे कृत्स्नस्य मुक्तिर्निरवयवत्वप्रतिज्ञाहानिर्वेति दोषः समानः। गुणा एव तस्यावयवा इति चेत्। तत्रापि गुणसमूहस्य प्रधानत्वे गुणानां निरवयवत्वेन प्रदेशभेदमनपेक्ष्य संयुज्यमानानां स्थूलमहदाद्यारम्भकत्वासिद्धिः। गुणैरारब्धस्य प्रधानत्वे प्रधानं कारणमिति सिद्धान्तविरोध इति। वैशेषिकमतेऽप्येवं दोषाः। परमाणूनां निरवयवत्वाभ्युपगमात् ॥ २८ ॥

॥ सर्वोपेता च सा[1] तद्दर्शनात् ॥ २९ ॥

पूर्वमुपादानस्य ब्रह्मणः सर्ववैलक्षण्येन सर्वशक्तियोगात् कृत्स्नप्रसक्त्यादयो दोषा निरस्ताः। तत्र न केवलं सर्ववैलक्षण्येन सर्वशक्त्युपेता सा परा देवतेत्युच्यते। अपितु तद्दर्शनाच्च। दर्शयतीति दर्शनं श्रुतिः। सर्वशक्तियोगश्रुतेश्चेत्यर्थः। "परास्य शक्तिर्विविधैव श्रूयते स्वाभाविकी ज्ञानबलक्रिया च", "सत्यकामः सत्यसंकल्प" इत्यादिश्रुतेः ॥ २९ ॥

॥ विकरणत्वान्नेति चेत् तदुक्तम् ॥ ३० ॥

सर्वशक्तिमत्त्वेऽपि "न तस्य कार्यं करणं च विद्यत", इति करणरहितस्य न कार्यारम्भाः संभवन्ति।

लोके हि देवादयः सर्वशक्तिमन्तोऽपि करणसंपन्ना एव कार्याय प्रभवन्तीति चेत्। यत् तत्र वक्तुं योग्यं तदुक्तम्। शब्दमूलत्वादिति। श्रुत्यवगाह्ये तर्काप्रवेशात्। तथा च श्रुतिः। "अपाणिपादो जवनो ग्रहीता पश्यत्यचक्षुः स शृणोत्यकर्णः"। इति ॥ ३० ॥

पुनरप्याक्षिपति ॥

॥ न प्रयोजनवत्त्वात् ॥ ३१ ॥

न ब्रह्मणः कारणत्वं संभवति। सर्वप्रवृत्तीनां प्रयोजनवत्त्वात्। तस्य चाप्तसमस्तकामत्वेन प्रयोजनाभावात्। अन्यथा स्वार्थप्रवृत्तौ पूर्णकामत्वहानिः। परार्थप्रवृत्तावनन्तदुःखबहुलं जगत् सृजतः करुणावत्तादिहानिरिति चेत् ॥ ३१ ॥

तत्राह ॥

॥ लोकवत् तु लीलाकैवल्यम् ॥ ३२ ॥

तुशब्द आक्षेपनिरासार्थः। आप्तसमस्तकामस्यापि परब्रह्मणो विचित्रविश्वसृष्टौ प्रवृत्तिर्लीलैव केवला। न तत्र प्रयोजनोद्देशः। लोकवत्।

यथा लोके राजादीनां परिपूर्णकामानामपि क्रीडाप्रवृत्तिर्दृश्यते। यथा वा सुखोन्मत्तस्य सुखोद्रेकात् फलनिरपेक्षनर्तनादि ॥ ३२ ॥

॥ वैषम्यनैर्घृण्ये न सापेक्षत्वात् तथा हि दर्शयति ॥ ३३ ॥

ननु लीलयापि ब्रह्मणो विश्वसृष्टिप्रवृत्तौ वैषम्यनैर्घृण्ये प्रसज्येयाताम्।

वैषम्यं नाम देवमनुष्यादीनामुत्तममध्यमादिरूपसृष्टिकर्तृत्वम्।

[1] स्वपक्षे इति पा०।

[1] व्याख्यान्तरेषु सेति पाठो नास्ति।

नैर्घृण्यं नाम दुर्विषहदुःखगर्भजगन्निर्मातृत्वेनादयालुता ।

तत्रोत्तरमाह । नेति । नेश्वरस्य वैषम्यनैर्घृण्ये *प्रसज्येते । कुतः । सापेक्षत्वात् । तत्तत्प्राणिपुण्यापुण्यकर्मसापेक्षत्वादीश्वरस्य । व्रीहियवानामादिसृष्टिवैचित्र्ये तत्तद्बीजगतासाधारणसामर्थ्यसापेक्षपर्जन्यवत् ।

न च सापेक्षत्वेऽप्राधान्यम् । भृत्यादिसेवानुसारेण फलदातू राज्ञोऽप्राधान्यादर्शनात् । तथा हि दर्शयति श्रुतिः । ‘‘पुण्यो वै पुण्येन कर्मणा भवति, पापः पापेन कर्मणा’’, ‘‘साधुकारी साधुर्भवति, पापकारी पापो भव’’तीत्यादिः ॥ ३३ ॥

॥ न कर्माविभागादिति चेन्नानादित्वादुपपद्यते चाप्युपलभ्यते च ॥ ३४ ॥

ननु ‘‘सदेव सौम्येदमग्र आसीत्’’,‘‘एकमेवे’’ति सृष्टेः पूर्वं क्षेत्रज्ञतत्कर्माविभागश्रवणात् कथं कर्मापेक्षत्वाद् वैषम्याद्यप्रसक्तिरिति चेन्न । कुतः । क्षेत्रज्ञानां तत्कर्मणां चानादित्वात् संसारस्य हेतुहेतुमद्भावोपपत्तेः । पूर्वसृष्टिसंपादितधर्मप्रपञ्चस्यात्यन्तिकनाशाभावात् तदपेक्षयोत्तरसृष्टौ न किंचिद्बाधकमिति भावः ।

ननु कुतस्तेषामनादित्वमित्यत आह, उपपद्यते च । उपपद्यते च क्षेत्रज्ञानां तत्कर्मप्रवाहाणां चानादित्वम्, क्षेत्रज्ञानां स्वरूपतोऽनादित्वेऽप्यविभागश्रवणं च । नामरूपविभागाभावात् । अन्यथा कृतनाशादिप्रसङ्गात् ।

उपलभ्यते च क्षेत्रज्ञानादित्वं श्रुतिस्मृत्योः ।

‘‘न जायते म्रियते वा विपश्चित्’’, ‘‘अजो ह्येको जुषमाणोऽनुशेते’’,‘‘प्रकृतिं पुरुषं चैव विद्ध्यनादी उभावपि’’ ।

इति ॥ ३४ ॥

॥ सर्वधर्मोपपत्तेश्च ॥ ३५ ॥

प्रधानपरमाण्वादिषूपपन्नानां सार्वज्ञ्यादीनां सर्वेषां धर्माणां कारणत्वोपपादकानां ब्रह्मण्येवोपपत्तेश्च ब्रह्मैव कारणं, न प्रधानादिः । परिमितशक्तित्वात् । ब्रह्मणश्चाचिन्त्यानन्तशक्तिमत्त्वात् सर्वमनवद्यमिति ॥ ३५ ॥

इति श्रीसनकसंप्रदायप्रवर्तकाद्याचार्यश्रीनिम्बार्कमतानुयायिश्रीमन्मुकुन्दचरणपद्ममकरन्दभृङ्गेण श्रीमत्केशवकाश्मीरिभट्टेन संगृहीतायां वेदान्तकौस्तुभप्रभाख्यायां ब्रह्मसूत्रवृत्तौ द्वितीयाध्यायप्रथमपादविवरणम् ॥ २ ॥ ∺ ∺ ॥

* व्याख्यान्तरेषूपपद्यत इत्यादि सूत्रान्तरम् ।

॥ अथ ज्ञानसिद्धान्तचन्द्रिका ॥

बर्कलेसंज्ञकमहापण्डितविरचितज्ञानसिद्धान्तमालायाः
अवतारिता ।

॥ तत्र षट्त्रिंशादिपरिच्छेदाः ॥

३६—यदि कोप्येवं मन्येत यन् मदीयैः सिद्धान्तैस्तात्त्विकवस्तुसत्तैवाऽपलप्यत इति चेत् समदुक्तार्थं प्रस्फुटमपि लेशतोऽपि नाऽज्ञासीदिति ब्रवीमि । उक्तसिद्धान्तानां त्वयं निष्कर्षः । तथाहि । ज्ञानाधिकरणीभूता जीवात्मानो यथेच्छं कल्पनापदाभिधेयानि ज्ञानानि कल्पयन्ति नियतिनियतान्यैन्द्रियकज्ञानानि च केवलं गृह्णन्ति । तत्र स्वकल्पितानि ज्ञानान्यैन्द्रियकज्ञानेभ्यो मन्दप्रभाण्यचिरस्थायीनि स्वविरोधिज्ञानबाध्यत्वाद् दुर्बलानि च भवन्ति । सुव्यवस्थितैः प्रकृतिसिद्धनियमायत्तैरैन्द्रियकज्ञानैर्जीवात्मभ्योऽत्यन्ताधिकशक्तिमतः परमेश्वरस्य सत्ताऽनुमाप्यते । इमानि ज्ञानानि काल्पनिकज्ञानान्यपेक्ष्योत्कटतरसंस्कारजनकत्वात्सुव्यवस्थितक्रमविशिष्टत्वाज्जीवात्माऽनधीनोत्पत्तिविनाशशालित्वाद्व्यक्ततरत्वाच्च वास्तविकवस्तूनीत्यभिधीयन्ते । अतएव दिवा चक्षुरिन्द्रियद्वारा गृहीतस्य सूर्यस्य वास्तविकत्वं निशादावात्मपरिकल्पितस्य तस्याऽवास्तविकत्वमुच्यते । एवंच सर्वेषां स्थावरजङ्गमादिसांसारिकपदार्थानां लोकाभिमतं वास्तविकत्त्वमुक्तसिद्धान्तैरपि सूपपादमेव । यदि कश्चिद्वास्तविकत्त्वमित्यस्याऽस्मदभिप्रेतादिन्द्रियग्राह्यत्वमित्यस्मादतिरिक्तमेवाऽर्थान्तरं स्वीकुर्यात्तर्हि स स्वयमेव तादृशार्थस्य संभवासंभवौ विमृशेत् ।

३७—नन्वत्रोक्तैः सिद्धान्तैर्लोकप्रसिद्धानि भौतिकान्यधिकरणानि तावदपलप्यन्तएवेति चेत्सत्यम् । परंतु यदि तादृशाधिकरणपदेनेन्द्रियग्राह्यरूपस्पर्शपरिमाणादिगुणगणात्मकमौपचारिकमेवाधिकरणं विवक्ष्यते चेन्नास्मत्सिधान्तैस्तदपलप्यते । यदि च तेनाऽऽत्मातिरिक्तं तादृशगुणानामाधारभूतमधिकरणमितिशास्त्रीयोर्थो विवक्ष्यते तर्हि तदपलापित्वं मयि प्रसज्येत । परंतु सर्वथाऽविद्यमानस्य कल्पनाया अप्यगोचरस्य विषयस्याऽस्वीकारे कोनाम वाच्यः स्यात् ।

३८—ननु ज्ञानान्येव भुज्यन्ते पीयन्ते परिधीयन्ते चेत्यादिवचनानि लोके प्रयुक्तानि चेत्कर्णकटून्यत्यन्तोपहास्यानि च भासेरन्निति चेद्युक्तम् । प्रायिकपदप्रयोगस्य स्थानेऽप्रायिकपदप्रयोगस्य परमोपहासजनकत्वात् । अस्ति च ज्ञानपदस्याऽप्रायिकत्वम् । लौकिकभाषणादौ वस्तुपदाभिधेयनानाविधगुणसमुदायबोधनतात्पर्येण तादृशपदप्रयोगस्य व्यवहाराभावात् । परंतु नैतावता ज्ञानान्येव भुज्यन्त इत्यादिवाक्यानामयाथार्थ्यमापद्यते । तादृशवाक्यानां रासनादिप्रत्यक्षोपल-

व्यवस्तूनि भुज्यन्त इत्याद्येव विवरणात् । ज्ञानपदेनाऽपि भोग्यविषयाद्यारम्भका उक्तरीत्याऽऽत्ममात्रनिष्ठा यथासंभवमन्योन्यसहचरिता रसगन्धस्पर्शादिगुणसमुदाया एव विवक्ष्यन्ते । ज्ञानपदं चेद्वस्तुपदमिव लोके तथा व्यवहृतमभविष्यत्तर्हि न तत्कर्णकटु नाप्युपहास्यं चाभविष्यत् । नचाऽस्माकं तथाविधवाक्यप्रयोगआग्रहः किंतु तेषां याथार्थ्य एव । यदिचाऽत्मैकनिष्ठा ज्ञायमानेतरानात्मकाः साक्षादिन्द्रियोपलब्धा विषया एव भुज्यन्ते परिधीयन्त इत्यत्रैव सर्वेषामनुमतिश्चेल्लौकिकव्यवहारानुरोधेन ते ज्ञानरूपा अपि विषया वस्तुपदेनैव व्यवह्रियेरन् ।

३९—तर्हि किमिति भवान्सर्वत्र ज्ञानपदमेव प्रयुङ्क्ते न पुनर्लौकिकव्यवहारानुरोधेन वस्तुपदमिति चेदत्र द्वौ हेतू । लोके प्रायशो वस्तुपदेनाऽऽत्मनोन्यत्र क्वापि वर्तमानं ज्ञानातिरिक्तमेव किंचिद्विवक्ष्यत इत्येकः । ज्ञातृज्ञानविषयाद्यखिलपदार्थवाचकत्वेन वस्तुपदस्य ज्ञानपदमपेक्ष्याऽत्यन्तव्यापकार्थबोधकत्वाज्ज्ञानमात्र बुबोधविषया वस्तुपदं प्रयोक्तुं न शक्यत इत्यपरः । एवं च प्रत्यक्षविषयाणामात्ममात्रनिष्ठत्वाचिष्क्रियत्वाच्च ज्ञानपदेनैव व्यवहारो युक्तः ।

४०—एतावता प्रबन्धेन बहुतिथमुक्तेपि कश्चिदिहाशङ्कते यद्वयमिन्द्रियजन्यज्ञानान्येवाखिलप्रमाणशेखरीभूतानि मन्यामहे यानि भवतां सर्वाण्ययं हेतुवादः कामं सत्यसंकाशोऽपि नाऽतिशेतुमीष्टे । तथा च प्रत्यक्षसिद्धा बाह्यवस्तुसत्ता न केनापि हेतुवादेनापलापयितुं शक्यत इति चेच्चित्र मेतत् । कोनामेन्द्रियजन्यज्ञानप्रामाण्यं तिरश्चक्रे । न क्वाप्यहं प्रत्यक्षसिद्धज्ञानानामप्रामाण्यम् प्रत्यपादयम् । यत्किमपि दृश्यते श्रूयतेऽनुभूयते तत्सर्वं विद्यत एव । यद्यत्रापि संदिह्यास्तर्ह्यहमस्मि नवेत्ययमपि संदेहोमयि प्रसज्येत । परंतु कस्येन्द्रियस्य प्रामाण्येन बाह्यस्याऽतएवाऽज्ञायमानस्य वस्तुनः सत्ता तेन प्रतिपक्षिणा साध्यत इति तु न पश्यामि । न वयं कमपि सर्वत्र संदेग्धुं स्वेन्द्रियेषु वाऽविश्वसितुं प्रवर्तयामः प्रत्युतेन्द्रियजन्यज्ञानानां यावच्छक्यं प्रामाणिकत्वम् स्वीकारयामः । अत्रोक्ताः सिद्धान्ताः सर्वथा सर्वसंदेहवादविपरीताः सन्तीत्यपि वक्ष्यमाणग्रन्थावलोकनेन स्फुटीभविष्यति ।

४१—अथ द्वितीय आक्षेपः । ननु सर्वस्य वस्तुजातस्य विज्ञानमयत्वे तात्विकवह्निवह्निज्ञानयोर्मध्ये मा कोपि भेदः प्रतीयताम् । प्रतीयते च वास्तविकस्य दाहस्य काल्पनिकस्य स्वाप्निकस्य वा तस्य मध्ये महदन्तरम् । अत्रापि यदि कश्चित्संदिह्यात्तर्हि स स्वयं स्वकरं वह्नौ प्रक्षिप्य तात्कालिकं स्पर्शं काल्पनिकवह्निस्पर्शेन तोलयित्वा तथाविधयोः स्पर्शयोर्मध्ये ऽस्ति कोपि विशेषो नवेति पश्येदितिस्पष्टमनुभूतस्य भेदस्योपपत्तयेऽवश्यं तात्विकोष्णस्पर्शस्य बाह्यपिण्डस्थत्वं स्वाप्निककाल्पनिकादिस्पर्शस्य त्वाऽऽत्ममात्रवृत्तित्वमुच्यतामिति चेदेवमादयः सर्वे आक्षेपाः पूर्वोक्तग्रन्थेनैव दत्तोत्तराः । अपरमिदमेवात्र वदामो यत्तात्विकवह्निस्पर्शतथाकल्पनयोर्वैयधिकरण्ये वास्तविकवह्निपीडातत्कल्पनयोरपि वैयधिकरण्यं प्रसज्येत । परंतु वह्नेर्वेदनाविशेषात्मकत्वात्तात्विकवह्निपीडाया बाह्यपिण्डस्थत्त्वं न शक्यते वक्तुमित्युभयविधयोरपि पीडयोरात्मनिष्ठत्वे सिद्धे तात्विकवह्निबौद्धवह्न्योस्तदेकनिष्ठत्वमेव पर्यवस्यति ।

४२—अथ तृतीय आक्षेपः । ननु पदार्थानामात्मबहिर्भूतत्त्वस्याऽनङ्गीकारे इदं मत्तोदूरम् इदं च समीपमित्यादिव्यवहारोन स्यात् । सर्वेषां वस्तूनामात्मनिष्ठत्वे सुदूरं वर्तमानमपि वस्त्वात्मगतकाल्पनिकविषयविशेष इव सन्निकृष्टमेव कथ्येत । तच्च बाधितम् इति चेन्न । स्वप्नादौ वस्तुत आत्मनिष्ठानामेव गृहवृक्षादीनां दूरवर्तित्वेन भानमिव जाग्रदवस्थायामपि तथाभानस्य संभवात्तेषां सन्निकृष्टत्वविप्रकृष्टत्वादिव्यवहारस्योपपत्तेः ।

४३—ननु स्वप्नादावात्मनिष्ठानामेव पदार्थानां दूरत्वनिकटत्वादिना भानसंभवेऽपि तदितरावस्थायामात्मबहिर्भूतावकाशस्यान्येव वस्तूनि प्रतीयन्ते । आत्मवस्तूनां केवलवस्तूनां वाऽन्तरालभूतस्याऽवकाशस्य न्यूनाधिक्यकृते एव तेषां सन्निकृष्टत्वविप्रकृष्टत्वे भवत इत्यनुपपत्तेरवकाशस्य साक्षाच्चक्षुर्ग्राह्यत्वमस्ति नवेति तावत्प्रपञ्च्यते । सैवेयमनुपपत्तिर्यत्परिहाराय नवदृष्टिसिद्धान्तप्रपञ्चाभिधमेकमपूर्वं निबन्धं निर्मायाऽर्वागेव प्राकाशयम् । तत्र चेत्थं प्रतिपाद्यते । तथाहि । अवकाशो दूरत्वादिकं वा न साक्षाच्चक्षुषा गृह्यते नापि रेखाभिः कोणैः स्वसंबद्धपदार्थान्तरैर्वा परिमातुं शक्यते किंत्ववकाशेन तत्रत्यवस्तुना च सर्वथाऽसंबद्धैर्विजातीयैश्चैव प्रत्यक्षान्तरानुगतैः कतिपयचाक्षुषप्रत्यक्षविशेषैरनुमीयते । तानि प्रत्यक्षाणि वस्तुतोऽवकाशादिभिरसंबद्धान्यपि चिरमनुभूतात्मप्रत्यक्षाणां तैः सहाऽन्वयाच्छब्दाः स्वाभिधेयानिवाऽवकाशविशेषांस्तत्रस्थपदार्थांश्च ज्ञापयन्ति । अत एव कश्चिज्जनुषान्धः पश्चाद्यदि दृष्टिं लभेत तर्हि तत्काल एव प्रत्यक्षावकाशयोः साहचर्यज्ञानस्यानुदयादाद्यप्रत्यक्षीभूतान्विषयांश्च स आत्मबहिर्भूतान् पश्येदपितु सर्वानात्मगतानेव । स्पष्टं चेदं नवदृष्टिसिद्धान्तप्रपंचे एकपञ्चाशत्तमपरिच्छेदे ।

४४—इदं चात्रावधेयम् । चाक्षुषस्पार्शनज्ञाने भिन्नभिन्ने विजातीये च स्तः । तत्र चरमजातीयानि ज्ञानान्याद्यजातीयज्ञानानां लिङ्गानि भवन्ति । चाक्षुषविषया नाऽऽत्मनोऽन्यत्र नापि बाह्यविषयप्रतिमाभूताः सन्तीत्यादिकं पूर्वमभिहितम-

न्येऽप्यस्माभिः सविशेषं निरूपितम् । नच तादृशनिबन्धस्य वचनरीतिमर्यादया स्पार्शनविषयाणामात्मबहिर्भूतत्वं ग्रन्थकर्त्रभिप्रेतमिव प्रतीयत इति भ्रमितव्यम् । तादृशलौकिकवचनरीत्यनुसरणस्य तत्रोक्तदृष्टिविषयकसिद्धान्तोपपत्तयेऽनावश्यकत्वेऽपि ग्रन्थसारल्यायाखिललोकप्रसिद्धवचनरीत्यनुसारस्यैवौचित्येन तत्र तथाविधाया एव वचनरीतेः स्वीकारात् । दृष्टिविषयकसिद्धान्तप्रतिपादके शास्त्रे वचनरीतिशैथिल्यप्रयुक्तस्पार्शनादिविषयान्तरविषयकदोषसंभवभियाऽपूर्ववचनरीत्यनुसरणस्याऽप्रकृतत्वाच्च । तथाच प्रकृते यैः प्रत्यक्षविशेषैर्विप्रकृष्टवस्तूनि तद्विप्रकर्षश्चानुमीयन्ते न तैर्वस्तुतोदूरं वर्तमानाः पदार्था ज्ञाप्यन्ते ऽपितु समयान्तरे व्यापारविशेषोत्तरमात्मनि स्पार्शनप्रत्यक्षविशेषा उदेष्यन्तीत्येतावदेव । यतोहि स्पार्शनप्रत्यक्षलिङ्गभूतैश्चाक्षुषप्रत्यक्षैरात्माऽनुमिनोति यत् मदधिष्ठितं शरीरं चलेच्चेन्मयि स्पार्शनप्रत्यक्षविशेषा उद्भवेयुरिति । इदमेव पूर्वोक्तग्रन्थभागात्स्फुटीभविष्यति । विस्तरस्तु नवदृष्टिसिद्धान्तप्रपञ्चस्य सप्तचत्वारिंशदधिकशततमपरिच्छेदे स्थलान्तरे च द्रष्टव्यः ।

४५—अथ तुरीय आक्षेपः । नन्वेतैः पूर्वोक्तसिद्धान्तैर्विषयाणां प्रतिक्षणमुत्पत्तिविनाशौ प्रतिपाद्येते इव भासते । विषयाणां तत्र प्रत्यक्षानतिरिक्तत्वस्यैवोक्तत्वात् । तथाच यावदेवोद्यानस्था वृक्षादयः केनचिद्दृश्यन्ते तावदेव तेषां सद्भावः । तेभ्योऽपसारितायामेव दृष्टौ ते नश्यन्ति पुनश्च तेषु तस्यां पातितायां पुनरुत्पद्यन्त इति क्षणिकविज्ञानवादएवापद्यत इति चेन्न । अस्य क्षणिकविज्ञानवादस्य पूर्वोक्ततृतीयचतुर्थादिपरिच्छेदेष्वेव निराकृतत्वात् । इदमपरमपि द्रष्टव्यं यद् विज्ञानमयवास्तविकवस्तुसत्ताया ज्ञायमानातिरिक्तत्वं कथं संभाव्येत । अहं तु गाढतमविचारेणापि वस्तुसत्तां ज्ञायमानातिरिक्तां नहि पश्यामि । अतः सर्वान् विदुषः प्रति पुनरप्येकवारं प्रार्थये यत्ते स्वात्मनि गाढं विविच्य पश्येयुर्न पुनः शब्दमात्रैर्वञ्चिताः स्युः । यदि च ते ऽज्ञायमानानामेव ज्ञानानां तन्मूलभूतानां वा क्वापि संभवं मन्येरंस्तर्हि सहसैवाहं स्वपक्षं परित्यजेयं यदि न तर्हि ते तादृशाज्ञातविषयस्याऽवलम्बनं तदनङ्गीकरणान्मयि दोषारोपश्च कथं निर्युक्तिके प्रतीयेतामिति जानीयुः ।

केशवशास्त्री

माराठोपाह्वः

THE ADVAITA-MAKARANDA.

A SUMARY OF THE VEDÁNTA SYSTEM, BY LAKSHMÍ-DHARA,

WITH THE COMMENTARY OF SVAYAM-PRAKÁŚA.

(Continued from page 156.)

XVII. Anticipating the question why then we cognise ignorance in the soul, as in thinking I shine not forth, the author proceeds to say that this is accounted for by illusion, like the supposition by owls &c. of darkness inthe sun.

Text.

(17). Nevertheless there does appear in the sky of consciousness some such mist as this animated by absence of reflection, and lasting till the sun of reflection rises.

Commentary.

The connection (of this verse of the text with the foregoing verse) is that though in reality illusion cannot exist in the soul, still this dimness, mist, or fog, so called because of the obscuration which it effects, does shine in the sky of consciousness, in the light of intelligence, in the soul.

Here it may be asked: How if illusion be in reality unreal, can it be presented in cognition? for there is no perceptive knowledge of a hare's horns and the like non-entities. To this the author replies by the words *some such mist as this*, that is, such as cannot be expounded as either existing or not existing; that is to say, this darkness being different from both entity and non-entity, there is no impossibility in presentatively cognising it.

If, again, any one should say that this recognition of darkness in the soul is impossible as involving a contradiction; he replies that it is not impossible, for that which is repugnant to darkness must be either an unconscious thing, or the soul which consists of self-illumination. The first alternative will not hold, for there can be no contradiction between darkness and unconsciousness. Nor will the second alternative hold good, inasmuch the darkness can have a duration in its contrary the self-illumined soul. Nor can it be rejoined that the soul, which by the thought I shine not forth establishes the fact of illusion, cannot be repugnant to that illusion; for were the light of which the soul consists not repugnant to illusion, there could be nothing else repugnant, and the illusion would never cease. In reference to this he adds the words *lasting till the sun of reflection rises.* Reflection or the knowledge generated by reflection is a sun as dispelling the darkness, and the darkness finds its period, limit, or boundary, in the rising of that sun, in the genesis of that cognition.

Though the soul when isolated is not repugnant to illusion, the illusion may be dispelled by the consciousness of the soul, when there is presented to it a modification of the understanding in the form of the indivisible; just as a ray of the sun by itself, though it illumines a stalk of grass or the like while unable to burn it, yet is seen to burn it when aided by a burning-glass.

In anticipation of the question why then when the modification in the form of the indivisible, generable by the grand text, once exists, the illusion as to self does not cease in all souls, the author adds the words *animatel by absence of r flection.* Darkness animated by absence of reflection is such as receives its life, or cause of duration, from the absence of two reflections, *viz.* study and meditation on the subject of the evidences given in the latter part of the Veda and the truths evidenced thereby. The modification in the form of the indivisible though generable by texts, does not so long as it is obstructed by want of comprehension and similar impediments, bring illusion to an end, just as fire so long as it is obstructed by gems, spells, and the like, does not consume the grass &c. with which it is in contact. Sarvajnâtma-muni accordingly has said: As the understanding soiled by the sins of a man, though there arise blameless acts of vision, serves no end when supplied with objects, so is the knowledge of the soul which springs from revelation. But when want of comprehension and the other obstructives cease upon proper reflection, the modification, no longer obstructed, brings illusion to an end; just as the fire upon the removal of the gems and other obstructives consumes the grass &c. The same authority states this also in the words: But when the man's sins are gone, the understanding becomes fruitful through the ejection of the obstructives; just as on the removal of the gem and the spell the smoke rises from the fire.

The inexplicable illusion being imaginary, its termination by knowledge is shown to be possible. Nor is this illusion unimagined, being commonly compared to a lamp, in the doctrine of the Bhâttas to a flash of light, in that of our sacred teachers to sensibility, and in that of others than the Bauddhas to difference or duality. While self-effectuating it involves no infinite regress, for we admit no ulterior illusion. When therefore illusion is brought to a close by knowledge, the cessation of the sense of personality by eradication thereof being brought about, the transmigratory being which consists of agency and fruition, and which is manifested in the soul, and which is caused by the soul's concomitant, the sense of personality, is brought to an end.

The knowledge, then, that the self-conscious soul is absolute spirit is fruitful.

XVIII. The author supposes a difficulty, as follows. If all except absolute spirit be in reality non-existent as imagined by illusion, the ceremonial part of the Veda &c. must be unauthoritative. For this teaches that one who desires paradise and the like should perform sacrifices, and so forth; but all this would be unaccountable if the precept, requitative efficacy, the man instructed and the sacrifice enjoined by the precept, and paradise, the result of the injunction, were in reality unreal. So again, if all but absolute spirit be in reality unreal, the Upanishads are unauthoritative, for in these it is taught in the words The soul indeed is to be seen &c., that one who desires emancipation, must perform sacred study &c. The supposition that this also is unauthoritative is improper, for portions of the ceremonial revelation and of the Upanishads are equally revelation as the text declaratory of absolute spirit. In rejoinder the author inquires: Do you wish to prove the unauthoritative character of the ceremonial revelation &c. as posterior to knowledge of the truth, or as anterior to such knowledge? The former alternative must be rejected; for its unauthoritative character subsequently to such knowledge is declared to be such as the unauthoritative character relative to a house holder of the revelation which announces the duties of a religious student, or that of the revelation as to the sacred fire relatively to the period of the recluse order. Having this in mind the author proceeds to reply to the second alternative.

Text.

(18). In this protracted dream, which the world is, projected in that long sleep, the illusion regarding the soul, flash forth the glimpses, paradise, emancipation, and the rest.

Commentary.

In the long dream lasting till knowledge of the truth, and cognised in the form of the universe, which is projected, produced, in the long sleep which has gone on from time without beginning, and which is the cause of an essential envelopment, in that long sleep which consists of illusion regarding soul, regarding the self-conscious spiritual substance, flash forth those glimpses, paradise, emancipation, and the rest. By the word paradise there is a subaudition of the desire of paradise, of one instructed, the instruction, and the matter of the instruction, *viz.* sacrifice &c. By the word emancipation there is a subaudition of knowledge the means of emancipation, of the precept enjoining sacred study, and so forth. The words *and the rest* are designed to comprise sons, friends, and other objects of every-day conventional action and expression. It is to be seen that emancipation presupposing bondage, and bondage being unreal, emancipation itself which presupposes that bondage, is a mere glimpse or hurried movement.

The purport is to the following effect. There is no refusal of the authority of the ceremonial part of the Veda, inasmuch as the whole world, the injunction, those enjoined, and all else, are before the knowledge of the truth, conventionally real, there may be a conventional conversancy about them all, just as in a dream before one awakes; and there is thus a conventional authoritativeness. And in this way, while the matter is admitted, there is sudden sublation of the texts expository of supreme spirit, which have no reference to the matter, and would be otherwise untenable, and which treat of objects real in very truth. Whereas if the matter be explained otherwise than as conventional and the conventional authoritativeness be not allowed, we shall have to disallow also the real authoritativeness of the texts declaratory of absolute spirit, and there will be no such thing as authoritativeness at all. Whereas if we allow both to be authoritative but in different ways, it cannot be asserted that there is a total absence of authority. Brahmâ himself, therefore, who knows the meaning of all the Vedas has said: A true matter has been declared by me to be of two kinds, O dwellers in paradise; the one essential, immediate, real, pure existence; this is auspicious, consisting of verity, intelligence, infinity of beatitude; the other imagined by illusion directly superposed illusorily on absolute spirit: the Veda declares both the matter which is conventional true, and that which consists of real truth, intelligence: but the systems speak not thus.

Hence though real truth pertains to secondless absolute spirit only, yet as relating to matter conventionally true the ceremonial part of the Veda has an object matter and is not unauthoritative.

XIX. Anticipating the objection that if individuated spirit the enjoyer and all the objects of its fruition are absolute spirit only, there cannot exist the distinction between enjoyer and enjoyed of which we are cognisant, everything being alike only illusorily surmised in absolute spirit; the author proceeds to declare that this distinction is to be explained by the influence of illusion.

Text.

(19). This distinction of conscious and unconscious is imagined in me the conscious; just as on a flat portion of a wall, the distinction of things moving and unmoving in a picture.

Commentary.

The distinction of conscious and unconscious is that whereby we recognise that this object enjoyable is unconscious and this enjoyer is conscious. This phænomenal distinction is imagined in the conscious Ego whose essence is unintermitted consciousness identical with self-presented self, absolute spirit. Imagined means superposed by the cosmical illusion. In the self-luminous one absolute spirit, the imagination of the unconscious object of fruition is accounted for by the predominance of the concomitants; and the imagination of the conscious subject of fruition is accounted for by the predominance that of which is accompanied. Accordingly the author of the Vârttika says: Absolute spirit predominating in consciousness becomes the cause of bodies, in which darkness predominates, and of conscious souls, by means of the works of imaginary illusion.

The author gives an illustration of the imagination of both the like and the unlike in respect to absolute spirit. In the flat and unvarying that is, unmoving, side of a wall, like the distinction between things moving and unmoving, like the distinction between the moving elephants &c. and the unmoving mountains &c. there depicted.

XX. An objection is anticipated, as follows: Even thus the soul cannot be absolute spirit, the soul being possessed of discrimination in virtue of its witnessing transmigratory existence, absolute spirit being proved by such texts as Nor gross nor subtile, Not this, nor that, to be without discrimination. In reply our author says.

Text.

(20). My nature of witness, which consists in a colouring by the intelligible is not real; it is merely an indication of the waveless sea of consciousness.

Commentary.

The intelligible means the world constituted by agency, fruition, &c. The colouring thereby is connection with the intelligible. My nature as a witness, which is constituted thereby, the character of witness pertaining to me, to self-presented self, is not real, does not in reality exist; for the intelligible being unreal, the nature of witness connected with it, cannot possess the character of reality. The waveless sea of consciousness, that sea which is in reality free from the waves of agency and other transmigratory conditions, is merely indicatory of me, of self-presented self; that is, it is extrinsic to, but gives knowledge of, the soul; just as the substantial causation of the universe is unessential to absolute spirit, but gives us knowledge thereof.

The soul therefore being in reality without discrimination there is nothing to show that it is not absolute spirit.

XXI. The author proceeds to declare that, the world being imagined in absolute spirit, and the sense of personality and other phænomenal things being imagined in the soul, in the aforesaid manner, and therefore in reality not existing, there is no change in absolute spirit definable by the two terms (that and thou).

Text.

(21). Of me, the ocean of immortality, there is no

decay, by the risings of unreal bubbles; of me, the mountain of crystal, there is no colouring by the playings of the dream-begotten clouds of evening.

Commentary.

Of the ocean of immortality, of bliss undifferenced, self-luminous, emancipation, definable by the term that, of me, of absolute spirit which is naught else than self-presented self, there is not by means of the rising of bubbles or foam, that is by production of ether and other phænomena, any decay; there is neither diminution nor increase,—for the word decay conveys a subaudition of growth; for an unreal thing can do no harm to that upon which it is superposed. That there accrues to absolute spirit from the genesis therein by the cosmical illusion of ether and the rest, neither diminution nor increase, is proclaimed also by Bhârata-tírtha in the Kûṭastha-dîpa, in the words: Illusion is a cloud, the world is the rain thereof; let it rain how it may, there is neither loss nor gain to consciousness which is the sky,—such is the approved position.

He next shows that the designate of the term thou is pure, in the words *of the mountain of crystal &c* Of me, of self-presented self, pure as a crystal mountain, there is no colouring by the play of the dream-begotten clouds of evening. Dream-begotten, the sense of personality and the rest imagined by illusion, such is the evening cloud. This cloud of evening is so styled because it resembles a cloud in imposing its own qualities on the cloudless sky in proximity to itself. The playing of this cloud consists of the illusions whereby spirit fancies itself an agent and so forth. The word play in reference to a cloud implies fluctuation of condition. By these arises redness in the sky with reference to the cloud. As then a crystal mountain becomes reddened, not so is there in reality any connection between agency, fruition, desire, and aversion, and the soul which consists of consciousness. That there is no real connection between the soul and the sense of personality and the like conditions, has also been stated by Bhârata-tîrtha in the Chitra-dîpa: What should desire and aversion residing in the sense of personality, the diseases of the body, and the birth and decay of vegetables and animals, have to do with the soul, which consists of consciousness?

Consciousness, then, the designate of the two terms (that and thou) is absolutely pure.

XXII. Anticipating the objection that there is and must be change in absolute spirit designated by the two terms (that and thou), inasmuch as it must be declared to be in reality the substratum of existence, for otherwise it would be non-existent like the horns of a hare; the author proceeds to say.

Text.

(22). Like the nature of ether existence is my essence, not a property of me; for there being naught else than I existent, that existence is not called a universal.

Commentary.

Existence is the essence of me the designate of the two terms (that and thou), not a property residing in me; as existence, as not depending on or (inhering in) any ulterior existence, cannot be non-existent. Anticipating the question why existence may not attach as a property to soul which is the existent as the universal nature of a jar residing a jar; the author proceeds to say that we cannot allow existence to reside as a universal in soul, there being no plurality of individuals existent, in the same way as we allow the universal nature of a jar in order to account for the thought and expression This is a jar, That is a jar, which applies in common to a plurality of jars. *Naught else than I*, there being no other existent individual besides the soul definable by the two terms (that and thou), existence is not admitted as a universal. An example is next given of the fact that a universal is not allowed to reside in one individual. *Like the nature of ether.* Such universals as the nature of a water-pot are admitted to account for the thought and expression applied in common to many water-pots and so forth; but in the present instance space and all else, being false, and not constituting an ulterior existence, existence as a universal cannot be admitted in the same way that we admit the nature of a water-pot as a universal; but existence can only be admitted as an essence, like the nature of ether (for there being but one ether, the ethereal principle cannot inhere in ethers more than one, and is not therefore a common attribute.)

Here some one may say: Let us allow existence as a universal in order to account for the usage (name and notion) applied in common to entities distributed according to their concomitants such as water-jars, pieces of cloth, and so forth, and in conformity with the experiences that the water-jar is existent, the piece of cloth is existent, the wall is existent, and so forth. To this we reply: Not so; for the name and notion of this common applicability may be accounted for by mere existence identical with absolute spirit present alike in all associated things, just as it is accounted for by infinite ether present alike in all parts of ether associated with (or limited by) water-pots &c.

Existence, then, is not a universal. For the same reason it is not a concomitant, for this hypothesis could only be adopted to account for the name and notion of common applicability to many. That existence consists of absolute spirit purely existent has also been declared by Vasishṭha, in the words: They declare that to be the absolute in existence which is pure existence, exempt from differences, unmingled, uniform, all-exte nsiv

Thus then existence being an essence and not a property or condition, that which is designated by the two terms (that and thou) is wholly pure.

XXIII. Some one may urge: Yet even thus you must allow soul to be the subject of cognition, else like a water-jar and so forth, it must be asserted not to be soul at all, the definition of soul being the substratum of knowledge, and that soul is the substratum of knowledge is recognised in the datum of consciousness, I cognise. Accordingly the nature of absolute spirit set forth in the text witness, thinker, alone and without qualities, cannot belong to the soul. The author therefore says in reply.

Text.

(23). Knowledge is the essence of me, not a quality; for if it were a quality it would follow that the knowable and unknowable would be neither soul nor existent.

Commentary.

Of me knowledge, consciousness, is the essence, not a quality inhering in me. If one ask why, he replies *for if it were a quality &c. It*, here the masculine form (*sa*) is employed on account of attraction by the predicate (a quality). A controversialist who maintains that consciousness is a quality should be asked: Does this consciousness make the soul its object, or not? To both alternatives the author states an objection. If the knowable and unknowable are apprehensible by the soul, they cannot be soul, just as a water-jar &c; and if they be not apprehensible, it will follow that they are non-existent, like the horns of a hare. If you assert that the soul is not an object of the cognition inhering in the soul, then the soul as not being cognised must be non-existent, for it is not accepted by any one that what is not cognised by means of any evidence, the horns of a hare for instance, has any existence. If on the other hand to escape this difficulty it be asserted that the soul is cognised, it will follow that the soul, like a water-jar and the like cognisables, is not the soul, according to the law that the object of cognition is not the soul.

Some one may say: The soul shines forth (or manifests itself) by reason of the cognition residing in it, as a spiritual substance; not as an object, that it should be not-self like a water-jar and the like. To this we reply: Not so, for by the rule that the illumination dependent on cognition but exterior to cognition is an object of knowledge, the objection will equally accrue that the soul is not soul, because it will necessarily be an object of the illumination dependent on cognition.

Nor let it be held that the nature of subject of knowledge is determinant of the nature of soul, for an easier supposition is that it is the nature of knowledge that is determinant of the nature of soul; and the assurance I know is the object of a modification pertaining to the sense of personality.

Nor let any one contend that knowledge is generable and destructible, as evinced by the assurances that knowledge has ceased, knowledge has arisen; for this also is only the object of a modification.[2]

Knowledge, then, is not a quality, but the essence itself of the soul. Bâdarâyaṇa himself has declared in an aphorism, viz Having hence alone, that the soul consists of knowledge. The meaning of this aphorism is thus exhibited by Vidyâraṇya in his Adhikaraṇa-ratnamâlâ. Here he first states a *primâ facie* view of the question in the words: The individual soul either consists of consciousness; it is declared to consist of consciousness, for consciousness being absent in dreamless slumber and similar states, the waking consciousness is effected by the internal sensory. He then proceeds to state the received tenet: Because it is absolute spirit it consists of consciousness, consciousness is not suspended in dreamless sleep, for the vision of duality, inasmuch as duality is sublated, belongs not to the seer.[3]

Some one may object: The soul consisting of knowledge either knows itself or does not. If it knows itself it follows that it is at once agent and acted upon. If it does not know itself, it follows that it does not exist at all. *Negatur:* for the soul, as self-luminous manifests itself without requiring an ulterior cognition. Nor does the soul admit the relation of agent and thing acted upon, for we do not allow that it can become its own object. The venerated Vidyâraṇya accordingly says in the Pancha-kośa-viveka: As knowing itself of itself it is not made known; it is not cognisable because there is no difference between the knower and the knowledge, but not because it does not exist. How indeed, we may ask, should that be non-existent, by the grace of which all the world shines forth; or how should that not itself appear. That the soul illumines all things, and shines without need of aught beside itself is also declared in the Âtma-yogavinśa: I am that consciousness which by my own existence superintending illusion, its emanations, and their varieties, by reason of my own luminousness cannot be either remembered or forgotten in dreams or other states.

The soul, then, *is* knowledge, and has not knowledge merely as a quality. It must therefore be absolute spirit exempt from qualities.

A. E. G.

[1] Absolute existence may be present in all phænomena, which are non-existent *per se*; just as space may be present in the spaces contained in water-jars and the like; existence and space not being participated in by them, as universals by singulars, but as themselves all-embracing singulars.

[2] And modifications of the internal organ are illusory and unreal.

[3] Not to the self-conscious soul, but to the internal organ under the accession of illusion.

PRINTED AND PUBLISHED BY THE PROPRIETORS, E. J. LAZARUS AND CO., AT THE MEDICAL HALL PRESS, BENARES.

काशीविद्यासुधानिधिः

श्रीगणेशाय नमः

श्रीमद्विजयिनीदेवीपाठशालोदयोदितः । प्राच्यप्रतीच्यवाक्पूर्वापरपक्षद्वयान्वितः ॥ १ ॥
अङ्कुरश्मिः स्फुटयतु काशीविद्यासुधानिधिः । प्राचीनार्यजनप्रज्ञाविलासकुमुदोत्करान् ॥ २ ॥

THE PANDIT.

A Monthly Journal, of the Benares College, devoted to Sanskrit Literature.

No. 92. Benares, January 1st, 1874. Vol. VIII.

॥ चिन्तामणेः शब्दखण्डम् ॥

ननु खदिरसहितस्यैकत्वात् खदिरसहितो धव इति द्विवचनानुपपत्तिः । धवसहितखदिरसाहित्यावस्यालक्षकत्वे च तस्या एकत्वादेकवचनापत्तिः । अवस्थाश्रययोरुपसर्जनत्वेन द्विवचनार्थान्वयानुपपत्तिश्चेति चेत् । अत्र कश्चित् । अवस्थालक्ष्यत्वेपि तदाश्रयगतस्वार्थबोधकत्वमेव द्विवचनबहुवचनयोः, पदवृत्तिवैचित्र्यात्, तथैव व्युत्पत्तेः । (१) यथा गुणवाचिनीलादिपदं क्व चिद्गुणमात्रवाचकं क्व चित्तदुपलक्षितद्रव्यपरम्, अन्यथा नीलः पट इति सामानाधिकरण्यं न स्याद्, एकत्र वृत्त्यभावात् । (२) यत्तु लक्षिता साहित्यावस्था स्वाश्रयमुभयं लक्षयतीति । तन्न । लक्षितलक्षणाया जघन्यत्वात् । (३) वस्तुतः साहित्याश्रयः प्रधानं साहित्यं त्ववच्छेदकतया गुणभूतं पदेन लक्ष्यते, तेन साहित्यावस्थस्यानेकत्वाद् द्विवचनबहुवचने भवतः । अत एवेतरेतरद्वन्द्वः सर्वपदार्थप्रधानः, धवश्च खदिरश्चेति विग्रहेण तथैवार्थविवरणात् । (४) समाहारे तु साहित्यावस्था प्रधानं पदार्थो गुणभूतः । तेन तस्यैकत्वाद्भेरीपटहमित्यादावेकवचनम् । धर्मे धर्मिणि च तात्पर्याद् द्वन्द्वयोर्भेदः । (५) अत एव युगपदधिकरणवचन इतरेतरद्वन्द्व इति शाब्दिकाः । अधिक्रियतइत्यधिकरणं पदार्थास्तेषां युगपद्वचनमेकेनैकदोपस्थापनं तच्च न शक्त्या एकपदस्येतरपदार्थे शक्त्यभावात् । अन्यथेतरपदवैयर्थ्यप्रसङ्गः । (६) अनेकार्थत्वेप्येकस्यैकत्रानेकार्थपरत्वाभावात् । नापि पदद्वयं मिलितमुभयोरुपस्थापकं मिलितस्य मिलिते शक्त्यभावात् । नापि द्वन्द्वे शक्तिरेव । पदलक्षणयैवानेकार्थोपस्थितिसंभवात् । अत एवाङ्गवाङ्गकालिङ्गशब्दाद् द्वन्द्वे बहुषु वर्तमानात् परस्य तद्राजस्याञादेस्तद्राजस्य बहुषु तेनैवास्त्रियामित्यनेन लोपे अङ्गवङ्गकलिङ्गा इति भवति । (७) अन्यथा साहित्यलक्षणां विना तेषां (८) प्रत्येकपदस्य बहुषु वृत्त्य-

॥ शब्दचिन्तामणिव्याख्या रुचिदत्तीया ॥

वैचित्र्यमात्रे उदाहरणमाह । (१) यथेति । (२) यत्त्विति । तथा च द्विवचनोपपत्तिरिति भावः । ननु सर्वत्राजहत्स्वार्थायां दध्युपघातकत्वादेर्विशेषणीभूतस्यैव लक्ष्यत्वं तदाश्रये विशेष्यएव च विभक्त्यर्थान्वय इति व्युत्पत्तिवैचित्र्यसंसिद्धमित्यस्वरसं कश्चिदित्यनेन दर्शयित्वा तथैव सिद्धान्तमाह । (३) वस्तुतस्त्विति । अन्यथा समाहारेपि द्विवचनादिकं स्याद्विति भावः । (४) समाहारे त्विति । न चैवं भेरीपटहं वादयेत्यादावनन्वयापत्तिरिति वाच्यम् । परम्परासंबन्धेन धर्मेपि तदन्वयात् । योग्यतावशादप्रधानेपि धर्मिणि तदन्वयोपपत्तिर्वृत्तिवैचित्र्यादित्यन्ये । (५) अत एवेति । साहित्यलक्षणासत्त्वादेवेत्यर्थः । (६) अनेकार्थत्वेपीति । सकृदुच्चरितादिति न्यायात् । अन्यथेत्यस्य विवरणं (७) साहित्यलक्षणां विनेति । (८) प्रत्येकपदस्येति । एतेन सर्वपदएव साहित्य-

भावादङ्गलोपो न स्यात् । घटौ घटा इत्यत्रापि घटसहितघटत्वेन द्वित्वबहुत्वान्वययोग्यतेति तदुपस्थितये घटपदे साहित्यलक्षणा । (९) तदर्थप्रदर्शनार्थं द्वन्द्वापवादकसरूपाणामेकशेषानुशासनमपि । तदुक्तम् ।

सहभावविवक्षायां वृत्तिर्द्वन्द्वैकशेषयोः ।
क्रमेणार्थप्रतीतौ हि न स्याद् द्विवचनादिकम् ॥

इति । ननु स्वरूपद्वयमेव साहित्यम्, अतिरिक्तस्याभावात्, स्वरूपयोश्च धवपदादुपस्थितौ युगपद्वृत्तिद्वयविरोधः । न चाजहत्स्वार्था । साधारणरूपाभावात् । एकक्रियान्वयित्व(१०)मेकान्वयप्रकारत्वम् अपेक्षाबुद्धिविशेषविषयत्वादिकं द्वित्वान्वयात्पूर्व(११)मविद्यमान(१२)मप्रतीतं च, (१३) धवखदिराविति हि प्रतीतिः न तु रूपान्तरेण । न च धवपदस्य खदिरे स्वार्थसंबन्धो लक्षणाबीजमस्तीति चेत् । न । साहित्यं तुल्यद्वारता, (१४) सा च धातूपनीतफलानुकूलसजातीयविजातीयव्यापारप्रचयस्यैकरूपस्तुल्यसंबन्धः । द्वन्द्वे ऽन्योन्यसंबन्धोप्ययमेव । धवखदिरौ छिन्धीत्यत्र छिदानुकूलो यावान् व्यापारः स तयोस्तुल्य एव (१५) भासते च । अतः स्वर्गकामादौ पत्न्याः सहत्वेनानुप्रवेशेपि न द्विवचनापत्तिरेकत्वविरोधो वा ऽतुल्यद्वारकत्वात् । दम्पत्योरेकरूपसजातीयविजातीयव्यापारप्रचयसंबन्धरूपसाहित्याभावात् । एवं छिदानुकूलव्यापारत्वेन साहित्यरूपेण शक्यलक्ष्यसाधारणेनाजहत्स्वार्थलक्षणया धवपदादुपस्थिते धवखदिररूपे विभक्त्यर्थद्वित्वान्वयः । धवपदार्थस्य खदिरेण संबन्धोपि तुल्यद्वारत्वमेव । न चास्य लक्ष्यत्वान्न संबन्धरूपतेति वाच्यम् । अजहत्स्वार्थायां हि येन रूपेण लक्ष्यता स एवसंबन्धः । यथा छत्रिकाकपदयोश्छत्रिघटितसमूहवर्त्तित्वं दध्युपघातकत्वं च लक्ष्यमेव संबन्धः । न चैवं खदिरपदवैयर्थ्यं लक्षणीयपदानुपयोगादिति वाच्यम् । खदिरपदं विना न नियता खदिरोपस्थितिरिति साहित्याश्रयद्वितीयविशेषज्ञापनाय सार्थकत्वम्, अन्यथा लक्षणाविरहेण धवद्वयधीप्रसङ्गात् । अत एवाग्नीषोमीये ऽग्नीषोमौ देवते इति द्वित्वान्वयबलादेव साहित्यावस्थयोः सापेक्षयोर्देवतात्वम् । द्वन्द्वे आद्यं पदं लक्षकं प्राथम्याद्, द्वितीयपदं साहित्यनिरूपकताकाङ्क्षितसमर्थकं मुख्यमेव । उभयोरमुख्यार्थत्वे हेत्वभावात् ।

(१६) अन्ये तु द्वितीयपदेपि लक्षणा, समभिव्याहृतविभक्त्यर्थान्वयानुरोधात् । अन्यथा समभिव्याहारभङ्गापत्तेः, पदार्थगतस्वार्थबोधिका हि विभक्तिः । न च समासे पदमन्यदस्ति समस्यमानपदात्, समासे शक्त्यभावात् । तेन धवपदार्थगतं खदिरपदार्थगतं च द्वित्वं (१७) तन्त्रेण विभक्तिराह । अतो धवपदवत् खदिरपदेपीतरसंबन्धावस्थार्थपरता । प्रातिपदिकार्थे इतरपदार्थान्वयस्य विभक्त्यर्थगर्भत्वादुभयपदार्थगतएव द्वित्वकर्मत्वे विभक्तिराह । न च द्वयोः सहितावस्थार्थपरत्वे धवद्वयं खदिरद्वयं च वाक्यार्थे ऽन्वीयेत न त्वेको धवः खदिरश्चेति चतुष्टयापत्तिरिति वाच्यम् । (१८) पदद्वयेन हि तयोरेकमेव साहित्यं लक्ष्यते तच्च न चतुष्टयवृत्ति ।

लक्षणेति सूचितम् । अन्यथा एकपदलक्षणायामपरपदस्य बहुषु वृत्त्यभावाद् अङ्गवाङ्गकालिङ्गा इत्याद्येव स्यादिति । (९) तदर्थेति । द्वन्द्वसमानार्थत्वाभावे द्वन्द्वाप्रसक्तौ तदपवादकमेकशेषानुशासनं न स्यादित्यर्थः । (१०) एकेति । एकोन्वयप्रकारः कर्मत्वादिः । आद्ययोराह । (११) अविद्यमानमिति । अन्ये त्वाह । (१२) अप्रतीतं चेति । एतदेव विवृणोति । (१३) धवखदिराविताति । (१४) सा चेति । सजातीयत्वादिकं स्वरूपनिर्वचनम् । अत एवाग्र तदनन्तर्भावेनैव वक्ष्यति । पूर्वोक्तदोषं निरस्यति । (१५) भासते चेति । द्वित्वान्वयात्पूर्वमिति शेषः । ननु धवखदिरावित्यादौ क्रियारहिते धातूपनीतफलानुकूलव्यापारवत्त्वाप्रतीतौ कथं द्वित्वान्वय इति चेत्, न । कार्यान्वितव्युत्पत्तेः क्रियारहिते ऽसंसर्गाग्रहभावाभ्युपगमेन द्वित्वानन्वयात् । वस्तुतस्तुल्यव्यापारवत्त्वमात्रं साहित्यं तच्च तत्रापि, अन्यथा धवखदिरौ त्यजेत्यादौ तयोर्धातूपनीतफलानुकूलव्यापारवत्त्वाभावेन द्वित्वानन्वयापत्तेस्तदपि विवक्षासिद्धं बोध्यम् । तदुक्तं, सहभावविवक्षायामित्यादि । अन्यथैकस्याप्राधान्यविवक्षायां तत्रैव खदिरसहितधवं छिन्धीति कस्य चित्प्रयोगो ऽसाधुः स्याद् द्वन्द्वापत्तेरिति । (१६) अन्ये त्वित्यस्वरसोद्भावनं, तद्बीजं तु समस्यमानपदार्थानुगतस्वार्थबोधकत्वं विभक्तीनामित्येव व्युत्पत्तिर्न तु यावत्पदार्थानुगतत्वगर्भा सा चैकपदलक्षणयैव निवर्हतीति । (१७) तन्त्रेणेति । युगपदित्यर्थः । (१८) पदद्वयेनेति । न चैवं पौनरुक्त्यं, करोतीत्यादाविव

अपरे तु द्वितीयपदं (१९) फलतो ऽनुवादकं, (२०) यथान्विताभिधाने एकं पदम्। अत एव समुच्चये ऽन्वाचये च तयोः साहित्यानवगमान्न द्विवचनबहुवचने, न वा द्वन्द्वः। यद्यपि चार्थमात्रे द्वन्द्वानुशासनं तथापि यत्रान्योन्यसाहित्यान्वयापूर्वक इतरपदार्थान्वयस्तत्र समासः साधुस्तेनेतरेतरयोगसमाहारयोस्तथाभावात्समासः। समुच्चये ऽन्वाचये च न तेषां संबन्ध एकैकशः क्रियान्वयात्। एवं धवं खदिरं च छिन्धीत्यादौ समुच्चये तुल्यवदसंबन्ध्ययोः क्रियान्वयधीः, पश्चात्तु तयोरेकरूपसजातीयविजातीयव्यापारप्रचययोगित्वं साहित्यं चकाराद्वगम्यते। (२१) क्रियाभेदे ऽन्वाचयः। यथैधानाहर्तुं व्रज शाकमप्यानेष्यसीति। (२२) गौश्चाश्वश्चेति समासार्थवाक्यमेव। (२३) साहित्यं परमनेन स्फोरितं (२४) द्विवचनबहुवचनयोरेव तद्व्यञ्जकत्वात्। यत्तु द्वित्वान्वयार्थं तदन्वययोग्यार्थोपनयनम् अपेक्षाबुद्धिविषयत्वावस्थया च द्वित्वान्वय इत्यपेक्षाबुद्धिविषयत्वावस्थस्वार्थपरतास्तु, इदमेव च साहित्यं (२५) न त्वेकक्रियान्वयः, तस्य (२६) विभक्त्यैव बोधितत्वात्। एकक्रियान्वयाभावेऽपि च द्वित्वान्वयदर्शनादिति। तन्न। (२७) अपेक्षाबुद्धिविशेषविषयत्वार्थमप्येक उपाधिरवश्यं वाच्य इति तथैव लक्षणाया युक्तत्वात्। लाघवात्। (२८) न च विना लक्षणामन्यसंबद्धस्य सतः (२९) सापेक्षस्य क्रियान्वयेऽपि विभक्त्या बोध्यतइति। अत्रोच्यते। (३०) एकस्मृत्यारूढपदद्वयात् स्वस्वशक्त्या स्वस्वार्थयोरेकदा स्मृतिसंभवादनेकस्मृत्यर्थं न साहित्ये लक्षणा। एकैकमात्रगोचरसंस्कारद्वयाद्धि पदयोस्तदर्थयोश्चैका स्मृतिरित्यनुभवसिद्धम्। प्रत्येकेन्द्रियसंयोगात्समूहालम्बनमिव। अन्यथा द्वन्द्वे न लक्षणा न वा तया ऽनेकस्मृतिः। पदयोस्तदर्थयोश्चैकस्मृत्यभावात्। एवं च पदद्वयादुपस्थिते धवखदिरादिस्वरूपे विभक्त्या द्वित्वान्वयो बोध्यते। यथेन्द्रियसंनिकृष्टे ज्ञाते वा धवखदिरादिस्वरूपे प्रत्यक्षेण द्वित्वं बोध्यते। न च तत्र तयोः स्वरूपातिरिक्तं तुल्यद्वारत्वादिकं साहित्यमस्ति ज्ञायते वा। तथा विभक्त्यापि विलक्षणरूपे द्वित्वं बोध्यते। उभयोर्द्वित्वान्वयबोधकत्वे विशेषाभावात्। (३१) ननु योग्यतावच्छेदकरूपेणोपस्थिते इतरपदादन्वयबोधः साहित्याश्रयत्वेन च धवखदिरौ तथा, न प्रत्येकं, (३२) छिद्रेतरत्वविशिष्टे घटपदस्य लक्षणैवेति चेत्। न। उपस्थिते योग्ये ऽन्वयबोधे ऽधिकस्य गुरुत्वात्। घटपदादपि (३३) योग्यस्यान्वयो बोध्यते न तु छिद्रेतरत्वेनेत्युक्तम्। स्यादेतत्। पदद्वयात्स्वशक्त्या एकदा स्मृतेनेतरपदार्थस्य विभक्त्यर्थस्य

संभेदे दोषाभावादिति। (१९) फलत इति। साहित्यनिरूपकतया सामान्यत उपस्थितस्य द्वितीयपदार्थस्य विशेषेणोपस्थितिरनुवादप्रयोजनमिति भावः। (२०) यथेति। इतरान्वितशक्त्युपस्थापितस्येतरस्य पदान्तरेण पुनर्वचनमनुवाद इत्यर्थः। (२१) क्रियाभेद इति। क्रियागुणप्रधानभाव इत्यर्थः। तेन धवं छिन्धि खदिरमपीत्यन्वाचये नाव्याप्तिः, न वा घटं पश्य पटं चानयेत्यादावुभयत्रैव प्राधान्येन क्रियान्वये तात्पर्यात् समुच्चये ऽतिव्याप्तिः। अत एवाहरणमानयनमेवेति न क्रियाभेदः। निरूपकभेदेन च भेदे समुच्चयेऽपि तथात्वापत्तिरिति निरस्तम्। गौश्चाश्वश्चेति न स्यात्, क्रियायोगाभावेन समुच्चयान्वाचयित्वाभावादित्यत आह। (२२) गौश्चेति। इयानेव विशेषो यद्द्वन्द्वे स्वार्थसंबन्धेन लक्षणया साहित्योपस्थितिरत्र पश्चाच्चकारेणेत्याह। (२३) साहित्यं परमिति। अनेन चकारेण पश्चादिति शेषः। नन्वत्रापि कथं लक्षणेत्यत आह। (२४) द्विवचनबहुवचनयोरिति। द्वित्वान्वयानुपपत्त्यैव सेत्यर्थः। एतदपीतरेतरयोगद्वन्द्वाभिप्रायेण, समाहारे तदभावेऽपि तत्सत्त्वादिति ध्येयम्। क्वचित्तु न स्फारितमिति पाठः, तत्र प्रागिति शेषः। (२५) न त्विति। यद्यप्येकक्रियान्वयः साहित्यं न प्रागुक्तमिति तन्निषेधोनुक्तोपालम्भस्तथापि परयन्यस्य तादृशस्यैवात्र लेखनमिति न दोषः। (२६) विभक्त्यैवेति। छिन्धीति विभक्त्यन्तेनेत्यर्थः। (२७) अपेक्षेति। द्वित्वादिवत्समूहालम्बनरूपापेक्षाबुद्धिविषयत्वस्याप्यनेकत्रासमाप्तेरित्यर्थः। अत एव गुणादौ तद्विषयापि द्वित्वादिधीर्नैकत्रेति भावः। तस्य विभक्त्यैवेति यदुक्तं तद् दूषयति। (२८) न चेति। अन्यसंबद्धस्य, इतरसहितावस्थस्य। (२९) सापेक्षस्य, साकाङ्क्षस्य। साहित्यलक्षणां विनाऽऽकाङ्क्षाविरहेण द्वित्वानन्वये क्रियानन्वयात्, तदुक्तं, प्रातिपदिकार्थे इतरपदार्थान्वयस्य विभक्त्यर्थगर्भत्वादिति। एकदा पदार्थयोरुपस्थितिरङ्गम्, न त्वेकपदेन, गौरवात्, सा च पदद्वयादेवोपपन्नेति न साहित्यलक्षणेत्याह। (३०) एकेति। प्रत्यक्षाद्विशेषमाशङ्कते (३१) नन्विति (३२) छिद्रेतरेति। मतान्तरेण बोध्यम्। (३३) योग्य इति। योग्यता च

त्रान्वयबोधो न स्यात् । इतरपदार्थे इतरपदानां नामार्थे विभक्तीनां स्वार्थान्वयबोधकत्वमिति व्युत्पत्तेः व्याप्तेश्च । अनेकं च न पदार्थो नापि नामार्थः मिलितपदद्वये पदनामत्वयोरभावात् । अतो द्वित्वान्वययोग्यस्य पदार्थनामार्थत्वनिर्वाहाय द्वन्द्वपदे साहित्यलक्षणेति । तन्न । पदार्थत्वं हि वृत्त्या पदोपस्थाप्यत्वं (३४) पदतात्पर्यविषयत्वं वा । अस्ति च द्वन्द्वे पदस्यानेकमुपस्थाप्यं तत्र तात्पर्यं च तन्निर्वाहश्चानेकैकस्मृतिद्वारा लक्षणया पदेन वा स्वस्वशक्त्या पदाभ्यां वेति न कश्चिद्विशेषः । एकपदोपस्थाप्यत्वं च न पदार्थत्वं, गौरवात् । एवं नामार्थत्वमपि तत्तात्पर्यविषयत्वमेव । अथ पदार्थतावच्छेदकावच्छिन्ने विभक्तेः स्वार्थान्वयबोधकत्व,मतो मिलिते तदवच्छिन्नत्वं न मिलितवृत्तिपदार्थतावच्छेदके लक्षणां विनेति चेत्, न । (३५) धवखदिरस्वरूपद्वयस्य प्रत्येकं तदवच्छिन्नत्वमेव । मेलकं च न स्वरूपद्वयातिरिक्तं (३६) प्रत्येकस्यायोग्यत्वाद् न द्वित्वान्वयः । तथापि (३७) यादृशे द्वित्वान्वयस्तादृशो न तदवच्छिन्नस्तदवच्छिन्ने च न द्वित्वान्वय इति चेत् । न । स्वरूपद्वयातिरिक्तस्य तादृशपदार्थस्याभावात् । (३८) वस्तुतः (३९) समभिव्याहृतपदार्थे विभक्त्यर्थान्वय इति व्युत्पत्तिलाघवा,न्न तु पदार्थतावच्छेदकावच्छिन्ने, गौरवात् । ननु विभक्तेः पदार्थतावच्छेदकधर्मव्याप्यसंख्याबोधकत्वं द्वन्द्वादन्यत्र तथा व्युत्पत्तेरिति उभयगतपदार्थतावच्छेदकसाहित्ये लक्षणेति चेत्, न । पदार्थतावच्छेदकधर्मसमानाधिकरणस्वार्थबोधकत्वेन विभक्तिव्युत्पत्तिलाघवाद् न तु सामानाधिकरण्ये नियमांशेऽपि प्रविशति, गौरवात् । नन्वेवं घटावानय पटं चेत्यत्र घटत्वसमानाधिकरणं द्वित्वं समभिव्याहृते पटेऽपीति तमादायान्वयबोधः स्यादिति चेत् । न । (४०) विभक्तीनां योग्यतादिमत्प्रकृत्यर्थगतस्वार्थबोधकत्वं व्युत्पन्नम् । न च घटावित्यत्र पटपदं प्रकृतिः धवखदिरावित्यत्र धवपदं व्यवहितमपि विभक्तिसमभिव्याहृतमेव तदन्तर्भावेनैव समासस्य प्रातिपदिकत्वात् । विभक्त्यन्तर्भावेनैव नामार्थस्य क्रियान्वयित्वाद् विभक्तेरेकपदार्थमात्रगतसंख्याभिधायकत्वं नानापदार्थगतसंख्यान्वयाबोधकत्वं चेति चेत् । न । आद्ये एकमात्रपदयोर्व्युत्पत्तावधिकत्वाद्, द्वितीये ऽन्वयाबोधकत्वे योग्यताविरहस्योपाधित्वाच्च । न चैकधर्मावच्छेदकं विना यदि स्वरूपद्वये द्वित्वान्वयस्तदा धवं च खदिरं चेत्यत्रैव वाक्यभेदः स्यात् । द्वित्वविशिष्टैकार्थप्रतिपादकत्वादिति वाच्यम् । (४१) आनयनान्वितद्वित्वविशिष्टैकार्थबोधकत्वात् । (४२) धवखदिराविति न वाक्यं, क्रियायाः प्रत्येकमन्वये वाक्यभेद, इत्यपि न । (४३) लक्षणापक्षेऽपि प्रत्येकमेव क्रियान्वयित्वात् । गमनादिक्रियाया व्यासज्यवृत्तित्वा भावात् । तद्राजानां तु (४४) प्रत्येकं तेनैव बहुषु वर्त्तमानात्परस्याजादेर्लोपो भवति, तेनैव तद्राजान्तेनैवेति वचनात् । (४५) न त्वेकबोधकात् । (४६) अत एवाङ्गानामपत्यानि बहूनि राजानोऽङ्गानामपत्यं राजा

बाधकमानाभावरूपा, न त्वन्वयप्रयोजकरूपवत्त्वादिकमिति भावः । लक्षणास्थले पदार्थस्यैव स्मारकत्वमिति मतमाश्रित्याह । (३४) पदतात्पर्येति । (३५) धवखदिरेति । पदार्थतावच्छेदकत्वमात्रं तन्त्रं,न त्वेकपदार्थतावच्छेदकत्वपर्यन्तं गौरवादिति भावः । (३६) प्रत्येकस्येति । व्यासज्यवृत्तितया प्रत्येकमात्रान्वयायोग्यत्वं द्वित्वस्येत्यर्थः । (३७) यादृश इति । मिलित इत्यर्थः । प्रत्येकस्य पदार्थतावच्छेदकानवच्छिन्नत्वमभ्युपेत्याह । (३८) वस्तुत इति । समभिव्याहाराभावात्पटे न तदन्वय इति यदि ब्रूयात्तदाह । (३९) समभिव्याहृतेति । अत एव पटं चेत्युक्तमिति भावः । यथाकथंचित्समभिव्याहारो ऽप्रयोजक इत्याह ।

(४०) विभक्तीनामिति । (४१) आनयनेति । यद्यप्यानयनान्वितेत्यधिकं द्वित्वान्वयमात्रादेवैकवाक्यतासिद्धेस्तथापि कार्यान्वितव्युत्पत्तिमाश्रित्य तथोक्तम् । एवमपि क्रियारहिते वाक्यभेदः स्यादत आह । (४२) धवेति । न वाक्यं, न प्रतिपादकं, त्वन्मते कार्यान्वितव्युत्पत्तेः । तथा च कृतं तत्रैकवाक्यत्वचिन्तया, मन्मते तु द्वित्वविशिष्टैकार्थबोधकत्वादैकवाक्यताभङ्गप्रसङ्गोऽपीति भावः । (४३) लक्षणापक्षेऽपीति । एकजातीयक्रियान्वयश्च ममापि तुल्यः, समुच्चये च क्रमिक एव क्रियान्वयबोध इति नैकवाक्यतेति भावः । (४४) प्रत्येकमिति । यद्यप्यङ्गवङ्गकलिङ्गा इत्यत्र न प्रत्येकं बहुत्वान्वयः । अन्यथा धवखदिरावित्यत्रापि प्रत्येकं द्वित्वान्वयापत्तेः । यदि विभक्तेरेकसंख्याभिधायकत्वव्युत्पत्तिः, तदा तुल्यं, तथापि प्रत्येकं बहुषु तात्पर्यं विवक्षितं तच्च समुदिते बहुत्वान्वयेऽप्यस्त्येवेति भावः । (४५) न त्विति । न तु साहित्यरूपैकधर्मावच्छिन्नबहुबोधकात्परस्येत्यनुषङ्गः । (४६) अत एवेति । यत एव तद्राजान्तप्रकृतिकृतमेव बहुत्वं प्रयोजकमित्यर्थः ।

वा आङ्ग इति प्रत्युदाहरणम्, अङ्गा इत्युदाहरणं, वा वृत्तिकारो दर्शयतिस्म। तस्मान्नानापदादुपस्थिते ऽनेकत्र द्वित्वान्वय इति नानेकोपस्थित्यर्थं साहित्यलक्षणा। अत एव

चन्द्रे कलङ्कः सुजने दरिद्रता
विकाशलक्ष्मीः कमलेषु चञ्चला।
मुखाप्रसादः सधनेषु सर्वदा
यशो विधातुः कथयन्ति खण्डितम्॥

इत्यादावेकैकस्मृत्यारूढनानापदजनितैकस्फूर्तिविषयेषु कलङ्कादिषु बहुत्वान्वयबोधः। मेलकोपस्थापकस्य द्वन्द्वस्य तत्राभावात्। (४७) तत्कल्पने मानाभावात्। (४८) एकवचनान्तानां वाक्ये ऽनन्वयप्रसङ्गाच्च। नन्वेवं धवखदिरौ छिन्धीत्यत्र तयोश्छिदानुकूलव्यापारवत्त्वं साहित्यं न प्रतीयतएवेति चेत् न। द्वित्वान्वयबोधात्पूर्वं तन्न प्रतीयतएव। तदुत्तरं च विभक्त्या क्रियापदेन संभूय च्छिदानुकूलसजातीयविजातीयव्यापारप्रचयस्य तुल्य एव संबन्धो धवे खदिरे च बोध्यते, यथा धवं छिन्धि खदिरं चेति समुच्चये। न चैवं द्वन्द्वसमानार्थत्वे समुच्चयेपि समासः स्यादिति वाच्यम्। (४९) द्वन्द्वे युगपदुपस्थिते द्वये एकदा क्रियान्वयबोधे तात्पर्यं तेन तत्र समासः। समुच्चये क्रमेणोपस्थिते क्रमेण क्रियान्वयबोधे तात्पर्यमित्यसमासः। अन्वाचयेप्येवम्। किं च यदि तुल्यव्यापारवत्त्वेन (५०) साहित्येन द्वयोरुपस्थितिः पदार्थता च तदा तुल्यव्यापारौ सहितौ वा गच्छत (५१) इति धीः स्याद् न तु चैत्रमैत्राविति। पदार्थतावच्छेदकरूपेण पदार्थे विभक्तेः क्रियापदस्य चान्वयबोधकत्वव्युत्पत्तेः व्याप्तेश्च। यथा दध्युपघातकत्वेन काकादेरितरपदार्थान्वयः। (५२) सहितावस्थचैत्रमैत्रत्वेनोपस्थितौ प्रत्येकं द्वित्वान्वयानुपपत्ति(५३)र्वृत्तिद्वयविरोधश्च। (५४) अपि च चैत्रमैत्रौ गच्छत इत्यत्र गमनस्य व्यासज्यवृत्तित्वाभावात् चैत्रत्वेन गमनान्वयार्थं चैत्रपदात् चैत्रत्वेन द्वित्वान्वयार्थं मैत्रसहितचैत्रत्वेनोपस्थितौ युगपद्वृत्तिद्वयविरोधः। (५५) सहितावस्थे गमनकर्तृत्वाभावात्। आख्यातार्थसंख्यान्वयेपि न सहितावस्थे। न च सहितत्वेनोपस्थिते पदार्थैकदेशे चैत्रे मैत्रे च धात्वर्थगमनान्वय इति वाच्यम्। (५६) सहितो गच्छतीति धीप्रसङ्गात्। (५७) न च धात्वर्थगमने आख्यातार्थद्वित्वान्वयः। सामानाधिकरण्यभङ्गप्रसङ्गात्, सुबन्ततिङन्तयोरेकसंख्याभिधायकत्वात्। एवं गर्गा भुञ्जतइत्यत्र भोजनस्यैककर्तृकत्वनियमाद् अनेककर्तृकं भोजनं न संभवतीति (५८) तन्त्रवृत्त्या गर्गत्वेनोपस्थिते ऽनेकत्र सुप्तिङर्थबहुत्वान्वयः न तु सहितत्वेनोपस्थिते। यत्तु तत्रापि धात्वर्थभोजनगतं बहुत्वमाख्यातेनोच्यत इति। तन्न। तिङन्तसुबन्तयोः (५९) सामानाधिकरण्यानुपपत्तेः। भोजनानां सहितत्वेनानुपस्थितेश्च। यदा चानुगतं रूपं विनैवैकैकपदात्स्वस्वशक्त्योपस्थितेनेकत्र योग्यतया द्वित्वबहुत्वान्वयस्तदा सुबन्ततिङन्तसंख्यान्वयः प्रातिपदिकार्थे भवतीति नैते दोषाः। यत्तु साहित्यं नोभयानुगततुल्यव्यापारादिकं, तेन रूपेण

द्वन्द्वेत्युपलक्षणमेकशेषाभावाच्चेत्यपि बोध्यम्। ननु तत्रापि द्वन्द्व एव तानीत्येकशेषो वा कल्प्यतइत्यत आह। (४७) तत्कल्पनइति। (४८) एकेति। यद्यप्येकत्वबहुत्वयोर्विरोधे बहुत्वान्वये तवापि तदन्वयस्तुल्य,स्तथापि प्रत्येकमेकत्वान्वये मिलिते बहुत्वान्वयो ऽविरुद्धो ऽत एव तथानुभवोपीति भावः। यद्यपि सुप्तिङ्भ्यामेकसंख्यानभिधानात्सामानाधिकरण्यभङ्ग,स्तथापि मतान्तरेणेदम्। (४९) द्वन्द्वे युगपदिति। वस्तुतः समासानित्यत्वादिति बोध्यम्। अन्यथा चन्द्रे कलङ्क इत्यादौ युगपत्क्रियान्वयतात्पर्ये समासापत्तिरिति। तुल्यव्यापारकत्त्वेनेत्यस्य विवरणं (५०) साहित्येनेति, एवमग्रेपि। (५१) इति धीरिति। स्यादिति शेषः। अभ्युपेत्याह।

(५२) सहितेति। चैत्रसहितमैत्रत्वादिनोपस्थितावन्यतरसाहित्यनिरूपकतया प्राधान्येनोपस्थितौ चैत्रसहितो मैत्र इत्यत्रेव प्रत्येकं द्वित्वान्वयः स्यादित्यर्थः। ननु सहितत्वेनोभयोः प्राधान्येनोपस्थितौ नोक्तदोष इत्यत आह। (५३) वृत्तिद्वयेति। मैत्रत्वादिनोपस्थितेरनुभवादित्यर्थः। ननु गङ्गातीरत्ववद्विशिष्टलक्षणायां नोक्तविरोध इत्यरुचेराह। (५४) अपि चेति। ननु मणिकारमते तद्विरोधाभावादुभयरूपेणाप्युपस्थितिः स्यादित्यरुचेराह। (५५) सहितावस्थइति। कृतेः प्रत्येकविश्रान्तत्वात्संख्यायाश्च भावनानुगामित्वादित्यर्थः। (५६) सहित इति। भावनान्वयिनैव संख्यान्वयात्प्रत्येकमयोग्यत्वादनन्वयः स्यादित्यर्थः। (५७) न चेति। यद्यपि साहित्येनोपस्थितिं विना धात्वर्थेपि द्वित्वान्वयानुपपत्तिस्तथापि प्रक[illegible]रमात्रे तात्पर्यम्। (५८) तन्त्रवृत्त्येति। एकया वृत्त्येत्यर्थः। (५९) सामानाधिकरण्येति। एकसंख्याभिधायकत्वेनैव तथात्वादि-

धवखदिरयोर्विभक्तिधात्वर्थान्वयाप्रतीतेः, किं तु प्रत्येकविलक्षणं स्वरूपद्वयमेव, प्रत्येकात् चोभयमन्यदेव । भवति हि द्वयादन्य एकः । धवो न धवखदिरौ, तौ च न धव इत्यनुभवात् । तथा चैकमात्रवाचकेन द्वयमशक्यं लक्ष्यतइति न वृत्तिद्वयविरोधः । धवपदस्य च स्वार्थनिरूप्यत्वमेव लक्ष्ये स्वरूपद्वये संबन्ध एकनिरूप्यत्वाद् द्वयस्य । अनुगतधर्मं विनापि धवपदादनेकोपस्थिति(६०)र्ध्रुवपदादिव चतुर्दशानाम् । योग्यतया विभक्त्यर्थस्य स्वरूपद्वये धात्वर्थस्य च प्रत्येकमन्वय इति, तन्न । उक्तरीत्या हि स्वस्वशक्त्या नानापदजनितैकस्मृतिविषये ऽनेकत्र द्वित्वान्वयबोधसंभवाद् न तदर्थं साहित्यलक्षणा । घटौ घटा इत्यत्र द्वित्वबहुत्वान्वययोग्यानेकोपस्थितिः शक्तित एव (६१) तन्त्रवृत्त्या घटपदात्संभवतीति न तदर्थं लक्षणा । यथा (६२) ग्रहं संमार्ष्टीत्यत्र ग्रहपदात्तन्त्रवृत्त्योपस्थितानेकग्रहे संमार्गान्वयः । तर्हि तत्रानेकग्रहस्वरूपमात्रज्ञानवदिहाप्यनेकघटस्वरूपधीः स्यात्, न तु तेषां सहितावस्थधीरिति चेत्, न । तां विनापि द्वित्वबहुत्वान्वययोग्योपस्थितेः । सहितावस्थत्वेनानेकस्य द्वित्वबहुत्वान्वययोग्यतेति चेत्, न । प्रकृत्युपस्थितानेकत्वेनैव तद्योग्यत्वात्, लाघवात् । भवत्वनेकत्र द्वित्वान्वयबोधस्तेषां साहित्यधीस्तल्लक्षणां विना न स्यादिति चेन्न । विभक्त्यर्थधात्वर्थान्वयबोधात्पूर्वमनेकत्र तुल्यव्यापारवत्त्वस्याप्रतीतेः । किं चैवं न विभक्त्यर्थद्वित्वबहुत्वान्वयानुपपत्त्या लक्षणा, किं तु साहित्यप्रतीत्यनुरोधात् । न चैवमपि धातुनैव तुल्यव्यापारवत्त्वस्य बोधनात् तदन्वयबोधात्पूर्वं तत्प्रतीत्यसिद्धेः । (६३) समाहारे तु पाणिपादं पञ्चपूलीत्यादौ तावद्वृत्त्येकधर्माभिधानं लक्षणयैव । तदेकत्वादेकवचनम् । तदाहुः शाब्दिकाः समाहरणं समाहारोऽनेकस्यैकीकरणम् । एको धर्मइति यावत् । स चैको धर्मः सेनावनादाविव द्वित्वबहुत्वसंख्याऽपेक्षाबुद्धिविषयत्वं वा । विरूपैकशेषे तु पितरावित्यत्रैकस्य पितृद्वयाभावाद् अगत्या पितृपदे (६४) जनकदाम्पत्ये लक्षणा, विभक्त्युपनीतं च द्वित्वं विरूपयोरेव (६५) मातापित्रोरवगम्यते । (६६) सरूपस्य पितृद्वयस्य मातृद्वयस्य चैकं प्रत्यजनकत्वात् । श्वशुरावित्यत्र श्वशुरपदे पत्नीजनकदाम्पत्ये लक्षणा । पत्नीजनकद्वित्वं (६७) चोक्तन्यायात् पत्नीमातापित्रोरेव ।

त्यर्थः । (६०) ध्रुवपदादिवेति । यथा ध्रुवपदादेकयैव शक्त्या ध्रुवत्वादिना प्रातिस्विकरूपेण चतुर्दशानामुपस्थितिस्तथा स्वार्थनिरूपकत्वेनैकेनैव संबन्धेन धवत्वादिनोभयोपस्थितिरित्यर्थः । न च ध्रुवपदे शक्यतावच्छेदकभेदेन शक्तिभेदः स्यादिति वाच्यम् । संकेतस्यैकोच्चारणगर्भतया पुष्पवन्तादिपदवत्तद्भेदेऽपि शक्त्यभेदादिति भावः । (६१) तन्त्रवृत्त्येति । एकेन रूपेण घटत्वेनेत्यर्थ इत्येके । अन्ये तु एकया वृत्त्येत्यर्थः । सर्वाभ्यो विभक्तिभ्यस्तसिरिति शक्तित इत्यनेन सामानाधिकरण्येनान्वय इत्याहुः । (६२) ग्रहो, यज्ञपात्रं, गृह्यतेनेनेत्यर्थः । तदसमभिव्याहृते तद्धीरसिद्धैवेति भावः । नन्वेवं धवखदिरावित्यत्रेव पाणिपादमित्यत्रापि द्विवचनं स्यात् प्रकृत्युपस्थापितानेकत्वस्याविशेषादित्यत आह । (६३) समाहारे त्विति । एकत्वान्वयानुपपत्त्या धर्मे लक्षणेत्यर्थः । नन्वेवं पाणिपादं चलतीत्यादौ धर्मे चलनान्वयानुपपत्तिरिति चेत्, न । परम्परासंबन्धेन तदुपपत्तेः । न च पाण्याद्यनन्वयापत्तिः । विशिष्टलक्षणया तदुपपत्तेः । यत्तु साक्षात्पाण्यादावेव चलनान्वयस्यानुभवान्न धर्मे लक्षणा न चैकत्वान्वयानुपपत्तिः । पदद्वयात्स्वस्वशक्त्युपस्थापितयोः प्रत्येकमेकत्वान्वयात् । न चैवं धवखदिरमित्यपि स्यादिति वाच्यम् । असाधुत्वात्, प्रकृतस्य द्वन्द्वश्च प्राणितूर्येत्यादिसूत्रेण साधुत्वादिति तत्र विभक्तेरेकसंख्याभिधायकत्वव्युत्पत्तेः प्रत्येकमेकत्वद्वयानन्वयात्, एकस्य चैकत्वस्यापरत्रायोग्यत्वात्, अन्यथा धवखदिरावित्यत्रापि प्रत्येकं द्वित्वान्वयापत्तिरिति । केचित्तु अनुशासनबलात्तत्रैकवचनप्रयोगः साधुस्तथा चैकत्वानन्वयेऽप्यदोष इति न लक्षणेत्याहुः । अन्ये तु धर्मलक्षणायामपि पदार्थतावच्छेदके पाण्यादौ चलनान्वयः शब्दवैचित्र्यात्, उत्कृष्टः पण्डित इत्यादाविवेति वदन्ति । (६४) जनकेति । जनकत्वमेव संबन्धः शक्यलक्ष्यसाधारणं चेति भावः । नव्यास्तु जनकत्वलक्षणायां पुंस्त्वादिविशिष्टान्वयोनुभवसिद्धो न स्यादित्येकशक्तेन द्वयमशक्यं स्वार्थनिरूप्यत्वेन संबन्धेन जनकस्त्रीत्वादिना भिन्नरूपेणैवोपस्थाप्यते, ध्रुवपदे शक्यतावच्छेदकवल्लक्ष्यतावच्छेदकमप्यनेकमिति वदन्ति । (६५) मातापित्रोरिति । लक्षणया तयोः प्रकृत्यर्थत्वादिति भावः । पुंस्त्वं पितर्येवान्वेति न तु मातरि, अयोग्यत्वात् । (६६) सरूपस्येति । यद्यपि मातृद्वयस्येति प्रकृतानुपयुक्तं तथापि दृष्टान्तपरं तदिति भावः । (६७) उक्तन्यायादिति । यद्यप्यत्र सरूपद्वयस्यापि संभव इति नोक्तन्यायस्तथाप्येकपत्नीकत्वेन प्रमिते गतिरियम् ।

ब्राह्मणावानयेत्यत्र (६८) दम्पतिपूजाप्रकरणे मानान्तराद् ब्राह्मणब्राह्मणीपरत्वावगमे पुमान् स्त्रियेति विरूपैकशेषत्वा(६९)द् ब्राह्मणपदे स्त्रीपुंसलक्षणैवानन्यगतिकत्वात्। (७०)पुल्लिङ्गं तु पदार्थस्यैकदेशगत(७१)मनूद्यते। स्त्रीपरत्वाज्ञाने च ब्राह्मणपदेन तन्त्रवृत्त्या पुंद्वयमेवोच्यते, न तु स्त्रीपुंसौ, सरूपैकशेषापेक्षया विरूपैकशेषस्य लाक्षणिकत्वेन जघन्यत्वात्। (७२) यदि च सरूपैकशेषेऽपि लक्षणा, तदा ऽग्न्यौकारान्तपदात्सद्वितीयपुंबुद्धौ द्वितीयापेक्षायां तत्पदबोध्यस्य पुमवरुद्धत्वाद् (७३) लिङ्गानुरोधाद् स्त्र्यर्थकल्पने मानाभावात् पुंद्वयमेवावगम्यते नतु स्त्रीपुंसौ। शिवौ नमस्कुर्यादित्यत्र नमस्यशिवान्तराभावाद् विरूपैकशेष इत्यगत्या (७४) शिवपदेन शिवश्च शिवा च लक्षणयोच्येते। भ्रातरौ पुत्रावित्यत्रापि मानान्तरात् स्त्रीपरत्वज्ञाने 'भ्रातृपुत्रौ स्वसृदुहितृभ्या'मिति विरूपैकशेषाद् (७५) भ्रातृपदेन भ्रातृस्वसारौ (७६) पुत्रपदेन पुत्रदुहितरौ लक्ष्येते। स्त्रीपरत्वाज्ञाने च तन्त्रवृत्त्योक्तयुक्त्या भ्रातृद्वयं पुत्रद्वयमेवोच्यते। नन्वेवं क्षौमे वसानावग्नीनादधीयातामित्यत्राप्यौकारान्तवसानपदात्सद्वितीयपुंबुद्धौ द्वितीयापेक्षायां तत्पदबोध्यस्य पुमवरुद्धत्वात् टाबाद्यर्थकल्पने च हेत्वभावात् पुंद्वयबुद्धौ पुरुषद्वयविधिराधाने स्यात्, वसानपदात्तन्त्रवृत्त्यापि स्त्रीपुंसयोर्ज्ञानासंभवात्। न चैवं पुमान् स्त्रियेति विरूपैकशेषोच्छेदः। यत्र तु मानान्तरात् स्त्रीपरत्वधीस्तत्र स्त्रीद्वितीयस्य प्रातिपदिकार्थत्वाद् उभयसमवेतद्वित्वस्य पुंस्यपि संभव इति विभक्त्या तद्गतसंख्याभिधाने विरूपैकशेषसंभवात्। इह तु स्त्रिया उपनायकाभावाद् द्वितीयत्वेन स्त्रिया अप्राप्तत्वात् वसानपदस्योक्तयुक्त्या तदुपस्थापकत्वाभावात् सरूपैकशेषतैव स्यात्। मैवम्। क्षौमे वसानावित्यत्र यत्कर्तव्यं तदनया सहेति विधिना ऽग्न्याधाने सहत्वेन प्राप्तया पत्न्यैव पुंसः सद्वितीयत्वात्, न त्वप्राप्तेन पुमन्तरेण। (७७) वाक्यभेदापत्तेः। पुंस्त्वं तु विभक्त्या (७८) नामार्थगतमेवानूद्यते, न तु नामार्थैकदेशगतम्। अन्यसहितावस्थपुमर्थस्यैव नामार्थत्वादिति॥

सरूपैकशेषशङ्कां वारयति। (६८) दम्पतीति। (६९) ब्राह्मणपदइति। यद्यपि ब्राह्मणत्वजातिमत्त्वाद्ब्राह्मण्यपि शक्यैवेति न लक्षणा, तथापि आद्यवर्णत्वस्त्रीत्वादिप्रकारकप्रतीतिपरत्वज्ञाने तन्निर्वाहार्थं सा, तदिदमुक्तं पत्नीपरत्वावगम इति, ब्राह्मण्याविति तु स्त्रीपुंसलक्षणायामसाध्विति भावः। यत्तु ब्राह्मण्यां न ब्राह्मणत्वं, विशुद्धमातापित्रोर्निजपुंस्त्वस्यैव तद्बीजत्वात्, अन्यथा तद्वधे प्रायश्चित्तह्रासो न श्रूयेतेति। तन्न। पुंस्त्वस्य गुरुत्वात्, प्रायश्चित्तभेदस्य चापकृष्टब्राह्मणवधइवान्यथाप्युपपत्तेरिति। नन्वेवं स्त्रीपुंसयोः पदार्थत्वे विभक्त्यर्थपुंस्त्वान्वयो न स्याद् उभयस्य पुंस्त्वाभावादित्यत आह। (७०) पुल्लिङ्गं त्विति। (७१) अनूद्यते। ब्राह्मणपदेनाप्युक्तत्वाद् विभक्त्येति शेषः। न च पदार्थैकदेशेनान्वये व्युत्पत्तिविरोधः। योग्यतावशेन चैत्रस्य नप्तेत्यत्रेव तथाप्यन्वयाविरोधाद् ध्रुवपदादिव प्रातिस्विकरूपेण पुंस उपस्थितेरितरपारतन्त्र्याभावादन्वयाविरोध इत्यन्ये। (७२) यदि चेति। तन्मतइति शेषः। एवं वक्रदण्डश्च कुटिलदण्डश्च वक्रदण्डावित्यत्रापि न लक्षणा; वक्रस्य कुटिलपर्यायत्वेन तन्त्रवृत्त्योपस्थितिसंभवात्। ननु ब्राह्मण्यपि तत्पदबोध्येत्यरुचेराह। (७३) लिङ्गानुरोधादिति। (७४) शिवपदेनेति। देवतात्वादिनेति शेषः। (७५) भ्रातृपदेनेति। सोदरत्वेनेति शेषः (७६) पुत्रपदेनेति। अपत्यत्वेनेति शेषः। (७७) वाक्यभेदेति। क्षौमपुमन्तरयोरुभयोर्विधेयतायां वाक्यभेदापत्तेरिति भावः। उत्पत्तिवाक्यश्रुतैककर्तृकत्वबाधापत्तेरित्यपि बोध्यम्। (७८) नामार्थगतमिति। ननु ब्राह्मणावित्यत्रेव स्त्रीपुंसयोर्नामार्थत्वात्पुंस्त्वं नामार्थैकदेशगतमेव। न चात्र पत्न्याः सहत्वेनान्वयात् पुंमात्रस्यैव प्राधान्येन क्रियान्वयात्पुमानेव नामार्थ इति वाच्यम्। तथा सति वसानाविति द्विवचनानुपपत्तेरिति। अत्राहुः। नामार्थगतम्, उत्पत्तिवाक्ये नामार्थतया प्राप्तं, न तु नामार्थैकदेशगतं, न तु नामार्थैकदेशतया प्राप्तमित्यर्थः। सपत्नीको ऽग्नीनादध्यादिति विधौ पत्नीसहितस्य पुंस एव नामार्थत्वात्, स्वर्गकामो यजेतेत्यत्र प्रधानविधौ स्वर्गकामपदान्नामार्थतया प्राप्तम्। अत्रैकदेश एवानूद्यतइत्यन्ये, ब्राह्मणावित्यत्र तु न तथा, संपूज्य द्विजदम्पत्यमित्यत्र पूजयेद् द्विजदम्पती इत्युत्पत्तिविधौ च स्त्रीपुंसयोरेव प्रातिस्विकरूपेण नामार्थत्वश्रवणात्। तथा चात्रोभयोरेव नामार्थत्वादेकगतमेवानूद्यतइति न द्विवचनानुपपत्तिः। न चैवं तुल्यवदुभयोरन्वयात् स्त्रियाः क्षौमपरिधानवदग्न्याधानमपि स्यात्, अन्यथा सुबन्ततिङन्तयोः सामानाधिकरण्यानुपपत्तेः, स्याच्च रथकारादिवद्विद्याप्रयुक्तिकल्पनमिति वाच्यम्। अनुमत्यादिना द्वारापि तत्कर्तृत्वोपपत्तेरिति दिक्॥

॥ अथ वेदान्तकौस्तुभप्रभायाः ॥

॥ द्वितीयाध्यायस्य ॥

॥ द्वितीयपादारम्भः ॥

सांख्यतार्किकबौद्धैश्च जैनैः पाशुपतादिभिः ।
दुर्विज्ञेयं गुरुं कृष्णं निम्बार्कं समुपाश्रये ॥ २ ॥

एवं परोद्भावितदूषणपरिहारपूर्वकं परब्रह्मणो विश्वजन्मादिकारणत्वमुक्तम् ।

इदानीं परपक्षान् निराकर्तुं परः पादः प्रवर्त्यते । अन्यथा परतन्त्रप्रज्ञाः प्राणिनस्तेषां परपक्षाणां प्रामाणिकत्वशङ्कया तेष्वेवावलम्बेरन्, न तु वैदिकपक्षमाद्रियेरन् ।

पूर्वं तु"ईक्षतेर्नाशब्दं", "कामाच्च नानुमानापेक्षा", "एतेन सर्वे व्याख्याता व्याख्याता"इत्यादिना तदुदाहृतवैदिकवाक्यानामतत्परत्वमुक्तम् ।

इह तु वाक्यान्यनपेक्ष्य स्वातन्त्र्येण तद्युक्तयः प्रतिषिध्यन्त इति न पुनरुक्तिः ।

तत्र सांख्या मन्यन्ते । त्रिगुणमचेतनं प्रधानं जगत्कारणम् । तस्य सत्त्वे पञ्च हेतूनाहुः । तथाहि,

"भेदानां परिमाणात् समन्वयाच्छक्तितः प्रवृत्तेश्च ।
कारणकार्यविभागादविभागाद्वैश्वरूप्यस्य ॥

इति ।

विश्वरूपमेव वैश्वरूप्यं, विचित्रसंनिवेशं जगत्, तस्य । ये च परिमितास्ते सामान्यकारणपूर्वकाः । यथा घटादयः । एवं परिमिता महदादिपृथिव्यन्ता भेदाः । तेषामेकं देशकालापरिमितं गुणत्रयसामान्यं कारणमस्ति । ये च यदन्विता दृश्यन्ते, ते तदेककारणपूर्वकाः । यथा मृदन्विताः शरावादयस्तत्पूर्वकाः । तथा सुखदुःखमोहान्विता बाह्याध्यात्मिका भेदाः सुखदुःखमोहात्मकसामान्यकारणपूर्वकाः । सुखदुःखमोहात्मकानि सत्त्वरजस्तमांसि, तत्पूर्वका भवितुमर्हन्ति ।

तथा घटादिकार्याणां कारणशक्तितः प्रवृत्तिवन्महदादिकार्याणामपि कारणशक्तितः प्रवृत्तिर्वाच्या । तच्छक्तिमत् कारणमव्यक्तम् ।

किंच । कारणात् कार्यस्य विभागो जन्म, अविभागो लयश्च तत्र दृश्यते । एतौ विभागाविभागौ वैश्वरूप्यस्य विचित्रसंनिवेशस्य जगतो दृश्यमानौ क्वचित् कारणे विश्रान्तौ । विभागत्वात् अविभागत्वाच्च । मृदि घटविभागाविभागवत् । इति त्रिगुणस्य जगतो गुणत्रयसाम्यरूपप्रधानादुत्पत्तिस्तस्मिन्नेव लयश्चेत्यनुमीयते । इति प्राप्ते तत्राहुः ॥

॥ रचनानुपपत्तेश्च नानुमानम् ॥ १ ॥

जगद्धेतुतयानुमीयत इत्यनुमानं प्रधानं न जगत्कारणम् । कुतः । रचनानुपपत्तेः । तत्स्वभावाभिज्ञचेतनानधिष्ठितं प्रधानं न विचित्रजगद्रचनासमर्थम् । अचेतनत्वात् । रथप्रासादादिरचनाहेतुभूतकेवलदार्वादिवदिति । चशब्देनान्वयानुपपत्तिः समुच्चीयते । नहि बाह्या रूपादयः सुखदुःखमोहिता अवभासन्ते । सुखादीनां चित्तधर्मत्वेन प्रतिपुरुषमन्तरेव संपद्यमानत्वात् । न बाह्यार्थाकारतयानुगताः सुखादयः संपद्यन्ते चेतनस्य । आत्मीयवासनानुसारेण बाह्यविषयनिमित्तास्तूत्पद्यन्त इति । सत्त्वादेश्चान्वितस्य द्रव्यगुणत्वेन शौक्ल्यादेरिवोपादानकारणत्वासंभवात् । न च सत्त्वादीन्यपि द्रव्याणि । तेषां द्रव्यगुणतया प्रसिद्धेः । शक्तितः प्रवृत्तेरित्यादिहेतवस्तु ब्रह्मण्युपपद्यन्ते । तस्याप्यपरिमितत्वात् । जगतस्तदधीनस्थितिप्रवृत्तित्वाज्जगदुत्पत्तिलयवत्त्वादिति ॥ १ ॥

॥ प्रवृत्तेश्च ॥ २ ॥

अनुपपत्तेरिति वर्तते । अचेतनस्य प्रधानस्य स्वतः प्रवृत्त्यनुपपत्तेश्च न कारणं तत् । मृदादीनां रथादीनां वा चेतनाधिष्ठितानामेव स्वकार्येषु प्रवृत्तिदर्शनात् ॥ २ ॥

॥ पयोऽम्बुवच्चेत् तत्रापि ॥ ३ ॥

ननु पयो यथा चेतनानधिष्ठितमेव दध्यात्मना स्वतः परिणममानं दृश्यते, वत्सविवृद्धये प्रवर्तते च । अम्बु च जलधरविमुक्तमेकरसं जम्बीराम्रनारिकेलादिविचित्ररसरूपेण स्वतः परिणमते, स्यन्दते च लोकानुग्रहाय । तथा प्रधानमपीति चेत् । तत् परिहरति, तत्रापीति । क्षीरादावपि चेतनानधिष्ठिते प्रवृत्त्यनुपपत्तेः । तयोश्चेतनाधिष्ठितत्वं चान्तर्यामिब्राह्मणे, "योऽप्सु तिष्ठ"न्नित्यादिश्रुतिसिद्धम् । वत्सवृद्धये च धेनुः पयः प्रवर्तयति, द्रवत्वाच्च वत्सचूषणेन क्षरति । अम्बु च चेतनाधिष्ठितमेव निम्नदेशापेक्षया द्रवत्वात् स्यन्दते ॥ ३ ॥

॥ व्यतिरेकानवस्थितेश्चानपेक्षत्वात् ॥ ४ ॥

प्रधानव्यतिरिक्तस्य प्रवर्तकस्य निवर्तकस्य वा हेत्वन्तरस्य सृष्टेःप्रागनवस्थितेरवस्थित्यभावात् प्रधानस्य स्वतः प्रवृत्तिः। सा च नित्या स्यात् । अनपेक्षत्वात् । ततश्च सर्वदा सृष्टिरेव स्यात् । पुरुषसंनिधिरूपहेत्वन्तरस्वीकारेणापेक्षणादपि न केवलं प्रधानं परिणामकर्तृ ॥ ४ ॥

॥ अन्यत्राभावाच्च न तृणादिवत् ॥ ५ ॥

न च यथा धेन्वाद्युपभुक्तं तृणोदकपल्लवादि स्वयमेव क्षीराद्याकारेण परिणमते, तद्वत् प्रकृतिरपि महदाद्याकारेण परिणमत इति वक्तुं शक्यम् । अन्यत्राभावात् । अन्यत्रानडुदाद्युपभुक्तेषु तेषु क्षीराकारेण परिणामाभावात् । अतः प्राज्ञाधिष्ठितमेव तृणादि क्षीरं भवति, तथा प्रधानमपि ॥ ५ ॥

॥ अभ्युपगमेऽप्यर्थाभावात् ॥ ६ ॥

एवं तावत् प्रधानस्य स्वतः प्रवृत्तिर्नास्ति, जडत्वादित्युक्तम्। सा चेत् तव हर्षायास्माभिरभ्युपगम्येत, तथापि तया न किंचित् प्रयोजनं सिध्यति।

तथाहि, प्रधानप्रवृत्तेः किं प्रयोजनम्। भोगो वापवर्गो वोभयं वेति। आद्ये प्रधानस्याचेतनत्वात् पुरुषभोगार्था सेति चेत्। प्रवृत्तेः प्राक् चैतन्यमात्रवपुषो निर्विकारस्य निष्क्रियस्य पुरुषस्य प्रकृतिदर्शनरूपभोगासंभवात्। संनिधिमात्रं भोगहेतुरिति चेत्। संनिधेर्नित्यत्वात् संततद्भोगप्रसङ्गादनिर्मोक्षप्रसङ्गः।

द्वितीये प्रवृत्तेः प्रागप्यपवर्गस्य सिद्धत्वादनर्थिका सा।

तृतीये भोक्तव्यानामानन्त्यादनिर्मोक्षप्रसङ्ग एवेति ॥ ६ ॥

॥ पुरुषाश्मवदिति चेत् तथापि ॥ ७ ॥

ननु यथा पङ्गुपुरुषोऽन्यपुरुषमधिष्ठाय प्रवर्तयति, अश्मा वायस्कान्तोऽयः प्रवर्तयति, एवं पुरुषः प्रधानं प्रवर्तयिष्यतीति चेत्। तत्रोच्यते। तथापीति। तेनापि प्रकारेण नैव दोषान्निर्मोक्षः। त्वया पुरुषस्य निष्क्रियत्वाभ्युपगमेन प्रवर्तकत्वासंभवात्। तदभ्युपगमे च स्वसिद्धान्तविरोधः। पङ्गुर्हि वागादिभिरन्धं प्रवर्तयति। अयस्कान्तश्च सामीप्यात्। तव पुरुषस्य तु निष्क्रियनिर्गुणत्वाच कश्चित् प्रवर्तनव्यापारोऽस्ति। संनिधिमात्रेण प्रवर्तकत्वे प्रलयाभावोऽपवर्गाभावश्च। संनिधेर्नित्यत्वादित्युक्तमेव ॥ ७ ॥

॥ अङ्गित्वानुपपत्तेश्च ॥ ८ ॥

इतश्च प्रधानस्याप्रवृत्तेः। प्रलये सत्त्वादीनां साम्येनावस्थितानां स्वरूपनाशभयात् परस्परं प्रत्यङ्गाङ्गिभावानुपपत्तेः। बाह्यस्य च कस्यचिद्वैषम्यहेतोरभावात्।

"प्रकृतिं पुरुषं चैव प्रविश्याशु महेश्वरः।
क्षोभयामास योगेन परेण परमेश्वरः" ॥

इत्युक्तौ चेश्वराभ्युपगमेन वेदान्तवाद एवेति नात्र नो विवादः। "सदेवे"ति श्रुतेः ॥ ८ ॥

॥ अन्यथानुमितौ च ज्ञशक्तिवियोगात् ॥ ९ ॥

नन्वन्यथा दूषितप्रकारभिन्नप्रकारान्तरेण गुणाननुमास्यामहे।

तथाहि, चलं गुणवृत्तमित्यभ्युपगमात् साम्यावस्थिता अपि गुणा यथाकार्यं वैषम्योपगमयोग्या एवेति चेत्। एवमपीदमहमेव करिष्यामीति प्रधानस्य ज्ञातृत्वशक्तिवियोगात् पूर्वोक्ता रचनानुपपत्त्यादयो दोषा दुष्परिहरा एव। वैषम्योपगमयोग्यत्वेऽपि तेषां साम्यावस्थायां वैषम्यहेतोरभावेन वैषम्यासंभवः। हेत्वभावेऽपि वैषम्यभाजश्चेत्। सर्वदा वैषम्यं स्यादिति ॥ ९ ॥

॥ विप्रतिषेधाच्चासमञ्जसम् ॥ १० ॥

पूर्वापरविरोधाच्चासमञ्जसं कापिलमतम्। तथाहि, एवं ते वदन्ति। प्रकृतिः परार्था दृश्या भोग्या, पुरुषस्तु तस्या द्रष्टा भोक्ताधिष्ठाता साक्षी चेति। सा च तस्य भोगापवर्गार्थतया प्रयोजनवती। तयैव साधनभूतया स भोगमपवर्गं च लभत इति च। स च नित्यनिर्विकारचैतन्यमात्रस्वरूपो न द्रष्टा, न भोक्ता, न कर्तेति। अत एव न स बध्यते, न मोक्षार्थं यतते, न मुच्यते, इति च। पुरुषसंनिधानमात्रेण पुरुषस्य चैतन्यं स्वस्याम्, स्वस्याश्च कर्तृत्वं पुरुषे, चानुसंधायाचेतना प्रकृतिरेव बध्यते, मोक्षार्थं यतते, मुच्यते चेति। पुरुषस्यानुपकारिणो भोगापवर्गरूपप्रयोजनं साधयन्ती प्रकृतिरुपकारिणीति च वदन्ति। अध्यासस्वरूपबन्धादयः पुरुषस्यानुपकारिणः। कस्तस्योपकार इत्येवमाद्यनेके विप्रतिषेधास्तत्स्मृतौ द्रष्टव्याः ॥ १० ॥

अथ परमाणुकारणवादं निराकरोति तथा चायं तेषां सिद्धान्तः। पार्थिवाप्यतैजसवायवीयभेदाच्चतुर्विधाः परमाणवः। ते च नित्या निरवयवा रूपादिमन्तः पारिमाण्डल्यपरिमाणाः प्रलयेऽनारब्धकार्या अवतिष्ठन्ते। सर्वत्र त्रिभ्यः कारणेभ्यः समवाय्यसमवायिनिमित्ताख्येभ्यः कार्यनिष्पत्तिः। यथा पटरूपकार्यस्य तन्तवः समवायि कारणम्। तन्तुसंयोगोऽसमवायि कारणम्। तुरीवेमकुविन्दादि निमित्तकारणम्। तत्रेश्वरेच्छावशेनाद्यं कर्म वायवीयेषु परमाणुषूत्पद्यते, ततः संयोगः, तेन द्वाभ्यां परमाणुभ्यां द्व्यणुकं ह्रस्वमुत्पद्यते, त्रिभिर्द्व्यणुकैस्त्र्यणुकं महदुत्पद्यते, चतुर्भिस्त्र्यणुकैश्चतुरणुकम्। इत्येवं क्रमेण महान् वायुरुत्पद्यते। एवं तैजसपरमाणुभ्यो महानग्निः। आप्येभ्यो महान् जलधिः। पार्थिवेभ्यो महती पृथिव्युत्पद्यते। कारणगुणेभ्यश्च कार्ये गुणान्तरमुत्पद्यते। यथा परमाणुगतशुक्लादिभ्यो द्व्यणुकशुक्लादिः। तद्गतद्वित्वसंख्यातश्च द्व्यणुके ह्रस्वत्वाणुत्वे परिमाणे चोत्पद्येते। परमाणुपरिमाणरूपपरिमाण्डल्यं तु न द्व्यणुके पारिमाण्डल्यान्तरमारभते। ततोऽप्यतिसौक्ष्म्यापत्तेः। द्व्यणुगतत्रित्वसंख्यातस्त्र्यणुके महत्त्वदीर्घत्वपरिमाणे चोत्पद्येते। द्व्यणुकगतह्रस्वत्वाणुत्वे तु महत्त्वादेर्नारम्भके प्रथिमानुपपत्तेः। संहारे चेश्वरेच्छया परमाणुषु कर्म, तेन संयोगनाशस्तेन द्व्यणुकनाश इत्येवं क्रमेण पृथिव्यादिनाश इति। तस्याप्यसामञ्जस्यं प्रतिपाद्यते॥

॥ महद्दीर्घवद्वा ह्रस्वपरिमण्डलाभ्याम् ॥ ११ ॥

पूर्वतोऽसमञ्जसमिति वर्तते। वेति चार्थे। अनुक्रमाणुह्रस्ववदिति समुच्चिनोति। ह्रस्वपरिमण्डलाभ्यां द्व्यणुकपरमा-

गुभ्यां महद्दीर्घवत् । त्र्यणुकोत्पत्तिवादवत् । अणुह्रस्ववत् । द्व्यणुकोत्पत्तिवादवच्चान्यदपि कणादसमञ्जसमिति ।

तथाहि, तन्त्वाद्यवयवानां स्वांशैः षड्भिः पार्श्वैः संपूज्यमानामेव पटाद्यवयवकव्युत्पादकत्वदर्शनात् परमाणवोऽपि सावयवा एव द्व्यणुकाद्युत्पादकाः स्युः । अन्यथा परमाणुसहस्रस्यापि संयोगे पारिमाण्डल्यानतिरिक्तपरिमाणतयाणुत्वह्रस्वत्वमहत्त्वाद्यसिद्धिर्भवेत् । कारणबहुत्वेन कार्यमहत्त्वोत्पत्तेश्च कल्पनामात्रत्वात् । तेषां सावयवत्वाङ्गीकारे चानवस्था ॥ ११ ॥

किमत्रान्यदसमञ्जसम् । तत्राह ॥

॥ उभयथापि न कर्मातस्तदभावः ॥ १२ ॥

आद्यकर्मोत्पत्तिरनुपपन्ना । प्रलये यत्नाभिघातादीनां कर्महेतूनामभावात् । शरीरप्रविष्टे हि मनस्यात्मनः संयोगे सत्यात्मगुणस्य प्रयत्नस्य जायमानत्वात् । तदा च शरीराभावात् स न संभवति । ईश्वरेच्छायाश्च नित्यत्वेन नित्यं तत्प्रसङ्गः स्यात् ।

न चादृष्टस्यात्र हेतुत्वं कल्प्यत इति वाच्यम् । विकल्पासहत्वात् ।

तथाहि, परमाणुगतमाद्यं कर्म स्वगतादृष्टप्रयुक्तम्, आत्मगतादृष्टप्रयुक्तं वा

नाद्यः । अदृष्टस्यात्मासाधारणकर्मविशेषस्य परमाणुवृत्तित्वासंभवात् । अनभ्युपगमाच्च । अभ्युपगमे च सदोत्पादकत्वप्रसङ्गादपसिद्धान्तापत्तेश्च । अदृष्टस्याचेतनत्वेन प्रवर्तकत्वासंभवाच्च ।

न द्वितीयः । तस्यात्मगतत्वेऽपि तदात्मनां चैतन्याभावेन कार्योत्पादनयोग्यतासंभवात् । अन्यथा प्रलयाभावप्रसङ्गो दुर्वारः । तदेवं नियतस्य कस्यचित् कर्महेतोरभावान्न कर्मोत्पत्तिः । तदभावाच्च न संयोगः ।

नापि विभागः । तथात्वे च सर्गप्रलययोरभाव एव स्यात् ।

अथायुतसिद्धानामाधाराधेयभूतानामिह प्रत्ययहेतुः समवायः । यथेह तन्तुषु पटः, गवि गोत्वं, पटे शुक्लादि रूपमिति कार्यकारणयोः सामान्यविशेषयोर्गुणगुणिनोश्च संबन्धः समवाय एव, स चैको नित्यः सर्वगतो व्योमवदिष्यते । अयुतसिद्धानां तु संयोगः संबन्धः । यथा पृथक् सिद्धयो रज्जुघटयोः । इत्यपि तत्सिद्धान्तः ॥ १२ ॥

तत्र समवायसंबन्धं निराकरोति ॥

॥ समवायाभ्युपगमाच्च साम्यादनवस्थितेः ॥ १३ ॥

तदभाव इत्यनुवर्तते । कार्यकारणयोः समवायाभ्युपगमाच्च प्रकृतकणभुक्प्रक्रियाभावः । कुतः । साम्यात् । समवायस्यापि संबन्धिसाम्यात् । तथाहि, यथा द्व्यणुकं समवायसंबन्धेन स्वकारणे समवैति । अत्यन्तभिन्नत्वात् । तथा स समवायोऽपि समवायिभ्यां समवायसंबन्धान्तरेण संबध्येत । अत्यन्तभेदसाम्यात् । सोऽपि संबन्धान्तरेणेत्यनवस्थानात् । अतो न समवायाभ्युपगमः प्रामाणिकः ।

न च समवायस्य स्वयं संबन्धरूपत्वान्न संबन्धान्तरापेक्षेति वाच्यम् । संयोगस्यापि संबन्धरूपत्वसाम्येन समवायापेक्षत्वापत्तेः । तथात्वे च संयोगस्य संयोगिभ्यां संबन्धः समवायपूर्वक इति प्रतिज्ञाभङ्गापत्तेः ।

न च संयोगो गुणत्वात् समवायमपेक्षत इति वाच्यम् । पारिभाषिकमात्रत्वात् । समवायस्यापि गुणत्वं वक्तुं शक्यते ।

न च कार्यकारणयोरयुतसिद्धत्वम् । कारणस्य पूर्वसिद्धत्वात्, कार्यस्योत्तरकालिकत्वात् । तथात्वेऽपृथक्सिद्धत्वासंभवात् ।

न चान्यतरापेक्षत्वमयुतसिद्धत्वमिति वाच्यम् । तथापि द्वयोः सतोः संबन्ध इति कृत्वोत्पन्नं कार्यं क्षणमात्रं पृथगवस्थाय समवायेन संबन्ध्यत इति दूषणस्य तादवस्थ्यात् ।

अथोत्पत्तिरेव समवाय इत्यप्ययुक्तम् । तथात्वे समवायस्य नित्यत्वासंभवात् । उत्पत्तिनित्यत्वयोरत्यन्तविरोधात् । उत्पत्तेर्नित्यत्वाङ्गीकारे कार्यत्वावच्छिन्नस्य नित्यत्वापत्तेः । कारकव्यापारानर्थक्याच्च ।

तस्मात् तादात्म्यलक्षण एव संबन्धो न समवायकृत इति ॥ १३ ॥

॥ नित्यमेव च भावात् ॥ १४ ॥

परमाणूनां प्रवृत्तिस्वभावत्वे प्रवृत्तेर्भावान्नित्यसृष्टिप्रसङ्ग इत्यक्षरार्थः ।

अयमभिप्रायः । परमाणवः प्रवृत्तिस्वभावाः, निवृत्तिस्वभावाः, उभयशीलाः, अनुभयशीला वा ।

आद्ये सृष्टेर्नित्यत्वं, प्रलयाभावश्च ।

द्वितीये सर्वाभावो, नित्यप्रलयप्रसक्तिश्च ।

न तृतीयचतुर्थौ । उभयस्वभावत्वस्येतरेतरविरोधात् सर्वथानुपपत्तेरिति ॥ १४ ॥

॥ रूपादिमत्त्वाच्च विपर्ययो दर्शनात् ॥ १५ ॥

परमाणवो रूपादिगुणवन्तो, न वा ।

आद्ये रूपादिमत्त्वाच्च परमाणूनां नित्यत्वविपर्ययोऽनित्यत्वं स्यात् । रूपादिमतां घटादीनामनित्यत्वदर्शनात् । परमाणवोऽनित्याः । रूपादिमद्द्रव्यत्वात् । घटादिवत् । इति प्रयोगात् ।

द्वितीये सिद्धान्तभङ्गात् । कार्यस्यापि रूपादिशून्यत्वापत्तेश्च ।

अथ रूपादिर्नश्येत । कार्यरूपादिमन्तोऽनित्याश्चेति तव वचनात् ॥ १५ ॥

॥ उभयथा च दोषात् ॥ १६ ॥

परमाणूनामुपचितगुणवत्त्वाङ्गीकारे सर्वेषां तुल्यत्वापत्तेरप्स्वपि गन्ध उपलभ्येत, तेजसि गन्धरसौ, वायौ, रूपरसगन्धाश्च । तेषां स्थौल्यहेतुत्वात् परमाणूनामपि स्थूलत्वापत्त्याऽपरमाणुत्वप्रसङ्गात् । अपचितगुणवत्त्वे च सर्वेषामेकैको गुणः स्यात् । तथात्वे च तेजसि स्पर्शः पृथिव्यां रूपस्पर्शरसा न स्युः । कारणगुणपूर्वकत्वात् कार्यगुणानाम् । इत्युभयथापि दोषादिति सूत्रार्थः ।

ननु केचिदपचितगुणाः, केचिदुपचितगुणाः, इति विचित्रत्वाङ्गीकार इति चेन्न । तथाप्युपचितगुणानां परमाणुत्वहानिप्रसङ्गात् । दृश्यादृश्यत्वादिमूर्तामूर्तताद्यवान्तरविचित्रताया गुणोपचयनिबन्धनत्वात् । चतुर्विधपरमाणूनां स्वतो भेदात् । सिद्धान्ते तु महाभूतवृत्तिगुणानां नियमश्रुतिसिद्धत्वेन दोषाभावादिति भावः । "शब्दस्पर्शरूपरसगन्धाः पृथिव्या गुणाः । तेषु गन्धहीनाश्चत्वारोऽपां गुणाः । तेषु रसहीनास्त्रयो गुणा अग्नेः । शब्दस्पर्शाविति वायोः । शब्द एक आकाशस्य," इति लौकिकोपनिषच्छ्रुतेः ।

"आकाशवायुतेजांसि सलिलं पृथिवी तथा ।
शब्दादिभिर्गुणैर्ब्रह्मन् संयुक्तान्युत्तरोत्तरैः ॥

इति विष्णुपुराणोक्तेश्च । सर्वज्ञसर्वशक्तिब्रह्माधिष्ठितत्वाच्च महाभूतादिप्रपञ्चस्येत्यलं प्रासङ्गिकेन ॥ १६ ॥

॥ अपरिग्रहाच्चात्यन्तमनपेक्षा ॥ १७ ॥

प्रधानकारणवादस्य कश्चित् सत्कार्यवादांशो मन्वादिभिरौपनिषदैर्गृहीतः । असत्कार्यवादस्य वैशेषिकादिपरिकल्पितपरमाणुकारणवादस्य च केनाप्यंशेनापरिग्रहादत्यन्तमनपेक्षा । अतिशयेनादरणीयोऽयं पक्षः श्रेयोऽर्थिभिरिति सूत्रकृतोऽभिप्रायः ॥ १७ ॥

बौद्धसिद्धान्तस्याप्यसत्कार्यवादिवैशेषिकसिद्धान्तसादृश्यात् तदनन्तरं तन्निरासायाह ॥

॥ समुदाय उभयहेतुकेऽपि तदप्राप्तिः ॥ १८ ॥

बौद्धसिद्धान्तग्राहिणो हि चत्वारः । तत्र बाह्यार्थास्तित्ववादिनौ वैभाषिकसौत्रान्तिकौ । तयोरपि बाह्यार्थप्रत्यक्षवादी, आद्यः । विज्ञानानुमेयबाह्यार्थवादी द्वितीयः । निरालम्बनविज्ञानास्तित्ववादी योगाचारस्तृतीयः । त्रयोऽप्येते स्वाभ्युपगतं वस्तु क्षणिकं वदन्ति । सर्वशून्यवादी माध्यमिकः । स चासंस्कारक्षयाद् ग्राह्यग्राहकाकारविमुक्ता संवित्संततिर्निर्वातस्थदीपवत् क्षणपरंपरयावतिष्ठते । संस्कारक्षयेऽस्य प्रदीपवदेव निर्बाणवच्छान्तिः । सेयमभावप्राप्तिरपवर्ग इति मन्यते ।

अन्ये तु संतत्यविच्छेदमिच्छन्ति । तत्र बाह्यार्थास्तित्ववादिमतं भूतभौतिकचितिचैतन्यभेदेन समुदायद्वयम् । तथाहि, रूपविज्ञानवेदनासंज्ञासंस्काराख्याः पञ्च स्कन्धाः । तत्र रूपस्कन्धो नाम पृथिव्यादीनि चत्वारि भूतानि, भौतिकं च शरीरेन्द्रियविषयरूपम् । तत्र रूपरसगन्धस्पर्शाः खरस्वभावाः पार्थिवाः परमाणवः पृथिवीरूपेण संहताः पृथिवीव्यापारायावतिष्ठन्ते । रूपरसस्पर्शाः स्नेहस्वभावा आप्याः परमाणवः सलिलात्मना संहन्यन्ते । रूपस्पर्शा उष्णस्वभावास्तैजसास्तेजोरूपेण संहताः । तथा स्पर्शा ईरणस्वभावा वायवीया वायुरूपेण संहन्यन्ते । पृथिव्यादिचतुष्टयं च शरीरेन्द्रियविषयरूपेण संहन्यते । इत्येवमेते चतुर्विधाः क्षणिकाः परमाणवो भूतभौतिकसंघातहेतुत्वं प्रतिपद्यन्ते । सोऽयं परमाणुहेतुको भूतभौतिकरूपो रूपस्कन्धो बाह्यसमुदायः ।

विज्ञानस्कन्धो नामाभ्यन्तरोऽहंप्रत्ययसमारूढो घटज्ञानं पटज्ञानमित्येवमविच्छेदेन वर्तमानो विज्ञानसंतानः । अयमेव कर्ता भोक्ता चात्मा, नान्यो नित्योऽस्तीति ।

वेदनास्कन्धश्च सुखवेदना दुःखवेदना च ।

संज्ञास्कन्धो नामोपलक्षणप्रत्ययो, यथा स्वस्तिमती गौरिति, स्वस्तिमत्तया गौरुपलक्ष्यते । ध्वजेन गृहं, दण्डेन पुरुष इति ।

संस्कारस्कन्धो नाम रागद्वेषमोहमदमात्सर्यभयशोकविषादादयश्चैतसा धर्माः । ते चामी चतुर्विधाः स्कन्धाश्चित्तचैत्तिका उच्यन्ते । सर्वव्यवहारास्पदभावेनान्तः संहन्यन्ते । सोऽयं विज्ञानादिचतुःस्कन्धहेतुक आन्तरः समुदायः । सर्वं वस्तुजातं समुदायद्वयरूपम् । यदतोऽन्यत् तत् सर्वमवस्तु । कालाकाशादि । तावेतौ लोकयात्रामावहतः । सिद्धे च लोकव्यवहारे नित्येनात्मना नास्ति प्रयोजनमिति मन्यन्ते ।

तत्रेदमभिधीयते । उभयहेतुकेऽपि समुदायेऽभ्युपगम्यमाने तदप्राप्तिः । समुदायासंभवः ।

न तावत् स्वतः समुदायापत्तिः । समुदायिनामचेतनत्वात् । क्षणिकत्वाच्च ।

नाप्यन्यतः । नित्यस्य भोक्तुः प्रशासितुः संहन्तुश्चेतनस्यानभ्युपगमात् ।

समुदायासिद्धौ स्थूलाभावेन व्यवहारो न सिध्येत् । परमाणूनां क्षणध्वंसित्वादतीन्द्रियत्वाच्च तैर्व्यवहारोऽस्तीति लुप्येत लोकयात्रा ॥ १८ ॥

इतरेतरप्रत्ययत्वादुपपन्नमिति चेन्न
संघातभावानिमित्तत्वात्[1] ॥ १९ ॥

१ व्याख्यान्तरेषु—चोत्पत्तिमात्रनिमित्तत्वात् इति पा० ।

कार्यं प्रत्ययते गच्छतीति व्युत्पत्तेः प्रत्ययशब्दो हेतुवाची ।

नन्वितरेतरहेतुत्वादुपपन्नमस्मद्दर्शनम् । तथाहि, योऽयं विज्ञानस्कन्धोऽहंप्रत्ययसमारूढः संततिरूपेण वर्तते, तस्याविद्यादयोऽनादिकालप्रवृत्ता हेतवः । स च तेषामिति ।

अविद्या नाम विपरीतबुद्धिः, अस्थिरे स्थिरदृष्टिरमार्गे मार्गदृष्टिरिति, तया रागद्वेषादिलक्षणं संस्कारस्कन्धो यस्य, ते । ततः पुण्यापुण्यकर्मलक्षणा प्रवृत्तिः । ततो जन्म,शरीरग्रहणम् । ततः पञ्चबुद्धीन्द्रियमनोरूपं षडायतनम् । ततः षड् ज्ञानानीन्द्रियसमानि विषयेषु रूपादिषूत्पद्यन्ते ।

तदेवं प्रमातृप्रमाणप्रमेयव्यवहारसिद्धेः सर्वमुपपन्नमिति चेत् । तत् परिहरति नेति । कुतः । संघातभावानिमित्तत्वात् । न ह्यविद्यादीनां भूतभौतिकसंघातापत्तेर्निमित्तत्वमुपपद्यते । पूर्वपूर्वक्षणस्योत्तरोत्तरहेतुत्वेऽपि न संघातापत्तिहेतुत्वम् । विज्ञानस्य क्षणिकत्वात् । कर्मणोऽपि क्षणिकत्वादुत्पत्तिनिरोधमात्रं सर्वत्र भवेत् । न संघातापत्तौ सामर्थ्यं शक्यं कल्पयितुम् । प्रमाणाभावात् ॥ १९ ॥

उत्तरोत्पादे च पूर्वनिरोधात् ॥ २० ॥

एवं पूर्वक्षणस्योत्तरहेतुत्वमभ्युपगम्यापि संघातानुपपत्तिरित्युक्तम् ।

अथेदानीं हेतुत्वस्याप्यसंभव उपपद्यते । उत्तरक्षणस्योत्पत्तिवेलायां पूर्वक्षणस्य निरोधात्, विनष्टत्वात्, उत्तरक्षणं प्रति हेतुत्वानुपपत्तिरेव ।

तथाहि, पूर्वस्तावद् घटक्षणः । स किमुत्पन्नः सन्नुत्तरहेतुरनुत्पन्नो वा ।

नानुत्पन्नः । शशविषाणतुल्यत्वात् ।

नाप्युत्पन्नः । अभाववत् तुच्छत्वात् । उत्पन्नविनष्टस्यानुत्पन्नस्य चाभावत्वाविशेषात् ।

अभावस्य हेतुत्वे सर्वं सर्वत्र सर्वदोत्पद्येत । न तु पूर्वक्षणविनाश उत्तरक्षणोत्पत्तिश्च युगपद्भवेताम् । तुलान्तयोर्नामोन्नामवदिति चेत् । न । तत्र मध्ये सूत्रधारणादन्तयोश्च युगपदुपस्थितयोरेकस्य गुरुत्वान्नामः, तद्रहितस्योन्नाम इति ।

न चात्रोत्तरोत्पत्तिकाले पूर्वस्य स्थितिरिष्यते, येनासौ तद्धेतुत्वं प्रतिपद्येत । अवतिष्ठते चेत् । क्षणिकत्वहानिः ।

किंच,कारणधर्मानुविधायित्वमन्तरेणेदं कार्यमिदं कारणमिति कल्पनायामतिप्रसङ्गः । मृदन्विताः शरावादयो दृश्यन्ते, सुवर्णान्विताश्च कुण्डलादयः । न चाकारसमर्पणे सामर्थ्यम् । क्षणिकत्वात् ।

तस्मान्नित्यपक्ष एव कार्यकारणव्यवस्था युज्यते । प्रत्यक्षप्रत्यभिज्ञानाच्च कुम्भादीनां नित्यत्वम् ।

ननु च नित्यत्वेऽपि कार्यकारणभावो नोपपद्यते । क्रमयौगपद्याभ्यामर्थक्रियाविरोधात् ।

किं कुशूलस्थो व्रीहिरङ्कुरजननस्वभावोऽतत्स्वभावो वा ।

यद्यतत्स्वभावो, न कदाचिदपि जनयेत् ।

अथ तत्स्वभावः, तदानीमेवोत्पादयेत् । ततश्च यानि कर्माणि व्रीहिणा कर्तव्यानि तानि सर्वाणि युगपत् कुर्यात् ।

न च सामग्रीवशेनाङ्कुरं जनयेत् । अतत्स्वभावत्वे समग्र्या अकिंचित्करत्वात् ।

यच्चोक्तं, प्रत्यभिज्ञानाच्च नित्यत्वमिति । तदनैकान्तिकम् । प्रदीपज्वालादिष्वदर्शनात् ।

यदि च नित्यो भावः स्यात् । अन्ते विनाशदर्शनं न प्राप्नुयात् ।

अथ मुद्गरादिना घटस्य विनाशः क्रियत इति चेत् । तदयुक्तम् ।

तथाहि, विनाशः किं द्रव्यभिन्नोऽभिन्नो वा क्रियते ।

आद्ये घटस्य किमायातम् । तथा घटे कृते पटस्य न किंचिद्भवति, तथा विनाशोऽपि भिन्नः ।

द्वितीये घटस्वरूपमेव विनाशः, तच्च कुलालेन कृतमिति मुद्गरः किमपरं करोति ।

अथ मन्यसे घटस्य संबन्धी विनाशः क्रियत इति । तत्र कः संबन्धः । किं तादात्म्यलक्षणस्तदुत्पत्तिलक्षणो वा ।

आद्ये पूर्वोक्तमेव दूषणम् । तादात्म्यं तत्स्वभावता । सा च कुलालेन कृतेति ।

द्वितीये घटमुद्गराभ्यां विनाश उत्पाद्यत इति घटस्य न किंचिदिति ।

तस्मात् स्वाभाविको विनाश एष्टव्य इति ।

अत्रोच्यते । योऽयं विकल्पः कृतः स तवैव सिद्धान्तं बाधते । कथम् । विसदृशसंतानोत्पत्तिप्रतिनिरोधाय योऽयमन्त्यो घटक्षणोऽभिमतो यतः कपालोत्पत्तिरिष्यते, स सदृशसंतानजननस्वभावः । घटक्षणत्वात् । अतीतानन्तरघटक्षणवत् । इत्यसावेव विसदृशसंतानजननस्वभावोऽप्यभ्युपेयेत । अन्यथा कुम्भकारादारभ्य कपालपङ्क्तिरेव स्यात् । एवं सति मुद्गरेण घटक्षणवदित्यस्य स्वच्छा संतानजननस्वभावता विनाश्यते, विसदृशसंतानजननस्वभावता चोत्पाद्यत, इत्यवश्यमभ्युपगन्तव्यम् । अन्यथा कपालोत्पत्त्यसंभवात् ।

ततश्च भवता सहेतुकं विनाशमभ्युपगच्छता विकल्पः परित्यक्तः ।

यदि विकल्पोऽङ्गीक्रियते, तर्हि विसदृशसंतानस्त्यक्तव्य इति सिद्धहानिर्दृष्टविरोधश्च । तत्र यथा तव सदृशसंतान-

जननस्वभावविनाशो मुद्गरेण क्रियते, तथा ममापि घटविनाश एव क्रियत इति स्थितः सहेतुको विनाशः । प्रत्यभिज्ञानाच्च कालान्तरावस्थायित्वम् । ज्वालादिष्वपि सामान्यं समाश्रित्य प्रत्यभिज्ञावृद्धिह्रासदर्शनाद् व्यक्तीनामनित्यतैव ।

यद्यवस्थायिनी व्यक्तिः स्यात् । गृहदाहादिष्वपि सामान्यं समाश्रित्य प्रत्यभिज्ञाप्रसङ्ग इत्यव्यभिचारः प्रत्यभिज्ञायाः । नहि क्षणिकत्वं प्रत्यक्षमनुभूयते । प्रथमोत्पन्ने निर्विकल्पज्ञाने विशेषापरामर्शवत् ।

यच्चोक्तं, क्रमयौगपद्याभ्यामर्थक्रियाविरोधादिति ।

स समानो योऽसावन्त्यो व्रीहिक्षणो यस्मादङ्कुरोत्पत्तिरिष्यते, सोऽप्यङ्कुरजननस्वभावो न भवति । व्रीहिक्षणत्वात् । अनन्तरातीतव्रीहिक्षणवत् । नहि समानसंततावकस्मादिह क्षणान्तरोत्पत्तिसंभवः ।

अथ सहकारिवशादुत्पादक इति चेत् । ममापि तदविशिष्टमिति ।

किंच, विनाशोत्पादौ भावव्यतिरिक्तावव्यतिरिक्तौ वा ।

आद्ये भावस्य क्षणत्रयप्रसङ्गः । उत्पत्तिक्षणः स्थितिक्षणो, नाशक्षणश्चेति ।

द्वितीये तूत्पादविनाशयोरभावाद्भावो नित्यः स्यात् ।

किंच, विनाशो नामाभावः । स च किं भावस्य पूर्वभावी वा, सहभावी वा, पश्चाद्भावी वेति ।

आद्ये भावोत्पत्तिर्न स्यात् ।

द्वितीयेऽप्यविरोधाद्भावस्य शाश्वतत्वप्रसङ्गः ।

तृतीये सहेतुको विनाशः प्राप्नोतीति, विवेकः ॥ २० ॥

एवं क्षणिकवादिमते पूर्वक्षणस्य निरोधग्रस्तत्वाच्चोत्तरक्षणस्य हेतुत्वं संभवतीत्युक्तम् । अथासत उत्पत्तिर्निरस्यते ॥

॥ असति प्रतिज्ञोपरोधो यौगपद्यमन्यथा ॥ २१ ॥

असति हेतौ कार्यमुत्पद्यते चेत् । प्रतिज्ञाया उपरोधो हानिः स्यात् । चतुर्भ्यः कारणेभ्यः कार्योत्पत्तिरितीयं प्रतिज्ञा हीयेत । अधिपतिप्रत्ययः सहकारिप्रत्ययः समनन्तरप्रत्यय आलम्बनप्रत्ययश्चेति विज्ञानोत्पत्तौ कारणचतुष्टयमिति वः प्रतिज्ञा । तत्र चक्षुरादीन्द्रियमधिपतिप्रत्ययः । प्रकाशः सहकारिप्रत्ययः । मनस्कारः समनन्तरप्रत्ययः । घटादिरालम्बनप्रत्यय उच्यते । निर्हेतुकोत्पत्तौ च प्रतिबन्धाभावात् सर्वं सर्वत्रोत्पद्येत । अन्यथा हेतौ सत्येव कार्यं जायते चेत् । तर्हि द्वयोः कार्यकारणयोर्घटक्षणयोर्यौगपद्यं स्यात् । कार्योत्पत्तिकालं यावत् कारणस्यावस्थानात् क्षणवादहानिः । नहि विनष्टस्य पितुः पुत्रोत्पत्तौ सामर्थ्यं दृष्टम् ॥ २१ ॥

एवमाद्यसूत्राभ्यां समुदायं निरस्य द्वाभ्यां कार्यकारणभावक्षणिकत्वे च निरस्य संप्रति तदभिमतो द्विविधविनाशो निरस्यते ॥

॥ प्रतिसंख्याऽप्रतिसंख्यानिरोधाप्राप्तिरविच्छेदात् ॥ २२ ॥

मुद्गराभिघातादिहेतुकः सदृशसंतानावसानरूपः स्थूलो यो भावविनाशः स प्रतिसंख्यानिरोधः । सूक्ष्मः स्वाभाविको निर्हेतुकः सदृशसंतानः प्रतिक्षणभावी यो भावविनाशः सोऽप्रतिसंख्यानिरोधः । तयोरप्राप्तिरसंभवः । कुतः । अविच्छेदात् । उत्पत्तिविनाशधर्मभाविनो द्रव्यस्याविच्छेदात् ।

एतौ हि संतानगोचरौ स्याताम्, संतानिगोचरौ वा ।

नाद्यः । संतानेषु संतानिनामविच्छिन्नत्वेन संतानविच्छेदस्यासंभवात् । तस्यावस्तुत्वाभ्युपगमात् ।

न द्वितीयः । संतानिनां घटादीनां प्रत्यभिज्ञानाच्च सूक्ष्मो न स्थूलो विनाशः । त्वत्पक्षे विनाशस्य भावाव्यतिरेकाच्च हेतुना विनाशः क्रियते । यस्य व्यतिरिक्तो विनाशस्तस्य सहेतुको विनाशः ॥ २२ ॥

॥ उभयथा च दोषात् ॥ २३ ॥

अविद्यानिरोधस्तैर्मोक्षोऽभिमतः । स निरोधः सहेतुको निर्हेतुको वा विनाशः ।

आद्ये, अथ सत्यचतुष्टयाभ्यासान्मुक्तिः । समुदायसत्यम् । निरोधसत्यम् । दुःखसत्यम् । मार्गसत्यं चेति । सर्वमुत्पत्तिमदिति यन्निर्णयज्ञानं तत् समुदायसत्यम् । सर्वं क्षणिकमिति निरोधसत्यम् । सर्वं दुःखात्मकमिति दुःखसत्यम् । सर्वं शून्यं सर्वं निरात्मकमिति मार्गसत्यम् । इत्येवं भावयतो रागादिनिवृत्तावभ्युपगम्यमानायां निर्हेतुको विनाश इतीयं प्रतिज्ञा हीयेत ।

द्वितीये साधनोपदेशानर्थक्यप्रसङ्ग इत्युभयथापि दोषादसमञ्जसं सौगतमतम् । अद्वितीये साधनोपदेशानर्थक्यप्रसङ्गः ॥ २३ ॥

॥ आकाशे चाविशेषात् ॥ २४ ॥

आवरणाभावमात्रमाकाशमिति तन्मतम् । तत्राहुः । आकाशेऽभावप्रतिज्ञा न युक्ता । कुतः । अविशेषात् । वाय्वादेरिव तस्यापि भावरूपत्वेन प्रतिपत्तेरविशेषात् । "आत्मन आकाशः संभूत" इत्यादिश्रुतिप्रामाण्यात् ।

"आकाशस्य स्थितिर्यावद्यावच्च जगतः स्थितिः ।
तावन्मम स्थितिर्भूयाज्जगद्दुःखानि निघ्नतः" ॥

इति दयापरेण वदता बुद्धेनाप्याकाशस्य भावत्वमभ्यनुज्ञातम् ।

किंच, चक्षुषा विशिष्टमाकाशं गृह्यते। पञ्चीकरणेन तस्य रूपवत्त्वात्। रोहितशुक्लकृष्णवर्णतेजोऽबन्नरूपिद्रव्यसमवायित्वाच्च।

ये पुनः शब्दगुणानुमेयमाकाशमिच्छन्ति, तेषां तन्न सिध्यति। शब्दस्याकाशेन सह संबन्धाग्रहणात्। असत्यपि शब्दे नभसि बुद्ध्युत्पत्तेः। श्रूयमाणेऽपि शब्दे तद्द्वारेणाकाशे बुद्ध्यनुत्पत्तेश्च ॥ २४ ॥

॥ अनुस्मृतेश्च ॥ २५ ॥

अनुस्मृतेश्चाप्ययुक्तं सौगतमतम्। अनुभूते वस्तुनि पश्चादुत्पद्यमानं विज्ञानमनुस्मृतिः। प्रत्यभिज्ञानमित्यर्थः। अहमिदमदर्शमिति यः पूर्वेद्युरनुभूतवान्, सोऽहमिदानीमिदमनुभवामीति क्षणभङ्गवादिनोऽनुस्मृतिर्नोपपद्यते। तदभावात् सर्वव्यवहारलोपप्रसङ्गः। सर्वश्च लोकोऽहमस्मीति प्रत्यभिजानाति, नाहं नास्मीति कश्चिदब्रवीति, आ जन्मन आ मरणादेतस्मिन्नन्तराले सोऽहमस्मीत्यनुसंदधानः कथमिव बौद्धो नापत्रपते, य एष आत्मा नास्तीति निराकरोति।

न च सादृश्यनिबन्धनोऽयं व्यवहारः क्षणिकवादे सदृशयोर्वस्तुनोर्ग्रहीतुरेकस्य स्थायिनोऽभावात् सादृश्यनिमित्तं प्रत्यभिज्ञानमिति मिथ्यालाप एव। अन्यथा क्षणिकत्वप्रतिज्ञाहानिः। आत्मादेर्व्यतिरिक्ते हि पदार्थे भावाभावप्रत्ययौ भवतो नात्मन्यभावप्रत्यय आत्मानं लभते।

न चैकसंतानत्वे सतीति विशेषणं संभवति। संतानिव्यतिरिक्तस्य संतानस्यानभ्युपगमेन स एवात्मा स्याच्चास्ति विवादः।

तस्मात् त्वत्पक्षे संतानिनो विज्ञानक्षणाः परस्परं भिन्ना एव सन्ति। न प्रातर्दृष्टे वस्तुनि मध्याह्ने स्मृतिर्नोपपद्यते। तत्र द्रष्टुः स्मर्तुश्च कार्यकारणभावाभावात्।

न च विज्ञातरि नष्टे पूर्वोपलब्धेः स्मरणं युक्तम्।

न चान्यदृष्टमन्यः स्मरति। स्मरणं खलु पूर्वं ज्ञातस्य सामान्येन ज्ञात्वा ग्रहणम्।

न च विज्ञानसंतानस्य परलोकगमनं संभवति। यदन्तराभवदेहमनुप्रविश्य विज्ञानसंतानः परलोकं गच्छतीति मन्यते। अन्तराभवदेहकल्पनायां प्रमाणाभावात्।

न च वरणवेलायां मण्डूकवदुत्प्लुत्य विज्ञानक्षणः प्रविशति। अमूर्तत्वात्।

न चान्यः प्रेरकोऽस्ति। कर्म प्रेरकमिति चेत्। तादृशकर्मणः प्रमाणाभावात्। ततश्च स्वर्गनरकगमनाभावात्। तत आगत्य गर्भप्रवेशासिद्धेरुत्पत्तिभावानुपपत्तिरिति दिक्।

एतेन पराभिमतो दृष्टिसृष्टिवादोऽपि निरस्तः। तत्राप्यर्थतः क्षणिकत्वाविशेषात् ॥ २५ ॥

यच्च तैरभ्युपगतम्। अभावाद्भावोत्पत्तिरिति तत्राह ॥

॥ नासतोऽदृष्टत्वात् ॥ २६ ॥

असतोऽभावाद्भाव उत्पद्यत इति। तत् परिहरति। नेति। कुतः। अदृष्टत्वात्। असतः शशविषाणादेरङ्कुरोत्पत्त्यदर्शनात्। अभावस्य निरुपाख्यत्वाच्छशविषाणबीजाभावयोः को विशेषः। ततश्च कारणनियमानुपपत्तिरिति सर्वं सर्वस्माद्युगपदुपपद्येत।

ननु बीजमुपमृद्यैवाङ्कुरः प्रादुर्भवति। क्षीरमुपमृद्य दधीव मृत्पिण्डमुपमृद्य घट इव च बीजमुपमृद्यैवाङ्कुर उत्पद्यत इति। अतोऽभावाद्भावोत्पत्तिरिति चेत्। न। तत्र बीजसंस्थानमात्रं निवर्तते। अविरोधि बीजद्रव्यमेव त्वङ्कुराकारेणावस्थान्तरतया परिणमत इति प्रत्यक्षमिति प्रत्याख्यातुं शक्यम् २६ ॥

॥ उदासीनानामपि चैवं सिद्धिः ॥ २७ ॥

अभावाद्भावोत्पत्तावुदासीनानां प्रयत्नशून्यानामप्यैहिकामुष्मिकसर्वार्थसिद्धिः स्यात्। अभावस्य सुलभत्वादिति ॥ २७ ॥

अथ विज्ञानवादियोगाचारपक्षो निरस्यते ॥

॥ नाभाव उपलब्धेः ॥ २८ ॥

प्रथमविपश्यनायुगनद्धवाही मार्गो योगः। तत्र समर्थेति समाधिरुच्यते। विपश्यना, सम्यग्दर्शनलक्षणा, यथा युगनद्धौ बलीवर्दौ वहतः, तथा, यो मार्गः सम्यग्दर्शनवाही, स योगः। तेनाचरतीति योगाचार उच्यते।

किं पुनः सम्यग्दर्शनम्। सर्वं बाह्यार्थशून्यं विज्ञानं, सर्वं क्षणिकं, सर्वं निरात्मकमिति।

कथं पुनर्विज्ञानमात्रं प्रतिज्ञायते। साकारं प्रत्यक्षं च विज्ञानम्। नीलं पीतमिति हि साकारं विज्ञानमेव प्रकाशते। प्रत्यक्षं च तत्। प्रदीपवत्। प्रकाशकत्वात्। अप्रत्यक्षस्योपलम्भे तस्य स्वपरोत्पन्नयोर्विज्ञानयोरविशेषप्रसङ्गः। अस्ति च विशेषः। स्वोत्पन्नेन विज्ञानेन प्रवृत्तिनिवृत्तिलक्षणं व्यवहारं पुरुषो निवर्तयति।

तथा चोक्तं विप्रभिक्षुणा।

"अप्रत्यक्षोपलम्भस्य नार्थदृष्टिः प्रसिध्यति।
अविभागोऽपि बुद्ध्यात्मा विपर्यासितदर्शनैः॥
ग्राह्यग्राहकसंवित्तिभेदवानिव लक्ष्यते"।

इति। तत्र ग्राह्याकारः प्रमेयम्, ग्राहकाकारः प्रमाणम्, स्वसंवित्तिः फलम्, इति त्रयमेकस्मिन् विज्ञानेऽवकल्पते।

तस्मान्नास्ति बाह्यार्थः ।

इतश्च सहोपलम्भनियमाच्च भेदो नीलतद्धियोः । यदेव नीलज्ञानं, तदेव नीलमुपलभ्यते ।

तस्मादनयोरभेद इति ।

इतश्च बाह्यार्थशून्यो जाग्रत्प्रत्ययः । प्रत्ययत्वात् । स्वप्नप्रत्ययवत् ।

कथं बाह्यार्थाभावे प्रत्ययवैचित्र्यमिति चेत् । वासनावैचित्र्यात् । बीजाङ्कुरवद्विज्ञानानां वासनानां चान्योन्यं निमित्तनैमित्तिकभावेन वैचित्र्यस्योपपन्नत्वादिति प्राप्तम् ।

अत्रोच्यते । न बाह्यार्थस्याभावः । कुतः । उपलब्धेः । स हि बहिर्देशसंबन्धः प्रत्यक्षमुपलभ्यते,पावकः पर्वतः, पृथिवी, सलिलम्, इत्याकारवान् । निराकारं च विज्ञानमन्तर्देशेऽहंकारसमारूढं विज्ञानमात्मापरोक्षमुत्पद्यते । तयोर्ज्ञानज्ञेययोर्भिन्नदेशयोरनुभूयमानयोः कथमेकत्वमाश्रीयते । क्षीरोदकयोस्तु परस्परसंसर्गात् स्यादेकत्वाभिमानः । प्रत्यक्षत्वं तु विज्ञानस्यास्माकमप्यभीष्टमेव,न पुनः पूर्वमेव विज्ञानं प्रत्यक्षमनुभूयते । ग्राह्याकारोपश्लेषमन्तरेण ग्राह्याकारपुरःसरमेव हि संवेदनम् । संवेद्येऽपि तु स परोक्षीभवति । घटसंवेदनं, पटसंवेदनमिति हि वेद्याकारपूर्वकमेव निर्दिश्यते ।

यदुक्तम् । "सहोपलम्भनियमा"दिति । तदनिरूपिताभिधानम् । साहित्यस्यार्थभेदहेतुकत्वात् । सहत्वं नामैकदेशवर्तित्वमेककालवर्तित्वं वा द्वयोर्भिन्नयोः पदार्थयोः । ततश्च भिन्नोपलम्भनियमादिति हेत्वर्थोऽभेद इति प्रतिज्ञा । सोऽयं प्रतिज्ञाहेत्वोर्विरोधः । प्रतिज्ञायां सत्यां हेतुर्बाध्यते । तस्मिन् प्रतिज्ञा बाध्यत इति ।

न च दृष्टान्तोऽस्ति ग्राह्यग्राहकयोरभेदे । द्विचन्द्रज्ञानादिष्वपि ग्राहकयोर्भेदो दृष्टो मीमांसकैरिति संक्षेपः ॥ २८ ॥

यच्चोक्तम् । स्वप्नप्रत्ययवदिति । तत्राह ॥

॥ वैधर्म्याच्च न स्वप्नादिवत् ॥ २९ ॥

स्वप्नमनोरथज्ञानवद्भवितुं जागरितज्ञानानि तु न । किंतु तद्विलक्षणानि । वैधर्म्यात् । निद्रादिदोषदुष्टकरणजन्यानि, बाधितानि च स्वप्नज्ञानानि । जागरितज्ञानानि तु तद्विलक्षणानीति न तत्साधर्म्यम् ।

न च प्रत्ययत्वात् स्वप्नप्रत्ययत्वं मिथ्यात्वे हेतुरभिप्रेयेत । स्वप्नज्ञानस्य मिथ्यात्वासिद्धेः । प्रबोधप्रत्ययस्य बाधकस्यापि मिथ्यात्वात् दृष्टान्ताभावः ।

तस्माज्जाग्रत्प्रत्ययस्य मिथ्यात्वमनुमानेन साधयितुमशक्यम् । प्रत्यक्षानुभवस्य बलीयस्त्वात् ।

ये तु बौद्धमतावलम्बिनो मायावादिनस्तेऽप्यनेन न्यायेन सूत्रकारेणैव निरस्ता वेदितव्याः ।

यदि बाह्योऽर्थो नाभिप्रेतः स्यात् । किमर्थमित्यं यतेत सूत्रकारः ।

अतोऽर्थवैचित्र्यकृतमेव ज्ञानवैचित्र्यं तत्तदर्थव्यवहारयोग्यतापादनरूपतया साक्षात् प्रतीयमानस्य तत्तदर्थसंबन्धाधीनं, न स्वतः । निराकारत्वात् ।

संबन्धश्च संयोगलक्षणः । ज्ञानमपि हि द्रव्यमेव । प्रभाद्रव्यस्य प्रदीपगुणभूतस्येव ज्ञानस्याप्यात्मगुणभूतस्य द्रव्यत्वे विरोधाभावात् ॥ २९ ॥

यदप्युक्तं, बाह्यार्थाभावेऽपि वासनानिबन्धनं ज्ञानवैचित्र्यं स्यादिति, तत्राह ॥

॥ न भावोऽनुपलब्धेः ॥ ३० ॥

वासनानां भावो न । कुतः । अनुपलब्धेः । निर्हेतुकविनाशिनां ज्ञानानामनुवर्तमानस्थिराकारस्याप्राप्तेः । विनष्टेन पूर्वज्ञानेनानुत्पन्नमुत्तरज्ञानं कथं वास्यते । बाह्यार्थानुपलब्धेरपि प्रत्यर्थं नानारूपवासनानां ह्यर्थोपलब्धिनिमित्तत्वात् ।

किंच,वासना नामानुभवजनितः स्मृतिहेतुः संस्कारः । तस्य चाश्रयं विना ज्ञेयाकारवैचित्र्ये सामर्थ्यं कल्पयितुं न शक्यम् ।

नन्वालयविज्ञानमहंप्रत्ययाख्यं, तेन घटादिज्ञाने वासना आधार्यन्ते, ताभ्यश्च घटादिज्ञानानि, इति परस्परहेतुहेतुमद्भावेन विज्ञानवासनाचक्रं प्रवर्तत इति चेत् । न । विज्ञानस्कन्धमात्रवादिनः कुतो व्यतिरिक्ता वासनाः । तदभ्युपगमे च विज्ञानवादहानिः ॥ ३० ॥

॥ क्षणिकत्वाच्च ॥ ३१ ॥

नेति वर्तते । आलयविज्ञानस्य चाधारत्वं नोपपद्यते । कुतः । क्षणिकत्वात् । प्रवृत्तिज्ञानवत् । इति संक्षेपः ॥ ३१ ॥

अथ सर्वशून्यवादिमाध्यमिकपक्षो निरस्यते ॥

॥ सर्वथानुपपत्तेश्च ॥ ३२ ॥

शून्यवाद एव बुद्धमतस्य परा काष्ठा । शिष्यबुद्धिवैशद्याय बाह्यार्थाद्यभ्युपगमेन तत्र क्षणिकत्वादयस्तेन कल्पिताः ।

न च बाह्यार्थो घटादयो विज्ञानं च सर्वे भावाः सन्ति । उत्पत्त्यनिरूपणात् । तेषां शून्यापत्तिरेव च मोक्ष इत्येव बुद्धाभिप्रायः । स्वतः सिद्धं हि शून्यं, न हेतुसाध्यम् । सत एव हि हेतुरपेक्ष्यते । असतश्च पदार्थस्य न भावादभावस्योत्पत्तिः संभवति । घटादिर्हि पिण्डादिकमनुपमृद्य नोत्पद्यते । पश्चादभावादुत्पद्यमानश्चाभावात्मक एव स्यात् । स्वतः परतो वाप्युत्पत्तिर्न संभवति । आत्माश्रयदोषापत्तेः । प्रयोजनाभावाच्च । परतश्चोत्पत्तौ परत्वाविशेषात् सर्वतः सर्वोत्पत्तिप्रसङ्गः । जनेरभावादेव न विनाशः ।

अतो जनिनाशसदसदादिकं भ्रान्तिरेवेति शून्यमेव तत्त्वमिति प्राप्त आह। सर्वथेति। नेत्यनुवर्तते। त्वदभिमतं सर्वशून्यत्वं न संभवति।

सर्वं शून्यमिति वादे सर्वस्य सत्त्वम्, असत्त्वं वा, सदसत्त्वं वा,प्रतिजानतस्तव सर्वथा नाभीष्टसिद्धिः। कुतः। अनुपपत्तेः। सर्वशून्यत्वानुपपत्तेः।

लोके भावाभावशब्दयोस्तद्बुद्ध्योश्च विद्यमानवस्त्ववस्थाविशेष एव भावाभावरूपयोर्विषयः। प्रमाणेनोपलभ्यमानघटाद्यवस्थाविशेषो भावबुद्धिविषयः। तद्विरोधिपिण्डकपालाकाराद्यवस्थाविशेषोऽभावबुद्धिविषयः।

ततश्च सर्वं सदिति सर्वमसदिति वा प्रतिजानता विद्यमानवस्त्ववस्थाविशेषयोगितैव प्रतिज्ञातास्तीति न त्वदभिमततुच्छतासिद्धिः।

किंच, येन प्रमाणेन शून्यत्वं साध्यते, तस्य सत्यत्वे सर्वस्य सत्यत्वापत्तिरिति सर्वथा शून्यवादोऽनुपपन्न एवेति ॥ ३२॥

एवं मुक्तकच्छबौद्धमतं निरस्याथेदानीं विवसनजैनमतं निरस्यते॥

॥ नैकस्मिन्नसंभवात् ॥ ३३ ॥

सप्त चैषां निरीश्वरवादिनां पदार्थाः शास्त्रसंग्रहभूताः। जीवाजीवाश्रवसंवरनिर्जरबन्धमोक्षा इति।

तत्र जीवाश्चेतना ज्ञानदर्शनसुखवीर्यगुणाः सावयवा देहपरिमाणाः। ते त्रिविधाः। बद्धात्मानो मुक्तात्मानो नित्यसिद्धाश्चेति।

ये मुक्तात्मानस्ते सर्वज्ञा निरतिशयसुखाश्चासते।

जीवभोग्यं वस्तुजातमजीवः। स च धर्माधर्मपुद्गलकालाकाशभेदभिन्नः। सम्यक्प्रवृत्त्यनुमेयो द्रव्यविशेषो धर्मः। अमुक्तानां स्थितिहेतुरधर्मः। वर्णगन्धरसस्पर्शवद् द्रव्यं पुद्गलः। स द्विधा। परमाणुतत्संघातभेदात्। पृथिव्यादिहेतवः परमाणवः। ते च न तार्किकाणामिव चतुर्विधाः। किं त्वेकस्वभावाः पृथिव्यादिभेदवस्तुपरिणामकृतः। पृथिव्यादिचतुष्टयं, तनुभुवनादिकश्च तत्संघातः।

कालस्तु भूतादिव्यवहारहेतुरणुरूपो द्रव्यविशेषः।

आवरणाभाव आकाशो द्विधा। लोकाकाशः सांसारिकः, अलोकाकाशो मुक्ताश्रयः।

आश्रावयति पुरुषं विषयेष्वितीन्द्रियप्रवृत्तिराश्रवः। कर्तारमभिव्याप्याश्रवत्यनुगच्छतीत्याश्रवं कर्मेति वा।

इन्द्रियवृत्तीः संवृणोतीति संवरमिन्द्रियनिरोधः समाधिरूपः।

पूर्वसंचितं कल्मषं निर्जरयतीति निर्जरो नाम।

अस्नानमौनरासननिवृत्तभोजनतप्तशिलारोहणकेशोपलुञ्चनादिलक्षणमर्हदुपदेशावगतं तपः।

बन्धस्त्वष्टविधः कर्मलक्षणः। तत्र ज्ञानावरणीयं, दर्शनावरणीयं, मोहनीयमन्तरीयमिति चत्वारि घातिकर्माणि। वेदनीयं नामिकं, गौत्रिकमायुष्कमिति चत्वार्यघातिकर्माणि। बन्धनिवृत्तौ नित्यसिद्धार्हदनुग्रहात् स्वाभाविकात्मस्वरूपाविर्भावो मोक्षो भवतीति।

तेषामेवापरः प्रपञ्चः पञ्चास्तिकायो नाम। जीवास्तिकायः, पुद्गलास्तिकायो, धर्मास्तिकायः, अधर्मास्तिकायः, आकाशास्तिकायश्चेति।

अनेकदेशवर्ती सांकेतिकपदार्थवाची, अस्तिकायशब्दः, जीवश्चासावस्तिकायश्चेत्येवं सर्वत्र कर्मधारयः।

इमं च सप्तभङ्गीनयं सर्वत्रावतारयन्ति। स्यादस्ति, स्यान्नास्ति, स्यादवक्तव्यः स्यादस्ति च, स्यादस्ति च नास्ति च, स्यादस्ति चावक्तव्यश्च, स्यान्नास्ति चावक्तव्यश्च, स्यादस्ति च नास्ति चावक्तव्यश्चेति। अतः सर्वं वस्तुजातं द्रव्यपर्यायात्मकमनैकान्तिकं, द्रव्यस्वरूपस्य चैकत्वात् स्थिरत्वात् सद्बुद्धिबोध्यत्वात् तदात्मना सत्त्वैकमनैकान्तिकम्। द्रव्यस्वरूपस्य चैकत्वात् तस्यावस्थाविशेषा घटत्वपटत्वादिरूपाः। तेषां चानेकत्वादस्थिरत्वादसद्बुद्धिबोध्यत्वात् तदात्मनाऽसत्त्वनित्यत्वानित्यत्वादिभिरनैकान्तिकत्वं न युक्तम्। कुतः। एकस्मिन् धर्मिणि सत्त्वासत्त्वादेर्विरुद्धधर्मस्य छायातपवद् युगपदसंभवात् कथमेको भावोऽस्ति,नास्ति च स्यात्। विरोधात्।

ननु पटरूपेण घटो नास्ति,स्वेन रूपेणास्तीति न विरोध इति चेन्न। स्वरूपेऽपि सप्तभङ्गीयस्याविशेषात् स्वरूपमस्तीत्यपि तत्रानध्यवसानमेव स्यात्।

किंच,ये सप्त पदार्थास्ते तथैव स्युः। अन्यथा वेत्यनिश्चितज्ञानमप्रमाणमेव स्यात्।

ननु सर्वमनैकान्तिकमित्यवधारणज्ञानं निश्चितमेवेति चेन्न। अवधारणमप्यनैकान्तिकमेव स्यात्। अवधारणं स्यान्नास्ति चावधारणमिति न क्वचिन्निश्चयः स्यात्। मोक्षोऽस्ति, नास्तीत्यवधारणादप्रवृत्तिरेव स्यात्। तत्रैवं शास्त्रं प्रणयन्नुन्मत्ततुल्यस्तीर्थकरः स्यात्।

यच्चोक्तं, पुद्गलसंज्ञकपरमाणुसंघाताः पृथिव्यादयस्तत् पूर्वोक्तेश्वरानधिष्ठितपरमाणुवादनिरासेनैव निरस्तमिति ज्ञेयम्। तथा पञ्चास्तिकायानामपि पञ्चत्वसंख्यास्ति, न वेति, विकल्पे, आद्ये स्यात्, द्वितीये न स्यादिति, न्यूनाधिकसंख्यत्वमेव स्यादिति संक्षेपः॥ ३३ ॥

॥ एवं चात्माकार्त्स्न्यम् ॥ ३४ ॥

एवमेकस्मिन् धर्मिणि विरुद्धधर्मसमावेशासंभवद्दोषवदात्मनोऽपि यदिष्टं देहपरिमाणत्वं, तदपि पक्षे स्यात्,पक्षे नेत्यकार्त्स्न्यमपरिपूर्णत्वं च दोषः प्रसज्येतेत्यर्थः । तत्र शरीरैकदेशे जीव इत्येकदेशो जीवशून्यः स्यात् ।

किंच, मनुष्यदेहपरिमाणो जीवः केनचित् कर्मविपाकेन पिपीलिकादेहे प्रविशन् न संमीयेत ॥ ३४ ॥

॥ न च पर्यायादप्यविरोधो विकारादिभ्यः ॥ ३५ ॥

ननु मनुष्यदेहपरिमाणस्य जीवस्य हस्तिशरीरादावकार्त्स्न्यं परिहर्तुं शक्यम् । कथम् । अनन्तावयव आत्मा । महति शरीरे तदवयवानामुपचयोऽर्भकशरीरे ऽपचय इत्येवं पर्यायादविरोध इति चेत् । नेति । कुतः । विकारमूर्तत्वादिदोषप्रसङ्गात् । अवयवोपगमापगमाभ्यामनिशमापूर्यमाणस्यापक्षीयमाणस्य च जीवस्य विकारित्वं स्यात् । तथात्वे चर्मादिवदनित्यत्वप्रसङ्गः । ततश्च बन्धमोक्षौ कस्य स्याताम् ।

यदि सावयवो जीवः स्याद्देहवद्विनाशी स्यात्, मूर्तश्च स्यात् ।

न चोपचयापचयौ कल्पयितुं शक्यौ । प्रमाणाभावात् । येऽपगतास्तेऽपगता एव न तेषां पुनरात्मसंबन्धो निरूपयितुं शक्यत इति ॥ ३५ ॥

॥ अन्त्यावस्थितेश्चोभयनित्यत्वादविशेषः ॥ ३६ ॥

अन्त्यस्य चरमदेहगतस्य परिमाणस्यावस्थितिरिष्यते विसिभिः । भिन्ने देहे मुक्तः सर्वगतो देहान्तरावच्छेदाभावात् । तन्नित्यं परिमाणम् । ततश्चाद्यमध्ययोरप्यवस्थयोर्नित्यत्वं स्यात् । अतोऽविशेषः । सर्वदाणुर्वा महान् वा जीवो न शरीरपरिमाण इति वक्तुं शक्यते ।

एवं चोपचयापचयप्रतिज्ञाहानिः ।

अतो दिगम्बरमतमपि सौगतमतवदत्यन्तमनादरणीयमिति ॥ ३६ ॥

अथ पशुपतिपक्षनिरास उपक्रम्यते ॥

॥ पत्युरसामञ्जस्यात् ॥ ३७ ॥

इयं तावत् पशुपतिमतानुगामिनां प्रक्रिया ।

पशुपतिनेश्वरेण प्रणीतं पञ्चाध्यायीशास्त्रं पञ्चतन्त्रपदार्था निर्णीयन्ते । कारणं, कार्यं, योगो, विधिर्दुःखान्त,इति । कारणं प्रधानमीश्वरश्च । कार्यं महदादि । योगोऽपि"ओङ्कारमभिध्यायात सकृ"दिति कुर्याद्धारणमित्येवमुक्तो विधिपदार्थः । विधिस्त्रिषवणस्नानादिर्गूढचर्यावसानः । मोक्षो दुःखान्तः । स च तार्किकादिवत् पाषाणकल्पावस्थितिः । पाशुपतकापालिकयोः । शैवानां तु सांख्यवच्चैतन्या आत्मानस्तिष्ठन्तीति विशेषः ।

ते चतुर्विधाः । कापालाः कालामुखाः पाशुपताः शैवाश्च सर्वेऽपि वेदविरुद्धाचारान् निःश्रेयःसाधनतया मन्यन्ते । निमित्तोपादानयोर्भेदं निमित्तकारणं पशुपतिं मन्यन्ते । तथैव साधनमपि मुद्रिकाषट्कधारणादि । तथा चाहुः कापालाः ।

"मुद्रिकाषट्कतत्त्वज्ञः परमुद्राविशारदः ।
भगासनस्थमात्मानं ध्यात्वा निर्वाणमृच्छति ॥
कण्ठिका रुचकं चैव कुण्डलं च शिखामणिः ।
भस्म यज्ञोपवीतं च मुद्राषट्कं प्रचक्षते ॥
आभिर्मुद्रितदेहस्तु न भूय इह जायते" ।

इत्यादि ।

तथा कालामुखा अपि । कपालपात्रशवभस्मस्नानतत्प्राशनलगुडधारणसुराकुम्भस्थापनतदाधारदेवतापूजादिकमैहिकामुष्मिकफलसाधनमिति मन्यन्ते ।

"रुद्राक्षकङ्कणं हस्ते जटा चैका च मस्तके
कपालं भस्मना स्नानम्",

इत्यादिकं शैवागमे प्रसिद्धम् ।

तथा केनचित् क्रियाविशेषेणेतरजातीयानामपि ब्राह्मणत्वप्राप्तिमुत्तमाश्रमप्राप्तिं च विदधति ।

"दीक्षाप्रवेशमात्रेण ब्राह्मणो भवति क्षणात् ।
कापालं व्रतमास्थाय यतिर्भवति मानवः" ॥

इति । तन्निराकरोति । पत्युरिति । नेत्यनुवर्तते ।

पाशुपतपक्षः श्रेयोऽर्थिभिर्नादरणीयः । कुतः । असामञ्जस्यात् । वेदबाह्यत्वात् । मुद्राषट्कधारणभगासनस्थात्मध्यानसुराकुम्भस्थापनतत्स्थदेवतार्चनगूढाचारश्मशानभस्मस्नानप्रणवपूर्वाभिध्यानादेरन्योन्यविरुद्धत्वाद्वेदबाह्यधर्मत्वाच्च । तदुक्तसाधनानां वेदोक्तवेदान्तश्रवणादिभगवदुपासनादीनां च परस्परात्यन्तविरोधाच्च । पाषाणकल्पावस्थितिरूपमोक्षस्याप्यवैदिकत्वात् । तथा पशुपतेरपि जन्यत्वेन जगत्कारणत्वासंभवाच्च । "एको ह वै नारायण आसीन्न ब्रह्मा नेशानः", "तस्य ध्यानान्तस्थस्य ललाटात् त्र्यक्षः शूलपाणिः पुरुषोऽजायत"इत्यन्वयव्यतिरेकश्रुतेस्तस्य जन्यत्वावगमात् । "तदैक्षत बहु स्यां प्रजायेय", "नारायणात् प्राणोऽजायत, मनः सर्वेन्द्रियाणि च खं वायुर्ज्योतिरापः पृथिवी विश्वस्य धारिणी," "नारायणाद्ब्रह्मा जायते", "नारायणाद्रुद्र" इत्यादिश्रुतयः परब्रह्म श्रीपुरुषोत्तमं जगदभिन्ननिमित्तोपादानं वदन्त्योऽन्यस्य वस्तुजातस्य तदुपादेयत्वं निश्चिन्वन्ति । क्वचिच्छ्रूयमाणाः शिवादिशब्दा अपि आकाशशब्दवद् ब्रह्मपरा एव । तच्च सिद्धान्तजाह्नव्यां श्रीदेवाचार्यपादैर्विशदं निर्णीतम् ॥ ३७ ॥

॥ संबन्धानुपपत्तेश्च ॥ ३८ ॥

पशुपतेरदेहस्य प्रधानादिसंबन्धानुपपत्तेरपि जगत्तत्त्वं न संभवति। लोके सशरीरस्यैव कुविन्दादेस्तन्त्वादिसंबन्धदर्शनात् ॥ ३८ ॥

॥ अधिष्ठानानुपपत्तेश्च ॥ ३९ ॥

पशुपतेः कुलालादिवत् प्रधानाधिष्ठातृत्वं नोपपद्यते। अशरीरस्यैव कुलालादेर्मृदाद्यधिष्ठातृत्वदर्शनाच्च ॥ ३९ ॥

॥ करणवच्चेन्न भोगादिभ्यः ॥ ४० ॥

यथाऽशरीरस्यैव जीवस्य करणकलेवराद्यधिष्ठातृत्वं, तथा पशुपतेरपि प्रधानाद्यधिष्ठातृत्वं संभवतीति चेत्। न। कुतः। भोगादिभ्यः। स्वार्जितपुण्यादिरूपकर्मफलभोगनिमित्तं पुण्यादिरूपादृष्टकारितं च जीवस्याधिष्ठातृत्वम्। तथा पशुपतेरपि पुण्यादियोगीदीश्वरत्वासंभवः। तस्मान्नाधिष्ठातृत्वं संभवति ॥ ४० ॥

॥ अन्तवत्त्वमसर्वज्ञता वा ॥ ४१ ॥

वाशब्दश्चार्थे। पशुपतेः पुण्यादिरूपादृष्टयोगे जीववदन्तवत्त्वं, सृष्ट्याद्यन्तःपातित्वमसर्वज्ञता च स्यादिति संक्षेपः ॥ ४१ ॥

॥ उत्पत्त्यसंभवात् ॥ ४२ ॥

श्रीभगवत्प्रणीतपरमश्रेयोबोधकस्यापि भगवच्छास्त्रस्य कपिलादिशास्त्रवदप्रामाण्यमाशङ्क्य तत् परिहरति।

तत्र शङ्क्यते। परमात्मनः परब्रह्मणो जगदभिन्ननिमित्तोपादानाच्छ्रीवासुदेवात् संकर्षणो नाम जीवो जायते, संकर्षणात् प्रद्युम्नसंज्ञं मनो जायते, ततोऽनिरुद्धाख्योऽहंकारो जायत इति पाञ्चरात्राणां प्रक्रिया।

तत्र जीवस्योत्पत्त्यसंभवाच्छ्रुतिविरुद्धैव सेति प्रतिभाति। "अजो ह्येको जुषमाणः", "न जायते म्रियते वे"त्यादिश्रुतेः ॥ ४२ ॥

॥ न च कर्तुः करणम् ॥ ४३ ॥

नापि कर्तुः संकर्षणाख्यजीवात् सकाशात् प्रद्युम्नाख्यस्य मनसः करणस्योत्पत्तिः संभवति। विरुद्धत्वात्। नहि कुलालादेर्दण्डादीनामुत्पत्तिः कस्यचिद्दृष्टचरी, उपपन्ना वेति।

"एतस्माज्जायते प्राणो मनः सर्वेन्द्रियाणि चे"त्यादिश्रुतिविरोधाच्चाप्रामाणमिदमपि तन्त्रम् ॥ ४३ ॥

इति प्राप्ते राद्धान्तः ॥

॥ विज्ञानादिभावे वा तदप्रतिषेधः ॥ ४४ ॥

वाशब्दः पूर्वपक्षव्यावृत्त्यर्थः। संकर्षणादीनां विज्ञानादिभावे, विज्ञानं च तदादि चेति विज्ञानादि ब्रह्म, "विज्ञानमानन्दं ब्रह्म"इति श्रुत्युक्तब्रह्मभावे सति, तत्प्रतिपादनपरस्यास्य तन्त्रस्य त्वप्रतिषेधः। तत्प्रामाण्यं न प्रतिषिध्यत इत्यर्थः।

अयमत्राभिप्रायः। प्रमाणत्वाप्रमाणत्वयोः शास्त्रमेकं नियामकम्। तदेकगम्यत्वात् तयोः।

तत्र श्रुतिमूलं च प्रामाण्यं शिष्टग्राह्यं, श्रुतिविरुद्धं चाप्रामाण्यं हेयं चेति सर्वं प्रमाणविदां समानम्।

एवं च पञ्चरात्रस्य श्रुतिमूलत्वं तत्तुल्यत्वेन मोक्षधर्मेऽपि सूत्रकारेणैव निर्णीतम्।

"गृहस्थो ब्रह्मचारी च वानप्रस्थोऽथ भिक्षुकः।
य इच्छेत् सिद्धिमास्थातुं देवतां कां यजेत सः॥

इत्यादियुधिष्ठिरप्रश्नानां पञ्चरात्रोक्तप्रक्रियया ह्युत्तरं दत्वाह।

"इदं शतसहस्राद्धि भारताख्यानविस्तरात्।
आविध्य मतिमन्थानं दध्नो घृतमिवोद्धृतम् ॥
नवनीतं यथा दध्नो द्विपदां ब्राह्मणो यथा।
आरण्यकं च वेदेभ्य ओषधिभ्यो यथामृतम् ॥
इदं श्रेय इदं ब्रह्म इदं हितमनुत्तमम्।
ऋग्यजुःसामभिर्जुष्टमथर्वाङ्गिरसैस्तथा ॥
भविष्यति प्रमाणं वा ह्येतदेवानुशासनम्"।

इति।

तथा चास्याप्रमाण्यं प्रमाणाभावाद्वा निषेधाद्वेति।

नाद्यः। उक्तप्रमाणस्य सत्त्वात्।

न द्वितीयः। भारतादौ क्वाप्यदर्शनात्।

न च।

"कापालं पाञ्चरात्रं च यामलं वामनार्हतम्।
एवंविधानि चान्यानि मोहनार्थानि तानि च" ॥

इत्यादिः क्वचित् कूर्मपुराणादौ निषेधो दृश्यत इति शङ्क्यनीयम्। भारतादिविरुद्धस्मृतेरनङ्गीकारात्।

"यदिहास्ति तदन्यत्र यन्नेहास्ति न तत् क्वचित्"।

इति सूत्रकारप्रतिज्ञावचनात्। भारतस्य तु सर्वैरपि शिष्टैर्निःसंशयेन परिग्रहान्न तत्राप्रामाण्यशङ्कावकाशः। अन्यथा भगवद्गीताया अपि तथात्वापत्तिर्दुर्वारेति।

तस्मान्मोहनादिशास्त्रसाहचर्यपाठानुपपत्त्या पञ्चरात्रशब्देन पञ्चरात्रान्तरं किमपि तन्त्रं कल्पनीयम्।

किंच, नारायणीये पञ्चरात्रप्रतिपाद्यविषयस्य निर्णयोपयिकसल्लिङ्गोपेतवाक्यसिद्धत्वादप्यस्य प्रमाणतमत्वम्।

तथाहि, "गृहस्थो ब्रह्मचारी चे"त्यादिना राज्ञः प्रश्नोपक्रमः। सर्वाश्रमिणां स्वानुरूपपुरुषार्थोपपत्तये को देवो यजनीयः, वैश्वदेवं पैत्र्यं च कर्म कथं कर्तव्यम्, विष्णुनिवेदितान्नेनेतरेण वा, किमात्मको मोक्षः, कः सर्ववेदसार, इत्युपक्रमः।

"एष एकान्तधर्मस्ते कीर्तितो नृपसत्तम ।
मया गुरुप्रसादेन दुर्विज्ञेयोऽकृतात्मभिः" ॥

इति ।

वैशम्पायनः ।

"एवं हि स महाभागो नारदो गुरवे मम ।
श्वेतानां यतिनां चाह ह्येकान्तगतिमव्ययाम् ॥
व्यासश्चाकथयत् प्रीत्या धर्मपुत्राय धीमते ।
पञ्चरात्रविदो ये च यथाक्रमपरा नृप" ॥

इति ।

भीष्मश्च ।

"मत्तोऽन्यानि च ते राजन्नुपाख्यानशतानि वै ।
यानि श्रुतानि सर्वाणि तेषां सारोऽयमुद्धृतः" ॥

इत्युपसंहारः ।

"ये च तद्भाविता लोके ह्येकान्तित्वं समाश्रिताः" ।
"नारायणः शाश्वतधर्मगोप्ता",
"काम्यं नैमित्तिकं राजन् यज्ञा याः परमक्रियाः ।
सर्वाः सात्वतमास्थाय विधिं चक्रे समाहितः ॥
पञ्चरात्रविदो मुख्यास्तस्य गेहे महात्मनः ।
प्रायणं भगवत्प्रोक्तं भुञ्जते चाग्रभोजनम्" ॥

इति सततोऽभ्यासः ।

"नारदेन तु संप्राप्तः सुरहस्यस्य संग्रहः ।
एष धर्मो जगन्नाथं ध्यायेन्नारायणं नृप ॥
सात्वतं विधिमास्थाय प्राक्सूर्यमुखनिःसृतम्" ॥

इत्यादिना पूर्वता ।

"एतदभ्यधिकं तेषां यत् तेजः प्रविशन्त्युत ।
अहो ह्येकान्तिनः श्रेष्ठान् प्रीणाति भगवान् स्वयम् ॥
विधिप्रयुक्तां पूजां च गृह्णाति भगवान् स्वयम् ।
एकान्तिनस्तु पुरुषा गच्छन्ति परमं पदम् ॥
नूनमेकान्तधर्मोऽयं श्रेष्ठो नारायणः प्रियः ।
सहोपनिषदान् वेदान् ये विप्राः सम्यगाश्रिताः ॥
पठन्ति विधिमास्थाय ये चापि यतिधर्मिणः ।
तेषां विशिष्टां जानामि गतिमेकान्तिनां नृणाम् ॥
एकान्तिनो हि पुरुषा दुर्लभा बहवो नृप ।
यद्येकान्तिभिराकीर्णं जगत् स्यात् कुरुनन्दन ॥
अहिंसकैरात्मविद्भिः सर्वभूतहितेरतैः ।
भवेत् कृतयुगप्राप्तिराशाकर्मविवर्जितैः ॥
नारायणात्मका मोक्षे ततो यान्ति परां गतिम्" ।

इत्यादिशतशः फलोक्तिः ।

"इदं महोपनिषदं चतुर्वेदसमन्वितम् ।
सांख्ययोगेन तुल्यो हि धर्म एकान्तिसेवितः ॥
सर्वेषु च नृपश्रेष्ठ ज्ञानेष्वेतेषु दृश्यते ।
यथागमं यथान्यायं निष्ठा नारायणः प्रभुः ॥
न चैनमेवं जानन्ति तमोभूता विशां पते ।
तमेव शास्त्रकर्तारः प्रवदन्ति मनीषिणः ॥
निष्ठा नारायण ऋषिर्नान्योऽस्तीति वचो मम ।
निःसंशयेषु सर्वेषु नित्यं वसति वै हरिः" ॥

इत्यादि नार्थवादः ।

किंच, जनमेजयेन पृष्टो वैशम्पायनः प्रतिकल्पं पञ्चरात्रं श्रीनारायणादाविर्भवति, तिरोभवति च, पाखण्डप्राचुर्यादिति संपूर्णाध्यायेनाह ।

"यदासीन्मानसं जन्म नारायणमुखोद्गतम् ।
ब्रह्मणः पृथिवीपाल तदा नारायणः स्वयम् ॥
तेन धर्मेण कृतवान् दैवं पैत्र्यं च भारत ।
फेनपा ऋषयश्चैव तं धर्मं प्रतिपेदिरे ॥
वैखानसाः फेनपेभ्यो धर्ममेतं प्रपेदिरे ।
वैखानसेभ्यः सोमस्तु ततः सोऽन्तर्दधे पुनः" ॥

इत्यादिना कल्पेकल्पे संप्रदायपूर्वकप्रवृत्त्युक्तयोऽत्रोपपत्तयः ।

अथ तन्निष्ठावतां ह्यन्यक्रियावद्भ्यः स्वरूपफललक्षणोक्तेरपि श्रेष्ठत्ववर्णनात् ।

"सहोपनिषदान् वेदान्" इत्यादिजनमेजयोक्तेः ।

"एकतश्च द्विजाश्चैव त्रिजाश्चैव महर्षयः ।
इदं मे समनुप्राप्ता मम दर्शनलालसाः ॥
न तु मां ते ददृशिरे न तु द्रक्ष्यन्ति केचन ।
ऋते ह्यैकान्तिकाच्चैषां त्वं च ह्यैकान्तिको मम" ॥

इति । नारदं प्रति श्वेतद्वीपपतिवचनात् ।

किंच, ।

"पञ्चरात्रविदो ये च यथाक्रमपरा नृप ।
एकान्तभावोपगतास्ते हरिं प्रविशन्ति वै ॥

यद् ब्रह्मा ऋषयश्चैव स्वयं पशुपतिश्च यत् ।
शेषाश्च विबुधश्रेष्ठा दैत्यदानवराक्षसाः ॥
नागाः सुपर्णा गन्धर्वाः सिद्धा राजर्षयस्तथा ।
हव्यं कव्यं च सततं विधियुक्तं प्रयुञ्जते ॥
कृत्स्नं तु तस्य देवस्य चरणावुपतिष्ठते ।
याः क्रियाः संप्रयुक्ताश्च एकान्तगतिबुद्धिभिः ॥
ताः सर्वाः शिरसा देवः प्रतिगृह्णाति वै स्वयम्" ।

तत्रैवाशरीरिणी वागेकतादीन् ब्रह्मपुत्रान् प्रति ।

"दृष्टा वः पुरुषाः श्वेताः पञ्चेन्द्रियविवर्जिताः ।
दृष्टो भवति देवेश एभिर्दृष्टैर्द्विजोत्तमैः ॥
गच्छध्वं मुनयः सर्वे यथागतमितोऽचिरात् ।
न स शक्यस्त्वभक्तेन द्रष्टुं देवः कथंचन ॥
कालं कालेन महता एकान्तत्वं समागतैः ।
शक्यो द्रष्टुं स भगवान् प्रभामण्डलदुर्दृशः" ॥

इति ।

श्रीनारायणो नारदं प्रति ।

"तं देवा आश्रमाश्चैव नानातनुसमाश्रिताः ।
भक्ताः संपूजयन्त्येनं गतिं चैषां ददाति सः ॥
ये तु तद्भाविता लोके ह्येकान्तित्वं समाश्रिताः ॥
एतदभ्यधिकं तेषां तत् तेजः प्रविशन्त्युत ।
इति गुह्यसमुद्देशस्तव नारद कीर्तितः ।
भक्त्या प्रेम्णा च विप्रर्षे अस्मद्भक्त्या च ते श्रुतः" ॥

इति ।

किंच, वेदोपबृंहणाय भारसंहितां कुर्वता श्रीबादरायणेन बहुषु स्थलेषु पञ्चरात्रप्रामाण्यं प्रतिष्ठापितवता तर्कपादे तत्प्रामाण्यं निराक्रियत इत्यस्यासंगतत्वमेव । भ्रान्तत्वापत्तेः ।

ननु

"परं तत्त्वमिदं कृत्स्नं संख्यातं विदितात्मनाम् ।
यदुक्तं यतिभिर्मुख्यैः कपिलादिभिरीश्वरैः ॥
यस्मिन् न विभ्रमाः केचिद्दृश्यन्ते मनुजर्षभ ।
गुणाश्च यस्मिन् बहवो दोषहानिश्च केवला" ॥

इति कपिलमतस्यापि भारते भ्रमादिदोषाभावप्रतिपादनम् । तथा "सर्वेषु च नृपश्रेष्ठ" त्यनेन सांख्यपाशुपतादीनामपि नारायणनिष्ठत्वप्रतिपादनम् । तथा "तमेव शास्त्रकर्तारं" इति तच्छास्त्रकर्तॄणामपि नारायणप्रतिपादकत्वप्रतिपादनम् ।

"सांख्ययोगः पञ्चरात्रं वेदाः पाशुपतं तथा ।
आत्मप्रमाणान्येतानि न हन्तव्यानि हेतुभिः" ॥

इति सांख्यादीनामात्मप्रमाणत्वप्रतिपादनम् ।

"सर्वं प्रमाणं हि तथा यथैतच्छास्त्रमुत्तमम्" ।

इति पञ्चरात्रदृष्टान्तेनेतरशास्त्राणामपि प्रमाण्यप्रतिपादनं च दृश्यते ।

तथात्वेऽपि शारीरके सांख्यपाशुपताद्यागमानां निषेधदर्शनात् तन्न्यायेनास्यापि निषेधो युक्त एव ।

न च सांख्यादौ वेदविरुद्धभागस्यापि सत्त्वात् तन्मात्रनिषेध इष्ट इति वाच्यम् । श्रुतिविरुद्धभागस्य संकर्षणाद्युत्पत्तिरूपस्यात्रापि सत्त्वात् तन्मात्रनिषेधोऽत्रापि युक्त इति चेत् । न । भगवच्छास्त्रविचारशून्यानां पदवाक्यप्रमाणतत्त्वनिर्णयाशक्तानां स्वाङ्गणेऽश्वधावनमात्रत्वात् ।

तथाहि, सांख्यादीनां पौरुषेयत्वेन वेदविरुद्धांशस्यापि संभवात् तन्मात्रनिषेधः सूपपन्नः ।

प्रकृते तु ।

"पञ्चरात्रस्य कृत्स्नस्य वक्ता नारायणः स्वयम्" ।

इति श्रीमुखनिर्गतत्वेन श्रीभगवद्गीतावत् कृत्स्नस्यापि वेदार्थरूपत्वेन प्रामाण्यतमत्वाचोक्तन्यायस्यात्रावकाशः ।

न हि सांख्यादीनां तत्पठनमात्रेण तत्तुल्यत्वं वक्तुं शक्यम् । उक्तरीत्या तेषां सल्लिङ्गोपेतवाक्यैर्निर्णयाभावेनोक्तन्यायस्य महद् वैषम्यात् ।

किंच, सांख्योक्ततत्त्वानामब्रह्मात्मकतैव शारीरके निराकृता । न स्वरूपम् । योगपाशुपतादिषु चेश्वरस्य केवलं निमित्तकारणतापरतत्त्वविपरीतकल्पना, वेदबाह्याचारश्च निराकृतः । न योगस्वरूपं, पशुपतिस्वरूपं चेति ।

अतः परं तत्त्वमित्यादिना, सांख्ययोग इत्यादिना च, तत्तदभिहिततत्त्वस्वरूपमात्रं ग्राह्यं, न तु बुद्धाद्यभिहिततत्त्ववत् सर्वं त्याज्यमित्युच्यते ।

नापि संकर्षणप्रद्युम्नानिरुद्धानां जीवमनोऽहंकाररूपत्वं संभावनार्हम् । अपितु श्रीवसुदेवाख्यस्य परब्रह्मणो व्यूहात्मत्वमेव ।

तदुक्तं पौष्करसंहितायाम् ।

"कर्तव्यत्वेन वै यत्र चातुरात्म्यमुपासते ।
क्रमागतैः स्वसंज्ञाभिर्ब्राह्मणैरागमं तु तत्" ॥

इति । तत्त्वचातुरात्म्योपासनं परब्रह्मोपासनमेवेति ।

"ब्राह्मणानां हि सद्ब्रह्मवासुदेवाख्ययाजिनाम् ।
विवेकदं परं शास्त्रं ब्रह्मोपनिषदं महत्" ॥

इति सात्वतसंहितोक्तेः ।

"यस्मात् सम्यक् परं ब्रह्म वासुदेवाख्यमव्ययम् ।
अस्मादवाप्यते शास्त्राज्ज्ञानपूर्वेण कर्मणा" ॥

इति पौष्करोक्तेः ।

यतस्तदेव वासुदेवाख्यं परं ब्रह्म यथाधिकारं भक्तैर्ज्ञानपूर्वेण कर्मणा समाराधितं सत् समवाप्यते, तस्मात् संकर्षणादीनामपि श्रीवासुदेवस्यैव स्वेच्छाव्यूहरूपत्वम् । "अजायमानो बहुधा व्यजायत" इति श्रुतेः ।

"धर्मसंस्थापनार्थाय संभवामि युगेयुगे" ।

इति गीतोक्तेः ।

"चतुर्विभक्तः पुरुषः स क्रीडति यथेच्छति" ।

इति कूर्मोक्तेश्च ।

जीवमनोऽहंकारतत्त्वाधिष्ठातृत्वाच्च तेषां जीवादिशब्दैः कथनस्याविरोधः ।

यथा "ता आप ऐक्षन्त," "तत् तेज ऐक्षत" इत्यत्राबाह्यचेतनेष्वीक्षणादिचेतनासाधारणधर्मादेरनुपपत्त्याऽबादिशब्दानां तदधिष्ठातृपरत्वं, तदन्तरात्मब्रह्मपरत्वं, चाभ्युपगम्यते । यथा वा, आकाशप्राणज्योतिरादिशब्दानां भूताकाशादौ तत्रोक्तलिङ्गानुपपत्त्या च ब्रह्मपरत्वं सूत्रितं, तद्वत् प्रकृतेऽपि सूपपन्नम् ॥ ४४ ॥

नाप्युक्तप्रक्रिया श्रुतिविरुद्धेत्याह ॥

॥ विप्रतिषेधाच्च ॥ ४५ ॥

विप्रतिषिध्यते हि जीवोत्पत्तिरस्मिन्नपि शास्त्रे ।

"अचेतना परार्था च नित्यसंततविक्रिया ।
त्रिगुणं कर्मिणां क्षेत्रं प्रकृते रूपमुच्यते ॥
व्याप्तिरूपेण संबन्धस्तस्याश्च पुरुषस्य च ।
स ह्यनादिरनन्तश्च परमार्थेन निश्चितः" ॥

इति परमसंहितोक्तेः ।

ननु तर्हि पूर्वापरविरोधादुभयविधवाक्यानामपि हेयत्वमिति चेत् । न । उक्तन्यायस्य वेदेऽव्यापनात् तत्रापि निषेधः सावकाशः ।

तथाहि, "न जायते म्रियते वा विपश्चिद्, यथाग्नेः क्षुद्रा विस्फुलिङ्गा" इत्यारभ्य "सर्व एवात्मानो व्युच्चरन्ति" इतीतरेतरविरोधस्य साम्यात् ।

न चोत्पत्तिश्रुतेर्देहयोगमात्रविधानपरत्वे तात्पर्यादविरोधः, अन्यथानात्मश्रुतेरित्यादिवक्ष्यमाणशास्त्रबाधादिति वाच्यम् । उक्तन्यायस्यात्रापि साम्यात् ।

किंच, सर्वसंहितासु जीवस्य नित्यत्वनिर्णयाज्जीवस्वरूपोत्पत्तिः पञ्चरात्रशास्त्रनिषिद्धैव ।

नापि संकर्षणाख्यजीवात् प्रद्युम्नाख्यस्य मनसः करणस्योत्पत्तिर्विरुद्धेति पूर्वोक्तदोषावकाशः शङ्कनीयः । संकर्षणादीनां ब्रह्मत्वे सिद्धे ततो मनआदीनामुत्पत्तेः सूपपन्नत्वात् । "एतस्माज्जायते प्राण" इति श्रुतिरपि स्वार्थपरत्वेन सूपपन्ना चेति ।

एतेन यदुच्यते कैश्चित् प्राप्तेत्येवायमुत्पत्त्यसंभवो दोषः प्रकारान्तरेणेत्यभिप्रायः कथम् ।

यदि तावदयमभिप्रायः । परस्परभिन्ना एवैते वासुदेवादयश्चत्वार ईश्वरास्तुल्यधर्माणो नैषामेकात्मत्वमस्तीति । ततोऽनेकेश्वरकल्पनानर्थक्यम्, एकेनेश्वरकार्यसिद्धेः सिद्धान्तहानिश्च । भगवानेको वासुदेवः परमार्थतत्त्वमित्यभ्युपगमात् ।

अथायमभिप्रायः । एकस्यैव भगवत एते चत्वारो व्यूहास्तुल्यधर्माण इति । तथापि तदवस्थ एवोत्पत्त्यसंभवो दोषः । नहि वासुदेवात् संकर्षणोत्पत्तिः संभवति ।

संकर्षणाच्च प्रद्युम्नस्य, प्रद्युम्नाच्चानिरुद्धस्य । अतिशयाभावात् । भवितव्यं च कार्यकारणयोरतिशयेन । यथा मृद्घटयोः । न ह्यसत्यतिशये कार्यं कारणमित्यवकल्पते ।

न च पञ्चरात्रसिद्धान्तिभिर्वासुदेवादिष्वेकैकस्मिन् सर्वेषु वा ज्ञानैश्वर्यादितारतम्यकृतः कश्चिद्भेदोऽभ्युपगम्यते । वासुदेवा एव हि सर्वे व्यूहा निर्विशेषा इष्यन्ते ।

न चैते भगवद्व्यूहाश्चतुःसंख्यायामेवावतिष्ठेरन् । ब्रह्मादेः स्तम्बपर्यन्तस्य समस्तस्यैव जगतो भगवद्व्यूहत्वावगमादिति, तन्निरस्तम् । वासुदेवस्यैकत्वेऽपि व्यूहावतारादिनावस्थाने तत्तद्रूपेण प्रादुर्भावे च विरोधाभावात् स्वरूपेणैकत्वं, मूर्त्यात्मनानेकत्वं च शास्त्रसंमतमेव । "अजायमानो बहुधा व्यजायत" इति श्रुतेः ।

नापि संकर्षणाद्युत्पत्तिप्रकारो विरुद्धः । अधिष्ठेयानामधिष्ठानात् परत्वस्य तेजआदिदृष्टान्तेन पूर्वमेवोक्तेः । तद्वत् प्रकृतेऽपि संकर्षणादिशब्दानां तदधिष्ठेयपरत्वव्याख्याने विरोधाभावात् ।

तथा चैवमभिप्रायः । "श्रीवासुदेवात् संकर्षणाधिष्ठेयसमष्टिजीवगता स्थूलदेहादियोगरूपोत्पत्तिः । "यथाग्नेः क्षुद्रा विस्फुलिङ्गा" इत्यादिश्रुतेः । न तु स्वरूपेणैव जन्म । अनित्यत्वापत्तेः । कृतनाशादिप्रसङ्गात् । अजत्वबोधकश्रुतिविरोधाच्च । तथैव संकर्षणाख्याद्ब्रह्मण एव प्रद्युम्नाधिपमनोवर्गोत्पत्तिः, प्रद्युम्नाख्याच्च ब्रह्मण एवानिरुद्धाधिष्ठातृसमष्ट्यहंकारस्येति सर्वसामञ्जस्यात् । "नारायणाज्जायते प्राणो मनः सर्वेन्द्रियाणि च" इति श्रुतेः । संकर्षणादिरूपादपि नारायणात् तत्कार्योत्पत्तेः संभवात् ।

न चैवं श्रुतत्यागाश्रुतकल्पनाप्रसङ्ग इति शङ्कनीयम् । "यथाग्नेः क्षुद्रा" इति श्रुतिव्याख्याने सर्वेषां तुल्यत्वेन तव मतेऽप्यविशेषात् ।

तस्माच्छास्त्रवाक्यानामितरेतरविरोधे तद्व्यवस्थायामुक्तदोषस्यायोगात् ।

नापि ब्रह्मादीनां व्यूहतोक्तिः सुवचा । प्रमाणशून्यत्वात् । ब्रह्मेशानादीनां तज्जन्यतत्तदुपदिष्टतत्तदनैश्वर्यादिभिर्जीवत्वाविशेषात् । प्रतिषेधश्चास्मिंश्छास्त्रे बहुविध उपलभ्यते गुणगुणित्वकल्पनादिलक्षणः । 'ज्ञानैश्वर्यशक्तिबलवीर्यतेजांसि गुणा आत्मन एवैते भगवन्तो वासुदेवा" इत्यादिदर्शनादिति । गुणादीनां श्रुतिसिद्धत्वेन स्वाभाविकत्वात् । "परास्य शक्ति" रिति श्रुतेः ।

यदप्युक्तम् । "चतुर्वेदेषु परं श्रेयोऽलब्ध्वा शाण्डिल्य इदं शास्त्रमधीतवान्", इत्यादिवेदनिन्दादर्शनादप्यस्याप्रामाण्यमिति तत् प्रामादिकम् । तस्य तत्प्रशंसामात्रपरत्वात् ।

यथा श्रीनारदेन "ऋग्वेदं भगवोऽध्येमि,यजुर्वेदं सामवेदमथर्वाणं चतुर्थमितिहासपुराणं पञ्चम" मित्यादिना, "सोऽहं भगवो मन्त्रविदेवास्मि नात्मवि" दित्यन्तेन, वाक्यसमुदायेन सर्वविद्यास्थानमभिधाय भूमविद्यातिरिक्तसर्वविद्यास्वात्मवेदनालाभोक्तिः प्रकृतभूमविद्याप्रशंसार्थिकैव । सर्वविद्यास्वधीयमानासु सतीष्वपि तत्प्रतिपाद्यपरतत्त्वनिर्णयालाभनिमित्तिका वा ।

यद्वा, श्रीनारदस्य भगवतः सार्वज्ञ्ययोगेऽपि सर्वलोकोपकारार्थकावतारत्वादन्येषां गुर्वभिगमनप्रकारसंग्राहणार्थिका वा । न तद्विरुद्धप्रख्यापनार्था । अन्यथा सर्वविद्यास्थानानां वेदादीनां सर्वेषां बाधप्रसङ्गात् । भूमविद्याया अपि साम्न एवैकदेशत्वेन तदन्तर्भूततया तन्निषेध्यत्वविरोधाच्च ।

यथा वा "प्रातः प्रातरनृतं ते वदन्ति,पुरोदयाज्जुह्वति येऽग्निहोत्र" मित्यनुदितहोमनिन्दोदितहोमप्रशंसार्थेति । तथा प्रकृतेऽपि शाण्डिल्याख्यानवचनस्य तत्प्रशंसार्थत्वान्न वेदविरुद्धतास्फोटनार्थत्वमिति तात्पर्यार्थः ।

तथा च परमसंहितायाम् ।

"अधीता भगवन् वेदाः साङ्गोपाङ्गाः सविस्तराः ।
श्रुतानि च मयाङ्गानि वाकोवाक्यायुतानि च ॥
न चैतेषु समस्तेषु संशयेन विना क्वचित् ।
श्रेयोमार्गं प्रपश्यामि येन सिद्धिर्भविष्यति ॥
वेदान्तेषु यदासारं संगृह्य भगवान् हरिः ।
भक्तानुकम्पया विद्वान् संचिक्षेप यथा सुखम्" ॥

इति । एषामर्थः । हे भगवन् सांगोपाङ्गा वेदा मया श्रुतास्तदङ्गान्यपि श्रुतानि, तथापि संशयेन विना, विना संशयेन सिद्धिर्भविष्यति तच्छ्रेयोमार्गं न पश्यामि, निर्णेतुं न शक्नोमि, तेषां दुरवगाहत्वेन दुर्बोधनार्थकत्वात् ।

अतो यथा श्रीभगवान् स्वभक्तानुकम्पया तान् संशयनिरासपूर्वकं सौकर्येण वेदोक्ततत्त्वं ग्राहयितुं यथासुखं येन सिद्धिर्भविष्यतीति विद्वान् सर्वज्ञो वेदान्तेषु यदासमन्ततः सारं सर्ववेदार्थतत्त्वं संगृह्य स्वाधारणानुग्रहवशात् संचिक्षेप, तद्वदस्वेति शेषः ।

एवं च सर्ववेदान्तवेद्यो जगज्जन्मादिहेतुर्ब्रह्मेशादिकिरीटकोटिभूषितपादपीठो हेयधर्मास्पृष्टमहिमर्दिकृतटः सार्वज्ञ्यवात्सल्यकारुण्याद्यपरिमितस्वाभाविकनित्यकल्याणगुणार्णवो मुमुक्षुध्येयो भगवान् परब्रह्माख्यः श्रीवासुदेव एव परमश्रेयोज्ञापकान.मृग्यजुःसामाथर्वसंज्ञकानां विधिनिषेधादिपञ्चविधवाक्यकदम्बरूपाणां शब्दतोऽर्थतश्च मन्निःश्वासरूपत्वेन दुर्ज्ञेयत्वान्मया विना तद्याथात्म्यस्य वेत्तुमशक्यत्वात् सुरादिभिरपि तद्याथात्म्यज्ञानभावे श्रेयसस्तत्साधनादीनां वा सिद्धेरिति निश्चित्य तत्तदर्थयाथात्म्योपपत्तये, एतदनधिकारिणां पुंसां स्वानुरूपपुरुषार्थसिद्धये च, स्वाश्रितानन्यजनजातमधिकृत्य तेषां स्वस्वरूपगुणादिविषयकतत्त्वज्ञानोपलब्धये स्वयं तान् वेदान् पञ्चरात्राख्यशास्त्रार्थरूपेण विशदं व्याचकार ।

तथा चात्र सर्वस्यापि वेदार्थस्य स्वयमेव श्रीमुखेन निर्णीतत्वात् सर्वांशेनापि तस्य प्रमाणतमत्वं सिद्धमिति संक्षेपः ।

वस्तुतस्तु शक्तिवादनिराकरणपरमिदमधिकरणं, न पञ्चरात्रप्रामाण्यशङ्कागन्धोऽपि । तथाहि, सर्वस्यापि कर्तृजातस्य तत्तच्छक्तिमत्तयैव तत्तत्कार्यकर्तृत्वं दृश्यते, न शक्तिं विना । यत्र यत्कर्तृत्वं, तत्र तच्छक्तिहेतुकम् । यथाग्नेर्दाहकर्तृत्वं दाहकशक्तिहेतुकम् । मणिमन्त्रादिना शक्त्यवरोधे तददर्शनात् ।

ततः शक्तिरेव जगज्जनित्रीति शाक्ता आहुस्तत्राह । "उत्पत्त्यसंभवात्" । नेत्यनुवर्तते । न शक्तेर्विश्वहेतुत्वं संभवति । कुतः । उत्पत्त्यसंभवात् । पुरुषसंसर्गं विना तस्याः सकाशाद् विश्वोत्पत्तेरसंभवात् तस्याः पूरुषसंसर्गोऽस्तीति चेत् । तत्राह । "न च कर्तुः करणम् । तस्यापि शरीरेन्द्रियादिकरणाभावेनानुग्राहकत्वानुपपत्तेः । करणाङ्गीकारे च पूर्वोक्तदोषप्रसङ्गः ।

ननु प्राकृतकरणाभावेऽपि तस्य स्वाभाविकज्ञानबलक्रियेच्छादिकरणमस्तीति चेत् । तत्राह । "विज्ञानादिभावे वा तदप्रतिषेधः" । वाशब्दस्त्वर्थे । तस्य विज्ञानादिभावे तु तदप्रतिषेधः । ब्रह्मवादान्तर्गततया विश्वहेतुत्वं न प्रतिषि-

ध्यते । ब्रह्मणो विश्वोत्पत्त्यङ्गीकारात् । केवलशक्तिकारणवादस्तुच्छ इत्युपसंहरति । "विप्रतिषेधाच्च" । श्रुतिस्मृतिविरोधाच्च शक्तिवादो न श्रेयोऽर्थिभिरादरणीय इति संक्षेपः ॥ ४५ ॥

इति श्रीसनकसंप्रदायप्रवर्तकाद्याचार्यश्रीनिम्बार्कमतानुयायिश्रीमन्मुकुन्दचरणपद्ममकरन्दभृङ्गेण श्रीमत्केशवकाश्मीरिभट्टेन संगृहीतायां वेदान्तकौस्तुभप्रभाख्यायां ब्रह्मसूत्रवृत्तौ द्वितीयाध्यायस्य द्वितीयः पादः ॥ :: :: ॥

॥ अथ ज्ञानसिद्धान्तचन्द्रिका ॥

बर्कलेसंज्ञकमहापण्डितविरचितज्ञानसिद्धान्तमालायाः

अवतारिता ।

तत्र षट्चत्वारिंशत्तमादिपरिच्छेदाः ।

४६—ये खल्वस्मत्सिद्धान्तेषु पिहितमात्रयोरेव नेत्रयोः परितोवर्तमानं सर्वमपि वस्तुजातं सहसैव विनश्येदित्यादय आक्षेपा उद्भाव्यन्ते ते प्रत्युत प्राचीनविदुषां सार्वजनीनसिद्धान्तेष्वेवाऽऽरोपयितुं युज्यन्ते । तेषां ज्ञायमानेतरानात्मकप्रत्यक्षरूपौ रूपालोकावेव चक्षुषा साक्षाद् गृह्येते इति स्वीकारात् । यद्यपि तेषां मध्ये केषां केषां चिद् विदुषां विषयाणां प्रतिक्षणसृष्टिरविश्वास्येव भासते तथापि सामान्यत इदमेव मतं प्राचीनविद्यालयेषु परमसिद्धान्तत्वेन प्रतिपाद्यते । तेषां नये सर्वमिदं भौतिकाधिकरणोद्भूतं जगद् अविरतसृष्टिरूपयेश्वरीयरक्षयैवावतिष्ठत इति सिद्धान्तितत्वात् ।

४७—किंचैषां भौतिकाधिकरणवादोऽपि निर्मूल एव । यावद्विषयाणां प्रत्यक्षीभूतत्त्वेतरसत्तानात्मकत्वस्यैव सर्वसंमत्या नाप्राप्तत्त्वात् । तादृशाधिकरणस्य च पूर्वोक्तदशमादिपरिच्छेदेषु बुध्यगोचरविलक्षणसत्तात्मकताया एव स्पष्टं प्रदर्शितत्वात् । अपरं चात्रद्रष्टव्यम् । संप्रतिलोके प्रायेण सर्वैर्वरं संस्तुतैरपि पण्डितैर्द्रव्यस्य निरवधिविभागभाक्त्वमुच्यते प्रत्युत स्वसिद्धान्तैर्निष्कम्पमुपपाद्यते । तथाच तेषां नयेऽतीन्द्रियस्य परमाणोरप्यनन्ता अवयवाः संभवन्ति । वस्तूनां परिच्छिन्नपरिमाणकत्त्वेन प्रतीतिस्तु तेषां स्वोपलब्धावयवाधिकावयवघटिततया न तावत्तत्कालोपलब्धाऽवयवमात्रघटितत्वाद् अपितु प्रत्यक्षप्रयोजकेन्द्रियस्य तद्गताशेषावयवग्रहणेऽक्षमत्वात् । यतोहि यथा यथा सूक्ष्मदर्शकयन्त्रादिना चाक्षुषशक्तिर्वर्ध्यते तथा तथा चाक्षुषविषया अधिकाधिकावयवघटिताः स्थूलतराश्च प्रतीयन्ते । तत्प्रान्तभागा अपि ये केवलया दृष्ट्या द्रष्टुमपि न शक्यन्ते परिष्कृतायां दृष्टौ सुस्पष्टरेखाकोणादिरूपा दृश्यन्ते । एवमनन्तं नेत्रशक्तिवर्धने विषया अप्यनन्तपरिमाणकाः प्रतीयन्त । परंतु सर्वोऽयं विपरिणामो द्रष्टुरेव न पुनर्दृश्यविषयस्य । एवं च सर्वस्यापि दृश्यजातस्यापरिमितपरिमाणकत्वेन नियताकाररााहित्येन च प्रतीतेः सर्वस्याप्यात्ममात्रनिष्ठत्वं भौतिकाधिकरणवादिनोऽप्यनिवार्यमेव । आत्मपरिकल्पितैरेवत्राखिलैर्विषयैर्जगदिदमापूर्यते । तादृशाधिकरणानां तत्परमाणूनां च रूपपरिमाणादिशून्यत्त्वाल्लौकिकपदार्थानां च रूपादिगुणविशिष्टत्त्वात् ।

४८—सविचारं विलोकिते पञ्चचत्वारिंशत्तमपरिच्छेदप्रदर्शितोप्याक्षेपोनाऽस्मत्सिद्धान्तेषु सयुक्तिकम् आक्षेप्तुं युज्यते । यतश्चक्षुरादिविषयाणां यद्यपि ज्ञायमानेतरानात्मकत्वं ज्ञानाभावे च तेषामविद्यमानत्वं वदामस्तथापि नैतावता पुरुषविशेषस्य तदज्ञाने एव वस्त्वभावमभिप्रेमः । कतिपयपुरुषाणां तज्ज्ञानाभावेऽपि पुरुषान्तराणां तज्ज्ञानस्य संभवात् । अत एव यत्र क्वापि विषया आत्मनोऽन्यत्र न सन्तीत्युच्यते न तत्रात्मपदेन चैत्रमैत्रादिविशेषात्मा विवक्ष्यते किंतु सामान्यतः सर्व एवाऽऽत्मानः । एवं चोक्तसिद्धान्तेभ्योविषयाणां प्रतिक्षणोत्पत्तिविनाशशालित्वं तत्प्रत्यक्षान्तरालकालेऽविद्यमानत्वं च निगमयितुं न शक्यत इति ।

४९—अथ पञ्चम आक्षेपः । ननु परिमाणाकारयोरात्ममात्रनिष्ठत्वे आत्मनः सपरिमाणत्वं साकारत्वं च प्रसज्येयाताम् । परिमाणाकारयोर्धर्मरूपत्त्वात्तदाधारभूते आत्मरूपे धर्मिणि तयोर्विधातुं युक्तत्वादिति चेन्न । अस्य धर्मधर्मिभावस्य लौकिकधर्मधर्मिभावादन्यादृशत्वात् । परिमाणादीनामात्मनिष्ठत्वं चात्मज्ञातत्त्वस्वरूपमेव न पुनरात्मधर्मत्त्वरूपम् । [नहि शुक्लनीलादिरूपं जानन् देवदत्तः शुक्लः कृष्ण इति वा कथ्यते] एवं च परिमाणज्ञातृत्वाद् यथाऽऽत्मनो न परिमाणवत्त्वं तथा नीलपीतादिरूपद्रष्टृत्त्वान्नीलपीताद्यात्मकत्त्वं च न संभवति । वस्तुतस्तु प्राचीनविदुषां धर्मधर्मिभवो निर्मूलो दुर्ज्ञेयश्च । तथा हि, तेषांनये पाशः कठिनोदीर्घश्चतुरस्रोभवतीत्यादिषु वाक्येषु पाशपदेन रूपपरिमाणकठिनत्वातिरिक्तमेव किंचिदाधारपदाभिधेयम् अभिप्रेयते यस्मिंस्ते कठिनत्वादयोधर्मास्तिष्ठन्तीत्युच्यते । परंतु न किमप्येतदहं बुध्यामि । मम तु पाशः कठिनत्वादि पदाभिहितवस्त्वनतिरिक्त एव प्रतिभाति । न तावत् पाशः कठिनोदीर्घश्चतुरस्रोऽस्तीति वाक्येन पाशपदाभिधेयं किंचनाऽनिर्वाच्यमुद्दिश्यम् उद्दिश्य कठिनत्वादयोधर्माविधीयन्ते किंतु पाशपदार्थ एव स्फुटं प्रदर्श्यते ।

५०—अथ षष्ठ आक्षेपः । ननु जडद्रव्यगतिभ्यां बहवः पदार्था उपपाद्यन्ते । तयोरेव प्रत्याख्यातयोः सर्वम् पदार्थविज्ञानशास्त्रमेवोच्छिद्येत । गतिस्थित्यादि विषयकाणां शिल्प

सिद्धान्तानां यथावत् प्रतिपादकानि मूलतत्त्वानि चोन्मूलयेरन्। किंबहुना सर्वे पदार्थविज्ञानशास्त्रज्ञाः प्राचीना अर्वाचीना वा भौतिकाधिकरणसद्भावं मत्त्वैव पदार्थविद्यामधिजग्मुरितिचेच्छृणु। येषां येषां विषयाणामुपपादनं जडद्रव्यसत्तासापेक्षमुच्यते ते ते सर्वे विषया अन्यथा व्याप्तिग्रहादिनाप्युपपादयितुं शक्यन्ते। तथा हि। विषयोपपादनं नाम ज्ञानविशेषोत्पत्तिकारणनिरूपणमेव तच्च ज्ञानविशेषस्य ज्ञानान्तरेण सहान्वयस्यासकृद्दर्शनादुप्तत्वेन व्याप्तिग्रहेणैव सम्यङ् निश्चीयते। तादृशभौतिकाधिकरणाभिधजडद्रव्यं तु कया रीत्याऽऽत्मनि ज्ञानान्याविष्करोतीति तु तदभिमानिना त्वयाप्युपपादयितुं दुर्घटमेव। एवंच पदार्थविज्ञानशास्त्रेऽपि तथाविधजडद्रव्यस्य न कोप्युपयोगः। किंच विषयाणां विषयान्तरकारणकत्वं वदन्तोऽपि न तावत्तत्कारणत्वेन तादृशानिर्वाच्यभौतिकाधिकरणान्यनुसंदधतेऽपितु रूपपरिमाणगत्यादिगुणानेव। परंत्वेषामपि ज्ञानरूपतया जडात्मकत्वाच्च कस्यापि कारणं भवितुमर्हन्तीत्यपि बोध्यम्। निरूपितं चैतत्पञ्चविंशतितमे परिच्छेदे पूर्वमेव।

५१—अथ सप्तम आक्षेपः। ननु सर्वाणि भौतिकानि कारणानि प्रत्याख्यायाऽऽत्मन एव साक्षात्सर्वकारणत्वस्य स्वीकारे वह्निस्तापयति जलं शीतलयतीत्यादिलौकिकप्रयोगाणां स्थाने आत्मा तापयति सएव शीतलयतीत्याद्येव प्रयोक्तुं युक्तम्। परंतु तथात्वे लोकोपहासापत्तिरितिचेद्भाषणादौ लोकसंप्रदाय एवानुसरणीयः। ज्ञेयं तु शास्त्रसंमतमेवेति ब्रूमः। यथा खलु भूरेव रविं परितो भ्रमति रविस्तु निश्चल एवेति परमतत्त्वार्थस्य कोपर्निकसाचार्याविष्कृतस्य सोपपत्तिकं पक्षपातिनोऽपि सुधियः सूर्य उदेत्यस्तं याति माध्याह्निकरेखां च स्पृशतीत्यादिलोकसंमतमेव भाषन्ते न पुनः स्वमतानुरोधेन प्रचलितवचनशैलीं विकुर्वते। अभिनववचनरीत्यनुसरणस्योपहासजनकत्वात्। एवं चास्मत्सिद्धान्तस्वीकारे प्रचलितभाषापरिवर्तनमनावश्यकमेव।

५२—इदमत्र बोध्यम्। सर्वासामुक्तीनामुपयोगो वक्तृश्रोत्राद्यभिप्रायाद्याविष्करणं स्वस्वहितार्जनानिष्टापाकरणादौ तेषां प्रवर्तनादिकमेव। यावत्ताभिरिमानि कार्याणि निर्वाह्यन्ते तावत् ता उक्तयः कामं यथार्थविचारदृष्ट्या वितथा अपि लोकव्यवहारे उपादेया एव। तासामयाथार्थ्यं त्वनिवार्यमेव। प्रायेण सर्वस्याप्यौचित्यस्य लोकव्यवहारायत्तत्वेन तासामपि सर्वसाधारणजनमतैकानुरोधित्वात्तादृशमतानां च प्राचुर्येण दोषवत्त्वात्। एवंच परमयथार्थेष्वपि शास्त्रीयविचारेषु भाषायाः स्वाभाविकप्रावण्यशक्त्योः परिवर्तनं कर्तुमशक्यम्, येन वैतण्डिकानां कथमपि तत्र दोषदानस्यावसरो न मिलेत्। परंतु विचारशाली गुणग्राही च श्रोता वक्तृभाषासंप्रदायापाटवप्रयुक्तदोषाभासानविगणय्य पूर्वापरवाक्यसंबन्धं विमृशंस्तदभिधेयार्थमेव संचिनुयात्।

५३—यत्तु कतिपये प्राचीना नवीनाश्च विद्वांसः सर्वेषां साक्षादुपलब्धानां विषयाणां निष्क्रियत्वात्स्वसाजात्येन तदाधारभूतानाम् आत्मनोऽन्यत्र वर्तमानानां द्रव्याणामपि जडत्वात् प्रत्यक्षाणाम् अन्यथाऽनुपपत्त्या परमेश्वर एव साक्षात् तत्प्रयोजक इति वदन्तो बाह्यजडद्रव्यसत्तामङ्गीकृत्यापि परमेश्वरस्यैव सर्वकर्तृत्वमाहुः। तदपि न शोभनम्। निरुपयुक्तानन्तवस्तुसृष्टिकल्पनाया निर्मूलत्वात्। किंचेश्वरस्यैव सर्वविधकार्यजनकत्वे भवदभिमतद्रव्याणां च जडत्वे किमितीश्वर इमान्यतीन्द्रियाणि सर्वथा निरुपयुक्तान्यनन्तान्यन्तर्गडुसदृशानि जडद्रव्याण्यपार्थमेव सृजेत्। नैतावताऽस्यावस्तुस्थितेरसंभवमेव कथयामः किंत्वेतादृश्याः कल्पनाया निर्युक्तिकत्वम् उपपत्तिराहित्यं चेति।

केशवशास्त्री
मराठोपाह्वः

SANSKRIT and ENGLISH DICTIONARY, being an abridgment of PROFESSOR WILSON'S DICTIONARY with an Appendix explaining the use of affixes in Sanskrit, by PANDIT RÁM JASAN, cloth bound and lettered. Rs. 10.

THE RÁMÁYAN of VÁLMÍKI, translated in English verse by RALPH T. H. GRIFFITH, M. A. Vol. II. Rs. 6. Vol. III. Rs. 4-8. Vol. IV. Rs. 6. and Postage 6 annas each.

THE LAGHU KAUMUDÍ, a Sanskrit Grammar with an English version, commentary and references by DR. BALLANTYNE, late Principal of the Sanskrit College, Benares, re-edited by RALPH GRIFFITH, M. A., Principal of the Sanskrit College, Benares. *Price* 8 *Rupees.*

"The Translation of Laghu Kaumudí made by the late Dr. Ballantyne has enabled even beginners to find their way through the Labyrinth of Native Grammar." *Prof. Max Müller.*

"THE BIBLE FOR THE PANDITS." The first three chapters of Genesis diffusely and unreservedly commented, in Sanskrit and English,—with an introduction, by JAMES R. BALLANTYNE, LL. D. Rs. 3.

THE BÁLARÁMÁYANA, a Drama by RÁJAŚEKHARA, edited by PANDIT GOVINDA DEVA ŚÁSTRI, late Professor of Hindu Astronomy in the Sanskrit College Benares, Rs. 2.

THE PRASANNARÁGHAVA, a Drama by Jaya Deva, edited by PANDIT GOVINDA DEVA ŚÁSTRI. Rs. 1-4

PRINTED AND PUBLISHED BY THE PROPRIETORS, E. J. LAZARUS AND CO., AT THE MEDICAL HALL PRESS, BENARES.

काशीविद्यासुधानिधिः

श्रीगणेशाय नमः

श्रीमद्विजयिनीदेवीपाठशालोदयोदितः । प्राच्यप्रतीच्यवाक्पूर्वापरपक्षद्वयान्वितः ॥ १ ॥
अङ्करश्मिः स्फुटयतु काशीविद्यासुधानिधिः । प्राचीनार्यजनप्रज्ञाविलासकुमुदोत्करान् ॥ २ ॥

THE PANDIT.

A Monthly Journal, of the Benares College, devoted to Sanskrit Literature.

No. 93. Benares, February 2nd, 1874. Vol. VIII.

॥ चिन्तामणेः शब्दखण्डम् ॥

(१) आख्यातस्य यत्नवाचकत्वादचेतने रथो गच्छतीत्यादौ आख्याते व्यापारलक्षणा । तथाहि । पचतीत्यादावाख्यातस्य यत्नो वाच्यः, पचति पाकं करोतीति यत्नार्थककरोतिना सर्वाख्यातविवरणात् । वृद्धव्यवहारादिवद्बाधकाभावे (२) विवरणादपि व्युत्पत्तेः । (३) द्वन्द्वादिसमासस्य विग्रहेण विवरणे विग्रहार्थेपि न शक्ति,रन्यलभ्यत्वात् । किं करोतीति यत्नप्रश्ने पचतीत्युत्तरस्य यत्नार्थत्वं विना ऽनुपपत्तेरित्याचार्याः ।

(४) अत्र वदन्ति । आख्यातस्य (५) करोतेश्च न यत्नार्थत्वं, रथो गच्छति जानाति यतते निद्रातीत्यत्र धात्वर्थानुकूलयत्नाभावे ऽप्याख्यातप्रयोगात्, (६) गमनं करोतीति करोतिना तत्राख्यातविवरणाच्च । तत्र व्यापारस्य करोत्यर्थत्वे चेतनेपि तथा । न च तत्राख्यातकरोत्योर्गौणत्वम् । मुख्ये बाधकाभावात् । अत एव प्रश्नोत्तरयोर्न यत्नार्थत्वं, किं तु कृञः (७) क्रियावाचित्वमेव, तेन किं करोतीति क्रियामात्रप्रश्ने पचति गच्छतीति क्रियाविशेषेणोत्तरमपि समञ्जसं भवति । अथ क्रियाजन्यत्वाविशेषेपि यत्नजन्यत्वाजन्यत्वाभ्यां घटाङ्कुरयोः कृताकृतव्यवहारात् तृजन्तकृधातुव्युत्पन्नकर्तृपदस्य कृत्याश्रयवाचकत्वाच्च कृञो यत्नार्थत्वम् । क्रियामात्रार्थत्वे कृञः क्रियाश्रयः कर्तृपदार्थः स्यात्, तथा च कारकमात्रे ऽतिप्रसङ्गः । एवं कृञो यत्नार्थत्वे तेन चाख्यातविवरणात्तस्यापि यत्नोर्थः । तदुच्यते ।

कृताकृतविभागेन कर्तृरूपव्यवस्थया ।
यत्न एव(८)कृतिः (९) पूर्वा परस्मिन्सैव भावना ॥

सैवाख्यातार्थो भावनोच्यते इति चेन्न । (१०) बीजे-

॥ शब्दचिन्तामणिव्याख्या रुचिदत्तीया ॥

(१) आख्यातस्येति । तथा च लक्षणाप्रसङ्गेनैवाख्यातार्थनिरूपणमत्रेति नानवसरपराघात इति भावः । (२) विवरणादपीति । तस्य प्रसिद्धार्थपदसामानाधिकरण्यपर्यवसन्नत्वादिति भावः । बाधकं विनेत्यस्य व्यावर्त्यमाह । (३) द्वन्द्वादीति ।

(४) अत्रेति । भट्टा इति शेषः । (५) करोतेश्चेति । तथा तेन विवरणेपि न यत्नार्थत्वमिति भावः । करोतेश्चेत्यत्र हेतुमाह । (६) गमनमिति । उक्तयुक्त्या ऽऽख्यातस्य व्यापारार्थत्वे रथो गच्छति गमनं करोतीत्याख्यातस्य करोतिना विवरणात्तस्यापि व्यापारार्थत्वमिति भावः । (७) क्रियेति । व्यापारेत्यर्थः । (८) कृतिरिति । करोत्यर्थ इत्यर्थः । नन्वेवमाख्यातस्य कृतिवाचकत्वे भावनाख्यातार्थ इति भज्येतेत्यत आह । (९) पूर्वेति । पूर्वापरीभूतव्यापारकलाप इत्यर्थः । तथा च फलानुकूलपूर्वापरीभूतव्यापारकलापरूपधात्वर्थविषयतया फलभावकत्वेन सैव कृतिर्भावनेत्युच्यतइति भावः । उक्तविभागोसिद्ध इत्याह (१०) बीजेनेति । तृजन्तेत्या-

नाङ्कुरः कृतः, स्वर्गादिना सुखं कृतं, बीजमङ्कुरं करोतीति यत्नं विनापि व्यवहारात् । (११) कर्तृपदं च न यौगिकम् । तथाहि । कृञो यत्नार्थत्वे तृचश्च कृत्यर्थत्वे (१२) कर्त्रर्थत्वे वा धातुप्रत्ययार्थयोः कृत्योः कृतिकर्त्रोर्वा परस्परमनन्वयः, (१३) कृतौ (१४) कृतिजन्यत्वस्य तद्विषयत्वस्य चाभावात्, कृतिविशिष्टस्य कृतिनिराकाङ्क्षत्वाच्च । एवं कृञः क्रियार्थत्वे तृचश्च क्रियाश्रयवाचकत्वे तयोः परस्परमनन्वय एवेत्यु(१५)भयदर्शने कर्तृपदं (१६) कर्मादिपदवद्रूढमेव । रूढिश्च कृत्याश्रये(१७) क्रियाश्रये वेत्यन्यदेतत् । तथा च कृताकृतविभागेन कर्तृरूपव्यवस्थया च न कृञो यत्नार्थत्वमिति । किं चाख्यातस्य करोतेश्च न यत्नार्थत्वम् । पाकाय यतते पाकं करोतीत्यादौ यत्नद्वयस्य यत्नविषयकयत्नस्य चाप्रतीतेः, प्रकृतिप्रत्ययार्थयोः साम्येनान्वयानुपपत्तेः, पौनरुक्त्याद्(१८)एकत्रैव विध्यनुवाददोषाच्च । ननु प्रकृतेस्तदर्थत्वेपि प्रत्ययस्य तदर्थत्वं न दोषाय । एको द्वौ बहवः एषिषिषतीत्यत्र च व्यभिचारात् । यत्तु द्वितीयसंख्येच्छादिकल्पनवदिहापि द्वितीययत्नकल्पनमिति । तन्न । द्वितीयसंख्येच्छायत्नाभावात् । वस्तुतस्तु प्रत्येकं सामर्थ्यावधृतौ संभेदे तूभयोरुपस्थितेरावश्यकत्वे(१९)प्येकस्यानन्वयेप्यदोषात् । (२०) पाकाय यतते पाकं कुर्यादित्यत्र कृत्यर्थकाख्याते त्वयापि तथैवाङ्गीकारादिति चेन्न । (२१) एको द्वौ बहव इत्यत्र नामार्थस्य विभक्त्युपनीतसंख्यान्वयावगमयोग्यत्वात् । (२२) लडादेर्यत्नसामर्थ्यानवधारणा(२३)ल्लिङः पचेतेत्यत्र कृतौ सामर्थ्यावधारणाच्च । (२४) अथायत्नार्थकधातुपराख्यातस्य यत्नार्थत्वं, तेन यततइत्यत्र नानन्वयः । अचेतने चाख्यातप्रयोगो गौण एव । न च वृत्त्यन्तरेणापि प्रयोगसंभवे शक्तिकल्पना युक्ता । (२५) यद्वानुकूलयत्ने प्रवृत्तं पदं तदेकदेशे ऽनुकूलमात्रे प्रयुज्यते । (२६) विशुद्धिमात्रं पुरस्कृत्य ब्राह्मणे श्रोत्रियपदवत् । अचेतने च मध्यमपुरुषोत्तमपुरुषौ न भवत एवोपपदयोर्युष्मदस्मदोश्चेतनार्थत्वात् । (२७) भवतु वा गौणएव, लोकस्यापर्यनुयोज्यत्वादितिचेन्न । अचेतने आख्यातस्य मुख्यत्वे बाधकाभावेन गौणत्वाभावात् । तस्मादाख्यातस्या(२८)नुकूलत्वेन व्यापारो वाच्य इति भट्टाः । तेन चेतनाचेतनयोर्धात्वर्थानुकूलव्यापारस्य सत्त्वादाख्यातप्रयोगो मुख्य एव । न चैवं पथि श्रमशयाने पचतीति स्यात्, श्रमशान्तिद्वारा शयनस्य पाकानुकूलव्यापारत्वादिति वाच्यम् । तत्र प्रयत्नविशेषस्यैवानुकूलव्यापारविशेषस्य वाच्यत्वात् । अन्यथा यत्नवाच्यत्वे तण्डुलानुकूलयत्नवति पचतीति स्यात् । एवमचेतनेपि करोतिनाख्यातविवरणात् करोत्यर्थोपि व्यापारविशेष एव । कथं तर्हि चैत्रः पचतीति पाकानुकूलयत्न-

---

दिकमन्यथासिद्धमित्याह । (११) कर्तृपदं चेति । नन्वेवं चैत्रः पक्तेत्यादावेवाश्रयाश्रयिभावेनान्वयः स्यान्न त्वभेदेनेति नामार्थयोरित्यादिव्युत्पत्तिविरोध इत्यरुचेराह । (१२) कर्त्रर्थत्वे वेति आद्यमाह । (१३) कृताविति । द्वितीये त्वाह । (१४) कृतीति । (१५) उभयेति । कृत्याश्रयः क्रियाश्रयो वा कर्तेत्युभयमतइत्यर्थः । (१६) कर्मादीति । कर्मकरणपदयोरुणादिप्रत्ययान्तकृधातुव्युत्पादितयोः प्रत्ययशक्त्यकल्पने योगाभावाद्यथा केवलरूढिस्तथेहापीत्यर्थः । यदि रथादिसाधारणः कर्तृपदप्रयोगस्तत्राह । (१७) क्रियाश्रये वेति । ननु पौनरुक्त्यमनुवादे न दोष इत्यत आह । (१८) एकत्रेति । केवलयोर्द्वित्वाख्यातयोरसाधुत्वात्परस्परसमभिव्याहारेणान्यतरस्य यत्नविधायकत्वमपरस्यानुवादकत्वमिति प्राप्त्यप्राप्तिनिबन्धनयोस्तयोरेकत्र वाक्ये विरोध इत्यर्थः । केचित्तु तदंशे गृहीतग्राहित्वेनाप्रामाण्यं स्यादिति भट्टमतमाश्रित्य दूषणमिदमित्याहुः । (१९) एकस्येति । नन्वेकस्य प्रत्ययार्थस्य नानन्वयः । कर्त्तरि संख्यानन्वयप्रसङ्गात्, नापि प्रकृत्यर्थस्य, स्वार्थबोधकव्युत्पत्तिभङ्गापत्तेरित्यतः प्रतिबन्दिमाह । (२०) पाकायेति । (२१) एको द्वाविति । तत्र प्रत्येकं सामर्थ्यावधारणादन्वययोग्यत्वमस्ति, केवलमाकाङ्क्षाविरहात् प्रत्ययार्थस्यानन्वयः । (२२) लडादेरिति । न चैवमपि प्रकृत्यर्थगतव्युत्पत्तिविरोध इति वाच्यम् । बोधकत्वे सत्येव तथा नियमात्, लडादेस्तु यत्नसामर्थ्यमेव न स्ववधारितं, मानाभावा,दतस्तत्र नेयं गतिरिति भावः । यतेतेत्यादौ तु सैव गतिरित्याह । (२३) लिङ इति । (२४) अथेति । यत्नार्थकयोगे तु संख्यावर्त्तमानत्वादिकमेवार्थ इति भावः । (२५) यद्वेति । एतत्त्वनुकूलत्वांशेपि शक्तिमभ्युपेत्योक्तम् । वस्तुतस्तस्य संसर्गमर्यादया भानसम्भवान्न तत्र शक्ति,स्तथा सति लाघवेनानुकूलत्वमात्रस्यैव शक्यत्वापत्तौ रथादौ गौणत्वादिकल्पनाप्रसङ्गाभावश्चेति बोध्यम् । (२६) विशुद्धेति । विशुद्धमातापितृजन्यसाङ्गवेदाध्येतरि शक्तमेकदेशे यथा प्रयुज्यतइत्यर्थः । (२७) भवत्विति । भित्तिलिखितोहमस्मीत्यादौ । (२८) अनुकूलत्वेनेति । व्यापारत्वापेक्षया तस्य लघुत्वादित्यभिमानेनेदं, व्यापारत्वेत्यपि

वत्प्रतीतिः । आक्षेपादिति चेन्न । आख्यातार्थेन व्यापारेण संख्यया वा यत्नानाक्षेपात् । तयोः प्रयत्नं विनापि सत्त्वात् । (२८) नापि कर्त्ता । (३०) द्रव्यमात्रस्य कर्तृत्वात् । यत्नवतश्च कर्तृत्वे (३१) आख्यातेन तदभिधाने यत्नस्याभिधानात् । नापि धात्वर्थमात्रेण, तस्य प्रयत्नं विनापि सत्त्वात् । नापि यत्नो धात्वर्थः । (३२) क्रियायास्त-(३३)त्फलस्य वा धातुवाच्यत्वात् । अन्यथा पाक इत्यत्रापि यत्नानुभवप्रसङ्गादिति चेन्न । धात्वर्थविशेषपाकादिना यत्नाक्षेपात्तस्य प्रयत्नं विना ऽनुपपत्तेः । अथ पचतीत्यस्य पाकयत्नवानिति विवरणाद् यत्नार्थतेति चे,त्तर्हि कर्त्रर्थतापि स्यात् । नहि पाकयत्न इत्येव विवरणम् । पचतीत्यस्य तात्पर्यविवरणं तत् तच्चाक्षेपेण निर्वहतीति चे,त्तुल्यं यत्नेपि । कथं तर्हि रथो गच्छति विद्यते व्योमेतिभावनानुभव इति चेत् । न । कथं चिद् भावनाया धात्वर्थान्वययोग्यत्वेन त्वयापि तत्र गौणत्वाभ्युपगमादिति । उच्यते । चैत्रः पचतीत्यत्र पाकानुकूल(३४)यत्नानुभवाद्यत्न एवाख्यातार्थः, लाघवाद्, न त्वनुकूलो व्यापारः । (३५) यत्नत्वापेक्षया व्यापारत्वस्योपाधित्वेन गौरवात् । न चाचेतनेपि आख्यातस्य मुख्यत्वार्थमनुगतो व्यापारः पदशक्यो मुख्यत्वसंभवे त्यागायोगादिति वाच्यम् । शक्तिग्राहकेन प्रमाणेन लघुनि शक्तिपरिच्छेदात् । अचेतने प्रयोगस्य वृत्त्यन्तरेणापि संभवाद् मुख्यत्वार्थं शक्तिकल्पने च वृत्त्यन्तरोच्छेदः । एतेन व्यापारवाचकाख्यातस्य यत्नसाध्यार्थकपच्यादिधातूपसंदानेन व्यापारविशेषयत्नोपस्थापकत्वमिति निरस्तम्,लाघवेन यत्नस्यैव शक्यत्वात् ।

(३६) ननु यत्नो नाख्यातार्थः पाकत्वेन पाकस्य यत्नसाध्यत्वानुमित्या यत्नलाभादित्युक्तमिति चेत्, न । (३७) चैत्रः पचतीत्यत्र पाकानुकूलवर्त्तमानयत्नवान् प्रतीयते, न च पाकस्य वर्त्तमानयत्नेन व्याप्तिरस्ति, अतीतानागते व्यभिचारात् । न च धात्वर्थेनानुमिते यत्ने आख्यातेन वर्त्तमानत्वान्वयबोधः संभवति । यत्नस्यापदार्थत्वात् । स्वार्थव्यापारस्य वर्त्तमानत्वबोधनेनाख्यातस्य पर्यवसितत्वाच्च । अथ चैत्रः पाकानुकूलवर्त्तमानव्यापारवानिति शाब्दबोधानन्तरं चैत्रः पाकानुकूलवर्त्तमानयत्नवान्, चेतनत्वे सति पाकानुकूलवर्त्तमानव्यापारवत्त्वाद्, मैत्रवत् । अनुमानं विना च पाकयत्ने वर्त्तमानत्वज्ञानमाख्यातस्य यत्ने शक्तिभ्रमादिति चेत्, न । यत्नाभावकालेपि तज्जन्यव्यापारस्य वर्त्तमानतया व्यभिचारात् । किं च व्यापारस्य वाच्यत्वं तल्लिङ्गकं वर्त्तमानयत्नानुमानमिति कल्पनाद् वरं यत्नवाच्यत्वं, लाघवात् । न चाचेतनेप्याख्यातस्य व्यापारवाचकत्वावधारणाद् एवं कल्पनेति युक्तम् । गौणतया शक्तिभ्रमेण वा तत्राख्याताद्व्यापारावगमोपपत्तेः । यत्नविगमदशायां तज्जन्यव्यापारकाले पचतीत्यत्र वर्त्तमानव्यापाराभिधानमाख्यातेन (३८) लक्षणया, यथा रथो गच्छतीत्यत्र । अतो ऽन्यलभ्यत्वान्न तदनुरोधेन व्यापारे शक्तिः । अन्यथा तवापि (३९) यत्नकाले पचतीति न स्यात् । तस्माल्लडाख्यातं, (४०) यत्नवाचकम्, आख्यातत्वात्, लिङादिवत् । तर्कश्चोक्त एव । एतेन फलानुकूलो व्यापारो धात्वर्थः, आख्यातवाच्या (४१)

बोध्यम् । (२९) नापि कर्त्तेति । आख्यातार्थेनेत्यनुषङ्गः । कर्तृपदं व्यापारवत्परं यत्नवत्परं वा, आद्ये । (३०) द्रव्येति । व्यापारवन्मात्रस्य कृतिव्यभिचारित्वादित्यर्थः । अन्त्ये यत्नेति (३१) आख्यातेनेति । अन्यथानुपस्थितस्याक्षेपकत्वानुपपत्तेरिति भावः । (३२) क्रियाया इति । व्यापारस्येत्यर्थः । मण्डनमतमाह । (३३) फलस्येति । (३४) यत्नानुभवादिति । अन्यथाक्षेपेपि न स्यादिति भावः । स्वमते यत्नत्वं जातिरित्यभिप्रेत्याह । (३५) यत्नत्वेति । व्यापारत्वस्येत्युपलक्षणमनुकूलत्वस्येत्यपि बोध्यम् । न चास्य सामान्यत्वेन तथात्व,मत एव कार्यत्वं कर्तृजन्यतावच्छेदकमिति वाच्यम् । लघोर्विशेषस्य संभवे सामान्यस्यापि गुरोस्त्यागात् ।

(३६) नन्विति । अन्यलभ्यत्वाच तत्र शक्तिरित्यर्थः । ज्ञानद्वयकल्पनागौरवदोषे सत्येवाह । (३७) चैत्र इति । तथा च तादृशप्रतीतिबललभ्यैवेत्यर्थः । (३८) लक्षणयेति । न चैवं शक्त्या वर्त्तमानत्वाभिधाने युगपद्वृत्तिद्वयविरोध इति वाच्यम् । विशिष्टलक्षणामादाय तत्त्वात्, मणिकृन्मते तद्विरोधाभावाच्च । नव्यास्तु यां शक्तिमपेक्ष्य लक्षणा ऽऽश्रीयते ताभ्यामेकदा प्रवृत्तौ तद्विरोधः, प्रकृते च विभक्तित्वेन संख्यायामाख्यातत्वेन भावनायां लत्वेन वर्त्तमानत्वे शक्तित्रयमिति न दोषावकाश इति वदन्ति । (३९) यत्नकालइति । यत्नत्वप्रकारकप्रतीतिपरत्वज्ञानकालइत्यर्थः । अन्यथा व्यापारत्वेन यत्नस्यापि शक्यतायाः संगतेरिति । (४०) यत्नवाचकं, यत्नत्वेनेति शेषः । न चैवं तस्य यत्नपदपर्यायत्वापत्तिः, इष्टत्वात् । अतिरिक्तवर्त्तमानत्वाद्यभिधायकत्वेनातथात्वाद्वा । (४१)

संख्यैव, तेन चैत्रः पचति रथो गच्छतीत्यत्र चैत्ररथयो(४२)र्धात्वर्थानुकूलव्यापारवत्त्वप्रतीतेर्मुख्य एव प्रयोगः । पचतीत्यत्र यत्नलाभो धात्वर्थेनाक्षेपादिति विक्लित्त्यनुकूलव्यापारस्य यत्नं विनानुपपत्तेरिति गुरुमतमपास्तम् । पचतीत्यस्य पाकानुकूलयत्नवर्तमानत्वस्याक्षेपाद(४३)लाभेनाख्यातार्थकत्वात् । यत्तु रत्नकोशकारोक्तं धात्वर्थो व्यापारः, आख्यातार्थ उत्पादना, सा चोत्पादकता सैव भावना, पचतीत्यादौ पाकमुत्पादयतीति विवरणात् । धात्वर्थोत्पादकता च चेतनाचेतनयोरिति सर्वत्राख्यातप्रयोगो मुख्य एव । यतते जानातीत्यादावपि यत्नं ज्ञानमुत्पादयतीत्यर्थात् । न तु व्यापारो यत्नो वाख्यातार्थः, यततइत्यादौ मुख्यत्वे सति गौणत्वस्यान्याय्यत्वात् । आख्यातार्थविवरणं करोत्यर्थोऽप्युत्पादकतैव, पाकं करोतीत्यादौ करोत्यर्थस्योत्पादयतीति विवरणात् । घटं करोतीत्यत्र कृञर्थश्चोत्पत्तिरेवावगम्यते । अत एव किं करोतीति सामान्येनोत्पादनाप्रश्ने पचतीति पाकोत्पादनाविशेषेणोत्तरमपि समञ्जसम् । चैत्र उत्पादयतीत्यत्र धात्वर्थ एवोत्पादना चैत्रेणान्वेति । आख्यातार्थ उत्पादना ऽनन्वितैवोत्पत्तेरुत्पत्त्यभावात् । (४४) वस्तुतस्तूत्पादयतीत्यत्र धात्वर्थ एवोत्पादना । अतोनुत्पादनार्थधातूत्तरवर्त्तिन आख्यातस्यानन्यलभ्यतयोत्पादना वाच्या । पचतीत्यादौ यत्नलाभः पाकादिना धात्वर्थेनाक्षेपान्न तूत्पादनामात्रेण व्यभिचारादिति । तदप्यत एव निरस्तम् । पचतीत्यत्र यत्नप्रतीतेर्यत्न एवाख्यातार्थो लाघवान्न तूत्पादनात्वमुपाधितया गौरवात् । पाकानुकूलवर्त्तमानयत्नस्याक्षेपादिनाप्यलाभाच्च ॥ वस्तुतस्तु चैत्रो जानातीच्छति यतत इत्यत्र ज्ञानादिमत्त्वं चैत्रस्य प्रतीयते न तूत्पादकत्वं, अचेतने ज्ञानोत्पादके शब्दलिङ्गेन्द्रियादौ जानातीत्यादिप्रयोगप्रसङ्गात् । घटं जानातीत्युक्ते घटज्ञानवान्न वेति संशयापत्तेश्च । अचेतनस्यापि ज्ञानोत्पादकत्वात् । शब्दादिकं ज्ञापयतीति चानुभवो न जानातीति, तस्माल्लाघवात्पचति पक्ष्यत्यपाक्षीदित्यत्रातीतानागतवर्त्तमानयत्नप्रतीतेश्च यत्न आख्यातवाच्यस्तेन यत्नस्य वर्त्तमानत्वादिकमाख्यातेनाभिधीयते, प्रकारान्तरेण तदलाभात् । (४५) जानातीच्छति यतते निद्रातीत्यत्र (४६) धात्वर्थ एव यत्नादिश्चैत्रेणान्वेति, यत्नादिमांश्चैत्र इत्यनुभवात् । धात्वर्थे च यत्नादौ नाख्यातार्थयत्नान्वयः । यत्नादिविषयकयत्नस्याभावात्, रथो गच्छतीत्यत्राख्याते व्यापारलक्षणा, तेन गत्यनुकूलव्यापारवत्त्वमात्रं रथस्य प्रतीयते । (४७) अथ पाकानुकूलैककृतिकाले पचतीतिवत् कृतेरत्यये ऽग्रिमकृतेरनुत्पादे च मध्ये ऽप्यपाक्षीत्पक्ष्यतीति च स्यात् । न च ध्रुवपदवत् कृतिप्रचयस्य शक्यत्वात्प्रचयस्य ध्वंसे प्रागभावे वा ऽपाक्षीत् पक्ष्यतीति प्रयोग इति वाच्यम् । एवं हि पचतीति न स्यादेव एकदा कृतिप्रचयस्यासत्त्वात् । अथ भूतभविष्यतोः (४८) कृत्यभावनिरूप्यत्वं कृतिकाले च कृत्यभावो नास्ति । प्रतियोगिजातीयकृत्यभावस्यासत्त्वादिति चेन्न । (४९) प्रागभावप्रध्वंसयोः कृतिविशेषप्रतियोगित्वेन कृतिकालेपि सत्त्वात् । तयोः सकलकृतिप्रतियोगिकत्वासंभवात् । ननु फलायोगव्यवच्छिन्ना कृतिः शक्या, ऽत एव पाकानुकूलतण्डुलक्रयकाले पचतीति न प्रयोगः । एवं चरमकृतिकाले पचति तत्प्रागभावकाले पक्ष्यति तद्ध्वंसकाले चापाक्षीदिति न मुख्यप्रयोगः तत्पूर्व पचतीति गौण एवेति चे,त्तर्हि मध्येपि पक्ष्यतीति स्यात्

संख्यैवेति । एवकारव्यवच्छेद्यं व्यापारमात्रं तेन वर्त्तमानत्वादेस्तदर्थत्वेप्यविरोधः । (४२) धात्वर्थेति । धात्वर्थतावच्छेदकफलानुकूलेत्यर्थः । धात्वर्थानुकूलव्यापारयोः कर्मधारय इत्यन्ये । (४३) अलाभे नेति । यद्यपि शब्दानुपस्थितेरपि यत्ने लडर्थवर्त्तमानत्वान्वयस्तन्मते संभवति । न च प्रत्ययार्थस्य प्रकृत्यर्थान्वयनियमः, आख्यातसंख्यायामेव व्यभिचारात् । तथापि ज्ञानद्वयकल्पनागौरवमभिसंधायैतदुक्तम् । ननूत्पत्तिराद्यक्षणसंबन्धः, स च तत्स्वरूपात्मक एवेति तस्योत्पत्तिरस्त्येवेत्यरुचेराह । (४४) वस्तुत इति । वाक्यार्थत एव धातुणिचोरुत्पत्तिहेतुत्वार्थकतया तल्लाभान्न तस्य तत्र शक्तिरिति भावः । ननु जानातीत्यादौ तथाप्यसंगतिरित्यत आह । (४५) जानातीति । (४६) धात्वर्थ एवेति । विभक्तीनां प्रकृत्यर्थेत्यादिव्युत्पत्तेरिति भावः । न चैवं भावनान्वये आख्यातार्थसंख्यान्वयो न स्यादिति वाच्यम् । अग्रे वक्ष्यमाणत्वात् । तटस्थ आह । (४७) अथेति । (४८) कृत्यभावेति । कृतिसामान्याभावेत्यर्थः । विद्यमानध्वंसप्रतियोगित्वं भूतत्वं, विद्यमानप्रागभावप्रतियोगित्वं भविष्यत्त्वमिति न तयोः सामान्याभावनिरूप्यत्वमित्याह । (४९)

तदा चरमकृतेरनागतत्वात्, एवं व्यापारप्रचयस्या(५०)ख्यातार्थत्वे धात्वर्थत्वे वा मध्ये पक्ष्यत्यपाक्षीदिति स्यात्। उच्यते। यत्राख्यातवाच्ये प्रचये एकैकस्य वर्त्तमानव्यवहारनिमित्तत्वं तत्र तावतां ध्वंसैः प्रागभावैश्च भूतभविष्यद् व्यवहारः। न तु वर्त्तमानव्यवहारनिमित्तं किंचिदभावात्। चेतनाचेतनयोर्भोजनगमनादौ तथैव प्रयोगे सति निमित्तानुसरणात्। धातोराख्यातस्य वा पाकानुकूलव्यापारवाचकत्ववादिभिरनन्यगतिकतया तथैव स्वीकाराच्च। स्यादेतत्। चैत्रस्तण्डुलं पचति चैत्रेण पच्यते तण्डुल इत्यत्र कर्त्तरि कर्मणि चाख्यातार्थसंख्यान्वयात्कर्तृकर्मणी अपि यत्नइव लकारवाच्ये (५१) तेन वाच्यगामिनी संख्येति नियमो भविष्यति, अन्यथातिप्रसंख्येयमात्रान्वये नियमो न स्यादिति वैयाकरणाः। तन्न। (५२) कर्तृगता संख्या यत्र वाच्या तत्र कर्त्ता तदन्वयः प्रतीयते इति तदुपपत्तेः। (५३) कर्तृगतैव संख्या क्व वाच्येति चेत्कर्ता क्व वाच्य इति तुल्यं, यत्र कर्तृगता संख्या प्रतीयत इति चेन्न। अन्योन्याश्रयात्, कर्तृवाच्यत्वे तद्गतसंख्याधीस्तद्गतसंख्याप्रतीत्या च तद्वाच्यतेति,। यत्राख्यातेन कर्तुर्विवक्षा तत्र कर्त्ता वाच्य इति चेन्न। यत्र कर्तृगतसंख्या विवक्षा तत्र सा वाच्येति तुल्यम्। एवं कर्मापि न शक्यं किं तु तद्गतसंख्यैव। कर्तृकर्मणी लकारवाच्ये इत्यस्यायमर्थः। तद्गतसंख्या वाच्येति। संप्रदायस्तु संख्येयमात्रसाकाङ्क्षापि संख्या भावनान्वयिनैवान्वेति। (५४) एकपदोपात्तत्वप्रत्यासत्तेः। भावना च व्यापारत्वेन शुद्धंप्रातिपदिकार्थमाकाङ्क्षति (५५) न तु कर्तृकर्मादि, द्वितीयादिना तस्य व्यापारवत्त्वेनोपस्थितेः। अत एव कर्माद्यपि न व्यापारमाकाङ्क्षति। अतः प्रथमानिर्दिष्टेनैव भावनान्वयः। प्रातिपदिकस्यापि क्रियान्वयार्थं व्यापाराकाङ्क्षत्वात्। शुद्धश्चाग्निना चैत्रस्तण्डुलं पचतीत्यत्र कर्त्ता। चैत्रेण पच्यत इत्यत्र कर्म, अतस्तत्रैव भावनान्वय इति संख्यान्वयोपि तत्रैव। तदुक्तं, यंयं भावनानुधावति तंतं संख्यापीति स्थितिरिति। स्यादेतत्। चैत्रस्तण्डुलं पचतीत्यत्र भावनान्वयश्चैत्रेसंभवति। आश्रयत्वात्। चैत्रेण तण्डुलः पच्यते इत्यत्र भावनान्वयस्तण्डुलस्य न विषयतया यत्नस्य विक्लित्त्यनुकूलव्यापारविषयत्वात्। (५६) विषयत्वेनान्वये वा तण्डुलं पचतीत्यत्रापि तण्डुलस्य विषयत्वेन भावनान्वय इति तद्गतैव संख्या स्यात्। नाश्रयतया। तत्रावृत्ते, श्चैत्रेपि न यत्नान्वयः, तृतीयार्थवत्त्वेनावरुद्धत्वाद् इत्यनन्वितैव तत्र भावना। अचेतने च भावनान्वयाभावात् कथं संख्यान्वयनियम इति। न। यत्नविशेष्ये संख्यान्वयात् चैत्रस्तण्डुलं पचतीत्यत्र तण्डुलस्य कर्मत्वेनान्वयात्तण्डुलवृत्तिफलजनकव्यापारजनकयत्नाश्रयश्चैत्र इति प्रतीयते इति स एव विशेष्यः। चैत्रेण पच्यते तण्डुल इत्यत्र चैत्रवृत्तियत्नजन्यव्यापारजन्यफलाश्रयस्तण्डुलः प्रतीयते इति यत्नस्य परम्परया तण्डुल एव विशेष्यः। एवं च यद्यप्युभयत्र चैत्रः कर्ता तण्डुलः कर्म तथापि यत्नविशेष्ये संख्यान्वयः। अचेतनेपि रथो ग्रामं गच्छतीत्यत्र ग्रामवृत्तिफलजनकव्यापाराश्रयो रथः प्रतीयते। रथेन गम्यते ग्राम इत्यत्र रथवृत्तिव्यापारजन्यफलाश्रयो ग्राम इत्यत्रापि विशेष्ये संख्यान्वयः। न चैवं यत्नस्य व्यापारस्य च विशेष्येण संख्यान्वये नियामकमननुगतमिति वाच्यम्। आख्यात(५७)तात्पर्यविषयस्य विशेष्ये संख्यान्वयात्। स च यत्नो व्यापारो वा।

प्रागभावेति। (५०) आख्यातार्थेति। नन्वाख्यातस्य संख्यावाचकत्वएव मानाभावः। प्रतीतेः सुब्विभक्त्यर्थसंख्ययैवोपपत्तेः। न च विनिगमनाविरहः, प्रथमान्तादिकर्तृकर्मादिवाचकपदं विना ऽऽख्याताप्रयोगाच्चैत्रो दण्डीत्यादावाख्यातं विनापि सुब्विभक्त्या संख्योपस्थापनादिति। मैवम्। चन्द्रे कलङ्क इत्यादौ सुब्विभक्त्यर्थबहुत्वाभावेनाख्यातवाच्यस्यैव तस्यान्वयात्। (५१) तेन वाच्येति। एकपदोपात्तत्वप्रत्यासत्तेरन्तरङ्गत्वादिति भावः। (५२) कर्तृगतेति। आत्मनेपदत्वादिकं तु न प्रयोजकं, पचेतेत्यादौ व्यभिचारादिति भावः। (५३) कर्तृगतेति। ओदनं पचतीत्यादिकर्मगतसंख्यायामसाध्विति भावः। एकपदेति। (५४) भावनया सहेति शेषः। (५५) शुद्धेति। शुद्धं व्यापारानवरुद्धमित्यर्थः। ननु व्यापारस्योद्देश्यत्वेन विषयत्वेपि व्यापार्यत्वेन तन्दुलस्यैव विषयता, कृतेः सिद्धवृत्तित्वादित्यभिप्रेत्याह। (५६) विषयत्वेनेति। नाश्रयतया, भावनान्वय इत्यनुषज्यते। (५७) तात्पर्यविषयस्येति। शक्यो वा लक्ष्यो वेति न विशेष इति भावः। यद्यपि विशेष्यत्वं व्यापारादेरपि, तथापीतराविशेषणत्वे सति साक्षात्परम्परया तद्विशेष्यत्वं विवक्षितम्। एतच्च लडाख्यातमभिप्रेत्य, लिङादौ च तत्तात्पर्यविषयेष्टसाधनत्वविशेष्ये धात्वर्थे यागादौ संख्यानन्वयादन्यदेव तदन्वयनिया-

(५८) चैत्रेण सुप्यतइत्यत्र चैत्रो न भावना विशेष्यः तृतीयार्थावरुद्धत्वात् । कर्म च तत्र नास्त्येवातो धात्वर्थ एव भावनाविशेष्यः फलत्वाद्विषयत्वाद्वेति तत्र संख्यान्वयः । द्विबहुवचनयोस्तत्रासाधुत्वमेव । तदुक्तम् ।

आक्षेपलभ्ये संख्येये नाभिधानस्य कल्पना ।
संख्येयमात्रलाभेपि । (५९) साकाङ्क्षेण व्यवस्थितिः ॥

इति । इदमेव च कर्तुः कर्मणश्चाक्षेपलभ्यत्वं यद्भावनाविशेष्यत्वे सति प्रथमान्तोपस्थाप्यत्वं न तु संख्यालिङ्गकानुमितिविषयत्वम् । (६०) अनुमित्या संख्येयमात्रगतत्वेन संख्या(६१)प्रतीतेः । ननु नामार्थे भावनान्वयेपि न संख्यान्वयः । प्रथमोपस्थितसंख्यान्वयेन तस्यानिराकाङ्क्षत्वात् । (६२) न च प्रथमा न संख्यावाचिका किं तु प्रयोगसाधुरिति वाच्यम् । चैत्र इदानीं राजेत्यत्र (६३) केवलादपि एकत्वप्रतीतेः । (६४) अन्यथा प्रथमोपस्थितसंख्यया कर्तृकर्मान्वये संख्या न तिङर्थ इत्यपि कल्प्येतेति चेत् । न । (६५) एकैव हि संख्या प्रथमाख्याताभ्यामभिधीयते सामानाधिकरण्यानुरोधात्, यथा चैत्रो दण्डीत्यत्र, अन्यथा त्वन्मतेप्याख्यातेन चैत्रसंख्याभिधानात्प्रथमावाच्यसंख्यान्वयश्चैत्रे न स्यात् । ओदनकामः पचेतेत्यत्र त्वयाप्ये(६६)षैव रीतिरवगन्तव्या । तत्र कर्तुरवाच्यत्वादिति वक्ष्यते । अथ कर्त्ताप्याख्यातवाच्यः, चैत्रः पचतीति सामानाधिकरण्याद्, (६७) अन्यथा नामाख्यातयोर्भिन्नप्रवृत्तिनिमित्तकत्वेप्येकत्र वृत्त्यभावे सामानाधिकरण्यं न स्यादिति चेन्न । नीलः पटश्चैत्रः पचति पच्यते तण्डुल इत्यादौ नाम्नोर्नामाख्यातयोर्वा एकसंख्यावाचकत्वमेव हि शाब्दं सामानाधिकरण्यं न तु भिन्नप्रवृत्तिनिमित्तस्यैकत्रार्थे वृत्तिर्गौरवात् । ओदनकामः पचेतेत्यादौ व्यभिचाराच्च । (६८) विध्याख्यातस्य हि कृतिशक्तस्य नामसामानाधिकरण्यं तयोरेकसंख्याभिधायकत्वात् न त्वेकर्तृवाचकत्वेन । तत्रापि कर्तुर्वाच्यत्वे (६९) तस्येष्टसाधनत्वबोधने ऽप्रवृत्तिस्तस्यासाध्यत्वात् । अयोग्यतया कर्त्तारं विहाय कृतिविषये (७०) पाके पाकविषये कृतौ वेष्टसाधनतान्वये कर्तुर(७१)नन्वया(७२)दप्रतीतेश्च नाभिधेयत्वम् । पचतीत्यस्य पाकयत्नवानिति विवरणात् कर्त्ता वाच्य इति चेत्, न । द्वन्द्वादिसमासस्य विग्रहेण विवरणेपि विग्रहार्थे शक्त्यभावेन व्यभिचारात् कर्त्तुरन्यलभ्यत्वेनावाच्यत्वस्थितौ विवरणस्य तात्पर्य-

---

मकमनुसंधेयम् । अनुगतं तु तन्नियामकं चिन्त्यम् । (५८) चैत्रेणेति । एतच्च स्वापादावेकत्वप्रकारकप्रतीतिमभ्युपेत्योक्तम् । वस्तुतस्तत्र स्वापैकत्वानेकत्वसंशयानुभवाच्च तत्र तत्संख्यान्वयः । अत एव स्वापस्य बहुत्वेप्येकवचनस्यैव साधुत्वेन प्रयोग इत्याहुः । (५९) साकाङ्क्षेण, भावनासाकाङ्क्षेण । तदर्थान्वयिनेति यावत् । नन्वेवं जानातीत्यादौ संख्यान्वयो न स्यात्, तत्राख्याततात्पर्यविषयभावनादेरनन्वयादिति चेत्, न । तत्र वर्त्तमानत्वादेरेवाख्याततात्पर्यविषयत्वात्तस्य च धात्वर्थान्वयित्वे परम्परया चैत्रादेस्तद्विशेष्यत्वादित्याहुः । भावनेति सत्यन्तं भावलकारार्थे द्वितीयं क्तान्तादिपदोपस्थाप्ये गतमित्युभयमुपात्तमित्येके । यतः प्रथमान्तपदोपस्थाप्यत्वमत एव भावनाविशेष्यत्वमित्यर्थ इत्यन्ये । (६०) अनुमित्येति । (६१) प्रतीतेः, प्रतीतिप्रसङ्गादित्यर्थः । कर्तृकर्मादिविशेषलाभो न स्यादिति भावः । शब्दानुपस्थितेनान्वयापत्तिरित्यपि बोध्यम् । (६२) न चेति । शुद्धप्रातिपदिकार्थएव प्रथमाविधानादिति भावः । (६३) केवलादपीति । क्रियाशून्यादपीत्यर्थः । शुद्धत्वं तु द्वितीयादिवदन्वयप्रकारराहित्यमिति भावः । ननु तत्राप्यस्तीतिपदाध्याहार इति यदि ब्रूयात्तत्राह । (६४) अन्वयेति । एवं सति वैपरीत्यापत्तिरिति भावः । चन्द्रे कलङ्क इत्यादौ व्यभिचारं स्फुटतयोपेक्ष्य नियमपक्षेपि न दोष इत्याह । (६५) एकैव हीति । यद्यपि सामानाधिकरण्यं नैकसंख्याभिधायकत्वमेव, साध्याविशेषात्, नापि भिन्नप्रवृत्तिनिमित्तयोरेकत्र वृत्तिः, कर्तृवाच्यत्वानभ्युपगमेन तदसिद्धेः । अत एवोभयपदार्थाभेदस्तदित्यप्ययुक्तं, तथापि विभक्त्यर्थद्वारकविशेषणविशेष्यभावापन्नार्थत्वे सति विभक्तिमत्त्वं सामानाधिकरण्यं, राज्ञः पुरुष इत्यादौ विभक्त्यर्थद्वारैव विशेषणविशेष्यभावात्, तच्च विभक्त्योरेकसंख्याभिधायकत्वं विना ऽनुपपन्नमित्यत्र तात्पर्यमित्याहुः । एवं सति चन्द्रे कलङ्क इत्यादौ कथं सामानाधिकरण्यमिति चिन्त्यम् । अन्यथा, उभाभ्यामेकसंख्यानभिधाने, आख्यातार्थसंख्यान्वये निराकाङ्क्षत्वादिति भावः । (६६) एषैव रीतिरिति । एकसंख्याभिधायकत्वेनैव सामानाधिकरण्यं न त्वेकत्र वृत्त्येत्यर्थः । (६७) अन्यथेति । इदमेव सामानाधिकरण्यमित्यभिमानः । व्यभिचारं विवृणोति । (६८) विधीति । (६९) तस्येति । एकपदोपात्तत्वप्रत्यासत्तेरित्यर्थः । कृतीष्टसाधनताज्ञानप्रवर्त्तकत्वमतेनेदम् । (७०) पाके पाकविषये कृताविति, मतभेदेन । (७१) अनन्वयादिति । एकार्थान्वयमित्यादिव्युत्पत्तेरिति भावः । (७२) अप्रतीतेश्चेति । पदा-

विषयत्वापकत्वात् । कर्तृशक्तिभ्रममूलत्वाद्वा । (७३) वस्तुतः पचतीत्यत्र यत्नवतः शक्यत्वे धात्वर्थस्य विषयत्वेन साध्यत्वेन वा कृतावन्वयो न स्यादितरपदार्थविशेषणतयोपस्थितौ पदार्थैकदेशे इतरपदार्थस्यानन्वयात् । राजपुरुषमानयेत्यत्र राज्ञइवानयने । पदार्थे पदार्थान्वयस्य व्युत्पत्तिसिद्धत्वात् । यत्नस्याश्रयान्वितत्वेनोपस्थितस्येतरानाकाङ्क्षत्वात् । पाकयत्नवतोरन्वये च यत्नवत्साध्यः पाकः पाकजनको यत्नवानिति धीः स्यात् । न तु पाकयत्नयोर्विषयविषयिभावधीः । पाककर्ता इत्यत्रापि न पाकस्य कृतावन्वयधीः । कृतेरपदार्थत्वात् । किं तु कृत्याश्रयः पाकजनक इति प्रतीतिः, अत एवापचत्यपि पाचकप्रयोगाद् ण्वुलः कृतियोग्यता वाच्येति निरस्तम् । पाकस्य कृतावनन्वयप्रसङ्गादिति (७४) पाचकपदं गौणमेव । ननु कर्तृकर्मणी लकारवाच्ये तेनाभिहिते कर्तरि कर्मणि चानभिहिताधिकारीया कर्तृकर्मविभक्तिर्न भवति किं तु प्रथमैव, लकारेण तयोरनभिधाने चैत्रेण पचति तन्दुलः चैत्रः पच्यत ओदनमित्याद्यपि स्यादिति चेन्न । कर्तृकर्मगतसंख्याभिधानानभिधानाभ्यामेवाभिहितानभिहितकार्योपपत्तेः, तादृशप्रयोगस्यासाधुत्वाच्च । साधुत्वे हि सत्यनुशासनं नह्यनुशासनानुरोधेन साधुत्वम् । (७५) ग्रामगामादौ साधुत्वापत्तेः । (७६) नवीनास्तु सुपः प्रकृत्यर्थगतस्वार्थसंख्याबोधकत्वं तिङः प्रथमान्तपदार्थगतसंख्याबोधकत्वमिति व्युत्पत्तिरेव, व्युत्पत्तिश्च तत्स्वभावत्वं तच्च फलोन्नेयम् । प्रथमान्तपदार्थः कर्त्ता कर्म वा । अत एव चैत्रेण सुप्यते इत्यत्र प्रथमान्तपदाभावान्न संख्यान्वयः, न च धात्वर्थे संख्यान्वयः । स्वापस्य द्वित्वबहुत्वेपि द्विवचनबहुवचनयोरभावात्सुप्यतइत्येव प्रयोगः स्यात् । अत एव स्वापमात्रावगमात्, आख्यातार्थयत्नसंख्ययोरनन्वये आख्यातं प्रयोगमात्रे साधु । तिङं विना धातोः केवलस्यासाधुत्वात् । अतो न संख्यानुरोधेन कर्तृकर्मणी लकारवाच्ये । वयं तु ब्रूमः । चैत्रेण पच्यते तन्दुलो रथेन गम्यते ग्राम इत्यत्र तन्दुलग्रामौ कर्मणी प्रतीयेते । अस्ति च तयोः (७७) परसमवेतक्रियाफलशालित्वं कर्मत्वं तच्चाख्यातवाच्यमेव । तन्दुलं पचतीत्यत्र द्वितीयायाइवान्यतः कर्मत्वाभावात् । (७८) तस्मात्कर्तृत्ववत्.(७९) कर्मत्वमपि लकारवाच्यं तद्धर्मिणोः कर्तृकर्मणोरन्यत एव लाभादिति ।

(८०) धात्वर्थः फलमितिमण्डनाचार्याः । पच्यर्थो विक्लित्तिर्लाघवान्न तु तत्फलको व्यापारोऽधःसंतापनादिर्गौरवात् । गमेरुत्तरसंयोगः पतेरधःसंयोगः त्यजेर्विभागोर्थो न तु तत्फलजनकः स्पन्दः । हन्तेरपि मरणमर्थः, न तु तत्फलजनको व्यापारः खड्गाभिघातादिः । गौरवात् ।

र्थैकदेशत्वादित्यपि बोध्यम् । (७३) वस्तुतस्त्विति । पदार्थान्वये संभवति न तदेकदेशान्वय,स्तथैव व्युत्पत्तेः । चैत्रस्य नप्तेत्यादौ चानन्यगतिकतया एकदेशान्वय इति भावः । (७४) पाचकपदमिति । यद्यपि पाचकपदप्रयोगो न स्यात्, पाकस्य कृतावनन्वयात्, धर्मिणोपि शक्यत्वेन पदार्थैकदेशत्वात् । यदि च तत्र यौगिकं किं तु रूढमेव, यदिवा योग्यतया एकदेशेनाप्यन्वयः, तदा योग्यताशक्यत्वेपि तुल्यं, तथापि गौरवाच्च योग्यता शक्येति पचत्यपि पाचकपदं गौणमिति भावः । धर्मिणि न शक्तिः किं तु कृतिमात्रे समवायः संसर्ग इति मतेनेदमित्यन्ये । (७५) ग्रामगामादाविति । कर्मण्यणित्यनुशासनस्य तत्रापि सत्त्वादिति भावः । (७६) नवीनास्त्वित्यस्वरसोद्भावनं, तद्बीजं तु सामग्र्यभावादेव फलाभावे संभवति न स्वभावावलम्बनं सहकार्युच्छेदापत्तेः त्वान्तादिपदे व्यभिचारश्चेति । (७७) परेति । एतच्च चैत्रो गच्छतीत्यत्र गमनक्रियाफलस्योत्तरदेशसंयोगस्य चैत्रेपि सत्त्वादतिव्याप्तिवारणाय । यद्यप्यात्मानं जानामीत्यत्रात्मन्यव्याप्तिः, तथापि करणव्यापारविषयत्वादिकं तद्बोध्यम् । (७८) कर्तृत्ववदिति । कृतिवदित्यर्थः । समवायस्य संसर्गत्वात् । (७९) कर्मत्वमपीति । यद्यपि वाक्यार्थतया तद्भासतएव तथापि तत्प्रकारकप्रतीतिमभ्युपेत्योक्तम् । वस्तुतस्तु चैत्रेण पच्यते तन्दुल इत्यत्र चैत्रवृत्तियत्नजन्यव्यापारजन्यफलाश्रयस्तन्दुल इति प्रतीतेस्तृतीयातः समवेतकृत्युपस्थितौ धातुना व्यापारस्य जनकत्वस्य संसर्गरूपतया चोपस्थितावन्यलभ्यतया विशिष्टे न शक्तिः, किं त्वनन्यलभ्यतया फलाश्रयत्वमात्रे । यदि च फलावच्छिन्नव्यापार एव धात्वर्थस्तथाऽऽश्रयत्वमात्रएव द्वितीयार्थोप्येतदेव,तन्दुलं पचतीत्यत्र तन्दुलवृत्तिफलजनकव्यापारजनकयत्नाश्रय इति प्रतीतेस्तत्राप्युक्तरीत्या तन्मात्रस्यैवानन्यलभ्यत्वादिति वदन्ति । यत्तु आश्रयत्वमपि संसर्ग एवेति, तन्न । तत्प्रकारकत्वस्यानुभवसिद्धत्वादिति ॥

प्रसङ्गादाह । (८०) धात्वर्थ इति ।

यजत्यर्थेऽपि देवतोद्देश्यकत्यागफलं स्वत्वध्वंस एव । जुहोत्यर्थस्त्यागफलं प्रक्षेपः । ददात्यर्थः संप्रदानस्वीकारपूर्वकत्यागफलं स्वस्य स्वत्वध्वंसः परस्वत्वं वा, न तु तत्तत्फलकत्यागो गौरवात् । न चैवं व्यापारविगमे फलदशायां पचति गच्छति ददातीत्यादिप्रयोगः स्यान्न त्वपाक्षीदित्यादिः । व्यापारकाले च पचतीत्यादिर्न स्यादिति वाच्यम् । धात्वर्थानुकूलव्यापारवर्तमानत्वमाख्यातार्थः, तेन व्यापारकाले पचतीत्यादि, न व्यापारविगमे । न च स्पन्दजन्यसंयोगविभागाश्रयत्वेनाकाशो गच्छति पतति त्यजतीति स्यात् (८१) विनश्यदवस्थे कर्मणि च न स्यात् संयोगविभागाद्यभावादिति वाच्यम् । (८२) व्यापारवति व्यापारकाले (८३) आख्यातप्रयोगात् । नन्वेवं धात्वर्थत्वेन फलं क्रिया, तथा च तन्दुलं पचतीत्यादौ तन्दुलादेः कर्मता न स्याद्विक्लित्त्यादिरूपक्रियाजन्यफलशालित्वाभावादिति चेन्न । (८४) परसमवेतव्यापारजन्यफलशालित्वं कर्मत्वं, स च व्यापारो धात्वर्थ आख्यातार्थो वेत्युभयथापि परसमवेतव्यापारफलशालिनस्तन्दुलादेः कर्मत्वं, विक्लित्त्यनुत्पादे व्यापारकाले पाको वर्ततइत्यत्र पाकपदे व्यापारलक्षणा । लाघवेन विक्लित्तेः शक्यत्वात्, जानातीच्छति यतते विद्यते तिष्ठतीत्यादौ ज्ञानेच्छाप्रयत्न(८५)सत्तागतिनिवृत्तिरेव धात्वर्थः । न ज्ञानादिफलं, न वा ज्ञानाद्यनुकूलो व्यापारः । ज्ञानादिमत्त्वमात्रप्रतीतेरिति । अत्रोच्यते । ओदनकामः पचेतेत्यत्र विधिप्रत्ययेन धात्वर्थे प्रवृत्त्यर्थं कृतिसाध्यत्वमिष्टसाधनत्वं च बोध्यते । न च फले विक्लित्त्यादावोदनसाधनत्वं, न वा फले प्रवृत्तिः संभवति । उपायमकृत्वा फलस्य साक्षात् कृत्या साधयितुमशक्यत्वात् । उपायकृतिसाध्यमेव हि फलं न तु तदन्यकृतिसाध्यम् । उपायकृतित एव तत्सिद्धेरधःसंतापनादेः कृतिसाध्येष्टसाधनत्वं विना विक्लित्त्यर्थमप्रवृत्तेश्च । उपाय एवाधःसंतापनादिर्व्यापारः प्रवृत्तिविषयत्वात् कृतिसाध्यत्वेनेष्टसाधनत्वेन च विधिप्रत्ययेन बोध्यते इति फलानुकूलो व्यापार एव धात्वर्थः । अथोपायस्य कृतिसाध्यत्वज्ञानं प्रवर्तकमिति सत्यं, किंतु विधिबोधितफलकृतिसाध्यत्वेन तदुपायकृतिसाध्यत्वमाक्षिप्यते, । तेन विना तदनुपपत्तेरिति चेत् । न । (८६) व्यवहारात्प्रवृत्तिजनके ज्ञाने विधिप्रत्ययस्य शक्तिग्रहात् प्रवृत्तिसाक्षादुपपादकविषयत्वात्कल्पनायाः । एवं पचिगमियजिजुहोतिददातीनामपि व्यापार एव वाच्यः फले प्रवृत्त्यसंभवात् । तत्र पच्यर्थो ऽधःसंतापनमेव तच्च रूपरसगन्धपरावृत्तिफलाविनाभूतं, संतापने च जातिविशेषो रूपादिपरावृत्तिजनकतावच्छेदको ऽवश्यवाच्यः । अन्यथा फलार्थमधःसंतापने ऽप्रवृत्तेः । व्यापारस्याख्यातवाच्यत्वेऽपि विशेषस्यावश्यवाच्यत्वात् । पच्यर्थे च फलं

(८१) विनश्यदवस्थइति । फलाजनकइत्यर्थः । (८२) व्यापारवतीति । फलस्वरूपयोग्यव्यापारवतीत्यर्थः । (८३) आख्यातेति । लडाख्यातेत्यर्थः । (८४) परेति । नन्वेवं वृक्षात्पर्णं पततीत्यादौ वृक्षादेरपि कर्मत्वापत्तिः, यदि च धात्वर्थावच्छेदकत्वं फलविशेषणं, तदा प्रकृतेप्यसंगतिरिति चेत्, तस्य कर्मत्वेपि तदा तत्रापादानविभक्तेरेव साधुत्वादित्याहुः । वस्तुतः फलपदं धात्वर्थफलपरमित्यदोषः । (८५) सत्तेति । सत्तासहिता गतिनिवृत्तिरिति मध्यमपदलोपी समासः, अन्यथा बहुवचन-

नपुंसकलिङ्गतान्यतरापत्तेरिति । (८६) व्यवहारादिति । प्रवृत्तिहेतुतयोपायगोचरकृतिसाध्यताज्ञानस्यैवोपस्थितत्वात्तत्रैव विधिप्रत्ययस्य शक्तिकल्पनं तस्यैव साक्षादुपपादकत्वादिति भावः । ननु लाघवाद्यत्नस्यैव धात्वर्थत्वे व्यवस्थिते पचेतेत्यादौ व्यापारलक्षणास्तु, अन्यथा रथो गच्छतीत्यादौ व्यापारप्रतीतिस्तस्यैवाख्यातवाच्यत्वं स्यात् । यदि च लाघवेन यत्नार्थत्वसिद्धौ तत्र लक्षणा तदा प्रकृतेपि तुल्यम् । किं चैवं कार्यान्वितव्युत्पत्तिरपि स्यात् । अपि चाख्यातत्वेनाख्यातवाच्य एव व्यापारस्तत्र विधित्वेन तदर्थः कृतिसाध्येष्टसाधनत्वमेकपदोपात्तत्वप्रत्यासत्तेरन्वेतु, यदि च तस्य यत्नार्थस्तदा व्यापारलक्षणास्तु, कृतिनिष्ठेष्टसाधनत्वविधिपक्षे दोषप्रसङ्गोपि नेति, मैवम् । फलस्य धात्वर्थत्वे स्पन्दजन्यसंयोगाद्याश्रयतया ग्रामाकाशादिकं गमनवदित्यादिप्रतीतिर्दुर्वारत्वात्, तथा च गौरवमपि न्याय्यं प्रामाणिकत्वादिति । अत्रेदं चिन्त्यते । अस्त्वेवं, तथापि पच्यादौ फलमेव धात्वर्थोऽस्तु, तत्र लाघवापवादकाभावात् । न चोक्तयुक्त्या गम्यादेर्व्यापारार्थत्वे धातुत्वेनैव तथात्वकल्पनादत्रापि तथेति वाच्यम् । जानातीत्यादौ विद्यतइत्यादौ च तथात्वापत्तेः । यदि च तत्तद्धातौ तत्तदर्थे शक्तिरत्र तु बाधकात्र तथा, तदा प्रकृतेपि तुल्यम् । नन्वेवं व्यापारकाले पचतीति न स्यात् । न च व्यापार आख्यातार्थः, पूर्वोक्तयुक्त्या तस्य यत्नार्थत्वादिति चेत्, न । कृतेरपि तदासत्त्वे तामादाय तत्प्रयोगसंभवात् तदसत्त्वे व्यापारलक्षणया तथात्वात् ।

न (८७) विशेषणं, (८८) न वोपलक्षणं, लोके ऽधः-संतापनविशेषस्य रूपादिपरावृत्त्यव्यभिचारेण व्यावर्त्त्याभावात् । वेदे ऽधःसंतापनमात्रं पाकपदार्थः । कृष्णलान् श्रपयेदित्यादौ फलाभावात् । (८६) अस्तु वोपलक्षणं, रूपादिपरावृत्तियोग्याधःसंतापनं पाकपदार्थः । (६०) योग्यता च संतापने कृष्णलादावप्यस्ति । गमेः (६१) स्पन्दविशेष एव वाच्यो न तूत्तरसंयोगजनकत्वेन स्पन्दवाच्यता । सर्वस्पन्दानां तथात्वेन व्यावर्त्याभावात् । (६२) स्पन्दे च विशेषः संयोगविभागजनकतावच्छेदकः सर्वसिद्ध एव । त्यजेश्च कर्ममात्रं शक्यं, (६३) न तु पूर्वदेशविभागफलकर्मत्वेन शक्यत्वम् । (६४) सर्वकर्मणां तथात्वेन व्यावर्त्त्याभावात् । त्यजतीति प्रयोगे च तद्बुद्धिर्निमित्तम् । पतत्यर्थोऽपि हि कर्मविशेष एव गुरुत्वासमवायिकारणप्रयोज्याधःसंयोगफलजनकः । फलं तु कर्मविशेषपरिचायकमात्रम् । (६५) यजतिददातिजुहोतीनामिदं न ममेत्यादि(६६)तत्तत्संकल्पविशेषपूर्वस्त्याग एव वाच्यः । संकल्पे च विशेषस्तु तत्तद्विशेषकृतस्तत्तत्फलविशेषजनकतावच्छेदको मानसप्रत्यक्षसिद्ध एव न तु तत्तत्फलजनकसंकल्पविशेषे शक्तिः, गौरवात् । (६७) देवतोद्देश्यकस्वस्वत्वध्वंसफलत्यागत्वं (६८) संप्रदानस्वीकरणपूर्वकस्वत्वध्वंसपरस्वत्वापत्तिफलजनकत्यागत्वं देवतोद्देश्यकप्रक्षेपफलत्यागत्वं च तत्तत्संकल्पविशेषपरिचायकमात्रमिति ॥

उपसर्गास्तु द्योतकाः न वाचकाः । द्योतकत्वं च धातोरर्थविशेषे तात्पर्यग्राहकत्वं तदुपसंदानेन तत्र शक्तिर्वा, न तु धात्वर्थाभिधायकत्वं, पौनरुक्त्यापत्तेः । ननु प्रयजतीत्यादौ प्रकर्षस्य विजयते इत्यादावतिशयस्य अभ्यागच्छतीत्यादावाभिमुख्यसामीप्ययोः प्रतीतावुपसर्गान्वयव्यतिरेकानुविधानात्पदान्तरवदत्रापि शक्तिः । न च प्रतिष्ठतीत्यत्र गतिधीर्न स्यात्, प्रशब्दस्य प्रकर्षवाचित्वेनातिशयेन गमनार्थताधीप्रसङ्गादिति वाच्यम् । तत्र प्रशब्दस्य धात्वर्थविरुद्धार्थत्वात् तच्च गमनमेव । धातोरिव तस्याप्यनेकार्थत्वात् । न च धातोः सार्थकत्वं क्लृप्तमतस्तत्रानेकार्थता युक्ता, उपसर्गे तु नैवमिति वाच्यम् । धातूनां बहुत्वान्न प्रकर्षवाचित्वं, गौरवात्, किं तु प्रशब्दस्यैकस्येति

तदुक्तं, प्रागयत्नविगमदशायामित्यादि । ननु व्यापारशक्तौ फलबहिर्भावादन्यतरमात्रशक्यत्वे कथं लाघवं, फलत्वव्यापारत्वयोरुपाधित्वेनाविशेषादिति मैवम् । फलावच्छिन्नस्यैव व्यापारस्य त्वया धात्वर्थत्वेनाभ्युपगन्तव्यत्वात्, अन्यथा त्यजिगम्योः पर्यायत्वापत्तेः, फलांशस्यापि प्रतीतेश्च । एतेन गमनत्वत्यागत्वयोर्भेदान्न पर्यायतेत्यपास्तम् । न च संयोगविभागादिफलस्याव्यावर्त्तकतया तदवच्छिन्नत्वेन न शक्यत्वमित्ययमग्रन्थविरोध इति वाच्यम् । अव्यावर्त्तकतया व्यापारविशेषणीभूतस्य न शक्यत्वं, किं तूपरञ्जकतया शक्यज्ञानविषयत्वेन फलमपि शक्यमेवेति तदर्थत्वात् । व्रीहीन्प्रोक्षतीत्यत्र जलसंयोगस्य न प्रोक्षणपदार्थत्वमिति प्रागुक्तस्याप्यत्रैव तात्पर्यमित्युपपादितमाधेयशक्तौ । न च पचतीत्यत्र फलानुकूलव्यापारानुकूलत्वेनाख्यातार्थप्रतीतेर्व्यापारो धात्वर्थ इति वाच्यम् । फलानुकूलत्वेनैव तस्य प्रतीत्या तदसिद्धेः । अन्यथा प्रतीतिबलादेव तदर्थत्वसिद्धौ उक्तन्यायानुसरणानुपपत्तेः । लक्षणया तादृशप्रतीत्युपपत्तेश्चेति । (८७) न विशेषणम् । न व्यावर्त्तकम् । अधःसन्तापनविशेषस्य फलाव्यभिचारात् । (८८) न वोपलक्षणम् । शक्ताविति शेषः । उपरञ्जकतया शक्यज्ञानविषयत्वेन फलस्यापि शक्यत्वात् । व्यापारे तु तस्योपलक्षणत्वमेव, यथा कृतिर्ज्ञाने विषयतया विशेषणं साध्ये चोपलक्षणमित्युक्तमाकरे । एकशक्तिसंभवे शक्तिद्वयमयुक्तमत आह । (८८) अस्तु वेति । (८०) योग्यता चेति । सहकारिविरहात्फलानुत्पादेऽपि न योग्यताहानिरिति लोकवेदयोरेकैव शक्तिरिति भावः । (८१) स्पन्दविशेषो, गमनत्वालिङ्गित इत्यर्थः । गमनत्वे मानमाह । (८२) स्पन्दे चेति । (८३) नन्विति । विभागरूपफलस्य विशेषणीभूय न शक्यत्वमित्यर्थः । कथमेतदत आह । (८४) सर्वेति । अव्यावर्त्तकतया विशेषणत्वाभावादित्यर्थः । नन्वेवं कथं तस्य प्रतीतिरित्यत आह । (८५) त्यजतीति । उपरञ्जकतया तस्यापि शक्यत्वादिति भावः । एतच्च फलांशप्रतीत्यवष्टम्भेन व्याख्यातम् । के चित्तु तत्प्रतीतिरसिद्धैव, गमेः स्पन्दविशेष इत्यादिग्रन्थस्वरसेन गमनत्वं कर्मत्वव्याप्यसामान्यमिति लीलावतीस्वरसेन च गमनत्वस्पन्दत्वयोर्भेदादेव नोक्तपर्यायत्वमिति तेन रूपेण व्यापारमात्रमेव धात्वर्थ इत्याहुः । (८६) तत्तदिति । परिचायकमाह । (८७) देवतेति । न च देवतादानेतिव्याप्तिः । तत्र तस्य देवतास्वत्वस्योद्देश्यत्वात् । यागे यष्टुः स्वत्वध्वंसस्यैवोद्देश्यत्वात् । होमस्तु यागात्मक एव किं तु जुहोतिप्रयोगे प्रक्षेपधीर्निमित्तम् । (८८) संप्रदानेति । एतच्च स्वीकरण-

तस्यापि सार्थकत्वात्। धातोरनेकार्थत्वं क्लृप्तं तदभियुक्तैरुपसर्गस्येति चेत्। तर्हि धातोर्नानार्थत्वे उपसर्गानुविधानमर्थविशेषे न स्यात्। अक्षादिपदे तेषामदर्शनात्। उपसर्गस्यापि शक्तत्वे धात्वनुविधानं न स्यादिति चे,न्न। साधुत्वार्थं तत्र तदनुविधानं तेन विना प्रयोगाभावात्। न तु शक्तौ। धातोस्तु शक्तावेव तदपेक्षेति वैषम्यम्। अथ प्रजयत्यभ्यागच्छतीत्यादौ सामान्यवाचकाद्धातोरेव प्रकर्षसामीप्यादिविशिष्टस्य विशेषस्योपस्थितिः। तात्पर्यग्राहकत्वमात्रमुपसर्गाणामिति चेत्। न। प्रकर्षादेर्विशेषस्याशक्यत्वेन तत्र लक्षणायां युगपद्वृत्तिद्वयापत्तेः। एतेनाभ्यागच्छतीत्यादिसामीप्यादिविशिष्टधात्वर्थप्रतीतेर्वाचकत्वमुपसर्गाणां, प्रतिष्ठुतइत्यादौ धातोरेव गमनार्थत्वं, तात्पर्यग्राहकस्तु प्रशब्दः। अन्यथा धातूपसर्गार्थयोर्विरोधेनान्वयानुपपत्तेः। एवं यत्र धातूपसर्गयोर्विरोधस्तत्र द्योतकत्वमन्यत्र वाचकत्वमिति मतमपास्तम्। अगमनविरोधिगमनस्यैव प्रशब्दार्थत्वात्। अत्रोच्यते। आख्यातस्य धात्वर्थेन सह स्वार्थान्वयबोधकत्व, मतः प्रतिष्ठुतइत्यत्र गमनं धात्वर्थ एव। प्रशब्दार्थत्वे भावनान्वयो न स्यात्। प्रकृतिप्रत्यययोः संभूयान्वयबोधकत्वनियमात्। एवं च प्रोत्तरस्थात्वेन गमने शक्तिरिति प्रशब्दः शक्यतावच्छेदको न शक्त इत्यौपसंदानिकी शक्तिरेव द्योतकत्वम्। प्रकर्षाभिमुख्यसामीप्यादेरुपसर्गवाच्यत्वेपि तद्विशिष्टधात्वर्थान्वयः संभवत्येव भावनाया ओदनं पचतीत्यत्रौदनविषयकपाकान्वयवदिति यद्यपि तथापि उपसर्गस्य शक्ततावच्छेदकत्वं न शक्तत्वं, गौरवात्। तथा च प्रोत्तरजित्वेन प्रकृष्टजये शक्तिः। एवं हि क्लृप्तविशेष्यशक्तेर्विशेषणविषयत्वमात्रं कल्प्यते। अन्यथा तु शक्त्यन्तरमेव। न चैवं जिपूर्वप्रत्वेन तत्रैव शक्तिरस्त्विति वाच्यम्। धात्ववाच्यत्वे भावनानन्वयप्रसङ्गात्, प्रतिष्ठुते इत्यत्रोपसर्गस्य शक्ततावच्छेदकत्वमात्रकल्पनाच्च। अथ वा प्रतिष्ठुतइत्यत्र विरोधिलक्षणया धातोर्गमनोपस्थितिः प्रशब्दस्तु तात्पर्यग्राहके ऽनन्यलभ्यस्य शब्दार्थत्वात्। प्रजयतीत्यादावपि विशेष्यवाचकस्य धातोर्विशिष्टे लक्षणा, विशेष्याद्विशिष्टस्यान्यत्वात्। प्रादेस्तात्पर्यग्राहकत्वम्। नहि शक्तिं विनापि धातुतः प्रतीतिसंभवे तत्कल्पनमर्हम्। अनन्यलभ्यस्य शब्दार्थत्वात्, व्यतिसे इत्यादौ तु लुप्तः स्मृतो धातुरेवार्थप्रत्यायकः। धातुलोपमजानतस्तत्रार्थप्रतीत्यभावादिति कृतं प्रसक्तानुप्रसक्त्या। स्यादेतत्। तथापि संकेतग्रहे चेष्टातोप्यनुभवाच्छब्दवत्सापि प्रमाणमतश्चत्वारि न प्रमाणानीति चेत्। उच्यते। शब्देन चेष्टायां संकेतग्रहाच्छब्दस्मृत्युपयोगिनी चेष्टा, लिपिवत्। शब्द एव प्रमाणमर्थे क्लृप्तत्वात्। नन्वेवं सति कथमेडमूकस्य व्यवहारस्तस्य शब्दास्मरणादिति चेत्। अव्युत्पन्नत्वाच्चेष्टायां तस्यतस्य शब्देन न संकेतग्रहो न मानान्तरेणेति समयाग्रहाच्छब्दवत् चेष्टापि तं प्रति कुण्ठितैव। व्यवहारस्तु एडमूकस्यैतद्विषया मम प्रवृत्तिर्निवृत्तिर्वा एतस्याभिप्रेता यदा भवति तदा मामुद्दिश्यायमेतां चेष्टां करोति इत्यन्वयव्यतिरेकाभ्यां व्याप्तिग्रहात्तयाभिप्रायमनुमाय प्रवृत्तिनिवृत्ती। कशाङ्कुशाभिघातादिवत्करितुरगादेः। न च कृतसमयापि चेष्टा ऽभिप्रायानुमापिकास्तु किं शब्दस्मरणेनेति वाच्यम्। अविनाभावाभावात्। न चैवं शब्देप्यभिप्रायानुमानादेव प्रवृत्त्याद्यस्त्विति वाच्यम्। शब्दादेव प्रत्येमीत्यनुव्यवसायात्तदनुभावकत्वे स्थिते तदनुकूलशक्तिकल्पनात्। एडमूकादौ तु मानाभावात्तत्प्रवृत्तेरन्यथाप्युपपत्तेः। एवमन्यत्रापि शब्दप्रयोजकत्वे स्थिते तद्द्वारैव चेष्टायामनुभावकत्वं संभवतीति न सा पृथक् प्रमाणम्। अथ वा स्मारयतु चेष्टा पदार्थानेव न तु शब्दांस्तथापि सा न प्रमाणम्। ऊर्द्धाङ्गुलीकरणे यात्रां करिष्यसीत्यादिका कृत्यन्वयिनी प्रयोजकाभिप्रायं स्मारयन्ती प्रमाणमेव न, शङ्खध्वनौ यात्रां करिष्यसीत्यत्र शङ्खध्वनिवत्। ह्यन्वायनी तु कारकेषु प्रातिपदिकार्थप्रधाना। क्रियासु आनयनादिस्वरूपप्रधाना। तथा च गौरश्वः पुरुष इत्यादिपदैरिव स्वतन्त्रेषु पदार्थेषु स्मारितेषु परस्परमन्वयायोगः। प्रातिपदिकार्थे कर्मत्वादेरानयनादिष्वतीतानागतवर्तमानत्वस्य चान्वयप्रकारस्यानुपस्थितेः। पदैकदेशविभक्तिविशेषवच्चेष्टैकदेशविशेषात्प्रकरणादिविशेषाद्वा कर्मत्वादिवर्तमानत्वादिस्मृ-

---

स्यत्नीयत्यागे कारण मन्यत्र तद् विनैव दानसिद्धेरत एवोत्सर्गेपि ददातिर्मुख्य इत्याहुः। केचित्तु स्वीकरणाभिप्रायेण त्यागेपि यत्रार्येपि न स्वीकारस्तत्र न दानसिद्धिः, किं तूत्सर्गमात्रम्। अतएव पुष्करिणीजलादेरुत्सर्गमात्रं, न

तिनियम इति चेत्कर्मत्वाद्युन्नीतत्वाद्युपस्थापकचेष्टैकदेशाभावात्। प्रकरणादयस्तु विषयविशेषे शब्दादीन्नियमयन्ति। न त्वन्वयप्रकारकर्मत्वादौ कालविशेषे वा प्रवर्तयन्ति। अन्यथा गौरश्व इत्यादावपि प्रकरणादिभिः कर्मत्वाद्युन्नीय विवक्षितार्थावसायः स्यात्। नहि चेष्टाकलापे प्रकरणादयः कारकविशेषानाचेतुमलं, न तु पदकदम्ब इत्यस्ति नियमः। तथा च कालसंख्याकर्मत्वादिप्रतिपादकविभक्त्यादिसमभिव्याहारवैयर्थ्यप्रसङ्गः। कथं तर्हि ततोऽर्थव्यवहारः। संशयप्रतिभयोरन्यतरस्मात्। चेष्टास्मारितशब्दानामपि कर्मत्वाद्यन्वयप्रकारोपस्थापकविभक्त्यादेरभावात् कथमन्वयबोधकत्वमिति चेत्। न। विभक्त्यादिमतामेव शब्दानां स्मरणात्। शब्दमात्रेण संकेताग्रहात्। नन्वपभ्रंशात्कथं वाक्यार्थधीः। अन्वयप्रकारोपस्थापकविभक्त्यादेरभावात्। न च साधुशब्दस्मरणादिति वाच्यम्। साधुशब्दसंकथाविरहिणामपि पामराणामर्थप्रत्ययात्। साधुपदमात्रस्मरणेऽपि कर्मत्वाद्युपस्थापकविभक्त्यादेरभावाच्चेति चेन्न। यथा हि पदार्थशक्तत्वेन ज्ञातादपभ्रंशात्पदार्थोपस्थितिः, तथा विभक्त्यर्थकर्मादिशक्तत्वेन ज्ञातादपभ्रंशैकदेशात्तत्तत्स्वरावच्छिन्नात्कर्मत्वाद्युपस्थितिः। अथ साधुशब्देऽन्वयप्रकारकविभक्त्यादेः सहकारित्वं न तु चेष्टायां, किं तु तात्पर्यग्राहकमात्रं सहकारीति चेत्, न। समयाधीनप्रवृत्तिकमानमात्रं प्रति तत्सहकारित्वात्। तद्विशेषशब्दस्य गुरुत्वादिति न सा प्रमाणान्तरम्। ऐतिह्यं चाप्रोक्तत्वेन शब्दएवान्तर्भवति। अर्थापत्त्यनुपलब्ध्योस्तु यथायथमन्तर्भावः प्रागेव चिन्तितः। अतः सिद्धं चत्वारि प्रमाणानीत्युपरम्यते॥

धीराः कुशाग्रमतयो भवतः प्रणम्य
मौलौ निधाय करवारिरुहे समीहे।
वाणीयमर्थरहितापि विशृङ्खलापि
सानुग्रहेण हृदयेन विलोकनीया॥ १॥

इति श्रीमहामहोपाध्यायश्रीगङ्गेश्वरविरचिते तत्त्वचिन्तामणौ शब्दखण्डस्तुरीयः परिच्छेदः संपूर्णः॥ शुभम्॥

तु दानं, तत एव शिवाय गां दद्यादित्यादावपि न दानमपि तूत्सर्गमात्रम्। एवं श्राद्धादावपि, संप्रदानस्वीकरणाभावादिति संक्षेपः॥

॥ शब्दचिन्तामणेरुपसंहारः॥

अत्यर्थमनुगृहीतोऽस्म्यद्य भगवता जगदीश्वरेण यच्चिरात्राय समेधितः शब्दचिन्तामणिप्रचारगोचरकामनाकुमुदिनीनिकरोऽद्य काशीविद्यासुधानिधिना सुपुष्पितः कामं संपादितः पट्चष्टात्प्रभृति त्रिनवतपर्यन्तैरष्टाविंशत्या ऽङ्कैः। भूयश्चाष्टपुत्रोपनामकबालकृष्णशास्त्रिणां पुस्तकेनैतच्चिन्तामणिशोधने साहाय्यमलम्बितं परं रुचिदत्तीयव्याख्यापुस्तकमपूर्ववादमारभ्यैकमेव वंशीधरपण्डितीयमुपलब्धं, तच्चातिजीर्णमशुद्धतरमासीदत्यन्तं त्रुटितसन्दर्भं च परं कथंकथमपि योजयित्वा परिशोधितम्। तदप्यासमाप्तेर्न लब्धं, किन्तूपसर्गार्थनिरूपणप्रस्तावएवोपरतम्। उपलब्धपुस्तके च 'प्रसङ्गादाह। उपसर्गास्त्विति। तत्र, स्वार्थविशेषे, शक्तिर्वा, धातोरिति शेषः। धातोरिवेति। न चैवं नानार्थत्वेपि प्रकर्षार्थमादाय प्रतिष्ठेत्यादौ स्थितिप्रकर्षधीः स्यादिति वाच्यम्। स्यापूर्वप्रशब्दस्य गतावेवानादितात्पर्येण तत्र तस्यासाधुत्वात्, तात्पर्याभावेनैव तदबोधकत्वाद्वा। तेन विनेति। यद्यप्युपकुर्भामित्यादौ धातुं विनापि तत्प्रयोगस्तथापि तदतिरिक्तस्थले धातोः प्रागेव तत्साधुत्वमिति भावः। धातोस्त्विति। औपसंदानिकशक्तेस्त्वयाङ्गी' एतत्पर्यन्तमस्त्यत ऊर्द्ध्वं प्रायो द्वित्रपत्रावशेषमेव तत्स्यादिति दृढं सम्भावयामि। सम्प्रार्थये चैतत्सुधानिधिचकोरात् यदि कस्य चित्पुस्तकमन्दिरमेषा रुचिदत्तीयाऽलंकुर्वाणा स्यात् स महाशयोऽवशिष्टमेतदंशमेतत्पत्रे प्रकाशनाय मां प्रति प्रेषयित्वाऽनुगृह्णात्विति। सम्प्रत्ययं च प्रेक्षकान् विज्ञापयामि, यत्सोल्लासममुमन्वर्थचिन्तामणिं मुहुर्मुहुर्निशम्य यथेष्टं शास्त्रीयरमणीयतरविषयरूपरत्नराशिं समुपचित्य मामकं परिश्रमं ते सफलयन्तां, क्षमन्तां च शोधकमुद्राक्षरविन्यासकतत्संयोजकानवधानकृतान् दोषान्। यथा च केषु चिच्चिन्तामणिपुस्तकेष्वेवान्तउपलभ्यमानः

श्लोकः।

गच्छतः स्खलनं क्वापि भवत्येव प्रमादतः।
हसन्ति दुर्जनास्तत्र समादधत सज्जनाः॥

इति। { काशीस्थराजकीयपाठशालायां
व्याकरणाध्यापको बालशास्त्री

॥ अथ वेदान्तकौस्तुभप्रभायाः ॥

॥ द्वितीयाध्यायस्य ॥

॥ तृतीयपादारम्भः ॥

वियदादिकहेतुं च कारुण्यादिगुणार्णवम् ।
स्वभावतोऽणुचिच्छक्तेर्भिन्नाभिन्नं हरिं भजे ॥ १ ॥

एवं सर्वस्य जगतः परब्रह्मैककारणत्वं प्रतिष्ठापयता श्रीबादरायणेन सांख्यादिवेदबाह्यप्रधानादिवादानां युक्त्याभासमूलतया विप्रतिषेधाच्चासंगतत्वमभिधायाथेदानीं वैदिके स्वपक्षे विप्रतिषेधादिदोषगन्धस्पर्शाभावप्रदर्शनायापरः प्रपञ्च आरभ्यते । तत्र तावदाकाश उत्पद्यते न वेति संशये पूर्वपक्षमाह ॥

॥ न वियदश्रुतेः ॥ १ ॥

न खल्वाकाश उत्पद्यते । कुतः । अश्रुतेः । छान्दोग्ये हि सृष्टिप्रकरणे "तत् तेजोऽसृजत"त्यादिना तेजोऽबन्नानां त्रयाणामेव सृष्टिरुक्ता नाकाशस्य ॥ १ ॥

इति प्राप्त आह ॥

॥ अस्ति तु ॥ २ ॥

तुशब्दः पूर्वपक्षव्यावृत्त्यर्थः । अस्ति तु वियदुत्पत्तिः । "आत्मन आकाशः संभूत" इति तैत्तिरीयकश्रुतेः ॥ २ ॥

नन्वेवं सत्याकाशसोत्पत्त्यनुत्पत्तिश्रुत्योर्विरोधः । तत्र चावश्यमेका श्रुतिर्गौणी कल्पनीया । उभयोः प्रामाण्यतुल्यत्वात् । इति वैशेषिकमतमनुश्रित्य पुनश्चोदयति ॥

॥ गौण्यसंभवाच्छब्दाच्च* ॥ ३ ॥

आकाशोत्पत्तिश्रुतिर्गौणी । यथा लोके, आकाशं कुरु, जातमाकाशमित्युच्यते, तद्वत् । कुतः । असंभवात् । समानजातीयैरनेकैर्हि द्रव्यैः परमाणुसंघैरेकं भूम्यादि द्रव्यमारभ्यते । न च निरवयवस्य विभोराकाशस्यानेकद्रव्यमारम्भकमवयवभूतं संभवति । "वायुश्चान्तरिक्षं चैतदमृत"मिति वियतोऽमृतत्वशब्दाच्चाप्यजत्वम् ।

किंच । आकाशस्योत्पत्तिमत्त्वे, "आकाशशरीरं ब्रह्म", "आकाश आत्मे"ति तस्य ब्रह्मविशेषणत्वं न स्यात् ॥ ३ ॥

नन्वेकस्मिन्नेव वाक्ये संभूतशब्दस्याकाशोत्पत्तौ गौणत्वमुत्तरत्र मुख्यत्वमिति कथं संभावनार्हम् । अर्धजरतीयन्यायप्रसङ्गात् । इति चेत् । तत्राह ॥

॥ स्याच्चैकस्यापि ब्रह्मशब्दवत् ॥ ४ ॥

चशब्दः संभावनायाम् । एकस्यापि संभूतशब्दस्याकाशे गौणत्वं, वाय्वादिषु च मुख्यत्वं स्यात् । यथा "तपसा ब्रह्म विजिज्ञासस्व, "तपो वै ब्रह्मे"त्यत्र ज्ञानसाधनतपसि ब्रह्मशब्दो गौणो, जिज्ञास्ये ब्रह्मणि च मुख्यः । तद्वत् प्रकृतेऽपि संभाव्यम् ॥ ४ ॥

इति प्राप्तेऽभिधीयते ॥

॥ प्रतिज्ञाऽहानिरव्यतिरेकाच्छब्देभ्यः ॥ ५ ॥

"येनाश्रुतं श्रुतं भवत्यमतं मतमविज्ञातं विज्ञात"मिति, "आत्मनि खल्वरे दृष्टे श्रुते मते ज्ञात इति सर्वं विदित"मिति प्रतिवेदान्तं प्रतिश्रुता या प्रतिज्ञा । तस्याश्च प्रतिज्ञाया आकाशादिसर्वप्रपञ्चस्य ब्रह्मोपादेयत्वेनोत्पत्त्यभ्युपगमेऽनुपरोधः स्यात् । उपादेयस्योपादानाव्यतिरेकात् स्वतन्त्रसत्ताभावात् । व्यतिरेके प्रतिज्ञाहानिः । प्रतिज्ञानुपरोधान्यथानुपपत्त्याकाशाद्युत्पत्तिर्मुख्यैव । प्रतिज्ञाहानौ वेदस्याप्रामाण्यप्रसङ्गादिति भावः ।

नाप्युक्तदृष्टान्तः साधीयान् । वैषम्यात् । दृष्टान्ते ब्रह्मशब्दस्य पाठभेदादेकस्य मुख्यत्वं, द्वितीयस्य च गौणत्वं सूपपन्नम् । प्रकृते तु संभूत इति शब्दस्य सकृत् पाठादुभयार्थकत्वं महद्भिरुद्धमिति सिद्धं दृष्टान्तस्य वैषम्यमित्यर्थः ।

किंच, शब्देभ्यः । "सदेव सोम्येदमग्र आसीदिति सृष्टेः प्रागेकत्वमवधार्य, "ऐतदात्म्यमिदं सर्व"मिति चेतनाचेतनवस्तुजातस्य तदात्मकतया तदपृथक्सिद्धताविधायकशब्देभ्यः सर्वस्यापि कार्यत्वेन मुख्योत्पत्तेः संभवात् ॥ ५ ॥

नन्वाकाशस्यामृतत्वश्रवणादुत्पत्त्यश्रवणाच्चोत्पत्तिरनुपपन्नेति चेत् तत्राह ॥

॥ यावद्विकारं तु विभागो लोकवत् ॥ ६ ॥

तुशब्द उत्पत्त्यसंभवशङ्कानिवृत्त्यर्थः । यावद्विकारं प्रपञ्चमात्रस्य "ऐतदात्म्यमिदं सर्व"मिति श्रुत्या विभाग उत्पत्तिरवगम्यते । लोकवदिति । यथा लोके देवदत्तस्यैते पुत्रा इति प्रतिज्ञाय तेषां मध्ये त्रयाणामुत्पत्तिकथने सर्वेषामुत्पत्तिलाभः । तद्वदाकाशोत्पत्तिरपि ।

यच्चोक्तं निरवयवस्येत्यादि । तन्न । अतीन्द्रियार्थविषयया श्रुत्याभिहितेऽर्थे निरवयवत्वादिहेतुकस्यानुत्पत्त्यनुमानस्योदेतुमशक्यत्वात् । प्रत्युत, आकाश उत्पत्तिविनाशवान्, भूतत्वात् अनित्यगुणाश्रयत्वाच्च, अग्निवत् । अव्यतिरेके, आत्मवच्च, इत्यनुमातुं शक्यत्वात् । अमृतत्वश्रुतेरपि, अमरा देवा आयुर्घृतमितिवद् गौणतया बहुकालावस्थितिपरत्वमिति संक्षेपः ॥ ६ ॥

॥ एतेन मातरिश्वा व्याख्यातः ॥ ७ ॥

* शंकरभाष्ये शब्दाच्चेति पृथक् सूत्रम् ।

एतेनाकाशोत्पत्तिप्रतिपादनेन वायोरुत्पत्तिरपि प्रतिपादिता भवतीत्यर्थः। "आकाशाद्वायु"रिति श्रुतेरिति संक्षेपः ॥ ७ ॥

अथाकाशवाय्वोरमृतत्वश्रवणेऽपि यद्युत्पत्तिरभ्युपगता, तर्हि ब्रह्मणोऽप्युत्पत्तिः किं स्यादिति संभाव्याह ॥

॥ असंभवस्तु सतोऽनुपपत्तेः ॥ ८ ॥

तुशब्द उत्पत्तिसंभावनाव्यावृत्त्यर्थः। सतो ब्रह्मणोऽसंभवः। जन्माभावः। कुतः। अनुपपत्तेः। उत्पत्त्यश्रवणात्। प्रत्युत, "स कारणं कारणाधिपाधिपः, न चास्य कश्चिज्जनिता न चाधिप", इति ब्रह्मणः सर्वकारणत्वमुक्त्वा तदन्यकारणस्य निषेधश्रवणात्। अन्यथानवस्थाप्रसङ्गात्। सर्वश्रुतिव्याकोपाच्च ॥ ८ ॥

एवं ब्रह्मान्तरेण सर्वस्योत्पत्तिमत्त्वं श्रावितम्। इदानीं वियदादीनि वाय्वादि कार्यं स्वयमेव स्वतन्त्रत्वेन सृजन्ति, उत परमेश्वर एव तत्तदात्मतया सर्वं कार्यं सृजतीति संशये स्वयमेव स्वतन्त्रत्वेन सृजन्ति। 'आकाशाद्वायु"रित्यादिश्रुतेः। परमेश्वराधिष्ठितत्वाश्रवणाच्चेति पूर्वपक्षयति ॥

॥ तेजोऽतस्तथाह्याह ॥ ९ ॥

अतो वायोस्तेज उत्पद्यते। हिर्निश्चये। कुतः। श्रुतिस्तथैवाह, "वायोरग्नि"रिति ॥ ९ ॥

॥ आपः ॥ १० ॥

अत इत्यनुवर्तते। अतस्तेजस आप उत्पद्यन्ते। "अग्नेराप"इति श्रुतेः ॥ १० ॥

॥ पृथिवी* ॥ ११ ॥

"अद्भ्यः पृथिव्युत्पद्यते ता अन्नमसृजन्त"इति श्रुतेः ॥ ११ ॥

नन्वन्नशब्दस्यादनीये व्रीहियवादौ शक्तत्वात् कथं पृथिवीवाचकत्वमित्याशङ्क्याह ॥

॥ पृथिव्यधिकाररूपशब्दान्तरेभ्यः ॥ १२ ॥

अधिकारश्च रूपं च शब्दान्तरं चेति तेभ्यो हेतुभ्योऽन्नशब्दस्य पृथिवीपरत्वं निश्चीयत इत्यर्थः। तत्र "तत् तेजोऽसृजत," "तदपोऽसृजते"ति महाभूताधिकारदर्शनात् क्रमप्राप्तां पृथिवीमेव बोधयत्यन्नशब्दः।

किंच, "यत् कृष्णं तदन्नस्ये"ति रूपश्रवणात् कृष्णं रूपं पृथिव्या एव। "यदग्ने रोहितं रूपं तेजसस्तद्रूपं, यच्छुक्लं तदपां, यत् कृष्णं तदन्नस्ये"ति रूपविभागश्रुतेरित्यर्थः।

शब्दान्तराच्च, "अग्नेरापः, अद्भ्यः पृथिवीति, तद्यदपां शर आसीत्, तत् समहन्यत, सा पृथिव्यभव"दिति श्रुतेः।

किंच, पृथिव्या अन्नोत्पत्तिश्रवणादपि कार्यकारणयोरभेदविवक्षया तद्व्यपदेशः सूपपन्नः। "पृथिव्या ओषधय ओषधिभ्योऽन्न"मिति श्रुतेः १२ ॥

इति प्राप्ते राद्धान्तः ॥

तदभिध्यानादेव तु तल्लिङ्गात् सः ॥ १३ ॥

तुशब्दः पूर्वपक्षव्यावृत्त्यर्थः। "तदैक्षत बहु स्यां प्रजायेये"ति तदीक्षणबहुभवनसंकल्पस्तदभिध्यानपदार्थः। तदेव यदसाधारणं लिङ्गं, तस्मात् परमेश्वर एव तत्तदन्तरात्मा तत्तत्कार्यस्य स्रष्टेति निश्चीयते। "य आकाशे तिष्ठ"न्नित्यादिश्रुतेः। एतेन "तत् तेज ऐक्षते"त्यादिश्रुतेरपि मुख्यार्थपरत्वं निरूपितम्। तत्रापि पूर्वोक्तरीत्या परस्यैवेक्षणविज्ञानात् ॥ १३ ॥

अथ लयप्रकारमाह ॥

॥ विपर्ययेण तु क्रमोऽत उपपद्यते च ॥ १४ ॥

तुशब्दः कारणलयपूर्वककार्यलयवादितार्किकादिपक्षव्यावृत्त्यर्थः। उपादानलये, उपादेयस्थित्यसंभवात् सृष्टिक्रमाद्विपर्ययेण प्रातिलोम्येन लयक्रमो बोध्यः। तत्र हेतुः। "अत उपपद्यते चे"ति। अत आप्यस्य हिमकरकादेरभावापत्तेर्दर्शनात्, उपपद्यते च, यस्माद्यस्योत्पत्तिस्तत्रैव तस्य लय उपपद्यते, नान्यथेति। "अन्नेन सोम्य शुङ्गेनापो मूलमन्विच्छे"त्यादिश्रुतेः।

"जगत्प्रतिष्ठा देवर्षे पृथिव्यप्सु प्रलीयते।
तेजस्यापः प्रलीयन्ते ज्योतिर्वायौ प्रलीयते ॥
खे वायुः प्रलयं याति मनस्याकाशमेव च।
मनो हि परमं भूतं तदव्यक्ते प्रलीयते ॥
अव्यक्तं पुरुषे ब्रह्मन् निष्क्रिये संप्रलीयते।
नास्ति तस्मात् परतरः पुरुषाद्वै सनातनात् ॥

इत्यादिस्मृतेश्च।

एतेन "तदाहुः, किं तदासीत्, तस्मै स होवाच, न सन्नासन्न सदसदिति," "तस्मात् तमः संजायते, तमसो भूतादिर्भूतादेराकाशमाकाशाद्वायुर्वायोरग्निरग्नेरापोऽद्भ्यः पृथिवी, तदण्डमभव"दिति सुबालोपनिषच्छ्रुतिः। तत्र तमआकाशयोर्मध्येऽक्षराद् व्यक्तं महद् भूतादि, तन्मात्रेन्द्रियाणि क्रमतो ज्ञेयानि। पृथिव्यप्सु प्रलीयते, आपस्तेजसि प्रलीयन्ते, तेजो वायौ विलीयते, वायुराकाशे विलीयते, आकाशमिन्द्रियेषु, इन्द्रियाणि तन्मात्रेषु, तन्मात्राणि भूतादौ विलीयन्ते, भूतादिर्महति विलीयते, महानव्यक्ते विलीयतेऽव्यक्तमक्षरे विलीयतेऽक्षरं तमसि, तमः परे देव एकीभवति, परस्मान्न सन्नासन्न सदसदित्ययमलयवाक्यानुरोधात्। "स होवाचतं ह वै, पूर्वं ह्येकमेवाद्वितीयं ब्रह्मासीत्, तस्मादव्यक्तमेवाक्षरं, तस्मादक्षरान्महान्, महतो वाहं-

* शंकरमते नेदं सूत्रम्।

कारस्तस्मादहंकारात् पञ्च तन्मात्राणि, तेभ्यो भूतानि, तैराष्टतमक्षरं भव'तीति गोपालोपनिषच्छ्रुतिश्च व्याख्याता। तथाहि, सृष्टेः पूर्वमविनाशि वस्तु किमासीदिति शिष्यवर्गेण पृष्टो गुरुस्तस्मै ह स्फुटमुवाच सृष्टेः प्राग् यद्वस्त्वासीत् तत् सत् स्थूलं तेजोऽबन्नरूपं नासीत्, असत् सूक्ष्मं प्रधानादिरूपं च नासीत्, सदसद्वायुरूपं च नासीत्, तर्हि किमासीदिति चेत्, तत् सदादिलक्षणं सूक्ष्मशक्तिकं ब्रह्मैवासीदिति शेषः। तस्माद्ब्रह्मणस्तमः संजायते, गुणसाम्यावस्थं प्रधानं समजायतेत्यर्थः। ततोऽक्षरं संजायते, गुणसाम्यावस्थं प्रधानमेव गुणक्षोभावस्थं प्रधानमेव कार्योन्मुखावस्थमभवत्, गुणसाम्यगुणक्षोभकार्योन्मुख्यावस्थाभेदेन तमोऽक्षरमव्यक्तमिति प्रकृतेरेवावस्थात्रयम्।

"प्रकृतिं पुरुषं चैव प्रविश्यात्मेच्छया हरिः।
क्षोभयामास संप्राप्ते सर्गकाले व्ययाव्ययौ॥

इति स्मृतेः। अव्यक्तात् त्रिविधो महान्, महतस्त्रिविधोऽहंकारः, सात्त्विकात् तस्मादिन्द्रियाधिष्ठात्र्यो देवता मनश्च, राजसादिन्द्रियाणि, तामसात् तन्मात्रद्वारा खादीनि, संहतैरेतैरण्डम्, अत्र हिरण्यगर्भः पुरुषः, तत्र तदन्तर्यामिनारायणः, तन्नाभिपद्मे वैराजस्य भोगविग्रहश्चतुर्मुखः, ततः क्षेत्रज्ञानां स्थूलदेहसंयोगेन यथावसरं जन्मेति सृष्टिक्रमः, तद्विपर्ययेण लयक्रमो ज्ञेयः। तथाहि, पृथिवी गन्धतन्मात्रद्वाराप्सु प्रलीयते, आपो रसतन्मात्रद्वारा तेजसि, तेजो रूपतन्मात्रद्वारा वायौ, स च स्पर्शतन्मात्रद्वारा व्योम्नि, आकाशमिन्द्रियेषु, इन्द्रियाणि तन्मात्रेषु, तन्मात्राणि भूतादावित्यत्र पाठक्रमादर्थक्रमस्य बलीयस्त्वेनाकाशस्तन्मात्रेषु, तन्मात्राणि भूतादौ, तामसाहंकारे, इत्यत्रापस्तन्मात्रेष्विति बहुवचनं पृथिव्यादीनां गन्धादितन्मात्रद्वारा लयप्रदर्शनार्थम्। इन्द्रियाणीन्द्रियेषु, कार्यकारणयोरभेदेनेन्द्रियेषु राजसाहंकारे दशेन्द्रियाणि लीयन्ते, इन्द्रियेष्विति बहुवचनात् सात्त्विकाहंकारे तदधिष्ठात्र्यो देवता मनश्च लीयन्ते, भूतादिस्त्रिविधोऽहंकारो महति, महानव्यक्ते प्रधाने, अव्यक्तमक्षरे, प्रधानमेव कार्योन्मुख्यावस्थां परित्यज्य गुणक्षोभावस्थं भवति, अक्षरं तमसि, प्रधानमेव गुणक्षोभावस्थां परित्यज्य गुणसाम्यावस्थं भवति, तमः परदेव एकीभवति, तमः प्रकृतिः पुरुषेण सह परे ब्रह्मणि श्रीपुरुषोत्तमे लीयत इत्यर्थः।

"प्रकृतिर्या मया ख्याता व्यक्ताव्यक्तस्वरूपिणी।
पुरुषश्चाप्युभावेतौ लीयेते परमात्मनि"॥

इति वैष्णवात्। गोपालोपनिषच्छ्रुत्यर्थस्तु तस्माद्ब्रह्मणोऽव्यक्तं प्रधानमासीत्, अव्यक्तमेवेत्येवकारोऽयोगव्यवच्छेदार्थः। यदव्यक्तं तदेवाक्षरशब्दवाच्यम्।

यद्वा यदव्यक्तं तदक्षरं ब्रह्मैव, शक्तितद्वतोरभेदात्। तस्मादक्षराद् ब्रह्माधिष्ठिताव्यक्तान्महानिति। शेषं प्राग्वत्। तैः पञ्चीकृतैर्भूतैरक्षरं जीवरूपमावृतं भवति, तन्निमित्तस्थूलशरीरवान् भवतीति सृष्टिक्रमः। तद्व्युत्क्रमेण लयक्रम इति संक्षेपः॥ १४॥

एवं ब्रह्मणः सकाशाद्भूतानामनुलोमप्रतिलोमाभ्यां सृष्टिप्रलयक्रमौ निरूपितौ। इदानीमिन्द्रियमनोबुद्धीनां क्रमो भूतक्रमाविरोधेन प्रतिपाद्यते॥

॥ अन्तरा विज्ञानमनसी क्रमेण तल्लि-
ङ्गादिति चेन्नाविशेषात्॥ १५॥

विज्ञानशब्देन विज्ञानसाधनत्वादिन्द्रियं बुद्धिश्च गृह्यते। तदुभयं मनश्चेति विज्ञानमनसी, ब्रह्मणो भूतानां चान्तराले विज्ञानमनसी स्यातां, तयोरपि क्रमेण तत्रैवोत्पत्तिलयावुपसंग्राह्यौ। सर्वस्य ब्रह्मकार्यत्वाभ्युपगमात्। "तल्लिङ्गात्"। "एतस्माज्जायते प्राणो मनः सर्वेन्द्रियाणि च"त्यादिलिङ्गात्। ततो भूतानां पूर्वोक्तोत्पत्तिप्रलयक्रमभङ्गप्रसङ्ग इति चेत्। तत् परिहरति। "नाविशेषा"दिति। "एतस्माज्जायते प्राण" इत्यनेन ब्रह्मणः सकाशादेव विज्ञानमनसोः खादीनां चोत्पत्तेरविशेषात्। तथा च दर्शयति श्रुतिः। "स प्राणमसृजत", "प्राणात् खं वायुर्ज्योतिरापः पृथिवीन्द्रियमनोऽन्न"मिति साक्रश्यमात्रपरा हीयं श्रुतिरेतस्माज्जायत इति, न श्रुत्यन्तरसिद्धक्रमपरा। भूतानुग्रहसापेक्षत्वाच्चेन्द्रियाणां क्रमो न विरुध्यते। भूतानुग्रहं च दर्शयति, "अन्नमयं हि सोम्य मन आपोमयः प्राणस्तेजोमयी वा"गिति संक्षेपः॥ १५॥

अथ जीवात्मनो जन्मादयः सन्ति न वा। किं तावत् प्राप्तम्। सन्तीति। कुतः। देवदत्तो जातः, अस्ति, मृत इत्यादिप्रतीतेः। अत्र राद्धान्तः॥

॥ चराचरव्यपाश्रयस्तु स्यात्, तद्व्यप-
देशो भाक्तस्तद्भावभावित्वात्॥ १६॥

तस्य जीवस्योत्पत्त्यादिव्यपदेशो भाक्तः। वाच्यैकदेशे भज्यत इति, तथौपचारिक इत्यर्थः। तर्हि किंविषयकोऽयं मुख्यो व्यपदेश इत्याशङ्क्याह। 'चराचरव्यपाश्रय'इति। चराचरशरीरमाश्रित्य जन्मादिव्यपदेशस्य प्रवृत्तिर्नात्मस्वरूपमुद्दिश्येत्यर्थः। कुतः। तद्भावे शरीरभावे, जन्ममरणयोर्भावित्वात्। "स वा अयं पुरुषो जायमानः शरीरमभिसंपद्यमानः स उत्क्रामन् म्रियमाण" इति स्थूलशरीरसंयोगवियोगयोरेव जन्मादिपदार्थत्वश्रवणादित्यर्थः॥ १६॥

नन्वग्निविस्फुलिङ्गादिदृष्टान्तैरात्मजन्मादेः श्रूयमाणत्वात् कथं भाक्तत्वमित्याशङ्क्य समाधत्ते॥

॥ नात्माऽश्रुतेर्नित्यत्वाच्च ताभ्यः ॥ १७ ॥

आत्मा जीवात्मा स्वरूपेण नोत्पद्यते । कुतः । अश्रुतेः । सृष्टिप्रकरणेषु तज्जन्मादेरश्रवणात् । उक्तश्रुतेः पूर्वोक्तरीत्या भाक्तत्वमेव ।

किंच तस्य ताभ्यः श्रुतिभ्य एव नित्यत्वावगमात् । "न जायते म्रियते वा विपश्चित्", "नित्यो नित्यानां चेतनश्चेतनानाम्" "अजो ह्येको जुषमाणोऽनुशेते जहात्येनां भुक्तभोगामजोऽन्यः" । "अजो नित्यः शाश्वतोऽयं पुराण" इत्यादिश्रुतिस्मृतिभ्यः । न चैवमेकविज्ञानेन सर्वविज्ञानप्रतिज्ञाभङ्ग इति वाच्यम् । तस्य तदात्मकत्वादिना तदपृथक्सिद्धत्वाभ्युपगमात् । स्वतन्त्रसत्तानाश्रयत्वाच्चेति संक्षेपः ।

अथ किं प्रत्यगात्मस्वरूपमित्यपेक्षायां तन्निर्णीयते । तथाहि, स किं चार्वाकाभिमतदेहरूप, उत दिगम्बराभिमतदेहातिरिक्तस्तत्परिमाणको वा लोकायतिकाभिमतभूतचतुष्टयसमुदायो वा, वैभाषिकाभिमतक्षणिकबाह्यार्थो वा, योगाचाराभिमतक्षणिकविज्ञानमेव वा, माध्यमिकाभिमतशून्यमेव वा, इन्द्रियाणि वा, मनो, बुद्धिर्वा, प्राणो वा, तार्किकाभिमतदेहेन्द्रियादिभिन्नो ज्ञानेच्छादिप्रयत्नाद्याश्रयो विभुः प्रतिदेहं भिन्न आगन्तुकचैतन्यगुणो वा, सांख्याद्यभिमतचिन्मात्रमेव वा, देहादिभिन्नो ज्ञानस्वरूपो ज्ञातृत्वादिधर्माश्रयो वेति ।

तत्र नाद्यः । देहे मृते चैतन्यानुपलब्धेः । देहो नात्मा । भौतिकत्वात् । घटादिवत् । इत्यनुमानात् ।

न द्वितीयः । अनित्यत्वापत्तेः । देहपरिमाणको नात्मा । सावयवत्वात् । घटादिवत् ।

न तृतीयः । संघातत्वात् । भूतचतुष्कसमूहो नात्मा । संघातत्वात् । व्रीह्यादिराशिवत् ।

न तुर्यः । भौतिकत्वात् । क्षणिकबाह्यार्थो नात्मा । जडत्वात् । घटादिवत् ।

न पञ्चमः । क्षणिकत्वात् । क्षणिकविज्ञानं नात्मा । क्षणिकत्वात् । शब्दादिवत् ।

न षष्ठः । शून्यं नात्मा । जडत्वात् । आकाशवत् ।

न सप्तमः । स्वापादौ तल्लयात् । इन्द्रियवर्गो नात्मा । सर्वावस्थाननुगतत्वात् । देहवत् । करणत्वात् । वास्यादिवच्च ।

नाष्टमः । मनो बुद्धिश्च नात्मा । अन्तःकरणत्वात् । बाह्यकरणवत् ।

न नवमः । जडत्वात् । सुषुप्तौ चौरादिभिर्भूषणादौ मुषिते चैतन्याभावेनाननुभूयमानत्वात् ।

प्राणो नात्मा । वायुत्वात् । व्यजनजन्यवायुवत् । इत्यनुमानेभ्यो देहादिबुद्धिपर्यन्तः पदार्थो यद्यनात्मा न स्यात् । तर्हि घटादिवद्ध्वंसाऽभावप्रतियोग्यपि न स्यात् । प्रत्यक्षगृहीतध्वंसाभावप्रतियोगित्वान्यथानुपपत्त्यापि देहादेरनात्मत्वम् । एवमग्रेऽप्यूह्यम् ।

इन्द्रियमनोबुद्ध्यादयो यद्यनात्मभूता न स्युस्तर्हि वास्यादिवज्जाग्रदादिसर्वावस्थाननुगता न स्युः ।

प्राणो यदि बाह्यवायुवज्जन्यो न स्यात् । तर्हि घटादिवदचेतनोऽपि न स्यादित्याद्यर्थापत्तिभ्यश्च ।

नापि दशमः । असंभवात् । तथाहि, आत्मनो विभुत्वे चैत्रचरणप्रतिष्ठकण्टकादिजन्यदुःखानुभवकाले सर्वेषामप्यात्मनां तत्र सत्त्वेन वेदनानुभवप्रसक्तेस्तत्र विनिगमनाभावेनासंभावितत्वावगमात् ।

न च यस्य शरीरे कण्टकवेधादि तस्यैव वेदनानुभवो नान्येषामिति व्यवस्थाङ्गीकारान्नोक्तदोषप्रसङ्ग इति वाच्यम् । सर्वेषां सांनिध्याविशेष एकस्यैवानुभवो नान्येषामिति नियन्तुमशक्यत्वात् ।

न च यददृष्टोत्पादितं शरीरं तत् तदीयमिति नियम इति वाच्यम् । अदृष्टस्याप्युक्तन्यायेन नियामकत्वासंभवात् । यदा हि तादृशादृष्टोत्पादनयैकेनात्मना संयुज्यते मनस्तथान्यैरपि मनोयोगस्याविशेषात् कथमिव कारणसाधारण्ये क्वचिदेवादृष्टोत्पत्तिर्नान्यत्रेति ।

ननु मनःसंयोगसाधारण्येऽप्यहमिदं फलं प्राप्नोमीत्यभिसंधिरदृष्टोत्पादककर्मानुकूलकृतिरित्येवमादिव्यवस्थानमिति तत एवादृष्टनियमो भविष्यतीति चेन्न । अभिसंध्यादीनामपि साधारणमनःसंयोगनिष्पाद्यतया व्यवस्थित्यसिद्धेः ।

ननु स्वकीयमनःसंयोगोऽभिसंध्यादिकारणमिति मनःसंयोग एव साधारणो भविष्यतीति चेन्न । नित्यं सर्वात्मसंयुक्तं मनः कस्यचिदेवेति नियन्तुमशक्यत्वात् ।

न चादृष्टविशेषादात्मविशेषेण मनसः स्वस्वामिभावसिद्धिरिति वाच्यम् । तस्याप्यदृष्टस्य पूर्ववद्व्यवस्थित्यसिद्धेः ।

न चात्मनां विभुत्वेऽपि तेषां प्रदेशविशेषा एव बन्धभाज इत्यात्मान्तराणां चैत्रशरीरे तत्प्रदेशविशेषाभावात् सुखदुःखादिव्यवस्था भविष्यतीति वाच्यम् । यस्मिन् प्रदेशे चैत्रः सुखाद्यनुभूय तस्माद्देशादपक्रान्तस्तस्मिन्नेव मैत्रे समागते सति तस्यापि तत्र सुखाभिदर्शनेन शरीरान्तर आत्मान्तरप्रदेशेष्वस्याप्यन्तर्भावात् ।

तस्माद्विभुबह्वात्मवादितार्किकादीनां व्यवस्था सुदुर्घटेति संक्षेपः ।

नाप्यागन्तुकचैतन्यगुणः । एवं हि ते मन्यन्ते । आत्मनश्चै-

तन्यं ग्रहाविष्टाद्यन्यात्ममनःसंयोगजम् । अग्निघटसंयोगजरोहितादिगुणवत् । नित्यचैतन्यत्वे हि सुप्तमूर्च्छितग्रहाविष्टानामपि चैतन्यं स्यात् । ततः कादाचित्कचैतन्यत्वादागन्तुकचैतन्य आत्मेति! तन्न । "अत्रायं पुरुषः स्वयंज्योतिर्भवती"ति, "न हि विज्ञातुर्विज्ञातेर्विपरिलोपो विद्यतेऽविनाशित्वा"दित्यादिश्रुतिविरोधात् । सुप्तिमूर्च्छादौ तु सदेव ज्ञानं कर्मणा संकुचितमनभिव्यक्तमपि जाग्रदादौ विकाशितमभिव्यज्यत इति न विरोधः । यथा वियदाश्रयस्य प्रकाशस्य प्रकाश्याभावादनभिव्यक्तिर्न स्वरूपाभावात् । तद्वत् प्रत्यगात्मा ज्ञानस्वरूपः । चेतनत्वात् । स्वप्रकाशत्वात् । अचिद्भिन्नत्वाच्च । ब्रह्मवत् ।

प्रत्यगात्मा यदि ज्ञानस्वरूपो न स्यात् तर्हि देहादिप्रकाशकोऽपि न स्यात् । "योऽयं विज्ञानघन"इति श्रुतेः ।

एतेन मीमांसकपक्षोऽपि निरस्तः । दोषतुल्यत्वात् ।

इयांस्तु विशेषः । तन्मते, आत्मवन्मनसामपि विभुपरिमाणकत्वमिति । तथा च तत्रापि सर्वैर्मनोभिः सर्वेषां जीवात्मनां संयोगादेः साम्यात् ।

किंच, आत्मवत् सर्वैरपि चक्षुरादिभिरिन्द्रियैः साकं मनःसंयोगस्य साम्याच्छ्रावणस्पार्शनादिज्ञानानां युगपदुत्पत्तिप्रसङ्गो दुर्वार इति दोषविशेषश्चिन्तनीयः । दुग्धादिभिर्द्रव्यैर्मनोयोगस्य युगपत् सद्भावात् ।

न च श्रावणादिज्ञाने श्रवणादिभिरिन्द्रियैः शब्दादियोगस्यासाधारणहेतुत्वान्मनोभिर्विषयसंनिकर्षे विज्ञानानुत्पत्तिः सुवचेति वाच्यम् । मनसामिन्द्रियैर्नित्यसंयोगस्य सत्त्वेनेन्द्रियसंयुक्तमनसां विषयसंनिकर्षाविशेषात् ।

किंच, अस्तु वा कदाचित् कूटस्थकल्पनया सुषुप्त्यादौ बाह्यश्रवणादिज्ञानानुत्पत्तिः । मनोविषयसंयोगस्य सत्त्वेऽपि तत्रेन्द्रियसंनिकर्षाभावात् । तथापि जाग्रदादाविन्द्रियसंयुक्तमनसां शब्दादिभिर्नित्यसंयोगस्य दुर्वारत्वेन शब्दादित्वावच्छिन्नशब्दादिमात्रविषयकज्ञानस्योत्पत्तेरवश्यं भावात् । मनस्त्वावच्छिन्नैर्मनइन्द्रियसंयोगाभावेऽपि शब्दादित्वावच्छिन्नशब्दादिस्मरणस्य सदा सद्भावापत्तेश्चेत्यलं विस्तरेण ।

नापि चिन्मात्रमेवेति पक्षः संभवति । "विज्ञातारमरे केन विजानीयात्", "ज्ञानात्येवायं पुरुषः, एष एव हि द्रष्टा श्रोता घ्राता रसयिता मन्ता बोद्धा कर्ता विज्ञानात्मा पुरुष"इत्यादिश्रुतिव्याकोपात् ॥ १७ ॥

तस्माच्चरम एव पक्षः सूत्रकाराभिमत इत्याह ।

॥ ज्ञोऽत एव ॥ १८ ॥

अयमात्मा ज्ञ एव, ज्ञानस्वरूपत्वे सति ज्ञातृस्वरूप एव । न पाषाणकल्पः । नापि ज्ञानमात्रम् । कुतः । अत एव । श्रुतिभ्य एवेत्यर्थः । श्रुतयस्तु पूर्वमुदाहृता बोध्याः । प्रत्यगात्मा ज्ञाता । आत्मत्वात् । ब्रह्मवत् । प्रत्यगात्मा यदि ज्ञानाश्रयो न स्यात्, तर्हि तदुपदेशशास्त्रस्य सार्थक्यमपि न स्यात् । 'ज्ञानात्येवाय"मिति पूर्वोक्तश्रुतेः ।

ननु ज्ञानाख्यधर्मस्य स्वरूपज्ञानतोऽत्यन्तसाजात्यात् । कथमिवाधाराधेयभावः, जले क्षिप्तस्य जलान्तरस्याधाराधेयभावादर्शनादिति चेन्न । विषमदृष्टान्तत्वात् । जलयोर्द्रव्यत्वाद्भेदानुपलब्धिरिष्टापन्ना । अत्यन्तसाजात्यात् । परंतु सावयवद्रव्यत्वेन भेदस्य तत्राप्यनुमेयत्वात् । अन्यथा वृद्धिह्रासानुपपत्तेः । प्रकृते तु धर्मत्वधर्मित्वयोरवच्छेदकत्वान्नोक्तदोषावकाशः । मणिद्युमण्यादिष्वाधाराधेयभेदस्य प्रत्यक्षोपलभ्यमानत्वात् । प्रकृष्टप्रभावान् सूर्य इत्यादिप्रतीतेश्च ।

न च मण्याद्यवयवेष्वेव प्रभावत्त्वव्यवहारः, सूर्यस्यावयवा एव विशीर्यमाणा लोके व्याप्नुवन्तीति वाच्यम् । कालान्तरे द्रव्यनाशप्रसङ्गात् । न च तत्रावयवान्तरोत्पत्तिः कल्पनीयेति वाच्यम् ।

त्वदुक्तराशेतरप्रमाणाभावात् । प्रभातद्वतोर्भेदस्य च प्रमाणसिद्धत्वात् ।

"रामेणानुगता सीता भास्करेण प्रभा यथा" ।

इति सर्वज्ञश्रीवाल्मीक्युक्तेः । अन्यथा रजतादिसंपुटनिहितायाः कस्तूरिकाया अवयवनाशे कालान्तरे सर्वस्या अप्यनुपलब्धिप्रसङ्गः स्यात् । तस्माद्यथा सूर्यतत्प्रभयोस्तैजसत्वाविशेषेऽपि सूर्यत्वप्रभात्वावच्छिन्नतयाधाराधेयभावः प्रत्यक्षादिप्रमाणसिद्धः । तथा प्रकृतेऽप्युभयोर्ज्ञानत्वसामान्येऽपि धर्मत्वधर्मित्वावच्छिन्नतया तथात्वस्य सामञ्जस्यादिति । उपलक्षणं चैतदहमर्थस्यापि । ज्ञात्रभिन्नाहमर्थस्वरूप इत्यर्थः । अहं जानामि, अहं करोमि, अहं वै त्वमसि देवते, त्वं वाहमस्मीत्यादिभ्यः ।

यत् तु कैश्चिदुच्यते, सत्यमनिदं चैतन्यम् । अनृतं युष्मदर्थोऽचेतनः । तयोर्मिथुनीकरणमध्यासः । तत्राहमित्याध्यात्मिककार्याध्यासेषु प्रथमोऽध्यास इति सत्यानृते मिथुनीकृत्याहमिदं, ममेदमिति नैसर्गिकोऽयं लोकव्यवहार इति श्रीभगवत्पादभाष्यकारोक्तेः ।

तस्मादहमर्थो नात्मा । सुषुप्तौ स्वप्रकाशस्यात्मनः सत्त्वेऽप्येवंविधस्याहमर्थस्याभावात् । "अथातोऽहंकारादेशः, अथात आत्मादेशः", इत्यादिश्रुत्योभयोः पार्थक्योपदेशात् ।

"अहंकार इतीयं मे भिन्ना प्रकृतिरष्टधा" ।

इति स्मृत्या च क्षेत्रान्तःपातित्वोपदेशादहमर्थो नात्मा ।

सुषुप्त्याद्यवस्थाननुगतत्वात् । स्थूलदेहादिवत् । करणत्वाच्च । चक्षुरादिवत् । इत्यनुमानाद्वेत्यादि । तन्न सम्यक् । असंभवात् । तथाहि, इदं रजतमिदं जलमयं सर्प इत्यादिवदध्यासमात्रस्याधिष्ठानारोप्यांशद्वयभानवत्त्वात् । अहमर्थेऽशद्वयभानाभावात् ।

नन्वयो दहतीतिवदहमुपलभे, इति द्रष्टृदृश्ययोरुपलम्भादंशद्वयभानमिति चेन्न । उक्तवाक्यस्याग्निना सिञ्चेदितिवद्वाक्याभासत्वेन त्वदीयकल्पनामात्रत्वात् ।

किंच, अयो दहतीत्यस्य वाक्यत्वेन तत्राप्यंशद्वयस्य न भानम् । अन्यथाग्निना सिञ्चेदित्यत्राप्यध्यासोऽभ्युपगन्तव्यः पण्डितंमन्यैः ।

किंच, अस्तु वा, अयो दहतीत्यस्य प्रामाण्यम् । तत्रायःशब्दोऽजहल्लक्षणया दाहाश्रयाग्निविशिष्टायोऽर्थे वर्तमानतया लाक्षणिक एव । शोणो धावतीतिवत्, अग्निर्माणवक इतिवद्वा तात्पर्यानुपपत्तेर्लक्षणाबीजत्वात् । अन्यथात्राप्यध्यासः कल्पनीयो मनीषिभिः । अनुभूयमाने हि द्व्यंशताकल्पने मानाभावात् । अन्यथात्मेत्यत्र द्व्यंशताकल्पनापत्तेः ।

नाप्यहमुपलभे, इत्यत्र द्व्यंशताभानसंभवः । ब्रह्म स्फुरति, आत्मास्ति, चैतन्यं भातीत्यादावपि द्व्यंशतापत्तेः ।

तस्माद् द्व्यंशताभानाभावादहमर्थ आत्मैवेति सिद्धम् । द्व्यंशतापि नच भाति । चेतनेऽहंप्रतीतिविषयेऽहमर्थक इति पूर्वाचार्योक्तेः ।

ननु यद्यात्मस्वरूप एवाहमर्थोऽभिप्रेतः, तर्हि सुषुप्त्यादौ किमिति न स्फुरतीति चेत् । मैवम् । अहमर्थस्तावदिच्छादिविशिष्ट एव स्फुरतीत्यावयोर्निर्विवादत्वात् । समं सुषुप्तौ चेच्छादेरभावादहमर्थस्य विशेषानुभवो विरुद्ध इति । कुतः । एवमहं सुखीच्छामीति प्रतीतिभिन्नात्मविषयकप्रतीतेरसत्त्वेनात्मनोऽपीच्छादिविशिष्टतयैव ग्रहणम् । इच्छादिग्रहं विनात्मग्रहाङ्गीकारश्चेदहमर्थस्याप्यङ्गीकारे क्षतेरभावात् । सुखत्वेनात्मनोऽनुभव इति चेत् । तर्हि सुखमहमस्वाप्समित्यहमर्थस्यैव सुखत्वेनानुभवादात्मत्वमविरुद्धमिति । न किंचिदवेदिषमित्यज्ञानाश्रयत्वेनानुभवाच्च ।

ननु सुषुप्तौ नाहमर्थानुभवः । न च परामर्शानुपपत्तिरिति वाच्यम् । परामृश्यमान आत्मेदानीं जातेनान्तःकरणेनाहमर्थेनावच्छेदादहंत्वं गतस्तथात्वेनानुभूयते । तथा च नोक्तपरामर्शानुपपत्तिरिति चेन्न । न किंचिदहमवेदिषमित्यादावज्ञानाद्यंशेष्वपरामर्शत्वप्रसङ्गात् । न ह्यज्ञानादिकं निराश्रयमन्याश्रयं वा परामृश्यते, किंत्वहमर्थाश्रयम् । एतावन्तं कालं स्वप्नं पश्यन्नासं जाग्रदासमित्यत्रैवाहमस्वाप्समित्यत्राप्यहमंशे परामर्शानुभवाच्च । अन्यथा यः पूर्वं दुःखी सोऽधुना सुखी जात इति वद्यः पूर्वं मदन्यः सुप्तः सोऽधुनाहं जात इति धीः स्यात् ।

ननु जागरे समुत्पन्नेऽनुभूयमानेऽहमर्थे परामृश्यमानात्माभेदारोपात् परामर्शत्वोपपत्तिरिति चेन्न । इदं रूप्यमित्यादावारोप्याभिन्नतयेदमर्थस्येवाहमित्यत्राहमर्थाभिन्नतयात्मनोऽप्रतीतेः । अन्यथैतावन्तं कालं सुप्तोऽहमन्यो वेति कदाचित् संशयः स्यात् । न त्वहमेवेति निश्चयः ।

न च सुषुप्तिकालानुभूतात्मैक्याध्यासान्निश्चयोपपत्तिरिति वाच्यम् । अहमर्थातिरिक्तात्मानुभवस्यालीकत्वात् ।

न च परामृश्यमानात्मैक्यारोपात् तदुपपत्तिरिति वाच्यम् । अपरामर्शे परामर्शारोपस्य क्वाप्यदर्शनात् । सिद्धेऽहमर्थस्यात्मान्यत्वे परामृश्यमानात्मैक्यारोपः । सिद्धे च तस्मिन् सुषुप्तावप्रकाशेनाहमर्थस्यात्मान्यत्वमित्यन्योन्याश्रयापत्तेश्च ।

एतेन सुषुप्तावहमर्थप्रकाशे स्मर्येत ह्यस्तन इवाहमर्थ इति निरस्तम् । अहंशब्दोल्लेखितपरामर्शापादने सुषुप्तौ तदुल्लेखानुभवाभावादेव तदभावोपपत्तेः । तावन्मात्रे च ह्यस्तनवैषम्यात् । अहमर्थविशेष्यकस्याहंप्रकारकस्य च परामर्शापादान इष्टापत्तेः । एतावन्तं कालं सुखमहमस्वाप्समिति सुषुप्तिकालिकसुखावच्छिन्नोऽहमर्थ इति स्मृतेश्च । अन्यथा स्मर्येत ह्यस्तन इवाहमर्थ इति चोद्यान्तरं स्यात् ।

ननु तथाप्येतावन्तं कालमहमिति सुषुप्तिकालिकात्मप्रकाशस्यैव परामर्शोऽस्त्विति चेन्न । तथा सत्यहमित्यभिमन्यमानपरामर्शापादनस्य व्यधिकरणत्वेनाशक्यत्वात् । अन्यथा तवाप्यात्मेत्यभिमन्यमान आसमिति परामर्शः स्यात् ।

तस्मात् सुषुप्तावहमर्थः प्रकाशत एव ।

अपिच सुषुप्तावहमर्थाभावेऽहं निर्दुःखः स्यामितीच्छया सुषुप्त्यर्थप्रवृत्त्यनुपपत्तेर्योऽहं सुप्तः स एव जागर्मीति प्रत्यभिज्ञानं स्यात् । योऽहं पूर्वमकार्षं सोऽहमद्य करोमीति प्रत्यभिज्ञानुपपत्तिश्च ।

ननु कृशोऽहं स्थूलः स्यामितिवत् प्रवृत्त्युपपत्तिरिति चेन्न । कार्श्यस्य परंपरासंबन्धेनारोपितस्यानारोपितस्य चाहमर्थस्य विद्यमानत्वेन प्रवृत्त्युपपत्तावपि सुषुप्तावहमर्थस्य नाशात् तदानींतनसुखादिसंबन्धाभावेन प्रवृत्त्यनुपपत्तेः । विवेकिनां मम देहः स्थूलः स्यादितीच्छयैव प्रवृत्तेश्च । नहि ममात्मा निर्दुःखः स्यादितीच्छया कस्यापि सुषुप्तौ प्रवृत्तिर्दृश्यते ।

तस्माद्दृष्टान्तानुपपत्तिरेव । वैषम्यात् । अहंव्यक्तिभेदात् । कृतनाशाकृताभ्यागमप्रसङ्गश्च । कर्तुर्भोक्तुश्चाहमर्थस्य भेदात् । अभिन्ने च चैतन्ये कर्तृत्वाद्यभावात् । कर्तृत्वाद्यारोपस्य च देहादावपि सत्त्वात्, अहं करोमीत्येव प्रतीत्याहमर्थान्यात्मनि कर्तृत्वाद्यारोपस्याप्यभावाच्च । अन्यथात्मा करोतीति प्रतीतिः स्यात् ।

न च सुषुप्तौ कारणात्मनावस्थितस्यैवोत्पत्त्यङ्गीकारान्नानुपपत्तिरिति वाच्यम् । कर्तृभोक्तृकारणस्य कर्तृत्वादिशून्यस्य स्थितावपि कृतहान्यादेरनुद्धारात् ।

किंच, त्वन्मतेऽहंकार एव क्रियाशक्त्या प्राणः, विज्ञानशक्त्या मन इति । तथा च सुषुप्तौ लये प्राणकार्यनिःश्वासादि न स्यात् ।

ननु प्राणस्याहंकाराद्भेदपक्षेऽहंकारस्य लयो युक्तः । अभेदपक्षेऽपि प्राणांशविहीनस्य लयाङ्गीकारान्नोक्तदोष इति । इति चेन्न । प्राणस्याहमर्थत्वाभावे कर्तृत्वस्य प्राणोपाधिकत्वान्नाहं कर्तेति बुद्ध्ययोगात् । अहमर्थत्वे तु सुषुप्तावप्यहमुल्लेखापातात् ।

ननु पूर्वोक्तयोः श्रुतिस्मृत्योरनुमानस्य च विरोधस्तदवस्थ एव । शास्त्रबाधस्तु तवाप्यनिष्ट इति चेन्न । श्रुत्यादेरन्यविषयत्वेन बाधाभावात् । तत्राप्य"थातोऽहंकारादेश" इत्यादिश्रुतिस्मृत्यो "र्गर्वोऽभिमानोऽहंकार" इत्यभिधानाद् गर्वादिवाचकाहंकारोऽपि यः स तु प्राकृत एव । "अहंकारश्चाहं कर्तव्यं चे"ति श्रुत्यन्तरात् । स च मान्ताव्ययरूपः कारप्रत्ययान्तः । आत्मवाच्यहंशब्दस्तु दकारान्तोऽस्मच्छब्दस्तस्मादुभयोरर्थतः शब्दतश्च भेदान्नोक्तदोषावकाशः ।

न चोभयोरप्यहंकार एव शक्तिरिति वाच्यम् । अहंकारस्यानेकप्रयोगदर्शनेनैकत्र शक्तेर्नियन्तुमशक्यत्वात् । अहंशब्दस्त्वहंकारशब्दवदात्मभिन्नप्रयोगप्राचुर्याभावादात्मपर एवेति भावः ।

एवमहमर्थस्य सर्वावस्थानुगतत्वसिद्ध्या परोक्तानुमानवृत्तिहेतोः स्वरूपासिद्धत्वेनाप्रमाणत्वं सुप्रसिद्धम् ।

ननु ज्ञातुः सत्त्वमेव विषयावभासकं स्यादिति चेन्न । तव विषयाभावात् । न हि ज्ञातुः सत्त्वमात्रं विषयानुभवे प्रयोजकम् । अपितु विषयसत्त्वसहकृतमेव । तस्माज्ज्ञातुः सत्त्वेऽपि विषयाभावाद्विशेषज्ञानानुदयोऽविरुद्ध इति भावः ।

न चैतावन्तं कालं मामप्यहं नावेदिषमित्यस्मदर्थाभावविषयकप्रत्ययस्य "न जानात्ययमहमस्मी"ति श्रुतेश्च सुषुप्तावहमर्थाभावे मानत्वात् कथमस्मत्प्रयुक्ताद्धेतोः स्वरूपासिद्धत्वम् ।

तस्मादननुगमस्य तादवस्थ्यमिति वाच्यम् । उक्तप्रत्ययेऽप्यहमर्थस्यानुवृत्तिदर्शनात् । तथाहि । तत्र मामिति द्वितीयान्तस्य कर्मरूपाहमर्थस्य जाग्रदनुभूतानादिकर्मसंस्कारप्रयुक्तात्मत्वाभिमतदेहाद्यवच्छिन्नो विषयः । अहमिति प्रथमान्तस्य कर्तुरस्मदर्थस्य देहादिविलक्षणशुद्धब्रह्मात्मकप्रत्यगात्मज्ञानविषयः । तथा च मामित्युक्तलक्षणस्य देहेन्द्रियादिसंबन्धस्य तत्राभावान्निषेधविषयत्वं सूपपन्नम् । तथैवाहमिति देहादिवियुक्तस्य तद्विशिष्टाभावविषयकानुभूत्याश्रयाभिन्नस्य तत्रापि सत्त्वेन ज्ञातृतया भानमपि सूपपन्नतरम् । तथा चाहमर्थस्यानुभवितुः सर्वावस्थानुगतत्वेन हेत्वसिद्धेः सूपपन्नतमत्वादप्रामाण्यमनुमानस्य ।

एतेनोक्तायाः श्रुतेरपि व्याख्यानमुक्तं भवति । तस्या अप्युक्तलक्षणविशिष्टप्रतियोगिकाभावविषयकज्ञानविधानपरत्वेन तुल्यार्थकत्वात् ।

नन्वहमर्थो नात्मा । अहंप्रतीतिविषयत्वात् । शरीरादिवत् । इति प्रयोगात्, तस्यानात्मात्वावगम इति चेन्न । त्वन्मतेऽहमर्थान्तर्गताधिष्ठानभूतचितोऽपि तत्प्रत्ययविषयत्वेन तत्र व्यभिचारात् ।

न च येन रूपेणाहंधीविषयत्वं, तेन रूपेणानात्मत्वं, स्वरूपेणात्मत्वमिति न व्यभिचार इति वाच्यम् । "अहमात्मा गुडाकेशे"त्यात्मत्वेनाप्यहंप्रतीतिविषयत्वात् । स्वरूपेणात्मत्वे मानाभावाच्च ।

न चाहमर्थ आत्मान्यः, अहंशब्दाभिधेयत्वात्, अहंकारशब्दाभिधेयवत्, इत्यनुमानमत्र मानमिति वाच्यम् । "अहमात्मागुडाकेशे"त्यहंशब्दाभिधेये विश्वात्मनि श्रीवासुदेवे परब्रह्मणि व्यभिचारात् ।

अथ यत् त्वयात्मनो गौरोऽहमित्यनात्मारोपाधिष्ठानत्वं, "मा न भूवं भूयास"मित्यादिना परमप्रेमास्पदत्वम्, अहमर्थस्य स्वसत्तायां प्रकाशव्यतिरेकवैधुर्येणात्मनः प्रकाशकत्वं चोक्तम्, तत् सर्वमहमर्थस्यानात्मत्वेऽयुक्तं स्यात् । उक्तस्य सर्वस्याहमर्थ एव पर्यवसानात् ।

न च प्रेमास्पदात्मैक्यारोपादहमर्थे तथा प्रतीतिरिति वाच्यम् । अन्योन्याश्रयापत्तेः । अहमर्थतयानुभवाभावाच्च । अहिते हितबुद्ध्या प्रेमोत्पत्तावप्यप्रेमास्पदे प्रेमास्पदत्वस्यारोपादर्शनाच्च ।

"समारोप्यस्वरूपेण विषयो रूपवान् भवेत् ।
विषयस्य तु रूपेण समारोप्यं न रूपवत्" ॥

इति वाचस्पत्युक्तेः । अध्यस्तान्तःकरणगतप्रेमास्पदत्वस्यैवात्मनि प्रतीत्यापत्तेश्च । अनिदमि रूप्ये शुक्तिनिष्ठेदन्तादिभानवदधिष्ठाननिष्ठसाधारणधर्मस्यारोप्ये भानेऽप्यसाधारणधर्मस्य प्रेमास्पदत्वादेर्भानासंभवात् । आरोप्यासाधारणधर्माणां भीषणत्वादीनां रज्ज्वामिवारोप्यासाधारणानामप्रेमास्पदत्वादीनामेवात्मनि भानापत्तेरित्यर्थः । त्वद्रीत्या सुखानुभवरूपस्यात्मनोऽहंसुखमनुभवामीति सुखानुभवाद्भेदेनैव प्रतीतेश्च

किंच,मोक्षेऽहमर्थाभाव आत्मनाशो मोक्ष इति बाह्यमतापत्तेः । प्रेमास्पदाहमर्थस्य त्वात्मत्वेऽपि नाशात् । तदति-

रिक्तशून्यस्य त्वन्मतेऽप्यनाशात् । न ह्यहमर्थभिन्न आत्मनि प्रेमधीः कदाचिदस्तीति भावः ।

किंच, "मामृतत्वं कृधि ज्योतिरहं विरजा विपाप्मा भूयासमि"ति श्रुत्याहमर्थस्यैवामृतत्वोक्तेः । अहं मुक्तः स्यामितीच्छा च न स्यात् । तस्यातद्विषयत्वात् ।

न चात्मन एव मुक्तिरिष्यते । अहंकारेतरारोपान्मुक्तः स्यामितीच्छापि सूपपन्ना । यथा शरीरस्यैव पुष्टीच्छायामप्यात्मनि तदैक्यारोपात् पुष्टः स्यामितीच्छा । यथात्मन एव सुखेच्छायामपि तदैक्यारोपाच्छरीरं सुखि स्यादितीच्छा चेति चेन्न । अन्योन्याश्रयापत्तेः । तत्र शरीरं पुष्टं स्यादितीच्छावदहं सुखी स्यामितीच्छावच्चेह चिन्मात्रं मुक्तं स्यादितीच्छायाः कदाप्यदर्शनेन मुक्तेरनिष्टत्वप्रसङ्गाच्च । यः कश्चिदात्मा मुक्तः स्यादितीच्छा चेन्न कदापि मुमुक्षुप्रवृत्तिः स्यात् । ममात्मा मुक्तः स्यादितीच्छाया अदर्शनात् ।

ननु यद्यपीच्छासमयेऽन्तःकरणाध्याससंभवेनात्ममात्रमुक्तीच्छा नास्तीति । सत्यम् । तथापि विशिष्टगतमुक्तीच्छाया एव विशेष्यगतमुक्तिविषयत्वपर्यवसानाभ्युपगम इति चेन्न । अहमर्थभिन्नतयात्मनो भानस्य क्वाप्यदर्शनेनैतत्कल्पनाया अप्रामाणिकत्वात् ।

अपिच, अहमर्थो यद्यन्तःकरणगर्भितस्तर्हि मम मन इति प्रत्ययो न स्यात् । तदवच्छिन्नस्य पुनस्तदनन्वयात् ।

किंच, एवं मनः स्फुरति, मनोऽस्तीति ज्ञानादहमिति ज्ञानस्य वैषम्यानुभवो न स्यात् । चिदचित्संवलनविषयत्वात् ।

तस्मादहमर्थस्यानात्मत्वे किमपि मानं नास्तीति सिद्धम् । आत्मत्वे तु प्रत्यक्षानुमानश्रुत्यादीनां सत्त्वात् तस्यात्मत्वं सुतरां सिद्धम् । तथाहि, जानाम्यनुभवामीत्यादिप्रतीतिभ्योऽहमर्थो मोक्षान्वयः । तत्साधनकृत्याश्रयत्वात् । संमननवदिति ।

न च स्वर्गसाधनकृत्याश्रये ऋत्विजि व्यभिचार इति वाच्यम् । उद्देश्यतासंबन्धेन हि यत्र कृतिस्तत्रैव फलमिति नियमः । ऋत्विजां तु दक्षिणाया एवोद्देश्यत्वान्नोक्तव्यभिचार इति । अहमर्थोऽनर्थनिवृत्त्याश्रयः । अनर्थाश्रयत्वात् । संमननवत् ।

न चासिद्धः । अहमज्ञोऽहमनुभवामीत्यबाधितानुभवात् । देहस्यानर्थाश्रयत्वाभावान्न व्यभिचारः । अनात्मत्वं नाहमर्थवृत्ति । अनात्ममात्रवृत्तित्वात् । घटत्वादिवत् । इत्याद्यनुमानेभ्यः । "सदेव सोम्येदमग्र आसीत्", "एकमेवाद्वितीयं", "तदैक्षत बहु स्यां प्रजायेय", "नामरूपे व्याकरवाणि", "त्रिवृतं करवाणि", ब्रह्मैवेदमग्र आसीत्", "स वात्मा" "आत्मानं वेदाहं", "हन्ताहमिमास्तिस्रो देवता" इत्यादिभ्यः ।

किंच, प्राकृतप्रलये विश्वलयात्मकेऽवशिष्यमाणस्यैकाद्वितीयादिशब्दाभिधेयस्य परब्रह्मणः श्रीपुरुषोत्तमस्यापि प्राणमनोभूतादिसृष्टेः प्रागपि ज्ञात्रभिन्नाहमर्थस्वरूपत्वमेवेत्यवगम्यते । तस्य नित्यमुक्तत्वं तावन्निर्विवादम् । एवं तत्साम्यापन्नानां "निरञ्जनः परमं साम्यमुपै"तीत्यादिश्रूयमाणानामप्यहमर्थस्वरूपत्वमेवेति मुक्तावपि तथात्वसिद्धेः । "अभयं वै जनक प्राप्तोऽसि यदात्मानमेव वेदाहं ब्रह्मास्मी"तीत्यत्रावधारणेनाहमर्थाभिन्नब्रह्मतादात्म्योपदेशात् । तथाभूतवेदनस्यात्मभावप्राप्तिरूपमोक्षफलकत्वोपदेशाच्च । अनविद्यस्यापि ब्रह्मणोऽहमुल्लेखोक्तेश्च ।

अहमित्येव यो वेद्यः स जीव इति कीर्तितः ।
स दुःखी स सुखी चैव स पात्रं बन्धमोक्षयोः ॥

इति कण्ठरवेणाहमर्थस्य मोक्षान्वयित्वश्रवणाच्च । "अहं मनुरभवं सूर्यश्चे"ति मुक्ततयावगम्यस्य वामदेवस्यानुभवाच्च । "अहमात्मा गुडाकेशे"ति सर्वात्मत्वं, "न त्वेवाहं जातु नाश"मित्यादिना कालत्रयाबाध्यत्वं, "ददामि बुद्धियोगं त"मिति मोक्षोपयिकज्ञानदातृत्वं, "मामेव ये प्रपद्यन्ते मायामेतां"मिति मायातरणासाधारणोपायरूपशरणापत्तिविषयत्वम्, "अहं कृत्स्नस्य जगतः प्रभवः प्रलयस्तथे"ति जगत्कारणत्वं, "वेदैश्च सर्वैरहमेव वेद्य" इति शास्त्रविषयत्वं, "ततो मां तत्त्वतो ज्ञात्वा विशते तदनन्तर"मिति मुक्तोपसृप्यत्वं, "मामुपेत्य तु कौन्तेय पुनर्जन्म न विद्यते" इत्यपुनरावृत्तिलक्षणफलत्वं, "मामेकं शरणं व्रजे"ति सर्वशरण्यत्वम् । "अहं त्वां सर्वपापेभ्यो मोक्षयिष्यामी"ति सर्वपापनिवर्तकत्वं, चाहमर्थस्यैव श्रीमुखेन निर्णीतं भगवद्गीतासु श्रीपुरुषोत्तमेन ।

किंच, अहमर्थादन्य आत्मा यदि स्यात्, तर्ह्युपलभ्येत । नतु तथोपलभ्यत इति योग्यानुपलब्धेरप्यत्र मानत्वात् ।

अपिच, अस्मदर्थान्यात्मप्रतीत्यभावान्यथानुपपत्तेरप्यत्र प्रामाण्यम् ।

किंच, परैरपि भाष्ये सर्वोऽप्यात्मास्तित्वं प्रत्येति, न नाहमस्मीति । यदि हि नात्मास्तित्वप्रसिद्धिः स्यात्, सर्वो लोको नाहमस्मीति प्रतीयादिति ।

न तावदयमेकान्तेनाविषयः । अस्मत्प्रत्ययविषयत्वान्वयव्यतिरेकेणात्मनोऽहमर्थतयैव प्रतिपादनात् । अन्यथा स्वोक्तिबाध इत्यर्थस्तस्मादहमर्थाभावाभाव एवात्मेत्यलं पल्लवनेन ॥ १८ ॥

अथ तत्परिमाणं निर्णीयते । तथाहि, स किं मध्यमपरिमाणको विभुपरिमाणोऽणुपरिमाणको वेत्याकाङ्क्षायामाह ॥

॥ उत्क्रान्तिगत्यागतीनाम् ॥ १९ ॥

प्रत्यगात्माणुपरिमाणक एव । कुतः । "स यदास्माच्छरीरादुत्क्रामति सहैवैतैः सर्वैरुत्क्राम"तीति, "ये वै के चास्माल्लोकात् प्रयन्ति चन्द्रमसमेव ते गच्छन्ति" इति । "तस्माल्लोकात् पुनरेत्यास्मै लोकाय कर्मण" इत्यादिना तस्योत्क्रान्तिगत्यागतीनां श्रवणादिति । न मध्यमपरिमाणको विभुपरिमाणको वा । तत्र दोषाणामुक्तत्वात् ।

ननु स्यादेतत् । मनसामात्मनां च विभुत्वबहुत्वयोग उक्तदोषाणां योगः । न त्वेकत्वविभुत्वयोगे । तथा चैक एव विभुरात्मानेकोपाधिभिरवच्छिन्नो घटावच्छिन्नाकाशवद् भिन्नतया भाति । स्वस्वोपाधिप्रयुक्ताश्च स्वीयसुखदुःखानुभूतय उपाधीनामेवेतरेतरभिन्नानां भेदनियामकत्वेन सुखाद्यनुभवसांकर्याभावाद्व्यवस्थासामञ्जस्यम् ।

यद्वा, बिम्बस्थानीयमेकं ब्रह्म, जलादिस्थानीयान्तःकरणाद्युपाधौ प्रतिबिम्बितं सज्जीवत्वमापद्यते । उपाधेश्चाविद्यकत्वात् तत्प्रयुक्तभेदोऽप्याविद्यकः । यथा सूर्यस्य जलपरिपूरितघटेषु तत्र तत्र प्रतिबिम्बविशेषो घटोपाधिकृतो भेदश्च । तत्रैकस्मिंश्चाल्यमाने घटजले घटे नष्टे च तद्गतस्यैकस्यैव प्रतिबिम्बस्य चाञ्चल्यं बिम्बभावापत्तिर्नान्येषां, तथैकस्मिन्नेवान्तःकरणे सुखादिवृत्तिरूपपरिणामे सति तद्गतैकस्यैव चेतनप्रतिबिम्बस्य तत्तद्दुःखाद्यनुभवो नान्येषां, तथा चैकस्मिन्नेवोपाधौ तत्त्वमस्यादिवाक्यश्रवणजन्यजीवब्रह्मैक्यज्ञानान्नष्टे सति तस्यैव ब्रह्मभावापत्तिर्नान्येषामिति सर्वस्या अपि सुखदुःखभोगासांकर्याभावव्यवस्थायाश्च सुवचत्वमिति चेन्न । उभयपक्षेऽपि बन्धमोक्षव्यवस्थानुपपत्तेः । सुखादिभोगसांकर्यापत्तेश्च पूर्वमेव विस्तृतत्वात् । "परमतप्रयोजननिराकरणप्रकरणे यस्य ब्रह्मभावापत्तिलक्षणो मोक्षः प्रयोजनत्वेनाभ्युपगम्यत" इत्यारभ्य "जीवब्रह्मैक्यं वक्तुमशक्य"मित्यन्तेन ग्रन्थेन ।

किंच, सर्वगताद्वितीयात्मवाद उपाधेर्विभुत्वाङ्गीकारश्चेत् सर्वस्यापि चेतनस्याद्यत्वेन जगदान्ध्यप्रसङ्गः । प्रकाशकाभावात् । गत्याद्यनुपपत्तिर्मुक्तोपसृप्यब्रह्मोच्छेदप्रसङ्गश्च । "ब्रह्मविदाप्नोति परं", "पूता मद्भावमागता" इत्यादिमोक्षशास्त्रबाधश्च । उपाधिपरिच्छिन्नानेकात्मत्ववादे च पदेपदे बन्धमोक्षापत्त्यादिदोषाणां पूर्वमेव विस्तृतत्वात् ।

किंच, मोक्षस्योक्तन्यायेनाकस्मात् पदेपदे सिद्धौ "तमेव विदित्वातिमृत्युमेति", "यदा चर्मवदाकाशं वेष्टयिष्यन्ति मानवा" इत्याद्यन्वयव्यतिरेकावधारणयुक्तमोक्षसाधनबोधकश्रुतीनां बाधप्रसङ्गः । मोक्षोद्देशेन जिज्ञासाशास्त्रारम्भवैयर्थ्यं च ।

किंच, उभयपक्षेऽप्यावरकोपाधेः सत्यत्वं मिथ्यात्वं वा ।

नाद्यः । द्वैतापत्तेः । सत्यस्य ज्ञाननाश्यत्वानङ्गीकारेणानिर्मोक्षप्रसङ्गाच्च । परमतप्रवेशाच्च ।

न द्वितीयः । अनुपपन्नत्वात् । तथाहि, यथा चित्तस्य सावयवत्वस्वरूपवत्त्वादिना सजातीयसमसत्ताकोपाधौ प्रतिबिम्बननियमः । तथावच्छेदकस्याप्युपाधेः समसत्ताकस्यैवावच्छेदकत्वनियमः । अन्यथा स्वप्नरज्ज्वा जाग्रदवस्थायां राजभटनिगृहीतचौरादीनां बन्धनापत्तेर्मृगमरीचिकाजले सूर्यादेः प्रतिबिम्बनापत्तेश्च । न तु तदस्ति । दृष्टश्रुतयोरगोचरत्वात् ।

किंच, तत्त्वज्ञानाज्जीवोपाधिनाशे सति जीवो नश्यति न वा ।

आद्ये स्वरूपनाशस्यैव मोक्षत्वापत्तिः ।

द्वितीयेऽविद्यानाशेऽप्यनिर्मोक्षप्रसङ्गः । ब्रह्मातिरिक्तजीवस्वरूपावस्थानात् ।

न च दर्पणादिषूपलभ्यमानापमुखमालिन्यादिवच्छब्दादिव्यवस्थोपपत्तिरिति वाच्यम् । आपातोक्तेः । मालिन्यादय औपाधिका दोषाः कदा नश्येयुः । दर्पणाद्युपाध्यपगम इति चेत् । किं तदा मालिन्याद्याश्रयः प्रतिबिम्बस्तिष्ठति न वा ।

आद्ये तत्स्थानीयस्य जीवस्यापि स्थितत्वादनिर्मोक्षप्रसङ्गः ।

द्वितीये तद्वदेव जीवनाशात् स्वरूपनाश एव मोक्षः स्यात् ।

किंच, यस्यापुरुषार्थरूपदोषप्रतिभासस्तदुच्छेदः पुरुषार्थः । तत्र किमौपाधिकदोषप्रतिभासो बिम्बस्थानीयस्य ब्रह्मण उत प्रतिबिम्बस्थानीयस्य जीवस्य वाभिप्रेतस्तदितरस्य वा ।

आद्ययोः कल्पयोर्दृष्टान्तासिद्धिः । मुखस्य तत्प्रतिबिम्बस्य वा मालिन्यादिदोषशून्यत्वात् । न हि मुखं प्रतिबिम्बं वा चेतयते । उभयोर्जडत्वात् । तदुभयेतरदृष्टेरभावान्न तृतीयः ।

किंच, अविद्याकल्पस्य जीवस्य को वा कल्पकः । अविद्येति चेन्न । तस्या अचेतनत्वात् ।

नापि जीवः । आत्माश्रयापत्तेः । शुक्तिरजतवदविद्याकल्पितत्वाच्च ।

ननु जीवस्य ब्रह्मैव किं कल्पकमिति चेन्न । ब्रह्मण्यज्ञानस्यैवापातात् ।

किंच, ब्रह्मण्यज्ञानानङ्गीकारे किं ब्रह्म जीवान् पश्यति न वा । न पश्यति चेत् । ईक्षादिपूर्विका विचित्रसृष्टिर्नामरूपस्य व्याकरणादि च ब्रह्मणो न स्यात् ।

अथ पश्यति चेत् । अखण्डैकरसं ब्रह्म नाविद्यामन्तरेण जीवान् पश्यतीति ब्रह्मण्यज्ञानप्रसङ्गः ।

अत एव मायाविद्याविभागवादोऽपि निरस्तः । अज्ञान-

मन्तरेण हि मायिनो ब्रह्मणो जीवदर्शित्वासंभवात् । नहि माया मायाविनमेव दृष्ट्वा मोहयितुमलम् ।

नापि माया मायाविनो दर्शनसाधनम् । दृष्टेषु परेषु तन्मोहनसाधनमात्रत्वात् तस्याः । अथ ब्रह्मणो माया जीवदर्शित्वं कुर्वन्ती जीवमोहनस्य हेतुरिति चेन्न । तर्हि परिशुद्धस्याखण्डैकरसस्य स्वप्रकाशस्य ब्रह्मणः परदर्शित्वं कुर्वन्ती माया मायापरपर्यायाविद्यैव स्यात् ।

ननु विपरीतदर्शनहेतुरविद्या । माया तु मिथ्याभूतं ब्रह्मव्यतिरिक्तं मिथ्यात्वेन दर्शयन्ती न ब्रह्मणो विपरीतहेतुः ।

अथ तस्या अनादित्वमिति । मैवम् । एकत्वे ज्ञायमाने द्विचन्द्रदर्शनहेतोरप्यविद्यात्वात् ।

यदि च ब्रह्माविद्यात्वेनैव स्वव्यतिरिक्तं जानाति तर्हि कथं तान् मोहयति । न ह्यनुन्मत्तो मिथ्यात्वेन ज्ञाता मोहयितुमीहते ।

अथापुरुषार्थापरमार्थदर्शनहेतुरविद्या । माया तु ब्रह्मणो नापुरुषार्थदर्शनहेतुः । अतोऽस्या अनादित्वमिति मतम् । तन्न द्विचन्द्रदर्शनस्य दुःखहेतुत्वाभावेन पुरुषार्थत्वाभावेऽपि तद्धेतुरविद्यैव । तन्निरसने प्रयासदर्शनात् ।

यदि च नापुरुषार्थदर्शनकरी माया तर्ह्यनुच्छेद्यतया ब्रह्मस्वरूपानुबन्धिनी स्यात् ।

अस्तु को दोष इति चेत् । द्वैतदर्शनमेव दोषः । "यत्र द्वैतमिव भवति, तत्रेतर इतरं पश्यति, यत्र त्वस्य सर्वमात्मैवाभूत्, तत् केन कं पश्ये" दित्याद्यद्वैतश्रुतिव्याकोपात् ।

परमार्थविषया अद्वैतश्रुतयः । मायायास्त्वपरमार्थत्वाच्च विरोध इति चेत् । अपरिच्छिन्नानन्दैकरूपस्य स्वरूपेणापरमार्थभूतमायादिदर्शनं तद्वत्ता चाविद्यामन्तरेण नोपपद्यते । तव मते ह्याविद्यकमेव ब्रह्म । मायादिदर्शित्वादिति ।

ननु "अनेन जीवेनात्मनानुप्रविश्य" ति श्रुतेर्न जीवब्रह्मणोर्वास्तवो भेदः, किंतु कल्पितभेदाश्रयणेनैवेयं व्यवस्थोच्यते, न च कस्य कल्पना । न तावद्ब्रह्मणः । तस्य परिशुद्धज्ञानात्मनः कल्पनाशून्यत्वात् । नापि जीवानाम् । अन्योन्याश्रयापत्तेः । कल्पनाधीनो हि जीवभावो जीवाश्रया च कल्पनेति वाच्यम् । अविद्याजीवत्वयोर्बीजाङ्कुरन्यायेनानादित्वात् । जीवानां भ्रमस्यानादित्वाच्च तद्धेतुरन्वेषणीय इति चेन्न । स्वकपोलकल्पनाविजृम्भितत्वात् । तथाहि, जीवस्याकल्पितस्वरूपेणाविद्याश्रयत्वे ब्रह्मण एवाविद्याश्रयत्वमुक्तं स्यात् । तदतिरिक्तेन तस्मिन् कल्पितेनाकारेणाविद्याश्रयत्वे जडस्याविद्याश्रयत्वमुक्तं स्यात् । न हि मायावादे तदुभयातिरिक्ताकारस्याङ्गीकारः ।

न च कल्पिताकारविशिष्टेन स्वरूपेणैवाविद्याश्रयत्वमिति वाच्यम् । अखण्डैकरसस्य स्वरूपस्याविद्यामन्तरेण विशिष्टत्वासंभवात् ।

किंच, जीवाज्ञानाश्रयणे किं प्रयोजनमिति वक्तव्यम् । बन्धमोक्षव्यवस्थासिद्धिरेवेति चेन्न । सा तु तत्पक्षेऽपि न संभवति । अविद्याया विनाशो हि मोक्षः । तत्रैकस्मिन् मुक्तेऽविद्याविनाशात् सर्वे मुच्येरन् । अन्येषां ह्यमुक्तत्वादविद्या तिष्ठति चेत् । तर्हि न कस्यापि मुक्तिः स्यात् । अविद्याया अनिष्टत्वात् । प्रतिजीवमविद्याभेदः कल्प्यते चेत् ।

भेदः स्वाभाविको वोत कल्पितः ।

नाद्यः । अनङ्गीकारात् । भेदसिद्धयेऽविद्याकल्पनस्य वैयर्थ्यप्रसङ्गात् ।

न द्वितीयः । अन्योन्याश्रयात् । जीवभेदसिद्धौ तासां सिद्धिः, ततश्च जीवभेदसिद्धिरिति ।

न च बीजाङ्कुरन्यायेन तस्यादोषत्वमुक्तमेवेति वाच्यम् । उक्तन्यायस्यात्रानवसरात् । तथाहि, बीजाङ्कुरेषु तावदन्यदन्यद्बीजमन्यस्यान्यस्याङ्कुरस्योत्पादकं प्रत्यक्षादिप्रमाणसिद्धम् । इह तु याभिरविद्याभिर्ये जीवाः कल्प्यन्ते, तानेवाश्रित्य तासां सिद्धिः ।

अथ बीजाङ्कुरन्यायेन पूर्वपूर्वजीवाश्रयाभिरविद्याभिरुत्तरोत्तरजीवकल्पनां मन्यसे, उत विज्ञानवादिवज्जीवोत्पत्तिम् ।

आद्ये, असंभवः । कल्पनायाः प्राक् कल्पकस्याभावात् ।

द्वितीये जीवानां भङ्गुरत्वं कृतनाशाकृताभ्यागमप्रसङ्गश्चेति ।

अत एव ब्रह्मणः पूर्वपूर्वजीवाश्रयाभिरविद्याभिरुत्तरोत्तरजीवभावकल्पनमित्यपि निरस्तम् । अविद्याप्रवाहेऽभ्युपगम्यमाने तत्कल्पितजीवभावस्यापि तद्वत् प्रवाहानादिता स्याच्च ध्रुवरूपता । तथात्वे चामोक्षाज्जीवभावस्य ध्रुवत्वमपि तवेष्टं न सिद्ध्येत् ।

ननु प्रासादनिगरणादिवदनुपपत्तैकाविद्यायामवस्तुभूतायां नेतरेतरादिदोषा अनवक्लृप्तिमावहन्तीति चेन्न । तथात्वे च सति मुक्तानपि परं ब्रह्म चाश्रयेदविद्येति मन्तव्यं पण्डितंमन्यैः । तेषां शुद्धज्ञानरूपत्वादशुद्धाविद्या न तत्र सज्जतीति चेत् । तर्ह्युक्तोपपत्तिभिर्जीवानपि नाश्रयेत् । तेषामपि स्वरूपतो ब्रह्माभिन्नत्वेन शुद्धत्वाविशेषात् । अन्यथा तव मते शुद्धस्य ब्रह्मणोऽविद्याश्रयत्वाङ्गीकारेण मुक्तानां शुद्धानां पुनरविद्याश्रयणेऽपि कियान् दोषः । तथोक्तं विवरणे,

"आश्रयत्वविषयत्वभागिनी निर्विशेषचितिरेव केवला" ।

इत्यादिना । अतः प्रतिबिम्बवादः श्रेयोऽर्थिभिः सर्वथा-

पेक्षणीयः । श्रुत्यादिमानशून्यत्वात् ।

ननु

"एक एव हि भूतात्मा भूतेभूते व्यवस्थितः ।
एकधा बहुधा चैव दृश्यते जलचन्द्रवत्" ॥

इति श्रुतिसिद्धत्वात् कथमश्रौतत्वमिति चेन्न । उक्तश्रुतेरन्तर्यामिणो निर्लेपत्वप्रतिपादनपरत्वेन प्रतिबिम्बविषयकत्वाभावात् । तस्मिन् वाक्ये प्रतिबिम्बशब्दादर्शनात् । काल्पनिकार्थस्य बुद्धिकौशलमात्रत्वात् । श्रुत्यर्थस्तु भूतात्मा, भगवान् वासुदेव एक एव, भूतेभूते चेतनाचेतनवर्गे । यद्वा, अभूत इति च्छेदः । भूते कार्यवर्गे, अभूते कारणवर्गे । यद्वा भूते सृष्टिं गते बद्धचेतनवर्गे, अभूते सृष्ट्यनन्तर्गते, नित्यमुक्तचेतनवर्गे । तदन्तर्यामितया व्यवस्थितः । विशेषेण सदैकरसानन्दरूपेणावस्थितोऽपि तद्गतदोषासंस्पृष्टमाहात्म्य एव दृश्यते महात्मभिस्तदनुग्रहभाजनैरुपनिषच्चक्षुषैरित्यन्वयः ।

ननु गुणदोषसंपृक्ते वस्तुनि वर्तमानस्य कथमिव तन्निर्लेपत्वमित्याशङ्कां दृष्टान्तेन निराकरोति । चन्द्रवदिति । यथा चन्द्रः श्रीगङ्गादिपुण्यजलेषु शूकरादिविलोडितदुर्गन्धिगतादिजलेषु च स्वकरनिकरव्याप्त्या वर्तमानोऽपि तद्गतगुणदोषैर्न युज्यते, एवं ब्रह्मादि स्वया कान्त्यैषु चेतनाचेतनेषु साम्येन स्वरूपव्याप्त्या तिष्ठन्नपि परमेश्वरो न तद्गतगुणदोषैर्युज्यते । अस्पृष्टस्वभावत्वात् । सूर्यो यथा सर्वलोकस्य चक्षुर्न लिप्यते चाक्षुषैर्बाह्यदोषैरेकः, तथा सर्वभूतान्तरात्मा न लिप्यते । "लोकदुःखेन बाह्य" इत्यग्रिमवाक्यात् । तत्रैकधा समष्ट्यन्तर्यामितया, बहुधा व्यष्ट्यन्तरात्मतयेति संक्षेपः ।

किंच, तवाभिप्रेतबिम्बभूतं ब्रह्मोपाध्यन्तःस्थं, तदनन्तर्गतं वा ।

नाद्यः । जलान्तःस्थस्य मत्स्यकूर्मादेः प्रतिबिम्बादर्शनात् ।

नान्त्यः । तव पक्षे ब्रह्मणोऽविद्याबहिःस्थत्वासंभवात् । अन्यथा सदेशत्वापत्तेः । परिच्छिन्नत्वप्रसङ्गाच्च । तथात्वे च मिथ्यात्वं दुर्वारम् । ब्रह्म मिथ्या, सदेशत्वात्, पृथिव्यादिवत्, परिच्छिन्नत्वात्, घटादिवच्च, इत्यनुमानात् । इत्याद्युक्तं पूर्वमेव । एवमवच्छेदवादेऽप्युक्तदोषा ऊह्याः । अविशेषात् ।

नाप्येकजीववादस्य सम्यक्त्वम् । पूर्वमेव निरस्तत्वात् । प्रमाणशून्यत्वाच्च ।

न च "पुरत्रये क्रीडति देव एकः", "एको देवः सर्वभूतेषु गूढ" इत्यादिश्रुतीनां तत्र मानत्वमिति वाच्यम् । अन्यार्थपरत्वात् । श्रुत्यर्थस्तु पुरत्रये जाग्रदाद्यवस्थावच्छिन्नदेहत्रये, एक एव जीवो देवः । प्रकाशरूपत्वात् । क्रीडनशीलत्वात् । न त्ववस्थाभेदाज्जीवभेदः । अन्यथा कृतनाशादिप्रसङ्गादिति प्रथमवाक्यार्थः । "एको देव" इत्यादि वाक्यं तु ब्रह्मपरम् । सर्वव्यापित्वसर्वभूतान्तरात्मत्वकर्माध्यक्षत्वसर्वसाक्षित्वादीनां ब्रह्मासाधारणलिङ्गानां जीवे कथमप्यसंभवात् ।

तस्मादेकजीववादोऽश्रौत एवेति सिद्धम् । नित्यो नित्यानां चेतनश्चेतनानां", "न त्वेवाहं जातु नासं न त्वं नेमे जनाधिपाः । बहवो ज्ञानतपसा पूता" इत्यादिश्रुतिस्मृतिविरोधात् । शास्त्रे क्वचिदेकवचनोक्तिर्जातिपरा । "ब्राह्मणो न हन्तव्य" इत्यादिवत् । औपाधिकभेदवादे तु कायव्यूहस्थले योगिनः सर्वदेहेषु भोग इवैकजीवस्य सर्वदेहगतसुखाद्यनुभवापत्तिः । ब्रह्मण एव जीवत्वेन नित्यमुक्तत्वादिश्रुतिव्याकोपश्च । एकस्यानेकदेहेषु प्रत्यक्त्वपराक्त्वासंभवश्च ।

न चान्तःकरणभेदस्यात्र नियामकत्वमिति वाच्यम् । योगिनः कायव्यूहानामन्तःकरणभेदेऽपि प्रत्यक्त्वपराक्त्वादर्शनात् । प्रत्युताहमित्येव सर्वत्र प्रतीतिदर्शनाच्चावच्छेदवादोक्तदोषाणामत्र तुल्यत्वम् । किंतूपाधिसत्यत्त्वमिथ्यात्वयोरेव विशेष इत्यलं विस्तरेण ।

तस्मादणुपरिमाणक एवेति ॥ १९ ॥

प्रकृतमनुसरामः ॥

॥ स्वात्मना चोत्तरयोः ॥ २० ॥

चशब्दोऽवधृत्यर्थः । यद्यप्युत्क्रान्तेः शरीरवियोगत्वेन सा कथंचित् स्थितेनापि संपाद्या स्यात् । उत्तरयोर्गत्यागत्योस्तु स्वात्मनैव संपाद्यत्वमिति विशेषः ॥ २० ॥

॥ नाणुरतच्छ्रुतेरिति चेन्नेतराधिकारात् ॥ २१ ॥

ननु नायमणुः । कुतः । अतच्छ्रुतेः । अणुभिन्नविभुत्वश्रुतेरित्यर्थः । "सोऽयं विज्ञानमय" इति जीवप्रस्तावे "स वा एष महानज आत्मे" ति महत्त्वश्रुतेरिति चेत् । तत् परिहरति । नेति । कुतः । इतरस्य परमात्मनोऽधिकारात् । "यस्यां नु वित्तः प्रतिबुद्ध आत्मे" ति मध्ये परमात्मप्रतिपादनात् तस्यैव परामर्श इत्यर्थः ॥ २१ ॥

॥ स्वशब्दोन्मानाभ्यां च ॥ २२ ॥

इतश्चायमणुरात्मा । "एषोऽणुरात्मा चेतसा वेदितव्यो यस्मिन् प्राणः पञ्चधा संविवेश" इति कण्ठरवेणाणुत्वश्रवणात् । अणुसदृशं वस्तूद्धृत्य यन्मानं तदुन्मानम् ।

"बालाग्रशतभागस्य शतधा कल्पितस्य च ।
भागो जीवः स विज्ञेयः स चानन्त्याय कल्पते" ॥

"आराग्रमात्रो ह्यवरोऽपि दृष्टः" ।

इति चोन्मानश्रवणात् । प्रत्यगात्माणुपरिमाणकः । उत्क्रा-

न्त्यादिमत्त्वात् । यद्येवं तद्येवम् । परमात्मवत् । जीवो यद्यणुपरिमाणको न स्यात्, तदा गत्याद्युपदेशोऽपि न स्यादिति "ते धूममभिसंभवन्ति" इत्यादिश्रुतेरिति संक्षेपः ॥ २२ ॥

ननु तर्हि सर्वावयवगतसुखदुःखाद्यनुभवयौगपद्यव्यवस्थानुपपत्तिः । स्वरूपस्याणुमात्रदेशवृत्तित्वादित्यत आह ॥

॥ अविरोधश्चन्दनवत् ॥ २३ ॥

यथा हरिचन्दनबिन्दुः शरीरैकदेशेऽपि पतितः कृत्स्नं शरीरमाह्लादयति, तथेति । धर्मिणोऽणुत्वेऽपि तद्धर्मभूतज्ञानस्य विभुत्वात् । अणुनश्चन्द्रस्य आकाशे व्याप्य एवमेवास्य प्रकाशो व्याप्तः । "व्याप्तो वै पुरुष" इति श्रुतेः ।

"यथा प्रकाशयत्येकः कृत्स्नं लोकमिमं रविः ।
क्षेत्रं क्षेत्री तथा कृत्स्नं प्रकाशयति भारत ॥
अणुमात्रोऽप्ययं जीवः स्वदेहं व्याप्य तिष्ठति ।
यथा व्याप्य शरीराणि हरिचन्दनविप्रुषः" ॥

इत्यादिस्मृतेश्च ।

"यथा च दीपः शरणे दीप्यमानः प्रकाशते ।
एवमेव शरीराणि प्रकाशयति चेतनः" ॥

इत्यश्वमेधपर्वणि ।

न च प्रकाशादेर्धर्मस्याश्रयं विना व्याप्त्यसंभव इति शङ्कनीयम् । दीपं विना तत्प्रभाया, वह्निं विना तदौष्ण्यादेः, पुष्पं विना तद्गन्धस्य व्याप्तिः, प्रत्यक्षागमाभ्यां सिद्धतरा । धर्मिणं विना जातिसमवायादीनां व्याप्तिरन्यैरपि स्वीकृता च ।

एतेन क्वचिद्विभुपरं शास्त्रमपि व्याख्यातम् । विभुधर्माश्रयाणां तथात्वस्य शक्यैवावगमान्मुख्यत्वमेवेति ।

नन्वात्मनोऽणुत्वाङ्गीकारेऽपि सुखादिव्यवस्था सूपपादा । आत्मवृत्तिविभुपरिमाणकधर्मभूतज्ञानेन स्वशिरःपाण्यादिगतसुखाद्यनुभवोऽपि दुर्वारः । ज्ञानव्याप्तेस्तत्रापि सत्त्वात् । सर्वजीवनिकायवृत्तिसुखादि सर्वेषामप्यवश्यमनुभाव्यमेव । विभुवादे कल्पितदोषाणां भोगसंस्कार्यस्य च तत्रापि दुर्वारत्वेन व्याप्तिसाम्यादिति चेन्न । आपातोक्तेः । तथा हि, अस्मत्सिद्धान्ते । "अज्ञानेनावृतं ज्ञानं तेन मुह्यन्ति", "आवृतं ज्ञानमेतेने"त्यादिनात्मज्ञानस्य विभुत्वेऽपि बद्धावस्थायां कर्मात्मकाज्ञानावृतत्वेनेन्द्रियसंनिकर्षसापेक्षत्वात्, यत्रेन्द्रियसंनिकर्षस्तस्यैवानुभवो नान्यस्येति । एवं देवदत्तस्य स्वशरीरगतसुखादिभिः स्वान्तःकरणसंनिकृष्टत्वात् तेषामेवानुभवो न यज्ञदत्तशरीरगतसुखादीनाम् । स्वकरणसंनिकर्षाभावात् । मोक्षावस्थायां तु तदावरकाज्ञानस्य ध्वंसात् सर्वविषयकानुभवस्येष्टापत्तिः । "सर्वं हि पश्यः पश्यति सर्वमाप्नोति सर्वश" इत्यादिश्रुतेः । परमते तु स्वरूपस्यैकत्वादुक्तदोषोद्धारासंभवः ।

सिद्धान्ते तु प्रतिदेहं स्वरूपभेदान्नोक्तदोषावकाश इति संक्षेपः ॥ २३ ॥

॥ अवस्थितिवैशेष्यादिति चेन्नाभ्युपगमाद्धृदि हि ॥ २४ ॥

ननु दृष्टान्तदार्ष्टान्तिकयोर्वैषम्यम् । हरिचन्दनबिन्दोर्हि देहैकदेशविशेषेऽवस्थितेर्विशेषभावाच्छरीरैकदेशावस्थानस्य प्रत्यक्षत्वात् तथाभावः । आत्मनस्तु न तथेति चेन्न । आत्मनोऽप्यवस्थितेर्देशविशेषाभ्युपगमात् । तथा ह्याह श्रुतिः । "हृदि ह्येष आत्मा", "स वा एष आत्मा हृदि" इति, "योऽयं विज्ञानमयः प्राणेषु हृद्यन्तर्ज्योति"रित्यादि ॥ २४ ॥

आत्मनो देशविशेषे स्थितिव्यापनाय चन्दनदृष्टान्तं प्रदर्श्य, एकदेशवर्तिनोऽपि सकलदेहं व्याप्य कार्यकरत्वे प्रकारमाह ॥

॥ गुणाद्वा लोकवत् ॥ २५ ॥

वाशब्दो मतान्तरव्यावृत्त्यर्थः । आत्मा स्वगुणेन ज्ञानेन सकलं देहं व्याप्यावस्थितः । आलोकवत् । यथा मणिद्युमण्यादीनामेकदेशस्थितानामप्यालोकोऽनेकदेशव्यापी दृश्यते । तद्वदात्मज्ञानमपि ॥ २५ ॥

ननु ज्ञानस्य व्यापकत्वेऽणुजीवव्यतिरेकेणावस्थानं वक्तव्यम् । तच्चायुक्तम् । गुणिव्यतिरिक्तदेशे गुणस्यावस्थानादर्शनात् । न च दीपप्रभान्यायेनेति वाच्यम् । प्रभाया दीपसंयुक्तद्रव्यान्तरत्वादित्याह ॥

॥ व्यतिरेको गन्धवत्, *तथा च दर्शयति ॥ २६ ॥

यथा गुणस्यापि गन्धस्य गुणिव्यतिरेकेण वृत्तिः । पुष्पपेटिकातो दूरस्थितस्य गन्धोपलम्भदर्शनात् । तद्वद्गुणिव्यतिरेकेण ज्ञानस्येत्यर्थः । अत एवात्मनश्चैतन्यगुणेनैव देहव्याप्तिरित्यत्र श्रुतिमाह । तथा चेति । ज्ञानगुणेन सर्वदेहव्यापित्वमात्मनो दर्शयति श्रुतिः । "स एष इह प्रविष्ट आ लोमभ्य आ नखेभ्य" इति ॥ २६ ॥

॥ पृथगुपदेशात् ॥ २७ ॥

इतश्चात्मनो गुणो व्यतिरिक्तः । कुतः । "प्रज्ञया शरीरं समारुह्ये"ति, "तदेषां प्राणानां विज्ञानमादाये"ति च यावद्, विज्ञानस्य पृथगुपदेशात् । "अविनाशी वा अरे अयमात्मानुच्छित्तिधर्मे"त्यादिना तस्य नित्यत्वप्रतिपादनाच्च । तथा च स्मृतिः ।

"यथा न क्रियते ज्योत्स्ना मलप्रक्षालनान्मणेः ।
दोषप्रहाणान्न ज्ञानमात्मनः क्रियते तथा ॥

* शंकरमते सूत्रद्वयम् ।

यथोदपानखननात् क्रियते न जलान्तरम् ।
सदेव नीयते व्यक्तिमसतः संभवः कुतः ॥
तथा हेयगुणध्वंसादेव बोधादयो गुणाः ।
प्रकाशन्ते न जन्यन्ते नित्या एवात्मनो हि ते" ॥

इति ॥ २७ ॥

ननु "नित्यं विभुं सर्वगतं सुसूक्ष्मं", "नित्यः सर्वगतः स्थाणु"रित्यादिविभुत्वप्रतिपादकश्रुतिस्मृतिविरोधस्तदवस्थ एवेत्याशङ्कायामाह ॥

॥ तद्गुणसारत्वात् तु तद्व्यपदेशः प्राज्ञवत् ॥ २८ ॥

तुशब्दः शङ्कानिरासार्थः । स विभुर्ज्ञानगुण एव सारो विभुत्वव्यपदेशे मुख्यो यस्य तस्य भावस्तस्मात् तद्व्यपदेशः । विभुत्वव्यपदेशः । तत्रैकदेशे दृष्टान्तमाह प्राज्ञवदिति । यथा प्राज्ञस्य ब्रह्मणो बृहन्तो गुणा अस्मिन्निति ब्रह्मेति, श्रुत्युक्ता निरुक्तिः । एवं प्रत्यगात्मनोऽपि विभुगुणत्वाद्विभुत्वव्यपदेशो न स्वरूपेण । अन्यथा पूर्वोदाहृतानि श्रुतिस्मृतिसूत्राणि बाध्येरन् ॥ २८ ॥

॥ यावदात्मभावित्वाच्च न दोषस्तद्दर्शनात् ॥ २९ ॥

यावदात्मवृत्तित्वान्नित्यत्वाच्च गुणस्य । अतस्तेन प्रत्यगात्मनो विभुत्वव्यपदेशो न विरुद्ध इत्यर्थः । खण्डो गौरित्यादिषु तथा दर्शनात् ॥ २९ ॥

ननु तस्य नित्यत्वे सुषुप्त्यादौ विषयानुभवापत्तिरिति चेत् । तत्राह ॥

॥ पुंस्त्वादिवत् तस्य सतोऽभिव्यक्तियोगात् ॥ ३० ॥

तुशब्देनोत्पत्तिर्निरस्यते । जाग्रदादावभिव्यक्तिसंभवाद्यावदात्मभावित्वमेव प्रत्यगात्मज्ञानस्य । पुंस्त्वादिवत् । यथा बाल्ये विद्यमानस्यैव पुंस्त्वस्य सप्तमधातोर्यौवनेऽभिव्यक्तिः । अन्यथा पुंस्त्वादेरागन्तुकतापत्तेः । तथात्वे च पुंक्लीबत्वविभागासिद्धिरित्यर्थः ॥ ३० ॥

॥ नित्योपलब्ध्यनुपलब्धिप्रसङ्गोऽन्यतरनियमो वान्यथा ३१ ॥

अन्यथा प्रत्यगात्मनो ज्ञानमात्रत्वे सर्वगतत्वे च नित्यमेवोपलब्ध्यनुपलब्धी प्रसज्जेयाताम् । तयोरन्यतरनियमो वा । उपलब्धिरेव वा नित्यं स्यात्, अनुपलब्धिरेव वेति ।

अयं भावः । उपलब्धिरनुपलब्धिश्च तावल्लोकसिद्धा । तयोरयं सर्वगतो ज्ञानात्मा चेत् कारणं, तर्हि सर्वलोकस्य सर्वदा सर्वत्र ते प्राप्नुयाताम् ।

यद्युपलब्धेरेव हेतुः, तदा सर्वदा सर्वत्र कस्याप्यनुपलब्धिर्न स्यात् । अनुपलब्धेरेव चेद्धेतुः, तर्हि कस्यापि कुत्राप्युपलब्धिर्न स्यादिति ।

न च करणायत्तानयोर्व्यवस्था । सर्वात्मनां विभुत्वेन सर्वकरणैः सर्वदा संयोगस्याविशेषादित्यादि पूर्वमेव विस्तृतम् ।

सिद्धान्ते तु तस्य शरीरान्तरेवावस्थितत्वात् तत्रैवोपलब्धिर्नान्यत्रेति व्यवस्था सिध्यति ॥ ३१ ॥

॥ शेषमपराङ्के ॥

SANSKRIT and ENGLISH DICTIONARY, being an abridgment of PROFESSOR WILSON'S DICTIONARY with an Appendix explaining the use of affixes in Sanskrit, by PANDIT RÁM JASAN, cloth bound and lettered. Rs. 10.

THE RÁMÁYAN of VÁLMÍKI, translated in English verse by RALPH T. H. GRIFFITH, M. A. Vol. II. Rs. 6. Vol. III. Rs. 4-8. Vol. IV. Rs. 6. and Postage 6 annas each.

THE LAGHU KAUMUDÍ, a Sanskrit Grammar with an English version, commentary and references by DR. BALLANTYNE, late Principal of the Sanskrit College, Benares, re-edited by RALPH GRIFFITH, M. A., Principal of the Sanskrit College, Benares. *Price 8 Rupees.*

"The Translation of Laghu Kaumudí made by the late Dr. Ballantyne has enabled even beginners to find their way through the Labyrinth of Native Grammar." *Prof. Max Müller.*

"THE BIBLE FOR THE PANDITS." The first three chapters of Genesis diffusely and unreservedly commented, in Sanskrit and English,—with an introduction, by JAMES R. BALLANTYNE, LL. D. Rs. 3.

THE BÁLARÁMÁYANA, a Drama by RÁJAŚEKHARA, edited by PANDIT GOVINDA DEVA ŚÁSTRI, late Professor of Hindu Astronomy in the Sanskrit College, Benares, Rs. 2.

THE PRASANNARÁGHAVA, a Drama by Jaya Deva, edited by PANDIT GOVINDA DEVA ŚÁSTRI. Rs. 1-4

PRINTED AND PUBLISHED BY THE PROPRIETORS, E. J. LAZARUS AND CO., AT THE MEDICAL HALL PRESS BENARES.

काशीविद्यासुधानिधिः

श्रीगणेशाय नमः

श्रीमद्विजयिनीदेवीपाठशालोदयोदितः । प्राच्यप्रतीच्यवाक्पूर्वापरपक्षद्वयान्वितः ॥ १ ॥

अङ्कुरश्मिः स्फुटयतु काशीविद्यासुधानिधिः । प्राचीनार्यजनप्रज्ञाविलासकुमुदोत्करान् ॥ २ ॥

THE PANDIT.

A Monthly Journal, of the Benares College, devoted to Sanskrit Literature.

No. 94. Benares, March 2nd, 1874. Vol. VIII.

॥ श्रीः ॥

काशिका

पाणिनिसूत्राणां व्याख्या

सूत्रपाठक्रमानुसारिणी वामनापरनामधेयेन श्रीमन्महामहोपाध्यायजयादित्यसूरिणा विरचिता श्रीमन्महामहिमभट्टोजिदीक्षितविरचितसिद्धान्तकौमुदीमरीचिप्रसारतः पूर्वं सर्वस्मिन् भारते वर्षे पठनपाठनादिप्रचुरविततप्रचारापि संप्रति लघीयस्त्वेन व्युत्पत्तिसौकर्यानुरोधेन चोक्तकौमुद्या एव पठनपाठनादिव्यवहारगोचरतयेयमतीवास्तंगता लुप्तकल्पेवास्ते, यस्याः संस्कृतविद्यैकमहाशरणे ऽस्मिन् क्षेत्रेपि नैकमप्यखण्डितं पुस्तकं कस्यापि पुस्तकालये उपलभ्यते । महाराष्ट्रभाषीयलोकोत्तरललितकाव्यनिर्मातृवामनपण्डितादशेषतन्त्रस्वतन्त्रादस्याः कर्ता वामनो ऽन्य एव ।

बोपदेवमहाग्राहग्रस्तो वामनदिग्गजः ।
कीर्तेरेव प्रसङ्गेन माधवेन विमोचितः ॥

इति शब्दकौस्तुभमनोरमयोरुपलभ्यमानश्लोकतो निखिलवैदिकभारतीतत्त्वार्थप्रकाशकभाष्यकारमाधवाचार्यतस्ततोपि प्राचीनाद्बोपदेवाचार्यतश्चास्य काशिकाकारस्य प्राचीनतरत्वस्य निर्णयेन नवनीताभिधे महाराष्ट्रभाषीयविविधमनोहरकाव्यैकदेशसंग्रहे तस्य महाकवेर्वामनपण्डितस्य (१५९५) मिते शककाले संस्थितेरुपलम्भेन च तयोरवरतो वर्षपञ्चशत्या अन्तरालकालस्य संभावनात् । तामिमां परमप्राचीनलुप्तप्रायसंस्कृतनिबन्धानां पुनरुज्जिजीवयिषुभिर्वैदेशीयविद्वद्वरग्रीत्साहितैश्च काशिकराजकीयपाठशालाप्रधानाध्यक्षैः प्रभुवरग्रिफिथ्साहिबाभिधमहाशयैः प्रवर्तितः कथंचिद् द्वित्रखण्डितपुस्तकसंयोगेन समग्रं पुस्तकं समासाद्य काशीविद्यासुधानिधिना प्रकाशयितुमुपक्रमते ।

काशिकराजकीयपाठशालीय-
व्याकरणाध्यापको बालशास्त्री ।

॥ श्रीगणेशाय नमः ॥

॥ काशिकायाः प्रथमाध्यायस्य प्रथमः पादः ॥

वृत्तौ भाष्ये तथा धातुनामपारायणादिषु ।
विप्रकीर्णस्य तन्त्रस्य क्रियते सारसंग्रहः ॥ १ ॥
इष्ट्युपसंख्यानवती
शुद्धगणा विवृतगूढसूत्रार्था ।
व्युत्पन्नरूपसिद्धि-
र्वृत्तिरियं काशिका नाम ॥ २ ॥
व्याकरणस्य शरीरं
परिनिष्ठितशास्त्रकार्य*मेतावत् ।
शिष्टः परिकरबन्धः
क्रियते ऽस्य ग्रन्थकारेण ॥ ३ ॥

॥ अथ शब्दानुशासनम् ॥

केषां शब्दानाम् । लौकिकानां वैदिकानां च । कथमनुशासनम् । प्रकृत्यादिविभागकल्पनया सामान्यविशेषवता लक्षणेन । अथ किमर्थो वर्णानामुपदेशः । प्रत्याहारार्थः । प्रत्याहारो लाघवेन शास्त्रप्रवृत्त्यर्थः ॥

* 'कृत्य' पाठान्तरम् ।

अ इ उ ण् ॥ १ ॥

अ इ उ इत्यनेन क्रमेण वर्णानुपदिश्यान्ते णकारमितं करोति प्रत्याहारार्थम् । तस्य ग्रहणं भवत्येकेन उरण् रपर इत्यकारेण । ह्रस्वमवर्णं प्रयोगे संवृतम् । दीर्घप्लुतयोस्तु विवृतत्वम् । तेषां सावर्ण्यप्रसिद्ध्यर्थमकार इह शास्त्रे विवृतः प्रतिज्ञायते । तस्य प्रयोगार्थम् अ अ इति शास्त्रान्ते प्रत्यापत्तिः करिष्यते ॥

ऋ ऌ क् ॥ २ ॥

ऋ ऌ इत्येतौ वर्णावुपदिश्य पूर्वांश्चान्ते ककारमितं करोति प्रत्याहारार्थम् । तस्य ग्रहणं भवति त्रिभिः । अकः सवर्णे दीर्घ इत्यकारेण । इको गुणवृद्धी इतीकारेण । उगितश्चेत्युकारेण । अकारादयो वर्णाः प्रचुरप्रयोगविषयास्तेषां सुज्ञानमुपदेशे प्रयोजनम् । ऌकारस्तु कॢपिस्थ एव प्रयुज्यते कॢपेश्च पूर्वत्रासिद्धमिति लत्वमसिद्धम् । तस्यासिद्धत्वाद् ऋकारएव अच्कार्याणि भविष्यन्तीति किमर्थम् ऌकार उपदिश्यते । लत्वविधानाद्यानि पराण्यच्कार्याणि तानि ऌकारे यथा स्युरिति । कानि पुनस्तानि । प्लुतः स्वरितो द्विर्वचनम् । कॢ३प्तशिखः प्रकॢप्तवानिति । यच्चाशक्तिजमसाधुशब्दरूपं तदनुकरणस्यापि साधुत्वमिष्यते । तत्स्थस्यापि ऌकारस्याच्कार्यप्रतिपत्त्यर्थम् ऌकारोपदेशः क्रियते । ऋतक इति प्रयोक्तव्ये शक्तिवैकल्यात् कुमारी ऌतक इति प्रयुङ्क्ते तदन्यो ऽनुकरोति कुमार्यॢतक इत्याहेति ॥

ए ओ ङ् ॥ ३ ॥

ए ओ इत्येतौ वर्णावुपदिश्य अन्ते ङकारमितं करोति प्रत्याहारार्थम् । तस्य ग्रहणं भवत्येकेन । एङि पररूपमित्येकारेण ॥

ऐ औ च् ॥ ४ ॥

ऐ औ इत्येतौ वर्णावुपदिश्य पूर्वांश्चान्ते चकारमितं करोति प्रत्याहारार्थम् । तस्य ग्रहणं भवति चतुर्भिः । अचः परस्मिन्पूर्वविधावित्यकारेण । इच एकाचो ऽम् प्रत्ययवच्चेति इकारेण । एचो ऽयवायाव इति एकारेण । वृद्धिरादैजिति ऐकारेण ।

प्रत्याहारेनुबन्धानां कथमज्ग्रहणेषु न ।
आचारादप्रधानत्वाल्लोपश्च बलवत्तरः ॥

वर्णेषु ये वर्णैकदेशा वर्णान्तरसमानाकृतयस्तेषु तत्कार्यं न भवति तच्छायानुकारिणो हि ते न पुनस्तएव । पृथक्प्रयत्ननिर्वर्त्यं हि वर्णमिच्छन्त्याचार्याः । नुड्विधिलादेशविनामेषु ऋकारे प्रतिविधातव्यम् । नुड्विधौ ऋकारग्रहणम् । आनृधतुः । आनृधुः । लादेशे ऋकारग्रहणम् । कॢप्तः कॢप्तवान् । विनामे ऋकारग्रहणम् । कर्तॄणाम् ॥

ह य व र ट् ॥ ५ ॥

ह य व र इत्येतान्वर्णानुपदिश्य पूर्वांश्चान्ते टकारमितं करोति प्रत्याहारार्थम् । तस्य ग्रहणं भवत्येकेन । शश्छोऽटीत्यकारेण । अयं रेफो यकारात्पर उपदिश्यते । तस्य यर्ग्रहणेन यय्ग्रहणेन च ग्रहणे सति स्वर्नयति प्रातर्नयतीत्यत्र यरो ऽनुनासिके ऽनुनासिको वेति अनुनासिकः प्राप्नोति । मद्रह्रदो भद्रह्रद इत्यत्र द्विर्वचनं प्राप्नोति अचो रहाभ्यां द्वे इति । कुण्डं रथेन वनं रथेनेत्यत्रानुस्वारस्य ययि परसवर्ण इति परसवर्णः प्राप्नोति । नैष दोषः । आकृतौ पदार्थे समुदाये सकृल्लक्ष्ये लक्षणं प्रवर्ततइत्येतस्मिन् दर्शने यरो ऽनुनासिके ऽनुनासिको वा ऽन्तरतमो भवतीत्येवमेतत्प्रवर्त्तते । तदनेन गकारादीनां ङकारादयो ये यथा स्वस्थानतो गुणतश्चान्तरतमास्ते सर्वे विहिताः । ये तु न स्थानतः नापि गुणतः स्थानमात्रेण गुणमात्रेण वा अन्तरतमास्ते सर्वे निवर्तिता इति स्थानमात्रान्तरतमो रेफस्य णकारो न भवति । द्विर्वचनेपि रेफस्य यरन्तर्भावे सति यत्कार्यत्वं प्राप्तं तत्साक्षाच्छिष्टेन निमित्तभावेन बाध्यत इति न द्विरुच्यते रेफः । अनुस्वारस्य ययि परसवर्ण इत्येतदप्यनुस्वारान्तरतमं सकृदेव परसवर्णं विदधाति । न च रेफस्यानुस्वारान्तरतमः सवर्णो ऽस्तीति न भविष्यति कुण्डं रथेन वनं रथेनेत्यत्र । अटां मध्ये विसर्ज्जनीयजिह्वामूलीयोपध्मानीयानामप्युपदेशः कर्त्तव्यः । किं प्रयोजनम् । ᳵकेउरण । उरः केण । उरᳶपेण । उरःपेण । अत्राड्व्यवाय इति णत्वं यथा स्यादिति ।

ल ण् ॥ ६ ॥

ल इत्येकं वर्णमुपदिश्य पूर्वांश्चान्ते णकारमितं करोति प्रत्याहारार्थम् । तस्य ग्रहणं भवति त्रिभिः । अणुदित्सवर्णस्य चाप्रत्यय इत्यकारेण । इण्कोरितीकारेण । इको यणचीति यकारेण । इण्ग्रहणानि सर्वाणि परेण णकारेण अण्ग्रहणानि तु पूर्वेण । अणुदित्सवर्णस्य चाप्रत्यय इत्येतदेकमनेन । अथ किमर्थमण्ग्रहणमेवैतन्न क्रियते । नैवं शक्यम् । अन्तःस्थानामपि हि सवर्णानां ग्रहणमिष्यते सँय्यन्ता । सँव्वत्सरः । यँल्लोकम् । तँल्लोकमित्यत्रानुस्वारस्यानुनासिके ययि परसवर्णे कृते तस्य यर्ग्रहणेन ग्रहणाद् द्विर्वचनं यथा स्यादिति । हकारादिष्वकार उच्चारणार्थो नानुबन्धः । लकारे त्वनुनासिकः प्रतिज्ञायते । तेन उरण् रपर इत्यत्र प्रत्याहारग्रहणाल्लपरत्वमपि भवति ॥

ञ म ङ ण न म् ॥ ७ ॥

ञ म ङ ण न इत्येतान्वर्णानुपदिश्य पूर्वांश्चान्ते मकारमितं करोति प्रत्याहारार्थम् । तस्य ग्रहणं भवति त्रिभिः । पुमः

खय्यम्परइत्यकारेण । हलो यमां यमि लोप इति यकारेण । ङमो ह्रस्वादचि ङमुण् नित्यमिति ङकारेण । ञमन्ताड्ड इति ञकारेणापि ग्रहणमस्य दृश्यते । के चित्तु सर्वाण्येतानि प्रत्याहारग्रहणानि ञकारेण भवन्त्विति मकारमनुबन्धं प्रत्याचक्षते । तथा तु सति ङमो ह्रस्वादचि ङमुण् नित्यमित्यत्रागमिनोर्ऋभोरभावादागमाभावप्रतिपत्तौ प्रतिपत्तिगौरवं भवति ॥

झ भ ञ् ॥ ८ ॥

झ भ इत्येतौ वर्णावुपदिश्य पूर्वांश्चान्ते ञकारमितं करोति प्रत्याहारार्थम्, तस्य ग्रहणं भवत्येकेन, अतो दीर्घो यञीति यकारेण ॥

घ ढ ध ष् ॥ ९ ॥

घ ढ ध इत्येतान्वर्णानुपदिश्य पूर्वांश्चान्ते षकारमितं करोति प्रत्याहारार्थम् । तस्यग्रहणं भवति द्वाभ्याम् । एकाचो बशो भष् झषन्तस्य स्ध्वोरिति झकारभकाराभ्याम् ॥

ज ब ग ड द श् ॥ १० ॥

ज ब ग ड द इत्येतान्वर्णानुपदिश्य पूर्वांश्चान्ते शकारमितं करोति प्रत्याहारार्थम् । तस्य ग्रहणं भवति षड्भिः । भोभगोअघोअपूर्वस्य योऽशीति अकारेण । हशि चेति हकारेण । नेड्वशि कृतीति वकारेण । झलां जश् झशीति जकारझकाराभ्याम् । एकाचो बशो भष् झषन्तस्य स्ध्वोरिति बकारेण ॥

ख फ छ ठ थ च ट त व् ॥ ११ ॥

ख फ छ ठ थ च ट त इत्येतान्वर्णानुपदिश्यान्ते वकारमितं करोति प्रत्याहारार्थम् । तस्य ग्रहणं भवत्येकेन नश्छव्यप्रशानिति छकारेण । खफग्रहणमुत्तरार्थम् ॥

क प य् ॥ १२ ॥

क प इत्येतौ वर्णावुपदिश्य पूर्वांश्चान्ते यकारमितं करोति प्रत्याहारार्थम् । तस्य ग्रहणं भवति चतुर्भिः । अनुस्वारस्य ययिपरसवर्ण इति यकारेण । मय उञो वो वेति मकारेण । झयो हो ऽन्यतरस्यामिति झकारेण । पुमः खय्यम्परे इति खकारेण ॥

श ष स र् ॥ १३ ॥

श ष स इत्येतान्वर्णानुपदिश्य पूर्वांश्चान्ते रेफमितं करोति प्रत्याहारार्थम् । तस्य ग्रहणं भवति पञ्चभिः । यरो ऽनुनासिके ऽनुनासिको वेति यकारेण । झरो झरि सवर्णे इति झकारेण । खरि चेति खकारेण । अभ्यासे चर्च्चेति चकारेण । शर्पूर्वाः खय इति शकारेण ॥

ह ल् ॥ १४ ॥

ह इत्येकं वर्णमुपदिश्य पूर्वांश्चान्ते लकारमितं करोति प्रत्याहारार्थम् । तस्य ग्रहणं भवति षड्भिः । अलो ऽन्त्यात्पूर्व उपधेति अकारेण । हलो ऽनन्तराः संयोग इति हकारेण । लोपो व्योर्वलीति वकारेण । रलो व्युपधाद्धलादेः संश्चेति रेफेण । झलो झलीति झकारेण । शल इगुपधादनिटः क्स इति शकारेण । अथ किमर्थमुपदिष्टो ऽपि हकारः पुनरुपदिश्यते । क्त्वविकल्पक्सेड्विधयो यथा स्युरिति । स्निहित्वा स्नेहित्वेत्यत्र रलो व्युपधाद्धलादेः संश्चेति क्त्वं वा यथा स्यात् । लिहेरलिक्षदिति शल इगुपधादनिटः क्स इति क्सो यथा स्यात् । रुदिहि स्वपिहीति वलादिलक्षण इड्यथा स्यात् । अदाग्धाम् । झल्ग्रहणेषु च हकारस्य ग्रहणं यथा स्यात् । यद्येवं ह य व र डित्यत्र तर्हि किमर्थमुपदिश्यते । महांहि सः देवा हसन्तीत्यत्राड्ग्रहणेषु चाश्ग्रहणेषु च ग्रहणं यथा स्यात् । हशि चेति हकारस्य ग्रहणं यथा स्यात् । ब्रह्मणो हसति । हशि चेति उत्वं यथा स्यात् ।

एकस्मान्ङञणवटा द्वाभ्यां षस्त्रिभ्य एव कणमाः स्युः ।
ज्ञेयौ चयौ चतुर्भ्यो रः पञ्चभ्यः शलौ षड्भ्यः ॥

इति । इति प्रत्याहारः ॥

वृद्धिरादैच् ॥ १ ॥

वृद्धिशब्दः संज्ञात्वेन विधीयते प्रत्येकमादैचां वर्णानां सामान्येन तद्भावितानामतद्भावितानां च । तपरकरणमैजर्थं तादपि परस्तपरइति खट्वैडकादिषु त्रिमात्रचतुर्मात्रप्रसङ्गनिवृत्तये । आश्वलायनः । ऐतिकायनः । औपगवः । औपमन्यवः । शालीयो मालीयः । वृद्धिप्रदेशाः सिचि वृद्धिः परस्मैपदेष्वित्येवमादयः ॥

अदेङ् गुणः ॥ २ ॥

गुणशब्दः संज्ञात्वेन विधीयते प्रत्येकमदेङां वर्णानां सामान्येन तद्भावितानामतद्भावितानां च । तपरकरणं त्विह सर्वार्थम् । तरिता । चेता । स्तोता । पचति । जयति । अहं पचे । गुणप्रदेशा मिदेर्गुण इत्येवमादयः ॥

इको गुणवृद्धी ॥ ३ ॥

परिभाषेयं स्थानिनियमार्था । अनियमप्रसङ्गे नियमो विधीयते । वृद्धिगुणौ स्वसंज्ञया शिष्यमाणाविक एव स्थाने वेदितव्यौ * ॥ वक्ष्यति सार्वधातुकार्द्धधातुकयोः अङ्गस्य गुण इति स इक एव स्थाने वेदितव्यः । तरति । नयति । भवति । वृद्धिः खल्वपि । अकार्षीत् । अहार्षीत् । अचैषीत् । अनैषीत् । अलावीत् । अस्तावीत् । गुणवृद्धी स्वसंज्ञया विधीयेते तत्र इक इति एतदुपस्थितं द्रष्टव्यम् । किं कृतं

* भवत इति वेदितव्यम् । पा० ।

भवति। द्वितीया षष्ठी प्रादुर्भाव्यते। मिदिमृजिपुगन्तलघूपधर्च्छिदृशिक्षिप्रक्षुद्रेष्वङ्गेनेग्विशेष्यते। जुसिसार्वधातुकादिगुणेष्विकाङ्गं विशेष्यते। मेद्यति। अबिभयुः *। इक इति किम्। आत्सन्ध्यक्षरव्यञ्जनानां मा भूत्। यानम्। ग्लायति। उम्भिता। पुनर्गुणवृद्धिग्रहणं स्वसंज्ञया विधाने नियमार्थम्। इह माभूत्। द्यौः। पन्थाः। सः। इममिति॥

न धातुलोपआर्धधातुके ॥ ४ ॥

धात्वेकदेशो धातुस्तस्य लोपो यस्मिन्नार्द्धधातुके तदार्धधातुकं धातुलोपं तत्र ये गुणवृद्धी प्राप्नुतस्ते न भवतः। लोलुवः। पोपुवः। मरीमृजः। लोलूयादिभ्यो यङन्तेभ्यः पचाद्यचि विहिते यङोचि चेति यङो लुकि कृते तमेवाचमाश्रित्य ये गुणवृद्धी प्राप्ते तयोः प्रतिषेधः। धातुग्रहणं किम्। लूञ्। लवितृ। रेडसि। पर्णं नयेः। अनुबन्धप्रत्ययलोपे माभूत्। रिषेर्हिंसार्थस्य विच्प्रत्ययलोपउदाहरणं रेडिति। आर्धधातुक इति किम्। त्रिधा बद्धो वृषभो रोरवीति। सार्वधातुके माभूत्। इक इत्येव। अभाजि। रागः॥

क्ङिति च ॥ ५ ॥

निमित्तसप्तम्येषा। क्ङिन्निमित्ते ये गुणवृद्धी प्राप्नुतस्ते न भवतः। चितः चितवान्। स्तुतः। स्तुतवान्। भिन्नः। भिन्नवान्। मृष्टः। मृष्टवान्। ङिति खल्वपि चिनुतः। चिन्वन्ति। मृष्टः। मृजन्ति। गकारोऽप्यत्र चर्त्वभूतो निर्दिश्यते। ग्लाजिस्थश्च क्स्नुः। जिष्णुः। भूष्णुः। इक इत्येव। कामयते। लैगवायनः। मृजेरजादौ संक्रमे विभाषा वृद्धिरिष्यते। संक्रमो नाम गुणवृद्धिप्रतिषेधविषयः। परिमृजन्ति। परिमार्ज्जन्ति। परिमृजन्तु। परिमार्ज्जन्तु। लघूपधगुणस्याप्यत्र प्रतिषेधः। अचिनवमसुनवमित्यादौ लकारस्य सत्यपि ङित्त्वे यासुटो ङिद्वचनं ज्ञापकं ङिति यत्कार्यं तल्लकारे ङिति न भवतीति॥

दीधीवेवीटाम् ॥ ६ ॥

दीधीवेव्योरिटश्च ये गुणवृद्धी प्राप्नुतस्ते न भवतः। आदीध्यनम्। आदीध्यकः। आवेव्यनम्। आवेव्यकः। इटः खल्वपि। श्वः कणिता। श्वो रणिता। वृद्धिरिटो न संभवतीति लघूपधगुणस्यात्र प्रतिषेधः॥

हलो ऽनन्तराः संयोगः ॥ ७ ॥

भिन्नजातीयैरज्भिरव्यवहिताः श्लिष्टोच्चारिता हलः संयोगसंज्ञा भवन्ति न समुदायः संज्ञी। जातौ चेदं बहुवचनं तेन द्वयोर्बहूनां च संयोगसंज्ञा सिद्धा भवति। अग्निरिति गनौ। अश्व इति शवौ। कर्ण इति रणौ। इन्द्रश्चन्द्रो मन्द्र इति नदराः। उष्ट्रो राष्ट्रं भ्राष्ट्रमिति षटराः। तिलान्स्त्यावपतीति नसतरयाः। नतसतरया वा। हल इति किम्। तितउच्छत्रम्। संयोगान्तस्य लोप इति लोपः स्यात्। अनन्तरा इति किम्। पचति पनसम्। स्कोः संयोगाद्योरिति लोपः स्यात्। संयोगप्रदेशाः संयोगान्तस्य लोप इत्येवमादयः॥

मुखनासिकावचनो ऽनुनासिकः ॥ ८ ॥

मुखसहिता नासिका मुखनासिका तया य उच्चार्यते वर्णः सो ऽनुनासिकसंज्ञो भवति। आङोनुनासिकश्छन्दसि। अभ्र आँ अपः। गभीर आँ उग्रपुत्रे। चन आँ इन्द्रः*। मुखग्रहणं किम्। अनुस्वारस्यैव हि स्यात्। नासिकाग्रहणं किम्। कचटतपानां माभूत्। अनुनासिकप्रदेशाः। आङोनुनासिकश्छन्दसीत्येवमादयः॥

तुल्यास्यप्रयत्नं सवर्णम् ॥ ९ ॥

तुल्यशब्दः सदृशपर्याय, आस्ये भवमास्यं ताल्वादिस्थानं, प्रयतनं प्रयत्नः स्पृष्टतादिर्वर्णगुणः। तुल्य आस्ये प्रयत्नो यस्य वर्णस्य येन वर्णेन सह स समानजातीयं प्रति सवर्णसंज्ञो भवति। चत्वार आभ्यन्तराः प्रयत्नाः सवर्णसंज्ञायामाश्रीयन्ते। स्पृष्टता ईषत्स्पृष्टता संवृतता विवृतता चेति। अअअइति त्रयो ऽकारा उदात्तानुदात्तस्वरिताः प्रत्येकं सानुनासिका निरनुनासिकाश्च ह्रस्वदीर्घप्लुतभेदादष्टादशधा भिद्यन्ते। तथेवर्णः। तथोवर्णः। तथा ऋवर्णः। ऌवर्णस्य दीर्घा न सन्ति। तं द्वादशप्रभेदमाचक्षते। सन्ध्यक्षराणां ह्रस्वा न सन्ति तान्यपि द्वादशप्रभेदानि। अन्तःस्था द्विप्रभेदा रेफवर्ज्जिता यवलाः सानुनासिका निरनुनासिकाश्च। रेफोष्मणां सवर्णा न सन्ति। वर्ग्यो वर्ग्येण सवर्णः। दण्डाग्रम्। खट्वाग्रम्। आस्यग्रहणं किम्। कचटतपानां भिन्नस्थानानां तुल्यप्रयत्नानां माभूत्। किं च स्यात्। तप्तो तप्तुमित्यत्र झरोझरि सवर्णइति पकारस्य तकारे लोपः स्यात्। प्रयत्नग्रहणं किम्। इचुयशानां तुल्यस्थानानां भिन्नप्रयत्नानां माभूत्। किं च स्यात्। अहश्च्योततीत्यत्र झरोझरि सवर्णइति शकारस्य चकारे लोपः स्यात्॥ ऋकारऌकारयोः सवर्णसंज्ञा वक्तव्या ॥ * ॥ होतृऌकारः। होतॄकारः। उभयोरृवर्णस्य ऌवर्णस्य चान्तरतमः सवर्णो दीर्घो नास्तीति ऋकार एव दीर्घो भवति। सवर्णप्रदेशा अकः सवर्णे दीर्घ इत्येवमादयः॥

नाज्झलौ ॥ १० ॥

अच्च हल् च अज्झलौ तुल्यास्यप्रयत्नावपि अज्झलौ परस्परं सवर्णसंज्ञौ न भवतः। अवर्णहकारौ दण्डहस्तः। इवर्णशकारौ दधिशीतम्। सवर्णदीर्घत्वं न भवति। वैपाशो मत्स्यः। आनडुहं चर्म्मेति यस्येतिचेति लोपो न भवति॥

* गुणवृद्धी इत्यारभ्याबिभयुरित्यन्तः पाठो बहुषु पुस्तकेषु नोपलभ्यते।

* अपः। पा०।

ईदूदेद्द्विवचनं प्रगृह्यम् ॥ ११ ॥

ईत् ऊत् एत् इत्येवमन्तं द्विवचनं शब्दरूपं प्रगृह्यसंज्ञं भवति । अग्नी इति । वायू इति । माले इति । पचेते इति । पचेथे इति । ईदूदेदिति किम् । वृक्षावत्र । प्लक्षावत्र । द्विवचनमिति किम् । कुमार्यत्र । किशोर्यत्र । तपरकरणमसंदेहार्थम् । प्रगृह्यप्रदेशाः । प्लुतप्रगृह्या अचीत्येवमादयः । ईदादीनां प्रगृह्यत्वे मणीवादीनां प्रतिषेधो वक्तव्यः ॥

मणीवोष्ट्रस्य लम्बेते प्रियौ वत्सतरौ मम ।
दम्पतीव जम्पतीव रोदसीव ॥

अदसो मात् ॥ १२ ॥

अदसः संबन्धी यो मकारस्तस्मात्परईदूदेतः प्रगृह्यसंज्ञा भवन्ति । अमी अत्र । अमी आसते । अमू अत्र । अमू आसाते । एकारस्य नास्त्युदाहरणम् । अदस इति किम् । शम्यत्र । दाडिम्यत्र । मादिति किम् । अमुकेऽत्र ॥

शे ॥ १३ ॥

शे इत्येतत्प्रगृह्यसंज्ञं भवति । किमिदं शे इति । सुपामादेशश्छन्दसि । न युष्मे वाजबन्धवः । अस्मे इन्द्राबृहस्पती । युष्मे इति । अस्मे इति । त्वेरायः । मेरायः । त्वे इति । मे इति । छान्दसमेतदवैकमुदाहरणम् अस्मे इन्द्राबृहस्पती इति । तत्र तथा पाठात् । इतरत्तु लौकिकमनुकरणम् । युष्मे इति । अस्मे इति । त्वे इति । इति ॥

निपात एकाजनाङ् ॥ १४ ॥

एकश्चासावच्च एकाच् निपातो य एकाच् आङ्वर्जितः स प्रगृह्यसंज्ञो भवति । अ अपेहि । इ इन्द्रं पश्य । उ उत्तिष्ठ । आ एवं नु मन्यसे । आ एवं किल तत् । निपात इति किम् । चकारात्र । एकाजिति किम् । प्रागनये वाचमीरय । अनाङिति किम् । आ उदकान्तात् ओदकान्तात् ।

ईषदर्थे क्रियायोगे मर्यादाभिविधौ च यः ।
एतमातं ङितं विद्याद्वाक्यस्मरणयोरङित् ॥

ओत् ॥ १५ ॥

निपात इति वर्त्तते । तस्योकारेण तदन्तविधिः । ओदन्तो यो निपातः स प्रगृह्यसंज्ञो भवति । आहो इति । उताहो इति ॥

संबुद्धौ शाकल्यस्येतावनार्षे ॥ १६ ॥

ओदिति वर्त्तते । संबुद्धिनिमित्तो य ओकारः स शाकल्यस्याचार्यस्य मतेन प्रगृह्यसंज्ञो भवति । इतिशब्दे ऽनार्षे अवैदिके परतः । वायो इति । वायविति । भानो इति । भानविति । संबुद्धाविति किम् । गवित्ययमाह । अत्रानुकार्यानुकरणयोर्भेदस्याविवक्षितत्वात् । असत्यर्थवत्त्वे विभक्तिर्न भवति । शाकल्यग्रहणं विभाषार्थम् । इताविति किम् । वायोत्र । अनार्ष इति किम् । एता गा ब्रह्मबन्धवित्यब्रवीत् ॥

उञः ॥ १७ ॥

शाकल्यस्येताविति वर्त्तते । उञः प्रगृह्यसंज्ञा भवति इतौ शाकल्यस्याचार्यस्य मतेन । शाकल्यस्येति । विभाषार्थम् । उ इति । विति ॥

ऊँ ॥ १८ ॥

उञ इति वर्त्तते । उञ इतावनार्षे ऊँइत्ययमादेशो भवति दीर्घो ऽनुनासिकः शाकल्यस्य मतेन प्रगृह्यसंज्ञकश्च । शाकल्यस्य ग्रहणं विभाषार्थमिहाप्यनुवर्त्तते, तेन त्रीणि रूपाणि भवन्ति । उ इति । विति । ऊँइति ॥

ईदूतौ च सप्तम्यर्थे ॥ १९ ॥

शाकल्यस्येतावनार्षइति निवृत्तम् । ईदन्तमूदन्तं च शब्दरूपं सप्तम्यर्थे वर्त्तमानं प्रगृह्यसंज्ञं भवति । अध्यस्यां मामकी तनू । मामक्यां तन्वामिति प्राप्ते । मामक्यां, मामकी इति । तन्वां तनू इति । सोमो गौरी अधिश्रितः । ईदूताविति किम् । प्रियः सूर्ये प्रियो अग्ना भवाति । अग्निशब्दात्परस्याः सप्तम्या डादेशः । सप्तमीग्रहणं किम् । धीती मती सुष्टुती । धीत्या मत्या सुष्टुत्या इति प्राप्ते । अर्थग्रहणं किम् । वाप्यश्वो नद्यातिः । तपरकरणमसन्देहार्थम् ॥

ईदूतौ सप्तमीत्येव लुप्ते ऽर्थग्रहणाद्भवेत् ।
पूर्वस्य चेत्सवर्णोसावाडाम्भावः प्रसज्यते ॥ १ ॥
वचनाद्यत्र दीर्घत्वं तत्रापि सरसी यदि ।
ज्ञापकं स्यात्तदन्तत्वे मा वा पूर्वपदस्य भूत् ॥ २ ॥

दाधा घ्वदाप् ॥ २० ॥

दारूपाश्चत्वारो धातवो धारूपौ च द्वौ दाब्दैपौ वर्जयित्वा घुसंज्ञका भवन्ति । डुदाञ्, प्रणिददाति । दाण् दाने, प्रणिदाता । दो, प्रणिद्यति । देङ्, प्रणिदयते । डुधाञ्, प्रणिदधाति । धेट्, प्रणिधयति वत्सो मातरम् । अदाबिति किम् । दाप् लवने, दातं बर्हिः । दैप् शोधने, अवदातं मुखम् । घुप्रदेशाः घुमास्थागापाजहातिसां हलीत्येवमादय * ॥

आद्यन्तवदेकस्मिन् ॥ २१ ॥

असहायस्य आद्यन्तोपदिष्टानि कार्याणि न सिद्ध्यन्तीत्ययमतिदेश आरभ्यते । सप्तम्यर्थे वतिः । आदाविव अन्तइव एकस्मिन्नपि कार्यं भवति । यथा कर्त्तव्यमित्यत्र प्रत्ययाद्युदात्तत्वं भवति एवमौपगवमित्यत्रापि यथा स्यात् । यथा वृक्षाभ्या-

* नेर्गदनदपतपदघुमास्यतीत्येवमादयः । पा० ।

मित्यत्रातोङ्गस्य दीर्घत्वमेवमाभ्यामित्यत्रापि यथा स्यात्। एकस्मिन्निति किम्। सभासन्नयने भवः साभासन्नयनः। आकारमाश्रित्य वृद्धसंज्ञा न भवति ॥

तरप्तमपौ घः ॥ २२ ॥

तरप् तमप् इत्येतौ प्रत्ययौ घसंज्ञौ भवतः। कुमारितरा। कुमारितमा। ब्राह्मणितरा। ब्राह्मणितमा। घप्रदेशा घरूपकल्पचेलड्ब्रुवगोत्रमतहतेषु ङ्यो ऽनेकाचो ह्रस्व इत्येवमादयः ॥

बहुगणवतुडति संख्या ॥ २३ ॥

बहुगणवतुडति इत्येते संख्यासंज्ञा भवन्ति। बहुकृत्वः। बहुधा। बहुकः। बहुशः। गणकृत्वः। गणधा। गणकः। गणशः। तावत्कृत्वः। तावद्धा। तावच्छः। कतिकृत्वः। कतिधा। कतिकः। कतिशः। बहुगणशब्दयोर्वैपुल्ये सङ्घे च वर्तमानयोरिह ग्रहणं नास्ति। संख्यावाचिनोरेव। भूर्यादीनां निवृत्त्यर्थं संख्या संज्ञा विधीयते ॥ अर्धपूर्वपदश्च पूरणप्रत्ययान्तः संख्यासंज्ञो भवतीति वक्तव्यं समासकन्विध्यर्थम् ॥ * ॥ अर्धपञ्चमशूर्पः। अर्द्धः पञ्चमो येषामिति बहुव्रीहौ कृते ऽर्द्धपञ्चमैः शूर्पैः क्रीतः। तद्धितार्थेति समासः। तत्र दिक्संख्ये संज्ञायामित्यनुवृत्तेस्ततः संख्यापूर्वस्य द्विगुसंज्ञायां शूर्पादञन्यतरस्यामित्यञ् ठञ्च। अद्ध्यर्द्धपूर्वद्विगोरिति लुक्। अर्धपञ्चमकः। संख्याप्रदेशाः। संख्यावंश्येनेत्येवमादयः * ॥

ष्णान्ता षट् ॥ २४ ॥

स्त्रीलिङ्गनिर्देशात्संख्येति संबध्यते। षकारान्ता नकारान्ता च या संख्या सा षट्संज्ञा भवति। षकारान्तास्तावत्। षट् तिष्ठन्ति। षट् पश्य। नकारान्ताः। पञ्च। सप्त। नव। दश। अन्तग्रहणमौपदेशिकार्थम्। तेनेह न भवति। शतानि। सहस्राणि। अष्टानामित्यत्र नुड् भवति। षट्प्रदेशाः षड्भ्यो लुगित्येवमादयः ॥

डति च ॥ २५ ॥

डत्यन्ता या संख्या सा षट्संज्ञा भवति। कति तिष्ठन्ति। कति पश्य ॥

क्तक्तवतू निष्ठा ॥ २६ ॥

क्तश्च क्तवतुश्च क्तक्तवतू प्रत्ययौ निष्ठासंज्ञौ भवतः। कृतः। कृतवान्। भुक्तः। भुक्तवान्। ककारः कित्कार्यार्थः। उकार उगित्कार्यार्थः। निष्ठाप्रदेशाः श्वीदितो निष्ठायामित्येवमादयः ॥

सर्वादीनि सर्वनामानि ॥ २७ ॥

सर्वशब्द आदिर्येषां तानीमानि सर्वादीनि सर्वनामसंज्ञानि भवन्ति। सर्वः। सर्वौ। सर्वे। सर्वस्मै। सर्वस्मात्। सर्वेषाम्। सर्वस्मिन्। सर्वकः। विश्वः। विश्वौ। विश्वे। विश्वस्मै। विश्वस्मात्। विश्वेषाम्। विश्वस्मिन्। विश्वकः। उभ। उभय। उभशब्दस्य सर्वनामत्वे प्रयोजनं सर्वनाम्नस्तृतीया चेति। उभये। उभयस्मै। उभयस्मात्। उभयेषाम्। उभयस्मिन्। डतर। डतम। कतर। कतम। कतरस्मै। कतमस्मै। इतर। अन्य। अन्यतर। इतरस्मै। अन्यतरस्मै। त्वशब्दोन्यवाची स्वरभेदाद् द्विःपठितः। एक उदात्तो द्वितीयो ऽनुदात्तः। के चित्तकारान्तमेकं पठन्ति। त्वत्त्वदिति द्वावपि चानुदात्ताविति स्मरन्ति। नेम। नेमस्मै। वक्ष्यमाणेन जसि विभाषा भवति। नेमे, नेमाः, इति। समः। समस्मै। कथं यथासंख्यमनुदेशः समानां समे देशे यजेतेति। समस्य सर्वशब्दपर्यायस्य सर्वनामसंज्ञेष्यते न सर्वत्र। सिम। सिमस्मै। पूर्वपरावरदक्षिणोत्तरापराधराणि व्यवस्थायामसंज्ञायाम्। स्वमज्ञातिधनाख्यायाम्। अन्तरं बहिर्योगोपसंव्यानयोः। त्यद्। तद्। यद्। एतद्। अदस्। इदम्। एक। द्वि। युष्मद्। अस्मद्। भवतु। किम्। सर्वादिः ॥ सर्वनामप्रदेशाः सर्वनाम्नः स्मै इत्येवमादयः ॥

विभाषा दिक्समासे बहुव्रीहौ ॥ २८ ॥

न बहुव्रीहाविति प्रतिषेधं वक्ष्यति तस्मिन्नित्ये प्रतिषेधे प्राप्ते विभाषेयमारभ्यते। दिशां समासो दिक्समासो दिगुपदिष्टे समासे बहुव्रीहौ विभाषा सर्वादीनि सर्वनामसंज्ञानि भवन्ति। उत्तरपूर्वस्यै। उत्तरपूर्वायै। दक्षिणपूर्वस्यै। दक्षिणपूर्वायै। दिग्ग्रहणं किम्। न बहुव्रीहाविति प्रतिषेधं वक्ष्यति तत्र न ज्ञायते क्व विभाषा क्व प्रतिषेध इति। दिग्ग्रहणे पुनः क्रियमाणे ज्ञायते दिगुपदिष्टसमासे विभाषा ऽन्यत्र प्रतिषेध इति। समासग्रहणं किम्। समास एव यो बहुव्रीहिस्तत्र विभाषा यथा स्यात्। बहुव्रीहिवद्भावेन यो बहुव्रीहिस्तत्र मा भूत्। दक्षिणदक्षिणस्यै देहि। बहुव्रीहाविति किम्। द्वन्द्वे विभाषा मा भूत्। दक्षिणोत्तरपूर्वाणामिति। द्वन्द्वे चेति नित्यं प्रतिषेधो भवति ॥

न बहुव्रीहौ ॥ २९ ॥

सर्वनामसंज्ञायां तदन्तविधेरभ्युपगमाद्बहुव्रीहेरपि सर्वाद्यन्तस्य संज्ञा स्यादिति प्रतिषेध आरभ्यते। बहुव्रीहौ समासे सर्वादीनि सर्वनामसंज्ञानि न भवन्ति। प्रियविश्वाय। प्रियोभयाय। द्व्यन्याय। त्र्यन्याय। इह च त्वत्कपितृको मत्कपितृक इत्यकच्च भवति। बहुव्रीहाविति वर्तमाने पुनर्बहुव्रीहिग्रहणं भूतपूर्वमात्रेपि प्रतिषेधो यथा स्यात्। वस्त्रान्तरा वसनान्तरा इति ॥

तृतीयासमासे ॥ ३० ॥

तृतीयासमासे सर्वादीनि सर्वनामसंज्ञानि न भवन्ति।

* संख्यायाः क्रियाभ्यावृत्तिगणने कृत्वसुजित्येवमादयः। पा०।

मासपूर्वाय । संवत्सरपूर्वाय । द्व्यहपूर्वाय । त्र्यहपूर्वाय । समासइति वर्त्तमाने पुनः समासग्रहणं तृतीयासमासार्थे-वाक्ये ऽपि प्रतिषेधो यथा स्यात् । मासेन पूर्वाय । पूर्वसदृशसमोनार्थेति तृतीयासमासं प्रतिपदं वक्ष्यति तस्येदं ग्रहणं न यस्य कस्य चित्तृतीयासमासस्य कर्तृकरणे कृता बहुलमिति । त्वयका कृतम् । मयका कृतम् ॥

द्वन्द्वे च ॥ ३१ ॥

द्वन्द्वे च समासे सर्वादीनि सर्वनामसंज्ञानि न भवन्ति । पूर्वापराणाम् । कतरकतमानाम् ॥

विभाषा जसि ॥ ३२ ॥

पूर्वेण नित्ये प्रतिषेधे प्राप्ते जसि विभाषा ऽऽरभ्यते । द्वन्द्वे समासे जसि विभाषा सर्व्वादीनि सर्वनामसंज्ञानि न भवन्ति । कतरकतमे । कतरकतमाः । जसः कार्यं प्रति विभाषा ऽकज्हि न भवति । कतरकतमकाः ॥

प्रथमचरमतयाल्पार्द्धकतिपयनेमाश्च ॥ ३३ ॥

विभाषाजसीति वर्त्तते । द्वन्द्वइति निवृत्तम् । प्रथम चरम तय अल्प अर्द्ध कतिपय नेम इत्येते जसि विभाषा सर्वनामसंज्ञा भवन्ति । प्रथमे । प्रथमाः । चरमे । चरमाः । द्वितये । द्वितयाः । अल्पे । अल्पाः । अर्धे । अर्धाः । कतिपये । कतिपयाः । नेमे । नेमाः । तय इति तयप्प्रत्ययः । शिष्टानि प्रातिपदिकानि । तत्र नेम इति सर्वादिषु पठ्यते तस्य प्राप्ते विभाषा ऽन्येषामप्राप्ते । उभयशब्दस्य तयप्प्रत्ययान्तस्य गणे पाठान्नित्या सर्वनामसंज्ञा इहापि जस्कार्यं प्रति विभाषा । काकचेष्टोर्यथायोगं वृत्तिः ॥

पूर्वपरावरदक्षिणोत्तरापराधराणि व्यवस्थायामसंज्ञायाम् ॥ ३४ ॥

पूर्व पर अवर दक्षिण उत्तर अपर अधर इत्येतेषां गणे पाठात्पूर्वेण नित्यायां सर्वनामसंज्ञायां प्राप्तायां जसि विभाषा ऽऽरभ्यते । पूर्वादीनि विभाषा जसि सर्वनामसंज्ञानि भवन्ति व्यवस्थायामसंज्ञायाम् । स्वाभिधेयापेक्षावधिनियमो व्यवस्था* । पूर्वे पूर्वाः । परे पराः । अवरे अवराः । दक्षिणे दक्षिणाः । उत्तरे उत्तराः । अपरे अपराः । अधरे अधराः । व्यवस्थायामिति किम् । दक्षिणा इमे गाथकाः । प्रवीणा इत्यर्थः । असंज्ञायामिति किम् । उत्तराः कुरवः । सत्यामेव व्यवस्थायामियं तेषां संज्ञा ॥

स्वमज्ञातिधनाख्यायाम् ॥ ३५ ॥

अत्रापि नित्या सर्वनामसंज्ञा प्राप्ता जसि विभाष्यते । स्वमित्येतच्छब्दरूपं जसि विभाषा सर्वनामसंज्ञं भवति न चेज्ज्ञातिधनयोः संज्ञारूपेण वर्तते । स्वे पुत्राः । स्वाः पुत्राः । स्वे गावः । स्वा गावः । आत्मीया इत्यर्थः । ज्ञातिप्रतिषेधः किम् ।

धूमायन्तइवाश्लिष्टाः प्रज्वलन्तीव संहताः ।
उल्मुकानीव मे ऽमी स्वा ज्ञातयो भरतर्षभ ॥

अधनाख्यायामिति किम् । प्रभूताः स्वा न दीयन्ते । प्रभूताः स्वा न भुज्यन्ते । प्रभूतानि धनानीत्यर्थः ॥

अन्तरं बहिर्योगोपसंव्यानयोः ॥ ३६ ॥

अत्रापि पूर्वेण नित्या सर्वनामसंज्ञा प्राप्ता सा जसि विभाष्यते । अन्तरमित्येतच्छब्दरूपं विभाषा जसि सर्वनामसंज्ञं भवति बहिर्योगउपसंव्याने च गम्यमाने । अन्तरे गृहाः । अन्तरा गृहाः । नगरबाह्याश्चाण्डालादिगृहा उच्यन्ते । अन्तरे शाटकाः । अन्तराः शाटकाः । उपसंव्यानं परिधानीयमुच्यते न प्रावरणीयम् । बहिर्योगोपसंव्यानयोरिति किम् । अनयोर्ग्रामयोरन्तरे तापसः प्रतिवसति । तस्मिन्नन्तरे शीतान्युदकानि । मध्यप्रदेशवचनोन्तरशब्दः । गणसूत्रस्य चेदं प्रत्युदाहरणम् ॥ अपुरीति च वक्तव्यम् ॥ * ॥ अन्तरायां पुरि वसति । विभाषाप्रकरणे तीयस्य ङित्सु सर्वनामसंज्ञेत्युपसंख्यानम् ॥ * ॥ द्वितीयाय । द्वितीयस्मै । तृतीयाय । तृतीयस्मै ॥

स्वरादिनिपातमव्ययम् ॥ ३७ ॥

स्वरादीनि शब्दरूपाणि निपाताश्चाव्ययसंज्ञानि भवन्ति । स्वर् । अन्तर् । प्रातर् । एते अन्तोदात्ताः पठ्यन्ते । पुनर् आद्युदात्तः । सनुतर् । उच्चैस् । नीचैस् । शनैस् । ऋधक् । आरात् । ऋते । युगपत् । पृथक् । एतेपि सनुतर्प्रभृतयोन्तोदात्ताः पठ्यन्ते । ह्यस् । श्वस् । दिवा । रात्रौ । सायम् । चिरम् । मनाक् । ईषत् । जोषम् । तूष्णीम् । बहिस् । आविस् । अवस् । अधस् । समया । निकषा । स्वयम् । मृषा । नक्तम् । नञ् । हेतौ । अद्धा । इद्धा । सामि । एतेपि ह्यस्प्रभृतयोन्तोदात्ताः पठ्यन्ते । वत् । वदन्तमव्ययसंज्ञं भवति । ब्राह्मणवत् । क्षत्रियवत् । सन् । सनात् । सनत् । तिरस् । एते आद्युदात्ताः पठ्यन्ते । अन्तरा । अयमन्तोदात्तः । अन्तरेण । ज्योक् । कम् । शम् । सना । सहसा । विना । नाना । स्वस्ति । स्वधा । अलम् । वषट् । अन्यत् । अस्ति । उपांशु । क्षमा । विहायसा । दोषा । मुधा । मिथ्या । क्त्वातोसुन्कसुनः कृन्मकारान्तः सन्ध्यक्षरान्तो ऽव्ययीभावश्च । पुरा । मिथो । मिथस् । प्रबाहुकम् । आर्यहलम् । अभीक्ष्णम् । साकम् । सार्द्धम् । समम् । नमस् । हिरुक् । तसिलादिस्तद्धित एधाच्पर्यन्तः । शस्तसी । कृत्वसुच् । सुच् । आस्थाली

* अत्र स्वाभिधेयापेक्षावधिनियमेति बहुव्रीहि [illegible] पदमन्तरोऽस्वपदविग्रहोऽपि [illegible] ।

च्व्यर्थाश्च । अम् । आम् । प्रतान् । प्रशान् । स्वरादिः । निपाता वक्ष्यन्ते । प्राग्रीश्वरान्निपाता इति । च । वा । ह । अह । एव । एवमित्यादयः । अव्ययप्रदेशाः अव्ययादाप्सुप इत्येवमादयः ।

सदृशं त्रिषु लिङ्गेषु सर्वासु च विभक्तिषु ।
वचनेषु च सर्वेषु यन्न व्येति तदव्ययम् ॥

तद्धितश्चासर्वविभक्तिः ॥ ३८ ॥

तद्धितान्तः शब्दो ऽसर्वविभक्तिरव्ययसंज्ञो भवति। यस्माच्च सर्वविभक्तेरुत्पत्तिः सो ऽसर्वविभक्तिः । ततः । यतः । तत्र । यत्र । तदा । यदा । सर्वदा । सदा । तद्धित इति किम् । एकः । द्वौ । बहवः । असर्वविभक्तिरिति किम् । औपगवः । औपगवौ । औपगवाः ॥

कृन्मेजन्तः ॥ ३९ ॥

कृद्यो मकारान्त एजन्तश्च तदन्तं शब्दरूपमव्ययसंज्ञं भवति । स्वादुंकारं भुङ्क्ते । संपन्नंकारं भुङ्क्ते । लवणंकारं भुङ्क्ते । एजन्तः । वक्षे रायः। ता वामेषे रथानाम् । क्रत्वे दक्षाय जीवसे । ज्योक्च सूर्यं दृशे । वक्षे इति वचेस्तुमर्थे सेसेनिति सेप्रत्यये कुत्वे षत्वे च कृते रूपम्। एषे इति इणः से प्रत्यये गुणे षत्वे च कृते रूपम् । जीवसे इति जीवेरसे प्रत्यये रूपम् । दृशे इति दृशेः केन्प्रत्ययो निपात्यते । दृशे विख्ये चेति । अन्तग्रहणमौपदेशिकप्रतिपत्त्यर्थम् । इह माभूत् । आधये । चिकीर्षवे । कुम्भकारेभ्य इति ॥

क्त्वातोसुन्कसुनः ॥ ४० ॥

क्त्वा तोसुन्कसुन् इत्येवमन्तं शब्दरूपमव्ययसंज्ञं भवति । कृत्वा । हत्वा । तोसुन् । पुरा सूर्यस्योदेतोराधेयः । पुरावत्सानामपाकर्त्तोः । भावलक्षणे स्थेण्कृञ्वदीति इणः कृञश्च तोसुन्प्रत्ययः । कसुन् । सृपितृदोः कसुन् । पुरा क्रूरस्य विसृपो विरप्शिन् । पुरा जर्तृभ्य आतृदः ॥

अव्ययीभावश्च ॥ ४१ ॥

अव्ययीभावसमासो ऽव्ययसंज्ञो भवति । किं प्रयोजनम् । लुङ्मुखस्वरोपचाराः । लुक् । उपाग्नि प्रत्यग्नि शलभाः पतन्ति । मुखस्वर । उपाग्निमुखः । प्रत्यग्निमुखः । मुखं स्वाङ्गमित्युत्तरपदान्तोदात्तत्वं प्राप्तं नाव्ययदिक्शब्देति प्रतिषिध्यते । तस्मिन् प्रतिषिद्धे पूर्वपदप्रकृतिस्वर एव भवति । उपचार । उपपयःकारः । उपपयःकामः । विसर्जनीयस्थानिकस्य सकारस्य उपचार इति संज्ञा । तत्राव्ययीभावस्याव्ययत्वे ऽतः कृकमिकंसकुम्भपात्रकुशाकर्णीष्वनव्ययस्येति पर्युदासः सिद्धो भवति । सर्वमिदं काण्डं स्वरादावपि पठ्यते । पुनर्वचनमनित्यत्वज्ञापनार्थं तेनायं कार्यनियमः सिद्धो भवति । इह च पुरा सूर्यस्योदेतोराधेयः, पुरा क्रूरस्य विसृप, इति न लोकाव्ययनिष्ठेति षष्ठीप्रतिषेधो न भवति ॥

शि सर्वनामस्थानम् ॥ ४२ ॥

शि इत्येतत्सर्वनामस्थानसंज्ञं भवति । किमिदं शि इति। जश्शसोः शिरादेशः । कुण्डानि तिष्ठन्ति । कुण्डानि पश्य । दधीनि मधूनि त्रपूणि जतूनि । सर्वनामस्थानप्रदेशाः । सर्वनामस्थाने चासंबुद्धावित्येवमादयः ॥

सुडनपुंसकस्य ॥ ४३ ॥

सुडिति पञ्च वचनानि सर्वनामस्थानसंज्ञानि भवन्ति नपुंसकादन्यत्र । नपुंसके न विधिर्न प्रतिषेधस्तेन जसंशे सर्वनामस्थानसंज्ञा पूर्वेण भवत्येव । राजा । राजानौ । राजानः। राजानम् । राजानौ । सुडिति किम् । राज्ञः पश्य । अनपुंसकस्येति किम् । सामनी वेमनी ॥

न वेति विभाषा ॥ ४४ ॥

नेति प्रतिषेधो वेति विकल्पस्तयोः प्रतिषेधविकल्पयोर्विभाषेति संज्ञा भवति । इतिकरणोऽर्थनिर्देशार्थः । विभाषाप्रदेशेषु प्रतिषेधविकल्पावुपतिष्ठेते । तत्र प्रतिषेधेन समीकृते विषये पश्चाद्विकल्पः प्रवर्त्तते । उभयत्र विभाषाः प्रयोजयन्ति। विभाषा श्वेः । शुशाव शिश्वाय शुशुवतुः शिश्वियतुः । विभाषा प्रदेशाः । विभाषा श्वेरित्येवमादयः ॥

इग्यणः संप्रसारणम् ॥ ४५ ॥

इग्यो यणः स्थाने भूतो भावी वा तस्य संप्रसारणमित्येषा संज्ञा भवति । यज् । इष्टम् । वप् । उप्तम् । ग्रह । गृहीतम् । केचिदुभयथा सूत्रमिदं व्याचक्षते । वाक्यार्थः संज्ञी वर्णश्चेति । इग्यण इति यो वाक्यार्थः स्थान्यादेशसंबन्धलक्षणः स संप्रसारणसंज्ञो भवति यण्स्थानिक इग्वर्णः स संप्रसारणसंज्ञो भवतीति । तत्र विधौ वाक्यार्थ उपतिष्ठते । ष्यङः संप्रसारणं वसोः संप्रसारणमिति । अनुवादे वर्णः संप्रसारणाच्चेति । संख्यातानुदेशादिह न भवति । अदुहितरामिति । * संप्रसारणप्रदेशाः । वसोः संप्रसारणमित्येवमादयः ॥

आद्यन्तौ टकितौ ॥ ४६ ॥

आदिष्टिद्भवति अन्तः किद्भवति षष्ठीनिर्दिष्टस्य । लविता । मुण्डो भीषयते । टित्प्रदेशाः । आर्धधातुकस्येड्वलादेरित्येवमादयः । कित्प्रदेशाः । भियो हेतुभये षुगित्येवमादयः ॥

मिदचो ऽन्त्यात्परः ॥ ४७ ॥

अच इति निर्धारणे षष्ठी । जातौ चेदमेकवचनम् । अचां संनिविष्टानामन्त्यादचः परो मिद्भवति । स्थानेयोगप्रत्ययपर-

* द्युभ्यामित्यत्र दिव उदिति तपरकरणाद्दीर्घो नेति क्वचित्पाठः।

त्वस्यायमपवादः । विरुणद्धि । मुञ्चति । पयांसि । मित्त्वादेशाः रुधादिभ्यः श्नमित्येवमादयः । मस्जेरन्त्यात्पूर्वं नुममिच्छन्त्यनुषङ्गसंयोगादिलोपार्थम् । मग्नः । मग्नवान् । मङ्क्ता । मङ्क्तुम् ॥

एच इग्घ्रस्वादेशे ॥ ४८ ॥

एचो ह्रस्वादेशे कर्तव्य इगेव ह्रस्वो भवति नान्यः । रै । अतिरि । नौ । अतिनु । गो । उपगु । एच इति किम् । अतिखट्वः । अतिमालः । ह्रस्वादेश इति किम् । दे३वदत्त । देवद३त्त ॥

षष्ठी स्थानेयोगा ॥ ४९ ॥

परिभाषेयं योगनियमार्था । इह शास्त्रे या षष्ठी अनियतयोगा श्रूयते सा स्थानेयोगैव भवति नान्ययोगा स्थानेयोगनिमित्तभूते सति सा प्रतिपत्तव्या । स्थानशब्दश्च प्रसङ्गवाची । यथा दर्भाणां स्थाने शरैः प्रस्तरितव्यमिति दर्भाणां प्रसङ्ग इति गम्यते । एवमिहापि अस्तेः स्थाने प्रसङ्गे भूर्भवति । भविता । भवितुम् । भवितव्यम् । ब्रुवः प्रसङ्गे वचिर्भवति । वक्ता । वक्तुम् । वक्तव्यम् । प्रसङ्गे संवन्धस्य निमित्तभूते ब्रुव इति षष्ठी । वहवो हि षष्ठ्यर्थाः । स्वस्वाम्यनन्तरसमीपसमूहविकारावयवाद्यास्तत्र यावन्तः शब्दे संभवन्ति तेषु सर्वेषु प्राप्तेषु नियमः क्रियते षष्ठी स्थानेयोगेति । स्थाने योगो ऽस्या इति व्यधिकरणो वहुव्रीहिः । अत एव निपातनाच्च सप्तम्या अलुक् ॥

स्थानेन्तरतमः ॥ ५० ॥

स्थाने प्राप्यमाणानामन्तरतम आदेशो भवति सदृशतमः । कुतश्च शब्दस्यान्तर्यम् । स्थानार्थगुणप्रमाणतः । स्थानतः । अकः सवर्णे दीर्घः । दण्डाग्रम् । यूपाग्रम् । द्वयोरकारयोः कण्ठ्य एव दीर्घ आकारो भवति । अर्थतः । वतण्डी चासौ युवतिः वातण्ड्ययुवतिः । पुंवद्भावेनान्तरतमः पुंशब्दो ऽतिदिश्यते । गुणतः । पाकः । त्यागः । रागः । चजोः कुघिण्ण्यतोरिति चकारस्याल्पप्राणस्याघोषस्य तादृश एव ककारो भवति जकारस्याघोषवतो ऽल्पप्राणस्य तादृश एव गकारः । प्रमाणतः । अमुष्मै । अमूभ्याम् । अदसो ऽसेर्दादु दो म इति ह्रस्वस्य ह्रस्वः दीर्घस्य दीर्घः । स्थान इति वर्तमाने पुनः स्थानेग्रहणं किम् । यत्रानेकमान्तर्यं संभवति तत्र स्थानत एवान्तर्यं वलीयो यथा स्यात् । चेता । स्तोता । प्रमाणतो ऽकारो गुणः प्राप्तस्तत्र स्थानत आन्तर्यादेकारौकारौ भवतः । तमव्ग्रहणं किम् । वाग्घसति । त्रिष्टुब्भसति । झयो होऽन्यतरस्यामिति हकारस्य पूर्वसवर्णे क्रियमाणे सोष्मणः सोष्माण इति द्वितीयाः प्रसक्ताः नादवतो नादवन्त इति तृतीयाः तमव्ग्रहणाद्ये सोष्माणो नादवन्तश्च ते भवन्ति चतुर्थाः ॥

उरण् रपरः ॥ ५१ ॥

ऋः स्थाने ऽण् प्रसज्यमान एव रपरो वेदितव्यः । कर्ता । हर्ता । किरति । गिरति । द्वैमातुरः । त्रैमातुरः । उरिति किम् । खेयम् । गेयम् । अण्ग्रहणं किम् । सुधातुरकङ् च । सौधातकिः ॥

अलो ऽन्त्यस्य ॥ ५२ ॥

षष्ठीनिर्दिष्टस्य य उच्यते आदेशः सो ऽन्त्यस्यालः स्थाने वेदितव्यः । इद्गोण्याः । पञ्चगोणिः । दशगोणिः ॥

ङिच्च ॥ ५३ ॥

ङिच्च य आदेशः सो ऽनेकालपि अलो ऽन्त्यस्य भवति । आनङृतो द्वन्द्वे । होतापोतारौ । मातापितरौ । तातङि ङित्करणस्य गुणवृद्धिप्रतिषेधार्थत्वात्सर्वादेशस्तातङ् भवति । जीवताद्भवान् । जीवतात्त्वम् ॥

आदेः परस्य ॥ ५४ ॥

परस्य कार्यं शिष्यमाणमादेरलः प्रत्येतव्यम् । क्व च परस्य कार्यं शिष्यते । यत्र पञ्चमीनिर्देशः । तद्यथा । ईदासः । आसीनो यजते । द्व्यन्तरुपसर्गेभ्यो ऽप ईत् । द्वीपम् । अन्तरीपम् । प्रतीपम् । समीपम् ॥

अनेकाल्शित्सर्वस्य ॥ ५५ ॥

अनेकाल् य आदेशः शिच्च सर्वस्य षष्ठीनिर्दिष्टस्य स्थाने भवति । अस्तेर्भूः । भविता । भवितुम् । भवितव्यम् । शित्खल्वपि । जश्शसोः शिः । कुण्डानि तिष्ठन्ति । कुण्डानि पश्य ॥

॥ अथ वेदान्तकौस्तुभप्रभायाः ॥

॥ द्वितीयाध्यायस्य ॥

॥ तृतीयपादावयवे ॥

॥ कर्ता शास्त्रार्थवत्त्वात् ॥ ३२ ॥

आत्मनो ज्ञातृत्वे कर्तृत्वमप्यस्ति न वेति संशये, आत्मा कर्तैव । कुतः । “यजेत स्वर्गकामः”, “मुमुक्षुर्वै शरणं व्रजेत्”, “सो ऽन्वेष्टव्यः स विजिज्ञासितव्यः”, इत्यादिभोगमोक्षसाधनोपदेशशास्त्रस्यार्थवत्त्वात् ।

नन्वकर्तैवात्मा । तथाहि, “न जायते म्रियते वे”ति तस्य जन्मादिविकारं प्रतिषिध्य,

“हन्ता चेन्मन्यते हन्तुं हतश्चेन्मन्यते हतम् ।
उभौ तौ न विजानीतो नायं हन्ति न हन्यते” ॥

इति हननक्रियाया व्यापाराश्रयत्वं फलाश्रयत्वं वा मन्यमानो ऽज्ञ इति कठवल्ल्युक्तेः ।

“प्रकृतेः क्रियमाणानि गुणैः कर्माणि सर्वशः ।
अहंकारविमूढात्मा कर्ताहमिति मन्यते” ॥

"नान्यं गुणेभ्यः कर्तारं यदा द्रष्टानुपश्यति ।
कार्यकारणकर्तृत्वे हेतुः प्रकृतिरुच्यते" ॥
"पुरुषः सुखदुःखानां भोक्तृत्वे हेतुरुच्यते" ।

इत्यादिस्मृतिभ्यश्च, प्रकृतेरेव कर्तृत्वेन पुरुषस्य भोक्तृत्वमात्रमेव । यथा जपाकुसुमस्थं लौहित्यं स्फटिके भाति तद्वन्मनोवृत्तिकृत्यादिकमात्मन्यध्यस्तं भासते न तु तात्त्विकम् । तथात्वे ह्यात्मनो विकारित्वापत्तेः । सुषुप्तौ मनसोऽभावे कृत्यादीनामदर्शनात् । अकर्त्रात्मबोधकश्रुतिव्याकोपाच्चेति चेन्न । असंभवादिति ब्रूमः । तथाहि, प्रत्येकं स्फटिके जपाकुसुमे च लौहित्यं भेदेन प्राप्तं प्रत्यक्षप्रमाणेन, तथात्मनि मनसि च प्रत्येकं कर्तृत्वं भायात् । आत्मा कृत्याद्याश्रयत्वेनाध्यस्तत्वात् कर्तेति । मनः स्वतः कर्त्रीति कदापि साक्षात्काराभावाद् दृष्टान्तवैषम्यम् । अन्यथा मनः कर्त्रीति, आत्मा कर्तेति कदाचिद्भेदेनापि भानं स्यादित्यर्थः ।

विकल्पासहत्वाच्च । तथाहि, सोपाधिकोऽयमध्यासो निरुपाधिको वा ।

नान्त्यः । नेदं रजतमितिवत् सकृदेव नायं कर्तेत्यकर्तृतयात्मज्ञानेन तन्निवृत्त्यापत्तेः । कुसुमस्येवोपाधेः प्रतिबन्धकस्याभावात् ।

नाप्याद्यः । रक्तं पुष्पमिति प्रमावत् कदाचिन्मनः कर्त्रीति प्रमया लोहितः स्फटिक इतिभ्रमवच्चैतन्यं कर्त्रीति भ्रमेण चावश्यं भाव्यमानत्वात् ।

ननु कुसुमस्य स्फटिकात्मनानध्यस्तत्वात्, मनसस्तु चिदात्मनाध्यस्तत्वादिति वैषम्येन तज्ज्ञानाभावोऽविरुद्ध इति चेन्न । अधिष्ठानात्मनानध्यस्तं जपाकुसुमादिस्थानीयमुपाधिं विना भीषणत्वयुक्तसर्पस्य रज्ज्वात्मनेव कर्तृत्वादियुक्तमनसश्चिदात्मनाध्यासे रज्जौ भीषणत्वान्तरस्येवात्मनि कर्तृत्वान्तरस्याध्यासस्य सोपाधिकत्वायोगात् ।

न चात्मनि कर्तृत्वान्तरमेवाध्यस्तमिति वाच्यम् । अध्यस्यमानधर्माश्रयस्याभेदारोप औपाधिकत्वासंभवात् ।

ननु रज्जुसर्पादावध्यस्यमानभीषणत्वादिविशिष्टसर्पापेक्षयाधिकसत्ताकसर्पान्तरस्य संभवेनास्य निरुपाधिकत्वम् । अत्र त्वध्यस्यमानान्तःकरणापेक्षया कर्तृत्वादिधर्मविशिष्टेतरस्याधिकसत्ताकस्यात्यन्ताभावादन्तःकरणमात्रस्योपाधित्वमिति चेन्न । स्फटिकेऽध्यस्यमानप्रातिभासिकलौहित्यापेक्षयाधिकसत्ताकलौहित्यान्तरस्य सत्त्वेन तस्यापि निरुपाधिकत्वापत्तेः ।

न च यद्धर्मी तादात्म्येनारोपितस्ततोऽधिकसत्ताकोऽतिरिक्तश्चास्ति । स निरुपाधिकोऽध्यासः । रज्जुसर्पादिवत् । लोहितः स्फटिक इत्यत्र तु न धर्मिणस्तादात्म्येनारोप इति सोपाधिकलौहित्योपपत्तिरिति वाच्यम् । मम मनो, मम बुद्धिर्ममान्तःकरणमिति भेदधिया प्रतिबन्धादभेदारोपासंभवेन धर्ममात्रस्यैव वक्तव्यतया लौहित्यादेरिव कर्तृत्वादेरुभयत्र प्रतीतेर्दुर्वारत्वात् । सोपाधिकस्थले धर्मारोपेणैवोपपत्त्या धर्म्यारोपस्याप्रामाणिकत्वाच्च । "समीपे स्थित उपदधाति स्वीयं धर्ममन्यत्रे"त्युपाधिलक्षणत्वात् । अभेदग्रहणदशायामप्ययं भीषणः, सर्पो भीषणः, अहं गौरः, शरीरं गौरमितिवन्मनः कर्तृ, चैतन्यं कर्त्रिति प्रतीत्यापत्तेः ।

अपिच, अस्मिन्नेवाधिकरणे भवद्भिरपि सांख्यदिशा बुद्धेः कर्तृत्वे प्राप्ते जीवस्यैवेति सिद्धान्तितत्वेन स्वोक्तविरोधाच्च । बुद्ध्यात्मनोरविवेकनिबन्धनस्य जीवनिष्ठकर्तृत्वस्य सांख्यमतेऽपि सत्त्वेनाविशेषात् ।

किंच, बन्धतन्निवृत्त्योपयिककृत्योः स्वध्वंसाभावस्वफलभाक्त्वाभ्यां सामानाधिकरण्यनियमेन बुद्धेः कर्तृत्वायोगात् ।

कर्तृत्वभोक्तृत्वाद्यनर्थरूपो बन्धो बुद्धिगतश्चेत् । ततो मोक्षोऽपि तद्गतः स्यात् । बन्धमोक्षयोः सामानाधिकरण्यनियमात् । अज्ञानमपि दुःखादिभोगद्वारेणैवानर्थ इति तव सिद्धान्तादित्यर्थः ।

न च बुद्धिगतं सद्रूपं भोक्त्रादिकम् । तद्धर्मत्वात् । नानर्थरूपम् । किंतु तदुपाधिकं मिथ्या भोक्तृत्वादिकमिति वाच्यम् । एतत्कल्पनायाः कर्तृत्वाध्याससिद्ध्यधीनत्वेनान्योन्याश्रयात् । मोक्षस्यापि सत्यस्यैवानर्थत्वाच्च । तदुक्तं वार्तिके बौद्धं प्रति ।

"नहि स्वप्नसुखाद्यर्थं पुमान् कश्चित् प्रवर्तते ।
यादृच्छिकत्वात् स्वाप्नस्य तूष्णीमास्येत पण्डितः ॥

इति । स्थूलो भुञ्जे, स्थूलः करोमि, इत्यादिना देहस्यानर्थान्वयापाताच्च ।

नापि बुद्ध्युपाधिकं ह्यात्मस्थभोक्तृत्वादिकमनर्थः । न तु देहस्थमिति वाच्यम् । अनर्थाश्रयस्यात्मनोऽनर्थकोटित्वायोगात् । भ्रमसमयेऽहं भोक्तेति प्रमाकाले बुद्धिर्भोक्त्रीति प्रतीत्यापत्त्या शुद्धात्मनि कदापि तत्प्रतीत्यभावापत्तेश्च ।

अपिच, मनसः श्रवणादिसाधनकर्तृत्वेन तत्फलमोक्षस्यापि तत्रैवापत्तेः । "शास्त्रफलं प्रयोक्तरि"ति न्यायात् । यत्र साधनकृतिस्तस्यैव फलभाक्त्वात् । अन्यथा कृतनाशाकृताभ्यागमप्रसङ्गात् । बन्धमोक्षयोर्वैयधिकरण्यापत्तेश्च ।

न च शुद्धोपहितयोः स्वाभाविकभेदाभावेन बन्धमोक्षयोः सामानाधिकरण्यं सूपपन्नमिति वाच्यम् । उपहितगतानर्थस्य शुद्धगतत्ववत् तद्गतदृश्यत्वमिथ्यात्वादीनामपि शुद्धगतत्वापत्तेः ।

न च जातेष्टिपितृश्राद्धादौ व्यभिचार इति वाच्यम्। कृतिफलयोः सामानाधिकरण्योपपादकोद्देश्यतासंबन्धस्य फलाधिकरणे पुत्रपित्रादौ सत्त्वात्। जातेष्टावपि पित्रर्थं पुत्रगतपूतत्वादि तदनुष्ठातुः पितुरेव फलमित्यर्थः। तथैव श्राद्धेऽपि बोध्यम्। आरोपितानारोपितसाधारणकर्तृत्वस्य फलं प्रति प्रयोजकत्वे बुद्धिदेहयोर्मोक्षान्वयापत्तिः।

किंच, "तन्मनोऽकुरुत" इत्यादिश्रुतौ मनसः कृतिकर्मत्वस्य शृण्वन्तः श्रोत्रेण विद्वांसो मनसेति करणत्वस्य "मन उत्क्रामचिवाश्नन्निवात्मा स" इत्यादौ मन उत्क्रमणेऽप्यात्मनः कर्तृत्वस्य "परं ज्योतिरुपसंपद्य स्वेन रूपेणाभिनिष्पद्यते स तत्र पर्येति जक्षत् क्रीडन् रममाण" इत्यादौ स्वरूपाविर्भावे परमुक्तावपि कर्तृत्वस्य "विज्ञानं यज्ञं तनुते विज्ञानात्मा योऽयं वेद जिघ्राणीति स आत्मा आनन्दभुक् तथा प्राज्ञ" इत्यादिश्रुतौ विज्ञानात्मनिष्ठकर्तृत्वस्य श्रवणात्।

न चात्र विज्ञानशब्दो बुद्धिपर इति वाच्यम्। "विज्ञानं ब्रह्मैवेदं तस्माच्च न प्रमाद्यति शरीरे पाप्मनो हित्वा सर्वान् कामान् समश्नुत" इति वाक्यशेषात्।

किंच, अहं करोमीत्यादिप्रत्यक्षेणात्मा मोक्षसाधनकृतिमान्, फलान्वयित्वात्, संमतवत्। अज्ञानं ज्ञानसमानाधिकरणम्, बन्धरूपत्वात्, संमतवत्, इत्याद्यनुमानैश्च कर्ता विज्ञानात्मा। "योऽयं वेद जिघ्राणी"त्यादिश्रुतिभिश्च।

यद्यात्मा कर्ता न स्यात्। तर्हि भोगमोक्षसाधनोपदेशोऽपि न स्यात्, इत्यर्थापत्त्या च सिद्धस्यात्मकर्तृत्वस्य बाधकादर्शनात्।

न च श्रुतिरनुवादपरा। अहमर्थात्मकर्तृत्वस्य "नामरूपे व्याकरोत्," "स हि सर्वस्य कर्ते"ति श्रुत्युक्तेश्वरकर्तृत्वस्य च प्रत्यक्षेणाप्राप्तत्वात्।

न च निर्धर्मकत्वं बाधकम्। निर्धर्मकत्वरूपधर्मस्य भावाभावाभ्यां व्याघातात्।

नापि निष्क्रियत्वं बाधकम्। क्रियाया धात्वर्थत्वे ह्यात्मन्यप्यस्त्यादिधात्वर्थसत्तादेः सत्त्वेन तत्त्वासिद्धत्वात्।

परिस्पन्दादिपरत्वे चेष्टापत्तेः। कृतिपरत्वे च "रुक्मवर्णं कर्तारमीशं पुरुषं ब्रह्मयोनि" मित्यादिश्रुत्या कर्तृत्वस्य चेतने विहितत्वेनासिद्धेः।

न च निष्क्रियत्वश्रुतिविरोधः। तस्या ब्रह्मणि परतन्त्रक्रियायाः प्रत्यगात्मनि स्वतन्त्रकर्तृत्वस्य निषेधकत्वात्। अन्यथा "स्वाभाविकी ज्ञानबलक्रिया चे"ति श्रुतेः, नहि द्रष्टुर्दृष्टेर्विपरिलोपो विद्यतेऽविनाशित्वात्", "नहि श्रोतुः श्रुतेः," "नहि मन्तुर्मते"रित्यादिश्रुतेश्च बाधस्य तवापि साम्यात्।

नापि निर्विकारत्वं बाधकम्। आकाशस्य संयोगाद्याश्रयत्वेऽपि निर्विकारित्ववदात्मनोऽज्ञानतद्ध्वंसाश्रयत्वेऽपि निर्विकारित्ववच्च ज्ञानादिगुणाश्रयत्वेऽपि विकारित्वायोगात्। "अविकार्योऽयमुच्यते," इत्यादिशास्त्राच्च।

ननु सुषुप्तौ मनसोऽभावे कर्तृत्वाद्यदर्शनं बाधकमिति चेन्न। तत्रापि श्वासादिकर्तृत्वदर्शनात् तदसिद्धेः। "सुषुप्तौ भूर्भूरित्यादिश्वसिती"त्यादिश्रुतेर्देहादिवन्मनसो निमित्तरूपत्वेनापि तदुपपत्तेश्च। "कामः संकल्प"इत्यादिश्रुतिरपि मनसः करणत्वबोधनविषयिकैव। "मनसैवाग्रे संकल्पयती"ति श्रुत्यन्तरात्। अत्र स्पष्टं कण्ठरवेण करणपाठदर्शनाच्च। "आत्मेन्द्रियमनोयुक्तं भोक्तेत्याहुर्मनीषिण" इति श्रुतेस्तु ह्यात्मनो भोक्तृत्वे देहादिवन्मनःसहकारित्वमात्रमित्येतत्परत्वात्।

किंच, "ध्यायतीव लेलायती"वेति श्रुताविवशब्दः परतन्त्रप्रभौ प्रभुरिवेतिवज्जीवकर्तृत्वस्येश्वरपारतन्त्र्यप्रदर्शनपरः।

नापि "प्रकृतेः क्रियमाणानी"ति स्मृतिर्बाधिका। तस्या अपि स्वतन्त्रकर्तृत्वनिषेधपरत्वाविशेषात्। सांसारिकप्रवृत्तावस्य कर्तृत्वं प्राकृतगुणप्रयुक्तं, न स्वरूपप्रयुक्तमिति विवेचनाय गुणेषु कर्तृत्वम्,। तथा च "कारणं गुणसङ्गोऽस्य सदसद्योनिजन्मसु", इति,

"तत्रैवं सति कर्तारमात्मानं केवलं तु यः।
पश्यत्यकृतबुद्धित्वान्न स पश्यति दुर्मतिः" ॥

इति केवलशब्दः स्वातन्त्र्यपर उक्तार्थे मानम्। सांसारिकप्रवृत्तावधिष्ठानादिपञ्चकस्य हेतुत्वात् केवलं स्वातन्त्र्येण स्वात्मानं कर्तारं मन्यमानो दुर्मतिरित्यर्थः। अन्यथा गुणानां कर्तृत्वे तेषामेव भोक्तृत्वापत्तिः। तयोः सामानाधिकरण्यनियमात्। न ह्यन्यकर्तृककर्मणान्येषां भोक्तृत्वं लोकवेदयोः प्रसिद्धम्।

किंच, गुणकर्तृकप्रवाहस्य नित्यत्वेनानिर्मोक्षप्रसङ्गो मुक्तानामपि पुनर्भोक्तृत्वप्रसङ्गश्च दुर्वारः। इतरकर्तृत्वप्रसङ्गात्।

किंच, भोक्तृत्वमात्रस्वीकारे भुजिक्रियाया व्यापाराश्रयत्वेनावश्यंभावात् कथमकर्तृत्वमात्मन इति पण्डितंमन्यैर्विचारणीयम्।

"दैवं चैवात्र पञ्चम"मित्यत्र दैवशब्दः परमात्मपरः। तथा च परमात्माधीनमेव प्रत्यगात्मनः कर्तृत्वमिति वक्ष्यते सूत्रकारः।

"स कारयेत् पुण्यमथापि पापं न तावता दोषवानीशितापि"।

इत्यादिश्रुतेः।

"केनापि देवेन हृदि स्थितेन
यथा नियुक्तोऽस्मि तथा करोमि"।

इत्यादिस्मृतेश्च । बद्धावस्थायामनादिप्रकृतिसंबन्धरूपया कर्मरूपया वाविद्यया संकुचितज्ञानक्रियाशक्तिकानां ज्ञानक्रियादौ मनआदिपारतन्त्र्यात् तत्सहायापेक्षा । मुक्तावस्थायां तु स्वपरस्वरूपयोराविर्भावेन बुद्धीन्द्रियादिनिरपेक्षत्वमिति विवेकः । "सर्वं हि पश्यः पश्यति सर्वमाप्नोति सर्वश" इति "यः सर्वज्ञः", "स हि सर्वस्य कर्ता," "तदैक्षत बहु स्यां प्रजायेये" त्यादिश्रुतिभ्य ईश्वरस्य तावन्नित्यक्रियाश्रयत्वं निर्विवादमेव । तथैव मुक्तानामपि ज्ञानक्रियादियोगोऽविरुद्धः । "स तत्र पर्येति," "जक्षत् क्रीडन् रममाणः संकल्पादेवास्य पितरः समुत्तिष्ठन्ती"त्यादिश्रुतेः ।

"विहारोपदेशात्," "संकल्पादेव तु तच्छ्रुते"रिति वक्ष्यमाणसूत्राच्च ।

ननु ज्ञानेच्छाकृत्यादीनां नित्यत्वे सदा सृष्ट्याद्यापत्तिः ।

न च कालस्य तत्र निमित्तत्वात् तद्भावाभावयोस्तत्र नियामकत्वेन नोक्तदोषावकाश इति वाच्यम् । प्रधानादाविच्छादिसंबन्धापादककालादेरपि सदा सत्त्वादिति चेन्न । सृष्टिप्रलयकालाभ्यां संबद्धाया ईश्वरेच्छाया एव सिसृक्षात्वजिहीर्षात्वसंभवात् । यथा परेषां वृत्तिश्चेदुपरागार्थेति मते व्यापकस्यापि चेतनस्य वृत्तिद्वारक एव घटादिसंबन्धः । यथा च तार्किकमते सर्वगतस्यापि गोत्वादेः सास्नादिमत्येव संबन्धो नान्यत्र । यथा चात्मत्वाद्धर्मैर्विश्वात्मनः श्रीपुरुषोत्तमस्य परब्रह्मणः सर्वदेशकालवस्तुपरिच्छिन्नपदार्थेतरतया व्यापकत्वेन सर्वत्र सत्त्वेऽपि कस्मिंश्चिच्चरमजन्मन्येवाधिकारिविशेषे साक्षात्कारो नान्यत्र । तद्वत् पारमेश्वरीयेच्छादेरपि सृष्टिकालादिविशेषावच्छिन्नप्रधानादिसंबन्धो नान्यदेति नोक्तदोषसंबन्धावकाश इत्यनवद्यम् ।

न च कर्तृत्वस्य क्लेशावहत्वान्न तत्र श्रौतं तात्पर्यमिति वाच्यम् । दर्शपौर्णमासादावपि श्रवणमननादावपि चातात्पर्यप्रसङ्गात् । श्वासादेरकरण एव क्लेशदर्शनाच्च । "यदा करोत्यथ निस्तिष्ठती"ति श्रुत्यैव कर्तृत्वस्य फलसंबन्धविधानाच्च ।

एतदुक्तं भवति । कर्तृत्वं बुद्धिगतं वा शुद्धगतं वाहमर्थगतं वा ।

नाद्यः, तस्या जडत्वेन तत्र कर्तृत्वाङ्गीकारे घटादावतिव्याप्तेः ।

नापि द्वितीयः । अहमर्थभिन्नात्मासिद्धेः पूर्वमेव विस्तृतत्वात् । परिशेषादहमर्थाभिन्नात्मनिष्ठमेव सिद्धम् ।

ननु मा भूत् केवलयोर्बुद्ध्यात्मनोरेकतरस्य कर्तृत्वम् । उक्तदोषात् । तथाप्युपाधिसंपर्कादकर्तुरप्यात्मन एव कर्तृत्वमिति चेन्न । तथात्वे षण्डस्यापि स्त्रीसंबन्धमात्रेण प्रजोत्पादकत्वप्रसङ्गात् ।

तस्मात् स्वाभाविककर्तृत्वाद्याश्रयस्यैवाहमर्थाभिन्नज्ञातुरात्मनो बद्धावस्थायां करणविषयसंबन्धनिमित्तकमेव कर्तृत्वं स्वाभाविकदाहकत्वाश्रयाग्नेः काष्ठादिसंबन्धनिमित्तकदाहकत्ववत् सूपपन्नम् । सुषुप्तिमूर्च्छादौ करणविषयादेरभावेन विशिष्टकर्तृत्वाभानस्यापि सूपपन्नत्वात् । सामान्यश्वासादिकर्तृत्वस्योक्तश्रुत्या तत्रापि सत्त्वाच्च । सर्वावस्थानुगतत्वमपि पूर्वोक्तरीत्या सूपपन्नतरम् ।

ननु तर्हि कर्तृत्वपक्षे जाग्रदवस्थायां कदापि तदुपरमो न स्यात्, करणकलापस्य तदा सत्त्वादिति चेन्न । कर्मक्रियाभावस्य तदुपरमे प्रयोजकत्वात् ।

किंच, सर्वस्यापि सचेतनस्य कर्मकर्त्रादिकलापस्य सर्वान्तरात्मश्रीपुरुषोत्तमपरतन्त्रत्वात्, तन्नियन्तृत्वस्य च बद्धजीवानाद्यदृष्टफलभोगानुरूपदेशकालसापेक्षत्वेन तत्प्रेरणसंकल्पस्य भावाभावौ तद्भानोपरत्योर्नियामकौ भवतः । तथात्वे च तत्प्रयोजकसत्त्वे तद्भानं, तदभावे चोपरतिरित्यर्थः ।

बद्धजीवेत्याद्युक्त्या ब्रह्मणि वैषम्यादिशङ्कापि दूरतो निरस्ता । तस्य स्वस्वादृष्टवृत्तितया तत्प्रयोजके ब्रह्मणि तदस्पर्शात् । "बुद्धिर्ज्ञानमसंमोह" इत्यादिश्लोकद्वयेन श्रीमुखगानात् । "फलमत उपपत्ते"रिति वक्ष्यमाणसाम्याच्च ।

नचैवं शास्त्राचार्योपदेशस्य निर्विषयत्वेन वैयर्थ्यापत्तिरिति वाच्यम् । उपदेशस्य श्रीहरिप्रयोजकताज्ञानप्राक्कालिकप्रवृत्तिविधायकत्वेन नैराकाङ्क्ष्यादिति भावः ।

एवं भोक्तृत्वादयोऽप्यूहनीयाः । तथाहि, सुषुप्त्यादौ "सुखमहमस्वाप्स"मिति योऽहं जागर्मि स एवाहं सुखी सुप्त इति स्मरणं प्रत्यभिज्ञानप्रमाणसिद्धं, मोक्षे च "जक्षत् क्रीडन्नि"ति श्रुतिप्रमाणसिद्धं भोक्तृत्वमिति संक्षेपः ॥ ३२ ॥

॥ विहारोपदेशात् ॥ ३३ ॥

इतश्चाप्यस्य कर्तृत्वम् । विहारः संचरणम् । "स ईयतेऽमृतो यत्र काम"मिति, "स्वे शरीरे यथाकामं परिवर्तते" इति विहारमुपदिशति श्रुतिः ॥ ३३ ॥

॥ उपादानात् ॥ ३४ ॥

इतश्चास्य कर्तृत्वम् । "स यथा महाराज" इति प्रकृत्य, "एवमेवैष एतान् प्राणान् गृहीत्वे"ति, "तदेषां प्राणानां विज्ञानेन विज्ञानमादाये"ति चोपादानं संकीर्त्यते । प्राणानामिन्द्रियाणां विज्ञानेन बुद्ध्यादिना विज्ञानं ग्राहकसामर्थ्यमादायेत्यर्थः ॥ ३४ ॥

इतश्चाप्यस्य कर्तृत्वमित्याह ॥

॥ व्यपदेशाच्च क्रियायां न चेन्निर्देशविपर्ययः ॥ ३५ ॥

यतोऽस्य लौकिकवैदिकक्रियासु “विज्ञानं यज्ञं तनुते कर्माणि तनुतेऽपि चे”ति श्रुत्या कर्तृत्वं व्यपदिश्यते। विज्ञानशब्देन जीवस्य न व्यपदेशः, अपितु बुद्धेरिति चेत्, तर्हि निर्देशविपर्ययः स्यात्। बुद्धेः करणत्वेन विज्ञानेनेति करणविभक्त्या निर्देशः स्यात् ॥ ३५ ॥

ननु जीवस्य कर्तृत्वे सदा स्वात्मनो हितमेव कुर्यान्न त्वहितमित्यत्राह ॥

॥ उपलब्धिवदनियमः ॥ ३६ ॥

तस्य परतन्त्रत्वाद्यथेष्टानिष्टयोरुपलब्धिस्तथा क्रियाया नियमः ॥ ३६ ॥

॥ शक्तिविपर्ययात् ॥ ३७ ॥

यदि विज्ञानशब्दो बुद्धिपरः स्यात्, तर्हि बुद्धेः करणशक्तिर्हीयेत, कर्तृत्वादिशक्तिश्च स्यात्। अतश्चापि जीवस्य कर्तृत्वम् ॥ ३७ ॥

इतश्च प्रत्यगात्मनः कर्तृत्वमित्याह ॥

॥ समाध्यभावाच्च ॥ ३८ ॥

जीवस्य कर्तृत्वाभावे मोक्षसाधनभूतसमाध्यभावश्च स्यात्। बुद्ध्यादेरन्योऽस्मीति समाधौ बुद्धेः कर्तृत्वायोगात् ॥ ३८ ॥

॥ यथा च तक्षोभयथा ॥ ३९ ॥

आत्मनः कर्तृत्वे हि स्वस्य भोगवाञ्छायां करोति, तदभावे न करोतीत्युभयथापि व्यवस्था सिध्यति, बुद्धेः कर्तृत्वे तस्या इच्छाया अभावाद् व्यवस्था न सिध्येत्। यथा तक्षा स्वकार्य इच्छया व्यवस्थितः ॥ ३९ ॥

॥ परात् तु तच्छ्रुतेः ॥ ४० ॥

तत् पुनर्जीवस्य कर्तृत्वं किं स्वायत्तं परमात्मायत्तं वेति संशये स्वायत्तमेवेति। विधिनिषेधशास्त्रस्य सार्थक्यात्। यः स्वातन्त्र्येण प्रवृत्तिनिवृत्तिशक्तः स एव विधिनिषेधविषयो निग्रहानुग्रहास्पदं च भवतीति प्राप्ते ब्रूमः। “परा”दिति। तुशब्दः पूर्वपक्षव्यावृत्त्यर्थः। जीवस्य कर्तृत्वं परमेश्वराधीनमेव। कुतः। तच्छ्रुतेः। कर्तृत्वादेरीश्वराधीनत्वश्रुतेः। “एष ह्येव साधु कर्म कारयति तं यमेभ्यो लोकेभ्य उन्निनीषते, एष एवासाधु कर्म कारयति तं यमेभ्यो लोकेभ्योऽधो निनीषते”, “अन्तः प्रविष्टः शास्ता जनानां”, “य आत्मानमन्तरो यमयती”त्यादिश्रुतेः। पूर्वमेव विस्तृतमेतत् ॥ ४० ॥

नन्वीश्वरस्य कारयितृत्वे धर्ममेव कारयेत्सर्वेषु, अन्यथा केनचित् पुरुषेण धर्मं केनचिदधर्मं कारयतो वैषम्यादिप्रसक्तिरित्यत आह ॥

॥ कृतप्रयत्नापेक्षस्तु विहितप्रतिषिद्धावैयर्थ्यादिभ्यः ॥ ४१ ॥

तुशब्दः शङ्कानिरासार्थः। जीवेन कृतो यो धर्माधर्मलक्षणः प्रयत्नस्तमपेक्ष्यैवान्यस्मिन्नपि जन्मनि परमेश्वरो धर्मादिकं कारयति, तदपेक्ष्य सुखादिफलं च ददाति, इति। कुत एवमिति चेदत आह, “विहिते”ति। ईश्वरस्य कर्मसापेक्षत्वे हि “ज्योतिष्टोमेन स्वर्गकामो यजेत,” “ब्राह्मणो न हन्तव्य” इत्याद्योर्विहितप्रतिषिद्धयोरवैयर्थ्यं भवति, अन्यथा तच्छास्त्रमनर्थकमेव स्यात्। धर्मकृतो दुःखमधर्मकृतश्च सुखं संपादयेदित्यादिदोष आदिशब्दार्थः ॥ ४१ ॥

अंशो नानाव्यपदेशादन्यथा चापि
दाशकितवादित्वमधीयत एके ॥ ४२ ॥

जीवस्य कर्तृत्वमीश्वराधीनमिति निरूपितम्। इदानीं तस्य “अंशो ह्येष परस्ये”ति श्रुत्या ब्रह्मांशत्वाभिधानात्, “निष्कलं निष्क्रिय”मिति श्रुत्या च ब्रह्मणो निरवयवत्वाभिधानादुभयश्रुतिविरोधप्रकारोऽत्र मीमांस्यते। तथा च किमत्यन्तभिन्नांशोऽयं, किंस्वित् सदुपाध्यवच्छिन्नो ब्रह्मप्रदेशः, ब्रह्मैवाविद्यया कल्पितांश इति वा, उत शक्तिमतः शक्तिरिव स्वाभाविकभिन्नाभिन्नः, इति संशये किं तावत् प्राप्तम्। स्वामिभृत्यपुत्रभ्रातृसखिवदत्यन्तभिन्न एवांशोऽयमिति। कुतः। नानाव्यपदेशात्। “द्वासुपर्णा सयुजा सखाया”, “ज्ञाज्ञौ द्वावजावीशानीशौ, “पृथगात्मानं प्रेरितारं च मत्वा,” “अनीशश्चात्मा वध्यते भोक्तृभावात्,” “अनीशया शोचति मुह्यमान” इत्यादिश्रुतिभ्यः। अभेदश्रुतयस्तु नरपतिरेव सर्वलोक इतिवदौपचारिक्य इति।

नैतद्युक्तम्। ब्रह्मणो निरवयवत्वेनात्यन्ताभिन्नांशत्वासंभवात्। अभेदश्रुतीनामपि प्राबल्येनौपचारिकत्वायोगात्। भेदनिन्दाश्रवणाच्च। अयोपाध्यवच्छिन्नस्यानन्यभूतस्य वाचकोऽयमंशशब्दः प्रयुक्तो यथाग्नेर्विस्फुलिङ्गस्य, कथं तर्हि निरवयवस्य परमात्मनोंऽशः संभवति। आगमादित्यवगम्यते। “यथाग्नेः क्षुद्रा विस्फुलिङ्गा व्युच्चरन्ती”ति दृष्टान्तप्रणयनात्, यथा चाकाशस्य पार्थिवाधिष्ठानावच्छिन्नकर्णच्छिद्रं, यथा च वायोः पञ्चवृत्तिः प्राणः, यथा च मनसः कामादयो वृत्तयः। स च भिन्नाभिन्नरूपः। अभिन्नरूपं स्वाभाविकम्, औपाधिकं तु भिन्नरूपम्। उपाधीनां च बलवत्त्वात् तत्संमूर्च्छितस्यान्वयः संसर्गोऽन्यभेदोऽप्युपगम्यते, स एव किं नेष्यते। नानाव्यपदेशात्। “सोऽन्वेष्टव्यः स विजिज्ञासितव्य” इति तत्र तत्र जीवपरयोर्भेदव्यपदेशात्। न हि भेदः स्यात् आह “तत्त्वमसि”, “नान्योऽतोऽस्ति द्रष्टे”त्याद्यभेदव्यपदेशाच्चैक्यमपि न संगतम्। विकल्पासहत्वात्। तथाहि, न तावदुपाधिना छिन्नो ब्रह्मखण्डो जीवः। ब्रह्मणोऽच्छेद्यत्वात्। जीवस्य सादित्वापत्ते-

श्च। नाप्यच्छिन्न एवाखण्डरूपोपाध्यवच्छिन्नो ब्रह्मप्रदेशविशेषो जीवोऽंशः । ब्रह्मैकप्रदेश उपाधिसंबन्धापत्त्या सर्वे दोषास्तस्यैव स्युः ।

किंच, उपाधौ गच्छति सति ब्रह्मप्रदेशाकर्षणानर्हत्वेनानुक्षणमुपहितब्रह्मप्रदेशभेदेन क्षणेक्षणे बन्धमोक्षौ स्याताम् ।

आकर्षणपक्षाभ्युपगमे वा छिन्नत्वात् कृत्स्नस्याप्याकर्षणं स्यात् ।

तदसंभवाभ्युपगमे पूर्वोक्तदोषस्य तादवस्थ्यम् । अविच्छिन्नब्रह्मप्रदेशेषु सर्वोपाधिसंसर्गेण सर्वजीवानां ब्रह्मण एव प्रदेशत्वेनैकत्वप्रतिसंधानं स्यात् ।

प्रदेशभेदादप्रतिसंधानाङ्गीकारे चैकस्यापि स्वोपाधौ गच्छति सति स एवाहमिति प्रतिसंधानं स्यात् ।

किंच, उपाधिना ब्रह्मणो जीवभावे सार्वज्ञ्यादिधर्मा आच्छादिताः, स्वरूपं वा ।

नाद्यः । असंभवात् । तथाहि, सार्वज्ञ्यादयः स्वाभाविका धर्मा औपाधिका वा ।

नान्त्यः ।

औपाधिकत्व उपाधेः सत्त्वमसत्त्वं वा । सत्त्वेऽपि ब्रह्मभिन्नत्वमभिन्नत्वं वा । भिन्नत्वेऽपि स्वप्रयुक्तत्वं ब्रह्मप्रयुक्तत्वं वा ।

नाद्यः । आत्माश्रयात् । न द्वितीयः । अनवस्थानात् । न तृतीयः । अन्योन्याश्रयात् । प्रयोजकस्य नित्यत्वेनानिवृत्तिप्रसङ्गाच्च ।

अभिन्नत्वे चोपाधिकभेदासिद्धिः । उपाधिर्ब्रह्मेति समानाधिकरणघटितप्रतीत्यापत्तिश्च । नाप्यसत्त्वम् । परमतप्रवेशापत्तेः । अनङ्गीकाराच्च ।

अथ स्वाभाविकत्वपक्षे तेषां स्वरूपभिन्नत्वमभिन्नत्वं वा ।

अत्यन्तभेदे शास्त्रविरोधः । "एवं गुणान् पृथक् पश्य" न्नित्यादिनिषेधश्रवणात् ।

अभिन्नत्वे ब्रह्मणा तेषां सामानाधिकरण्यापत्तिः । तथात्वे, "आनन्दं ब्रह्मणो विद्वान्" "परास्य शक्ति" रिति व्यधिकरणश्रुतिव्याकोपः ।

अन्त्ये, स्वाभाविकभिन्नाभिन्नानां ह्यावरणासंभवादस्मत्पक्षप्रवेशश्च । अन्यथा स्वरूपस्यावरणापत्तिः । तदङ्गीकारे सार्वज्ञ्यादिहानिः ।

किंच, उपाधिः सहेतुको निर्हेतुको वा ।

नाद्यः । अनवस्थानात् ।

नान्त्यः । मुक्तस्यापि पुनर्बन्धप्रसङ्गात् ।

किंच, ब्रह्मणः सार्वज्ञ्यादयो व्याप्यवृत्तय उतैकदेशवृत्तयः ।

आद्ये, सर्वज्ञस्य सर्वस्यापि बन्धयोगेऽनिर्मोक्षप्रसङ्गः, जगदान्ध्यापत्तिश्च ।

द्वितीये, तद्गुणानां परिच्छिन्नत्वेनाकिंचित्करत्वमिति । मायावादपक्षप्रवेशापत्तिश्च ।

किंच, मुक्तावस्थायां जीवः स्वरूपेण तिष्ठति, न वा ।

आद्ये, उपाधिविगमेऽपि जीवस्वरूपस्य विद्यमानताङ्गीकारे, औपाधिकभेदवादो दत्ततिलाञ्जलिः स्यात् । स्वरूपेणैव भेदाङ्गीकारात् ।

द्वितीये, स्वरूपनाश एव मुक्तस्वरूपः स्यात् । तथात्वे च प्रच्छन्नबाह्यान्मायावादिनः को वा विशेष इति त्वयैव चिन्तनीयम् ।

नाप्युदाहृतदृष्टान्तानामग्निविस्फुलिङ्गप्राणमनोवृत्तीनामत्र प्रामाण्यम् । वैषम्यात् । अग्निवाय्वोः सावयवद्रव्यत्वेन तत्रांशानां स्वाभाविकानामेव सत्त्वेनोपाधिकल्पनाया अप्रयोजकत्वात् । कामादिवृत्तीनां च मनःपरिणामत्वात् । एवं जीवस्य ब्रह्मपरिणामत्वापत्तेः । तथात्वे चोभयोरनित्यत्वं स्यात् ।

तस्मान्न जीवस्योपाधिकृतांशत्वं,

न चोक्तश्रुतेर्निर्विषयत्वेन व्याकोपस्य प्रसङ्ग इति वाच्यम् । तस्याः प्रत्यगात्मनोऽजत्वेऽपि जन्मप्रतिपादकश्रुतिसार्थक्याय देहसंबन्धाज्जन्मप्रतिपादनपरत्वेन नैराकाङ्क्ष्यात् । वस्तुतोऽत्यन्ताभेद एव पर्यवसानाद्भेदाभेदाङ्गीकारस्य वैयर्थ्यमेव ।

किंच, परैरपि विवरणेन तावद्ब्रह्मणो जातिव्यक्तिभावो, गुणगुणिभावः, कार्यकारणभावो, विशिष्टस्वरूपत्वमंशांशिभावो वा । विभुत्वे मानाभावात् ।

न च तदभावे भेदाभेदौ दृश्येते ।

न च "ममैवांशो जीवलोक" इति स्मृतेरंशांशितेति वाच्यम् । "निष्कलं निष्क्रिय" मिति निरंशत्वप्रतिपादकश्रुतिविरोधात् । "पादोऽस्य विश्वा भूतानी" ति श्रुतिर्नांशांशिभावं ब्रूते । किंतु ब्रह्मानन्त्यप्रतिपादनाय जीवस्याल्पमात्रत्वमाह । अन्यथा सांशस्य ब्रह्मणो घटादिवदवयवारभ्यत्वप्रसङ्गात् ।

ननु स्वाभाविकी निरवयवता, बुद्ध्याद्युपाधिनिमित्तं सांशत्वमिति नोक्तदोष इति चेन्न । एवमपि वास्तवाभेदो न सिध्येत् । नहि निरवयवमाकाशं खड्गधारादिभिर्वस्तुतो भेत्तुं शक्यम् ।

अथान्तःकरणोपाधीनां वस्तुब्रह्मदारणसामर्थ्यमस्ति, तर्हि ब्रह्म स्वस्यानर्थाय कथमुपाधीन् सृजेत् ।

न च जीवार्था तत्सृष्टिः । तत्सृष्टेः प्राग्जीवविभागासिद्धेः ।

न च कर्माविद्यासंस्कारा अन्तःकरणोत्पत्तेः प्राग्विद्यमाना जीवं विभजन्ते । अन्तःकरणद्रव्यस्यैव जीवोपाधित्वा-

ङ्गीकारादित्यादिना बहुशो निरस्तत्वाच्च । तस्माद्दुरुपपादोऽयमौपाधिकभेदाभेदवाद इति संक्षेपः ।

ननु स्यादेतत् । औपाधिकभेदवाद उक्तदोषाणां संभवात् तदनङ्गीकारः, अपितु निरंशत्वश्रुतिविरोधात् स्वाभाविकांशत्वाभावेऽपि सूर्यप्रतिबिम्बयोरिव जीवपरयोः कल्पितोंऽशांशिभावः, भेदस्याविद्यकत्वात् स्वरूपैक्यमेव परमार्थ इति चेन्न । तुच्छत्वात् । उक्तसिद्धान्तस्य सूर्यप्रतिबिम्बदृष्टान्तेन जीवस्य ब्रह्मांशत्वकल्पनाया दृष्टान्तवैषम्येनासंभवात् । तथाहि, यथा सूर्यजलयोर्बिम्बोपाध्योः सावयवत्वरूपादिमत्त्वात् तत्र प्रतिबिम्बसंभवः । न तथा दार्ष्टान्ते ब्रह्मरूपबिम्बस्याविद्यारूपोपाधेश्च निरवयवत्वनीरूपत्वाभ्यां तत्संभव इति पूर्वमेवोक्तम् ।

ननु यज्जन्यं तत् सावयवं, कार्यत्वात्, घटादिवदित्यनुमानादन्तःकरणस्य सावयवत्वाङ्गीकारान्नोक्तदोषप्रयोग इति चेन्न । "तद्गुणसारत्वा"दित्यस्य भाष्ये भवद्भिरेव जीवस्य स्वरूपेण विभुत्वं निरूप्याणुत्वोत्क्रान्त्यादिप्रतिपादकसूत्रश्रुतयश्च बुद्ध्यणुत्वपरिमाणपरत्वेन व्याख्याताः । तद्बाधापत्तेः । उपाधेर्निरवयवत्वे प्रतिबिम्बानुपपत्तिः । सावयवत्वे स्वाणुत्वप्रतिपादकश्रुतिसूत्रभाष्याणां बाध इत्युभयथापाशा रज्जुरित्यलं विस्तरेण ।

एवं च नैतेषु पक्षेषु भूयः श्रुत्यविरोधः संभवति । अतः परिशिष्टपक्षेषूभयश्रुत्यविरोधोऽभिप्रेत इति निश्चीयते । तथा च परमात्मनोंऽशोऽयं जीवः । कुतः । नानाव्यपदेशात् । कथं तर्ह्युक्तविरोधपरिहार इति चेत् । तत्राह । "अन्यथा चापी"ति । अनात्मत्वेनाप्यभेदेनापि व्यपदेशादित्यर्थः । तथा च भेदाभेदव्यपदेश एव सर्वविरोधपरिहारहेतुरिति भावः ।

न चौपाधिकपक्षेऽपि तेनैव सर्वाविरोधसंभव इति वाच्यम् । उक्तदोषप्रयोगात् । अत्र तूभयोः स्वाभाविकत्वाङ्गीकारात् । नानाव्यपदेशस्तावत्, नियन्तृत्वनियम्यत्वस्वतन्त्रत्वपरतन्त्रत्वसर्वज्ञत्वाल्पज्ञत्वाधारत्वाधेयत्वोपास्यत्वोपासकत्वानुग्राहकत्वानुग्राह्यत्वप्राप्यत्वप्रापकत्वोपकारकत्वोपकार्यत्वैकत्वानेकत्वविभुत्वाणुत्वादिभिः श्रूयते । "य आत्मानमन्तरो यमयति", "अन्तः प्रविष्टः शास्ता जनानाम्", "आत्मा हि परमः स्वतन्त्रोऽधिगुणः, जीवोऽल्पशक्तिरस्वतन्त्रोऽवरः", "ज्ञाज्ञौ द्वावजावीशानीशौ", "तस्मिँल्लोकाः श्रिताः सर्वे", "आत्मा वा अरे द्रष्टव्यः श्रोतव्यो मन्तव्यो निदिध्यासितव्यः", "यमेवैष वृणुते तेन लभ्यः", "ब्रह्मविदाप्नोति परं", "नित्यो नित्यानां चेतनश्चेतनानामेको बहूनां यो विदधाति कामान्", "सत्यं ज्ञानमनन्तं ब्रह्म", "अणुर्ह्येष आत्मा चेतसा वेदितव्य"इत्यादिश्रुतिषु । अभेदव्यपदेशश्च "तत् त्वमसि", "अयमात्मा ब्रह्म", "अहं ब्रह्मास्मी"त्यादिश्रुतिषु । अपि चैके शाखिन आथर्वणिका ब्रह्मणो दाशकितवादित्वमधीयते ब्रह्मसूक्ते "ब्रह्मदाशा ब्रह्मदासा ब्रह्मेमे कितवा" इत्यादिना । दाशाः कैवर्ताः प्रसिद्धाः । ये चामी दासाः स्वामिष्वात्मानमुपक्षिपन्ति, ये चान्ये कितवा द्यूतकृतस्ते सर्वे ब्रह्मैवेत्यर्थः । तथा चोभयोः स्वरूपस्वभावयाथात्म्यतदपृथक्सिद्धत्वादभेदव्यवहारश्च मुख्यः ।

एवं च शक्तिमतः शक्तेरिवांशत्वेनाभिन्नत्वेऽपि तदपृथक्सिद्धत्वादभिन्नत्वमितिवत् प्रकृतेऽपि जीवस्य ब्रह्मशक्तित्वाद् ब्रह्मांशत्वेन भिन्नत्वं तदपृथक्सिद्धत्वेन चाभिन्नत्वं मुख्यमेवेति राद्धान्तः । उभयविधवाक्यानां तुल्यबलत्वात् ।

तथाहि, वेदान्तशास्त्रे द्विविधानि वाक्यानि दृश्यन्ते, तत्र "नित्यो नित्यानां", "जहात्येनां भुक्तभोगामजोऽन्यः," "पृथगात्मानं प्रेरितारं च मत्वा," "भोक्ता भोग्यं प्रेरितारं च मत्वा," "प्रधानः क्षेत्रपतिः," "अक्षरात् परतः परः" इत्यादीनि भेदपराणि । "आत्मा वा इदमेक एवाग्र आसीत्", "एको ह वै नारायण आसीत्", "सदेव सोम्येदमग्र आसीत्", "तत् त्वमसि", "अयमात्मा ब्रह्म", "आत्मैवेदं सर्वं", "सर्वं खल्विदं ब्रह्म", "अहं ब्रह्मास्मी"त्यादीन्यभेदपराणि । "सर्वं तं परादाद्योऽन्यत्रात्मनः सर्वं वेदे"त्यादीनि भेदनिषेधपराणि । "अस्थूलमनण्व"त्यादीनि च स्थौल्यादिसामान्यनिषेधपराणि । तत्र भेदवाक्यानां परतन्त्रसत्त्वविषयकत्वेन स्वार्थाभिधायित्वम् । तस्य बहुत्वात् । स्वतन्त्रसत्त्वविषयिका चाभेदवाक्यप्रवृत्तिः । तस्यैकत्वात् । तथैव तेषां नैराकाङ्क्ष्यम् ।

सत्ता हि द्विधा । स्वतन्त्रपरतन्त्रभेदात् । आत्माश्रितत्वे सति स्वायत्तस्थितिप्रवृत्तिका प्रथमा । नियन्तृत्वादिवत् समानाधिकरणासाधारणधर्मविशेषः । तस्य च भगवद्ब्रह्मादिशब्दवाच्ये श्रीकृष्ण एवान्वयः । तस्यैव सर्वनियन्तृत्वात् । नियन्तृत्वस्वतन्त्रसत्त्वयोः सामानाधिकरण्यनियमात् । "आत्मा हि परमः स्वतन्त्रोऽधिगुणः" ।

"सत्त्वं स्वातन्त्र्यमुद्दिष्टं तच्च कृष्णे न चापरे" ।

इत्यादिश्रुतिस्मृतिभ्यः ।

परायत्तस्थितिप्रवृत्तिकता द्वितीया । सा च चिदचिदात्मकनियम्यवर्गवृत्तिः । तदसाधारणधर्मत्वात् । "यदासीत् तदधीनमासीत्", "जीवोऽल्पशक्तिरस्वतन्त्रोऽवरः" ।

अस्वातन्त्र्यात् तदन्येषामसत्त्वं विद्धि भारत ।

इत्यादिश्रुतिस्मृतिभ्यः ।

परतन्त्रसत्त्वं द्विविधम् । कूटस्थं विकारशीलं च । तत्र कौटस्थ्यं नाम जन्मादिविकारशून्यत्वे सति नित्यत्वम् । तच्च जीववर्गाश्रितम् । तदाश्रयो जीवः प्रत्यगक्षरपुरुषक्षेत्रज्ञादिशब्दाभिधेयः । विक्रियायुक्तत्वे सत्यनाद्यनन्तत्वं द्वितीयम् । तच्च प्रकृतिवर्गाश्रितम् । तदाश्रयश्च कार्यकारणात्मकप्रधानप्रकृत्यादिशब्दवाच्योऽचिद्वर्गः । तथैव भेदनिषेधपराणां चिदचिद्वस्तुवृत्तिस्वतन्त्रसत्त्वनिषेधपरत्वेन स्वार्थे प्रामाण्यम् ।

भिन्नत्वं नाम स्वतन्त्रसत्तावत्त्वेन स्थितिप्रवृत्त्यर्हत्वम् । तच्च नियम्यवर्गे नास्त्येव । तस्य ब्रह्मासृष्टत्वेन पृथक् सिद्धत्वादिति भेदनिषेधस्य तात्पर्यार्थः । सामान्यनिषेधपराणां च ब्रह्मणः सर्ववैलक्षण्यज्ञानेन स्वार्थे प्रामाण्यमिति सर्वेषामपि तुल्यबलत्वान्न परस्परं बाध्यबाधकभावः ।

ननु कथं तुल्यबलत्वम् । श्रौतत्वादिति चेत् । तर्ह्यर्थवादानामपि स्वार्थे प्रामाण्यापत्तिः । तेषामपि तदविशेषात् ।

अतो भेदवाक्यानां प्रत्यक्षसिद्धभेदविषयकत्वेनानुवादपरत्वावगतिः । "वह्निर्हिमस्य भेषज"मित्यादिवाक्यवत् स्वार्थहीनत्वेन श्रुतिनिन्दितभेदविषयकत्वाच्च दुर्बलत्वम् । अभेदवाक्यानां तु प्रमाणान्तराप्राप्ताभेदविषयकत्वादुपक्रमादिषड्लिङ्गोपेतत्वाच्च प्रबलत्वमिति चेन्न । जीवेशयोः प्रतियोग्यनुयोगिनोः प्रत्यक्षागोचरतया तद्भेदस्यापि प्रत्यक्षात् । तव सिद्धान्ते प्रत्यक्षप्रमाणस्य सन्मात्रानुभूतिग्राहित्वेनाभिन्ननिर्विशेषसन्मात्रानुवृत्तेः प्रत्यक्षप्राप्तसत्त्वादभेदवाक्यानामेव तदनुवादपरत्वस्य वक्तुं सुशकत्वात् । भेदवाक्यानामपि षड्लिङ्गोपेतत्वाच्च पूर्वोक्तहेत्वाभासत्वमेव ।

ननु कोऽयं भेदः । स्वरूपं वा, धर्मो वा ।

नाद्यः । स्वरूपवद्भेदस्यापि वृत्तियोगनिरपेक्षव्यवहारापत्तेः । हस्तः कर इत्यादिवद्भिन्नो घट इत्यादीनां पर्यायत्वापत्तेश्च ।

नापि धर्मः । तथात्वे स्वरूपाभेदोऽप्यवश्यं भावी । अन्यथा स्वरूपमेव स्यात् । भेदे च तस्यापि भेदस्तद्धर्मस्यापीत्यनवस्था । धर्मिग्रहे भेदग्रहो, भेदग्रहे च धर्मिग्रह इत्यन्योन्याश्रयश्च ।

तस्माद्भेदस्यैवासिद्धेः कुतस्तद्विषयकवाक्यानां प्राबल्यमिति चेन्न । तव पक्षेऽपि साम्यात् ।

तथाहि, अभेदः स्वरूपं वा, धर्मो वा ।

नाद्यः । स्वरूपवदभेदस्यापि ग्रहापत्त्या, अयं घटः, अयं पट, इत्यादिप्रतीतिविषयाणां घटादीनामलीकत्वापत्तेः । सर्वप्रत्यक्षाणां सन्मात्रनिर्विशेषानुभूतिग्राहकत्वाविशेषे घटाद्यनुभवेनैव सत्तानुभवापत्त्या वेदान्तविचारो दत्ततिलाञ्जलिः स्यात् ।

नापि धर्मः । त्वदुत्प्रेक्षितदोषाणामत्रापि तौल्यात् । द्वैधापत्तेः । निर्विशेषत्वप्रतिज्ञाहानेरपसिद्धान्ताच्च ।

वस्तुतस्तु भेदो जातिवद्धर्मविशेष एव । गोत्वादिवत् । प्रतीत्यपेक्षया वस्तुनः स्वस्य च भेदव्यवहारहेतुत्वान्नोक्तदोषावकाश इति संक्षेपः ।

तत् सिद्धं सर्वेषामपि वाक्यानां तुल्यबलत्वं, तेषां सर्वेषां स्वार्थसिद्धये विश्वभिन्नाभिन्नं ब्रह्मसूत्रकृताभिप्रेतम् ।

ततश्चैवं तेषां समन्वयः । अभेदवाक्यैर्जगद्ब्रह्मणोः सामानाधिकरण्यं निरूप्यते । तद् द्विविधम् । यथार्थायथार्थभेदात् ।

अयथार्थमपि द्विविधम् । अध्यासो बाधश्च । तत्राध्यासो नाम प्रमाणबलादन्यत्रान्यस्योपासनाद्यर्थं तत्ताविधानम् । यथा "नाम ब्रह्मोपासीते"त्यादिश्रुतीनामादित्याप्रतीकेषु तद्वस्तुषु ब्रह्मत्वेनोपासनविधानम् । बाधितत्वं चोत्तरविरोधिज्ञानविषयत्वम् । यथा स्थाणुरेव चौरः । स्थाणुज्ञानाच्चोरस्य बाधितत्वात् । उभयोरप्यनयोः सामानाधिकरण्यलक्षणहीनत्वेन गौणत्वादयथार्थत्वम् ।

यथार्थं च विविधम् । कार्यकारणव्याप्यव्यापकाधाराधेयविशेष्यविशेषणात्मात्मीयादिभेदात् । तत्र न तावदध्यासः । विरुद्धत्वात् । प्रयोजनाभावेन प्रतीकादिवदत्र प्रमाणाभावाच्च ।

नापि बाधः । ज्ञानाबाध्यत्वात् । अन्यथा शुक्तिरूप्यवदाकाशादेरपि बाधापत्तिः । सा चादृष्टचरानुपपन्ना च ।

नापि विशेषणविशेष्यता । तदनुपपत्तेर्वक्ष्यमाणत्वात् । परिशेषात् कार्यकारणभावादिरूपमेव ग्राह्यम् । तथा च सर्वात्मा भगवान् श्रीकृष्णः स्वाश्रितात्मसत्तया स्वनियम्यव्याप्यात्मीयादिरूपाद् विश्वस्मादभिन्नः । तथैव चिदचिन्नियम्यवर्गवृत्तिपरतन्त्रसत्त्वाभावरूपेणास्थूलादिवाक्यप्रतिपाद्येन विश्वविलक्षणत्वापरपर्यायेण सर्वज्ञादिवद्भावरूपेण स्वासाधारणधर्मेण विश्वस्माद्भिन्न इति स्वभावतो विश्वभिन्नाभिन्नः श्रीपुरुषोत्तमः सर्ववेदान्तार्थः । एतदभिप्रायं पुरस्कृत्य तत्त्वमस्यादिवाक्यार्थोऽनुसंधेयः । तथाहि, सर्वज्ञः सर्वशक्तिः स्वतन्त्रसत्ताश्रयः श्रीपुरुषोत्तमस्तत्पदार्थः । तदात्मकः परतन्त्रसत्ताश्रयश्चेतनस्त्वंपदार्थः । असिशब्दश्च तयोस्तादात्म्यसंबन्धाभिधायकः ।

एवं च विश्वात्मकपरब्रह्मसर्वज्ञसर्वशक्तिस्वतन्त्रसत्त्वावच्छिन्नतत्पदार्थाभिन्नतदात्मकपरतन्त्रसत्ताश्रयचेतनस्त्वमसीति वाक्यार्थः । पूर्वाचार्यैस्तु सर्वज्ञसर्वशक्तिस्वतन्त्रसत्ताश्रयश्रीपुरुषोत्तमस्तत्पदार्थः । तदात्मकपरतन्त्रसत्ताश्रयजीवान्तरात्मभूतः स एव च त्वंपदार्थः । ब्रह्मणः सर्वात्मस्वतन्त्रसत्ताश्रयत्वाभ्यां सर्वशब्दवाच्यत्वात् । तयोस्तादात्म्योपदेशार्थोऽसिशब्दः ।

इत्थं च विश्वात्मपरब्रह्मसर्वज्ञसर्वशक्तिस्वतन्त्रसत्ताश्रयतत्पदार्थाभिन्नतदात्मकपरतन्त्रसत्ताश्रयत्वंपदार्थजीवावच्छिन्नसर्वान्तरात्मा वासुदेवस्त्वंपदार्थोऽसीति वाक्यार्थ उक्तः । तत्र त्वंपदस्य जीवपरतया प्रसिद्धस्य कथं जीवान्तरात्मपरत्वमित्याशङ्क्य ब्रह्मणः सर्वात्मत्वेन सर्वशब्दवाच्यत्वादेवेति समाहितम् ।

"सर्वाणि नामानि यमाविशन्ति
सर्वे वेदा यत्पदमामनन्ति" ।
"नमामः सर्ववचसां प्रतिष्ठा यत्र शाश्वती" ।
"वेदैश्च सर्वैरहमेव वेद्यः",

इत्यादिशास्त्रात् । विस्तृतश्चैषोऽर्थोऽग्न्यादिदृष्टान्ते श्रीपुरुषोत्तमाचार्यपादैरिति संक्षेपः ।

नन्वेवं तच्छब्दस्य जीवान्तर्यामिपरत्वे त्वमसीति मध्यमपुरुषो न घटेत । नहि त्वदन्तर्यामिपरमात्मासीत्यन्वयो युज्यत इति चेत् ।

उच्यते । त्वदन्तर्यामीत्यादिशब्दान्तरेणोपस्थापिते जीवान्तर्यामिणि मध्यमपुरुषान्वयासंभवेऽपि त्वमिति युष्मत्पदोपस्थापिते तस्मिंस्तदन्वयो युज्यत एव । तथा च पाणिनिसूत्रम् । "युष्मद्युपपदे समानाधिकरणे स्थानिन्यपि मध्यम" इति । प्रत्यगर्थबोधकयुष्मच्छब्दोपपदे मध्यमपुरुषो भवतीत्यर्थः । न पुनर्युष्मच्छब्दस्य प्रत्यगर्थद्वारा परमात्मपर्यन्तत्वे मध्यमनिवृत्तिरिति । "अधिकं तु प्रविष्टं न तद्धानि" रिति न्यायात् । एवं सोऽहमस्मि, त्वं वाहमस्मीत्यादिष्वस्मीत्युत्तमपुरुषोऽपि । अहंपदेनाभिमुखचेतनद्वारा तदन्तर्यामिणोऽभिधानाभ्युपगमात् । तत्रापि "अस्मद्युत्तम" इति हि स्मर्यते । न त्वस्मच्छब्दस्य स्वाभिमुखचेतनद्वारा तदन्तर्यामिपर्यन्तत्व उत्तमनिवृत्तिरिति ।

ये तु "तत् त्वमसि", "सोऽहमस्मि", इत्यादिष्वहंत्वमादिशब्दैर्युष्मदस्मदर्थत्यागेन निर्विशेषचिन्मात्रस्वरूपैक्यमेव वाक्यवेद्यमाहुः, तांस्तत् त्वमसीत्यादिवाक्यस्थोऽसिशब्दः सोऽहमस्मीत्यादिवाक्यस्थोऽस्मिशब्दश्च खण्डयति । श्रोतर्यनुसंधातरि च युष्मदस्मदी । ते हि तैः परित्यक्ते । न हि तेषामसिना कश्चित् प्रबोधनीयः । न चास्मिना कश्चिद्द्विशिष्यानुसंधेयोऽस्ति ।

ननु त्वं वाहमस्मि, अहं वै त्वमसीत्यादौ त्वमहंपदयोरुभयोरपि श्रवणात् कथं पुरुषव्यवस्थेति चेत् । उद्दिश्य एव युष्मदादिपदमुपपदत्वेन पाणिनिसूत्राभिमतम् । तथा चोद्दिश्यसमर्थकोपपदवशादेवात्र मध्यमोत्तमयोर्व्यवस्था सिध्यति । एवं "तत् त्वमसी" त्यत्रापि त्वंपदार्थ उद्दिश्य एव । ततश्चोद्देश्यविषयकं त्वं पदमेव पुरुषनिमित्तम् । न तु तत्पदमपीति न प्रथमपुरुषप्रसङ्ग इति ॥ ४२ ॥

॥ मन्त्रवर्णात्* ॥ ४३ ॥

मन्त्रवर्णादप्युक्तार्थस्य निश्चयः । "एतावानस्य महिमातो ज्यायांश्च पूरुषः पादोऽस्य विश्वा भूतानि त्रिपादस्यामृतं दिवी" ति भूतशब्देन जीवप्रधानानि स्थावरजङ्गमादीनि दर्शयति । पादशब्दोंऽशवाची । चिच्छक्तेरेवांशत्वाभिधानं चात्र ॥ ४३ ॥

कुतश्चायमर्थोऽवगम्यतेऽत आह ॥

॥ अपिच स्मर्यते ॥ ४४ ॥

भगवद्गीतासु श्रीमुखेनेति शेषः ।

"ममैवांशो जीवलोके जीवभूतः सनातनः" ।

इति चकाराच्छक्तित्वपरामर्शः । तथा च,

"अपरेयमितस्त्वन्यां प्रकृतिं विद्धि मे पराम् ।
जीवभूताम्",

इत्यनेन जीवस्य शक्तित्वोक्तेस्तस्यैवांशत्वगानादिति भावः ।

"एकदेशस्थितस्याग्नेर्ज्योत्स्ना विस्तारिणी यथा ।
परस्य ब्रह्मणः शक्तिस्तथेदमखिलं जगत् ॥
विष्णुशक्तिः परा प्रोक्ता चेतनाख्या तथा परा" ।

इति वैष्णवे जनकवाक्याच्चास्य शक्तित्वनिश्चयः ।

तस्माच्चिच्छक्तेरेव स्वाभाविकभिन्नाभिन्नांशत्वमिति सिद्धम् ॥ ४४ ॥

स्यादेतत् । तथापि जीवस्य स्वाभाविकभिन्नाभिन्नांशत्वे जीवगता दोषा ब्रह्मण एव स्युरित्याशङ्क्याह ॥

॥ प्रकाशादिवत् तु† नैवं परः ॥ ४५ ॥

यथा जीवः कर्मवशात् सुखदुःखमनुभवति । नैवं परः । परमात्मा । तस्य तद्धेतोरभावात् । दृष्टान्तमाह, "प्रकाशादिव" दिति । यथा प्रकाशस्य सूर्यादेरंशः प्रभारूपा शक्तिरेवाधादिभिरुपरुध्यते, न सूर्यादिः, यथा वाग्नेर्दाहकत्वशक्त्यंश एव मणिमन्त्रादिना निरुध्यते, यथा वा देहिनो मनुष्यादेर्देहरूपांश एव शस्त्रव्याध्यादिभिश्छिद्यते, विक्रियते च, न देही चेतनः ।

"न हन्यते हन्यमाने शरीरे" ।

इति गानात् । तथा ब्रह्मांशस्यापि जीवस्यानादिकर्मात्मकाविद्यापरिमुक्तत्वात् तत्कृतसुखदुःखित्वसंविकृत्वम् । न परस्य तद्योगः । दोषास्पृष्टस्वभावत्वात् ॥ ४५ ॥

* मन्त्रवर्णाच्चेति शंकरभाष्यसंमतपुस्तकपाठः ।

† व्याख्यान्तरे तुशब्दो नास्ति ।

॥ स्मरन्ति च ॥ ४६ ॥

यथा जीवदुःखेनेश्वरस्यादुःखित्वं, तथर्षयः स्मरन्ति ।

"तत्र यः परमात्मासौ स नित्यो निर्गुणः स्मृतः ।
न लिप्यते फलैश्चापि पद्मपत्रमिवाम्भसा ॥
कर्मात्मा त्वपरो योऽसौ बन्धमोक्षैः स युज्यते ।
स सप्तदशकेनापि राशिना युज्यते पुनः" ॥

इति । चकारात् समामनन्ति चेति ज्ञेयम् । "तयोरन्यः पिप्पलं स्वाद्वत्त्यनश्नन्नन्योऽभिचाकशीति" इति ।

येषां तु जीवो वास्तवो नास्ति, ब्रह्मैवाविद्यया जीवभावं प्राप्तम् । तेषां कदापि कथंचिदपि नोक्तदोषोद्धारः संभवति । कर्मवश्यस्य वस्तुतोऽसंभवाद् ब्रह्मण एव सर्वदोषप्रसङ्गः । अत एवोदाहृतश्रुतिस्मृत्योरपि न तत्र प्रामाण्यमस्ति । यदि तस्य स्वप्रकाशत्वेन निर्लेपत्वाङ्गीकारस्तर्हि सुखदुःखात्मककर्मसंबन्धस्य तत्फलभोक्तृत्वाभावात् सर्वं शास्त्रं दत्ततिलाञ्जलि स्यात् ।

केचित् तु पृथ्व्यां शुक्लकृष्णादीनां गवादिवस्तूनां गोत्वादीनि विशेषणान्यंशाः, यथा वा देहिनो देवमनुष्यादेर्देहोऽशः, तद्वत् । एकवस्त्वेकदेशत्वं ह्यंशत्वम् । विशिष्टस्यैकस्य वस्तुतो विशेषणमंश एव ।

तथा च विवेचका विशिष्टे वस्तुनि विशेषणांशोऽयं, विशेष्यांशोऽयमिति व्यपदिशन्ति । विशेषणविशेष्ययोरंशांशित्वेऽपि स्वभाववैलक्षण्यं दृश्यते । एवं जीवपरयोर्विशेषणविशेष्ययोरंशांशित्वं स्वभावभेदश्चोपपद्यत इति सिद्धान्तयन्ति ।

तदसमीचीनम् । दृष्टान्तदार्ष्टान्तवैषम्यात् ।

तथाहि, यदुक्तं 'गोत्वादिविशिष्टानां शुक्लकृष्णादीनां गवादिवस्तूनां गोत्वादीनि विशेषणान्यंशा इत्यारभ्यांशांशित्वेऽपि स्वभाववैलक्षण्यं दृश्यते", इत्यन्तम् । तत् सत्यं, नात्र विवादः । गोत्वादेर्देवमनुष्यादेर्देहस्य च विशेषणत्वसंभवात् । व्यावर्त्यानां सत्त्वेन व्यावर्तकत्वात् ।

परंतु यत् पुनरुक्तम् । "एवं जीवपरयोर्विशेषणविशेष्ययोरंशांशित्वं स्वभावभेदश्चे"ति तदयुक्तम् । जीवपरयोर्विशेषणविशेष्यत्वासंभवात् । चिदचितोर्ब्रह्मविशेषणत्वे ब्रह्मणश्च विशेष्यत्वे चिदचिद्ब्रह्मेतरतत्त्वानङ्गीकारात् । व्यावर्त्याभावेन व्यावर्तकत्वं विशेषणत्वमिति विशेषणलक्षणसमन्वयाभावात् ।

नापि विशेष्यरञ्जकविशेषज्ञानहेतुत्वं विशेषणत्वम् । यथा "स्वरूपसत्त्वमात्रेण नहि किंचिद्विशेषणं स्वबुद्ध्या रज्यते", "येन विशेष्यं तद्विशेषण"मिति वचनात् । "अतसीपुष्पसंकाशो गोविन्द" इत्यत्रातसीपुष्पसादृश्यविशेषणजन्यज्ञानेन गोविन्दपदार्थो रज्यते, ध्यातृबुद्धावुपस्थाप्यते । तथा चेतनाचेतनयोरेकतरज्ञाने तदुभयज्ञाने वा विशेष्यभूतस्य ब्रह्मणो रञ्जकत्वाभावादुपस्थापकत्वासंभव एव । अन्यथाहमर्थतया ज्ञातजीवस्य देहादिरूपेण ज्ञाताचेतनस्य च पुंसो ब्रह्मज्ञानोपस्थितिप्रसङ्गात् ।

ननु स्वाभाविकभेदाभेदपक्षेऽपि दोषबाहुल्यादसंभव एव । तथाहि, ईश्वरः स्वरूपेणैव देवासुरनरतिर्यगादिभेदेनावस्थित इति । तदात्मकत्ववर्णनात् । तथा च सत्येकमृत्पिण्डारब्धघटशरावादिगतान्युदकाहरणादिसर्वकार्याणि, तथा तस्यैव भवन्ति । एवं सर्वजीवगतसुखदुःखादिकं सर्वमीश्वरगतमेव स्यात् । घटशरावादिसंस्थानानुपयुक्तं मृद्द्रव्यं, यथा कार्यान्तरानन्वितम् । एवं सुरासुरमनुजादिजीवानुपयुक्तेश्वरांशः सार्वज्ञ्यादिगुणाकरः ।

न च स एवेश्वर एकांशेन कल्याणगुणाकरः, स एवान्यांशेन हेयगुणाकर इति युक्तम् । द्वयोरंशयोरीश्वरत्वाविशेषात् कस्तेन लाभः । एकस्यैवैकांशेन नित्यदुःखित्वमंशान्तरेण सुखित्वम् ।

किंच, अंशान्तरेण सुखित्वमपि नेश्वरत्वाय कल्पते । यथा देवदत्तस्यैकस्मिन् हस्ते चन्दनागुरुलेपकेयूराद्यलंकार एकस्मिन् हस्ते मुद्गरादिपातो ज्वालाप्रवेशश्च, तद्वदीश्वरस्यैव स्यादिति ब्रह्माज्ञानवादादपि महत् पापीयानयं पक्षः । अपरिमितदुःखस्य पारमार्थिकत्वाभ्युपगमात् संसारिणां मन्वन्तरत्वेन दुस्तरत्वादिति चेन्न । उक्तशङ्काया महद्भ्रान्तिकल्पितत्वात् । अस्माभिः स्वरूपभेदस्य स्वाभाविकत्वाभ्युपगमान्नोक्तदोषसंपृक्तवातलेशस्पर्शावकाशः । श्रुत्यादिषु स्वाभाविकभेदाभेदपक्षस्यैव राद्धान्तत्वात् ।

यदि जीवपरयोः स्वरूपेणाभेदोऽङ्गीकृतः स्यात्, तर्हि भवदुक्तदोषकल्पनावकाशः । स तु नास्त्येवेत्यर्थः ।

न चैवं परपक्षप्रवेशः । उत्तरभाविनामेव पूर्वपक्षसिद्धसिद्धान्तोपजीवित्वनियमात् । युष्मत्पक्षस्यैवास्मत्पक्षानुगामित्वसिद्धिरित्यर्थः ।

किंच, अहो मनीषापूर्वपक्षारोपकाणां; स्वप्रयुक्तवज्रस्य स्वसिद्धान्तपर्वते पातो नालोचितः श्रीमद्भिः । सार्वज्ञ्यादिगुणाब्धि भगवति परब्रह्मणि श्रीपुरुषोत्तमे चेतनाचेतनयोः पापादिजाड्यादिसंयुक्तयोर्वैशिष्ट्याङ्गीकारात् ।

तथाहि, सार्वज्ञ्यादिविशिष्टस्य ब्रह्मणश्चेतनाचेतनविशेषणे अभिप्रेते, केवलस्य वा ।

नान्त्यः । निर्विशेषत्वानभ्युपगमात् । इतरथा सार्वज्ञ्यादीनामव्याप्यवृत्तित्वप्रसङ्गात् । मायावादप्रवेशाच्च ।

किंच, सार्वज्ञ्यादिविशिष्टस्य चेतनाचेतनविशिष्टस्य चेतरेतरभिन्नत्वे विशिष्टद्वयसिद्धौ विशिष्टाद्वैतभङ्गात्। चेतनादिविशिष्टप्रवेशस्य सार्वज्ञ्यादिहीनत्वापत्त्या नियन्तृत्वभङ्गाच्च। तथात्वे च त्वत्सिद्धान्त एव त्वदुक्तिवज्रनिपातः।

तथाहि, यथा कस्यचिन्मानवस्य देहैकदेशे चन्दनागुरुलेपादि देशान्तरे तारकर्दमादिलेपनं, परिहासार्थं बालैर्लीलया क्रियते। तथा प्रकृतेऽपि परमेश्वरस्यैकदेशे मङ्गलगुणगणादिविविधभूषणयोगो, देशान्तरे सर्वदोषसंपन्नजीवादियोगः।

तस्मान्महाबीभत्सितोऽयं भवतां सिद्धान्तः।

नाप्याद्यः। विशिष्टवैशिष्ट्यापत्त्या विशिष्टाद्वैतसिद्धान्तभङ्गात्।

किंच, सार्वज्ञ्यादिसमस्तकल्याणगुणाढ्यस्यैव यदि चेतनादिवैशिष्ट्याभ्युपगमोऽभिप्रेतस्तर्हि सर्ववस्त्रभूषणायुधादिदिव्यालंकारसंपन्नस्य पुंसोऽतिजीर्णबीभत्सितनीलवस्त्रायोभूषणादिवेष्टनवत् सर्वदिव्यगुणगणाद्यलंकृतस्य भगवतः परब्रह्मण उपर्यपरिमितदुःखाद्यवच्छिन्नजीववैशिष्ट्यमभ्युपगतं स्यात्।

तस्मान्मायावादादपि महद् दुष्टोऽयं पक्षः। तत्पक्षे सार्वज्ञ्यादिविशिष्टस्य भिन्नत्वाङ्गीकारात्। भवन्मते तूत्तमगुणभूषणस्यैव पापावच्छिन्नजीववैशिष्ट्याङ्गीकारात्।

किंच,तन्मते कल्पितत्वाङ्गीकारेण कदाचिन्निवृत्तिसंभावनापि भवति। भवन्मते तु कदाचिदपि कथमपि निवृत्तिमनोरथस्याप्यसंभवः। यावदात्मवृत्तित्वाङ्गीकारात्।

तस्मान्महत् पापीयानयं पक्षः श्रेयोऽर्थिभिरुपेक्षणीयः।

अपिच, ब्रह्मणो विशिष्टाद्वैतत्वाङ्गीकारेऽपि तस्य चेतनाचेतनाभ्यां स्वभावतो भेदः। तयोश्च परस्परं भेदः स्वाभाविक एवाभ्युपगम्यते भवद्भिः। अन्यथा स्वभावसांकर्यप्रसङ्गात्।

एवं च भेदस्याभेदस्य च स्वाभाविकत्वमङ्गीकृत्य पुनर्विशिष्टवैशिष्ट्याङ्गीकारे गौरवमात्रत्वाद्वरीयस्त्वं स्वाभाविकभेदाभेदपक्षस्यैव। लाघवादिति संक्षेपः॥ ४६॥

ननु ब्रह्मात्मकत्वेन ब्रह्मांशत्वेन ज्ञानस्वरूपत्वेन च सर्वेषां समानत्वे केषांचिद्वेदाध्ययनतदर्थानुष्ठानाद्यनुज्ञा, केषांचित् तत्परिहारः, केषांचिद्दर्शनस्पर्शनाद्यनुज्ञा, केषांचित् तत्परिहारश्च, शास्त्रेषु कथमुपपद्यत इत्याशङ्क्याह॥

॥ अनुज्ञापरिहारौ देहसंबन्धाज्ज्योतिरादिवत्॥ ४७॥

सर्वेषां ब्रह्मांशत्वज्ञानस्वरूपत्वादिनैकरूपवत्वे सत्यपि ब्राह्मणक्षत्रियवैश्यशूद्रादिरूपशुच्यशुचिदेहसंबन्धनिबन्धनावनुज्ञापरिहारावुपपद्येते। ज्योतिरादिवत्। यथाग्नेरग्नित्वेनैकरूपत्वेऽपि श्रोत्रियागारादग्निराह्रियते, श्मशानादेस्तु परिह्रियते, यथाचादि श्रोत्रियादेरनुज्ञायते, अन्त्यजादेस्तु परिह्रियते, यथा वा मूत्रपुरीषादि गवां पवित्रतयानुज्ञायते,तदेव जात्यन्तरात् परिवर्ज्यते, तद्वत्॥ ४७॥

ननु सर्वेषामेकरूपत्वे देहसंबन्धादनुज्ञापरिहारौ चेदेकेनाश्वमेधे कृते सर्वैः कृतं स्यात्, एकेन सुरापाने कृते सर्वैः कृतमिति कथं नोच्यते। आत्मनो वास्तवैकत्वादित्याशङ्क्याह॥

॥ असंततेश्चाव्यतिकरः॥ ४८॥

ब्रह्मांशत्वेनैकरूपत्वे सत्यपि न व्यतिकरः। कुतः। असंततेः। अव्याप्तेः। सर्वजीवात्मनामणुपरिमाणकत्वात्, प्रतिशरीरं स्वरूपेणैव भिन्नत्वाच्च, न कर्मसंकरः, फलभोगसांकर्यं वा। कर्तुर्भोक्तुः स्वेस्वे शरीरे स्वरूपेणैव वैलक्षण्यादित्यर्थः। अविद्याकल्पितजीववादे सत्योपाध्यवच्छिन्नब्रह्मजीववादे वा जीवब्रह्मणोः परस्परं जीवानां च कर्मतत्फलभोगव्यतिकरादयः सर्वे दोषाः सन्ति नास्मन्मत इति यावत्॥ ४८॥

नन्वविद्याकृतजीवपक्षेऽप्युपाधितन्त्रो हि जीव उपाध्यसंतानाच्च नास्ति। जीवसंतानतश्च कर्मतत्फलभोगस्य व्यतिकरादयो दोषा न सन्तीत्यत आह॥

॥ आभास एव च॥ ४९॥

अखण्डस्वप्रकाशचिन्मात्रशुद्धस्य स्वरूपप्रकाशचिन्मात्रशुद्धस्य स्वरूपतिरोधानपूर्वकोपाधिभेदोपपादनरूपो हेतुराभास एव। प्रकाशतिरोधानं प्रकाशनाश एवेति धर्मान्तरानङ्गीकारात्।

आभासा इति पाठे हेतव इति बहुवचनं ज्ञेयम्। चकारः श्रुत्यादिप्रमाणाभावं समुच्चिनोति। सजातीयविजातीयस्वगतभेदशून्यतत्त्ववादिनां मते ब्रह्मण्युपाधिकल्पने युक्तय आभासा एव। शास्त्रप्रमाणाभावश्चेति यावत्। चकारात् "पृथगात्मानं प्रेरितारं च मत्वा," "ज्ञाज्ञौ", "तयोरन्यः पिप्पलं स्वाद्वत्ती"त्यादिश्रुतिविरोधश्चेति। अविद्यापरिकल्पितोपाधिभेदेऽपि सर्वोपाधिभिरुपहितस्वरूपस्यैवाभ्युपगमाद्भोगव्यतिकरस्तदवस्थ एव।

किंच, अपरे त्वाभास एवेत्येकवचनान्तं सूत्रं पठित्वान्यमर्थं वर्णयन्ति। परमात्माभासो जीवः प्रतिबिम्बात्मा संसारार्थमविद्याकल्पितः। तस्य परिमितत्वादसंततेरव्यतिकर इति। तदयुक्तम्। आभासस्यावस्तुत्वाभ्युपगमात्। अवस्तुनः शशविषाणकल्पस्याचेतनस्य कुतो बन्धमोक्षौ वा,कर्माधिकारो वा। न च परमात्मनः संसारित्वमस्तीत्यादिनान्यैरपि निरस्तत्वात्॥ ४९॥

ननु पारमार्थिकोपाध्यवच्छिन्नब्रह्मजीववादेऽनाद्यदृष्टप्रवाहेणोपाधिप्रवाहस्यानादित्वात् संबन्धिनि जीवे दोषा, न ते ब्रह्मणि प्रसज्यन्त इत्यत आह॥

॥ अदृष्टानियमात् ॥ ५० ॥

अदृष्टेरपि नियमो न संभवति। अदृष्टेस्तत्कृतोपाधिभिश्च ब्रह्मच्छेदनासंभवात् तत्कृता दोषा ब्रह्मण्येव स्युः ॥ ५० ॥

॥ अभिसंध्यादिष्वपि चैवम् ॥ ५१ ॥

अदृष्टहेतुभूताभिसंध्यादिषु संकल्पादिष्वपि चैवं नियमासंभवः। उपाधिब्रह्मव्यतिरिक्तवस्त्वन्तराभावात्। पूर्वपूर्वोपाधिसंयुक्तं ब्रह्मैव। संकल्पादयस्तद्गता एवेति न कश्चिद्विशेषः। आदिना श्रद्धादिपरिग्रहः ॥ ५१ ॥

॥ प्रदेशादिति चेन्नान्तर्भावात् ॥ ५२ ॥

ननूपाधिसंबन्धिब्रह्मप्रदेशादनुपहितब्रह्मप्रदेशो भिद्यते। अतो व्यवस्थोपपद्यत इति चेन्न। उपाधीनां तत्र तत्र गमनात् सर्वप्रदेशानां सर्वोपाध्यन्तर्भावाद्रागादिव्यतिकरस्तदवस्थ एव। प्रदेशभेदेन संबन्धेऽपि सर्वस्य ब्रह्मप्रदेशत्वात् प्रदेशसंबन्धिदुःखं ब्रह्मण्येव स्यात् ॥ ५२ ॥

इति श्रीसनकसंप्रदायप्रवर्तकाद्याचार्यश्रीनिम्बार्कमतानुयायिश्रीमन्मुकुन्दचरणपद्ममकरन्दभृङ्गेण श्रीमत्केशवकाश्मीरिभट्टेन संगृहीतायां वेदान्तकौस्तुभप्रभाख्यायां ब्रह्मसूत्रवृत्तौ द्वितीयाध्यायस्य तृतीयपादविवरणम् ॥ २ ॥ ३ ॥ :: ::

॥ अथ वेदान्तकौस्तुभप्रभायाः ॥

॥ द्वितीयाध्यायस्य ॥

॥ चतुर्थपादारम्भः ॥

अथेन्द्रियाणां सृष्टिप्रतिपत्तिं परिहरति। तत्र "एतस्मादात्मन आकाशः संभूतः", "तत् तेजोऽसृजत" इत्यादिसृष्टिप्रकरणे प्राणोत्पत्त्यश्रवणात्। "असद्वा इदमग्र आसीत्, "तदाहुः, किं तदसदासी"दिति, "ऋषयो वाव तेऽग्रेऽसदासीत्", "तदाहुः, के ते ऋषय" इति, "प्राणा वाव ऋषय" इति, अत्र प्रागुत्पत्तेः प्राणानां सत्त्वश्रवणाच्च। "यथाग्नेः क्षुद्रा विस्फुलिङ्गा व्युच्चरन्त्येवमेवास्मादात्मनः सर्वे प्राणा" इति, "एतस्माज्जायते प्राणो मनः सर्वेन्द्रियाणि च"ेति, "सप्त प्राणाः प्रभवन्ति तस्मा"दिति, "स प्राणमसृजत", तत्प्राणाच्छ्रद्धा"मित्यादिषूत्पत्तिश्रवणाच्च, किं प्राणा जायन्ते, न वेति संशये, किं तावत् प्राप्तम्। न जायन्त इति। कुतः। "असद्वा इद"मिति सर्वाभावकथनपूर्वकतत्सद्भावश्रवणात्। अत्र राद्धान्तः ॥

॥ तथा प्राणाः ॥ १ ॥

यथाकाशादिभूतानामुत्पत्तिस्तथा प्राणपदाभिधेयेन्द्रियाणामुत्पत्तिर्बोध्या। उक्तश्रुतिभिः "स प्राणमसृजत", "प्राणाच्छ्रद्धात्, खं वायुर्ज्योतिरापः पृथिवीन्द्रियं मनोऽन्न"मित्युत्पत्तिश्रुतीनां बाहुल्यात् ॥ १ ॥

ननु सद्भावश्रवणविरोधादुत्पत्तिर्गौणीति चेदत्राह ॥

॥ गौण्यसंभवात् ॥ २ ॥

गौण्या असंभवोऽन्यसंभवः, तस्मात्। प्राणोत्पत्तिश्रुतेर्गौणत्वं न संभवति। प्रतिज्ञाविरोधात्। "कस्मिन्नु भगवो विज्ञाते सर्वमिदं विज्ञातं भवती"ति, एकविज्ञानेन सर्वे विज्ञानं प्रतिज्ञाय तत्सिद्ध्य इदमुच्यते। "एतस्माज्जायते प्राण" इत्यादि। सा च प्रतिज्ञा प्राणादेः सर्वविकारजातस्य तदुपादेयत्वाङ्गीकार एव सिध्यति, नान्यथा। उपादानापृथक्सिद्धत्वादुपादेयस्येत्यर्थः। तथा "आत्मनो वा अरे दर्शनेन श्रवणेन मत्या विज्ञानेनेदं सर्वं विदित"मित्याद्यन्यत्रापि श्रवणात् ॥ २ ॥

॥ तत्प्राक्श्रुतेश्च ॥

श्रुतस्य "जायत"इति पदस्याकाशादिषु मुख्यस्य प्रागपि प्राणादिषु श्रवणादाकाशादिवत् प्राणानां मुख्यैव जन्मश्रुतिः। "एतस्माज्जायते प्राण" इति सकृदुच्चरितो बहुभिः संबध्यमानो "जायत" इति शब्दः क्वचिन्मुख्यः क्वचिद्गौण इति निर्णेतुमशक्यत्वात्। वैरूप्यप्रसङ्गात्। यथा "स प्राणमसृजत", "प्राणाच्छ्रद्धा"मित्यादावपि प्राणे श्रुतः सृजतिः परेष्वपि श्रद्धादिष्वनुषज्यते। तथा "आत्मनो व्युच्चरन्ति", इत्यादावप्येष न्यायो बोध्यः ॥ ३ ॥

॥ तत्पूर्वकत्वाद्वाचः ॥ ४ ॥

यद्यपि सृष्टिप्रकरणे तेजोऽबन्नानां त्रयाणामेवोत्पत्तिः श्रूयते, तथापि वाक्प्राणमनसां ब्रह्मप्रकृतिकतेजोऽबन्नपूर्वकत्वाभिधानात्, "अन्नमयं हि सोम्य मनः", "आपोमयः प्राणः" "तेजोमयी वा"गित्यत्र भूताव्यापकत्वादपि मुख्यमेव जन्मेति निश्चीयते। न हि स्वतः सिद्धं वस्तु परानुग्राहकत्वमपेक्षत इति भावः।

तस्माद्रागादीनां भूतानुग्राह्यत्वं वदन्ती श्रुतिस्तत्स्वभावमनुवदतीति तात्पर्यार्थः ॥ ४ ॥

॥ शेषमुत्तराङ्के ॥

PRINTED AND PUBLISHED BY THE PROPRIETORS, E. J. LAZARUS AND CO., AT THE MEDICAL HALL PRESS BENARES.

काशीविद्यासुधानिधिः

श्रीगणेशाय नमः

श्रीमद्विजयिनीदेवीपाठशालोदयोदितः । प्राच्यप्रतीच्यवाक्पूर्वापरपक्षद्वयान्वितः ॥ १ ॥
अङ्कुरश्मिः स्फुटयतु काशीविद्यासुधानिधिः । प्राचीनार्यजनप्रज्ञाविलासकुमुदोत्करान् ॥ २ ॥

THE PANDIT.

A Monthly Journal, of the Benares College, devoted to Sanskrit Literature.

No. 95. Benares, April 1st, 1874. Vol. VIII.

काशिकायाः

प्रथमाध्यायस्य प्रथमः पादः

स्थानिवदादेशोऽनल्विधौ ॥ ५६ ॥

स्थान्यादेशयोः पृथक्त्वात् स्थान्याश्रयं कार्यमादेशे न प्राप्नोतीत्ययमतिदेश आरभ्यते । स्थानिना तुल्यं वर्त्ततइति स्थानिवत् । स्थानिवदादेशो भवति स्थान्याश्रयेषु कार्येष्वनलाश्रयेषु स्थान्यलाश्रयाणि कार्याणि वर्ज्जयित्वा । अनल्विधिरनेकाल्विधिरित्यर्थः । किमुदाहरणम् । धात्वङ्गकृत्तद्धिताव्ययसुप्तिङ्पदादेशाः । धात्वादेशो धातुवद्भवति । अस्तेर्भूः । ब्रुवो वचिः । आर्धधातुकविषये प्रागेवादेशेषु कृतेषु धातोरिति तव्यादयो भवन्ति । भविता । भवितुम् । भवितव्यम् । वक्ता । वक्तुम् । वक्तव्यम् । अङ्गादेशो ऽङ्गवद्भवति । केन । काभ्याम् । कैः । किमः कादेशे कृते ऽङ्गाश्रया इनदीर्घत्वैस्भावा भवन्ति । कृदादेशः कृद्वद्भवति । प्रकृत्य । प्रहृत्य । ल्यबादेशे कृते ह्रस्वस्य पिति कृति तुगिति तुग्भवति । तद्धितादेशस्तद्धितवद्भवति । दाधिकम् । अद्यतनम् । कृत्तद्धितसमासाश्चेति प्रातिपदिकसंज्ञा भवति । अव्ययादेशो ऽव्ययवद्भवति । प्रस्तुत्य । प्रहृत्य । उपस्तुत्य । अव्ययादिति सुब्लुग् भवति । सुबादेशः सुब्वद्भवति । वृक्षाय । प्लक्षाय । सुपि चेति दीर्घत्वं भवति । तिङादेशस्तिङ्वद्भवति । अकुरुतम् । अकुरुत । सुप्तिङन्तं पदमिति पदसंज्ञा भवति । पदादेशः पदवद्भवति । ग्रामो वः स्वम् । जनपदो नः स्वम् । पदस्येति रुत्वं भवति । वत्करणं किम् । स्थानी आदेशस्य संज्ञा मा विज्ञायीति स्वाश्रयमपि यथा स्यात् । आङो यमहनः । आहत । आवधिष्टेत्यात्मनेपदमुभयत्रापि भवति । आदेशग्रहणं किम् । आनुमानिकस्याप्यादेशस्य स्थानिवद्भावो यथा स्यात् । पचतु । एरुः । अनल्विधाविति किम् । द्युपथितदादेशा न स्थानिवद्भवन्ति । द्यौः । पन्थाः । स इति हल्ङ्याब्भ्य इति सुलोपो न भवति ॥

अचः परस्मिन्पूर्वविधौ ॥ ५७ ॥

पूर्वेणानल्विधौ स्थानिवद्भाव उक्तः । अल्विध्यर्थमिदमारभ्यते । आदेशः स्थानिवदिति वर्त्तते । अच इति स्थानिनिर्देशः । परस्मिन्निति निमित्तसप्तमी । पूर्वविधाविति विषयसप्तमी । अजादेशः परनिमित्तकः पूर्वविधौ कर्त्तव्ये स्थानिवद्भवति । पटयति । अवधीत् । बहुखट्वकः । पटुमाचष्टइति णिचि टिलोपे कृते तस्य स्थानिवद्भावादत उपधाया इति वृद्धिर्न भवति । अवधीत् । अतो लोपस्य स्थानिवद्भावादतो हलादेर्लघोरिति हलन्तलक्षणा वृद्धिर्न भवति । बहुखट्वक इति आपोऽन्यतरस्यामिति ह्रस्वस्य स्थानिवद्भावाद् ह्रस्वान्त ऽन्त्यात्पूर्वमिति स्वरो न भवति । अच इति किम् । प्रश्नः । आक्राष्टाम् । आगत्य । प्रश्न इति प्रच्छेर्नङ्प्रत्यये छ्वोः शूडनुनासिके चेति छकारस्य शकारः परनिमित्तकस्तुकि कर्त्तव्ये न स्थानिवद्भवति । आक्राष्टामिति झलो झलीति सिचो लोपः परनिमित्तकः षढोः कः सि इति ककारे कर्त्तव्ये न स्थानिवद्भवति । आगत्येति वा ल्यपीति अनुनासिकलोपः परनिमित्तकस्तुकि कर्त्तव्ये न स्थानिवद्भवति । परस्मिन्निति किम् । युवजानिः । वधूटीजानिः । वैयाघ्रपद्यः । आदीध्ये । युवजानिरिति जायाया निङ् न प-

रनिमित्तकस्तेन यलोपे न स्थानिवद्भवति । वैयाघ्रपद्य इति न परनिमित्तकः पादस्यान्तलोपः पद्भावं न प्रतिबध्नाति । आदीध्ये इति दीधीङ उत्तमपुरुषैकवचने टेरेत्वस्यापरनिमित्तकत्वाद् यीवर्णयोर्दीधीवेव्योरिति लोपो न भवति । पूर्वविधाविति किम् । हे गौः । बाभ्रवीयाः । नैधेयः । हे गौरिति वृद्धिरजादेशः संबुद्धिलोपे कर्त्तव्ये न स्थानिवद्भवति । बाभ्रवीया इति बाभ्रव्यस्यामीच्छात्रा इति वृद्धाच्छ इति छः हलस्तद्धितस्येति यकारलोपे कर्त्तव्ये ऽवादेशो न स्थानिवद्भवति । नैधेयः । आतो लोप इटि चेत्याकारलोप इतश्चानिञ इति ढक्लक्षणे प्रत्ययविधौ न स्थानिवद्भवति ॥

न पदान्तद्विर्वचनवरेयलोपस्वरसवर्णानुस्वारदीर्घजश्चर्विधिषु ॥ ५८ ॥

पूर्वेणातिप्रसक्तः स्थानिवद्भाव एतेषु विधिषु प्रतिषिध्यते । पदान्तविधिं प्रत्यजादेशो न स्थानिवद्भवति । कौ स्तः । यौ स्तः । तानि सन्ति । यानि सन्ति । श्नसोरल्लोपः क्ङिति सार्वधातुक इति परनिमित्तकः स पूर्वविधावावादेशे यणादेशे च कर्त्तव्ये स्थानिवत्स्यात्, अस्माद्वचनाच्च भवति । द्विर्वचनविधिं प्रति न स्थानिवद्भवति । दद्ध्यत्र । मद्ध्वत्र । यणादेशः परनिमित्तकस्तस्य स्थानिवद्भावादनचि चेति धकारस्य द्विर्वचनं न स्यादस्माद्वचनाद्भवति । वरे योऽजादेशः स पूर्वविधिं प्रति न स्थानिवद्भवति । अप्सु यायावरः प्रवपेत पिण्डान् । यातेर्यङन्ताद्यश्च यङ इति वरचि कृते ऽतो लोपः परनिमित्तकस्तस्य स्थानिवत्त्वादातो लोप इटि चेत्याकारलोपः स्यादस्माद्वचनान्न भवति । यलोप । यलोपविधिं प्रत्यजादेशो न स्थानिवद्भवति । कण्डूतिः । कण्डूयतेः क्तिचि कृते ऽतोलोपः परनिमित्तको लोपो व्योर्वलीति यलोपे स्थानिवत्स्यादस्माद्वचनान्न भवति । स्वर । स्वरविधिं प्रति अजादेशो न स्थानिवद्भवति । चिकीर्षकः । जिहीर्षकः । ण्वुलि कृते ऽतो लोपः परनिमित्तको लिति प्रत्ययात्पूर्वमुदात्तमिति स्वरे कर्त्तव्ये न स्थानिवद्भवतीति । सवर्ण । सवर्णविधिं प्रति अजादेशो न स्थानिवद्भवति । शिण्ढि । पिण्ढि । शिषेः पिषेश्च लोण्मध्यमपुरुषैकवचने रुधादिभ्यः श्नम् हित्वधित्वष्टुत्वजश्त्वेषु कृतेषु श्नसोरल्लोपः क्ङिति सार्वधातुके परनिमित्तको ऽनुस्वारस्य ययि परसवर्णे कर्त्तव्ये न स्थानिवद्भवति । अनुस्वार । अनुस्वारविधिं प्रत्यजादेशो न स्थानिवद्भवति । शिंषन्ति । पिंषन्ति । नश्चापदान्तस्य झलीति अनुस्वारे कर्त्तव्ये श्नसोरल्लोपो न स्थानिवद्भवति । दीर्घ । दीर्घविधिं प्रति अजादेशो न स्थानिवद्भवति । प्रतिदीव्ना । प्रतिदीव्ने । प्रतिदिवन्नित्येतस्य भस्येत्यधिकृत्य तृतीयैकवचने चतुर्थ्येकवचने च अल्लोपो ऽन इति अकारलोपः परनिमित्तकस्तस्य स्थानिवद्भावाद्धलि चेति दीर्घत्वं न स्यात्, नह्ययं वकारो हल्पर इति अस्माद्वचनाद्भवति । जश् । जश्विधिं प्रत्यजादेशो न स्थानिवद्भवति । सग्धिश्च मे सपीतिश्च मे । बब्धान्ते हरी धानाः । अदेः क्तिनि बहुलं छन्दसीति घस्लादेशः, घसिभसोर्हलि चेति उपधालोपः, झलो झलीति सकारलोपः, झषस्तथोर्धोऽध इति धत्वम्, उपधालोपस्य स्थानिवत्त्वात् झलां जश् झशीति धकारस्य जश्त्वं न स्यादस्माद्वचनाद्भवति । समाना ग्धिः, समानस्य सभावः । सग्धिः । बब्धामिति । भसेर्लोड्द्विवचने शपः श्लुः, द्विर्वचन,मभ्यासकार्यं, घसिभसोर्हलि चेति उपधालोपः, झलो झलीति सकारलोपः, झषस्तथोर्धोऽध इति धत्वम्, उपधालोपस्य स्थानिवत्त्वात् झलां जश् झशीति जश्त्वं न स्यादस्माद्वचनाद्भवति । चर् । चर्विधिं प्रत्यजादेशो न स्थानिवद्भवति । जक्षतुः । जक्षुः । अक्षन्नमीमदन्त पितरः । लिड्द्विवचनबहुवचनयोरदेर्घस्लादेशः, गमहनजनखनघसामित्युपधालोपः, द्विर्वचन,मभ्यासकार्यं, तत्रोपधालोपस्य स्थानिवत्त्वात् खरि चेति घकारस्य चर्त्वं न स्यादस्माद्वचनाद्भवति । शासिवसिघसीनां चेति षत्वम् । अक्षन्नित्यदेर्लुङ्बहुवचने घस्लादेशश्च्लेरागतस्य मन्त्रे घसह्वरेति लुक्, गमहनजनखनघसामित्युपधालोपः, तस्य स्थानिवत्त्वात् खरि चेति चर्त्वं न स्यादस्माद्वचनाद्भवति । स्वरदीर्घयलोपेषु लोपाजादेशो न स्थानिवद्भवति । अन्यत्र तु स्थानिवदेव । तेन बहुखट्वकः । किर्योः । गिर्योः । वाय्वोरिति स्थानिवत्त्वात् स्वरदीर्घयलोपा न भवन्ति ॥

द्विर्वचनेचि ॥ ५९ ॥

द्विर्वचननिमित्ते ऽचि अजादेशः स्थानिवद्भवति द्विर्वचनएव कर्त्तव्ये । रूपातिदेशश्चायं नियतकालस्तेन कृते द्विर्वचने पुनरादेशरूपमेवावतिष्ठते । आल्लोपोपधालोपणिलोपयणयवायावादेशाः प्रयोजनम् । आल्लोपः । पपतुः । पपुः । आतो लोप इटि चेत्याकारलोपे कृते तस्य स्थानिवद्भावादेकाच इति द्विर्वचनं भवति । उपधालोप । जघ्नतुः । जघ्नुः । गमहनजनखनघसामित्युपधालोपे कृते ऽनच्कत्वाद् द्विर्वचनं न स्यात्, अस्माद्वचनाद्भवति । णिलोपः । आटिटत् । अटतेर्णिचि लुङि चङि णिलोपे कृते तस्य स्थानिवत्त्वादजादेर्द्वितीयस्येति टिशब्दस्य द्विर्वचनं भवति । यण् । चक्रतुः । चक्रुः । करोतेरतुसि उसि च यणादेशे कृते ऽनच्कत्वाद् द्विर्वचनं न स्यात् स्थानिवत्त्वाद्भवति । अयवायावादेशाः । निनय । निनाय । लुलव । लुलाव । नयतेर्लुनातेश्चोत्तमे णलि गुणे कृते वृद्धौ चायवायावादेशास्तेषां स्थानिवत्त्वान्नेलोनैलाविति द्विर्वचनं भवति । द्विर्वचनइति किम् । जग्ले । मम्ले । अवयामा-

कारस्य न भवति । द्विर्वचननिमित्तइति किम् । दुद्यूषति । ऊठि यणादेशो न स्थानिवद्भवति । अचीति किम् । जेघ्रीयते । देध्मीयते । ईघ्राध्मोर्यङि चेति ईकारादेशस्तस्य स्थानिवद्भावादाकारस्य द्विर्वचनं स्यात् । अज्ग्रहणाच्च भवति ॥

अदर्शनं लोपः ॥ ६० ॥

अदर्शनमश्रवणमनुच्चारणमनुपलब्धिरभावो वर्णविनाश इत्यनर्थान्तरमेतैः शब्दैर्योऽर्थोऽभिधीयते तस्य लोप इतीयं संज्ञा भवति । अर्थस्येयं संज्ञा न शब्दस्य । प्रसक्तस्यादर्शनं लोपसंज्ञं भवति । गोधाया ढ्रक् । गौधेरः । पचेरन् । जीवे रदानुक् । जीरदानुः । स्रिवेर्मनिन् । आस्रेमाणम् । यकारवकारयोरदर्शनमिहोदाहरणम् । अपरस्यानुबन्धादेः प्रसक्तस्य । लोपप्रदेशाः लोपो व्योर्वलीत्येवमादयः ॥

प्रत्ययस्य लुक्श्लुलुपः ॥ ६१ ॥

अदर्शनमिति वर्त्तते । प्रत्ययादर्शनस्य लुक् श्लु लुप् इत्येताः संज्ञा भवन्ति । अनेकसंज्ञाविधानाच्च तद्भावितग्रहणमिह विज्ञायते । लुक्संज्ञाभावितं प्रत्ययादर्शनं लुक्संज्ञं भवति । श्लुसंज्ञाभावितं श्लुसंज्ञं भवति । लुप्संज्ञाभावितं लुप्संज्ञं भवति । तेन संज्ञानां संकरो न भवति । विधिप्रदेशेषु च भाविनी संज्ञा विज्ञायते । अत्ति । जुहोति । वरणाः । प्रत्ययग्रहणं किम् । अगस्तयः । कुण्डिनाः । लुक्श्लुलुप्प्रदेशाः लुक्तद्धितलुकि, जुहोत्यादिभ्यः श्लुः, जनपदे लुबित्येवमादयः ॥

प्रत्ययलोपे प्रत्ययलक्षणम् ॥ ६२ ॥

प्रत्ययनिमित्तं कार्यमसत्यपि प्रत्यये कथं तु नाम स्यादिति सूत्रमिदमारभ्यते । प्रत्ययलोपे कृते प्रत्ययलक्षणं प्रत्ययहेतुकं कार्यं भवति । अग्निचित्, सोमसुत्, अधोगित्यत्र सुप्तिङोर्लुप्तयोः सुप्तिङन्तं पदमिति पदसंज्ञा भवति । अधोगिति दुहेर्लङि तिपि शब्लुकि तिलोपे घत्वभष्भावजशत्वचर्त्वेषु कृतेषु रूपम् । प्रत्ययइति वर्त्तमाने पुनः प्रत्ययग्रहणं किम् । कृत्स्नप्रत्ययलोपे यथा स्यात् । इह मा भूत् । आघ्नीय । सङ्ग्मीय । हनिगम्योर्लिङात्मनेपदे लिङः स लोपोनन्त्यस्येति सीयुट्सकारलोपः प्रत्ययैकदेशलोपस्तत्र प्रत्ययलक्षणेन झलीत्यनुनासिकलोपो न भवति । प्रत्ययलक्षणमिति किम् । रायः कुलं रैकुलम् । गवे हितं गोहितम् । आयवादेशौ न भवतो वर्णाश्रयत्वात् ॥

न लुमताङ्गस्य ॥ ६३ ॥

पूर्वेणातिप्रसक्तं प्रत्ययलक्षणमिति विशेषे प्रतिषेध उच्यते । लुमता शब्देन लुप्ते प्रत्यये यदङ्गं तस्य प्रत्ययलक्षणं कार्यं न भवति । गर्गाः । मृष्टः । जुहुतः । शब्यज्ञो * लुमता लुप्तयोरङ्गस्य गुणवृद्धी न भवतः । लुमतेति किम् । कार्यते । अङ्गस्येति किम् । पञ्च । सप्त । पयः । साम ॥

अचोन्त्यादि टि ॥ ६४ ॥

अच इति निर्द्धारणे षष्ठी । जातावेकवचनम् । अचां संनिविष्टानां योन्त्योच् तदादि शब्दरूपं टिसंज्ञं भवति । अग्निचित् । इच्छब्दः । सोमसुत् । उच्छब्दः । आताम् । आथाम् । आम्शब्दः । पचेते । पचेथे । टिप्रदेशाः । टित आत्मनेपदानां टेरेइत्येवमादयः ॥

अलोन्त्यात्पूर्व उपधा ॥ ६५ ॥

धात्वादौ वर्णसमुदाये ऽन्त्यादलः पूर्वो यो वर्णः सोलेोपधासंज्ञो भवति । पच् । पठ् । अकारः । भिद् । छिद् । इकारः । बुध् । युध् । उकारः । वृत् । वृध् । ऋकारः । अल इति किम् । शिष्टः । शिष्टवान् । समुदायात्पूर्वस्य मा भूत् । उपधाप्रदेशाः । अत उपधाया इत्येवमादयः ॥

तस्मिन्निति निर्दिष्टे पूर्वस्य ॥ ६६ ॥

तस्मिन्निति सप्तम्यर्थनिर्देशे पूर्वस्यैव कार्यं भवति नोत्तरस्य । इको यणचि । दध्युदकम् । मध्विदम् । पचत्योदनम् । निर्द्दिष्टग्रहणमानन्तर्यार्थम् । अग्निचिदत्रेति व्यवहितस्य मा भूत् ॥

तस्मादित्युत्तरस्य ॥ ६७ ॥

निर्दिष्टग्रहणमनुवर्त्तते । तस्मादिति पञ्चम्यर्थनिर्देशउत्तरस्यैव कार्यं भवति न पूर्वस्य । तिङ्ङतिङः । ओदनं पचति । इह न भवति । पचत्योदनमिति ॥

स्वं रूपं शब्दस्याशब्दसंज्ञा ॥ ६८ ॥

शास्त्रे स्वमेव रूपं शब्दस्य ग्राह्यं बोध्यं प्रत्याय्यं भवति न बाह्यो ऽर्थः, शब्दसंज्ञां वर्जयित्वा । शब्देनार्थावगतेरर्थे कार्यस्यासंभवात् तद्वाचिनां शब्दानां संप्रत्ययो मा भूदिति सूत्रमिदमारभ्यते । अग्नेर्ढक् । आग्नेयमष्टाकपालं निर्वपेत् । अग्निशब्दो ऽग्निशब्दस्यैव ग्राहको भवति न ज्वलनः पावको धूमकेतुरिति नातः प्रत्ययो भवति । उदश्वितो ऽन्यतरस्याम् । औदश्वित्कम् । औदश्वितम् । तक्रमरिष्टं कालशेयं दण्डाहतं मथितमिति नातः प्रत्ययो भवति । अशब्दसंज्ञेति किम् । दाधा घ्वदाप् । तरप्तमपौ घः । घुग्रहणेषु घग्रहणेषु च संज्ञिनां ग्रहणं न संज्ञायाः ॥ सित्तद्विशेषाणां वृक्षाद्यर्थम् ॥ * ॥ सिन्निर्देशः कर्तव्यः । ततो वक्तव्यं तद्विशेषाणां ग्रहणं भवतीति । किं प्रयोजनम् । वृक्षाद्यर्थम् । विभाषा वृक्षमृगतृणेति । प्लक्षन्यग्रोधम् । प्लक्षन्यग्रोधाः । पित्पर्यायवचनस्य च स्वाद्यर्थम् ॥ * ॥ पिन्निर्देशः कर्त्तव्यः । ततो वक्तव्यं पर्यायवचनस्य ग्रहणं भवति, चकारात्

* यञञोरिति कुत्र चित्पुस्तके उपलभ्यमानः पाठ एव समीचीनः ।

स्वस्य रूपस्य तद्विशेषाणां चेति । किं प्रयोजनम् । स्वाद्यर्थम् । स्वे पुषः । स्वपोषं पुष्टः । रैपोषम् । धनपोषम् । अश्वपोषम् । गोपोषम् । जित् पर्यायवचनस्यैव राजाद्यर्थम् ॥ * ॥ जिन्निर्देशः कर्त्तव्यः । ततो वक्तव्यं पर्यायवचनस्यैव ग्रहणं भवतीति, न स्वरूपस्य नापि तद्विशेषाणाम् । किं प्रयोजनम् । राजाद्यर्थम् । सभा राजामनुष्यपूर्वा । इनसभम् । ईश्वरसभम् । तस्यै व न भवति । राजसभा । तद्विशेषाणां च न भवति । पुष्यमित्रसभा । चन्द्रगुप्तसभा । झित्तद्विशेषाणां च मत्स्याद्यर्थम् ॥ * ॥ झिन्निर्देशः कर्त्तव्यः । ततो वक्तव्यं तस्य च ग्रहणं भवति तद्विशेषाणां चेति । किं प्रयोजनम् । मत्स्याद्यर्थम् । पक्षिमत्स्यमृगान् हन्तीति ठक् । पाक्षिकः । मात्स्यिकः । तद्विशेषाणाम् । शाकुनिकः । पर्यायाणां न भवति । अजिह्मान् हन्ति । अनिमिषान् हन्तीति । अस्येष्यते । मीनान् हन्तीति मैनिकः ॥

अणुदित्सवर्णस्य चाप्रत्ययः ॥ ६९ ॥

परेण णकारेण प्रत्याहारग्रहणम् । अण् गृह्यमाण उदिच्च सवर्णानां ग्राहको भवति स्वस्य च रूपस्य प्रत्ययं वर्जयित्वा । आद्गुणः । अस्य च्वौ । यस्येति च । स्वरानुनासिक्यकालभिन्नस्य ग्रहणं भवति । उदित्खल्वपि । चुटू । लशक्वतद्धिते । चवर्गटवर्गयोः कवर्गस्य च ग्रहणं भवति । अप्रत्यय इति किम् । सनाशंसभिक्ष उः । अ सांप्रतिके । दीर्घो न भवति ॥

तपरस्तत्कालस्य ॥ ७० ॥

तः परो यस्मात्सोयं तपरः तादपि परस्तपरः । तपरो वर्णस्तत्कालस्यात्मना तुल्यकालस्य गुणान्तरयुक्तस्य सवर्णस्य ग्राहको भवति स्वस्य च रूपस्य । विध्यर्थमिदम् । अणिति नानुवर्तते । अणामन्येषां च तपराणाम् इदमेव ग्रहणकशास्त्रम् । अतो भिस ऐसित्येवमादिषु पूर्वग्रहणकशास्त्रं न प्रवर्त्तत एव । अतपरा अणस्तस्यावकाशः । किमुदाहरणम् । अतो भिस ऐस् । वृक्षैः । प्लक्षैः । विड्वनोरनुनासिकस्यात् । अब्जाः । गोजाः । तत्कालस्येति किम् । खट्वाभिः । मालाभिः ॥

आदिरन्त्येन सहेता ॥ ७१ ॥

आदिरन्त्येनेत्संज्ञकेन सह गृह्यमाणस्तन्मध्यपतितानां वर्णानां ग्राहको भवति स्वस्य च रूपस्य । अण् । अक् । अच् । हल् । सुप् । तिङ् । अन्त्येनेति किम् । सुडिति तृतीयैकवचनेन टा इत्यनेन ग्रहणं मा भूत् ॥

येन विधिस्तदन्तस्य ॥ ७२ ॥

येन विशेषणेन विधिर्विधीयते स तदन्तस्यात्मान्तस्य समुदायस्य ग्राहको भवति स्वस्य च रूपस्य । एरच् । इवर्णान्तादच्प्रत्ययो भवति । चयः । जयः । अयः । ओरावश्यके । उवर्णान्ताद् ण्यद्भवति । अवश्यलाव्यम् । अवश्यभाव्यम् ॥ समासप्रत्ययविधौ तदन्तविधेः प्रतिषेधो वक्तव्यः ॥ * ॥ द्वितीयान्तं श्रितादिभिः सह समस्यते । कष्टश्रितः । इह मा भूत् । कष्टं परमश्रित इति । प्रत्ययविधौ । नडादिभ्यः फक् । नडस्यापत्यं नाडायनः । इह मा भूत् । सूत्रनडस्यापत्यं सौत्रनाडिः । किमविशेषेण । नेत्याह ॥ उगिद्वर्णग्रहणवर्जमिति वाच्यम् ॥ * ॥ उगितश्चेति ङीप्प्रत्ययस्तदन्तादपि भवति । भवती । अतिभवती । वर्णग्रहणम् । अत इञ् । दाक्षिः । प्लाक्षिः ॥ यस्मिन्विधिस्तदादावल्ग्रहणे ॥ * ॥ अल्ग्रहणेषु यस्मिन्विधिस्तदादाविति वक्तव्यम् । अचि श्नुधातुभ्रुवां य्वोरियङुवङाविति । श्रियः । भ्रुवः ॥

वृद्धिर्यस्याचामादिस्तद्वृद्धम् ॥ ७३ ॥

यस्येति समुदाय उच्यते । अचां मध्ये यस्य वृद्धिसंज्ञक आदिभूतस्तच्छब्दरूपं वृद्धसंज्ञं भवति । अचामिति जातौ बहुवचनम् । शालीयः । मालीयः । औपगवीयः । कापटवीयः । आदिरिति किम् । सभासंनयने भवः साभासन्नयनः ॥ वा नामधेयस्य वृद्धसंज्ञा वक्तव्या ॥ * ॥ देवदत्तीयाः । दैवदत्ताः ॥ गोत्रान्तादसमस्तवत्प्रत्ययो भवतीति वक्तव्यम् ॥ * ॥ घृतप्रधानो रौढिः घृतरौढिः । तस्य छात्रा घृतरौढीयाः । ओदनप्रधानः पाणिनिरोदनपाणिनिस्तस्य छात्रा ओदनपाणिनीयाः । वृद्धाम्भीयाः । वृद्धकाश्यपीयाः ॥ जिह्वाकात्यहरितकात्यवर्जम् ॥ * ॥ जैह्वाकाताः । हारितकाताः ॥

त्यदादीनि च ॥ ७४ ॥

यस्याचामादिग्रहणमुत्तरार्थमनुवर्त्तते । इह न संबध्यते । त्यदादीनि शब्दरूपाणि वृद्धसंज्ञानि भवन्ति । त्यदीयम् । तदीयम् । एतदीयम् । इदमीयम् । अदसीयम् । त्वदीयम् । मदीयम् । त्वादायनिः । मादायनिः । भवदीयम् । किमीयम् ॥

एङ् प्राचां देशे ॥ ७५ ॥

यस्याचामादिग्रहणमनुवर्त्तते । एङ् यस्याचामादिस्तत्प्राग्देशाभिधाने वृद्धसंज्ञं भवति । एणीपचनीयम् । भोजकटीयः । गोनर्दीयः । एङिति किम् । आहिच्छत्रः । कान्यकुब्जः । प्राचामिति किम् । देवदत्तो नाम वाहीकेषु ग्रामः । तत्र भवो दैवदत्तः । देशइति किम् । गोमत्यां भवा मत्स्या गौमताः ।

प्रागुदञ्चौ विभजते हंसः क्षीरोदके यथा ।
विदुषां शब्दसिद्ध्यर्थं सा नः पातु शरावती ॥

इति श्रीजयादित्यविरचितायां काशिकायां वृत्तौ प्रथमाध्यायस्य प्रथमः पादः ॥

॥ अथ प्रथमाध्यायस्य द्वितीयः पादः ॥

गाङ्कुटादिभ्यो ऽञ्णिन्ङित् ॥ १ ॥

अतिदेशोयम् । गाङिति इङादेशो गृह्यते, न गाङ् गताविति । ङकारस्यानन्यार्थत्वात् । कुटादयोपि कुटकौटिल्यइत्येतदारभ्य यावत् कुङ्शब्दे इति । एभ्यो गाङ्कुटादिभ्यः परे ऽञ्णितः प्रत्यया ङितो भवन्ति ङिद्वद्भवन्तीत्यर्थः । गाङः । अध्यगीष्ट । अध्यगीषाताम् । अध्यगीषत । कुटादिभ्यः । कुटिता । कुटितुम् । कुटितव्यम् । उत्पुटिता । उत्पुटितुम् । उत्पुटितव्यम् । अञ्णिदिति किम् । उत्कोटयति । उच्चुकोट । उत्कोटकः । उत्कोटो वर्त्तते ॥ व्यचेः कुटादित्वमनसीति वक्तव्यम् ॥ * ॥ विचिता । विचितुम् । विचितव्यम् । अनसीति किम् । उरुव्यचाः ॥

विज इट् ॥ २ ॥

ओविजी भयचलनयोः, अस्मात्पर इडादिः प्रत्ययो ङिद्भवति । उद्विजिता । उद्विजितुम् । उद्विजितव्यम् । इडिति किम् । उद्वेजनम् । उद्वेजनीयम् ॥

विभाषोर्णोः ॥ ३ ॥

इडिति वर्त्तते । ऊर्णुञ् आच्छादने, अस्मात्पर इडादिः प्रत्ययो विभाषा ङिद्भवति । प्रोर्णुविता । प्रोर्णविता । इडित्येव । प्रोर्णवनम् । प्रोर्णवनीयम् ॥

सार्वधातुकमपित् ॥ ४ ॥

सार्वधातुकं यदपित्तन्ङिद्वद्भवति । कुरुतः । कुर्वन्ति । चिनुतः । चिन्वन्ति । सार्वधातुकमिति किम् । कर्त्ता । कर्तुम् । कर्त्तव्यम् । अपिदिति किम् । करोति । करोषि । करोमि ॥

असंयोगाल्लिट्कित् ॥ ५ ॥

अपिदिति वर्त्तते । असंयोगान्ताद्धातोः परो लिट्प्रत्ययो ऽपित् किद्भवति । बिभिदतुः । बिभिदुः । चिच्छिदतुः । चिच्छिदुः । ईजतुः । ईजुः । असंयोगादिति किम् । सस्रंसे । दध्वंसे । अपिदित्येव । बिभेद * ॥

इन्धिभवतिभ्यां च ॥ ६ ॥

इन्धिभवतीत्येताभ्यां परो लिट्प्रत्ययः किद्भवति । समीधे दस्युहन्तमम् । पुत्र ईधे अथर्वणः । भवतेः खल्वपि । बभूव । बभूविथ । इन्धेः संयोगार्थं ग्रहणम् । भवतेः पिदर्थम् । अत्रेष्टिः । श्रन्थिग्रन्थिदम्भिस्वञ्जीनामिति वक्तव्यम् ॥ * ॥ श्रेथतुः । श्रेथुः । ग्रेथतुः । ग्रेथुः । देभतुः । देभुः । परिषस्वजे । परिषस्वजाते ॥

* बिभेदियेति पा० ।

मृडमृदगुधकुषक्लिशवदवसः क्त्वा ॥ ७ ॥

मृड मृद गुध कुष क्लिश वद वस् इत्येतेभ्यः परः क्त्वाप्रत्ययः किद्भवति । न क्त्वासेडिति प्रतिषेधं वक्ष्यति तस्यायं पुरस्तादपकर्षः । गुधकुषक्लिशीनां तु रलो व्युपधादिति विकल्पे प्राप्ते नित्यार्थं वचनम् । मृडित्वा । मृदित्वा । गुधित्वा । कुषित्वा । क्लिशित्वा । उदित्वा । उषित्वा ॥

रुदविदमुषग्रहिस्वपिप्रच्छः संश्च ॥ ८ ॥

रुद विद मुष ग्रहि स्वपि प्रच्छ इत्येतेभ्यः संश्च क्त्वा च कितौ भवतः । रुदविदमुषीणां रलो व्युपधादिति विकल्पे प्राप्ते नित्यार्थं ग्रहणम् । ग्रहेर्विध्यर्थमेव । स्वपिप्रच्छ्योः सन्नर्थं ग्रहणम् । किदेव हि क्त्वा । उदित्वा । रुरुदिषति । विदित्वा । विविदिषति । मुषित्वा । मुमुषिषति । गृहीत्वा । जिघृक्षति । सुप्त्वा । सुषुप्सति । पृष्ट्वा । पिपृच्छिषति । ग्रहादीनां कित्त्वात्संप्रसारणं भवति । किरश्च पञ्चभ्य इति प्रच्छेरिडागमः ॥

इको झल् ॥ ९ ॥

सन्नित्यनुवर्त्तते । क्त्वेति निवृत्तम् । इगन्ताद्धातोः परो झलादिः सन् किद्भवति । चिचीषति । तुष्टूषति । चिकीर्षति । इक इति किम् । पिपासति । तिष्ठासति । झलिति किम् । शिशयिषते । किमर्थमिदमुच्यते । गुणो मा भूदिति । अज्झनगमां सनीति दीर्घत्वं गुणस्य बाधकं भविष्यति । यथैव तर्हि दीर्घत्वं गुणं बाधते तथा णिलोपमपि बाधेत । तस्माद्दीर्घत्वस्यावकाशदानाय कित्त्वमिदमारभ्यते । चिचीषतीत्यादिषु सावकाशं दीर्घत्वं परत्वाद् णिलोपेन बाध्यते । ज्ञीप्सति ॥

इकः कित्त्वं गुणो मा भूद्दीर्घारम्भात्कृते भवेत् ।
अनर्थकं तु ह्रस्वार्थं दीर्घाणां तु प्रसज्यते ॥
सामर्थ्याद्धि पुनर्भाव्यमृदित्वं दीर्घसंश्रयम् ।
दीर्घाणां नाकृते दीर्घे णिलोपस्तु प्रयोजनम् ॥

हलन्ताच्च ॥ १० ॥

इकः सन् झल्किदिति वर्त्तते । समीपवचनोन्तशब्दः । हल् चासावन्तश्च हलन्तः । इगन्तादिक्समीपाद्धलः परः सन् झलादिः किद्भवति । बिभित्सति । बुभुत्सते । इक इत्येव । पिपक्षते । झलित्येव । विवर्त्तिषते । दम्भेर्हल्ग्रहणस्य जातिवाचकत्वात्सिद्धम् । धीप्सति । धिप्सति ॥

लिङ्सिचावात्मनेपदेषु ॥ ११ ॥

हलन्तादिको झल्किदिति वर्त्तते । सनिति निवृत्तम् । इगन्तादिक्समीपाद्धलः परौ झलादी लिङ्सिचौ आत्मनेपदेषु परतः कितौ भवतः । भित्सीष्ट । भुत्सीष्ट । सिचि खल्वपि । अभित्त । अबुद्ध । इक इत्येव । यक्षीष्ट । अयष्ट । संप्रसारणं हि

स्यात् । आत्मनेपदेष्विति किम् । असाक्षीत् । अद्राक्षीत् । सृजिदृशोर्झल्यमकितीत्यमागमो न स्यात् । हलन्ताद्धित्येव । चेषीष्ट । अचेष्ट । गुणो न स्यात् । झलित्येव । वर्त्तिषीष्ट । अवर्त्तिष्ट । गुणो न स्यात् । लिङ्सिचाविति किम् । द्वेष्टा । द्वेक्ष्यति ॥

उश्च ॥ १२ ॥

ऋवर्णान्ताद्धातोः परौ लिङ्सिचावात्मनेपदेषु झलादी कितौ भवतः । कृषीष्ट । हृषीष्ट । सिचः खल्वपि । अकृत । अहृत । झलित्येव । वरिषीष्ट । अवरिष्ट । वृतो वा । अवरीष्ट * ॥

वा गमः ॥ १३ ॥

लिङ्सिचावात्मनेपदेष्विति वर्त्तते । गमेर्धातोः परौ लिङ्सिचौ आत्मनेपदेषु झलादी वा कितौ भवतः । संगंसीष्ट । संगसीष्ट । सिचः खल्वपि । समगत । समगंस्त । कित्त्वपक्षे अनुनासिकलोपो भवति । अनुदात्तोपदेशवनतितनोत्यादीनामिति ॥

हनः सिच् ॥ १४ ॥

हन्तेर्धातोः परः सिच् किद्भवति । आहत । आहसाताम् । आहसत । सिचः कित्त्वादनुनासिकलोपः । सिज्ग्रहणं लिङ्निवृत्त्यर्थम्, उत्तरत्रानुवृत्तिर्मा भूत् । आत्मनेपदग्रहणमुत्तरार्थमनुवर्त्तते । इह तु परस्मैपदे हन्तेर्वधभावस्य नित्यत्वात्कित्त्वस्य प्रयोजनं नास्ति ॥

यमो गन्धने ॥ १५ ॥

सिच आत्मनेपदेष्विति वर्त्तते । यमेर्धातोर्गन्धने वर्त्तमानात्परः सिच् प्रत्ययः किद्भवति आत्मनेपदेषु परतः । गन्धनं सूचनं, परेण प्रच्छाद्यमानस्यावद्यस्याविष्करणम् । अनेकार्थत्वाद्धातूनां यमिस्तत्र वर्तते । उदायत । उदायसाताम् । उदायसत । सूचितवानित्यर्थः । सिचः कित्त्वादनुनासिकलोपः । आङो यमहन इत्यात्मनेपदम् । गन्धनइति किम् । उदायंस्त पादम् । उदायंस्त कूपादुदकम् † उद्धृतवानित्यर्थः । सकर्मकत्वेपि समुदाङ्भ्यो यमो ऽग्रन्थइत्यात्मनेपदम् ॥

॥ विभाषोपयमने ॥ १६ ॥

यमः सिजात्मनेपदेष्विति वर्त्तते । यमेर्धातोरुपयमने वर्त्तमानात् परः सिच्प्रत्ययो विभाषा किद्भवति आत्मनेपदेषु परतः । उपायत कन्याम् । उपायंस्त कन्याम् । उपायत भार्याम् । उपायंस्त भार्याम् । उपयमनं स्वीकरणं विवाहः दारकर्म पाणिग्रहणमित्यर्थः । उपाद्यमः स्वकरणइत्यात्मनेपदम् ॥

---

* आत्मनेपदेष्वित्येव । अकार्षीत् । इति क्वाचित्कः पाठः ।

† रज्जुम् । पा० ।

स्थाघ्वोरिच्च ॥ १७ ॥

सिजात्मनेपदेष्विति वर्तते । तिष्ठतेर्धातोः घुसंज्ञकानां च इकारश्चान्तादेशः सिच्च किद्भवति आत्मनेपदेषु परतः । उपास्थित । उपास्थिषाताम् । उपास्थिषत । घुसंज्ञकानाम् । अदित । अधित ॥

इच्च कस्य तकारेत्त्वं दीर्घो मा भूदृतेपि सः ।
अनन्तरे प्लुतो मा भूत् प्लुतश्च विषये स्मृतः ॥

न क्त्वा सेट् ॥ १८ ॥

क्त्वाप्रत्ययः सेण्न किद्भवति । देवित्वा । वर्त्तित्वा । सेडिति किम् । कृत्वा । हुत्वा* । क्त्वाग्रहणं किम् । निगृहीतिः । उपस्निहितिः । निकुचितिः ॥

न सेडिति कृते ऽकित्त्वे निष्ठायामवधारणात् ।
ज्ञापकान्न परोक्षायां सनि झल्ग्रहणं विदुः ॥
इत्त्वं कित्संनियोगेन रोणा तुल्यं सुधीवनि ।
वस्वर्थं किदतीदेशान्निगृहीतिः प्रयोजनम् ॥

निष्ठा शीङ्स्विदिमिदिक्ष्विदिधृषः ॥ १९ ॥

न सेडिति वर्त्तते † । शीङ् स्विदि मिदि क्ष्विदि धृष् इत्येतेभ्यः परो निष्ठाप्रत्ययः सेण्न किद्भवति । शयितः । शयितवान् । प्रस्वेदितः । प्रस्वेदितवान् । प्रमेदितः । प्रमेदितवान् । प्रक्ष्वेदितः । प्रक्ष्वेदितवान् । प्रधर्षितः । प्रधर्षितवान् । सेडित्येव । स्विन्नः । स्विन्नवान् । स्विदादीनामादितश्चेति निष्ठायामिट् प्रतिषिध्यते । विभाषा भावादिकर्म्मणोरिति पक्षेभ्यनुज्ञायते स विषयः कित्त्वप्रतिषेधस्य ॥

मृषस्तितिक्षायाम् ॥ २० ॥

मृषेर्धातोः तितिक्षायामर्थे निष्ठा सेण्न किद्भवति । तितिक्षा क्षमा । मर्षितः । मर्षितवान् । तितिक्षायामिति किम् । अपमृषितं वाक्यमाह ॥

उदुपधाद्भावादिकर्मणोरन्यतरस्याम् ॥ २१ ॥

निष्ठा सेण्न किदिति वर्त्तते । उदुपधाद्धातोः परो भावे आदिकर्मणि च वर्त्तमानो निष्ठाप्रत्ययः सेडन्यतरस्यां न किद्भवति । द्युतितमनेन । द्योतितमनेन । प्रद्योतितः । प्रद्युतितः । मुदितमनेन । मोदितमनेन । प्रमुदितः । प्रमोदितः । उदुपधादिति किम् । लिखितमनेन । भावादिकर्म्मणोरिति किम् । रुचितं कार्षापणं ददाति । सेडित्येव । प्रभुक्त ओदनः । व्यवस्थितविभाषा चेयम् । तेन शब्विकरणानामेव भवति । गुधपरिवेष्टने । गुधितमित्यत्र न भवति ॥

---

* हुत्वेति पाठान्तरम् ।

† सेड् न किदिति वर्तते । पा० ।

पूङः क्त्वा च ॥ २२ ॥

अन्यतरस्यामिति न स्वर्यते । उत्तरसूत्रे पुनर्वावचनात् । न सेडिति वर्त्तते । पूङश्चेतीड्विहितः क्लिशः क्त्वानिष्ठयोः पूङश्चेति । पूङः परो निष्ठाप्रत्ययः क्त्वा च सेण् न किद्भवति । पवितः । पवितवान् । क्त्वाप्रत्ययस्य न क्त्वा सेडिति सिद्ध एव प्रतिषेधः । तस्य ग्रहणमुत्तरार्थम् । तथा चोक्तम् । नित्यमकित्त्वमिडाद्योः क्त्वानिष्ठयोः क्त्वाग्रहणमुत्तरार्थमिति ॥

नोपधात्थफान्ताद्वा ॥ २३ ॥

निष्ठेति निवृत्तम् । नकारोपधाद्धातोस्थकारान्तात्फकारान्ताच्च परः क्त्वाप्रत्ययः सेड्वा न किद्भवति । ग्रथित्वा । ग्रन्थित्वा । श्रथित्वा । श्रन्थित्वा । गुफित्वा । गुम्फित्वा । नोपधादिति किम् । रेफित्वा । गोफित्वा । थफान्तादिति किम् । स्रंसित्वा । ध्वंसित्वा ॥

वञ्चिलुञ्च्यृतश्च ॥ २४ ॥

वञ्चि लुञ्चि ऋत इत्येतेभ्यः परः क्त्वाप्रत्ययः सेड्वा न किद्भवति । वचित्वा । वञ्चित्वा । लुचित्वा । लुञ्चित्वा । ऋतित्वा । अर्तित्वा । ऋतेरीयङार्धधातुको विकल्पितः । स यत्र पक्षे नास्ति तत्रेदमुदाहरणम् । सेडित्येव । वक्त्वा ॥

तृषिमृषिकृशेः काश्यपस्य ॥ २५ ॥

न क्त्वा सेडिति प्रतिषेधे प्राप्ते कित्त्वं विकल्प्यते । तृषि मृषि कृशि इत्येतेभ्यः परः क्त्वाप्रत्ययः सेट् काश्यपस्याचार्यस्य मते वा न किद्भवति । तृषित्वा । तर्षित्वा । मृषित्वा । मर्षित्वा । कृशित्वा । कर्शित्वा । काश्यपग्रहणं पूजार्थं वेत्येव हि वर्त्तते ॥

रलो व्युपधाद्धलादेः संश्च ॥ २६ ॥

वेति वर्त्तते । सेडिति च । उश्च इश्च वी । वी उपधे यस्य स व्युपधः । उकारोपधादिकारोपधाच्च धातो रलन्ताद्धलादेः परः संश्च क्त्वा च सेटौ वा कितौ भवतः । द्युतित्वा । द्योतित्वा । दिद्युतिषते । दिद्योतिषते । लिखित्वा । लेखित्वा । लिलिखिषति । लिलेखिषति । रल इति किम् । देवित्वा । दिदेविषति । व्युपधादिति किम् । वर्त्तित्वा । विवर्त्तिषते । हलादेरिति किम् । एषित्वा । एषिषिषति । सेडित्येव । भुक्त्वा । बुभुक्षते ॥

ऊकालोऽज्झ्रस्वदीर्घप्लुतः ॥ २७ ॥

ऊ इति त्रयाणामयं मात्रिकद्विमात्रिकत्रिमात्रिकाणां प्रश्लिष्टनिर्देशः । ह्रस्वदीर्घप्लुत इति द्वन्द्वैकवद्भावे पुल्लिङ्गनिर्देशः । उऊऊ३ इत्येवं कालोऽज् यथाक्रमं ह्रस्वदीर्घप्लुत इत्येवं संज्ञो भवति । उकालो ह्रस्वः । दधि । मधु । ऊकालो दीर्घः । कुमारी । गौरी । ऊ३कालः प्लुतः । देवदत्ता३ अन्वसि । कालग्रहणं परिमाणार्थम् । दीर्घप्लुतयोः ह्रस्वसंज्ञा मा भूत् । आलूय । प्रलूय । ह्रस्वस्य पिति कृति तुगिति तुक् भवति । अज्ग्रहणं संयोगाज्समुदायनिवृत्त्यर्थम् । प्रतक्ष्य । प्ररक्ष्य । ह्रस्वाश्रयस्तुङ्मा भूत् । तितउच्छत्रम् । दीर्घात्पदान्ताद्वेति विभाषा तुङ्मा भूत् । ह्रस्वदीर्घप्लुतप्रदेशाः । ह्रस्वो नपुंसके प्रातिपदिकस्य । अकृत्सार्वधातुकयोर्दीर्घः । वाक्यस्य टेः प्लुत उदात्तः ॥

अचश्च ॥ २८ ॥

परिभाषेयं स्थानिनियमार्था । ह्रस्वदीर्घप्लुताः स्वसंज्ञया शिष्यमाणा अच एव स्थाने वेदितव्याः । वक्ष्यति ह्रस्वो नपुंसके प्रातिपदिकस्य । रै । अतिरि । नौ । अतिनु । गो । उपगु । अच इति किम् । सुवाग् ब्राह्मणकुलम् । अकृत्सार्वधातुकयोर्दीर्घः । चीयते । श्रूयते । अच इति किम् । भिद्यते । छिद्यते । वाक्यस्य टेः प्लुत उदात्तः । देवदत्ता ३ । यज्ञदत्ता ३ । अच इति किम् । अग्निची ३ त् । सोमसु ३ त् । तकारस्य मा भूत् । स्वसंज्ञया विधाने नियमः । अजिति वर्त्तते । इह मा भूत् । द्यौः । पन्थाः । सः । द्युभ्याम् । द्युभिः । अत्र नियमो नास्ति ॥

उच्चैरुदात्तः ॥ २९ ॥

अजिति वर्त्तते । उदात्तादिशब्दाः स्वरे वर्णधर्मे लोकवेदयोः प्रसिद्धा एव तदिह तद्गुणे अचि परिभाष्यन्ते । उच्चैरुपलभ्यमानो योऽच् स उदात्तसंज्ञो भवति । उच्चैरिति च श्रुतिप्रकर्षो न गृह्यते । उच्चैर्भाषते । उच्चैः पठतीति । किं तर्हि, स्थानकृतमुच्चत्वं संज्ञिनो विशेषणम् । ताल्वादिषु हि भागवत्सु स्थानेषु वर्णा निष्पद्यन्ते तत्र यः समाने स्थाने ऊर्ध्वभागनिष्पन्नो ऽच् स उदात्तसंज्ञो भवति यस्मिन्नुच्चार्यमाणे गात्राणामायामो निग्रहो भवति । रूक्षता अस्निग्धता स्वरस्य । संवृतता कण्ठविवरस्य । ये । ते । के । उदात्तप्रदेशा आद्युदात्तश्चेत्येवमादयः ॥

नीचैरनुदात्तः ॥ ३० ॥

अजितिवर्तते । नीचैरुपलभ्यमानो योऽच् सोऽनुदात्तसंज्ञो भवति । समाने स्थाने नीचभागे निष्पन्नो ऽच् अनुदात्तः । यस्मिन्नुच्चार्यमाणे गात्राणामन्ववसर्गो भवति । मार्दवम् । स्वरस्य मृदुता स्निग्धता । कण्ठविवरस्योरुता महत्ता । त्वसमसिमनेमेत्यनुच्चानि । नमस्ते रुद्र नीलकण्ठ सहस्राक्ष । अनुदात्तप्रदेशाः । अनुदात्तौ सुप्पितावित्येवमादयः ॥

समाहारः स्वरितः ॥ ३१ ॥

अजिति वर्त्तते । उदात्तानुदात्तस्वरसमाहारो योऽच् स स्वरितसंज्ञो भवति । सामर्थ्याच्चात्र लोकवेदयोः प्रसिद्धौ गुणावेव वर्णधर्मावुदात्तानुदात्तौ गृह्येते नाचौ । तौ समाह्रियेते यस्मिन्नचि तस्य स्वरित इत्येषा संज्ञा विधीयते । शिक्यम् ।

कन्या । सामन्यः । क्त । स्वरितप्रदेशाः । तित्स्वरितमित्येवमादयः ॥

तस्यादित उदात्तमर्धह्रस्वम् ॥ ३२ ॥

उदात्तानुदात्तस्वरसमाहारः स्वरित इत्युक्तम् । तत्र न ज्ञायते कस्मिंश्चिदंशे उदात्तः कस्मिंश्चिदनुदात्तः, कियान्वा उदात्तः कियान्वा अनुदात्त इति । तदुभयमनेनाख्यायते । तस्य स्वरितस्य आदावर्धह्रस्वमुदात्तम् । परिशिष्टमनुदात्तम् । अर्धह्रस्वमिति चार्द्धमात्रोपलक्ष्यते । ह्रस्वग्रहणमतन्त्रम् । सर्वेषामेव ह्रस्वदीर्घप्लुतानां स्वरितानामेष स्वरविभागः, शिक्यमित्यत्रार्द्धमात्रादित उदात्ता ऽपरार्धमात्रा ऽनुदात्ता, एकश्रुतिर्वा । कन्या इत्यत्रार्द्धमात्रा ऽऽदित उदात्ता ऽध्यर्धमात्रा ऽनुदात्ता । माणवक ३ माणवकेत्यत्रार्धमात्रा ऽऽदित उदात्ता ऽर्धतृतीयमात्रा अनुदात्ता ॥

॥ अथ वेदान्तकौस्तुभप्रभायाः ॥

॥ द्वितीयाध्यायस्य ॥

॥ चतुर्थपादावशेषः ॥

॥ सप्त गतेर्विशेषितत्वाच्च ॥ ५ ॥

कतीतरे प्राणा इति विशयः । "अत्र सप्त प्राणाः प्रभवन्ति तस्मा"दिति, "अष्टौ ग्रहा"इति, "सप्त वै शीर्षण्याः प्राणा" इति, "नव वै पुरुषे प्राणा नाभिर्दशमी"ति, "दश वै पुरुषे प्राणा आत्मैकादश" इत्यादिश्रुतिषु सप्तादिचतुर्दशपर्यन्ता प्राणसंख्या दृश्यते । अतः संशयः । कतीतरे प्राणा इति ।

किं तावत् प्राप्तम् । सप्तैव । कुतः । गतेरिति । "सप्त प्राणाः प्रभवन्ति तस्मा"दिति श्रुत्यावगमात् ।

न च "गुहाशया निहिताः सप्त सप्ते"ति वीप्साश्रुतेर्विरोध इति वाच्यम् । वीप्सायाः पुरुषभेदाभिप्रायकत्वात् । तथा च प्रतिपुरुषं सप्तेत्यर्थः ।

नन्वेवमष्टत्वाद्यधिकसंख्याश्रुतेर्व्याकोप इति चेत् । तत्राह । "विशेषितत्वाच्चे"ति । "सप्त वै शीर्षण्याः प्राणा"इति तावन्मात्रेण श्रुत्या विशेषितत्वात् । अधिकस्य चात्रैवान्तर्भावादित्यर्थः ॥ ५ ॥

अत्र सिद्धान्तः ।

॥ हस्तादयस्तु स्थितेऽतो नैवं हि ॥ ६ ॥

हस्तादयस्त्वन्ये प्राणाः सप्तभ्यो भिन्नाः श्रुत्या पठ्यन्ते । "हस्तौ वै ग्रहः, स कर्मणातिग्रहेण गृहीतो हस्ताभ्यां हि कर्म करोति" इत्यादिश्रुतिषु स्थिते सप्तत्वातिविलक्षणे सप्तानां तदधिकसंख्यायामन्तर्भावो युक्तः । न त्वधिकसंख्याया हीनसंख्यायाम् । अन्याय्यत्वात् । अतो हस्तादीनां सप्तातिरिक्तत्वादेव नैवम् । सप्तैवेति न मन्तव्यम् ।

तथा चैवं व्यवस्था । प्राणास्तावदेकादशसंख्याका एव । कार्यस्यापि तावन्मात्रत्वात् । फलभावे साधनापेक्षाभावात् । "दशमे पुरुषे प्राणा आत्मैकादशे"त्यत्रात्मशब्दोऽन्तःकरणरूपमनोवाचकः । करणस्यैवाधिकारात् । तत्र शब्दस्पर्शरूपरसगन्धविषयकाणि पञ्च ज्ञानानि । तत्करणानि पञ्च ज्ञानेन्द्रियाणि श्रोत्रत्वक्चक्षूरसनघ्राणाख्यानि । वचनादानविहरणोत्सर्गानन्दरूपाश्च पञ्च कर्मविशेषाः । तत्करणानि च पञ्च कर्मेन्द्रियाणि वाग्घस्तपादपायूपस्थाख्यानि । संकल्पादिकं चान्तरं कर्म । तत्करणं च मन इति ।

"इन्द्रियाणि दशैकं च पञ्च चेन्द्रियगोचराः" ।

इति श्रीमुखोक्तेः । तत्र सप्तसंख्याया अन्तर्भावदोषलेशावकाशोऽपि नास्ति । अधिकसंख्याश्रुतिस्तु मनोवृत्तिभेदमादाय सामञ्जस्यं बोध्यम् ।

तथाहि, मनस एव वृत्तिभेदेन चातुर्विध्यात् । तस्यैव द्वित्वविवक्षया द्वादशत्वं, त्रित्वविवक्षया त्रयोदशत्वं, चतुष्ट्वविवक्षया च चतुर्दशत्वं श्रुतिभिरुच्यते । तथात्वे च सर्वश्रुतीनां स्वार्थपरत्वेन नैराकाङ्क्ष्यात् सामञ्जस्यमेव । अधिकसंख्याकल्पनस्य वैयर्थ्यादेकादशैव प्राणा इति सिद्धम् ॥ ६ ॥

अथेन्द्रियाणां परिमाणविवादं परिहरति ॥

॥ अणवश्च ॥ ७ ॥

प्रकृताः प्राणा इन्द्रियाणि विभवः, अणवो वा । किं तावत् प्राप्तम् । विभव इति । कुतः । "त एते सर्वे समा अनन्ता" इत्यनन्तत्वश्रुतेः । अत्र राद्धान्तः । "अणवश्च", चो नियोगे प्रकृताः प्राणा अणव एव । कुतः । "प्राणमनूत्क्रामन्तं सर्वे प्राणा अनूत्क्रामन्ती"ति, उत्क्रान्त्यादिश्रवणात् । तेषामुत्क्रान्त्यादिषु पार्श्वस्थैरनुपलभ्यमानत्वाच्च न स्थौल्यमपीति भावः ।

न चानन्तो विधायकवाक्यविरोधः शङ्कनीयः । तस्यासंख्यातत्वविधानपरत्वात् ।

यद्वा, "अथ यो हैताननन्तानुपास्ते", इति श्रुत्युक्तोपासनार्थत्वात् ।

न च मनसोऽणुत्वे सर्वदेहगतसुखदुःखाद्यनुभवाभावप्रसङ्ग इति वाच्यम् । तस्य संकोचविकाशशीलत्वात् । अन्यथा ध्रुवादिविषयपर्यन्तानुभवानुपपत्तेः । अन्येषां चक्षुरादीनां तेन विनाकिंचित्करत्वादिति भावः ॥ ७ ॥

॥ श्रेष्ठश्च ॥ ८ ॥

प्राणसंवादे शरीरधारणहेतुतया निश्चितो मुख्यः प्राणः

श्रेष्ठशब्दाभिधेयः । "प्राणो वाव ज्येष्ठः श्रेष्ठश्चे"ति श्रुतेः । स च जायते न वेति संशये न जायते । कुतः ।

"न मृत्युरासीदमृतं न तर्हि ।
न राच्या अह्न आसीत् प्रकेतः ॥
आनीदवातं स्वधया तदेकम् ।
तस्माद्धा नापरः किंचनास" ॥

इति श्रुतौ, "आनी"दिति प्राणकर्मोपादानात् प्रागुत्पत्तेः प्राणस्य सद्भावावगमात् । इति प्राप्ते राद्धान्तः । "श्रेष्ठश्चे"ति । श्रेष्ठो मुख्यः । प्राणोऽपि भूतादिवदुत्पद्यते । कुतः । "एतस्माज्जायते प्राणो मनः सर्वेन्द्रियाणि चे"त्यत्र मनस इन्द्रियेभ्यश्च तस्य पार्थक्येनोत्पत्तिश्रवणात् ।

न चोक्तश्रुतिविरोध इति वाच्यम् । तस्याः परमकारणब्रह्मपरत्वात् ।

नाप्यानीदिति पदं प्राणसद्भावे मानम् । "अवात"मिति विशेषणश्रवणात् । "अप्राणो ह्यमना" इति श्रुत्यन्तरोक्तब्रह्मलिङ्गत्वादवातस्य । अवातमप्राणमित्यर्थः । अन्यथा, अद्वितीयादिश्रुतिव्याकोपादित्यर्थः । पूर्वन्यायसिद्धेः पृथग्योगकरणमुत्तरचिन्तार्थम् ॥ ८ ॥

॥ न वायुक्रिये पृथगुपदेशात् ॥ ९ ॥

स मुख्यः प्राणः किं वायुरुत करणव्यापारः, अथ वा वायुरेव कंचन विशेषमापन्न इति संशये राद्धान्तमाह । प्राणो वायुतत्त्वान्तर्गत इन्द्रियव्यापाररूपा तत्क्रिया च न भवति । कुतः । पृथगुपदेशात् ।

न चैवं यः प्राणः स वायुः,स एष वायुः पञ्चविधः प्राणोऽपानो व्यान उदानः समान इति श्रवणविरोध इति वाच्यम् । "प्राण एव ब्रह्मणश्चतुर्थपादः स वायुना ज्योतिषा भाति च तपति चे"ति श्रुतेः । न हि वायुरेव सन् वायोः पृथगुपदिश्येत, इत्यर्थः । तथा क्रियाख्यः करणव्यापारोऽपि पृथक्त्वेनोपदिश्यते । "एतस्माज्जायते प्राणो मनः सर्वेन्द्रियाणि चे"त्यत्र प्राणस्य करणेभ्यः पृथगुपदेशात् । न हि सर्वेषां कारकाणामेकव्यापारत्वसंभवः । प्रत्येकं तेषां भिन्नव्यापारत्वनियमात् । अन्यथा सर्वेषामपि सर्वव्यापारकत्वापत्तेः ।

न च "यः प्राणः स वायु"रित्यादिश्रुतिविरोधस्य तादवस्थ्यमिति वाच्यम् । वायुरेवायमध्यात्मभावात्मकावस्थापन्नः पञ्चरूपात्मना वर्तमानः प्राणाख्ययोपपत्तेर्न द्रव्यान्तरम् । न वा वायुमात्रमित्यविरोध उभयश्रुतेः ।

एतेन ।

"सामान्यकरणवृत्तिः प्राणाद्या वायवः पञ्च" ।

इति करणानां सामान्या वृत्तिः प्राण इति सांख्यपक्षो निरस्तः ॥ ९ ॥

ननु "सुप्तेषु वागादिषु प्राण एको जागर्ति, प्राण एको मृत्युना नाप्तः, प्राणः सवर्गो वागादीन् संवृङ्क्ते, प्राण इतरान् प्राणान् रक्षति,मातेव पुत्रा"निति प्राणस्य शरीरेन्द्रियादिं प्रति स्वातन्त्र्यश्रवणात् स्वतन्त्रः प्राण इत्यभ्युपगन्तव्यमित्याशङ्क्य समाधत्ते ॥

॥ चक्षुरादिवत् तु तत्सहशिष्ट्यादिभ्यः ॥ १० ॥

तुशब्दः पूर्वपक्षव्यावृत्त्यर्थः । यथा चक्षुरादीनि जीवकर्तृत्वादिव्यापारं प्रति करणानि, तथा मुख्यप्राणोऽपि राजमन्त्रिवदुपकरणभूत एव, न स्वतन्त्रः । कुतः । तत्सहशिष्ट्यादिभ्यः । शासनं शिष्टिः । चक्षुरादिभिः सह तस्यापि शासनश्रवणात् प्राणसंवादे । तत्सजातीयत्वे हि तैः सह शासनं युज्यते । प्राणशब्दपरिगृहीतकारणेष्वस्य विशिष्टाभिधानमादिशब्देन ग्राह्यम् । "अथ य एवायं मुख्यः प्राणो योऽयं मध्यमः प्राण" इत्यादिषु विशिष्याभिधानाज्जीवं प्रति चक्षुरादिवदुपकरणत्वमिति सिद्धम् ॥ १० ॥

ननु यदि चक्षुरादिवदस्य जीवं प्रत्युपकरणत्वं, तर्ह्यस्य विषयरूपकार्यमपि द्वादशकमङ्गीकार्यम् । तथा चैकादशसंख्याकक्षार्याभ्युपगमसिद्धान्तभङ्ग इत्याशङ्कायां समाधानमाह ॥

॥ अकरणत्वाच्च न दोषस्तथाहि ॥ ११ ॥

चः शङ्काच्छेदार्थः । नोक्तदोषप्रसङ्गावकाशः । चक्षुरादिवन्मुख्यप्राणस्याकरणत्वात्, जीवव्यापारं प्रति तस्य करणत्वाभावात् । तर्हि किमर्थोऽस्याङ्गीकारस्तत्राह, "तथाहि", दर्शयति । हीति निश्चयार्थः । श्रुतिस्तस्य भिन्नमसाधारणं कार्यान्तरं दर्शयतीत्यर्थः । तथाहि, प्राणसंवादे । "अथ ह प्राणा अहं श्रेयसे व्यूदिरे",इत्युपक्रम्य "यस्मिन्नुत्क्रान्त इदं शरीरं पापिष्ठतरमिव दृश्येत, स वः श्रेष्ठ"इत्युक्ते वागादीनां प्रत्येकमुत्क्रान्तौ प्रवचनादिवृत्तिमात्रहीनं यथापूर्वं जीवनं दर्शयित्वा, प्राणस्योच्चिक्रमिषायां वागादिशैथिल्यापत्तिं शरीरपातप्रसक्तिं च निरूप्य, प्राणाधीनां देहादिस्थितिं प्राणासाधारणकार्यभूतां दर्शयति । तान् वरिष्ठः प्राण उवाच । "मा मोहमापद्यथाहमेवैतत् पञ्चधात्मानं विभज्यैतद्बाणमवष्टभ्य विधारयामि", इति ।

किंच, "प्राणेन रक्षन्नवरं कुलाय"मिति चक्षुरादीनां लये प्राणकृतदेहादिरक्षां दर्शयति ।

किंच,"कस्मिन्नहमुत्क्रान्त उत्क्रान्तो भविष्यामि, कस्मिन् वा प्रतिष्ठिते प्रतिष्ठास्यामि", इति, "स प्राणमसृजते"त्यादिना प्राणाधीनां जीवस्य स्थितिमुत्क्रान्तिं च दर्शयतीति ॥ ११ ॥

ननु तथापि प्राणस्यानेकत्वश्रवणात्, तथाहि, प्राणोऽपानो व्यान उदानः समानश्चेति । तत्र प्राग्वृत्तिरुच्छ्वासादिकर्मा नासादिसंचारी प्राणः । अपानोऽर्वाग्वृत्तिर्निःश्वासादिकर्मा । व्यानस्तयोर्मध्ये वर्तमानो वीर्यवत्कर्महेतुः । उदान ऊर्ध्ववृत्तिरुत्क्रान्त्यादिहेतुः । समानः समं सर्वेष्वङ्गेषु रसान् नयतीति । एवं संज्ञासंख्याकार्यभेदात् तत्त्वान्तरत्वमेव तेषामिति चेदत्राह ॥

॥ पञ्चवृत्तिर्मनोवद्व्यपदिश्यते ॥ १२ ॥

प्राणादिसंज्ञकः पञ्चपञ्चवृत्तिः प्राण एव । न तत्त्वान्तरम् । "एतत् सर्वं प्राण एवे"ति वचनात् । तत्र दृष्टान्तः । मनोवदिति । "कामः संकल्पो विचिकित्सा श्रद्धा धृतिरधृतिर्ह्रीर्धीर्भीरित्येतत् सर्वं मन एवे"तिवत् । यथा संकल्पादयो मनोवृत्तिविशेषास्तथा प्राणापानादयोऽपि प्राणवृत्तय इत्यर्थः ॥ १२ ॥

स चाणुरित्याह ॥

॥ अणुश्च ॥ १३ ॥

व्याख्यातप्रायमिदम् । इतरप्राणोक्तन्यायस्यात्राप्यवारणीयत्वात् ।

ननु "समः प्लुषिणा समो मशकेन समो नागेन सम एभिस्त्रिभिर्लोकैः समोऽनेन सर्वेण", "प्राणे सर्वं प्रतिष्ठितं, प्राणेनावृत"मिति विभुत्वश्रवणाद्विभुत्वमेव । अन्यथोक्तशास्त्रविरोधादुक्तपरिहार इति चेन्न । उक्तश्रुतेः समष्टिप्राणपरत्वेनाविरुद्धत्वात् ॥ १३ ॥

अथेन्द्रियाणि स्वतन्त्रतया स्वयमेव कार्ये प्रवर्तन्ते,स्वस्वाधिष्ठातृदेवताप्रेरितानि वा । किं तावत् प्राप्तम् । स्वयमेव प्रवर्तन्त इति । कुतः । तेषां तादृक्शक्तिमत्त्वात् । अत्र ब्रूते ॥

॥ ज्योतिराद्यधिष्ठानं तु तदामननात् ॥ १४ ॥

ज्योतिरादिभिरग्न्यादिभिरधिष्ठानमधिष्ठितं वागादिकरणजातं देवताप्रवर्तितं सत् स्वकार्यार्थे प्रवर्तते । न स्वातन्त्र्येण । कुतः । तदामननात् । "अग्निर्वाग्भूत्वा मुखं प्राविशत्", "वायुः प्राणो भूत्वा नासिके प्राविशत्", "आदित्यश्चक्षुर्भूत्वाक्षिणी प्राविश"दित्यादिश्रवणात् । अध्यात्माधिभूताधिदैवैः सर्वज्ञानक्रियाव्यवहारसिद्धिरिति तात्पर्यार्थः । तत्राध्यात्मशब्दः करणपरः । अधिभूतशब्दो विषयपरः । अधिदैवशब्दश्च करणाधिष्ठातृदेवतावर्गवाचकः । "चक्षुरध्यात्मं, द्रष्टव्यमधिभूतम्,आदित्यस्तत्राधिदैवतम्, श्रोत्रमध्यात्मं, श्रोतव्यमधिभूतं, दिशस्तत्राधिदैवतं, नासाध्यात्मं, घ्रातव्यमधिभूतं,पृथिवी तत्राधिदैवतं, जिह्वाध्यात्मं,रसयितव्यमधिभूतं, वरुणस्तत्राधिदैवतं, त्वगध्यात्मं, स्पर्शयितव्यमधिभूतं,वायुस्तत्राधिदैवतम्" इत्यादिश्रुतिभ्यः । अत्र पृथिवीशब्देनाश्विनौ लक्ष्येते शास्त्रान्तरविरोधपरिहारार्थम् । जडायाः प्रेरकत्वासंभवात् ।

"वागध्यात्ममिति प्राहुर्ब्राह्मणास्तत्त्वदर्शिनः ।
वक्तव्यमधिभूतं च वह्निस्तत्राधिदैवतम्" ॥

इत्यादिस्मृतेश्चोक्तहेतोराभासत्वं निर्णीतं भवति । रथादीनां शक्तिमत्त्वेऽप्यनडुदादिकं विना प्रवृत्त्यदर्शनादप्रयोजकत्वं, जडत्वेन सत्प्रतिपक्षत्वं च । इन्द्रियाणि न स्वातन्त्र्ययोग्यानि । जडत्वात्, करणत्वाद्वा । रथादिवत्, वास्यादिवच्चेति ।

तस्माच्छास्त्रादिप्रमाणबलेन पराधिष्ठितत्वमापेक्षत्वमेवेति सिद्धम् ॥ १४ ॥

ननु यदि देवताधिष्ठितत्वमेव तेषामङ्गीक्रियते, तर्हि तदधिष्ठातृदेवतानामेव भोक्तृत्वमपि स्वीकार्यम्, चेतनत्वात्, तथात्वे च शरीरिभोक्तृत्वापत्तिरित्याशङ्क्य, तत्परिहारमाह ॥

॥ प्राणवता शब्दात् ॥ १५ ॥

प्राणोऽस्यास्तीति प्राणवांस्तेन प्राणवता । प्राणोपलक्षितदेहेन्द्रियादिशब्दसमुदायस्वामिना शारीरेणैव प्राणानां संबन्धो न देवताभिः । कुतः । शब्दात् । श्रुतिमुखेन तथैवावगमात् । "अथ यत्रैतदाकाशमनुविषण्णं चक्षुः, स चाक्षुषः पुरुषो दर्शनाय चक्षुरथ यो वेदेदं जिघ्राणीति, स आत्मा गन्धाय घ्राण"मित्यादिश्रुतिः शारीरेणैव प्राणानां संबन्धं दर्शयति । परमपुरुषेणेन्द्रियाधिष्ठातृदेवतानां द्वारि द्वारपालानामिव करणप्रवर्तकत्वे निरूपितत्वात् । न भोक्तृत्वादिषु । न हि स्वामिभोगे द्वारपालानामधिकारः संभवति । तासां सद्भिर्दिव्यभोगदानाच्च ।

तस्माद्भगवदाज्ञया शारीरकरणानि स्वस्वकार्ये प्रेरयन्त्यो दिव्यभोगान् भुञ्जन्ति । श्रीभगवदाज्ञाभङ्गभिया नान्यत्र भोगे तासां प्रवृत्तिरिति भावः । "भीषास्माद्वातः पवते, भीषोदेति सूर्यः, भीषणादग्निश्चेन्द्रश्च मृत्युर्धावति पञ्चमः", "एतस्यैवाक्षरस्य प्रशासने गार्गि सूर्याचन्द्रमसौ विधृतौ तिष्ठत" इत्यादिना देवतानां परनियोज्यत्वश्रवणात् ।

"सर्वस्य चाहं हृदि संनिविष्टः",

इत्यादिस्मृतेश्च ॥ १५ ॥

॥ तस्य च नित्यत्वात् ॥ १६ ॥

तस्य करणसंबन्धस्य शारीरेणैव नित्यत्वाच्च देवताभिरिति सूत्रार्थः । उत्क्रान्त्यादौ तदनुवृत्तिदर्शनात् । "तमुत्क्रामन्तं प्राणोऽनूत्क्रामति, प्राणमनूत्क्रामन्तं सर्वे प्राणा अनूत्क्रामन्ती"ति श्रुतेः ।

तस्मात् करणाधिष्ठातृदेवतानां सत्त्वेऽपि शारीरस्यैव भोक्तृत्वं, न देवतानामिति सिद्धम् ।

अत्र केचित् तदिदं जीवस्याग्न्यादिदेवतानां च प्राणविषयमधिष्ठानं किं स्वायत्तं परायत्तं वेति विशये, स्वायत्तमिति प्राप्त उच्यते, "ज्योतिराद्यधिष्ठान"मिति । प्राणवता जीवेन सह ज्योतिरादीनामग्न्यादिदेवतानां प्राणविषयमधिष्ठानं, तदामननात् । तस्य परमात्मनः संकल्पादेव भवतीत्यर्थः । कुतः । शब्दात् । इन्द्रियाणां साभिमानिदेवतानां जीवात्मनश्च परमपुरुषामननायत्तत्वशास्त्रात् । इति सिद्धान्तितम् तच्चिन्त्यम् ।

यद्यपि चेतनाचेतनस्वरूपस्थित्यादिकं परमेश्वरायत्तमिति सर्वसंमतम् । अस्माकं त्वभीष्टतममेव । श्रुतिप्रमाणसिद्धत्वात् । तथाप्युक्तार्थस्य "परात् तु तच्छ्रुते"रित्याद्युक्तशास्त्रेणैव सिद्धतया पौनरुक्त्यदोषस्यावश्यंभावादिति मनीषिभिरनुसंधेयम् ॥ १६ ॥

ननु यथा प्राणापानादयो मुख्यस्य प्राणस्य वृत्तिविशेषास्तथेतरे प्राणाश्चक्षुरादयोऽपि तद्वृत्तय एव । न तत्त्वान्तराणि । कुतः । तथैव श्रूयमाणत्वात् । "हन्तास्यैव सर्वे रूपमसामे"ति, "त एतस्यैव सर्वे रूपमभव"न्नित्यादिना ।

किंच प्राणैकशब्दश्रवणादपि तत्त्वाभेदो निश्चीयत इत्याशङ्कोत्तरमाह ॥

॥ त इन्द्रियाणि तद्व्यपदेशादन्यत्र श्रेष्ठात् ॥ १७ ॥

ते प्रकृताः प्राणा वागादय इन्द्रियाण्युच्यन्ते । तानि तत्त्वान्तराण्येव । न मुख्यप्राणस्य वृत्तयः । कुतः । "तद्व्यपदेशादन्यत्र श्रेष्ठात्" । श्रेष्ठादन्यत्र, मुख्यप्राणं विना, तद्भिन्नतयेति यावत्, तेषां वागादीनां श्रुतौ व्यपदेशात् । "एतस्माज्जायते प्राणो मनः सर्वेन्द्रियाणि चे"त्यादिना ।

ननु तर्हि मनसोऽपीन्द्रियत्वं न स्यात् । पृथगुपदेशाविशेषादिति चेन्न । तस्य मनसः श्रुतिव्याख्यारूपस्मृतौ हीन्द्रियत्वाभ्युपगमात् । "इन्द्रियाणि दशैकं चे"ति श्रीमुखोक्तेः । "दशमे पुरुषे प्राणा आत्मैकादशे"ति श्रुतेश्च । समानजातीयामेकां जातिं क्रियां गुणं चाश्रित्य संख्याप्रयोगाः प्रवर्तन्ते । यथाष्टौ ग्रहाः । रूपादिज्ञानोत्पत्तिहेतुत्वाच्चेन्द्रियत्वं मनस इति भावः ।

ननु कथं तर्हि चक्षुरादौ प्राणशब्दप्रयोग इति चेन्न । प्राणार्थानप्रवृत्तिकत्वेनेन्द्रियाणां तत्तन्निर्देशस्य गौणत्वेनाविरोधात् । "तस्मादेत एतेनाख्यायन्त" इति श्रुतेर्मुख्यप्राणविषयस्यैव प्राणशब्दस्येतरेन्द्रियेषु लाक्षणिकत्वावगमादित्यर्थः ॥ १७ ॥

॥ भेदश्रुतेर्वैलक्षण्याच्च ॥ १८ ॥ १६ ॥

मुख्यप्राणस्येन्द्रियाणां च भेदश्रवणादपि मुख्यप्राणादिन्द्रियाणां तत्त्वान्तरत्वमित्यर्थः, "ते ह वाचमूचु"रित्युपक्रम्य, वागादीनामसुरविध्वस्तानामुपन्यासं कृत्वा, तत्प्रकरणोपसंहारे "य एनमासन्यं प्राणमूचू"रित्यसुरविध्वंसिनो मुख्यस्य प्राणपृथक्कृत्वेनोपक्रमात् । अत्रैव हेत्वन्तरमाह "वैलक्षण्याच्चे"ति । मुख्यप्राणादितरेषां वैलक्षण्यादपि तत्त्वान्तरत्वमिति सूत्रार्थः । तथाहि, प्राणस्य वागादिषु सुप्तेषु जागरणम् । इन्द्रियाणां मृत्युव्याप्तत्वेन प्राणस्य मृत्युना नाप्तत्वम् । तेषां विषयग्रहणहेतुत्वम् । प्राणस्य तु देहादिधारणपातनहेतुत्वं च । श्रुतिदर्शनाद्वैलक्षण्येन तत्त्वान्तरत्वमित्यर्थः । इन्द्रियेषु श्रवणालोचनाद्यसाधारणवृत्तयः । प्राणस्य तु सर्वेन्द्रियेषु परिस्पन्दरूपासाधारणवृत्तिरिति विवेकः ।

अत्र प्रमाणभूताः श्रुतयस्तु सर्वमेव पठित्वानुसंधेया इति संक्षेपः ।

ननु "तत् तेजोऽसृजत","तस्माद्वा एतस्मादात्मन आकाशः संभूतः","एतस्माज्जायते प्राण"इत्यादिजगत्सृष्टिविषयश्रुतीनां परस्परविरुद्धसृष्टिक्रमपरत्वदर्शनादितरेतरबाध्यबाधकभावापत्त्या ह्येकतमस्यापि क्रमस्याप्रामाणिकत्वम् । तस्मात् सर्वेषामपि श्रौतत्वाविशेषादिति चेन्न । गुणोपसंहारन्यायेन न्यूनाधिकसंख्योपक्रमस्य पौर्वापर्यक्रमस्याविरोधेन सर्वस्यापि सामञ्जस्यात् । तथा चोक्तं विवरणकारैः श्रीपुरुषोत्तमाचार्यचरणैः । "गुणोपसंहारन्यायेन सर्वस्य वाक्यजातस्य सामञ्जस्यमेवे"त्यादिना । एतदुक्तं भवति । सृष्टिक्रमश्रुतीनां परस्परविरोधे कयाचिद् व्यवस्थयैव भाव्यम् । अन्यथैकतमस्या अपि श्रुतेर्बाधायामर्धनास्तिकत्वापत्तिः । तत्र प्रलयश्रुतेः प्रबलत्वात् तदनुसारेण सर्वास्वपि सृष्टिविषयिकासु श्रुतिषु गुणोपसंहारन्यायेन सृष्टिक्रमोपन्यासः कर्तव्यः । तथात्वे तु न कश्चिद्विरोधावकाशः । तथैवाम्नायते सुबालोपनिषदि क्रमः । "पृथिव्यप्सु प्रलीयते, आपस्तेजसि प्रलीयन्ते, तेजो वायौ प्रलीयते,वायुराकाशे प्रलीयते, आकाश इन्द्रियेषु, इन्द्रियाणि तन्मात्रेषु, तन्मात्राणि भूतादौ प्रलीयन्ते, भूतादिर्महति प्रलीयते, महानव्यक्ते प्रलीयते,अव्यक्तमक्षरे, अक्षरं तमसि, तमः परे देव एकीभवति" इत्यादिना । व्याख्याता चेयं श्रुतिर्वैष्णवश्रीपराशरेण ।

"जगत्प्रतिष्ठा देवर्षे पृथिव्यप्सु प्रलीयते ।
तेजस्यापः प्रलीयन्ते तेजो वायौ प्रलीयते ॥
वायुश्च लीयते व्योम्नि तच्चाव्यक्ते प्रलीयते" ।

इत्युक्त्वा,

"प्रकृतिर्या मयाख्याता व्यक्ताव्यक्तस्वरूपिणी ।
पुरुषश्चाप्युभावेतौ लीयेते परमात्मनि ॥
परमात्मा च सर्वेषामाधारः परमेश्वरः ।
विष्णुनामा स वेदेषु वेदान्तेषु च गीयते" ॥

इत्यादिनेति संक्षेपः ॥ १८ ॥ १९ ॥

॥ संज्ञामूर्तिक्लृप्तिस्तु त्रिवृत् कुर्वत उपदेशात् ॥ २० ॥

छान्दोग्ये सत्प्रकरणे "सेयं देवतैक्षत", "हन्ताहमिमास्तिस्रो देवताः", "अनेन जीवेनात्मनानुप्रविश्य नामरूपे व्याकरवाणी"ति, तां त्रिवृतं त्रिवृतमेकैकां करवाणीति नामरूपव्याकरणमाम्नातम् । तत्र संशयः । एतन्नामरूपव्याकरणव्यापाराश्रयो जीवः, परमात्मा वेति । किं तावत् प्राप्तम् । जीव एवेति । कुतः । "अनेन जीवेनात्मने"ति विशेषोक्तेः । यथा चारेणाहं परसैन्यमनुप्रविश्य संकलयामीति प्रयोगे चारकर्तृकमेव परसैन्यप्रवेशसंकलनं हेतुकर्तृत्वेन राज्युपचर्यत उत्तमपुरुषप्रयोगेणेति । अत्र राद्धान्तः । "संज्ञामूर्तिक्लृप्ति"रिति । संज्ञा च मूर्तिश्च संज्ञामूर्ती, तयोः क्लृप्तिः समर्थनं व्याकरणं, सा च त्रिवृत् कुर्वतस्त्रिवृतीः कर्तुः परमेश्वरस्यैव कर्म, न जीवस्य । कुतः । उपदेशात् । "सेयं देवतैक्षते"त्यादिना "व्याकरवाणी"त्युत्तमपुरुषप्रयोगेण परस्यैव व्याकर्तृत्वोपदेशात् । व्याकरणप्रवेशयोः समानकर्तृत्वोपपत्तेश्चेति सूत्रार्थः ।

ननु "अनेन जीवेनात्मने"ति विशेषश्रवणाज्जीवस्यैव कर्तृत्वं युक्तमिति चेन्न । नामरूपव्याकरणात् प्राक् कर्तृत्वे जीवस्य सामर्थ्याभावात् । अन्यथा प्रलयेऽपि तस्य कर्तृत्वसामर्थ्ययोगे प्रलयाभावप्रसङ्गात् ।

एतेन समष्टिजीवाभिमानिचतुर्मुखस्यैव नामरूपव्याकरणं कर्मेति पक्षो निरस्तः । तस्यापि त्रिवृत्कृतभूतनिर्मितब्रह्माण्डजन्मानन्तरोत्पत्तिकत्वात् ।

"तस्मिन्नेवाभवद्ब्रह्मा सर्वलोकपितामहः" ।

इति स्मरणात् ।

किंच, त्रिवृत्करणपूर्वकमेवेदं नामरूपव्याकरणमित्यवगम्यते । प्रत्येकं नामरूपव्याकरणस्य तेजोऽबन्नोत्पत्तिवचनेनैव निर्णयात्, नामरूपव्याकरणं विना तेजोऽबन्नमित्यादिनाम्ना निर्देष्टुमशक्यत्वात् तेज इत्यादिनामाद्यभावे केन निर्दिशेत् । यथा नामरूपव्याकरणात् प्राग् देवदत्तस्य पुत्रा इति सामान्यनिर्देशे सत्यपि देवदत्तस्य त्रयः पुत्रा यज्ञदत्तोऽग्निदत्तो ब्रह्मदत्तश्चेति निर्देशासंभवः । नामादिव्याकरणोत्तरं तु संभवत्येव । तथा नामरूपव्याकरणात् प्राक् परमेश्वरसृज्यमिदं जगदिति सामान्येन निर्देष्टुं शक्येऽपि तेजोऽबन्नमिति नामादिविशेषविभागेन वक्तुमशक्यत्वात् । व्याकरणे तु संभवतीति भावः । तच्च त्रिवृत्करणमग्न्यादित्यचन्द्रविद्युत्सु श्रुत्या दर्शितम् । "यदग्ने रोहितं रूपं तेजसस्तद्रूपं, यच्छुक्लं तदपां, यत् कृष्णं तदन्नस्ये"त्यादिना । तत्राग्निरिति रूपव्याकरणं, रूपप्रागभावे नामकरणासंभवाद्रूपाभावे तदनुपलब्धिप्रसङ्गाद्रूपव्याकरणमेव विषयोपलब्धेः साधारणहेतुरित्यर्थः । तथैवाग्निरिति वर्णसमुदायरूपं नामव्याकरणम् । एवमादित्यादिष्वपि विवेचनीयम् ।

एतेनैव पार्थिवाप्यतैजसेष्वपि पदार्थेषु त्रिवृत्करणं सूपपन्नम् । उपक्रमोपसंहारसाधारण्यात् । तत्रेमास्तिस्रो देवतास्त्रिवृत् त्रिवृदेकैका भवतीत्युपक्रमसामान्यात् । "यद्रोहितमिवाभू"दिति तैजसरूपमित्युपसंहारसाम्याच्चेति संक्षेपः ।

यच्चोक्तं, चारेण परसैन्यं प्रविश्येत्यादि । तत् तुच्छम् । दृष्टान्तवैषम्यात् । राजचारयोरत्यन्तभेदेन पृथक्सिद्धत्वात् । प्रकृते जीवस्य ब्रह्मात्मकत्वेन तदपृथक्सिद्धत्वात् । ब्रह्माण्डान्तर्वर्तिनो जीवस्य तद्बहिर्भूतवर्तिपदार्थानां नामरूपव्याकरणासंभवात् । चतुर्मुखादेः स्वसृज्यानां नामादिव्याकरणे शक्तिमत्त्वेऽपि स्वाप्राग्वस्तूनां नामादिव्याकर्तृत्वेन शक्तिरितिध्वन्यर्थः ।

किंच, जीवबुद्ध्यगोचरस्थानस्य जगतो नामादिव्याकृतौ परमेश्वरस्यैव समर्थत्वान्नान्यस्य । "आकाशो ह वै नामरूपयोर्निर्वहिते"त्यादिनोपनिषत्सु तस्यैव तथात्वश्रवणात् । श्रुत्यर्थस्तु, इमाः साकल्येन करनिहितफलवत् परमेश्वरस्य श्रुत्यर्थाभिमानिदेवविशेषस्य प्रत्यक्षगोचरास्तेजोऽबन्नसंज्ञिकास्तिस्रो देवता अनेन जीवेन स्वात्मकसमष्टिजीवावच्छिन्नेन जीवनहेतुनान्तरात्मनानुप्रविश्य नामरूपे व्याकरवाणीति देवतिर्यङ्मनुष्यादिविचित्रासंख्येयस्वेतरागोचरव्यक्तात्मना विभज्य तत्तन्नामादिना संयोजयामीत्येतत्संकल्पविषयसंसिद्धये तासामन्योन्यासंसृष्टानां तत्कार्यासमर्थानां संसर्गलक्षणसामर्थ्यं विधायैकैकां त्रिवृतमकरोदिति यावत् ।

नन्वेव "मनेन जीवेनात्मने"ति सामानाधिकरण्यस्य मुख्यताभङ्ग इति चेन्न । ब्रह्मणः सर्वात्मत्वेन सर्वशब्दवाच्यत्वात् सामानाधिकरण्यं मुख्यमेवेति ।

अत्र ये जीवब्रह्मणोरत्यन्ताभेदमभ्युपगच्छन्ति, ते प्रष्टव्याः । सृष्टेः प्राक् प्रलयसमयेऽनभिव्यक्तनामरूपकस्य जीवस्य जीवात्मना सद्भावो न वेति ।

नाद्यः । अद्वैतभङ्गात् । ब्रह्मण एव जीवभावापत्त्या प्रवेश इति सिद्धान्तभङ्गात् । सजातीयविजातीयस्वगतभेदशून्यं निर्विशेषं ब्रह्मासीदिति "सदेव सोम्ये"ति श्रुत्यर्थ इत्युपक्रमवाक्यार्थसिद्धान्तभङ्गाच्च ।

न द्वितीयः । जीवस्याजत्वानादित्वभङ्गात् । तद्बोधकशास्त्रव्याकोपाच्च । कृतनाशाकृताभ्यागमप्रसङ्गाच्च ।

किंच, "सदेवे"ति वाक्यस्योक्तलक्षणनिर्विशेषपरत्वाङ्गीकारे "तदैक्षत बहु स्यां प्रजायेये"त्यादिश्रुतिप्रतिपादितेक्षणबहुभवनसंकल्पाश्रयस्य तत्पूर्वकसृष्टिकर्तुरभावेन सृष्ट्यभावप्रसङ्गः । वाक्यस्य निर्विषयत्वापत्त्या बाधप्रसङ्गश्च नालोच्यते वैदिकाभिमानिभिर्देवानांप्रियैः ।

यच्च कैश्चित्, "अनेन जीवेने"त्येत"दनुप्रविश्ये"त्यन्तेन संबध्यते, आनन्तर्यात्, न "व्याकरवाणी"त्यनेनेति श्रुत्यक्षराणि योजितानि । तदप्यपेशलम् । तदानीं तन्मते जीवस्याभावात् । अन्यथाद्वैतसिद्धान्तभङ्गात् ।

किंच, क्त्वाप्रत्ययेन समानकर्तृकत्वप्रतीतिबाधप्रसङ्गाच्च ।

यत् तु चारेण परसैन्यं प्रविश्येत्यादि व्याख्यातम् । तन्महत् क्षुद्रम् । दृष्टान्तवैषम्योक्त्या पूर्वमेव निरस्तत्वात् । अत्यन्तभेदपरत्वे ब्रह्मणो जगदुपादानत्वाभावप्रसङ्गात् । तथात्वे चावैदिकतार्किकादिपक्षे प्रवेशात् ।

अन्यैस्तु "अनेन जीवेने"त्यस्य जीवविशिष्टेनेति व्याख्यानमुक्तम् । तदप्यपेशलम् । विशिष्टवादस्य पूर्वमेव निरस्तत्वादित्यलं विस्तरेण ॥ २० ॥

अथ त्रिवृत्कृतानां तेजोऽबन्नानां कार्यविभागमाह ॥

॥ मांसादि भौमं यथाशब्दमितरयोश्च ॥ २१ ॥

भूमेस्त्रिवृत्कृतायाः पुरुषेण भुज्यमानाया इदं भौमं मांसादि कार्यं यथाशब्दं श्रुतिरूपशब्दनिरूप्यमवगन्तव्यम् । "अन्नमशितं त्रेधा विधीयते, तस्य यः स्थविष्ठो धातुस्तत् पुरीषं भवति, मध्यमं मांसम्, अणिष्ठं तु मन एवे"ति श्रुतेः । एवमितरयोरप्तेजसोश्च कार्यमपि बोध्यम् । मूत्रं लोहितं प्राणश्चेत्यपां कार्यम् । अस्थि मज्जा वाक् च तेजसः कार्यमित्यर्थः ॥ २१ ॥

ननु सर्वं भूतभौतिकवस्तुमात्रं त्रिवृत्कृतमेव । तर्हीदं भूमेः कार्यमिदमपामिदं तेजस इति भेदनिर्देशासंभवप्रसङ्गो दुर्वारः । सर्वेषां सर्वत्र सत्त्वादित्याशङ्कां परिहरन्नाह ॥

॥ वैशेष्यात् तु तद्वादस्तद्वादः ॥ २२ ॥

तुशब्दः शङ्कानिरासार्थः । विशेषस्य भावो वैशेष्यम् । भागभूयस्त्वमिति यावत् । तस्य पृथिव्यादौ दर्शनात् तद्वादः, स तेजोऽबन्नविशेषवादो भौतिकवस्तुविशेषवादश्च सूपपन्न इत्यर्थः । द्विरुक्तिरध्यायपरिसमाप्त्यर्था ॥ २२ ॥

अप्रतर्क्याय हरये रमाकान्ताय विष्णवे ।
श्रीकृष्णाय नमस्तेऽस्तु निर्दोषगुणशालिने ॥ १ ॥

इति श्रीसनकसंप्रदायप्रवर्तकाद्याचार्यश्रीनिम्बार्कमतानुयायिश्रीमन्मुकुन्दचरणपद्ममकरन्दभृङ्गेण श्रीमत्केशवकाश्मीरिभट्टेन संगृहीतायां वेदान्तकौस्तुभप्रभाख्यायां ब्रह्मसूत्रवृत्तौ द्वितीयाध्यायस्य चतुर्थपादविवृतिः समाप्ता ॥ २ ॥ ४ ॥ :: ::

॥ अथ वेदान्तकौस्तुभप्रभायाः ॥

॥ तृतीयाध्यायस्य ॥

॥ प्रथमपादारम्भः ॥

साधनोपाययुक्तानां भक्तानां पुरुषोत्तमः ।
ददाति वाञ्छितं सर्वं वर्ण्यन्ते तान्यत.स्त्विह ॥

इत्थं द्वितीयेऽध्याये श्रुतिविरुद्धस्मृतीनां तर्काणां च भ्रममूलत्वं प्रदर्श्य श्रुतीनामितरेतरविरोधाभासं निराकृत्य समन्वयाविरोधो निर्णीतः । तेन च श्रीपुरुषोत्तमस्यैव परब्रह्मणो मुमुक्षुध्येयस्य निखिलजगदेककारणत्वं वेदान्ताः प्रतिपादयन्तीति स्थापितम् । अथेदानीमस्मिंस्तृतीयाध्याये तत्प्राप्त्युपायभूतसाधनानि निरूप्यन्ते । तानि च कर्मज्ञानभक्तिप्रपत्त्यादिरूपाणि श्रीपुरुषोत्तमाचार्यपादैर्विस्तरेण भाषितानीत्यत्रोपरम्यते ।

इयं तावच्छ्रेयःसाधनप्रक्रिया । आदौ जन्मसमये पुंसि भगवतः श्रीमुकुन्दस्य कृपाकटाक्षो मुमुक्षोत्पादेनासाधारणहेतुभूतः । ततः सात्त्विकं मुमुक्षार्हं जन्म । मुमुक्षायां सत्यां तत्साधने स्वाधिकारानुरूपं यतते ।

तत्रादौ यथाधिकारभगवदर्पितनिष्कामकर्मयोगः । तेन भगवदीयानुग्रहसहकृतमनस्कस्य मुमुक्षोर्वैराग्यादिपूर्वकजिज्ञासया श्रवणादिलक्षणया तत्स्वरूपादिविषयकपरोक्षज्ञानम् । ततो ध्यानपरिपाकजन्या परा भक्तिपर्यायरूपा ध्रुवा स्मृतिः । तया च तदनुग्रहेण तत्साक्षात्कारः । ततो मोक्ष इति ।

तत्र मोक्षोपायश्च प्राप्यवस्त्वतिरिक्तवैतृष्ण्यम् । प्राप्यतृष्णा चेति । तत्सिद्धये प्रथमद्वितीयपादयोरारम्भः ।

तत्र प्रथमे पादे पञ्चाग्निविद्यामाश्रित्य संसारिजीवस्य लोकगत्यागतिरूपदोषाः प्रदर्श्यन्ते वैराग्यार्थम् । "तस्माज्जुगुप्सेते"ति श्रुतेः ।

तत्रायं जीवो देहाद्देहान्तरं गच्छन् देहबीजभूतैर्भूतसूक्ष्मैः संपरिष्वक्तो गच्छति, उतासंपरिष्वक्त इति संशयेऽसंपरिष्वक्त इति पूर्वः पक्षः । स्वर्गे नरके वा यत्र फलमनुभूयते, तत्रैव भूतानि लभ्यन्त इति सांख्यसिद्धान्तादिति प्राप्ते स्वसिद्धान्तमाह ॥

॥ तदन्तरप्रतिपत्तौ रंहति संपरिष्वक्तः प्रश्ननिरूपणाभ्याम् ॥ १ ॥

तदनन्तरप्रतिपत्तौ देहाद्देहान्तरप्रवेशे देहबीजैर्भूतसूक्ष्मैः संपरिष्वक्तः परिवेष्टितो जीवो रंहति गच्छति। कुतः। "प्रश्न"ेति। प्रश्नस्तावत्। छान्दोग्ये पञ्चाग्निविद्यायां श्वेतकेतुं प्रति पाञ्चालः प्रवाहणः कर्मिणां गन्तव्यदेशादिप्रश्नान् कृत्वेदमपि पृष्टवान्। "वेत्थ यथा पञ्चम्यामाहुतावापः पुरुषवचसो भवन्ती"ति। निरूपणं नाम प्रतिवचनम्, द्युपर्जन्यपृथिवीपुरुषयोषिद्रूपेषु पञ्चस्वग्निषु श्रद्धासोमवृष्ट्यन्नरेतोरूपाः पञ्चाहुतीर्दर्शयित्वा, "इति तु पञ्चम्यामाहुतावापः पुरुषवचसो भवन्ती"ति। अतः प्रश्नप्रतिवचनाभ्यां देहबीजभूतसूक्ष्मैः सहैव तत्र तत्र गच्छतीत्यवगम्यते ॥ १ ॥

नन्वापः पुरुषवचस इत्युक्ते केवलाभिरद्भिर्वेष्टनं श्रुतम्। तत् कथं सर्वैर्भूतसूक्ष्मैर्वेष्टनमित्यत्राह ॥

॥ त्र्यात्मकत्वात् तु भूयस्त्वात् ॥ २ ॥

चोद्यनिवृत्त्यर्थस्तुशब्दः। त्रिवृत्करणेनापां त्र्यात्मकत्वादन्नतेजसोरपि परिग्रहः। भूयस्त्वाद्बाहुल्यात् पञ्चम्यामाहुतावाप इत्युक्तम्। शुक्रशोणितेऽपां बाहुल्यदर्शनात् ॥ २ ॥

॥ प्राणगतेश्च ॥ ३ ॥

इतश्च भूतसूक्ष्माणां गमनमित्यवगम्यते। प्राणानामिन्द्रियाणां जीवेन सह गमनश्रुतेः। "तमुत्क्रामन्तं प्राणोऽनूत्क्रामति प्राणमनूत्क्रामन्तं सर्वे प्राणा अनूत्क्रामन्ती"ति,

"मनःषष्ठानीन्द्रियाणि प्रकृतिस्थानि कर्षति।
शरीरमेव चाप्नोति यच्चाप्युत्क्रामतीश्वरः॥
गृहीत्वैतानि संयाति वायुर्गन्धानिवाशयात्"।

इति स्मरणाच्च, निराश्रयाणां च तेषां गतिरनुपपन्ना। अतस्तदाश्रयभूतसूक्ष्माणामपि गतिरभ्युपगन्तव्या ॥ ३ ॥

॥ अग्न्यादिगतिश्रुतेरिति चेन्न भाक्तत्वात् ॥ ४ ॥

"यत्रास्य पुरुषस्य मृतस्याग्निं वागप्येति, वातं प्राणश्चक्षुरादित्य"मित्येवं वाक्प्राणादीनामग्न्यादिगतिश्रुतेर्न जीवेन सह प्राणानां गमनमिति चेन्न। भाक्तत्वात्। भज्यते, मुख्या वृत्तिर्यया गौण्या वृत्त्या सा भक्तिः, तत्र भवं भाक्तम्। वागादीनामग्न्यादिगमनश्रवणमौपचारिकम्, अग्न्यादीनामधिष्ठातृत्वनिवृत्त्यर्थम्। लोमकेशयोर्गत्यदर्शनात्। "ओषधीर्लोमानि वनस्पतीन् केशान्" इति ॥ ४ ॥

॥ प्रथमेऽश्रवणादिति चेन्न ता एव ह्युपपत्तेः ॥ ५ ॥

प्रथमेऽग्नौ द्युलोकाख्ये "तस्मिन्नेतस्मिन्नग्नौ देवाः श्रद्धां जुह्वती"ति प्रत्ययविशेषरूपायाः श्रद्धायाः श्रवणादपामश्रवणात् कथं पञ्चम्यामाहुतावपां पुरुषभाव इति चेन्नैष दोषः। हि यतस्ता एवापः श्रद्धाशब्देनोच्यन्ते, याः प्रश्न उपन्यस्ताः। कुतः। उपपत्तेः। उपक्रमोपसंहारयोरेवमुपपत्तेः। अन्यथा प्रश्नप्रतिवचनयोरेकवाक्यता न स्यात्। सादृश्यप्रयोगोपपत्तेश्च। "श्रद्धा वा आपः श्रद्धामेवारभ्य यज्ञेन यजत"इति प्रयोगदर्शनात् ॥ ५ ॥

॥ अश्रुतत्वादिति चेन्नेष्टादिकारिणां प्रतीतेः ॥ ६ ॥

ननु प्रश्नप्रतिवचनाभ्यामापः श्रद्धादिक्रमेण पञ्चम्यामाहुतौ पुरुषभावं प्रतिपद्यन्त इति श्रूयते, न तु तत्संपरिष्वक्तो जीवः श्रूयते। अतस्तत्परिष्वक्तो जीवो गच्छतीति वक्तुमशक्यमिति चेन्न। कुतः। इष्टादिकारिणां प्रतीतेः। तस्मिन्नेव वाक्ये ह्युत्तरत्र "अथ य इमे ग्राम इष्टापूर्ते दत्तमित्युपासते, ते धूममभिसंभवन्ती"त्युपक्रम्य धूमादिना पितृयानेन यथा चन्द्रप्राप्तिं कथयति। "आकाशाच्चन्द्रमसमेष सोमो राजे"ति,त इह प्रतीयन्ते। "तस्मिन्नेतस्मिन्नग्नौ देवाः श्रद्धां जुह्वति तस्या आहुतेः सोमो राजा संभवती"ति भूतसूक्ष्मपरिवेष्टितं जीवं द्युलोके फलभोगाय देवाः प्राणाः प्रक्षिपन्ति, सोऽयं प्रक्षेपो होम इहाभिप्रेतः ॥ ६ ॥

ननु "तद्देवानामन्नं तं देवा भक्षयन्ती"ति चन्द्रकिरणारब्धदेहानां कथमन्नभाव इत्याशङ्क्याह ॥

॥ भाक्तं वानात्मवित्त्वात् तथाहि दर्शयति ॥ ७ ॥

वेति चोद्यव्यावृत्त्यर्थः। भाक्तमेषामन्नत्वं न मुख्यम्। "न ह वै देवा अश्नन्ति, न पिबन्ति, एतदेवामृतं दृष्ट्वा तृप्यन्ती"ति चर्वणनिषेधात्। "यथा राज्ञां विशोऽन्नं, विशामन्नं पशव"इति, अनात्मवित्त्वाच्च ह्येषां केवलकर्मिणां गुणभावो देवान् प्रति। तथाहि दर्शयति श्रुतिः, तेषामेवोपभोग्यत्वम्। "अथ योऽन्यां देवतामुपास्तेऽन्योऽसावन्योऽहमस्मीति, न स वेद, यथा पशुरेवं स देवाना"मिति स्मृतिरप्यनात्मविदां देवोपभोग्यत्वमात्मविदां च ब्रह्मप्राप्तिं दर्शयति।

"देवान् देवविदो यान्ति मद्भक्ता यान्ति मामपि।

इति। तस्माद्भूतसूक्ष्मैः संपरिष्वक्त एव जीवो गच्छतीति युक्तमुक्तम् ॥ ७ ॥

एवमविदुषामारोहणप्रकारो निरूपितः। अथेदानीमवरोहणं तत्प्रकारं चाह ॥

॥ कृतात्ययेऽनुशयवान् दृष्टस्मृतिभ्यां यथेतमनेवं च ॥ ८ ॥

इष्टादिकारिणां धूमादिवर्त्मना चन्द्रमण्डलमारुह्य तत्र भुक्तभोगानां "तस्मिन् यावत् संपातमुषित्वाथैतमेवाध्वानं पुनर्निवर्तन्त"इत्यादिनावरोहः श्रूयते। स किं निरनुशयानां तेषां भवत्युत सानुशयानामिति विशये निरनुशयानामिति

पूर्वः पक्षः । "यावत् संपात"मित्युक्तेः । संपतन्त्यनेनेति संपातं कर्म, यावत् तदस्ति, तद्भुक्त्वेत्यर्थः ।

"प्राप्यान्तं कर्मणस्तस्य यत् किंचेह करोत्ययम् ।
तस्माल्लोकात् पुनरेत्यस्मै लोकाय कर्मणे" ॥

इति श्रवणादित्येवं प्राप्तेऽभिधीयते । कृतस्य यागादेरत्यये भोगेन क्षये सत्यनुशयवान्,कर्तारमनुशेरते फलोपभोगाय भुक्तयः, सोऽनुशयशिष्टं कर्म, तद्वानवरोहति । कुतः । दृष्टस्मृतिभ्यां, श्रुतिस्मृतिभ्याम् । श्रुतिस्तावत्,"तद्य इह रमणीयचरणा अभ्याशो ह यत् ते रमणीयां योनिमापद्येरन्, ब्राह्मणयोनिं वा क्षत्रिययोनिं वा वैश्ययोनिं वा,अथ य इह कपूयचरणा अभ्याशो ह यत् ते कपूयां योनिमापद्येरन्, श्वयोनिं वा, शूकरयोनिं वा, चाण्डालयोनिं वे"ति । चरणशब्द आचरणीयकर्मपरः । कपूयचरणाः कुत्सितकर्माणः । स्मृतिरपि । वर्णा आश्रमाश्च स्वकर्मनिष्ठाः प्रेत्य कर्मफलमनुभूय ततः शेषेण विशिष्टदेशजातिकुलरूपायुःश्रुतवृत्तवित्तसुखमेधसो जन्म प्रतिपद्यन्त"इति सानुशयानामवरोहं दर्शयति । स्वर्गप्राप्तिहेतुभूतज्योतिष्टोमादिकर्मभ्यः कर्मान्तरमनुशयपदवाच्यम् । शेषशब्दश्चोपयुक्तात् कर्मणः कर्मान्तराभिप्रायो न हि स्वर्गार्थस्तयकर्मणः कश्चिच्छेषः शक्यते कल्पयितुम् । श्रुतिप्रमाणत्वादस्यार्थस्य नानुमानमत्र क्रमते ।

तस्माद्यावत् संपातमिति, यत् किंचेह करोत्ययमिति चैवं द्रष्टव्यम् । यावदामुष्मिकफलं कर्म, तत् सर्वं तत्रैव क्षपयित्वावशिष्टेनैहिकफलेन जपहोमादिनावरोहतीति । यथा कश्चित् सेवकः सकलैः सेवोपकरणै राजकुलं प्रविष्टश्चिरावस्थानादुपक्षीणबहूपकरणश्छत्रपादुकादिमात्रपरिच्छदः स्यातुमशक्नुवन् निवर्तत इत्येवमनुशयमात्रपरिग्रहो न चन्द्रमण्डले स्यातुं शक्नोतीति । "यथेतमनेवं च" । आरोहणप्रकारेण प्रकारान्तरेण च पुनर्निवर्तन्त इत्यर्थः । पितृयाने धूमाकाशयोर्निर्देशेनावरोहश्रवणादारोहणानुसारोऽवरोहः । तद्विरुद्धवाय्वादिश्रवणाच्चान्यथापीति ॥ ८ ॥

॥ चरणादिति चेन्नोपलक्षणार्थेति कार्ष्णाजिनिः ॥ ६ ॥

ननु रमणीयचरणाः कपूयचरणा इत्यत्र चरणमाचारशीलं वृत्तमिति नार्थान्तरम् ।

"अद्रोहः सर्वभूतेषु कर्मणा मनसा गिरा ।
अनुग्रहश्च ज्ञानं च शीलमेतद्विदुर्बुधाः ॥

इति स्मृतेः । ततश्च न चरणशब्देन पुण्यापुण्यरूपं कर्मोच्यते । वेदेऽपि चरणकर्मणी भेदेन व्यपदिश्येते । "यान्यनवद्यानि कर्माणि तानि सेवितव्यानि, नो इतराणि । यान्यस्माकं सुचरितानि तानि त्वयोपास्यानि, नो इतराणीति । अतश्च न कर्मणावरोहो वर्ण्यते, किंतु चरणाच्छीलाद्योनिविशेषप्राप्तिरिति चेत् । तन्न । चरणश्रुतिः कर्मोपलक्षणार्थेति कार्ष्णाजिनिराचार्यो मन्यते स्म । सुखदुःखे हि पुण्यापुण्यरूपकर्मफले । न हि केवलादाचारात् तयोः प्राप्तिः संभवति ॥ ९ ॥

॥ आनर्थक्यमिति चेन्न तदपेक्षत्वात् ॥ १० ॥

आचारस्यानर्थक्यमेवं सति स्यादिति चेन्न । तदपेक्षत्वात् । सुखसाधनपुण्यकर्माधिकारस्याचारपूर्वकत्वात् ।

"आचारहीनं न पुनन्ति वेदाः" ।
"संध्याहीनोऽशुचिर्नित्यमनर्हः सर्वकर्मसु" ।

इत्यादिस्मृतेः ॥ १० ॥

॥ सुकृतदुष्कृते एव तु बादरिः ॥ ११ ॥

सुकृतदुष्कृते एव चरणशब्देनोच्येते । चर्यत इति चरणं कर्म । न हि लोकवेदयोश्चरणशब्दः शीले प्रसिद्धः । तुशब्द उपलक्षणार्थनिवृत्त्यर्थः । न हि मुख्ये संभवति लक्षणाश्रयणीया । कर्मचरणयोर्भेदव्यपदेशस्तु ब्राह्मणपरिव्राजकन्यायेनेति बादरिराचार्यो मेने ॥ ११ ॥

॥ अनिष्टादिकारिणामपि च श्रुतम् ॥ १२ ॥

जीवस्य गतिस्त्रिधा । अर्चिरादिका, धूमादिका,यमवशगा च । तत्र विदुषां मोक्षहेतुका प्रथमा । सा च फलाध्याये वक्ष्यते । अविदुषां पुण्यकर्मणां च धूमादिकात्र निरूपिता । तदुभयविधुराणां तु नरकाद्यापत्तिश्चेदानीं निरूप्यते । तथाहि, ये विहितं न कुर्वन्ति, ये च निषिद्धं कुर्वन्ति, त उभयेऽनिष्टादिकारिणः, तेऽपि चन्द्रमसं गच्छन्ति, उत नेति संशये तेषामपि श्रुतं गमनं कौषीतक्याम्नाये, "ये वै के चास्माल्लोकात् प्रयन्ति चन्द्रमसमेव ते सर्वे गच्छन्ति"इति सर्वेषामविशेषेण गतिश्रवणात् ॥ १२ ॥

ननु सुकृतिनां दुष्कृतकर्मणां च समानफलत्वमयुक्तमित्याशङ्क्याह ॥

॥ संयमने त्वनुभूयेतरेषामारोहा-
वरोहौ तद्गतिदर्शनात् ॥ १३ ॥

तुशब्दः शङ्कानिरासार्थः । संयमने यमालये दुःखमनुभूयेतरेषामनिष्टादिकारिणां चन्द्रारोहावरोहौ । कुतः । तद्गतिदर्शनात् । दर्शयति च श्रुतिस्तेषां यमवश्यताम् ।

"न सांपरायः प्रतिभाति बालं
प्रमाद्यन्तं वित्तमोहेन मूढम् ।
अयं लोको नास्ति पर इति मानी
पुनः पुनर्वशमापद्यते मे ॥

इति "वैवस्वतं संयमनं जनानां यमं राजान"मिति ॥ १३ ॥

॥ स्मरन्ति च ॥ १४ ॥

स्मरन्ति च सर्वेषां यमवश्यत्वं पराशरादयः ।
"सर्वे चैते वशं यान्ति यमस्य भगवन् किल" ।
इत्यादिषु ॥ १४ ॥

॥ अपि च सप्त ॥ १५ ॥

अपिशब्दः स्मरणस्य समुच्चयार्थः । पापिनां गन्तव्यत्वेन सप्त नरकान् रौरवमहारौरवप्रभृतीन् स्मरन्ति ॥ १५ ॥

ननु सप्तसु नरकेषु कथं यमयातनाप्राप्तिः । यतो रौरवादिषु चित्रगुप्तादीनामन्येषामधिष्ठातॄणां स्मरणादित्यत आह ॥

॥ तत्रापि च तद्व्यापारादविरोधः ॥ १६ ॥

रौरवादिष्वपि यमव्यापारादाज्ञाकरणादविरोधः ॥ १६ ॥

इति प्राप्ते राद्धान्तः ॥

॥ विद्याकर्मणोरिति तु प्रकृतत्वात् ॥ १७ ॥

तुशब्दः पक्षनिवृत्तौ । विद्याकर्मविहीनानां देवयानपितृयानगती न स्तः । कारणाभावात् । पञ्चाग्निविद्यायां "वेत्थ यथासौ लोको न संपूर्यत" इति प्रश्नस्य प्रतिवचने, "अथैतयोः पथोर्न कतरेण च न तानीमानि क्षुद्राण्यसकृदावर्तीनि भूतानि भवन्ति, जायस्व म्रियस्वेत्येतत् तृतीयं स्थानं तेनासौ लोको न संपूर्यत" इत्यनिष्टादिकारिणामनवरोहं दर्शयति । "पथो"रिति च विद्याकर्मणोर्निर्देशः । तयोः प्रकृतत्वात् । "तद् य इत्थं विदु"रिति देवयानः पन्थाः । "इष्टापूर्ते दत्त"मिति पितृयाणः, तयोरन्यतरेणापि येन गच्छन्ति, तानीमानि तृतीयस्थानभाञ्जि भूतानीति ॥ १७ ॥

नन्वेवं तर्हि तेषां चन्द्रगमनाभावे शरीरयोगस्यैवासंभवः । पञ्चमाहुत्यभावादित्यत आह ॥

॥ न तृतीये तथोपलब्धेः ॥ १८ ॥

तृतीये स्थाने शरीरारम्भाय न पञ्चमाहुत्यपेक्षा । कुतः । तथोपलब्धेः । तथा तेनोक्तप्रकारेण "जायस्व, म्रियस्वे"त्येतत् तृतीयं स्थानं, तेनासौ लोको न संपूर्यत इति तृतीयस्थानस्य केवलपापकर्मणो द्युलोकारोहावरोहाभावेन द्युलोकासंपूर्तिवचनादस्य तृतीयस्थानस्य शरीरारम्भाय न पञ्चमाहुत्यपेक्षा ।

न चैवं पञ्चमाहुतिवाक्यबाध इति वाच्यम् । तस्य पुरुषवचस्त्वप्रतिपादनमात्रेणोपक्षीणतयान्यनिवारकत्वे मानाभावात् । अवधारणादर्शनात् । अन्यथा वाक्यभेदप्रसङ्गात् ॥ १८ ॥

॥ स्मर्यतेऽपि च लोके ॥ १९ ॥

अपिच, लोके पुण्यकर्मणां धृष्टद्युम्नद्रौपदीप्रभृतीनां पञ्चमाहुत्यनपेक्षमयोनिजं जन्म स्मर्यते ॥ १९ ॥

॥ दर्शनाच्च ॥ २० ॥

इतश्च चतुर्विधो भूतग्रामो जरायुजाण्डजस्वेदजोद्भिज्जलक्षणः । तत्र योषित्पुरुषसंबन्धमन्तरेण स्वेदस्थावरयोरुत्पत्तिदर्शनाच्च पञ्चमाहुत्यपेक्षा ॥ २० ॥

ननु "त्रीण्येव बीजानि भवन्त्यण्डजं जीवजमुद्भिज्ज"मित्यत्र त्रिविधो भूतग्रामः श्रूयते कथं तस्य चतुर्विधत्वमित्यत्राह ॥

॥ तृतीयशब्दावरोधः संशोकजस्य ॥ २१ ॥

तृतीयेनोद्भिज्जशब्देन संशोकजस्य स्वेदजस्यावरोधोऽन्तर्भावः । स्वेदजोद्भिज्जयोर्भूम्युदकोष्मप्रभवतुल्यत्वात् ॥ २१ ॥

॥ तत्स्वाभाव्यापत्तिरुपपत्तेः ॥ २२ ॥

इष्टादिकारिणां भूतसूक्ष्मपरिवेष्टितसानुशयानामवरोह उक्तः । अथ तत्प्रकारश्चिन्त्यते । "अथैतमेवाध्वानं पुनर्निवर्तन्ते, यथेतमाकाशमाकाशाद्वायुं वायुर्भूत्वाभ्रं भवत्यभ्रं भूत्वा मेघो भवति, मेघो भूत्वा प्रवर्षती"त्यत्र संशयः । किमाकाशादिप्रतिपत्तौ देवमनुष्यादिभाववदाकाशादिभावः, आहोस्वित् सादृश्यप्राप्तिरिति । तत्राकाशादिभाव इति पूर्वः पक्षः । राद्धान्तस्तु तत्स्वाभाव्यापत्तिराकाशादिसाम्यप्राप्तिरित्यर्थः । कुतः । उपपत्तेः । न ह्यन्यस्यान्यभाव उपपद्यते । तत्सादृश्यं तु युज्यते ॥ २२ ॥

॥ नातिचिरेण विशेषात् ॥ २३ ॥

आकाशवायुधूमाभ्रमेघवर्षप्राप्तौ किं द्राघिष्ठं कालं सादृश्येनावस्थानमुताल्पकालमिति विशयः । अल्पकाले हेत्वभावाद् द्राघिष्ठमिति प्राप्ते ब्रूमः । नातिचिरेणाल्पेन कालेनावरोहः । यावद्व्रीह्यादिप्राप्तिरित्यर्थः । कुतः । विशेषश्रवणात् । "अतो वै खलु दुर्निष्प्रपतर"मिति । एकस्तकारश्छान्दसत्वाल्लुप्तो ज्ञेयः । व्रीह्यादिभावादुत्तरं दुःखतरनिःसरणमिति वदन् सर्वत्र पूर्वत्र चिरं कालं बोधयति ॥ २३ ॥

॥ अन्याधिष्ठिते पूर्ववदभिलापात् ॥ २४ ॥

"त इह व्रीहियवा ओषधिवनस्पतयस्तिलमाषा इति जायन्ते" इति श्रूयते, तत्र किं व्रीह्यादिशरीरा जायन्ते उत क्षेत्रज्ञान्तराधिष्ठिते व्रीह्यादौ संसर्गमात्रं प्रपद्येरन्निति विशयः । व्रीह्यादिदेहभोक्तारो जायन्त इति पूर्वः पक्षः । जनेर्मुख्यार्थत्वोपपत्तेः । इति प्राप्ते सिद्धान्तः । अन्याधिष्ठिते व्रीह्यादिशरीरे जीवविशेषाधिष्ठिते व्रीह्यादौ संसर्गमात्रं प्राप्नुवन्त्यनुशयिनो, न तु व्रीह्यादिशरीरित्वम् । कुतः । "पूर्वव"दिति । आकाशादिवत् तेषामपि कथनात् । तत्कार्यजन्यत्वाभावाच्च स्थावरयोनित्वमित्यर्थः ॥ २४ ॥

॥ अशुद्धमिति चेन्न शब्दात् ॥ २५ ॥

अत्र सांख्यश्चोदयति । कर्म द्विविधम् । शुद्धमशुद्धं च । तत्र शुद्धमहिंसादि । द्वितीयं ज्योतिष्टोमादि । पशुहिंसावत्त्वात् । अनुशयिनां ज्योतिष्टोमादिकर्तृत्वेनाशुद्धव्यामिश्रकर्मफलभोगाय मुख्यमेव स्थावरं जन्मेति प्राप्ते राद्धान्तः । शुद्धमेव ज्योतिष्टोमादि कर्म । कुतः । शब्दात् । शास्त्रप्रमाणकत्वाद्धर्माधर्मयोः । "सामान्यविधेर्विशेषविधिर्बलीयान्", "न हिंस्यात् सर्वा भूतानी"ति सामान्यनिषेधस्य बाह्यहिंसाविषयकत्वेन सावकाशत्वात् । क्रतुगतहिंसाविधेस्तु निरवकाशत्वेन बलीयस्त्वात् । तेन सामान्यनिषेधस्य बाधो युक्त एव । अतो गौणमत्र जन्मेति ॥ २५ ॥

॥ रेतःसिग्योगोऽथ ॥ २६ ॥

इतश्च व्रीह्यादिसंश्लेषमात्रम् । व्रीह्यादिभाववचनानन्तरं, "यो यो ह्यन्नमत्ति, यो रेतः सिञ्चति, तद्भूय एव भवती"ति श्रुतेः । रेतःसिग्योगो यथा तद्योगमात्रं वक्ति, तद्वद्व्रीह्यादिभावेऽपि तद्योगमात्रमेव, "भूय एव भवति," तदाकृतिर्भवतीत्यर्थः । मनुष्येण भक्षितो मनुष्यो जायते, पश्वादिना भक्षितः पश्वादिर्भवतीति यावत् ॥ २६ ॥

॥ योनेः शरीरम् ॥ २७ ॥

योनिप्राप्तेः पश्चादेवानुशयिनां देहप्राप्तिः । तत्रैव च सुखदुःखादिभोगस्य सत्त्वात् । ततः पूर्वं ह्याकाशादिप्राप्तौ तद्योगमात्रमेवेति सिद्धम् ॥ २७ ॥

इति श्रीसनकसंप्रदायप्रवर्तकाद्याचार्यश्रीनिम्बार्कमतानुयायिश्रीमन्मुकुन्दचरणपद्ममकरन्दभृङ्गेण श्रीमत्काश्मीरिकेशवभट्टेन संगृहीतायां वेदान्तकौस्तुभप्रभाख्यायां ब्रह्मसूत्रवृत्तौ तृतीयाध्यायप्रथमपादविवरणं समाप्तिमगात् ॥ ३ ॥ १ ॥ :: ::

॥ अथ वेदान्तकौस्तुभप्रभायाः ॥

॥ तृतीयाध्यायस्य ॥

॥ द्वितीयपादारम्भः ॥

॥ संध्ये सृष्टिराह हि ॥ १ ॥

इत्थं जाग्रदवस्थायां जन्ममरणस्वर्गनरकगमनादिदुःखजातं जीवस्य विरागार्थं प्रपञ्चितम् ।

एतेनात्मानात्मविवेकोऽपि सिद्धः ।

अथेदानीं तयोर्विवेकविरागयोर्दार्ढ्यार्थं स्वप्नाद्यवस्था निर्णीयन्ते । तत्र स्वप्ने सृष्टिः श्रूयते बृहदारण्यके । "न तत्र रथा न रथयोगा न पन्थानो भवन्ति, अथ रथान् रथयोगान् पथः सृजते, न तत्रानन्दा मुदः प्रमुदो भवन्ति, अथानन्दान् मुदः प्रमुदः सृजते, न तत्र वेशन्ताः पुष्करिण्यो नद्यः स्रवन्त्यो भवन्त्यथ वेशन्तान् पुष्करिण्यः स्रवन्त्यः सृजते स हि कर्ते"ति । तत्र संशयः । सा सृष्टिः किं जीवकृता, उत परमेश्वरकृतेति । जीवनिर्मितेति । कुतः । संध्ये स्वप्नस्थाने । "संध्यं तृतीयं स्वप्नस्थान"मिति श्रुतेः । हि यतः सृजते । "स हि कर्ते"ति श्रुतिराह । स्वप्नदृग्जीवस्यैव तत्र प्रतीयमानत्वात् ॥ १ ॥

॥ निर्मातारं चैके पुत्रादयश्च ॥ २ ॥

किंच, एके शाखिनः स्वप्नार्थानां निर्मातारं जीवमधीयते, "य एष सुप्तेषु जागर्ति, कामं कामं पुरुषो निर्मिमाणः" इति । अत्र कामशब्देन काम्यन्त इति कामाः पुत्रादय एवोच्यन्ते, नेच्छामात्रम् । "सर्वान् कामान् छन्दतः प्रार्थयस्व शतायुषः पुत्रपौत्रान् वृणीष्वे"ति प्रक्रमात् । अतो जीवनिर्मितैव स्वप्नसृष्टिः । उपकरणाद्यभावेऽपि तस्य प्रजापतिवाक्ये सत्यसंकल्पत्वश्रवणेन सृष्ट्युपपत्तेः ॥ २ ॥

इति प्राप्ते राद्धान्तमाह ॥

॥ मायामात्रं तु कार्त्स्न्येनानभिव्यक्तस्वरूपत्वात् ॥ ३ ॥

तुशब्दः पक्षव्यावृत्त्यर्थः । स्वाप्नसृष्टिः परमेश्वरनिर्मितैव । न जीवकृता । कुतः । यतो मायामात्रम् । मायाशब्द आश्चर्यवाची ।

"जनकस्य कुले जाता देवमायेव निर्मिता" ।

इत्यत्रैवं दर्शनात् । जीवस्योपकरणाद्यभावेन तच्छक्तिशून्यत्वात् । तस्य सत्यसंकल्पत्वादिधर्माणां कार्त्स्न्येनानभिव्यक्तस्वरूपत्वात् । बद्धावस्थायां तिरोधानादित्यर्थः ।

तस्मात् तज्जीवकर्मानुसारेण तदेकैकं जीवानुभवयोग्यमितरसकलपुरुषाननुभूयमानमाश्चर्यरूपं रथादिकं श्रीपुरुषोत्तमेनैव निर्मीयते । तस्य सर्वशक्तिसत्यसंकल्पत्वादिस्वाभाविकधर्मयोगात् ॥ ३ ॥

॥ सूचकश्च हि श्रुतेराचक्षते च तद्विदः ॥ ४ ॥

"यदा कर्मसु काम्येषु स्त्रिय"मिति, "अथ यदा स्वप्ने पुरुषं कृष्णं कृष्णदन्त"मित्यादिना स्वप्नस्येष्टादिसूचकत्वश्रवणाज्जीवकर्तृकत्वं न संभवति । यदि जीवः सृष्टिकर्ता, तर्हि शुभसूचकमेव स्वप्नं दृष्ट्वा सदा सुखमेवानुभवेन्न कदापि दुःखी स्यात् । न हि चेतनः स्वदुःखार्थं कोऽपि यतत इति भावः । स्वप्नाध्यायविदश्च स्वप्नं शुभाशुभयोः सूचकमाचक्षते ।

"आरोहणं गोवृषकुञ्जराणां
स्वप्नेष्वगम्यागमनं च धन्यम्" ।

इति, 'खरयानतैलाभ्यञ्जनान्यधन्यानी'ति, "कामं का-

ष''मिति च परमेश्वरमेव निर्मातारमाह । ''य एष सुप्तेषु जागर्ति'' ।

''तदेव शुक्रं तद्ब्रह्म तदेवामृतमुच्यते ।
तस्मिंल्लोकाः श्रिताः सर्वे तदु नात्येति कश्चन'' ॥

इति वाक्यशेषे परमात्मासाधारणधर्मश्रवणात् । तेषां च जीवे कथमप्यसंभवात् ।

तस्माज्जीवानामल्पतरकर्मानुसारिफलभोगाय तावन्मात्रकालिकं तदेकतमेनानुभाव्यं रथादि परमेश्वर एव सृजतीति । विशेषार्थस्तु पूर्वमेवोक्तः ॥ ४ ॥

ननु जीवस्य सत्यसंकल्पादिकं कुतस्तिरोहितमिति चेत् तत्राह ॥

॥ पराभिध्यानात् तु तिरोहितं ततो ह्यस्य बन्धविपर्ययौ ॥ ५ ॥

तुशब्दः शङ्काच्छेदकः । पराभिध्यानात्, अनादितत्तत्कर्मानुगुणपरमेश्वरसंकल्पादेव तिरोहितमिति ब्रूमः ।

ततस्तत्संकल्पादेव ह्यस्य बन्धमोक्षौ श्रूयेते ।

''संसारबन्धस्थितिमोक्षहेतु'':,

इत्यादिश्रुतेः ।

''बन्धको भवपाशेन भवपाशाच्च मोचकः'' ।

इत्यादिस्मृतेश्च ॥ ५ ॥

॥ देहयोगाद्वा सोऽपि ॥ ६ ॥

सोऽपि तिरोभावोऽपि देहयोगादेव भवति । वा विकल्पे । व्यवस्थितश्च विकल्पः । सृष्टिकाले देहावस्थाचिद्वस्तुसंयोगात् । प्रलये च नामरूपविभागानर्हाचिद्वस्तुसंयोगात् । अतोऽनभिव्यक्तस्वरूपत्वाच्च जीवस्य स्वाप्नसृष्टिकर्तृत्वमिति सिद्धम् ॥ ६ ॥

अथ सुषुप्त्यवस्था श्रूयते । ''अथ यत्रैतत् सुप्तः समस्तः स्वप्नं न विजानाति, आसु तदा नाडीषु सृप्तो भवती''ति । छान्दोग्ये तथा ''अथ यदा सुषुप्तो भवति, यदा न कंचन वेद, तदा हि ता नाम नाड्यो द्वासप्ततिसहस्राणि हृदयात् पुरीततमभिप्रतिष्ठन्ते, ताभिः प्रत्यवसृप्य पुरीतति शेते''इति । ''य एषोऽन्तर्हृदय आकाशस्तस्मिंश्छेते'' इति च । बृहदारण्यके । आकाशशब्दोऽत्र ब्रह्मवाचकः, तथा ''यत्रैतत् पुरुषः स्वपिति नाम, सता सोम्य तदा संपन्नो भवती''ति । नाड्यः पुरीतद्ब्रह्म चेति त्रिविधसुषुप्तिस्थानपराः श्रुतयो दृश्यन्ते । ताः किमन्योन्यनिरपेक्षतया सुषुप्तिस्थानं विकल्पयन्ति, उत परस्परापेक्षतयैकं सुषुप्तिस्थानं प्रतिपादयन्तीति संशयः । निरपेक्षत्वेन प्रतीतेर्युगपदनेकस्थाने वृत्त्यसंभवाच्च विकल्पयन्तीति प्राप्ते,आह ॥

॥ तदभावो नाडीषु तच्छ्रुतेरात्मनि च ॥ ७ ॥

चकारः पुरीतत्समुच्चयार्थः । तदभावः स्वप्नदर्शनाभावः । सुषुप्तिरिति यावत् । स नाडीपुरीतदात्मसु भवति । कुतः । तच्छ्रुतेः । तेषां नाडीपुरीतदात्मनां सुषुप्तिस्थानत्वेन श्रवणात् । तत्र नाडीपुरीततौ प्रासादखट्वास्थानीयौ, ब्रह्म च पर्यङ्कस्थानीयम् । अतो ब्रह्मैव साक्षात् सुषुप्तिस्थानमिति ॥ ७ ॥

॥ अतः प्रबोधोऽस्मात् ॥ ८ ॥

यतो ब्रह्मैव सुषुप्तिस्थानम्, अतोऽस्माद्ब्रह्मणो जीवस्य प्रबोधो जागरितं स्थानप्राप्तिरुपपद्यते,''सत आगम्य न विदुः,सत आगच्छामह''इति ॥ ८ ॥

॥ स एव तु कर्मानुस्मृतिशब्दविधिभ्यः ॥ ९ ॥

किं यः सुप्तः स एव प्रबोधसमये समुत्तिष्ठति तदन्यो वेति विशयः । नियमहेत्वभावादनियम इति पूर्वपक्षे प्राप्त उच्यते ''स एव त्वि''ति । तु शब्दः पक्षव्यावृत्त्यर्थः । यः सुप्तः स एव प्रबोधसमय उत्तिष्ठति । कुतः । ''कर्मे''त्यादि । पूर्वेद्युरर्धे कृतं कर्मानुस्मृत्य परेद्युस्तत्समाप्तये प्रवृत्तिदर्शनात् । योऽहमस्वाप्सं स एवाहं जागर्मीति प्रत्यभिज्ञानात् । ''इमाः सर्वाः प्रजा अहरहर्गच्छन्त्य एतं ब्रह्मलोकं न विदन्ति, त इह व्याघ्रो वा, सिंहो वा, वृको वा, वराहो वा, कीटो वा, पतङ्गो वा, दंशो वा, मशको वा, यद्यद्भवन्ति, तत् तदा भवन्ति'', इत्येवमादिशब्देभ्यश्च । ''अग्निहोत्रं जुहुयात्'', ''आत्मानमुपासीते''त्यादिविधिभ्यश्च । अन्यथाग्निहोत्रादिकर्मस्वर्धकृतेष्वन्यश्चेदुत्तिष्ठति, तदाग्निहोत्रादिश्रवणादिभोगमोक्षसाधनविधायिकाः श्रुतयोऽनर्थकाः स्युः । कृतनाशाकृताभ्यागमप्रसङ्गश्च । अहरहर्जीवानामुत्पत्तिविनाशौ च स्यातामिति भावः ॥ ९ ॥

॥ मुग्धेऽर्धसंपत्तिः परिशेषात् ॥ १० ॥

मुग्धो नाम मूर्च्छितः । स किमवस्थ इति चिन्त्यते । चतस्रोऽवस्थास्तावज्जीवस्य प्रसिद्धाः । जागरितं, स्वप्नः, सुषुप्तिरुत्क्रान्तिरिति । न तु पञ्चमी क्वापि प्रसिद्धास्ति । तत्र केयं मूर्च्छा, आसामन्यतमा, उतावस्थान्तरमिति विशयेऽन्यतमेति पूर्वः पक्षः । अवस्थान्तरकल्पने मानाभावादिति प्राप्ते सिद्धान्तः । मुग्धे मूर्च्छिते मुशलाद्यभिहते पुरुषे या तस्यावस्था, सार्धसंपत्तिः । मरणस्थानस्यार्धं संपद्यते मुग्धः । कुतः । परिशेषात् । जागरादावनन्तर्भावात् ।

तथाहि, न तावत् स्वप्नजागरौ । विशेषज्ञानाभावात् ।

नापि मरणम् । प्राणोष्मणोर्विद्यमानत्वात् ।

नापि सुषुप्तिः । तद्वैलक्षण्यात् । सुषुप्तस्य प्रसन्नवदनत्वनेत्रनिमीलनश्वासप्रमुञ्चनादीनामुपलम्भात् ।

अतः परिशेषान्मरणार्धसंपत्तिर्मूर्च्छा । मरणं च सर्वप्राणादिसंबन्धोपरतिः । सूक्ष्मप्राणदेहसंबन्धेनावस्थितिर्मूर्च्छेति विवेकः । यत् तूक्तम् । "न पञ्चमी क्वापि प्रसिद्धास्ती"ति । नैष दोषः । अस्याः कादाचित्कत्वात् । लोकायुर्वेदयोरर्धसंपत्त्यभ्युपगमाच्च न पञ्चमी गण्यत इति ।

तस्माज्जन्ममरणस्वर्गनरकादिभोगेन स्वप्नादिदुःखभोगेन च तेषु दोषं निश्चित्य, तेभ्यश्च सर्वानात्मवर्गेभ्य आत्मानं विविच्य, ततः सर्वतो विरजाः श्रेयसे यतेतेति तात्पर्यार्थः । 'परीक्ष्य लोकान् कर्मजितान् ब्राह्मणो निर्वेदमायात्, यथेह कर्मजितो लोकः क्षीयत' इत्यादिश्रुतेः ॥ १० ॥

॥ न स्थानतोऽपि परस्योभयलिङ्गं सर्वत्र हि ॥ ११ ॥

दोषदर्शनेन वैराग्योत्पादनार्थं जीवस्यावस्थाविशेषा निरूपिताः ।

अथेदानीं ब्रह्मप्राप्तितृष्णोत्पादनाय ब्रह्मणः समस्तहेयसंबन्धरहितत्वाशेषकल्याणगुणसागरत्वप्रतिपादनाय चेदमारभ्यते ।

तत्र जागरादिस्थानस्थितस्य जीवस्येव तदन्तर्यामितया स्थितस्य ब्रह्मणोऽपि तत्तत्स्थानप्रयुक्ता दोषाः संभवन्त्युत नेति संशये, संभवन्तीति । कुतः । तत्र तत्र शरीरेऽन्तर्यामितया सर्वावस्थास्ववस्थानात् । अतः स्वेच्छया प्रविष्टस्याकर्मवश्यस्यापि नानाविधाशुचिदेहसंबन्धः । छन्दतोऽपि पूयशोणितादिमज्जनं चापुरुषार्थ एवेति । अतः संभवन्ति सर्वे दोषा इति प्राप्त आह । "न स्थानत" इति । परस्य ब्रह्मणः सर्वत्र चेतनाचेतनवस्तुमात्रे शुद्धाशुद्धपदार्थे स्वेच्छया प्रविष्टस्यापि स्थानतश्चेतनाचेतनादिस्थानतश्चेतनादिस्थानभूतैः पदार्थैर्नापुरुषार्थभूतहेयधर्मसंबन्धः । हि यस्मात् सर्वत्र सर्वास्वपि श्रुतिस्मृतिषूभयलिङ्गं ब्रह्माम्नातम् । "तत्र य आत्मापहतपाप्मा सत्यकामः, सत्यसंकल्पः", "यः सर्वज्ञः सर्ववित्", यस्य ज्ञानमयं तपः", "आनन्दं ब्रह्मणो विद्वान्", "स्वाभाविकी ज्ञानबलक्रिया च", "भीषास्माद्वातः पवते", "निष्कलं निष्क्रियं शान्तम्", "अथात आदेशो नेति ने"ति, "अस्थूलमनणु," इत्यादिश्रुतयः ।

"समस्तकल्याणगुणात्मकोऽसौ
स्वशक्तिलेशोद्धृतभूतसर्गः ।
तेजोबलैश्वर्यमहावबोधः
स्ववीर्यशक्त्यादिगुणैकराशिः ॥
परः पराणां सकला न यत्र
क्लेशादयः सन्ति परावरेशे" ।
"यो मामजमनादिं च वेत्ति लोकमहेश्वरम्" ।
"मयाध्यक्षेण प्रकृतिः",
"उत्तमः पुरुषस्त्वन्यः सर्वज्ञः सर्वकृत् सदा ।
सर्वशक्तिः सर्वकर्मा सर्वज्ञानबलादिमान् ॥
अन्यूनश्चाप्यवृद्धश्च स्वाधीनो नादिमान् वशी ।
क्लमतन्द्राभयक्रोधकामादिभिरसंयुतः ॥
निरवद्यः परप्राप्तेर्निरधिष्ठोऽक्षरक्रमः" ।

इत्यादिस्मृतयश्च समस्तहेयलेशास्पृष्टमाहात्म्यमशेषकल्याणगुणसागरं परं ब्रह्म प्रतिपादयन्तीत्यर्थः । एतदभिप्रेत्योक्तं श्रीभगवताद्याचार्येण वाक्यकारेण ।

"स्वभावतोऽपास्तसमस्तदोष-
मशेषकल्याणगुणैकराशिम्" ।

इत्यादिना ॥ १ ॥

॥ शेषमपराह्णे ॥

॥ अथ ज्ञानसिद्धान्तचन्द्रिका ॥

बर्क्लेसंज्ञकमहापण्डितविरचितज्ञानसिद्धान्तमालायाः अवतारिता ।

तत्र चतुष्पञ्चाशत्तमादिपरिच्छेदाः ।

५४–अथाष्टम आक्षेपः । ननु जडद्रव्यसत्तायां तत्पक्षपातिबाहुल्यमेव दृढं मानम् । न खलु तेषां सर्वेषामपि जनानां भ्रान्तत्वं कल्पयितुं शक्यते । ईदृशभ्रमविस्तारकल्पनेऽनुकूलतर्कविरहादिति चेच्छृणु । अखिलजनमनस्सु याथार्थ्येन परीक्षितेषु भूयिष्ठानां जनानां तादृशेऽर्थे विश्वासो नैवोपलभ्येत । आत्मबाह्याया जडद्रव्यसत्तायास्सर्वथा बाधितत्वात् । तद्बाधितत्वनिश्चये तु निष्पक्षपातपरीक्षैवालम् । अथ प्रायेण लोके केषां चिदात्मबहिर्भूतानामिवाऽचेतनवस्तुविशेषाणां साक्षात् प्रत्यक्षकारणीभूतत्वेनाऽभ्युपगमात् कथमुच्यते भूयिष्ठा जनास्तादृशजडद्रव्यसत्तां नैव विश्वसेयुरिति चेत्सत्यम् । केवलमेतावतैव प्राकृतजनानां तत्र विश्वासोऽनुमीयेत । परंतु न कोऽपि तादृशपदार्थं स्वयं बोद्धुं निर्वक्तुं वा शक्नुयात् । सन्ति चैवं विधान्यपराण्यपि वचनानि यानि श्रुतमात्राण्येव जना अक्षिणी निमील्य विश्वसन्त्येव न पुनस्तद्भावाभावावपि विचारयन्तीति प्रतीयते । इदमेव स्थूलधिषणावतामात्मवञ्चनं नाम ।

५५–भवतु नाम सर्वजनसंमता जडद्रव्यसत्ता तथापि नायं तद्याथार्थ्यसाधनसमर्थो हेतुः । तथाहि । न कोऽपि भूयिष्ठानि मिथ्यामतानि लोके भूरिशः साभिनिवेशं स्वीकृतानि प-

श्यन् प्रेक्षावान्त्सर्वजनसंमतत्वाद्धेतोः कस्यापि तादृशमतस्य याथार्थ्यमभ्युपैति । आसीच्चैवंविधं कालान्तरं यत्र भुवोविरुद्धपार्श्ववर्तिनां जनानां परस्पराभिमुखपादतलवत्त्वं भूभ्रमणं च परमबाधितार्थत्वेन चिन्तिते आस्ताम् । यदि च प्रचुरजनसंमत्यैवाखिलतत्त्वार्थानां भावाभावौ विचार्येतां तर्ह्युक्ततत्त्वयोरप्ययाथार्थ्यं प्रसज्येत । तदभिमानिविदुषां संप्रत्यपि तद्विपक्षप्राकृतजनसंघमपेक्ष्य नितान्तमल्पीयस्त्वात् ।

५६—अथ नवम आक्षेपः । ननु जडद्रव्यस्यैवाऽभावे किं तर्हीदृशस्य भ्रान्तमतस्य मूलं, कथं चास्य लोके प्रसरस्संवृत्त इति चेदुच्यते । आदौ जना विविधानि प्रत्यक्षाणि स्वकृत्यनायत्तानि स्वयमुद्भावयितुमशक्यानि च निरूप्य सन्त्येषां ज्ञानानां केप्यात्मबहिर्भूता एव विषया ये खल्विन्द्रियसन्निकर्षादिवशाज्ज्ञायन्त इत्यूहांचक्रिरे । तदनु शास्त्रविदस्तु साक्षात् प्रत्यक्षविषयाणामात्ममात्रनिष्ठत्वं स्फुटमनुभूय तादृशं लौकिकं मतं बाधितार्थकमिति खण्डयांचक्रुः । परंतु तादृशज्ञानोत्पत्तिकारणनिरूपणविषये लौकिकमतसमबाध्यमेव मतान्तरमाविश्चक्रिरे । तथाहि । सन्ति कतिपये आत्मनोऽन्यत्र वर्तमाना ज्ञायमानत्वानात्मकसत्तात्मकविषयविशेषा यदुत्पादितान्येवाऽऽत्मनि तत्प्रतिबिम्बानि ज्ञानविषयीभवन्तीति । तदिदं प्राचीनमतं लौकिकमतसमानमूलकमेव बोध्यम् । आत्मनाऽनुत्पादितान्यप्युत्पद्यमानानि ज्ञानान्यवश्यमात्मेतरकारणवन्ति भवेयुरित्यनुमानादेवाऽऽत्मबाह्यानां वस्तुविशेषाणां तादृशज्ञानकारणत्वस्य तत्स्वीकृतत्वात् ॥

५७—यच्च प्राचीनविद्वद्भिरैन्द्रियकप्रत्यक्षप्रयोजकीभूतानि प्रत्यक्षीभूतविषयसन्निभान्यनन्तानन्तानि विषयान्तराणि कल्प्यन्ते न पुनरेकस्यैव सर्वशक्तिमतः परमेश्वरस्य तादृशसकलज्ञानकर्तृत्वं मन्यन्ते तस्य त्रीणि बीजानि । तानि यथा । प्रत्यक्षोपलब्धविषयसदृशानामात्मानमतीत्य तिष्ठतां वस्तुविशेषाणां कल्पने तेषां पुनस्तादृशज्ञानोत्पादनानुकूलशक्तिमत्त्वस्य कल्पने च प्रादुर्भवन्तो विरोधास्तैर्न ज्ञायन्त इत्येकम् । आत्मगतप्रत्यक्षोत्पादकस्येश्वरस्य केन चिन्नियतेन ज्ञानगणविशेषेण कस्यचित् कर्मकरपुरुषस्य रूपपरिमाणावयवसंस्थित्यादिविशेषैरिवोपलक्षितुमशक्यत्वमित्यपरम् । जगदीशितुरीश्वरस्य सुव्यवस्थितैकरूपकार्यकारित्वम् इति तृतीयम् । अस्येदं तत्त्वम् । इयं तावल्लोकानां नैसर्गिकी प्रवृत्तिर्यत् किंचिदद्भुतस्यातिमानुषस्य कर्मणो दर्शनएव ईश्वरस्य तादृशविलक्षणकार्यानुष्ठातृत्वं मन्यन्ते । प्रायिकप्रकृतिप्रवाहस्तु न पुनस्तेषां हृदि दिव्यं कर्तृत्वं प्रत्याययति । यद्यपि लौकिकविषयाणां नियतपौर्वापर्यस्य सुव्यवस्थित्यादेश्च दर्शनाच्चितान्तनैपुण्यदाक्षिण्यादिविशिष्टः सर्वशक्तिमान् स्वतन्त्र एव तत्स्रष्टोचितुमुचितस्तथापि तादृशसुव्यवस्थित्यादेर्नित्यातिपरिचयवशाच्च तथाविधानि कार्याणि तादृशस्वतन्त्रेच्छेनेश्वरेण साक्षात्स्वयं सृष्टानीति चिन्त्यते । विशेषतोहि लोके अनियतास्थिरव्यापाराणामेव तेषां वस्तुतो दुष्टत्वेऽपि स्वातन्त्र्यकार्यत्वेन प्रसिद्धेरिति ।

केशवशास्त्री

माराठोपाह्वः

SANSKRIT and ENGLISH DICTIONARY, being an abridgment of PROFESSOR WILSON'S DICTIONARY with an Appendix explaining the use of affixes in Sanskrit, by PANDIT RÁM JASAN, cloth bound and lettered Rs. 10.

THE RÁMAYAN of VÁLMÍKI, translated in English verse by RALPH T. H. GRIFFITH, M. A. Vol. II. Rs. 6. Vol. III. Rs. 4-8. Vol. IV. Rs. 6. and Postage 6 annas each.

THE LAGHU KAUMUDÍ, a Sanskrit Grammar with an English version, commentary and references by DR. BALLANTYNE, late Principal of the Sanskrit College, Benares, re-edited by RALPH GRIFFITH, M. A., Principal of the Sanskrit College, Benares. *Price* 8 *Rupees.*

"The Translation of Laghu Kaumudí made by the late Dr. Ballantyne has enabled even beginners to find their way through the Labyrinth of Native Grammar." *Prof. Max Müller.*

"THE BIBLE FOR THE PANDITS." The first three chapters of Genesis diffusely and unreservedly commented, in Sanskrit and English,—with an introduction, by JAMES R. BALLANTYNE, LL. D. Rs. 3.

THE BÁLARÁMÁYANA, a Drama by RÁJAŚEKHARA, edited by PANDIT GOVINDA DEVA ŚÁSTRI, late Professor of Hindu Astronomy in the Sanskrit College, Benares, Rs. 2.

THE PRASANNARÁGHAVA, a Drama by Jaya Deva, edited by PANDIT GOVINDA DEVA ŚÁSTRI. Rs. 1-4.

PRINTED AND PUBLISHED BY THE PROPRIETORS, E. J. LAZARUS AND CO., AT THE MEDICAL HALL PRESS BENARES.

काशीविद्यासुधानिधिः

श्रीगणेशाय नमः

श्रीमद्विजयिनीदेवीपाठशालोदयोदितः । प्राच्यप्रतीच्यवाक्पूर्वापरपक्षद्वयान्वितः ॥ १ ॥
अङ्कुरश्मिः स्फुटयतु काशीविद्यासुधानिधिः । प्राचीनार्यजनप्रज्ञाविलासकुमुदोत्करान् ॥ २ ॥

THE PANDIT.

A Monthly Journal, of the Benares College, devoted to Sanskrit Literature.

No. 96. Benares, May 1st, 1874. Vol. VIII.

काशिकायाः

प्रथमाध्यायस्य द्वितीयः पादः

एकश्रुति दूरात्संबुद्धौ ॥ ३३ ॥

त्रैस्वर्यं पदानां प्राप्ते दूरात्संबुद्धावेकश्रुत्यं विधीयते । एका श्रुतिर्यस्य तदिदमेकश्रुति । एकश्रुति वाक्यं भवति । दूरात्संबोधयति येन वाक्येन तत्संबोधनं संबुद्धिः, नैकवचनं संबुद्धिः । स्वराणामुदात्तादीनामविभागो ऽभेदः तिरोधानमेकश्रुतिः । आगच्छ भो माणवक देवदत्ता ३ । दूरादिति किम् । आगच्छ भो माणवक देवदत्त ॥

यज्ञकर्मण्यजपन्यूङ्खसामसु ॥ ३४ ॥

त्रैस्वर्येण वेदे मन्त्राः पठ्यन्ते तेषां यज्ञक्रियायामपि तथैव प्रयोगे प्राप्ते एकश्रुतिर्विधीयते । जपन्यूङ्खसामानि वर्ज्जयित्वा यज्ञकर्म्मणि मन्त्राणामेकश्रुत्यं भवति । अग्निर्मूर्द्धा दिवः ककुत्पतिः पृथिव्या अयम् । अपां रेतांसि जिन्वतो३म् । यज्ञकर्मणीति किम् । संपाठे मा भूत् । अजपेष्विति किम् । ममाग्ने वर्च्चो विहवेष्वस्तु । जपो ऽनुकरणमन्त्रः । उपांशुप्रयोगः । अन्यूङ्खेति किम् । न्यूङ्खा ओकाराः षोडश । तेषु के चिदुदात्ताः के चिदनुदात्ताः । असामस्विति किम् । ए३ विश्वं समत्रिणं दह ३ । सामानि वाक्यविशेषस्थगीतय उच्यन्ते । तत्रैकश्रुतिर्न भवति ॥

उच्चैस्तरां वा वषट्कारः ॥ ३५ ॥

यज्ञकर्म्मणीति वर्तते । यज्ञकर्म्मणि वषट्कारः उच्चैस्तरां वा भवति एकश्रुतिर्वा । वषट्शब्देनात्र वौषट्शब्दो लक्ष्यते,वौषडित्यस्यैवेदं स्वरविधानम् । यद्येवं वौषड्ग्रहणमेव कस्मान्न कृतम् । वैचित्र्यार्थम् । विचित्रा हि सूत्रस्य कृतिः पाणिनेः । सोमस्याग्ने वीही ३ वौ ३ षट् । सोमस्याग्ने वीही३ वौ३ षट् ॥

॥ विभाषा छन्दसि ॥ ३६ ॥

छन्दसि विषये विभाषा एकश्रुतिर्भवति, पक्षान्तरे त्रैस्वर्यमेव भवति । वेति प्रकृते विभाषाग्रहणं यज्ञकर्म्मणीत्यस्य निवृत्त्यर्थम् । तेनायं स्वाध्यायकालेपि पाक्षिक एकश्रुत्यविधिर्भवति । इषेत्वोर्ज्जे त्वा । इषे त्वोर्ज्जे त्वा । अग्न आयाहि वीतये । अग्न आयाहि वीतये । अग्निमीळे पुरोहितम् । अग्निमीळे पुरोहितम् । शन्नो देवीरभिष्टये । शन्नो देवीरभिष्टये । * व्यवस्थितविकल्पोयमिति के चित् । व्यवस्था च वेदे मन्त्रदले नित्यं त्रैस्वर्यं ब्राह्मणदले नित्यमेकश्रुत्यमिति ।

"दृच्छासंहितयोरार्षे छन्दो वेदे च छन्दसि"

इति नानार्थकोशात् छन्दसि वर्णसंहितायामिति भट्टाचार्यचरणाः । इति भाषायामप्येकश्रुतिर्विभाषा भवतीति सिद्धम् ॥

न सुब्रह्मण्यायां स्वरितस्य तूदात्तः ॥ ३७ ॥

सुब्रह्मण्यानाम निगदस्तत्र यज्ञकर्म्मणीति विभाषा छन्दसीति च एकश्रुतिः प्राप्ता प्रतिषिध्यते । सुब्रह्मण्यायामेकश्रुतिर्न भवति । यस्तु लक्षणप्राप्तः स्वरितस्तस्योदात्त आदेशो भवति । सुब्रह्मण्यो ३ मिन्द्रागच्छ हरिव आगच्छ मेधातिथेर्मेष वृषणश्वस्य मेने गौरावस्कन्दिन्नहल्यायै जार कौशिक-

* व्यवस्थितेत्यारभ्य सिद्धमित्यन्तः पाठः केषु चित्पुस्तकेषु नोपलभ्यते ।

ब्राह्मण गौतमब्रुवाण श्वः सुत्यामागच्छ मघवन् । अत्र सुब्रह्मण्योमित्योकारस्तित्स्वरेण स्वरितस्तस्योदात्तो विधीयते इन्द्र आगच्छेत्यामन्त्रितमाद्युदात्तं द्वितीयो वर्णो ऽनुदात्तः । उदात्तादनुदात्तस्य स्वरित इति स्वरितः प्रसक्तस्तस्यानेनोदात्तः क्रियते । तेन द्वावप्युदात्तौ संपन्नौ । आगच्छेत्याकार उदात्तः । ततः परानुदात्तः स्वरितस्तस्यानेनोदात्तः क्रियते । तदेवमिन्द्र आगच्छेति चत्वार उदात्ताः । पश्चिम एकोनुदात्तः । हरिव आगच्छेत्यनयैव प्रक्रियया चत्वार उदात्ताः द्वावनुदात्तौ । मेधातिथेरिति षष्ठ्यन्तं परमामन्त्रितमनुप्रविशति । सुबामन्त्रिते पराङ्गवत्स्वरे इति । ततः सकलस्यामन्त्रिताद्युदात्तत्वे कृते द्वितीयमक्षरमनुदात्तं तस्योदात्तादनुदात्तस्य स्वरित इति स्वरितत्वे प्राप्ते इदमुदात्तत्वं विधीयते । तेन द्वावप्युदात्तौ भवतः । शेषमनुदात्तम् । वृषणश्वस्य मेनइति समानं पूर्वेण । गौरावस्कन्दिन्निति तथैव द्वे आद्ये अक्षरे उदात्ते शेषमनुदात्तम् । अहल्यायै जारेति सुबन्तस्यामन्त्रितानुप्रवेशात् तद्वदेव स्वरः । द्वावुदात्तौ शेषमनुदात्तम् । कौशिकब्राह्मणेति समस्तमामन्त्रितमाद्युदात्तं तत्र पूर्ववद् द्वावुदात्तौ । शेषमनुदात्तम् । एवं गौतमब्रुवाणेति द्वावुदात्तौ शेषमनुदात्तम् । श्वः सुत्यामागच्छ मघवन्निति श्वः शब्द उदात्तः सुत्यामित्यन्तोदात्तः । संज्ञायां समजनिषदेति क्यपो विधाने उदात्त इति वर्त्तते । आगच्छेति द्वावुदात्तौ । अन्त्योनुदात्तः । मघवन्निति पदात्परमामन्त्रितं निहन्यते ॥

देवब्रह्मणोरनुदात्तः ॥ ३८ ॥

सुब्रह्मण्यायामेव देवा ब्रह्माण इति पठ्यते, तत्र पूर्वेण स्वरितस्योदात्ते प्राप्ते अनेनानुदात्तो विधीयते । देवब्रह्मणोः स्वरितस्यानुदात्त आदेशो भवति । देवा ब्रह्माण आगच्छत । द्वयोरपि पदयोरामन्त्रिताद्युदात्तत्वे शेषनिघाते चोदात्तादनुदात्तस्य स्वरितः कृतस्तस्यानुदात्तो भवति ॥

स्वरितात्संहितायामनुदात्तानाम् ॥ ३९ ॥

एकश्रुतिरिति वर्त्तते । संहितायां विषये स्वरितात्परेषामनुदात्तानामेकश्रुतिर्भवति । इमं मे गङ्गे यमुने सरस्वति शुतुद्रि । माणवक जटिलकाध्यापक क्व गमिष्यसि । इममित्यन्तोदात्तं, मे इति अनुदात्तं, विधिकालएव निघातविधानात् । तत्पुनरुदात्तादनुदात्तस्य स्वरित इति स्वरितं संपद्यते । तस्मात्स्वरितात्परेषामनुदात्तानां गङ्गेप्रभृतीनामेकश्रुतिर्भवति । सर्वएते आमन्त्रितनिघातेनानुदात्ताः । माणवक जटिलकेति प्रथममामन्त्रितमाद्युदात्तं तस्य द्वितीयमक्षरं स्वरितं ततः परेषामनुदात्तानामेकश्रुतिर्भवति । संहिताग्रहणं किम् । अवग्रहे मा भूत् । इमं मे गङ्गे यमुने सरस्वति ॥

उदात्तस्वरितपरस्य सन्नतरः ॥ ४० ॥

अनुदात्तग्रहणमनुवर्त्तते । उदात्तः परो यस्मात्स उदात्तपरः, स्वरितः परो यस्मात्स स्वरितपरः, उदात्तपरस्य स्वरितपरस्य चानुदात्तस्य सन्नतर आदेशो भवति । अनुदात्ततर इत्यर्थः । देवा मरुतः पृश्निमातरोपः । मातर इत्यनुदात्तः । अप इत्यन्तोदात्तः । ऊडिदंपदाद्यप्पुम्रैद्युभ्य इति । तत्रानुदात्तयोरेकादेश ओकारोनुदात्तः । तस्योदात्ते परभूते सन्नतर आदेशो भवति । इमं मे गङ्गे यमुने सरस्वति शुतुद्रि । इकारोनुदात्तः शुतुद्रि इत्येतदामन्त्रितं पादादौ तस्माच्च निहन्यते, अनुदात्तं सर्वमपादादाविति तस्य प्रथममक्षरमुदात्तं तस्मिन्परभूते पूर्वस्य सरस्वतीकारस्य सन्नतर आदेशो भवति । माणवक जटिलकाध्यापक क्व गमिष्यसि । क्व इति स्वरितस्तस्मिन्परभूते क इति अनुदात्तस्तस्य सन्नतर आदेशो भवति ॥

अपृक्त एकाल्प्रत्ययः ॥ ४१ ॥

अपृक्त इतीयं संज्ञा भवति एकाल् यः प्रत्ययस्तस्य । असहायवाची एकशब्दः । स्पृशोनुदके क्विन् । घृतस्पृक् । भजो ण्विः । अर्धभाक् । पादभाक् । एकालिति किम् । दर्विः । जागृविः । प्रत्यय इति किम् । सुराः । अपृक्तप्रदेशा वेरपृक्तस्येत्येवमादयः ॥

तत्पुरुषः समानाधिकरणः कर्मधारयः ॥ ४२ ॥

तत्पुरुष इति समासविशेषस्य संज्ञां वक्ष्यति । स तत्पुरुषः समानाधिकरणपदः कर्म्मधारयसंज्ञो भवति । अधिकरणशब्दोभिधेयवाची । समानाधिकरणः समानाभिधेयः । परमराज्यम् । उत्तमराज्यम् । कर्मधारये राज्यमित्युत्तरपदाद्युदात्तं न भवति । पाचकवृन्दारिका । तत्पुरुष इति किम् । पाचिकाभार्यः । समानाधिकरण इति किम् । ब्राह्मणराज्यम् । कर्म्मधारयप्रदेशाः कर्म्मधारये निष्ठेत्येवमादयः * ॥

प्रथमानिर्दिष्टं समासउपसर्ज्जनम् ॥ ४३ ॥

प्रथमया विभक्त्या यन्निर्द्दिश्यते समासशास्त्रे तदुपसर्ज्जनसंज्ञं भवति । समासइति समासविधायि शास्त्रं गृह्यते । वक्ष्यति द्वितीया श्रितातीतपतितगतात्यस्तप्राप्तापन्नैरिति द्वितीयासमासे द्वितीयेत्येतत्प्रथमानिर्दिष्टं तृतीयासमासे तृतीयेति चतुर्थीसमासे चतुर्थीति पञ्चमीसमासे पञ्चमीति षष्ठीसमासे षष्ठीति सप्तमीसमासे सप्तमीति । कष्टश्रितः । शङ्कुलाखण्डः । यूपदारु । वृकभयम् । राजपुरुषः । अक्षशौण्डः । उपसर्जनप्रदेशा उपसर्ज्जनं पूर्वमित्येवमादयः ॥

* कर्मधारयप्रदेशाः पुंवत्कर्मधारयजातीयदेशीयेष्वित्येवमादय इति पाठान्तरम् ।

एकविभक्ति चापूर्वनिपाते ॥ ४४ ॥

एका विभक्तिर्यस्य तदिदमेकविभक्ति,समासे विधीयमाने यन्नियतविभक्तिकं द्वितीये संबन्धिनि बहुभिर्विभक्तिभिर्युज्यमानेप्येकयैव विभक्त्या युज्यते तदुपसर्जनसंज्ञं भवति अपूर्वनिपाते, पूर्वनिपातं पूर्वनिपाताख्यमुपसर्जनकार्यं वर्ज्जयित्वा। निरादयः क्रान्ताद्यर्थे पञ्चम्या। पूर्वपदे नानाविभक्तिकेप्युत्तरपदं पञ्चम्यन्तमेव भवति। निष्क्रान्तः कौशाम्ब्या निष्कौशाम्बिः। निष्क्रान्तं कौशाम्ब्या निष्कौशाम्बिम्। निष्क्रान्तेन कौशाम्ब्या निष्कौशाम्बिना। निष्क्रान्ताय कौशाम्ब्या निष्कौशाम्बये। निष्क्रान्तात् कौशाम्ब्या निष्कौशाम्बेः। निष्क्रान्तस्य कौशाम्ब्याः निष्कौशाम्बेः। निष्क्रान्ते कौशाम्ब्या निष्कौशाम्बौ। एवं निर्वाराणसिः। एकविभक्तीति किम्। राजकुमारी। अपूर्वनिपातइति किम्। नहि भवति कौशाम्बीनिरिति ॥

अर्थवदधातुरप्रत्ययः प्रातिपदिकम् ॥ ४५ ॥

अभिधेयवचनोऽर्थशब्दः। अर्थवच्छब्दरूपं प्रातिपदिकसंज्ञं भवति धातुप्रत्ययौ वर्ज्जयित्वा। डित्थः। कपित्थः। कुण्डम्। पीठम्। अर्थवदिति किम्। वनं धनमिति नान्तस्यावधेर्मा भूत्। न लोपो हि स्यात्। अधातुरिति किम्। हन्तेर्लङ्। अहन्। नलोपः स्यात्। अप्रत्यय इति किम्। काण्डे। कुड्ये। ह्रस्वो नपुंसके प्रातिपदिकस्येति ह्रस्वः स्यात्। *अनर्थकस्यापि निपातस्य प्रातिपदिकसंज्ञेष्यते। अध्यागच्छति। प्रलम्बते। प्रादिपदिकप्रदेशाः ह्रस्वो नपुंसके प्रातिपदिकस्येत्येवमादयः ॥

कृत्तद्धितसमासाश्च ॥ ४६ ॥

कृतस्तद्धिताः समासाश्च प्रातिपदिकसंज्ञा भवन्ति। अप्रत्यय इति पूर्वत्र पर्युदासात्कृदन्तस्य तद्धितान्तस्य वानेन प्रातिपदिकसंज्ञा विधीयते। अर्थवत्समुदायानां समासग्रहणं नियमार्थम्। कृत्। कारकः। हारकः। कर्त्ता। हर्त्ता। तद्धितः। औपगवः। कापटवः। समासः। राजपुरुषः। ब्राह्मणकम्बलः। समासग्रहणस्य नियमार्थत्वाद्वाक्यस्यार्थवतः संज्ञा न भवति ॥

ह्रस्वो नपुंसके प्रातिपदिकस्य ॥ ४७ ॥

नपुंसकलिङ्गेऽर्थे यत्प्रातिपदिकं वर्त्तते तस्य ह्रस्वो भवति आदेशोऽलोन्त्यस्याचः। अतिरि कुलम्। अतिलु कुलम्। नपुंसकइति किम्। ग्रामणीः। सेनानीः। प्रातिपदिकस्येति किम्। काण्डे तिष्ठतः। कुड्ये तिष्ठतः। प्रातिपदिकग्रहणसामर्थ्यादेकादेशः पूर्वस्यान्तवच्च भवति ॥

* अनर्थकस्येत्यारभ्य प्रलम्बते इत्यन्तः पाठो बहुषु पुस्तकेषु न दृश्यते।

गोस्त्रियोरुपसर्ज्जनस्य ॥ ४८ ॥

प्रातिपदिकस्येति वर्त्तते। गोइति स्वरूपग्रहणं,स्त्रीइति प्रत्ययग्रहणं, स्वरितत्वात्। उपसर्ज्जनग्रहणं तयोर्विशेषणं, गोरुपसर्ज्जनस्य स्त्रीप्रत्ययान्तस्योपसर्ज्जनस्येति। ताभ्यां प्रातिपदिकस्य तदन्तविधिः। उपसर्ज्जनगोशब्दान्तस्य उपसर्ज्जनस्त्रीप्रत्ययान्तान्तस्य च प्रातिपदिकस्य ह्रस्वो भवति। चित्रगुः। शबलगुः। स्त्रियाः। निष्कौशाम्बिः। निर्वाराणसिः। अतिखट्वः। अतिमालः। उपसर्ज्जनस्येति किम्। राजकुमारी। स्वरितत्वं किम्। अतितन्त्रीः। अतिलक्ष्मीः। अतिश्रीः। ईयसो बहुव्रीहेः प्रतिषेधो वक्तव्यः ॥*॥ बहुश्रेयसी। विद्यमानश्रेयसी ॥

लुक्तद्धितलुकि ॥ ४९ ॥

स्त्रीग्रहणमनुवर्त्तते उपसर्जनस्येति च। पूर्वेण ह्रस्वत्वे प्राप्ते लुग्विधीयते। तद्धितलुकि सति स्त्रीप्रत्ययस्य उपसर्ज्जनस्य लुग्भवति। पञ्चेन्द्राण्यो देवता अस्य पञ्चेन्द्रः। दशेन्द्रः। पञ्चभिः शष्कुलीभिः क्रीतः पञ्चशष्कुलः। आमलक्याः फलं आमलकम्। बकुलम्। बदरम्। तद्धितग्रहणं किम्। गार्ग्याः कुलं गार्गीकुलम्। लुकीति किम्। गार्गीत्वम्। उपसर्ज्जनस्येत्येव। अवन्ती। कुन्ती। कुरूः ॥

इद्गोण्याः ॥ ५० ॥

पूर्वेण लुकि प्राप्ते इकारो विधीयते। गोण्यास्तद्धितलुकि सति इकारादेशो भवति। पञ्चभिर्गोणीभिः क्रीतः पटः पञ्चगोणिः। दशगोणिः। इदिति योगविभागः। पञ्चभिः सूचीभिः क्रीतः पञ्चसूचिः। दशसूचिः। स च एवंविषय एव ॥

लुपि युक्तवद्व्यक्तिवचने ॥ ५१ ॥

लुपीति लुप्संज्ञया लुप्तस्य प्रत्ययस्यार्थ उच्यते। तत्र लुपि युक्तवद् व्यक्तिवचने भवतः। युक्तवदिति निष्ठाप्रत्ययेन क्तवतुना प्रकृत्यर्थ उच्यते। स हि प्रत्ययार्थमात्मना युनक्ति तस्य युक्तवतो व्यक्तिवचने लुबर्थे विधीयेते। अथ वा युक्तः प्रकृत्यर्थः प्रत्ययार्थेन संबद्धस्तस्मिन्निव व्यक्तिवचने लुबर्थे भवतः। सप्तम्यर्थे वतिः। व्यक्तिवचने इति च लिङ्गसंख्ययोः पूर्वाचार्यनिर्द्देशस्तदीयमेवेदं सूत्रम्। तथा चास्य प्रत्याख्यानं भविष्यति। तदशिष्यं संज्ञाप्रमाणत्वादिति। व्यक्तिः स्त्रीपुंनपुंसकानि,वचनमेकत्वद्वित्वबहुत्वानि। पञ्चालाः क्षत्रियाः। पुंलिङ्गाः बहुवचनविषयाः। तेषां निवासो जनपदः यथा तेषु क्षत्रियेषु व्यक्तिवचने तद्वज्जनपदे भवतः। पञ्चालाः। कुरवः। मगधाः। मत्स्याः। अङ्गाः। वङ्गाः। सुह्माः। पुण्ड्राः। लुपीति किम्। लुकि मा भूत्। लवणः सूपः। लवणा यवागूः। लवणं शाकम्।

व्यक्तिवचने इति किम् । शिरीषाणामदूरभवो ग्रामः शिरीषास्तस्य वनं शिरीषवनम् । विभाषौषधिवनस्पतिभ्य इति णत्वं न भवति ॥ हरीतक्यादिषु व्यक्तिः ॥ * ॥ हरीतक्याः फलानि हरीतक्यः फलानि ॥ खलतिकादिषु वचनम् ॥ * ॥ खलतिकस्य पर्वतस्यादूरभवानि वनानि खलतिकं वनानि ॥

विशेषणानां चाजातेः ॥ ५२ ॥

लुपीति वर्त्तते । लुबर्थस्य यानि विशेषणानि तेषामपि व्यक्तिवचने भवतो जातिं वर्जयित्वा । पञ्चालाः रमणीयाः बह्वन्नाः बहुक्षीरघृताः बहुमाल्यफलाः । गोदौ रमणीयौ । बह्वन्नौ बहुक्षीरघृतौ बहुमाल्यफलौ । अजातेरिति किम् । पञ्चालाः जनपदः । गोदौ ग्रामः । जात्यर्थस्य चायं युक्तवद्भावप्रतिषेधः । तेन जातिद्वारेण यानि विशेषणानि तेषामपि युक्तवद्भावो न भवति । पञ्चालाः जनपदो रमणीयो बह्वन्नः । गोदौ ग्रामो रमणीयो बह्वन्न इति ॥ मनुष्यलुपि प्रतिषेधो वक्तव्यः ॥ * ॥ चञ्चाभिरूपः । वध्रिका दर्शनीयः ॥

तदशिष्यं संज्ञाप्रमाणत्वात् ॥ ५३ ॥

तदिति प्रकृतं युक्तवद्भावलक्षणं निर्दिश्यते, तदशिष्यं न वक्तव्यं कस्मात्संज्ञाप्रमाणत्वात् । संज्ञाशब्दा हि नानालिङ्गसंख्याः । प्रमाणं पञ्चाला वरणा इति च । नैते योगशब्दाः । किं तर्हि जनपदादीनां संज्ञा एताः । तत्र लिङ्गं वचनं च स्वभावसिद्धमेव न यत्नप्रतिपाद्यम् । यथा आपो दाराः गृहाः सिकता वर्षा इति ॥

लुब्योगाप्रख्यानात् ॥ ५४ ॥

लुबप्यशिष्यः । योयं जनपदे लुप् वरणादिभ्यश्चेति लुबुच्यते अयं न वक्तव्यः, किं कारणं योगाप्रख्यानात् । नहि पञ्चाला वरणा इति योगः संबन्धः प्रख्यायते नैतदुपलभामहे वृक्षयोगान्नगरे वरणा इति । किं तर्हि संज्ञा एताः । तस्मादत्र तस्य निवासः अदूरभवश्चेति तद्धितो नैवोत्पद्यते किं लुपो विधानेन ॥

योगप्रमाणे च तदभावे दर्शनं स्यात् ॥ ५५ ॥

पञ्चालादयः संज्ञा शब्दा न योगनिमित्ता इत्युक्तं, तच्चावश्यमेवाभ्युपगन्तव्यं योगप्रमाणे हि तदभावे ऽदर्शनं स्यात् यदि पञ्चालादिशब्दो योगस्य प्रमाणं योगस्य वाचकः स्यात् ततस्तदभावे ऽदर्शनमप्रयोगः स्यात् । दृश्यते च संप्रति विनैव क्षत्रियसंबन्धेन जनपदेषु पञ्चालादिशब्दस्ततो ऽवसीयते नायं योगनिमित्तकः किं तर्हि रूढिरूपेणैव तत्र प्रवृत्त इति ॥

प्रधानप्रत्ययार्थवचनमर्थस्यान्यप्रमाणत्वात् ॥ ५६ ॥

अशिष्यमिति वर्त्तते, प्रधानं समासे किं चित्पदं प्रत्ययस्तव्यदादिः ताभ्यामर्थवचनमर्थाभिधानमनेन प्रकारेण भवतीति पूर्वाचार्यैः परिभाषितम् । प्रधानोपसर्जने प्रधानार्थं सह ब्रूतः प्रकृतिप्रत्ययौ सहार्थं ब्रूत इति । तत्पाणिनिराचार्यः प्रत्याचष्टे । अशिष्यमेतत् अर्थस्यान्यप्रमाणत्वादिति । अन्य इति शास्त्रापेक्षया लोको व्यपदिश्यते शब्दैरर्थाभिधानं स्वाभाविकं न पारिभाषिकमशक्यत्वात्, लोकत एवार्थावगतेः । यैरपि व्याकरणं न श्रुतं ते ऽपि राजपुरुषमानयेत्युक्ते राजविशिष्टं पुरुषमानयन्ति न राजानं नापि पुरुषमात्रम् । औपगवमानयेत्युक्ते उपगुविशिष्टमपत्यमानयन्ति नोपगुं नाप्यपत्यमात्रं नोभौ । यश्च लोकतो ऽर्थः सिद्धः किं तत्र यत्नेन ॥

कालोपसर्ज्जने च तुल्यम् ॥ ५७ ॥

अशिष्यमिति वर्त्तते । कालोपसर्ज्जने चाशिष्ये कस्मादर्थस्यान्यप्रमाणत्वात् । तुल्यशब्दो हेत्वनुकर्षणार्थः । अशिष्यविशेषणं चैतत् । कालोपसर्जने च तुल्यमशिष्ये भवतः । इहान्ये वैयाकरणाः कालोपसर्ज्जनयोः परिभाषां कुर्वन्ति । आन्याय्यादुत्थानादान्याय्याच्च संवेशनात् । एषोद्यतनः कालः । अपरे पुनराहुः । अहरुभयतोर्द्धरात्रं एषोद्यतनः काल इति । तथोपसर्जनपरिभाषां कुर्वन्ति अप्रधानमुपसर्ज्जनमिति । तत्पाणिनिराचार्यः प्रत्याचष्टे लोकतो ऽर्थावगतेः । यैरपि व्याकरणं न श्रुतं तेप्याहुरिदमस्माभिरद्य कर्त्तव्यमिदं श्वः कर्त्तव्यमिदं ह्यः कृतमिति । नैवं व्युत्पाद्यन्ते ! तथोपसर्ज्जनं वयमत्र गृहे ग्रामे वा उपसर्ज्जनमप्रधानमिति गम्यते । यश्च लोकतो ऽर्थः सिद्धः किं तत्र यत्नेन । यद्येवं पूर्वसूत्रएव कालोपसर्ज्जनग्रहणं कस्मान्न क्रियते, किमर्थो योगविभागः । प्रदर्शनार्थः । अन्यदप्येवं जातीयकमशिष्यमिति । तथा च पूर्वाचार्याः परिभाषन्ते मत्वर्थे बहुव्रीहिः, पूर्वपदार्थप्रधानो ऽव्ययीभावः, उभयपदार्थप्रधानो द्वन्द्व इत्येवमादि, तदशिष्यमिति ॥

जात्याख्यायामेकस्मिन्बहुवचनमन्यतरस्याम् ॥ ५८ ॥

अशिष्यमिति निवृत्तम् । जातिर्नामायमेकोर्थः तदभिधाने एकवचनमेव प्राप्तमत इदमुच्यते जातेराख्या जात्याख्या जात्याख्यायामेकस्मिन्नर्थे बहुवचनमन्यतरस्यां भवति । जात्यर्थो बहुवद् भवतीति यावत् । तेन तद्विशेषणानामजातिशब्दानामपि संपन्नादीनां बहुवचनमुपपद्यते । संपन्नो यवः । संपन्ना यवाः । संपन्नो व्रीहिः । संपन्ना व्रीहयः । पूर्ववया ब्राह्मणः प्रत्युत्थेयः । पूर्ववयसो ब्राह्मणाः प्रत्युत्थेयाः । जातिग्रहणं किम् । देवदत्तो यज्ञदत्तः । आख्यायामिति किम् । काश्यपप्रतिकृतिः काश्यपः । भवत्ययं जातिशब्दो न त्वनेन जातिराख्यायते किं तर्हि प्रतिकृतिः । एकस्मिन्निति किम् । व्रीहियवौ ॥ संख्याप्रयोगे प्रतिषेधो वक्तव्यः ॥ * ॥ एको व्रीहिः संपन्नः सुभिक्षं करोति ॥

॥ अस्मदो द्वयोश्च ॥ ५९ ॥

अस्मदो योऽर्थस्तस्यैकत्वे द्वित्वे च बहुवचनमन्यतरस्यां भवति । अहं ब्रवीमि । वयं ब्रूमः । आवां ब्रूवः । वयं ब्रूमः ॥ सविशेषणस्य प्रतिषेधो वक्तव्यः ॥ * ॥ अहं देवदत्तो ब्रवीमि । अहं गार्ग्यो ब्रवीमि । अहं पटुर्ब्रवीमि । युष्मदि गुरावेकेषाम् । त्वं मे गुरुः । यूयं मे गुरवः ॥

॥ फल्गुनीप्रोष्ठपदानां च नक्षत्रे ॥ ६० ॥

चकारो द्वयोरित्यनुकर्षणार्थः । फल्गुन्योर्द्वयोः प्रोष्ठपदयोश्च द्वयोर्नक्षत्रयोर्बहुवचनमन्यतरस्यां भवति । कदा पूर्वे फल्गुन्यौ, कदा पूर्वाः फल्गुन्यः । कदा पूर्वे प्रोष्ठपदे, कदा पूर्वाः प्रोष्ठपदाः । नक्षत्रइति किम् । फल्गुन्यौ माणविके ॥

॥ छन्दसि पुनर्वस्वोरेकवचनम् ॥ ६१ ॥

अन्यतरस्यामित्यनुवर्त्तते । द्वयोर्द्विवचने प्राप्ते पुनर्वस्वोश्छन्दसि विषये एकवचनमन्यतरस्यां भवति । पुनर्वसुर्नक्षत्रमदितिर्देवता । पुनर्वसू नक्षत्रमदितिर्देवता । नक्षत्रइत्येव । पुनर्वसू माणवकौ । छन्दसीति किम् । पुनर्वसू इति ॥

विशाखयोश्च ॥ ६२ ॥

छन्दसीति वर्त्तते, द्विवचने प्राप्ते छन्दसि विषये विशाखयोरेकवचनमन्यतरस्यां भवति । विशाखा नक्षत्रमिन्द्राग्नी देवता । विशाखे नक्षत्रमिन्द्राग्नी देवता ॥

तिष्यपुनर्वस्वोर्नक्षत्रद्वन्द्वे बहुवचनस्य द्विवचनं नित्यम् ॥ ६३ ॥

छन्दसीति निवृत्तम् । तिष्य एकः पुनर्वसू द्वौ तेषां द्वन्द्वो बह्वर्थः । तत्र बहुवचने प्राप्ते द्विवचनं विधीयते । तिष्यपुनर्वस्वोर्नक्षत्रविषये द्वन्द्वे बहुवचनप्रसङ्गे नित्यं द्विवचनं भवति । उदितौ तिष्यपुनर्वसू दृश्येते । तिष्यपुनर्वस्वोरिति किम् । विशाखानुराधाः । नक्षत्रइति किम् । तिष्यश्च माणवकः पुनर्वसू माणवकौ तिष्यपुनर्वसवो माणवकाः । ननु च प्रकृतमेव नक्षत्रग्रहणं किमर्थं पुनरुच्यते । पर्यायाणामपि यथा स्यात् । तिष्यपुनर्वसू । पुष्यपुनर्वसू । सिध्यपुनर्वसू । द्वन्द्वइति किम् । उन्मुग्धास्तिष्यस्तौ पुनर्वसू येषां तइमे तिष्यपुनर्वसवः । उन्मुग्धास्तिष्यादय एव विपर्ययेण दृश्यमाना बहुव्रीहिणोच्यन्ते । तेन नक्षत्रसमासएवायम् । बहुवचनस्येति किम् । एकवचनस्य मा भूत्, तिष्यपुनर्वसु इदमिति । सर्वो द्वन्द्वो विभाषा एकवद्भवतीत्यस्यैतदेव ज्ञापकम् । नित्यग्रहणं विकल्पनिवृत्त्यर्थम् ॥

सरूपाणामेकशेष एकविभक्तौ ॥ ६४ ॥

समानं रूपमेषामिति सरूपाः । सरूपाणां शब्दानां एकविभक्तौ परत एकशेषो भवति । एकः शिष्यते इतरे निवर्त्तन्ते । वृक्षश्च वृक्षश्च वृक्षौ । वृक्षश्च वृक्षश्च वृक्षश्च वृक्षाः । प्रत्यर्थं शब्दनिवेशाच्चैकेनानेकस्याभिधानं, तत्रानेकार्थाभिधाने अनेकशब्दत्वं प्राप्तं तस्मादेकशेषः । सरूपाणामिति किम् । प्लक्षन्यग्रोधाः । रूपग्रहणं किम् । भिन्नेऽप्यर्थे यथा स्यात् । अक्षाः । पादाः । माषाः । एकग्रहणं किम् । द्विबह्वोः शेषो मा भूत् । शेषग्रहणं किम् । आदेशो मा भूत् । एकविभक्ताविति किम् । पयः पयो जरयति । ब्राह्मणाभ्यां च कृतं ब्राह्मणाभ्यां च देहि ॥

वृद्धो यूना तल्लक्षणश्चेदेव विशेषः ॥ ६५ ॥

शेष इति वर्त्तते । यूनेति सहयोगे तृतीया । वृद्धो यूना सहवचने शिष्यते युवा निवर्त्तते । वृद्धशब्दः पूर्वाचार्यसंज्ञा गोत्रस्य । अपत्यमन्तर्हितं वृद्धमिति । वृद्धयूनोः सहवचने वृद्धः शिष्यते तल्लक्षणश्चेदेव विशेषः । तदिति वृद्धयूनोर्निर्देशः । लक्षणशब्दो निमित्तपर्यायः । चेच्छब्दो यद्यर्थे, एवकारोऽवधारणे । विशेषो वैरूप्यम् । वृद्धयुवनिमित्तकमेव यदि वैरूप्यं भवति ततो वृद्धः शिष्यते युवा निवर्तते । समानायामाकृतौ वृद्धयुवप्रत्ययौ भिद्येते । गार्ग्यश्च गार्ग्यायणश्च गार्ग्यौ । वात्स्यश्च वात्स्यायनश्च वात्स्यौ । वृद्ध इति किम् । गर्गश्च गार्ग्यायणश्च गर्गगार्ग्यायणौ । यूनेति किम् । गार्ग्यश्च गर्गश्च गार्ग्यगर्गौ । तल्लक्षण इति किम् । गार्ग्यवात्स्यायनौ । एवकारः किमर्थः । भागवित्तिश्च भागवित्तिकश्च भागवित्तिभागवित्तिकौ । कुत्सा सौवीरत्वं च भागवित्तिकस्यापरो विशेषो विद्यते ॥

स्त्री पुंवच्च ॥ ६६ ॥

शेष इति वर्त्तते, वृद्धो यूनेति च सर्वं, स्त्री वृद्धा यूना सहवचने शिष्यते तल्लक्षणश्चेदेव विशेषो भवति । पुंसइवास्याः कार्यं भवति । स्त्र्यर्थः पुमर्थवद्भवति । गार्गी च गार्ग्यायणश्च गार्ग्यौ । वात्सी च वात्स्यायनश्च वात्स्यौ । दाक्षी च दाक्षायणश्च दाक्षी ॥

पुमान् स्त्रिया ॥ ६७ ॥

तल्लक्षणश्चेदेव विशेष इति वर्त्तते । वृद्धो यूनेति निवृत्तम् । स्त्रिया सहवचने पुमान् शिष्यते स्त्री निवर्त्तते । स्त्रीपुंसलक्षणश्चेदेव विशेषो भवति । ब्राह्मणश्च ब्राह्मणी च ब्राह्मणौ । कुक्कुटश्च कुक्कुटी च कुक्कुटौ । तल्लक्षणश्चेदेव विशेष इत्येव । कुक्कुटश्च मयूरी च कुक्कुटमयूर्यौ । एवकारः किमर्थः । इन्द्रश्च इन्द्राणी चेन्द्रेन्द्राण्यौ । पुंयोगादाख्यायामित्यपरो विशेषः । पुमानिति किम् । प्राक् च प्राची च प्राक्प्राच्यौ । प्रागित्यमव्ययलिङ्गम् ॥

भ्रातृपुत्रौ स्वसृदुहितृभ्याम् ॥ ६८ ॥

यथासंख्यं भ्रातृपुत्रशब्दौ शिष्येते सहवचने स्वसृदुहितृ-

भ्याम्। स्वस्रा सहवचने भ्रातृशब्दः शिष्यते । भ्राता च स्वसा च भ्रातरौ । दुहित्रा सहवचने पुत्त्र शब्दः शिष्यते। पुत्त्रश्च दुहिता च पुत्त्रौ ॥

नपुंसकमनपुंसकेनैकवच्चास्यान्यतरस्याम् ॥ ६९ ॥

तल्लक्षणश्चेदेव विशेष इति वर्त्तते। नपुंसकानपुंसकमात्रकृते विशेषे अनपुंसकेन सहवचने नपुंसकं शिष्यते एकवच्चास्य कार्यं भवति अन्यतरस्याम् । शुक्लश्च कम्बलः शुक्ला च बृहतिका शुक्लं च वस्त्रं तदिदं शुक्लम् । तानीमानि शुक्लानि । अनपुंसकेनेति किम्। शुक्लं च शुक्लं च शुक्लं च शुक्लानि । एकवच्चेति न भवति ॥

पिता मात्रा ॥ ७० ॥

अन्यतरस्यामिति वर्त्तते नैकवदिति । मात्रा सह वचने पितृशब्दः शिष्यते अन्यतरस्याम् । माता च पिता च पितरौ । मातापितराविति वा ॥

श्वशुरः श्वश्र्वा ॥ ७१ ॥

अन्यतरस्यामिति वर्तते । श्वश्र्वा सहवचने श्वशुरशब्दः शिष्यते अन्यतरस्याम् । श्वशुरश्च श्वश्रूश्च श्वशुरौ । श्वश्रूश्वशुराविति वा ॥

त्यदादीनि सर्वैर्नित्यम् ॥ ७२ ॥

त्यदादीनि शब्दरूपाणि सर्वैः सहवचने नित्यं शिष्यन्ते त्यदादिभिरन्यैश्च । सर्वग्रहणं साकल्यार्थं, नित्यग्रहणं विकल्पनिवृत्त्यर्थम् । स च देवदत्तश्च तौ । यश्च देवदत्तश्च यौ । त्यदादीनां मिथो यद्यत्परं तत्तच्छिष्यते ॥ * ॥ स च यश्च यौ । यश्च कश्च कौ ॥

ग्राम्यपशुसंघेष्वतरुणेषु स्त्री ॥ ७३ ॥

ग्राम्याणां पशूनां संघाः ग्राम्यपशुसंघाः । एतेषु सह विवक्षायां स्त्री शिष्यते । पुमान् स्त्रियेति पुंसः शेषे प्राप्ते स्त्रीशेषो विधीयते । अतरुणग्रहणं सामर्थ्यात्पशुविशेषणम् । गाव इमाः । अजा इमाः । ग्राम्यग्रहणं किम् । रुरव इमे । पृषता इमे । पशुष्विति किम् । ब्राह्मणाः क्षत्त्रियाः । संघेष्विति किम् । एतौ गावौ चरतः । अतरुणेष्विति किम् । वत्सा इमे । बर्करा इमे । अनेकशफेष्विति वक्तव्यम् ॥ * ॥ इह मा भूत् । अश्वा इमे ॥

इति श्रीजयादित्यविरचितायां काशिकायां वृत्तौ प्रथमाध्यायस्य द्वितीयः पादः ॥ :: ॥ :: ॥ :: ॥ :: ॥

॥ अथ प्रथमाध्यायस्य तृतीयः पादः ॥

॥ भूवादयो धातवः ॥ १ ॥

भू इत्येवमादयः शब्दाः क्रियावचना धातुसंज्ञा भवन्ति । भू। भवति । एध । एधते । स्पर्द्ध । स्पर्द्धते । धातुशब्दः पूर्वाचार्यसंज्ञा। ते च क्रियावचनानां संज्ञां कृतवन्तः । तदिहापि पूर्वाचार्यसंज्ञाश्रयणात् क्रियावाचिनामेव भूवादीनां धातुसंज्ञा विधीयते ॥

भूवादीनां वकारोयं मङ्गलार्थः प्रयुज्यते ।
भुवो वार्थं वदन्तीति भ्वर्था वा वादयः स्मृताः ॥
धातुप्रदेशा धातोरित्येवमादयः ॥

॥ उपदेशेजनुनासिक इत् ॥ २ ॥

उपदिश्यतेनेनेत्युपदेशः शास्त्रवाक्यानि सूत्रपाठः खिलपाठश्च तत्र योजनुनासिकः स इत्संज्ञो भवति । एध। स्पर्द्ध। प्रतिज्ञानुनासिक्याः पाणिनीयाः । उपदेशइति किम् । अभ्रँ आपः। अजिति किम् । आतो मनिन् क्वनिब्वनिपश्च। अनुनासिक इति किम् । सर्वस्याचो मा भूत्। इत्प्रदेशा आदितश्चेत्येवमादयः ॥

॥ हलन्त्यम् ॥ ३ ॥

उपदेशइति वर्त्तते। अन्ते भवमन्त्यम्। धात्वादेः समुदायस्य यदन्त्यं हल् तदित्संज्ञं भवति । अ इ उ ण् । णकारः । ऋ ऌ क् । ककारः । ए ओ ङ् । ङकारः । ऐ औ च् । चकारः । उपदेशइत्येव । अग्निचित् । सोमसुत् । हस्य ल् हलिति * द्वितीयमत्र हल्ग्रहणं तन्त्रेणोपात्तं द्रष्टव्यम् । तेन प्रत्याहारपाठे हलित्यत्र लकारस्य इत्संज्ञा क्रियते। तथा च सति हलन्त्यमित्यत्र प्रत्याहारे नेतरेतराश्रयदोषो भवति ॥

न विभक्तौ तुस्माः ॥ ४ ॥

पूर्वेण प्राप्तायामित्संज्ञायां विभक्तौ वर्त्तमानानां तवर्गसकारमकाराणां प्रतिषेध उच्यते । तवर्ग । टाङसिङसामिनात्स्याः । वृक्षात् । प्लक्षात् । सकार । जस् । ब्राह्मणाः । तस् । थस्। पचतः। पचथः। मकार । अपचताम् । अपचतम् । विभक्ताविति किम्। अचो यत्। ऊर्णोया युस्। रुधादिभ्यः श्नम्। किमोऽत् । इदोऽदित्यत्र प्रतिषेधो न भवति । अनित्यत्वादस्य प्रतिषेधस्य। इदमस्थमुरित्युकारानुबन्धनिर्द्देशादनित्यत्वमुपलक्ष्यते ॥

आदिर्ञिटुडवः ॥ ५ ॥

इदिति वर्तते । आदिशब्दः प्रत्येकमभिसंबध्यते । ञि टु डु इत्येतेषां समुदायानामादितो वर्तमानानामित्संज्ञा भ-

* हलहलिति पा॰

वति। ञिमिदा। मिन्नः। ञिधृषा। धृष्टः। ञिक्ष्विदा। क्ष्विण्णः *। ञिइन्धी। इद्धः। टुवेपृ। वेपथुः। टुओश्वि। श्वयथुः। डुपचष्। पक्त्रिमम्। डुवप्। उप्त्रिमम्। डुकृञ्। कृत्रिमम्। आदिरिति किम्। पटूयति। कण्डूयति। उपदेश इत्येव। ञिकारीयति ॥

षः प्रत्ययस्य ॥ ६ ॥

षकारः प्रत्ययस्यादिरित्संज्ञो भवति। शिल्पिनि ष्वुन्। नर्त्तकी। रजकी। प्रत्ययस्येति किम्। षोडः। षडिकः। आदिरित्येव। अविमह्योष्टिषच्। अविषः। महिषः ॥

चुटू ॥ ७ ॥

चवर्गटवर्गौ प्रत्ययस्यादौ इत्संज्ञौ भवतः। गोत्रे कुञ्जादिभ्यश्च्फञ्। कौञ्जायन्यः। छस्य ईयादेशं वक्ष्यति। जस्। ब्राह्मणाः। झस्यान्तादेशं वक्ष्यति। शण्डिकादिभ्यो ञ्यः। शाण्डिक्यः। टवर्ग। चरेष्टः। कुरुचरी। मद्रचरी। ठस्य इकादेशं वक्ष्यति। सप्तम्यां जनेर्डः। उपसरजः। मन्दुरजः। ढस्यैयादेशं वक्ष्यति। अत्नायणः। आचः। पृथग्योगकरणमस्य विधेरनित्यत्वज्ञापनार्थम्। तेन वित्तश्चुञ्चुप्चणपौ। केशचुञ्चुः। केशचणः। अवात्कुटारच्च। नते नासिकायाः संज्ञायां टीटञ्नाटञ्भ्रटचः। अवटीटः। आदिरित्येव। कर्म्मणि घटोऽठच्। कर्मठः ॥

लशक्वतद्धिते ॥ ८ ॥

तद्धितवर्ज्जितस्य प्रत्ययस्यादितो वर्त्तमाना लकारशकारकवर्गा इत्संज्ञा भवन्ति। लकार। ल्युट्च। चयनम्। जयनम्। शकार। कर्त्तरि शप्। भवति। पचति। कवर्ग। क्तक्तवतू निष्ठा। भुक्तः। भुक्तवान्। प्रियवशे वदः खच्। प्रियंवदः। वशंवदः। ग्लाजिस्थश्च ग्स्नुः। ग्लास्नुः। जिष्णुः। भूष्णुः। भञ्जभासमिदो घुरच्। भङ्गुरम्। टाडसिङसामिनात्स्याः। वृक्षात्। वृक्षस्य। अतद्धितइति किम्। चूडालः। लोमशः। कर्णिका ॥

तस्य लोपः ॥ ९ ॥

तस्येत्संज्ञकस्य लोपो भवति। तथा चैवोदाहृतम्। तस्य ग्रहणं सर्वलोपार्थम्। अलोन्त्यस्य मा भूत्। आदिर्ञिटुडव इति ॥

यथासंख्यमनुदेशः समानाम् ॥ १० ॥

संख्याशब्देन क्रमो लक्ष्यते। यथासंख्यं यथाक्रममनुदेशो भवति। अनुदिश्यतइत्यनुदेशः। पश्चादुच्चार्यतइत्यर्थः। समानां समसंख्यानां समपरिपठितानामुद्देशिनामनुदेशिनां च यथाक्रममुद्देशिभिरनुदेशिनः संबध्यन्ते। तूदीशलातुरवर्मतीकूचवाराड्ढक्छण्ढञ्यकः। प्रथमात्प्रथमः। द्वितीयाद् द्वितीय इत्यादि। तौदेयः। शालातुरीयः। वार्मतेयः। कौचवार्यः। समानामिति किम्। लक्षणेत्थंभूताख्यानभागवीप्सासु प्रतिपर्यनवः। लक्षणादयश्चत्वारो ऽर्थाः। प्रत्यादयस्त्रयः। सर्वेषां सर्वत्र कर्म्मप्रवचनीयसंज्ञा भवति। इह कस्मान्न भवति। वेशोयशआदेर्भगाद्यल्। ख चेति। स्वरितेन लिङ्गेन यथासंख्यं, यत्र नेष्यते तत्र स्वरितत्वं न प्रतिज्ञायते। स्वरितेनाधिकार इति स्वरितग्रहणं पूर्वेणापि संबध्यते ॥

॥ स्वरितेनाधिकारः ॥ ११ ॥

स्वरितेनेति इत्थंभूतलक्षणे तृतीया। स्वरितो नाम स्वरविशेषो वर्णधर्मः *। तेन चिह्नेनाधिकारो वेदितव्यः। अधिकारो विनियोगः। स्वरितगुणयुक्तं शब्दरूपमधिकृतत्वादुत्तरत्रोपतिष्ठते। प्रतिज्ञास्वरिताः पाणिनीयाः। प्रत्ययः। धातोः। ङ्याप्प्रातिपदिकात्। अङ्गस्य। भस्य। पदस्य ॥

॥ अनुदात्तङित आत्मनेपदम् ॥ १२ ॥

अविशेषेण धातोरात्मनेपदं परस्मैपदं च विधास्यते तत्रायं नियमः क्रियते। अनुदात्तेतो ये धातवो ङितश्च तेभ्य एव आत्मनेपदं भवति नान्येभ्यः। अनुदात्तेद्भ्यः। आस्। आस्ते। वस्। वस्ते। ङिद्भ्यः खल्वपि। षूङ्। सूते। शीङ्। शेते ॥

॥ भावकर्म्मणोः ॥ १३ ॥

लः कर्म्मणि च भावे चाकर्म्मकेभ्य इति भावकर्म्मणोर्विहितस्य लस्य तिबादयः सामान्येन वक्ष्यन्ते तत्रेदमुच्यते। भावे कर्म्मणि चात्मनेपदं भवति। भावे। ग्लायते भवता। सुप्यते भवता। आस्यते भवता। कर्म्मणि। क्रियते कटः। ह्रियते भारः। कर्म्मकर्त्तरि। लूयते केदारः स्वयमेवेति परस्मैपदं न भवति। तस्य विधाने द्वितीयं कर्तृग्रहणमनुवर्त्तते। तेन कर्त्तैव यः कर्त्ता तत्र परस्मैपदं भवति ॥

कर्त्तरि कर्म्मव्यतिहारे ॥ १४ ॥

कर्म्मशब्दः क्रियावाची व्यतिहारो विनिमयः। यत्रान्यसंबन्धिनीं क्रियामन्यः करोति इतरसंबन्धिनीं चेतरः स कर्मव्यतिहारः। तद्विशिष्टक्रियावचनाद्धातोरात्मनेपदं भवति। व्यतिलुनते। व्यतिपुनते। कर्म्मव्यतिहारइति किम्। लुनन्ति। कर्तृग्रहणमुत्तरार्थं शेषात्कर्त्तरि परस्मैपदमिति ॥

॥ न गतिहिंसार्थेभ्यः ॥ १५ ॥

पूर्वेणात्मनेपदं प्राप्तं प्रतिषिध्यते। गत्यर्थेभ्यो हिंसार्थेभ्यश्च धातुभ्यः कर्म्मव्यतिहारे आत्मनेपदं न भवति। व्यतिगच्छन्ति। व्यतिसर्पन्ति। हिंसार्थेभ्यः। व्यतिहिंसन्ति। व्यतिघ्नन्ति। प्रतिषेधे हसादीनामुपसंख्यानम् ॥ * ॥ व्यतिहसन्ति। व्यतिजल्पन्ति। व्यतिपठन्ति। हरतेरप्रतिषेधः ॥ * ॥ संप्रहरन्ते राजानः ॥

---

* ञिष्विदा। ष्विन्नः। पा०

* वर्णधर्मो न स्वरधर्म इति क्व चित्पाठः।

इतरेतरान्योन्योपपदाच्च ॥ १६ ॥

इतरेतरो ऽन्योन्य इत्येवमुपपदाद्धातोः कर्मव्यतिहारे आत्मनेपदं न भवति । इतरेतरस्य व्यतिलुनन्ति । अन्योन्यस्य व्यतिलुनन्ति । परस्परोपपदाच्चेति वक्तव्यम् ॥ * ॥ परस्परस्य व्यतिलुनन्ति ॥

नेर्विशः ॥ १७ ॥

शेषात्कर्तरीति परस्मैपदे प्राप्ते निपूर्वाद्विश आत्मनेपदं विधीयते नेः परस्माद्विश आत्मनेपदं भवति । निविशते । निविशन्ते । नेरिति किम् * । प्रविशति । यदागमास्तद्गुणीभूता-स्तद्ग्रहणेन गृह्यन्ते तेनाटा नास्ति व्यवधानम् । न्यविशत । नेरुपसर्गस्य ग्रहणम् अर्थवद्ग्रहणे नानर्थकस्येति तस्मादिह न भवति । मधुनि विशन्ति भ्रमराः ॥

परिव्यवेभ्यः क्रियः ॥ १८ ॥

डुक्रीञ् द्रव्यविनिमये ञित्त्वात्कर्त्रभिप्राये क्रियाफले सिद्धमात्मनेपदम्, अकर्त्रभिप्रायार्थोयमारम्भः । परिव्यवेभ्य उत्तरात्क्रीणातेरात्मनेपदं भवति । परिक्रीणीते । विक्रीणीते । अवक्रीणीते । पर्यादय उपसर्गा गृह्यन्ते तेनेह न भवति । बहुविक्रीणाति वनम् ॥

विपराभ्यां जेः ॥ १९ ॥

शेषात्कर्त्तरि परस्मैपदमित्यस्यापवादः । विपरापूर्वाज्जयतेर्धातोरात्मनेपदं भवति । विजयते । पराजयते । विपराशब्दावुपसर्गौ गृह्येते साहचर्यात्,तेनेह न भवति । बहु विजयति वनम् । परा जयति सेनेति ॥

आङो दो ऽनास्यविहरणे ॥ २० ॥

अकर्त्रभिप्रायार्थोयमारम्भः । आङ्पूर्वाद्ददातेरनास्यविहरणे वर्त्तमानादात्मनेपदं भवति । विद्यामादत्ते । अनास्यविहरणइति किम् । आस्यं व्याददाति ॥ आस्यविहरणसमानक्रियादपि प्रतिषेधो वक्तव्यः ॥ * ॥ विपादिकां व्याददाति । कूलं व्याददाति । स्वाङ्गकर्म्मकाच्चेति वक्तव्यम् ॥ * ॥ इह मा भूत् । व्याददते पिपीलिकाः पतङ्गस्य मुखम् ॥

क्रीडो ऽनुसंपरिभ्यश्च ॥ २१ ॥

क्रीडृ विहारे एतस्माद् अनु सम् परि इत्येवंपूर्वाद् आङ्पूर्वाच्चात्मनेपदं भवति । अनुक्रीडते । संक्रीडते । परिक्रीडते । आङः खल्वपि । आक्रीडते । समो ऽकूजने इति वक्तव्यम् ॥ * ॥ संक्रीडन्ति शकटानि । समा साहचर्यादन्वादिरुपसर्गो गृह्यते तेनेह कर्म्मप्रवचनीयप्रयोगे न भवति । माणवकमनुक्रीडति । आगमेः क्षमायामात्मनेपदं वक्तव्यम् ॥ * ॥ क्षमा उपेक्षा कालहरणमिति यावत् । आगमयस्व तावन्माणवकम् । शिक्षेर्जिज्ञासायाम् ॥ * ॥ विद्यासु शिक्षते । आशिषि नाथः ॥ * ॥ सर्पिषो नाथते । मधुनो नाथते । आशिषीति किम् । माणवकमनुनाथति । हरतेर्गतताच्छील्ये ॥ * ॥ पैतृकमश्वा अनुहरन्ते । मातृकं गावो ऽनुहरन्ते । गतताच्छील्य इति किम् । मातुरनुहरति । किरतेर्हर्षजीविकाकुलायकरणेष्विति वक्तव्यम् ॥ * ॥ अपस्किरते वृषभो हृष्टः । जीविकायाम् । अपस्किरते कुक्कुटो भक्षार्थी । कुलायकरणे । अपस्किरते श्वा आश्रयार्थी । हर्षादिष्विति किम् । अपकिरति कुसुमम् । आङि नुप्रच्छ्योरुपसंख्यानम् ॥ * ॥ आनुते शृगालः । आपृच्छते गुरुम् । शप उपलम्भनइति वक्तव्यम् ॥ * ॥ वाचा शरीरस्पर्शनमुपलम्भनम् । देवदत्ताय शपते । यज्ञदत्ताय शपते । उपलम्भनइति किम् । शपति ॥

समवप्रविभ्यः स्थः ॥ २२ ॥

सम् अव प्र वि इत्येवंपूर्वात् तिष्ठतेरात्मनेपदं भवति । संतिष्ठन्ते । अवतिष्ठते । प्रतिष्ठते । वितिष्ठते ॥ आङः स्थः प्रतिज्ञानइति वक्तव्यम् ॥ * ॥ अस्ति सकारमात्मानमातिष्ठते । आगमो गुणवृद्धी आतिष्ठते ॥

प्रकाशनस्थेयाख्ययोश्च ॥ २३ ॥

स्वाभिप्रायकथनं प्रकाशनं, स्थेयस्याख्या स्थेयाख्या । तिष्ठत्यस्मिन्निति स्थेयः । विवादपदनिर्णेता लोके स्थेय इति प्रसिद्धस्तस्य प्रतिपत्त्यर्थमाख्याग्रहणम् । प्रकाशने स्थेयाख्यायां च तिष्ठतेरात्मनेपदं भवति । प्रकाशने तावत् । तिष्ठते कन्या छात्रेभ्यः । तिष्ठते वृषली ग्रामपुत्रेभ्यः । प्रकाशयत्यात्मानमित्यर्थः । स्थेयाख्यायाम् । त्वयि तिष्ठते । मयि तिष्ठते । संशय्य कर्णादिषु तिष्ठते यः ॥

उदो ऽनूर्ध्वकर्म्मणि ॥ २४ ॥

उत्पूर्वात्तिष्ठतेरनूर्ध्वकर्म्मणि वर्त्तमानादात्मनेपदं भवति । कर्म्मशब्दः क्रियावाची अनूर्ध्वताविशिष्टक्रियावचनात्तिष्ठतेरात्मनेपदं भवति । गेहे उत्तिष्ठते । कुटुम्बे उत्तिष्ठते । तदर्थं यतत इत्यर्थः । उद ईहायामिति वक्तव्यम् ॥ * ॥ इह मा भूत् । अस्माद्ग्रामात् शतमुत्तिष्ठति । शतमुत्पद्यतइत्यर्थः । ईहाग्रहणमनूर्द्ध्वकर्म्मण एव विशेषणं नापवादः । अनूर्द्ध्वकर्म्मणीति किम् । आसनादुत्तिष्ठति ॥

उपान्मन्त्रकरणे ॥ २५ ॥

उपपूर्वात्तिष्ठतेर्मन्त्रकरणे ऽर्थे वर्त्तमानादात्मनेपदं भवति । ऐन्द्र्या गार्हपत्यमुपतिष्ठते । आग्नेय्या आग्नीध्रमुपतिष्ठते । मन्त्रकरणइति किम् । भर्तारमुपतिष्ठति यौवनेन । उपाद्देवपूजासंगतिकरणमित्रीकरणपथिष्विति वाच्यम् ॥ * ॥ देवपूजाया-

म् । आदित्यमुपतिष्ठते । संगतिकरणे । रथिकानुपतिष्ठते । मित्रकरणे । महामात्रानुपतिष्ठते । मित्रकरणसंगतिकरणयोः को विशेषः । संगतिकरणमुपश्लेषः । तद्यथा । गङ्गा यमुनामुपतिष्ठते । मित्रकरणं तु विनाप्युपश्लेषेण मैत्रीसंबन्धः । पथि । अयं पन्थाः स्रुघ्नमुपतिष्ठते । वा लिप्सायामिति वक्तव्यम् ॥ * ॥ भिक्षुको ब्राह्मणकुलमुपतिष्ठते । उपतिष्ठतीति वा ॥

अकर्मकाच्च ॥ २६ ॥

उपादिति वर्तते । उपपूर्वात् तिष्ठतेरकर्मकादकर्मकक्रियावचनादात्मनेपदं भवति । यावद्भुक्तमुपतिष्ठते । यावदोदनमुपतिष्ठते । भुक्तमिति भावे क्तप्रत्ययः । भोजनेभोजने सन्निधीयत इत्यर्थः । अकर्म्मकादिति किम् । राजानमुपतिष्ठति ॥

॥ उद्विभ्यां तपः ॥ २७ ॥

अकर्म्मकादिति वर्त्तते । उद्वि इत्येवंपूर्वात् तपतेरकर्म्मकक्रियावचनादात्मनेपदं भवति । उत्तपत्ते । वितपते । दीप्यत इत्यर्थः । अकर्म्मकादित्येव । उत्तपति सुवर्णं सुवर्णकारः । वितपति पृष्ठं सविता । स्वाङ्गकर्मकाच्चेति वक्तव्यम् ॥ * ॥ उत्तपते पाणिम् । उत्तपते पृष्ठम् । वितपते पाणिम् । वितपते पृष्ठम् । स्वाङ्गं चेह न पारिभाषिकं गृह्यते ऽद्रवं मूर्त्तिमत् स्वाङ्गमिति । किं तर्हि,स्वमङ्गं स्वाङ्गम् । तेनेह न भवति । देवदत्तो यज्ञदत्तस्य पृष्ठमुत्तपतीति । उद्विभ्यामिति किम् । निष्टपति ॥

॥ आङो यमहनः ॥ २८ ॥

अकर्मकादिति वर्तते । यम उपरमे हन, हिंसागत्योरिति परस्मैपदिनौ । ताभ्यामकर्म्मकक्रियावचनाभ्यामाङ्पूर्वाभ्यामात्मनेपदं भवति । आयच्छते । आयच्छेते । आयच्छन्ते । हनः खल्वपि । आहते । आघ्नाते । आघ्नते । अकर्मकादित्येव । आयच्छति कूपाद्रज्जुम् । आहन्ति वृषलं पादेन । स्वाङ्गकर्मकाच्चेति वक्तव्यम् । आयच्छते पाणिम् । आहते शिरः । स्वाङ्गं चेह न पारिभाषिकं गृह्यते किं तर्हि, स्वमङ्गं स्वाङ्गं, तेनेह न भवति । आहन्ति शिरः परकीयमिति ॥

॥ समो गम्यृच्छिप्रच्छिस्वरत्यर्तिश्रुविदिभ्यः ॥ २९ ॥

अकर्म्मकादिति वर्त्तते । शेषात् कर्त्तरि परस्मैपदे प्राप्ते संपूर्वेभ्यो गमि ऋच्छि प्रच्छ स्वरति अर्ति श्रु विदि इत्येतेभ्यो ऽकर्मकेभ्यो धातुभ्य आत्मनेपदं भवति । संगच्छते । समृच्छते । संपृच्छते । संस्वरते । संकल्पा अस्य समरन्त । अर्तेर्लुङि ल्लिः सर्तिशास्त्यर्तिभ्यश्चेत्यङादेशः । तत्र परस्मैपदेष्वित्येतच्चाश्रीयते बहुलं छन्दस्यमाङ्योगेऽपीत्याट् प्रतिषिध्यते । ऋदृशोऽङि गुण इति गुणः । समरन्त । संशृणुते । संविक्ते । ऋच्छेरनादेशस्य ग्रहणम् । समृच्छिष्यते । अर्त्यादेशस्य त्वर्त्तेरित्येव सिद्धमात्मनेपदम् । अर्तेरुभयत्र पठ्यते, ऋ गतिप्रापणयोरिति भ्वादौ ऋस्टगताविति जुहोत्यादौ, विशेषाभावाद् द्वयोरपि ग्रहणम् । विदेर्ज्ञानार्थस्य ग्रहणं, परस्मैपदिभिर्गमादिभिः साहचर्याच्च लाभार्थस्य स्वरितेत्त्वादुभयतोभाषस्य । दृशेश्चेति वक्तव्यम् ॥ * ॥ संपश्यते । अकर्म्मकादित्येव । ग्रामं संपश्यति ॥

॥ अथ वेदान्तकौस्तुभप्रभायाः ॥

॥ तृतीयाध्यायस्य ॥

॥ द्वितीयपादावशेषः ॥

॥ भेदादिति चेन्न प्रत्येकमतद्वचनात् ॥ १२ ॥

ननु यदुक्तं ब्रह्मण उभयलिङ्गत्वाच्छुद्धाशुद्धपदार्थेषु स्वेच्छया प्रविष्टस्यापि नापुरुषार्थभूतहेयधर्मसंबन्धगन्ध इति । तन्न संभवति । यथा जीवस्य स्वतोऽपहतपाप्मत्वादियुक्तस्यापि तत्तद्देहसंबन्धित्वावस्थाभेदात् ते दोषाः स्युरिति चेत् । तन्न । कुतः । प्रत्येकमतद्वचनात् । "एष त आत्मान्तर्याम्यमृत"इति प्रतिपर्यायमन्तर्यामिणो निर्दोषत्वाभिधानेन दोषासंबन्धित्ववचनात् । जीवस्य तु बद्धावस्थायामपहतपाप्मत्वादिकं तिरोहितमित्युक्तं "पराभिध्याना"दित्यनेन ।

किंच, सर्वं वस्तु परमेश्वरसंकल्पादेव कालभेदेन सुखदुःखात्मकं भवति, न स्वरूपतस्तथास्ति । अन्यथा सर्वं सर्वदा सर्वस्य सुखायैव दुःखायैव वा स्यात् । तथोक्तम् ।

"नरकस्वर्गसंज्ञे वै पापपुण्ये द्विजोत्तम ।
वस्त्वेकमेव दुःखाय सुखायेर्ष्यागमाय च ॥
कोपाय च यतस्तस्माद्वस्तु दुःखात्मकं कुतः ।
तदेव प्रीतये भूत्वा पुनर्दुःखाय जायते ॥
तदेव कोपाय यतः प्रसादाय च जायते ।
तस्माद्दुःखात्मकं नास्ति न च किंचित् सुखात्मकम्" ॥

इति ।

अतः कर्मवश्यानां जीवानामेव तत्तत्कर्मानुगुण्येनेश्वरसंकल्पेन तत्तद्वस्तुसंबन्धप्रयुक्तो दोषः । ब्रह्मणस्तु स्वाधीनस्य सर्वत्रान्तर्यामितयावस्थितस्यापि न दोषगन्धस्पर्शः संभवति । अपितु सर्वनियमनरूपलीलारसपोषक एव तत्तद्वस्तुसंबन्ध इति ॥ १२ ॥

॥ अपिचैवमेके ॥ १३ ॥

अपिच, जीवपरयोरेकत्र स्थितिमत्त्वेऽपि यदिदं दोषभात्त्वाभात्त्वमुक्तम् । एवमेवैके शाखिनोऽधीयते, "द्वा सुपर्णा सयुजे"त्यादिना ॥ १३ ॥

ननु यदुक्तं, जीवस्य कर्मवश्यतया कर्मफलभोक्तृत्वम्, ब्रह्मणस्तु तदभावाच्च तद्भोक्तृत्वं मति। नैतदुपपद्यते। यतः। "अनेन जीवेनात्मनानुप्रविश्य नामरूपे व्याकरवाणी"ति स्वात्मकजीवानुप्रवेशपूर्वकं ब्रह्मणो नामरूपव्याकरणश्रुतेस्तस्यापि तदन्तर्यामितया तदात्मभूतस्य जीववद्देवमनुष्यादिरूपवत्त्वं, तन्नामभाक्त्वं चाविशिष्टम्। तथात्वे च विधिनिषेधविषयतया कर्मवश्यत्वमवर्जनीयमिति चेत्। तत्राह ॥

॥ अरूपवदेव हि तत् प्रधानत्वात् ॥ १४ ॥

तत्तच्छरीरेऽन्तर्यामितयानुप्रविष्टमपि तद्ब्रह्मारूपवदेव। देवमनुष्यादिरूपरहितमेव। कुतः। देवतिर्यङ्मनुष्यादिनामरूपनिर्वोढृत्वेन प्रधानत्वात्। "आकाशो ह वै नामरूपयोर्निर्वहिता ते यदन्तरा तद्ब्रह्मे"ति श्रुतेः।

अयं भावः। जीवस्य कर्मजन्यसुखदुःखभोक्तृत्वेन तत्तद्रूपसंबन्धित्वं, ब्रह्मणस्तु कर्माभावेन तत्फलभोक्तृत्वाभावादरूपत्वम्। विधिनिषेधशास्त्रमपि कर्मवश्यमेवाधिकुरुते। अत उभयलिङ्गमेव हि परं ब्रह्म ॥ १४ ॥

ननु स्यादेतत्। यदि ब्रह्मणः सत्यकामत्वसत्यसंकल्पत्वसर्वज्ञत्वजगत्कारणत्वसर्वान्तरात्मत्वादिकं सत्यं स्याच्च तु शबलगततया"नेति नेती"त्यादिश्रुतिप्रसिद्धत्वेन मिथ्याभूतम्। अतः "सत्यं ज्ञानमनन्तं ब्रह्मे"त्यादिश्रुतिप्रतिपाद्यप्रकाशैकस्वरूपस्य ब्रह्मणः कथमुभयलिङ्गत्वमिति चेत्, तत्राह ॥

॥ प्रकाशवच्चावैयर्थ्यात् ॥ १५ ॥

यथा"सत्यं ज्ञानमनन्तं ब्रह्मे"त्यादिवाक्यावैयर्थ्यात् प्रकाशैकस्वरूपं ब्रह्मेत्यभ्युपगतम्, तथा सत्यकामत्वादिसमस्तहेयलेशास्पृष्टमाहात्म्यत्वकल्याणगुणसागरत्वाभिधायिवाक्यावैयर्थ्यादुभयलिङ्गत्वं ब्रह्मण इति ॥ १५ ॥

॥ आह च तन्मात्रम् ॥ १६ ॥

"सत्यं ज्ञान"मिति वाक्यं प्रकाशस्वरूपं ब्रह्मेत्येतावन्मात्रमाह, न तु वाक्यान्तरागतं कल्याणगुणसागरत्वसत्यकामत्वादिकं निषेधति ॥ १६ ॥

॥ दर्शयति चाथो अपि स्मर्यते ॥ १७ ॥

दर्शयति च वेदान्तवाक्यगणः परस्य समस्तहेयलेशास्पृष्टमाहात्म्यत्वं कल्याणगुणसागरत्वं च। "य आत्मापहतपाप्मा","निष्कलं निष्क्रियं शान्तं निरवद्यं निरञ्जनं","सत्यकामः सत्यसंकल्पः", "यः सर्वज्ञः सर्ववित्",

"परास्य शक्तिर्विविधैव श्रूयते
स्वाभाविकी ज्ञानबलक्रिया च।
तमीश्वराणां परमं महेश्वरं
तं देवतानां परमं च दैवतम्" ॥
"स कारणं कारणाधिपाधिपो
नचास्य कश्चिज्जनिता न चाधिपः"।
"न तस्य कार्यं करणं च विद्यते
न तत्समश्चाभ्यधिकश्च दृश्यते" ॥

इत्यादिः। अथो स्मर्यतेऽपि,

"अहं कृत्स्नस्य जगतः प्रभवः प्रलयस्तथा।
मत्तः परतरं नान्यत् किंचिदस्ति धनंजय" ॥

इत्यादिना ॥ १७ ॥

॥ अत एव चोपमा सूर्यकादिवत् ॥ १८ ॥

यतः सर्वत्रान्तर्यामितयावस्थितस्यापि परस्योभयलिङ्गवत्तया निर्लेपत्वाच्च तत्स्थानप्रयुक्तदोषसंबन्धित्वम्। अत एव शास्त्रे सूर्यकादिवत्, सूर्यस्य प्रतिकृतयः सूर्यकास्तद्वत्, जलसूर्यादिवत्, इत्युपमोपादीयते।

"आकाशमेकं हि यथा घटादिषु पृथग्भवेत्।
तथात्मैको ह्यनेकस्थो जलाधारेष्विवांशुमान्" ॥

"एक एव हि भूतात्मे"त्यादिषु। श्रुत्यर्थस्तु पूर्वमेव जीवात्मस्वरूपनिर्णय उक्तः ॥ १८ ॥

नन्वम्बुन्यनवस्थित एव सूर्यो भ्रान्त्या तत्रस्थ इव गृह्यते। परमात्मा तु "यः पृथिव्यां तिष्ठन् योऽप्सु तिष्ठन् य आत्मनि तिष्ठ"न्नित्येवमादिश्रुत्या परमार्थत एव स्थितो गृह्यते। अतो न सूर्यादिदृष्टान्तो ब्रह्मणि संभवतीति। दार्ष्टान्तवैरूप्यादित्याचिपति ॥

॥ अम्बुवदग्रहणात् तु न तथात्वम् ॥ १९ ॥

अम्बुवदिति सप्तम्यन्ताद्वतिः। अम्बुनीव सूर्यस्य ब्रह्मणोऽग्रहणाच्च तथात्वं, सूर्यस्येव तत्प्रयुक्तदोषगन्धाभाववत्त्वं नेति ॥ १९ ॥

तत् परिहरति ॥

॥ वृद्धिह्रासभाक्त्वमन्तर्भावादुभयसामञ्जस्यादेवम् ॥ २० ॥

न हि दृष्टान्तदार्ष्टान्तिकयोरत्यन्तसाधर्म्यं विवक्षितम्। असंभवात्। अपितु विवक्षितांश एव। तथा च सूर्यादिदृष्टान्तेन ब्रह्मणो निर्लेपत्वमात्रे तात्पर्यं। कथमेवमवगम्यते। उभयस्य दृष्टान्तद्वयस्य सामञ्जस्यादेवं निश्चीयते।

तथाहि, यथा सूर्यः शुद्धाशुद्धेषु जलाधारेषु स्वकिरनिकरव्याप्त्यावस्थितो वस्तुतोऽवास्थितैस्तत्तद्गुणैर्दोषैर्वृद्धिह्रासादिभिर्न स्पृश्यते। यथा चाकाशो वृद्धिह्रासभाक्षु घटकर्कर्यादिषु विषयेषु वस्तुतोऽवस्थितोऽपि तद्गतवृद्धिह्रासादिदोषैर्न लिप्यते, एवं परं ब्रह्मापि, अन्तर्भावात्, तत्तदन्तरात्मत्वात्, तत्र तत्रावस्थितमपि तत्तद्गतवृद्धिह्रासादिदोषैर्न लिप्यत इति वृद्धिह्रासाभाक्त्वमात्रं दृष्टान्तद्वयेन निवर्त्यते ॥ २० ॥

॥ दर्शनाच्च ॥ २१ ॥

दृष्टान्तदार्ष्टान्तिकयोः सर्वात्मना साम्याभावेऽपि व्याघ्र इव पुरुष इत्यादिषु दृष्टान्तोपादानदर्शनादप्येवमवगम्यते॥२१॥

॥ प्रकृतैतावत्त्वं हि प्रतिषेधति
ततो ब्रवीति च भूयः ॥ २२ ॥

पूर्वं ब्रह्मणश्चेतनाचेतनवस्त्वन्तरात्मत्वेऽपि यथा जीवस्य तत्र तत्रावस्थितस्य तत्तद्दोषयोग उक्तो, न तथा परस्य। यतः श्रुतिस्मृतिषु स्वभावतोऽपास्तसमस्तदोषत्वमनन्तकल्याणगुणाकरत्वं चोच्यते, अत उभयलिङ्गमिति निरूपितम्।

इदानीं प्रत्यक्षादिप्रमाणैर्दुर्ज्ञेयस्य ब्रह्मणो ज्ञानाय स्थूलादिरूपोपदेशेन प्रप्रेयत्तानिषेधपूर्वकं सत्यज्ञानाद्यनन्तकल्याणगुणाश्रयमपरिच्छिन्नस्वरूपं मीमांस्यते। बृहदारण्यके, तत्र स्थूलदृष्टीनां ज्ञानाय "द्वे वाव ब्रह्मणो रूपे मूर्तं चामूर्तं चे"त्यादिना तेजोऽबन्नात्मकं वाय्वाकाशात्मकं चेति पञ्चभूतात्मकस्थूलरूपमुपदिश्य, महारजतादीनि रूपाणि चोपदिश्य, पठ्यते। "अथ त आदेशो नेति नेति", "न ह्येतस्मा"दिति, "नेत्यन्यत् परमस्ति", "अथ नामधेयं सत्यस्य सत्यं, प्राणा वै सत्यं, तेषामेष सत्य"मित्यत्र संशयः। "नेति नेती"ति श्रुतिः किं पूर्वोपदिष्टं मूर्तामूर्तादिरूपमात्रं प्रतिषेधति, उत प्राप्तं ब्रह्मण एतावत्त्वं प्रतिषेधतीति। किं तावत् प्राप्तम्। ब्रह्मणो रूपादिमात्रं प्रतिषिध्यते श्रुत्येति। सामान्यनिषेधश्रवणात्। अतो मूर्तामूर्तादिनामरूपं प्रतिषिध्य, नीरूपं नित्यशुद्धबुद्धमुक्तस्वभावमद्वितीयं ब्रह्म प्रतिपादयतीदं वाक्यम्। तस्य सत्त्वे च ब्रह्मणोऽद्वितीयत्वादिविरुद्धे नेति प्राप्ते सिद्धान्तमाह। "प्रकृतैतावत्त्व"मिति। हिरवधारणे, अन्ययोगव्यवच्छेदार्थकः। प्रकृतैतावत्त्वमेव ब्रह्मणः प्रतिषेधति। प्रकृतं यन्मूर्तामूर्तप्रपञ्चमेतावदेव ब्रह्म न भवतीति "अथात आदेशो नेति नेती"त्यत्र प्रतिपाद्यते, न तु प्रपञ्चस्वरूपं निषिध्यते। अतत्परत्वाद्वाक्यस्य। द्वौ नञौ द्वित्वसंख्यावच्छिन्नरूपमेतावत्त्वं प्रतिषेधतः।

"भोक्ता भोग्यं प्रेरितारं च मत्वा,
सर्वं प्रोक्तं त्रिविधं ब्रह्म एतत्"।

इत्यन्यत्रापि त्रिरूपत्वप्रतिपादनात्। तदेवाह "ततो ब्रवीति च भूयः", ततः पूर्वोक्तान्मूर्तामूर्तरूपद्वयादन्यद्रूपत्वं ब्रवीति च वाक्यशेषः। "न ह्येतस्मा"दिति, "नेत्यन्यत् परमस्ती"ति। एतस्मात् पूर्वोक्तादन्यद् ब्रह्मस्वरूपं न हीति न वक्तव्यम्। "अन्यत् परमस्ती"ति, एतस्मात् परमुत्कृष्टमिन्द्रियाद्यग्राह्यमेतन्नियन्तृपुरुषोत्तमाख्यमन्यत् स्वरूपमस्तीत्यर्थः।

"यस्मात् क्षरमतीतोऽहमक्षरादपि चोत्तमः"।

इति वाक्यात्।

यद्वा, एवमक्षरयोजना। प्रकृते यत् स्थूलसूक्ष्मादिधर्मवद्वस्तु, जडाजडवर्गः, ब्रह्मगतं चैतावत्त्वमिदमित्थमियदिति परत्र वृत्तिपरिमितत्वं "नेति नेती"ति श्रुतिर्निषेधति, न तु ब्रह्मण उभयप्रकारत्वं ह्यस्पृष्टाखिलदोषत्वमचिन्त्यापरिमितसार्वज्ञ्यादिधर्मवत्त्वं चेति। कुतः। ततोऽनन्तरं भूयोऽपरिमितं ब्रह्मण उभयगुणादीन् ब्रवीति प्रतिपादयतीति। एवं "नेति नेती"ति नञ्भ्यां प्राकृतस्थूलसूक्ष्मादिधर्मवज्जडवस्तुतदवच्छिन्नजीववस्तुविलक्षणं ब्रह्मेति प्रतिपाद्यत इति। अन्यत् समानम्। किं तदित्यपेक्षायामाह, "अथ नामधेयं सत्यस्य सत्य"मिति। तस्य निर्वचनम्। "प्राणा वै सत्यं तेषामेष सत्य"मिति। प्राणशब्देन प्राणवन्तो जीवा उच्यन्ते। ते हि वियदादिवदनुत्पाद्याः। अतस्तेषां सत्यशब्दवाच्यत्वम्। परंतु तेऽप्यनादिकर्मवशा देहयोगेन जन्मभाजो ज्ञानसंकोचविकाशरूपविकारवन्तश्च। एतत् परमात्मनो नास्तीति तेषामेष सत्यमिति।

यद्वा, "यदासीत् तदधीनमासी"दिति श्रुत्यनुसारात् प्राणास्तदुपलक्षिताचेतनजातं तत्संबन्धिनश्चेतनाश्च परतन्त्रसत्ताश्रयाः, तेषामपि सत्यं, स्वतन्त्रसत्ताश्रयं, चेतनादिवर्गादियत्तावच्छेदेन निर्दिष्टादत्यन्तविलक्षणं परं ब्रह्म, निखिलहेयगन्धाघ्रातमाहात्म्यं समस्तकल्याणगुणैकार्णवमित्यर्थः। "सर्वस्य वशी", सर्वस्येशानः", "संसारबन्धस्थितिमोक्षहेतुः", "अक्षरात् परतः पर" इत्यादिश्रुतिभ्यः। एतदभिप्रायमादाय पूर्वाचार्यैरप्युक्तम्।

"नेति नेति च निषेधिताश्रयस्तद्विशेषविषयोऽपि संमतः"।

इत्यादिना। तथैवाह भगवान् सनत्सुजातः।

"तस्यैव नामादिविशेषरूपै-
रिदं जगद्भाति महानुभाव।
निर्दिश्य सम्यक् प्रचरन्ति वेदा-
स्तद्विश्ववैरूप्यमुदाहरन्ति"॥

इति। विश्ववैरूप्यं स्थौल्यादिधर्मवतो विश्वस्माद्विलक्ष-

णमित्यर्थः । नाप्युक्ताद्वितीयत्वविरोधः । साम्याधिकाशून्यत्वस्यैवाद्वितीयत्वस्य श्रुतिसंमतत्वात् ।

केचित् तु "नेति नेती"ति किमयं प्रतिषेधो रूपे रूपवच्चोभयं प्रतिषेधति, आहोस्विदेकतरम्, यदाप्येकतरं, तदापि किं ब्रह्म प्रतिषेधति, रूपे परिशिनष्टि, आहोस्विद्रूपे मूर्तामूर्ते प्रतिषेधति । ब्रह्म परिशिनष्टीति संदेहं कृत्वा वाङ्मनसातीतमविषयान्तःपाति प्रत्यगात्मभूतं नित्यशुद्धबुद्धमुक्तस्वभावं ब्रह्मेति ।

तस्माद्ब्रह्मणो रूपं प्रपञ्चं प्रतिषेधति, परिशिनष्टि च, ब्रह्मेत्यभ्युपगन्तव्यमिति, स्वरूपजिज्ञासायामिदमुपक्रान्तम् । "अथात आदेशो नेति नेती"ति । तत्र कल्पितरूपप्रत्याख्यानेन ब्रह्मणः स्वरूपावेदनमिदमिति निर्णीयते । तदास्पदं हीदं समस्तं कार्यं "नेति नेती"ति प्रतिषिद्धम् । युक्तं च कार्यस्य वाचारम्भणशब्दादिभ्योऽसत्त्वमिति "नेति नेती"ति प्रतिषेधनं, न तु ब्रह्मणः, सर्वकल्पनामूलत्वात्", इति सिद्धान्तयन्ति । तदसत् । न तावदुक्तसंदेहो युक्तः । ब्रह्मणः प्रतिषेधप्राप्त्यभावात् । प्रपञ्चस्यापि स्वरूपनिषेधपरत्वाभावाद्वाक्यस्य, न हि शास्त्रं स्वयमेव ब्रह्मणो रूपं दर्शयित्वा पुनः स्वयमेव प्रतिषेधति ।

"प्रक्षालनाद्धि पङ्कस्य दूरादस्पर्शनं वरम्" ।

इति न्यायात् ।

ननु नेदं शास्त्रं प्रतिपाद्यत्वेन ब्रह्मणो रूपद्वयं निर्दिशति, लोकप्रसिद्धं त्विदं रूपद्वयं ब्रह्मणि कल्पितं परामृश्यते प्रतिषेधत्वाय,शुद्धब्रह्मस्वरूपावेदनाय च । इति चेन्न । तस्य कल्पकाभावेन कल्पितत्वासंभवात् ।

तथाहि, को वा तस्य कल्पक इति विवेचनीयं, ब्रह्मैव वा, जीवो वेति ।

नाद्यः, शुद्धस्य निर्विशेषस्य कल्पनाश्रयत्वायोगात् । अन्यथा शुद्धत्वहानेः ।

न द्वितीयः, भवन्मते तस्यापि कल्पितत्वेन कल्पकत्वासंभवात् । न हि प्रतिबिम्बः कल्पनाश्रयो दृष्टः श्रुतः संभवति वा । जडत्वात् । वास्तवचेतनान्तराङ्गीकारेऽद्वैतभङ्गः, कल्पितत्वानुपपत्तिश्चेत्यादिना पूर्वैर्विस्तृतत्वादलमस्माभिरत्र ।

नापि वाचारम्भणशब्दः प्रपञ्चासत्त्वपरः । पूर्वमेवारम्भणाधिकरणे निरस्तत्वात् ।

किंच, यदि प्रपञ्चासत्त्वमेवाभिप्रेतं, तर्हि "तदनन्यत्वमारम्भणशब्दादिभ्य"इत्यस्मिन्नधिकरणेऽसत्कार्यवादं निरस्य, किमर्थं सत्कार्यवादसमर्थनम् ।

तस्मात् तत्रोक्तप्रतिज्ञादृष्टान्तविरोधादधिकरणविरोधः, स्ववाक्यविरोधश्चानिवार्यः ।

अपिच, "वाङ्मनसातीतमविषयान्तःपाती"त्युक्त्वा पुनः "शुद्धब्रह्मस्वरूपावेदनाये"त्यपि स्वोक्तिविरोधः । सर्वप्रमाणविषयस्यावेदनासंभवात् । विषयत्वाङ्गीकारे च मिथ्यात्वप्रसङ्गादित्यलं विस्तरेण ।

तस्मान्नेति नेतीति शब्दो ब्रह्मणः प्राप्तमूर्तामूर्तरूपेयत्तामेव प्रतिषेधति । वाक्यशेषश्चोक्ताद्भूयस्त्वं तद्भिन्नलक्षणेन स्वरूपतः सत्यत्वोपलक्षितसार्वज्ञ्याद्यनन्तगुणतश्चानन्तत्वं प्रतिपादयतीति सूत्रकारतात्पर्यार्थः । "सत्यं ज्ञानमनन्तं ब्रह्म", "यः सर्वज्ञः सर्वविदि"त्यादिश्रुतिभ्यः ॥ २२ ॥

यद्येवं तर्हि कथं न गृह्यत इत्याशङ्क्याह ॥

॥ तदव्यक्तमाह हि ॥ २३ ॥

हि यस्मात् तद्ब्रह्माव्यक्तं तत्र गृह्यत इति शास्त्रमाह ।

"न चक्षुषा गृह्यते नापि वाचा
नान्यैर्देवैस्तपसा कर्मणा वा ।

इत्यादि । एव"मात्मा वारे द्रष्टव्यः", "मनसैवानुद्रष्टव्यः", इत्यादिश्रुतीनां निर्विषयत्वेन व्याकोपः ॥ २३ ॥

दर्शनाभावेऽनिर्मोक्षप्रसङ्गो दुर्वार इति चेत् तत्राह ॥

॥ अपि संराधने प्रत्यक्षानुमानाभ्याम् ॥ २४ ॥

संराधने सम्यग्भक्तियोगे ध्याने परं ब्रह्म व्यक्तं भवति, प्रकाशते । ध्यानेन प्रीतः परमात्मा तस्मै मुमुक्षवे स्वयमात्मानं दर्शयतीत्यर्थः । कुत इदमवगम्यत इत्यत आह, प्रत्यक्षानुमानाभ्याम् । श्रुतिस्मृतिभ्यामित्यर्थः ।

"ज्ञानप्रसादेन विशुद्धसत्त्व-
स्ततस्तु तं पश्यति निष्कलं ध्यायमानः" ।

इत्यादिश्रुतेः ।

"यं विनिद्रा जितश्वासाः संतुष्टाः संयतेन्द्रियाः ।
ज्योतिः पश्यन्ति युञ्जानास्तस्मै योगात्मने नमः" ॥
"योगिनस्तं प्रपश्यन्ति भगवन्तं सनातनम्" ।

इत्यादिस्मृतेश्च ॥ २४ ॥

किमात्मना ब्रह्म प्रकाशत इत्यपेक्षायामाह ॥

॥ प्रकाशादिवच्चावैशेष्यं, प्रकाशश्च, कर्मण्यभ्यासात् ॥ २५ ॥

"प्रकाशादिव"दिति, सूर्यवाय्वादिवत् । यथा सूर्यस्तमःशीतादिदोषरहितः प्रभासङ्गत्वादिगुणयुक्तश्च, यथा वा वा-

युर्नीचोत्तमादिसङ्कदोषरहितोऽपि शब्दस्पर्शादिगुणवांश्चेति लोके शास्त्रे च सुप्रसिद्धं, तद्वद्ब्रह्मणोऽप्यवैशेष्यं, विशेषो मायिकधर्मः,तत्संबन्धराहित्यम्। चकाराद्वैशेष्यं च सार्वज्ञ्याद्यनन्तकल्याणविशेषधर्माश्रयत्वं च शास्त्रे प्रसिद्धम्। "य आत्मापहतपाप्मा विजरो विमृत्यु"रित्यादि,"यः सर्वज्ञः सर्ववित्", "सत्यं ज्ञानमनन्तं ब्रह्म", "आनन्दं ब्रह्मणो विद्वान्", "स्वाभाविकी ज्ञानबलक्रिया चे"त्यादिश्रुतिभ्यः। तस्य प्रकाशश्च। कर्मण्यभ्यासात्। कर्मणि संराधने सम्यग्भक्तियोगेऽभ्यासादसकृदावर्तमानान्निदिध्यासनाद्भवति। न तु सकृद् ध्यानेनेत्यर्थः। "आवृत्तिरसकृदुपदेशा"दिति वक्ष्यमाणसूत्रात्। "आत्मा वारे द्रष्टव्यः श्रोतव्यो मन्तव्यो निदिध्यासितव्य"इत्यादिश्रुतेः। "तस्मात् सर्वेषु कालेषु मामनुस्मरे"ति भगवदुक्तेश्च, "आलोड्य सर्वशास्त्राणि विचार्य च पुनः पुन"रिति सूत्रकारवाक्याच्च॥ २५॥

प्रसङ्गात् तत्फलमाह॥

॥ अतोऽनन्तेन तथाहि लिङ्गम्॥ २६॥

अतोऽस्माद्ब्रह्मप्रकाशात् साक्षात्काराद्धेतोः, अनन्तेन, स्वरूपगुणशक्त्यादिभिरपरिच्छिन्नेन, परब्रह्मणा श्रीपुरुषोत्तमेन सह, साम्यं गच्छतीति शेषः। तत्र प्रमाणमाह, "तथाहि लिङ्ग"मिति। एतदर्थगमकं श्रौतवाक्यमित्यर्थः, "हिर्निश्चये।

"यदा पश्यः पश्यते रुक्मवर्णं
कर्तारमीशं पुरुषं ब्रह्मयोनिम्।
तदा विद्वान् पुण्यपापे विधूय
निरञ्जनः परमं साम्यमुपैति॥

केचित् तु, "ननु संराध्यसंराधकभावाभ्युपगमात् परेतरात्मनोरन्यत्वं स्यादित्याशङ्क्य,नेत्युच्यते। यथा सौरप्रकाश आकाशो वाङ्गुल्याद्युपाधौ कर्मणि भिन्न इव वक्र इव भाति, वस्तुतस्त्वेकस्वरूप एव, तद्वत् प्रकाश आत्मापि ध्यानज्ञानादौ कर्मण्युपाधौ भिन्न इव भाति, वस्तुतस्त्ववैशेष्यमेकरूपत्वमेवात्मनः। कुतः। अभ्यासात्। "तत्त्वमसी"त्याद्यभेदश्रुत्यभ्यासात्। अतो भेदस्यौपाधिकत्वाद्विद्यया भेदं निरस्य, जीवोऽनन्तेन परमात्मनैकतां गच्छति।

तथाहि, लिङ्गमपूर्वार्थज्ञापकं, "ब्रह्मैव सद् ब्रह्माप्येती"त्यादि", इत्याहुः, तदसंगतम्। ब्रह्मण्युपाधिसंबन्धासंभवात्।

तथाहि, उपाधिः शुद्धेऽभ्युपगत ईश्वरे वा।

नाद्यः, उपाधिसंबन्धस्यैवाशुद्धत्वहेतुत्वेन शुद्धत्वहानेः।

न द्वितीयः, ईश्वरस्याविद्यासंबन्धोत्तरभावित्वात्। औपाधिकनिरूप्य उपाधिस्तन्निरूप्य औपाधिकश्चेत्यन्योन्याश्रयात्। प्रतिबिम्बावच्छेदवादयोस्तत्र तत्र विस्तरशो निरस्तत्वाच्च।

किंच, न तावत् "तत्त्वमसी"त्यभ्यासो भेदनिरासे हेतुः। "एष त आत्मान्तर्यामी"ति ततोऽप्याधिक्येन भेदाभ्यासस्यापि सत्त्वात्। सिद्धान्ते भेदाभेदवाक्ययोस्तुल्यबलत्वात्। अन्यथा परस्परं बाध्यबाधकभावाभ्युपगम उभयोरपि प्रामाण्याभावप्रसङ्गेन सर्ववेदान्तेो दत्ततिलाञ्जलिः स्यात्।

तस्मादभ्यासशब्द उक्तार्थक एव। तस्यैव प्रकरणात्। यदप्युक्तं, "विद्यया भेदं निरस्य जीवोऽनन्तेन परमात्मनैकतां गच्छती"ति। तदप्यप्रमाणम्। स्वरूपभेदस्य स्वाभाविकत्वात्। स्वाभाविकस्यापि नाशाङ्गीकारे स्वरूपनाशस्यापि वक्तुं शक्यत्वात् स्वरूपनाश एव मुक्तिः स्यात्।

नापि "ब्रह्मैव स"न्निति श्रुतेरत्यन्ताभेदे लिङ्गत्वम्। तत्राप्युभयमानस्य सत्त्वात्। "ब्रह्मैव स"न्निति बृहद्गुणयोगाद्ब्रह्मत्वस्यापि तत्र सत्त्वेनाभेदप्रत्ययः। "ब्रह्माप्येती"ति प्राप्तृप्राप्यभावश्रवणेन भेदस्यापि भानाभावात् सर्वं समञ्जसम्। नैकस्यापि विरोध इत्यलं विस्तरेण॥ २६॥

एवं ब्रह्मणो मूर्तामूर्तप्रपञ्चैतावत्त्वं रूपं प्रतिषिध्य, ततो भूयस्त्वमनन्तकल्याणविशेषवत्त्वं च निरूप्य,तत्प्रकाशप्रकारं च प्रतिपाद्य,ब्रह्मणो निर्दोषत्वसिद्ध्यर्थं चिदचिद्रूपप्रपञ्चस्य तेन भेदाभेदप्रकारं निर्धारयति सूत्राभ्याम्। तत्र तावदचेतनस्य ब्रह्मणा भेदाभेदः सूपपन्न इत्याह॥

॥ उभयव्यपदेशात् त्वहिकुण्डलवत्॥ २७॥

अचिद्वस्तुनो ब्रह्मणा भेदाभेद एव संबन्धः। कुतः। "उभयव्यपदेशात्"। "सर्वं खल्विदं ब्रह्म","तज्जलानिति", "ब्रह्मैवेदं सर्वम्", "आत्मैवेदं सर्व"मित्यभेदव्यपदेशात्। "हन्ताहमिमास्तिस्रो देवताः", "अनेन जीवेनात्मनानुप्रविश्य नामरूपे व्याकरवाणि", "यः पृथिव्यां तिष्ठन् पृथिव्या अन्तरो", "यं पृथिवी न वेद", "यस्य पृथिवी शरीरं", "यः पृथिवीमन्तरो यमयत्येष त आत्मान्तर्याम्यमृत"इत्यादिना भेदव्यपदेशाच्चेत्युभयविधशास्त्राविरोधात् स्वाभाविकभेदाभेद एव सिध्यति। अन्यथा चैकतरस्य शास्त्रस्यावश्यं बाधप्रसङ्गात्।

ननु भेदाभेदयोरितरेतरविरोधात् कथमेकत्रावस्थानमित्याशङ्क्य तत्साधकदृष्टान्तमाह। "अहिकुण्डलव"दिति। यथाहिकुण्डलयोरहित्वेन कुण्डलत्वेन च भेदः। अह्यात्मकत्वादिना च कुण्डलस्याभेदः। तथा च कुण्डलावस्थापन्नस्याहेः कुण्डलस्य व्यक्तत्वात् प्रत्यक्षप्रमाणगोचरत्वेन भेदः स्वाभाविकः। सर्पात्मकत्वतदाधेयत्वतद्व्याप्यत्वादिना तदपृथक्सिद्धत्वादभेदोऽपि स्वाभाविकः। लम्बायमानावस्थायां तु सर्वदा सर्पायतत्वावच्छिन्नस्वरूपस्य कुण्डलस्य सूक्ष्मरूपेण तत्र सत्त्वेऽप्यव्यक्तनामरूपतया प्रत्यक्षायोग्यत्वमित्युभयोरपि स्थूलसूक्ष्मावस्थ-

योरनुगतत्वाद्भिन्नत्वम्। अन्यथा तस्य तत्राभावे पुनराविर्भावो न स्यात्। तथा स्थूलावस्थापन्नस्य कार्यस्य कारणापृथक्सिद्धपरतन्त्रसत्तावच्छिन्नस्वरूपेण व्यक्तनामरूपत्वाद्भेदः श्रुत्यादिप्रमाणसिद्धः। तदात्मकत्वादिना चाभेदः। अव्याकृतावस्थायां तु बीजेऽङ्कुरस्येव कार्यस्य कारणे सूक्ष्मरूपेण सद्भावेऽप्यव्यक्तनामरूपत्वात् प्रत्यक्षाद्यग्राह्यत्वमित्युभयावस्थायामपि तदात्मकत्वतदाधेयत्वतदायत्तसत्ताकत्वादिना तदपृथक्सिद्धत्वेनाभिन्नत्वेऽपि परतन्त्रसत्तावच्छिन्नतदात्मीयस्वरूपेण नामरूपविभागेन च भिन्नत्वमपीति स्वाभाविकभिन्नाभिन्नत्वमेवेति संक्षेपः।

केचित् तु "इदं सूत्रं जीवात्मभेदाभेदपरत्वेन व्याख्याय, "अहिकुण्डलव"दिति पक्षे जीवस्यावस्थारूपस्यानित्यत्वप्रसक्ति"रित्यनित्यत्वं प्रतिपादयन्तो दूषयन्ति। तत् तुच्छतरम्। तस्योक्तरीत्या जीवभेदाभेदपरत्वाभावात्। अचेतनस्यावस्थापत्तिरूपानित्यत्वं सर्वसंमतत्वादस्माकमपीष्टमेवेति ॥ २७ ॥

एवमचेतनस्य ब्रह्मभिन्नाभिन्नत्वप्रकारं निरूप्य चेतनस्य तत्त्वं प्रतिपादयति ॥

॥ प्रकाशाश्रयवद्वा तेजस्त्वात् ॥ २८ ॥

वाशब्दोऽतिदेशार्थः। पूर्वोक्ताचेतनवच्चेतनस्यापि ब्रह्मणो भिन्नाभिन्नत्वं दर्शयति। कुतः। उभयव्यपदेशादित्यनुवर्तते। "ततस्तु तं पश्यति निष्कलं ध्यायमान" इति ध्यातृध्येयत्वेन द्रष्टृदृश्यत्वेन च, "ब्रह्मविदाप्नोति परं", "परात् परं पुरुषमुपैति दिव्य"मिति प्राप्तृप्राप्यत्वेन च, "य आत्मानमन्तरो यमयती"ति नियन्तृनियम्यत्वेन च, स्वाभाविकस्य व्यपदेशात्। "तत् त्वमसि", "अहं ब्रह्मास्मि", "अयमात्मा ब्रह्म", इत्यादिना च स्वाभाविकाभेदस्य च व्यपदेशाद्भिन्नाभिन्नत्वमिति। अधिकशङ्का तु यदि पूर्वदृष्टान्तेन चेतनस्य भिन्नाभिन्नत्वं तर्ह्यचेतनवदवस्थाभाक्त्वमङ्गीकृतं स्यादिति तन्निरासयन् दृष्टान्तान्तरमाह, "प्रकाशाश्रयव"दिति। यथा सूर्यमणिदीपादिप्रकाशस्तत्प्रभावरूपः स्वाश्रयात् सूर्यादेर्भिन्नतया प्रत्यक्षेणोपलभ्यते। स्वाभाविकभेदवत्त्वात्। सूर्यदीपादेर्दृष्टृगोचरत्वेऽपि सूर्यप्रभेयं दीपप्रकाशोऽयमिति भेदप्रतीतेः सर्वजनप्रसिद्धत्वात्। तथा तदाधेयत्वतदात्मकत्वादिभिश्च हेतुभिस्तदविनाभावादभिन्नत्वमपि प्रत्यक्षादिमानप्रसिद्धमेव। अतोऽभेदस्यापि स्वाभाविकत्वमिति। तद्वत् प्रत्यगात्मनामपि परतन्त्रसत्तावच्छिन्नब्रह्मात्मीयस्वरूपत्वाणुपरिमाणकत्वाल्पज्ञत्वादिहेतुभिः स्वभावाद्भिन्नत्वेऽपि ब्रह्मात्मकत्वतदाधेयत्वतद्व्याप्यत्वतदधीनस्थितिप्रवृत्तिकत्वादिभिर्हेतुभिस्तदविनाभावादभिन्नत्वमपि स्वाभाविकमेवेति न केनापि वाक्येन विरोधलेशस्य संभावनेति। तत्र हेतुमाह, "तेजस्त्वादिति"। उभयोरपि तेजोरूपत्वाद्गुणतोऽप्यभेदः संभवतीत्यर्थः।

केचित् तु "सक्तिप्रकाशपक्षेऽप्याधाराधेयभावः प्रत्यहमुदयास्तमयौ च भवत इत्याहुः"। तत् तुच्छम्। आधाराधेयभावस्य शास्त्रप्रमाणसिद्धत्वेनेष्टापन्नत्वात्।

"यस्मिंल्लोकाः श्रिताः सर्वे तदु नान्वेति कश्चन"।

"अस्मिन् द्यौश्च पृथिवी चान्तरिक्षमोतं मनः सह प्राणैश्च सर्वै"रित्यादिश्रुतेः।

"अपि सर्वमिदं प्रोतं सूत्रे मणिगणा इव"।

इति स्मृतेश्च। "द्युभ्वाद्यायतन"मित्युक्तसूत्राच्च। नाप्युदयास्तमयौ दोषौ वक्तुं शक्यौ। तयोर्नित्यं संबन्धात्। नहि सूर्याद्विच्छिद्य प्रकाशस्योदयास्तमयौ भवतः। दृष्टश्रुतागोचरत्वात्। नाप्युभयोः सप्रकाशस्य सूर्यस्य लोकान्तरगमनागमनव्यवहारेणैवोदयास्तमयत्वव्यवहार औपचारिकः। न मुख्यः। किंतु तस्य लोकान्तरे सप्रकाशस्य सत्त्वेऽपि मनुष्यादेः स्वदृष्ट्यावरणान्न स दृश्यते। तत्रत्यैरनावृतचक्षुर्भिर्दृश्यते।

एवं जीवपरमात्मनोरपि प्रकाशाश्रयवत् सर्वदा वर्तमानत्वेऽपि,

"अज्ञानेनावृतं ज्ञानं तेन मुह्यन्ति जन्तवः"।

इति प्रमाणादज्ञानावृतधर्मीणां न दर्शनं, भगवत्प्रसादेन भग्नावरणानां दिव्यदृष्टीनां शास्त्रसिद्धम्।

"न तु मां शक्यसे द्रष्टुमनेनैव स्वचक्षुषा।
दिव्यं ददामि ते चक्षुः पश्य मे योगमैश्वरम्" ॥

इति भगवद्वचनात् ॥ २८ ॥

ननु ब्रह्मस्वरूपस्यैवाचिद्रूपेणावस्थाने भेदश्रुतयो ब्रह्मणोऽपरिणामित्ववादिन्योऽपि बाधिता भवेयुरित्याशङ्कायां समाधत्ते ॥

॥ पूर्ववद्वा ॥ २९ ॥

वाशब्द आक्षेपनिरासार्थः। पूर्ववत्, यथा पूर्वं "कृत्स्नप्रसक्तिर्निरवयवशब्दव्याकोपो वे"त्यनेन ब्रह्मणो जगदुपादानत्वं न संभवतीत्याक्षेपे प्राप्ते समाहितं, "श्रुतेस्तु शब्दमूलत्वा"दिति, तथात्रापि बोध्यम्।

तथाहि, अनन्तगुणशक्तिमतो ब्रह्मणः परिणामिस्वभावाचिच्छक्तेः स्थूलावस्थायां सत्यां तदन्तरात्मत्वेन तत्रावस्थानेऽपि परिणामस्य शक्तिगतत्वात् स्वरूपे परिणामाभावात् कुण्डलदृष्टान्तो न दोषावहः। अपृथक्सिद्धत्वेनाभेदेऽपि भेदज्ञापनार्थः। उपसंहृतशक्तित्वेन प्रपञ्चस्याविभक्तनामरूपत्वात् कारणैकत्वापत्त्या "सदेव सोम्येदमग्र आसीत्," "एकमेवाद्वितीय"मित्यादिश्रुतिभिरेकत्वप्रतिपादनादहिदृष्टान्तोक्तिरपि

संभवतीति निरवद्यम्। भेदश्रुतयोऽपि कार्यकारणयोः स्वरूपस्वभावविवेचनपरा नात्यन्तभेदपराः। अनेकतादात्म्यप्रतिपादकवाक्यविरोधात्॥ २९॥

ननु दोषवदन्तःस्यत्वे कज्जलागार इव कथं दोषस्पर्शाभाव इति चेत् तत्राह॥

॥ प्रतिषेधाच्च॥ ३०॥

सर्वान्तःस्थत्वेन सर्वरूपत्वेऽपि दोषास्पृष्टस्वभावत्वेन दोषस्पर्शप्रतिषेधात्। श्रुत्येति शेषः।

"सूर्यो यथा सर्वलोकस्य चक्षु-
र्न लिप्यते चाक्षुषैर्बाह्यदोषैः।
एकस्तथा सर्वभूतान्तरात्मा
न लिप्यते लोकदुःखेन बाह्यः"॥

"वायुर्यथैको भुवनं प्रविष्टो
रूपं रूपं प्रतिरूपो बभूव।
एकस्तथा सर्वभूतान्तरात्मा
रूपं रूपं प्रतिरूपो बहिश्च॥

इत्यादिश्रुतिभिः।

केचित् "त्वहिकुण्डलवत्", "प्रकाशादिवच्चावैशेष्य" मिति तथैव भवितुमर्हति, तथाहि, अविद्याकृतत्वाद्बन्धस्य विद्यया मोक्ष उपपद्यत इति सिद्धान्तं कृत्वा यदि पुनः परमार्थत एव बद्धः कश्चिदात्माहिकुण्डलन्यायेन परस्यात्मनः संस्थानभूतः, प्रकाशाश्रयन्यायेन चैकदेशभूतोऽभ्युपगम्येत, ततः पारमार्थिकस्य बन्धस्य तिरस्कर्तुमशक्यत्वान्मोक्षशास्त्रवैयर्थ्यं प्रसज्येत, न चात्रोभावपि भेदाभेदौ श्रुतिस्तुल्यवद्व्यपदिशति। अभेदमेव हि प्रतिपाद्यत्वेन निर्दिशति, भेदं तु पूर्वमेवानुवदत्यर्थान्तरविवक्षयेति" दूषयन्ति।

तत् तुच्छम्। असंभवात्। तथाहि, यदुक्तं "प्रकाशादिवच्चावैशेष्य"मिति पूर्वमुपन्यस्त एव सिद्धान्त इति। तन्न। तदसंभवस्य तत्रैव निर्णीतत्वात्।

यच्चोक्तम्, "अविद्याकृतत्वाद्बन्धस्य विद्यया मोक्ष उपपद्यतं" इति। तत् सत्यम्। अस्माकमप्यङ्गीकारात्। अविद्याशब्दस्यानादिकर्मपरत्वात्।

"अविद्यया मृत्युं तीर्त्वा विद्ययामृतमश्नुते"।

"अविद्या कर्मसंज्ञान्या तृतीया शक्तिरिष्यते"॥

इति श्रुतिस्मृतिभ्यः। अनादिपुण्यापुण्यात्मककर्मणैव बन्धः, तस्य च "तत् सुकृतदुष्कृते विधुनुते पुण्यपापे विधूय," "क्षीयन्ते चास्य कर्माणि" इत्यादिशास्त्रात्। ध्वंसेन मोक्षस्य संभवात्।

यत् तु "पारमार्थिकस्य बन्धस्य तिरस्कर्तुमशक्यत्वान्मोक्षशास्त्रवैयर्थ्यं प्रसज्येते"त्युक्तं, तद्दुराग्रहमात्रम्।

"भूयश्चान्ते विश्वमायानिवृत्तिः",

इति श्रुतिबलादेव कर्मनिमित्तकसत्यस्यैव प्रकृतिसंबन्धतत्कार्यलिङ्गशरीरादेर्निवृत्तिसंभवाच्च कश्चिद्दोषस्पर्शावकाशः। सत्यस्य वस्तुनो निवृत्तिर्नास्तीति नियमाभावस्य पूर्वमेव विस्तरश उक्तत्वात्। लोकेऽपि सत्यस्यैव राजकारागृहे पुरुषाणामयोमयशृङ्खलकाष्ठादिबन्धस्य राजाज्ञया निवृत्तिः। सत्यस्यैव पुरुषाङ्गे लिप्तस्य चन्दनपङ्कमिष्यादेर्जलप्रक्षालनादिना निवृत्तिः। सत्यस्यैव भूषणवस्त्रगवादेर्दानेन निवृत्तिर्दृष्टचरा, सर्वजनप्रसिद्धा च। तेषां च तत्र सत्त्वदर्शनात्। बन्धस्य मिथ्यात्वाभ्युपगमे च न कश्चिद्वस्तुतो बद्धः, मोक्ष्यते वा, भवतामित्यङ्गीकृतं स्यात्।

इष्टमेवेति चेत्, तर्हि शास्त्रारम्भो व्यर्थ एव स्यात्। प्रयोजनाभावात्।

तथाहि, शुद्धस्य बन्धो नासीत्, नास्ति, न भविष्यति, यो बद्धः स तु मिथ्या। तस्य मोक्षार्थं बुद्धिमन्तो न यतन्ते, सूर्याकाशादीनां जलघटाद्युपाधिषु प्रतिबिम्बत्वेनावच्छिन्नत्वेन च सत्त्वेऽपि क्षत्यभावदर्शनात्। तन्मुक्तये तेषां प्रयत्नस्य चादर्शनात्। एवं भवन्मते ब्रह्मणोऽपि शुद्धबुद्धनित्यमुक्तस्य कल्पिताविद्यारूपोपाधौ प्रतिबिम्बितत्वेऽवच्छिन्नत्वे वा दोषास्पृष्टत्वेन क्षत्यभावात् तस्य मोक्षाय प्रयत्नस्यासंभव एव। सर्वदा स्वरूपस्फुरणात्।

न चाविद्यासंबन्धात् स्वरूपास्फुरणमिति वाच्यम्। तर्हि द्वितीयस्य तव मोचकस्य स्वप्रकाशस्याभावाच्च कदापि कथमपि तत्संबन्धो नश्यति। अविद्यालक्षणप्रमाणप्रयोजनकाद्यभावस्य पूर्वैर्विस्तृतत्वादत्रोपरम्यते।

नापि प्रतिबिम्बस्य स्वमोक्षार्थं प्रयत्नः संभवति। स्वरूपनाशप्रसङ्गात्। न हि स्वरूपनाशाय कश्चिद्यतते, अपितु स्वरूपापत्त्यायैवेति।

किंच, तस्य जडत्वेन कृत्याश्रयत्वासंभवात्। अन्यथा घटादिष्वतिप्रसङ्गात्। प्रतिबिम्बो जडः। ज्ञातृत्वकर्तृत्वादिचेतनधर्मानाश्रयत्वात्। सूर्यमनुष्यादिप्रतिबिम्बवत्।

तस्माद्बन्धस्य मिथ्यात्वे मोक्षस्यापि तत्त्वं, तस्य मिथ्यात्वे तत्साधनजातस्य वैयर्थ्ये, तथात्वे तत्प्रतिपादकशास्त्रस्य सुतरां वैयर्थ्यम्। एवं च मोक्षशास्त्रस्य सुतमां वैयर्थ्यमिति तव श्रीमुखेनैव सिद्धम्।

अपिच, सर्वज्ञा व्यासादयः शास्त्रकाराश्च, बन्धो मिथ्या, तत्सापेक्षो मोक्षोऽपि मिथ्या, न कश्चिद्बद्धो वा मुक्त इत्येव

ब्रूयुः । किमिति बहुशास्त्रविस्तरेण । अन्यथायथार्थोपदेशे तेषां वञ्चकत्वं स्यात् । तथात्वे च बौद्धमतस्वीकारः स्यात् ।

किंच, चेतनस्यास्माभिरहेः कुण्डलावस्थावदवस्थात्वं न ह्यङ्गीकृतं, येन त्वदुक्तदोषप्रसङ्गः स्यात्, अपितु प्रकाशाश्रयन्यायेन तस्य त्वाधाराधेयभाव एव स्पष्टं ज्ञायते, न त्वेकदेशत्वं जीवस्य, तथात्वे च पूर्वोक्तप्रकारेण निर्दोषत्वस्योक्तत्वात् ।

नापि "न चात्रोभावपि भेदाभेदौ श्रुतिस्तुल्यवद्व्यपदिशति, अभेदमेव हि प्रतिपाद्यत्वेन निर्दिशति, भेदं तु पूर्वसिद्धमेवानुवदत्यर्थान्तरविवक्षये"ति वक्तुं शक्यम् । प्रतियोगिप्रत्यक्षाभावाद्भेदाप्रत्यक्षत्वेन तस्यानुवादत्वायोगात् । प्रतियोगिनोर्जीवेशयोरप्रत्यक्षत्वं प्रसिद्धमेव ।

ननु जगदचेतनं न प्रत्यक्षमेवानुभूयते, तदंशे नानुवादत्वमिति चेन्न । ब्रह्मणस्तु प्रत्यक्षाभावात् । न ह्येकस्य प्रत्यक्षेण भेदप्रत्यक्षं जायते । अपितूभयप्रत्यक्षेणैव । तस्मात् प्रत्यक्षादियाह्येऽचेतने परिणामादिस्वभावे प्रकाशानन्दापरिच्छिन्नस्वरूपस्यानन्तकल्याणगुणाश्रयस्य ब्रह्मणः श्रुतिज्ञापितो भेदोऽनुभूयते। यादृशं ब्रह्म श्रुत्याभिधीयते, नेदं जगत् तादृशं दृश्यते। अतो भेदोऽस्तीति ज्ञायते ।

तस्माच्चिदचिद्ब्रह्मभेदस्य श्रुतिप्रतीतत्वमेव, नानुवादार्हत्वमिति सिद्धम् । प्रत्युताभेदवाक्यानामेव भवन्मतेऽनुवादपरत्वापातात् ।

तथाहि, भवतां सिद्धान्ते घटः सन्, पटः सन्नित्यादिप्रत्यक्षस्य सन्मात्रानुभूतिग्राहित्वेनाभिन्ननिर्विशेषसन्मात्रानुभूतेः प्रत्यक्षप्राप्तत्वादभेदवाक्यानां तदनुवादपरत्वस्य वक्तुं शक्यत्वात् । अभेदवाक्यानि न स्वार्थपराणि, प्रत्यक्षप्राप्तानुभूतिपरत्वेनानुवादपरत्वात्, अग्निर्हिमस्य भेषजमित्यादिवाक्यवदिति पूर्वमेवोक्तत्वात् ।

ननु "नान्योऽतोऽस्ति द्रष्टे"त्यादिश्रुत्या परमात्मनोऽन्यस्य चेतनस्य "नेति नेती"त्यादिवाक्यैः प्रपञ्चस्य प्रतिषेधादुक्तार्थासिद्धेरद्वैतमेव सिद्धान्त इति चेन्न । उक्तवाक्यानां त्वदुक्तार्थपरत्वाभावात् ।

तथाहि, "नान्योऽतोऽस्ति द्रष्टे"त्यस्य स्वतन्त्रद्रष्ट्रन्तरनिषेधपरत्वस्योक्तत्वात्, न सामान्यद्रष्टृनिषेधपरत्वं तस्य । अन्यथा "ततस्तु तं पश्यति निष्कलं ध्यायमान"इत्यादिद्रष्टृत्वप्रतिपादकशास्त्रव्याकोपात् । "नेति नेती"त्यादेरपि ब्रह्मण इयत्तानिषेधपरत्वेन प्रपञ्चस्वरूपनिषेधपरत्वाभावस्योक्तत्वादित्यलं विस्तरेण ।

अन्ये तु "ब्रह्मणः संस्थानविशेषा एवाचिद्वस्तुनीति सूत्रं व्याख्याय,एकस्यैव द्रव्यस्यावस्थाविशेषयोगेऽपि ब्रह्मस्वरूपस्यैवाचिद्द्रव्यस्वरूपत्वादुक्तदोषादनिर्मोक्षप्रसङ्गः । अथ प्रभातदाश्रययोरिवाचिद्ब्रह्मत्वजातियोगमात्रं विवक्षितम् । एवं तर्ह्यश्वत्वगोत्ववद्ब्रह्मापीश्वरे चिदचिद्वस्तुनोश्चानुवर्तमानं सामान्यमिति सकलश्रुतिस्मृतिव्यवहारविरोधः ।

तस्मा"दंशो नाना व्यपदेशात्", "प्रकाशादिवत् तु नैवं पर"इति, जीववत् पृथक्स्थित्यनर्हविशेषणत्वेनाचिद्वस्तुनो ब्रह्मांशत्वे, विशिष्टवस्त्वेकदेशत्वेनाभेदव्यवहारो मुख्यः । विशेषणविशेष्ययोः स्वरूपस्वभावभेदेन च भेदव्यवहारो मुख्यः । ब्रह्मणो निर्दोषत्वं च रक्षितम् ।

तदेवं "प्रकाशजातिगुणशरीराणां मणिव्यक्तिगुणात्मनः प्रत्यपृथक्सिद्धलक्षणतया यथांशत्वं, तथेह जीवस्याचिद्वस्तुनश्च ब्रह्म प्रत्यंशत्वमित्याहुः" । तत् प्रामादिकम् । एकस्यैवानन्तविचित्रशक्तिकस्य ब्रह्मणोऽवस्थाविशेषयोगे तत्तद्रूपत्वेनावस्थानेऽपि दोषाभावात् ।

तथाहि, सर्वस्य चिदचिद्वस्तुनो ब्रह्मात्मकत्वेन तदाधेयत्वेन तद्व्याप्यत्वेन तन्नियम्यत्वेन तत्तन्त्रत्वेन च तदविनाभावनियमात्। ब्रह्मणश्च वस्तुजातस्यात्मत्वादिना सर्वरूपत्वे सर्वनामत्वेऽपि च दोषास्पृष्टस्वभावत्वात्, स्वरूपे परिणामानङ्गीकाराच्च, सर्वमनवद्यम् । "ब्रह्मैवेदं, सर्वं", "सर्वं खल्विदं ब्रह्म", "ऐतदात्म्यमिदं सर्वं", स्वयमात्मानमकुरुत", "सच्च त्यच्चाभवत्",

"नामानि सर्वाणि यमाविशन्ति",

"सर्वनामा सर्वकर्मा सर्वलिङ्ग", इत्याद्याः श्रुतयः,

"अहमात्मा गुडाकेश सर्वभूताशयस्थितः ।
अमृतं चैव मृत्युश्च सदसच्चाहमर्जुन" ॥

"वासुदेवः सर्व"मिति,

"इन्द्रियाणि मनो बुद्धिः सत्त्वं तेजो बलं धृतिः ।
वासुदेवात्मकान्याहुः क्षेत्रं क्षेत्रज्ञमेव च" ॥

"सर्वं समाप्नोषि ततोऽसि सर्वः",

"कटकमुकुटकर्णिकादिभेदैः
कनकमभेदमपीष्यते यथैकम् ।
सुरपशुमनुजादिकल्पनाभि-
र्हरिरखिलाभिरुदीर्यते तथैकः" ॥

"न तदस्ति विना यत् स्यान्मया भूतं चराचरम् ।
योऽयं तवागतो देव समीपे देवतागणः" ॥

"स त्वमेव जगत्स्रष्टा यतः सर्वगतो भवान्" ।

इत्याद्याः स्मृतयश्च चिदचित्प्रपञ्चस्य ब्रह्मात्मकत्वे तदपृथक्सिद्धत्वे ब्रह्मणश्च सर्वरूपत्वे प्रमाणम् । "सत्यं ज्ञा-

नमनन्तं ब्रह्म", "य आत्मापहतपाप्मा विजरो विमृत्युर्विशोको विजिघत्सोऽपिपासः सत्यकामः सत्यसंकल्पः", "असङ्गो ह्ययं पुरुषः", "अस्थूलमनण्वह्रस्वमदीर्घमलोहितमच्छाय"मित्यादि । "अन्यत्र धर्मादन्यत्राधर्मादन्यत्रास्मात् कृताकृतात्, अन्यत्र भूताच्च भव्याच्च यत् तत् पश्यसि तद्वदे"त्याद्याः श्रुतयः, ।

"परस्तस्यानुभावोऽन्योऽव्यक्तोऽव्यक्तात् सनातनः ।
यः स सर्वेषु भूतेषु नश्यत्सु न विनश्यति ॥
यस्मात् क्षरमतीतोऽहमक्षरादपि चोत्तमः ।
अतोऽस्मि लोके वेदे च प्रथितः पुरुषोत्तमः" ॥

"स सर्वभूतप्रकृतिं विकारान्
गुणांश्च दोषांश्च मुने व्यतीतः ।
अतीतसर्वावरणोऽखिलात्मा
तेनाश्रितं यद् भुवनान्तराले" ॥

इत्याद्याः स्मृतयश्च ब्रह्मणो निर्लेपत्वे प्रमाणम् ।

तस्मादहिकुण्डलदृष्टान्तेन भेदाभेदाङ्गीकारेऽपि परिणामादिदोषस्याचिच्छक्तिगतत्वेन परब्रह्मणो निर्दोषत्वादुक्ताशङ्काया उन्मत्तप्रलापत्वं सिध्यति । अन्यथा "प्रकृतिश्चे"ति, "तदनन्यत्वमारम्भणशब्दादिभ्य"इत्यधिकरणयोरुदाहृतस्मृतिसमुदायस्य च व्याकोपात् ।

किंच, भवद्भिरपि "प्रकृतिश्च प्रतिज्ञादृष्टान्तानुपरोधा"दित्यस्य सूत्रस्य भाष्ये प्रतिज्ञादृष्टान्ताभ्यां निमित्तमात्रकारणत्वं निरस्य ब्रह्मण एवोपादानत्वे, उपादानभूतमृत्पिण्डलोहमणिनखकृन्तनविज्ञानेन घटमणिककटकमुकुटपरश्वधवास्यादितत्कार्यविज्ञानवन्निखिलजगदेककारणभूते ब्रह्मणि विज्ञाते तत्कार्यं जगद्विज्ञातमेव स्यात्, कारणमेवावस्थान्तरमापन्नं कार्यं न द्रव्यान्तरमिति कार्यकारणरूपेणावस्थितमृद्विकारादिनिदर्शनेन प्रतिज्ञासमर्थनादिति । सर्वचिदचिद्वस्तुशरीरतया सर्वदा सर्वात्मभूतं परं ब्रह्म कदाचिद्विभक्तनामरूपं, कदाचिच्चाविभक्तनामरूपम् । यदा विभक्तनामरूपं, तदा तदेव बहुत्वेन कार्यत्वेन चोच्यते । यदा चाविभक्तनामरूपं, तदेकमद्वितीयं कारणमिति च ।

एवं सर्वदा चिदचिद्वस्तुशरीरस्य परस्य ब्रह्मणो विभक्तनामरूपा यावस्था सा "गौरनाद्यन्तवती", "विकारजननीमजामेका"मित्यादिभिरभिधीयत इति च । "आत्मकृतेः परिणामा"दित्यस्य भाष्येऽविभक्तनामरूप आत्मा कर्ता, स एव विभक्तनामरूपः कार्यमिति कर्तृत्वकर्मत्वयोर्न विरोध इत्युक्तम् ।

तथा च परमात्मन एव सर्वावस्थावत्तया स्थूलादिसर्वकार्यस्वरूपत्वाङ्गीकारात् त्वत्प्रयुक्तदोषरूपवज्रं त्वदुपर्येवापतितम् ।

ननु परमात्मनश्चिदचित्संघातरूपजगदाकारपरिणामे परमात्मशरीरभूतचिदंशगताः सर्वे एवापुरुषार्थाः, तथाभूताचिदंशगताश्च सर्वे विकाराः, परमात्मनि कार्यत्वेनावस्थयोस्तयोः शरीरभूतयोर्नियन्तृतयात्मभूतः परमात्मा तदङ्गतापुरुषार्थैर्विकारैश्च न स्पृश्यत इत्युक्तत्वान्न विरोध इति चेत् । तर्ह्यागतोऽसि नो मार्गं । अस्माभिरपि दोषाणां सर्वेषां परमात्मीयशक्तिभूतयोश्चिदचितोरेवाङ्गीकारात् । स्वरूपे परिणामानङ्गीकारात् ।

"यश्चोभयोः समो दोषः परिहारोऽपि वा समः ।
नैकः पर्यनुयोक्तव्यस्तादृगर्थविचारणे" ॥

यच्चोक्तम् "अथ प्रभातदाश्रययोरिवाचिद्ब्रह्मणोर्ब्रह्मत्वजातियोगमात्रं विवक्षितम् । एवं तर्ह्यश्वत्वगोत्ववद्ब्रह्मापीश्वरे चिदचिद्वस्तुनोश्चानुवर्तमानं सामान्यमिति सकलश्रुतिस्मृतिव्यवहारविरोध"इति । तत् स्ववाग्विलासमात्रं, भ्रान्तिकल्पितं वा । एतत्सूत्रस्य तत्परत्वाभावात् । अचिद्ब्रह्मणोः प्रकाशाश्रयदृष्टान्तासंभवात् । अचेतनस्य प्रभादृष्टान्तत्वं भवतामेवानुभूतं नान्येषाम् ।

किंच, ब्रह्मत्वजातेः केनाप्यङ्गीकाराभावात् । "सदेव सौम्येदमग्र आसीत्", "एकमेवे"ति श्रुत्या ब्रह्मण एकत्वावधारणात्, एकत्वस्य च जातिबाधकत्वात् ।

यदप्युक्तम्, "तस्मादंशो नानेत्यारभ्य ब्रह्मणो निर्दोषत्वं च रक्षित"मित्यन्तम् । तदप्यसम्यक् । व्यावर्त्याभावेन चिदचितोर्विशेषणत्वस्य पूर्वमेवान्यत्रान्येष्वपि विस्तरशो निरस्तत्वात् ।

यत् पुनरुक्तम्, "विशिष्टवस्त्वेकदेशत्वेनाभेदव्यवहारो मुख्यः, विशेषणविशेष्ययोः स्वरूपस्वभावभेदेन च भेदव्यवहारोऽमुख्य" इति । तदपि दुराग्रहमात्रम् । भेदाभेदव्यवहारस्यैव मुख्यत्वेन भेदाभेदयोश्च स्वाभाविकतयाभ्युपगम्य भूयो विशिष्टत्वाङ्गीकारस्य गौरवमात्रत्वात् । लाघवाद्भेदाभेदस्यैव वक्तुं सुशकत्वाच्च ।

यच्चाप्युक्तं, "प्रकाशजातिगुणशरीराणां मणिव्यक्तिगुणात्मनः प्रत्यपृथक्सिद्धलक्षणविशेषणविशेष्यतया यथांशत्वं, तथेह जीवस्याचिद्वस्तुनश्च ब्रह्म प्रत्यंशत्व"मिति । तदप्युक्तम् । प्रकाशमण्यादिदृष्टान्ते सविशेषणविशेष्यभावे सत्यंशांशित्वव्यवहारादर्शनात् ।

न च शरीरशरीरिणोर्विशेषणविशेष्यत्वाङ्गीकारे चिदचितोरपि ब्रह्मशरीरत्वप्रतिपादनात् तद्वैशिष्ट्यं किमिति नाङ्गीक्रियत इति वाच्यम् । शरीरशरीरिभावे विशेषणविशेष्यभाव इति

नियमाभावात् । चिदचितोर्ब्रह्मशरीरत्वेऽपि विशेषणत्वासंभवात् । किंतु व्यावर्तकत्वं विशेषणत्वं, यत्र व्यावर्त्यं सत्येव शरीरशरीरिभावस्तत्रैव शरीरस्य विशेषणत्वं नान्यत्रेति नियमात् । प्रकृते तदभावाच्च विशेषणत्वमिति सिद्धम् ।

ननु शक्तिशक्तिमतोरप्यंशांशिभावाप्रसिद्धेः सिद्धान्ते कथमंशांशिभावाङ्गीकार इति चेन्न ।

"अपरेयमितस्त्वन्यां प्रकृतिं विद्धि मे पराम्" ।

इति शक्तित्वमभिधाय, पुनः,

"ममैवांशो जीवलोके जीवभूतः सनातनः" ।

इति तस्यैवांशत्वोक्तेस्तत्रापि चेतनशक्तेरेवांशत्वोक्तिर्नाचेतनस्यानभिधानादिति निश्चीयते ।

एतेन "जीववत् पृथक्स्थित्यनर्हविशेषणत्वेनाचिद्वस्तुनो ब्रह्मांशत्वमित्युक्तं" निरस्तम् ।

किंच,चिदचितोर्ब्रह्मविशेषणत्वस्य श्रुतिस्मृतिसूत्रेषु क्वाप्यश्रवणादपि सर्वथा विशेषणत्वासिद्धिरेवेति संक्षेपः ।

तस्माद्ब्रह्मणश्चेतनाचेतनयोश्चाहिकुण्डलदृष्टान्तेन प्रकाशाश्रयदृष्टान्तेन च स्वाभाविकभेदाभेद एव संबन्धः शास्त्रप्रतिपाद्य इति सिद्धम् । "एकः सन् बहुधा विचचार," "एको देवो बहुधा संनिविष्टः," "त्वमेकोऽसि बहुधा बहून् प्रविष्ट" इत्याद्याः श्रुतयः ।

"एकत्वे सति नानात्वं नानात्वे सति चैकता ।
अचिन्त्यं ब्रह्मणो रूपं कस्तद्वेदितुमर्हति" ॥

भगवान् मनुः ।

"एकत्वेन पृथक्त्वेन बहुधा विश्वतोमुखम्" ।

इति भगवद्वाक्यम् । हरिवंशे घण्टाकर्णः ।

"केचिद्बहुत्वेन वदन्ति देव-
मेकात्मना केचिदिमं पुरातनम् ।
वेदान्तसंस्थापितसत्त्वयुक्तं
द्रष्टुं तमीशं वयमुद्यताः स्मः ॥
अनेकमेकं बहुधा वदन्ति
श्रुतिस्मृतिन्यायनिविष्टचित्ताः ।
आहुर्यमात्मानमजं पुराणं
द्रष्टुं तमीशं वयमुद्यताः स्मः" ॥

इत्याद्याः स्मृतयश्च प्रमाणत्वेनानुसंधेयाः । अलं विस्तरेण ॥ ३० ॥

परमतः सेतून्मानसंबन्धभेदव्यपदेशेभ्यः ॥ ३१ ॥

"यतो वा इमानी"त्यादिना जगज्जन्मादिकारणतया निर्दिष्टात् सत्यज्ञानानन्दात्मकान्निर्धारितयाथातथ्यात् परब्रह्मणः परमप्यन्यत्तत्त्वमस्ति न वेति संशये, तावदस्तीति पूर्वपक्षयति। कुतः । "अथ य आत्मा स सेतुर्विधृति"रिति सेतुत्वश्रवणात्, सेतोश्च प्राप्यान्तरप्रापकत्वदर्शनेन ब्रह्मणोऽपि प्राप्यान्तरप्रापकतैव प्रतीयते, न तु स्वयं प्राप्यता ।

किंच, एवं "सेतुं तीर्त्वे"ति तरितव्यत्वाभिधानेनैतस्य प्राप्यत्वाभावाविष्करणात्, "उन्मानव्यपदेशाच्च", "चतुष्पाद् ब्रह्म षोडशकलं ब्रह्मे"त्युन्मितं परिच्छिन्नमुच्यते । उन्मानव्यपदेशेन च सेतुप्राप्यस्यानुन्मितस्यास्तित्वं द्योत्यते ।

किंच, "अमृतस्य परं सेतुम्", "अमृतस्यैष सेतु"रित्यमृतस्य वस्त्वन्तरस्य प्राप्यप्रापकलक्षणः संबन्धः प्रतीयते ।

किंच, "तेनेदं पूर्णं पुरुषेण सर्व"मिति प्रतिपादितपुरुषादपि "ततो यदुत्तरं तदरूपमनामय"मित्यधिकस्य निर्देशात्, परस्मादपि ब्रह्मणः परमन्यदुपदिश्यते ॥ ३१ ॥

अत एभ्यो हेतुभ्यः परस्मादपि ब्रह्मणोऽन्यत् परमभ्युपगन्तव्यमिति प्राप्त उच्यते ॥

॥ सामान्यात् तु ॥ ३२ ॥

तुशब्दः पूर्वपक्षं निरुणद्धि । न ब्रह्मणोऽन्यत् परमस्ति,सेतुव्यपदेशस्तावत्,"एषां लोकानामसंभेदाये"ति वाक्यशेषश्रुतासंकरकारित्वलक्षणधर्मसामान्यनिबन्धनः । एवं "सेतुं तीर्त्वे"त्यत्र तरतिश्च प्राप्तिवचनो, व्याकरणं तरतीतिवत्,नोल्लङ्घनवचनः ॥ ३२ ॥

यदुक्तम्, "उन्मानव्यपदेशादस्य परिमितत्वं प्रतीयते," तत्राह ॥

॥ बुद्ध्यर्थः पादवत् ॥ ३३ ॥

बुद्धिरुपासना, तदर्थ उन्मानोपदेशः, यथा "मनो ब्रह्मेत्युपासीते"त्यध्यात्मं तदेतच्चतुष्पाद् ब्रह्म, "वाक्पादः प्राणः पादश्चक्षुः पादः श्रोत्रं पाद" इत्यध्यात्ममित्यत्र ब्रह्मप्रतीकभूतमनआदौ वागादिपादत्वव्यपदेश उपासनार्थो न तु तात्त्विकः । मनसो वागादिपादत्वासंभवात् । एवमपरिच्छिन्नस्य ब्रह्मणः "प्राची दिक्कला प्रतीची दिक्कला दक्षिणा दिक्कला, उदीची दिक्कला,एष वै सोम्य चतुष्कलः पादो ब्रह्मणः प्रकाशमाना"मेत्युक्तदिगादिलक्षणचतुष्कलपादसंबन्धासंभवादुपासनार्थ एव ॥ ३३ ॥

ननु स्वयमनुन्मितस्य कथमुपासनार्थतयाप्युन्मानप्रतीतिस्तत्राह ॥

॥ स्थानविशेषात् प्रकाशादिवत् ॥ ३४ ॥

यथा प्रकाशाकाशादेरपरिच्छिन्नस्यापि वातायनाद्युपाधि-

वशेन परिच्छिन्नत्वानुसंधानम्। एवमिहाप्यभिव्यक्तस्यानभूतप्राणाद्युपाधिवशेनोन्मित्वानुसंधानमुपपद्यते ॥ ॥ ३४ ॥

यदुक्तं "ममृतस्य परं सेतु"मिति प्राप्यप्रापकसंबन्धव्यपदेशेनामृताद्विद्योऽवगम्यत इति तत्राह ॥

॥ उपपत्तेश्च ॥ ३५ ॥

"यमेवैष वृणुते तेन लभ्य" इति स्वप्राप्तेः स्वयमेव साधनतया जोजुष्यमाणे ब्रह्मणि स्वेनैव प्राप्यप्रापकत्वलक्षणसंबन्धव्यपदेशस्यापि नानुपपत्तिः ॥ ३५ ॥

यदुक्तं, "ततो यदुत्तरतर"मित्यधिकं वस्तु प्रतिपाद्यत"इति, तत्राह ॥

॥ यथान्यप्रतिषेधात् ॥ ३६ ॥

"यस्मात् परं नापरमस्ति किंचि"दिति तत्रैव तदतिरिक्तोत्कृष्टवस्तुनो निषेधेन तद्विरुद्धतया "ततो यदुत्तरतर"मिति वाक्ये तदधिकवस्तूपक्षेपासंभवात् । एतच्चैतन्मात्रव्याख्याने श्वेताश्वतरप्रकाशिकायां स्पष्टीकृतम् ॥ ३६ ॥

॥ अनेन सर्वगतत्वमायामशब्दादिभ्यः ॥ ३७ ॥

अनेन सेत्वादिव्यपदेशनिराकरणान्यप्रतिषेधरूपेणानन्तरोक्तन्यायेन ब्रह्मणः सर्वगतत्वं सर्वस्मिज्जगति व्याप्तत्वं सिद्धं भवति । तच्चास्य,"तेनेदं पूर्णं पुरुषेण सर्वं",

"यच्च किंचिज्जगत्यस्मिन् दृश्यते श्रूयतेऽपि वा ।
अन्तर्बहिश्च तत् सर्वं व्याप्य नारायणः स्थितः" ॥

"नित्यं विभुं सर्वगत"मित्याद्यायामशब्देभ्यो व्याप्तिवचनशब्देभ्यो विज्ञायते । आदिशब्देन "ब्रह्मैवेदं सर्वं", "सर्वं खल्विदं ब्रह्म", "आत्मैवेदं सर्वं" मित्यादयो गृह्यन्ते । अतो न ब्रह्मणोऽन्यत् प्राप्यमस्तीति ॥ ३७ ॥

॥ फलमत उपपत्तेः ॥ ३८ ॥

सर्वेषां जीवानां भोगापवर्गरूपं फलं किंकर्तव्यतया श्रूयमाणं कर्मैवापूर्वद्वारेण ददात्याहोस्वित् तदाराधितः परमात्मैवेति विशयेऽग्रे पूर्वपक्षं निराकरिष्यन् प्रथमं सिद्धान्तमाह । "फलमत" इति । शास्त्रीयमैहिकामुष्मिकं सर्वं फलमतः परमात्मन एव भवितुमर्हति । कुतः । उपपत्तेः । कर्मणां हि क्षणिकत्वात् कालान्तरभावि फलं दातुमसमर्थत्वात् । सर्वाध्यक्षात् सर्वज्ञात् सर्वशक्तेर्महोदारात् तत्तत्कर्मभिराराधितात् परमात्मन एवैहिकामुष्मिकभोगजातस्य स्वात्मभावापत्तिरूपमोक्षस्य चोपपन्नत्वात् ।

न चापूर्वमेव कर्मजन्यं कालान्तरे फलं दातुं समर्थमिति वाच्यम् । तस्याप्यचेतनस्य काष्ठलोष्टसमस्य चेतनाप्रवर्तितस्य प्रवृत्त्यनुपपत्तेः । स्वातन्त्र्येण फलदातृत्वे प्रमाणाभावाच्च ।

न चार्थापत्तिः प्रामाण्यमिति वाच्यम् । ईश्वरसिद्धेस्तस्याः क्षयात् ॥ ३८ ॥

श्रुतत्वाच्च ॥ ३९ ॥

इतश्च "विज्ञानमानन्दं ब्रह्म", "रातिर्दातुः परायणं", "स वा एष महानजः", "आत्माक्षादो वसुदान" इति परमात्मन्येव भोगापवर्गरूपफलप्रदातृत्वश्रवणात् ॥ ३९ ॥

पक्षान्तरमुच्यते ॥

धर्मं जैमिनिरत एव ॥ ४० ॥

जैमिनिराचार्यो धर्मं कर्मफलप्रदं मन्यते । कुतः । "अत एव", श्रुतेरुपपत्तेश्च । लोके हि कृष्यादेर्मर्दनादेश्च कर्मण एव साक्षात् परंपरया वा फलप्रदत्वदर्शनात् । तथा वेदेऽपि; "यजेत स्वर्गकामः," "आत्मानमेव लोकमुपासीते"त्यादिना बुभुत्सुमुमुक्ष्वोः कर्तव्यतया श्रूयमाणं कर्मैव तत्तत्फलसाधनरूपतयावगम्यते । क्षणिकमप्यपूर्वद्वारेण सर्वफलप्रदम्, इतरथा कर्मोपदेशो निरर्थकः स्यात् ॥ ४० ॥

पूर्वं तु बादरायणो हेतुव्यपदेशात् ॥ ४१ ॥

तुशब्दः पूर्वपक्षनिरासार्थः । पूर्वं पूर्वोक्तं परमात्मानमेव फलहेतुं भगवान् बादरायणो मन्यते । कुतः । हेतुव्यपदेशात् । ईश्वरस्यैव पुण्यापुण्यकारयितृत्वेन फलदातृत्वेन च हेतुत्वं व्यपदिश्यते । "पुण्येन पुण्यं लोकं नयति पापेन पापम्", "एष ह्येव साधु कर्म कारय"तीत्यादिना ।

न च यज्ञादिकर्मणो देवतार्चनत्वात् तदर्चिता देवा एव फलं ददतीति कथमीश्वर एव फलद इति वाच्यम् । देवादीनां स्वतन्त्रतया फलदत्वाभावात् तत्तदन्तर्यामीश्वर एव फलप्रदः । "यो वायौ तिष्ठन् योऽग्नौ तिष्ठन्,य आदित्ये तिष्ठ"न्नित्यादिश्रुतेः ।

"यो यो यां यां तनुं भक्तः श्रद्धयार्चितुमिच्छति ।
तस्य तस्याचलां श्रद्धां तामेव विदधाम्यहम् ॥
स तया श्रद्धया युक्तस्तस्याराधनमीहते ।
लभते च ततः कामान् मयैव विहितान् हितान् ॥
अहं हि सर्वयज्ञानां भोक्ता च प्रभुरेव च" ।

इत्यादिस्मरणाच्च प्रभुः फलप्रद इत्यर्थः ॥ ४१ ॥

इति श्रीसनकसंप्रदायप्रवर्तकाद्याचार्यश्रीनिम्बार्कमतानुयायिश्रीमन्मुकुन्दचरणपद्ममकरन्दभृङ्गेण श्रीमत्काश्मीरिकेशवभट्टेन संगृहीतायां वेदान्तकौस्तुभप्रभाख्यायां ब्रह्मसूत्रवृत्तौ तृतीयाध्यायद्वितीयपादविवरणम् ॥ ३ ॥ २ ॥ :: :: ॥

॥ अथ ज्ञानसिद्धान्तचन्द्रिका ॥

बर्क्लेसंज्ञकमहापण्डितविरचितज्ञानसिद्धान्तमालायाः

अवतारिता ।

तत्राष्टपञ्चाशत्तमादिपरिच्छेदाः ।

५८—अथ दशम आक्षेपः । ननु युष्मदभिमतविज्ञानवादो गणितशास्त्रसुनिर्णीतानेकतत्त्वार्थविसंवादी स्यात् । तथाहि । भूभ्रमणं तावदखिलैर्ज्योतिर्विद्भिरैकवाक्यतया सुनिश्चितप्रमाणसिद्धं स्वीक्रियते । भवन्मये तु नैतत्संभवति । भूभ्रमणस्याप्रत्यक्षीभूतत्वेन तत्सत्ताया एवानुपपत्तेः । प्रत्यक्षगोचराणामेव विषयाणां सद्भावस्य स्वीकारादिति चेद्भूभ्रमणादिमतस्वरूपे याथातथ्येन ज्ञातेऽस्मत्सिद्धान्तास्सर्वात्मना तदनुकूला एव प्रतीयेरन्निति ब्रवीमि । तथाहि । भूर्भ्रमति नवेत्यादिविषयिणी जिज्ञासा याथार्थ्येन विचारिते ज्योतिर्वित्प्रतिपादितेभ्यो हेतुभ्यो वक्ष्यमाणप्रकारेण भूभ्रमणदर्शनमनुमातुं शक्यते न वेत्यत्रैव पर्यवस्यति । तद्दर्शनप्रकारश्च तैरित्थं प्रतिपाद्यते । सूर्यपृथिव्योस्तस्मिंस्तस्मिन्नन्तराले तेषु तेषु चावस्थाविशेषेषु तेन तेन प्रकारेण च यदि कोपि तिष्ठेत्तर्हि ग्रहाणां मध्ये भुवमपि भ्रमन्तीं बहुभिर्धर्मैस्तत्सन्निभां च पश्येदिति । एवं चैतन्मतं सुनिश्चितप्रकृतिनियमानुसारिहेतुभ्योऽनुमितमिति न कथमप्यविश्वासमर्हति ॥

५९—एवम् अनुवेलम् आत्मगतेभ्यो वर्तमानकालिकप्रत्यक्षेभ्यो भूरिशो भविष्यत्प्रत्यक्षज्ञानानि न पुनस्संदिग्धोहरूपाण्यपितु तत्त्वत एवोत्तरकाले आत्मनि संस्कारविशेषापादकानि विविधव्यापारपरंपराफलीभूतान्यवश्यंभावीनि वृत्तानि वर्तमानकालिकात्मस्थितिविपर्याससंभावनायां तदनुगुणविपरीतफलान्यपिचानुमातुं शक्यन्ते । तदिदं कार्यकारणादिसंबन्धज्ञानात्मकभावि बाह्यविषयक्रमयौगपद्यादिज्ञानं प्रकृतिनियमज्ञानमेव । तच्च प्रत्यक्षात्मकसंबन्धज्ञानरूपमेव नतु प्रत्यक्षानात्मकसंबन्धज्ञानात्मकमिति सुधीभिर्विभाव्यम् । ननु प्रत्यक्षात्मकवस्तुवादे वस्तूनां वस्त्वाभासानां च तादात्म्याद् ग्रहाणाम् आभासिकपरिमाणस्य वास्तविकपरिमाणत्वापत्तिरिति चेन्नैवम् । वास्तविकपरिमाणस्यानुमानादिना स्पष्टमवगमात् । अनुमितपरिमाणस्यैव च प्रकृतिनियमसिद्धसंभावनीयप्रत्यक्षात्मकतया वास्तविकत्वमिति पूर्वमेव प्रपञ्चितम् । एवं ये ग्रहा अतिदूरत्वाद्ये च जलीयास्स्थलीयाश्च क्षुद्रतमजन्तवोऽतिसौक्ष्म्यान्न दृश्यन्ते किंतु अनुमीयन्त एव तेषामप्यनुमितप्रत्यक्षात्मकत्वं द्रष्टव्यमित्यलं पल्लवितेन ॥

६०—अथैकादश आक्षेपः । ननु सप्तपञ्चाशत्तमादिपरिच्छेदानुसारेणेश्वरेच्छामात्रादेव सकलज्ञानसंभवे कस्तर्हि महीरुहादिनानाविधावयवसंस्थित्यादिनिर्माणस्य प्राण्यवयवेषु यन्त्रेष्विव स्वच्छन्दमाकुञ्चनप्रसारणादिशक्तिदानादेश्चोपयोगः । मारुहन् महीरुहाः फलपुष्पादिकं च मोत्पादि । माच प्राणिनः सत्यामपि सुपरिकल्पितेन्द्रियसंस्थित्यां तदभावे इव कामपि चेष्टां कर्तुं शकन् । सर्वेषामेषामिन्द्रियादीनां ज्ञानरूपत्वाज्ज्ञानानां च जडात्मकतया किमपिकार्यं जनयितुमक्षमत्वात् । एवमखिलानि मनुष्यकृतिसिद्धानि शैल्पानि प्राकृतिकानि च परमोत्कृष्टकार्याणि सर्वथाऽपार्थान्येव । किंबहुना भवन्मतानुरोधेन सर्वोऽपि शिल्पी कामं कालमापकयन्त्रस्य चक्रचक्रप्रेरकायःसूत्राद्यखिलावयवान्निर्माय स्वाभिप्रेतगतिसंपादनसमर्थेन पटुतरतत्संनिवेशप्रकारेण तान् यथायथं सन्निवेश्याप्यखिलं स्वकार्यजातं निष्फलमेव प्रेक्षमाणस्तादृशचक्रादिचालनं पलहोरासूचकसूचीचोदनादिकं चेश्वरकृतमेव पश्येत् । युक्तमेवेति चेत् किमिति परमेश्वरश्चक्राद्यवयवरचनयथोचिततत्संनिवेशनादिशिल्पिव्यापारमन्तरैव घटीयन्त्रकार्यं न साधयति । शून्यमेव घटीयन्त्रपात्रमविकलघटीयन्त्रान्तरमिव कुतो नोपयुज्यते । कथं च घटीयन्त्रगतगतिवैकल्यं स्वानुगुणां तादृशयन्त्रघटकावयवसंस्थित्यव्यवस्थामनुगच्छति । तस्यां प्रतिकृतायां तु यन्त्रगतिरपि निर्दुष्टा भवति । ईदृशा एव कार्यकारणभावाः प्राकृतिक कार्येष्वप्युपलभ्यन्ते । येषां भूयिष्ठानि कार्याणि अतिमात्रं सूक्ष्माणि सन्ति यानि परमसूक्ष्मदर्शकयन्त्रैरपि लक्षयितुं न शक्यन्ते । एवं चानन्तानां लोके परमोपयोगित्वेन प्रसिद्धानां विविधविलक्षणकार्यसाधकानां यन्त्राणां प्राकृतिककार्याणां च किमपि समञ्जसमसाधारणप्रयोजनं विज्ञानवादिना त्वयाऽवश्यं वक्तव्यमिति निष्कर्षः ॥

६१— तस्योत्तरम् प्रकारद्वयेन । यद्यपि तस्याचिन्त्यशक्तेः परमेश्वरस्याचिन्त्यकृत्यानां तत्संस्थापितलौकिकवस्तूपयोगानां च विषये कतिपये विरोधाभासा भासेरन्पूर्वोक्तास्मत्सिद्धान्तैर्नापि निराक्रियेरंस्तथापीयमनुपपत्तिर्न तथागौरवमार्हेद्येन साक्षात्प्र माणसिद्धविषयाणामपि याथार्थ्यमपलप्येत ।

नहिकापि वस्तुस्थितिः साधनदौर्बल्यादुच्छिद्येत ।

इत्येकः । नहि प्राचीन सर्वसंमतसिद्धान्ता अप्युक्तदोषनिर्मुक्तास्सन्ति । यतोहि जगदीश्वरस्याखिलोपकरणान्यन्तरेणेच्छामात्रेणैवाखिलकार्योत्पादनशक्तिमत्त्वे सर्वानुमते किमितीश्वरस्तथाऽकृत्वा तानि कार्याणि विविधोपकरणादिवक्रोपायाऽऽयत्तानि करोतीत्यादि दोषास्तत्राप्याक्षेप्तुं शक्यन्त एव । प्रत्युत यन्त्राद्युपकरणान.मात्मनोऽन्यत्र स्थितिं प्रकल्प्य कार्यजनकत्वं वदतां मते एवोक्तविधा दोषास्सुनिर्भरमाक्षिप्येरन् । रूपपरिमाणगत्याकार घनत्वादिगुणानां जडतया कार्यजननासामर्थ्यस्य पूर्वं पञ्चविंशतितमपरिच्छेदे एव सुनिर्णीतत्त्वात् । एवं चाप्रत्यक्षीभूतवस्तुसत्ताकल्पनमेव निष्फलम् । तेषु स्वयमज्ञेयेषु ज्ञेयकार्यजननरूपस्य फलस्याऽऽरोपयितुमशक्यत्वात् । तादृशसामर्थ्यस्य च वस्तुत आत्ममात्रनिष्ठत्वादित्यपरः ॥

केशवशास्त्री मराठोपाव्हः

PRINTED AND PUBLISHED BY THE PROPRIETORS, E. J. LAZARUS AND CO., AT THE MEDICAL HALL PRESS BENARES.

SRI AUROBINDO LIBRARY
PONDICHERRY, INDIA

Fumigated OCT 1993

But thought nor word can seize eternal truth